॥ श्रीः ॥

श्रीहर्षरचितं

नैषधीयचरितम्।

श्रीमन्नारायणरचितया नैषधीयप्रकाशाख्यया

व्याख्यया समुल्लसितम्।

पञ्चनददेशीयविश्वविद्यालयान्तर्गतसंस्कृतश्रेण्यध्यक्षप्रधानाध्यापक-

महामहोपाध्याय—

दाधीचपण्डितशिवदत्तशर्मणा

टीकान्तरीयटिप्पण्योपस्कृत्य संशोधितम्।

(षष्ठं संस्करणम्)

पणशीकरोपाह्वविद्वद्वरलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा संस्कृतम्।

तच्च

मुम्बय्यां

पाण्डुरङ्ग जावजी

इत्येतैः स्वीये निर्णयसागराख्यमुद्रणयन्त्रालये मुद्रयित्वा प्रकाशितम्।

शाकः १८५०, सन १९२८.

मूल्यं ६ रूप्यकाः।

स श्रीहर्षकविः श्रीहीरपण्डितान्मामल्लदेव्यां समजनीति प्रतिसर्गसमाप्तिश्लोकस्य कान्यकुब्जेश्वरजयन्तचन्द्राश्रित आसीदिति "ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्" इत्येतद्ग्रन्थसमाप्तौ प्रशस्तिश्लोकतः, "पूर्वस्यां वाराणस्यां पुरि गोविन्दचन्द्रो नाम राजा ५७० अन्तःपुरीययौवनरसपरिमलग्राही। तत्सुतो [विजयचन्द्रः। तत्सुतो] जयन्तचन्द्रः। तस्मै राज्यं दत्त्वा पिता योगं प्रपद्य परलोकमसाधयत्। जयन्तचन्द्रः सप्त योजनशतमानां पृथिवीं जिगाय। मेघचन्द्रः कुमारस्तस्य। यः सिंहनादेन सिंहानपि भस्मलम्। किं पुनर्मदान्धगन्धेभघटाः। तस्य राज्ञः सैन्यं गङ्गायमुने विना नाम्भसा तृप्यतीति नदीद्वययष्टिग्रहणात् 'पङ्गुलो राजा' इति लोके श्रूयते। यस्य गोमती दासी षष्टिसहस्रेषु वाहेषु प्रक्षरां (पर्याणं?) निवेश्याभिषेणयन्ती परचक्रं त्रासयति। राज्ञः श्रम एकः। तस्य राज्ञो बहवो विद्वांसः। तत्रैको हीरनामा विप्रः। तस्य नन्दनः शासनकर्ता श्रीहर्षः। सोऽद्यापि बालावस्थः। सभायां राजकीयेनैकेन पण्डितेन वादिना हीरो राजसमक्षं जित्वा मुद्रितवदनः कृतः लप्वा(ज्जा)पङ्क मग्नो वैरं बभार।

धारालं (?) मृत्युकाले श्रीहर्षं स बभाषे—'वत्सामुकेन पण्डितेनाऽहमाहत्य राजदृष्टौ जितः। तन्मे दुःखम्। यदि सत्पुत्रोऽसि, तदा तं जयेः क्ष्मापसदसि'। श्रीहर्षेणोक्तम् ओमिति। हीरो द्यां गतः। श्रीहर्षस्तु कुटुम्बभारमाप्तदायादेष्वारोप्य विदेशं गत्वा विविधाचार्यपार्श्वेऽचिरात्तर्कालंकारगीतगणितज्यौतिषचूडामणिमन्त्रव्याकरणाद्याः सर्वा विद्याः सुस्फुराः प्रजग्राह। गङ्गातीरे सुगुरुदत्तं चिन्तामणिमन्त्रं वर्षप्रमाणं साधयामास। प्रत्यक्षा त्रिपुराऽभूत्। अमोघादेशत्वादिवराप्तिः तदादि राजगोष्ठीषु भ्रमति। अलौकिकोल्लेखशेखरितं जल्पं करोति यं कोऽपि न बुध्यते। ततोऽतिविद्ययापि लोकागोचरभूतया खिन्नः पुनर्भारतीं प्रत्यक्षीकृत्याऽभणत्—'मातः, अतिप्रज्ञापि दोषाय ते(मे) जाता। बुध्यमानवचनं मां कुरु'। देव्योक्तं—'तर्हि मध्यमरात्रेऽम्भःक्लिन्ने शिरसि दधि पिब। पश्चात्स्वपिहि। कफांशावताराज्जडतालेशमाप्नुहि'। तथैव कृतम्। बोध्यवागासीत्। खण्डनादिग्रन्थान्परश्शताञ्ग्रन्थ्य। कृतकृत्यीभूय काशीमयासीत्। नगरतटे स्थितो जयन्तचन्द्रमजिज्ञपत् 'अहमधीत्य समागतोऽस्मि'। राजापि गुणस्नेहलो हीरजेतृपण्डितेन सह सचातुर्वर्ण्यः पुरीपरिसरमसरत्। श्रीहर्षो नमस्कृतः। तेनापि यथार्हमुचितं लोकाय कृतम्। राजानं त्वेवं तुष्टाव—

'कविकुलादृष्टाध्वपान्थे महाकाव्ये' इति, एकादशसमाप्तौ—'श्रृङ्गारामृतशीतगौ' इति, त्रयोदशसमाप्तौ—'स्वादूत्पादभृति' इति, एकान्नविंशसमाप्तौ—'एकामत्यजतो नवार्थघटनाम्' इति ॥

१ कान्यकुब्जेश्वरत्वेऽपि काश्यादितीर्थाधिपतित्वमपि तदीयदानपत्रतः प्रतीयत इति न विरोधः॥ २ दर्शयिष्यमाणप्राचीनदानपत्रानुसारेण वर्धितम् ॥ ३ तथाचोक्तं दशमसर्गसमाप्तौ—'तर्केष्वसमश्रमस्य' इति ॥ ४ तथाचोक्तं स्वयमपि प्रथमसर्गसमाप्तिश्लोके—"तच्चिन्तामणिमन्त्रचिन्तनफले श्रृङ्गारभङ्ग्या महाकाव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः" इति ॥ ५ तथाचोक्तमनेनैव नैषधीयचरितस्य चतुर्थसर्गसमाप्तौ—'स्थैर्यविचारणप्रकरणभ्रातरि' इति, पञ्चमसर्गसमाप्तौ—'श्रीविजयप्रशस्तिरचनातातस्य' इति, षष्ठसर्गसमाप्तौ-'षष्ठः खण्डनखण्डतोऽपि सहजात्' इति, सप्तमसर्गसमाप्तौ—'गौडोर्वीशकुलप्रशस्तिभणितिभ्रातरि' इति, नवमसर्गसमाप्तौ—'संदृब्धार्णववर्णनस्य' इति, सप्तदशसमाप्तौ—'यातः सुसदृशि च्छिन्दप्रशस्तेः' इति, अष्टादशसमाप्तौ—'शिवश(भ)क्तिसिद्धिभगिनीसौभ्रात्रभव्ये' इति, द्वाविंशसमाप्तौ—'नव(नृप-साहसाङ्कचरिते चम्पूकृतौ' इति ॥

'गोविन्दनन्दनतया च वपुःश्रिया च मास्मिन्नृपे कुरुत कामधियं तरुण्यः ।
[१]अस्त्रीकरोति जगतां विजये स्मरः स्त्रीरस्त्री जनः पुनरनेन विधीयते स्त्री ॥'

व्याचख्यौ च तारस्वरं सरसविस्तरम् । तुष्टा सभा राजा च । पितृवैरिणं तु वादिनं सकटाक्षमाचचक्षे—

'साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले
तर्के वा मयि संविधातरि समं लीलायते भारती ।
शय्या वास्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता
भूमिर्वा हृदयंगमो यदि पतिस्तुल्या रतिर्योषिताम् ॥'

एतच्छ्रुत्वा स वादी प्राह—'देव ! वादीन्द्र ! भारतीसिद्ध, तव समः कोऽपि न पुनराविकः

'हिंस्राः सन्ति सहस्रशोऽपि विपिने शौण्डीर्यवीर्योद्यता-
स्तस्यैकस्य पुनः स्तुवीमहि महः सिंहस्य विश्वोत्तरम् ।
केलिः कोलकुलैर्मदो मदकलैः कोलाहलं नाहलैः
संहर्षो महिषैश्च यस्य मुमुचे साहंकृते हुंकृते ॥

इदं श्रुत्वा श्रीहर्षो निष्क्रोध इवासीत् । भूपेनोक्तं—अत्र श्रीहर्ष इदमेव वक्तुमर्हं [२]... दिनाम् । कोऽर्थः । सम्यगवसरमज्ञासीः श्रीहीरवैरिन्नित्यर्थः ॥ अन्योन्यं गाढालिङ्गनम... रत् । द्वयोपि (?) वसुधासुधांशुर्विस्तरेण (?) सौधमानीय माङ्गलिकानि कारयित्वा गृहं प्रहितः । लक्षसंख्यानि हेमानि ददिरे । निश्चिन्तीकृत्यैकदा नृपेणोक्तः कवीशः—'वादी... किंचित्प्रबन्धरत्नं कुरु' । ततो नैषधं महाकाव्यं बद्धं दिव्यरसं महागूढव्यङ्ग्यभारसारं ... दर्शितम् । राज्ञोचे—'सुष्ठुतममिदं । केवलं काश्मीरान् व्रज, तत्रत्यपण्डितेभ्यो दर्शय, ... तीहस्ते च मुञ्च, भारती च तत्र पीठे स्वयं साक्षाद्वसति, असत्यं प्रबन्धं हस्ते न्यस्तमव... निकरमिव दूरे क्षिपति, सत्यं तु मूर्धधूननपूर्वं सुष्टुत्यूरीकरोति । उपरितः पुष्पाणि पतन्ति... श्रीहर्षो राजदत्तार्थनिष्पन्नविपुलसामग्रीकः काश्मीरानगमत्, तत्रत्यपण्डितेभ्योऽदर्शय... स्वकीयं सरस्वतीहस्ते पुस्तकं न्यास्थत् । सरस्वत्या दूरे क्षिप्तं तत् । श्रीहर्षेणोक्तं—'किं... वीति विकलासि यन्मदुक्तमपि प्रबन्धमितरप्रबन्धमिवावमन्यसे' । भारत्याह—'भोः पु... मानक, न स्मरसि—यदत्रोक्तं त्वयैकादशे सर्गे चतुःषष्टितमे काव्ये—

'देवी पवित्रितचतुर्भुजवामभागा वागालपत्पुनरिमां गरिमाभिरामाम् ।
एतस्य निष्कृपकृपाणसनाथपाणेः पाणिग्रहादनुगृहाण गणं गुणानाम् ॥'

एवं मां विष्णुपत्नीत्वेन प्रकाश्य लोके स्फुटं कन्यात्वं लुप्तवानसि । ततो मया पुस्तकं क्षि...

'या (पा)चको याचको व्याधिः पयत्वं मर्मभेदकः ।
योगिनामप्यमी यद्द प्रायेणोद्वेगकारकाः ॥' इति. ।

वाग्देवीवाक्यं श्रुत्वा श्रीहर्षो वदति—'किमर्थमेकस्मिन्नवतारे नारायणं पतिं चतुर्भु...

---

१ व्यतिरेकहेतुः—स्मरः कामः स्त्रीं नरीकरोति । अनेन [illegible] [illegible] [illegible] मायोक्तिमेवे ॥ २ [illegible] "[illegible]"—(४२) "[illegible]"—(४३) [illegible] पिहितौ स्तः । [illegible] 'चतुर्दशिके' इति [illegible] ॥

पुराणेष्वपि विष्णुपत्नीति पठ्यसे, ततः सत्ये किमिति कुप्यसि । कुपितैः किं छुब्यते कल-ङ्काद्' इति । स्वयं गृहीत्वा पुस्तकं हस्ते धारितम् । ग्रन्थश्च श्लाघितः सभासमक्षम् । श्रीहर्षेण पण्डिता उक्तास्तत्रत्याः–'ग्रन्थमत्रत्याय राज्ञे **माधवदेव**नाम्ने दर्शयत, श्रीजयन्तचन्द्राय च 'शुद्धोऽयं ग्रन्थः' इति लेखं प्रदत्त' इति । भारत्यभिमते ज्ञातेऽपि ते न लेखं ददते, न भूपं दर्शयन्ति । स्थितः श्रीहर्षो बहून्मासान् । जग्धं पाथेयम् । विक्रीतं वृषभादि । मितीभूतः परिच्छदः । एकदा नद्यासन्नदेशे कूपतटासन्नदेशे देवकुले रुद्रजपं रहः करोति । तत्रागते कयोश्चिद्द्रुहिणोरुल्लुण्ठे (?) चेट्यौ जलप्रथमपश्चाद्ग्रहणघटभरणविषये वादे लग्ने तयोश्चिरमुक्तिप्रत्युक्तिरभूत् । शीर्षाणि स्फुटितानि घातप्रतिघातैः । गते राजकुलम् । राजा साक्षिणं गवेषयति ।

उक्ते ते—अत्र कलहे कोऽपि साक्षी विद्यते न वा ? । ताभ्यां जगदे—'विप्रस्तत्रैक आस्ते जपतत्परः' । गता राजकीयाः । आनीतः श्रीहर्षः । पृष्टस्तयोर्न्यायानयौ । श्रीहर्षेण गीर्वाणवाण्योक्तं–'देव, वैदेशिकोऽहं न वेद्मि, किमप्येते प्राकृतवादिन्यौ ब्रूतः । केवलं ताञ्छब्दान् वेद्मि' । राज्ञोक्तम्–(तर्हि तानेव वद) । तत्क्रमस्थमेव तद्भाषितप्रतिभाषितशतमभिहितमनेन । राजा चमत्कृतः । अहो प्रज्ञा । अहो अवधारणा । दास्योर्वादं निर्णीय यथासंभवं निग्रहानुग्रहौ कृत्वा प्रहित्य श्रीहर्षमपृच्छद्राजा–'कस्त्वमेधि शिरोमणिः' । श्रीहर्षेणोक्तं सर्वं कथानकम् । राजन्पण्डितकृतदौर्जन्यात्तव पुरे दुःखी तिष्ठामि । सम्यक् पारम्पर्याज्ञा (?) । राजा पण्डितानाहूय अवादीत्–'धिङ् मूढाः, ईदृशे रत्ने न लिख्यथ ।'

> वरं प्रज्वलिते वह्नावह्नायानेहितं (?) वपुः ।
> न पुनर्गुणसंपन्ने कृतः स्वल्पोऽपि मत्सरः ॥
> वरं सा निर्गुणावस्था यस्यां कोऽपि न मत्सरी ।
> गुणयोगे तु वैमुख्यं प्रायः सुमनसामपि ॥

तस्मात् खला यूयं गच्छत । एवं (नं) महात्मानं प्रत्येकं स्वगृहेषु सत्कुरुत' तदा श्रीहर्षोऽपि प्राग्वत्—

> 'यथा यूनस्तद्वत्परमरमणीयापि रमणी
> कुमाराणामन्तःकरणहरणं नैव कुरुते ।
> मदुक्तिश्चेतश्चेन्मदयति सुधीभूय सुधियः
> किमस्या नाम स्यादरसपुरुषाराधनरसैः ॥'

इति । लब्धचि(शि)रे पण्डिताः सर्वे गृहं नीत्वा सत्कृत्यानुनीय राज्ञा च सत्कार्य तैः [illegible] श्रीहर्षः [illegible] । मिलितो जयन्तचन्द्राय । उक्तं सर्वम् । तुष्टः सः । प्रख्यातं नैषधं लोके ॥

अथान्तरे **जयन्तचन्द्रस्य पद्माकरनामा** प्रधानचरः **श्रीअणहिल्लपुरं** गतः । तत्र [illegible] रत्नक[illegible](श्र)[illegible]वाटिकायां नर्तुकायां (?) केतक्यामिव मधुकरकुलं निलीय-[illegible] दृष्ट्वा [illegible]–एषा सुवर्णेयं शाटी तां मे दर्शय । तस्य हि मन्त्रि-[illegible] मनः । रत्नकेन सार्थं तस्मै तद्गृहं नीत्वा तामर्पयित्वा तत्स्वामिनी

१ [illegible]–"[illegible] चतुर्दशतयीं विद्यां विदद्भिर्महाकाव्ये" इति ॥

सूहवदेविनाम्नी शालापतिपत्नी विधवा यौवनस्था सुरूपा दर्शिता। तां श्रीकुमारपाल-पार्श्वादुपरोध्य तद्गृहानीत्वा सोमनाथयात्रां कृत्वा काशीं गतस्तां पद्मिनीं जयन्तचन्द्र-भोगिनीमकरोत्। सूहवदेवीरिति ख्यातिमगात्। सा च सगर्वा विदुषीति कृत्वा कलाभारतीति पठ्यते लोके। श्रीहर्षोऽपि नरभारतीति पठ्यते। तस्य तत्र सहते सा मत्सरिणी। एकदा सत्कारमाकारितः श्रीहर्षो भणितश्च 'त्वं कः'। श्रीहर्षः—'कलासर्वज्ञोऽहम्'। राज्ञ्याभाणि—'तर्हि उपानहौ परिधापय'' को भावः—यद्ययं 'न वेद्मि' इति भणति द्विजत्वात्, तर्हि भग्नः। श्रीहर्षेणाङ्गीकृतम्। गतो निलयम्। तत्सत्कैर्यथातथा परिकर्मितैः सायं लोलाक्षः सन् दूरस्थः स्वामिनीमाजूहवत्, चर्मकारविधिनोपानहौ पर्यधीधपत् 'सम्युक्षणं विनिक्षिपध्वं, चर्मकारोऽहम्' इति वदन्। राजानमपि तां कुचेष्टां ज्ञापयित्वा खिन्नो गङ्गातीरे संन्यासमग्रहीत्।

सा च सूहवदेविः साम्राज्येच्छा पुत्रमजनयत्। सोऽपि यौवनमाससाद। धीरः परं दुर्नयनदः।

तस्य च राज्ञो विद्याधरो मन्त्री स च चिन्तामणिविनायकप्रसादात्सर्वधातुहेमत्वकरण-प्रख्यातमाहात्म्यसर्षपाषाणलाभात् ८८०० विप्राणां भोजनदातेति लघुयुधिष्ठिरतया ख्यातः कृताभीप्सकः। राजा तं जगाद—'राज्यं कस्मै कुमाराय ददामि'। मन्त्र्याह—'मेघचन्द्राय कुलीनाय देहि। न पुनर्धूतापुत्राय'। राजा तु तदा कामिनीतत्सुत्रायैव दित्सते। एवं विरोध उत्पन्नो मन्त्रिराज्ञोः। कथं कथंचिन्मन्त्रिणा राज्ञीदाक्षिण्यप्रमाणीकार्यं भूपो मेघचन्द्रराज्यदानमङ्गीकारितः। राज्ञी क्रुद्धा धनाद्यैस्तदा स्वच्छन्दतया निजप्रधाननरान् प्रेष्य तक्षशिलाधिपतिः सुरत्राणः कान्यकुब्जाय प्रयाणे प्रयाणे सपादलक्षहेमदानोक(घ) न चलितः, आयाति। (तत्तु) विद्याधरेण चरद्वारा विदितं राज्ञे कथितम्। राजा तत्कर्णनहसन्नुदः प्राह—'ममेयं पट्टमहिषी नैवं पतिद्रोहं समाचरति'। मन्त्री तु वदति 'राजन्! सम्मुखमायाति विशति सुरत्राणः'। राज्ञा हक्कितो गतो गृहम्। चिन्तितं च तेन—'नृपस्तावन्मूढः, राज्ञी बलवती लब्धप्रसराऽविवेकिनी, मम मरणं यदि स्वामिरणादर्वागेव तदा धन्यता। प्रतिस्खलितो मन्त्री स्वसदनात्तावत् गच्छन्तं पिण्याकं दृष्ट्वा तमाक्रिमात्मेयन्, पुनः पुरोगतः स्फुटितपनसपिटकमालोक्य तदनेन मनोऽदधात्। तेन कुचेष्टारूपेणात्मनो विधिवैपरीत्यं निर्णीयोपरागे व्यजिज्ञपत्—'देव, अहं गङ्गाजले मङ्क्त्वा म्रिये परासरामि'। राजाऽवदत्—'यदि म्रियते, तदा सुखं जीवामः। कर्णज्वरो निवर्तते'। मन्त्री पुनः—हुं हितवचनमाकर्ण-नम्, अनये कृतिः, म्रियेष्वपि दोषः, विद्युरजनेन्द्रत्वम्, तयोः किल पूर्वेऽस्मानि। कल्पतं राज्ञो मरणम्। राजानमापृच्छ्य गृहं गत्वा सर्वस्वं द्विजानुद्दिश्य प्रदाय स्वमानिरक्तो गङ्गा-तीरहस्त्यं प्रविश्य कुसुमो (पुरो) हितमाह—'स्नानं स्नान। नियमयति वरः प्रमाणितः। ततः सर्वपापमलः। तेन तु 'पिबे दानं पत्न्याः दत्ते' इति कुवेनान्तरदण्डं पिबेव सोऽमृतं गङ्गादेव्या ददे। मन्त्री जले मङ्क्त्वा मृतः। राजाऽनाथो जातः। सुरत्राण आगतः। नगरे भग्नं भाग्येन स्फुटितम्। तदा पुत्रपाणिपुत्रमुक्तः। ८४००(?) निजनं कृत्वं राजा न शक्नोति। हठपूर्व्य तत्स्थानम्। दैवेनैव—सेनामध्ये नेतृ नामानि स्थानम्-

राणि । राजा हृदयेऽहारयत् । ततो न ज्ञायते किं हतो मृतो वा । गगनैलीता पृः इति राजशेखरसूरिणा १३४८ खिस्ताब्दे विरचिते प्रबन्धकोषे श्रीहर्षविद्याधरजयन्तचन्द्रप्रबन्धात्, 'गौडदेशीयः' इति 'श्रीहर्षवंशे हरिहरो गौडदेश्यः' इत्येतदुत्तरहरिहरप्रबन्धतोऽवगम्यते ॥

जयचन्द्रराज्यसमयस्तु—

अकुण्ठोत्कण्ठवैकुण्ठकण्ठपीठलुठत्करः ।
संरम्भः सुरतारम्भे स श्रियः श्रेयसेऽस्तु वः ॥ १ ॥

आसीदशीतद्युतिवंशजातक्ष्मापालमालासु दिवं गतासु ।
साक्षाद्विवस्वानिव भूरिधाम्ना नाम्ना यशोविग्रह इत्युदारः ॥ २ ॥

तत्सुतोऽभून्महीचन्द्रश्चन्द्रधामनिभं निजम् ।
येनापारमकूपारपारे व्यापारितं यशः ॥ ३ ॥

तस्याभूत्तनयो नयैकरसिकः क्रान्तद्विपन्मण्डलो
विध्वस्तोद्धतवीरयोधतिमिरः श्रीचन्द्रदेवो नृपः ।
येनोदारतरप्रभावशमिताशेषप्रजोपद्रवं
श्रीमद्गाधिपुराधिराज्यमसमं दोर्विक्रमेणार्जितम् ॥ ४ ॥

तीर्थानि काशिकुशिकोत्तरकोशलेन्द्रस्थानीयकानि परिपालयताऽधिगम
हेमात्मतुल्यमनिशं ददता द्विजेभ्यो येनाङ्किता वसुमती शतशस्तुला
तस्यात्मजो मदनपाल इति क्षितीन्द्रचूडामणिर्विजयते निजगोत्रच
यस्याभिषेककलशोल्लसितैः पयोभिः प्रक्षालितं कलिरजःपटलं धरित्र्य

यस्यासीद्विजयप्रयाणसमये तुङ्गाचलोच्चैश्चल-
न्माद्यत्कुम्भिपदक्रमासमभरभ्रश्यन्महीमण्डले ।
चूडारत्नविभिन्नतालुगलितस्त्यानासृगुद्भासितः
शेषः शेषवशां (?) दिव क्षणमसौ क्रोडे निलीनाननः ॥ ७

तस्मादजायत निजायतबाहुवल्लिबन्धावरुद्धनवराज्यगजो नरेन्द्रः ।
सान्द्रामृतद्रवमुचां प्रभवो गवां यो गोविन्दचन्द्र इति चन्द्र इवाम्बु

न कथमप्यलभन्त रणक्षमांस्तिसृषु दिक्षु गजानथ वज्रिणः ।
ककुभि बभ्रमुरभ्रमुवल्लभप्रतिभटा इव यस्य घटागजाः ॥ ९ ॥

अजनि विजयचन्द्रो नाम तस्मान्नरेन्द्रः सुरपतिरिव भूभृत्पक्षविच्छेद
भुवनदलनहेलाहर्म्यहम्मीरनारीनयनजलदधाराधौतभूलोकतापः ॥ १०

लोकत्रयाक्रमणकेलिविशृङ्खलानि प्रख्यातकीर्तिकविवर्णितवैभवानि ।
यस्य त्रिविक्रमपदक्रमभाञ्जि भान्ति प्रोद्योतयन्ति बलिराजभयं यशांसि

१ अतएव स्वामिनस्तस्वामिवर्णनं कृतवान् । तथा चोक्तवान् स्वयमेव सप्तमसर्गसमाप्तिश्लोके 'वीरसकुलप्रशस्तिभणितिभ्रातरि' इति प्रकृतनैषधीयचरितमहाकाव्यविशेषणम् ॥ २ 'अथो कन्यन्येभ्यः कुब्जनिलपि । महोदयं गाधिपुरम्' इति केशवः ॥ ३ 'काशी वाराणसी काशिवरणासी ॥' इति केशवः ॥ ४ अयं च हम्मीरः, कुत्रत्य इति न निश्चयः ॥

यस्मिंश्चलत्युदधिनेमिमहीजयार्थं माद्यत्करीन्द्रगुरुभारनिपीडितेव ।
याति प्रजापतिपदं शरणार्थिनी भूस्त्वङ्गत्तुरङ्गनिवहोत्थरजश्छलेन ॥ १२ ॥

तस्मादद्भुतविक्रमादथ जयच्चन्द्राभिधानः पति-
र्भूपानामवतीर्ण एष भुवनोद्धाराय नारायणः ।
द्वैधीभावमपास्य विग्रहरुचिं धिक्कृत्य शान्ताशया
सेवन्ते यमुदग्रबन्धनभयध्वंसार्थिनः पार्थिवाः ॥ १३ ॥

गच्छेन्मूर्च्छामतुच्छां न यदि कवलयेत्कूर्मपृष्ठाभिघात-
प्रत्यावृत्तः श्रमार्तो नमदखिलफणश्वासवात्यासहस्रम् ।
उद्योगे यस्य धावद्धरणिधरधुनीनिर्झरस्फारधार-
श्च्यद्दानद्विपालीबहलभरगलद्धैर्यमुद्रः फणीन्द्रः ॥ १४ ॥

सोऽयं समस्तराजचक्रसंसेवितचरणः परमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरनिजभुजोपार्जितकान्यकुब्जाधिपत्यश्रीचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वरश्रीमदनपालदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीगोविन्दचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीविजयचन्द्रदेवपादानुध्यातपरमभट्टारकमहाराजाधिराजपरमेश्वरपरममाहेश्वराश्वपतिगजपतिनरपतिराजत्रयाधिपतिविविधविद्याविचारवाचस्पतिश्रीमज्जयचन्द्रो विजयी अमुरैसपत्तलायां केमौलीग्रामनिवासिनो निखिलजनपदानुपगतानपि च राजराज्ञीयुवराजमन्त्रिपुरोहितप्रतीहारसेनापतिभाण्डागारिकाक्षपटलिकभिषग्नैमित्तिकान्तःपुरिकदूतकरितुरगपत्तनाकरस्थानगोकुलाधिकारिपुरुषानाज्ञापयति बोधयत्यादिशति च—विदितमस्तु भवतां—यथोपरिलिखितग्रामः सजलस्थलः सलोहलवणाकरः । समत्स्याकरः सगर्तोषरः समधूकाम्रवनवाटिकाविटपतृणयूतिगोचरपर्यन्तः सोर्ध्वाधश्चतुराघाटविशुद्धः स्वसीमापर्यन्तस्त्रिचत्वारिंशदधिकद्वादशशतसंवत्सरे आषाढे मासि शुक्लपक्षे सप्तम्यां तिथौ रविदिने । अङ्कतोऽपि संवत् १२४३ आषाढसुदि रवौ ७ । अद्येह श्रीमद्वाराणस्यां गङ्गायां स्नात्वा विधिवन्मन्त्रदेवमुनिमनुजभूतपितृगणांस्तर्पयित्वा तिमिरपटलपाटनपटुमहसमुष्णरोचिषमुपस्थायौषधिपतिशकलशेखरं समभ्यर्च्य त्रिभुवनत्रातुर्भगवतो वासुदेवस्य पूजां विधाय प्रचुरपायसेन हविषा हविर्भुजं हुत्वा मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धयेऽस्माभिः [illegible] भारद्वाजगोत्राय भारद्वाजाङ्गिरसबार्हस्पत्येति त्रिप्रवराय राउतश्री[illegible] राउतश्रीहिंसपुत्राय टोडराउतश्री [illegible] चन्द्रार्कं यावच्छासनीकृत्य प्रदत्तो मत्वा यथादीयमानभागभोगकरप्रवणिकरप्रभृतिनियतानियतसमस्तादायानाज्ञाविधेयीभूय दास्यथ इति ।

भवन्ति चात्र श्लोकाः—

भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति ।
उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ ॥
शङ्खं भद्रासनं छत्रं वराश्वा वरवारणाः ।
भूमिदानस्य चिह्नानि फलमेतत्पुरंदर ॥

षष्टिं वर्षसहस्राणि स्वर्गे वसति भूमिदः ।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥
स्वदत्तां परदत्तां वा यो हरेत वसुंधराम् ।
स विष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जति ॥
तडागानां सहस्रेण वाजपेयशतेन च ।
गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ॥
वारिहीनेष्वरण्येषु शुष्ककोटरवासिनः ।
कृष्णसर्पाश्च जायन्ते देवब्रह्मस्वहारिणः ॥
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥

वाताभ्रविभ्रममिदं वसुधाधिपत्यमापातमात्रमधुरा विषयोपभोगाः ।
प्राणास्तृणाग्रजलविन्दुसमा नराणां धर्मः सखा परमहो परलोकयाने ॥
यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ।
निर्माल्यवान्तप्रतिमानि तानि को नाम साधुः पुनराददीत ॥

(इण्डियन् आण्टिक्केरी १५११-१२)

इति प्राचीनलेखमालायां २३ लेखे संवत् १२४३ (A. D. 1187) स्फुट एव लिखितः । २२ लेखे जयच्चन्द्रयौवराज्यदानपत्रे संवत् १२२५ (A. D. 1169) लिखितः ॥

इत्थं च जयन्तचन्द्रस्य द्वादशख्रिष्टशतके स्थितिनिश्चयान्नैषधीयचरितकर्तुः श्रीहर्षस्यापि तदैव स्थितिर्निश्चिता । अत एव **जयन्तचन्द्र**पितृ**विजयचन्द्र**वर्णनात्मकमेव '**विजयप्रशस्तिरचनाततस्य**' इति पञ्चमसर्गसमाप्तिश्लोके स्वकीयविशेषणध्वनित**विजयप्रशस्ति**नामकं काव्यं भवेत् ॥

अस्मिंश्च विषये बहूनां विसंवादं प्रदर्श्य तत्खण्डनपूर्विका डाक्टर **बूलर**संमतिरपि । तथाहि तदीयं Royal Asiatic Society, Bombay Branch इतिनामभूषितविद्वत्सभया १८७५ ख्रिस्ताब्दे प्रकाशिते प्रबोधग्रन्थे (pp. 271-387) मुद्रितं व्याख्यानम्—

इतः प्राग् वर्षद्वयं व्यत्यगाययदाहम् एशियाटिकसभासदां पुरस्तान्नैषधीयनिर्मातृश्रीहर्षसमयविवेचसंदर्भमेकमपाठिषम् । तत्र च राजशेखरकृतं प्रकृतप्रबन्धकोपात् "श्रीहर्षः ख्रिष्टद्वादशशताब्द्यन्तिमभागे बभूव" इति साधयितुं प्रायतिषि । निरमासिषं च तद्विषयकमेकं संदर्भम् ।

१–अत्र चोपदर्शितप्राचीनलेखो द्रष्टव्यः ॥ २ तच्च इण्डियन आण्टिक्केरीप्रथमपुस्तके ३० पृष्ठे विलोकनीयम् ॥

ततःप्रभृति बहवो जना विशेषश्चेण्डियनआण्टिक्केरी(Indian Antiquary) नामकपुस्तके तत्र मदीयनैषधीयसमयविविक्तिपुस्तके स्खलना बहून् दोषानुदजीघटन्। परंतु संप्रत्यहमस्मिन् संदर्भे तदुद्घाटितदोषाभासान् वक्ष्यमाणस्वयुक्तिभिरपनेतुं स्वसंमतं च द्रढयितुमाशासे।

अथ युक्तयः—

स्वनिर्मिते प्रथमे संदर्भे नैषधीयसमयनिश्चायकानि वक्ष्यमाणप्रमाणान्यदीदृशम्॥

(१) श्रीहर्षो वाराणस्यधिपतिजयन्तचन्द्रसभायाः सभ्योऽभूदिति राजशेखरः॥

(२) अयं जयन्तचन्द्रो जयचन्द्र एव। यः किल राठौरवंशीयानां कान्यकुब्जाधिपानामन्तिमो वाराणस्यधिपतिर्बभूव; यं च खिष्टस्य पञ्चनवत्युत्तरैकादशशताब्द्यां ११९५ यवना राज्यात् प्रसह्य प्राभ्रंशयांचक्रुः॥

(३) श्रीहर्षोऽप्यकथयत् 'कान्यकुब्जाधिपतिनाहं सत्कृतोऽभूवम्' इति॥

(४) राजशेखरोऽपि स्वग्रन्थैकखण्डे प्रसङ्गतोऽवर्णयत्—नैषधीयस्य प्रथमं पुस्तकं हरिहरो गुजरातेतिख्यातदेशं वीरधवलनामनि राजनि वसुमतीं शासत्यानयत्।

तत्पुस्तकाच्च वीरधवलप्रधानामात्यो वास्तुपालो नामाऽन्यदेकं पुस्तकमवतारयामास' इति॥

किंच स्वनिर्मिते प्रथमे संदर्भे 'राजशेखरस्य सर्वं तु प्रमाणजातं विश्वासानर्हम्' इत्यप्यहं स्वीकृतवान्॥

डाक्टर फिट्ज़एडवर्ड हाल (Fitz Edward Hall) पण्डितेन "धाराधिपतिभोजराजकृतसरस्वतीकण्ठाभरणे धृता बहवो नैषधीयश्लोका दृश्यन्ते" इत्यभाणि।

अहं च 'भोजराजः खिष्टैकादशशताब्द्याः पूर्वार्धेऽभूत्'इत्यपि स्वसंदर्भेऽलेखिषम्।

किंच यन्महाशयडाक्टरहालपण्डितेनोक्तम्, तदपि स्वसत्तायां प्रमाणमपेक्षते। यतः 'सरस्वतीकण्ठाभरणे नैषधीयश्लोकाः कदाचित्केनचिदन्येन ग्रन्थकर्तुः पश्चात्प्रक्षिप्यन्ते स्म,—इति संदेह एव' इत्यपि तत्रादर्शयम्॥

मदीयसंदर्भसंमतमुद्दिश्य वक्ष्यमाणा आक्षेपा जनैः प्रादर्शिषत। ते च यथा—

श्रीमान् काशीनाथत्र्यम्बकतुलङ्गः कुसुमाञ्जलिकर्तुरुदयनाचार्यस्य समयं निरूपयन् प्रसङ्गतः श्रीहर्षस्यापि समयविवेकमन्ववभात्। तत्रादर्शयत्—"श्रीहर्षः खिष्टस्य नवम्यां दशम्यां वा शताब्द्यां बभूव, न तु द्वादश्याम्" इति॥ अत्र विषये चेमानि प्रमाणान्यदीदृशत्।

(१) नैषधीयकाव्यस्य श्लोकाः सरस्वतीकण्ठाभरण उदाहृता दृश्यन्त इति।

(२) खिष्टैकादशशताब्दीसंभूतवाचस्पतिमिश्रेण श्रीहर्षप्रणीतखण्डनखण्डखाद्यस्य खण्डनं कृतम्।

(३) सायणमाधवः स्वप्रणीतशंकरविजयनामग्रन्थे श्रीहर्षं शंकराचार्यसमकालीनमकथयत्॥ इति।

---

१ तथाचोक्तम्-'ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात्' इति॥ २ इण्डियन् आण्टिक्केरी (Ind. Ant.) प्रथमपुस्तके २९७ पृष्ठे, ३५३ पृष्ठे, द्वितीयपुस्तके ७१ पृष्ठे च विलोकनीयम्।

महाशयकाशीनाथतेलङ्गश्चान्त इत्यप्यकथयत्—'राजशेखरस्य कथनं विश्वासानर्हम् । तस्य बहुषु स्थानेषु स्फुटदोषप्रस्खलात्' इति ॥

किंच महाशयतेलङ्गप्रदर्शितदोषेभ्योऽतिरिक्तं दोषं महाशयो ग्रौस (F. S. Growse) पण्डितोऽपि चन्दकविप्रणीत 'पृथिवीराजरासौ' नामकग्रन्थे केनचिल्लिखेन प्रादर्शयत् "चन्दोनाम कविः खिष्टद्वादशशताब्द्यन्तिमभागेऽभूत्; तद्यदि राजशेखरस्य वचनं तथ्यं स्यात्तर्हि चन्दः श्रीहर्षस्य समयकालीनतया बाढं परिचितः स्यात् । प्रत्युत चन्दः स्वपूर्वजानां वर्णने नलचरितप्रणेतारं श्रीहर्षं कालिदासात् पूर्वं व्यवस्थापयत्" इति ॥

इण्डियन् आण्टिक्वेरी (Ind. Ant.) नामपुस्तके बाबूरामदाससेनेन[1] पूर्णय्येन[3] च राजशेखरानुकूलं मम मतमनुमोद्य दृढीकृतम् । महाशयग्रौसस्य च मन्मतप्रतिकूलदोषा युक्तिभिरुपशमिताः । अतोऽहं ताभ्यामनुगृहितोऽस्मि । परंतु हन्त तयोरपि युक्तयो न मे संमतं यथावद्दृढयितुं शक्नुवन्ति ॥

अथ मम प्रतिकूलाः सर्वे आक्षेपाः समाधीयन्ते ।

(१) तत्र प्रथमं यदुक्तं "नैषधीयकाव्यस्य सरस्वतीकण्ठाभरणे श्लोका दृश्यन्ते" इति, तस्य समाधानम्—

अयमाक्षेपस्तु डाक्टर हालसाहिबेनादौ प्रदर्शितः । परंतु मया सम्यगन्विष्य व्यवेचि "सरस्वतीकण्ठाभरणे नैकोऽपि नैषधीयचरितश्लोको दृश्यते" इति ।

गतवर्षे च मया सरस्वतीकण्ठाभरणस्यैकं पुस्तकं रत्नदर्पणनामिका तत्प्रथमपरिच्छेदत्रय-टीका च वाराणसीतः समानायिते । अस्मिन्नेवान्तरे श्रीमता झळकीकरेण वामनाचार्य-शास्त्रिणा सरस्वतीकण्ठाभरणे धृतानां श्लोकानामकारादिक्रमेणानुक्रमणिका समग्रा निर-मायि । अथ पुनस्तां नैषधीयपुस्तकस्य प्रतिश्लोकपादं संगमय्य "नैषधीयकाव्यश्लोकच्छायापि सरस्वतीकण्ठाभरणे नास्ति" इति निरधारि ।

तस्यास्मिन् निश्चयेन कदाचिद्भ्रान्तिः स्यादिति वक्तुमशक्यं महापरिश्रमेणेत्थंकरणात् ॥

किंच डाक्टर औफ्रेख्ट् (Dr. Aufrecht) पण्डितेन स्वनिर्मितायां आक्स्फोर्ड (Oxford MSS.)हस्तलिखितपुस्तकानां सूच्यां सरस्वतीकण्ठाभरणे धृतानां श्लोकानां तत्कर्तॄणां चानुक्रमणिका लिखिता, परंतु तत्र नैषधीयनामापि न दृश्यते । अतो डाक्टर-हालपण्डितस्य कथनं भ्रान्तिग्रस्तं प्रतीयते । अथवा डाक्टर हालपण्डितेनावलोकितं सर-स्वतीकण्ठाभरणपुस्तकमशुद्धं स्यादिति ॥

अथ द्वितीयाक्षेपसमाधानम्—

(२) यच्चोक्तम्—'खिष्टैकादशशताब्द्यन्तिमभागाविर्भूतवाचस्पतिमिश्रेण श्रीहर्षप्रणी-तखण्डनखण्डखाद्यस्य खण्डनं कृतम् । अतः श्रीहर्षो वाचस्पतिमिश्रात् पूर्वोऽभू-दिति सुस्पष्टम्' इति । तदेतत्तु सत्यं यत् वाचस्पतिमिश्रेण खण्डनोद्धारनामा ग्रन्थः

---

१ (Ind. Ant.) पुस्तके द्वितीयखण्डे २१३ पृष्ठे विलोकनीयम् ॥ २ बाबूरामदाससेनव्याख्यानं (Ind. Ant.) पुस्तके तृतीयखण्डे ३१ पृष्ठे विलोकयम् ॥ ३ पूर्णय (P. N. Pūrnaiya B.A.)-स्य व्याख्यानं (Ind. Ant.) पुस्तकतृतीयखण्डे २९ पृष्ठे विलोकयम् ॥

कृतः। परंतु तत्र नायं निश्चयः स्याद् यद् कतमोऽयं वाचस्पतिमिश्रः। यतो वाचस्पतिमिश्रा बहवोऽभूवन्। यैः खलु धर्मशास्त्राणि दर्शनग्रन्थाश्च निरमायिषत।

किंचेन्द्रप्रस्थ(देहली)नगरनिवासिपण्डितविश्वेश्वरनवलगोस्वामीपार्श्वे खण्डनोद्धारस्यैकं पुस्तकं वर्तते। अथ यदाहमिन्द्रप्रस्थनगरमगमं तदा स प्रार्थितः कृपया तत् पुस्तकं मामदर्शयत्। तत्र च न किमपि तत् प्रमाणमपश्यं यत् 'खलु वाचस्पतिमिश्रः षोडशद्वादशशताब्द्यामभूत्' इति साधयेत्। खण्डनोद्धारग्रन्थश्च प्राचीनवेदान्तिकृतवेदान्तपुस्तकानां सूचीपत्रे नैव दृश्यते। वाराणसीमहाविद्यालयीयपण्डिता अपि मया खण्डनोद्धारसमयं निश्चेतुं पृष्टाः "अयं खण्डनोद्धारग्रन्थः केनचिन्नवीनवाचस्पतिमिश्रेण व्यरचि, नतु 'प्राचीनेन'" इति मां प्रत्यबोधयन्।

अथ तृतीयाक्षेपसमाधानम्—

(३) यदप्युक्तं "पृथिवीराजरासौ नामके ग्रन्थे चन्दकविः श्रीहर्षं कालिदासात् पूर्वजातममन्यत" इति, तत्रोच्यते चन्दकविः स्वग्रन्थे मङ्गलाचरणपद्यमये श्लोके श्रीहर्षमुद्दिदेश। यंच श्रीमान् ग्रौसो यथावदन्ववादीत्।

किंच चन्दकविः मङ्गलाचरणश्लोकेषु 'सर्पराजं शेषं, विष्णुं, व्यासं, शुकदेवं नलराजयशःप्रख्यापकं श्रीहर्षं भोजराजवृत्तान्तप्रणेतारं कालिदासं, दण्डमालिनं, गीतगोविन्दकर्तारं जयदेवं च एतान् प्राचीनप्रसिद्धकवीन् प्रणमामि' इत्यकथयत्। तत्र यत् श्रीमान् ग्रौसः परामृशति—"चन्दकविनैते महाकवयो हि तत्तज्जन्मसमयमनुसृत्य मङ्गलाचरणश्लोकेषु पूर्वोत्तरतः सनामोद्देशं स्थापयितुमभिवादिताः" इति। तत्तु "श्रीहर्षः स्वप्रणीतखण्डनखण्डखाद्यग्रन्थे कालिदासप्रणीतग्रन्थसंदर्भान् उदाजहार" इति श्रीहर्षग्रन्थविवेकानुसंधानशीलश्रीमत्कैलासनाथवेदान्तवचनादसंभवमिव प्रतिभाति।

किंच सिद्धद्वादशशताब्दीसंभूतचन्दकविः श्रीहर्षं प्राचीनकविमिवावर्णयिष्यत्तर्हि राजशेखरस्य संमतमसंभवमभविष्यत्। अथाऽस्यदनुकूलं राजशेखरस्य संमतं यत्प्रमाणमनुसृत्य(?) अनेकतरेण निश्चेतुं शक्यम्। तथाहि—

(१) यत् श्रीमता ग्रौसपण्डितेनोक्तं "चन्दप्रणीतपृथिवीराजरासौ"-पुस्तके मङ्गलाचरणश्लोकेषु यः श्रीहर्षस्य प्रथममुद्देशः स 'श्रीहर्षः कालिदासात् पूर्वोऽभूत्' इति कवेराशयं व्यञ्जयति इत्यसत्यं स्यात्।

(२) अथवा चन्दग्रन्थे मङ्गलाचरणश्लोकाः क्षेपकाः स्युरिति॥ तथाहं तु "चन्दकविना कवितारम्यानुसारेणैव कवीनां नामानि पूर्वोत्तरं उद्दिष्टानि, नतु तज्जन्मसमयानुसारेण"

---

१ [illegible] (Catalogus Catalogorum) [illegible]। [illegible]॥ २ [illegible] (Inst. Am.) [illegible] ८१ पृष्ठे [illegible]।

इति मन्ये। अतो नात्राश्चर्यं यच्चन्दकविना श्रीहर्षस्य कालिदासात् प्रथममुद्देशः कृतः। यतः संप्रत्यपि बहवः पण्डिता नैषधकाव्यं सर्वेभ्यः काव्येभ्यः प्रायः श्रेष्ठं मन्यन्ते।

कालिदासकाव्येभ्यश्चापि श्रेष्ठं मत्वा सबहुमानं पठन्ति प्रशंसन्ति च। किंच—अन्यकाव्यापेक्षयाऽस्य नैषधस्य बह्व्यष्टीकाः सन्ति। किंच यच्चन्दकविना 'श्रीहर्षः प्रसिद्धः कविरभूत्' इति मङ्गलाचरणे उक्तम्, तत् **श्रीहर्षस्य कालिदासात्** पूर्वतां साधयितुं न शक्नोति। यतश्चन्दसमयात् किंचित् प्राङ् नवीनस्यापि **श्रीहर्षस्य** प्रसिद्धिसत्त्वेन **चन्दक**विना तथा प्रतिपादितत्वात्॥

किंच **प्रबन्धकोपा**दवगम्यते—यन्नै**षध**काव्यं ख्रिष्टस्य चतुःसप्तत्युत्तरैकादशशताब्याः ११७४ किंचित् प्राक् **श्रीहर्षेण** प्राणायि। यतो **जयचन्द्र**प्रधानस्य **सोमनाथ**तीर्थयात्रावृत्तान्तं श्रीहर्षस्य काश्मीरयात्रावृत्तस्य पश्चाद् **राजशेखरः** प्रबन्धकोपेऽवर्णयत्। **श्रीहर्षस्तु** नैषधकाव्यं रचयित्वैव काश्मीरं जगाम॥

अपिच **चन्द**कविना **पृथिवीराजरासौ**नामग्रन्थः **प्रबन्धकोपा**द्बहुकालानन्तरं व्यरचि। यतस्तत्र **पृथुराज**मृत्युः, तत्सुत**रत्नसिंहस्य गौरि**नामयवनाधिपतिना सह सांग्रामिकं वृत्तं च वर्ण्यते स्म।

किंच इदमप्यकथयित्वा वाचंयमेन भवितुमशक्यं मया। यत् "**जोधपुरा**धीशप्रधान्कविराज**मुरारिदिन**नामाऽकथयत्"–'तन्नाहमत्र श्रद्दधे। यत् '**पृथिवीराजरासौ**'-पुस्तकं चन्दकविनैव प्रणीतम् इति। किंत्विदं पुस्तकं ख्रिष्टचतुर्दशशताब्यां प्राणायीति मे प्रतिभाति।' अत्र स इदं प्रमाणद्वयं चादर्शयत्—

(१) बहवः कवय उदाहरन्ति 'यच्चन्दो निजस्वामिना सह, स्वामिमृत्योः पश्चाद्वाचिरेणैव शत्रुभिरघानि' इति।

(२) किंच तत्र पुस्तके यवनभाषाया बहवः शब्दाः सन्ति। यवनाश्चात्र भारते ख्रिष्टस्य चतुर्नवत्युत्तरैकादशशताब्यां ११९४ समागत्य न्यवात्सुः। तत् कथं तेष्वागतेष्वेव तेषां भाषायाः प्रचारः स्यात्। मम मतेतु चतुर्दशशताब्यां वर्षशतत्रयानन्तरं यवनभाषाया लब्धप्रचारतया चन्दपुस्तके प्रवेशः संभाव्यत एव" इति।

तत्राहं तु कविराज**मुरारिदिन**नाम्नोऽस्मिन् प्रमाणद्वयेऽन्तिमं कथंचिच्छ्रद्दधे॥

अथ चतुर्थाक्षेपसमाधानम्—

(४) यदप्युच्यते "**माधवप्रणीतसंक्षेपशंकरविजये** वर्णितम्। यत् 'खण्डनकारः श्रीशंकराचार्याच्छास्त्रविचारे पराजेष्ट' इति"। तत्रोच्यते माधवप्रणीतश्रीसंक्षेपशंकरविजये सत्येतिहासा न दृश्यन्ते। किंतु तत्र शंकराचार्यस्य प्रशंसार्थं स्वकल्पितेतिवृत्तमुपन्यस्तं माधवेन। तत्र दिङ्मात्रमुदाह्रियते—माधवेनोक्तं "शंकरः बाणं, मयूरं, खण्डनकर्तारं श्रीहर्षं, तत्प्राचीनमुदयनाचार्यं च शास्त्रार्थे विजिग्ये" इति॥ परंतु **बाणमयूरौ च** ख्रिष्टसप्तमशताब्यां प्रादुरास्ताम्। इत्थं चेतिहासविषयेषु संक्षेपशंकरविजयं किंचिदपि निश्चेतुं सर्वथाऽनर्हम्।

एवं च नाद्यापि किंचिदपि तत् प्रमाणमुपलभ्यते यद्राजशेखरस्य संमतं खण्डयेत्।

मया समधिगताः । तासु च नारायणविरचितप्रकाशाख्यव्याख्याया एव सर्वोत्कर्षशी-कत्वेन मुख्यत्वमङ्गीकृतम् । अन्यासु च यत्र विशेषो लब्धस्तत्रैव टिप्पणं दत्तम् ॥

अस्य ग्रन्थस्य शोधनोपक्रमे ये महाशयाः पुस्तकानि प्रेषितवन्तस्तेषां प्रत्युपकारं कर्तुमक्षमः केवलं परोपकारशीलताप्रकाशनार्थं नामावली प्रकाश्यते—

<table>
<tr><td>नैषधीयचरितमूलपुस्तकत्रयम्</td><td rowspan="5">} जयपुरराजगुरुश्रीनारायणभट्टपर्वणीकराः</td></tr>
<tr><td>नैषधीयप्रकाशपुस्तकम्</td></tr>
<tr><td>साहित्यविद्याधरीपुस्तकम्</td></tr>
<tr><td>सुखावबोधापुस्तकम्</td></tr>
<tr><td>जीवातुप्रथमसर्गस्य लिखितं पुस्तकम्</td></tr>
</table>

तिलकाख्यव्याख्यापुस्तकम् जयपुरराजगुरुदाधीचचन्द्रेश्वरशर्माणः नरहरिकृतदीपिकापुस्तकम् महामहोपाध्यायपण्डितदुर्गाप्रसादशर्माणः जीवातुव्याख्यापुस्तकम् (मुद्रितम्) जयपुरराजकी-यपुस्तकालयाध्यक्षाः नैषधीयप्रकाशस्य पुस्तकान्तरम् ग्वालियरनगरतो भट्टविश्वनाथशर्माणः ।

एवं महता परिश्रमेण सटीकमिदं महाकाव्यं संशोध्य **निर्णयसागरयन्त्रालयाधिपतये** **'जावजी दादाजी'** इत्यभिख्यया प्रसिद्धाय श्रेष्ठिनेऽदाम् । तदत्र प्रमादस्य मनुष्यासाधा-रणधर्मत्वान्मद्दोषादक्षरयोजकदोषाद्वा द्वितीयावृत्तावपि क्वचनाशुद्धिः स्थिता जाता वा तां सहृदयहृदयाः संशोध्य पाठयन्तु च्छात्रान् । अहमपि पुनरावृत्तौ शोधयिष्यामि । यतः—

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः । हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

इति प्रार्थयति

पञ्चनददेशीयविश्वविद्यालयान्तर्गतसंस्कृतश्रेण्यध्यक्षप्रधानाध्यापकपण्डित—

शिवदत्तशर्मा ।

५ सर्गे—

ज्ञात्वा नारदतः स्वयंवरविधिं भैम्याः स्वर्वर्त्मगैः
सार्धं दिक्पतिभिः पथाग्र पृथिवीं शक्रेण पुनः पीडितः ।
अस्मद्दौत्यमुपेत्य याहि नृप भो भैमीमहो गेह-
त्वामस्मास्वनुकूलयाशिति नलं सोऽमुत्र दौत्ये दृढी ॥ ५ ॥

६ सर्गे—

भूजानिर्भुवनैकदृश्यतनुरप्युच्चैरदृश्यस्तदा
कक्षाः सप्त यथाग्र भीमदुहितुः प्रासादमासादयन् ।
तां तत्र प्रसमीक्ष्य खण्डनपरां गीर्वाणदूतीगिरां
दूरादुच्छ्वसितिति स चेतसि भृशं दूनोऽपि दौत्येन यः ॥ ६ ॥

७ सर्गे—

अश्रान्तं तरदन्तरोऽद्भुतरसाकूपारपूरान्तरे
प्रत्यारभ्य मुखान्नखावधि नलस्तां प्रादुरास स्तुवन्[२] ।
सा तु व्यक्तमसुं समीक्ष्य चकिता तद्रूपलुब्धा सखी-
ष्वाश्चर्यस्तिमिकासु कोऽसि किमिह प्राप्तोऽस्यपृच्छत्स्वयम् ॥ ७ ॥

८ सर्गे—

दूतं विद्धि वराङ्गि मां दिविषदां धन्यासि यत्त्वामहो
सोऽप्याशापतिभिः सह स्वयमिदं ब्रूते कृपा मद्गिरा ।
अस्मास्वन्यतमं वृणीष्व कमपि त्वं नन्दने नन्द भो
मा कुत्रापि नरे[३] स्खलेति बहुधा भैमीं नलोऽलोभयत् ॥ ८ ॥

९ सर्गे—

चित्तं मेऽस्ति नले न लेखपतिषु त्वं कोऽनलश्रीस्तये-[४]
त्युक्तः प्रोज्झ्य सुरानलं[५] श्रयति किं मुग्धास्यवोचत्स ताम् ।
पश्चादश्रुमुखीमुदीक्ष्य सहसा सोऽहं नलस्तत्प्रिये
मा रोदीरिति तत्र[६] वादिनि सँ विदैवाद्दिवोऽवातरत्[७] ॥ ९ ॥

१० सर्गे—

आजग्मुर्महति स्वयंवरमहे नन्दन्नले नायका-
श्चत्वारो हरितां हरिप्रभृतयः कृत्वा नलस्याकृतिम् ।
वाग्देव्यां नृपवृन्दवर्णनविधौ बद्धोद्यमायां पुरो
मध्येराजकमाजुहाव तनयां भीमो महीवासवः ॥ १० ॥

११ सर्गे—

एते सन्ति सुरा इतः पुनरिते दीव्यन्ति विद्याधराः
किंच स्फाररुचः पृथक्पृथगितो द्वीपाधिपा आसते ।

---

१ इन्द्रः ॥ २ 'स्तुवन्' इत्यत्रान्वयः ॥ ३ 'पृथ्वीपालकपालके' इत्यप्यर्थः ॥ ४ रलयोरभेदात् 'नवे
इत्यपि ॥ ५ नलतुल्यः, अग्नितुल्यश्च ॥ ६ तस्मिन्नले ॥ ७ हंसः ॥

इत्थं योग्यतमा वृणीष्व कमपि स्वायत्त वा लङ्घनि-
वाचो भूरि विलोकितापि विजहौ सा चित्तबद्धं नलम् ॥ ११ ॥

१२ सर्गे—

पार्श्वे पश्य परे त्वदर्थमपरे द्वीपा समुद्रादिने
ज्ञाता: प्राज्यपराक्रमक्रमभुजः पश्यालि पृथ्वीभुजः ।
एषु स्वीकुरु कंचिदेकमिति वाग्देव्योपदिष्टा पुरो
यान्ती वीक्ष्य निरीक्षितुं ललितमतः सा पञ्च मेने नलान् ॥ १२ ॥

११ सर्गे—

पञ्चत्वं नलेषु तत्र कमपि श्रीवीरसेनोद्भवं
देवं मञ्जु परीक्ष्य किं त्रपयति व्यर्थं त्वमस्मानिति ।
वाचा श्लेषवचःप्रपञ्चकलितानल्पैरनल्पैस्तया
भैमी पञ्चनलीं विनाश्य समभूत्तद्देहभूर्मोनभूः ॥ ११ ॥

१४ सर्गे—

त्वोऽभ्यागतदिग्गीशदर्शितनला मन्दाऽमन्दा सती
मत्वा तानिमनुन्नसन्नं करतः कण्ठे नलस्य स्रजम् ।
दिक्पालेषु गतेषु खं सह गिरा दत्वा वरानन्दरा-
स्तानोदा निपपात मूर्धनि तयोः पुष्पप्रसूनावलिः ॥ १४ ॥

१८ सर्गे—

इत्थं तामथ मेदिनीतलशचीमासाद्य सौधे महा-
रत्नस्फूर्जितकाञ्चनक्षितिभृति क्ष्माचक्रशक्रो नलः ।
नक्तं यत्नवशीकृतां क्रमगलल्लज्जां कलाकोविदः
कंदर्पोदधिपारलम्भनतरीमुच्चैर्मुदारीरमत् ॥ १८ ॥

१९ सर्गे—

प्रातर्बोधविधित्सवो रससुधावर्षाः सहर्षा जगु-
र्गाथा बोधकराः कराहतकलातोद्या गृहोद्यानगाः ।
बुद्ध्वा प्राङ्निषधेश्वरः सुरसरित्स्नातो रथस्थः समा-
गच्छंस्तैरवलोकितो ननु पुनस्तन्निर्गमः सौधतः ॥ १९ ॥

२० सर्गे—

प्राप्ते राज्ञि पुरोगता वितरति स्वर्णाम्बुजन्मान्युरी-
कुर्वाणा नियमं समापयति सा मानं मनागाश्रिता ।
अङ्के कुर्वति लज्जिता सहचरीरुत्सार्य नीविस्पृशि
द्रागुत्थाय चचाल चालसगतिर्लोलन्नितम्बा बहिः ॥ २० ॥

२१ सर्गे—

सौधान्निःसरते स्मितं विकिरते राज्ञां नमो गृह्णते
स्नात्वा त्र्यम्बकमर्चते मुररिपोः स्तोत्राण्यहो श्रृण्वते ।
भुक्त्वा पर्यटते शनैः शतपदं मञ्चे प्रियामञ्चते
सायं वर्णयते नमांसि कलये तस्मै नलक्ष्माभृते ॥ २१ ॥

२२ सर्गे—

सायं सांध्यविधिं विधाय विगलद्दोषः प्रदोषस्तवं
प्रत्यारभ्य विधूदयावधि वधूसङ्गादनङ्गी स्तुवन् ।
तस्या ग्लौविषया गिरोऽमृतकिरः श्रुत्वा स काव्यस्थिर-
प्रज्ञः प्राप परं स्मरन्स्मरनवानन्दो नलो विस्मयम् ॥ २२ ॥

१ कलातोद्यानि मधुरवाद्यानि ॥ २ चन्द्रविषयाः ॥ ३ अत्रानन्दपदेन नैषधीयचरितकाव्यस्यानन्दाङ्कता सूचिता ।

|| श्रीः ||

महाकविश्रीहर्षप्रणीतं

नैषधीयचरितम् ।

नारायणकृतया नैषधीयप्रकाशाख्यव्याख्यया समेतम् ।

प्रथमः सर्गः ।

वैदेही यस्य वामे जयति जयजनिर्दक्षिणे लक्ष्मणोऽपि
श्रीमानग्रे हनूमानतुलबलचयो हस्तविन्यस्तहस्तः ।
कोदण्डं काण्डमेकं दधदहितकुलध्वंसकारी समन्ता-
द्दद्यादव्याजरम्याक्षतिविघटितनिर्वाणको जानिरस्मान् ॥

दशकंधरकरिसिंहः सीताचेतःसरोजरोलम्बः ।
रघुकुलकैरवचन्द्रः पायादपायतो रामः ॥

नमाम भूपाङ्कवतां श्रीपतो नाभिनामितः ।
स्तवेऽब्जन्मने यस्य पदवी सुदुर्लभा ॥

नत्वा श्रीनरसिंहपण्डितपितुः पादारविन्दद्वयं
मातुश्चापि महालदेव्यभिधया विख्यातकीर्तेः क्षितौ ।
श्रीरामेश्वरवेदयोः सुमनसोर्गुर्वोरयोर्वो यथा-
बुद्धि श्रीनिषधेन्द्रकाव्यविवृतिं निर्माति नारायणः ॥

प्रणम्य शंकरं लोकनन्दं श्रीपतिं तनम् ।
कुर्वे नाम्ना नैषधीयप्रकाशं हृद्यं मुदे ॥

चिकीर्षितस्य ग्रन्थस्य निर्विघ्नसमाप्त्यर्थं शिष्टाचारपरिप्राप्तम् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इति मङ्गलाचरणं कर्तव्यमिति ग्रन्थकृच्छ्रीहर्षनामा कविर्मुखे वैदीमच्युत-पाभीष्टदेवतानमस्कारलक्षणं मङ्गलमाचरति । अन्ये तु 'निर्दिष्टवस्तुनिर्देशलक्षणं मङ्गलम्' इत्याहुः—

निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियन्ते न बुधाः सुधामपि ।
नलः सितच्छत्रितकीर्तिमण्डलः स राशिरासीन्महसां महोज्ज्वलः ॥ १ ॥

निपीयेति ॥ अत्र पुण्यश्लोकनलरूपनिर्दिष्टवस्तुनिर्देशेन निर्विघ्नग्रन्थसमाप्ति-प्रयोजनम्—'के नल साक्षात्' इति । पुण्यश्लोकानां स्मरणमपि मङ्गलार्थम्, किं पुनः कीर्तन-

---

१ 'स्तुवीम्' इति पाठान्तरे विशिष्टविशेषणम् । २ 'कुरुते' इति पाठः । ३ 'सर्वम्' इति पाठः ।
४ क्वचित् 'निपीयेति' इत्युदाहृतस्य पाठः । ५ 'स्निग्ध' इति पाठः ।

१८ सर्गे—

इत्थं तामथ मेदिनीतलशचीमाराय सौधे महा-
रत्नस्फूर्जितकाञ्चनक्षितिभृति क्ष्मानाकशाखो नलः ।
नक्तं यत्नवशीकृतां क्रमगलल्लज्जां कलाकोविदः
कंदर्पोदधिपारलम्भनतरीमुच्चैर्मुदारीरमत् ॥ १८ ॥

१९ सर्गे—

प्रातर्बोधविधित्सवो रसमुधावर्षाः सदर्पा जगु-
र्गाथा बोधकराः करा[1]हतकलातोद्या गृहोद्यानगाः ।
बुद्ध्वा प्राङ्निपधेश्वरः सुरसरित्स्नातो रथस्थः समा-
गच्छंस्तैरवलोकितो नतु पुनस्तन्निर्गमः सौधतः ॥ १९ ॥

२० सर्गे—

प्राप्ते राज्ञि पुरोगता वितरति स्वर्णाम्बुजन्मान्युरी-
कुर्वाणा नियमं समापयति सा मानं मनागाश्रिता ।
अङ्के कुर्वति लज्जिता सहचरीरुत्सार्य नीविस्पृशि
प्रागुत्थाय चचाल चालसगतिर्लोलन्नितम्बा बहिः ॥ २० ॥

२१ सर्गे—

सौधान्निःसरते स्मितं विकिरते राज्ञां नमो गृह्णते
स्नात्वा त्र्यम्बकमर्चते मुररिपोः स्तोत्राण्यहो भ्रश्नते ।
भुक्त्वा पर्यटते शनैः शतपदं मध्ये प्रियामश्नते
सायं वर्णयते नमांसि कलये तस्मै नलक्ष्माभृते ॥ २१ ॥

२२ सर्गे—

सायं सांध्यविधिं विधाय विगलद्दोषः प्रदोषस्तवं
प्रत्यारभ्य विधूदयावधि वधूत्सङ्गादनङ्गी स्तुवन् ।
तस्या [2]शैलौविषया गिरोऽमृतकिरः श्रुत्वा स काव्यस्थिर-
प्रज्ञः प्राप परं स्मरन्स्मरनवान[3]न्दो नलो विस्मयम् ॥ २२ ॥

१ कलातोद्यानि मधुरवाद्यानि ॥　२ चन्द्रविषयाः ॥　३ अत्रानन्दपदेन नैषधीयचरितका[व्यस्य आन]न्दाङ्कता सूचिता ।

मिति । किंविशिष्टो नलः । महसां राशिः प्रतापानामाश्रयः । यद्वा—महसां तेजसां
सूर्य इव स्थितः । लुप्तोपमा, लुप्तोत्प्रेक्षा वा । एतेन स एव तेजस्वी सूर्यवत्, नान्य
व्यङ्ग्यम् । स कः । बुधाः शुमतयो यस्य प्रजापालनरूपाः कथा गोष्ठीनिपीय सादरं
सुधामप्यमृतमपि तथा नाद्रियन्ते यथा पूर्वमन्दृते यागादिराग्नौ सादरा आसंस्तथा नल
श्रवणानन्तरं नेति ततोऽप्यधिका नलकथेति भावः । 'कथाम्' इति पाठः साधीयान् ।
रादिमधुरद्रव्यादपि सुधायामादर इत्यपेरर्थः । यदीयाः कथा अमृतादपि सरसा इत्यर्थः ।
एतेन इन्द्रादीनां त्यागेन नले दमयन्त्यनुरागस्यौचिती युक्ता । यद्वा—बुधा देवाः सुधान्
सोऽपि तां नाद्रियन्ते । यत्कथा अमृतादपि मनोहरा इत्यर्थः । यद्वा—दृष्ट्यादिना क्षिति
रक्षिणो बुधा-देवा यत्कथामाकर्ण्य सुष्ठु धाम मनोहरां कान्तिं पाति रक्षति सुधानपाश्चन्द्रस्त-
स्मिन्नलकथावत्पूर्ववद्वा नाद्रियन्ते । यद्वा—बुधा ज्ञातारः क्षितिरक्षिणोऽन्ये राजानो यज्ञादि-
नामृतमपि नाद्रियन्त इति । यद्वा—फणामण्डलधारणादिना क्षितिं रक्षन्ति ते क्षितिरक्षिणः
शेषतक्षकादयो नागाः 'सुधा भुजंगभोजनम्' इत्यभिधानात्स्वीयं भोजनममृतमपीन्द्रेण रक्षणा-
र्थमर्पितममृतं च नाद्रियन्ते । यतो बुधास्तारतम्यविज्ञातारः । क्षितिरक्षित्वं तक्षकादिषु
शेषसाहचर्यादुपचर्यते । एतेन व्याख्याननयेण नलकीर्तेर्लोकत्रयव्यापित्वं द्योत्यते । यद्वा—
'क्षितिः, अक्षिणः' इति पदद्वयम् । अक्षो बिभीतको निवासोऽस्यास्तीत्यक्षी कलिः । यस्य
कथा निपीय स्थितस्य पुरुषस्याक्षिणः कलेः क्षितिर्नाशो भवति । 'क्षि क्षये' इति धातुः ।
तथा चोक्तम्—'कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं
कलिनाशनम् ॥' इति । तथा यस्य कथा निपीय बुधाः सुधामपि नाद्रियन्त इति । तथा-
शब्दः समुच्चयार्थो व्याख्येयः । यद्वा—अक्षाः पाशास्ते क्रीडार्थं यस्य विद्यन्ते सोऽक्षी तस्य
द्यूतव्यसनिनोऽपि नलस्य क्षितिः पृथ्वी । राज्यमित्यर्थः । एवंविधस्यापि भूपतित्वमित्या-
श्चर्यम् । तथाशब्दोऽत्रापि समुच्चयार्थः । यत एवंविधोऽत एव कीर्तेर्मण्डलं यशोमण्डलम्,
सितं च तच्छत्रं च सितच्छत्रं श्वेतातपत्रमिवाचरितं कृतं वा लोकत्रयव्याप्तिसमर्थं कीर्तिमण्डलं
यस्य येन वा । पुनः किंविशिष्टः—महोज्ज्वलो महैरुत्सवैरुज्ज्वलो दीप्यमानः । एतेनोत्साह-
युक्तत्वं तस्य । महान्परमकाष्ठापन्न उज्ज्वलः शृङ्गारो यस्येति वा । यद्वा—महानुज्ज्वलः
शृङ्गारो यत्र दमयन्त्याः । एतेन पञ्चनलीमध्ये तस्यैव वृतत्वात् । यद्वा—महसा तेजसा
प्रतापेन ज्वलतीति महोज्ज्वलः । सूर्यपक्षेऽपि 'आदित्याज्जायते वृष्टिः' इति वृष्टिप्रदत्वेन
क्षितिरक्षिणः सूर्यस्य कथा निपीय बुधाः सुधामपि चन्द्रे विषये तथा नाद्रियन्ते ।
तस्य तत्रासामर्थ्यात् । किंभूतः सूर्यः । श्वेतातपत्रीकृतं कीर्तियुक्तं स्तुतियुक्तं विस्ता-
रयुक्तं वा मण्डलं यस्य । स्तोता श्वेतच्छत्राकारं मण्डलं स्तौति । महसा तेजसा ज्वल-
तीति महोज्ज्वलः । 'कीर्तिः प्रतापयशसोर्विस्तारे कर्दमेऽपि च' इति विश्वः । 'महस्त्सूत्सव-
तेजसोः', 'शृङ्गारः शुचिरुज्ज्वलः' इत्यमरः । 'ज्ञातृचान्द्रिसुरा बुधाः' इति क्षीरस्वामी ।

"महसा तेजसा ज्वलति' इति व्याख्यानं तु जकारस्य द्वित्वानुपपत्त्योपेक्ष्यम्" इति जिनराजसू-
[illegible] व्याख्या 'अनचि च' इति सूत्रासरणमूलिका ।

मिति । किंविशिष्टो नलः । महसां राशिः प्रतापानामाश्रयः । यद्वा—महसां तेजसां राशिः सूर्य इव स्थितः । लुप्तोपमा, लुप्तोत्प्रेक्षा वा । एतेन स एव तेजस्वी सूर्यवत्, नान्य इति व्यङ्ग्यम् । स कः । बुधाः सुमतयो यस्य प्रजापालनरूपाः कथा गोष्ठीर्निपीय सादरं श्रुत्वा सुधामप्यमृतमपि तथा नाद्रियन्ते यथा पूर्वममृते यागादिसाध्ये सादरा आसंस्तथा नलकथा-श्रवणानन्तरं नेति ततोऽप्यधिका नलकथेति भावः । 'कथाम्' इति पाठः साधीयान् । शर्करादिमधुरद्रव्यादपि सुधायामादर इत्यपेरर्थः । यदीयाः कथा अमृतादपि सरसा इत्यर्थः । एतेन इन्द्रादीनां त्यागेन नले दमयन्त्यनुरागसौचिती सूचिता । यद्वा—बुधा देवाः सुधान्ध-सोऽपि तां नाद्रियन्ते । यत्कथा अमृतादपि मनोहरा इत्यर्थः । यद्वा—वृष्ट्यादिना क्षिति-रक्षिणो बुधा-देवा यत्कथामाकर्ण्य सुष्ठु धाम मनोहरां कान्तिं पाति रक्षति सुधामपाश्चन्द्रस्त-स्मिन्नलकथावत्पूर्ववद्वा नाद्रियन्ते । यद्वा—बुधा ज्ञातारः क्षितिरक्षिणोऽन्ये राजानो यज्ञादि-नामृतमपि नाद्रियन्त इति । यद्वा—फणामण्डलधारणादिना क्षितिं रक्षन्ति ते क्षितिरक्षिणः शेषतक्षकादयो नागाः 'सुधा भुजंगभोजनम्' इत्यभिधानात्स्वीयं भोजनममृतमपीन्द्रेण रक्षणार्थमर्पितममृतं च नाद्रियन्ते । यतो बुधास्तारतम्यविज्ञातारः । क्षितिरक्षित्वं तक्षकादिषु शेषसाहचर्यादुपचर्यते । एतेन व्याख्यानत्रयेण नलकीर्तेर्लोकत्रयव्यापित्वं द्योत्यते । यद्वा—'क्षितिः, अक्षिणः' इति पदद्वयम् । अक्षो बिभीतको निवासोऽस्यास्तीत्यक्षी कलिः । यस्य कथा निपीय स्थितस्य पुरुषस्याक्षिणः कलेः क्षितिर्नाशो भवति । 'क्षि क्षये' इति धातुः । तथा चोक्तम्—'कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥' इति । तथा यस्य कथा निपीय बुधाः सुधामपि नाद्रियन्त इति । तथा-शब्दः समुच्चयार्थो व्याख्येयः । यद्वा—अक्षाः पाशास्ते क्रीडार्थं यस्य विद्यन्ते सोऽक्षी तस्य द्यूतव्यसनिनोऽपि नलस्य क्षितिः पृथ्वी । राज्यमित्यर्थः । एवंविधस्यापि भूपतित्वमित्या-श्चर्यम् । तथाशब्दोऽत्रापि समुच्चयार्थः । यत एवंविधोऽत एव कीर्तेर्मण्डलं यशोमण्डलम्, सितं च तच्छत्रं च सितच्छत्रं श्वेतातपत्रमिवाचरितं कृतं वा लोकत्रयव्याप्तिसमर्थं कीर्तिमण्डलं यस्य येन वा । पुनः किंविशिष्टः—महोज्ज्वलो महैरुत्सवैरुज्ज्वलो दीप्यमानः । एतेनोत्साह-युक्तत्वं तस्य । महान्परमकाष्ठापन्न उज्ज्वलः शृङ्गारो यस्येति वा । यद्वा—महानुज्ज्वलः शृङ्गारो यत्र दमयन्त्याः । एतेन पञ्चनलीमध्ये तस्यैव वृतत्वात् । यद्वा—महसा तेजसा प्रतापेन ज्वलतीति महोज्ज्वलः । सूर्यपक्षेऽपि 'आदित्याज्जायते वृष्टिः' इति वृष्टिप्रदत्वेन क्षितिरक्षिणः सूर्यस्य कथा निपीय बुधाः सुधामपि चन्द्रे विषये तथा नाद्रियन्ते । तस्य तत्रासामर्थ्यात् । किंभूतः सूर्यः । श्वेतातपत्रीकृतं कीर्तियुक्तं स्तुतियुक्तं विस्तारयुक्तं वा मण्डलं यस्य । स्तोता श्वेतच्छत्राकारं मण्डलं स्तौति । महसा तेजसा ज्वलतीति महोज्ज्वलः । 'कीर्तिः प्रतापयशसोर्विस्तारे कर्दमेऽपि च' इति विश्वः । 'महस्तूत्सवतेजसोः', 'शृङ्गारः शुचिरुज्ज्वलः' इत्यमरः । 'ज्ञातृचान्द्रिबुधा बुधाः' इति क्षीरस्वामी ।

---

१ "'महसा तेजसा ज्वलति' इति व्याख्यानं तु जकारस्य द्वित्वानुपपत्त्योपेक्ष्यम्" इति जिनराजसूरि[illegible]रचितसुख[illegible]व्या व्याख्या 'अनचि च' इति सूत्रालरणमूलिका ।

कल्पिते 'निपीय स्थितस्य' इत्यध्याहारेणैककर्तृकत्वात्ल्यप्साधुः । निपीयेति 'पीङ् पाने' । क्षितिरक्षिण इत्यत्र ताच्छील्ये णिनिः । कथेति 'चिन्तिपूजि–' इति कथेर्ङ् । आद्रियन्त इति 'दृङ् आदरे' इति तौदादिकाण्ङित्त्वात्तङि प्रथमपुरुषे झे परतः शे विकरणे धातोः 'रिङ्शयग्–' इति रिङादेशेयङादेशयोः 'अतो गुणे' इति पररूपे च रूपं सिद्धम् । दुग्धन्त इति दुहः 'इगुपध–' इति कः । सितच्छत्रितेत्यत्राचारक्विबन्तात्, 'तत्करोति–' इति ण्यन्ताद्वा निष्ठा । 'निष्ठायां सेटि' इति णेर्लोपः । ज्वल इत्यत्र 'ज्वलितिकसन्तेभ्यो णः' इति णस्य पाक्षिकत्वात्पचाद्यच् । अस्य महाकाव्यत्वम् 'सर्गबन्धो महाकाव्यम्' इति लक्षणात् । नायकश्चात्र धीरललितः 'निश्चितो धीरललितः कलासक्तः सुखी मृदुः' इति । रसश्चात्र शृङ्गारः । स द्विविधः । संभोगशृङ्गारो विप्रलम्भशृङ्गारश्च । तस्यापरे रसा अङ्गभूताः । एवं सर्वत्र । अस्मिन्सर्गे 'इत्यनुनम्' इति यावद्वंशस्थं वृत्तम् ॥

रसैः कथा यस्य सुधावधीरिणी नलः स भूजानिरभूद्गुणाद्भुतः ।
सुवर्णदण्डैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमण्डलः ॥ २ ॥

रसैरिति ॥ 'सर्वं वाक्यं सावधारणं भवति' इति न्यायात् नल एव भूजानिर्भूपतिरभूत् । नान्य इत्यर्थः । भूर्जाया यस्येति 'जायाया निङ्' । स कः । यस्य कथा शृङ्गारादिभी रसैः यद्भूतां सुधामवधीरयति तिरस्करोतीत्येवंशीला सुधावधीरिणी । सुधायाः यद्भूतत्वं व्याख्यातृप्रसिद्ध्या व्याख्यातम् । मधुररसयुक्तैव वा । यस्य कथा रसैः कृत्वा सुधाया अवधिम् । उत्कृष्टां सुधामिति यावत् । तामीरयति क्षिपतीत्येवंशीला । 'सुधावधीरिणी' इत्यपि पाठः । तत्रापि स एवार्थः । यद्वा—यस्य कथा रसैर्हेतुभिः सुधाया अवधिः । एतत्परमन्यं नास्तीत्यर्थः । 'ढ्रलोपे–' इति दीर्घः । एतेनेन्द्रादिपरित्यागेन नले भैम्यनुरागस्यौचित्यम् । यद्वा—शोभनं धावतीति सुधा वा पुष्पसंचारिणी धीर्यस्येति [illegible] तस्य योत्स्यते । रणो [illegible] रणोऽस्यास्तीति । अनेनोत्साहशालित्वम् । भूजानिरित्यनेन प्रभुत्वमुक्तम् । गुणैः शौर्यादिभिः संधिविग्रहादिभिर्वाद्भुत आश्चर्यरूपः । अतएव कवेरेतस्य वर्णनं युक्तम् । यद्वा—'रसैः, एः' इति पदद्वयम् । यस्य कथा एः कामस्य रसा भूः स्थानम् । [illegible] इत्यर्थः । कीदृशो नलः । सुवर्णेत्यादि । सुवर्णस्य दण्डः सुवर्णदण्डः । एकं च तत्सितं च तदातपत्रं चैकसितातपत्रम् । सुवर्णदण्डश्च एकसितातपत्रं च सुवर्णदण्डैकसितातपत्रे । सुवर्णदण्डैकसितातपत्रे इते तद्रूपतामिते वा सुवर्णदण्डैकसितातपत्रिते । प्रतापस्यावलिः प्रतापावलिः । ज्वलन्ती चासौ प्रतापावलिश्च ज्वलत्प्रतापावलिः । कीर्तिमण्डलं कीर्तिमण्डलम् । ज्वलत्प्रतापावलिश्च कीर्तिमण्डलं च ज्वलत्प्रतापावलिकीर्तिमण्डले । सुवर्णदण्डैकसितातपत्रिते ज्वलत्प्रतापावलिकीर्तिमण्डले येन यस्य वा । यथाक्रमं योजना । [illegible] । [illegible]

१ [illegible]

पौनरुक्त्यम्। एवमन्येष्वपि पदेषु विशिष्टार्थप्रतिपादनादपौनरुक्त्यं द्रष्टव्यम्। अथवा शोभमानो न्याय्यो वा द्विजातिवर्णानां दण्डः शासनं यथासंभवं करदानं वा यत्र। तथैकं सितातपत्रं यस्मिंस्तादृशं कृतम्। तथा ज्वलन्त्यौ प्रतापावलिकीर्ती यस्मिन्। यद्वा—प्रतापावलियुक्ता कीर्तिर्यस्मिन्। एवंभूतं मण्डलं राष्ट्रं यस्य सः। एतेन पूर्वश्लोकेन सहापौनरुक्त्यम्। प्रतापस्य दण्डत्वनिरूपणात्संकोचः प्रतीयते, सानौचिती प्रतापस्य व्यापकत्वं विना कीर्तेर्व्यापकत्वमनुपपद्यमानं तद्गमयतीति वर्णसाम्यमात्रेण च दण्डत्वनिरूपणात्परिहरणीया। ज्वलदित्युभयविशेषणम्। अन्यथा कीर्तिमण्डलशब्दस्य पूर्वनिपातः स्यात्। यद्वा कीर्तिं प्रति प्रतापस्य हेतुत्वादभ्यर्हितत्वात्पूर्वनिपातः॥

कविरिदानीं स्वमौद्धत्यं परिहरंस्तस्यैव गुणानुवर्णने कारणमाह—

पवित्रमत्रातनुते जगद्युगे स्मृता रसक्षालनयेव यत्कथा[2]।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति॥ ३॥

पवित्रमिति॥ सा इति संबन्धाद्या इति योज्यम्। या यत्कथा यत्संबन्धिनी कथात्र युगेऽस्मिन्कलियुगे स्मृता स्मर्यमाणा सती जगद्भुवनमा सामस्त्येन पवित्रं तनुते करोति। सा यत्कथा आविलां सदोषां मद्गिरमपि रसैः शृङ्गारादिभिः क्षालनयेवोज्ज्वलीकरणेनेव कथं न पवित्रयिष्यति। अपि तु पवित्रीकरिष्यत्येव। जगदपेक्षया मद्वचसोऽन्तरङ्गत्वात्। तदेवाह—स्वसेविनीमेव। स्वकथैकतत्परामेवेत्यर्थः। 'वैन्यं पृथुम्–' इत्यादिना स्मरणमाहात्म्यात्। 'कर्कोटकस्य–' इत्यादिना कीर्तनस्यापि माहात्म्यात्। या स्मृता पवित्रयति सा स्मरणपूर्वकं कीर्तिता मद्गिरं कथं न पवित्रयिष्यति। यद्येन सेव्यते तत्सदोषमपि तेन पवित्रीक्रियते। अन्यदपि मलिनं वस्त्रादि रसेनोदकेन या क्षालना तया निर्मलीक्रियते। अपिर्यथापाठमेव वा योज्यः। यद्वा—पवित्रीकरणे कारणद्वयम्। आविलत्वम्, अन्यच्च अन्यसेवाराहित्येन स्वसेवित्वम्। अपिरन्यच्चेत्यर्थे। 'तत्कथा' इत्यपि पाठः साधुः। पवित्रमिति 'पुवः संज्ञायाम्' इति कर्तरीत्रः। इह तु 'पवित्रमिव पवित्रम्' इत्युपचारात्। क्षालनयेति क्षालेश्चुरादेः 'ण्यासश्रन्थो–' इति युच्। योरनः। क्षालनयेवेति 'इवेन नित्यसमासो विभक्त्यलोपश्च' इति द्वौ[3]॥

द्वितीयश्लोके तस्य गुणाद्भुतत्वमुक्तं, तदेवाह—

अधीतिबोधाचरणप्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः।
चतुर्दशत्वं कृतवान्कुतः स्वयं न वेद्मि विद्यासु चतुर्दशस्वयम्॥ ४॥

अधीतीति॥ अयं नलः स्वयमात्मना चतुर्दशसु विद्यासु। अधीतिबोधाचरणप्रचारणैः। अधीतिरध्ययनम्, बोधोऽर्थज्ञानम्, आचरणं कर्मानुष्ठानम्, प्रचारणमध्यापनम्, एतैश्चतुर्भिरुपाधिभिः प्रकारैश्चतस्रो दशा अवस्थाः प्रणयन्कुर्वंश्चतुर्दशत्वं कुतः केन हेतुना कृतवान्

१ 'अत्र व्यतिरेकोऽलंकारः। अन्यच्च यथासंख्यालंकारः। अत्र सुवर्णदण्डसितच्छत्रे उक्ते पश्चात्तेनैव प्रतापावलिकीर्तिमण्डले निर्दिष्टे इत्यनयोः संकरः' इति साहित्यविद्याधरी। २ 'तत्कथा' इति [illegible]। ३ 'नहि तत्कथां विहायान्यन्मद्गीः प्रतिपादयति, इति राजविषयो रत्याख्यो [illegible]। अत्रोत्प्रेक्षालंकारः। रसेति श्लिष्टम्' इति साहित्यविद्याधरी।

[इत्यहं] न जाने। अत्र हेतुर्नास्तीत्यर्थः। चतुर्दशसु विद्यासु सतश्चतुर्दशत्वे सिद्धेऽपि तत्करणं निष्फलत्वादयोग्यम्। चतुर्दशसु चतुर्दशत्वं धर्मः सिद्ध एव। किंचाधीत्यादिचतुर्भिः प्रकारैरेकैकस्या विद्यायाश्चतुरवस्थत्वेन षट्पञ्चाशता भाव्यमिति चतुर्दशत्वाक्षेपोऽपि। तत्राचतुर्दशत्वमेव स्वयं ज्ञाता सन्कुतः कृतवानित्यहं न वेद्मीति कवेरात्मोक्तिरित्याशङ्क्य पुनः स्वयं वदति —चतुर्भिरधिका दशेत्यपनयो न चतुर्दशत्वस्य, किंतु चतस्रो दशा अवस्था अधीत्यादयो यासां ताश्चतुर्दशास्तासां भावस्तत्त्वम्। तदहं न जाने इति न। अपितु जाने एवेति काकुः। एतेन षट्पञ्चाशत्त्वं निरस्तम्। चतुर्भिरधिका दशेत्यपि निरस्तम्। यद्यपि क्षत्रियस्याध्यापने नाधिकारः, तथापि धनादि दत्त्वा ब्राह्मणद्वाराध्यापनं युक्तमिति न दोषः। एतेन चतुर्दशापि विद्यास्तस्य स्फुरन्तीत्युक्तम्। 'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥' इति याज्ञवल्क्यः। 'अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश॥' इति मनुः। 'दशाविर्धर्मचिन्तायां कैतवेऽपि विशेषणे' इति विश्वः। बोधशब्दस्योत्तरेण समासं कृत्वाधीतिशब्देन समासः। अन्यथा बोधस्य पूर्वनिपातः स्यात्। यद्वा—अधीतेरभ्यर्हितत्वात्पूर्वनिपातः। 'लट्' इत्यनुवर्तमाने पुनर्लड्ग्रहणात्प्रथमासामानाधिकरण्येऽपि शता। तद्योगे च 'न लोका–' इति षष्ठीनिषेधाद्दशा इति द्वितीया। एवं सर्वत्र ज्ञेयम्। चतुर्दशत्वमित्यत्र 'त्वतलोर्गुणवचनस्य' इति पुंवत्। गुणग्रहणेन जातिसंज्ञयोर्निवृत्तिः क्रियते, न शुक्लादिगुणविशेषप्रतिपत्तिः। तथा च—'भवति हि सफलत्वं वल्लभालोकनेन' इत्यादयः प्रयोगा दृश्यन्ते॥

उपवेदानामन्तर्भावनाधिक्य विद्यान्तरसंबन्धं वर्णयितुमाह—

अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।
अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्॥ ५॥

अमुष्येति॥ अमुष्य नलस्य विद्या मुख्याष्टादशत्वेनैव नवद्वयद्वीपपृथग्जयश्रियां जिगीषयेव। उत्प्रेक्षा। अष्टादशतामष्टादशप्रकारत्वमगाहत प्राप। यद्यपि विद्याया अष्टादशत्वं सत एवास्ति, तथापि तदष्टादशविधत्वमनेनाभ्यस्तमित्यभिसंधिः। नवानां द्वयमष्टादश। नवद्वयं च ते द्वीपाश्च तेषां पृथक्पृथग्भिन्ना या जयश्रियो जयसूचिकाः श्रियः। यद्वा—जयन्तीति जयाः सर्वोत्कर्षेण वर्तमाना याः श्रियस्तासां जेतुमिच्छया। एकया विद्ययैको द्वीपो जेतव्यः, इत्यष्टादशभिर्विद्याभिरष्टादश द्वीपश्रियः सुखेन जेतुं शक्या इत्यर्थः। यद्वा—अमुष्य या विद्या बुद्धिः साष्टादशत्वमगाहतेति पूर्ववदन्वयः। अष्टादशद्वीपानां जयश्रियां जिगीषयाष्टादश बुद्धिविशेषा जाता इत्यर्थः। अन्यथा दुष्करं द्वीपो जेतव्य इति। कुत एवममुष्यैव रसनाग्रे जिह्वाग्रे नर्तकीव नर्तकी स्फुरद्रूपा, नान्यस्येत्यर्थः। अष्टादश विद्या अस्यैव स्फुरन्ति स्मेत्यर्थः। नर्तकीत्य-

---

१ [illegible] । यथोक्तं कालिदासेन— [illegible] इति [illegible] । २ [illegible] ।

प्येका शिरोहस्तादिभिः षड्भिरङ्गैः ग्रीवाबाह्वादिभिः षड्भिः प्रत्यङ्गैः भ्रूनेत्रादिभिः षड्भिरु-पाङ्गैः, विस्तरं नीताष्टादशधा भवति । तथा विद्या अपि चतुर्दश पूर्वोक्ताः 'आयुर्वेदो धनु-र्वेदो गान्धर्वश्चार्थशास्त्रकम्' इति चतस्रः । एवमष्टादश । द्वीपानामष्टादशत्वमवान्तरलङ्कासिंह-लकादिभेदेन भागवतोक्तरीत्या 'अष्टादशद्वीपनिखातयूपः' इति कालिदासोक्त्या च ज्ञात-व्यम् । यद्वा—नवद्वयद्वीपानां भिन्ना या जयजनिता नलस्य श्रियस्तासां जेतुमिच्छया वेति लुप्तोत्प्रेक्षा । नलेनाष्टादश द्वीपा जितास्तेन तस्य तावत्यः श्रियो जातास्तासां जेतुमिच्छया विद्याप्यष्टादशतां प्राप्ता । श्रीसरस्वत्योः सहजविरोधात्सपत्न्योरिव । केव । अङ्गगुणेन षट्संख्या-गुणेन विस्तरं नीता विस्तारं प्राप्ता त्रयी त्रित्वसंख्याष्टादशत्वं प्राप्नोति । ज्योतिःशास्त्रे त्रित्वं षट्संख्यया गुणितमष्टादशतां लभते । तत्राङ्गशब्देन षट्संख्या गृह्यते । तया गुणनमा-वृत्तिः । यद्वा—त्रय्युद्धारोऽथर्ववेदः । स एकः, षडङ्गानि व्याकरणादीनि, गुणा अप्रधानानि पुराणन्यायमीमांसाधर्मशास्त्रायुर्वेदधनुर्वेदगान्धर्ववेदार्थशास्त्रलक्षणान्यष्टौ । तैर्विस्तरं नीता वेद-त्रयी यथा । अङ्गानि च गुणाश्चैतेषां समाहारोऽङ्गगुणं तेन । अथ च—स्वादुरसोत्पादनप्रका-रकथनद्वारा श्रुता सती लोकस्य रसनाग्रं जिह्वाग्रं नर्तयतीति रसनाग्रनर्तकी । नलः सूपका-रविद्याङ्गानामवयवभूतानां मधुराम्ललवणतिक्तकटुकषायाख्यानां षण्णां रसानां न्यूनाधिकस-मत्वरूपेण गुणेनाष्टादशतां प्राप । यथा मधुरद्रव्ये मधुरद्रव्यान्तरस्य न्यूनः प्रक्षेपः, तिक्तेऽ-धिकः, अम्ले समः, इत्यनेन प्रकारेण सर्वरसानां त्रैविध्येऽष्टादशत्वम् । यद्वा—अङ्गानां दु-ग्धदध्यादीनाम् । तथा च सूपशास्त्रम् 'दुग्धं दधि नवनीतं घोलवने तक्रमस्तुयुगम् । मण्डाट-विकहविष्यं विदलान्नं चेति विज्ञेयम् ॥ कन्दो मूलं शाखा पुष्पं पत्रं फलं चेति । अष्टादशकं मांसं भक्ष्याण्युक्तानि गिरिसुतया ॥' इति । दध्युदकं मस्त्वित्युच्यते, कणिशभवं व्रीह्यादि, शिम्ब्यादिभवं मुद्गादि, घण्टकभवं चणकादि । इदं त्रिविधं धान्यम् । भूचरखेचरजलचरभे-दात्त्रिविधं मांसम् । षड्रसाः । कन्दमूलफलनालपत्रपुष्पमयं षड्विधं शाकम् । इत्येवं धान्या-द्यङ्गगुणेन विस्तरं नीता इति केचित् । द्यूतावेशेन बहुभाषिणो नलस्य जिह्वाग्रनर्तकी विद्याक्ष-विद्याऽङ्गानां द्विकादीनां गुणेन तद्वशेन विस्तरं नीताष्टादशतां प्राप । चतुरङ्गद्यूते हि द्विक-त्रिकचतुष्कपञ्चकैर्मिलितैश्चतुर्दश भवन्ति । तथा चोड्डीयकचतुष्टयमेलनादष्टादश भेदा इति केचित् । सूपशास्त्रविदष्टादशद्वीपजिचायमित्यर्थः । नर्तकीत्यत्र 'शिल्पिनि ष्वुन्' । पित्त्वा-। जिगीषयेत्यत्र 'अप्रत्ययात्' इत्यप्रत्ययः । विस्तरमित्यत्र '—अशब्दे' इति [घञः,] 'ऋदोरप्' । त्रयीत्यत्र त्रित्वसंख्या इति पक्षे विस्तर इव विस्तरः । तमित्युपचारः ॥

...' इति मल्लिनाथविरचितजीवातुव्याख्या । २ 'अङ्गविद्यागुणनेन अष्टादशत्वम्' इत्युपाध्यायविश्वेश्वरभट्टारकव्याख्याने तु 'अङ्गानि वेदाश्चत्वारः' इत्याथर्वणस्य ... त्रयीत्वहानिः, त्रय्य(न्)न्तर्भावे तु नाष्टादशत्वसिद्धिरिति चिन्त्यम्'—इति जीवातुः ॥ ... तु षड्गुणनेनाष्टादशत्वसाधनमेव । तच्च त्रय्या एव गुणनेन भवति, चतुष्टय्या गुणने चतुर्विंशतित्वापत्तिरिति विश्वेश्वरव्याख्याने न दोषः ॥ ३ 'अत्रोपमालंकारः । जिगीषयेत्यत्राध्यवसायस्य सिद्धत्वादतिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।

इति स्यात्। तस्य संज्ञायां करणाधिकरणयोश्च विधानात्प्रकृते तदभावादेव। यद्वा—अवतरतीत्यवतरः। त्रिनेत्रश्चासाववतरश्चेति पचाद्यचि ज्ञेयम्। अवतरत्वस्य बोधिकेति शेषपष्ठ्याः समासः, न तु कर्मषष्ठ्याः। 'तृजकाभ्यां कर्तरि' इति निषेधात्। नचैवं सति निषेधवैयर्थ्यम्। कारकषष्ठ्याः समासे हि कृदुत्तरपदप्रकृतिस्वरप्रसङ्गः। शेषपष्ठ्यास्तु समासे समासान्तोदात्तत्वमिति स्वरविशेषस्य सत्त्वात्। एतेन 'जनिकर्तुः प्रकृतिः', 'तत्प्रयोजको हेतुश्च' इति निर्देशो व्याख्यातः। अनित्यः षष्ठीसमासनिषेध इत्यन्ये। यद्वा—बोधयतीति बोधा इति पचाद्यचि पूर्वेण षष्ठीसमासे समासात्स्वार्थिके कनि 'प्रत्ययस्थात्कात्पूर्वस्यात इत्–' इतीत्वम्। अवतरत्वं बोधयतीति 'कर्मण्यण्' इत्यणि ङीपि कनि 'केणः' इति ह्रस्वत्वमिति वा समर्थनीयम् ॥

पदैश्चतुर्भिः सुकृते स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे।
भुवं यदेकाङ्घ्रिकनिष्ठया स्पृशन्दधावधर्मोऽपि कृशस्तपस्विताम् ॥ ७ ॥

पदैरिति ॥ अमुना नलेन चतुर्भिः पदैश्चरणैः सत्यास्तेयशमदमरूपैस्तपोदानयज्ञज्ञानरूपैर्वा सुकृते धर्मे स्थिरीकृते निश्चलीकृते सति कृते सत्ययुगे के जनास्तपो धर्मं न प्रपेदिरे न प्रापुः। अपि तु सर्वे धर्मपरा बभूवुः। कृते युगे धर्मस्य चतुष्पात्त्वे सिद्धेऽप्यधर्मस्याप्येकस्य पादस्य सत्त्वाशङ्कायामनेनाधर्मस्यातितरां कृशीकरणद्वारा स्थिरकरणाच्चिप्रत्ययोपपत्तिः। कुतोऽवगतमेतदित्याह—यद्यस्माद्धर्मविरुद्धोऽधर्मोऽपि तपस्वितां धर्मवत्तां दधौ दधार। अन्ये तपश्चक्रुरिति किमाश्चर्यम्। किं कुर्वन्। एकाङ्घ्रिकनिष्ठया भुवं स्पृशन्। एकोऽङ्घ्रिर्यस्यां सा एकाङ्घ्रिका, सा चासौ निष्ठा स्थितिश्च तया, एकचरणकनिष्ठिकया वा भुवं स्पृशन्। अत एव कृशो दुर्बलः क्षीणः। धर्माधर्मौ चतुष्पादौ। धर्मस्य ज्ञानादयश्चत्वारः पादाः, अधर्मस्य तद्विपरीताः। तत्र कृतयुगे धर्मश्चतुष्पात्, अधर्म एकपात्। अतश्चाधर्मन्यूनत्वमेवाधर्मस्य कृशत्वम्। अथ च दीनत्वम्। अन्योऽपि महांस्तपस्वी पूर्वावस्थो भवति। 'नलस्तु कृतयुगे नाभूत्' इति कश्चित्। तच्च सर्वपुराणेषु कृतयुग एव नलसंभवस्योक्तत्वात् 'अवश्यंभाविभावानां प्रतीकारो भवेद्यदि। प्रतिकुर्युर्न किं नूनं नलरामयुधिष्ठिराः ॥' इति युगक्रमनिर्देशाद्विरुद्धमिति ज्ञातव्यम्। तन्मते शोभनाकृतिः सुकृतिस्तस्याः [illegible] चतुर्भिश्चरणैर्नलेन त्रेतायामपि कृते कृतयुगे स्थिरीकृते सति धर्मस्य बाहुल्या[illegible]युगमपि कृतयुगमेवेति सविसर्ग[2] पाठमङ्गीकृत्य व्याख्येयम्। यद्वा—अनेन त्रेतायां [illegible]तुर्भिः पादैर्धर्मे स्थिरीकृते सति तेन च कृते कृतयुगे जाते सति के न तपः प्रपेदिरे। त्र चतुष्पाद्धर्मस्तदेव कृतयुगम्। 'तपस्वी चानुकम्पार्हे' इति विश्वः। तपस्वीति 'तपःसहस्राभ्याम्–' इति विनिः[3] ॥

---

१ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी। 'तृतीयां दृशन्' इति रूपकम्। 'नलस्य विभूतिभेदेऽप्यभेदोक्तेरतिशयोक्तिः। अत्रोक्तयो रूपकातिशयोक्त्योः संकरः' इति जीवातुः। २ एतच्च 'खर्परे शरि वा विसर्गलोपः' इति वार्तिकविस्मृतिमूलकम्। सविसर्गपाठे सप्तम्यन्तश्लेषोऽनुपपन्नः स्यात्। ३ 'अत्रानुप्रासः शब्दालंकारः। अनुमानमर्थालंकारः। 'अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः। अधर्मोऽपि तपस्वितां दधाविति विरोधाभासः' इति साहित्यविद्याधरी। अत्रार्थापत्तिरलंकारः 'एकत्र वस्तुनो भावाद्यत्र वस्त्वन्यथा भवेत्। कैमुत्यन्यायतः सा स्यादर्थापत्तिरलंक्रिया ॥' इति स्मरणादिति जीवातुः।

यदस्य यात्रासु बलोद्धतं रजः स्फुरत्प्रतापानलधूममञ्जिम ।
तदेव गत्वा पतितं सुधाम्बुधौ दधाति पङ्कीभवदङ्कतां विधौ ॥ ८ ॥

यदस्येति ॥ अस्य नलस्य यात्रासु दिग्विजयेषु यद्बलेन सैन्येनोद्धतं रजस्तदेव तद्रज एव विधौ चन्द्रेऽङ्कतां कलङ्कत्वमधुनापि दधाति । किंभूतं रजः—स्फुरन्प्रकाशमानो यः प्रतापः स एवासह्यत्वादनलोऽग्निस्तस्य यो धूमस्तस्य मञ्जिमेव सौन्दर्यमिव मञ्जिमा यस्य । यथा—इतो गत्वा सुधाम्बुधौ सुधासमुद्रे पतितं सदत एव पङ्कीभवत्कर्दमीभवत् । सुधाम्बुधेश्चन्द्र उत्पन्नस्तत्संबद्धः पङ्कश्चन्द्रेऽपि लग्नः, स एव कलङ्क इत्यर्थः । आसमुद्रं यात्रा सेनाबाहुल्यं चानेन द्योत्यते । सुधाम्बुधिः क्षीरसमुद्रः । सुधाम्बुधावमृतसमुद्रे इति विधुविशेषणं वा । रजसः पङ्कीभवनयोग्यत्वार्थमुक्तम् । अथ च यत्पतितं पातित्यहेतुत्वादन्यस्य निर्मलस्यापि स्वसंसर्गान्मालिन्यं करोति, तदेव दधातीति काकुर्लुप्तोत्प्रेक्षा वा । 'वर्णदृढादिभ्यः—' इति दृढादेराकृतिगणत्वान्मञ्जिमेत्यत्रेमनिच् । 'द्वितीया श्रितातीतपतित—' इति पतितशब्दः साधुः ॥

स्फुरद्धनुर्निस्वनतद्घनाशुगप्रगल्भवृष्टिव्ययितस्य संगरे ।
निजस्य तेजःशिखिनः परश्शता वितेनुरिङ्गालमिवायशः परे ॥ ९ ॥

स्फुरदिति ॥ परश्शताः शतात्परेऽनन्ताः परे शत्रवः । (दिग्देशकालवाचिनामेव पूर्वादिशब्दानां सर्वनामत्वात्कथं शत्रुवाचिनोः परापरशब्दयोः सर्वनामत्वमिति । अत्र कैयटादयः—देशवाचितया व्यवस्थाविषययोरेव परापरशब्दयोरुपचाराच्छत्रौ प्रतिवादिनि प्रयोगमाहुः । वस्तुतस्तु परापरशब्दयोर्देशान्तरनिष्ठत्वादिकमेवार्थः । शत्रुत्वादिकं त्वार्थिकोऽर्थः ।) संगरे सङ्ग्रामे निजस्य स्वकीयस्य तेजःशिखिनः प्रतापाग्नेरिङ्गालमिव दग्धकाष्ठमिवायशो वितेनुर्विस्तारयामासुः । इङ्गालो भाषाशब्दः । कविनिर्देशो ध्येयम्, अयशः श्यामं वर्ण्यते । कथंभूतस्य तेजःशिखिनः—स्फुरदिति । स्फुरन्प्रकाशमानो धनुर्निस्वनः कोदण्डशब्दो यस्य एवंविधश्चासौ स नलश्च स्फुरद्धनुर्निस्वनः तस्य नलस्य घना निबिडा ये आशुगा बाणास्तेषां प्रगल्भा प्रौढासौ या वृष्टिस्तया व्ययितस्य निर्वापितस्य । स्फुरन्धनुर्निस्वनो यस्यामिति वृष्टिविशेषणं वा । तस्य नलस्य । अन्यत्पूर्ववत् । यद्वा—धनुर्निस्वनं तनोति विस्तारयति, तमवति प्राप्नोति वा धनुर्निस्वनतत् । स्फुरन्प्रकाशमानश्चासौ धनुर्निस्वनतश्च । महत्त्वादयमेवेति । तस्य । अन्यत्पूर्ववत् । यद्वा—स्फुरन्तौ धनुर्निस्वनौ धनुःशिञ्जितौ यस्य स तथा (स प्रसिद्धः) स एव घनो मेघस्तस्याशुगा [illegible] प्रौढा च । अन्यत्पूर्ववत् । शिखिपक्षे तु (यद्वा) स्फुरन्ती इन्द्रधनुर्विद्युतौ येषु ते च घना मेघास्तेषामाशुगा...

---

१ 'पङ्कीभवदङ्कतो [illegible] २ [illegible] ३ [illegible]

मिनी प्रौढा, आशुगेन वायुना वा प्रौढा या वृष्टिस्तया व्ययितस्य विनाशं प्रापितस्य । निस्वनं तन्वन्तीति निस्वनततः, स्फुरद्धनुर्युक्ता निस्वनततश्च ये घना मेघा इति वा । तेजःप्रधानस्याग्नेरिङ्गालः श्याम एव भवति । सर्वे राजानस्तेन जिता इत्यर्थः । 'आशुगौ वायुविशिखौ' इत्यमरः । निस्वनं तनोतीति निस्वनतदित्यत्र पक्षे क्वौ 'गमः क्वौ' इत्यत्र 'गमादीनामिति वक्तव्यम्' इति वचनादनुनासिकलोपे तुक् । संज्ञापूर्वकत्वाच्च 'नहिवृति-' इति दीर्घाभावः । तयतेर्वा क्विपि 'लोपो व्योर्वलि' इति यलोपे तुक् । शतात्परे इति विगृह्य 'पञ्चमी' इति योगविभागाद्बाहुलकाद्वा समासे 'राजदन्ता-' इति परनिपाते पारस्करादित्वात्सुटि ष्टुत्वे च 'परश्शताः' इति सिद्धम् ॥

अनल्पदग्धारिपुरानलोज्ज्वलैर्निजप्रतापैर्वलयज्ज्वलद्भुवः ।
प्रदक्षिणीकृत्य जयाय सृष्टया रराज नीराजनया स राजघः ॥ १० ॥

अनल्पेति ॥ स राजघो राज्ञो हन्ति न क्षुद्रान्, राज्ञां हन्ता नलो नीराजनया आरार्तिकेन रराज शुशुभे । किंभूतो नलः—जयाय विजयाय भुवो वलयं मण्डलं प्रदक्षिणीकृत्य स्थितः । किंभूतया नीराजनया—सृष्टया कृतया । पुरलोकैरिति शेषः । किंभूतं वलयम्—निजप्रतापैः स्वकीयैस्तेजोभिर्ज्वलत्प्रकाशमानम् । किंभूतैर्निजप्रतापैः-अनल्पानि बहूनि दग्धान्यरिपुराणि वैरिनगराणि यैस्तेऽनल्पदग्धारिपुराः, ते च तेऽनला वह्नयस्तैरुज्ज्वला दीप्यमानास्तैः । भूरितरैरित्यर्थः । तेजसस्तेजोन्तरसंयोगे भूयस्त्वं भवति । अनलवदुज्ज्वलैरिति वा । यद्वा—किंभूतया नीराजनया—उक्तविशेषणैर्निजप्रतापैरेव सृष्टया नलेनैव कृतया । किंभूतं वलयम्—ज्वलन्नलेनैव देदीप्यमानम् । शोभमानमित्यर्थः । अत एव राज्ञामभावो नीराजं नीराजकरणं नीराजना इत्यत्र 'अव्ययं विभक्ति-' इत्यभावेऽव्ययीभावः । 'अनश्च' इति टजन्तात् 'तत्करोति-' इति ण्यन्ताद्युच् । प्रचुरज्वालितवैरिनगराग्निवद्दीप्तैः स्वीयक्षात्रतेजोभिर्दीप्तं भूमण्डलं जयाय जेतुं परिभ्रम्य स्वैरेव प्रतापैः सृष्टया नीराजनया राजाभावकरणेन स रेजे इति भावः । जयाय भूमण्डलं परिक्रम्य यद्राजाभावकरणं तेन रेजे इति वा । यद्वा—ज्वलत्प्रकाशमानं जयाय जेतुं प्रदक्षिणीकृत्य स्वीयक्षात्रतेजोभिः कृतया नीराजनया आरार्तिकविधानेन स रेजे । प्रतापैर्नीराजनयेति व्यस्तरूपकं वा । अत्र ज्वलद्भूमण्डलं जेतुं प्रदक्षिणीकृत्य सृष्टया, अर्थान्नलेनैवेति व्याख्येयम् । यद्वा—स्वीयतेजोभिः पुरलोकैर्वा जयस्याय आगमने कृतया, जये सत्ययेन शुभावहविधिना हेतुना कृतयेति वा । (गमनागमनयोर्नीराजनं क्रियत इति लोकाचारः । नलस्य जयं प्राप्तुं कृतया इति वा । जयाये जयागमने सृष्टया । अस्मिन्पक्षे पुरा लोकैः कृतया इत्यन्वयः । विजयाय लोकैः सृष्टया नीरस्य शान्त्युदकस्याजना क्षेपणा तया वा)। यद्वा—नलस्योज्ज्वलैः शृङ्गारभूतैर्निजप्रतापैः, अनल्पानि दग्धान्यरिपुराणि यासु ता अनल्पदग्धारिपुराः । अत एव ज्वलन्तीर्देदीप्यमाना भुवो वैरिदेशान्वलयन्स्वाधीनीकुर्वन् । यद्वा—किंभूतं वलयम्—अनल्पा दग्धारयो यस्मिंस्तदनल्पदग्धारि । अस्मिन्पक्षे

१ 'अत्रोपमा रूपकं चालंकाराविति साहित्यविद्याधरी । रूपकोत्प्रेक्षयोः संकरः' इति जीवातुः । कुत्रचित्त्र दृश्यतेऽयं विशेषचिह्नितः पाठः ।

पुरः स्थया कृतया इत्यन्वयः । यद्वा—किंभूतो नलः—अनल्पा दग्धा आ समन्तात् रिपुराजो रिपुद्रव्याणि येन स तथा । ‘भृङ्गारः शुचिरुज्ज्वलः’ इत्यमरः । वल्यज्ज्वलादित्यत्र पक्षे परसवर्णः । पक्षान्तरे तु क्तुलम् । ‘राजघ इत्युपसंख्यानम्’ इति निपातितः । जयायेति ‘तुमर्थाच्च–’ इति चतुर्थी । यद्वा—स राज्ञां हन्ता नलः अजया लक्ष्म्या आय विष्णवे सृष्टया नीराजनया रेजे । राज्ञो विष्णुरूपत्वाल्लक्ष्म्या नीराजना क्रियते । यतः कारणात्प्रदक्षिणः प्रकृष्टा दक्षिणा दातृत्वं येषां ते प्रदक्षिणा वदान्यास्ते सन्ति यस्य स प्रदक्षिणी । अतिवदान्या अप्येतस्यानुचराः इत्ययं वदान्यतम इत्यर्थः । यद्वा प्रकृष्टदक्षिणा ज्योतिष्टोमादयो यस्य सन्तीति प्रदक्षिणी । अत एव कृती कर्मकुशलः ॥

निवारितास्तेन महीतलेऽखिले निरीतिभावं गमितेऽतिवृष्टयः ।
न तत्यजुर्नूनमनन्यविश्रमाः प्रतीपभूपालमृगीदृशां दृशः ॥ ११ ॥

निवारिता इति ॥ अतिवृष्टय ईतयः प्रतीपभूपालमृगीदृशां प्रतीपा वैरिणो ये भूपाला राजानस्तेषां मृगीदृशो नायिकास्तासां दृशो नेत्राणि नूनं प्रायेण न तत्यजुर्न मुमुचुः । नूनमुत्प्रेक्षायां वा । ईतयस्तस्य राष्ट्रे न सन्तीत्यर्थः । किंभूता अतिवृष्टयः—तेन नलेनाखिले महीतले निवारिताः प्रतिषिद्धाः । निष्कासिता इत्यर्थः । किंभूते महीतले—निरीतिभावं निर्गता ईतयो यस्मात्तन्निरीति तस्य भावस्तम् । गमिते प्रापिते । अतः अनन्यविश्रमा न विद्यतेऽन्योऽन्यत्र वा विश्रमो विश्रामस्थानं यासां ताः । अनेन सर्वेऽपि शत्रवो निहता इत्युक्तम् । यच्च येन निष्कास्यते तत्तद्वैरिणमाश्रयति । स्त्रीणां च स्त्रिय एव शरणमित्युक्तिः । ‘अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः ॥’ विश्रम इत्यत्र ‘नोदात्तोपदेशस्य–’ इति वृद्धिनिषेधः ॥

सितांशुवर्णैर्वयति स्म तद्गुणैर्महासिवेम्नः सहकृत्वरी बहुम् ।
दिगङ्गनाङ्गावरणं रणाङ्गणे यशःपटं तद्भटचातुरी तुरी ॥ १२ ॥

सितेति ॥ तद्भटचातुरी तद्गुणैः रणाङ्गणे यशःपटं वयति स्म । तस्य नलस्य भटाः । यद्वा—ते चासौ भटश्च तेषां तस्य वा चातुरी दुर्धर्षत्वं सैव तुरी [illegible] तस्य नलस्य गुणैः, तैः प्रसिद्धैर्वा शौर्यादिगुणैः । अथ च गुणैस्तन्तुभिः सङ्ग्रामाङ्गणे यशोरूपं पटं विस्तारितवती । निरमासीदित्यर्थः । किंभूतैर्गुणैः—सितांशुश्चन्द्रस्तद्वद्वर्णः शुक्लरूपं येषां तैः । धवलैरित्यर्थः । कीदृशी—महान्योऽसिः खड्गः स एव वेमा वयनकाष्ठं तस्य सहकृत्वरी सहकारिणी । किंभूतं यशःपटम्—बहुं महापरिमाणम् । अत एव दिश एवाङ्गनास्तासामङ्गावरण-

---

१ [illegible] इति साहित्यविद्याधरी । [illegible] इति [illegible] । २ [illegible] साहित्यविद्याधरी ।

वरणमाच्छादकम्। सर्वदिग्व्याप्तमपि यश आसीदित्यर्थः। 'परमरिणि तेजस्वत्वात्तामाशु कर्तुं प्रभवति हि विपक्षोच्छेदनसारोऽपि' इति न्यायेन भटैरेव नलशौर्यं विनैव वैरिणो हताः। किन्त्वपि यशो नलस्याकारीति भावः। तन्तुवायकुर्वीः रजकाधारिणं कुविन्दादर्शी। सा अन्ये-ष्वागारकलनेकं पटं वयति। इयं तु तद्विपरीता इति व्यतिरेकः। वेमा तुरिः। वयति स्म इति 'लट् स्मे' इति भूते लट्। सदकलरीति 'राजनि युधि कृञः' इति वर्तमाने 'सहे च' इति क्वनिपि 'वनो र च' इति ङीप्। चातुर्येण चातुरी। भावः निरवधीर् ॥

प्रतीपभूपैरिव किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता।
अमित्रजिन्मित्रजिदोजसा स यद्विचारदृक्चारदृगप्यवर्तत ॥ १३ ॥

प्रतीपेति ॥ विरुद्धधर्मैरपि मिथोविरोधिस्वभावैरपि धर्मैः स्वभावैः ततो नलाद्भिया भयेन भेत्तृता विरुद्धत्वमुज्झिता किम्। केरिव—प्रतीपभूपैरिव प्रतिकूलराजभिर्यथा भेत्तृतो-पजापकारित्वं त्यक्ता। उपजापोऽन्तर्भेदः। कुत एतज्ज्ञातमत आह—यद्यस्मात्स नल ओजसा अमित्रजिदमित्रान्वैरिणो जयतीत्यमित्रजित्। तथा ओजसा (तेजसा) मित्रजित् (सूर्यमपि जयतीति) अवर्ततासीत्। स चारदृगपि विचारदृगवर्तत। चारा एव दृग्यस्य स चारदृक्। विगता चारा एव दृग्यस्य स विचारदृक्। योऽमित्रजित्स मित्रजित्कथम्, यश्चारदृक्स विचा-रदृक्कथमिति विरुद्धधर्मास्तैर्भेत्तृतोज्झिता। कथम्— तेजसा मित्रजित्तेजसा मित्रं सूर्यं जयतीति मित्रजित्, तथा विचारः शास्त्रमेव, विवेको वा दृग्यस्य स विचारदृक् चारा एव दृग् यस्य स चारदृक्। अपिश्चार्थे विरुद्धपक्ष उभयत्रापि योज्यः। अथ च विरुद्धत्वम्—अमित्रजियः स मित्रजित्कथम्, असुहृदं यो जयति स सुहृदं कथं जयति। अथ च यः असूर्यं जयति स सूर्यं कथं जयतीति विरोधः। तत्परिहारः पूर्वव्याख्यानात्। विचारं पश्यतीति विचारदृग्वा। 'चारैः पश्यन्ति राजानः' इति। एतेन शत्रुजित्त्वं तेजस्वित्वं शास्त्रमार्गगामित्वं चोररक्षणत्वं च व्यक्तीकृतम्। एतेन विजिगीषुत्वं नलस्य द्योतितम् 'अरिर्मित्रमरेर्मित्रं मित्रमित्रमतः परम्। तथारिमित्रमित्रं च विजिगीषोः पुरःसराः ॥ पार्ष्णिग्राहस्ततः पश्चादाक्रन्दस्तदनन्तरम्। आसा-रावनयोश्चैव विजिगीषोश्च पृष्टतः ॥ अरेश्च विजिगीषोश्च मध्यमो भूम्यनन्तरः। अनुग्रहे संह-तानां व्यस्तानां च वधे प्रभुः ॥' इति द्वादशराजमण्डली तत इति 'भीत्रा—' इत्यपादानत्वम् ॥

तदोजसस्तद्यशसः स्थिताविमौ वृथेति चित्ते कुरुते यदा यदा।
तनोति भानोः परिवेषकैतवात्तदा विधिः कुण्डलनां विधोरपि ॥१४॥

तदोजस इति ॥ विधिर्ब्रह्मा यदा यदा इति पूर्वोक्तं चित्ते मनसि कुरुते। विचारयती त्यर्थः। तदा तदा भानोः सूर्यस्य विधोरपि चन्द्रस्य च परिवेषकैतवात्परिवेषव्याजात्कुण्डलनां वैयर्थ्यसूचकं रेखामण्डलं करोति। इतीति किम्—तदोजसो नलप्रतापस्य, तद्यशसो नलयश-सश्च स्थितौ सत्यामिमौ सूर्याचन्द्रमसौ वृथा निष्प्रयोजनाविति, तदोजसस्तद्यशसश्च हेतोरिमौ वृथा स्थिताविति वा। सूर्याचन्द्राभ्यां यत्करणीयं तन्नलतेजोयशोभ्यामेव क्रियते। सूर्यतुल्यं

---

१ 'अत्र रूपकमलंकारः गुणैरिति श्लिष्टशब्दः' इति साहित्यविद्याधरी। २ 'अत्र विरोधालंकारः' 'आभासत्वे विरोधस्य विरोधालंकृतिर्मता' इति लक्षणात्। एतदुपजीवनेन विरुद्धधर्माध्यासस्य चाश्रय-भेदकत्वादुत्प्रेक्षा। सा च प्रतीपभूपैरिवेत्युपमानुप्राणितेति त्रयाणां संकरः' इति जीवातुः।

चन्द्रतुल्यं चास्तिन्द्वदनम् । परिवेषस्य कादाचित्कत्वात् 'यदा यदा' इत्युक्तम् । कैतवादिति भावे हुवादित्वादण् । नृपालिखितग्रन्थस्य कुण्डलनया लोपः क्रियते तथेत्यर्थः ॥

तस्य वदान्यत्वं वर्णयति—

अयं दरिद्रो भवितेति वैधसीं लिपिं ललाटेऽर्थिजनस्य जाग्रतीम् ।
मृषां न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः ॥ १५ ॥

अयमिति ॥ स नृपो नलोऽर्थिजनस्य याचकजनस्य ललाटे जाग्रतीं वैधसीं ब्राह्मीं लिपिं मृषा मिथ्या न चक्रे, किंतु यस्माद् ब्रह्मणा लिखितत्वात्सत्यामेव चकार । इतीति किम्—अयं याचकलोको दरिद्रो निर्धनो भविता भावीति वैधसी लिपिः । तर्हि तस्यानौदार्यत्वप्रतीतेः कथं वदान्यत्वमित्याशङ्क्योक्तिभङ्ग्या समाधत्ते—किं कृत्वा—दारिद्र्यदरिद्रतां प्रणीय दारिद्र्यस्यैव दरिद्रताम् । राहित्यमित्यर्थः । तां प्रणीय निर्माय । वैधसीं लिपिं मृषा न चकारेत्यर्थः । यतोऽल्पितकल्पपादपः अल्पितोऽल्पीकृतः कल्पपादपः कल्पवृक्षो येन । कथम्—कल्पवृक्षो याचितमेव ददाति, नलस्त्वयाचितमपि । अतो वदान्यतम इत्यर्थः । नलराज्ये कोऽपि दरिद्रो नाभूदित्यर्थः । यद्वा—अकल्पितं धनं दत्त्वा ब्राह्मीं लिपिं मृषां न चक्रे, अपि तु कृतवानेवेति काकुः । अल्पित इति 'तत्करोति–' इति ण्यन्तान्निष्ठा ॥

प्रकारान्तरेण पुनरपि नितरां वदान्यत्वमाह—

विभज्य मेरुर्न यदर्थिसात्कृतो न सिन्धुरुत्सर्गजलव्ययैर्मरुः ।
अमानि तत्तेन निजायशोयुगं द्विफालबद्धाश्चिकुराः शिरःस्थितम् ॥ १६ ॥

विभज्येति ॥ तेन नलेन वत्सलात्करणाभ्यां फलाभ्यां भागाभ्यां बद्धः संयमिता-श्चिकुराः केशा एव निजं स्वीयमयशस्तोऽकीर्तियुगलमानन्यमन्यत । शिरसि सीमन्तलोमपदमार्गे स्थिताः केशा न भवन्ति, किंत्वकीर्तियुगमेव । तत्किम्—यदनेन नलेन मेरुर्हेमाद्रि-र्विभज्य खण्डशो विधायार्थिसाद्याचकायत्तोऽस्मदधीनो देयो वा न कृतः । तथा सिन्धुः समुद्र उत्सर्गजलव्ययैर्दाने क्रियमाणे ये जलव्यया जलदानानि तैर्मरुर्निर्जलदेशो न कृतः । दानं हि जलपूर्वकं भवति । यद्वा—मरुरुत्सर्गजलव्ययैः सिन्धुर्न कृतः । तदकरणकलङ्कभयवशादेवाने द्विफालबद्धाः केशा एव जाता इत्यर्थः । सर्वस्वदानेऽपि याचकेष्टमपि न कृतं तदकरणे न तुतोषेति भावः । एतेनास्यादर्शोऽपि नास्तीति सूचितम् । [illegible]—'[illegible] शिरसि स्थिता' इति । अर्थिसादित्यत्र 'तदधीनवचने,' 'देये त्रा च' इति साति: । फालशब्दः पर्यायः ॥

---

१ '[illegible] कुण्डलनोल्लेखेन [illegible] । [illegible] अत्र [illegible] । [illegible] न भवति, किंतु [illegible] कुण्डलना [illegible] इति साहित्यविद्याधरी । २ '[illegible] इति साहित्यविद्याधरी । '[illegible]' इति जीवातुः ।

अजस्रमभ्यासमुपेयुषा समं मुदैव देवः कविना बुधेन च ।
दधौ पटीयान्समयं नयन्नयं दिनेश्वरश्रीरुदयं दिने दिने ॥ १७ ॥

अजस्रमिति ॥ अयं देवो राजा नलो दिने दिने प्रतिदिनमुदयमधिकामभिवृद्धिं दधौ । किं कुर्वन्—कविना काव्यकर्त्रा बुधेन विदुषा वैयाकरणेन च समं सह मुदैव हर्षेणैव समयं कालं नयन्गमयन् । किंभूतेन कविना बुधेन च—अजस्रं सर्वदाभ्यासं काव्यकरणशास्त्रमनन-व्यसनमुपेयुषा प्राप्तवता । 'अभ्याशम्' इति पाठे नलसांनिध्यम् । कीदृशः—पटीयान्कवि-त्वाद्यभ्यासवान्, आक्षेपादिसमर्थश्च । पुनः किंभूतः—दिनेश्वरश्रीर्दिनेश्वरः सूर्यस्तद्वच्छ्रीः शोभा यस्य । अत एव दिनेश्वरोऽपि कविना शुक्रेण बुधेन चन्द्रपुत्रेण सह प्रातरादिसमयं कुर्वन्पटीयांस्तेजस्वी तमोनाशसमर्थः प्रतिदिनमुदयं धत्ते । 'बुधशुक्रौ सदा पूर्वोत्तरराशिस्थौ' इति ज्योतिर्विदः । यद्वा—ताभ्यां समं समयं सम्यगम् अयं शुभावहविधिं यन्प्राप्नुवन्नयं प्रतिदिनमुदयं न दधौ, अपितु दधावेव । 'अभ्यासो व्यसनेऽन्तिके' इति विश्वः । अजस्र-मिति नञ्पूर्वाज्जसेः 'नमिकम्पि–' इति रः । उपेयुषेति 'उपेयिवाननाश्वाननूचानश्च' इति साधुः । उपेयुषेत्यादौ सममिति सहार्थयोगे तृतीया ॥

तस्य सामुद्रिकलक्षणवत्त्वमाह—

अधोविधानात्कमलप्रवालयोः शिरःसु दानादखिलक्षमाभुजाम् ।
पुरेदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया ॥ १८ ॥

अधोविधानादिति ॥ किमिति संभावनायाम् । वेधसा ब्रह्मणास्य नलस्य पदं चरण इति हेतोरूर्ध्वरेखया लक्षणभूतयाङ्कितं चिह्नितं किम् । इतीति किम्—इदं नलपदं कमलप्र-वालयोः पद्मपल्लवयोः कमलविद्रुमयोर्वा अधोविधानादरुणत्वस्निग्धमृदुत्वैरधःकरणाद्धिक्कारात्, तथा—अखिलक्षमाभुजां समस्तभूभृतां शिरःसु दानात्स्थापनात्क्रमेणोर्ध्वमुत्कृष्टमुपरि च पुरा भवति भविष्यति । 'यावत्पुरा–' इत्यादिना लट् । राज्ञां शिरःसु दानं नामाक्रम्य वर्तनम् ॥

तस्य वयःसंधिमाह—

जगज्जयं तेन च कोशमक्षयं प्रणीतवाञ्शैशवशेषवानयम् ।
सखा रतीशस्य ऋतुर्यथा वनं वपुस्तथालिङ्गदथास्य यौवनम् ॥ १९ ॥

जगदिति ॥ अयं नलः शैशवशेषवाञ्शैशवस्य शेषो विद्यते यस्यैवंभूतः षोडशाब्ददेशीयो समग्रस्य भूमण्डलस्य जयं विजयं प्रणीतवान्कृतवान् । तेन च विजयेन कोशं भाण्डा-[illegible]ं परिपूर्णं कृतवान् । तेन चेति पदेनानुषङ्गिकत्वं लक्षणया द्योत्यते । दानशूरस्य [illegible]मेवानुषङ्गिकं, न तु मुख्यमिति भावः । नत्वव्ययभावत्वेन [illegible] । एतेन शत्रुराहित्यं सूचितम् । दमयन्तीलाभस्त्ववशिष्यते । अथ जगज्जयानन्तरं

१ 'अत्रोपमाश्लेषसहोक्त्योऽलंकाराः' इति साहित्यविद्याधरी । 'दिनेश्वरश्रीरिव श्रीर्यस्य स इति [illegible]लंकारः । अत्र निदर्शनाश्लेषयोः संकरः' इति जीवातुः । २ 'अत्रोत्प्रेक्षालंकारः' । 'संभाव-नमथोत्प्रेक्षा' इति साहित्यविद्याधरी । ३ 'कोशस्याक्षयत्वमपरिमितत्वेनैव, न तु कृपणभावेनेति' सुखावबोधा ।

यौवनं तारुण्यमस्य वपुः शरीरं तथालिङ्गत्। अयं यौवनं प्रापेत्यर्थः। शरीरं कर्तृ यौवनं कर्मीभूतं प्रापेति वा। अनेन नलवपुरेव यौवनमलंकृतं न तु तत्तेन। यथा रतीशस्य कामस्य सखा मित्रमृतुर्वसन्तो वनमाश्लिष्यति, तथा स्वत एव रमणीयं वनं वसन्त उद्दीपयति तथा यौवनं कर्तृ शरीरं कर्म उद्दीपयति स्म। शरीरमपि सौन्दर्यात्कामस्य मित्रम्। रतीशस्य ऋतुरित्यत्र 'ऋत्यकः' इति प्रकृतिभावः॥

शरीरवर्णनमेव प्रक्रमते—

अधारि पद्मेषु तदङ्घ्रिणा घृणा क्व तच्छयच्छायलवोऽपि पल्लवे।
तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः॥२०॥

अधारीति॥ तदङ्घ्रिणा तच्चरणेन पद्मेषु कमलेषु घृणा जुगुप्सा दया वाधार्यधारि। पद्मो नलचरणात्, नलचरणस्य वा मा येषाम्, सामुद्रिकलक्षणत्वेन पदि मान्तीति वा। मच्छोभालानेन यानि सलक्ष्मीकानि मामाश्रित्यैव यानि वर्तन्ते तैः सह स्पर्धा मया कथं कार्या। क्रमेण स्वतो निःशोभत्वाज्जुगुप्सा, आश्रितत्वाच्च करुणा। पद्मात्तच्चरणशोभाधिकेत्यर्थः। पल्लवे प्रवाले तच्छयच्छायलवोऽपि तस्य नलस्य शयो हस्तस्तस्य छाया कान्तिस्तच्छयच्छायं तस्य लवो लेशोऽपि क्व। कुतः—यतः पदो लवः पल्लवः शरीरनिकृष्टावयवचरणशोभालेशो यत्र वर्तते तत्र शरीरोत्कृष्टावयवपाणिशोभालेशोऽपि कथम्। हीनेन सह साम्यायोगादित्यर्थः। एतेन पल्लवात्तत्करशोभाधिकेत्यर्थः। किंच शारदः शरदि भवो निर्मलः पार्विकः पर्वणि पूर्णिमायां भवः संपूर्णकलः शर्वरीश्वरो निशानाथश्चन्द्रस्तस्य नलस्यास्यं मुखं तस्य दास्येऽपि सेवकत्वेऽप्यधिकारितां पात्रत्वं न गतो न प्राप्तः किमुत तत्साम्यम्। चन्द्रस्य शरत्पूर्णिमासंयोगाद्रमणीयत्वम्, आस्यस्य तु स्वत एव। शारदत्वादधृष्टत्वादग्रे स्थातुमशक्यत्वात्साम्यं न लेभे इति वा रमणीयनायकस्य रमणीयेनैव दासेन भाव्यम्। न चास्य पूर्वोक्तप्रकारेण तुल्यत्वम्। अतो दासत्वमपि न प्राप्नोति भावः। निर्मलत्वात्संपूर्णत्वात्कलङ्कसाहचर्यत्वाद्, स्त्रीप्रधानत्वाद्वा। अस्य चतुःषष्टिकलत्वात्। 'शारदः पीतमुद्गे स्यात्छालीनेऽप्रतिभे नवे'। तच्छयच्छाय इति 'विभाषा सेना—' इत्यादिना नपुंसकत्वम्। शारद इति भवार्थे 'संधिवेला—' इत्यण्। पार्विक इति भवार्थे 'कालाट्ठञ्'। 'पार्वणः' इति पाठे 'संधिवेला—' 'सन्' इति प्रकृतिभावः॥

प्रकारान्तरेण सामुद्रिकलक्षणत्वमाह—

किमस्य लोम्नां कपटेन कोटिभिर्विधिर्न लेखाभिरजीगणद्गुणान्।
न रोमकूपौघमिषाज्जगत्कृता कृताश्च किं दूषणशून्यबिन्दवः॥२१॥

किमिति॥ विधिर्ब्रह्मा रोम्णां कपटेन मिषेण सार्धत्रिकोटिभी रेखाभिरस्य नलस्य

---

१ 'कर्मोत्कर्षकारः' इति साहित्यविद्याधरी। २ 'अत्र [illegible] [illegible] इति साहित्यविद्याधरी। 'हस्तकुचादि [illegible] [illegible] इति जीवातुः।

गुणाञ्शौर्यौदार्यादीन्किं नाजीगणत्, अपि तु गणयामासेति काकुः। गुणगणनया गणकेन ब्रह्मणा लेखा एव लिखिता न तु रोमाणि। अनेन सर्वगुणवत्त्वं तस्य द्योतितम्। दोषराहित्यमाह—जगत्कृता ब्रह्मणा रोमकूपौघमिषाद्रोमकूपसमूहव्याजेन दूषणशून्यविन्दवो दूषणानां शून्यान्यभावास्तज्ज्ञापका विन्दवश्च न कृताः किम्, अपि तु कृता एव। यत्र किमपि न तत्र ज्योतिर्विद्भिः शून्यसूचको विन्दुः क्रियते, तथा रोमकूपा अपि वर्तुला विन्दुत्वेनोत्प्रेक्ष्यन्ते। अयं रोमकूपो न, किंतु दोषराहित्यसूचका विन्दव एव लिखिताः। 'तिस्रः कोट्योऽर्धकोटी च यानि रोमाणि मानुषे' इति तावन्तः कूपा इति 'रोमैकैकं कूपके पार्थिवानाम्' इति सामुद्रिकलक्षणं सूच्यते। अजीगणत्। ण्यन्ताच्चङि द्वित्वे 'ई च गणः' ॥

अमुष्य दोर्भ्यामरिदुर्गलुण्ठने ध्रुवं गृहीतार्गलदीर्घपीनता।
उरःश्रिया तत्र च गोपुरस्फुरत्कपाटदुर्धर्षतिरःप्रसारिता ॥ २२ ॥

अमुष्येति ॥ अमुष्य नलस्य दोर्भ्यामरिदुर्गलुण्ठनेऽरीणां दुर्गाणि गिरिप्राकारास्तेषां लुण्ठने बलाद्ग्रहणे क्रियमाणे सति, अर्गलदीर्घपीनतार्गलस्येव दीर्घं च तत्पीनं च, तस्य भावस्तत्ता। कर्मधारयो द्वन्द्वो वा। सा गृहीता ध्रुवं गृहीता ननु। ध्रुवं प्रायेण वा। तत्र च तत्रैवारिदुर्गलुण्ठन एवामुष्योरःश्रिया वक्षस्थलशोभया गोपुरे स्फुरद्दीप्यमानं यत्कपाटं तस्य दुर्धर्षता कठिनता तिरःप्रसारिता विशालता च गृहीता किम्। अनेन तस्याजानुबाहुत्वं व्यूढोरस्कत्वमनाकलनीयत्वं च ध्वनितम्। लुण्ठने समर्थ एवाग्रणीर्भवति पुरोवर्ति सारं वस्तु गृह्णाति। 'तद्विष्कम्भोऽर्गलं न ना' इत्यमरः, 'पुरद्वारं तु गोपुरम्' इति च। उभयत्र कर्मधारयात्तल्[1] ॥

स्वकेलिलेशस्मितनिन्दितेन्दुनो निजांशदृक्तर्जितपद्मसंपदः।
अतद्द्वयीजित्वरसुन्दरान्तरे न तन्मुखस्य प्रतिमा चराचरे ॥ २३ ॥

स्वकेलीति ॥ तन्मुखस्य प्रतिमा स्वरूपमुपमानं चराचरे स्थावरजंगमात्मके जगति नास्ति। चन्द्रपद्मे उपमानं चेत्तत्राह—कथंभूतस्य तन्मुखस्य—स्वेति। स्वा स्वकीया केलिः क्रीडा तस्या लेशो लवभूतं यत्स्मितं तेन निन्दितो निर्जित इन्दुर्येन तत्। तथा निजः स्वकीयोंऽशो भागस्तद्रूपे ये दृशौ नेत्रे ताभ्यां तर्जिता निर्भर्त्सिताधःकृता पद्मानां संपत्समूहः सौभाग्यं वा येन। चन्द्रपद्मातिरिक्तमन्यदुपमानं भविष्यतीति चेत्तत्राह—अतद्द्वयीति चरा- ...पमम्। तयोश्चन्द्रपद्मयोर्द्वयी तद्द्वयी तस्या जित्वरं जयनशीलम्। न विद्यते तद्- सुन्दरान्तरमन्यत्सुन्दरं वस्तु यस्मिन्। जगति मुखस्योपमानं द्वयम्। चन्द्रः पद्मं ...पं वस्त्वन्तरं नास्ति। तद्द्वयमेतन्मुखेनांशभूतेन स्मितेन चक्षुर्द्वयेन च निर्जित- ...त्स्य तन्मुखस्योपमानं नास्तीत्यर्थः। 'चराचरं स्याज्जगति' इति विश्वः। जित्व-

रोम्णां रोमकूपाणां च कपटमिषशब्दाभ्यां ताद्रूप्यापह्नवेन गुणगणनारेखात्वदूषणशून्यवि- ...न्दुत्वो... त्प्रेक्षयोः संसृष्टिः' इति जीवातुः। २ 'अत्राप्युत्प्रेक्षयोः संसृष्टिः' इति ...। 'उत्प्रेक्षा चोपमा चालंकारः' इति साहित्यविद्याधरी।

ष्टांशेन प्रकारेण) द्विधा मन्मथविभ्रमः कामजनितो विभ्रमोऽनयजातः। विविधो भ्रमो विभ्रमः, विलासश्च। कामस्य विशिष्टो भ्रमः, कामजनितो विलासश्च। तदुभयं कामिन्यपेक्षायां यथाक्रमेणाह—तस्य महीभृतो राज्ञो नलस्य मन्मथश्रिया कामश्रीसदृशशोभया स्वीयान्तःकरणे मदनोऽयमिति भ्रान्तिः। तथा। निजस्य स्वस्य च विलासान्तःकरणस्य तं प्रति नलं प्रतीच्छया अलभिलापेण कामजनितो विलासः कटाक्षादिरिति कामजन्यविभ्रमद्वैविध्यम्। महीभृत इति संबन्धषष्ठ्या मन्मथपदेनान्वयात्, नृपे इति विषयसप्तम्या मन्मथविभ्रमपदेनान्वयान्नात्र पौनरुक्त्यम्। चौ परस्परसमुच्चये। जगत्त्रयीभ्रुवामिति सामान्येनोक्तेः पतिव्रतादिरहितानामिति ज्ञेयम्। एवं 'न का निशी—' इत्यादावपि ज्ञेयम्। यद्वा—मन्मथश्रियैव इति चकारमेवकारार्थं व्याख्याय द्वितीयं समुच्चयार्थं व्याख्याय पतिव्रतानां मन्मथोऽयमिति निरभिलापो विशिष्टो भ्रमो जातः। अन्यासां तु तं प्रतीच्छयापीति द्वैविध्यमित्यनौचिती परिहरणीया 'विभ्रमो भ्रान्तिहावयोः' इति विश्वः। मननं मत् शास्त्राद्यभ्यासजन्यं ज्ञानं मथ्नातीति मन्मथः। मूलविभुजादित्वात्कः॥

इदानीं क्रमेण देवनागमर्त्याङ्गनानां कामविभ्रमं श्लोकत्रयेणाह—

निमीलनभ्रंशजुषा दृशा भृशं निपीय तं यस्त्रिदशीभिरर्जितः।
अमूस्तमभ्यासभरं विवृण्वते निमेषनिःस्वैरधुनापि लोचनैः॥ २७॥

निमीलनेत्यादिना॥ त्रिदशीभिर्देवाङ्गनाभिः योऽभ्यासभरोऽभ्यासातिशयो निमीलनभ्रंशजुषा निमीलनस्य नेत्रसंकोचस्य भ्रंशोऽभावस्तं जुषतीति निमीलनभ्रंशजुट् तया दृशा तं नलं निपीय सादरं दृष्ट्वार्जितः कृतः। अमूस्त्रिदश्यस्तमभ्यासभरं निमेषनिःस्वैः निमेषदरिद्रैर्लोचनैरधुनाप्यद्यापि विवृण्वते प्रकटयन्ति। देवाङ्गनानां स्वत एव निर्निमेषत्वं नलावलोकने उत्प्रेक्षणीयमित्युत्प्रेक्षितम्। यदत्यन्तमभ्यस्तं तत्कदापि न विस्मर्यते। त्रिदशीति पुंयोगलक्षणो वा ङीप्॥

अदस्तदाकर्णि फलाढ्यजीवितं दृशोर्द्वयं नस्तदवीक्षि चाफलम्।
इति स्म चक्षुःश्रवसां प्रिया नले स्तुवन्ति निन्दन्ति हृदा तदात्मनः॥२८॥

अद इति॥ चक्षुःश्रवसां नागानां प्रियाः स्त्रियो नले नलनिमित्तमात्मनस्तद्दृशोर्द्वयमिति पूर्वोक्तप्रकारेण हृदा मनसा स्तुवन्ति स्म निन्दन्ति स्म च। इतीति किम्—अद इदं नोऽस्माकं [illegible]यं तदाकर्णि तं नलमाकर्णयतीत्येवंशीलं सत् फलाढ्यजीवितं फलेनाढ्यं जीवितं यस्य। [illegible]तमित्यर्थः। तदवीक्षितं नलं न वीक्षते एवंभूतं सत् अफलं निष्फलमिति। [illegible] स्थितत्वान्नलाकर्णनं भवति, न तु वीक्षणम्[3]॥

[1] नलश्रीविभ्रवनितेच्छयोः श्लिष्टपदोपात्तविभ्रमोभयेन यथासंख्यसंबन्धाच्छ्लेषसंकीर्णो यथा[illegible] इति जीवातुः। 'तस्य मन्मथश्रिया इत्युपमा। मन्मथविभ्रम इति श्लेषः' इति साहित्य[illegible]। २ 'अत्रेवादिशब्दानामभावात्तमभ्यासमिव विवृण्वते इति प्रतीयमानोत्प्रेक्षालंकारः। [illegible] सिद्धत्वादतिशयो वा' इति साहित्यविद्याधरी। ३ 'अत्र गुणक्रियाविरोधालंकारः। जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धा स्याद्गुणस्त्रिभिः। क्रिया द्वाभ्यामथ द्रव्यं द्रव्येणैवेति ते दश॥' इति साहित्यविद्याधरी।

विलोकयन्तीभिरजस्रभावनाबलादमुं नेत्रनिमीलनेष्वपि ।
अलम्भि मर्त्याभिरमुष्य दर्शने न विघ्नलेशोऽपि निमेषनिर्मितः ॥२९॥

विलोकेति ॥ मर्त्याभिर्मानुषीभिरमुष्य दर्शनेऽवलोकने निमेषनिर्मितो नेत्रनिमीलनरचितो विघ्नलेशोऽपि नालम्भि न प्रापि । किंभूताभिर्मानुषीभिः—अजस्रभावनाबलादजस्रं निरन्तरं या भावना वासना, चिन्तनं वा तद्वशादमुं नलं नेत्रनिमीलनेष्वपि नेत्रसंकोचेष्वपि सत्सु विलोकयन्तीभिः पश्यन्तीभिः । यो हि यं स्मरति स नेत्रगोचराभावेऽपि तमेव पश्यति । मर्त्याभिरिति योपधत्वान्न ङीप् । अलम्भि इत्यत्र 'लभेश्च' इत्यनुवृत्तौ 'विभाषा चिण्णमुलोः' इति नुम् ॥

इदानीं पतिव्रताव्यतिरिक्तानां सर्वासामपि मुग्धादिक्रमेण नलेऽनुरागमाह—

न का निशि स्वप्नगतं ददर्श तं जगाद गोत्रस्खलिते च का न तम् ।
तदात्मताध्यातधवा रते च का चकार वा न स्वमनोभवोद्भवम् ॥३०॥

नेति ॥ का स्त्री निशि स्वप्नगतं रात्रौ स्वप्नप्राप्तं तं नलं न ददर्श, अपि तु सर्वापि । का च गोत्रस्खलिते नामव्यत्यये नामभ्रान्तौ तं नलं न जगाद, अपि तु सर्वापि । च परं रते संभोगे तदात्मताध्यातधवा तस्य नलस्यात्मा स्वरूपं यस्य तस्य भावस्तत्ता नलस्वरूपवत्त्वं तया नलस्वरूपेण ध्यातो धवः प्रियो यया सैवंभूता सती का वा स्वमनोभवोद्भवं स्वस्य मदनोद्भूतिं न चकार, अपि तु सर्वापि । स्वप्रिये नलभावं कृत्वा रेमे इत्यर्थः । क्रमेण मुग्धादीनां नले चित्तासङ्गो दर्शितः । बह्व्यो युवतयो नलमेव स्वप्नगतं ददृशुरित्यर्थः । 'नाम गोत्रं कुलं गोत्रं गोत्रस्तु धरणीधरः' इति यादवप्रकाशः ॥

इदानीमन्यस्त्रीणां तदयोग्यत्वप्रतिपादनपुरःसरं भैमीप्रसङ्गं करोति—

श्रियास्य योग्याहमिति स्वमीक्षितुं करे तमालोक्य सुरूपया धृतः ।
विहाय भैमीमपदर्पया कया न दर्पणः श्वासमलीमसः कृतः ॥ २१ ॥

श्रियेति ॥ कया सुरूपया कान्त्या भैमीं विहाय त्यक्त्वा दर्पण आदर्शः श्वासमलीमसः श्वासेन मुखवायुना मलिनो न कृतः, अपितु भैमीव्यतिरेकेण सर्वाभिरपि कृतः । अयोग्यत्वात् । किंभूतो दर्पणः—तं नलं चित्रादावालोक्य इति विचार्य स्वमात्मानमवीक्षितुमवलोकयितुं करे हस्ते धृतः । इतीति किम्—श्रिया शोभयास्य नलस्याहं योग्या सदृशी स्यामिति काकुः । किंभूतया कया—अपदर्पया गतदर्पया तमालोक्य गतगर्वया इति वान्वयः । भैमीं त्यक्त्वा सर्वा अपि गतगर्वा जाता इति भावः । 'प्राप्तरूपसुरूपाभिरूपा बुधमनोज्ञयोः' इत्यमरः । विहायेति ल्यबन्तप्रतिरूपको निपातो विनार्थे द्रष्टव्यः । (तद्योगे च 'ततोऽन्यत्रापि दृश्यते' इति वचनाद्भैमीमिति द्वितीया) शिष्टप्रयोगात् । 'ज्योत्स्नातमिस्रा—' इति मलीमसो निपातितः ॥

---

१ 'अत्र विशेषोक्तिरलंकारः' । [illegible]—'[illegible]' इति साहित्यविद्याधरी । २ 'अत्र हेत्वनुप्रासोऽलंकारः' इति साहित्यविद्याधरी । '[illegible]' इति जीवातुः । ३ इदं पद्यं [illegible] । ४ '[illegible]' इति जीवातुः । 'अत्र [illegible]' इति साहित्यविद्याधरी ।

नले भैमीमनोभिलापमाह—

यथोह्यमानः खलु भोगभोजिना प्रसह्य वैरोचनिजस्य पत्तनम् ।
विदर्भजाया मदनस्तथा मनो नलावरुद्धं वयसैव वेशितः ॥ ३२ ॥

यथेति ॥ वयसा पक्षिणा गरुडेनैवोह्यमानः प्राप्यमाणो मदनः प्रद्युम्नः प्रसह्य बलात्कारेण वैरोचनिजस्य पत्तनं बलिपुत्रस्य बाणस्य शोणितपुरं नगरं यथा गरुडेनैव प्रवेशितस्तथा वयसैव तारुण्येनैव विदर्भजाया दमयन्त्या मनः कर्म प्रसह्य शैशवसमयं क्रान्त्वा मदनः प्रवेशितः । खलु वाक्यालंकारे, प्रसिद्धौ वा । किंभूतेन गरुडेन—भोगभोजिना भोगं सर्पशरीरं भुङ्क्ते एवंशीलस्तेन । तारुण्यपक्षे—भोगं सुखं भुङ्क्ते भोजयति वा तच्छीलेन । किंभूतं पत्तनम्—अनलेनाग्निनावरुद्धं समन्ततो व्याप्तम् । भैमीमनःपक्षे—नलेन संबद्धमाक्रान्तं चित्रादौ दृष्टं श्रुतं च नलं मनसि निधाय कामपीडिता जातेत्यर्थः । कामः कीदृक्—तारुण्यचिह्नैरुह्यमानस्तर्क्यमाणः । प्रसह्येति हठार्थेऽव्ययम् । पक्षे सहेल्र्यप् । बाणासुरकन्याविवाहेऽनिरुद्धे श्रीकृष्णनप्तरि बाणेनावरुद्धे नारदवचनाद्बलप्रद्युम्नसहितः श्रीकृष्णो गरुडमारुह्यानिरुद्धमोचनार्थं शोणितपुरं गत इति विष्णुपुराणम् । 'भोगिभोजिना' इति पाठे भोगिनः सर्पान्, भोगयुक्तान्विलासिनश्चेति । 'खगवाल्यादिनोर्वयः' इत्यमरः ॥

तमेव प्रकारमाह—

नृपेऽनुरूपे निजरूपसंपदां दिदेश तस्मिन्बहुशः श्रुतिं गते ।
विशिष्य सा भीमनरेन्द्रनन्दना[2] मनोभवाज्ञैकवशंवदं मनः ॥ ३३ ॥

नृप इति ॥ स भीमनरेन्द्रस्य नन्दना दमयन्ती तस्मिन्नृपे नले मनो विशिष्य अन्यस्त्रीभ्यः सकाशादतिशयेन, अन्यनृपेभ्य आकृष्य वा दिदेश निदधौ । किंभूते नृपे—निजरूपसंपदां स्वकीयसौन्दर्याधिक्यानामनुरूपे योग्ये । तथा बहुशोऽनेकवारं श्रुतिं श्रवणगोचरं गते प्राप्ते । किंभूतं मनः—मनोभवस्य कामस्य आज्ञायां एकं मुख्यं वशंवदं प्रवणम् । कामाज्ञाकारकमित्यर्थः । मदनायत्तत्वान्नल एव संलग्नमित्यर्थः । रूपं च संपदश्चेति वा । बहुश इति 'संख्यैकवचनात्–' इति शस् । नन्दना इति नन्द्यादित्वाल्ल्युः । वशंवदमिति 'प्रियवशे वदः खच्' । 'अरुर्द्विषदजन्तस्य–' इति मुम् ॥

उपासनामेत्य पितुः स रज्यते दिने दिने सावसरेषु वन्दिनाम् ।
पठत्सु तेषु प्रतिभूपतीनलं विनिद्ररोमाजनि शृण्वती नलम् ॥ ३४ ॥

उपासनामिति ॥ सा भैमी स्वावसरं लब्ध्वा दिने दिने प्रतिदिनं पितुरुपासनां सेवा-

'अत्र श्लेषोपमालंकारौ' इति साहित्यविद्याधरी । 'अत्र यथोह्यमानः मनोनल इति शब्दश्लेषः ५ ... ।श्लिष्टविशेषणा चेयमुपमा । साच वयसा इति वयसोरभेदाध्यवसायमूलातिशयोक्त्यनुप्रा- संकरः' इति जीवातुः । २ 'नन्दिनी' इति पाठान्तरम् । ३ 'श्रवणादनुरागः । तथाच रुद्रटः— ...। तु द्वेधा कन्योढा चेति जायते [निलन्] । गुरुमदनार्तं नायकमालोक्याकर्ण्य वा सम्यक् ॥' [...]ारतिलकेप्युक्तम्—'अन्यदीया द्विधा प्रोक्ता कन्योढा चेति ते प्रिये । दर्शनाच्छ्रवणाचापि कामार्ते भवतो यथा ॥' 'अत्रानुप्रासोऽलंकारः' इति साहित्यविद्याधरी ।

नैषधस्य वन्दिनामवसरेषु समयेषु रज्यते स्म अनुरक्ता बभूव । तेषामवसरे नलवर्णनश्रवणादित्यर्थः । तदेवाह—तेषु वन्दिषु प्रतिभूपतीनन्यान्राज्ञः पठत्सु स्तुतिपूर्वकं वदत्सु सत्सु सा भैमी नलं शृण्वती सती तत्क्षणमेव विनिद्ररोमा जातपुलका जाता । श्रवणानुरागः सात्त्विको भावश्च दर्शितः । उपासनामिति 'ण्यासश्रन्थ—' इति युच् । रज्यते इति रञ्जेर्दैवादिकस्य रञ्जे रूपम् । भूपतीनतीति लक्षणे कर्मप्रवचनीयत्वम् । विनिद्ररोमा इति नान्तं हलन्तं वा । अजनीति 'दीपजन—' इति कर्तरि चिणि 'जनिवध्योश्च' इति निषेधाद्वृद्ध्यभावः ॥

कथाप्रसङ्गेषु मिथः सखीमुखात्तृणेऽपि तन्व्या नलनामनि श्रुते ।
द्रुतं विधूयान्यदभूयतानया मुदा तदाकर्णनसज्जकर्णया ॥ ३५ ॥

कथेति ॥ मिथः परस्परं कथाप्रसङ्गेषु सखीमुखात्तृणेऽपि विषये नलनाम्नि तन्व्या दमयन्त्या श्रुते सति अनया भैम्या मुदा हर्षेण तस्य नलनाम्न आकर्णने श्रवणे सज्जौ तत्परौ कर्णौ यस्याः एवंविधया अभूयत जातम् । किं पुनर्वाच्यं नलनृपवर्णने सज्जकर्णत्वम् । किं कृत्वा—अन्यत्कथान्तरं कार्यान्तरं वा द्रुतं झटिति विधूय परित्यज्य । एता यदि [illegible] एव कथयन्तीति इत्येवेत्यर्थः । तन्व्या इति विरहव्यथया कृशत्वम् । अभूयत । भावे लङात्मनेपदे ॥

स्मरात्परासोरनिमेषलोचनाद्बिभेमि तद्भिन्नमुदाहरेति सा ।
जनेन यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत् ॥ ३६ ॥

विष्णुभक्तास्तैः सह सङ्गो मैत्री यस्य । पुनः किंभूतः—अकदाप्यवीक्षितः न कम् अकं दुःखं दापयन्तीत्येवंशीला अकदापिनः स्वयं दुःखं ददति दापयन्ति चेत्येवंशीला दुष्टास्तैरकदापिभिः । अवीक्षितो न दृष्टः । तत्सङ्गादिरहित इत्यर्थः । अत एव मही सर्वदोत्सववान् । स्याः इति मध्यमपुरुषसामर्थ्यात्सा भैमी (प्रार्थयित्री) इति ज्ञातव्यम् । यद्वा कश्चन कस्मैचिदाशिषं ददत्प्रार्थनायां लिङ् । यद्वा राजानं प्रार्थयते महीपतिस्त्वं प्रसिद्धः स्याः । अन्यत्पूर्ववत् । दमयन्तीपदानि नलसंबोधनपदानि समानार्थानि ज्ञातव्यानीत्यलम् ॥

अहो अहोभिर्महिमा हिमागमेऽप्यभिप्रपेदे प्रति तां स्मरार्दिताम् ।
तपर्तुपूर्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे ॥ ४१ ॥

अहो इति ॥ अहोभिर्दिवसैः कर्तृभिः हिमागमे हेमन्तर्तावपि स्मरार्दितां मदनपीडितां तां भैमीं प्रति लक्ष्यीकृत्य महिमा दैर्घ्यं प्रपेदे प्राप्तम् । विभावरीभी रात्रिभिः तपर्तुपूर्तावपि निदाघर्तुभरेऽपि मेदसां भरा मज्जबाहुल्यं लक्षणया स्थूलत्वं बिभरांबभूविरे धृतम् । हेमन्तर्तौ दिनानि ह्रस्वानि, रात्रयो महत्यः । ग्रीष्मेऽपि दिनानि महान्ति, रात्रयोऽल्पाः । विरहित्वा-दतिवादयितुमशक्यत्वात्तां प्रति विपरीता जाता इत्यर्थः । अहो विचित्रमित्यर्थः । अहो इत्योदन्तत्वात्प्रगृह्यत्वम् । बिभरामित्यत्र 'भीह्री–' इत्याम् श्लुवच्च ॥

इदानीं नलस्यापि तस्यामनुरागमाह—

स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम् ।
कदाचिदस्या युवधैर्यलोपिनं नलोऽपि लोकादशृणोद्गुणोत्करम् ॥ ४२ ॥

स्वकान्तीति ॥ कदाचित्कस्मिंश्चित्समये नलोऽपि लोकाल्लोकमुखादस्या भैम्या गुणोत्करं सौन्दर्यादिगुणादिगुणसमूहमशृणोत् । किंभूतं गुणोत्करम्—युवधैर्यलोपिनं तरुणधैर्यलोपन-शीलम् । तथा—स्वस्या भैम्याः कान्तिकीर्तिव्रजः सौन्दर्यविषयो यो यशःसमूहः स एव शुभ्रत्वान्मौक्तिकमाला तस्या अन्तर्घटना नलस्य मनसि या घटना संबन्धस्तस्य गुणश्रियं दोर-कशोभां श्रयन्तं कुर्वाणम् । गुणोत्करेण नलचेतसि तत्कान्तिकीर्तिर्गुम्फितेत्यर्थः । मालया अन्तर्घटनार्थं दोरको भवति । यद्वा—स्वस्य नलस्य । तद्योगे नलरमणीयकानुरूपो भैमीगु-णसमूह इति भावः । मौक्तिकमिति विनयादित्वात्स्वार्थे ठक् । लोकादिति हेतौ पञ्चमी ॥

तमेव लब्ध्वावसरं ततः स्मरः शरीरशोभाजयजातमत्सरः ।
अमोघशक्त्या निजयेव मूर्तया तया विनिर्जेतुमियेष नैषधम् ॥ ४३ ॥

तमेवेति ॥ ततो भैमीगुणश्रवणानन्तरं स्मरः कामस्तमेवावसरं प्रस्तावं लब्ध्वा तया कृत्वा नैषधं नलं विनिर्जेतुं पराभवितुमियेष ऐच्छत् । उत्प्रेक्षते—मूर्तया शरीरिण्या [illegible] । यतः स्वशरीरस्य या शोभा तस्या जयस्तेन जातो मत्सरः

[illegible]' इति साहित्यविद्याधरी । २ 'अत्र हिमागमे कारणे सत्यपि दिनानां लघुत्वं [illegible] । तथा ग्रीष्मे कारणे सत्यपि रात्रीणां लघुता इति विशेषोक्तिरलंकारः । दिनरात्रिमहत्त्वे [illegible]' इति साहित्यविद्याधरी । ३ 'अत्र कीर्ति-[illegible]लंकारः' इति जीवातुः ।

क्रोधो यस्येति पराजयेच्छायाः कारणम्। जातक्रोधी वैरी कमप्यवसरं प्राप्य शस्त्रायुधः स्ववैरिणं पराजेतुं प्रक्रमते। शोनेति भिदादिगणे निपातनात्साधुः॥

अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजालयः।
तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः॥ ४४॥

अकारीति॥ तेन क्षमाभुजा राज्ञा नलेन भीमनृपात्मजालयः भीमनृपकन्या आलयः स्थानमाश्रयो यस्य एवंभूतो गुणः सौन्दर्यादिः श्रवणातिथिः श्रवणगोचरोऽकारि कृतः। आकर्णित इत्यर्थः। आदरातिशयापूर्वत्वसूचनायातिथिपदम्। स्मरेणापि गुणः प्रत्यञ्चा स्वात्मशरासनाश्रयः स्वात्मनो यच्छरासनं धनुस्तदाश्रय आधारः स्थानं यस्यैवंभूतोऽकारि। किंभूतेन—तस्य नलस्योच्चमुत्कृष्टं धैर्यं तस्य व्ययो नाशस्तस्मै संहितो धनुष्यारोपित इषुर्येन। यदैव भैमीगुणश्रवणं जातं तदैव तस्य मदनपीडा जातेति भावः। चस्तुल्यकालद्योतनार्थो वा। शोभनं दृढं यदात्मशरासनमिति वा॥

अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैः सनाथयन्।
निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि॥४५॥

अमुष्येति॥ स्मरः त्रयाणां लोकानां समाहारस्त्रिलोकी तस्या विजयेनार्जितानि संपादितान्यपि यशांसि कीर्तीः संशये संदेहे निमज्जयामास। खलु संभावनायाम्। त्रैलोक्ये जितेऽपि यद्येनं जेतुं शक्ष्यामि तदैकस्याजये सर्वापि कीर्तिर्गलिष्यतीति शक्ष्यामि न वेति संदेहः। किंभूतः स्मरः—तदा धीरस्यामुष्य नलस्य जयाय विशिखैर्बाणैः ज्यां सनाथयन्सनाथां कुर्वन्। योजयन्नित्यर्थः। यतः साहसी हिताहितानपेक्षं यत्कर्म तत्साहसं तद्वान्। अविमृश्यकारीत्यर्थः। विशिखैरिति धीरस्यैकेन जेतुमशक्यत्वाद्बहुत्वम्। त्रैलोक्यापेक्षयास्यातिधीरत्वमुक्तम्। 'विजयोर्जितानि' इति पाठः साधीयान्। जयायेति 'तुमर्थाच्च—' इति चतुर्थी। निमज्जयामासेति मस्जेः सकारस्य 'झलां जश् झशि' इति यो दकारस्तस्य '—मज्जतीनाम्'—इति निर्देशाच्चुत्वम्॥

अनेन भैमीं घटयिष्यतस्तथा विधेरवन्ध्येच्छतया व्यलासि तत्।
अभेदि तत्तादृगनङ्गमार्गणैर्यदस्य पौष्पैरपि धैर्यकञ्चुकम्॥ ४६॥

अनेनेति॥ अस्य नलस्य तत्प्रसिद्धं तादृग्दुर्भेदमपि धैर्यमेव कञ्चुकं पौष्पैः पुष्पसंबन्धिभिरनङ्गमार्गणैः कामबाणैर्यदभेदि विदारितम्, तत्तथा [illegible] परित्यागप्रकारेण अनेन नलेन भैमीं घटयिष्यतः संगमयिष्यतो विधेर्ब्रह्मणोऽवन्ध्येच्छतया अवन्ध्या सफला इच्छा मनोरथो यस्य तस्य भावस्तत्ता, सफलेच्छतया तथा व्यलासि विलसितमिति निष्कर्षः। [illegible]। तैः [illegible] [illegible] पौष्पैरिति। [illegible] [illegible]

१ 'कुमो[illegible]कारः' इति साहित्यविद्याधरी। २ [illegible] [illegible] इति साहित्यविद्याधरी। [illegible] इति जीवातुः। ३ [illegible] इति जीवातुः।

भावितमपि विधीष्टं भवत्येवेति भावः। व्यलासीति भावे चिण्। अनेदीति कर्मणि कर्मकर्तरि वा चिण्। पौष्पैः। भेदविवक्षायां संबन्धेऽण्। स्वार्थे वा॥

धैर्यभङ्गमेवाह—

किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रयत्यहो।
स्मरं तनुच्छायतया तमात्मनः शशाक शङ्के स न लङ्घितुं नलः॥४७॥

किमन्यदिति॥ यस्य कामस्यास्त्रैर्बाणैस्तापितः पितामहो ब्रह्माऽद्यापि वारिजं कमलमाश्रयति। अहो आश्चर्ये। वृद्धोऽपि ब्रह्मा कामसंतप्तः। यः स्वपितामहमप्यतिवृद्धमतिपूज्यं शस्त्रैः पीडयतीति सोऽन्यं पीडयतीति किं वाच्यम्। स्वभावसिद्धं कमलासनत्वं कामसंतप्तत्वेनोत्प्रेक्षितम्। लुप्तोत्प्रेक्षा। संतप्ताः शीतलमाश्रयन्ते। अत एव वारिजपदम्। अन्यत्कामस्य किं वर्णनीयं तत्राह—शङ्के इति। नल आत्मनः स्वस्य तनुच्छायतया शरीरसाम्येनेव। यद्वा—तन्वी छाया शोभा यस्य तस्य भावस्तत्ता तया विरहव्यथाजनितम्लानशोभतया तं स्मरं लङ्घितुं जेतुं न शशाक। यद्वा—आत्मनः सकाशात्कामस्य तनुच्छायतयाल्पशोभत्वेन जेतुं नाशकत्, अपि तु शशाकैव। तस्याल्पकान्तित्वमात्मनोऽधिककान्तित्वमेव जय इत्यर्थः। पूर्वं तस्यातिशयितं धैर्यं वर्णयित्वा तन्नाशकथनं विप्रलम्भपोषार्थम्। लङ्घितुमिति शकियोगे तुमुन्॥

उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयस्कृतेन किम्।
त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं विवेश यत्॥४८॥

उर इति॥ सा तन्वी कृशाङ्गी स्वीया त्रपैव सरिन्नदी तस्या दुर्गं प्राकारमपि, त्रपासरिदेव दुर्गं वा। प्रतीर्य तीर्त्वा नलस्य हृदयं यद्विवेश प्रविष्टा। यद्वा—नलस्यैव त्रपासरिद्दुर्गम्। तदुरोभुवा वक्षस्थलगेन कुम्भयुगेन कुचकलशयुगेन जृम्भितं विलसितम्। किमुत्प्रेक्षायाम्। किंभूतेन—नवोपहारेण नवो नूतन उप समीपगतो हारो मुक्ताहारो यस्य, उपहार उपायनं तद्रूपेण वा। वयसा यौवनेन कृतं वयस्कृतं तेन। तेन लज्जां त्यक्त्वा संपन्नयौवना भैमी ध्याता इत्यर्थः। अन्यापि कुम्भकारकृतमुपढौकितं कुम्भद्वयं वक्षसि निधाय जलदुर्गं तीर्त्वा प्रियसंकेतं गच्छति। यच्छब्दोऽप्यर्थः। सा तन्व्यप्युरोभुवा कुम्भयुगेन त्रपासरिद्दुर्गमपि प्रतीर्य नलस्य हृदयमपि विवेश किमिति वितर्क इति वान्वयः। किंभूतं दुर्गम्—जृम्भितम्। अत्युच्चमित्यर्थः। अन्यत्पूर्ववत्। 'उपायनमुपग्राह्यमुपहारस्तथोपदा' इत्यमरः। उरोभुवा इति भाषितपुंस्कत्वेन नुमभावः। कुम्भयुगेनेति कर्तरि तृतीया॥

---

१ 'कञ्चुकं भिन्नमिति विरोधः' तस्य विविधविलासेनाभासीकरणाद्विरोधाभासोऽलंकारः। स च [illegible] इति तयोरङ्गाङ्गिभावेन संकरः' इति जीवातुः। 'अत्रानुमानविरोधाव' इति साहित्यविद्याधरी। २ 'अत्र स्मरलङ्घने पितामहोऽप्यशक्तः किमुत नल इत्यर्थापत्ति-[illegible]लंकारः। तनोश्छायेव छाया इत्युपमा। छाययोरभेदाध्यवसायादतिशयोक्तिः। अलङ्घ्यत्वे [illegible] हेतुत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा। सा च शङ्के इति व्यञ्जकप्रयोगाद्वाच्या' इति जीवातुः। [illegible] श्लेषश्चालंकारः' इति साहित्यविद्याधरी। ३ 'अत्रोत्प्रेक्षा रूपकं श्लेषश्चालं-' इति साहित्यविद्याधरी। 'अत्र विषयनिगरणादभेदाध्यवसायादतिशयोक्तिः जृम्भणं किमि-[illegible] सा चोक्तातिशयोक्तिमूला इति संकरः' इति जीवातुः।

अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा ।
अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला ४९

अपेति ॥ मनोभुवा कामेनास्य नलस्य यद् अनिर्वाच्यं कृतम् । तद् निशा रात्रिः शय्या आस्तरणं चाबोधि जानाति स्म । किंभूतस्यास्य—जनाय लोकाय निजां स्वकीयामधीरताम् धैर्यमपह्नुवानस्य गोपायतः । किंभूता निशा शय्या च—यतो जागरदुःखं साक्षादीक्षते सा विदुषीत्यर्थः । तज्जागर इत्येकं पदं वा । तथा शशाङ्ककोमला चन्द्रेण मनोहरा । शशस्य मृगविशेषस्याङ्क उत्सङ्गो यस्य स चन्द्रः । चन्द्रवन्मनोहरा वा । चन्द्रेण कर्पूरप्रक्षेपेण मनोहरा वा । चान्द्री रात्रिरतिदुःसहत्वाज्जागरदुःखसाक्षिणी । शय्या चात्मनि विलुण्ठनेन । रात्रिशय्याव्यतिरेकेण केनचित्तद्विरहदुःखं न ज्ञातमिति भावः । जनायेति 'श्लाघह्नुङ्—' इति संप्रदानत्वम् । अबोधीति 'दीपजन—' इति कर्तरि चिण् । निशा इति हलन्ताद्वा टाप् । शय्या इति 'संज्ञायां समजनि—' इति क्यपि 'अयङ् यि—' इत्ययङ् ॥

स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत ।
त्यजन्त्यसूञ्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ॥५०॥

स्मरेति ॥ भृशं स्मरोपतप्तोऽप्यतिशयेन कामपीडितोऽपि स नलो विदर्भराजं विदर्भदेशाधिपं भीमं तनयां कन्यां नायाचत । यतः प्रभुः समर्थः । अभिमानीति यावत् । कामपीडितः स कथं न याचितवानित्यत आह—मानिनोऽभिमानिनः पुरुषाः शर्म सुखं तथा असूंश्च प्राणानपि त्यजन्ति । एतद्द्वयं तेषां वरमल्पनिष्टम् । एकमद्वितीयं प्रधानमयाचितव्रतम् अयाचनरूपं व्रतं नैव त्यजन्तीत्यर्थः । एतद्वरं न विद्यते वरं श्रेष्ठं यस्मात् । अतिश्रेष्ठमित्यर्थः । पाठक्रमादर्थक्रमस्य बलीयस्त्वाच्छर्मपदस्य पूर्वमन्वयः । यद्वा—चकारस्तुल्यकालयोतनार्थः । शर्म यथा भवति तथासूनपि त्यजन्ति । सुखेन त्यजन्तीत्यर्थः । वरं श्रेष्ठमिति मत[illegible] विशेषणं वा । विदर्भराजेति 'राजाहः—' इति टच् । याचिर्द्विकर्मकः । 'देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये' इत्यमरः ॥

नृपाविषादाभिनयादयं क्वचिज्जुगोप निःश्वासततिं वियोगजाम् ।
विलेपनस्याधिकचन्द्रभागताविभावनाच्चापललाप पाण्डुताम् ॥ ५१ ॥

नृपेति ॥ अयं नलः क्वचित्कस्मिंश्चिद्दुःखे विषये नृपाविषादाभिनयात् [illegible] निःश्वासोच्छ्वासकदम्बाद्वियोगजां विरहजनितां निःश्वासततिं निःश्वासपरम्परां जुगोप तिरोदधे स । तथा—विलेपनस्य चन्दनस्याधिकचन्द्रभागः कर्पूरांशो यस्मिंस्तस्य भावस्तत्ता, तस्य विभावनात्प्रकटीकरणाद्वियोगजां पाण्डुतां चापललाप । अथ चन्दनमध्ये कर्पूरोऽधिको जातस्तेनाङ्गपाण्डुत्वं न त्वन्यत्कारणम् । विषनीति विषादः खिदः [illegible] निःश्वासदुःखं [illegible] मनोविकारेणाङ्गुर्जगोप । 'घनसारश्चन्द्रसंज्ञः कर्पूरः' इत्यमरः ॥

---

१ 'रवेन नायकस्य [illegible]' इति साहित्यविद्याधरी । २ '[illegible] [illegible] [illegible] साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी । [illegible] इति टीकान्तरम् इति जीवातुः ।

शशाक निह्नोतुमयेन तत्प्रियामयं बभाषे यदलीकवीक्षिताम्।
समाज एवालपितासु वैणिकैर्मुमूर्च्छ यत्पञ्चममूर्च्छनासु च ॥ ५२ ॥

शशाकेति ॥ अयं नलोऽलीकवीक्षितां मोहेन मिथ्यैव वीक्षितां प्रियां भैमीं प्रति यत्किंचिद्बभाषे, तदयेन दैवेन निह्नोतुं गोपायितुं शशाक। वैणिकैर्वीणावादनकुशलैः पञ्चमरागस्य मूर्च्छनास्वालपितासु पुनःपुनर्गीतासु सतीषु समाज एव सभायामेव यन्मुमूर्च्छ तदपि अयेन रागमूर्च्छनाजनितसुखानुभवव्यापारवश्यव्याजेन निह्नोतुं शशाक। मूर्च्छाप्यपलपितेत्यर्थः। सप्तानां स्वराणामारोहावरोहौ मूर्च्छनाः। तास्त्वेकविंशतिः। अथ च प्रियां प्रति अये भैमीति समाजे यत् बभाषे तत् निह्नोतुं न शशाक इति काकुः। शशाकैव। शब्दान्तरान्तर्भूतत्वाद्वचनमपलपितम्। यद्वा—वैणिकैः पञ्चमरागमूर्च्छनासु गातुं प्रारब्धासु समाज एव सभैव मुमूर्च्छ। येन नलकृतभैमीसंबोधनमाकर्णनीयं स समाज एव मूर्च्छां प्राप। यद्वा—यत्किंचिद्बभाषे, तद् अये कामाय निह्नोतुं न शशाक, समाजाय त्वपलपितुं समर्थोऽभूत्। यतः समाज एव मुमूर्च्छ। इः कामः तस्मै कामाय। 'अये क्रोधे विषादे च संभ्रमे स्मरणेऽपि च', 'इः कामे पुरुषोक्तौ च' इति विश्वः। 'अयः शुभावहो विधिः', 'वीणावादस्तु वैणिकः' इत्यमरः। रागप्रकटीकरणमालपितम्। पशुव्यतिरिक्तसमूहवाचित्वात्समाज इत्यत्र घञ्। वैणिकैरिति 'शिल्पम्' इति ठक्। मूर्च्छोन्मादावुक्तौ[1] ॥

अवाप सापत्रपतां स भूपतिर्जितेन्द्रियाणां धुरि कीर्तितस्थितिः।
असंवरे शंवरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि ॥ ५३ ॥

अवापेति ॥ स भूपतिः सापत्रपतामवाप। अन्यतो लज्जापत्रपा तया सह वर्तमानः सापत्रपः तस्य भावस्तत्ता तां प्राप। किंभूतः—यतो जितेन्द्रियाणां मध्ये धुर्यग्रे प्रथमतः कीर्तिता स्तुता स्थितिर्मर्यादा यस्य। विरहव्यथा लोकेनापि ज्ञातेति सलज्जोऽभूदित्यर्थः। कस्मिन्सति—तत्र समाजे सभामध्येऽसंवरे निरोद्धुमशक्येऽगोप्ये शंवरवैरी कामस्तस्य विक्रमे क्रमेण परिपाट्या स्फुटतां प्राकट्यमुपेयुषि प्राप्ते सति। असंवरे इत्यत्र 'ग्रहवृदृनिश्चि–' इत्यप्[2] ॥

अलं नलं रोद्धुममी किलाभवन्गुणा विवेकप्रमुखा न चापलम्।
स्मरः स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृशः ॥ ५४ ॥

अलमिति ॥ अमी विवेकप्रमुखा विवेकादयो गुणा नलमिदं पूर्वोक्तं चापलं रोद्धुमावरितुमलं समर्था नाभवन्। नलस्य चापलं रोद्धुं न समर्था इत्यर्थः। किल निश्चयेन। यद्यतः प्रसिद्धः स्मरो रत्यामनुरागे सति पुरुषमनिरुद्धमेव चपलमेव सृजति करोति। अयमेतादृशः सर्गनिसर्गः सृष्टिनिर्णयः स्वभावो वा। अयमेव निश्चय इत्यर्थः। अनुरागे सति सर्वोऽपि भवतीत्यर्थः। विवेकस्यापि किमपि न चलतीत्यर्थः। यद्वा—स्मरो रत्यां संभोगेनिवारयितुमशक्यं चापलमित्यर्थः। अयमीदृशः कामेन सृज्यमानस्य प्रस्तुतत्वाच्चापलः। अथ च—मदनः प्रद्युम्नाख्यो रत्यां स्वप्रियायामनिरुद्धनामानमेव पुत्रं जन-

1 'एतेन व्रीडात्यागोन्मादमूर्च्छावस्थाः सूचिताः' इति जीवातुः। 2 'छेकानुप्रासोऽलंकारः' इति [illegible]।

वीमश्वो लोकोत्तरः स्मृतः' इति शालिहोत्रे । विभूषितम् वीनां पक्षिणां भुवि स्थान उषितम् । वेगवशादाक्रमणवशाद्वा गगनगामिनमिति वा । सितमित्यनेन कफप्रकृतित्वम् । तेनातिबलवत्त्वसहिष्णुत्वादिलक्षणं सूचितम् । 'ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु', 'वाजिशाला तु मन्दुरा' इत्यमरः । पुरुषशब्दात्पक्षे भावे युवादित्वादण् । परिमाणे 'पुरुषहस्तिभ्यामण् च' इत्यण् । क्षोदितमिति हेतुमण्ण्यन्तान्निष्ठा । कर्तरि च तृतीया, करणे वा ॥ (इतः सप्तभिः कुलकम्—)

अथान्तरेणावटुगामिनाध्वना निशीथिनीनाथमहःसहोदरैः ।
निगालगाद्देवमणेरिवोत्थितैर्विराजितं केसरकेशरश्मिभिः ॥ ५८ ॥

अथेति ॥ अथानन्तरं स नलः हयमारुरोहेति सप्तमश्लोकेनान्वयः । अश्वविशेषणानि । किंभूतं हयम्—स्कन्धप्ररूढाः केशाः केसरकेशास्तेषां रश्मिभिः तल्लक्षणैरेव किरणैर्वा विराजितम् । किंभूतैः—निगालगाद् गलप्रदेशे वर्तमानाल्लक्षणभूताद्देवमणेः देवमणिनाम्नो दक्षिणावर्तादवटुगामिना आन्तरेण कण्ठमध्यवर्तिनाध्वना मार्गेणोत्थितैः निःसृतैरिव । तथा—उज्ज्वलत्वात् निशीथिनी रात्रिस्तस्या नाथश्चन्द्रस्तस्य महांसि किरणास्तेषां सहोदरैः सदृशैः । प्रायेण सहोदराः सरूपा भवन्तीति सारूप्यं लक्ष्यते । अथ च देवमणिः कौस्तुभः, चन्द्रश्च । समुद्रादुत्पन्नत्वादुभयोः सहोदरत्वम् । केसरकेशरश्मिभिरुपलक्षितम् । विराजितं वीनां पक्षिणां राजा विराजो गरुडः तद्वदाचरितम् । 'निगालस्तु गलोद्देशे', 'अवटुर्घाटा कृकाटिका' इत्यमरः । 'देवमणिः शिवेऽश्वस्य कण्ठावर्ते च कौस्तुभे' इति विश्वः । सहोदरैरिति 'वोपसर्जनस्य' इति वैकल्पिकत्वात्सादेशाभावः ॥[2]

अजस्रभूमीतटकुट्टनोत्थितैरुपास्यमानं चरणेषु रेणुभिः ।
रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः[3] ॥ ५९ ॥

अजस्रेति ॥ रेणुभिश्चरणेषूपास्यमानं सेव्यमानम् । किंभूतं रेणुभिः—अजस्रं निरन्तरं भूमीतटकुट्टनं धरातलचूर्णनं तेनोत्थितैः । कैरिव—अणिमा अणुपरिमाणत्वं तेनाङ्कितैर्युक्तैर्जनस्य लोकस्य चेतोभिरिवान्तःकरणैरिव । 'अणुपरिमाणं मनः' इति । किंभूतैश्चेतोभिः—रयप्रकर्षस्य वेगातिशयस्याध्ययनार्थं पठनार्थमागतैः । तद्वेगं प्रेक्षतां लोकानां चेतोभिर्वेगातिशयाध्ययनार्थमागतैरिवेत्युत्प्रेक्षा । इति मनसोऽपि सकाशादश्वस्य वेगातिशयो द्योत्यते । अथ च शिष्यो गुरुचरणयोरुपास्ते । अजस्रभूमीतटकुट्टनमुत्तमाश्वजातिः । भूमीति 'कृदिकारादक्तिनः' इति ङीप् । अणिमा म्रदिमवत् ॥

चलाचलप्रोथतया महीभृते स्ववेगदर्पानिव वक्तुमुत्सुकम् ।
अलं गिरा वेद किलायमाशयं स्वयं हयस्येति च मौनमास्थितम्[4] ॥६०॥

[illegible] ॥ चलाचलोऽतिचञ्चलः प्रोथ ओष्ठाग्रं नासापुटं यस्य, तस्य, भावस्तत्ता, [illegible]ते नलाय स्वकीयवेगविषये दर्पान्गर्वान्वक्तुमुत्सुकमिवोत्कण्ठितमिव । तर्हि किमिति [illegible]—किल प्रसिद्धौ । अयं नलो हयस्याशयमभिप्रायं स्वयमात्मनैव वेद

[1] अत्र पक्षे—'क्षोदितम्' इति क्षोदवत्कृतम्' इत्यर्थे 'तत्करोती'ति ण्यन्तात् क्तः, मतोर्लोपश्च' इति [illegible] । २ 'अत्रानुप्रासोत्प्रेक्षारूपकाणां संकरः' इति साहित्यविद्याधरी । ३ 'अत्रोत्प्रेक्षा[illegible]श्चालंकारौ' इति साहित्यविद्याधरी । ४ 'अत्र सापह्नवोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी ।

जानाति किल, अतो गिरा वाचा अलं पूर्णतामिति हेतोरिव मौनमास्थितम् । 'चलाचलप्रोथल
मश्वजातिः' । ज्ञातुरमे स्वयं स्वगुणं वक्तुमनुचितमित्यर्थः । चलाचल इति 'चरिचलिपतिवदी
द्विर्वचनमाक्चाभ्यासस्य' इति द्वित्वमागागमश्च । 'अभ्यासकार्यमनन्ति' इति वचनाद्, आ
नदीर्घत्वामभ्यांद्वा, 'हलादिः शेषः' न । महीभृते 'क्रियया यमभिप्रैति सः–' इति संप्रदानत्वम
गिरेति वारणार्थयोगे तृतीया । वेद इति 'विदो लटो वा' इति णल् ॥

महारथस्याध्वनि चक्रवर्तिनः परानपेक्षोद्वहनाद्यशः सितम् ।
रदावदातांशुमिषादनीदृशां हसन्तमन्तर्बलमर्वतां रवेः ॥ ६१ ॥

महारथस्येति ॥ महारथस्यायुतयोधिनः चक्रवर्तिनः सार्वभौमस्य नलस्याध्वनि मा
आकाशगामित्वेन न विद्यतेऽपेक्षा यस्यां क्रियायामिति परेषामन्येषामश्वानामनपेक्षयानाश्रये
यदुद्वहनं तस्माज्जातं यद्यशस्तेन यशसा सितं श्वेतम् । अत एव रदानां दन्तानामवदाता निर्म
येंऽशवः किरणास्तेषां मिषाद् अनीदृशां परानपेक्षोद्वहनासमर्थानां रवेः सूर्यस्यार्वतामश्वानां ब
अन्तर्मुखमध्ये हसन्तम् । सूर्याश्वाः परापेक्षोद्वहनाः नाहं तथा इत्युपहासस्तेषाम् । यद्वा परान
क्षोद्वहनात्सूर्याश्वानां बलं दन्तोज्ज्वलकिरणव्याजादन्तर्हसन्तमित्यन्वयः । स्वाभाविकं श्वेत
यशोहेतुत्वेनोत्प्रेक्षितम् । सूर्याश्वानां नीलवर्णत्वात् ॥

सितत्विषश्चञ्चलतामुपेयुषो मिषेण पुच्छस्य च केसरस्य च ।
स्फुटं चलच्चामरयुग्मचिह्नैरनिह्नुवानं निजवाजिराजताम् ॥ ६२ ॥

सितेति ॥ सिता श्वेता त्विड् दीप्तिर्यस्य तस्य चञ्चलतां चापल्यमुपेयुषः प्राप्तस्य पुच्छ
च केसरस्य स्कन्धकेशसमूहस्य च मिषेण व्याजेन चलच्चलं चामरयुग्मं तस्य चिह्नैः स्फु
निजवाजिराजतां वाजिनां राजा वाजिराजः, तस्य भावस्तत्ता निजस्यात्मनो वाजिराजता ता
निह्नुवानं प्रकटयन्तमिति स्फुटमुत्प्रेक्षे । राजा हि श्वेतचामरद्वयेन वीज्यते । चलनक्रियापेक्ष
चिह्नैरिति बहुवचनम् । चिह्नैरिति 'तत्करोति–' इति ण्यन्ताद्भावे 'स्फुट् च' इति स्फुट ।

अपि द्विजिह्वाभ्यवहारपौरुषे मुखानुषक्तायतवल्गुवल्गया ।
उपेयिवांसं प्रतिमल्लतां रयस्मये जितस्य प्रसभं गरुत्मतः ॥ ६३ ॥

अपीति ॥ रयस्मये वेगगर्वे प्रसभं बलात्कारेण जितस्य गरुत्मतो गरुडस्य द्विजिह्वाः स
तेषामभ्यवहारो भक्षणं तस्मिन्पौरुषं तस्मिन्नपि मुखेऽनुषक्ता लग्ना आयता दीर्घा वल्
सुन्दरी या वल्गा प्रग्रहस्तया कृत्वा प्रतिमल्लतां प्रतिभटत्वमुपेयिवांसं प्राप्तवन्तम् । वल्गा
हि सर्पपुच्छसदृशा दृश्यन्ते । पूर्वं वेगदर्पविषये जितः संप्रति सर्पभक्षणेऽपि । वल्
कान्यकुब्जभाषायां 'वाग' इति प्रसिद्धा ॥

स सिन्धुजं शीतमहःसहोदरं हरन्तमुच्चैःश्रवसः श्रियं हयम् ।
जिताखिलक्ष्माभृदनल्पलोचनस्तमारुरोह क्षितिपाकशासनः ॥ ६४ ॥

---

१ '[illegible]' इति साहित्यविद्याधरी । '[illegible]
[illegible] । सा च [illegible] इति [illegible] । २ '[illegible]
[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी
४ '[illegible]' इति साहित्यविद्याधरी । '[illegible]
[illegible] । सा च [illegible] । '[illegible]' इति [illegible] ।

इति वृद्धिनिषेधात् भक्रामि इति चिन्त्यम् । 'सकृद्धृक्रमवदं भवति, द्विर्वदं सुवदं भवति' इति तदो दावचनज्ञापितया परिभाषया वृद्धिनिषेधस्यानित्यत्वमाश्रित्य कथंचित्परिहरणीयम्। यदा तु 'तदो दा च' इत्यत्र स्वार्थे दा इति प्रत्यय इति पक्षस्तदैतस्याः परिभाषाया निर्मूलत्वाच्चिन्त्यमेव । यद्वा—'प्राग्दिशो–' इति थमो विभक्तित्वात् 'न विभक्तौ–' इत्यनेनैव मकारस्येत्संज्ञानिषेधे सिद्धे 'इदमस्थमुः' इत्युकारोच्चारणं व्यर्थं सदेतस्याः परिभाषाया मूलमिति ज्ञेयम् । गत्यन्तरं वा गवेषणीयम् । पदेति 'पद्दन्नो–' इति पदादेशः । एककेनेति 'एकादाकिनिच्च–' इति चकारात्कन् ॥

चमूचरास्तस्य नृपस्य सादिनो जिनोक्तिषु श्राद्धतयेव सैन्धवाः ।
विहारदेशं तमवाप्य मण्डलीमकारयन्भूरितुरंगमानपि ॥ ७१ ॥

चमूचरा इति ॥ तस्य नृपस्य चमूचराः सेनाचराः सादिनोऽश्ववारास्तं पूर्वोक्तं विहारदेशं बाह्यलीलाप्रदेशमवाप्य प्राप्य भूरितुरंगमानपि बहूनश्वानपि मण्डलीं मण्डलाकारेण गतिविशेषमकारयन् । अपिशब्दात्तन्मण्डलीकरणवशात्स्वयमपि कृतवन्त इत्यर्थः । के इव—जिनोक्तिषु बौद्धवचनेषु श्राद्धतयास्तिकतया सैन्धवा इव सिन्धुदेशोद्भवा जिना इव । विहारदेशं सुगतालयं प्राप्य यथा जिना मण्डलाकारेणावतिष्ठन्ते तथेत्यर्थः । तेषामयं संप्रदायः । तण्डुलादिसप्तधान्यमयीं मण्डलीं कारयन्तीति तत्संप्रदायविदः । चमूचरा इति 'चरेष्टः' । श्राद्ध इति मत्वर्थे 'प्रज्ञा–' इति णः । मण्डलीमिति गौरादित्वान्ङीप् । तुरंगमानिति 'हृक्रोः–' इति कर्मत्वम् ॥

द्विषद्भिरेवास्य विलङ्घिता दिशो यशोभिरेवाब्धिरकारि गोष्पदम् ।
इतीव धारामवधीर्य मण्डलीक्रियाश्रियामण्डि तुरंगमैः स्थली ॥ ७२ ॥

द्विषद्भिरिति ॥ तुरंगमैरश्वैरितीव हेतोः, विचार्य वा धारामास्कन्दितादिपञ्चप्रकारां गतिमवधीर्य त्यक्त्वावज्ञाय मण्डलीक्रियाश्रिया मण्डलीकरणजनितशोभया स्थली अकृत्रिमा भूमिः, अमण्ड्यभूषि । अश्ववारा धाराभिः प्रथममश्वान्नमयन्ति, पश्चाद्भ्रमिगत्या इति तेषां जातिः । इतीति किम्—अस्य द्विषद्भिरेव दिशो भयेन विलङ्घिता आक्रान्ताः, अस्य यशोभिरेव कीर्तिभिरेवाब्धिः समुद्रो गोष्पदं गोखुरप्रमाणोऽनायासेन लङ्घ्य एवंविधोऽकारि कृतः । ऋजुगत्यास्माभिर्दिगन्तः समुद्रश्च लङ्घनीयः । तयोर्लङ्घनमन्यैरेव कृतमिति तत्रैव भ्रमिं चक्रुरित्यर्थः । 'आस्कन्दितं धौरितकं रेचितं वल्गितं प्लुतम् । गतयोऽमूः पञ्च धाराः' इत्य-
...। गोष्पदमिति 'गोष्पदं सेवितासेवितप्रमाणेषु' इति सुट्पत्वे । धारामिति धार्यन्ते गतौ

अत एव मनोरमायां दीक्षितैः—'कथं तर्हि हरेर्यदक्रामि पदैककेन खम्' इति श्रीहर्षः । प्रमाद ...। यदि समाधेयमेव इत्याग्रहस्तर्हि निवृत्तप्रेषणात्प्राकृतेऽर्थे णिच्चि ततश्चिण् बोध्यः' इत्युक्तम् । णिज्निमित्तिकात्र वृद्धिः । न च तत्राप्यमन्तत्वेन मित्त्वेन ह्रस्वापत्तिः । 'मितां ह्रस्वः' इत्यत्र 'वा ...मे' इत्यतो वा इत्यस्यानुवृत्तौ व्यवस्थितविभाषाश्रयणेन ह्रस्वाप्रवृत्तेः इति तेषामाशयः । सु-...।य तु 'आक्रामि' इति पाठमङ्गीकृत्य क्रमणं क्रमः, क्रम एव क्रामः, प्रज्ञाद्यणन्तस्याङा समासे ...इतिः' इतीनिप्रत्ययान्तं आक्रामि इति खम् इत्येतद्विशेषणं सुबन्तमिति व्याख्येयम्' इत्युक्तम् ।
१ 'अत्र प्रतीयमानोत्प्रेक्षा श्लेषश्चालंकारः' इति **साहित्यविद्याधरी** । २ 'अत्रोत्प्रेक्षालंकारः' इति **साहित्यविद्याधरी** ।

वनान्तस्य वनस्वरूपस्य पर्यन्तं मर्यादामुपेत्य गत्वा न्यवर्तत निवृत्तम्। कस्मिन्सति—तस्मिन्नले क्रमेणावतीर्णदृक्पथे दृश्या(गो)त्रागोचरे सति। किंभूतैर्दृष्टिप्रकारैः—अनुजनमनुगच्छन्यो बन्धुसमाज इष्टसमूहस्तस्य बन्धुभिः सदृशैः। वनान्तः पर्यन्तोऽवधिर्यथा भवति गतित्वेन तथेति क्रियाविशेषणं वा। बन्धुभिरपि वनान्तमुदकसमीपं क्रीडावनसमीपं वा साभिलाषं गत्वा तत्रैव पथि स्थित्वा पथिकेऽदृष्टे सति निवर्त्यते। 'जीवनं भुवनं वनम्' इत्यमरः। (पुरौकसामिति 'पॄ पालने' इत्यस्मान्मूलविभुजादेराकृतिगणत्वात्कप्रत्यये 'उदोष्ठ्यपूर्वस्य' इत्युत्वे रपरत्वे पुर इत्यदन्तेन पुरे पुरं वा ओको येषामिति 'सप्तमीविशेषणे बहुव्रीहौ' इत्यत्र सप्तमीग्रहणात्तज्ज्ञापकात् लक्षणया वा बहुव्रीहौ सुम्लुकि 'वृद्धिरेचि' इति वृद्धौ सिद्धमिष्टं रूपम्) दृक्पथे इति 'ऋक्पूर्–' इति समासान्तः॥

ततः प्रसूने च फले च मञ्जुले स संमुखस्थाङ्गुलिना जनाधिपः।
निवेद्यमानं वनपालपाणिना व्यलोकयत्काननकामनीयकम्॥ ७६॥

तत इति॥ ततो वनप्रवेशानन्तरं स जनाधिपो नलः काननस्य क्रीडावनस्य कामनीयकं रामणीयकं व्यलोकयत्पश्यति स्म। किंभूतम्—वनपालस्योद्यानरक्षकस्य पाणिना हस्तेन निवेद्यमानं ज्ञाप्यमानम्। किंभूतेन—मञ्जुले रमणीये प्रसूने पुष्पे फले च (जातावेकवचनम्) संमुखस्थाभिमुखाङ्गुलिर्यस्य। कामनीयकमिति भावे 'योपधात्–' इति वुञ्। गुणवाचित्वात् 'पूरणगुण–' इति समासनिषेधेऽपि 'संज्ञाप्रमाणत्वात्' इति ज्ञापकबलात्समासः॥

फलानि पुष्पाणि च पल्लवे करे वयोतिपातोद्गतवातवेपिते।
स्थितैः समादाय महर्षिवार्धकाद्वने तदातिथ्यमशिक्षि शाखिभिः॥७७॥

फलानीति॥ वने विद्यमानैः शाखिभिर्वृक्षैर्महर्षिवार्धकाद्वृद्धमहर्षिसमूहात्तदातिथ्यं तस्य नलस्य पूजाशिक्षि शिक्षितेव। किंभूतैः शाखिभिः—वयोतिपातेन पक्षिपतनोद्गत उच्छ्रितो यो वातस्तेन वेपिते कम्पिते पल्लवे शाखाप्रलक्षणे एव करे हस्ते पुष्पाणि फलानि च समादाय गृहीत्वा स्थितैः। वृद्धमहर्षिसङ्घोऽपि वृद्धत्वादेव चले हस्ते फलानि पुष्पाणि च गृहीत्वा राजपूजार्थं यथा तिष्ठति तथा वृक्षा अपि उद्याने महर्षयस्तिष्ठन्तीति सूचितम्। विजने विद्याभ्यासश्च। फलपुष्पयुक्ता वृक्षास्तिष्ठन्तीति भावः। वृद्धानां समूहो वार्धकम् 'गोत्रोक्षो–' इति सूत्रे 'वृद्धाच्च' इति वक्तव्याद्वुञ्। महर्षीणां वार्धकमिति षष्ठीसमासः। सामर्थ्याद्वृत्त्यन्तर्गतस्यापि वृद्धशब्दस्य यथाकथंचिन्महर्षिशब्देनान्वयः। महर्षिपक्षे—वयसस्तारुण्यस्य। 'आख्यातोपयोगे' इत्यपादानत्वम्। आतिथ्यम् तादर्थ्ये 'अतिथेर्ञ्यः' इति ञ्यः। शाखिनः व्रीह्यादित्वादिनिः॥

राजानं दृष्ट्वा सात्त्विकभावोत्पत्तेः कण्टकितत्वात्प्रथमं केतकं वर्णयति—

विनिद्रपत्रालिगतालिकैतवान्मृगाङ्कचूडामणिवर्जनार्जितम्।
दधानमाशासु चरिष्णु दुर्यशः स कौतुकी तत्र ददर्श केतकम्॥ ७८॥

---

१ अयं पाठः कुत्रचिन्नास्ति। २ 'अत्रानुप्रासः सहोक्तिश्चालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र जात्यनुप्रासावलंकारौ' इति साहित्यविद्याधरी। 'स्वभावोक्तिः' इति जीवातुः। ४ 'अत्र प्रतीयमानोत्प्रेक्षा श्लेषश्चालंकारः' इति साहित्यविद्याधरी। 'उत्प्रेक्षेयम्, सा च व्यञ्जकाप्रयोगाद्गम्या, पूर्वोक्तरूपकश्लेषाभ्यामुत्थापिता चेति संकरः' इति जीवातुः।

विनिद्रेति ॥ स नलस्तत्र वने कौतुकी अपूर्वपुष्पादिदर्शनोत्सुकः, विरही वा सन्केतकं केतकीपुष्पं ददर्श। किंभूतं केतकम्—विनिद्रा विकसिता पत्रालिः पत्रपङ्क्तिस्तत्र गताः, तां वा गता ये अलयो भ्रमरास्तेषां कैतवान्मिषात् मृगाङ्कश्चन्द्रः चूडामणौ यस्य स शिवः, तेन वर्जनं पुराणप्रसिद्धः परित्यागस्तेनार्जितमुपार्जितमाशासु दिशासु चरिष्णु प्रसरणशीलं दुर्यशोऽपकीर्तिः, तां दधानम्। भ्रमरा न सन्ति किंतु महादेवकृतपरित्यागजन्यमयश इति। महता परित्यक्तोऽयशोभाग्भवति। चरिष्णु 'अलंकृञ्—' इत्यादिना इष्णुच्। कौतुकी 'अत इनिः'। केतक्याः पुष्पं केतकम्। विकारावयवप्रत्ययस्य 'पुष्पमूलेषु बहुलम्' इति वचनाल्लुक् 'लुक् तद्धित—' इति स्त्रीप्रत्ययलुक् ॥

वियोगभाजां हृदि कण्टकैः कटुर्निधीयसे कर्णिशरः स्मरेण यत्।
ततो दुराकर्षतया तदन्तकृद्विगीयसे मन्मथदेहदाहिना ॥ ७९ ॥

वियोगेति ॥ 'तेन नलेन इति क्रुधा क्रोधेन केतकमाक्रुश्यताऽनिन्द्यत' इति तृतीयश्लोकेनान्वयः। इतीति किम्—स्मरेण कामेन वियोगभाजां वियोगिनां स्त्रीपुंसानां हृदि वक्षसि कण्टकैः कटुः क्रूरः कर्णिशरः कर्णयुक्तो बाणः त्वं यद्यस्मान्निधीयसे निक्षिप्यसे ततस्तस्मात्कारणात्कर्णिशरत्वाद्वा हृदयाद्वा दुराकर्षतयोद्धर्तुमशक्यतया तदन्तकृद्वियोगिनां प्राणहारी त्वं मन्मथदेहदाहिना स्मरहरेण महादेवेन विगीयसे निन्द्यसे। येन वियोगिनो हता अस्मदादयः स दग्ध एव तत्प्रेष्यस्त्वं केतकमिति निन्द्यसे। लुप्तोत्प्रेक्षा ॥

त्वदग्रसूच्या सचिवेन कामिनोर्मनोभवः सीव्यति दुर्यशःपटौ।
स्फुटं स पत्रैः करपत्रमूर्तिभिर्वियोगिहृद्दारुणि दारुणायते ॥ ८० ॥

त्वदग्रेति ॥ मनोभवः कामस्तवाग्रमेव सूक्ष्मत्वात्तीक्ष्णत्वाच्च सूची तद्रूपेण सचिवेनोपकारकेण सहायेन कृत्वा कामिनोः स्त्रीपुंसयोः परस्परधैर्यभञ्जकौ दुर्यशोलक्षणौ पटौ सीव्यति योजयति तत्प्रथमकलिकयातिसुरभितयोद्दीपनभावहेतुभूतया कामिनावुचितानुचितसंबन्धमविचार्य मिथो रिरंसू प्रवर्तेते इति भावः। स्फुटमुत्प्रेक्षते—स कामो वियोगिनां हृदेव दारु काष्ठं तस्मिन्करपत्रवत्क्रकचवन्मूर्तिः स्वरूपं येषां तैस्तव पत्रैः कृत्वा दारुणायते भीषणवदाचरति। केतकप्रदर्शनाद्वियोगिनोः स्त्रीपुंसयोर्धैर्यभङ्गः, पत्रदर्शनाच्च हृदयं विदीर्णं भवतीति भावः। 'दारुणायते' इति पाठे श्लेषोऽस्तीति ज्ञातव्यम्। सूची इति गौरादित्वान्ङीष्। कामिनोः वियोगिनश्च 'पुमान्स्त्रिया' इत्येकशेषः ॥

धनुर्मधुस्विन्नकरोऽपि भीमजापरं परागैस्तव धूलिहस्तयन्।
प्रसूनधन्वा शरसात्करोति मामिति क्रुधाक्रुश्यत तेन केतकम् ॥ ८१ ॥

धनुरिति ॥ प्रसूनधन्वा कामस्तव परागैर्धूलिभिः धूलिहस्तयन्धूलियुक्तं हस्तं कुर्वन्सन् भीमजापरं भैम्यनुरक्तं मां शरसाद्बाणाधीनं बाणलक्ष्यं करोति। किंभूतः कामः—धनुः पुष्पं

---

१ 'भ्रमालिकैतवादित्यनेनालिनःसहेन दुर्यशस्त्वारोपरूपकसंकरः 'भिक्षुं निर्दयं भ्रमालिकैतवेन स्मृतिः' इति लक्षणात्' इति जीवातुः। २ 'अत्र दुःखदत्वम् केतकीविशेषणत्वम् दलविचित्रितवाहेतुत्वोक्तिरेकादेशो हेतुः, स च अधिकारभावोऽन्यो, स योतकृत्वोक्तिरेवेति संकरः' इति जीवातुः। ३ 'दारुणायते' इत्युक्त्या, स च दारुणीति रूपकानुप्राणितेति संकरः' इति जीवातुः।

तस्य मधुना रसेन खिन्न आर्द्रः करो यस्य इति केतकमनिन्द्यत। तव धूलिर्यदि न स्यात्तदा कामः खिन्नकरत्वाच्च्युतसायकः स्यात्। अतोऽयमपराधस्तवैव। खिन्नकरो धनुर्धरो धूलियुक्तं हस्तं करोतीति जातिः। धूलिहस्तयन्निति धूलियुक्तं हस्तं करोतीति ण्यन्ताच्छतृ। प्रसूनधन्वा इति 'धनुषश्च' इत्यनङ्। शरसादिति 'तदधीन–' इति सातिः॥

विदर्भसुभ्रूस्तनतुङ्गताप्तये घटानिवापश्यदलं तपस्यतः।
फलानि धूमस्य धयानधोमुखान्स दाडिमे दोहदधूपिनि द्रुमे॥ ८२॥

विदर्भेति॥ स नलो दाडिमे द्रुमे दाडिमसंज्ञके फलानि अपश्यत्। किंभूते द्रुमे–दोहदधूपिनि अतिशयितफलादिसमृद्धिर्येन भवति तद्दोहदम्। दाडिमीवृक्षस्य दोहदं यो धूपो दोहदधूपः, सोऽस्यास्तीति तस्मिन्। कानिव—घटानिव। किंभूतान्घटान्—विदर्भसुभ्रूर्भैमी, तस्याः स्तनयोस्तुङ्गता उच्चैस्त्वं तस्य आप्तयेऽलमतिशयेन तपस्यतस्तपः कुर्वतः। अत एव धूमस्य धयान्धायकान्। अत एवाधोमुखान्। अन्योऽप्युच्चपदप्राप्तयेऽधोमुखो धूमपानादिना तपश्चरति। एतानि दाडिमीफलानि न किंतु घटा एवैते। तानिवेत्युत्प्रेक्षा। तपस्यतः 'कर्मणो रोमन्थ–' इत्यादिना क्यङ्। 'तपसः परस्मैपदं च' इति वक्तव्याच्छतृ। धयान् 'पाघ्रा–' इति सूत्रेण धेटः शः। 'तत्रोपसर्गानुवृत्तिर्नावश्यकी' इति वृत्तावुक्तम्। दोहदधूपिनि इति कर्मधारयादिनिः समर्थनीयः॥

वियोगिनीमैक्षत दाडिमीमसौ प्रियस्मृतेः स्पष्टमुदीतकण्टकाम्।
फलस्तनस्थानविदीर्णरागिहृद्विशच्छुकास्यस्मरकिंशुकाशुगाम्॥ ८३॥

वियोगिनीमिति॥ असौ नलो दाडिमीमैक्षतापश्यत। किंभूताम्—वियोगिनीं विभिः पक्षिभिः शुकादिभिः योगोऽस्या अस्तीति। अथ च वियोगिनीं विरहिणीं नायिकामिवेति लुप्तोत्प्रेक्षा। प्रियस्मृतेर्दोहदादिस्मरणात् (लक्षणया) प्राप्तेर्हेतोः स्फुटं प्रकटमुदीतकण्टकां प्रियस्मरणाद्रोमाञ्चिताङ्गीम्। नायिकापि नायकस्मरणाद्रोमाञ्चिताङ्गी भवति। तथा–फलानि स्तना एव, तेषां स्थाने मध्ये विदीर्णं स्फुटितं रागि पक्वत्वाल्लोहितयुक्तं हृत् अन्तरप्रदेशस्तस्मिन्विशन्ति यानि शुकास्यानि शुकमुखानि तान्येव स्मरस्य किंशुकानि पलाशपुष्पाण्येव आशुगा बाणा यस्याम्। नायिकापक्षे—दाडिमीफलतुल्यस्तनमध्ये विरहित्वात्स्फुटितमनुरागयुक्तं यद्धृदयं तस्मिन्विशन्तः शुकास्यतुल्या मदनकिंशुका आशुगा बाणा यस्याः। दाडिमीफलं स्वयमेव विदीर्यते। अथवा फलस्य परमात्मसाक्षात्कारलक्षणस्य स्तनं कथकम्। बोधकमिति यावत्, एवंभूतं यत्स्थानं तुरीयावस्थालक्षणं तस्माद्विदीर्णं च्युतं तुरीयावस्थामप्राप्तमेवंभूतं पूर्वं विषयेषु [illegible] सानुरागं यद्धृदयं तद्विशन्तः शुकाः (लक्षणया) तदुपदेशा योगाभ्यासेन हृदयसंलग्नास्तैः [illegible] क्षेप्याः स्मरकिंशुकाशुगा यस्यास्ताम्। विषयेभ्यः परावृत्तचित्ताम्। अनन्तरं प्रियस्य परप्रेमास्पदस्य सच्चिदानन्दघनस्य परमात्मस्वरूपस्य स्मृतेः संनिहितानन्तरप्राप्तस्यानुध्यानाच्छीघ्रतरप्राप्तिसंभावनासंजातहर्षेणोद्गतरोमाञ्चाम्। विविधा योगा वियोगास्तद्वतीमष्टाङ्गयोगयुक्तां, विशिष्टां योगिनीं वा तद्वदैक्षत। सामर्थ्यादिवशब्दलाभः। वियोगिनीमिति 'संपृचा–' इत्यादिना विपूर्वाद्युजेः कर्मकर्तरि घिनुणि ङीप्। दाडिमीति जातिवाचित्वान्ङीप्। उत्पूर्वादीङः

१ 'अत्रोत्प्रेक्षालंकारः' इति जीवातुः।

दृष्ट्वा विरहिणो म्रियन्ते । 'पन्थो ण नित्यम्' इति णे पान्थः । चम्पकोपरि भ्रमरो न तिष्ठतीति केचित् । तत्र तिष्ठति परंतु म्रियते इति प्रामाणिकाः ॥

अमन्यतासौ कुसुमेषु गर्भगं परागमन्धंकरणं वियोगिनाम् ।
स्मरेण मुक्तेषु पुरा पुरारये तदङ्गभस्मेव शरेषु संगतम् ॥ ८७ ॥

अमन्यतेति ॥ असौ नलः कुसुमेषु गर्भगमान्तरप्रदेशगतं परागं पुरा पूर्वं स्मरेण पुरारये शिवाय मुक्तेषु पुष्परूपेषु शरेषु संगतं लग्नं तस्य शिवस्याङ्गलग्नं भस्म इवामन्यतातर्कयत् । किंभूतम्—वियोगिनामन्धंकरणं नेत्रोपघातकम् । भस्मनान्धत्वं भवति । अन्धंकरणमिति 'आढ्यसुभगस्थूल–' इति ख्युन् । 'अरुर्द्विषद्–' इति मुम् ॥

पिकाद्वने शृण्वति भृङ्गहुंकृतैर्दशामुदञ्चत्करुणे वियोगिनाम् ।
अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः ॥ ८८ ॥

पिकादिति ॥ दूनः संतप्तो नलः स्थलपद्मिनीं ददर्श । कस्मिन्सति—वने पिकात्कोकिलाद्वियोगिनां दशामवस्थां भृङ्गाणां भ्रमराणां हुंकृतैर्हुंकारैः कृत्वा शृण्वति सति । किंभूते वने—उदञ्चन्तो विकासं प्राप्नुवन्तः करुणसंज्ञका वृक्षा यस्मिन् । किंभूताम्—अनास्थया नलगताऽधीरतयाऽभिनयवशात् सूनानि पुष्पाणि कमलानि तल्लक्षणकरान्हस्तान्प्रसारयतीत्येवंशीला ताम्, अनास्थयानादरेणापश्यदिति वा । अन्यस्मिन्दयावति कस्यचित् कष्टां दशां शृण्वति सति अनिच्छया किमनेनेति करं प्रसार्य कश्चन वारयति । यद्वा—अनास्थया संसारानित्यतयाभिनयवशात्करं प्रसारयतीति । वने पिकाः कूजन्ति भृङ्गा हुंकारं कुर्वन्ति करुणपुष्पाणि विकसन्ति कमलानि चोन्मीलन्ति । एतच्च दृष्ट्वा विरहिणो व्यथन्ते इति भावः । किमिदं वनं शृणोति दुःखवार्तामितीव पुष्पविकासव्याजेन करं प्रसारयतीति वार्थः । आस्था इत्यत्र 'आतश्चोपसर्गे' इत्यङ् । दून इति दीर्घादूङः स्वादि–(त्वेनोदि–) त्वान्निष्ठानः । करुणो वृक्षः, पक्षे करुणा दया ॥

रसालसालः समदृश्यतामुना स्फुरद्द्विरेफारवरोषहुंकृतिः ।
समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्जनाभियम् ॥ ८९ ॥

रसालेति ॥ अमुना नलेन रसाल आम्रलक्षणः सालो वृक्षः समदृश्यत दृष्टः । किंभूतः—स्फुरन्तो भ्रमन्तो द्विरेफा भ्रमरास्तेषामाराव एव रोषहुंकृतिः क्रोधहुंकारो यस्य । किं कुर्वन्निव—समीरेण वायुना लोलैर्मुकुलैः कृत्वा वियोगिने विरहिणे जनाय तर्जनाया भर्त्सनाया भीर्भयं तां दित्सन्निव दातुमिच्छन्निव । अन्योऽपि हुंकृत्य वलेनाङ्गुल्यादिना तर्जयति । रसालशब्दस्तत्पुष्पे वर्तते । दित्सन्निति ददातेः सनि द्विर्वचनम् 'सनि मीमा–' इतीस् 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः 'सः स्यार्धधातुके' इति तः । 'भयभीत–' इत्यादिना वक्तव्यात्तर्जनाभियमिति समासः ॥

---

१ 'अत्र रूपकापह्नुतिरूपमालंकारः' इति साहित्यविद्याधरी । २ 'अत्रानुप्रासोत्प्रेक्षालंकारौ' इति साहित्यविद्याधरी । ३ 'स्वादिभ्यश्च' इति निष्ठानत्वम् 'इति मल्लिनाथस्य तु प्रमाद एव दूङो स्वादित्वाभावात्' । ४ 'अत्र समासोक्तिरूपकाप्रतीयमानोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । ५ 'अत्रानुप्रासोत्प्रेक्षालंकारौ' इति साहित्यविद्याधरी । 'द्विरेफेत्यादिरूपकोत्थापितेयं तर्जनाभयजननोत्प्रेक्षेति संकरः' इति जीवातुः ।

दिनेदिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूर्च्छ च तापमृच्छ च ।
इतीव पान्थाञ्शपतः पिकान्द्विजान्सखेदमैक्षिष्ट स लोहितेक्षणान् ९०

दिनेदिन इति ॥ स नलः पिकान् द्विजान्पक्षिणः ब्राह्मणांश्च सखेदं सोद्वेगमैक्षिष्ट ददर्श । किंभूतानिव—इति पूर्वोक्तप्रकारेण पान्थाञ्जनाञ्शपत इव पान्थेभ्यः शापं ददत इव । यतो लोहितेक्षणान्रक्तत्वाद्रक्तनेत्रान् । इतीति किम्—रे पान्थ, त्वं दिनेदिने अधिकं भृशं तनुः कृश एधि भव, पुनस्त्वं मूर्च्छ मूर्च्छां प्राप्नुहि । तथा त्वं तापं सर्वाङ्गतापमृच्छ लभस्व च । पिकः स्वभावाद्रक्तलोचनः । पिकशब्दं श्रुत्वा पान्थानां मूर्च्छा तापश्च भवति । क्रुद्धा ब्राह्मणा अपि रक्तनेत्राः सन्तः शापं ददते । रे इत्यनादरेऽव्ययम् । एधि । अस्तेर्लोटि हेः 'हुझल्भ्यो हेः—' इति धौ 'घ्वसोरेद्धौ—' इत्येत्वे 'श्नसोः—' इत्यल्लोपश्च । ऋच्छ इत्यर्तेर्हौ 'पाघ्रा—' इत्यादिना ऋच्छादेशे 'अतो हेः' इति हेर्लुक् । ऋच्छेर्वा । पान्थान् नित्यं पन्थानं गच्छन्तीत्यर्थे 'पन्थो ण नित्यम्' इति णः, पन्थादेशश्च । ङीप्समानताभावात्पान्थानिति द्वितीया । उपालम्भाभावाच्च 'शपतः' इति तङभावः ॥

अलिस्रजा कुड्मलमुच्चशेखरं निपीय चाम्पेयमधीरया धिया ।
स धूमकेतुं विपदे वियोगिनामुदीतमातङ्कितवानशङ्कत ॥ ९१ ॥

अलीति ॥ स नलः चाम्पेयं कुड्मलमधीरया धिया बुद्ध्या निपीय सादरमालोक्य आतङ्कितवान् चकितः सन् वियोगिनां विपदे विनाशायोदीतमुदयं प्राप्तं तमेव धूमकेतुमुत्पातविशेषमशङ्कत तर्कितवान् । धूमकेतुर्विनाशसूचकः । किंभूतं कुड्मलम्—अलिस्रजा भ्रमरपङ्क्त्योच्चशेखरमुच्चाग्रम् । 'चाम्पेयश्चम्पको हेमपुष्पकः' इत्यमरः । ततो विकारप्रत्ययस्य 'पुष्प—' इति लुक् । कुड्मलमिति 'कलस्तृपश्च' इत्यत्र कलप्रत्ययमनुवर्त्य 'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्' इति कले तस्य मुडागमे 'कुट कौटिल्ये' इत्यस्य धातोः 'कुट्मलः' टवर्गान्तोऽयम् । 'कुड बाल्ये' इत्यस्य 'कुड्मलः' डवर्गोऽपि । तथाच मेदिनीकोशः—'कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे' इति ॥

गलत्परागं भ्रमिभङ्गिभिः पतत्प्रसक्तभृङ्गावलि नागकेसरम् ।
स मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शापमिव व्यलोकयत् ॥ ९२ ॥

गलदिति ॥ स नलो नागकेसरं नागकेसरकुसुमं शापमिव निकषमिव कामशापमिव व्यलोकयत् । कीदृशम्—गलत्परागं क्षरत्परागम् । तथा भ्रमिभङ्गिभिर्भ्रमणरचनाविशेषैः पतन्ती वृक्षादागच्छन्ती प्रसक्ता लग्ना भृङ्गावलिर्भ्रमरपङ्क्तिर्यस्मिन् । किंभूतं शापम्—मारस्य कामस्य नाराचा बाणास्तेषां निघर्षणात्स्खलन्तो भ्रश्यन्तो ज्वलन्तो दीप्यमानाः कणाः स्फुलिङ्गा यस्मात् । परागो ज्वलत्कणस्थाने । भृङ्गावलिर्धूमस्थाने । [illegible] भ्रमणं भवति । लोहं [illegible] कणाश्च तस्मादुच्छलन्ति । '[illegible] निकषः [illegible]' इत्यमरः ॥

तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद्गुणस्पृशः ।
स्वचापदुर्निर्गतमार्गणभ्रमात्स्मरः स्वनन्तीरवलोक्य लज्जितः ॥ ९३ ॥

---

१ '[illegible]' इति जीवातुसाहित्यविद्याधर्यौ । २ '[illegible]' इति साहित्यविद्याधरी ।

तदिति ॥ स्मरः कामः शिलीमुखालीर्भ्रमरपङ्क्तीरवलोक्य स्वचापात्स्वगुणः दुर्निर्गता दुःखेन निर्गता मार्गणा बाणास्तेषां भ्रमाद्भ्रान्तेः लज्जितो लज्जां प्राप्त इव (लुप्तोत्प्रेक्षा)। किंभूताः शिलीमुखालीः—कुसुमादपि सुगन्धि तदङ्गं नलाङ्गमुद्दिश्य पातुकाः पतनशीला आगच्छन्तीः। यद्वा—कुसुमात्सकाशात्पातुकाः। यद्वा—कुसुमगुणवत्त्वात्कुसुमलक्षणाद्धनुषः पातुकाः। यतो गुणस्पृशो गुणाभिलाषिणीः, मौर्वीं स्पृशश्च। स्वनन्तीः शब्दायमानाः। शिलीमुखपदं भ्रान्तेः कारणम्। 'अलिबाणौ शिलीमुखौ' इत्यमरः। दुर्निर्गतो हि बाणो ध्वनति लक्ष्यं च न स्पृशति तेन धानुष्को लज्जते। सुगन्धीति सुपूर्वस्य 'गन्धस्येत्' इतीत्त्वम्। पातुकाः तच्छीले 'लषपत—' इत्युकञ् ॥

मरुल्ललत्पल्लवकण्टकैः क्षतं समुच्छलच्चन्दनसारसौरभम्।
स वारनारीकुचसंचितोपमं ददर्श मालूरफलं पचेलिमम् ॥ ९४ ॥

मरुदिति ॥ स नलः पचेलिमं पक्कं मालूरफलं बिल्वफलं ददर्श। किंभूतम्—मरुता ललन्तो विलसन्तो ये पल्लवाः शाखाग्राणि तेषां कण्टकैः क्षतम्। मरुत् देवः, तद्वल्ललन्विलासं कुर्वन्यः पल्लवो विटस्तस्य कण्टकाः कण्टकवत्तीक्ष्णा नखास्तैः क्षतम्। अथ च—तस्य पल्लव इव पल्लवः पाणिः, तस्य कण्टकैर्नखैरिति छायार्थः। तथा समुच्छलदुद्गच्छच्चन्दनवत्सारं श्रेष्ठं सौगन्ध्यं यस्मात्। चन्दनस्य सारं सौगन्ध्यं यस्मादिति च। सारशब्देन घनसारः कर्पूरो लक्षणया, श्रीखण्डयुक्तः सार इति वा। अत एव वारनारी गणिका तस्याः कुचौ ताभ्यां संचिता तुल्या, अर्जिता वा उपमा सादृश्यं यस्य। गणिकास्तनतुल्यशोभं वा। कुलस्त्रीकुचे नखक्षतादिप्राकट्योक्तेरनौचित्यमिति 'वार' इति पदम्। 'बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलौ' इत्यमरः। ललतिरुभयपदी। 'इगन्ताच्च लघुपूर्वात्' इति भावेऽण्। कर्मकर्तरि केलिमर उपसंख्यानात्पचेलिमम् ॥

युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम्।
स्मरेषुधीकृत्य धिया भयान्धया स पाटलायाः स्तवकं प्रकम्पितः ॥९५॥

युवेति ॥ स नलो भयान्धया भयभ्रान्तया धिया बुद्ध्या पाटलायाः स्तवकं गुच्छं स्मरेषुधीकृत्य कामतूणीरीकृत्य प्रकम्पितश्चकितः। किंभूतं गुच्छम्—युवद्वयी स्त्रीपुंसद्वयी तस्याश्चित्ते वेध्येऽन्तःकरणे तयोर्मध्ये निमज्जनं ब्रुडनं तस्मिन्नुचितानि योग्यानि प्रसूनानि पुष्पाणि तैः शून्येतरं पूर्णं गर्भगह्वरं मध्यबिलं यस्य। एतत्पाटलागुच्छं न भवति, किंतु कामस्य शस्त्रमिति बुद्ध्या कम्पित इत्यर्थः ॥

मुनिद्रुमः कोरकितः शितिद्युतिर्वनेऽमुनामन्यत सिंहिकासुतः।
तमिस्रपक्षत्रुटिकूटभक्षितं कलाकलापं किल वैधवं वमन् ॥ ९६ ॥

अत्र स्वनच्छिलीमुखेषु दुर्निर्गतमार्गणभ्रमात् भ्रान्तिरलंकारः स च शिलीमुखेति श्लेषानुप्राणिता ... लज्जितत्वोत्प्रेक्षा इत्यनयोः संकरः' इति जीवातुः। २ 'कर्मकर्तरि चायं कैश्चिदिष्यते, ... तु कर्मणि प्रदर्शितः' इति कैयटः। ३ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी। 'अत्रानुप्रासे रूपकालंकारः' इति साहित्यविद्याधरी। 'अत्र पाटलस्तवके मदनतूणीरभ्रमाद्भ्रान्तिमदलंकारः। 'कविसंमतसादृश्याद्विषये विहितात्मनि। आरोप्यमाणानुभवो यत्र स भ्रान्तिमान्मतः॥' इति लक्षणात्' इति जीवातुः।

नृपाय तस्मै हिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः ।
विनिर्मितं केतकरेणुभिः सितं वियोगिनेऽदत्त न कौमुदीमुदः ॥ ९९ ॥

नृपेति ॥ अहर्महः अह्नो दिवसस्य महस्तेजः तस्मै वियोगिने नृपाय कौमुदीमुदश्चन्द्रिकाजनितान्संतोषान्नादत्त । किंभूतमहर्महः—वनानिलैरुद्यानवायुभिर्हिमितं हिमीकृतम् । पुष्परसैर्मकरन्दैः सुधीकृतममृतीकृतम् । केतकरेणुभिः केतकीकुसुमपरागैः सितं श्वेतं विनिर्मितं कृतम् । चन्द्रिकातुल्यमपि दिवसे तेजो विरहित्वात्तस्य चन्द्रिका दुःखदायिनी इति दुःखदं जातमित्यर्थः । अहर्महः कौमुदीति व्यस्तरूपकम्, तस्मै मुदो नादत्त इति वा । शैत्यादिगुणयोगादहर्मह इति कारणात्तस्मै मुदोऽदत्त, न कौमुदीति वा । शैत्यादिगुणयोगेन दिवसतेजः सुखान्तरं तस्मै ददौ, कौमुदीमुदो न ददाविति वा । दिवसतेजः कौमुदीजन्यहर्षान्नादत्त किम् । अपि तु ददावेवेति वा । अहर्मह इति 'रोऽसुपि' इति रेफः ॥

अयोगभाजोऽपि नृपस्य पश्यता तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः कुहूरुताहूयत चन्द्रवैरिणी ॥ १०० ॥

अयोगेति ॥ अयोगभाजोऽपि विरहिणोऽपि नृपस्य नलस्य तत्प्रसिद्धमाननं मुखं साक्षादबाधितत्वेन अमृतांशुं चन्द्रमेव पश्यता पिकेन कोकिलेन चन्द्रवैरिण्यमावस्या मुहुराहूयताकारिता । किंभूतेन पिकेन—अनेन मुखेन विरहित्वान्म्लानेन भवितव्यं, तदधुनापि न म्लायतीति रोषेण क्रोधेन अरुणे रक्ते चक्षुषी यस्य । तथा–कुहूः कुहूः इति रुत् शब्दो यस्य । कुहूः इति रौतीति वा कुहूः इति रुत् शब्दस्तयामावास्या आकारिता । उत इति निश्चये, किंत्वर्थे वा । चन्द्रवैरिणी कुहूरिति वा योजना । विरहेऽपि चन्द्राधिक्यं मुखस्य । तदेव पाण्डुतादिगुणोपेतमेवेति वा । 'कुहूः स्यात्कोकिलालापनष्टेन्दुकलयोरपि' इति विश्वः । पिकस्य नेत्रे स्वभावेनैव रक्ते, शब्दश्च कुहूरिति । तत्रैतत्सर्वमुत्प्रेक्षितम् ॥

अशोकमर्थान्वितनामताशया गतान्शरण्यं गृहशोचिनोऽध्वगान् ।
अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम् ॥ १०१ ॥

अशोकेति ॥ एष नलोऽशोकं वृक्षमेवंभूतमिवामन्यत । 'अर्थेन यत्सेवया शोको न भवति' इत्येवंरूपेणान्वितमन्वर्थं नाम यस्य तस्य भावोऽर्थान्वितनामता तस्यामाशयाभिलाषेणागतान्प्राप्तान्गृहशोचिनः स्त्रीशोचिनोऽध्वगान्पान्थानवन्तमिवामन्यत' इत्यन्वयः । पुनः किं[illegible]म्—पल्लवैः शाखाग्रैः कृत्वा प्रतीष्टमङ्गीकृतं कामस्य ज्वलत् आर[illegible]जालकमस्त्रसमूहो [illegible]न, अस्त्ररूपाणि जालकानि कलिका येनेति वा । यतः—शरण्यं शरणे र[illegible] साधुम् । अन्यो-
शरण्योऽरिदास्त्राणि स्वाङ्गे गृह्णञ्शरणागतान्रक्षति । पल्लवैरवन्तमिति वा कामस्य ज्वलद[illegible] येनेति वा अर्थान्वितनामताशया शरणागतान्पान्थानवन्तं मारयन्त[illegible] । अवन्तं मारणार्थमेवेति तात्पर्यम् । यतः शरणे मारणे साधुं समर्थम् । पथि[illegible]भ्यो भयम्, तानि तु पुष्पान्तराद्दारुणान्यत्रैव विद्यन्ते । ततश्च 'कामशस्त्राणि

[illegible] । वनानिलादिषु सुखकारणेषु सत्सु सुखकार्यानुत्पत्तेरुक्तनिमित्तविशेषोक्तिरलं[illegible]ति साहित्यविद्याधरी । २ 'वियोग–' इति पाठो जीवातुसंमतः । ३ 'अत्रोत्प्रेक्षा रूपकालं[illegible] इति साहित्यविद्याधरी । 'अत्रोत्प्रेक्षा श्लिष्टरूपकसापेक्षेति संकरः' इति जीवातुः ।

'बहिः परम्' इति क्वचित्पाठः। तत्र परं केवलम्। किंभूतं वनम्—इष्टगन्धाढ्यमिष्टेनाभीष्टेन गन्धेन सौरभेणाढ्यं समृद्धम्। किंभूतोऽसौ—पिकोपगीतोऽपि। तथा—शुकस्तुतोऽपि। 'आमोदो हर्षगन्धयोः' इति विश्वः॥

करेण मीनं निजकेतनं दधद्द्रुमालवालाम्बुनिवेशशङ्कया।
व्यतर्कि सर्वर्तुघने वने मधुं स मित्रमत्रानुसरन्निव स्मरः॥ १०५॥

करेणेति॥ स नलः स्मर इव व्यतर्कि। लोकैरिति शेषः। किंभूतः स्मरः—सर्वे च ते ऋतवश्च सर्वर्तवस्तैर्घने संपूर्णेऽत्रास्मिन्वने मित्रं सहायं मधुं वसन्तमनुसरन्मृगयमाणः। निजकेतनं चक्रवर्तिचिह्नं ध्वजरूपं मीनं लक्षणभूतरेखारूपमत्स्यं द्रुमाणामालवालेष्वम्बु तस्मिन्निवेशशङ्कया करेण दधत् धारयन्। दधदिति 'नाभ्यस्तात्' इति नुन्निषेधः। आलूयते खन्यत इत्यालवालम्। औणादिक आलच्प्रत्ययः॥

लतावलालास्यकलागुरुस्तरुप्रसूनगन्धोत्करपश्यतोहरः।
असेवतामुं मधुगन्धवारिणि प्रणीतलीलाप्लवनो वनानिलः॥ १०६॥

लतेति॥ वनानिलोऽमुं नलमसेवत। किंभूतः—लतारूपा अवलास्तासां लास्यकला नृत्यविद्या तस्या गुरुरध्यापकः। तथा—तरूणां प्रसूनानि पुष्पाणि तेषां गन्धोत्करस्य गन्धसमूहस्य पश्यतोहरश्चौरः। तथा—मधु पुष्परसस्तल्लक्षणे गन्धवारिणि गन्धोदके प्रणीतं कृतं लीलाप्लवनं जलक्रीडा येन। मधुगन्धाख्यं नलसर इति केचित्। क्रमेण विशेषणत्रयेण मन्दत्वसुगन्धत्वशीतलत्वानि सूच्यन्ते। एवंविधो वायुः कार्यसिद्धेः सूचकः। अन्योऽप्येवंविधः पीठमर्दादिभिः परिचारको नायकं सेवते। पश्यतोहर इति 'षष्ठी चानादरे' इति षष्ठ्या 'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेषु' इत्यलुक्॥

अथ स्वमादाय भयेन मन्थनाच्चिरत्नरत्नाधिकमुच्चितं चिरात्।
निलीय तस्मिन्निव सत्नपांनिधिर्वने तडाको ददृशेऽवनीभुजा॥१०७॥

अथेति॥ अथानन्तरमवनीभुजा राज्ञा नलेन स तडाकोऽपांनिधिरिव समुद्र इव ददृशे। लुप्तोत्प्रेक्षा। किंभूतः—चिराद्बहुकालेनोच्चितं वृद्धिं प्रापितम्, तथा—चिरत्नैश्चिरंतनै रत्नैरैरावतादिभिरधिकम्। पूर्वं तान्यसहायान्येवासम्, इदानीं तु तान्येव बहूनि जातानि तेभ्योऽधिकं वा। स्वं धनं मन्थनाद्भयेनादाय गृहीत्वा तस्मिन्वने निलीय तडाकरूपेणैव तिरोहितीभूय निवसन्। समुद्रोपमयोदकबाहुल्यं व्यज्यते। तस्मिन्वने सन् विद्यमान इति पक्षे साक्षादुत्प्रेक्षा। अन्योऽपि धनी राजादिपीडनाद्भयेन सर्वस्वं गृहीत्वा निरुपद्रवे देशान्तरे गुप्तो वसति। 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः। तडाक इति 'तड आघाते' इत्यस्मात् 'पिनाकादयश्च' इत्युणादि-[illegible]ये सिद्धम्। मन्थनादिति 'भीत्रा—' इत्यपादानत्वम्। चिरत्न इति 'चिरपरुत्परा-[illegible] वक्तव्यः' इति त्नः॥

[illegible]क्तनिमित्तविशेषोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'असौ मीनः पानीये प्रवेक्ष्य-[illegible]' इति सुखावबोधा। ३ 'अत्रानुप्रासोत्प्रेक्षालंकारौ' इति साहित्यविद्याधरी। [illegible]' इति साहित्यविद्याधरी। ५ 'अत्रानुप्रासातिशयोक्तिः समासोक्ति-[illegible]' इति साहित्यविद्याधरी।

रथाङ्गभाजा कमलानुषङ्गिणा शिलीमुखस्तोमसखेन शार्ङ्गिणा ।
सरोजिनीस्तम्बकदम्बकैतवान्मृणालशेषाहिभुवान्वयायि यः ॥ १११ ॥

रथेति ॥ यत्तडागः सरोजिनी कमलिनी तस्याः स्तम्बकदम्बो गुल्मसमूहस्तस्य कैतवा-न्मिषात्कमलिनीगुल्मसमूहेनैव शार्ङ्गिणा श्रीकृष्णेनान्वयायि अनुगतः । कृष्णो हि समुद्रे शेते । कदम्बपदप्रयोगसामर्थ्यात् शार्ङ्गिणेति जातावेकवचनम् । किंभूतेन—रथाङ्गं चक्रं, चक्रवाकश्च तद्भाजा । तथा—कमला लक्ष्मीः, कमलमुत्पलं तथा, तेन च सहानुषङ्गः संबन्धोऽस्यास्तीति तेन । तथा—शिलीमुखस्तोमो भ्रमरसमूहस्तत्सखेन तत्सदृशेन तद्वर्णभागेन तत्सहितेन च, बाणसमूहसहितेन वा । तथा—मृणालमिव शेषाहिः स एव भूः शयनस्थानं यस्य मृणालान्येव शेषाहिः भूरुत्पत्तिस्थानं यस्य । 'सलिलं कमलं जलम्' इत्यमरः । कमलानुषङ्गिणेत्यत्र श्लेषः ॥

तरङ्गिणीरङ्कजुषः स्ववल्लभास्तरङ्गरेखा बिभरांबभूव यः ।
दरोद्गतैः कोकनदौघकोरकैर्धृतप्रवालाङ्कुरसंचयश्च यः ॥ ११२ ॥

तरङ्गिणीरिति ॥ यत्तडागः तरङ्गरेखास्तरङ्गमाला एव तरङ्गिणीर्नदीर्बिभरांबभूव । व्यस्त-रूपकम् । किंभूताः—अङ्कजुषो मध्यसेविनीरुत्सङ्गसेविनीश्च । तथा—स्ववल्लभाः स्वप्रियाः, प्राणे-श्वरीश्च । यतश्च तडागः दरोद्गतैरीषदुद्गतैः कोकनदौघा रक्तोत्पलसमूहास्तेषां कोरकैर्मुकुलैः कृत्वा धृतः प्रवालाङ्कुरसंचयो विद्रुमाङ्कुरसमूहो येन (तादृग् अस्ति) समुद्रे नद्यः प्रविशन्ति, विद्रुमाङ्कुराश्च बहवः सन्ति, तथात्रापीति समुद्रसाम्यम् ॥

महीयसः पङ्कजमण्डलस्य यश्छलेन गौरस्य च मेचकस्य च ।
नलेन मेने सलिले निलीनयोस्त्विषं विमुञ्चन्विधुकालकूटयोः ॥११३॥

महीयस इति ॥ यत्तडाको नलेन महीयसो महत्तरस्य गौरस्य श्वेतस्य तथा मेचकस्य नीलस्य पङ्कजमण्डलस्य कमलसमूहस्य छलेन व्याजेन सलिले निलीनयोर्निमग्नयोर्विधुकालकूट-योश्चन्द्रविषयोस्त्विषं दीप्तिं विमुञ्चन्मुद्गिरन्निव मेने शङ्कितः । समुद्रे यथा चन्द्रो, विषं च तिष्ठति तथात्रापीति । विधुरमृतमिति केचित् ॥

चलीकृता यत्र तरङ्गरिङ्गणैरबालशैवाललतापरम्पराः ।
ध्रुवं दधुर्वाडवहव्यवाडवस्थितिप्ररोहत्तमभूमधूमताम् ॥ ११४ ॥

चलीकृता इति ॥ यत्र यस्मिंस्तडाके तरङ्गरिङ्गणैस्तरङ्गस्खलनैः चलीकृताश्चालिता अबाला महत्यः शैवाललतास्तासां परम्पराः समूहाः वाडवहव्यवाट् वाडवानलस्तस्यावस्थितिरवस्थानं तेन प्ररोहत्तमोऽतिशयेन प्रादुर्भूतो भूमा बाहुल्यं यस्य एवंविधो यो धूमस्तस्य भावस्तत्ता तां दधुरिति ध्रुवं शङ्के । समुद्रे वाडवानलधूमस्तिष्ठति तद्वदत्रापि । प्ररोहत्तमधूमभूमतामिति क्वचित् । तत्र प्ररोहत्तमो धूमभूमा यासामिति । 'वहेश्च' इत्यस्य छान्दसत्वस्य प्रायिकत्वात् ।९' इत्यत्र ण्विः । बहोर्भावो भूमा इति 'बहोर्लोपो भू च बहोः' इति सिद्धम् ॥

।पि कैतवशब्देन स्तम्बत्वमपह्नुत्य शार्ङ्गित्वारोपादपह्नवभेदः' इति जीवातुः । 'अत्र श्लेषो-ऽलंकारः' इति साहित्यविद्याधरी । २ 'अत्रानुप्रासरूपकापह्नुतीनां संकरः' इति
। 'अत्रापि कोकनदकोरकाणां विद्रुमत्वेन रूपणाद्रूपकालंकारः' इति जीवातुः ।
छलेन विमुञ्चन्निव' इति सापह्नवोत्प्रेक्षा' इति जीवातुः । ४ 'अत्रोत्प्रेक्षालंकारः' इति
धरी ।

प्रकाममादित्यमवाप्य कण्टकैः करम्बितामोदभरं विवृण्वती ।
धृतस्फुटश्रीगृहविग्रहा दिवा सरोजिनी यत्प्रभवाप्सरायिता ॥ ११५ ॥

प्रकामेति ॥ यत्प्रभवा यस्मात्तडागादुत्पत्तिर्यस्याः सा सरोजिनी कमलिनी दिवा दिने अप्सरायिता अप्सरस इवाचरिता अप्सरस्तुल्या । किम्भूता—आदित्यं सूर्यमवाप्य प्रकाममतिशयेन कण्टकैः करम्बिता व्याप्ता । आमोदभरं सौगन्ध्यबाहुल्यं विवृण्वती प्रकटयन्ती । तथा—धृतः स्फुटानि विकसितानि श्रीगृहाणि कमलानि तान्येव विग्रहः शरीरं यया । अथ च एवंविधाः प्रकामं प्रकृष्टमदनमादित्यं देवं प्राप्य रोमाञ्चिता हर्षं प्रकटयन्त्यो दिवा स्वर्गेण धृतः स्फुटायाः प्रकाशमानायाः श्रियः शोभायाः गृहं स्थानं विग्रहः शरीरं यासां ता अप्सरसोऽपि । आदित्यमिति 'दित्यदित्या—' इति ण्यः । अप्सरायितेति 'कर्तुः क्यङ् सलोपश्च' इति क्यङि 'ओजसोऽप्सरसः—' इत्यादिना सलोपः ॥

यदम्बुपूरप्रतिबिम्बितायतिर्मरुत्तरङ्गैस्तरलस्तटद्रुमः ।
निमज्ज्य मैनाकमहीभृतः सतस्ततान पक्षान्धुवतः सपक्षताम् ॥ ११६ ॥

यदिति ॥ यस्य तडागस्याम्बुन उदकस्य पूरे प्रवाहे प्रतिबिम्बिता प्रतिफलिता आयतिर्दैर्घ्यं यस्य एवंभूतस्तटद्रुमस्तीरवृक्षो निमज्ज्यान्तर्निमग्नो भूत्वा सतो विद्यमानस्य मैनाकमहीभृतो मैनाकनाम्नः पर्वतस्य सपक्षतां समानतां पक्षसाहित्यं च ततान विस्तारयामास । मैनाक इव स्थित इत्यर्थः । किम्भूतः—मरुत्तरङ्गैर्वायुचालितोर्मिभिस्तरलश्चञ्चलः । किम्भूतस्य—पक्षान्धुवतः कम्पयतः । अत्र वृक्षप्रतिबिम्बः समुद्रे मैनाकस्थितिरिति ॥

युग्मम्—

पयोधिलक्ष्मीमुषि केलिपल्वले रिरंसुहंसीकलनादसादरम् ।
स तत्र चित्रं विचरन्तमन्तिके हिरण्मयं हंसमबोधि नैषधः ॥ ११७ ॥
प्रियासु बालासु रतक्षमासु च द्विपत्त्रितं पल्लवितं च बिभ्रतम् ।
स्मरार्जितं रागमहीरुहाङ्कुरं मिषेण चञ्च्वोश्चरणद्वयस्य च ॥ ११८ ॥

पयोधीति युग्मम् ॥ स नलस्तत्र तस्मिन्केलिपल्वले क्रीडासरसि चित्रमन्तिके विचरन्तं हंसीसमीपे गच्छन्तं हिरण्मयं सुवर्णमयं हंसमबोधि ददर्श । किम्भूते—पयोधिः समुद्रस्तस्य लक्ष्मीं शोभां पूर्वोक्तविधिलक्षणप्रकारेण मुष्णातीति । किम्भूतं हंसम्—रिरंसू रन्तुमिच्छुः हंसी तस्याः कलनादोऽव्यक्तमधुरध्वनिस्तत्र सादरं साभिलाषम् । चित्रं सुवर्णमयत्वादाश्चर्यकारकं वा अन्तिके पल्वलसमीपे वा । पूर्वोक्तप्रकारेणातिवर्णितस्य पल्वलत्वमनुचितम् । तत्तु नलस्य क्रीडासर इति बुद्ध्या पल्वलत्वव्यपदेश इति वा । अथच विचरन्तमङ्गुष्ठतुल्ये विलासपल्वलतुल्ये शरीरे विचरन्तं हंसं परमात्मानं कश्चिद्योगी पश्यति । रिरंसुहंसी हंसी तस्याः कलनादे सादरम् । हिरण्मयत्वं 'हिरण्मयः पुरुषः' 'एको हंसः' इति श्रुतेः । विहरन्तमिति क्वचित् । हिरण्यस्य विकार इत्यर्थे मयटि 'दाण्डिनायन—' इत्यादिना हिरण्मयः साधुः ।

---

१ [illegible] इति साहित्यविद्याधरी । २ [illegible] इति साहित्यविद्याधरी । ३ [illegible] इति साहित्यविद्याधरी । ४ 'चञ्च्वोः' इत्येकवचनान्तोऽपि पाठः क्वचित् ।

अबोधीति कर्तरि णिच् ॥ **प्रियास्विति** ॥ किंभूतम्—बालासु प्रियासु स्वल्पमात्रं न पुरः
रामयांसु प्रियासु चञ्चोर्मिषेण चरणद्वयस्य च मिषेण द्विप्रकारं द्विगुणं पल्लवितं पल्लवितं
च स्मरार्जितं कामोत्पन्नं रागोऽनुरागलक्षणो महीरुहो वृक्षस्तस्याङ्कुरं बिभ्रतं धारयन्तं धारय-
न्तम्। बालासु स्वल्पोऽनुरागः प्रौढासु भूयानित्यर्थः। पञ्चशराङ्कं चञ्चुपुटस्य। अनेकान्
संयोगाच्चरणद्वयस्य पल्लवसाम्यम्। राजहंसस्य च चञ्चुचरणं लोहितम्। द्विगुणशब्दाभ्यां ता-
कादित्वादितच्। बिभ्रतमिति 'नाभ्यस्तात्-' इति नुमभावः। चञ्चुपुटस्य द्विविधत्वाद्
प्रियासु चुम्बनादिव्यापारः। प्रौढासु चरणतलस्य पल्लवितत्वात्सर्वाङ्गीण इति सूचितम् ॥

महीमहेन्द्रस्तमवेक्ष्य स क्षणं शकुन्तमेकान्तमनोविनोदिनम्।
प्रियावियोगाद्विधुरोऽपि निर्भरं कुतूहलाक्रान्तमना मनागभूत् ॥११९

महीति ॥ स महीमहेन्द्रः पृथ्वीन्द्रः प्रियावियोगाद्दमयन्तीविरहान्निर्भरमत्यन्तं विधुरोऽपि
विह्वलोऽपि तं शकुन्तं हंसं क्षणं मुहूर्तमवेक्ष्यावलोक्य मनागीषत्कुतूहलेन कौतुकेनाक्रान्त-
मनोऽन्तःकरणं यस्सैवंभूतोऽभूत्। किंभूतम्—एकान्तेन नियमेन सर्वदाभीक्ष्णं वा मनो
विनोदयति रञ्जयत्येवंशीलम् ॥

विरहित्वेऽपि तस्य कुतूहलाक्रान्तत्वं कुत इत्यपेक्षायां कविरर्थान्तरन्यासेनोत्तरमाह—सै-
न्यनलदर्शनेनातिभीतः कथं तत्र निदद्राविल्युत्तरश्लोकाकाङ्क्षायामुत्तरश्लोकसमर्थनार्थं वार्था-
न्तरन्यासमाह—

अवश्यभव्येष्वनवग्रहग्रहा यया दिशा धावति वेधसः स्पृहा।
तृणेन वात्येव तयानुगम्यते जनस्य चित्तेन भृशावशात्मना ॥ १२०

अवश्येति ॥ अवश्यं नियमेन भव्येषु भवितव्येषु शुभादिषु विषयेऽनवग्रहोऽवाध्य-
मानो निरर्गलो ग्रहोऽभिनिवेशः प्रसरो यस्याः सा वेधसो ब्रह्मणः स्पृहा वाञ्छा यया दिशा
येन मार्गेण धावति गच्छति तया दिशा तेनैव मार्गेण जनस्य लोकस्य चित्तेन सा वेधसः
स्पृहानुगम्यते। यथा विधिः प्रेरयति तथा लोकः करोतीत्यर्थः। किंभूतेन चित्तेन—भृश-
मत्यर्थमवशोऽनधीन आत्मा स्वरूपं यस्य तेन। विधिस्पृहाधीनेनेत्यर्थः। यथा—अप्रति-
बन्धा वात्या यया दिशा धावति तया दिशा निःसारत्वाद्वातपरतन्त्रेण तृणेन सा वात्यानुग-
म्यते तथेत्यर्थः। अवश्यंभाविभैमीपरिणयनानुकूले विधिप्रेरिते हंसे कौतुकं युक्तमिति भावः।
विधिप्रेरितत्वादेव नलस्वीकृतस्वीयग्रहणपूर्वमोचनद्वारा नलस्योपकारार्थं सैन्यसंनिधावपि

१ अत्र 'रागं बिभ्रतम्' इति हंसविशेषणाद्रागस्य हंसाधिकरणकत्वोक्तिः। प्रियास्वधिकरणभूता-
इत्युपाध्यायविश्वेश्वरव्याख्यानं प्रत्याख्येयम्। अन्यनिष्ठरागस्यान्याधिकरणत्वायोगात्। न चायमे-
एवोभयनिष्ठ इति भ्रमितव्यम्। अस्येच्छापरपर्यायस्य तथात्वायोगात्। अन्यथा बुद्ध्यादीनामपि तथा-
त्वापत्तौ सर्वसिद्धान्तविरोधात्। विषयानुरागाभावप्रसङ्गाच्च। उभयोरपि रागित्वसाम्यादुभयनिष्ठत्वभ्रम-
केषांचित्। तस्मात्कामिनोरन्योन्यविषयत्वमेव नाधिकरणत्वमिति सिद्धम्। प्रियास्विति विषयसप्तमी-
[illegible]ति सर्वं रमणीयम्। 'अत्र 'रागमहीरुहाङ्कुरम्' इति रूपकं चञ्चुचरणमिषेण इत्यपह्नवानुप्र-
इति संकरः। तेन च बाह्याभ्यन्तररागयोर्भेदेऽभेदलक्षणातिशयोक्त्युत्थापिता चञ्चुचरणव्याजेन
बहिरङ्कुरितत्वोत्प्रेक्षा व्यज्यते इत्यलंकारेणालंकारध्वनिः' इति जीवातुः। अत्र अनुप्रासयथा-
[illegible]तिसंसृष्टिः इति साहित्यविद्याधरी। २ 'अत्रानुप्रासो विशेषश्चालंकारौ' इति साहि-
धरी।

बुद्धिपूर्वं निदद्राविति भावः । यद्वा अनेनाकारेण तेन न ज्ञातस्तथापि विधिवशादेव भाविन्यपि सुखेऽन्तःकरणं सोत्साहं जातमिति भावः । अवश्यभव्येष्विति मयूरव्यंसकादित्वात्समासः । 'लुम्पेदवश्यमः—' इति मलोपः ॥

अथावलम्ब्य क्षणमेकपादिकां तदा निदद्रावुपपल्वलं खगः ।
स तिर्यगावर्जितकंधरः शिरः पिधाय पक्षेण रतिक्रमालसः ॥ १२१ ॥

अथेति ॥ अथानन्तरं स खगो हंसस्तदा तस्मिन्समये रतिक्रमेण सुरतखेदेनालसः सन् उपपल्वलं सरःसमीपे क्षणं निदद्रौ निद्रां चक्रे । किं कृत्वा—पक्षेण शिरः पिधायाच्छाद्य । किंभूतः—तिर्यगावर्जिता नम्रीकृता कंधरा ग्रीवा येन सः । पुनः किं कृत्वा—एकश्चासौ पादश्च एकपादः सोऽस्यां स्थितावस्तीति तां स्थितिमवलम्ब्याङ्गीकृत्य । पक्षिजातिरियम् । एकपादिकामिति बहुव्रीहौ कुम्भपद्यादिष्वेकपदीशब्दस्य पाठात्पादशब्दान्त्यलोपे 'पादोऽन्यतरस्याम्' इति ङीपि भत्वात्पदादेशे एकपदीमिति प्राप्ते 'न कर्मधारयान्मत्वर्थीयः' इति 'एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ' इति चानित्यत्वादनभिलोपकर्मधारयादस्त्यर्थे ठनि इकादेशे समर्थनीयम् । उपपल्वलमिति सामीप्येऽव्ययीभावः ॥

सनालमात्माननिर्जितप्रभं ह्रिया नतं काञ्चनमम्बुजन्म किम् ।
अबुद्ध तं विद्रुमदण्डमण्डितं स पीतमम्भःप्रभुचामरं नु किम् ॥ १२२ ॥

सनालमिति ॥ स नलः तं हंसमित्यबुद्ध तर्कितवान् । इतीति किम्—एकचरणावस्थानात्सनालं नालसहितमात्मनः स्वस्याननेन मुखेन निर्जिता प्रभा यस्य । अत एव ह्रिया लज्जया नतं नम्रं काञ्चनं सौवर्णमम्बुजन्म कमलमेतत्किम् । तथा—चरणस्य रक्तत्वाद्विद्रुमदण्डेन मण्डितमलंकृतं पीतं पीतवर्णमम्भःप्रभोर्वरुणस्य चामरं किमिति तर्कितवान् । कमलं सनालम्, चामरं च सदण्डं भवति । काञ्चनमिति विकारे 'अनुदात्तादेश्च' इत्यञ् । स्वरितादित्वाद्वा अबुद्धेति बुध्यतेर्लुङि सिज्लोपे 'झषस्तथोर्धोऽधः' इति धादेशे रूपम् ॥

कृतावरोहस्य हयादुपानहौ ततः पदे रेजतुरस्य बिभ्रती ।
तयोः प्रवालैर्वनयोस्तथाम्बुजैर्नियोद्धुकामे किमु बद्धवर्मणी ॥ १२३ ॥

कृतेति ॥ ततोऽनन्तरं हयादश्वात्कृतावरोहस्य कृतावतरणस्य नलस्य पदे चरणौ रेजतुः शुशुभाते । किंभूते पदे—उपानहौ बिभ्रती धारयमाणे । तत्रोत्प्रेक्षते—तयोः [illegible] वनयोः काननोदकयोर्विधायकैः प्रवालैः पल्लवैः तथाम्बुजैः सह नियोद्धुकामे [illegible] सती बद्धवर्मणी बद्धं वर्म कवचं याभ्यां ते । किमु [illegible] । [illegible] निद्धले शुक्लमानम्, [illegible] । [illegible] इति [illegible] । [illegible] भवति । 'वने सलिलकानने' [illegible] । [illegible] इति दीर्घः । रेजतुरिति 'फणां च सप्तानाम्' [illegible][1] ॥

---

१ [illegible] इति साहित्यविद्याधरी । २ [illegible] इति साहित्यविद्याधरी । [illegible] इति [illegible] । ३ [illegible] इति साहित्यविद्याधरी । ४ [illegible] इति साहित्यविद्याधरी ।

विधाय मूर्तिं कपटेन वामनीं स्वयं वलिध्वंसिविडम्बिनीमयम्
उपेतपार्श्वश्चरणेन मौनिना नृपः पतङ्गं समधत्त पाणिना ॥ १

विधायेति ॥ अयं नृपः पाणिना हस्तेन पतङ्गं हंसं स्वयमेव समधत्त धृतव
कृत्वा—कपटेन वलिध्वंसी नारायणस्तस्य विडम्बिनीमनुसरणशीलां वामनीं ह
स्वरूपं विधाय कृत्वा । किंभूतः—मौनिना निःशब्देन चरणेन पादेन गमनेन वोपे
पार्श्वौ हंससामीप्यं येन । त्रिविक्रमोऽपि वलिं छलयितुं वामनावतारमूर्तिं कृत्वा स
मित्वान्निःशब्देन चरणेनाङ्घ्रिणा गमनेन प्राप्तसूर्यपार्श्वोऽभवत् सूर्यं हस्तेनास्प्राक्षीदि
पक्षिधारणजातिरुक्ता । वामनीमिति संवन्धेऽपि ङीप्, गौरादित्वान्ङीप् वा ॥

तदात्तमात्मानमवेत्य संभ्रमात्पुनःपुनः प्रायसदुत्प्लवाय सः ।
गतो विरुत्योड्डयने निराशतां करौ निरोद्धुर्दशति स केवलम्

तदात्तमिति ॥ स हंस आत्मानं तेन नलेनात्तं धृतमवेत्य ज्ञात्वा संभ्रमाद्भया
उत्प्लवायोड्डीनगमनाय प्रायसयत्नं चक्रे । अनन्तरमुड्डयने निराशतां निष्प्रयत्नत्वम्,
हित्यं वा गतः प्राप्तः सन्विरुत्य दीनं शब्दं कृत्वा केवलं निरोद्धुर्ग्रहीतुर्नलस्य करौ
ददंश । पक्षिजातिः । प्रायसदिति 'यसु प्रयत्ने' इत्यस्मात् 'यसोऽनुपसर्गे' इति श्य
लङि शप् । यद्वा लुङि पुषादित्वादङ् । तदेति भिन्नं वा ॥

ससंभ्रमोत्पातिपतत्कुलाकुलं सरः प्रपद्योत्कतयानुकम्प्रताम्
तमूर्मिलोलैः पतगग्रहान्नृपं न्यवारयद्वारिरुहैः करैरिव ॥ १२६

ससंभ्रमेति ॥ सरः कर्तृ सजातीयधारणात्संभ्रमं भयसहितमुत्पाति अवश्यमुत
पतत्कुलं पक्षिकुलं तेन आकुलं व्याप्तं सत् । अत एव पक्षिपक्षवातेन योत्कता उत
त्कमुदकं यस्य तस्य भावस्तत्ता तया, हंसोत्कण्ठतया वा अनुकम्प्रतां सकम्पतां,
वा प्रपद्य प्राप्य ऊर्मिलोलैस्तरङ्गचञ्चलैर्वारिरुहैः कमलैरेव करैर्हस्तैस्तं नृपं पतगग्रहा
न्न्यवारयदिव न्यषेधयदिव । करैरिवेति वा । अन्योऽपि कश्चिज्जिघांसुमुत्कण्ठितत्वेन
प्राप्य चञ्चलैः कमलतुल्यैः करैर्वारयति । इयमपि पक्षिजातिः । कम्प्रेत्यत्र 'नमि
इति रः । यद्यपि सरसः पतगग्रहो नेष्टः तथापि नृपस्येष्ट इति । 'वारणार्थाना
पादानत्वम् ॥

पतत्रिणा तद्रुचिरेण वञ्चितं श्रियः प्रयान्त्याः प्रविहाय पल्वल
चलत्पदाम्भोरुहनूपुरोपमा चुकूज कूले कलहंसमण्डली ॥ १

पतत्रिणेति ॥ कलहंसमण्डली राजहंससंहतिः कूले तीरे चुकूज शब्दं
किंभूता—तत् पल्वलमल्पसरः प्रविहाय त्यक्त्वा प्रयान्त्या गच्छन्त्याः श्रियः
[illegible] लक्ष्म्याः चलन्ती ये पदाम्भोरुहे चरणकमले तयोर्वर्तमानौ नूपुरौ

[illegible] इति साहित्यविद्याधरी । २—'वारिरुहैः करैः' इति न्यस
[illegible] इत्युत्प्रेक्षा । वास्तवनिवारणासंभवादुत्प्रेक्षानिवारणस्य करसाध्यत्वात्तत्र रूपक
[illegible] उपमात्वेनार्थानुसाराद्व्यवहितान्वयेनाप्युत्प्रेक्षाव्यञ्जकत्वमिति रूपकोत्प्रेक्ष
संकरः' इति जीवातुः । 'अत्रानुप्रासोत्प्रेक्षारूपकस्वभावोक्तीनां संकरः' इति

तत्तुल्या । शीलाने कारणमाह—किंभूतं पल्वलम्—रुचिरेण सुन्दरेण पतत्रिणा पक्षिणा हंसेन वर्जितं रहितम् । तस्या नूपुरसाम्याद् कूजितस्य मञ्जीरशब्दसाम्यम्, कूजनेनैव तस्या नूपुरतुल्यत्वं वा । यथा सुखप्रदेन प्रियेण त्यक्तं स्थानं त्वरया गच्छन्त्याः प्रियायाश्चरणे नूपुरौ कूजत इति श्लेषः । प्रयान्त्या इति वर्तमानप्रत्ययेन प्रियः शीघ्रं प्रत्यागमनं सूचितम् । 'कलहंसस्तु कादम्बे राजहंसे नृपोत्तमे' इति विश्वः ॥

न वासयोग्या वसुधेयमीदृशस्त्वमङ्ग यस्याः पतिरुज्झितस्थितिः ।
इति प्रहाय क्षितिमाश्रिता नभः खगास्तमाचुक्रुशुरारवैः खलु ॥१२८॥

नेति ॥ क्षितिं प्रहाय त्यक्त्वा नभोऽन्तरिक्षमाश्रिताः प्राप्ताः खगाः पक्षिण आरवैः शब्दैस्तं नलमिति पूर्वोक्तप्रकारेणाचुक्रुशुर्निनिन्दुः । खलु उत्प्रेक्षायां, निश्चये वा । इतीति किम्—हे अङ्ग दीनकर्तृकगानर्थानरूपे, यस्या वसुधाया उज्झितस्थितिस्त्यक्तमर्याद ईदृशो निरपराधप्राणिधारणलक्षणमधर्मं कुर्वाणो निरपत्रपो वा त्वं पतिः पालयिता सेयं वसुधा पृथ्वी वासयोग्या न भवतीति वरम् । शून्यं नभ एव आश्रयिष्यामः, न तु बहुधनरत्नसंपूर्णां वसुंधराम् । दुष्टत्वादित्यर्थः । अन्योऽपि सोपद्रवं देशं त्यजति । आरवैरित्यत्र 'ऋदोरप्' इत्यपो नित्यम् 'उपसर्गे रुवः' इति बाधके घञि प्राप्ते 'विभाषाङि इति रुप्लुवोः' घञो विकल्पविधानात्केऽप्यप् ॥

न जातरूपच्छदजातरूपता द्विजस्य दृष्टेयमिति स्तुवन्मुहुः ।
अवादि तेनाथ स मानसौकसा जनाधिनाथः करपञ्जरस्पृशा ॥ १२९ ॥

न जातेति ॥ अथानन्तरमिति पूर्वोक्तप्रकारेण मुहुर्वारंवारं स्तुवन्स जनाधिनाथो नलः तेन मानसौकसा हंसेनावादि वक्ष्यमाणप्रकारेणोक्तः । किंभूतेन—करपञ्जरं हस्तलक्षणं पञ्जरं पक्षिबन्धनयन्त्रं स्पृशतीति तेन । इतीति किम्—द्विजस्य पक्षिणो जातरूपस्य सुवर्णस्य छदौ पक्षौ ताभ्यां जातं रूपं सौन्दर्यं यस्य तस्य भावस्तत्ता, सा क्वापि न दृष्टेति । अथच ब्राह्मणमात्रस्य सौवर्णप्रच्छदनजातसौन्दर्यमाश्चर्यकारि भवति । पञ्जरपदेन करस्पृष्टस्य शैथिल्याद्‌नो-हानाभावः सूच्यते ॥

धिगस्तु तृष्णातरलं भवन्मनः समीक्ष्य पक्षान्मम हेमजन्मनः ।
तवार्णवस्येव तुषारशीकरैर्भवेदमीभिः कमलोदयः कियान् ॥ १३० ॥

धिगिति ॥ हे राजन्, हेमजन्मनः सुवर्णप्रभवस्य सुवर्णप्रभवशरीरस्य मम पक्षान्समीक्ष्य दृष्ट्वा तृष्णया स्पृहया तरलं चपलं भवन्मनस्त्वदन्तःकरणं धिक् गर्हितमस्तु । सुवर्णलिप्सयैव त्वयाहं धृतः, स्तुतश्चेत्यर्थः । अमीभिः पक्षैस्तव राज्ञः सतः कियान्कियत्परिमाणः कमला लक्ष्मीस्तस्या उदय आधिक्यं भवेत् । अपितु नाल्पोऽपीत्यर्थः । कैः कस्येव—तुषारशीकरैर्हिमकणैरर्णवस्य समुद्रस्येव । यथा हिमकणैः समुद्रस्य कमलं जलं तस्योदयः कियान् । यथोदकवृद्ध्यर्थं समुद्रेण हिमकणा नाद्रियन्ते, तथा समुद्रेण त्वया मम पक्षसुवर्णं नाभिलषणीयमिति भावः । पर-

---

१ 'अत्रानुप्रासोपमालंकारयोः संकरः' इति साहित्यविद्याधरी । २ 'श्लेषोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । ३ 'अत्रानुप्रासरूपकालंकारौ' इति साहित्यविद्याधरी ।

द्रव्यामिलापेण कियांल्लक्ष्मीरागुदयो भवेत्, अपि तु विगदेनेति वा। 'कमला श्रीर्हरिप्रिया,' 'सलिलं कमलं जलम्' इत्यमरः। धिग्योगे 'मनः' इति द्वितीया ॥

न केवलं प्राणिवधो वधो मम त्वदीक्षणाद्विश्वसितान्तरात्मनः।
विगर्हितं धर्मधनैर्निबर्हणं विशिष्य विश्वासजुषां द्विषामपि ॥ १३१ ॥

न केवलमिति ॥ हे राजन्, त्वदीक्षणात्त्वाद्घोरस्तव ईक्षणाद्विलोकनाद्विश्वसितो विश्वासं प्राप्तोऽन्तरात्मा मनो यस्यैवंभूतस्य मम वधः केवलं प्राणिवधो जन्तुहिंसामात्रं न भवति, किंतर्हि धर्म एव धनं येषां तैर्मन्वादिभिर्द्विषां वैरिणामपि विश्वासजुषां विश्वसितानां निबर्हणं मारणं विशिष्योत्कृष्य विगर्हितं विशेषेण निन्दितम्। धर्मधनैर्निबर्हणं हिंसामात्रं निन्दितम्। सामान्येनेत्यर्थः। विश्वासजुषां तु द्विषामपि निबर्हणं विशिष्य विशेषतो गर्हितमिति वा योजना। विश्वासघातकस्य गुरुप्रायश्चित्तप्रतिपादनात्। यस्तु मारणीयस्तस्यापि विश्वसितस्य मारणं निन्दितम्, किंपुनर्निरपराधस्य मादृशस्येति भावः ॥

पदेपदे सन्ति भटा रणोद्भटा नतेषु हिंसारस एष पूर्यते।
धिगीदृशं ते नृपते कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥ १३२ ॥

पद इति ॥ हे नृपते, पदेपदे स्थानेस्थाने रणोद्भटाः सङ्ग्रामदुर्मदा भटाः शूराः सन्ति विद्यन्ते। एष हिंसारसो मारणानुरागस्तेषु भटेषु न पूर्यते परिपूर्णो न भवतीति काकुः। अपितु भवितुं युक्तः। एष हिंसारसस्त्वया भटेषु परिपूर्णः कर्तव्यः। स्थानेस्थाने भटाः सन्ति परमेष हिंसारसो नतेषु नम्रेषु मादृशेषु त्वया पूर्णः क्रियते इति शिरश्चालनेनायुक्तत्वमेव ध्वन्यते। तेषां शूरतरत्वात्तान्प्रति किंचिदपि कर्तुं न शक्नोषीति भाव इति वा। स्थानेस्थाने शूरा न सन्ति। काकुः। एष हिंसारसस्तेषु परिपूर्णो भवितुं युक्तो न त्वस्मास्विति वा। तेषु हिंसारसो न परिपूर्णः क्रियते त्वया, ततश्चास्मासु परिपूर्णः क्रियत इति वा। ईदृशं विश्वासहननलक्षणं ते कुविक्रमं कुत्सितं पौरुषं धिक्। निन्द्यस्ते पराक्रम इत्यर्थः। यः पराक्रमः कृपणे दीने कृपाश्रये करुणास्पदे मयि पतत्रिणि पक्षिणि वर्तते। पुनर्धिक्पदमतिशयनिन्दासूचकम्। कौ पृथिव्यां प्रसिद्धं विक्रममिति वा। 'पूरी पूतौ (आप्यायने)' इत्यस्य कर्तरि श्यनि पूर्यते इति रूपम्। कर्मणि क्यैपि (यकि) वा ॥

फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः।
त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी ह्रणीयते ॥ १३३ ॥

फलेनेति ॥ हे राजन् वार्येव भूरुत्पत्तिस्थानं वारिभूस्तस्यां रोहन्त उत्पद्यन्ते तेषां कमलानां फलेन पद्माक्षलक्षणेन, मूलेन कन्दादिना मृणालेन च यस्य मम हंसस्येत्थमभिनयेन पुरोवर्तितया दर्शयति। मुनेरिव वृत्तयो जीवनानि। इत्थं सर्वलोकसमक्षमिति वा। तस्मिन्न- [illegible] निस्पृहे ऋषितुल्येऽपि मयि अद्य दण्डधारिणा शास्तिकारिणा त्वया पत्या स्वामिना -वी कथं न ह्रणीयते। अन्यायवर्तिनि प्रिये स्त्रियो यथा लज्जन्ते। वारिरुहां भूरुहां

[illegible] इति साहित्यविद्याधरी। २ 'अत्र विदग्धानुप्रासकाव्यलिङ्गालंकारौ' इति [illegible]। ३ 'क्यपि' इति पाठस्त्वसंगत एव 'सार्वधातुके यक्' इत्यत्र यक एव विधा- [illegible]। ४ 'अत्र विदग्धानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। ५ 'घृणीयते' इति पाठः।

चेति वा । कण्ड्वादेः 'हृणीङ् रोषे लज्जायां च' इत्यस्माद्धातोः कण्ड्वादित्वात्स्वार्थे यकि ङित्त्वात् 'स्वरितञितः—' इति सूत्रेण कर्तृगामिनि क्रियाफले तङ् । 'हृणीङ्' इति पाठान्ङित्त्वात्तङ् । हृणीङ् सौत्रो धातुर्लज्जार्थे इति केचित्[1] ॥

इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः ।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥ १३४ ॥

इतीति ॥ स खगो हंस इत्यनेन प्रकारेण ईदृशैरेतादृशैरन्यैरपि वाङ्मयैर्वचनैस्तं नृपं राजानं सचित्रवैलक्ष्यकृपं चित्रं च वैलक्ष्यं च कृपा च तत्सहितं विरचय्य विधाय दयासमुद्रे कृपानिधौ तस्य नलस्याशये हृदये कारुण्यलक्षणो रसस्तस्यापगा नदीः गिरो वाचोऽतिथीचकार । करुणा वाचस्तमाकर्णयामासेत्यर्थः । पक्षिणो मनुष्यवाक्त्वात्, हैमपक्षत्वाद्वा चित्रमाश्चर्यम् । स्वनिन्दाश्रवणात्तल्लज्जलम् । तद्दैन्यश्रवणात्कृपा । समुद्रे च रसनद्योऽतिथीभवन्ति । 'आत्मनश्चरिते सम्यग्ज्ञातेऽन्यैर्यस्य जायते । अपत्रपातिमहती स विलक्ष इति स्मृतः ॥' विरचय्येति 'ल्यपि लघुपूर्वात्' इति णेरयादेशः । वाङ्मयैरिति 'नित्यं वृद्धशरा—' इति नित्यमहणादेकाचो मयट् । 'बहुप्वनियमः' इति कृपाशब्दस्य न पूर्वनिपातः । कारुण्येति स्वार्थे ष्यञ् ॥

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि न ॥ १३५ ॥

मदिति ॥ कारुण्यगिरोऽन्यापदेशेन राजानं श्रावयति—जननी मम माता जरातुरा वार्धक्यपीडिता स्वतो जीवितुमसमर्था । तर्हि पुत्रान्तरेण जीविका स्यात्, तदपि नेत्याह—यतो मदेकपुत्रा अहमेवैकः पुत्रो यस्याः सा । तर्हि तव स्त्री स्यात्, नेत्याह । वरटा मम स्त्री नवप्रसूतिर्नवप्रसवा । सापि स्वतो जीवितुमसमर्था । पत्यन्तरेणापि जीविकाऽसंभावितेत्याह—यतः तपस्विनी पतिव्रता, अथ च दीना । एष मल्लक्षणो जनस्तयोर्मातृपत्न्योर्गतिर्निर्वाहकः । यद्वा—मम एकः पुत्रो यस्याः सा अजननी मन्मरणानन्तरमप्रसवित्री । यतो जरातुरा न वृद्धा न । प्रसवसंभावनायामपि पातिव्रत्यादजननी । यस्रे सूतिर्येषा यस्याः । यद्वा—नव एव सानुरेव सुतरामूती रक्षणं यस्याः सा । मद्वियोगात्स्वैतत्क्रमणं करिष्यतीत्यर्थः । वरटाविशेषणानि । तयोः पुत्रवरटयोः । तं मामर्दयन्पीडयन्मारयन् हे विधे भाग्य, दैव वा । करुणा दया त्वां न रुणद्धि नावृणोति । न वारयतीत्यर्थः । अहो आश्चर्यम् । एवंविधपीडने हि त्वया सदयेन भवितव्यम् । तव देवस्य सतो दया नोत्पद्यते, किं पुनर्मनुष्यस्येति कमनोक्तिः । 'हंसस्य योषिद्वरटा' इत्यमरः । अर्दयन्निति चौरादिकादर्दयतेः 'संबोधने च' इति शतृ । आत्मनेपदेनेति केचित् । तदा 'गणकृतमनित्यम्' इत्यर्दिनमर्दयञ्चन्तं [illegible] सर्माधिः ॥

मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः सुतशोकसागरः ॥ १३६ ॥

---

१ 'अथ [illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति [illegible] पाठः । [illegible] इति [illegible] । [illegible] इति साहित्यविद्याधरी । ४ '[illegible]' इति साहित्यविद्याधरी ।

मुहूर्तेति ॥ मम सखायो मित्राणि पक्षिणः मुहूर्तमात्रं क्षणमात्रमीदृश्येव संसारस्थिति-रिति भवस्य निन्दया निवृत्तिं दुःखविस्मरणमेष्यन्ति यास्यन्ति । किंभूताः—स्रवन्ति गलन्त्य-श्रूणि येषाम् । तथा—दयासखा दयालवः । हे मातः, परं केवलं सुतशोकः पुत्रशोक एव सागरः समुद्रस्त्वयैव दुरुत्तरो दुःखेनापि तरितुमशक्यः । भविष्यतीति शेषः । 'मम मित्राणां क्षणमात्रं दुःखं तव तु यावज्जीवमिति भावः । मुहूर्तमात्रमिति 'कालाध्वनोः–' इति द्वितीया । दयासखा इति 'राजाहःसखिभ्यष्टच्' । दुरुत्तर इति खल् । 'न लोका–' इति निषेधात्त्वयेति तृतीया ॥

मदर्थसंदेशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते ।
विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये स कीदृग्भविता तव क्षणः ॥ १३७ ॥

मदर्थेति ॥ हे प्रिये, स तव क्षणः समयः कीदृक्कीदृशो भविता भविष्यति । नितराम-निर्वाच्यो भविष्यतीति भावः । किंभूतायास्तव—त्वया इति पूर्वोक्तप्रकारेण वचसि मत्सहच-रान्प्रत्युदिते उक्ते सति । पृष्टे सतीत्यर्थः । अथानन्तरमेव पक्षिणो मत्सहचरान्रुदतो रोदनं कुर्वतो विलोकयन्त्याः पश्यन्त्याः । इतीति किम्—हे सहचराः, मत्प्रिमे मदर्थे ये संदेशमृ-णाले संदेशश्च मृणालं च तयोर्विषये मन्थरोऽलसः । तत्र गत्वा त्वमिदं मत्प्रियां ब्रूहि इति संदेश आज्ञा, मृणालं च मद्भक्ष्यम् । एवंभूतो मत्प्रियः कियद्दूरे पथि वर्तत इति । कियद्दूरं यस्येति प्रियविशेषणं वा । पूर्वत्रान्यपदार्थः पन्थाः । मदर्थं मृणालान्यानेयानीति संदेशमृणा-लानि तैर्मन्थरो, भारबाहुल्यान्मन्थर इति वा । मदर्थ इति 'अर्थेन नित्यसमासः–' इति समासः ॥

कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः ।
वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटंतपनिष्ठुराक्षरा ॥ १३८ ॥

कथमिति ॥ हे विधातः ब्रह्मन्, मयि विषये तव पाणिपङ्कजात्करकमलादित्येवंभूता लिपिः कथं निर्गता । किंभूतात्—प्रियायाः शैत्यं शीतत्वं, मृदुत्वं च तयोः शिल्पिनो निर्मातुः । इतीति किम्—त्वं वल्लभया प्रियया सह वियोक्ष्यसे वियोगं प्राप्स्यसीति । किंभूता—ललाटं तापयन्ति ललाटंतपानि निष्ठुराणि कठिनान्यक्षराणि यस्याः । लिप्यामेतदयुक्तमित्यर्थः । 'कारणगुणाः कार्यगुणानारभन्ते' इति न्यायात् । करपङ्कजं शीतलं मृदु च तस्य दाहकाठिन्य-योरुत्पादकत्वं विरुद्धमिति भावः । ललाटंतपेत्यत्र 'असूर्यललाटयोः–' इति खश्, 'अरुर्द्विष-दजन्तस्य' इति मुम् ॥

अयि स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं बतोदिता ।
मुखानि लोलाक्षि दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि ॥ १३९ ॥

अयीति ॥ अयि प्रिये, लोलाक्षि स्वभावतः शोकवशाच्चचलनेत्रे, त्वमद्य दिशां दशापि [illegible]यं निश्चितमेव शून्यानि रिक्तानि विलोकयिष्यसि द्रक्ष्यसि । बत खेदे । मां

[illegible] इति साहित्यविद्याधरी । २ 'अत्र भावोदयालंकारः' इति सा-[illegible] । ३ 'अत्र विषमं रूपकं चालंकारः । तथा च रुद्रटः—'कार्यस्य कारणस्य च यत्र [illegible] गुणयोः । तद्वत्क्रिययोरथवा संजायेतेति तद्विषमम् ॥' अत्र निष्ठुरत्वतापत्वमृदुत्वशैत्य-इति साहित्यविद्याधरी ।

विना सर्वं शून्यमिव द्रक्ष्यसीति भावः । किंभूता—स्वयूथ्यैः स्ववर्ग्यैर्हंसैरशनिक्षतोपमं वज्रप्रहारसदृशमिमं मरणरूपं मम वृत्तान्तं वार्तामुदितोक्ता । ब्रूञोऽर्थग्रहणाद्द्विकर्मा । वृत्तान्तम् । मुख्यकर्मणि द्वितीया ॥

ममैव शोकेन विदीर्णवक्षसा त्वया विचित्राङ्गि विपद्यते यदि ।
तदास्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः ॥ १४० ॥

ममैवेति ॥ हे विचित्राङ्गि सुन्दरगात्रि, ममैव शोकेन दुःखेन विदीर्णवक्षसा स्फुटितहृदयया त्वया यदि विपद्यते म्रियते, तदा तर्हि हा खेदे अहं दैवेन हतोऽपि पुनर्हतोऽस्मि । यतः—स्फुटं निश्चितं ते इत्यमिनवेनाल्पीयांसः शिशवो बालकाः परासवो मृता भवेयुः । मां विना त्वत्तोऽपि तेषां जीवनं संभाव्यते, तव मरणे सति तेऽपि मरिष्यन्तीति पिष्टपेषणमेव दैवेन कृतमिति भावः । 'एकशोकेन' इति पाठः ॥

तवापि हाहा विरहात्क्षुधाकुलाः कुलायकूलेषु विलुठ्य तेषु ते ।
चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनास्फुटीतेक्षणा मम ॥ १४१ ॥

तवेति ॥ हाहा इति खेदे । हे प्रिये, मम ते बालका बहुभिर्मनोरथैश्चिरेण बहुकालेन लब्धाः सन्तः क्षणेन गताः । मृतप्राया इत्यर्थः । किंभूताः—क्षुधाकुलाः । तथा—अतिबाल्यादस्फुटितेक्षणा अप्रकाशितनेत्राः । किंकृत्वा—तवापि । अपिशब्दान्ममापि विरहात्तेषु प्रसिद्धेषु कुलायकूलेषु स्वकृतनीडतटेषु विलुठ्य लुठित्वा । पूर्वश्लोकार्थानुवादः ॥

इति प्रियां प्रत्युक्त्वा सुतान्प्रत्याह—

सुताः कमाहूय चिराय चुंकृतैर्विधाय कम्प्राणि मुखानि कं प्रति ।
कथासु शिष्यध्वमिति प्रमील्य स स्रुतस्य सेकाद्बुबुधे नृपाश्रुणः ॥ १४२ ॥

सुता इति ॥ हे सुताः पुत्राः, जननीं मां विना चुंकृतैः शिशुपक्षिसूक्ष्मशब्दविशेषैश्चिराय कमाहूयाकार्य भक्ष्यं याचयिष्यथ । कं प्रति कम्प्राणि चलानि मुखानि विधाय गोष्ठीः कथयिष्यथ, अपि तु न कमपि प्रति । उभयोर्मृतत्वात् । शिशुपक्षिणामियं जातिः । एवं सति परं यूयं कथासु शिष्यध्वं कथाशेषीभविष्यथेत्युक्त्वा स हंसः प्रमील्य मूर्च्छां प्राप्य स्रुतस्य कारुण्याद्गलितस्य नृपाश्रुणो नृपनेत्रबाष्पस्य सेकात्सेचनाद्बुबुधे । भक्ष्ययाचनं गोष्ठीकरणं च कवेरुक्तिः, न तु हंसस्य । तस्य वचः आहूय विधायेत्येतदन्तम् । शोकवशात्खण्डोक्तिः करुणरसपोषिका । गोष्ठीषु विषये चतुरा भविष्यथेति पितरं मातरं च विना युष्मान्कमपि कः शिक्षयेदिति वाक्यशेषो वा । शिष्यध्वमिति कर्मकर्तरि प्राप्तकाले लोट्लङ् । एवमहमपि कथासु शिष्ये इत्युत्तरं चापि ज्ञेयम् ॥

इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयावनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमयेत्यभिधाय ॥ १४३ ॥

---

१ 'अत्रानुभावोन्नमालंकारौ' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र विरोधाभासोऽलंकारः' इति साहित्यविद्याधरी । ४ 'अत्र [illegible] कारः' इति साहित्यविद्याधरी ।

इत्थमिति ॥ अवनिपालो राजा दीनेषु दयालुस्तस्य भावस्तत्ता तया इत्यभिधायोक्त्वा इत्थं पूर्वोक्तप्रकारेण विलपन्तं विलापं कुर्वन्तममुं हंसममुञ्चदत्यजत्। इतीति किम्—हे हंस, यदर्थं धृतोऽसि तद्रूपमदर्शि दृष्टम्। अथातःपरं त्वं यथेच्छं स्वेच्छया गच्छ। यदर्थं धृतोऽसीत्यादिना 'धिगस्तु तृष्णा–' (१ स०, १३०) इत्यादि परिहृतम्। 'स्पृहिगृहि–' इत्यालुचि दयालुः। दोधकं वृत्तम्[1] ॥

आनन्दजाश्रुभिरनुस्रियमाणमार्गान्प्राक्शोकनिर्गमितनेत्रपयःप्रवाहान्।
चक्रे स चक्रनिभचङ्क्रमणच्छलेन नीराजनां जनयतां निजबान्धवानाम्॥१४४॥

आनन्देति ॥ स हंसः चक्रनिभं चक्राकारं चङ्क्रमणं भ्रमणं तस्य छलेन व्याजेन नीराजनामारार्तिकां जनयतां कुर्वतां निजबान्धवानां प्रस्वीयमित्राणां प्राक्स्वग्रहणसमये शोकेन निर्गतान्नेत्रपयःप्रवाहान्बाष्पप्रवाहान्स्वमुक्तिसमये आनन्दजाश्रुभिरानन्दजनितबाष्पैरनुस्रियमाणमार्गाननुगम्यमानमार्गांश्चक्रे। धृते हंसे रुरुदुः, मुक्ते जहसुरित्यर्थः। बद्धमुक्तं पक्षिणं वेष्टयित्वा पक्षिणो भ्रमन्ति रुवन्ति चेति पक्षिजातिः। अन्यस्यापि कारागृहादिबद्धविमुक्तस्यानन्दाश्रुसहितैर्बान्धवैर्नीराजना क्रियते। चङ्क्रमणमिति क्रमेर्गतिकौटिल्ये यङन्ताद्भावे ल्युट्। वलयाकारापि गतिः कुटिलैव। 'यङोऽचि च' इति चकारादन्यत्रापि यङो लुक्। सर्वसर्गसमाप्तिश्लोकेष्वानन्दपदप्रयोगादानन्दाङ्कमिदं काव्यम्। वसन्ततिलकावृत्तम्[2] ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
काव्ये चारुणि नैषधीयचरिते[3] सर्गोऽयमादिर्गतः॥ १४५ ॥

श्रीहर्षमिति ॥ श्रीहीरनामा पिता मामल्लदेवी माता च यं श्रीहर्षनामानं पुत्रं सुषुवे। किंभूतः हीरः—कविराजानां राजिः पङ्क्तिस्तस्या मुकुटानामलंकाररूपो हीरो हीराख्यं रत्नम्। किंभूतम्—जितेन्द्रियचयं जित इन्द्रियचय इन्द्रियसमूहो येन। तस्य श्रीहर्षस्य चिन्तामणिमन्त्रस्य चिन्तनमनुध्यानं जपादिकं तस्य फले शृङ्गारभङ्ग्या शृङ्गाररचनाविशेषेण चारुणि रमणीये शृङ्गाररसप्रधाने नैषधीयं नलसंबन्धि चरितं चरित्रं यस्मिन्नेवंविधे महाकाव्येऽयमादिः प्रथमः सर्गो गतः समाप्तः। चिन्तामणिमन्त्रचिन्तनसामर्थ्यादेवंविधं काव्यं कृतमिति भावः। शार्दूलविक्रीडितं वृत्तम्[4]। नैषधसंबन्धि नैषधीयम् 'वृद्धाच्छः'। छन्दांस्यलंकाराश्चात्र नोक्ताः लक्षणग्रन्थगौरवभयात्। ते तु सुधिया ग्रन्थान्तराज्ज्ञातव्याः॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृतौ नैषधीयप्रकाशे
प्रथमः सर्गः समाप्तः ॥

---

१ 'अत्रानुप्रासोपमालंकारः' इति साहित्यविद्याधरी। २ 'अत्रानुप्रासापह्नुतिजात्यलंकारसंसृष्टिः' इति साहित्यविद्याधरी। ३ 'नैषधस्य चरिते' इति पाठः साहित्यविद्याधरी। ४ 'अत्रानुप्रासरूपकालंकारौ' इति साहित्यविद्याधरी।

स गरुद्वनदुर्गदुर्ग्रहान्कटु कीटान्दशतः सतः क्वचित् ।
नुनुदे तनुकण्डु पण्डितः पटुचञ्चूपुटकोटिकुट्टनैः ॥ ४ ॥

स इति ॥ स हंसः पटु कीटाद्यपनयने समर्थं चञ्चूपुटं तस्य कोटिरग्रभागस्तेन कुट्टनानि घट्टनानि तैः कीटान् तनुकण्डु तन्वी स्वल्पा कण्डूर्यस्यां क्रियायां यथा तथा नुनुदे स्फोटयामास । किंभूतः—पण्डितः कण्डूयने कुशलः । किंभूतान्—गरुद्वनं पक्षवृन्दं तल्लक्षणं दुर्गं तत्र दुर्ग्रहान्धर्तुमशक्यान् । अत एव—कटु तीक्ष्णं पीडाकारि यथा तथा दशतः खादतः । तथा—क्वचिन्निर्हारयितुमशक्ये शरीरे देशे सतो विद्यमानान् । अन्योऽपि पर्वतदुर्गदुर्ग्रहानुपद्रवकारकान्मारणेन नुदति । नुनुदे इति स्वरितेत्त्वादात्मनेपदम् ॥

अयमेत्य तडाकनीडजैर्लघु पर्यव्रियताथ शङ्कितैः ।
उदडीयत वैकृतात्करग्रहजादस्य विकस्वरस्वरैः ॥ ५ ॥

अयमेत्येति ॥ अयं हंसस्तडाकस्य नीडजाः पक्षिणस्तैरेत्यागत्य लघु शीघ्रं पर्यव्रियत वेष्टितः । अथानन्तरमस्य करग्रहजान्नलस्य हस्तग्रहणजाताद्वैकृताद्विकाराच्छङ्कितैस्त्रस्तैः अत एव विकस्वरस्वरैरुच्चस्वरैः पक्षिभिरुदडीयत उड्डीनम् । एषा पक्षिजातिः । वैकृतं दन्तुरपक्षत्वात् । तीर्थादौ करग्रहणार्थं कैश्चित्कथन परितो वेष्ट्यते । अथ वलिग्रहणजातकलहादेः शङ्कितैर्दूरं गम्यते । 'लघु क्षिप्रम्' इत्यमरः । वैकृतात् । स्वार्थेऽण 'स्थेशभास–' इति वरचि विकस्वरः ॥

वहतो बहुशैवलक्ष्मतां धृतरुद्राक्षमधुव्रतं खगः ।
स नलस्य ययौ करं पुनः सरसः कोकनदभ्रमादिव ॥ ६ ॥

वहत इति ॥ स खगो हंसः सरसः सकाशान्नलस्य करं पुनर्ययौ । कस्मादिव—कोकनदभ्रमादिव रक्तोत्पलभ्रान्तेरिव । सरसः पल्वलस्य कोकनदभ्रमादिवेति वा । नलकरस्य रक्तत्वात्कोकनदभ्रान्तिः । रक्तोत्पलं च हंसानां प्रियमित्युत्प्रेक्षा । किंभूतस्य नलस्य सरसश्च—बहूनि शिवसंबन्धीनि लक्ष्माणि त्रिपुण्ड्रादीनि यस्य तस्य भावस्तत्ता तां वहतो धारयतः । शिवे भक्तिरेषां ते शैवाः, तत्संबन्धीनि वा । सरःपक्षे—बहूनि शैवलानि यस्यां सा बहुशैवला क्ष्मा पृथ्वी यस्मिंस्तस्य भावस्तत्ता तां वहतः । शिवं कल्याणं तत्संबन्धीनि शुभसूचकानि लक्ष्माणि सामुद्रिकोक्तानि मत्स्यादीनि यस्येति वा । किंभूतं करम्—धृतं रुद्राक्षाणां मधुतुल्यं [illegible] (क.) व्रतं नियमो येन, [illegible] एव मधुव्रता भ्रमरा येनेति वा । रुद्राक्षधारणं नियमेन करोति, [illegible] नियमो नेति न पौनरुक्त्यम् । कोकनदमपि रुद्राक्षस[illegible] । न [illegible], [illegible] अक्षमाः । कर्मषष्ठ्या समासः । तान्नुनोति [illegible] च । धृतं [illegible] वा । शिवद्रोहिपराभवकारिणमित्यर्थः । अ[illegible] । [illegible] ययुः [illegible] भ्रमरा यस्येति वा । अर्थात्कोकनदविशेष[illegible] । [illegible] । तथा 'रः पावके च तीक्ष्णे च' इति विश्वः । शैवलम्

---

१ [illegible] इति गाङ्गिल्यविद्याधरौ ।
२ [illegible] इति गाङ्गिल्यविद्याधरौ ।

मृगयाया अनिन्दने कारणमाह—

अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान् ।
अनवद्यतृणार्दिनो मृगान्मृगयाघाय न भूभुजां घ्नताम् ॥ १० ॥

अबलेति ॥ मृगया भूभुजां राज्ञामघाय पापाय न भवति । कथमित्यत आह—किंभूतानां भूभुजाम्—अबलं निर्बलं स्वकुलं च तदश्नन्त्येवंशीलाञ्झषान्मीनान् घ्नतां मारयताम् । तथा—निजाः स्वीया ये नीडद्रुमा निवासस्थानवृक्षास्तान्पीडयन्त्येवंशीलान्खगान्पक्षिणो घ्नताम् । तथा—अनवद्यं निरपराधं तृणं तद् अर्दन्ति पीडयन्त्येवंशीलान्मृगान्घ्नताम् । 'अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः' इति स्मृतेस्तरुणतृणादेरपि प्राणित्वात्तद्वधस्तु दोषाय । परं दुष्टनिग्रहो राज्ञां धर्म एवेति भावः । अबलान्बलिनो भक्षयन्तीति मत्स्यानां जातिस्वभावः । अवद्येति 'अवद्यपण्य-' इति साधुः । पश्चाद्बहुव्रीहिस्तत्पुरुषो वा । पूर्वश्लोके मृगयादोषाभावे स्मृतिं प्रमाणमुक्त्वात्र युक्तिमप्यवदत् ॥

यदवादिषमप्रियं तव प्रियमाधाय नुनुत्सुरस्मि तत् ।
कृतमातपसंज्वरं तरोरभिवृष्यामृतमंशुमानिव ॥ ११ ॥

यदिति ॥ हे राजन्, अहं तव यदप्रियं निन्दाद्यवादिषमुक्तवानस्मि प्रियमाधाय कृत्वा तदप्रियं नुनुत्सुर्निराकर्तुमिच्छुरस्मि । तत्र दृष्टान्तमाह—अंशुमान्सूर्यस्तरोर्वृक्षस्य आतपेन कृतं संज्वरं पीडाममृतं जलमभिवृष्याभितो वर्षित्वा यथा नुदतीत्यर्थः । अनेन दृष्टान्तेनातिशयितं प्रियं करिष्यामीति सूच्यते ॥

उपनम्रमयाचितं हितं प्रतिहर्तुं न तवापि सांप्रतम् ।
करकल्पजनान्तराद्विधेः शुचितः प्रापि स हि प्रतिग्रहः ॥ १२ ॥

उपेति ॥ अयाचितमप्रार्थितमुपनम्रमुपस्थितं हितं प्रियं परिहर्तुं त्यक्तुं तवापि सार्वभौमस्यापि न सांप्रतं न युक्तम् । हि यतः करकल्पम् ईषदसमाप्तः करः जनान्तरं अन्यो जनो मल्लक्षणः, करकल्पं जनान्तरं यस्यैवंविधाच्छुचितो निर्मलाच्छोभनाद्विधेर्दैवात्स प्रतिग्रहस्त्वया प्रापि प्राप्तः । सर्वं हि शुभाशुभं दैवात्प्राप्यते । यद्दैववशाद्भवति तत्केनापि निराकर्तुं न शक्यते । करेण हि दीयते । यद्वा विधेर्दैवस्य हस्तभूताज्जनान्तरादेतादृशः प्रतिग्रहो राज्ञो दोषाय न । 'अयाचिताहृतं ग्राह्यमपि दुष्कृतकर्मणः' इति याज्ञवल्क्यः ॥

स्वगर्वं परिहरति—

पतगेन मया जगत्पतेरुपकृत्यै तव किं प्रभूयते ।
इति वेद्मि न तु त्यजन्ति मां तदपि प्रत्युपकर्तुमर्तयः ॥ १३ ॥

पतगेनेति ॥ पतगेन पक्षिणा मया जगत्पतेर्भुवनाधिपतेस्तव नलस्योपकृत्यै उपकाराय ते किं समर्थेन भूयतेऽपितु नेति यद्यपि वेद्मि जानामि तदपि तथापि प्रत्युपकर्तुं

१ 'अत्रानुप्रासकाव्यलिङ्गक्रियादीपकालंकारः । काव्यलिङ्गे 'अबलस्वकुलाशिनः' इत्यादिना विशेषणद्वारेण पदार्थगत्या हेतुरुक्तः, अत्र घ्नतामिति क्रियापदत्वात्क्रियादीपकम्' इति **साहित्यविद्याधरी** । २ 'अत्र बिम्बप्रतिबिम्बभावेन दृष्टान्तोपमापरिवृत्त्योरलंकारः' इति **साहित्यविद्याधरी** । ३ 'अत्र काव्यलिङ्गमलंकारः' इति **साहित्यविद्याधरी** ।

भैमीपितृकुलस्य शोभनं तद्भैमीमातृकुलेनाङ्गीकृतमिति विनिमयः। भैमीसंबन्धेन पितृकुलवन्मातृकुलं मातृकुलवत्पितृकुलं शोभते। सादृश्यं तु तात्पर्यार्थः। तच्च सादृश्यं श्रुतिगामितया विशेष्यते। तच्च श्रुतिगामित्वलक्षणं सादृश्यं मातृकुलस्य पितृकुलापेक्षया पितृकुलस्य च मातृकुलापेक्षया नतु दृगाद्यपेक्षया। एवं दृगादीनामपि सजातीयापेक्षयैव श्रुतिगामित्वलक्षणं सादृश्यमङ्गीकरणीयं नतु लोकयुगाद्यपेक्षया। तथा—दमस्वसुर्दशावपि नेत्रे अपि श्रुतिगामितया आकर्णदेशविशालत्वेनातितरां विनिमयेन भाते शोभेते इति द्विवचनम्। दक्षिणनयनस्य श्रुतिगामित्वेन या शोभा तां वामनयनमङ्गीकरोति। वामनयनस्य च श्रुतिगामित्वेन या शोभा तां दक्षिणनयनमङ्गीकरोतीत्यत्रापि विनिमयः। श्रुतिगामित्वेन दक्षिणं वाममिव वामं दक्षिणमिवेत्यत्रापि सादृश्य एव तात्पर्यं ज्ञेयम्—दमस्वसुः संबन्धी श्रुतदृष्टाः श्रुताः पुराणादौ, दृष्टाः कासुचित्सुन्दरीषु। यद्वा—कासुचित्स्त्रीष्वेव श्रुताः कासुचिद्दृष्टा रमणीगुणाः स्त्रीगुणाः श्रुतिगामितया लोकाकर्णनविषयत्वेन व्यतिभाते विनिमयेन शोभन्त इति बहुवचनम्। पुराणादावन्यस्त्रीषु वा ये श्रुतास्ते कासुचिद्दृष्टास्ते भैम्यामेव श्रूयन्त इति श्रुतानां दृष्टानां च स्त्रीगुणानां दमस्वसुः संबन्धिनां सर्वेषां श्रुतिगामित्वं विद्यते। ततः श्रुतानां स्त्रीगुणानां दमस्वसुः संबन्धिनां यच्छ्रुतिगामितया शोभनं तद्दृष्टैरङ्गीकृतम्। एवं दृष्टानां शोभनं तच्छ्रुतैरङ्गीकृतमित्यत्रापि यथाकथंचिद्विनिमयः। यथा श्रुता भैमीसंबन्धिनः श्रुतिगामितया शोभन्ते तथा दृष्टा अपि भैमीसंबन्धिनः श्रुतिगामितया शोभन्त इत्यत्रापि सादृश्य एव तात्पर्यम्। श्रुतदृष्टा अपि सर्वे गुणा भैम्यां विद्यन्त इति भावः। सामुद्रिकशास्त्रे श्रुतानां पद्मिन्यादौ दृष्टानामिति वा यथाकथंचिज्ज्ञेयम् विस्तरभयान्न लिख्यते। 'श्रुतिः स्तोत्रे तथाम्नाये वार्तायां श्रोत्रकर्मणि' इति विश्वः। गामी गम्यादि। आवश्यके ताच्छील्ये वा णिनिः। 'त्वतलोः—' इति पुंवत्। व्यतिपूर्वस्य भातेः 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदम्। द्विवचने सवर्णदीर्घत्वे कृते, बहुवचने च 'आत्मनेपदेष्वनतः' इति झस्यादादेशे शब्लुक् टेरेत्वं सर्वत्र। वचनश्लेषः॥

नलिनं मलिनं विवृण्वती पृषतीमस्पृशती तदीक्षणे।
अपि खञ्जनमञ्जनाञ्चिते विदधाते रुचिगर्वदुर्विधम्॥ २३॥

नलिनमिति॥ तदीक्षणे भैमीनेत्रे पृषतीमञ्जनशलाकामस्पृशती अप्राप्ते अञ्जनानञ्जिते सती नलिनं कमलं मलिनं स्वकान्त्या दूषितं विदधाते कुर्वाते। किंभूते तदीक्षणे—विवृण्वती आत्मानं प्रकाशयन्ती प्रसारयन्ती। ऋजुरीत्या विलोकमाने। अञ्जनाञ्चिते अञ्जनपूजिते सत्यने सती तदीक्षणे खञ्जनमपि खञ्जरीटमपि रुचिगर्वेण कान्तिमदेन दुर्विधं दरिद्रं विदधाते। अनञ्जीकृतं कमलं कटाक्षावलोकनप्रसृतया स्वकान्त्या मलिनं श्यामं विवृण्वती कुर्वती, तथा—पृषती हरिणीमस्पृशती नेत्रविषयेऽगणयन्ती एवंविधे भैमीनेत्रे कज्जलाञ्चिते खञ्जनमिति पूर्ववत्। अञ्जनपूजनात्पूर्वं स्वकान्त्या कमलं जितं, हरिणीनेत्रयोस्तु भैमीनेत्रशोभा[illegible]नि नास्ति। अञ्जनपूजानन्तरं खञ्जनस्य मन्नेत्रसदृशं नान्यस्येति गर्वस्तद्रहितं कुर्वाते

१ बहुवचने अदादेशसामान्यात् पूर्वं शपो लुक्, ततो झस्यादेशो बोध्यः। २ 'अत्र वचनश्लेषालंकारः' इति साहित्यविद्याधरी। 'अत्र लोकयुगादीनां त्रयाणामपि प्रकृतत्वात्के[illegible] योगिताभेदः। 'प्रस्तुताप्रस्तुतानां च केवलं तुल्यधर्मतः। औपम्यं गम्यते यत्र सा तुल्ययोगिता॥' इति लक्षणात्' इति जीवातुः।

इत्यर्थ इति वा, दृत्ति कान्तिविषये दर्पेण रहितमिति वा । दर्वीति भिन्नं पदम् । खञ्जनो हि शुक्लकृष्णोऽतितरलोऽतिचञ्चलश्च । अतस्तेन साम्यसंभावनायां कज्जलदानानन्तरं तदधिकभ्रान्तिमत्त्वात्सोऽपि जित इति भावः । नलिनं स्वगतं श्यामं गुणं विलोकनवशादिङ्गन्ती प्रकाशयन्ती नलिनं द्विगर्वदुर्विधं विदधाते इति वा, मलिनं श्यामं नलिनं नीलोत्पलं द्विगर्वदुर्विधं विदधाते इति वा । सविलासवीक्षणदशायाः पूर्वमेव नीलोत्पलं जितमित्यर्थः । तथा—अवकुञ्चती सती पृषती हरिणी द्विगर्वदुर्विधां विदधाते, निर्निमेषलवेलयानपि ताभ्यां हरिणी जिता किं पुनः कटाक्षविक्षेपवेलयामिति वा । अलिन्पक्षे दुर्विधा च दुर्विधश्चेति 'नपुंसकमनपुंसकेन—' इति नपुंसके(कशेषे)कवद्भावौ । अज्यतेऽनेनेत्यञ्जनं तेन पूजिते इत्यनेन ल्युडन्तस्य 'अञ्जू व्यक्ति(गतिकान्ति)म्रक्षणेषु' इति धातोरर्थानुसारेण द्वयोः स्निग्धनीलरक्तत्वितवर्णकान्तिचाञ्चल्ययोगः सूचितः । तथाच नलिनादिषु मध्ये क्वचित्कस्यचिद्गुणस्य सत्त्वाद्द्वयोस्तु पूर्वोक्तगुणसद्भावात्ताभ्यां नलिनादीनि जितानीति भावः । 'नलिनं दूषिते कृष्णे' इति विश्वः । अञ्चिते 'अञ्चेः पूजायाम्' इतीटि 'नाञ्चेः पूजायाम्' इति नलोपनिषेधः । अञ्जनाञ्चिते इति पाठे 'अजि भाषे' इति चौरादिकस्याऽयमर्थनिष्ठा । अञ्जनेन भासिते इत्यर्थः ॥

अधरं किल बिम्बनामकं फलमस्मादिति भव्यमन्वयम् ।
लभतेऽधरबिम्बमित्यदः पदमस्या रदनच्छदं वदत् ॥ २४ ॥

अधरमिति ॥ हे राजन्, अस्या दमयन्त्या रदनच्छदमधरमोष्ठं वददभिदधत् अधरबिम्ब इत्यदःपदमेतत्पदं । सुबन्तोऽयं शब्द इत्यतो हेतोर्भव्यं समीचीनमन्वयं संबन्धं लभते प्राप्नोति । इतीति किम्—किल अस्माद्बिम्बनामकं फलमस्मादोष्ठादधरं हीनम् । बिम्बापेक्षयाऽस्याधिकरक्तत्वादमृततुल्यत्वाच्च अधरं बिम्बं बिम्बसंज्ञकं फलं यस्मादधरबिम्ब इति बहुव्रीहिः, न त्वधर एव बिम्बमिति । अन्यासां तु अधरो बिम्ब इवेति तत्पुरुषः कर्मधारयः । एवमस्यास्तु बहुव्रीहावर्थतः शब्दतश्च भव्यत्वम् । नैन्यधरो जितबिम्ब इति भावः ॥

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा ।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम ॥ २५ ॥

हृतेति ॥ इन्दुमण्डलं चन्द्रबिम्बं वेधसा ब्रह्मणा दमयन्तीवदनाय तन्मुखं निर्मातुं हृतसारमिव गृहीतश्रेष्ठभागमिव कृतं मध्ये बिलं छिद्रं यस्यैवंभूतं विलोक्यते दृश्यते तस्यैव

१ 'अत्र छेकानुप्रासोऽतिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । 'दृशोर्नीलिमकान्तिमत्त्वसाम्यसंबन्धेऽप्यसंबन्धोक्तिरतिशयोक्तिः तया चासना [illegible]' इति जीवातुः । २–३ 'आभ्याम् रदनच्छदे' इति द्विवचनान्तपाठः साहित्यविद्याधरीसंमतः । 'यतो [illegible]—रदनच्छदे ओष्ठौ वदत् प्रतिपादयत् । रदनच्छदशब्दस्य [illegible] । [illegible]—'रदनच्छदोऽधरौष्ठः' इति 'आभ्याम् रदनच्छदे' इति पठन्तु [illegible] 'ओष्ठाधरौ रदच्छदः' इति द्विवचननिर्देशात्' इति सुखावबोधा । 'आभ्याम्' इति पाठे रदनच्छदौ [illegible] । [illegible] । 'दल दर्भ [illegible]' इति [illegible] । ४ '[illegible]' इति साहित्यविद्याधरी । 'अत्र [illegible] [illegible]' इति जीवातुः ।

इत्यर्थः। कलङ्केन हृतसारत्वमुत्प्रेक्षितम्। किंभूतम्—धृतो गभीरखन्यां निम्नगर्ते परभागस्थितस्य खस्याकाशस्य नीलिमा येन। कलङ्को न भवति, किं त्वयमाकाशनीलिमा। भैमीमुखं निष्कलङ्कचन्द्रसारतुल्यमिति भावः। वदनाय 'क्रियार्थोपपदस्य च—' इति चतुर्थी। खनीति 'कृदिकारादक्तिनः' इति ङीप्॥

प्रकारान्तरेण भैमीमुखस्य चन्द्राधिक्यमाह—

धृतलाञ्छनगोमयाञ्चनं विधुमालेपनपाण्डुरं विधिः।
भ्रमयत्युचितं विदर्भजाननीराजनवर्धमानकम्॥ २६॥

धृतेति॥ ब्रह्माज्ञया चन्द्रो भ्राम्यति। तत्रोत्प्रेक्षते। विधिर्ब्रह्मा विधुं चन्द्रमुचितं योग्यं विदर्भजा भैमी तस्या आननं तस्य नीराजनार्थमारार्तिकार्थं वर्धमानकमिव वर्धमानकं शरावं भ्रमयति। किंभूतं विधुम्—धृतं लाञ्छनमेव कलङ्क एव गोमयाञ्चनं गोमयपूजनं येन। तथा—आलेपनं पिष्टोदकम् ('अईपण' इति लोके प्रसिद्धं) तेनैव पाण्डुरम्। चन्द्रस्तन्मुखसादृश्यं न प्राप्नोति भावः। गोमयलिप्तेन चूर्णादिचिह्नेन शरावेण दृष्टिदोषनिरासार्थं नीराजना क्रियत इति लोकाचारः। 'शरावो वर्धमानकः' इत्यमरः॥

सुषमाविषये परीक्षणे निखिलं पद्ममभाजि तन्मुखात्।
अधुनापि न भङ्गलक्षणं सलिलोन्मज्जनमुज्झति स्फुटम्॥ २७॥

सुषमेति॥ कमलस्य शोभाधिका, भैमीवदनस्य वेति सुषमाविषये परमशोभाविषये परीक्षणे दिव्येन शोधने निखिलं समस्तं पद्मं पद्मजातं तन्मुखाद्भैमीमुखादभाजि पराजयं प्राप्तम्। यतः—भङ्गलक्षणं पराजयचिह्नं सलिलोन्मज्जनं जलादुन्मज्जनमूर्ध्वभवनमद्यापि नोज्झति स्फुटं व्यक्तमेव न त्यजति। स्फुटमुत्प्रेक्षे वा। जलोन्मज्जनं तस्य स्वाभाविकं भङ्गलक्षणत्वेनोत्प्रेक्षितम्। स्फुटं विकसितमिति पद्मविशेषणं वा। जलदिव्ये धनुर्धरमुक्तं बाणमादाय यावदन्यो धावन्नागच्छति तावद्यः सलिले निमग्न एव तिष्ठति स विजयते, यस्तु ततः पूर्वमेवोन्मज्जति स पराजयत इति भावः। 'सुषमा परमा शोभा' इत्यमरः। 'सुविनिर्दुर्भ्यः—' इति षत्वम्। अभाजीति कर्मकर्तरि चिण् 'भञ्जेश्च चिणि' इति नलोपः॥

धनुषी रतिपञ्चबाणयोरुदिते विश्वजयाय तद्भ्रुवौ।
नलिके न तदुच्चनासिके त्वयि नालीकविमुक्तिकामयोः॥ २८॥

धनुषी इति॥ तद्भ्रुवौ भैमीभ्रुवौ विश्वजयाय त्रैलोक्यजयाय रतिपञ्चबाणयोर्धनुषी

---

१ 'अत्रोत्प्रेक्षालंकारः, अनुप्रासश्च' इति साहित्यविद्याधरी। 'अत्र कलङ्कापह्नवत्वेन खनीलिमारोपादपह्नवभेदः। स च कृतमध्यबिलमित्येतत्पदार्थहेतुककाव्यलिङ्गानुप्राणितः। तदपेक्षा चेयं हृतसार- [illegible] संकरः। तया चोपमा व्यज्यत इति पूर्ववद्ध्वनिः' इति जीवातुः। २ 'अत्र रूपकं समं [illegible]। तथा चोक्तम् 'उपमैव तिरोभूतभेदा रूपकमिष्यते। समं योग्यतया योगो यदि संभावितः [illegible]॥' इति साहित्यविद्याधरी। 'अत्र विधुतल्लाञ्छनादेर्नीराजनशरावगोमयत्वादित्वेन रूपणा- [illegible] इति जीवातुः। ३ 'अत्रानुमानमतिशयोक्तिरलंकारौ' इति साहित्यविद्याधरी। [illegible] मत्प्रेक्षा' इति जीवातुः।

नोदिते प्रादुर्भूते न इति काक्वा । 'नु' इति पाठे वितर्के । तथा—तस्या भैम्या उच्चनासिके रन्ध्रद्वयोपलक्षिते नासिके त्वयि विषये नालीकौ नलिकाप्रवेशमार्गलघुशरौ तयोर्धनुषिकामयो-र्नलिके शराधारनलौ न भवतः, अपितु नलिके एव । एतस्या भ्रूनासिके दृष्ट्वा सर्वोऽपि कामाधीनो भवतीति भावः । 'नालीकः शरशल्ययोः' इति विश्वः । विश्वजयाय 'तुमर्थाच्च–' इति चतुर्थी । कामयोरिति 'शीलिकामिभक्ष्याचरिभ्यो णः' ॥

सदृशी तव शूर सा परं जलदुर्गस्थमृणालजिद्भुजा ।
अपि मित्रजुषां सरोरुहां गृहयालुः करलीलया श्रियः ॥ २९ ॥

सदृशीति ॥ हे शूर, सा भैमी परं केवलं तव सदृशी योग्या । किंभूता—जललक्षणं दुर्गं तत्र तिष्ठन्ति जलदुर्गस्थानि मृणालानि जयत इति जितौ भुजौ यस्याः सा । मृणाला-दपि कोमलौ गौरौ च तद्भुजौ इत्यर्थः । तथा—करलीलया हस्तविलासेन मित्रं सूर्यं, सुहृदं च जुषन्ते सेवन्ते मित्रजुषि तेषाम् । विकसितत्वात्तथोक्तानामपि सरोरुहां कमलानां श्रियो गृहयालुर्ग्रहीतुकामा । त्वमपि जलदुर्गस्थवैरिजिद्भुजः सत्सुहृदां सत्सहायानामपि वैरिणां संपदः करलीलया बलिक्रियया । गृहयालुरिति शूरत्वादुभयोः साम्यम् । अपिरन्यच्च इत्यर्थे वा । 'मित्रं सुहृदि मित्रोऽर्के', 'बलिहस्तांशवः कराः' 'लीला विलासक्रिययोः' इत्यमरः । गृहेश्चौरा-दिण्यन्तात् 'स्पृहिगृहि–'इत्यादिनालुचि 'अयामन्ता–' इत्ययादेशे गृहयालुः । तद्योगे 'न लोका–' इति षष्ठीनिषेधाच्छ्रिय इति द्वितीया ॥

वयसी शिशुतातदुत्तरे सुदृशि स्वाभिविधिं विधित्सुनी ।
विधिनापि न रोमरेखया कृतसीम्नी प्रविभज्य रज्यतः ॥ ३० ॥

वयसी इति ॥ हे राजन्, तस्यां सुदृशि सुनयनायां स्वाभिविधिं निजाभिव्याप्तिं विधि-त्सुनी कर्तुकामे अहमेव सर्वात्मना इमामभिव्याप्य तिष्ठामीति बाल्यं मन्यते । एवं तारुण्य-मपि । एवंभूते शिशुता च तदुत्तरं शिशुतायाः बाल्यतः परं तारुण्यं च वयसी न रज्यतः, अपितु रज्यत एव संतुष्यत एव । बाल्यतारुण्ये तस्यां तिष्ठत इत्यर्थः । वयःसंधौ वर्तमाना इति यावत् । किंभूते वयसी—विधिना ब्रह्मणा उदरे वर्तमानया रोमरेखया प्रविभज्य समं विभागं कृत्वा कृतसीम्नी कृतमर्यादे अपि । एवंविधे विभज्य न रज्यतः, किं तर्हि संवलिते एवानुरागं भजत इति वा । बाल्यं वर्तते, रोमरेखोद्भवेन च तारुण्यं प्राप्तमित्युभे संवलिते एव तिष्ठतः । रम्यत्वाद्बाल्यं त्यक्तुं न शक्नोति, तारुण्यं चागन्तुमिच्छतीति भावः । विधिना शास्त्रोक्तमार्गेण रेखया कृतसीम्न्यपि वस्त्वाधिक्यार्थं भुवि नदीदेयं नदीपेयमिति केचिद्व्याचक्षते ॥

---

१ 'अत्र भ्रुवोः कार्मुकत्वेन रूपणं तथा नासिकाया नलिकात्वेन संभावनात् रूपकोत्प्रेक्षासंकरः' इति साहित्यविद्याधरी । २ 'अत्र उपमारूपकालंकारसंकरः' इति साहित्यविद्याधरी । ३ 'अत्रोक्तनिमित्ता विशेषोक्तिरलंकारः । तथा च काव्यप्रकाशः—'विशेषोक्तिरखण्डेषु कारणेषु फलावचः' । अत्र च रोमरेखया विधिनापि कृतसीमात्वकारणे सत्यपि प्रविभागसिद्धिः कार्यं नोक्तम् । अत्र वस्तुनि विधिविधानेच्छा निमित्तमुक्तम्' इति साहित्यविद्याधरी । 'अत्र वस्तुतस्तयोर्निर्विभेदत्वान्नायकनायिकाव्यवहार-प्रतीतेः समासोक्तिरलंकारः' इति जीवातुः ।

अपि तद्वपुषि प्रसर्पतोर्गमिते कान्तिझरैरगाधताम् ।
स्मरयौवनयोः खलु द्वयोः प्लवकुम्भौ भवतः कुचावुभौ ॥ ३१ ॥

अपीति ॥ उभौ कुचौ स्तनौ तद्वपुषि प्रसर्पतोः प्लवमानयोः क्रीडतोर्द्वयोः स्मरयौवनयोः कामतारुण्ययोः प्लवकुम्भौ प्लवनार्थं कुम्भौ तरणकुम्भौ भवतः । खलु उत्प्रेक्षायाम् । किंभूते तद्वपुषि—कान्तिझरैः कान्तिप्रवाहैरगाधतामतलस्पर्शत्वं गमिते प्रापितेऽपि । अगाधे ह्युदके क्रीडानुचिता, तत्रापि क्रीडतोरिति द्योतनार्थमपिशब्दः । पूर्वापेक्षया अपिः, अन्यच्च इत्यर्थे वा । अगाधे ह्युदके क्रीडतोर्द्वयोर्घटद्वयेन भाव्यम् । यद्यपि द्विवचनेनैव द्वयोः, उभौ इति च लभ्यते तथापि सदासहवासित्वपरस्परमिलितत्वप्रदर्शनार्थमुक्तमित्यवगन्तव्यम् ॥

कलसे निजहेतुदण्डजः किमु चक्रभ्रमकारितागुणः ।
स तदुच्चकुचौ भवन्प्रभाझरचक्रभ्रममातनोति यत् ॥ ३२ ॥

कलस इति ॥ न्यायशास्त्रे समवायिकारणमसमवायिकारणं निमित्तकारणं चेति यत्समवेतमेव कार्यमुत्पद्यते तत्समवायिकारणं, यथा मृत्पिण्डो घटस्य । तत्र पूर्वश्लोके कुम्भत्वारोपणेन तदुभयसाम्यमसहमानः कविः प्रभागुणाधिकत्वप्रतिपादनेन तयोरुत्कृष्टतानारोपयितुं हंसमुखेनापूर्वामुक्तिभङ्गिं प्रणीतवान् । असंभाव्यवस्तुदर्शने परसंमतिप्रश्ने किमुशब्दः । हे राजन्, चक्रभ्रमं करोत्येवंशीलश्चक्रभ्रमकारी तस्य भावश्चक्रभ्रमकारिता तल्लक्षणो गुणः स्वभावः (यः) कलसे घटे दृश्यते स निजस्य स्वस्य घटस्य हेतुर्निमित्तकारणं दण्डस्तस्माज्जातः किमु । समवायिकारणगुणः कार्ये गुणामारभते न निमित्तगुणः । अत्र तु निमित्तगुणः कार्ये गुणमारभत इति असंभाव्यमेतत्त्वया कुत्रचिद्दृष्टमिति प्रश्नार्थः किमु । मया तु दृष्टः । कुत्रेत्यपेक्षायामाह—यद्यस्मात्स कलसस्तस्या भैम्या उच्चकुचौ भवन्नुच्चस्तनतां प्रपद्यमानः प्रभाझरेण दीप्तिसमूहेन चक्रभ्रमं कुलालचक्रभ्रमणमर्थाद्दृष्टेः करोति । सुन्दरवस्तुदर्शनेन दृष्टेर्भ्रमणं भवति । सूर्याद्यालोकावलोकनवत् । अथ च स तदुच्चकुचौ भवन्दीप्तिसमूहेन चक्रस्य राष्ट्रस्य, लोकसमूहस्य वा भ्रमं मदजनितं मोहमातनोति । सर्वोऽपि स्तनकान्तिदर्शनेन कामान्धो भवतीति भावः । अथ च कान्तिप्रवाहे चक्रवाकभ्रान्तिमातनोति । (कान्ति) प्रवाहे चक्रवाका भवन्ति (भ्रमन्ति) अतो भ्रमकारणत्वाच्छब्दच्छलाच्चक्रभ्रमकारितागुणो घटे विद्यते । तुङ्गत्वेन कान्तिमत्त्वेन च तत्कुचौ घटचक्रवाकतुल्याविति भावः । निजः सहजश्चासौ हेतुश्च । समवायिकारणमिति यावत् । तादृशो न भवतीति अनिजहेतुर्निमित्तकारणं तादृशाद्दण्डाज्जातः किमु इत्युत्प्रेक्षा, आक्षेपो वा । दण्डगुणः कलसे विद्यत इत्यत्र किं प्रमाणमित्याशङ्कायां शब्दच्छलेन हेतुमाह— स इति । यद् यस्मादिति वा । इति यथा-

'अत्र कुचयोः कुम्भत्वसंभावनेनोत्प्रेक्षालंकारो, न रूपकम् । तथा च काव्यप्रकाशः—'संभा[illegible] प्रकृतस्य परेण यत्' । खलुशब्द उत्प्रेक्षाव्यञ्जकः, अतिशयोक्तिरिति वा' इति साहित्य[illegible] । 'अत्र कुचयोः स्मरयौवनप्लवनकुम्भत्वोत्प्रेक्षया तयोरौत्कट्यं कुचयोश्चातिवृद्धिर्व्यज्यत[illegible] वस्तुध्वनिः' इति जीवातुः ।

माति व्याख्येयम् । 'चक्रो गणे चक्रवाके चक्रं सैन्यरथाङ्गयोः । ग्रामजाले कुलालस्य भाण्डे राष्ट्रास्त्रयोरपि' इति विश्वः ॥

भजते खलु षण्मुखं शिखी चिकुरैर्निर्मितबर्हगर्हणः ।
अपि जम्भरिपुं दमस्वसुर्जितकुम्भः कुचशोभयेभराट् ॥ ३२ ॥

भजत इति ॥ खलूत्प्रेक्षे । दमस्वसुः चिकुरैः केशैर्निर्मिता कृता बर्हगर्हणा पिच्छभारतिरस्कारो यस्य स शिखी मयूरः षण्मुखं कार्तिकेयं भजते सेवते । [illegible] [illegible]म् । तथा दमस्वसुः कुचशोभया स्तनभारेण जितौ गण्डौ यस्य स इभराट् करिणां राजा ऐरावतोऽपि जम्भारिमिन्द्रं सेवते । भैम्याः केशसाम्यं स्तनसाम्यं च देवाराधनेन प्राप्तुं [illegible] वैरनिर्यातनार्थं वा तौ भजत इति भावः । अधिकेन जितोऽन्यमधिकं भजते । चिकुरैरिति बहुवचनेनैव बहुत्वं सूचयित्वा षण्मुखपदप्रयोगेण षण्मुखत्वात्स्कन्दस्य केशसंभावनया तदाश्रयणं शिखिनः स्कन्दाश्रयणं युक्तम् । 'जृभि जभि गात्रविनामे' जम्भते गात्रविनामं करोतीति जम्भस्तद्रिपुर्जम्भादधिकः । अत एव सेव्यते । अस्या गात्रविनामकारिणी कुचशोभा जम्भतुल्येति हेतोस्तदधिकमिन्द्रं सेवते इति ॥

उदरं नतमध्यपृष्ठतास्फुटदङ्गुष्ठपदेन मुष्टिना ।
चतुरङ्गुलमध्यनिर्गतत्रिवलिभ्राजि कृतं दमस्वसुः ॥ ३३ ॥

उदरमिति ॥ हे राजन्, दमस्वसुर्भैम्या उदरं मुष्टिना कृतम् । विधिनेत्यर्थः । किंभूतेन मुष्टिना—नतो नम्रो मध्यो यस्यैवंविधं पृष्ठं यस्योदरस्य तस्य भावस्तत्ता तया स्फुटः स्पष्टोऽङ्गुष्ठपदमङ्गुष्ठस्थानं यस्य तेन । किंभूतमुदरम्—चतसृणामङ्गुलीनां मध्ये निर्गतास्तिस्रो वलयस्ताभिर्भ्राजते तच्छीलम् । पृष्ठमध्ये निम्नत्वमङ्गुष्ठनिवेशनात् । उदरे त्रिवलीयुक्तत्वं चतुरङ्गुलिधारणात् । चतसृणां त्रीण्येवान्तराणि भवन्ति । चतुरङ्गुलेति 'तत्पुरुषस्य—' इत्यच् ॥

प्रकारान्तरेणोदरमेव वर्णयति—

उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु ।
धृतचतुरङ्गुलीव यद्वलिभिर्भाति सहेमकाञ्चिभिः ॥ ३४ ॥

उदरमिति ॥ कोऽपि कुतुकी दमस्वसुरुदरं मुष्टिना स्वकृतं परिमाति [illegible] । किमु उत्प्रेक्षे । यद्यस्मात्तदुदरं सहेमकाञ्चिभिः सुवर्णमेखलासहितैस्त्रिभिर्वलिभिः कृत्वा धृत-

---

१ [illegible]

स्तस्य मुष्टेश्चतस्र अङ्गुलयो येन एवंविधमिव भाति। तिस्रो वलयश्चतुर्थी हेमकाञ्ची। चतस्रोऽङ्गुलयस्तस्य मुष्टेरित्यर्थः। को ब्रह्मा। अपिरेवार्थः। ब्रह्मैवेत्यर्थः॥

पृथुवर्तुलतन्नितम्बकृन्मिहिरस्यन्दनशिल्पशिक्षया।
विधिरेककचक्रचारिणं किमु निर्मित्सति मान्मथं रथम्॥ ३६॥

पृथ्विति॥ विधिर्ब्रह्मा मान्मथं कामसंबन्धिनं रथं निर्मित्सति निर्मातुमिच्छति। किमु उत्प्रेक्षायाम्। किंभूतो विधिः—मिहिरः सूर्यस्तस्य स्यन्दनो रथस्तस्य शिल्पं निर्माणं तस्य शिक्षयाभ्यासेन पृथुं महान्तं वर्तुलं तस्या भैम्या नितम्बं करोतीति कृत्। किंभूतं रथम्—एककेनासहायेन चक्रेण चरति एवंशीलम्। सूर्यरथैकचक्रनिर्माणाभ्यासेन ब्रह्मणा भैमीनितम्बः कृतः स कामरथत्वेनोत्प्रेक्षितः। नितम्बदर्शनान्मदनप्रादुर्भावो भवतीति भावः। निर्मित्सति। माङः 'सनि मीमा–'इत्यादिना अच इस् 'अत्र लोपोऽभ्यासस्य'॥

तरुमूरुयुगेन सुन्दरी किमु रम्भां परिणाहिना परम्।
तरुणीमपि जिष्णुरेव तां धनदापत्यतपःफलस्तनीम्॥ ३७॥

तरुमिति॥ हे राजन्, सुन्दरी भैमी परिणाहिना विशालेनोरुयुगेनोरुद्वयेन तरुं वृक्षरूपां रम्भां कदलीं परं केवलं जिष्णुर्जयनशीलेति किमु किं वक्तव्यम्। अपि त्वेवं न वाच्यम्। किंतु तरुणीमपि तां रम्भामप्सरोविशेषमपि जिष्णुरेव। किंभूताम्—धनदापत्यस्य कुबेरपुत्रस्य नलकूबरस्य तपसः फले स्तनौ यस्याः। यदर्थं नलकूबरेण तपः कृतं तां रम्भाम्। कदलीमप्यूरुयुगेन जितवतीत्यर्थः। द्वयेन द्वयं जितम्। 'परिणाहो विशालता'-इत्यमरः। 'रम्भा कदल्यप्सरसोः' इति विश्वः। 'न लोका–' इति निषेधात्तरुमिति द्वितीया। सुन्दरी। गौरादित्वान्ङीष्॥

जलजे रविसेवयेव ये पदमेतत्पदतामवापतुः।
ध्रुवमेत्य रुतः सहंसकीकुरुतस्ते विधिपत्त्रदंपती॥ ३८॥

जलजे इति॥ ये जलजे कमले रवेः सूर्यस्य सेवयैवैतस्या भैम्याः पदतां चरणत्वं पदमुत्तमस्थानं, व्याजं चावापतुः प्रापतुरिव। ध्रुवमुत्प्रेक्षते। विधिपत्त्रदंपती ब्रह्मवाहनपक्षिजायापती हंसस्त्रीपुंसौ कर्तारौ ते जलजे कर्मणी एत्यागत्य रुतः शब्दाद् ध्रुवं निश्चयेन सहंसकीकुरुतः हंससहिते कुरुतः। हंसरवतुल्याच्छिञ्जितादेते सहंसे इत्यनुमीयत इत्यर्थः। हंसकः पादकटकस्तत्सहिते नूपुरयुक्ते कुरुतः। विधिहंसमिथुनमेतन्नूपुरत्वेन परिणतमित्यर्थः। रविसेवया पद्मयोर्भैमीपदप्राप्तिः। विधिसेवया हंसानामेतच्चरणस्थानप्राप्तिरित्यर्थः। विधिपत्त्रदंपती वै पद्मे एत्य रुतः शब्दं कुरुतः। 'रु शब्दे'। तथा सहंसे कुरुत इति वा। [illegible] हंससंयोगो युक्तः। भैमीपदयोः पद्मादप्युत्कृष्टत्वाद्धंसरवसमानशिञ्जितयोगाच्चेव-[illegible]। सुन्दरतरे सुकुमारे च सृजता ब्रह्मणा स्वीयहंसमिथुनमेव तद्रूपगत्वेन कल्पितम्,

'[illegible] [illegible]' इति साहित्यविद्याधरी। '[illegible]' इति जीवातुः। २ '[illegible]' इति साहित्यविद्याधरी।
३ '[illegible]। [illegible]' इति साहित्यविद्याधरी।

वतीमिति 'सुप्सुपा' इत्यनेन समासः। कतम इति 'कतरकतमौ जातिपरिप्रश्ने' इति वचनसामर्थ्यात्स्वार्थेऽपि डतमच् ॥

अनुरूपमिमं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम्।
युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ॥ ४२ ॥

अन्विति ॥ इममस्या भैम्या अनुरूपं रूपयोग्यं पतिं निरूपयन् अयं वा योग्यः, अयं योग्य इति विचारयन्नपि अथ पश्चात्सर्वेष्वपि युवसु तरुणेषु पूर्वपक्षतामयोग्यरूपत्वं व्यपनेतुं निराकर्तुमक्षमोऽसमर्थः सन्नहं त्वयि सिद्धान्तधियं भैमीरूपानुरूपत्वबुद्धिं निःसपत्नं निश्चयं न्यवेशयं निवेशितवान्। अथ पश्चात्त्वयीति वा। त्वत्तोऽन्यस्तद्योग्यः कोऽपि तरुणो न विद्यत इति। अन्यत्रापि पूर्वपक्षापेक्षया सिद्धान्तस्य बलवत्त्वम्[1] ॥

अनया तव रूपसीमया कृतसंस्कारविबोधनस्य मे।
चिरमप्यवलोकिताद्य सा स्मृतिमारूढवती शुचिस्मिता ॥ ४३ ॥

अनयेति ॥ चिरं चिरकालमवलोकितापि शुचिस्मिता रम्यहास्या सा भैमी अद्य मे स्मृतिं स्मृतिपथमारूढवती प्राप्ता। किंभूतस्य मे—तवानया दृश्यमानया रूपसीमया लावण्यमर्यादया कृतं जनितं संस्कारविबोधनं पूर्वाहितभावनाख्यसंस्कारसमुद्बोधो यस्य। तद्रूपयोग्यत्वात्त्वद्रूपदर्शने सा स्मृतेत्यर्थः। सदृशदर्शने हि स्मृतिर्भवति 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इति। रूपसीमयेति 'डाबुभाभ्याम्—' इति डापि तृतीया ॥

त्वयि वीर विराजते परं दमयन्तीकिलकिञ्चितं किल।
तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम् ॥ ४४ ॥

त्वयीति ॥ किलेति संभावनायाम्। हे वीर हे शूर, किल दमयन्त्याः किलकिञ्चितं शृङ्गारचेष्टाविशेषः त्वयि परं केवलं विराजते विशेषेण शोभते। वीरस्यैव शृङ्गारित्वं युज्यते, वीरानुरागिण्यश्च स्त्रिय इति सूचनार्थं वीरेति पदम्। अर्थान्तरन्यासं दृष्टान्तत्वेनाह—मणिहारावलेर्मुक्ताहारसमूहस्य रामणीयकं सौन्दर्यं तरुणीस्तने तरुण्या एव कुचे शोभते, न तु वृद्धयोषितः। 'क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिञ्चितम्' इत्यालंकारिकाः। रामणीयकं कामनीयकवत् ॥

पुनरुत्कण्ठार्थमाह—

तव रूपमिदं तया विना विफलं पुष्पमिवावकेशिनः।
इयमृद्धधना वृथावनी स्ववनी संप्रवदत्पिकापि का ॥ ४५ ॥

तवेति ॥ हे राजन्, तव इदं दृश्यमानमनुपमं रूपं तया भैम्या विना विफलं निरर्थकम्। कस्य किमिव—अवकेशिनो वन्ध्यवृक्षस्य विफलं फलरहितं पुष्पमिव, तद्यथा न शोभते। अथवा—अवकेशिनो मुण्डितमुण्डस्य शिरसि धार्यमाणं पुष्पं यथा विफलम्। तया विना न

---

१ 'अत्र प्रतीपमलंकारः' इति साहित्यविद्याधरी। २ 'अत्र सममलंकारः'। तथा च काव्य-[illegible] 'समं योग्यतया योगो यदि संभावितः क्वचित्' इति साहित्यविद्याधरी। ३ 'अत्र स्मरणम-[illegible]। तथा चोक्तं काव्यप्रकाशे—'यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः। स्मरणम्' इति साहित्य-[illegible]। ४ 'अत्र प्रतिवस्तूपमालंकारः' इति साहित्यविद्याधरी। 'अत्र हारकिलकिञ्चितयोर-[illegible] बिम्बप्रतिबिम्बतया स्तननृपयोः समानधर्मत्वोक्तेर्दृष्टान्तालंकारः' इति जीवातुः।

केवलं रूपं विफलं, किं च (तु)—ऋद्धधना पूर्णधना इयमवनी पृथ्व्यपि वृथा व्यर्थैव। तथा— संप्रवदन्तः कूजन्तः पिकाः कोकिला यस्यां सा स्ववन्यपि स्वयमारोपिता विलासवाटिकापि का। न कापि। भैमीप्राप्त्यभावे सर्वमेतन्निरर्थकमित्यर्थः। 'वन्ध्योऽफलोऽवकेशी च' इत्यमरः। वनी इति गौरादित्वान्ङीप्। अव्यक्तवाक्त्वात्संप्रवददित्यत्र वदेः शता॥

अहमेवैतद्रूपयोग्यस्त्वदन्यसुलभा कथमित्यत आह—

अनया सुरकाम्यमानया सह योगः सुलभस्तु न त्वया।
घनसंवृतयाम्बुदागमे कुमुदेनेव निशाकरत्विषा॥ ४६॥

अनयेति॥ यतः सुरैर्देवैरपि काम्यमानयाभिलष्यमाणयानया भैम्या सह योगः संबन्धस्तु त्वया न सुलभः सुप्रापः। तत्र युक्तिमाह—कः केनेव। अम्बुदागमे वर्षाकाले घनसंवृतया मेघच्छन्नया निशाकरस्य चन्द्रस्य त्विषा दीप्त्या सह संबन्धः कुमुदेनेव। न सुप्रापो न प्राप्यते, परंतु दुःखेन मदुपायेन सा प्राप्या। तत्र गत्वा त्वय्येव तस्या अनुरागमुत्पाद्य त्वामेव यथा भजेत्तथा करिष्यामीति भावः। यथा वर्षासु मेघानामतिप्रतिबन्धकतया कुमुदेन चन्द्रज्योत्स्ना दुष्प्रापापि वायुना दैवान्मेघनिराकरणे प्राप्यते तथेत्यर्थः। सुलभः। खलर्थत्वेन षष्ठीनिषेधात्त्वयेति तृतीया॥

व्यञ्जितमर्थं व्यक्तीकुर्वन्निगमयति—

तदहं विदधे तथातथा दमयन्त्याः सविधे तव स्तवम्।
हृदये निहितस्तया भवानपि नेन्द्रेण यथापनीयते॥ ४७॥

तदिति॥ तत्तस्मात् योगस्य सान्तरायत्वात्कारणादहं दमयन्त्याः सविधे समीपे तव स्तवं स्तुतिं तथातथा तेनतेन प्रकारेण विदधे करिष्यामि तया भैम्या हृदये मनसि निहितोऽवस्थितो भवान्यथा येन प्रकारेणेन्द्रेणापि नापनीयते दूरीक्रियते, किमुतान्येन। इन्द्रादेरप्यधिकतया त्वं वर्णनीयः। विदधे, अपनीयते इति च वर्तमानसामीप्ये वर्तमानवत्प्रत्ययः। विदधे आशंसायां भूतवद्वा॥

अनौचित्यं परिहरति—

तव संमतिमेव केवलामधिगन्तुं धिगिदं निवेदितम्।
ब्रुवते हि फलेन साधवो न तु कण्ठेन निजोपयोगिताम्॥ ४८॥

तवेति॥ इदं दमयन्तीयोजनं त्वदनुमतं नवेति केवलां संमतिमनुमतिमधिगन्तुमेव, प्राप्तुमित्यर्थः। इदं निवेदितं विज्ञप्तं धिक्। हि यतः साधवः सज्जना निजोपयोगितां निजोपकारितां फलेन फलनिष्पत्त्या ब्रुवते, न तु कण्ठेन कण्ठस्वरेण वचनेन। तव केवलां संमतिमधिगन्तुं ज्ञातुमेवेदं निवेदितं मम वचनं तस्मात् निन्द्यम्। [illegible]

१ 'अत्र [illegible]' इति साहित्यविद्याधरी। २ 'अत्र [illegible]' इति साहित्यविद्याधरी। [illegible]
३ '[illegible]' इति साहित्यविद्याधरी।

इति केनापि नोच्यत इति वा । भवत्संमतिं ज्ञातुमेवेदं वचनं यदि संमतिं भवत्कर्तृकमात्मसंमानं प्राप्तं चेद्वचनं तर्हि धिक् निन्द्यमेव । यतः—साधवो न ह्येतादृशा भवन्तीति वा ॥

तदिदं विशदं वचोमृतं परिपीयाभ्युदितं द्विजाधिपात् ।
अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम् ॥ ४९ ॥

तदिति ॥ स नलो द्विजाधिपात्पक्षिश्रेष्ठात्, चन्द्राच्चाभ्युदितं निर्गतमिदं पूर्वोक्तं विशदं प्रव्यक्तं धवलं च वचोलक्षणममृतं परिपीय सादरमाकर्ण्य पीत्वा चातितृप्ततयातिहृष्टत्वेन सितं श्वेतं स्मितं तस्य पीतस्यामृतस्य चोद्गारमिव विनिर्ममे चकार । श्वेतस्य श्वेत एवोद्गारो भवतीति सितपदम् । अन्योऽप्यतितृप्तोऽजीर्णभयादुद्गारं करोति, सोऽप्यपक्वत्वात्सितो भवति । साधवः स्मितभाषिणः । भैमीप्राप्तिसंभावनाज्जातहर्षाद्वा स्मितम् । उद्गार इति 'उद्ग्योर्ग्रः' इति घञ् ॥

परिमृज्य भुजाग्रजन्मना पतगं कोकनदेन नैषधः ।
मृदु तस्य मुदेऽकिरद्गिरः प्रियवादामृतकूपकण्ठजाः ॥ ५० ॥

परीति ॥ नैषधो नलस्तस्य हंसस्य मुदे हर्षाय गिरो वाचो मृदु कोमलं यथा तथाऽकिरदुवाच । किं कृत्वा—भुजाग्रे बाहुप्रान्ते जन्मोत्पत्तिर्यस्य तेन कोकनदेन रक्तोत्पलेन । करेणेत्यर्थः । पतगं परिमृज्य संस्पृश्य । किंभूता गिरः—प्रियवादामृतं स्तुतिवचोलक्षणममृतं तस्य कूपः, आकर इत्यर्थः । एवंभूतो यः कण्ठस्तस्माज्जाताः । मञ्जुलं सरसं च वच उवाचेति भावः । मृदु परिमृज्येति वा ॥

न तुलाविषये तवाकृतिर्न वचोवर्त्मनि ते सुशीलता ।
त्वदुदाहरणाकृतौ गुणा इति सामुद्रकसारमुद्रणा ॥ ५१ ॥

नेति ॥ हे हंस, तव आकृतिः स्वरूपं तुल्यत इति तुला उपमेयं तल्लक्षणे विषये न । उपमानाभावात्, किं तूपमानमेव । तुल्यतेऽनयेति तुला उपमानं तस्य विषये लक्ष्ये उपमेयमध्ये न तिष्ठति, किं तूपमानमेवेति वा । तथा—ते सुशीलता सुस्वभावत्वं सुवृत्तत्वं वा वचोवर्त्मनि न वाग्गोचरो न, वर्णयितुं न शक्यत इत्यर्थः । तथा—आकृतौ गुणा इति 'यत्राकृतिस्तत्र गुणा वसन्ति' इति सामुद्रकशास्त्रस्य सारो रहस्यं तस्य मुद्रणा नियमना, संग्रह इति यावत् । सा त्वदुदाहरणा त्वमेवोदाहरणं दृष्टान्तो यस्याः । अन्यथा सा निर्विषया स्यादिति भावः । 'तवाकृतिं गुणांश्च दृष्ट्वा सामुद्रिकशास्त्रकारैः 'यत्राकृतिस्तत्र गुणा वसन्ति' इत्युक्तम् । उदाहरणं प्रथमदृष्टान्तस्त्वमित्यर्थः' इति वा । तुलेति कर्मणि करणे च 'घञर्थे कविधानम्' इति कः । ण्यन्तत्वात्तुलनेति यद्यपि भवितव्यम् । तथापि 'अतुलोपमाभ्याम्' इति निर्देशात्क-

---

१ 'अत्रार्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी । २ 'अत्र रूपकोत्प्रेक्षालंकारः । तत्र वचोमृतमिति रूपकम् । तदुत्प्रेक्षाया निमित्तम् । अत्रार्थान्तरप्रतीतिस्तु रूपकादेव । तेन नात्र समासोक्तिः' साहित्यविद्याधरी । ३ 'अत्र भुजाग्रजन्मना कोकनदेनेति विषयस्यानिगरणेन विषयिणः कोक[illegible]नोपनिबन्धनादतिशयोक्तिः । 'विषयस्यानुपादानाद्विषय्युपनिबध्यते । यत्र सातिशयोक्तिः स्यात्क[illegible]संमता ॥' इति लक्षणात् । सा च पाणिकोकनदयोरभेदोक्तिरभेदरूपा, तस्याः प्रियवादामृत[illegible] रूपकसंसृष्टिः' इति जीवातुः ।

प्रत्ययः । सामुद्रकेति समुद्रेण प्रोक्तमित्यस्मिन्नर्थे 'तेन प्रोक्तम्' इत्यणि स्वार्थे कन् । 'सामुद्रिक' इति पाठेऽणन्तादस्त्यर्थे 'अत इनिठनौ' इति ठन् ॥

न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा ।
न परं पथि पक्षपातितानवलम्बे किमु मादृशेऽपि सा ॥ ५२ ॥

नेति ॥ ननु संबोधने । तावकी तवेयं तनुः परं केवलं सुवर्णमयी हेमविकारो न, किंतु तावकी वागपि वाण्यपि तथा किं सुवर्णमयी शोभना वर्णा यस्यां सा । किं प्रश्ने । वाक्पटुत्वं, शरीरसौन्दर्यं च लब्धैवेति सूचितम् । नु संबोधने । न इति पृथक् । वागपि तथा न किम्, अपितु तथैवेति वा । अन्यच्च तव पक्षपातिता पक्षाभ्यां पतति गच्छत्येवंशीलः पक्षपाती तस्य भावस्तत्तानवलम्बे निरालम्बे पथि अन्तरिक्षमार्गे परं केवलं, न किंतु सा पक्षपातिता स्ववर्गान्तःपातित्वमनुकूलवर्तित्वमनवलम्बे निर्गतिके मादृशे मत्सदृशे किमु किमिति वा । निरालम्बनस्य मम त्वमेवालम्बनमिति भावः ॥

भृशातापभृता मया भवान्मरुदासादि तुषारसारवान् ।
धनिनामितरः सतां पुनर्गुणवत्संनिधिरेव सन्निधिः ॥ ५३ ॥

भृशेति ॥ हे हंस, मया भवान्मरुद्वायुरासादि प्राप्तः । किंभूतेन—भृशातापमतिशयितकामज्वरं बिभर्तीति । किंभूतो मरुत्—तुषारस्य हिमस्य सारः श्रेष्ठो भागो विद्यतेऽस्येति । ज्वरितस्य शीतलेन वायुना यथा तापनाशस्तथा भवत्संगत्या ममेत्यर्थः । तदेव दृष्टान्तेनाह—धनिनां धनवतामितर एतद्विलक्षणो नीचो द्रव्यरूपो वा संनिधिः सम्यङ्निधिः । सतां विदुषां पुनर्गुणवतां संनिधिः समागम एव संनिधिः सम्यङ् संनिधिर्न लभ्यः । निधिप्राप्त्या धनिकानां यथा हर्षस्तथा गुणिजनसंनिधिप्राप्तिना हर्षः । [illegible] । 'इतरस्त्वन्यनीचयोः' इत्यमरः ॥

शतशः श्रुतिमागतैव सा त्रिजगन्मोहनमहौषधिर्मम ।
अनुना तव शंसितेन तु स्वदृशैवाधिगतानवैमि ताम् ॥ ५४ ॥

शतश इति ॥ त्रिजगतो मोहे मूर्च्छानाशने वशीकरणे च महौषधिस्तत्तुल्यौषधिः संमोहिनीत्यर्थः । सा भैमी शतशः शतवारमनेकवारं वा मम श्रुतिमागतैव । अनेकवारं मया श्रुतैवेत्यर्थः । अधुनानेन तव शंसितेन सत्कथनेन सौन्दर्यकथनेन तु पुनरहं तां भैमीं स्वदृशैव स्वनेत्रेणैवाधिगतां दृष्टामवैमि जाने । यथेयमेव दृष्टा तथा तर्हि मयापि दृष्टैवेत्यतिवि-शदा लौकिकस्तुतिः । यत्र बहुवारमाकर्णितं तत्कदाचिद्दृष्टमपि । शतश इति बहुधेत्यर्थ-उपलक्षणेन ॥

नेत्रादपि मित्रवचनस्याधिक्यमाह—

अखिलं विदुषामनाविलं सुहृदा च स्वहृदा च पश्यताम् ।
सविधेऽपि नसूक्ष्मसाक्षिणीवदनालंकृतिमात्रमक्षिणी ॥ ५५ ॥

अखिलमिति ॥ चौ तुल्ययोगार्थौ । सुहृदा मित्रेण च स्वहृदा स्वमनसा चाखिलं समस्तं वस्त्वनाविलमसंदिग्धम्, अविपर्यस्तं च आगमानुमानाभ्यां पश्यताम्, अनाविलमसंदिग्धं यथा भवति तथा वा जानतां विदुषां ज्ञातॄणामक्षिणी नेत्रे वदनालंकृतिमात्रं मुखालंकरणमेव न त्वन्यत्तयोः प्रयोजनम् । यतः किंभूते अक्षिणी—सविधेऽपि समीपेऽपि न सूक्ष्मवस्तुग्राहके । यन्नेत्रद्वयं स्वगतं कज्जलारक्तत्वादिकमपि ज्ञातुं न शक्नोति तद्दूरस्थं कथं गृह्णीयात् । असानीप्या-दिति भावः । अतः प्रत्यक्षं ताभ्यां दुर्बलमित्यर्थः । मित्रस्य प्रथमग्रहणं हृदयापेक्षया प्राधान्य-द्योतनार्थम् । एवंविधे अक्षिणी विदुषामलंकरणमात्रं न, किंत्वलंकृतिरेव वद कथय इति वा । सुहृदा देशकालादिव्यवहितमपि पश्यति न तु नेत्राभ्याम् । सुहृदेति 'सुहृद्दुर्हृदौ—' इति साधुः । नसूक्ष्मेति नसमासः । सूक्ष्मसाक्षिणी नेति केचित् । 'मात्रं कार्त्स्न्येऽवधारणे' । अत्रावधारणे मात्रशब्दः ॥

अमितं मधु तत्कथा मम श्रवणप्राघुणकीकृता जनैः ।
मदनानलबोधने भवेत्खग धाय्या धिगधैर्यधारिणः ॥ ५६ ॥

अमितमिति ॥ हे खग हंस, जनैर्लोकैः श्रवणयोः प्राघुणकीकृतातिथीकृता श्राविता तस्या भैम्याः कथा मम मदनानलस्य कामाग्नेर्बोधने दीपने धाय्या अग्निसंधुक्षणे समर्था ऋग्भवेद्भवति । तया यथाग्निर्दीप्यते । तथा तत्कथया मम मदनाग्निर्दीप्यते । किंभूता तत्कथा—अमितमनुपमं, बहु वा मधु । दिव्यापरिमितामृततुल्येत्यर्थः । अतो धैर्यधारिणो मत्सदृशानधीरान्पुरुषान्धिक् । एतादृशा अधीरा[1] निन्द्याः मम (इत्यस्य) विशेषणम्, अधैर्य-धारिण इति वा । तदा मां धिगित्यर्थः । 'ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धनी' इत्यमरः ॥

विषमो मलयाहिमण्डलीविषफूत्कारमयो मयोहितः ।
खग कालकलत्रदिग्भवः पवनस्त्वद्विरहानलैधसा ॥ ५७ ॥

विषम इति ॥ हे खग, तद्विरहानलो भैमीवियोगवह्निस्तस्यैधसा इन्धनेन मया काल-कलत्रदिग् दक्षिणा तत्र भवः पवनो वायुर्दक्षिणवातः विषमो दुःसह ऊहितस्तर्कितः । किंभूतः—मलयाचले वर्तमाना अहिमण्डली भुजंगसमूहस्तस्य विषं तस्य फूत्कारमयोऽग्निसंधुक्षणधमनवा-युरूपः । विषं माति आत्मना समीकरोतीति वा । विषं मयते ददाति वा । कालयति सर्वभू-तानीति कालस्तत्पुत्रस्त्वेवंविध एव संभाव्यते । फूत्कारसंधुक्षितेन वह्निना यथा काष्ठं दह्यते तथा मलयपवनसंधुक्षितेन विरहानलेनाहमपि दग्ध इति भावः । मलयाचले चन्दनबाहुल्या-

---

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिरूपकार्थान्तरन्या-सानां संकरः' इति साहित्यविद्याधरी । 'अत्र तत्कथाया धाय्यात्मना प्रकृतमदनाग्नीन्धनोप-योगात् परिणामालंकारः । 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इत्यलंकारसर्वस्वकारः' इति [illegible] । ३ 'दल धाऊ—' इति पाठे दल खेदे इति तिलकजीवातू ।

अथवेति ॥ अथवेति पूर्वापरितोषे। इयम् 'भव पोत इवावलम्बनम्' इत्यादिना नोऽस्मत्कर्तृका भवतस्त्वत्कर्मिका प्रवर्तना प्रेरणा पिष्टं पिष्टमेव कथं न पिनष्टि। पिष्टपेषणन्यायं कथं नानुसरति व्यर्थमित्यर्थः। ननु स्वतःप्रवृत्तौ पिष्टपेषणं न तथास्तीत्याशङ्कायां स्वतःप्रवृत्तिं दृष्टान्तेन समर्थयते—हि यस्मात्सतां साधूनां परार्थता परोपकारित्वं स्वत एव। परप्रेरणं नापेक्षते इत्यर्थः। तस्मात्पिष्टपेषणतुल्या प्रवर्तनेति भावः। यथा ग्रहणानां ज्ञानानां यथार्थता प्रामाण्यं स्वत एव। ज्ञानं स्वतःप्रमाणमिति मीमांसकाः। यद्वा गृह्यते ज्ञायतेऽर्थो यैस्तानि शब्दास्तेषां यथार्थतानुगतार्थता स्वत एव। वृक्षशब्दोच्चारणमात्रे मूलशाखापत्रादि प्रत्यक्षमिव स्फुरति यथा तथा सतो नाममात्रे गृहीते तेषां परोपकारित्वं स्फुरत्येव। 'एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये–' इत्यादि भर्तृहरिः। अन्यद्विस्तरभयान्न लिख्यते[1]। प्रवर्तनेति 'ण्यास–' इति युच्। न इति 'अस्मदो द्वयोश्च' इत्येकत्वेऽपि बहुवचनम् ॥

तव वर्त्मनि वर्ततां शिवं पुनरस्तु त्वरितं समागमः।
अयि साधय साधयेप्सितं स्मरणीयाः समये वयं वयः ॥ ६२ ॥

तवेति ॥ वर्त्मनि मार्गे तव शिवं कल्याणं वर्ततां भवतु। कृतकार्यस्य तव त्वरितं शीघ्रं समागमो मया सह मेलनं पुनरस्तु भवतु। अयि हंस, ईप्सितं भैमीप्राप्तिलक्षणं मदभिलषितं साधय साधय निष्पादय। स्वार्तिद्योतनार्थं वीप्सा। साधय गच्छ, अभिमतं साधय कुर्विति वा। हे वयः पक्षिन्, वयं समये सखीराहित्यसमये एकान्ते स्मर्तव्याः। तस्यामस्मदभिलाष उत्पादयितव्य इति केचित्। अथ च किंचित्प्रतिबन्धकाशङ्कासमये वयं वैन्यादयः कार्यसिद्ध्यर्थं स्मरणीयाः। 'अनुनये त्वयि' इत्यमरः। वयम् 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम्। पक्षे 'त्यदादीनां मिथः–' इत्यस्मदः शेषः[2] ॥

इति[3] तं स विसृज्य धैर्यवान्नृपतिः सूनृतवाग्बृहस्पतिः।
अविशद्वनवेश्म विस्मितः स्मृतिलग्नैः[4] कलहंसशंसितैः ॥ ६३ ॥

इतीति ॥ स नृपतिर्नल इति पूर्वोक्तप्रकारेण तं हंसं विसृज्य प्रस्थाप्य वनवेश्म उद्यानगृहमविशत्। किंभूतः—धैर्यवान्धैर्ययुक्तः। यावद्धंसागमनं तत्रैव प्रतीक्षाकारित्वात्। तथा—सूनृतवाचि प्रिये सत्ये च वचसि बृहस्पतिरिव, न तूपचारवादी। तथा—रमणीयत्वात्स्मृतिगोचरं स्मरणविषयं लग्नैर्गतैः कलहंसशंसितैर्हंसभाषितैः कलैर्गम्भीरैः हंसभाषितैर्वा विस्मितः साश्चर्यः ॥

अथ भीमसुतावलोकनैः सफलं कर्तुमहस्तदेव सः।
क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजो ययौ ॥ ६४ ॥

अथेति ॥ अथानन्तरं सोऽण्डजो हंसो भीमसुता भैमी तस्या अवलोकनैर्दर्शनैस्तदेवा-

---

१ 'अत्र निदर्शनावाक्यदृष्टान्तालंकारः' यदुक्तम्–'संभवतासंभवता वा वस्तुसंबन्धेन गम्यमानं प्रतिबिम्बकरणं निदर्शना' इति साहित्यविद्याधरी। 'उपमासंसृष्टोऽर्थान्तरन्यासः' इति जीवातुः। 'अत्राशीर्नामालंकारः यथोक्तं दण्ड्यलंकारे—'आशीर्नामालंकारेऽभिलषिते वस्तुन्याशंसनम्' इति विद्याधरी। ३ 'इति सोऽपि विसृज्य तं खगम्' इति पाठस्तिलकसुखावबोधयोः ४ 'स्मृतिलग्नैः' इति पाठो जीवातुसंमतः। ५ 'अत्र दीपकमतिशयोक्तिश्चालंकारः' इति विद्याधरी।

हर्दिनं सफलं सार्थकं कर्तुं कुण्डिनं नाम नगरं ययौ जगाम । किंभूतम्—रमणीयत्वाद्भैम्यधिष्ठितत्वाच्च क्षितिमण्डलस्य मण्डनायितमलंकारीभूतं मण्डनत्वेनाचरितम् । तदेवैतस्तेन क्षणमपि विलम्बो न कृतः । तेन परोपकारित्वं सूच्यते ॥

तद्गमने श्लोकत्रयेण शकुनान्याह—

प्रथमं पथि लोचनातिथिं पथिकप्रार्थितसिद्धिशंसिनम् ।
कलसं जलसंभृतं पुरः कलहंसः कलयांबभूव सः ॥ ६५ ॥

प्रथममिति ॥ स कलहंसः प्रथमं पथि मार्गे लोचनातिथिं लोचनगोचरं जलसंभृतं जलपूर्णं कलसं घटं पुरोऽग्रे कलयांबभूव ज्ञातवान् । स्वानुकूलं शकुनमद्राक्षीदित्यर्थः । अतिथिशब्देनाकस्मिकोपस्थितिः सूच्यते । बुद्धिपूर्वकं शकुनं तथा न फलदं यथाकस्मिकम् । किंभूतं कलसम्—पथिकैः प्रार्थिता या सिद्धिस्तां शंसतीति शंसिनं द्योतकम् । पथिकः 'पथः ष्कन्' ॥

अवलम्ब्य दिदृक्षयाम्बरे क्षणमाश्चर्यरसालसं गतम् ।
स विलासवनेऽवनीभृतः फलमैक्षिष्ट रसालसंगतम् ॥ ६६ ॥

अवलम्ब्येति ॥ स हंसोऽवनीभृतो नलस्य विलासवने क्रीडावने रसाले आम्रे संगतं लग्नं फलमैक्षिष्ट ददर्श । फलमात्रदर्शनं कार्यसिद्धिसूचकम्, सुतरामाम्रफलदर्शनमिति भावः । किं कृत्वा—क्षणं मुहूर्तं दिदृक्षया मार्गावलोकनेच्छयाम्बरे आकाशे [illegible]रसेनालसं मन्दं गतं गमनमवलम्ब्याश्रित्य इति पक्षिजातिः ॥

नभसः कलभैरुपासितं जलदैर्भूरितरक्षुपं नगम् ।
स ददर्श पतङ्गपुंगवो विटपच्छन्नतरक्षुपन्नगम् ॥ ६७ ॥

नभस इति ॥ स पतङ्गपुंगवः पक्षिश्रेष्ठो नगं पर्वतं ददर्श । किंभूतम्—नभस आकाशस्य कलभैः करिशावकैरिव जलदैर्मेघैरुपासितम् । तथा—भूरितराः [illegible] क्षुपा यस्मिन् । तथा—विटपैः शाखाभिश्छन्नास्तिरोहितास्तरक्षवो [illegible] पन्नगाः सर्पाश्च यत्र । [illegible] । 'कलभः करिशावकः', [illegible] 'तरक्षुस्तु मृगादनः' इत्यमरः । [illegible] ॥

स ययौ धुतपक्षतिः क्षणं क्षणभुग्भोगिभुजा[illegible] ।

पक्षतिः पक्षमूलं येन । तथा—क्षणमूर्ध्वमयनं गमनं तेन दुर्विभावनो दुर्लक्ष्यः । तथा—क्षणं विततीकृतौ विस्तारितौ अत एव निश्चलौ निष्कम्पौ छदौ पक्षौ यस्य । सर्वापि पक्षिजातिः । अत एव आलोककानां पश्यतां जनानां दत्तं कौतुकं येन । एकत्र दुर्लक्ष्यत्वादेव कौतूहलम् । आलोकयतेर्ण्वुल् ॥

तनुदीधितिधारया रयाद्गतया लोकविलोकनामसौ ।
छदहेम कषन्निवालसत्कषपाषाणनिभे नभस्तले ॥ ६९ ॥

तन्विति ॥ असौ हंसः अलसद्राज । किं कुर्वन्निव—लोकविलोकनां जननयनगोचरं गतया प्राप्तया तनुदीधितिधारया शरीरदीप्तिधारया, गमनवेगात्तन्वी कृशा या दीधितिधारा दीप्तिधारा तया वा कृत्वा कषपाषाणनिभे निकषोपलतुल्ये गगने नभस्तले छदहेम पक्षसुवर्णं शुद्धमशुद्धं वेति परीक्षार्थं कषन्निव घर्षन्निव । निकषे सुवर्णलेखापि जनैर्विलोक्यते ॥

विनमद्भिरधःस्थितैः खगैर्झटिति श्येननिपातशङ्किभिः ।
स निरैक्षि दृशैकयोपरि स्यदझांकारितपत्रपद्धतिः ॥ ७० ॥

विनमद्भिरिति ॥ स हंसः स्वापेक्षयाऽधःस्थितैः खगैः पक्षिभिरेकया दृशा दृष्ट्या उपर्यूर्ध्वं निरैक्षि दृष्टः । किंभूतैः—श्येनस्य निपातशङ्किभिर्निपतनशङ्कनशीलैः । अत एव झटिति विनमद्भिर्नम्रीभूतैः । किंभूतः–(श्येननिपातशङ्कायां हेतुः) स्यदेन वेगेन झांकारिता झाम् इत्याकारकशब्दं कुर्वती पत्रपद्धतिः पक्षसरणिर्यस्य श्येनत्रस्तपक्षिजातिरियम् । झांकारितेति तारकादित्वादितच् । 'स्यदो जवे' इति निपातः ॥

ददृशे न जनेन यन्नसौ भुवि तच्छायमवेक्ष्य तत्क्षणात् ।
दिवि दिक्षु वितीर्णचक्षुषा पृथुवेगद्रुतमुक्तदृक्पथः ॥ ७१ ॥

ददृश इति ॥ जनेन यन्गच्छन्नसौ हंसो न ददृशे न दृष्टः । किंभूतेन–भुवि भूम्यां तस्य हंसस्य छाया तच्छायमवेक्ष्य दृष्ट्वा तदवलोकनार्थं तत्क्षणात्तस्मिन्नेव क्षणे दिवि गगने दिक्षु दिशासु च वितीर्णं दत्तं चक्षुर्येन । किंभूतः—(यतः) पृथुनातिशयेन वेगेन द्रुतं झटिति मुक्तस्त्यक्तो दृक्पथो दृष्टिमार्गो येन । भुवि तच्छायां दृष्ट्वा तदवलोकनार्थं यावदन्तरिक्षे दिक्षु च दृष्टिर्दीयते तावदेवातिवेगेन दूरगामित्वान्नालोकीति भावः । यन् इतीणः शतरि रूपम् । तच्छायम् 'विभाषा सेना–' इति नपुंसकत्वम् । दृक्पथः 'ऋक्–' इत्यादिना समासान्तः ॥

न वनं पथि शिश्रियेऽमुना क्वचिदप्युच्चतरद्रुचा रुतम् ।
न सगोत्रजमन्ववादि वा गतिवेगप्रसरद्रुचा रुतम् ॥ ७२ ॥

---

१ 'अत्र दीपकजात्यलंकारसंकरः' । यदुक्तं रुद्रटेन—'संस्थानावस्थानक्रियादि यद्यस्य यादृशं भवति । लोके चिरप्रसिद्धं तत्कथनमनन्यथा जातिः । अत्र तिर्यग्जातिरुक्ता । अन्यमते तु स्वभावोक्ति-' इति साहित्यविद्याधरी । २ 'अत्रोत्प्रेक्षोपमे अलंकारौ । व्यवहारसमारोपस्त्वाभ्यामलंका- [illegible]मेव, उपमा त्वत्रोत्प्रेक्षाया अङ्गभूता' इति साहित्यविद्याधरी । ३ 'अत्रापि जातिरलंकारः, [illegible] च' इति साहित्यविद्याधरी । ४ 'अत्र काव्यलिङ्गपुनरुक्तवदाभासावलंकारौ । यदुक्तं [illegible]रो—'पुनरुक्तवदाभासौ विच्छिन्नाकारशब्दगा । एकार्थतेव' इति साहित्यविद्याधरी । [illegible] [illegible]म्' इति पाठे—अमुना वनं पानीयं न भेजे । कीदृशम्—उच्चानामुन्नतानां तरङ्गाणां [illegible]न चारुता यत्रेति व्याख्येयम्' इति साहित्यविद्याधरी ।

न वनमिति ॥ अमुना हंसेन पथि मार्गे क्वचिदपि प्रदेशे वनं न शिश्रिये नाश्रितम् । किंभूतम्—उच्चतराणां द्रूणां द्रुमाणां चारुता यत्र । तथा—बाधवा सगोत्रजं स्वजातिहंसजातं रुतं नान्ववादि नानूदितम् । सगोत्रैः सह संवादो न कृत इत्यर्थः । किंभूतेन—गतिवेगेन गमनवेगेन प्रसरन्ती रुग्दवर्चिर्यस्य । वनस्थितिः स्वयूथ्यसंभाषणं च पक्षिजातिः । विलम्बभयादुभयमपि तेन न कृतमिति गमने सादरत्वं सूचितम् । सगोत्रेति 'ज्योतिर्जनपद—' इति सः । रुगिति संपदादित्वाद्भावे क्विप् ॥

अथ भीमभुजेन पालिता नगरी मञ्जुरसौ धराजिता ।
पतगस्य जगाम दृक्पथं हरशैलोपमसौधराजिता ॥ ७३ ॥

अथेति ॥ अथ धराजिता राज्ञा भीमेन पालितासौ मञ्जुः सुन्दरी कुण्डिनाख्या नगरी पतगस्य हंसस्य दृक्पथं दृष्टिगोचरं जगाम । किंभूतेन—भीमो शत्रूणां भयजनको भुजो यस्य । किंभूता—हरशैलः कैलासस्तदुपमैस्तत्सदृशैः सौधैः सुधाधवलितैः राजगृहैः राजिता शोभिता । कैलासोऽपि भीमभुजेन हरभुजेन पालितः । सौधराजिता, असौ धराजिता इति विरोधाभासः ॥

दयितं प्रति यत्र संतता रतिहासा इव रेजिरे भुवः ।
स्फटिकोपलविग्रहा गृहाः शशभृद्भित्तनिरङ्कभित्तयः ॥ ७४ ॥

दयितमिति ॥ असौ का—यत्र नगर्यां गृहा भुवो नायिकातुल्यायाः रतिहासाः केलिहासा इव रेजिरे शुशुभिरे । किंभूता रतिहासाः—दयितं पृथ्वीपतिं भीमं प्रति संतता निरन्तराः, प्रवृत्ता वा । किंभूता गृहाः—स्फटिकोपलाः स्फटिकरत्नानि विग्रहः स्वरूपं येषाम् । स्फटिकरत्ननिर्मिता इत्यर्थः । तथा—शशभृच्चन्द्रस्तस्य भित्तं शकलं तद्वन्निरङ्का निष्कलङ्का भित्तयो येषाम् । गृहाणां शुभ्रत्वाद्धासतुल्यत्वम् । रतिसमये कान्तं प्रति स्त्रीणां हासा भवन्ति अन्यदा न । 'गृहाः पुंसि च भूम्न्येव', 'भित्तं शकलखण्डे वा' इत्यमरः । संततः 'तनो वा—' इति पक्षे मलोपाभावः 'भित्तं शकलम्' इति साधु ॥

नृपनीलमणीगृहत्विषामुपधेर्यत्र भयेन भास्वतः ।
शरणार्थमुवास वासरेऽप्यसदावृत्त्युदयत्तमं तमः ॥ ७५ ॥

नृपेति ॥ यत्र तमोऽन्धकारं नृपस्य राज्ञो नीलमणिनिर्मिता गृहास्तेषां त्विषस्तासामुपधेर्व्याजाद् भास्वतः सूर्याद्भयेनैव हेतुना वासरे दिवसेऽपि शरणं गृहं रक्षितारं वा अर्थयते तादर्थ्ये सत् उवास वसति स्म । इन्द्रनीलनिर्मितगृहदीप्तयो न भवन्ति, किं त्वन्धकारोऽयमिति भावः । शत्रोर्भीतोऽन्योऽपि रक्षितारमाश्रयते, तदाश्रयेणोदयं प्राप्नोति च । किंभूतं तमः—असती अविद्यमाना आवृत्तिर्भ्रंशनं यस्य तत् । अत एवातिशयेनोदयदुदयत्तमम् । ततः कर्मधारयो वा । अन्यत्र रात्रौ तमस्तिष्ठति दिवा न तिष्ठति, अत्र तु

---

१ 'अत्र यमकमलंकारः' इति साहित्यविद्याधरी । २ 'भीमभुजेन' इति पाठान्तरम् । 'भीमभुजेन' इत्यस्य 'भीमबाहुना' इत्यर्थकस्य [illegible] इति साहित्यविद्याधरीकारः । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी । 'अत्र [illegible]' इति जीवातुः । ४ '[illegible]' इति साहित्यविद्याधरी ।

रात्रिंदिवम् । असती अविद्यमाना आवृत्तिः प्रतिबन्धकं सूर्यादि यस्य । अत एवोदयत्तममिति वा । सूर्यादेरिन्द्रनीलदीप्तिप्रतिबन्धकत्वाभावादतिनिबिडमिति वा । 'उपधिर्व्याजचक्रयोः' इति विश्वः । मणी इति 'कृदिकारात्–' इति ङीप् । भास्वत इति 'भीत्रा–' इत्यपादानत्वम् । शरणार्थमिति 'चतुर्थी तदर्था–' इति समासः । पक्षे 'कर्मण्यण्' ॥

सितदीप्रमणिप्रकल्पिते यदगारे हसदङ्करोदसि ।
निखिलान्निशि पूर्णिमा तिथीनुपतस्थेऽतिथिरेकिका तिथिः ॥ ७६ ॥

सितेति ॥ यदगारे यस्या नगर्या अगारे गृहेषु । जातावेकवचनम् । निशि रात्रावेकिका एकाकिनी पूर्णिमा तिथिर्निखिलान्प्रतिपदादीन्सकलांस्तिथीनतिथिर्याचको भूत्वा सन् उपतस्थे प्राप । आगन्तुकरूपेण संगत इत्यर्थः । किंभूते—सिताः स्फाटिका दीप्रा दीप्तिमन्तो ये मणयो रत्नानि तैः प्रकल्पिते निर्मिते । तथा—हसन्ती प्रकाशमाने अङ्करोदसी समीपद्यावापृथिव्यौ यस्य । यद्वा हसन्नङ्को मध्यो ययोरेवंविधे रोदसी द्यावाभूमी येन । सर्वास्वपि रात्रिषु सितमणिनिर्मितगृहप्रभापटलेन द्यावाभूम्योरन्तरालस्य प्रकाशमानत्वादन्धकाराभावात्पूर्णिमैव जातेति भ्रान्तिर्भवतीति भावः । 'तिथयो द्वयोः' इत्यमरः । दीप्रेति 'नमिकम्पि–' इति रः । उपतस्थे 'उपाद्देवपूजा–' इत्यादिना संगतकरणे तङ् । एकैव एकिका । 'एकादाकिनिच–' इति स्वार्थे कः ॥

सुदतीजनमज्जनार्पितैर्घुसृणैर्यत्र कषायिताशया ।
न निशाखिलयापि वापिका प्रससाद ग्रहिलेव मानिनी ॥ ७७ ॥

सुदतीति ॥ यत्र वापिका जलक्रीडादीर्घिकाखिलयापि सकलयापि निशा रात्र्या न प्रससाद न स्वच्छाभूत् । किंभूता—सुदतीजनानां सुन्दरीसमूहानां मज्जनेन जलक्रीडया अर्पितैर्वितीर्णैर्घुसृणैः कुङ्कुमाङ्गरागैः कषायितः कलुषित आशयो मध्यं यस्याः । केव—ग्रहिला आग्रहवती मानिनीव सुन्दरीव । अनेन कुङ्कुमाङ्गरागबाहुल्यं सूच्यते । मानिन्यपि सपत्नीजने प्रतिफलितं प्रियकुङ्कुमाङ्गरागं दृष्ट्वा प्रियेण नमस्कारादिना प्रसादितापि सकलयापि निशा रात्र्या न प्रसीदति । सापि घुसृणैः कलुषिता । तथा—अशया शयनं शयः स्वप्नः स न विद्यते यस्या इति वा, सुदतीजने मज्जनमासक्तिरिति वा । शोभना दन्ता यस्याः सा । 'अग्रान्तशुद्ध–' इति चकारस्यानुक्तसमुच्चयार्थत्वान्नित्यं स्त्रीसंज्ञत्वात् 'स्त्रियां संज्ञायाम्' इति वा दत्रादेशः । निशा 'पद्दन्–' इति निशाया निश् । 'ग्रहोऽनुग्रहनिर्बन्धौ' इति विश्वः । ग्रहशब्दो निर्बन्धवाचकः । प्रकृते तु माननिर्बन्धः । तुन्दादिराकृतिगणत्वाश्रयणादिलच् ॥

क्षणनीरवया यया निशि श्रितवप्रावलियोगपट्टया ।
मणिवेश्ममयं स निर्मलं किमपि ज्योतिरबाह्यमिज्यते ॥ ७८ ॥

---

१ 'अत्रापह्नुतिविभावनोदात्तालंकारः । तत्रापह्नुतिविभावनयोः कारणभूता, वासरे हि तमसो नाशे हेतुरविः कारणे सत्यपि कार्यानुत्पत्तिर्विभावना । इन्द्रनीलमणीनां गृहास्तत्र सन्तीत्युदात्तम् । यदुक्तं काव्यप्रकाशे—'उदात्तं वस्तुनः संपत्' इति साहित्यविद्याधरी । २ 'अत्रानुप्रासोऽलंकारः । सर्वासु रात्रिषु पूर्णिमान्तरेऽन्यप्रतिपदनादसंबन्धे संबन्धरूपातिशयोक्तिरपि । तयोदात्तमपि । तिथीनां गृहस्य ...ध्वनितोक्तिरपि । अतिथिरूपत्वात्पूर्णिमाया रूपकमपि' इति साहित्यविद्याधरी । ३ 'अत्रोपमोदात्तावलंकारौ' इति साहित्यविद्याधरी । ४ 'ईक्ष्यते' इति सानराजदीक्षितमूल...। जीवातावपि ईक्ष्यते इत्यत्र इत्येव पाठो दृश्यते ।

व्यावभुन्ति । एतत्संज्ञकानामित्यर्थः । पुनः किंभूतैः—(हेतुगर्भं विशेषणम्) पृथक् निजं स्वकीयं चिह्नं लक्षणं तद्धारिभिः । पातालस्य निध्यादि चिह्नं, तत्तलगृहेषु । धान्यादि भूमेश्चिह्नं, तन्मध्यगृहेषु । संक्रन्दनादि स्वर्गचिह्नं, तदूर्ध्वगृहेषु वियत इत्यर्थः । त्रिभूमिकगृहयुक्तेत्यर्थः । जगत्त्रयसारैर्निर्मितत्वादेवाखिला सकलाप्यद्भुताश्चर्यरूपा अखिलादपि त्रैलोक्यादद्भुता । एकैव त्रैलोक्यरूपत्वादाश्चर्यकारिणीति भावः । एकस्मिन्नपि लोके वर्तमानत्वेऽपि लोकान्तरवस्तुदर्शनाद्विस्मय इति वा । 'अधःस्वरूपयोरस्त्री तलम्' इत्यमरः । धरा च अम्बरं चेति समासं कृत्वा पूर्वपदेन समासः ॥

दधदम्बुदनीलकण्ठतां वहदत्यच्छसुधोज्ज्वलं वपुः ।
कथमृच्छतु यत्र नाम न क्षितिभृन्मन्दिरमिन्दुमौलिताम् ॥ ८२ ॥

दधदिति ॥ यत्र नगर्यां क्षितिभृन्मन्दिरं राजगृहमिन्दुमौलितां चन्द्रयुक्ताग्रतां चन्द्रशेखरत्वं, चन्द्रयुक्तमस्तकत्वं च कथं नाम न ऋच्छतु प्राप्नोत्वेव । संप्रश्ने लोट् । किंभूतम्—अम्बुदैर्मेघैर्नीलः श्यामः कण्ठः कण्ठस्थानीयः प्रदेशो यस्य तस्य भावस्तत्ता तां दधत् । तथा—अत्यच्छयातिनिर्मलया सुधया लेपेनोज्ज्वलं वपुः स्वरूपं वहद्बिभ्रत् । इन्दुर्मौलौ यस्य तत्तां महादेवत्वं राजगृहस्य सूच्यते । सोऽपि जलदवन्नीलकण्ठतामतिनिर्मलसुधावद्गौरं शरीरं च धारयति । कण्ठदेशे मेघा अग्रभागे चन्द्रश्चेत्यत्युच्चत्वं राजगृहस्य सूच्यते । 'सुधालेपेऽमृते स्नुही' इत्यमरः ॥

बहुरूपकशालभञ्जिकामुखचन्द्रेषु कलङ्करङ्कवः ।
यदनेककसौधकंधराहरिभिः कुक्षिगतीकृता इव ॥ ८३ ॥

बह्विति ॥ बहु रूपकं सौन्दर्यमाकृतिर्वा यासामेवंविधाः शालभञ्जिका दन्तादिरचिताः स्तम्भादिषु निर्मिताः पुत्रिकास्तासां मुखान्येव चन्द्रास्तेषु कलङ्करङ्कवः संभाविता लाञ्छनमृगा यस्या नगर्या अनेककानां बहुसंख्याकानां सौधानां प्रासादानां कंधरासु गतैः कृत्रिमैर्हरिभिः सिंहैः कुक्षिगतीकृता इव भक्षिता इव लक्ष्यन्ते । कुक्षौ गतास्तादृशाः कृताः चन्द्रेषु लाञ्छनमृगैर्भाव्यम्, ते तु तत्र न विद्यन्ते तर्हि कंधरागतैः सिंहैर्भक्षिता इवेति लक्ष्यन्ते । निष्कलङ्कानि तासां मुखानीत्यर्थः । बहुरूपकेति 'शेषाद्विभाषा' इति कप् । पुंवद्भावाट्टान्निवृत्तौ 'प्रत्ययस्थात्—' इतीत्वनिवृत्तिः ॥

बलिसद्म दिवं स तथ्यवागुपरि स्माह दिवोऽपि नारदः ।
अधराथ कृता ययैव सा विपरीताजनि भूर्विभूषया ॥ ८४ ॥

---

१ 'अत्र यथासंख्यालंकारः । त्रैलोक्यवस्तूनां तत्र संभवादुदात्तमपि' इति साहित्यविद्याधरी । 'अत्र क्षितिगर्भादीनां जगत्सु सतां तच्चिह्नानां च यथासंख्यं संबन्धात् यथासंख्यालंकारः । एतेन त्रैलोक्यवैभवं गम्यते' इति जीवातुः । २ 'अत्र श्लेषोऽलंकारः' इति साहित्यविद्याधरी । 'अत्र विशेषणविशेष्याणां श्लिष्टनामाभिधायाः प्रकृतार्थमात्रनियन्त्रणात्प्रकृतेश्वरप्रतीतेर्ध्वनिरेव' इति जीवातुः । ३ 'अत्र बहुवचनम्' इदं खल्वपि भूय उत्तरपदार्थप्राधान्ये सति संगृहीतं भवति । किम् । अनेकमिति । किमत्र संगृहीतम् एकवचनम् इति भाष्यविरुद्धम् । ४ 'अत्रोत्प्रेक्षारूपकालंकारौ' इति साहित्यविद्याधरी । ५ 'भूर्निभूषया' इति पाठस्तिलकजीवातुसंमतः ।

बलीति ॥ तथ्यवाक्सत्यवाक्च नारदो बलिसद्म पातालं तत्क्षणं दिवं स्वर्गं दिवोऽपि स्वर्गादप्युपरि अतिरमणीयामाह स्म वदति स्म । 'स्वर्गादप्यतिरमणीयानि पातालानि' इति विष्णुपुराणे नारदवचनम् । अथ च शब्दच्छलेनोर्ध्वभागे पातालमिति प्रसिद्धेरभावात्कथं तस्य तथ्यवाक्त्वमित्याशङ्क्य शब्दच्छलेन समर्थयते—अथ पश्चाद्भुविभूषया पृथिव्या अलंकारभूतया यया नगर्या अधरा हीना कृतेव जितेवेत्यर्थः । अथ च अधोदेशे कृतेव सा बलिसद्म द्यौर्विपरीता अन्यादृश्यजनि जाता । अधोभागे बभूवेत्यर्थः । पूर्वं भूर्लोकात्स्वर्लोकाचोर्ध्वमभूदिदानीं ताभ्यामधोभागे जातेति वैपरीत्यम् । अथवा अनया जितत्वादेव पातालस्याधरत्वम्, न त्वधोभागे स्थितत्वादित्युभयत्रापि नारदस्य सत्यवाक्त्वम् । स्वर्गात्पातालं रमणीयं तदप्यनया जितमिति स्वर्गपातालाभ्यामियमतिरमणीयेति श्लोकतात्पर्यम् ॥

प्रतिहट्टपथे घरट्टजात्पथिकाह्वानदसक्तुसौरभैः ।
कलहान्न घनान्यदुत्थिताद्धुनाप्युज्झति घर्घरस्वरः ॥ ८५ ॥

प्रतीति ॥ प्रतिहट्टपथे सर्वेष्वपि विपणिमार्गेषु पथिकाः पान्थास्तेषामाह्वानमाकारणं तद्ददति आह्वानदानि सक्तूनां सौरभाणि सौगन्ध्यानि तैः कृत्वा तैरुपलक्षिताद्वा घरट्टाद्गोधूमादिपेषणपाषाणो घरट्टस्तस्माज्जातायदुत्थितायस्मान्नगर्या उदितात्कलहाज्जातो यो घर्घरस्वरः घर्घरशब्दोऽधुनाप्यद्यापि घनान्नेषामन्नोज्झति न त्यजति । यत्तच्छब्दार्थोऽर्थाद्बुद्ध्यः । सक्तूनामोदनाघ्राय पान्था भोजनार्थं तत्रस्थान्सक्तूंस्त्यक्तुं न शक्नुवन्ति, मेघाश्च तान्नाहं प्रत्युत्तरदन्तीति सक्तुनिमित्तो मेघघरट्टयोः कलहः । मेघाः पीडयन्ति सक्तुपरिमलैर्घरट्ट जीवयन्ति । तेन मेघानां घरट्टानां च नित्यं कलहः । तेन घर्घरस्वरोऽद्यापि मेघान्न मुञ्चतीति वा । घरट्टः पान्थाह्वानं ददाति मेघाश्च यन्ति खण्डयन्तीति भावः । योऽतिरोषात्कलहं करोति घर्घरस्वरस्तं न त्यजति । सर्वोपकारित्वं नगर्या द्योत्यते । हट्टपथे च कलहो भवति । 'ऋक्–' इत्यादिना समासान्तः 'तृतीयासप्तम्योः–' इत्यभावः । घर्घरः पृथक्पदम् ॥

वरणः कनकस्य मानिनीं दिवमङ्कादमराद्रिरागताम् ।
घनरत्नकपाटपक्षतिः परिरभ्यानुनयन्नुवास याम् ॥ ८६ ॥

वरण इति ॥ कनकस्य सुवर्णस्य वरणः प्राकार एवामराद्रिः सुमेरुः मानिनीं कोपनां अत एवाङ्कादुत्सङ्गं त्यक्त्वा आगतां भुवं प्राप्तां यां नगरीमेव दिवं परिरभ्यालिङ्ग्य अनुनयन्प्रसादयन्नुवास । मेरुः कथं तत्रागत इत्यत आह—घनरत्ने निबिडरत्ने निबिडे वा रत्नकपाटे ते एव पक्षती पक्षौ यस्य । सपक्षत्वात्तस्य तदागमनम् । उत्प्रेक्षयानेन [illegible] दैवेन स्थितो, न तु तां गृहीत्वा स्वगृहं नेतुमशकत् । [illegible] अनुनेतुं यतन्ते । सम्भावनारो मेरुतुल्यः, नगरी स्वर्गतुल्या, रत्नकपाटे हेमाद्रिपक्षतुल्ये । अन्योऽपि मानिनी-

---

१ 'स्वर्गादप्यतिरम्याणि पातालानीति नारदः' इति विष्णुपुराणम्' इति सुखावबोधा । २ 'स्व- [illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी । 'अथ [illegible]' । ४ [illegible] घर्घरस्वरम् [illegible] इति जीवातुः । ५ [illegible] सुखावबोधा [illegible] ।

मन्यत्र गतामालिङ्ग्यानुनयं तदनुरोधात्तत्रैव वसति । 'प्राकारो वरणः शालः' इत्यमरः । अनुनयन्निवास' इति वा पाठः ॥

अनलैः परिवेषमेत्य या ज्वलदर्कोपलवप्रजन्मभिः ।
उदयं लयमन्तरा रवेरवहद्वाणपुरीपरार्ध्यताम् ॥ ८७ ॥

अनलैरिति ॥ या नगरी ज्वलद्भिर्देदीप्यमानैरर्कोपलैः सूर्यकान्तैर्निर्मितेभ्यो वप्रेभ्यो जन्म येषां तैरनलैरग्निभिः परिवेषं वेष्टनमेत्य प्राप्य रवेः सूर्यस्योदयं लयमस्तं चान्तरा उदयमारभ्यास्तपर्यन्तं वाणपुरीव परार्ध्यतामग्रगण्यतां श्रेष्ठतामवहद्दधार । पुर्याः परार्ध्यतां वा । वाणपुर्यपि रुद्रप्रसादादनलावरुद्धेति प्रसिद्धिः । सूर्यकिरणसंबन्धात्सूर्यकान्तेभ्योऽग्निरुत्पद्यते । अनेकप्राकारेति भावः । उदयम्, लयम्, 'अन्तरान्तरेण–' इति द्वितीया ॥

बहुकम्बुमणिर्वराटिकागणनाटत्करकर्कटोत्करः ।
हिमवालुकयाच्छवालुकः पटु दध्वान यदापणार्णवः ॥ ८८ ॥

बह्विति ॥ यस्या आपणो हट्ट एवार्णवः पटु सातिशयं दध्वान गर्जितवान् । किंभूतः—बहवः कम्बवः शङ्खाः मणयो मौक्तिकादयश्च यत्र, समुद्रोऽप्येवम् । तथा—वराटिकागणनायां कपर्दकगणनार्थमटन्तो भ्रमन्तः करा हस्ता एव कर्कटोत्कराः कुलीरसमूहा यत्र समुद्रे भ्रमत्कुलीरास्तिष्ठन्ति । तथा—हिमवालुकया कर्पूरेणाच्छवालुको निर्मलसिकतः । समुद्रे सिकतास्तिष्ठन्ति तत्स्थानेऽत्र कर्पूरः । सिकतासाम्येनात्र कर्पूरबाहुल्यम् । तत्र देशे बाहुल्येन कपर्दैरेव व्यवहारः । पटुशब्देन जनसंमर्दः सूच्यते ॥

यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापया ।
मुमुचे न पतिव्रतौचिती प्रतिचन्द्रोदयमभ्रगङ्गया ॥ ८९ ॥

यदिति ॥ अभ्रगङ्गया आकाशगङ्गया प्रतिचन्द्रोदयं चन्द्रोदये चन्द्रोदये पतिव्रतौचिती पातिव्रत्यौचित्यं न मुमुचे न त्यक्तम् । किंभूतया—यदगारघटानां यस्या गृहसमूहानामट्टा उपरिगृहास्तेषु कुट्टिमा बद्धभूमयस्तासु स्रवन्तो द्रवन्तो य इन्दूपलाश्चन्द्रकान्तास्तैस्तुन्दिला बहुतरा आपो जलानि यस्यास्तया । चन्द्रोदये समुद्रोदकवृद्धिर्भवति गङ्गा च तत्पत्नी चन्द्रकान्तगलदुदकसंपर्काद्वर्धत इति पातिव्रत्यौचित्यम् । 'आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा' इत्यादि पतिव्रतालक्षणम् । अनेनाकाशगङ्गाया अपि कुट्टिमानामूर्ध्वभावत्वं सूच्यते । तुन्दिला मत्वर्थे 'तुन्दादिभ्यः–' इतीलच् । लक्षणया पुष्टत्वम् । तुन्दिलापयेति 'ऋक्–' इत्यादिना समासान्तः । प्रतिर्वीप्सायाम् ॥

---

१ 'अत्र रूपकालंकारः । नायकनायिकाव्यवहारप्रतीतिस्तु रूपकादेव । तेन नात्र समासोक्तिः' इति साहित्यविद्याधरी । 'रूपकालंकारः स्फुट एव । तेन चेयं नगरी कुतश्चित्कारणादागता द्यौरेव वरणः स्वर्णाद्रिरेवेत्युत्प्रेक्षा व्यज्यते' इति जीवातुः । २ 'अत्रान्यधर्मस्यान्येन संबन्धासंभवात्तादृशी परार्ध्यतामिति सादृश्याक्षेपान्निदर्शनालंकारः' इति जीवातुः । 'उदात्तालंकारोऽपि' इति साहित्यविद्याधरी । ३ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी । ४ 'अत्रातिशयोक्तिकाव्यलिङ्गोदात्तसंसृष्टिः' इति साहित्यविद्याधरी । 'अत्राभ्रगङ्गाया यदगारेत्यादिना विशेषणार्थासंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिः । तथा च यदगाराणामतीन्दुमण्डलमौन्नत्यं गम्यते । तदुत्थापिता चेयमस्याः पातिव्रत्यधर्मापरित्यागोत्प्रेक्षेति संकरः । सा च व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः ।

रुचयोऽस्तमितस्य भास्वतः स्खलिता यत्र निरालयाः किल ।
अनुसायमभुर्विलेपनापणकश्मीरजपण्यवीथयः ॥ ९० ॥

रुचय इति ॥ यत्र नगर्यामनुसायं प्रतिसंध्याकालं विलेपनापणे सुगन्धद्रव्यविक्रयहट्टे कश्मीरजं तत्कुङ्कुमं पण्यं विक्रेयं तस्य वीथयो मार्गा अस्तमितस्यास्तंगतस्य भास्वतो रवेः स्खलितास्च्युता निरालया निराश्रया रुचय इवाभुर्भान्ति स्म । किल इवार्थे । भातेर्लङ् । अनुर्वीप्सायाम् । सायंकाले तासां रक्तत्वादित्यर्थः । पण्यम् 'अवद्यपण्य—' इति साधु । 'पङ्क्तिर्वीथी पद्व्यपि' ॥

विततं वणिजापणेऽखिलं पणितुं यत्र जनेन वीक्ष्यते ।
मुनिनेव मृकण्डुसूनुना जगतीवस्तु पुरोदरे हरेः ॥ ९१ ॥

विततमिति ॥ यत्र नगर्यां जनेन लोकेन वणिजा लाभजीविना आपणे हट्टे पणितुं विक्रेतुं विततं विस्तारितमखिलं जगतीवस्तु वीक्ष्यतेऽवलोक्यते । एकैकस्यापि वणिजो हट्टे सर्वं वस्तु विद्यत इति भावः । केन कस्मिन्निव—मृकण्डुसूनुना मार्कण्डेयेन मुनिना पुरा पूर्वं हरेर्विष्णोरुदरे जठरे जगतीषु त्रैलोक्येषु जातं वस्त्विव । वीक्ष्यते स्मेत्यर्थः । पणितुम् । आर्धधातुके विकल्पादायाभावः । वीक्ष्यते भूते पुरायोगे 'पुरि लुङ् चास्मे' इति लट् । उकारान्तादपत्यार्थे शुभ्रादित्वाड्ढकि कित्त्वाद्वृद्धौ च 'ढे लोपोऽकद्र्वाः' इत्युकारलोपे च मार्कण्डेयः ॥

सममेणमदैर्यदापणे तुलयन्सौरभलोभनिश्चलम् ।
पणिता न जनारवैरवैदपि गुञ्जन्तमलिं मलीमसम् ॥ ९२ ॥

सममिति ॥ यस्या नगर्या आपणे पणिता विक्रेता मलीमसं श्यामं गुञ्जन्तमपि शब्दायमानमप्यलिं भ्रमरं जनारवैर्लोककोलाहलैर्नावैन्नाज्ञासीत् । किं कुर्वन्—एणमदैः कस्तूरिकाभिः समं सह तुलयन् । किंभूतमलिम्—सौरभलोभेन सौरभ्याभिलाषेण निश्चलं कस्तूरिकायाः उपरि स्थितम् । निश्चलत्वात्समानवर्णत्वाच्च कस्तूरिकायाः भ्रमरस्य भिन्नत्वेन यद्यपि ज्ञातुं न शक्यते तथापि गुञ्जनाद्भेदः । जनरवेषु गुञ्जनस्यान्तर्हितत्वादिति भावः । अवैदिति विदो लङि रूपम् । तुलयन् 'तुल उन्माने' इति ण्यन्ताच्छता । [illegible] गुणाभावः । मलीमसम् 'ज्योत्स्नातमिस्रा—' इति साधुः ॥

---

१ 'लङ्' इति पाठस्तु जीवातुतिलकसुखावबोधासाहित्यविद्याधरीसंमतः । २ 'अतिशयो-क्त्यलंकारः । विशेषालंकारोऽपि । यदुक्तं रुद्रटेन—[illegible] इति' साहित्यविद्याधरी । ३ [illegible] इति तु उपमालंकारः । [illegible] इति नरहरिः । [illegible] । ४ [illegible] इति साहित्यविद्याधरी । ५ [illegible] इति साहित्यविद्याधरी ।

रविकान्तमयेन सेतुना सकलाहं ज्वलनाहितोष्मणा।
शिशिरे निशि गच्छतां पुरा चरणौ यत्र दुनोति नो हिमं॥ ९३॥

रवीति॥ यत्र नगर्यां हिमं शीतं रविकान्तमयेन सूर्यकान्तवद्धेन सेतुना पथा शिशिरे शिशिरर्तौ निशि रात्रावपि गच्छतां स्त्रीपुंसानां चरणौ पुरा नो दुनोति नादुनोत्। किंभूतेन सेतुना—सकलं च तदहश्च सकलाहं ज्वलनोऽग्निस्तेनाहित आरोपित ऊष्मा औष्ण्यं यस्य। सकलाहम् 'राजाह–' इति टच्। अत्यन्तसंयोगे द्वितीया। दुनोति। पुरायोगे लट्॥

विधुदीधितिजेन यत्पथं पयसा नैषधशीलशीतलम्।
शशिकान्तमयं तपागमे कलितीव्रस्तपति स्म नातपः॥ ९४॥

विध्विति॥ आतपो यत्पथं यस्या नगर्याः पन्थानं तपागमे ग्रीष्मागमेऽपि न तपति स्म नोष्णीचकार। किंभूतम्—शशिकान्तमयं चन्द्रकान्तमयम्। अत एव विधुदीधितिजेन चन्द्रकिरणसंबन्धजेन पयसा जलेन नैषधशीलवन्नलस्वभाववच्छीतलम्। किंभूतः—कलितीव्रः कलियुगवदतिदारुणः। दिने तप्तोऽपि चन्द्रोदये स्रवद्भिश्चन्द्रकान्तैरतिशीतलो जात इत्यर्थः। यत्पथम् ऋगादित्वादः॥

परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः।
फणिभाषितभाष्यफक्किकाविषमा कुण्डलनामवापिता॥ ९५॥

परीति॥ या नगरी परिखावलयच्छलेन परिखामण्डलव्याजेन कुण्डलना रेखावलयमवापिता सती परेषां शत्रूणां ग्रहणस्य स्वाधीनत्वस्य गोचरो विषयो न। शत्रुभिर्ग्रहीतुमशक्येत्यर्थः। किंभूता—फणिभाषिता शेषोक्ता भाष्यस्य फक्किका ग्रन्थस्तद्वद्विषमा दुर्ग्रहा शेषव्यतिरिक्तेन ज्ञातुमशक्या। यथा भाष्यफक्किका वररुचिना कुण्डलितेति प्रसिद्धिः शेष एव तदर्थं जानाति॥

मुखपाणिपदाक्ष्णि पङ्कजै रचिताङ्गेष्वपरेषु चम्पकैः।
स्वयमादित यत्र भीमजा स्मरपूजाकुसुमस्रजः श्रियम्॥ ९६॥

मुखेति॥ यत्र नगर्यां भीमजा स्मरस्य कामस्य पूजायाः कुसुमस्रजः (श्रियं) पुष्पमालायाः श्रियं शोभां स्वयमात्मनैवादित स्वीचकार। कामपूजापुष्पमालाख्याने सैव जातेत्यर्थः। यतः किंभूता—मुखपाणिपदाक्ष्णि आस्यकरचरणनयने पङ्कजैर्गौररक्तनीलोत्पलै रचिता निर्मिता। प्राण्यङ्गत्वादेकवद्भावः। तथा—परेष्वन्येष्वङ्गेषु चम्पकैश्चम्पापुष्पै रचिता। मालाप्यनेकविधैः पुष्पैः क्रियते। वदनकरचरणनेत्रं कमलतुल्यम्, अन्यदङ्गं चम्पकतुल्यमिति भावः। माल्यया यथा कामः प्रसन्नीक्रियते, तथा तयेत्यर्थः। (–पदाक्ष्णि) 'अस्थिदधि–'

---

१ 'सकलाहर्ज्वलन–' इति 'रोऽसुपि' इति रः–इति केचित्, तदुपेक्ष्यम्' इति सुखाववोधा। २–'अत्र सेतोरूष्मासंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिः। तत्रोत्तरस्याः पूर्वसापेक्षत्वात्संकरः' इति जीवातुः। 'अत्र विशेषोक्त्युदात्तालंकारौ' इति साहित्यविद्याधरी। ३ 'अत्राप्युक्तनिमित्ता विशेषोक्त्युदात्तोपमालंकारसंसृष्टिः' इति साहित्यविद्याधरी। 'अत्र नगरपथस्येन्दूपलपयःसंबन्धोक्तेरतिशयोक्तिः तत्सापेक्षत्वादुपमयोः संकरः' इति जीवातुः। ४ 'विषमा' इति भिन्नमेव पदं जीवातुसंमतम्। 'अत्रापह्नुत्युपमालंकारौ' इति साहित्यविद्याधरी। 'अत्र नगर्याः कुण्डलिग्रन्थत्वेनोत्प्रेक्षा। सा च [illegible] च्छलेन इत्यपह्नवोरथापितत्वात्सापह्नवा व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः।

इत्यादौ 'अङ्गाधिकारे तस्य च तदुत्तरपदस्य च' इति तदन्तविध्यनुज्ञानादनङादेशे 'अल्लोपोनः' इत्यल्लोपः। आदित 'आङो दोऽनास्यविहरणे' इति तङ्। 'स्थाघ्वोरिच्च' इतीकारः। 'ह्रस्वाद-ङ्गात्' इति सिचो लोपः' ॥

जघनस्तनभारगौरवाद्वियदालम्ब्य विहर्तुमक्षमाः।
भुवमप्सरसोऽवतीर्य यां शतमध्यासत तत्सखीजनः ॥ ९७ ॥

जघनेति ॥ शतसंख्याता अप्सरसो जघनस्तनभारगौरवान्नितम्बकुचयोः(स्य) भारेण स्थूलत्वेन गौरवाद्गुरुत्वाद्वियदाकाशमवलम्ब्य यतो विहर्तुं क्रीडितुमक्षमा अतस्तयां भुवं निश्चि-तम्। अतो (अवतीर्य) भुवमागत्य तत्सखीजनो भैमीसखीजनो भूत्वा यां नगरीमध्यास-ताध्यतिष्ठन्। यत्सख्योऽप्सरस्तुल्या इति भावः। अभ्यर्हितत्वाज्जघनस्य पूर्वनिपातः। याम् 'अधिशीङ्—' इति कर्मत्वम् ॥

स्थितिशालिसमस्तवर्णतां न कथं चित्रमयी बिभर्तु या।
स्वरभेदमुपैतु या कथं कलितानल्पमुखारवा न वा ॥ ९८ ॥

स्थितीति ॥ या नगरी स्थित्या स्वीयस्वीयाचारानतिक्रमणेन शालिनः शोभमानाः समस्ता वर्णा यस्यां तस्या भावस्तत्ता तां कथं केन प्रकारेण न बिभर्तु, अपि तु बिभर्त्येव। अत एव चित्रमयी आश्चर्यरूपा। अन्यत्र ब्राह्मणादिवर्णानां संकरादत्र च तदभावादाश्चर्यरूप-त्वम्। ब्राह्मणादयोऽत्रासंकीर्णास्तिष्ठन्तीत्यर्थः। अथ च या चित्रमयी लेख्यप्रचुरा सा स्थित्या परस्परानतिक्रमेण शालिनः सर्वे नीलपीतादिवर्णा यस्यां तद्भावं कथं न बिभर्तु, अपितु बिभर्त्येव। वा समुच्चये। यस्मात् या कलिताङ्गीकृता अनल्पानां बहूनां नरादीनां मुखारवा मुखशब्दा यया एवंभूता, तस्मात्स्वरभेदमनेकशब्दत्वं नरकरितुरगादिशब्दानां भेदं कोलाहलवशाद्घर्घरशब्दं वा कथं नोपैतु। अथ च कलितोऽङ्गीकृतो वाचाटत्वादनल्पमुखा ब्राह्मणास्तेषामारवो वेदरूपो यया जातो वा यस्यां सा, स्वरभेदमुदात्तादिभेदमकारादिभेदं वा कथं नोपैतु। यद्वा—स्थितयो वर्णानामष्टौ स्थानानि ताभिः शालिनः समस्ता वर्णा अक्षराणि यस्याम्। ब्राह्मणाः सलक्षणं वेदं यत्र पठन्तीत्यर्थः। 'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥' इति शिक्षायाम्। अथच—स्वः स्वर्गादभेदं साम्यं कथं न प्राप्नोतु। स्वर्गेऽनल्पमुखस्य चतुर्मुखस्य ब्रह्मण आरवः शब्दो विद्यते तस्मात्स्वर्गेण सहैकत्वं युज्यते। या बहुमुखारवा सा स्वरभेदं कथमुपैतु, अपि तु न। लोकबाहुल्यात्स्त्रीपुंसादिस्वरभेदो नोपलभ्यत इत्यर्थः। 'वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षरे', 'आलेख्याश्चर्ययोश्चित्रम्' इत्यमरः ॥

स्वरुचारुणया पताकया दिनमर्केण समीयुषोत्तृपः।
लिलिहुर्बहुधा सुधाकरं निशि माणिक्यमया यदालयाः ॥ ९९ ॥

---

१ 'अत्र निदर्शनालंकारः' इति साहित्यविद्याधरी। 'अत्र [illegible] सिध्यतीव [illegible] निदर्शनाभेदः। [illegible]। तदु-त्थापिता चेयं निदर्शनेति संकरः' इति जीवातुः। २ 'अत्र [illegible]लंकारः। '[illegible]' इति साहित्यविद्याधरी। ३ 'अत्र श्लेषालंकारः' इति साहित्यविद्याधरी। 'अत्र श्लेष[illegible]रूपकालंकारः। [illegible] इति जीवातुः।

स्वरुचेति ॥ मणिमयसंज्ञके रत्नविशेषैर्निर्मिता य[illegible] गृहाः [illegible] स्वकान्त्या अरुणया रक्तया पताकया कृत्वा निशि रात्रौ सुधाकरममृतांशोर्न [illegible] लिलि-हुरस्पृशन् । पताकाया जिह्वात्वं सूच्यते । सा[illegible] भाति । किंभूतं—दिनं [illegible] सर्नीयुपा संगतेनार्केण सूर्येण कृत्वा उत्तप्त उत्कृष्य [illegible], [illegible] पिपासा येषाम् । अन्योऽपि सूर्यतेजसा तप्तो रात्रौ जिह्वया शीतलं मधुरं च वस्तु [illegible] । [illegible] इति भावः । दिनम् । अत्यन्तसंयोगे द्वितीया । 'उपेयिवान्–' इत्यत्र 'उपेयिवाननाश्वाननूचानश्च न भवति' इत्युक्तत्वात्सर्नीयुपेति साधुः । [illegible] इति [illegible] 'सन्नाशा विधार्थे धा' इति धाप्रत्ययः । लिहेः [illegible] क्रियाफले परस्मैपदम् ॥

लिलिहे स्वरुचा पताकया निशि जिह्वानिभया सुधाकरम् ।
श्रितमर्ककरैः पिपासु यन्नृपसद्मामलपद्मरागजम् ॥ १०० ॥

लिलिहे इति ॥ पूर्वोक्त एवार्थो जिह्वापदप्रक्षेपेण वर्णितः । लिहेः स्वरितेत्त्वात्कर्त्रभि-प्राये क्रियाफले तङ् । 'श्रितम्' इति पाठः । अर्ककरैः श्रितं [illegible] । स्थितमि-त्यपि क्वचित् । अर्ककरैः पिपासु स्थितम् । अर्ककरैस्तप्तमित्यर्थः ॥

अमृतद्युतिलक्ष्म पीतया मिलितं यद्वलभीपताकया ।
वलयायितशेषशायिनः सखितामादित पीतवाससः ॥ १०१ ॥

अमृतेति ॥ पीतया गौर्या यस्या नगर्या वलभीपताकया वलभीसंज्ञकगृहविशेषवैज-यन्त्या मिलितं संबद्धममृतद्युतेश्चन्द्रस्य लक्ष्म लाञ्छनं कर्तृ वलयायितो मण्डलीभूतः शेपस्त-स्मिञ्शेते एवंशीलस्य पीतवाससो विष्णोः सखितां साम्यमादित प्राप । तत्सदृशं बभूवेत्यर्थः । कलङ्कमभितो वर्तमानस्य चन्द्रस्य शेषसाम्यम्, कलङ्कस्य श्रीकृष्णसाम्यम्, पीतपताकायाः पीतवस्त्रसाम्यम् । अत्युच्चत्वं व्यज्यते ॥

अश्रान्तश्रुतिपाठपूतरसनाविर्भूतभूरिस्तवा-
जिह्मब्रह्ममुखौघविघ्नितनवस्वर्गक्रियाकेलिना ।
पूर्वं गाधिसुतेन सामिघटिता मुक्ता नु मन्दाकिनी
यत्प्रासाददुकूलवल्लिरनिलान्दोलैरखेलद्दिवि ॥ १०२ ॥

अश्रान्तेति ॥ यस्याः प्रासादानां देवराजगृहाणां दुकूलवल्लिर्वैजयन्तीरूपा श्वेतदुकूलवल्लिः अनिलान्दोलैर्वायुकर्तृकचालनैर्दिवि आकाशे मन्दाकिनी नु स्वर्गङ्गेवाखेलच्चिक्रीड; नुरिवार्थे वितर्के वा । किंभूता मन्दाकिनी—गाधिसुतेन विश्वामित्रेण पूर्वं सामिघटितार्धनिर्मिता पश्चा-[illegible] मुक्ता त्यक्ता । किंभूतेन—अश्रान्तश्रुतिपाठेन निरन्तरवेदपाठेन पूताभ्यः पवि-[illegible] रसनाभ्यो जिह्वाभ्य आविर्भूतेषु प्रकटीभूतेषु भूरिषु बहुषु स्तवेषु स्तुतिषु अजिह्मा-[illegible] ब्रह्ममुखौघाश्चत्वार्यपि ब्रह्ममुखानि तैर्विघ्निता विघ्नवती कृता नवा नूतना स्वर्गक्रिया-

१ 'अत्र समासोक्त्यतिशयोक्तितद्गुणोदात्तालंकारसंकरः' इति साहित्यविद्याधरी । 'अत्र, गृहाणां [illegible]मित्तः सुधाकरलेहनात्मकशीतोपचार उत्प्रेक्ष्यते । सा चोक्ततद्गुणोत्थेति संकरः व्यञ्जकाप्रयोगा-[illegible] इति जीवातुः । २ 'अत्रापि समासोक्त्यतिशयोक्तितद्गुणोदात्तालंकारसंकरः' इति साहित्यवि-[illegible] । 'अलंकारश्च पूर्ववत् । जिह्वानिभया इत्युपमासंकरश्च विशेषः' इति जीवातुः । ३ 'अत्रोपमा-[illegible]' इति साहित्यविद्याधरी ।

केलिः स्वर्गनिर्मितक्रीडा यस्य तेन । पूर्वमर्यकृतां सृष्टिं ब्रह्मादिभिरर्थितो विश्वामित्रोऽनुब्र-दिति पुराणादौ । लता वायुना चञ्चलीक्रियते । 'सानि त्वयं जुगुप्सने' इत्यमरः । सानिपाटि-वेत्यत्र 'सानि' इति समासः ॥

यदतिविमलनीलवेश्मरश्मिभ्रमरितभाः शुचिसौधवस्त्रवल्लिः ।
अलभत शमनस्वसुः शिशुत्वं दिवसकराङ्कतले चला लुठन्ति ॥१०३॥

यदिति ॥ यस्या नगर्या अतिविमलानि नीलरत्ननिर्मितवेश्मानि गृहाणि तेषां रश्मिभिः किरणैर्भ्रमरिता भ्रमरीकृता, तैः कृत्वा भ्रमरवदाचरिता वा भा दीप्तिर्यस्याः सा एवंविधा शुचिसौधवस्त्रवल्लिर्धवलगृहान्तरपताकापङ्क्तिर्दिवसकरस्य सूर्यस्याङ्कतले समीपाधोभागे, उत्सङ्ग-तले च चला चञ्चला लुठन्ती क्रीडन्ती सती शमनस्वसुर्यमभगिन्या यमुनायाः शिशुत्वमल-भत प्राप । बालिका यमुनेव शोभते स्मेत्यर्थः । सापि श्यामा पितुः सूर्यस्य समीपे शिशुत्वा-च्चपला लुठनं करोति । शिशुत्वं यमुनापलत्वमिति केचित् । उचत्वं सूच्यते ॥

स्वप्राणेश्वरनर्महर्म्यकटकातिथ्यग्रहायोत्सुकं
पाथोदं निजकेलिसौधशिखरादारुह्य यत्कामिनी ।
साक्षादप्सरसो विमानकलितव्योमान एवाभव-
द्यन्न प्राप निमेषमभ्रतरसा यान्ती रसादध्वनि ॥ १०४ ॥

स्वप्राणेति ॥ यत्कामिनी यस्या नगर्याः स्त्री अभ्रतरसा मेघवेगेनाध्वनि मार्गे रसान्मेघ-वेगजनितप्रीतेः प्रियानुरागाद्वा यान्ती गच्छन्ती सती यद्यस्मान्निमेषं निमेषोपलक्षितमपि विलम्बं, अथ च नेत्रसंकोचं न प्राप । तेन कारणेन सा स्त्री विमानेन कलितं गतिकर्माक्रान्तं व्योम गगनं यानिरेवंविधाः साक्षात्प्रत्यक्षदृश्यमाना अप्सरस एवाभवत् । किं कृत्वा—निजं यत्केलिसौधं क्रीडागृहं तस्य शिखराच्छृङ्गात्पाथोदं मेघमारुह्य । किंभूतं पाथोदम्—स्वप्रा-णेश्वरः स्वप्रियस्तस्य नर्महर्म्यं क्रीडागृहं तस्य कटके मध्यप्रदेशे आतिथ्यग्रहाय प्रायुणिक-पूजाग्रहणाय । कटकप्राप्तय इति यावत् । तस्मा उत्सुकमुत्कण्ठितम् । तद्गतसौन्दर्येण विमान-तुल्यमेघाधिरोहणात्कारणमनेन निमेषाप्राप्त्या च देवाङ्गनातुल्या जातेति भावः । कटकशिखर-पदाभ्यामपि हर्म्याणामुच्चतरत्वं सूचितम् । इः कामस्तस्मिन्नरसादिति वा । 'प्रसितोत्सुका-भ्याम्—' इति तृतीयासप्तम्योः प्रसक्तादातिथ्यग्रह एव अयः शुभावहविधिस्तस्मिन्नुत्सुकमिति वा व्याख्येयम् । कामिन्यपेक्षया शुभकर्मत्वम् ।—व्योमान इति 'अनो बहुव्रीहेः' इति न ङीप् । 'स्त्रियां बह्वप्सरसः' इत्यमरः ॥

वैदर्भीकेलिशैले मरकतशिखरादुत्थितैरंशुदर्भै-
र्ब्रह्माण्डाघातभग्नस्यदजनदतया ह्रीधृतावाङ्मुखत्वैः ।

---

१ 'अत्रो[illegible]लंकारः । अत्र गौडीया रीतिः । यदुक्तं रुद्रटेन—[illegible] गौडीया' इति साहित्यविद्याधरी । २ '[illegible] [illegible]' इति साहित्यविद्याधरी । '[illegible]' इति जीवातुः । ३ '[illegible]' इति साहित्यविद्याधरी । '[illegible]' इति जीवातुः ।

कस्या नोत्तानगाया दिवि सुरसुरभेरास्यदेशं गताग्रै-
र्यद्गोग्रासप्रदानव्रतसुकृतमविश्रान्तमुज्जृम्भते स्म ॥ १०५ ॥

वैदर्भीति ॥ यस्या नगर्या गोग्रासस्य प्रदानलक्षणव्रतं तस्य सुकृतं पुण्यं नीलत्वादंशुभिरेव दर्भैरविश्रान्तं अनवरतमुज्जृम्भते स्म वर्धते स्म । किंभूतैः—वैदर्भीकेलिशैले भैमीक्रीडापर्वते मरकताख्यरत्नविशेषनिर्मितशिखरादुत्थितैरूर्ध्वगामिभिः । तथा—ब्रह्माण्डघातेन ब्रह्माण्डसंघट्टनेन भग्नः स्यदजो वेगजो मदो गर्वो येषां तद्भावस्तत्ता तया ह्रिया लज्जयेव धृतं कृतमवाङ्मुखत्वं व्यावृत्तं यैः । अत एव दिवि स्वर्गे उत्तानगाया उत्तानगामिन्याः कस्याः सुरसुरभेर्देवगव्या आस्यदेशं मुखप्रदेशं गताग्रैः प्राप्ताग्रैः सर्वस्या अपि मुखं प्राप्ताग्रैः । अनेकमरकतरत्ननिर्मितो भैमीक्रीडाशैलस्तत उत्थिताः किरणा यावद्ब्रह्माण्डं गतास्तत उपरिगमनाभावान्निवृत्ता देवगवीनामुत्तानगामित्वात्तन्मुखपतितास्तत्तन्मुखपतितदर्भतुल्या जाता इति भावः । 'उत्ताना वै देवगवा वहन्ति' इति श्रुतेः । अन्यो भग्नगर्वो लज्जयाधोमुखो भवति ॥

विधुकरपरिरम्भादात्मनिष्यन्दपूर्णैः शशिदृषदुपक्लृप्तैरालवालैस्तरूणाम् ।
विफलितजलसेकप्रक्रियागौरवेण व्यरचि स हृतचित्तस्तत्र भैमीवनेन ॥१०६॥

विधुति ॥ तत्र नगर्यां भैमीवनेन स हंसो रमणीयत्वाद्धृतचित्त आकृष्टमना व्यरचि विरचितः । किंभूतेन—तरूणामालवालैर्जलाधारैः कर्तृभिर्विफलितं व्यर्थीकृतं जलसेकप्रक्रियागौरवं जलसेचनप्रकारभारो यस्य । किंभूतैः—शशिदृषद्भिश्चन्द्रकान्तैरुपक्लृप्तानि निर्मितानि तैः । पुनः किंभूतैः—विधुकरपरिरम्भाच्चन्द्रकिरणसंपर्कादात्मनः स्वस्य निष्यन्देन निर्झरोदकेन पूर्णैः । वृक्षाणामालवालपूरणप्रयासश्चन्द्रकान्तनिर्मितत्वात्तैरेव क्रियत इति भावः । निष्यन्देति 'अनुविपर्यभिनिभ्यः–' इति षत्वम् ॥

अथ कनकपतत्रस्तत्र तां राजपुत्रीं सदसि सदृशभासां विस्फुरन्तीं सखीनाम् ।
उडुपरिषदि मध्यस्थायिशीतांशुलेखानुकरणपटुलक्ष्मीमक्षिलक्षीचकार १०७

अथेति ॥ अथानन्तरं कनकपत्रः सुवर्णपक्षो हंसस्तत्र वने तां राजपुत्रीं भैमीमक्षिलक्षीचकार नेत्रगोचरीचकार । किंभूताम्—सदृशभासां समानकान्तीनां सखीनां सदसि सभायां विस्फुरन्तीं विशेषेण दीप्यमानाम् । तथा—उडुपरिषदि नक्षत्रसभायां मध्यस्थायिनी शीतांशुलेखा चन्द्रलेखा तस्या अनुकरणेऽनुकारे पटुः समर्था लक्ष्मीः शोभा यस्यास्ताम् । सदृशदीप्तिमध्ये नक्षत्रापेक्षया चन्द्रलेखा यथाधिका तथा सख्यपेक्षया भैमीति । भैमीसखीनां तत्सादृश्यकथनमन्यसुन्दरीभ्यो विशिष्टसौन्दर्यप्रतिपादनार्थम् । 'सूतोग्रराजभोजकुलमेरुभ्यो दुहितुः पुत्रट्' इति पुत्रशब्दतारस्य दुहितृशब्दस्य पुत्रादेशे टित्वान्ङीपि राजपुत्रीति । केचित्तु पाठेऽस्मिन् पुत्रशब्दं पठन्ति । तेन पुत्रपुत्रीति सिद्धम् । विस्फुरन्तीम् 'स्फुरतिस्फुलत्योः' इति वा षत्वम् ।—[illegible] ॥

१ '[illegible]' इति साहित्यविद्याधरी । '[illegible]' इति जीवातुः । '[illegible]' इति साहित्यविद्याधरी । '[illegible]' इति जीवातुः । २ '[illegible]' साहित्यविद्याधरी ।

भ्रमणरयविकीर्णस्वर्णभासा खगेन क्वचन पतनयोग्यं देशमन्विष्यताधः ।
मुखविधुमदसीयं सेवितुं लम्बमानः शशिपरिधिरिवोर्ध्वं मण्डलस्तेन तेने ॥ १०८ ॥

भ्रमणेति ॥ तेन खगेन हंसेनोर्ध्वमूर्ध्वप्रदेशे शशिपरिधिरिव चन्द्रपरिवेष इव मण्डलस्तेने । भ्रमणमकृतेत्यर्थः । अवतरतः पक्षिणो मण्डलगतिः क्रियास्वभावः । किंभूतेन—भ्रमणरयेण परिभ्रमणवेगेन विकीर्णा प्रसारिता स्वर्णभाः सुवर्णदीप्तिर्येन । तथा—क्वचन क्वाप्यधः कस्मिन्नप्यधःप्रदेशे पतनयोग्यमवतरणयोग्यदेशं स्थानमन्विष्यता पर्यालोचयता । किंभूतः शशिपरिधिः—अदसीयममुष्या भैम्या अयं तं मुखविधुं मुखचन्द्रं सेवितुं परिचुम्बितुं लम्बमानोऽधःप्रदेशमागतः । अदसीयम् । त्यदादित्वात् 'वृद्धाच्छः' । 'भस्याढे तद्धिते' इति पुंवद्भावः । 'बिम्बोऽस्त्री मण्डलं त्रिषु' इत्यमरः ॥

अनुभवति शचीत्थं सा घृताचीमुखाभिर्न सह सहचरीभिर्नन्दनानन्दमुच्चैः ।
इति मतिरुदयासीत्पक्षिणः प्रेक्ष्य भैमीं विपिनभुवि सखीभिः सार्धमाबद्धकेलिम् ॥ १०९ ॥

अन्विति ॥ विपिनभुव्युपवनप्रदेशे सखीभिः सार्धं सह आबद्धकेलिं कृतक्रीडां भैमीं प्रेक्ष्य दृष्ट्वा पक्षिणो हंसस्य इति मतिर्बुद्धिरुदयासीदुत्पन्ना बभूव । इतीति किम्—सा प्रसिद्धा शचीन्द्राणी घृताचीमुखाभिर्घृताचीप्रभृतिभिः सहचरीभिरप्सरोभिः सखीभिः सार्धमुच्चैरतिशयेन इत्थमनेन प्रकारेण । भैमीवदित्यर्थः । नन्दनानन्दं नन्दनवने क्रीडां नानुभवति । एतत् क्रीडासुखं शच्या अपि नास्तीत्यर्थः । ततोऽपीयमधिकेति भावः । नानुभवति, अपि तु चैवेयं किं नन्दनानन्दमनुभवतीति वा । भैमीतत्सखीवनानां शचीघृताचीनन्दनैः साम्यम् । सहचरी पचादौ चरडिति पाठाट्टित्वान्ङीप् । प्रेक्ष्येति भिन्नकर्तृकत्वात्क्त्वानुपपत्तौ स्थितस्येत्यध्याहार्यम् । केलिमिति ह्रस्वः पाठः ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ २ ॥

श्रीहर्षमिति ॥ पूर्वार्धं पूर्ववत् । द्वयोः पूरणो द्वितीयः । द्वितीय एव द्वैतीयीकः । 'तीयादीकक्स्वार्थे वक्तव्यः' । द्वैतीयीकस्य भावस्तत्ता तया मितो गणितः । निसर्गोज्ज्वलः स्वभावसुन्दरः । शेषं स्पष्टम् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृतौ नैषधीयप्रकाशे
द्वितीयः सर्गः समाप्तः ॥

---

१ 'अत्र रूपकोत्प्रेक्षालंकारसंसृष्टिः' इति साहित्यविद्याधरी । [illegible] इति जीवातुः । २ 'उदभूत्' इति तिलकजीवातुसंमतः पाठः । ३ 'अत्र भैमी [illegible]—इति [illegible] [illegible] । [illegible] इति जीवातुः । ४ 'अत्र भ्रान्तिमदलंकारः । [illegible] नलंकारसंसृष्टिः—'[illegible]' इति साहित्यविद्याधरी । '[illegible] [illegible] । [illegible] [illegible] इति जीवातुः ।

उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः।
यान्वेति मां द्रुह्यति मह्यमेव सात्रेत्युपालम्भि तयालिवर्गः ॥ ७ ॥

उच्चेति ॥ तया भैम्या आलिवर्गः सखीजन इत्यनेन प्रकारेणोपालम्भि उपालब्धः। इतीति किम्—इदानीं मन्मनेतं धारयन्त्यां सत्यां भवतीभिरेष हंसः करतालिकानां हस्तातालानां दानाद्वादनादुच्चाटनीय उड्डयनीयः। प्रश्नकाकुः। एतस्य ग्रहणे मया यत्नः क्रियते, भवतीभिरुच्चाटनं क्रियते, एतन्न युक्तमित्यर्थः। अत्र आसु भवतीषु मध्ये या मामन्वेति अनुगमिष्यति सा मह्यमेव द्रुह्यत्येव। एवशब्दस्यावृत्तिः। मम द्रोहमेव करिष्यतीति। अन्वेति द्रुह्यतीति 'वर्तमानसामीप्ये–' इति भविष्यति लट्। अन्वादेशेऽपि 'न चवाहा–' इति एवशब्देन साक्षाद्योगे निषेधान्मह्यमित्यत्र न मयादेशः। मह्यम्—'क्रुधद्रुह–' इति चतुर्थी ॥

धृताल्पकोपा हसिते सखीनां छायेव भास्वन्तमभिप्रयातुः।
श्यामाथ हंसस्य करानवाप्तेर्मन्दाक्षलक्ष्या लगति स्म पश्चात् ॥ ८ ॥

धृतेति ॥ श्यामा यौवनमध्यस्था हंसस्य पश्चाल्लगति स्म चचाल। किंभूता—सखीनां हसिते हास्यविषये वह्वपराधाभावाद्धृतः कृतोऽल्पः कोपो यया। तथा—हंसस्य करेण हस्तेनानवाप्तेरप्राप्तेर्हेतोर्मन्दाक्षेण लक्ष्या दृश्या। सलज्जेत्यर्थः। कस्य केव–भास्वन्तं सूर्यमभिप्रयातुः सूर्यसंमुखं गच्छतः पुरुषस्य छाया यथा तस्यैव पश्चाल्लगति। छायापि हि हंसस्य सूर्यस्य किरणप्राप्तेः श्यामा भवति। हंसस्य (इत्यत्र) पश्चादित्यनेन योगे 'षष्ठ्यतसर्थप्रत्ययेन' इति षष्ठी। 'पश्चात्' इति निपातः। 'मन्दाक्षं ह्रीस्त्रपा' इत्यमरः ॥

शस्ता न हंसाभिमुखी पुनस्ते यात्रेति ताभिश्छलहस्यमाना।
साह स्म नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः ॥ ९ ॥

शस्तेति ॥ ताभिः सखीभिरिति पूर्वोक्तेन प्रकारेण छलेन शब्दछलेन हस्यमाना सोपहासमुच्यमाना सा भैमी इति वक्ष्यमाणं सखीः प्रति आह स्म वदति स्म। इतीति किम्—हे भैमि, हंसाभिमुखी राजहंससंमुखी, अथ च सूर्यसंमुखी यात्रा ते पुनः राजपुत्र्या न शस्ता न प्रशस्ता। अशकुनत्वाच्छास्त्रनिषिद्धत्वादिति सखीवचनम्। हे सख्यः, एष हंसो मे मम नैव अशकुनीभवेदपशकुनरूपो नैव भवेदिति प्रार्थनायां लिङ्। यतोऽयं भावि भविष्यत्प्रियं तस्यावेदकः सूचकः। राजहंसाभिमुखी यात्रा शकुनरूपैव। हंसदर्शनस्य श्रवणस्य च वसन्तराजेन सर्वसिद्धिकरत्वोक्तेरिति भावः। अत एव भावी भविष्यन्ननुरागवान्वा प्रियो नलस्त[illegible] इति। लोकोत्तरसुवर्णशकुनदर्शनाल्लोकोत्तरनलशुभप्राप्तिरनुमीयते वा। नैवाशकुनिः [illegible] वा। 'प्रत्यादित्यं प्रतिबुधम्' इति यात्रानिषेधात्। न चायं सूर्यादिः, किं तु पक्ष्येव। [illegible] शुभसूचकात्पक्षिनिषेधकाच्च च्वौ 'अस्य च्वौ' इतीकारः। पक्षिनिषेधकादश[illegible] 'च्वौ च' इति दीर्घो वा भावी गम्यादिः ॥

'अत्रोपमाभावशबलतालंकारः' इति साहित्यविद्याधरी। २ 'अत्रापह्नुतिर्वक्रोक्तिश्चालंकारः' [illegible]

उच्चाटनीयः करतालिकानां दानादिदानीं भवतीभिरेषः।
यान्वेति मां द्रुह्यति मह्यमेव सात्रेत्युपालम्भि तयालिवर्गः॥ ७॥

उच्चेति॥ तया भैम्या आलिवर्गः सखीजन इत्यनेन प्रकारेणोपालम्भि उपालब्धः। इतीति किम्—इदानीं मय्येतं धारयन्त्यां सत्यां भवतीभिरेष हंसः करतालिकानां हस्ततालानां दानाद्वादनादुच्चाटनीय उड्डयनीयः। प्रश्नकाकुः। एतस्य ग्रहणे मया यत्नः क्रियते, भवतीभिरुच्चाटनं क्रियते, एतन्न युक्तमित्यर्थः। अत्र आसु भवतीषु मध्ये या मामन्वेति अनुगमिष्यति सा मह्यमेव द्रुह्यत्येव। एवशब्दस्यावृत्तिः। मम द्रोहमेव करिष्यतीति। अन्वेति द्रुह्यतीति 'वर्तमानसामीप्ये–' इति भविष्यति लट्। अन्वादेशेऽपि 'न चवाहा–' इति एवशब्देन साक्षाद्योगे निषेधान्मह्यमित्यत्र न मयादेशः। मह्यम्—'क्रुधद्रुह–' इति चतुर्थी॥

धृताल्पकोपा हसिते सखीनां छायेव भास्वन्तमभिप्रयातुः।
श्यामाथ हंसस्य करानवाप्तेर्मन्दाक्षलक्ष्या लगति स्म पश्चात्॥ ८॥

धृतेति॥ श्यामा यौवनमध्यस्था हंसस्य पश्चाल्लगति स्म चचाल। किंभूता—सखीनां हसिते हास्यविषये बह्वपराधाभावाद्धृतः कृतोऽल्पः कोपो यया। तथा—हंसस्य करेण हस्तेनानवाप्तेरप्राप्तेर्हेतोर्मन्दाक्षेण लक्ष्या दृश्या। सलज्जेत्यर्थः। कस्य केव—भास्वन्तं सूर्यमभिप्रयातुः सूर्यसंमुखं गच्छतः पुरुषस्य छाया यथा तस्यैव पश्चाल्लगति। छायापि हि हंसस्य सूर्यस्य किरणप्राप्तेः श्यामा भवति। हंसस्य (इत्यत्र) पश्चादित्यनेन योगे 'षष्ठ्यतसर्थप्रत्ययेन' इति षष्ठी। 'पश्चात्' इति निपातः। 'मन्दाक्षं ह्रीस्त्रपा' इत्यमरः॥

शस्ता न हंसाभिमुखी पुनस्ते यात्रेति ताभिश्छलहस्यमाना।
साह स्म नैवाशकुनीभवेन्मे भाविप्रियावेदक एष हंसः॥ ९॥

शस्तेति॥ ताभिः सखीभिरिति पूर्वोक्तेन प्रकारेण छलेन शब्दछलेन हस्यमाना सोपहासमुच्यमाना सा भैमी इति वक्ष्यमाणं सखीः प्रति आह स्म वदति स्म। इतीति किम्—हे भैमि, हंसाभिमुखी राजहंससंमुखी, अथ च सूर्यसंमुखी यात्रा ते पुनः राजपुत्र्या न शस्ता न प्रशस्ता। अशकुनत्वाच्छास्त्रनिषिद्धत्वादिति सखीवचनम्। हे सख्यः, एष हंसो मे मम नैव अशकुनीभवेदपशकुनरूपो नैव भवेदिति प्रार्थनायां लिङ्। यतोऽयं भावि भविष्यत्प्रियं तस्यावेदकः सूचकः। राजहंसाभिमुखी यात्रा शकुनरूपैव। हंसदर्शनस्य श्रवणस्य च वसन्तराजेन सर्वसिद्धिकरत्वोक्तेरिति भावः। अत एव भावी भविष्यन्ननुरागवान्वा प्रियो नलस्तस्यावेदक इति। लोकोत्तरसुवर्णशकुनदर्शनाल्लोकोत्तरनलशुभप्राप्तिरनुमीयते वा। नैवाशकुनिः पक्ष्येवेति वा। 'प्रत्यादित्यं प्रतिबुधम्' इति यात्रानिषेधात्। न चायं सूर्यादिः, किं तु पक्ष्येव। अशकुनशब्दादशुभसूचकात्पक्षिनिषेधकाच्च च्वौ 'अस्य च्वौ' इतीकारः। पक्षिनिषेधकादशकुनिशब्दाच्च्वौ 'च्वौ च' इति दीर्घो वा भावी गम्यादिः॥

---

१ 'अत्रोपमाभावशबलतालंकारः' इति **साहित्यविद्याधरी**। २ 'अत्रापह्नुतिर्वक्रोक्तिश्चालंकारः' इति **साहित्यविद्याधरी**।

'धार्यः कथंकारम्–' इति यदुक्तं तत्र भूपर्यटनेन श्रान्तस्य तव धारणे कः प्रयास इत्याशङ्कायामाह—

विधेः कदाचिद्भ्रमणीविलासे श्रमातुरेभ्यः स्वमहत्तरेभ्यः ।
स्कन्धस्य विश्रान्तिमदां तदादि श्राम्यामि नाविश्रमविश्वगोऽपि ॥ १९ ॥

विधेरिति ॥ हे भैमि, अहं विधेर्ब्रह्मणः कदाचित्कस्मिंश्चित्समये भ्रमणीविलासे वाह्यलीलायां श्रमातुरेभ्यः परिश्रान्तेभ्यः स्वमहत्तरेभ्यो निजपूर्वजेभ्यो हंसेभ्यः स्कन्धस्य विश्रान्तिमदाम् । तेषु श्रान्तेषु तद्भारमहमग्रहीषम् । किंभूतोऽहम्—अविश्रमं क्वचिद्विश्रान्तिमकृत्वैव विश्वगोऽपि सर्वलोकगाम्यपि । तदादि तत्प्रभृति न श्राम्यामि न श्रान्तो भवामि । निजपूर्वजप्रसादाच्छ्रमरहितो विश्वं भ्रमामीति भावः । भ्रमणी इति 'कृत्यल्युटः–' इति ल्युट् । श्राम्यामि 'शमामष्टानाम्–' इति दीर्घः । 'डप्रकरणेऽन्यत्रापि गमेर्डो दृश्यते' इति विश्वग इत्यत्र डः ॥

ननु पक्षिणः सर्वत्र बन्धनसंभवात्त्वं कथं न बद्ध इत्याशङ्क्य नलप्रसङ्गेनोत्तरं प्रयच्छति—

बन्धाय दिव्ये न तिरश्चि कश्चित्पाशादिरासादितपौरुषः स्यात् ।
एकं विना मादृशि तन्नरस्य स्वर्भोगभाग्यं विरलोदयस्य ॥ २० ॥

बन्धायेति ॥ कश्चित्पाशादिर्वागुरादिर्दिव्ये दिवि भवे मादृशि मत्सदृशे तिरश्चि पक्षिणि विषये बन्धाय बन्धनाय मादृशं बद्धुमासादितपौरुषः प्राप्तसामर्थ्यो न स्याद्भवेत् । दिव्यत्वादेवाहं केनचिद्बद्धुं न शक्य इत्यर्थः । परमयं विशेषः—विरलोदयस्य विरलजन्मनः क्वचित्कस्यचिन्नरस्य पुरुषस्य तत्प्रसिद्धमेकमसाधारणं स्वर्भोगभाग्यं स्वर्लोके स्रक्चन्दनादिभोगयोग्यं भाग्यं शुभं कर्म विना । यो भूमिस्थोऽपि स्वर्गभोगं भुङ्क्ते तस्यैव मादृशा वश्या इति भावः । एवंविधः कश्चन, न सर्व इत्यर्थः । अथ च—विगतो रेफो (यस्य) विरस्तस्य, (रस्य स्थाने) लस्योदयो यस्मिंस्तस्य नलस्य । यद्वा—नरशब्दस्य विशेषेण रस्थाने लोदयो यस्य । उभयथापि नलस्येत्यर्थः । ततश्च नलस्य तदेयं स्वर्भोगभाग्यं विना मादृशं धर्तुं कोऽपि न शक्नोति । नलस्य स्वर्भोगभागधेयस्यैव मादृशा वश्या इति भावः । स चासौ नरश्च तन्नर इति वा । बन्धाय 'तुमर्थात्–' इति चतुर्थी । दिव्ये दिगादित्वाद्यत् । एकम् 'पृथग्विना–' इति द्वितीया । विरेति 'प्रादिभ्यो धातुजस्य–' इति समासः ॥

नरस्य स्वर्भोगभाग्यमेव कुत इत्यत आह—

इष्टेन पूर्तेन नलस्य वश्याः स्वर्भोगमत्रापि सृजन्त्यमर्त्याः ।
महीरुहा दोहदसेकशक्तेराकालिकं कोरकमुद्गिरन्ति ॥ २१ ॥

इष्टेनेति ॥ इष्टेन यागादिना । पूर्तेन कूपादिना, अपेक्षिताधिकदक्षिणादिना वा वश्या [illegible]ा देवा अत्रापि भूलोकेऽपि मनुष्यजन्मन्यपि नलस्य स्वर्भोगं सृजन्ति । यागबाहुल्यं [illegible] च नलं विना केनापि न कृतमिति तस्यैव वश्या भूत्वा स्वर्भोगं सृजन्ति । देहान्त[illegible] स्वर्गफलं कथमत्रैवेत्याशङ्क्याह—अचेतना अपि महीरुहा वृक्षा दोहदसेकशक्ते[illegible] सामर्थ्या[illegible] उदकसेकसामर्थ्याच्चाकालिकमन्यकालभव[illegible] कोरकं कलिकामुद्गिरन्ति कालान्तरे प्रकटयन्ति । तथा—वृक्षा अपीष्टेन दोहदेन पूर्तेन [illegible]लेन नलाधीनाः सन्तो दोहदसेकसामर्थ्यादाकालिकं कोरकमुद्गिरन्तीत्यपि ज्ञेयम् ।

१ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी ।

अलं सजन्धर्मविधौ विधाता रुणद्धि मौनस्य मिषेण वाणीम्।
तत्कण्ठमालिङ्ग्य रसस्य तृप्तां न वेद तां वेदजडः स वक्राम्॥ ३०॥

अलमिति॥ धर्मविधौ संध्याकर्मकरणे सजन्सक्तः सन् विधाता ब्रह्मा मौनस्य मिषेणालमत्यर्थं वाणीमावृणोति। बहिर्निर्गता पुरुषान्तरं भजेदिति शङ्कया मौनं करोति न तु धर्मार्थमिति भावः। यद्रुणद्धि तदलं वृथेति वा। वैयर्थ्यमेवाह—स ब्रह्मा तत्कण्ठं नलकण्ठमालिङ्ग्याश्लिष्य रसस्य शृङ्गारादिनवरसैस्तृप्तां संपूर्णां वक्रां वक्रोक्तिरूपां तां वाणीं न वेद न जानाति। यतो वेदजडः सदैव वेदपाठव्याकुलीभूतहृदयः। निरुद्धापि कदा निर्गत्य नलकण्ठमालिलिङ्गेति नाज्ञासीदिति भावः। अथ च वेदजडत्वात्तं विहायानुरागान्नलकण्ठमालिङ्ग्य शृङ्गारादिपूर्णामित्यर्थः। शृङ्गारादियुक्तां वक्रोक्तिं नल एव जानाति नान्य इत्यर्थः। अन्योऽपि छान्दसो विरक्तामनुरक्तां वा स्वस्त्रियं न जानाति। 'पूरणगुण-' इति सुहितार्थयोगे षष्ठीसमासनिषेधादेव रसस्येति तृप्त्यर्थकरणे षष्ठी॥

श्रियस्तदालिङ्गनभूर्न भूता व्रतक्षतिः कापि पतिव्रतायाः।
समस्तभूतात्मतया न भूतं तद्भर्तुरीर्ष्याकलुषाणुनापि॥ ३१॥

श्रिय इति॥ पतिव्रतायाः श्रियः (शोभायाः छलेन राज्यलक्ष्मीछलेन च) तदालिङ्गनं नलालिङ्गनं तस्माद् भवतीति भूः कापि व्रतक्षतिः पातिव्रत्यक्षतिर्न भूता न जाता। तस्या लक्ष्म्या भर्तुर्विष्णोर्नलालिङ्गनेन लक्ष्मीविषये ईर्ष्याऽसहिष्णुत्वलक्षणा तया कलुषं कालुष्यं तस्याणुर्लेशस्तेनापि न भूतं न जातम्। पातिव्रत्यक्षत्यभावे, तद्भर्तुरीर्ष्याकालुष्याभावे च हेतुमाह—समस्तभूतात्मतया समस्तानां भूतानामात्मा स्वरूपं विष्णुस्तस्य भावस्तत्ता तया। विष्णोः सकलभूतस्वरूपत्वेन नलोऽपि विष्णुरेवेति तदालिङ्गनेन पातिव्रत्यक्षतिः, विष्णोरीर्ष्या च नाभूदित्यर्थः। सदा कान्तिसंपत्तियुक्त इति भावः। कलुषशब्दोऽत्र धर्ममात्रपरः। असूयानिमित्तपापलेशेनापि न भूतमिति वा। पत्यर्थभर्तृशब्दस्य याजकादित्वात्षष्ठीसमासः॥

धिक् तं विधेः पाणिमजातलज्जं निर्माति यः पर्वणि पूर्णमिन्दुम्।
मन्ये स विज्ञः स्मृततन्मुखश्रीः कृत्वार्धमौज्झद्धरमूर्ध्नि यस्तम्॥ ३२॥

धिगिति॥ हे भैमि, स्मृता तस्य नलस्य मुखश्रीर्येन एवंभूतोऽपि यो विधेर्ब्रह्मणः पाणिर्हस्तः पर्वणि पूर्णिमायां पूर्णं परिपूर्णकलं सकलङ्कं चन्द्रं निर्माति रचयति। अत एवाजातलज्जं निर्लज्जं विधेः पाणिं धिक्। तज्जैत्रे नलानने सत्यपि यः करस्तस्मादतिहीनं पूर्णचन्द्रं निर्माति स निर्लज्जत्वे निन्द्य एव। स विधेः पाणिर्विज्ञः कुशलः। स कः—यः स्मृतनलाननशोभः सन् कृतार्धं कृतैकदेशमपि तं चन्द्रं हरमूर्ध्नि शिवमस्तके औज्झत्तत्याजेत्यहं मन्ये। प्रारब्धमपि तदुत्तमस्यान्यस्य स्मरणाद्यस्त्यजति स विपश्चिदेवेति भावः। पूर्णकल-

---

१ 'अत्र छेकानुप्रासोऽपह्नुतिः समासोक्तिश्च' इति साहित्यविद्याधरी। 'अत्र प्रस्तुतवान्देवीकथनादप्रस्तुतवर्णात्मकवाणीवृत्तान्तप्रतीतेः प्रागुक्तरीत्या ध्वनिरेवेत्यनुसंधेयम्' इति जीवातुः। २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी। 'अत्र शच्यादिचित्तचाञ्चल्योक्तिर्नलसौन्दर्ये तात्पर्यान्नानौचित्यदोषः' इति जीवातुः। ३ 'भवमूर्ध्नि' इति तिलकजीवातुसंमतपाठः। 'मृडमूर्ध्नि' इति सुखावबोधासाहित्यविद्याधरीसंमतपाठः।

नैष्कलं च चन्द्रं यद्यप्येक एव ब्रह्मणः पाणिर्निर्माति तथापि कर्षणेन्दुन्यूनत्वं [illegible] भेदमुत्पादयते । चन्द्रादप्यतिरमणीयं वदनमस्तीति भावः ॥

> निलीयते ह्रीविधुरः स्वजैत्रं श्रुत्वा विधुस्तस्य मुखं मुखान्नः ।
> सूरे समुद्रस्य कदापि पूरे कदाचिदभ्रभ्रमदभ्रगर्भे ॥ २२ ॥

निलीयत इति ॥ हे भैमि, विधुश्चन्द्रो नोऽस्माकं मुखात्तव मुखं स्वजैत्रं स्वस्य जेतृ श्रुत्वा ह्रीविधुरो लज्जाविकलः सन्कदापि कदाचिदमावास्यायां सूरे सूर्ये, कदाचिद्वर्षाकाले समुद्रस्य पूरे प्रवाहे कदाचिच्छरत्काले अभ्रे आकाशे भ्रमन्ति अभ्राणि मेघास्तेषां गर्भे मध्ये निलीयतेऽन्तर्हितो भवति । अन्योऽपि स्वजेतारं श्रुत्वा लज्जाविकलोऽदर्शनेच्छुः [illegible] निलीयते । 'सूरसूर्यार्यमा–' 'पोटिवौ द्वे क्रियानरन्', 'अभ्रं मेघ' [illegible] । [illegible] महार्थम् ॥

श्रियाविति ॥ हे भैमि, वयं तस्य नरेन्द्रस्य श्रियौ शोभासमृद्धी निरीक्ष्य दृष्ट्वा स्मरामरेन्द्रावपि कामेन्द्रावपि न स्मरामः अन्तःकरणगोचरौ न कुर्मः । मदने कान्तिरेव, इन्द्रे च समृद्धिरेव, नले तु द्वे अपीत्याधिक्यम् । तस्मिन्नले क्षमयोः भूक्षान्त्योः सम्यग् वासेन वसत्या खलु निश्चयेन शेषबुद्धावनन्तसुगतावपि बुद्धौ चित्ते न दध्मः । मनसापि न स्मराम इत्यर्थः । तयोरेकैकक्षमाधारत्वमस्य च द्वयोरप्याधारत्वम् अतस्तयोः स्मरणं न । ताभ्याममयमधिक इति भावः । 'क्षितिक्षान्त्योः क्षमा' इत्यमरः । कर्मणः शेषत्वेनाविवक्षणात्स्मरामरेन्द्रावित्यत्र 'अधीगर्थ–' इति षष्ठ्यभावः ॥

विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः ।
मनोभिरासीदनणुप्रमाणैर्न लङ्घिता दिक्कतमा तदश्वैः ॥ ३७ ॥

विनेति ॥ तस्य नलस्य अश्वैः कतमा दिक् न लङ्घिता निर्जिता आसीत्, अपितु सर्वापि । किंभूतैः—पतत्रं पक्षं विना पक्षरहितैः विनतातनूजैर्गरुडैः । तथा—ईक्षणलक्षणीयैर्नेत्रगोचरैः समीरणैर्वायुभिः । तथा—अनणुप्रमाणैर्महापरिमाणाधिकरणैर्मनोभिरन्तःकरणैः । गरुडः सपक्षः, वायुरचाक्षुषः, मनोऽणुपरिमाणमिति प्रसिद्धिः । तद्विपरीता अपि तदश्वा वेगेन गरुडादिरूपा जाता इति भावः । इवयोजना वा कर्तव्या । 'न निर्जिता' इति क्वचित्पाठः । अतिजवास्तदश्वा इति भावः । कतमा, 'कतरकतमौ जातिपरिप्रश्ने' इति स्वार्थे डतमच् ॥

संग्रामभूमीषु भवत्यरीणामस्रैर्नदीमातृकतां गतासु ।
तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिः सुभिक्षम् ॥ ३८ ॥

संग्रामेति ॥ हे भैमि, राज्ञां व्रजाः समूहास्तेषामिमे राजव्रजीयास्तैरसुभिर्नरेन्द्रप्राणरूपैर्वायुभिः कृत्वा तस्य नलस्य बाणधारा बाणपरम्परास्तल्लक्षणाः पवनाशनाः सर्पास्तेषां सुभिक्षं भिक्षासमृद्धिर्भवति । नलबाणैः सर्वेऽपि शत्रवो हता इति भावः । कासु सतीषु—संग्रामभूमीष्वरीणां शत्रूणामस्रैः रुधिरैर्नदीमातृकतां गतासु नदीजलपरिपूर्णासु सतीषु । वैरिरुधिरनदीपरिपूर्णास्वित्यर्थः । दैर्घ्येणाशुगामित्वेन प्राणहरत्वेन बाणानां पवनाशनत्वम् । प्राणानां पवनत्वात्तैरेव तेषां सुभिक्षमिति भावः । नदीमातृकासु भूमिष्ववग्रहादिसद्भावेऽपि सुभिक्षं भवति । 'देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः । स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥' इत्यमरः । नदीमातृक इति 'नद्यृतश्च' इति कप् । राजव्रजीय इति 'वृद्धाच्छः' । सुभिक्षम् । भिक्षाणां समृद्धिः 'अव्ययं विभक्ति–' इत्यव्ययीभावः ॥

यशो यदस्याजनि संयुगेषु कण्डूलभावं भजता भुजेन ।
हेतोर्गुणादेव दिगापगालीकूलंकषत्वव्यसनं तदीयम् ॥ ३९ ॥

यश इति ॥ कण्डूलभावं रणकण्डूसहितत्वं भजता प्राप्नुवता भुजेन संयुगेषु यदस्य नलस्य यशोऽजनि संपादितं, (तत्) तदीयं यशःसंबन्धि दिश एवापगा नद्यस्तासु वा नद्य-

---

१ 'अत्र यथासंख्यमलंकारः' इति साहित्यविद्याधरी । 'अत्र द्वयोरपि श्रियोर्द्वयोरपि क्षमयोः प्रकृतत्वात्केवलप्रकृतश्लेषः । एतेन सौन्दर्यादिगुणैः स्मरादिभ्योऽप्यधिक इति व्यज्यते । श्लेषयथासंख्ययोः संकरः' इति जीवातुः । २ 'अत्र विभावनालंकारः' इति साहित्यविद्याधरी । 'अत्राश्वानां विशिष्टगरुडत्वादित्वेन निरूपणाद्रूपकालंकारः' इति जीवातुः । ३ 'रूपकमलंकारः' इति जीवातुसाहित्यविद्याधर्यौ ।

त्वालानाली पङ्क्तिस्तस्याः कूलं तीरं तत्कषत्वं कषणस्वभावस्तद्रूपं व्यसनं हेतोः कारणस्य गुणादेव जातमिति शेषः । न तु स्वभावतः । यशःकारणे भुजे विद्यमानात्कण्डूलक्षणात्कारणगुणादेव यशसि कूलंकषत्वरूपं व्यसनमागतमिति भावः । तस्य यशः सर्वदिग्व्यापीत्यर्थः । कण्डूल इति 'सिध्मादिभ्यश्च' इत्यस्त्यर्थे लच् । कण्डूं लालादत्ते इति वा, 'आतोऽनुपसर्गे कः' । कूलंकष इति 'सर्वकूल–' इति खशि अजन्तत्वान्मुम् ॥

इदानीं तस्य गुणानुवर्णनासक्तिं द्योतयन्नतिशयोक्तिमाह—

यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारेपरार्धं गणितं यदि स्याद्गणेयनिःशेषगुणोऽपि स स्यात् ॥ ४० ॥

यदीति ॥ त्रिलोकी त्रैलोक्यं यदि गणनापरा गुणगणनासक्ता स्यात्तस्यास्त्रिलोक्यास्तद्गुणगणनार्थमायुषः समाप्तिर्यदि न स्याद्यदि गणितं गणितशास्त्रं पारेपरार्धं परार्धात्परं स्यात्तदा स नलः गणेया गणयितुं शक्या निःशेषाः समग्रा गुणा यस्य एवंभूतोऽपि भवेत् । न तु एवम् । ततः सोऽप्यसंख्येयगुण इति भावः । त्रिलोकी समाहारे द्विगौ 'द्विगोः' इति ङीप् । पारेपरार्धम् । 'पारेमध्ये षष्ठ्या–' इति समासः । एदन्तत्वं च निपातनात् । गणेय इति 'गणेरेयः' इत्यौणादिको गणेरेयः । स्यात्, क्रियातिपत्तेरविवक्षितत्वाल्लिङ् ॥

तस्यान्तःपुरे स्वगतिं द्योतयन्नाह—

अवारितद्वारतया तिरश्चामन्तःपुरे तस्य निविश्य राज्ञः ।
गतेषु रम्येष्वधिकं विशेषमध्यापयामः परमाणुमध्याः ॥ ४१ ॥

अवारीति ॥ हे भैमि, वयं परमाणुवन्मध्यो यासां ता अतिकृशोदर्यः [illegible] एव रम्येषु गतेषु विषयेऽधिकं लोकोत्तरं गमनविशेषमध्यापयामः पाठयामः । किं कृत्वा— तिरश्चां पक्ष्यादीनामवारितद्वारतयाऽनिषिद्धप्रवेशत्वेन तस्य राज्ञोऽन्तःपुरे निविश्य [illegible] । इङः शब्दकर्मत्वात् 'गतिबुद्धि–' इत्यण्यन्तकर्तुर्णिजन्तस्य कर्मत्वम् ॥

नर्मसाचिव्यमपि कुर्म इत्याह—

पीयूषधारानधराभिरन्तस्तासां रसोदन्वति मज्जयामः ।
रम्भादिसौभाग्यरहःकथाभिः काव्येन काव्यं सृजताऽऽदृताभिः ॥ ४२ ॥

पीयूषेति ॥ वयं रम्भादीनामप्सरसां सौभाग्यं [illegible] तस्य कथाभिः [illegible] तासां [illegible] रसोदन्वति [illegible] । किंभूताभिः—पीयूषधारा [illegible] । तथा—काव्ये [illegible] काव्येन [illegible] । [illegible] ॥

१ [illegible]

श्रियाविति ॥ हे भैमि, वयं तस्य नरेन्द्रस्य श्रियौ शोभासमृद्धी निरीक्ष्य दृष्ट्वा स्मरामरेन्द्रावपि कामेन्द्रावपि न स्मरामः अन्तःकरणगोचरौ न कुर्मः । मदने कान्तिरेव, इन्द्रे च समृद्धिरेव, नले तु द्वे अपीत्याधिक्यम् । तस्मिन्नले क्षमयोः भूक्षान्त्योः सम्यग् वासेन वसत्या खलु निश्चयेन शेषबुद्धावनन्तसुगतावपि बुद्धौ चित्ते न दध्मः । मनसापि न स्मराम इत्यर्थः । तयोरेकैकक्षमाधारत्वमस्य च द्वयोरप्याधारत्वम् अतस्तयोः स्मरणं न । ताभ्याममयमधिक इति भावः । 'क्षितिक्षान्त्योः क्षमा' इत्यमरः । कर्मणः शेषत्वेनाविवक्षणात्स्मरामरेन्द्रावित्यत्र 'अधीगर्थ–' इति षष्ठ्यभावः ॥

विना पतत्रं विनतातनूजैः समीरणैरीक्षणलक्षणीयैः ।
मनोभिरासीदनणुप्रमाणैर्न लङ्घिता दिक्कतमा तदश्वैः ॥ ३७ ॥

विनेति ॥ तस्य नलस्य अश्वैः कतमा दिक् न लङ्घिता निर्जिता आसीत्, अपितु सर्वापि । किंभूतैः—पतत्रं पक्षं विना पक्षरहितैः विनतातनूजैर्गरुडैः । तथा—ईक्षणलक्षणीयैर्नेत्रगोचरैः समीरणैर्वायुभिः । तथा—अनणुप्रमाणैर्महापरिमाणाधिकरणैर्मनोभिरन्तःकरणैः । गरुडः सपक्षः, वायुरचाक्षुषः, मनोऽणुपरिमाणमिति प्रसिद्धिः । तद्विपरीता अपि तदश्वा वेगेन गरुडादिरूपा जाता इति भावः । इवयोजना वा कर्तव्या । 'न निर्जिता' इति क्वचित्पाठः । अतिजवास्तदश्वा इति भावः । कतमा, 'कतरकतमौ जातिपरिप्रश्ने' इति स्वार्थे डतमच् ॥

संग्रामभूमीषु भवत्यरीणामस्रैर्नदीमातृकतां गतासु ।
तद्बाणधारापवनाशनानां राजव्रजीयैरसुभिः सुभिक्षम् ॥ ३८ ॥

संग्रामेति ॥ हे भैमि, राज्ञां व्रजाः समूहास्तेषामिमे राजव्रजीयास्तैरसुभिर्नरेन्द्रप्राणरूपैर्वायुभिः कृत्वा तस्य नलस्य बाणधारा बाणपरम्परास्तल्लक्षणाः पवनाशनाः सर्पास्तेषां सुभिक्षं भिक्षासमृद्धिर्भवति । नलबाणैः सर्वेऽपि शत्रवो हता इति भावः । कासु सतीषु—संग्रामभूमीष्वरीणां शत्रूणामस्रै रुधिरैर्नदीमातृकतां गतासु नदीजलपरिपूर्णासु सतीषु । वैरिरुधिरनदीपरिपूर्णास्वित्यर्थः । दैर्घ्येणाशुगामित्वेन प्राणहरत्वेन बाणानां पवनाशनत्वम् । प्राणानां पवनत्वात्तैरेव तेषां सुभिक्षमिति भावः । नदीमातृकासु भूमिष्ववग्रहादिसद्भावेऽपि सुभिक्षं भवति । 'देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः । स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥' इत्यमरः । नदीमातृक इति 'नद्यृतश्च' इति कप् । राजव्रजीय इति 'वृद्धाच्छः' । सुभिक्षम् । भिक्षाणां समृद्धिः 'अव्ययं विभक्ति–' इत्यव्ययीभावः ॥

यशो यदस्याजनि संयुगेषु कण्डूलभावं भजता भुजेन ।
हेतोर्गुणादेव दिगापगालीकूलंकषत्वव्यसनं तदीयम् ॥ ३९ ॥

यश इति ॥ कण्डूलभावं रणकण्डूसहितत्वं भजता प्राप्नुवता भुजेन संयुगेषु यदस्य नलस्य यशोऽजनि संपादितं, (तत्) तदीयं यशःसंबन्धि दिश एवापगा नद्यस्तासु वा नद्य-

---

१ 'अत्र यथासंख्यमलंकारः' इति साहित्यविद्याधरी । 'अत्र द्वयोरपि श्रियोर्द्वयोरपि क्षमयोः प्रकृतत्वात्केवलप्रकृतश्लेषः । एतेन सौन्दर्यादिगुणैः स्मरादिभ्योऽप्यधिक इति व्यज्यते । श्लेषयथासंख्ययोः संकरः' इति जीवातुः । २ 'अत्र विभावनालंकारः' इति साहित्यविद्याधरी । 'अत्राश्वानां विशिष्टगरुडादिरूपत्वेन निरूपणाद्रूपकालंकारः' इति जीवातुः । ३ 'रूपकमलंकारः' इति जीवातुसाहित्यविद्याधर्यौ ।

स्यातामाली पङ्क्तिस्तस्याः कूलं तीरं तत्कषत्वं कषणस्वभावस्तद्रूपं व्यसनं हेतोः कारणस्य गुणादेव जातमिति शेषः । न तु स्वभावतः । यशःकारणे भुजे विद्यमानात्कम्बुलक्षणात्कारणगुणादेव यशसि कूलंकषत्वरूपं व्यसनमागतमिति भावः । तस्य यशः सर्वदिग्व्यापीत्यर्थः । कम्बुल इति 'सिध्मादिभ्यश्च' इत्यस्त्यर्थे लच् । कम्बुं लात्याद्त्ते इति वा, 'आतोऽनुपसर्गे कः' । कूलंकष इति 'सर्वकूल–' इति खशि अजन्तत्वान्मुम् ॥

इदानीं तस्य गुणानुवर्णनाशक्तिं द्योतयन्नतिशयोक्तिमाह—

यदि त्रिलोकी गणनापरा स्यात्तस्याः समाप्तिर्यदि नायुषः स्यात् ।
पारेपरार्धं गणितं यदि स्याद्गणेयनिःशेषगुणोऽपि स स्यात् ॥ ४० ॥

यदीति ॥ त्रिलोकी त्रैलोक्यं यदि गणनापरा गुणगणनासक्ता स्यात्तस्यास्त्रिलोक्यास्तद्गुणगणनार्थमायुषः समाप्तिर्यदि न स्याद्यदि गणितं गणितशास्त्रं पारेपरार्धं परार्धात्परं स्यात्तदा स नलः गणेया गणयितुं शक्या निःशेषाः समग्रा गुणा यस्य एवंभूतोऽपि भवेत् । नतु एवम् । ततः सोऽप्यसंख्येयगुण इति भावः । त्रिलोकी समाहारे द्विगौ 'द्विगोः' इति ङीप् । पारेपरार्धम् । 'पारेमध्ये षष्ठ्या–' इति समासः । एदन्तत्वं च निपातनात् । गणेय इति 'गणेरेयः' इत्यौणादिको गणेरेयः । स्यात्, क्रियातिपत्तेरविवक्षितत्वाल्लिङ् ॥

तस्यान्तःपुरे स्वगतिं द्योतयन्नाह—

अवारितद्वारतया तिरश्चामन्तःपुरे तस्य निविश्य राज्ञः ।
गतेषु रम्येष्वधिकं विशेषमध्यापयामः परमाणुमध्याः ॥ ४१ ॥

अवारीति ॥ हे भैमि, वयं परमाणुवन्मध्यो यासां ता अतिकृशोदरीः कन्याः सत्य एव रम्येषु गतेषु विषयेऽधिकं लोकोत्तरं गमनविशेषमध्यापयामः पाठयामः । किं कृत्वा—तिरश्चां पक्ष्यादीनामवारितद्वारतयाऽनिषिद्धद्वारत्वेन तस्य राज्ञोऽन्तःपुरे निविश्य प्रविश्य । इङः शब्दकर्मत्वात् 'गतिबुद्धि–' इत्यण्यन्तकर्तुर्ण्यन्तत्वे कर्मत्वम् ॥

नर्मेत्थमपि कुर्म इत्याह—

पीयूषधारानधराभिरन्तस्तासां रसोदन्वति मज्जयामः ।
रम्भादिसौभाग्यरहःकथाभिः काव्येन काव्यं सृजताद्दृताभिः ॥ ४२ ॥

पीयूषेति ॥ वयं रम्भादीनामप्सरसां सौभाग्यं पुरुषवशीकरणादिशक्तिस्तस्य रहो रहस्यं तस्य कथाभिः संभोगगोष्ठीभिर्वस्त्वन्तरगोप्यकथाभिश्च तासां नलस्त्रीणामन्तर्हृदयं रसोदन्वति शृङ्गारसमुद्रे निमज्जयामो निमज्जयामः । किंभूताभिः—पीयूषधारा अमृतप्रवाहस्तस्याः पराभवपराभिरन्यूनाभिः । तथा—काव्यं प्रबन्धविशेषं सृजता कुर्वता काव्येन शुक्रेण आदृताभिः काव्ये प्रतिपादिताभिः । उदन्वति 'उदन्वानुदधौ च' इति साधुः । तत्र निमज्जनं सुखम् । 'रहः सुरतगोप्ययोः' इति धरणिः ॥

---

१ 'अत्र स्वभाव' इति साहित्यविद्याधरी । [illegible] इति जीवातुः । २ 'अत्र [illegible]' इति जीवातुः । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी । ४ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

तासां विश्वासत्वं मदनादेशार्हत्वमाह—

काभिर्न तत्राभिनवस्मराज्ञा विश्वासनिक्षेपवणिक्क्रियेऽहम्।
जिह्रेति यन्नैव कुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन॥ ४३॥

काभिरिति॥ तत्र नलान्तःपुरे काभिः सुन्दरीभिरहं पक्षी अभिनवातिगोप्या स्मराज्ञा तस्या विश्वासेन निक्षेपवणिक्स्थापनिको वणिङ् क्रिये अपितु सर्वाभिरपि कृतः। कया स्वका-मरहस्यं मयि न कथ्यत इत्यर्थः। तत्र हेतुः—यत् यतो हेतोस्तिर्यक्पक्ष्यादिः कुतोऽपि कस्मादपि प्राणिनो नैव जिह्रेति लज्जते। तेन कारणेन कश्चित्कोऽपि प्राणी तिरश्चोऽपि सकाशान्न त्रपते लज्जते। अतस्ता निर्लज्जाः सत्यो मदग्रेऽतिगोप्या अपि कामगोष्ठीः कुर्वन्तीति भावः। अन्यदपि गोप्यं विश्वासयोग्ये वणिजि निक्षिप्यते॥

तासां परिहासोक्तमलीकमपि वचो नान्यस्मै कथयामीत्याह—

वार्तापि नासत्यपि सान्यमेति योगादरन्ध्रे हृदि यां निरुन्धे।
विरञ्चिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः॥ ४४॥

वार्तेति॥ असत्यप्यलीकापि सा परिहासवार्तापि परिहासकथा अन्यं नैति। अन्यस्मै न कथयामीत्यर्थः। सा का—अरन्ध्रेऽरिभेदरहिते हृदि योगादुपायेन। प्रयत्नादित्यर्थः। यां वार्तां निरुन्धे नितरामावृणोमि। ध्यानादिसंबन्धाद्दोषरहिते हृदीति वा सदोषमेवान्तःकरणमन्यस्मा अन्यवार्तां कथयति, मदन्तःकरणं तु ध्यानादिना निर्दोषम्, अतो न कथयामीति भावः। वार्ताप्यन्यं नैति किमुतान्यत्, अलीकाप्यन्यं नैति किमुत सत्येति द्योतनार्थमपिशब्दौ। दुष्ट-प्रयुक्ता वार्ता जनहितार्थं कथनीयापि न कथ्यते। सरन्ध्रादेव बहिर्निर्गमः संभाव्यते इदं त्वरन्ध्रम्। अथ च—असती कुलटापि कार्मणादियोगान्नीरन्ध्रस्थाने निरुद्धाप्यन्यं पुरुषं नै-तीत्युक्तिः। योगवत्त्वमेवाह—विरञ्चेर्ब्रह्मणो नानाननानि चत्वारि मुखानि तत्कृतो वादो वचनं तेन धौतं पवित्रीकृतं समाधिशास्त्रं योगशास्त्रं तस्य श्रुतिः श्रवणं तेन पूर्णौ कर्णौ यस्य। योग-शास्त्राणि श्रुतयश्चेति वा। योगिनो हि यत्रकुत्रापि न जल्पन्ति तथा ब्रह्मण उपदेशादहमपि। त्वमपि वयःसंधिं विश्वासार्हे मयि विश्वस्य कामगोष्ठीं कुर्विति भावः। रुधेः स्वरितेत्त्वात्तङ्॥

अतिशयितमभिलाषमुत्पादयितुं नलप्राप्तेर्दुर्लभत्वमाह—

नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बतान्या।
कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्या॥ ४५॥

नलेति॥ हे भैमि, तव त्वया अनवाप्यं दुष्प्रापमसत्कर्तृकपक्षवीजनादिसेवादिरूपं [illegible] स्वर्गोपभोगं नलाश्रयेण कृत्वान्या नायिकानर्हापि लभते। बत खेदे हा कष्टं। [illegible]। वर्तमानसामीप्ये लट्। प्राप्नोति वा, बहुवल्लभत्वादिति वा। केव—अम्बुजिन्या [illegible]र्लभं दुष्प्रापं ज्योत्स्नोत्सवं चन्द्रिकाजन्यविकासादिरूपं महोत्सवमिन्दुपरिग्रहेण

[illegible]' इति साहित्यविद्याधरी। २ 'अत्र काव्यलिङ्गमलंकारः'
। 'अत्र वार्तानिरोधस्य विरिञ्चीत्यादिपदार्थहेतुकत्वात्काव्यलिङ्गभेदः'

चन्द्रालोकारेण कुमुद्वतीव यथा म्लायति । अन्यथा अनर्हत्वादेव मे खेदः । [illegible] नलपरिग्रहस्त्वया संभाव्य इत्यर्थः । नहि तं विना पदमन्यं भजाम इत्यर्थः । तत्र कृद्योगे 'कृत्यानाम्–' इति कर्तरि षष्ठी । अम्बुजिन्याः खलर्थयोगे षष्ठीनिषेधात्कर्तरि तृतीया ॥

प्रकृतमुपसंहरमाह—

तन्नैषधानूढतया दुरापं शर्म त्वयास्मत्कृतचाटुजन्म ।
रसालवल्ल्या मधुपानुविद्धं सौभाग्यमप्राप्तवसन्तयेव ॥ ८६ ॥

तदिति ॥ तत्तस्मात्त्वया नैषधेन नलेनानूढतयापरिणीतत्वेनास्मत्कृतैः चाटुभिः प्रियवचनैः जन्म यस्य तत् शर्म सुखं दुरापं दुष्प्रापम् । नलप्राप्तिमन्तरेण [illegible] सुखं प्राप्तव्यं नास्तीति भावः । कया किमिव—अप्राप्तवसन्तया रसालवल्ल्या माकन्दलतया मधुपैर्भ्रमरैरनुविद्धं कृतं सौभाग्यं मकरन्दास्वादमोदानुभवलक्षणमिव [illegible] दुष्प्रापम् । पूर्वश्लोकेऽम्बुजिनीदृष्टान्तेन सर्वथा दुष्प्रापत्वं सूचितम्, इह [illegible] कालान्तरे प्राप्स्यत इति सूच्यते । खलर्थयोगे 'न लोक–' इति षष्ठीप्रतिषेधः ॥

तत्र नलप्राप्तिसंभावनायामधैर्यं न कर्तव्यमित्याह—

तस्यैव वा यास्यसि किं न हस्तं दृष्टं न कः केन विधेः प्रसादः ।
अजातपाणिग्रहणासि तावद्रूपस्वरूपातिशयाश्रयश्च ॥ ८७ ॥

तस्यैवेति ॥ त्वं तस्यैव नलस्यैव वा हस्तं किं न यास्यसि अपि [illegible]

सदा विश्वासलं वदन्नादेशार्हत्वमाह—

कामिनं तत्राभिनवसराग्रा विश्वासनिक्षेपवणिक् क्रियेऽहम्।
जिहेति यन्नैव कुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन ॥ ४३ ॥

कामिरिति ॥ तत्र नलान्तःपुरे कामिः सुन्दरीभिरहं पक्षी अभिनवातिगोप्या सरागा तस्या विश्वासेन निक्षेपवणिक्स्थापनिको वणिक् क्रिये अपितु राजाभिरपि कृतः। कथा सकामरहस्यं मयि न कथ्यत इत्यर्थः। तत्र हेतुः—यत् यतो हेतोस्तिर्यक्पश्वादि कुतोऽपि कस्मादपि प्राणिनो नैव जिहेति लज्जते। तेन कारणेन कश्चित्कोऽपि प्राणी तिरश्चोऽपि सकाशान्न त्रपते लज्जते। अतस्ता निर्लज्जाः सत्यो मदग्रेऽतिगोप्या अपि कामगोष्ठीः कुर्वन्तीति भावः। अन्यदपि गोप्यं विश्वासयोग्ये वणिजि निक्षिप्यते ॥

तासां परिहासोक्तमलीकमपि वचो नान्यस्मै कथयामीत्याह—

वार्तापि नासत्यपि सान्यमेति योगादरन्ध्रे हृदि यां निरुन्धे।
विरञ्चिनाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः ॥ ४४ ॥

वार्तेति ॥ असत्यप्यलीकापि सा परिहासवार्तापि परिहासकथा अन्यं नैति। अन्यस्मै न कथयामीत्यर्थः। सा का—अरन्ध्रेऽरिभेदरहिते हृदि योगादुपायेन। प्रयत्नादित्यर्थः। यां वार्तां निरुन्धे नितरामावृणोमि। ध्यानादिसंबन्धाद्दोषरहिते हृदीति वा सदोषमेवान्तःकरणमन्यस्या अन्यवार्तां कथयति, मदन्तःकरणं तु ध्यानादिना निर्दोषम्, अतो न कथयामीति भावः। वार्ताप्यन्यं नैति किमुतान्यत्, अलीकाप्यन्यं नैति किमुत सत्येति द्योतनार्थमपिशब्दौ। दुष्टप्रयुक्ता वार्ता जनहितार्थं कथनीयापि न कथ्यते। सरन्ध्रादेव बहिर्निर्गमः संभाव्यते इदं त्वरन्ध्रम्। अथ च—असती कुलटापि कार्मणादियोगान्नीरन्ध्रस्थाने निरुद्धाप्यन्यं पुरुषं नैतीत्युक्तिः। योगवत्त्वमेवाह—विरञ्चेर्ब्रह्मणो नानाननानि चत्वारि मुखानि तत्कृतो वादो वचनं तेन धौतं पवित्रीकृतं समाधिशास्त्रं योगशास्त्रं तस्य श्रुतिः श्रवणं तेन पूर्णौ कर्णौ यस्य। योगशास्त्राणि श्रुतयश्चेति वा। योगिनो हि यत्रकुत्रापि न जल्पन्ति तथा ब्रह्मण उपदेशादहमपि। त्वमपि वयःसंधिं विश्वासार्हे मयि विश्वस्य कामगोष्ठीं कुर्विति भावः। रुधेः स्वरितेत्त्वात्तङ् ॥[1]

अतिशयितमभिलापमुत्पादयितुं नलप्राप्तेर्दुर्लभत्वमाह—

नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बतान्या।
कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्या ॥ ४५ ॥

नलेति ॥ हे भैमि, तव त्वया अनवाप्यं दुष्प्रापमसत्कर्तृकपक्षवीजनादिसेवादिरूपं त्रिदिवोपभोगं स्वर्गोपभोगं नलाश्रयेण कृत्वान्या नायिकानर्हापि लभते। बत खेदे हा कष्टं। प्राप्स्यते। वर्तमानसामीप्ये लट्। प्राप्नोति वा, बहुवल्लभत्वादिति वा। केव—अम्बुजिन्या कमलिन्या दुर्लभं दुष्प्रापं ज्योत्स्नोत्सवं चन्द्रिकाजन्यविकासादिरूपं महोत्सवमिन्दुपरिग्रहेण

---

१ 'अत्र रूपककाव्यलिङ्गावलंकारौ' इति साहित्यविद्याधरी। २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी। 'अत्र वार्तानिरोधस्य विरिञ्चीत्यादिपदार्थहेतुकत्वात्काव्यलिङ्गभेदः' इति जीवातुः।

चन्द्राङ्गीकारेण कुमुद्वतीव यथा प्राप्नोति । अन्यस्या अनर्हत्वादेव न खेदः । त्वमौचित्याद्धि नलपरिग्रहस्त्वया संपाद्य इत्यर्थः । नहि तं विना वयमन्यं भजाम इत्यर्थः । तव कृद्योगे 'कृत्यानाम्–' इति कर्तरि षष्ठी । अम्बुजिन्या खलर्थयोगे षष्ठीनिषेधात्कर्तरि तृतीया ॥

प्रकृतमुपसंहरन्नाह—

तन्नैषधानूढतया दुरापं शर्म त्वयास्मत्कृतचाटुजन्म ।
रसालवन्या मधुपानुविद्धं सौभाग्यमप्राप्तवसन्तयेव ॥ ४६ ॥

तदिति ॥ तत्तस्मात्त्वया नैषधेन नलेनानूढतयापरिणीतत्वेनास्माभिः कृतं यच्चाटु प्रियवचनं तस्माज्जन्म यस्य शर्म सुखं दुरापं दुष्प्रापम् । नलाश्रयेणैव त्वयाप्यस्मत्प्रियवचनजनितं सुखं प्राप्तव्यं नान्यथेति भावः । कया किमिव—अप्राप्तवसन्तया रसालवन्या सहकारवाटिकया मधुपैर्भ्रमरैरनुविद्धं कृतं सौभाग्यं मकरन्दास्वादझांकारगुञ्जनादिलक्षणमिव यथा दुष्प्रापम् । पूर्वश्लोकेऽम्बुजिनीदृष्टान्तेन सर्वथा दुष्प्रापत्वं सूचितम्, इदानीमाम्रवनीदृष्टान्तेन कालान्तरे प्राप्स्यत इति सूच्यते । खलर्थयोगे 'न लोका–' इति षष्ठीनिषेधः ॥

तत्र नलप्राप्तिसंभावनायामधैर्यं न कर्तव्यमित्याह—

तस्यैव वा यास्यसि किं न हस्तं दृष्टं मनः केन विधेः प्रविश्य ।
अजातपाणिग्रहणासि तावद्रूपस्वरूपातिशयाश्रयश्च ॥ ४७ ॥

तस्यैवेति ॥ त्वं तस्यैव नलस्यैव वा हस्तं किं न प्राप्स्यसि अपितु प्राप्स्यस्येवेति संभाव्यते । सर्वथा नलं न प्राप्नोषीति निश्चेतुं न शक्यते इति पूर्वश्लोकपरितोषद्योतको वाशब्दः । निश्चयाभावः कथमत आह—केन पुरुषेण विधेर्ब्रह्मणो मनोऽन्तःकरणं प्रविश्य दृष्टं ज्ञातं येन्मया नलो न प्राप्स्यत इति । अपि तु न केनापि । एवंसति कदाचित्तत्प्राप्तिसंभावनास्तीत्याह—तावदादौ त्वं न जातं पाणिग्रहणं विवाहो यस्याः सा एवंभूतासि वर्तसे । अधुनैव नैराश्यं न कर्तव्यमित्यर्थः । ननु योग्यतामन्तरेण तत्प्राप्तिः कथं स्यादित्यत आह—रूपस्य लावण्यस्य स्वरूपेणैवालंकारमन्तरेणैव स्वाभाविकोऽतिशयस्तस्याश्रयः स्थानमप्यसि । ईदृक्सौन्दर्येण नलप्राप्तिरपि तव संभाव्यत इति भावः ॥

अनुरूपत्वात्तस्या नलप्राप्तिं द्रढयति—

निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥ ४८ ॥

निशेति ॥ निशा रात्र्या शशाङ्कं चन्द्रं, शिवया गौर्या गिरीशं, श्रिया लक्ष्म्या हरिं विष्णुं योजयतः संयोगं प्रापयतो विधेरपि ब्रह्मणोऽपि स्वारसिकः स्वेच्छाकृतो प्रयासः प्रयत्नः परस्परं मिथो योग्ययोः समागमाय मेलनाय प्रतीतः ख्यातः । पूर्वोक्तदृष्टान्तेन ब्रह्मा स्वरसत एव परस्परं योग्ययोर्द्वयोः समागमं करोति कार्यवैचित्र्यदर्शनात्, अतो नलभैम्योरपि योगं विधास्यतीति भावः । स्वरसेन चरतीति स्वारसिकः । 'चरति' इति ठक् । [illegible]

१ 'अकृत्वा' इति साहित्यविद्याधरी । २ [illegible] इति साहित्यविद्याधरी ।

सख्य विश्वासस्थलं वदन्नदिशार्दूलमाह—

काभिर्न तत्राभिनवस्मराज्ञा विश्वासनिक्षेपवणिक्क्रियेऽहम् ।
जिह्रेति यन्नैव कुतोऽपि तिर्यक्कश्चित्तिरश्चस्त्रपते न तेन ॥ ४३ ॥

काभिरिति ॥ तत्र नलान्तःपुरे काभिः सुन्दरीभिरहं पक्षी अभिनवातिगोप्या स्मराज्ञा तस्या विश्वासेन निक्षेपवणिक्स्थापनिको वणिङ् क्रिये अपितु सर्वाभिरपि कृतः । कथा सकामरहस्यं मयि न कथ्यत इत्यर्थः । तत्र हेतुः—यत् यतो हेतोस्तिर्यक्पश्वादि कुतोऽपि कस्मादपि प्राणिनो नैव जिह्वेति लज्जते । तेन कारणेन कश्चिदन्योऽपि प्राणी तिरश्चोऽपि सकाशान्न त्रपते लज्जते । अतस्ता निर्लज्जाः सत्यो मदग्रेऽतिगोप्या अपि कामगोष्ठीः कुर्वन्तीति भावः । अन्यदपि गोप्यं विश्वासयोग्ये वणिजि निक्षिप्यते ॥

तासां परिहासोक्तमलीकमपि वचो नान्यस्मै कथयामीत्याह—

वार्तापि नासत्यपि सान्यमेति योगादरन्ध्रे हृदि यां निरुन्धे ।
विरञ्चिनानाननवादधौतसमाधिशास्त्रश्रुतिपूर्णकर्णः ॥ ४४ ॥

वार्तेति ॥ असत्यप्यलीकापि सा परिहासवार्तापि परिहासकथा अन्यं नैति । अन्यस्मै न कथयामीत्यर्थः । सा का—अरन्ध्रेऽरिभेदरहिते हृदि योगादुपायेन । प्रयत्नादित्यर्थः । यां वार्तां निरुन्धे नितरामावृणोमि । ध्यानादिसंबन्धाद्दोषरहिते हृदीति वा सदोषमेवान्तःकरणमन्यस्मा अन्यवार्तां कथयति, मदन्तःकरणं तु ध्यानादिना निर्दोषम्, अतो न कथयामीति भावः । वार्ताप्यन्यं नैति किमुतान्यत्, अलीकाप्यन्यं नैति किमुत सत्येति द्योतनार्थमपिशब्दौ । दुष्टप्रयुक्ता वार्ता जनहितार्थं कथनीयापि न कथ्यते । सरन्ध्रादेव बहिर्निर्गमः संभाव्यते इदं त्वरन्ध्रम् । अथ च—असती कुलटापि कार्मणादियोगान्नीरन्ध्रस्थाने निरुद्धाप्यन्यं पुरुषं नैतीत्युक्तिः । योगवत्त्वमेवाह—विरञ्चेर्ब्रह्मणो नानाननानि चत्वारि मुखानि तत्कृतो वादो वचनं तेन धौतं पवित्रीकृतं समाधिशास्त्रं योगशास्त्रं तस्य श्रुतिः श्रवणं तेन पूर्णौ कर्णौ यस्य । योगशास्त्राणि श्रुतयश्चेति वा । योगिनो हि यत्रकुत्रापि न जल्पन्ति तथा ब्रह्मण उपदेशादहमपि । त्वमपि वयःसंधिं विश्वासार्हे मयि विश्वस्य कामगोष्ठीं कुर्विति भावः । रुधेः स्वरितेत्त्वात्तङ् ॥

अतिशयितमभिलाषमुत्पादयितुं नलप्राप्तेर्दुर्लभत्वमाह—

नलाश्रयेण त्रिदिवोपभोगं तवानवाप्यं लभते बतान्या ।
कुमुद्वतीवेन्दुपरिग्रहेण ज्योत्स्नोत्सवं दुर्लभमम्बुजिन्या ॥ ४५ ॥

नलेति ॥ हे भैमि, तव त्वया अनवाप्यं दुष्प्रापमस्तरकर्तृकपक्षवीजनादिसेवादिरूपं त्रिदिवोपभोगं स्वर्गोपभोगं नलाश्रयेण कृत्वान्या नायिकानर्हापि लभते । बत खेदे हा कष्टं । प्राप्स्यते । वर्तमानसामीप्ये लट् । प्राप्नोति वा, बहुवल्लभत्वादिति वा । केव—अम्बुजिन्या कमलिन्या दुर्लभं दुष्प्रापं ज्योत्स्नोत्सवं चन्द्रिकाजन्यविकासादिरूपं महोत्सवमिन्दुपरिग्रहेण

---

१ 'अत्र रूपककाव्यलिङ्गावलंकारौ' इति साहित्यविद्याधरी। २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । 'अत्र वार्तानिरोधस्य विरिञ्चीत्यादिपदार्थहेतुकत्वात्काव्यलिङ्गभेदः' इति जीवातुः ।

चन्द्रालोकारेण कुमुद्वतीव यथा प्राप्नोति । अन्यस्या अनर्हत्वादेव मे खेदः । त्वमेवाङ्गत्वेन नलपरिग्रहस्त्वया संपाद्य इत्यर्थः । नहि तं विना वचनान्यं भजन इत्यर्थः । तव कृद्योगे 'कृत्यानाम्–' इति कर्तरि षष्ठी । अम्बुजिन्या खलर्थयोगे षष्ठीनिषेधात्कर्तरि तृतीया ॥

प्रकृतमुपसंहरन्नाह—

तन्नैषधानूढतया दुरापं शर्म त्वयास्मत्कृतचाटुजन्म ।
रसालवन्या मधुपानुविद्धं सौभाग्यमप्राप्तवसन्तयेव ॥ ४६ ॥

तदिति ॥ तत्तस्मात्त्वया नैषधेन नलेनानूढतयापरिणीतत्वेनास्माभिः कृतं यच्चाटु प्रियवचनं तस्माज्जन्म यस्य तच्छर्म सुखं दुरापं दुष्प्रापम् । नलाश्रयेणैव त्वयास्मत्प्रियवचनजनितं सुखं प्राप्तव्यं नान्यथेति भावः । कया किमिव—अप्राप्तवसन्तया रसालवन्या सहकारवाटिकया मधुपैर्भ्रमरैरनुविद्धं कृतं सौभाग्यं मकरन्दास्वादझांकारगुञ्जनादिलक्षणमिव यथा दुष्प्रापम् । पूर्वश्लोकेऽम्बुजिनीदृष्टान्तेन सर्वथा दुष्प्रापत्वं सूचितम्, इदानीमाम्रवनीदृष्टान्तेन कालान्तरे प्राप्स्यत इति सूच्यते । खलर्थयोगे 'न लोका–' इति षष्ठीनिषेधः ॥

तत्र नलप्राप्तिसंभावनायामधैर्यं न कर्तव्यमित्याह—

तस्यैव वा यास्यसि किं न हस्तं दृष्टं मनः केन विधेः प्रविश्य ।
अजातपाणिग्रहणासि तावद्रूपस्वरूपातिशयाश्रयश्च ॥ ४७ ॥

तस्यैवेति ॥ त्वं तस्यैव नलस्यैव वा हस्तं किं न प्राप्स्यसि अपितु लप्स्यस एवेत्यर्थः । सर्वथा नलं न प्राप्स्यसीति निश्चेतुं न शक्यते इति पूर्वोक्तपरितोषद्योतको वाशब्दः । निश्चयाभावः कथमत आह—केन पुरुषेण विधेर्ब्रह्मणो मनोऽन्तःकरणं प्रविश्य दृष्टं ज्ञातं मैन्या नलो न प्राप्स्यत इति । अपि तु न केनापि । एवंसति कदाचित्प्राप्तिसंभावनापीत्याह— तावदद्यापि त्वं न जातं पाणिग्रहणं विवाहो यस्याः सा एवंभूतासि वर्तसे । अधुनैव नैराश्यं न कर्तव्यमित्यर्थः । ननु योग्यताभावे प्राप्तिः कथं स्यादित्याशङ्क्याह—रूपस्य सौन्दर्यस्य स्वरूपेणैवालंकारमन्तरेणैव स्वाभाविकोऽतिशयस्तस्याश्रयः स्थानमप्यसि । तद्वशेनापि नलप्राप्तिरपि तव संभाव्यत इति भावः ॥

तदुपपादयन्नस्या नलप्राप्तिं द्रढयति—

निशा शशाङ्कं शिवया गिरीशं श्रिया हरिं योजयतः प्रतीतः ।
विधेरपि स्वारसिकः प्रयासः परस्परं योग्यसमागमाय ॥ ४८ ॥

निशेति ॥ निशा रात्र्या शशाङ्कं चन्द्रं, शिवया गौर्या गिरीशं, श्रिया लक्ष्म्या हरिं विष्णुं योजयतः संयोगं प्रापयतो विधेरपि ब्रह्मणोऽपि स्वारसिकः [illegible] प्रयासः प्रयत्नः परस्परं मिथो योग्ययोः समागमाय मेलनाय प्रतीतः ख्यातः । [illegible] स्वत एव परस्परं योग्ययोरेव समागमं करोति [illegible], अतो नलमपि [illegible] योजयिष्यतीति भावः । स्वरसेन प्रवर्तत इति स्वारसिकः । 'चरति' इति ठक् । [illegible] [illegible] [illegible] इति [illegible] [illegible] [illegible]

---

१ [illegible] इति सर्वंकषिकापाठः । २ [illegible] इति सर्वंकषिकापाठः ।

स्वागतादिषु दर्शनात्स्वार्थिकस्वाभाविकादिभाष्यकारप्रयोगदर्शनाच्च शुद्धिरेवेति बोध्यम्। एव-मन्यत्रापि द्रष्टव्यम् ॥

अन्यनिराकरणे न नलस्यैव त्वं योग्येत्याह—

वेलातिगस्त्रैणगुणाब्धिवेणिर्न योगयोग्यासि नलेतरेण।
संदर्भ्यते दर्भगुणेन मल्लीमाला न मृद्वी भृशकर्कशेन ॥ ४९ ॥

वेलेति ॥ वेलां मर्यादामतिक्रम्य गच्छति एवंभूतो यः स्त्रैणः स्त्रीसंबन्धी गुणाब्धिः सौन्दर्यादिगुणसमुद्रस्तस्य वेणिः प्रवाहरूपा समस्तसौन्दर्यादिगुणभाजनं त्वं नलादितरेण वरेण सह योगयोग्या संबन्धयोग्या नासि न भवसि। यतः—मृद्वी मल्लीमाला पुष्पमाला भृशकर्कशेनातिकठिनेन दर्भगुणेन कुशनिर्मितदोरकेण न संदर्भ्यते ग्रथ्यते। मल्लीमालायाः कुशदोरकेण गुम्फनमनुचितं तथा तव नलव्यतिरिक्तेन योग इति भावः। 'वेणिर्नदीप्रवाहे कचोच्चये' इति क्षीरस्वामी। स्त्रीसंबन्धिनः स्त्रैणाः 'स्त्रीपुंसाभ्यां–' इति नञ्। वेणीति संबु-द्ध्यन्तं वा तत्र नद्यन्तत्वाद्ध्रस्वः। मृद्वी 'वोतो गुण–' इति ङीप् ॥

तस्या नलप्राप्तौ प्रकारान्तरेण हेतुमाह—

विधिं वधूसृष्टिमपृच्छमेव तद्यानयुग्यो नलकेलियोग्याम्।
त्वन्नामवर्णा इव कर्णपीता मयास्य संक्रीडति चक्रिचक्रे ॥ ५० ॥

विधिमिति ॥ अहं तस्य विधेर्यानं विमानं तस्य धुर्यो भारवाहकः सन् नलकेलेर्नल-क्रीडाया योग्यामुचितां वधूसृष्टिं नलक्रीडायोग्या का त्वया निर्मितेति स्त्रीसृष्टिं विधिं ब्रह्माण-मपृच्छमेव पृष्टवानेव। तेन किमुत्तरितमित्यत आह—नलकेलियोग्या भैमी रचितेति तव नाम्नो वर्णा इव कर्णाभ्यां पीता उत्तरत्वेन मया श्रुताः। सम्यगेव किमिति न श्रुता इत्यत आह—कस्मिन्सति—अस्य ब्रह्मणश्चक्रिणो रथस्य चक्रे संक्रीडति कूजति सति। रथाङ्ग-कूजनेन सम्यङ्नाकर्णीति भावः। यदि निश्चयेनावक्ष्यत्तदा स्वत एव कार्यसिद्धेस्तदर्थं स्वस्मि-न्सादरा नाभविष्यदितीवशब्दप्रयोगः। चक्रचक्रे हंससमूहे इति क्वचित्। युग्यः 'तद्वहति–' इति यत्। संक्रीडति 'समोऽकूजने' इति प्रतिषेधाच्छर्ता ॥

ब्रह्मणः स्ववचनान्यथाकरणे बाधकमाह—

अन्येन पत्या त्वयि योजितायां विज्ञत्वकीर्त्या गतजन्मनो वा।
जनापवादार्णवमुत्तरीतुं विधा विधातुः कतमा तरीः स्यात् ॥ ५१ ॥

अन्येनेति ॥ वा अथवा। निश्चये वा। त्वयि अन्येन नलातिरिक्तेन पत्या भर्त्रा सत्यां विज्ञत्वकीर्त्या सर्वज्ञत्वयशसैव गतमतिक्रान्तं जन्म यस्य येन वा एवंविधस्य ... एवार्णवस्तं सर्वज्ञेन ब्रह्मणेदमनुचितं कथमकारीति लोकापवादसमुद्रमुत्त-... विधा प्रकारस्तरीर्नौका स्यात्। अपितु न कापीत्यर्थः। सकलेनापि जन्मना यत्स-... ...यथाकरणे तदैव गमिष्यतीति भिया नलेनैव योजनीयेति

'अत्र रूपकसमदृष्टान्तालंकारः' इति साहि-...
...लंकार। २ 'रथाङ्गसमूहे' इति तिलकजीवा-...
४ ... इति साहित्यविद्याधरी।

भावः । समुद्रं तरीतुं काचिन्नौर्भवति, जनापवादार्णवं तरीतुं न चापीति भावः । 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः । उत्तरीतुम् 'वॄतो वा' इति दीर्घः । तरन्त्यनया तरीः 'अवितॄस्तृतन्त्रिभ्य ईः' ॥

अभिप्रायं ज्ञातुमुपसंहरन्नाह—

आस्तां तदप्रस्तुतचिन्तयालं मयासि तन्वि श्रमितातिवेलम् ।
सोऽहं तदागः परिमार्ष्टुकामः किमीप्सितं ते विदधेऽभिधेहि ॥ ५२ ॥

आस्तामिति ॥ हे भैमि, तन्नलवर्णनं तव तद्योग्यत्वप्रतिपादनं चास्तां तिष्ठतु । न कर्तव्यमित्यर्थः । यतः—अप्रस्तुतस्य चिन्तया कथयालम् । निष्प्रयोजनत्वात् । हे तन्वि, मया त्वमतिवेलं भृशं श्रमितासि । सोऽहं तदागः अपराधं परिमार्ष्टुकामोऽपनेतुकामः सन् तव किमीप्सितं कं मनोरथं विदधे करोमि अभिधेहि ब्रूहि । अप्रस्तुतचिन्तयेति वारणार्थयोगे तृतीया ॥

इतीरयित्वा विरराम पत्री स राजपुत्रीहृदयं बुभुत्सुः ।
ह्रदे गभीरे हृदि चावगाढे शंसन्ति कार्यावतरं हि सन्तः ॥ ५३ ॥

इतीति ॥ राजपुत्र्या भैम्या हृदयं नलेऽनुरागो विद्यते न वेति मनो बुभुत्सुर्ज्ञातुमिच्छुः स पत्री हंस इति पूर्वोक्तमीरयित्वोक्त्वा विरराम तूष्णीमभूत् । ननु नलानुरागमस्या वेद, तथापि नलेऽनुरक्ता नवेति प्रकटं किमिति नोक्तवानित्यत आह—हि यस्माद्गभीरे [illegible] पंयुक्ते ह्रदे जलाशये, गूढाभिप्राये हृदि चावगाढ आलोडिते, ज्ञाते च सति सन्तः पण्डिताः कार्यावतरं करणीयं तरणपर्यं, कार्यस्य प्रस्तावं च शंसन्ति कथयन्ति । गम्भीरे [illegible] अत्रोत्तरीतव्यमिति तरणमार्गं यथा न कोऽपि कथयति तथा [illegible] कार्यविशेषप्रस्तावं न करोति । अतस्तदभिप्रायं ज्ञात्वा तस्यां नलानुरागप्रकाशनं [illegible] नलानुरागमप्रकाश्यैव तूष्णीमभूदित्यर्थः । राजपुत्रीति [illegible] । विररामेति 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । [illegible] 'न लोका—' इति [illegible] ॥

किंचित्तिरश्चीनविलोलमौलिर्विचिन्त्य वाच्यं मनसा मुहूर्तम् ।
पतत्रिणं सा पृथिवीन्द्रपुत्री जगाद वक्त्रेण तृणीकृतेन्दुः ॥ ५४ ॥

किंचिदिति ॥ सा पृथिवीन्द्रपुत्री भैमी मुहूर्तं [illegible] वाच्यं वक्तव्यं विचिन्त्य विचार्य पतत्रिणं हंसं जगाद । [illegible] किंचित्तिरश्चीनो वक्रः विलोलश्चलो मौलिर्यस्याः सा । [illegible] [illegible] ॥

[illegible]—

धिक् चापले [illegible] ।
[illegible] ॥ ५५ ॥

[illegible]

[illegible]

धिगिति ॥ हे हंस, चापले चञ्चलत्वविषये यद् वत्सिमवात्सल्यं वत्सस्य बालस्य भावो वत्सिमा बालत्वं तेन यद्वात्सल्यं सस्नेहत्वं बाल्येन चापलविषये यत्प्रीतिमत्त्वम् चापल्याङ्गीकरणमिति यावत्। तद् धिङ्निन्द्यमनुचितम्। यतः—यस्य चापलस्य प्रेरणाभियोगाद्यदधीनतयोत्तरलीभवन्त्या अतिशयेन चञ्चलीभवन्त्या मया पश्चाल्लगित्वा तटस्थ उदासीनस्त्वमुपद्रुतः पीडितोऽसि। कयेव—समीरसम्बन्धाद्वायुसंबन्धाच्चलीभवन्त्या नीरभङ्ग्येव। तरङ्गरूपयोदकरचनया तटस्थः कूलस्थो यथोपद्रूयते। निरपराधस्त्वं पश्चाल्लगित्वा मया पीडितः, अतोऽहमनुचितकारिण्येवेति भावः। वत्सशब्दात्पृथ्वादित्वादिमनिच्। तस्मादेव 'वत्सांसाभ्याम्—' इत्यभिलापवति लच्। तथाच वत्सल इति स्नेहवानुच्यते ॥

आत्मनिन्दापूर्वकं हंसस्तुतिमाह—

आदर्शतां स्वच्छतया प्रयासि सतां स तावत्खलु दर्शनीयः।
आगः पुरस्कुर्वति सागसं मां यस्यात्मनीदं प्रतिबिम्बितं ते ॥ ५६ ॥

आदर्शेति ॥ हे हंस, दर्शनीयोऽतिरमणीयस्त्वं खलु निश्चयेन, उत्प्रेक्षे वा। स्वच्छतया निष्कपटतया कृत्वा सतां साधूनां तावत्प्रथममादर्शतां दृष्टान्ततां प्रयासि प्राप्नोषि। किंवदयं निष्कपट इति प्रश्ने। त्वमेव प्रथमं दृष्टान्तयोग्योऽसीत्यर्थः। अथ च निर्मलतया दर्पणतुल्योऽसि। दर्पणोऽपि सतामवलोकनीयः, श्रीकामैः प्रातरवलोक्यते च। निष्कपटतामादर्शतां च समर्थयते—पश्चाल्लगनात्सागसं सापराधां मां पुरस्कुर्वति 'मयाति तन्वि श्रमिता—' इत्यादिवचनान्मांप्रति प्रियभाषिणि यस्य तवात्मनि स्वरूपे इदमागः तटस्थपीडनलक्षणो ममापराधः प्रतिबिम्बितः 'सोऽहं तदागः' इति वचनात्त्वया मदपराधः स्वीयत्वेनैव स्वीकृत इति सतां स्वभावोऽयम्। अन्यापराधं स्वात्मन्यारोपयन्ति। खलुः किमर्थे। आदर्शतां प्रयासि किम्। ततोऽप्यधिकः। आदर्शे पुरो यथास्थितं वस्तु प्रतिफलति, त्वयि तु सापराधे वस्तुनि पुरःस्थितेऽप्यपराधलक्षणो धर्मः प्रतिबिम्बितो, न तु सापराधो धर्मीत्यादर्शादधिकत्वादाश्चर्यरूपोऽसीति[2] ॥

स्वापराधं निश्चित्य तत्क्षमां प्रार्थयते—

अनार्यमप्याचरितं कुमार्या भवान्मम क्षाम्यतु सौम्य तावत्।
हंसोऽपि देवांशतयासि वन्द्यः श्रीवत्सलक्ष्मेव हि मत्स्यमूर्तिः ॥ ५७ ॥

अनार्यमिति ॥ हे सौम्य सुन्दर, भवान्कुमार्या बालाया ममानार्यमनुचितमप्याचरितमाचरणं तावत्प्रथमं क्षाम्यतु सहताम्। ईप्सितप्रश्नोत्तरं तु पश्चाद्वक्तव्यम्। अज्ञस्य ह्यपराधः क्षन्तव्य इति कुमारीपदम्। राजपुत्र्याः पक्षिणि मयि प्रार्थनमनुचितमित्यत आह—हंसोऽपि त्वं देवांशतया वन्द्योऽसि पूज्योऽसि। देवांशत्वं ब्रह्मवाहनत्वान्यथानुपपत्त्या। ततः प्रार्थ्यस इति भावः। क इव—श्रीवत्सो लक्ष्म चिह्नं यस्य स मत्स्यमूर्तिर्मत्स्यस्वरूप इव। श्रीवत्सचिह्नाद्देवांशो मत्स्योऽपि पूज्यते तथा त्वम्। 'सौम्यं तु सुन्दरे' इत्यमरः। देवताधिकारे सोमाट्ट्यणो विधानात् सौम्य इति चिन्त्यम्। सोमस्य चन्द्रस्येयं सौमी सुधा तामर्हति दण्डादित्वाद्यप्रत्यये सौम्य देवतुल्य इत्यर्थ इति समर्थनीयम्[3] ॥

---

१ 'अत्रोपमा' इति साहित्यविद्याधरी। २ 'अत्रार्थान्तरं क्षेपश्च' इति साहित्यविद्याधरी। ३ 'अत्र काव्यलिङ्गमुपमा च' इति साहित्यविद्याधरी।

वीणाक्वणिताभ्यामपि तद्वाक्कोमला सरला चेति भावः। 'मृद्वीका गोस्तनी द्राक्षा' इत्यमरः। मृद्वीका 'वोतो गुणवचनात्' इति ङीषन्तात्संज्ञायां कनि 'केऽणः' इत्यस्य संज्ञापूर्वकविधित्वा-द्ध्रस्वत्वाभावः। घुष इत्यप्रज्ञानार्थत्वाद् 'घुषिरविशब्दने' इति निष्ठाया इण्निषेधः। घो(षु)-षिमनिटं केचित्पठन्ति ॥

मन्दाक्षमन्दाक्षरमुद्रमुक्त्वा तस्यां समाकुञ्चितवाचि हंसः।
तच्छंसिते किंचन संशयालुर्गिरा मुखाम्भोजमयं युयोज ॥ ६१ ॥

मन्दाक्षमिति(क्षेति) ॥ अयं हंसः तच्छंसिते तस्या वचने अप्रकटत्वात्पोक्तत्वादिव किंचन संशयालुः संदिहानः सन्मुखाम्भोजं प्रशस्तं मुखं गिरा वाचा युयोज। वदति स्मेत्यर्थः। कस्यां सत्याम्—तस्यां भैम्यां मन्दाक्षेण लज्जया मन्दा स्वल्पाक्षरमुद्रा वर्णवि-न्यासो यस्यां क्रियायां तथा उक्त्वा समाकुञ्चिता वाग्यया तूष्णींभूतायां सत्याम्। मुखाम्भो-जम् 'प्रशंसावचनैश्च' इति समासः ॥

करेण वाञ्छेव विधुं विधर्तुं यमित्थमात्थादरिणी तमर्थम्।
पातुं श्रुतिभ्यामपि नाधिकुर्वे वर्णं श्रुतेर्वर्ण इवान्तिमः किम् ॥ ६२ ॥

करेणेति ॥ हे भैमि, करेण विधुं चन्द्रं विधर्तुं ग्रहीतुं वाञ्छेव स्पृहेव नतु तात्त्विकी स्पृहा। इत्थमनेनैव गोप्याकारेण आदरिणी आदरयुक्ता, अदरिणी निर्भया अकम्पयुक्ता वा त्वं यमर्थं प्रयोजनमात्थ ब्रूषे अहं तमर्थं श्रुतिभ्यां कर्णाभ्यां पातुं सादरं श्रोतुमपि किं नाधि-कुर्वे नाधिकारीभवामि। कर्तुं यद्यपि न समर्थस्तथापि श्रोतुं शक्त एवेत्यपिशब्दार्थः। अथ च तमर्थं कर्तुमप्यधिकारी भवामि, किंपुनः श्रोतुमित्यपिशब्दार्थो वा। अंतःकरणे ज्ञात एव(मेव) श्रोतुमपि नाधिकुर्वे, अपितु अधिकुर्व एवेति वा। कः किमिव—अन्तिमो वर्णः शूद्रः श्रुतेर्वेदस्य वर्णमक्षरमिव। वेदाक्षरश्रवणे शूद्रस्याधिकारो नास्ति तथा मम नेति भावः। आत्थेति भूतेपि 'वर्तमानसामीप्ये—' इति वर्तमानवत्प्रत्ययः। अन्तिमः 'अन्ताच्च' इति वक्तव्याड्डिमच् ॥

अवाप्यते वा किमियद्भवत्या चित्तैकपद्यामपि विद्यते यः।
यत्रान्धकारः किल चेतसोऽपि जिह्मेतरैर्ब्रह्म तदप्यवाप्यम् ॥ ६३ ॥

अवाप्यत इति ॥ हस्तेन चन्द्रधारणवद्दुष्प्रापत्वं यदुक्तं तत्र किंचिदित्याह—योऽर्थः चित्तैकपद्यामन्तःकरणलक्षणे क्रमगम्येऽतिसूक्ष्मे मार्गेऽपि विद्यते स भवत्यावाप्यते प्राप्यते। वा निश्चये। चन्द्रधारणदृष्टान्तेन यत्तस्यार्थस्य दुष्प्रापत्वमियत्किम्। इयद्गौरवं किमर्थम्। तत्र कार्यमित्यर्थः। अथ च—परचित्तगोचरो विषयः सुज्ञेन ज्ञायते, इयद्गोपनं तस्य किमर्थम्। स

१ 'वचनग्रहणं रूढशब्दपरिग्रहार्थम्। ये तु यौगिकाः प्रशस्तशोभनरमणीयादयः, ये विशेषवचनाः [illegible], ये च गौण्या वृत्त्या प्रशंसां गमयन्ति 'सिंहो माणवकः' इत्यादयः, ते सर्वे व्युदस्यन्ते' [illegible] मनोरमायामुक्तत्वेन चिन्त्योऽत्रानेन समासः। तस्मात् 'उपमितं व्याघ्रादिभिः—' इति समासो [illegible]। २ 'अत्रानुप्रासससमासोपमालंकारः' इति साहित्यविद्याधरी। ३ 'अत्रानुप्रासोपमे' इति साहित्यविद्याधरी। ४ 'अर्थाप्यते' इति पाठमाश्रित्य हे भैमि, भवत्या किं वा इयदेतावद्यथा तथा अर्थाप्यते किमर्थमयमर्थो द्विजराजपाणिग्रहवदतिदुर्लभत्वेनाख्यायत इत्यर्थः। अर्थशब्दात् 'तदाचष्टे' इत्यर्थे णिच् 'अर्थवेदसत्यानामापुग्वक्तव्यः' इत्यापुगागमः' इति जीवातावभिहितं तिलकसंमतं च।

मया ज्ञात इत्यर्थः । एकमार्गे स्थितं वस्तु सर्वैरपि ज्ञायते । एतद्दृष्टान्तेन द्रढयति—किलेति श्रुतौ । यत्र ब्रह्मणि चेतसोऽप्यन्धकारः 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इति श्रुतेः । यन्मनोगोचरो न भवति तदपि स्वप्रकाशं ब्रह्म जिह्मेतरैरनल्पैरवाप्यं प्राप्यं प्राप्यत इत्यर्थः । किं पुनर्मनोगोचरः । ततश्च सूक्ष्मदर्शिना मया तवाभिप्रायो ज्ञात एव । तया किलेति गोप्यत इति भावः । 'वर्तन्येकपदीति च', 'जिह्मस्तु कुटिलेऽलसे' इत्यमरः । एकपदी 'संख्यासुपूर्वस्य' इत्यन्तलोपे 'पादोऽन्यतरस्याम्' इति ङीपि पदादेशः । अवाप्यम् 'शकि लिङ् च' इति कृत्यः ॥

ननु कथमजानन्नेवाभिमानेन ज्ञातमिति वदसीत्याशङ्कायामाह—

ईशाणिमैश्वर्यविवर्तमध्ये लोकेशलोकेशयलोकमध्ये ।
तिर्यञ्चमप्यञ्च मृषानभिज्ञरसज्ञतोपज्ञसमज्ञमज्ञम् ॥ ६४ ॥

ईशेति ॥ ईशस्येश्वरस्याष्टविधैश्वर्यमध्येऽणिमलक्षणं यदैश्वर्यं तस्य विवर्तस्तात्त्विकोऽन्यथाभावस्तस्त्वतोऽणिमैश्वर्यमेव जातो मध्यो यस्यास्तत्संबुद्धिः हे कृशोदरि, त्वं लोकेशो ब्रह्मा तस्य लोकेशया लोकवर्तिनो लोका जनास्तेषां मध्येऽज्ञं मूर्खं तिर्यञ्चमपि मामेवंभूतं अञ्च जानीहि, पूजयवा । किंभूतं माम्—मृषा असत्यं तस्यानभिज्ञा अज्ञातारः सत्यवादिनो रसज्ञाः सहृदयास्तेषामुभयेषां भावस्तत्ता सत्यवादिता, सहृदयता च तद्विषये उपज्ञा आद्यं ज्ञानं यस्य एवंविधश्चासौ समज्ञश्च । समज्ञशब्दस्य सर्वज्ञशब्दपर्यायत्वात्सर्वज्ञत्वमेवंविधस्वरूपं मां अज्ञमलोकज्ञमिव अहृदयं मूर्खं च यथा तवेच्छा तथा जानीहीत्यर्थः । सत्यवादिनां सहृदयानां सर्वज्ञानां च मध्ये प्रथमगणनीयोऽहं मिथ्याभाष्यहृदयो मूर्खश्च कथं स्यामिति भावः । मृषानभिज्ञा सत्यवादिनो रसज्ञा जिह्वा येषां तेषां भावः सत्यवादिता, उपज्ञायत इत्युपज्ञा आद्यं ज्ञानं मृषानभिज्ञरसज्ञताया उपज्ञा मृषानभिज्ञरसज्ञतोपज्ञं, तेन समज्ञा कीर्तिर्यस्य । एवं सत्यवादिता प्रथमं कस्मादुत्पन्नेति जिज्ञासायां तस्याः प्रथमोत्पत्तिकारणत्वेनाहमेव ख्यात इत्येवंरूपमज्ञं मां जानीहीति वा । लोकेशय इति 'अधिकरणे शेतेः' इत्यचि 'शयवासवासिष्व—' इति सप्तम्या अलुक् । रसज्ञतोपज्ञ इत्यत्र (पक्षे) 'आतश्चोपसर्गे' इत्यङि 'उपज्ञोपक्रमं—' इत्यादिना नपुंसकत्वम् । समः सर्वैर्ज्ञायते इति समज्ञा कीर्तिः 'यजयेॆ कविधानम्' इति कः ॥

सत्यवादित्वमेव प्रकटयति—

मध्ये श्रुतीनां प्रतिवेशिनीनां सरस्वती वासवती मुखे नः ।
ह्रियेव ताभ्यश्चलतीयमद्धा पथाद्य सत्सङ्गगुणेन नद्धा ॥ ६५ ॥

मध्ये इति ॥ हे भैमि, नोऽस्माकं मुखे वर्तमाना सरस्वती वाणी प्रतिवेशिनीनां निकट- गृहवर्तिनीनां श्रुतीनां वेदानां मध्ये वासवती स्थितिमती [illegible] ह्रियेव अद्धा निश्चयेन अपथादपथं कुमार्गं प्राप्य । [illegible] । न चलति न व्यभिचरति । यतः—सता सह सङ्गः स एव गुणस्तेन नद्धा संबद्धा । [illegible] न व्यभिचरति । वेदसाहचर्यान्मृषापि [illegible] । 'सर्वे [illegible] [illegible]' । [illegible] न चलति न [illegible], किंतु [illegible] वा । '[illegible]-

---

१ '[illegible]' इति [illegible] । '[illegible]' । [illegible] [illegible] इति [illegible] । २ '[illegible]' । [illegible] इति [illegible] । ३ '[illegible]' इति [illegible] । ४ '[illegible]' [illegible] ।

ल्लिङ्गस्य' इति 'अपथं नपुंसकम्' इत्येतन्नाश्रीयते। अथवा पथिशब्दपर्यायः पथशब्दोऽकारान्तोऽप्यस्ति। अथवा 'अद्धापथात्' इत्येकमेव पदम्। अद्धापथात्सत्यमार्गान्न चलतीत्यर्थः। अथ च—सञ्शोभनः सङ्गः संधिर्यस्य तेन गुणेन दृढया रशनया बद्धा काचिद्यथा न चलति तथेयमपि। मद्वाण्याः श्रुतयः प्रतिवेशिन्यो भवन्ति। अत एव तत्सदृशमेव व्यवहरति नान्यथा॥

अथ त्वमभिप्रायं कथयेति प्ररोचनार्थं स्वसामर्थ्यं द्योतयति—

पर्यङ्कतापन्नसरस्वदङ्कां लङ्कां पुरीमप्यभिलाषि चित्तम्।
कुत्रापि चेद्वस्तुनि ते प्रयाति तदप्यवेहि स्वशये शयालु॥ ६६॥

पर्यङ्केति॥ हे भैमि, ते चित्तं मनो लङ्कां पुरीमप्यभिलाषि द्रष्टुं गन्तुं वा अभिलषुकं सत् कुत्राप्यन्यत्र कस्मिंश्चिल्लङ्कायाः सकाशाददतितरां दुष्प्रापे वस्तुनि विषये चेत्प्रयाति गच्छति त्वं तदपि तदुभयमपि स्वशये स्वहस्त एव शयालु विद्यमानमवेहि जानीहि। कुत्रापि वस्तुनि अभिलाषि तव चित्तं लङ्कायां विद्यमानवस्तुप्राप्त्यर्थं लङ्कामपि प्रयाति तदपीति वा योजना। दुष्प्रापवस्तुनः साधकोऽहमेवेति तत्कथयेति भावः। किंभूतां लङ्काम्—सरस्वतः समुद्रस्याङ्को मध्यः। परितः सर्वदिक्षु अङ्कतां चिह्नतां परिवेष्टनं वा आपन्नः प्राप्तः सरस्वदङ्को यस्याः सा ताम्। पर्यङ्कतां मञ्चताम्। समुद्राङ्के सुखेन तिष्ठतीत्यर्थः। पर्यङ्कतां योगपट्टत्वं प्राप्तः समुद्रोऽङ्कचिह्नं यस्या इति वा। पर्यङ्कतां वृसीत्वं वा समुद्रमध्ये तिष्ठतीत्यर्थ इति वा। सर्वथा लङ्काया दुष्प्रापत्वं सूचितम्। या एवंविधा दुष्प्रापा तामपि हस्तगतामवेहि, किंपुनरन्याम्। कुत्रापि कोः पृथिव्याः त्राणं त्राः तामाप्नोतीति कुत्राप्। 'क्विप् च' इति क्विप्, तस्मिन्राजलक्षणे वस्तुनि वा। पर्यङ्क इति विकल्पत्वाल्लत्वाभावः। अपेः पदार्थे संभावनायां समुच्चये वा कर्मप्रवचनीयत्वाल्लङ्कामिति द्वितीया। अभिलाषस्य (पिशब्दस्य) गम्यादिपाठाद्वा। तदिति सा च लङ्का च तच्च वस्तु तत् 'नपुंसकमनपुंसकेन—' इत्येकशेषः पाक्षिकमेकत्वं च॥

इतीरिता पत्त्ररथेन तेन ह्रीणा च हृष्टा च बभाण भैमी।
चेतो नलङ्कामयते मदीयं नान्यत्र कुत्रापि च साभिलाषम्॥ ६७॥

इतीति॥ तेन पत्त्ररथेन पक्षिणा इति पूर्वोक्तप्रकारेणेरितोक्ता ह्रीणा निजाभिलाषकथनप्रस्तावेन लज्जिता स्वाभिलाषस्य प्रापकोऽहमिति तेनोक्तत्वाद्धृष्टा आह्लादयुक्ता। विस्मितेति यावत्। भैमी इति बभाणावोचत्। इति किम्—मदीयं चेतो लङ्कां न अयते प्राप्नोति। अभिलष्यतीत्यर्थः। अन्यत्र चान्यत्रापि कुत्रापि राजनि वा न च नैव साभिलाषम्। अथ च—नलं नलनामानं राजानं कामयते। तदतिरिक्तेऽन्यवस्तुनि नैव साभिलाषमिति श्लिष्टमवोचत्। 'तर (पत)त्पत्त्ररथाण्डजाः' इत्यमरः। ह्रीणा 'नुदविद—' इति निष्ठानत्वम्। अप्राप्यवस्तुप्रापकोऽहमिति हंसोक्तिं श्रुत्वा हृष्टा सरोमाञ्चा। ततश्च हृषेर्लोमहर्षविषयत्वाद् 'हृषेर्लोमसु' इत्येवेड्विकल्पः। एवं सर्वत्र ज्ञेयम्। 'क्ङिति च' इत्यनेनेग्लक्षणयोरेव वृद्धिगुणयोः प्रतिषेधात्कामयत इत्यत्र त्वनिग्लक्षणत्वादप्रतिहतप्रसरा वृद्धिरिति ज्ञेयम्॥

---

१ 'कृतसमासान्तपथरूपग्रहणात्पचाद्यजन्तपथशब्देन समासे पुंस्त्वमेव'। तथा च त्रिकाण्डशेषः— 'वाटः पथश्च मार्गश्च' इति मुकुटः। २ 'अत्र समासोक्त्युपमे' इति साहित्यविद्याधरी। ३ 'अत्र समासोक्तिः' इति साहित्यविद्याधरी। ४ 'अत्र श्लेषः' इति साहित्यविद्याधरी।

महीति ॥ स नैषधेन्दुर्निषधदेशोद्भवजनानामिन्दुराह्लादकः खलु यस्मान्मह्यां महेन्द्र इव। तत्तस्मान्मद्विधेन विश्वासेन पृथग्जनेनेव नीचजनेनेव स नल इत्यमेव बालाहृदयचञ्चलत्वसमर्थनप्रकारेण सांशयिकं संदेहचञ्चलमीदृक् नलाभिलापलक्षणं प्रयोजनं कार्यं, इत्यमेवाविचार्यैव वा कथं बोधनीयः केन प्रकारेण ज्ञापनीयः। यथाविश्वासेन मूर्खेण भयं त्यक्त्वा राज्ञोऽग्रेऽविचार्य यत्किंचिदुच्यते तथा मया निश्चितं वक्तुं न शक्यत इत्यर्थः। इत्यमेव बालया त्वयाहं यथा बोधितस्तथा मया स कथं बोध्य इति वा। 'पृथग्जनः स्मृतो नीचे मूर्खे च' इति विश्वः। मह्यां महेन्द्र इव 'सप्तमी' इति योगविभागात्समासः। षष्ठीसमासो वा। 'गतिबुद्धि-' इति कर्मत्वे बोधनीय इति कर्मणि कृत्यः॥

पूर्वोक्तमेव द्रढयति—

पितुर्नियोगेन निजेच्छया वा युवानमन्यं यदि वा वृणीषे।
त्वदर्थमर्थित्वकृति प्रतीतिः कीदृङ्मयि स्यान्निषधेश्वरस्य॥ ७२॥

पितुरिति ॥ पितुर्नियोगेन आज्ञया निजेच्छया वा स्वेच्छया त्वं यद्यन्यं नलव्यतिरिक्तं युवानं तरुणं वृणीषे तर्हि त्वदर्थं तुभ्यं त्वया भैमी परिणेतव्या इति अर्थित्वकृति याच्ञाकारिणि मयि निषधेश्वरस्य नलस्य कीदृक्कीदृशी प्रतीतिर्विश्वासः स्यात्। प्रतारकोऽयमिति तस्य बुद्धिः स्यात्। निश्चयं विना तस्याग्रे वक्तुं न युक्तमित्यर्थः। यद्यर्थे यदि वा इति। कीदृग्वा इति वा वाशब्दो योजनीयः। अर्थित्वकृति। कृञः क्विपि तुक्॥

अथ संदिग्धे कार्ये त्वयापि नाहं नियोज्य इत्याह—

त्वयापि किं शङ्कितविक्रियेऽस्मिन्नधिक्रिये वा विषये निधातुम्।
इतः पृथक्प्रार्थयसे तु यद्यत्कुर्वे तदुर्वीपतिपुत्रि सर्वम्॥ ७३॥

त्वयेति ॥ त्वयापि शङ्कितविक्रिये संभावितवरान्तरवरणलक्षणविकारेऽस्मिन्विवाहलक्षणे विषये निधातुं योजयितुं किंवा किमित्यहमधिक्रिये अधिकारिक्रिये। अस्मिन्नधिकारे नाहं नियोज्य इत्यर्थः। हे उर्वीपतिपुत्रि, इतो विवाहलक्षणकार्यात्पृथगन्यद्यद्यत्प्रार्थयसे याचसे, अहं तत्सर्वमपि कुर्वे साधयेयम्। प्रार्थयसे इति कुर्वे इति च वर्तमानसामीप्ये लट्॥

श्रवःप्रविष्टा इव तद्गिरस्ता विधूय वैमत्यधुतेन मूर्ध्ना।
ऊचे ह्रियोऽपि श्लथितानुरोधा पुनर्धरित्रीपुरुहूतपुत्री॥ ७४॥

श्रव इति ॥ धरित्रीपुरुहूतपुत्री पृथ्वीन्द्रपुत्री पुनरूचे। किं कृत्वा—श्रवः कर्णं प्रविष्टाः कर्णान्तर्गतास्ताः पूर्वोक्तास्तद्गिरो हंसवाणीः वैमत्येनासंमत्या धुतेन कम्पितेन मूर्ध्ना विधूयेव निरस्येव। किंभूता— ह्रियोऽपि लज्जाया अपि श्लथीकृतः (अनुरोधः) अनुबन्धोऽनुसंधानं यया। श्रवःप्रविष्टा इवेति केचित्। तदा प्रतिकूलत्वादनङ्गीकारेण वस्तुगत्या श्रवणप्रविष्टा न भवन्तीत्यतः प्रविष्टा इवेत्युक्तम्। अन्येनापि कर्णप्रविष्टस्य कीटादेर्निराकरणार्थं शिरश्चालनं क्रियते। या लज्जा सर्वथा त्यक्तुं न शक्या सापि त्यक्तेत्यपिशब्दार्थः। वैमत्यम्। दृढादिपाठाद्भावे ष्यञ्। कर्मधारयाद्वा स्वार्थे ज्ञापकात्। नूनो नित्त्वाद्वचेस्तङ्॥

---

१ 'अत्रोपमाकाव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी। २ 'अत्रानुप्रासो नियतादशावयवं यमकं वा' इति साहित्यविद्याधरी। ३ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी।

दृष्टान्तद्वयेन पितृकर्तृकनलान्यस्वकर्तृकपरिणयं निराकरोति श्लोकद्वयेन—

मदन्यदानं प्रति कल्पना या वेदस्त्वदीये हृदि तावदेषा ।
निशोऽपि सोमेतरकान्तशङ्कामोंकारमग्रेसरमस्य कुर्याः ॥ ७५ ॥

मदन्यदानमिति ॥ मम अन्यस्मै नलव्यतिरिक्ताय वराय पितृकर्तृकं दानं प्रति उद्दिश्य 'पितुर्नियोगेन–' इत्यादिर्या कल्पना शङ्का तर्कः एषा तावत्कल्पना त्वदीये हृदि वेदः वेद इव प्रमाणभूता इति चेत्तर्हि त्वं निशोऽपि रात्रेरपि सोमाचन्द्रादितरोऽन्यः कान्तः प्रियस्तस्य शङ्कां अस्य वेदस्याग्रेसरं पुरोवर्तिनमोंकारं कुर्याः अङ्गीकुरु । वेदस्याग्रेसर आदौ ओंकारो भवति । रात्रेश्चन्द्रादन्यः कान्तो न, तथा नलातिरिक्तो ममेत्यर्थः । नलकर्तृकं दानं वा । अग्रेसरम् 'पुरोग्रतोग्रेषु सर्तेः' इति टः 'अजाद्यदन्तम्' इति पूर्वनिपातमकृत्वाऽग्रशब्दस्य परनिपातकरणं सप्तम्येकवचनेन विगृह्य एदन्तत्वार्थम् । 'यूथं तदग्रसर–' इत्यादयः प्रयोगा अग्रतः सरति, अग्रेण वेति समर्थनीयाः ॥

सरोजिनीमानसरागवृत्तेरनर्कसंपर्कमतर्कयित्वा ।
मदन्यपाणिग्रहशङ्कितेयमहो महीयस्तव साहसिक्यम् ॥ ७६ ॥

सरोजिनीति ॥ हे हंस, सरोजिन्याः कमलिन्या मानसरागोऽन्तःकरणानुरागः तस्य वृत्तेः सद्भावस्य स्थितेः । अनर्केण सूर्यादन्येन सह संपर्कं संबन्धमतर्कयित्वाऽविचार्य तवेयं ममान्येन नलव्यतिरिक्तेन पाणिग्रहः परिणयस्तच्छङ्किता तस्य महीयोऽतीव महत्साहसिक्यं साहसिकत्वम् । अहो आश्चर्ये । सूर्यातिरिक्तः कान्तः कमलिन्याश्चेत्तर्हि नलातिरिक्तो ममेति भावः । सहसाऽविचार्यैव वर्तते साहसिकः । 'ओजःसहोम्भसा वर्तते' इति ठक् । ततो ब्राह्मणादित्वात्ष्यञ् ॥

पुनरपि द्वितीयं पक्षं निराकरोति—

साधु त्वया तर्कितमेतदेव स्वेनानलं यत्किल संश्रयिष्ये ।
विनामुना स्वात्मनि तु प्रहर्तुं मृषागिरं त्वां नृपतौ न कर्तुम् ॥ ७७ ॥

साध्विति ॥ हे हंस, एतत्त्वया साधु सम्यक्तर्कितमूहितम् । किल सत्ये । यत्स्वेनात्मनैव स्वेच्छया अनलं नलादन्यं संश्रयिष्ये । किल चेदित्यर्थे यद्यर्थे वा । नलादन्यं चेत्संश्रयिष्ये तर्हि तु पुनरमुना नलेन विना नलप्राप्त्यभावे स्वात्मनि स्वविषये स्वप्रहारं कर्तुमनलं वह्निमेव संश्रयिष्ये । न तु त्वां नृपतौ नले मृषागिरं मिथ्यावादिनं कर्तुं नलादन्यं संश्रयिष्ये । त्वं चेत्स्वीकरोषि तर्हि स्वात्मघातं करिष्यामीति तस्य पुरस्तात्कथयेति भावः । स्वात्मनीति कर्मविवक्षया सप्तमी ॥

एवद्वचनं प्रत्युत्तरमनु हंसमेवाह—

मदन्यलब्ध्यै पुनराह यस्त्वां तर्कः स किं तत्फलवाचि मूकः ।
अदास्यदाकाण्यनिवारहेतुर्वाणी न वेधा यदि सन्तु के तु ॥ ७८ ॥

---

१ 'अत्र स्वात्मनीत्यधिकरणे सप्तमी' इति साहित्यविद्याधरी । २ 'अत्र समर्थनीयास्तत्र प्रयोगाः' इति साहित्यविद्याधरी । ३ 'अत्र मेदं' इति साहित्यविद्याधरी ।

मदिति ॥ हे हंस, यस्मात्कस्मात् पुनर्मदुक्तिरूपं मया प्रतारणीयमानं स तर्कः तस्य प्रतारकस्य फलं प्रयोजनं तद्विनिमिष्यामि नास्ति किं मूकः प्रतारणस्य फलं किमिति न वदति, न वदति चेन्मास्तु तत् । तथाच यशस्विना राज्ञा वेदमेवंविधा व्यभिचारहेतुलोऽशनाद्यो यस्याः [यस्या व्यभिचारकारणं शङ्कितुं न शक्यते] एवंविधा अव्यभिचारिणी वाक् यदि वेदा न वेदवत्प्रमाणभूता न भवेत्, तर्हि के तु पुनर्वेदाः सन्तु । अव्यभिचारितावाक्यमेव वेदत्वम् । एवंविधाया अपि वाचोऽप्रामाण्ये वेदस्याप्यप्रामाण्यं स्यादित्यर्थः । ततश्च पूर्वश्लोकोक्तं मद्वचोऽन्यथाशङ्कां विहाय सत्यमेव ज्ञातव्यम् । विप्रलभ्यम् 'पोरदुपधात्' इति यत् । शक्य इति 'शकिसहोश्च' इति यत् ॥

पुनरपि पूर्वोक्तं 'पितुर्नियोगेन–' (३।७४) इत्यादि पद्यद्वयं युक्त्या निराकरोति—

अनैषधायैव जुहोति तातः किं मां कृशानौ न शरीरशेषाम् ।
ईष्टे तनूजन्मतनोः स नूनं मत्प्राणनाथस्तु नलस्तथापि ॥ ७९ ॥

अनैषधायेति ॥ तातः पिता चेच्छरीरशेषां शरीरमात्रावशेषां मामनैषधाय नलव्यतिरिक्ताय जुहोति ददाति तर्हि कृशानावेवाग्नावेव किं न जुहोति वह्नावेव किमिति मां न क्षिपति वद इति किमः प्रश्नार्थत्वेन नञो निषेधार्थत्वेन च व्याख्येयम् । अत्रोक्तमप्याह—यद्यप्यन्यस्मै दास्यति तथापि मम प्राणानां नाथस्तु नल एव । तुरेवार्थः । यतो नूनं निश्चितं स पिता तनूजन्म अपत्यं तस्य तनुः शरीरं तस्यैव ईष्टे स्वामी तदधीनस्य शरीरस्य यत्किंचित्करोतु, प्राणास्तु नलाधीना एव, पितृकर्तृकान्यदाने नलोद्देशेनाग्नौ जन्मान्तरेऽपि तत्प्राप्त्यर्थं प्राणांस्त्यक्ष्यामि । 'यं यं वापि स्मरन्भावं' इति भगवद्वचनात् । तनूजन्मतनोरिति 'अधीगर्थ–' इति षष्ठी ॥

'इतः पृथक्प्रार्थयसे' (३।७३) इत्युक्तं दूषयति—

तदेकदासीत्वपदादुदग्रे मदीप्सिते साधु विधित्सुता ते ।
अहेलिना किं नलिनी विधत्ते सुधाकरेणापि सुधाकरेण ॥ ८० ॥

तदिति ॥ तस्य नलस्यैकं केवलं दासीत्वं तल्लक्षणं पदं वस्तु तस्मात्सकाशादुदग्रे उत्कृष्टे मदीप्सिते ममाभिलाषे यत्ते विधित्सुता कर्तुकामत्वं तत्साधु उचितम्, काक्वा न साध्विति वा[3] । नलदासीत्वादन्यन्न प्रार्थय इति भावः । नलस्य दासीत्वं सम्यक्, अन्यस्य महिषीत्वं नेत्याह—नलिनी कमलिनी सुधाया अमृतस्याकरेण आलयेनाप्यहेलिना हेलिः सूर्यस्तस्मादन्येन सूर्यव्यतिरिक्तेन सुधाकरेण चन्द्रेण किं विधत्ते कुरुते, अपि तु न किमपि । सूर्येऽनुरागबाहुल्याच्चन्द्रे तदभावादमृतपूर्णोऽपि तस्मै न रोचते तथा ममेत्यर्थः । सुधाकरपदं प्रथमं यौगिकं द्वि[illegible]मिति न पुनरुक्तिः तदेकदासीत्वपदाद्वस्तुनः सकाशादधिके मदीप्सिते विधि[illegible]स्ति इति यत्तत्साध्वप्यनुचितम् । तादृशस्य मदीप्सितस्याभावादित्यर्थ इति वा ॥

एतदेव द्रढयति—

तदेकलुब्धे हृदि मेऽस्ति लब्धुं चिन्ता न चिन्तामणिमप्यनर्घ्यम् ।
चित्ते ममैकः सकलत्रिलोकीसारो निधिः पद्ममुखः स एव ॥ ८१ ॥

---

१ 'अत्र काव्यलिङ्गम्' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गम्' इति साहित्यविद्याधरी । ३ 'अत्र दृष्टान्तमलंकारः' इति साहित्यविद्याधरी ।

पुण्यं त्वया संचीयतां परिपुष्टीक्रियताम् । प्रतिश्रुतकरणेन महान्धर्मः, तेन च मत्प्राणरक्षणाद्धर्मो भविष्यतीत्यर्थः । प्रतिश्रुतादाने चाधर्मः, मत्प्राणहानिश्चेति स्त्रीहत्यालक्षणश्चाधर्मः । एतद्द्वयं यथा न भवति तथा कर्तव्यमिति भावः । निश्चयाभावे कथं कार्यमित्यत आह—आर्य श्रेष्ठ, वृथा निष्कारणिका 'पितुर्नियोगेन–' इत्यादिविशङ्का विरुद्धा संभावना निवार्यतां दूरतस्त्यज्यताम् । अये हंस, भद्रेऽसंदिग्धेऽप्यपि पदार्थे विषये भृशमतिशयेन केयं मुद्रा मूकीभावः किमिति नाङ्गीक्रियत इत्यर्थः । भद्रे शुभरूपे श्रेष्ठे साधौ त्वयि इयं का मुद्रा स्थितिरिति वा ॥

अलं विलङ्घ्य प्रियविज्ञ याञ्चां कृत्वापि वाम्यं विविधं विधेये ।
यशःपथादाश्रवतापदोत्थात्खलु स्खलित्वास्तखलोक्तिखेलात् ॥ ८४ ॥

अलमिति ॥ हे प्रियविज्ञ प्रियश्चासौ विज्ञश्च विषु पक्षिषु मध्ये ज्ञ पक्षिश्रेष्ठ इति वा हंस, याञ्चां मत्कृतां प्रार्थनां विलङ्घ्यातिक्रम्य अलं नातिक्रमणीया । प्रियस्य सतो विज्ञस्य नलस्य याञ्चां विलङ्घ्यालमिति वा । तथा—विधेये करणीयवस्तुविषये विविधं वाम्यं वक्रत्वमपि कृत्वा अलम् । न करणीयमित्यर्थः । अपिः तुल्यकालत्वद्योतनार्थः । उभयमपि न कार्यमित्यर्थः । तथा—आश्रवतापदं दातृत्वलक्षणं पदमुत्तमस्थानं तस्मादुत्थ उत्पन्नः तस्माद्यशःपथात्कीर्तिमार्गात्स्खलित्वा पतित्वापि खलु पूर्यतां पतनमपि न कार्यम् । अपिशब्दोऽत्रापि योज्यः । किंभूतात्—अस्तः क्षिप्तः खलोक्तीनां खलदुर्वचनानां खेलो विलासो यस्मिन् । हंसतुल्य उपकारी अन्यो नास्तीति दुर्जना अपि यथा तव कीर्तिं वर्णयन्ति तथा कुर्वित्यर्थः । आश्रवता वचनकारिता, प्रतिश्रुतकारित्वमिति वा । पन्था हि पदोत्थो भवति । विज्ञ इति कः । विलङ्घ्य कृत्वा, स्खलित्वा इति 'अलंखल्वोः प्रतिषेधयोः–' इति क्त्वाप्रत्ययः । आशृणोतीत्याश्रवः पचादिषु । 'यजयाच–' इति नङि याञ्चा ॥

सोपहासं ब्रूते—

स्वजीवमप्यार्तमुदे ददद्भ्यस्तव त्रपा नेदृशबद्धमुष्टेः ।
मह्यं मदीयान्यदसूनदित्सोर्धर्मः कराद्भ्रश्यति कीर्तिधौतः ॥ ८५ ॥

स्वेति ॥ हे हंस, मदीयानसून्नलक्षणान्प्राणान्मह्यमेवादित्सोर्दातुमनिच्छोः ईदृशोऽभिनवश्चासौ बद्धमुष्टिश्च कृपणशिरोमणिस्तस्य तव आर्तानां दीनानां मुदे हर्षाय स्वजीवमपि स्वप्राणमपि ददद्भ्यो जीमूतवाहनादिभ्यः सकाशाद्यद्यस्मात्त्रपा लज्जा न भवति तस्मात्तव करात्कीर्तिधौतो यशोधवलो धर्मो भ्रश्यति । अधुनैव विनश्यति । यशो नश्यति धर्मोपीत्यर्थः । अन्यदीयं गृहीत्वा तस्मै यो न ददाति तस्य स्वजीवदातृभ्यः सकाशाल्लज्जा कथं स्यात्, यदि स्यात्तर्हि दद्यादेव तस्मादुभयमपि तव नष्टम् । ते तु जीवमपि ददुः, त्वं तु तदीयमेव धनं न ददासि, किंपुनः स्वीयजीवमिति । तस्माद्येन धर्मो यशश्च भवति तदेव कुर्विति भावः । बद्धमुष्टेः करात्पततीति विरोधाभासः । नेति काकुर्वा । 'कर्णस्त्वचं शिबिर्मांसं जीवं जीमूत-

---

१ 'अत्र छेकानुप्रासः' इति साहित्यविद्याधरी । २ 'अत्रानुप्रासः' इति साहित्यविद्याधरी । 'इह 'न पादादौ खल्वादयः' इति निषेधस्योद्देजकत्वाभिप्रायत्वात् नञर्थस्य खलुशब्दस्यानुद्देजकत्वाद् नन्वदेव पादादौ प्रयोगो न दूष्यत इत्यनुसंधेयम्' इति जीवातुः ।

वाहनः । ददौ दधीचिरस्थीनि किमदेयं महात्मनाम् ॥' इतिवचनं जीवदाने प्रमाणम् । 'न लोका–' इति निषेधादसूनिति द्वितीया । धौतः धावेर्निष्ठायामूठि वृद्धिः ॥

त्वया मत्कार्ये कृते प्रत्युपकर्तुमशक्यत्वेनाहमधमर्णा यथा स्यां तथा कुर्वित्याह—

दत्त्वात्मजीवं त्वयि जीवदेऽपि शुध्यामि जीवाधिकदे तु केन ।
विधेहि तन्मां त्वदृणान्यशोद्धुममुद्रदारिद्र्यसमुद्रमग्नाम् ॥ ८६ ॥

दत्त्वेति ॥ हे हंस, जीवदे प्राणदे त्वयि आत्मनो जीवं दत्त्वापि शुध्याम्यनृणीभवामि, जीवाधिकं नलं ददति तस्मिंस्त्वयि केन तु पुनः प्रकारेण शुध्यामि । केवलजीवदत्त्वे तु जीवदानेनानृणीभवनं युक्तम्, जीवाधिकदत्त्वे तु जीवे दत्तेऽप्यनृणीभवितुं न शक्यते । जीवाधिकमन्यत्किमपि न विद्यत इति भावः । यतः—तस्मात्त्वदृणान्यशोद्धुमनपाकर्तुं माममुद्रो निर्मर्यादो दारिद्र्यसमुद्रः तत्र मग्नामविदरिद्रां विधेहि । तवाधमर्णा यथा स्यां तथा कुर्विति भावः । जीवाधिकदो भवेति भावः । ऋणशब्दस्तत्रोपकारपरः । अशोधनं प्रत्युपकाराकरणम् । अत्र भैमीजीव एव जीवशब्देन गृह्यते । प्राणेभ्योऽप्यधिकं नलं ददातीति जीवाधिकदः एवंविधेऽत एव जीवदे नलदान एव मम प्राणनं यतः । एवंविधे त्वय्यात्मनः प्राणान्दत्त्वापि आत्मजीवव्ययसाध्यमुपकारं कृत्वापि केन पुनः प्रकारेणानृणीभवामि, अपितु प्राणव्ययसाध्य उपकारे कृतेऽपि ममानृणत्वं यतो न भवेदिति वा योजना ॥

अस्मिन्कार्ये कृते फलसद्भावेन त्वयैतत्करणीयमित्याह—

क्रीणीष्व मज्जीवितमेव पण्यमन्यन्नचेदस्ति तदस्तु पुण्यम् ।
जीवेशदातर्यदि ते न दातुं यशोऽपि तावत्प्रभवामि गातुम् ॥ ८७ ॥

क्रीणीष्वेति ॥ हे हंस, मज्जीवितं जीवनमेव पण्यं विक्रेयं वस्तु क्रीणीष्व । प्रियदानमूल्येनेति शेषः । मह्यमेव तत्क्रयेण प्रयच्छ । ननु तुभ्यं क्रयेण जीवदाने मम को लाभ इत्याशङ्क्याह—अन्यद्धनादिकं चेद्यद्यपि नास्ति तत्तथापि पुण्यमस्तु भवतु । जीवितदाने च जीवाधिकदाने च जीवाधिकदानेन विनान्यन्मूल्यं यद्यपि न विद्यते तथापि तस्य स्थाने श्रेय एव भवत्वित्यर्थः । ननु पुण्यं पारलौकिकं, अहमैहिकमपि किमपि वाञ्छामीत्याशङ्क्याह—हे जीवेशदातः प्राणनाथदातः, जीवाधिकतुल्यमूल्याभावेन यद्यपि ते तुभ्यं दातुं न प्रभवामि समर्थास्मि तथापि तव यशस्तावत्साकल्येन प्रथमतो वा गातुं समर्थास्मि । प्रभवाम्येवेति तावच्छब्दोऽवधारणार्थो वा । ऐहिकं पारलौकिकं च फलं तव विद्यते, तद्रूपेण मूल्येन मह्यं जीवदानं कुर्विति भावः । यद्वा—तावत्तदर्थे । यदि ते दातुं न प्रभवामि तर्हि यशोऽपि यशः पुनर्गातुं न प्रभवामि, अपि तु प्रभवाम्येव । पण्यम् 'पणपाद–' इत्यादिनार्हार्थे यत् ॥

पूर्वोक्तफलद्वयाभावेऽपि साधव उपकुर्वन्तीत्याह—

वराटिकोपक्रिययापि लभ्यानिभ्याः कृतज्ञानधमाद्रियन्ते ।
प्राणैः पणैः स्वं निपुणं भणन्तः क्रीणन्ति तानेव तु हन्त सन्तः ॥ ८८ ॥

---

१ 'अथातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'तह्येव–' इति पाठस्तिलकजीवातुसाहित्यविद्याधरीसुखावबोधासंमतः । ३ 'अशोद्धुम्' इति साहित्यविद्याधरीसंमतः पाठः । ४ 'अत्र विरोधाभासोऽलंकारः' इति साहित्यविद्याधरी । ५ 'अयदन्यदस्ति–' इति पाठ [illegible] । ६ 'अथातिशयोक्तिः' इति साहित्यविद्याधरी ।

वराटिकेति ॥ अथवेति पूर्वोक्तापरितोषे । इभ्या धनिकाः । धनलुब्धा इवेत्यर्थः । वराटिकोपक्रियया कपर्दकदानमात्रोपकारेणापि लभ्यान्सुलभान्कृतज्ञान्साधून्नाद्रियन्ते न संमानयन्ति । आदरं न कुर्वन्तीत्यर्थः । तुः पुनरर्थे । हन्त आश्चर्ये । सन्तस्तु साधवः प्राणैरेव पणैर्मूल्यैस्तानेव कृतज्ञान्क्रीणन्ति क्रयेण गृह्णन्ति । कृतज्ञोपकारार्थं प्राणानपि त्यक्त्वा तानर्जयन्तीत्यर्थः । किंभूताः सन्तः—स्वमात्मानं निपुणं कुशलं भणन्तो ब्रुवन्तो मानयन्तः । प्राणाधिकं मूल्यमर्हन्त एतेऽस्माभिरल्पेन मूल्येन लब्धा इति वयं कुशला इति संतुष्यन्ति । अतः फलाभावेऽपि साधुना त्वया कृतज्ञार्हं कर्तव्या । मह्यं जीवदानं कुर्विति भावः । 'दाने तपसि शौर्ये वा यस्य न प्रथितं यशः । विद्यायामर्थलाभे वा मातुरुच्चार एव सः ॥' इति । 'इभ्य आढ्यो धनी' इत्यमरः । इभमर्हति, दण्डादित्वाद्यः ॥

बलात्कारेणापि त्वत्तो नलो याचनीय इत्युक्तिविशेषेणाह—

स भूभृदष्टावपि लोकपालास्तैर्मे तदेकाग्रधियः प्रसेदे ।
न हीतरस्माद्घटते यदेत्य स्वयं तदातिप्रतिभूर्ममाभूः ॥ ८९ ॥

स इति ॥ यतः स भूभृत् राजा नलोऽष्टावपि लोकपालाः । लोकपालांशत्वात्त एवासावित्यर्थः । अतः तस्मिन्नल एव एकाग्रा निश्चिता धीर्यस्यास्तस्या मे मम तैर्लोकपालैः प्रसेदे प्रसन्नीभूतम् । नलस्य तदंशत्वात्ते मम भक्तायाः प्रसन्ना जाताः । प्रसन्नत्वेऽन्यथानुपपत्तिं प्रमाणयति—हि यस्मात्त्वमेत्यागत्य स्वयमप्रेरित एव मम यत्तदाप्तिप्रतिभूः नलप्राप्तिलग्नकोऽभूः जातोऽसि 'तदप्यवेहि स्वशये शयालु' इत्यादिना, तत् लोकपालप्रसादव्यतिरेकेण न घटते । लोकपालैर्मम विश्वासार्थं त्वं लग्नकः कृतः, अतस्त्वामेव नलं याचे । लोके प्रतिभूरेव पीड्यते, धनिकाधमर्णयोरन्तरे स्थितत्वात् । प्रतिभूरित्यत्र 'भुवः संज्ञान्तरयोः' इति क्विप् ॥

नलदातृत्वं विना तवानौचित्यमेव स्यादित्याह—

अकाण्डमेवात्मभुवार्जितस्य भूत्वापि मूलं मयि वीरणस्य ।
भवान्न मे किं नलदत्वमेत्य कर्ता हृदश्चन्दनलेपकृत्यम् ॥ ९० ॥

अकाण्डमिति ॥ अकाण्डमेवाप्रस्ताव एव कौमार एव आत्मभुवा कामेनार्जितस्य मयि वर्तितस्य रमस्य शब्दस्य रहस्यकथनस्य मूलं कारणं भूत्वापि विः पक्षी भवान्नलदत्वं नलस्य दूतत्वमेत्य प्राप्य मे हृदः चन्दनलेपस्य कृत्यमनुरागकार्यं किं न कर्ता, मम हृदयं नलदानेन शीतलं विरहदहनतापरहितं किमिति न कुरुषे एवं तावत्कर्तुं युक्तम्, अन्यथा त्वया रहस्यकथनं किमिति कारितम्, ततो नलदो भवेति भावः । कामपीडा कौमारे न युज्यते । किंतु तारुण्ये । तथा बाल्ये कामपीडा कथिता नलमुद्दिश्य, तत्र कारणं त्वमेव जातोऽसीत्यर्थः । अकाण्डं अवसररहितं यथा भवति तथा कामजनितस्य संग्रामस्य निदानं भूत्वा नलप्रसादादिति वा । अथच—अकाण्डं स्कन्धरहितं ब्रह्मणा मयि निर्मितं तृणस्य वीरणतृणस्य मूलं भूत्वा नलदत्वमुशीरत्वमेत्य प्राप्य संतप्तस्य हृदयस्य चन्दनलेपेन यत्कृत्यं शीतलत्वरूपं कार्यं हि न कर्तासि । काकुः, अकर्ता वा । तथापि नलदत्वाद्धृदश्चन्दनलेपकृत्यं युक्तमेव । नलप्रसादि-

१ 'अर्जितस्यात्मकरूपसंबन्धः' इति साहित्यविद्याधरी। २ 'अत्र कृतमनुप्रासं च' इति साहित्यविद्याधरी। ३ 'भवान्नु' इति साहित्यविद्याधरीसंमतः पाठः।

चाहं हृदश्चन्दनलेपं करिष्यामि नान्यथेति भावः। 'स्याद्वीरणं वीरतृणं मूलेऽस्योशीरमस्त्रियाम्। अभयं नलदं सेव्यम्' इत्यमरः। कृत्यम्, 'विभाषा कृवृषोः' इति क्यप्‌ क्वचिपि तुक् ॥

शीघ्रमेवैतत्कर्तव्यमित्याह—

अलं विलम्ब्य त्वरितुं हि वेला कार्ये किल स्थैर्यसहे विचारः।
गुरूपदेशं प्रतिभेव तीक्ष्णा प्रतीक्षते जातु न कालमार्तिः ॥ ९१ ॥

अलमिति ॥ हि यस्मादियं त्वरितुं त्वरां कर्तुं वेला एतत्कार्यं कर्तुं शीघ्रं गन्तुमयं समयः, अतो विलम्ब्यालं विलम्बो न कार्यः। क्षणं विचार्य करिष्यामीत्यत आह—किल यस्मात्स्थैर्यसहे विलम्बसहे कार्ये विषये विचारः। क्रियत इति शेषः। इदं तु विलम्बसहं न भवतीति विचारो न युज्यत इत्यर्थः। तत्र हेतुमाह—आर्तिः तीक्ष्णा पीडा मद्विषये विरहपीडा जातु कदाचिदपि कालं न प्रतीक्षते। तत्र दृष्टान्तः—का कमिव। तीक्ष्णा कुशाग्रतुल्या शिष्यस्य प्रतिभा प्रज्ञा गुरूपदेशमिव गुरूपदेशात्पूर्वमेव शास्त्रार्थं गृह्णाति। लोकेऽपि यावद्विवाहादिसमयः समायाति तावत्पूर्वमेव त्वरा भवति। शीघ्रमेतत्कार्यं साधयेति भावः। त्वरितुम्, 'कालसमयवेलासु—' इति तुमुन् ॥

श्लोकचतुष्टयेन विज्ञापनावसरमुपदिशति—

अभ्यर्थनीयः स गतेन राजा त्वया न शुद्धान्तगतो मदर्थम्।
प्रियास्यदाक्षिण्यबलात्कृतो हि तदोदयेदन्यवधूनिषेधः ॥ ९२ ॥

अभ्यर्थनीय इत्यादिना ॥ इतो गतेन त्वया शुद्धान्तगतोऽवरोधमध्यस्थितः स राजा मैमी त्वयानुग्राह्येति मदर्थं नाभ्यर्थनीयः। मद्विषयं किमपि न वक्तव्यमित्यर्थः। गतेन त्वयाभ्यर्थनीयः परंतु शुद्धान्तगतो नेति वा। एवमग्रिमश्लोकत्रयेऽपि विशेषणस्य नमा संबन्धः कार्यः। किमिति नेत्याशङ्क्याह—हि यस्मात्तदा तस्मिन्समये प्रियाणामास्यानां वेषु वा दाक्षिण्यस्यानुरोधस्य बलादाधिक्यात्कृतोऽन्यवधूनिषेधोऽन्यस्त्रीनिषेध उदयेत्प्रादुर्भवेत्। यद्यप्यन्यस्त्रीवाञ्छनास्य स्यात्तथापि तत्समक्षं प्रार्थिते तन्मुखावलोकनेन जनितया लज्जया, प्रीत्या वा एताभ्यः सकाशादन्या कापि सुन्दरी नास्तीति निषेध उदयेदिति हेतोर्न प्रार्थनीयस्तदेत्यर्थः। 'शुद्धान्तश्चावरोधश्च' इत्यमरः। 'अर्थ उपयाचने' ॥

शुद्धान्तसंभोगनितान्ततुष्टे न नैषधे कार्यमिदं निगाद्यम्।
अपां हि तृप्ताय न वारिधारा स्वादुः सुगन्धिः स्वदते तुषारा ॥ ९३ ॥

शुद्धान्तेति ॥ त्वया शुद्धान्तसंभोगेनान्तःपुरस्त्रीसुरतेन नितान्ततुष्टेऽतिशयेन संतुष्टे। शान्तकामे इति यावत्। नले इदं पूर्वोक्तं कार्यं न निगद्यं न वक्तव्यम्। सप्तमी वा। हि यस्मादपामद्भिस्तृप्ताय पुरुषाय स्वादुः सुरसा सुगन्धिः कर्पूरादिना तुषारा शीतला च वारि-

---

१ 'चन्दनस्य' इति शब्दश्लेषः, अन्यत्रार्थश्लेषः। तथाच 'नलदस्यनेन च' इति [illegible] ध्यवसायेन हृते आरोप्यमाणस्योशीरस्य प्रकृता [illegible] नालंकारः। 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इति लक्षणात्। स चोपश्लेष[illegible] इति संकर' इति जीवातुः। २ 'अत्र काव्यलिङ्गम्' इति साहित्यविद्याधरी। 'उपमार्थान्तरन्यासयोः संकरः' इति जीवातुः। ३ 'अत्र काव्यलिङ्गम्' इति साहित्यविद्याधरी।

धारोदकधारा न रोचते । पिपासाया अभावात्पीतादुदकादुत्कृष्टमप्युदकं यथा तस्मै न रोचते तथा संभोगेन शान्तमदनत्वात्तद्वधूभ्योऽभ्यधिकाहं तस्मै न रोचेयम् । तस्मात्तदापि न वक्तव्यमिति भावः । निगाद्यम्, सोपसर्गाद्वदतेर्ण्यत् । सुहितार्थयोगे 'पूरणगुण–' इति षष्ठीसमासनिषेधादेव अपामिति षष्ठी । 'तृप्त्यर्थानां करणे षष्ठी च' इति वा, तृप्ताय 'रुच्यर्थानाम्–' इति चतुर्थी । सुगन्धिरिति 'गन्धस्येत्–' । तुषारेत्यभिधेयलिङ्गता ॥

त्वया निधेया न गिरो मदर्थाः क्रुधा कदुष्णे हृदि नैषधस्य ।
पित्तेन दूने रसने सितापि तिक्तायते हंसकुलावतंस ॥ ९४ ॥

त्वयेति ॥ हे हंसकुलावतंस हंसवंशभूषण, नैषधस्य हृदि क्रुधा क्रोधेन कदुष्णे ईषत्तप्ते सति मदर्था मत्प्रयोजना गिरो वाचस्त्वया न निधेयाः कर्तव्याः । यतः—पित्तेन पित्तदोषेण रसने रसनेन्द्रिये दूने दूषिते सति सितापि शर्करापि तिक्तायते तिक्तेवाचरति निम्बतुल्यरसा भवति । अहं शर्करातुल्यापि तिक्ता स्यामित्यर्थः । 'शर्करा सिता' इत्यमरः । 'कवं चोष्णे' इति चकारात्कदुष्णम् । रस्यतेऽनेनेति रसनम् । तिक्तेवाचरतीति 'कर्तुः क्यङ्' । तिक्ता भवतीति वार्थे लोहितादित्वात्क्यष् । 'वा क्यषः' इत्यात्मनेपदम् ॥

धरातुराषाहि मदर्थयाञ्चा कार्या न कार्यान्तरचुम्बिचित्ते ।
तदार्थितस्यानवबोधनिद्रा बिभर्त्यवज्ञाचरणस्य मुद्राम् ॥ ९५ ॥

धरेति ॥ हे हंस, त्वया धरायां तुराषाट् इन्द्रस्तस्मिन्पृथ्वीन्द्रे नले पूर्वोक्तव्यतिरिक्तकार्यान्तरचुम्बि कार्यमात्रासक्तं चित्तं यस्य एवंभूते सति मदर्थयाञ्चा न कार्या न विधेया । यतः—तदा कार्यान्तरासक्तिसमयेऽर्थितस्य याचितस्य अनवबोधोऽनाकर्णनं तल्लक्षणा निद्रा अवज्ञाया अवहेलनाया आचरणं करणं तस्य मुद्रां सादृश्यं बिभर्ति धारयति । असमये कार्यान्तरासक्तत्वात्तव विज्ञापनां यदि न शृणुयात्तदा इदं कार्यमस्मै न रोचत इति विचार्य तवापि पुनर्विज्ञापनायां बुद्धिर्नोदीयादिति भावः । तुरासाहि इति प्रयोगो भाषायां 'छन्दसि सहः' इति ण्विप्रत्ययस्य छन्दसि विहितत्वाच्चिन्त्यः । गिरिशादिवन्महाकविप्रयोगादस्यापि छान्दसत्वस्य प्रायिकत्वाद्वा परिहर्तव्यम् । प्रकारान्तरं तु—धरातुरा धरावत्पृथ्वीवत् अतुरानुत्ताला, अवेगा वा सा पूर्वोक्ता प्रसिद्धा वा । याञ्चाविशेषणम् । हि निश्चितम् । अन्यत्पूर्ववत् । धरवत्पर्वतवत् अतुरा वा । स्वस्थेन समयं दृष्ट्वा न सोत्तालेनेत्यर्थः । यद्वा—हे अहिमदर्थ अहीन्मथ्नाति अहिमद्गरुडः तमर्थयते मित्रत्वं प्राप्तं प्रार्थयते तत्संबोधनम् । गरुडतुल्यपराक्रम इत्यर्थः । अन्यत्पूर्ववत् ॥

निगमयति—

विज्ञेन विज्ञाप्यमिदं नरेन्द्रे तस्मात्त्वयास्मिन्समयं समीक्ष्य ।
आत्यन्तिकासिद्धिविलम्बिसिद्ध्योः कार्यस्य कार्यस्य शुभा विभाति ॥ ९६ ॥

१ 'अर्थान्तरन्यासः' इति साहित्यविद्याधरी । 'दृष्टान्तालंकारः' इति जीवातुः । २ 'अत्रा-र्थान्तरन्या[illegible]' । 'तिक्तायते इत्युपमा' इति साहित्यविद्याधरी । 'अत्रापि दृष्टान्तालंकारः' इति जीवातुः । ३ 'लोके तु साहयतेः क्विप्' इति सिद्धान्तकौमुद्यां दीक्षितः । ४ 'अत्र काव्यलिङ्गम्' इति साहित्यविद्याधरी ।

तथाभिधात्रीमथ राजपुत्रीं निर्णीय तां नैषधबद्धरागाम्।
अमोचि चञ्चूपुट मौनमुद्रा विहायसा तेन विहस्य भूयः ॥ ९९ ॥

तथेति ॥ अथ अनन्तरं तेन विहायसा पक्षिणा स्वामीप्सितसिद्धेर्विहस्य चञ्चूपुटस्य मौनमुद्रा मौनभङ्गिर्भूयः पुनरप्यमोचि त्यक्ता। वक्तुं प्रारब्धम्। किं कृत्वा—तथाभिधात्रीं 'श्रुतश्च दृष्टश्च' इत्यादि भाषमाणां तां राजपुत्रीं भैमीं नैषधे नले बद्धो रागः प्रीतिर्यया एवंभूतां निर्णीय निश्चित्य। 'विहायाश्च शकुन्ते स्यात्' इति विश्वः।

इदं यदि क्ष्मापतिपुत्रि तत्त्वं पश्यामि तन्न स्वविधेयमस्मिन्।
त्वामुच्चकैस्तापयता नृपं च पञ्चेषुणैवाजनि योजनेयम् ॥ १०० ॥

इदमिति ॥ हे क्ष्मापतिपुत्रि राजपुत्रि, यदि इदं पूर्वोक्तं सर्वं तत्त्वं सत्यं, तत्तर्ह्यस्मिन्कार्ये स्वस्यात्मनो विधेयं करणीयं न पश्यामि। मया करणीयं किमपि नावशिष्यते। तर्हि त्वां विना स्वयमेव कथं भविष्यतीत्यत आह—त्वां नृपं नलं चोच्चकैरतिशयेन तापयता उभयोरपि परस्परं रागाद्विरहपीडां जनयता पञ्चेषुणैव कामेनैवेयं योजना घटना अजनि जनिता। अत एव मद्व्यापारोऽत्र नावशिष्यत इत्यर्थः। तप्तयोः संधिरिति लोहादौ दृश्यते ॥

भैम्यवस्थाः श्रुत्वा नलस्यापि काश्चिदवस्थाः सूचयन्नाह—

त्वद्बद्धबुद्धेर्बहिरिन्द्रियाणां तस्योपवासव्रतिनां तपोभिः।
त्वामद्य लब्ध्वामृततृप्तिभाजां स्वदेवभूयंचरितार्थमस्तु ॥ १०१ ॥

त्वदिति ॥ हे भैमि, तपोभिः पुण्यैरद्य त्वां लब्ध्वा प्राप्य अमृततृप्तिं विभाजां पीयूषपानजनिततृप्तितुल्यतृप्तिभाजां तस्य नलस्य बहिरिन्द्रियाणां चक्षुरादीनां केवलानां स्वदेवभूयं 'आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्' इत्यादिश्रुतिसिद्धं स्वीयं देवत्वं चरितार्थं कृतकार्यमस्तु। एतावत्कालं शब्दमात्रेण तेषां देवत्वमभूत्, इदानीं त्वल्लाभेनामृततृप्तितुल्यत्वाद्देवत्वं सार्थकं भविष्यतीत्यर्थः। किंभूतस्य तस्य—त्वय्येव बद्धा निवेशिता बुद्धिर्मनो येन। अनशननियमवतश्च। किंभूतानामिन्द्रियाणाम्—मनसस्त्वयि लीनत्वात्तेषु मनोव्यापाराभावादुपवासव्रतं विद्यते येषाम्। अन्यस्याप्याकृष्टेन्द्रियस्यानशननियमवतः परब्रह्म ध्यायतः पुण्यैस्तदेव ब्रह्म लब्ध्वा मोक्षलक्षणानन्दभाजो देवत्वं सार्थकं भवतीत्युक्तिः। बहिरिन्द्रियाणां निजव्यापारेष्वप्रवृत्तिस्तपः। विषयभोगाभावश्चोपवासः। अमृतपाने हि देवानां देवत्वं, तथा त्वल्लाभे तदिन्द्रियाणामपि देवत्वं कृतार्थमस्तु। देवभूयम्। भुवो भावे क्यप्। उपवासश्चासौ व्रतं चेति कर्मधारयादिनिः समर्थनीयः। उपवासेन व्रतिन इति वा समाधिः ॥

नलस्य त्वद्विरहेण कामजनितं विरहज्वरमाह—

तुल्यावयोर्मूर्तिरभून्मदीया दग्धा परं सास्य न ताप्यतेऽपि।
इत्यभ्यसूयन्निव देहतापं तस्यातनुस्त्वद्विरहाद्विधत्ते ॥ १०२ ॥

---

१ 'अत्र उक्तमिति पदार्थे 'अमोचि चञ्चूपुटमौनमुद्रा' इति वाक्यार्थरचनम्। तस्मादोजो गुणः। अलंकारश्च छेकानुप्रासः' इति साहित्यविद्याधरी। २ 'अत्र कामतापो योजनायाः कारणमजनीत्यनेन योजनातीतत्वं प्रतिपाद्यते। 'तापयता' इत्यनेन च तापस्य वर्तमानत्वम्। तस्मादत्र कार्यकारणपौर्वापर्यलक्षणातिशयोक्तिः' इति साहित्यविद्याधरी। ३ 'अत्र समासोक्तिरलंकारः' इति साहित्यविद्याधरी। 'अर्थान्तरप्रतीतेर्ध्वनिरेवेत्यनुसंधेयम्' इति जीवातुः।

तुल्येति ॥ हे भैमि, अतनुः कामः त्वद्विरहात्तस्य नलस्य देहतापं विधत्ते करोति । किं कुर्वन्निव—इति पूर्वोक्तप्रकारेण अभ्यसूयन्निव ईर्ष्यां कुर्वन्निव—इति किम् । आवयोः काम-नलयोर्मूर्तिः शरीरं पूर्वं तुल्या समानाभूत्, अनन्तरं मदीया सा मूर्तिर्दग्धा, अस्य नलस्य सा मूर्तिः परमातिशयेन ताप्यतेऽपि न एतच्छरीरस्य दाहोऽपि न क्रियते एवं परं संतापोऽपि केनचिन्न क्रियत इति । अनङ्गस्त्वद्विरहादेव देहतापं करोति नान्यस्मादित्यर्थः । मम च तस्य च आवयोः । 'त्यदादीनां मिथः' इत्येकशेषः ॥

दशा वर्णयति—

> **लिपिं दृशा भित्तिविभूषणं त्वां नृपः पिबन्नादरनिर्निमेषः ।**
> **चक्षुर्झरैरर्पितमात्मचक्षूरागं स धत्ते रचितं त्वया नु ॥ १०३ ॥**

लिपिमिति ॥ नृपो नलो दृशा दृष्ट्या भित्तेर्विभूषणमलंकारभूतां लिपिं चित्रलिखितां त्वामादरेण तात्पर्येण निर्निमेषो नेत्रसंकोचरहितः सन् पिबन्सादरमवलोकयंश्चक्षुर्झरैर्निर्निमेषत्वादनुरागवशाच्च जातैर्नेत्रबाष्पप्रवाहैरर्पितं जनितमात्मचक्षूरागं लोचनयोर्लौहित्यं धत्ते । उत्प्रेक्षते—त्वया रचितमिव जनितमिव । अयं बाष्पजनितलौहित्यं न भवति, किंतु त्वद्विषयको नयनानुरागः । प्रथमावस्था ॥

तामेव पुनराह—

> **पातुर्दृशालेख्यमयीं नृपस्य त्वामादरादस्तनिमीलयास्ते ।**
> **ममेदमित्यश्रुणि नेत्रवृत्तेः प्रीतेर्निमेषच्छिदया विवादः ॥ १०४ ॥**

पातुरिति ॥ आलेख्यमयीं चित्रलिखितां त्वामादरात् अस्तनिमीलया निर्निमेषया दृशा पातुः सादरमवलोकयितुर्नृपस्याश्रुणि विषये नेत्रवर्तिन्याः प्रीतेरनुरागस्य निमेषस्य च्छिदया विच्छेदेन सह ममेदमिति इदमश्रु मदीयम्, इदं मदीयमिति अहमहमिकया विवादः कलह आस्ते भवति । अनुरागवशान्निमेषाभावो भवति नयनानुरागजन्यम्, निमेषच्छेद-जन्यमेतदश्रु इति लोकः संदेग्ध इति भावः । [illegible] नयनप्रीतिरिति द्योतितम् । [illegible] ॥

द्वितीयामाह—

> **त्वं हृद्गता भैमि बहिर्गतापि प्राणायिता नासिकयास्यगत्या ।**
> **न चित्रमाक्रामति तत्र चित्रमेतन्मनो यद्भवदेकवृत्ति ॥ १०५ ॥**

त्वमिति ॥ हे भैमि, बहिर्गतापि बहिःप्रदेशे [illegible] त्वं कथं [illegible] नलस्य [illegible], [illegible] । अथ च—बहिर्गता त्वं नासिकया [illegible] । अत एव प्राणायिता [illegible] । [illegible]

[illegible]

मुखमार्गेण प्राद्रष्टाकुलमपि नवं बहिर्गता पुनरन्तः प्रविशन्ति मार्गाभावो न भवति तथा त्वमपि । भवती त्वमेव केवला [illegible] यथा [illegible] एतन्मनो नलान्तःकरणं निम्नालेन्दुयं गजाकामति तन्निम्नमिव भाति. [illegible] आक्षेपः । निम्नप्रायया भवत्या भवितव्यं, तच यदा निम्नमिव निर्माणरे अलं [illegible] । [illegible] नपि तस्य चित्ते न लगतीति त्वं आगमनशील इत्यर्थः । चित्रं किं, एतन्मनः इदं यत्र मार्गाणि करोति तत्र चित्रम्, अपि तु नेति काकुः । [illegible] इति वा । [illegible] इति वा । भवदेकवृत्ति एतन्मनो यथियं नाकामति अथाभावयेत्याति तत्र चित्रम् । चित्रं हि [illegible] लोकयते, अनेन नेत्राश्चर्यमिति वा । एतन्मनो [illegible] तत्र चित्रं न, यद्यपि विरहिणश्चित्रं दुःखदं तथाप्याश्चर्यं न । यतश्चित्रं भवदेकवृत्ति भवत्या एव एक वृत्तिरव-स्थानं यस्यैवंविधम् । यत्र लग्नेन लिखितानि [illegible] निम्नमत्र [illegible] वा । 'चित्तम्' इति पाठे व्याख्या—तत्र प्राणिभवने [illegible] चित्तनाश्चर्यं न गच्छति । यस्माद् एतन्मनस्त्वदेकवृत्ति त्वदासक्तम् । यस्य यत्रासक्तिस्तस्य प्राणवन्द्वाति । अत्र किमाश्च-र्यम् । इति द्वितीयावस्था ॥ आक्रामतीति 'वा भ्राश–' इति श्यन्विकल्पः । भवत्या एका वृत्तिर्यत्र 'सर्वनाम्नो वृत्तिमात्रे–' इति भवतीशब्दस्य पुंवत् ॥

तृतीयमाह—

अजस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयाम् ।
श्वासान्स वर्षत्यधिकं पुनर्यद्ध्यानात्तव त्वन्मयतां तदाप्य ॥ १०६ ॥

अजस्रमिति ॥ त्वं दूरदीर्घामतिमहतीं तदीयां नलसंबन्धिनीं संकल्परूपां सोपानततिं सोपानपरम्परां 'भैमीप्राप्तिः कथं भवेत्, प्राप्तौ सत्यामहमेवं करिष्यामि, सा एवं करिष्यति' इत्येवंरूपां मानसविचारलक्षणामजस्रं निरन्तरमारोहसि । त्वत्प्राप्त्युपायादि सर्वदा विचारयतीत्यर्थः । यत्पुनः स नलः अधिकमत्यर्थं श्वासान्निःश्वासान्वर्षति मुञ्चति तत्तव ध्यानाच्चिन्तनात्त्वन्मयतां त्वत्सायुज्यमाप्य प्राप्य तत्प्रधानो भूत्वा । त्वय्यनुरागबाहुल्यात्त्वच्चिन्तनात्त्वदप्राप्तिरभावाद्दुःखवशादत्यर्थं निःश्वासान्मुञ्चतीत्यर्थः । योऽतिदीर्घां सोपानपङ्क्तिमारोहति स निःश्वासान्मुञ्चति, अत्र तु विपरीतमित्याश्चर्यम् । तच्च त्वद्ध्यानात्त्वन्मयत्वप्राप्तौ सत्यां व्यधिकरणत्वाभावात्संगच्छते । त्वद्धर्मा नले युज्यन्ते । तस्मात्त्वत्सायुज्यं तस्य जातमित्यनुमीयत इति भावः । अथ च यो यं ध्यायति स तन्मयो भवति । 'योगप्रभावात्प्रह्लादो जातो विष्णुमयोऽसुरः' इति विष्णुपुराणम् । 'आरोहणं स्यात्सोपानम्' इत्यमरः । आप्येत्यत्राङ्ग समासः । तृतीयावस्था तेनानुभूयत इति ॥

संकल्पमेवाह—

हृत्तस्य यन्मन्त्रयते रहस्त्वां तद्व्यक्तमामन्त्रयते मुखं यत् ।
तद्वैरिपुष्पायुधमित्रचन्द्र सख्यौचिती सा खलु तन्मुखस्य ॥ १०७ ॥

१ 'अत्र विषयनिवृत्तिः संकल्पश्च कामदशे प्रतिपादिते । अत्र विरोधाभासश्लेषोपमालंकारसंसृष्टिः' इति साहित्यविद्याधरी । २ 'तामव्याप्य' इति सुखावबोधासंमतः पाठः । ३ 'अत्रासंगत्यलंकाराभासः' इति साहित्यविद्याधरी । 'अत्र श्वाससोपानारोहणयोः कार्यकारणयोर्वैयधिकरण्योक्तिरसंगत्यलंकारः । कार्यकारणयोर्भिन्नदेशत्वे स्यादसंगतिः' इति लक्षणात् । तन्मूला चेयं नलस्य दमयन्तीतादात्म्योत्प्रेक्षेति संकरः' इति जीवातुः ।

लावण्यशेषामित्युक्तम्। 'तथैव' इति पाठे लावण्यशेषामेव कृशतां तथा अनायि यथानङ्गता-माप्यमानोऽपि तेन सह स्पर्धां न लजतीति व्याख्या॥

सप्तमीमाह—

त्वत्प्रापकात्त्रस्यति नैनसोऽपि त्वय्येष दास्येऽपि न लज्जते यत्।
स्मरेण बाणैरतितक्ष्य तीक्ष्णैर्लूनः स्वभावोऽपि कियान्किमस्य॥११०॥

त्वदिति॥ एष नलस्त्वां प्रापयति दापयति तत्त्वत्प्रापकम्, तस्माद् एनसोऽपि पापादपि 'राक्षसो युद्धहरणात्' इत्यादिच्छलादिरूपान्न त्रस्यति न बिभेति। यच्च त्वयि विषये दास्येऽपि न लज्जते, ततो हेतोः स्मरेण तीक्ष्णैर्बाणैरतितक्ष्य अतिशयेनास्य शरीरं तनूकृत्य कियान्स्वल्पः स्वभावोऽपि लूनः छिन्नः किमिति सहेतुकोत्प्रेक्षा। धर्मशीलत्वादयं सर्वदा पातकाद्बिभेति दासत्वे च राजत्वाल्लज्जते इत्यस्य स्वभावः। स तु त्वत्प्राप्तिलोभेन न दृश्यते। शरीरस्यातिकार्श्यात्स्वभावस्यापि कार्श्यं जातमित्यनुमीयत इत्यर्थः। त्रपानाशावस्थोक्ता। त्वत्प्रापकादित्यादिना त्वदन्यविषयनिवृत्तिरेव तात्पर्यवृत्त्या वर्ण्यत इति श्लोकतात्पर्यम्। अतितक्ष्येति स्वभावापगमे हेतुत्वार्थमुक्तं, न तु तनुतावस्थाप्रतिपादनार्थम्। शरीरस्यातितक्षणे स्वभावस्य लूनत्वं संभाव्यत इति द्योतनार्थमतिशब्दतीक्ष्णशब्दप्रयोगौ। एनसः 'भीत्रार्थानां-' इति पञ्चमी॥

पुनस्त्रपानाशमेवाह—यद्वा प्रथमतस्त्रपानाशं वर्णयितुमाह—

स्मारं ज्वरं घोरमपत्रपिष्णोः सिद्धागदङ्कारचये चिकित्सौ।
निदानमौनादविशद्विशाला साङ्क्रामिकी तस्य रुजेव लज्जा॥१११॥

स्मारमिति॥ तस्य नलस्य विशाला महती लज्जा सिद्धे चिकित्सासमर्थेऽगदंकारचये वैद्यसमूहे निदानमौनादादिकारणविषये मौनादादिकारणस्याज्ञानादविशत्प्रविष्टा। किंभूतस्य—अपत्रपिष्णोर्लज्जाशीलस्य। किंभूते—स्मारं मदनजनितं घोरं दारुणं ज्वरं चिकित्सौ प्रतिकुर्वाणे। केव—सङ्क्रमेण जनिता साङ्क्रामिकी संसर्गजनिता रुजेव रोग इव क्षयादिर्व्याधिः क्षयिणं परित्यज्य यथान्यं संसर्गिणं प्रविशति तथा लज्जाशीलस्य तस्य लज्जया भवितव्यम्। सा च तं विहाय वैद्यसमूहे दृश्यते कार्श्ये निदानाज्ञानात्। 'अक्षिरोगो ज्वरः कुष्ठं तथापस्मार एव च। सहभुक्त्यादिसंबन्धात्संक्रामन्ति नरान्तरम्॥' इति। वैद्यैः पृष्टेन तेन लज्जां विहाय ज्वरनिदानं यदैव कथितं तदैवास्माभिर्ज्ञातमित्युक्त्वा लज्जितम्। 'लज्जाशीलेऽपत्रपिष्णुः' इत्यमरः। ज्वरम्, 'न लोका-' इति षष्ठीनिषेधाद्द्वितीया। अपत्रपिष्णोः, 'अलंकृञ्-' इतीष्णुच्। अगदं रोगरहितं करोतीति 'अगदंकारः'। कर्मण्यणन्ते कारशब्दे उत्तरपदे 'कारे सत्यागदस्य' इति मुम्। साङ्क्रामिकी, अध्यात्मादित्वाट्ठकि अनुशतिकादित्वादुभयपदवृद्धिः॥

अष्टमीमाह—

बिभेति रुष्टासि किलेत्यकस्मात्स त्वां किलापेति हसत्यकाण्डे।
यान्तीमिव त्वामनु यात्यहेतोरुक्तस्त्वयेव प्रतिवक्ति मोघम्॥११२॥

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। 'अत्र विशेषोक्तिरलंकारः 'तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिरलंकृतिः' इति लक्षणात्' इति जीवातुः। २ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र त्रपानाशलक्षणा स्मरदशोक्ता। अत्र वैद्येषु विषये लज्जान्तरस्यारोपादपह्नुतिरूपमालंकारः' इति साहित्यविद्याधरी।

बिभेतीति ॥ स नलः हे भैमि, त्वं रुष्टासि कुपितासि किलेति संभाव्य अकस्मात्त्वत्कोपेन विनैव बिभेति भयं प्राप्नोति । तथा—किल निष्प्राभूतां त्वामपि प्राप्तवानिति कृत्वा अकाण्डेऽवसर एव त्वत्प्राप्तिं विनैव सुखातिशयाद्धसति । तथा—यान्तीमिव गच्छन्तीमिव त्वामनु लक्षीकृत्य अहेतोर्निष्कारणं याति । तथा—त्वयोक्त इव संभाषित इव आगच्छामि, त्वदादिष्टं मया पूर्वमेव कृतमित्यादि मोघं निष्फलं प्रतिवक्ति प्रतिवचनं ददाति । उन्मादावस्थेयं ॥

नवमीमाह—

> भवद्वियोगाच्छिदुरार्तिधारायमस्वसुर्मज्जति निःशरण्यः ।
> मूर्च्छामयद्वीपमहान्धपङ्के हा हा महीभृद्भटकुञ्जरोऽयम् ॥ ११३ ॥

भवदिति ॥ भवत्या वियोगेन विरहेण जनिता अच्छिदुरा संतता या आर्तिः पीडा तस्या धारा प्रणालीपरम्परा सैव यमस्वसा यमुना तस्या मूर्च्छामयं मूर्च्छारूपं यद्द्वीपं जलमध्यावकाशस्तस्मिन्महान्ध्यलक्षणो महाज्ञानलक्षणः पङ्कः कर्दमस्तस्मिन् निःशरण्यो रक्षितृरहितोऽयं नलः महीभृद्भटो राजश्रेष्ठ एव कुञ्जरो हस्ती निमज्जति त्रुडति । हा हा खेदातिशये । अन्योऽपि कुञ्जरो हस्तिपकं विना नद्या द्वीपपङ्के त्रुडति । पङ्कलग्नो गजो नोद्धर्तुं शक्यत इति मूर्च्छावस्था । एवं नवावस्थासूचकाः श्लोकाः 'लिपिम्—' इत्यादयो यथायथमूह्याः । भवत्या वियोग इति 'सर्वनाम्नो वृत्तिमात्रे—' इति पुंवत् । अच्छिदुरेति 'विदिभिदि—' इति कुरच् ॥

उक्तिविशेषेण दशमीमवस्थामाह—

> सव्यापसव्यत्यजनाद्द्विरुक्तैः पञ्चेषुबाणैः पृथगर्जितासु ।
> दशासु शेषा खलु तद्दशा या तया नभः पुष्प्यतु कोरकेण ॥ ११४ ॥

सव्येति ॥ सव्यापसव्याभ्यां वामदक्षिणाभ्यां त्यजनं मोचनं तस्माद्द्विगुणैर्दशभिः पञ्चेषुबाणैः कामबाणैः पृथक्प्रत्येकमर्जितासु रचितासु दशासु अर्जितप्रायासु मध्ये शेषावशिष्टा या तद्दशा मृतिलक्षणा तया कोरकेण कलिकया नभो गगनं खलु निश्चितं पुष्प्यतु पुष्पितं भवतु । सा दशमी दशा खपुष्पतुल्या अलीका भवत्वित्यर्थः । एकैकेन मदनबाणेनास्यैषां दशानां तस्य भवन्ति, अस्य तु नव, दशमी नेति तस्या अवसरः । अस्याः कोरकत्वमनुद्भूतत्वात् । नले तर्हि सापि दशा भविष्यति सा मा भूत् सत्यातिरेव भवत्विति भावः । दशमा अशुभत्वान्नामग्रहणानर्हत्वात्तच्छब्दप्रयोगः । द्विरुक्तशब्दो लक्षणया द्विगुणपर्यायः । शेषशब्दस्त्रिलिङ्गः, अभिधेयलिङ्गत्वात् । 'पुष्प विकसने' अस्मादपि लोट् । 'चक्षूरागः प्रथमं चित्तासङ्गस्ततोऽथ संकल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः । उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः ॥' इति ॥

प्रकृतमाह—

> त्वयि स्मराधेः सततास्मितेन प्रस्थापितो भूमिभृतास्मि तेन ।
> आगत्य भूतः सफलो भवत्या भावप्रतीत्या गुणलोभवत्याः ॥ ११५ ॥

---

१ 'अमोऽभेद्यरूपकालंकारः' इति साहित्यविद्याधरी । २ 'अत्र रूपकालंकारः । [illegible] कारणेन [illegible]' इति जीवातुः । ३ 'मलवद्' इति जीवातुसंमतः पाठः । ४ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

त्वयीति ॥ स्मराधेः कामजनितपीडातः सततं नियतमस्मितेन हास्यरहितेन भूमिभृता राज्ञा त्वयि विषयेऽहं प्रस्थापितोऽस्मि भैमी मदर्थं त्वया विज्ञापनीयेति । अहमिहागत्य गुणेषु लोभवत्या अनुरागिण्या भवत्यास्तव भावप्रतीत्या प्रेमपरिज्ञानेन सफलः कृतकार्यो भूतो जातः । नलसदृशो गुणी, त्वं च गुणानुरागिणी, स्वत एव तस्मिन्ननुरक्तेति ज्ञात्वा कृतार्थो जातोऽस्मीति भावः ॥

धन्यासि वैदर्भि गुणैरुदारैर्यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकाया यदब्धिमप्युत्तरलीकरोति ॥ ११६ ॥

धन्यासीति ॥ हे वैदर्भि भैमि, सा त्वं धन्या दैवाधिकासि । यया त्वया उदारैरतिरमणीयैर्गुणैः सौन्दर्यादिभिः कृत्वा नैषधो धीरोदात्तो नलोऽपि समाकृष्यत स्ववशीकृतः । या ईदृशं धीरं वशीकरोति ततः परा का धन्येत्यर्थः । दृष्टान्तेन धन्यत्वं समर्थयते—खलु यस्याश्चन्द्रिकाया इतः परा का स्तुतिः । यत् या गम्भीरमप्यब्धिं समुद्रमुत्तरलीकरोति अतिशयेन चञ्चलीकरोति तद्वत्तद्वशीकरणमेव तव स्तुतिर्धन्यता च । अथच—वैदर्भी काव्यरीतिः गुणैः श्लेषादिभिरलंकारैः । अन्यदपि विशालैर्दोरकैराकृष्यते ॥

नलेन भायाः शशिना निशेव त्वया स भायान्निशया शशीव ।
पुनःपुनस्तद्युगयुग्विधाता योग्यामुपास्ते नु युवां युयुक्षुः ॥ ११७ ॥

नलेनेति ॥ हे भैमि, त्वं नलेन कृत्वा भायाः शोभस्व । केन केव—परिपूर्णेन शशिना निशेव । स नलस्त्वया कृत्वा भायाच्छोभताम् । कया क इव—निशया शशीव । उभयोः समागमे उभावपि व्यतिभातामित्यर्थः । नु उत्प्रेक्षे । पुनःपुनः प्रतिमासं तद्युगं चन्द्रनिशालक्षणं युग्मं युनक्तीति युक् एवंविधो विधाता ब्रह्मा युवामुभावपि युयुक्षुर्योक्तुमिच्छुः सन् योग्यामभ्यासमुपास्ते करोति । शिल्पी रमणीयं वस्तु संघट्टयितुमभ्यासं करोति अन्यथा चन्द्रनिशयोः पुनः पुनर्योजनं व्यर्थं स्यादित्यर्थापत्तिः प्रमाणम् । 'स्वभ्यासमास्ते' इति पाठे अभ्यासस्य समृद्ध्यर्थम् । समृद्धावव्ययीभावे चतुर्थ्या अम्भावः । 'योग्याभ्यासार्कयोषितोः' इति विश्वः ॥

स्तनद्वये तन्वि परं तवैव पृथौ यदि प्राप्स्यति नैषधस्य ।
अनल्पवैदग्ध्यविवर्धिनीनां पत्रावलीनां वलना समाप्तिम् ॥ ११८ ॥

स्तनद्वय इति ॥ हे तन्वि कृशाङ्गि, नैषधस्य नलस्यानल्पं बहुतरं वैदग्ध्यं कौशलं तस्य विवर्धिनीनां ज्ञापिकानां पत्रावलीनां पत्रवल्लीपङ्क्तीनां वलना रचना समाप्तिं यदि प्राप्स्यति

---

१ 'अत्रानियतदेशावयवं यमकमलंकारः' इति साहित्यविद्याधरी । २ 'अत्र प्रतीपमलंकारः । यदुक्तम्—'आक्षेप उपमानस्य प्रतीपमुपमेयता । तस्यैव यदि वा कल्प्या तिरस्कारनिबन्धनम् ॥' इति साहित्यविद्याधरी । 'दृष्टान्तालंकारः । एतेन नलस्य समुद्रगाम्भीर्यं दमयन्त्याश्चन्द्रिकाया इव सौंदर्यं व्यज्यते' इति जीवातुः । ३ 'अत्रोपमोत्प्रेक्षालंकारः । आशीर्वादप्रतिपादनादाशीरलंकारोऽपि' इति साहित्यविद्याधरी । 'अत्र दमयन्तीनलयोरन्योन्यशोभाजननोक्तेरन्योन्यालंकारः । 'परस्परक्रियाजननमन्योन्यम्' इति लक्षणात् । उपमाद्वयानुप्राणित इति संकरः । तन्मूला चेयं विधातुः पुनः पुनर्निशाशशियोजनायां दमयन्तीनलयोजनाभ्यासत्वोत्प्रेक्षा' इति जीवातुः ।

तर्हि परं केवलं पृथौ विशाले तवैव स्तनद्वये अतिपीनत्वात्, नान्यस्य तत्कुचत्वात् । पृथु-शब्दो भाषितपुंस्कः ॥

एकः सुधांशुर्न कथंचन स्यात्तृप्तिक्षमस्त्वन्नयनद्वयस्य ।
त्वल्लोचनासेचनकस्तदस्तु नलास्यशीतद्युतिसद्वितीयः ॥ ११९ ॥

एक इति ॥ एकोऽसहायः सुधांशुश्चन्द्रोऽतिविशालस्य त्वन्नयनद्वयस्य कथंचन केनापि प्रकारेण तृप्तिक्षमः संतर्पणसमर्थो यतो न स्यान्न भवेत् । ततस्तः कारणात् स चन्द्रो नलास्य-लक्षणो यः शीतद्युतिश्चन्द्रस्तेन सद्वितीयः ससहायः सन् त्वल्लोचनयोस्तव नेत्रयोरासेचनको निर्भरीयदतृप्तिकारकोऽस्तु भवतु । चकोरतुल्यस्य त्वन्नेत्रद्वयस्यैकेन चन्द्रेण तृप्त्यभावाच्चन्द्रद्वयेन भवितव्यम् । तत्र चन्द्रसहकारी नलास्यचन्द्रो भवत्विति मनोरथः । तस्मात्त्वयं नलः कार्य इति भावः । 'तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शने' इत्यमरः ॥

अहो तपःकल्पतरुर्नलीयस्त्वत्पाणिजाग्रस्फुरदङ्कुरश्रीः ।
त्वद्भ्रूयुगं यस्य खलु द्विपत्री तवाधरो रज्यति यन्कलन्यः ॥ १२० ॥
यस्ते नवः पल्लवितः कराभ्यां स्मितेन यः कोरकितस्तवास्ते ।
अङ्गम्रदिम्ना तव पुष्पितो यः स्तनश्रिया यः फलितस्तवैव ॥ १२१ ॥

अहो इति ॥ यस्त इति ॥ (युग्मम्) नलीयो नलसंबन्धी तपोरूपः कल्पतरुः कल्प-वृक्षः अहो आश्चर्यरूपः । आश्चर्यरूपत्वमेव विशेषणैः प्रकटयति—कीदृशः कल्पतरुः । त्वत्पाणि-जाग्राणि तव नखाग्राण्येव स्फुरन्ती प्रकाशमाना अङ्कुरश्रीरङ्कुरशोभा यस्य । [illegible] । अङ्कुरानन्तरं त्वद्भ्रूयुगमेव यस्य कल्पवृक्षस्य द्विपत्री पत्रद्वयम् । तवाधर ओष्ठ एव यस्य 'कन्दलो नव्यमाङ्कुरः ।' नालमित्यर्थः । रज्यति रक्तो भवति । प्रथमाङ्कुरस्यैव [illegible] त्वात् । यस्ते कराभ्यां नवो नूतनः पल्लवितः पल्लवयुक्तो विद्यते [illegible] हस्तावेव यस्य पल्लवौ जातौ । यः तव स्मितेन कोरकितः कलिकायुक्त आस्ते । पल्लवानन्तरं कोरका भवन्ति, स्मितस्य सितत्वात्कोरकत्वम् । कोरकादेरपि विकसनात् पुष्पत्वं [illegible] तवाङ्गम्रदिम्ना शरीरमार्दवेन पुष्पितः पुष्पयुक्तो विभाति । अङ्गान्येव [illegible] पुष्पस्थाने जातानि । यः तवैव स्तनश्रिया फलितः फलयुक्तः । तव स्तनावेव यस्य फलस्थाने जातौ । अतीवाश्चर्यजनकोऽयं नलीयतपःकल्पवृक्षः । एवंविधा त्वां [illegible] तेनैव [illegible] त्वमेवेति भावः । अन्यस्य तरोरेते पदार्थाः क्रमेण भवन्ति, एतस्य [illegible] अहो-शब्द आश्चर्यं द्योतयति । [illegible] [illegible] ॥

कांसीकृतासीत्खलु मण्डलीन्दोः संसक्तरश्मिप्रकरा स्मरेण ।
तुला च नाराचलता निजैव मिथोनुरागस्य समीकृतौ वाम् ॥ १२२ ॥

कांसीति ॥ उत्प्रेक्षे । हे भैमि, वां तव नलस्य च मिथः परस्परं योऽनुरागस्तस्य समीकृतौ समीकरणे नलस्य त्वयि यावाननुरागः तावानेव तव नलेऽनुराग इत्युभयोरनुरागस्य तुलनार्थं स्मरेणेन्दोश्चन्द्रस्य मण्डली कांसीकृता परिमेयवस्तुधारणार्थं कांस्यपात्रमिव कृतासीत् । किंभूता—संसक्ताः संबद्धा रश्मिप्रकराः किरणसमूहा रज्जुसमूहाश्च यस्याः सा । निजैव स्वीयैव नाराचलता बाणवल्ली तुला च तुलादण्डश्च कृता । कंसाय पात्रविशेषाय हितं कंसीयम् 'तस्मै हितम्' इति 'प्राक्क्रीताच्छः' तस्य विकारः 'कंसीयपरशव्ययोः—' इति यञ् । छस्य लुक् कांस्यम्, अकांस्यं कांस्यं संपन्नं कांसीकृतम् । च्वौ 'क्यच्व्योश्च' इति हल उत्तरस्य 'आदेः परस्य' इति यकारमात्रस्य लोपः । अवर्णस्य 'अस्य च्वौ' इतीत्वम् । 'कंसीकृता' इति पाठे 'कंसो दैत्यान्तरेऽपि च । कांस्ये च कांस्यपात्रे च' इति विश्वः । 'किरणप्रग्रहौ रश्मी' इत्यमरः ॥

सत्त्वस्रुतस्वेदमधूत्थसान्द्रे तत्पाणिपद्मे मदनोत्सवेषु ।
लग्नोत्थितास्त्वत्कुचपत्रलेखास्तन्निर्गतास्तं प्रविशन्तु भूयः ॥ १२३ ॥

सत्त्वेति ॥ हे भैमि, मदनोत्सवेषु तत्पाणिपद्मे नलहस्तकमले पूर्वं लग्नाः पश्चादुत्थिताः त्वत्कुचयोः पत्रलेखाः पत्रावलयः तन्निर्गता नलपाणिपद्मेनैव लिखिता भूयस्तमेव पाणिपद्मं प्रविशन्तु । किंभूते पाणिपद्मे—सत्त्वेन सत्त्वभावेन स्रुतो जनितः स्वेदो घर्मोदकं तल्लक्षणं मधूत्थं सिक्थकं तेन सान्द्रे निबिडे । रतोत्सववशात्पत्रावल्या मार्जनं भवत्वित्यर्थः । कारणे कार्यस्य लय उचित इति भावः । मधूत्थे यथालिखितमेतीति मधूत्थपदम् । पद्मशब्दः पुंलिङ्गेऽपि, ततः 'तम्' इति युज्यते ॥

बन्धाढ्यनानारतमल्लयुद्धप्रमोदितैः केलिवने मरुद्भिः ।
प्रसूनवृष्टिं पुनरुक्तमुक्तां प्रतीच्छतं भैमि युवां युवानौ ॥ १२४ ॥

बन्धाढ्येति ॥ हे भैमि, युवानौ तरुणौ युवां केलिवने क्रीडावने मरुद्भिर्वायुभिः पुनरुक्तां पुनःपुनर्मुक्तां त्यक्तां प्रसूनवृष्टिं प्रतीच्छतं गृह्णीतम् । किंभूतैर्मरुद्भिः—बन्धैः पद्मासनादिसुरतबन्धैराढ्यं विस्तृतं नानारतमनेकप्रकाररतं तदेव मल्लयुद्धं तेन प्रमोदितैः प्रकर्षेण परिमलं प्रापितैः । संभोगेन पुष्पेषु च्युतेषु पुनःपुनर्मोचनं संगच्छते । अथ च मल्लयुद्धहृष्टैर्देवैर्मुक्तां पुष्पवृष्टिं मल्लौ गृह्णीतः । 'मरुतौ पवनामरौ' इत्यमरः । युवतिश्च युवा च 'पुमान्स्त्रिया' इत्येकशेषः ॥

अन्योन्यसंगमवशादधुना विभातां तस्यापि तेऽपि मनसी विकसद्विलासे ।
स्रष्टुं पुनर्मनसिजस्य तनुं प्रवृत्तमादाविव द्व्यणुककृत्परमाणुयुग्मम् ॥१२५॥

अन्योन्येति ॥ अधुनोभयसंबन्धानन्तरं अन्योन्यसंगमवशात्परस्परसंयोगवशाद्विकसन्विलासो विभ्रमो ययोस्ते तस्यापि नलस्यापि तेऽपि तवापि मनसी परमाणुयुग्ममिव विभातां

१ 'अत्र रूपकमलंकारः' इति साहित्यविद्याधरी । 'अत्रेन्दुमण्डलादौ कंसादिरूपणादेव सरस्य कार्यकारणरूपसिद्धेरेकदेशविवर्तिरूपकम्' इति जीवातुः । २ 'अत्राशीरलंकारः रूपकं च' इति साहित्यविद्याधरी । ३ 'अत्र रूपकप्रतीयमानोत्प्रेक्षाश्लेषालंकारसंसृष्टिः' इति साहित्यविद्याधरी ।

शोभेताम् । किंभूतं परमाणुयुग्मम्—मनसिजस्य कामस्य तनुं शरीरं पुनः स्रष्टुं प्रवृत्तम् । अत एवादौ द्व्यणुकं करोतीति द्व्यणुककृत् । 'सक्रियाभ्यां द्वाभ्यां परमाणुभ्यामेकं द्व्यणुकमारभ्यते, एवं क्रमेण महत्कार्यमारभ्यते' इति सिद्धान्तः । दग्धस्य कामस्य मनोजन्यत्वान्मनसिजत्वम् । ततश्च तदुत्पत्त्यर्थं मनोद्वयेन द्व्यणुकमारब्धव्यम् । तत्तु येन केनचिन्मनोद्वयेन कर्तुं न शक्यते, एतादृशपरस्परानुरागस्य कुत्रचिदप्यभावात् । ततश्च युवयोरेव मनोद्वयेन कर्तुं शक्यते नान्येनेति भावः । युवयोः परस्परानुरागबाहुल्यात्कामः शरीरी स्यादिति भावः ॥

कामः कौसुमचापदुर्जयममुं जेतुं नृपं त्वां धनु-
र्वल्लीमव्रणवंशजामधिगुणामासाद्य माद्यत्यसौ ।
ग्रीवालंकृतिपट्टसूत्रलतया पृष्ठे कियल्लम्बया
भ्राजिष्णुं कपरेखयेव निवसत्सिन्दूरसौन्दर्यया ॥ १२६ ॥

काम इति ॥ असौ कामः कौसुमेन चापेन दुर्जयं जेतुमशक्यममुं नृपं नलं जेतुमव्रणे निर्दोषे वंशे जाताम्, अथ च घुणादिजन्यव्रणरहितवेणुजाताम् [illegible] सौन्दर्यादि-गुणयुक्तां, आरोपितमौर्वीकां च त्वां त्वद्रूपां धनुर्वल्लीं धनुर्लतामासाद्य [illegible] अधुना नलं जेष्यामीति तुष्यति । किंभूतां धनुर्वल्लीम्—निवसता विद्यमानेन सिन्दूरेण सौन्दर्यं लोहितिमा यस्यां तया पृष्ठे धनुःपृष्ठभागे, अथ च पश्चाद्भागे कियल्लम्बया किंचिद्दीर्घया ग्रीवा मध्यं कण्ठश्च तस्या अलंकृतिरलंकारभूता पट्टसूत्रलता तया । पीतेन पट्टसूत्रेणेत्यर्थः । भ्राजिष्णुं शोभमानाम् । कषेव—कषरेखयेव परीक्षारेखयेव । कषणभारया धनुर्भेदकेनुपरीक्षायां [illegible] सिन्दूरं चलति चेत्तदा परिपाको नैव इति धानुष्कप्रसिद्धिः । कामस्य त्वां विना नलवशीकरणं किमपि न सिद्धत इति भावः । भ्राजिष्णुम्, 'भुवश्च' इति चकारादिष्णुच् ॥

त्वद्गुच्छावलिमौक्तिकानि गुलिकास्तं राजहंसं विभो-
र्वेध्यं विद्धि मनोभुवः स्वमपि तां मञ्जुं धनुर्मञ्जरीम् ।
यन्नित्याङ्कनिवासलालिततनज्याभज्यमानं लस-
न्मध्यबिला विलासमखिलं रोमालिरालम्बते ॥ १२७ ॥

त्वदिति ॥ हे भैमि, त्वं विभोः मनोभुवः कामस्य त्वद्गुच्छावलेः तव हारविशेषस्य मौक्तिकान्येव गुलिकाः मृत्पिण्डगोलकानिति जानीहि । तथा—तं राजहंसं नृपश्रेष्ठं नलं वेध्यम्, अथ च तं नलमेव राजहंसाख्यं पक्षिविशेषं कामस्य वेध्यं लक्ष्यं विद्धि । तथा—स्वमात्मानमपि तां प्रसिद्धां मञ्जुं मनोज्ञां धनुर्मञ्जरीं धनुर्लतां जानीहि । यत्र रोमाली रोमराजिर्यस्या धनुर्लताया नित्यं मध्यप्रदेशे [illegible] लालिततनुः [illegible] मध्यभागं [illegible] संपूर्णं विलासमवलम्बते [illegible] ।

---

१ [illegible] । [illegible] । [illegible] इति साहित्यविद्याधरी । २ [illegible] । [illegible] साहित्यविद्याधरी । [illegible] इति जीवातुः ।

किंभूता रोमालिः—लसन्ती नाभ्येव मध्ये विलं यस्याः सा। गुलिकाधारणच्छिद्रस्थाने नाभिरेव जातेत्यर्थः। गुलिकाधनुरिति नाम(क)स्वरूपेण रत्नेण नलः कामस्य जय्यो नान्येनेति भावः। धनुर्मौर्वीमध्ये गुलिकारोपणस्थानविलं भवति, तदत्र नाभिरेव, रोमालिर्मौर्वी, अङ्गयष्टिर्धनुः, स राजहंसो वेध्य इत्यर्थः। विभुस्तु गुलिकाधनुःक्रीडां करोति। 'हारभेदा यष्टिभेदा गुच्छगुच्छार्धगोस्तनाः' इत्यमरः। 'राजहंसो नृपश्रेष्ठे कादम्बकलहंसयोः' इति विश्वः॥

पुष्पेषुश्चिकुरेषु ते शरचयं त्वद्भालमूले धनू
रौद्रे चक्षुषि तज्जितस्तनुमनुभ्राष्ट्रं च यश्चिक्षिपे।
निर्विद्याश्रयदाश्रयं स वितनुस्त्वां तज्जयायाधुना
पत्रालीस्त्वदुरोजशैलनिलया तत्पर्णशालायते॥ १२८॥

पुष्पेषुरिति॥ तेन नलेन सौन्दर्यादिना गुणेन जितोऽत एव निर्विद्य वैराग्यं प्राप्य यः पुष्पेषुः कामस्ते तव चिकुरेषु केशपाशेषु पुष्पेषुत्वात्स्वं शरचयं बाणसमूहं चिक्षिपे त्यक्तवान्। तव भालमूले ललाटमूले भ्रूस्थाने स्वं धनुस्त्यक्तवान्। रौद्रे रुद्रसंबन्धिनि दारुणे चक्षुष्यनुभ्राष्ट्रे तृतीयनेत्रलक्षणे भर्जनपात्रे स्वीयां तनुं च चिक्षिपे क्षिप्तवान्। स कामोऽधुना वितनुः शरीररहितोऽथ च विशेषेण कृशः सन् तज्जयाय तं नलं जेतुं त्वामेवाश्रयमाश्रयत। तथा—तव उरोजौ स्तनावेव शैलौ तावेव निलयः स्थानं यस्याः सा तत्र विद्यमाना पत्रालिः पत्रवल्लीपङ्क्तिः तस्य कामस्य पर्णशालेवाचरति भवति। भैमीकेशपाशपुष्पाणां कामजनकत्वात्कामबाणत्वम्। भ्रुवोरपि कामजनकत्वाद्धनुष्ट्वम्। स्तनपर्वतनिलयपत्रवल्लीनामपि तज्जनकत्वाद्गृहत्वम्। त्वयैव शस्त्रेण कामेन स जेतव्यो नान्यत्किंचित्तज्जयायेति त्वदाश्रयेण मदनस्त्वं पीडयतीत्यर्थः। अन्योऽपि जितोऽस्त्रादि त्यक्त्वाग्नौ देहं त्यक्त्वा शत्रुं जेतुं पर्वते पर्णशालामधिष्ठाय तपस्यति। अनुभ्राष्ट्रम्, सप्तम्यर्थे सादृश्ये वाव्ययीभावः। क्षिपेः स्वरितेत्त्वात्तङ्[२]॥

इत्यालपत्यथ पतत्त्रिणि तत्र भैमीं सख्यश्चिरात्तदनुसंधिपराः परीयुः।
शर्मास्तु ते विसृज मामिति सोऽप्युदीर्य वेगाज्जगाम निषधाधिपराजधानीम्॥

---

१ 'अत्र रूपकमलंकारः' इति साहित्यविद्याधरी। 'अत्र मौक्तिकादौ गुलिकाद्यवयवरूपणादवयविनि कामे वेद्धृत्वरूपणस्य गम्यमानत्वादेकदेशविवर्ति सावयवरूपकमलंकारः' इति जीवातुः।
२ 'अत्र दमयन्तीवद्धकुसुमैर्भ्रूयुगेन च सह शरचयधनुषोरभेदप्रतिपादनाद्भेदेऽभेदरूपातिशयोक्तिसमासोक्तिरूपकोपमालंकारसंसृष्टिः। ननु स्तनयोः शैलत्वनिरूपणमलंकारकृतां दूषणम्। यदुक्तं काव्यप्रकाशे—'उपमाया उपमानस्य जातिप्रमाणगतं न्यूनत्वमधिकता वा सादृश्यानुचितार्थत्वं दोषः। यथा—'पातालमिव नाभिस्ते स्तनौ क्षितिधरोपमौ' इति। सत्यमेतत्। किं त्वत्र निर्भिन्नपुरुषव्यापारवर्त्मनि क्रियमाणमेतद्रूपकं गुणातिशयतामेवाश्रयति, न तु दोषताम्। तथा पर्णशालायते इत्युपमाया एतद्रूपकमङ्गम्। यदि चैतन्न क्रियते तदा कवेरनौचित्यं स्यादधुना त्वलंकारातिशयप्रतिपादनादौचित्यमेव' इति साहित्यविद्याधरी। 'अत्र पूर्वार्धे शरचापादीनां पूर्वोक्तपुष्पादिविषयनिगरणेन तदभेदाध्यवसायाद्भेदेऽभेदलक्षणातिशयोक्तिः। तत्पर्णशालायते इत्युपमा च। तया चोत्थापितेन त्वामाश्रयमिति रूपकेण संकीर्णा व्यञ्जकाप्रयोगाद्गम्या। कामस्याश्रयाश्रयणोत्प्रेक्षेति संकरः' इति जीवातुः।

नेन चित्तवृत्तेर्न व्यवदधे व्यवहितीभूतम् । यद्यपि दूरं गतस्तथापि प्रियबन्धुत्वात्तस्या मनस्यवर्तिष्टैवेत्यर्थः । बन्धुमनुव्रजतो वारि अवधिर्भवति । 'औदकान्तात्प्रियं पान्थमनुव्रजेत्' इति वचनात् । दृष्टः पार्श्वेऽपीति वा । 'तदनेन' इति पाठः । 'आराद्दूरसमीपयोः' इत्यमरः । विप्रचकृषे, अकर्मकत्वविवक्षया भावे लिट्[1] ॥

अस्तित्वं कार्यसिद्धेः स्फुटमथ कथयन्पक्षतेः कम्पभेदै-
राख्यातुं वृत्तमेतन्निषधनरपतौ सर्वमेकः प्रतस्थे ।
कान्तारे निर्गतासि प्रियसखि पदवी विस्मृता किं नु मुग्धे
मारोदीरेहि यामेत्युपहृतवचसो निन्युरन्यां वयस्याः ॥ १३२ ॥

अस्तित्वमिति ॥ अथ तयोर्मध्ये एको हंसो निषधनरपतौ नलसमीप एतत्सर्वं वृत्तं निष्पन्नम् । वचसेति शेषः । आख्यातुं कथयितुं प्रतस्थे । किं कुर्वन्—पक्षयोः कम्पभेदैः कम्पविशेषैः कृत्वा भैमीप्राप्तिरूपायाः कार्यसिद्धेरस्तित्वं सद्भावं स्फुटं कथयन् । इति पूर्वोक्तमार्गेणोपहृतमुक्तं वचो याभिस्ता वयस्याः सख्योऽन्यां भैमीं निन्युः । गृहं प्रापयामासुरित्यर्थः । इति किम्—हे प्रियसखि, त्वं कान्तारे दुर्गमे वर्त्मनि विषये निर्गतासि प्रस्थितासि नु, अयि मुग्धे भ्रान्तचित्ते भैमि, पदवी मार्गः विस्मृता किं त्वया, त्वं मारोदीः, एह्यागच्छ । वयं सर्वा मिलित्वा याम गृहं प्रति गच्छाम इति । पक्षकम्पनविशेषः कार्यसिद्धिसूचकः । अन्योऽपि हस्तचालनादिना कार्यसिद्धिं कथयति । 'कान्तारं वर्त्म दुर्गमम्' इत्यमरः । अस्तीत्यव्ययात् त्वप्रत्ययः । आख्यातेति वा पाठः[2] ॥

सरसि नृपमपश्यद्यत्र तत्तीरभाजः स्मरतरलमशोकानोकहस्योपमूलम् ।
किसलयदलतल्पम्लायिनं प्राप तं स ज्वलदसमशरेषुस्पर्धिपुष्पर्द्धिमौलेः ॥

सरसीति ॥ स हंसो यत्र सरसि नृपं पूर्वमपश्यत्तस्य सरसस्तीरं भजते तस्य अशोकानोकहस्याशोकवृक्षस्य उपमूलं मूलसमीपे तं नलं प्राप । किंभूतम्—स्मरतरलं मदनजनितपीडया चञ्चलम् । तथा—किसलयानामग्रपल्लवानां दलानि कोमलाङ्कुरास्तेषां तल्पं शय्या तस्यापि म्लायिनं म्लानशीलम् । किंभूतस्यानोकहस्य—ज्वलन्तो देदीप्यमाना असमशरेषवः कामबाणास्तैः सह स्पर्धन्ते एवंशीलानि पुष्पाणि तेषामृद्धिः समृद्धिस्तद्युक्तो मौलिरग्रभागो यस्य । विरहव्यथया हंसं प्रतीक्षमाणस्तत्रैव स्थितो यत्र पूर्वं हंसेन दृष्टः । अशोकपुष्पाणां रक्तत्वाज्ज्वलत्कामबाणतुल्यत्वम्[3] ॥

परवति दमयन्ति त्वां न किंचिद्वदासि
द्रुतमुपनम किं मामाह सा शंस हंस ।
इति वदति नलेऽसौ तच्छशंसोपनम्रः
प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः ॥ १३४ ॥

---

१ 'अत्रातिशयोक्तिविरोधालंकारः । यदुक्तं रुद्रटे—'यस्मिन्द्रव्यादीनां परस्परं सर्वथा विरुद्धानाम् । एकत्रावस्थानं समकालं भवति स विरोधः' इति । वसन्ततिलकावृत्तम्' इति साहित्यविद्याधरी । 'समीपस्थस्य विप्रकृष्टत्वं दूरस्थस्य संनिकृष्टत्वं चेति विरोधाभासः' इति जीवातुः । २ 'अत्रोत्प्रेक्षालंकारः स्रग्धरा वृत्तम्' इति साहित्यविद्याधरी । ३ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी ।

परवतीति ॥ नले उन्मादवशादिति वदति असौ हंस उपसन्नः समीपमागतः सन् त
नोद्वृत्तान्तं सर्वं शशंस कथयति स्म । इतीति किम्—चित्ते प्रत्यक्षीकृतां भैमीं प्रत्याह ।
हंसमपि—हे परवति पित्रधीनत्वात्परतन्त्रे दमयन्ति, अहं त्वां प्रति अद्यापि नागच्छ
त्वादि किमपि न वदामि । स्वातन्त्र्याभावात् । हे हंस, त्वं द्रुतं शीघ्रमुपसन्न नलसमीपम
गच्छ । सा भैमी मामुद्दिश्य किमाहेत्यनयोत्कण्ठेन कथयेति । वाक्यार्थः कर्म । तद्वचनानन्तर
नैवायं गत्वा कथं कथितवानित्याशङ्क्याह—प्रियस्येति । हि यस्मात्सुकृतां धार्मिकाणां प्रियं
स्वाभीष्टमनु लक्षीकृत्य तत्स्पृहायाः स्वेच्छाया एव विलम्बो, न त्वन्यस्य । यदैव तेषां वस्तु
प्राप्तुमिच्छा भवति तदैव पुण्यवशात्प्राप्नुवन्तीति भावः । 'क्व स्पृहायाः' इति केचित् ।
स्पृहाया विलम्बः क्वेति योजनीयम् । सुकृताम्, 'सुकर्मपापमन्त्रपुण्येषु कृञः' इति क्विप् ।
आहेति विभक्तिप्रतिरूपकमव्ययं भूतार्थे ॥

कथितमपि नरेन्द्रः शंसयामास हंसं
किमिति किमिति पृच्छन्भाषितं स प्रियायाः ।
अधिगतमथ सान्द्रानन्दमाध्वीकमत्तः
स्वयमपि शतकृत्वस्तत्तथान्वाचचक्षे ॥ १३५ ॥

कथितमिति ॥ स नरेन्द्रो नलो हंसेन कथितमपि प्रियाया भैम्या भाषितं वचनं
किमिति किमिति कीदृक्कीदृगित्येवमादरातिशयेन हंसं पृच्छन्पुनःपुनः कथनाय शंसयति स्म । अथा-
नन्तरं सान्द्रो निबिड आनन्द एव माध्वीकं मधु तेन मत्तो हृष्टः सन् अधिगतं ज्ञातार्थं तद्भै-
मीभाषितं स्वयमपि शतकृत्वोऽनेकवारं हंसेन यथोक्तं तथैव ईदृग्भैम्योक्तमीदृग्भैम्योक्तमिति
चिरःकम्पनादिना पुनरन्वाचचक्षेऽनूदितवान् । अत्याहतत्वेन जातिः । मद(त्त)विशेषणोक्त्या-
पि पुनर्वादयति स्वयमपि पुनर्वदति । 'मधु माध्वीकमद्ययोः' इत्यमरः । 'माध्वीकं' इति
पाठे मृद्वीकाया द्राक्षाया विकारो माध्वीकम् । शतैः शब्दकर्मत्वादणौ कर्तुर्ण्यन्ते कर्मत्वम् ।
शतवारं शतकृत्वः 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति कृत्वसुच् ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ १३६ ॥

श्रीहर्षमिति ॥ तार्तीयीक इति द्वैतीयीकवत् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे

तृतीयः सर्गः समाप्तः ॥

---

१ 'अस्मन्निमित्तमित्यनेनोद्देशः' इति साहित्यविद्याधरी । २ 'क्व स्पृहायाः' इति ... ।
...ऐश्वर्ये च माध्वीकं द्राक्षा' इति साहित्यविद्याधरी ।

चतुर्थः सर्गः ।

अथ नलस्य गुणं गुणमात्मभूः सुरभि तस्य यशःकुसुमं धनुः ।
श्रुतिपथोपगतं सुमनस्तया तमिषुमाशु विधाय जिगाय तान् ॥ १ ॥

अथेति ॥ अथ हंसगमनानन्तरमात्मभूर्मदनः श्रुतिपथे कर्णमार्गे उपगतं प्राप्तमाकर्णितं नलस्य गुणं सौन्दर्यादिरूपगुणं गुणं मौर्वीं विधाय कृत्वा, तथा—वर्णितं सुरभि ख्यातं सुगन्धि च तस्य यशोलक्षणं कुसुमं धनुर्विधाय, तथा—श्रुतिपथोपगतं श्रुतमाकर्णकृष्टं च तमेव राजानं नलं सुमनस्तया मनोपितया कुसुमत्वेन च इषुं बाणं विधाय आशु तां भैमीं जिगाय जितवान् । अन्यस्यान्यत्वकरणं देवत्वेन संभाव्यते हंसमुखात्तं श्रुत्वा झटिति कामपीडासहिता जातेति भावः । नले तदनुरागपोषार्थं विप्रलम्भवर्णनमनेन सर्गेण क्रियते । निर्वेदादयो विभावा आलस्यादयश्च विप्रलम्भशृङ्गारपोषार्थं यथायथमूहनीयाः । 'सुगन्धे च मनोज्ञे च सुरभि' इति विश्वः । जिगाय, 'सन्लिटोर्जेः' इति कुत्वम् ॥

यदतनुज्वरभाक्तनुते स्म सा प्रियकथासरसीरसमज्जनम् ।
सपदि तस्य चिरान्तरतापिनी परिणतिर्विषमा समपद्यत ॥ २ ॥

यदतन्विति ॥ अतनुज्वरभाक्कामजनितसंतापभाक्सा भैमी प्रियकथा नलगोष्ठीत्वल-क्षणा सरसी तस्या विप्रलम्भाख्यशृङ्गाररूपे रसे मज्जनं तस्यां रसेन प्रीत्या मज्जनम् । साद-रमाकर्णनमित्यर्थः । तनुते स्म चकार । तस्य मज्जनस्य सपदि परिणतिः परिपाकः विषमा दुःसहा समपद्यत जाता । किंभूता—चिरं चिरकालमान्तरं मनस्तापयत्येवंशीला । नलगुणा-कर्णनजकामपीडाशान्त्यर्थं तत्कथया विरहपीडानाशो भविष्यतीति बुद्ध्या सादरं तत्कथाया-माकर्णितायां प्रत्युत तस्या उद्दीपकत्वात्पूर्वापेक्षयातितमां सा कथा विरुद्धार्थजनिका जातेति भावः । योऽपि ज्वरी सरोजलस्नानं करोति तस्य विषमाख्यो ज्वरो भवति । ज्वरिणस्तदा स्नानमपि विषमत्वजनकं भवति, सरसीस्नानं तु सुतरामिति सरसीपदम् ॥

ध्रुवमधीतवतीयमधीरतां दयितदूतपतद्गतवेगतः ।
स्थितिविरोधकरीं द्व्यणुकोदरी तदुदितः स हि यो यदनन्तरः ॥ ३ ॥

---

१ 'स्मरेण सा जिता' इति पदेन विप्रलम्भस्योपक्षेपः कृतः । तत्र रसस्वरूपं तद्ग्रन्थान्तरोक्तं संक्षेपतो लिख्यते । तदुक्तं भरते—'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' । तत्र 'विभावा आलम्बनोद्दी-पनभेदेन ललनोद्यानादयः । अनुभावाः कटाक्षभुजाक्षेपादयः । सहकारिणश्च निर्वेदाद्यास्त्रयस्त्रिंशत् । एतैर्व्यक्तीकृतः स्थायिभावो रसः' इत्यभिधीयते । तत्र स्थायिभावाः 'रतिर्हासश्च शोकश्च—'इत्यादयोऽष्टौ । 'स्तम्भः स्वेदोऽथ रोमाञ्चः' इत्यादयोऽष्टौ सात्त्विकाः । तथा 'रतिर्देवादिविषया व्यभिचारी तथाञ्जितः । भावः प्रोक्तः' इति भावस्य लक्षणम् । ते च रसाः कस्यचिन्मते दश, कस्यचिन्मते नव, कस्यचिन्मतेऽष्टौ ॥ यदुक्तं रुद्रटे—'शृङ्गारवीरकरुणा'—इत्यादि तत्र सामान्यशृङ्गारलक्षणम् । यदुक्तं तत्रैव—'व्यवहारा-त्पुंनार्योः' इत्यादि । अथ विप्रलम्भनामा शृङ्गारोऽयं चतुर्विधो भवति । 'प्रथमानुरागमान—' इत्यादि ॥ संभोगशृङ्गारलक्षणमष्टादशसर्गे प्रतिपादयिष्यामः । अत्र रूपकदीपकश्लेषसंकरः' इति साहित्यविद्याधरी ।
२—'अत्र रूपकम् । अर्थान्तरप्रतीतिस्तु रूपकादेव । तेन न समासोक्तिः' इति साहित्यविद्याधरी । ज्वरशान्त्यर्थाद्रसमज्जनात्तदुद्रेकरूपानर्थोत्पत्तेर्विषमालंकारभेदः ।' इति जीवातुः ।

ध्रुवमिति ॥ मृगुचोदर्पतिकृशोदरी इयं भैमी दयितस्य नलस्य दूतो हंसस्तस्य पतत्त्वां पक्षाभ्यां गतो यो वेगस्तस्माद्दयितदूतस्य पततोः पक्षयोर्गते गमने यो वेगस्तस्माद्वा, पक्षाभ्यां गतं गमनं यस्य स पक्षी दयितदूतश्चासौ पतद्गतश्चेति वा, तस्य वेगस्तस्मात्स्वकाद्यात्स्थितिः सीमर्यादा तस्या विरोधकरीं विरोधिनीमधैर्यतां धैर्याभावं शैघ्र्यं चाधीतवती पठितवती स्वीचकार । ध्रुवमुत्प्रेक्षे । अप्ययने न्यायं प्रमाणयति—हि यस्माद्यो यस्मादनन्तर एवाव्यव-हितः स तदुदितस्तस्मादेवोत्पद्यते । 'यदनन्तरमेव यद्भवति तत्तस्य कारणम्' इति गौतमः । तस्मिन्हंसे गतमात्रे एतस्या अधीरता जातेति तस्मादेवाधीता, इति सहोत्प्रेक्षा । वेगतः, 'आख्यातोपयोगे' इत्यपादानत्वम् । विरोधकरीम्, हेतौ टः ॥

अतितमां समपादि जडाशयं स्मितलवस्मरणेऽपि तदाननम् ।
अजनि पङ्गुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जनः ॥ ४ ॥

अतीति ॥ तदाननं भैमीमुखं स्मितलवस्य हास्यलेशस्य स्मरणविषयेऽप्यतितमां जडाशयं जडाभिप्रायं समपादि जातम् । विरहपीडया स्मितलेशमपि नास्मार्षीत् । स्मितं नाकरोदित्यत्र किं वाच्यम् । तदीक्षणखञ्जनः तस्या नयनरूपः खञ्जरीटोऽपाङ्गे नेत्रप्रान्तलक्षणे निजाङ्गणे भ्रमि-कणेऽपि विलासगमनलेशेऽपि पङ्गुः खञ्जोऽजनि जातः । अन्योऽपि निजाङ्गणे सुखेन भ्रमति तथा पङ्गुरङ्गणे भ्रमति, अयं तु तत्राप्यसमर्थोऽभूत् । खञ्जयतीति अन्यानिवलोकनमात्रेण पङ्गूकरोति स स्वीयगमनेऽपि पङ्गुर्जात इत्याश्चर्यम् । विरहपीडया कटाक्षावलोकनमपि विसस्मार । अतितमाम् । स्वार्थे तमप् । समपादि, कर्तरि 'चिण्ते पदः' इति चिण् । अङ्गणं, दन्त्यनपपाठः । 'अजिरं त्वङ्गणं तत्स्यात्कालिन्द्यामङ्गना नता' इति विश्वप्रकाशः ॥

किमु तदन्तरुभौ भिषजौ दिवः स्मरनलौ विशतः स्म विगाहितुम् ।
तदभिकेन चिकित्सितुमाशु तां मखभुजामधिपेन नियोजितौ ॥ ५ ॥

किम्विति ॥ स्मरनलौ तदन्तस्तस्या अन्तर्हृदयं विगाहितुमालोडितुं विशतः स्म प्रविष्टौ । उत्प्रेक्षते—तदभिकेन तस्या भैम्याः कामुकेन मखभुजां देवानामधिपेनेन्द्रेण आशु शीघ्रं तां भैमीं चिकित्सितुं नीरोगां कर्तुं शरीरस्थितिं विचारयितुं च नियोजितावत एतौ दिवो भिषजौ स्वर्वैद्यौ आश्विनेयौ किमु । नलो नलविषयो मदनश्च भैम्यन्तःकरणमधितिष्ठतः स्मेति भावः । 'अनुकाभिका—' इत्यभिकशब्दः साधुः । नियोजितौ, चौरादिकाद्युजेः क्तः ॥

श्लोकद्वयेन तापमाह—

कुसुमचापजतापसमाकुलं कमलकोमलमैक्ष्यत तन्मुखम् ।
अहरहर्वहदभ्यधिकाधिकां रविरुचिग्लपितस्य विधोर्विधाम् ॥ ६ ॥

---

१ 'उत्प्रेक्षा हेत्वलंकारः' इति तिलकसाहित्यविद्याधरौ । 'इत्युत्प्रेक्षान्तरगतेनानुमानालंकारेण संकरः' इति जीवातुः । २ 'अङ्गणे' इति पाठस्तेनाङ्गणे न दोषः । हैमापवादरूपोऽलंकारः' इति सुखाव-बोधा । ३ 'अत्र विरोधोक्तिः, रूपकं च' इति साहित्यविद्याधरी । 'अत्रातिशयोक्तिरलंकारः' इति तिलकः । ४ 'उत्प्रेक्षालंकारः' इति तिलकसाहित्यविद्याधरौ । 'देवस्य नलसंबन्धित्वेन सौन्दर्यं व्यज्यते । अत्र चिन्तानाम संचारी भावः सूचितः । 'ध्यानं चिन्तेहितानाप्तेः शून्यता' इति लक्षणात् इति जीवातुः ।

कुसुमेति ॥ तन्मुखं रविरुच्या ग्लपितस्य विधोश्चन्द्रस्य अहरहः प्रत्यहमभ्यधिकाधिकां पूर्वदिनापेक्षया परदिने महतीं विधामवस्थां वहद्दृश्यत दृष्टम्। सर्वजनैरित्यर्थः। किंभूतम्—कुसुमचापजः कामजस्तापो ज्वरस्तेन समाकुलं म्लानमित्यर्थः। यतः—कमलदलकोमलं सुकुमारम्। विरहव्यथया सूर्यकिरणम्लानचन्द्रसदृशं जातमिति भावः। अहरहः, वीप्सायां द्विर्वचनम्, अत्यन्तसंयोगे द्वितीया। अभ्यधिकाया अधिका महती, 'यस्मादधिकम्–' इति ज्ञापकात्, 'पञ्चमी' इति योगविभागात्समासः॥

तरुणतातरणिद्युतिनिर्मितद्रढिम तत्कुचकुम्भयुगं तदा।
अनलसंगतितापमुपैतु नो कुसुमचापकुलालविलासजम्॥ ७॥

तरुणतेति ॥ तस्याः कुचावेव कुम्भयुगं तदा तस्मिन्समये अनलसंगत्या नलप्राप्त्यभावेन वह्निसंगत्या तापं तज्जनितज्वरम्, औष्ण्यं च नो उपैतु न प्राप्नोतु, अपि तु प्राप्नोतु। किंभूतम्—कुसुमचापः कामः स एव कुलालः कुम्भकारस्तस्य विलासः क्रीडा तया जातं विरचितं। तथा—प्रशान्तत्वात्तरुणता तारुण्यं तल्लक्षणया तरणिद्युत्या सूर्यदीप्त्या निर्मितः कृतो द्रढिमा दार्ढ्यं यस्य। कुलालोऽपि घटं कृत्वा आतपे शुष्कं कृत्वाग्नौ प्रक्षिपति। विलासजमिति तापविशेषणं वा। द्रढिमेत्यत्र 'वर्णदृढादिभ्यः ष्यञ्च' इतीमनिचि 'र ऋतोः–' इति रः॥

अधृत यद्विरहोष्मणि मज्जितं मनसिजेन तदूरुयुगं तदा।
स्पृशति तत्कदनं कदलीतरुर्यदि मरुज्वलदूषरदूषितः॥ ८॥

अधृतेति ॥ तदा तस्मिन्समये मनसिजेन कामेन विरहोष्मणि आधिजनिते दाहे मज्जितं यत्तदूरुयुगमधृत जीवशेषमतिष्ठत्। कदलीतरुस्तत्कदनं तस्योरुयुगस्य कदनं साम्यमवस्थां वा तर्हि स्पृशति प्राप्नोति तदूरुयुगसमानः स्यात्, यदि कदलीतरुर्मरौ धन्वदेशे ज्वलद्वह्निदग्धमूषरं क्षारमृत्तिकास्थलं तेन दूषितः पीडितः स्यात्। अतिमृदोः कदलीतरोर्वह्निदग्धे ऊषरे यदि स्थितिः स्यात्तर्हि तदूरुयुगदुःखं कदलीतरुणाप्यनुभूयेत। तदूरुयुगमतितरां संतप्तमभूदिति भावः। मनसिजेति 'सप्तम्यां जनेर्डः', 'हलदन्तात्–' इति सप्तम्या अलुक्। स्पृशति, कालसामीप्ये लट्। 'स्यादूषः क्षारमृत्तिका' इत्यमरः। अस्त्यर्थे 'ऊषशुषिमुष्क–' इति रः। अधृत, 'धृङ् अवस्थाने'॥

स्मरशराहतिनिर्मितसंज्वरं करयुगं हसति स्म दमस्वसुः।
अनपिधानपतत्तपनातपं तपनिपीतसरः सरसीरुहम्॥ ९॥

स्मरेति ॥ दमस्वसुर्भैम्याः करयुगं स्मरशरैराहतिर्हननं तया निर्मितः कृतः संज्वरः संतापो यस्य एवंभूतं सत्तपेन ग्रीष्मेण निपीतं सरस्तस्मिन्विद्यमानं सरोरुहं कमलं हसति स्म। तत्तुल्यं जातमित्यर्थः। किंभूतं कमलम्—अनपिधानो निष्प्रतिबन्धः पतंस्तपनातपः सूर्यातपो यस्मिन्। ग्रीष्मसंबन्धिकमलवदतितरां संतापोऽनुभूयत इत्यर्थः॥

---

१ 'अत्र निदर्शनालंकारः' इति तिलकसाहित्यविद्याधर्यौ। २ 'अत्रानुप्रासश्लेषरूपकालंकारः' इति साहित्यविद्याधरी। ३ 'अत्रातिशयोक्तिरलंकारः' इति तिलकसाहित्यविद्याधर्यौ। ४ 'अत्रोपमालंकारः' इति तिलकसाहित्यविद्याधर्यौ। 'सहतीर्ष्यति असूयति' इति दण्डिना सदृशपर्याये पठितत्वादुपमालंकारः' इति जीवातुः।

मदनतापभरेण विदीर्य नो यदुदपाति हृदा दमनस्वसुः ।
निविडपीनकुचद्वययन्त्रणा तमपराधमधात्प्रतिबध्नती ॥ १० ॥

मदनेति ॥ दमनस्वसुर्हृदा हृदयेन मदनतापभरेण मदनजनितज्वरबाहुल्येन कृत्वा विदीर्य स्फुटित्वा यद् नो उदपाति उत्पतितम्, निविडं निरन्तरं पीनं पीवरं कुचद्वयं तेन कृता यन्त्रणा बन्धनं प्रतिबध्नती सती तं निर्भेदानुत्पतनलक्षणमपराधमधाद्धार विरहसंतापभराद्दमैमीहृदयं विदीर्य गन्तुकामं जातमपि स्तनद्वयेन तमपराधं सोढ्वापि रक्षितम् । अन्यथा मृतमेव स्यात् । स्तनद्वयस्यायमपराधो न तु हृदयस्य । अथ च तमपराधमधात्पीतवती । उत्पतनशीलस्य वस्त्वादेः पाषाणादिना कृता यन्त्रणा प्रतिबन्धं करोति पूर्वनिपातनियमात् पूर्वं पीनशब्दस्योत्तरेण समासं कृत्वा निविडपदेन समासः कर्तव्यः । अधात्, धाञ्धेटोरपि लुङि 'घुमास्था-' इति सिचो लुकि रूपम् ॥

चिन्तामाह—

निविशते यदि शूकशिखा पदे सृजति सा कियतीमिव न व्यथाम् ।
मृदुतनोर्वितनोतु कथं न तामवनिभृत्तु निविश्य हृदि स्थितः ॥ ११ ॥

निविशत इति ॥ 'शूकोऽस्त्री श्लक्ष्णतीक्ष्णाग्रे' इत्यमरः शूकशिखा धान्यकण्टकाग्रभागं पदे चरणे यदि निविशते प्रविशति सा शूकशिखा कियतीमिव व्यथां न सृजति करोति, अपि तु महतीं पीडां करोति । अतः कारणान्मृदुतनोरतिसुकुमाराया भैम्या हृदि निविश्य प्रविश्य स्थितोऽवनिभृत्पर्वतो नलश्च, तु पुनस्तां व्यथां कथं न वितनोतु करोतु, करोत्येव । नलस्तु तस्या हृदयं प्रविश्य स्थितः परं तया न प्राप्तः । अतस्तं सर्वदा विचिन्तयन्त्यास्तस्या महती व्यथा जातेति भावः । इवशब्दो वाक्यालंकारे । निविशते, 'नेर्विशः' इति तङ् ॥

चिन्तया विषयान्तराग्रहणमाह—

मनसि सन्तमिव प्रियमीक्षितुं नयनयोः स्पृहयान्तरुपेतयोः ।
ग्रहणशक्तिरभूदिदमीययोरपि न संमुखवास्तुनि वस्तुनि ॥ १२ ॥

मनसीति ॥ इदमीययोरेतदीययोर्नयनयोः संमुखे अग्रे वास्तु स्थानं यस्यैवंभूते पुरोवर्तिन्यपि वस्तुनि घटादौ ग्रहणशक्तिः ज्ञानसामर्थ्यं नाभूत् । किम्भूतयोः—मनसि सन्तं स्थितं प्रियं नलमीक्षितुं स्पृहयेव वाञ्छयेवान्तर्हृदयप्रदेशमुपेतयोः । विरहव्यथया नेत्रयोर्निरुद्देशत्वेन निःसहत्वात्पुरःस्थितमपि वस्त्वन्यद्ग्रहीतुं न शक्यते । तत्रान्तर्गतत्वे प्रियालोकनवाञ्छायाः कारणत्वेनोत्प्रेक्षा । इदमीययोः, त्यदादित्वाद्वृद्धाच्छः ॥

---

१ 'अत्रातिशयोक्तिरलंकारः' इति तिलकसाहित्यविद्याधर्यौ । 'अत्रातिशयोक्त्युत्थे हृदयस्फोटे निरस्यमाने कुचयन्त्रणानिमित्तत्वमुत्प्रेक्ष्यते । सा च व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः । २ 'अत्रातिशयोक्तिः' इति तिलकव्याख्या । 'अत्रातिशयोक्तिर्वस्तुनिबन्धनिरोधालंकारः' इति साहित्यविद्याधरी । 'अत्र पादे दृष्टान्तत्वेऽपि दुस्सहा व्यथा किंतु हृदये महत्त्वेनेति' इति कैमुत्यन्यायेनार्थान्तरन्यासोऽलंकारः' इति जीवातुः । ३ 'अत्रोत्प्रेक्षा' इति तिलकसाहित्यविद्याधर्यौ ।

चिन्तानुभावं रोदनं मुखानतिं चाह—

हृदि दमस्वसुरश्रुझरप्लुते प्रतिफलद्विरहात्तमुखानतेः ।
हृदयभाजमराजत चुम्बितुं नलमुपेत्य किलागमि तन्मुखम् ॥ १३ ॥

हृदीति ॥ विरहेणात्ता स्वीकृता मुखानतिर्मुखनम्रता यया तस्या दमस्वसुर्भैम्याः अश्रुझरप्लुते बाष्पप्रवाहपरिपूर्णे हृदि वक्षसि प्रतिफलत्प्रतिबिम्बितं तत्तादृगाननं मुखं कर्तृ हृदयभाजं हृदयमध्यवर्तिनं नलं चुम्बितुमुपेत्य समीपं गत्वा आगमि किल आगमिष्यदिवाराजत शुशुभे । विरहवशान्मुखं नम्रं जातम्, अश्रु च निर्गतमित्यर्थः । विरहेणात्ता या मुखानतिस्तस्या हेतोः प्रतिफलदिति वा । तं नलमिति वा । आगमि 'भविष्यति गम्यादयः' इति साधुः ॥

चिन्तानुभावं निःश्वासमाह—

सुहृदमग्निमुदञ्चयितुं स्मरं मनसि गन्धवहेन मृगीदृशः ।
अकलि निःश्वसितेन विनिर्गमानुमितनिह्नुतवेशनमायिता ॥ १४ ॥

सुहृदमिति ॥ मृगीदृशो भैम्या निःश्वसितेन निःश्वासलक्षणेन गन्धवहेन मलयानिलेन मनसि विद्यमानं सुहृदं स्मरं स्मरलक्षणमग्निमुदञ्चयितुमुत्तेजयितुं विनिर्गमेन निःसरणेनानुमितमनुमानज्ञानविषयीकृतं निह्नुतवेशनं गुप्तप्रवेशनं यस्य स चासौ मायी च तस्य भावस्तत्ता सा अकलि अङ्गीकृता । अभ्यस्तेत्यर्थः । विरहान्निःश्वासवायुर्बहिर्निःसरति । बहिर्निःसरणं चान्तःप्रवेशनं विनानुपपद्यमानं सत्तमनुमापयति । वायुना स्वमित्रस्य स्मराग्नेर्वर्धनार्थमन्तःप्रवेशः कृत इति लुप्तोत्प्रेक्षा । बाह्येन वायुनान्तः प्रविश्य निःश्वासरूपेण बहिर्निर्गतमिवेत्यर्थः । विरहवशाद्दृशनिःश्वासो जात इति भावः । अन्योऽपि मायी दुर्गमध्ये स्थितस्य मित्रस्य बहिर्निर्गमनार्थं गुप्तं प्रविशति, निर्गमानन्तरं तस्य गुप्तप्रवेशो दुर्गस्थैरनुमीयते । पद्मिनीत्वान्निःश्वासस्य गन्धवहत्वम् । व्रीह्यादित्वान्मायी ॥

विरहपाण्डिमरागतमोमषीशितिमतन्निजपीतिमवर्णकैः ।
दश दिशः खलु तद्दृगकल्पयल्लिपिकरी नलरूपकचित्रिताः ॥ १५ ॥

विरहेति ॥ तद्दृक् भैमीदृष्टिलक्षणा लिपिकरी चित्रकारिणी विरहेण जनितः पाण्डिमा पाण्डुरत्वं, तथा रागोऽनुरागो लोहितिमा च, तमो मूर्च्छा तल्लक्षणा मषी तस्याः शितिमा कृष्णता स प्रसिद्धो निजः स्वीयः पीतिमा गौरत्वं एतद्रूपैर्वर्णैः कृत्वा । खलु अप्यर्थः । दशापि दिशः नलरूपकैर्नलप्रतिच्छन्दकैः चित्रिताश्चित्रयुक्ता अकल्पयत् । पाण्डिमा तु मुख एव प्रकटः, अन्यत्र तु पीतिमा । स चासौ निज इति विग्रहः । निजो दृक्संबन्धी, तस्या भैम्याः सहजो यः पीतिमेति वा । विरहवशात्पाण्डिमादयो वर्णा जाताः । उन्मादवशाद्दशस्वपि दिक्षु नलमेवापश्यदिति भावः । खलुरिवार्थे वा । लिपिकरीवेत्युत्प्रेक्षा । लिपिकरी, 'दिवाविभा—' इति टे टित्वान्ङीप् ॥

---

१ 'आगमितम्' इति पाठमाश्रित्य 'तारकादित्वादितच्' इत्युक्त्वा 'संजातागमनम्' इति व्याख्यातं जीवातौ । साहित्यविद्याधर्यां 'अपीदं संमतम्' । २ 'अत्रोत्प्रेक्षातिशयोक्तिश्च' इति तिलकसाहित्यविद्याधर्यौ । ३ 'अत्र समासोक्तिरूपकालंकारः' इति साहित्यविद्याधरी । 'उत्प्रेक्षा' इति जीवातुः । ४ 'अत्र रूपकं विशेषश्च' इति साहित्यविद्याधरी ।

स्मरकृतां हृदयस्य मुहुर्दशां बहु वदन्निव निःश्वसितानिलः ।
व्यधित वाससि कम्पमदः श्रिते त्रसति कः सति नाश्रयबाधने ॥१६॥

स्मरकृतामिति ॥ निःश्वसितानिलो निःश्वासवायुः भैम्या हृदयस्य स्मरकृतां दशां पीडां मुहुः बहुतिशयेन सखीजनस्य पुरस्ताद्वदन्निव कथयन्निव अदो हृदयं श्रिते आश्रिते वाससि कम्पं व्यधित चकार । विरहवशान्निःश्वासानां बाहुल्यात्तस्या हृदयं चकम्पे, तत्कम्पवशाद्वस्त्रमपि चकम्प इत्यर्थः । उचितमेतत् । आश्रयस्य बाधने पीडायां सत्यामाश्रितः को हि न त्रसति बिभेति, अपि तु सर्वो बिभेत्येव । कम्पितहृदयाश्रितस्य वस्त्रस्यापि कम्पो युक्तः । वदन्निति, वदितुमिति हेतौ शता । योऽविचारं बहु वदति सोऽप्यधरादिकम्पं करोति ॥

संततमन्तर्ज्वरमाह—

करपदाननलोचननामभिः शतदलैः सुतनोर्विरहज्वरे ।
रविमहो बहुपीतचरं चिरादनिशतापमिषादुदसृज्यत ॥ १७ ॥

करेति ॥ सुतनोर्भैम्या विरहज्वरे वियोगजनिते ज्वरे करपदाननलोचनानि नामानि संज्ञा येषां तत्संज्ञैः शतदलैः कमलैः दिने बहु अपरिमितं पीतचरं पूर्वं पीतं रविमहः सूर्यतेजः अनिशतापमिषात्संततसंतापव्याजाच्चिराच्चिरकालमुदसृज्यत उत्सृज्यते स्म । करकमलमित्यादि[2] ॥

अश्रुपातमाह—

उदयति स्म तदद्भुतमालिभिर्धरणिभृद्भुवि तत्र विमृश्य यत् ।
अनुमितोऽपि च बाष्पनिरीक्षणाद्व्यभिचचार न तापकरो नलः ॥ १८ ॥

उदयतीति ॥ आलिभिः सखीभिस्तत्र तस्यां धरणिभृद् राजा भीमस्तस्माद्भुवस्तस्मिन् उत्पन्नायां भैम्यां विमृश्य विचार्य बाष्पनिरीक्षणादश्रुदर्शनादपि तापकरोऽनुमितो नलः यत्र व्यभिचचार तद् अव्यभिचारलक्षणमद्भुतमुदयति स्म उदितम् । अपिश्चकारार्थो वा । अश्रुदिवेऽश्रुदर्शनमात्रादेव नलविरहजनितमेवेदमिति यत्तासां निश्चयज्ञानं तदव्यभिचरितमित्यर्थः । पूर्वं पाण्डुत्वादिना नलस्य तापकारित्वमनुमितम्, अश्रुदर्शनात्स्फीतमिति । अपि चेति समुच्चयार्थो वा । पर्वते बाष्पदर्शनाद्वह्न्यनुमितिर्व्यभिचारिणी भवति [illegible] तदाश्चर्यम् 'बाष्पमश्रूष्मणोः' इति विश्वः । उदयति 'इ गतौ' [illegible] लट् ॥

हृदि विदर्भभुवः प्रहरन्शरै रतिपतिर्निषधाधिपतेः कृते ।
कृततदन्तरगस्वहठव्यधः फलदनीरितनूच्छलदं खलु ॥ १९ ॥

हृदीति ॥ रतिपतिः कामः [illegible] कृते [illegible] विदर्भभुवो भैम्या हृदि शरैः प्रहरन्प्रहारं कुर्वन्[illegible] [illegible] । [illegible] किंभूतः—कृतः तदन्तरगस्य [illegible]

---

१ '[illegible]' इति [illegible] तिलकस्याटिप्पणी । [illegible]
[illegible] इति तिलकस्याटिप्पणी । [illegible]
'[illegible]'
तिलकस्याटिप्पणी । [illegible]

खलु एवंविध इव। अत एव फलन्ती फलदा अनीतिर्यस्य। कामो नलश्च भैम्या हृदयवर्तिनौ, कामश्च स्ववैरिणो नलस्य प्रहारं कुर्वन्भैमीहृदयं प्रहृतवान्। ततश्चात्मानमेव प्रहृतवान्न नलम्। योद्धा ह्यात्मानं रक्षित्वा परं प्रहरति, अनेन तु नलार्थं भैमीहृदयं प्रहृतम्, तेन फलदनीतिना स्वयमेव मूर्च्छितम्। अथ मदनो मूर्च्छया अधिकीभवंस्तामतितरां पीडयति स्मेति भावः। नलव्यधलक्षणा नीतिः फलदेति वा। अन्यवधार्थमन्यस्य प्रहार इत्यनीतिः। 'मूर्छा मोहसमुच्छ्राययोः'। कृते तादर्थ्ये विभक्तिप्रतिरूपकमव्ययम्॥

शङ्कामाह—

विधुरमानि तया यदि भानुमान्कथमहो स तु तद्धृदयं तथा।
अपि वियोगभरास्फुटनस्फुटीकृतदृपत्त्वमजिज्वलदंशुभिः॥ २०॥

विधुरिति॥ तया भैम्या विधुश्चन्द्रो यदि भानुमान्सूर्योऽमानि दाहकत्वाचन्द्र एव सूर्यत्वमारोपितं चेत्तर्हि स तु पुनः सूर्यः वियोगभरेण विरहबाहुल्येनापि यदस्फुटनमविदीर्णत्वं तेन स्फुटीकृतं दृपत्त्वं पाषाणत्वं यस्य येन वा एवंविधमतिकठिनमपि तस्या हृदयमंशुभिः कृत्वा कथं तथा अनिर्वाच्यमजिज्वलद्ददाह। नह्यारोपितेऽग्नित्वे अग्नितुल्योऽयमिति तस्य दाहसामर्थ्यं, पाषाणदाहे त्वनिर्वाच्यम्। अत एव अहो आश्चर्यम्। मानितेऽपि सूर्यत्वे विरहिणः सूर्यस्य च परस्परमित्रत्वात्कथं दाहकत्वम्। अत एवाश्चर्यम्। यदि चन्द्रः सूर्यो मानितो न तु तात्त्विकस्तर्हि तापातिभरास्फुटनलक्षणेन साम्येन प्रकटीकृतं सूर्यकान्तत्वं येनैवंविधं भैमीहृदयं करैः कृत्वा कथं तथाऽजिज्वलत्। चन्द्रस्य कुत्रापि दाहकत्वमदृष्टचरमश्रुतचरं च। सूर्यस्य तु प्रसिद्धम्। अतोऽयं तात्त्विकः सूर्य एव। अन्यच्च सूर्यकान्तज्वलनं सूर्य एव करोति न त्वन्यः, अतस्तात्त्विकः सूर्य एव, न त्वारोपितः। आरोपितत्वादाश्चर्यमित्यर्थः। विरहित्वाचन्द्रकिरणास्तया न सोढा इति भावः॥

द्वाभ्यां मृतिं सूचयति—

हृदयदत्तसरोरुहया तया क सदृगस्तु वियोगनिमग्नया।
प्रियधनुः परिरभ्य हृदा रतिः किमनुमर्तुमशेत चितार्चिपि॥ २१॥

हृदयेति॥ विरहाग्निपीडितत्वान्निःसहया शैत्यार्थं हृदये दत्तं सरोरुहं कमलं यया तया भैम्या सदृक् तुल्या क कस्मिन्देशे अस्तु अपि तु तत्तुल्यान्या कापि कुत्रापि नास्ति। रति-[illegible] दूषयति—रतिः प्रियधनुः हृदा परिरभ्यालिङ्ग्य अनुमर्तुं मदनस्य पश्चान्मरचितार्चिपि चिताग्नौ किमशेत निद्रिता अपि तु न। तस्माद्रतिः समाना न। क्षत्रियाणां [illegible] मृतानां स्त्रियो धनुरालिङ्ग्यानुम्रियन्त इत्याचारः। विरहसंतप्तत्वाच्छीतलत्वोपचारः। [illegible] वह्नित्वं व्यङ्ग्यं चितार्चिपीत्यनेन। 'तदा रतिः' इति पाठः समीचीनः। सदृक्, [illegible]नान्यथोश्च' इति वक्तव्यात्किन्। 'दृग्दृशवतुपु' इति सभावः॥

१ 'अत्रोत्प्रेक्षाश्लेषालंकारः' इति तिलकसाहित्यविद्याधर्यौ। 'अत्र भेदेन मूर्च्छालक्षणकार्यदर्शनाद्[illegible]पतेः स्वस्यापि प्रहार उत्प्रेक्ष्यते। सा च श्लेषमूलातिशयोक्त्युत्थापितेति संकरः। व्यञ्जकाप्रयोगा[illegible]म्या। [illegible] व्यज्यते' इति जीवातुः। २ 'अत्र विरोधालंकारः' इति तिलकसाहित्यविद्याधर्यौ। ३ 'अत्रोत्प्रेक्षा' इति तिलकसाहित्यविद्याधर्यौ।

अनलभावमियं स्वनिवासिनो न विरहस्य रहस्यमबुध्यत ।
प्रशमनाय विधाय तृणान्यसूञ्ज्वलति तत्र यदुज्झितुमैहत ॥ २२ ॥

अनलेति ॥ इयं भैमी स्वनिवासिनः स्वीयस्य विरहस्य रहस्यं तात्त्विकमनलभावमग्नित्वं नाबुध्यत नाजानात् । यद्यस्मात् तत्र विरहे ज्वलति दीप्यमाने सति असून्प्राणांस्तृणानीव कृत्वा प्रशमनाय विरहवह्निशान्त्यर्थमुज्झितुं त्यक्तुमैहत ऐच्छत् । विरहस्य वह्नित्वं चेज्ज्ञातं स्यात्तच्छान्त्यर्थं तृणक्षेपं न कुर्यात् । अतो विरहस्य वह्नित्वं नाजानादित्यर्थः । किंतु स्वीयवि-रहस्य अनलभावं नलस्य भावः प्राप्तिस्तदभावं नलप्राप्त्यभावलक्षणं रहस्यं मूलकारणं नाजा-नात्, अपि तु जानात्येव । नलविरहे मरणमेव ज्यायो न तु जीवनमित्यैच्छदिति भावः । यतः स्वविरहस्य रहस्यं स्वेन ज्ञायते, तस्मात्स्वीयान्प्राणान्प्रशमनायोद्भूताय यमाय तृणतुल्या-न्कृत्वा त्यक्तुमैच्छत् । एतच्च दुःसहत्वज्ञानेन विना न घटते । विरहस्यातिदुःसहत्वं जातमिति भावः । 'शमनो यमराड्यमः' इत्यमरः ॥

प्रकृतिरेतु गुणः स न योषितां कथमिमां हृदयं मृदु नाम यत् ।
तदिषुभिः कुसुमैरपि दुन्वता सुविवृतं विबुधेन मनोभुवा ॥ २३ ॥

प्रकृतिरिति ॥ नाम प्रसिद्धौ । योषितां हृदयमन्तःकरणं मृदु कोमलमिति यत् प्रकृतिः स्त्रीणां स्वाभाविको गुणः, इमां योषितं भैमीं कथं कुतो नैतु न प्राप्नोतु, अपि तु प्राप्नुयात् । इमां प्राप्त इत्यस्मिन्नर्थे प्रमाणमाह—विबुधेन देवेन, विदुषा च मनोभुवा मदनेन कुसुमै-रपि पुष्परूपैरपीषुभिर्बाणैर्हृदयं दुन्वता पीडयता सता तन्मृदुत्वलक्षणं प्रमेयं सुविवृतं सुतरां स्पष्टीकृतम् । यदि स गुणो न स्यात्तर्हि पुष्पबाणैः पीडा न स्यात् । सा तु जाता । तस्मात्स गुणः समायात इति सुतरां मदनबाणैः पीडितेति भावः । दुर्बोधं प्रमेयं विदुषा विविच्यते ॥

निर्वेदानुभावं बहिरनिर्गममाह—

रिपुतरा भवनादविनिर्यतीं विधुरुचिर्गृहजालबिलैर्नु ताम् ।
इतरथात्मनिवारणशङ्कया ज्वरयितुं विशदंशुधराविशत् ॥ २४ ॥

रिपुतरेति ॥ विधुरुचिश्चन्द्रकान्तिः भवनाद्गृहादविनिर्यतीं बहिरनिर्गच्छन्तीं तां भैमीं ज्वरयितुं संतापयितुं गृहजालबिलैर्गवाक्षच्छिद्रैरविशत् । किंभूता—अतो रिपुतरा विरहि-ण्यामतिवैरिणी तथा—विशदेशधरा [illegible] । [illegible] हेतुमाह—इतरथा अन्यथा आत्मनिवारणशङ्कया आत्मनिषेधभिया । वैरिण्या चन्द्रकान्त्या वैरिणी भैमी दृष्टा, सा च [illegible] बहिर्न निर्गच्छति । अतः [illegible] चन्द्रकान्तिः [illegible] शरीरस्थापितानां [illegible] [illegible] । [illegible]

१ '[illegible]' इति साहित्यविद्याधरी । '[illegible]' इति तिलकव्याख्या । २ '[illegible]' इति तिलकव्याख्या । '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' [illegible] '[illegible]' इति [illegible] ।

भावाद्रवाश्रैरेव प्रविष्टा । न तु स्वरूपेण । अन्तर्गतवैरिमारणार्थमियमेव रीतिरन्येनाप्यनुष्ठीयते । अविनिर्यतीमिति इणः शतरि रूपम् ॥

अतिरिक्तां मृशानतिमाह—

हृदि विदर्भभुवोऽश्रुभृति स्फुटं विनमदास्यतया प्रतिबिम्बितम् ।
मुखदृगोष्ठमरोपि मनोभुवा तदुपमाकुसुमान्यखिलाः शराः ॥ २५ ॥

हृदीति ॥ मनोभुवा कामेन तदुपमाकुसुमानि मुखनयनोष्ठोपमायोग्यानि कुसुमानि कमलनीलोत्पलबन्धूकानि अखिलाः शराः पूर्वोक्तकुसुमरूपाः पञ्चापि बाणा अश्रुभृति अश्रुपूर्णे विदर्भभुवो भैम्या हृदि दुःखवशाद्विनमदास्यतया नम्रमुखत्वेन प्रतिबिम्बितं प्रतिफलितं, मुखदृगोष्ठमेव अरोपि समारोपितं, स्फुटमुत्प्रेक्षते । प्रकटं प्रतिबिम्बितमिति वा । प्रतिबिम्बितं भैमीमुखदृगोष्ठमेव भैमीवधार्थं कामेन पञ्चापि बाणाः प्रायेण समारोपिता इत्यर्थः । पीडावशादश्रु, नम्रमुखत्वं च तस्या जातमिति भावः । मुखदृगोष्ठम् शरा इति व्यस्तरूपकम् । प्राण्यङ्गत्वादेकवद्भावः ॥

विरहपाण्डुकपोलतले विधुर्व्यधित भीमभुवः प्रतिबिम्बितः ।
अनुपलक्ष्यसितांशुतया मुखं निजसखं सुखमङ्कमृगार्पणात् ॥ २६ ॥

विरहेति ॥ विधुश्चन्द्रः भीमभुवो भैम्या विरहेण पाण्डुनि कपोलतले प्रतिबिम्बितः सन् भैमीमुखमङ्कमृगस्य कलङ्कमृगस्यार्पणादङ्के मुखमध्ये वा मृगस्यारोपणात्सुखमनायासेन निजसखं स्वीयं मित्रं व्यधित चकार । कया—अनुपलक्ष्याः विवेकेन ज्ञातुमयोग्याः सिता अंशवः किरणा यस्य चन्द्रस्य तस्य भावस्तत्ता तया । चन्द्रकपोलयोः पाण्डुत्वात्प्रतिबिम्बितस्यापि चन्द्रस्यानुपलब्धिः । कलङ्कस्य श्यामत्वादुपलब्धिः । ततश्च मृगाङ्कलाभाद्वदनस्य निजमित्रत्वं युक्तमित्यर्थः । सवर्णे स्थितं सवर्णं शङ्खदुग्धादिवन्न लक्ष्यते । विरहात्पूर्वं मुखस्य गौरत्वात्प्रतिबिम्बितश्चन्द्रः पृथग्लक्ष्यते स्म, विरहे तु पाण्डुनि मुखे सवर्णत्वाच्चन्द्रो न दृश्यते । अतो भैमीमुखं चन्द्र एवेति सर्वस्यापि प्रतीतिरभूत् । पूर्वमतिचन्द्रं मुखमासीत्, अधुना तु चन्द्रतुल्यं पाण्डुरं जातमिति भावः । अन्येन चतुरेण किंचिदुत्कृष्टं वस्तु दत्त्वा सख्यं संपादनीयमित्युक्तिः । दुष्टो निर्दोषेऽपि स्वसंसर्गिणि स्वदोषं संक्रमय्य साम्यं करोति । निजसखम्, 'राजाहः—' इति टच् ॥

विरहतापिनि चन्दनपांशुभिर्वपुषि सार्पितपाण्डिममण्डना ।
विषधराभबिसाभरणा दधे रतिपतिं प्रति शंभुविभीषिकाम् ॥ २७ ॥

विरहेति ॥ सा भैमी रतिपतिं कामं प्रति शंभुसंबन्धिनीं विभीषिकां भयानकतां दधेऽङ्गीकृतवती । किंभूता—विरहतापिनि विरहसंतप्ते वपुषि संतापेन शुष्कत्वाच्चन्दनपांशुभिश्च-

१ 'अत्र सद्भावोत्प्रेक्षा समासोक्तिश्च' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । ३ अत्र 'उपमा' इति साहित्यविद्याधरी । तद्गुणश्चालंकारः । उक्तं च रुद्रटे—'यस्मिन्नेकगुणानामर्थानां योगलक्ष्यरूपाणाम् । संसर्गे नानात्वं न लक्ष्यते तद्गुणः सः' इति तिलकव्याख्या । 'अत्र चन्द्रस्य कपोलसावर्ण्येन तदेकत्वकथनात्सामान्यालंकारः । 'सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता' इति लक्षणात्' इति जीवातुः ।

न्दनरजोभिरर्पितं विरचितं पाण्डिम्ना पाण्डुरत्वेनैव मण्डनमलंकारो यस्याः सा । तथा— दैर्घ्याच्छुभ्रत्वाच्च विषधराभानि वासुक्यादिसर्पतुल्यानि बिसाभरणानि बिसालंकरणानि यस्याः सा । भस्मपाण्डुरं सा (सर्पा)लंकरणं मदीयं वपुर्दृष्ट्वा शंभुभ्रान्त्या भीतः कामो मां न पीडयिष्यतीति बुद्ध्या चन्दनबिसानि धृतानीति भावः[1] ॥

विनिहितं परितापिनि चन्दनं हृदि तया धृतबुद्बुदमाबभौ ।
उपनमन्सुहृदं हृदयेशयं विधुरिवाङ्कगतोडुपरिग्रहः ॥ २८ ॥

विनिहितमिति ॥ परितापिनि विरहसंतप्ते हृदि तया भैम्या विनिहितं निक्षिप्तं धृतं बुद्बुदं धृतचन्द्रकं चन्दनं विधुरिव चन्द्र इवाबभौ शुशुभे । किंभूतो विधुः—हृदयेशयं हृदि विद्यमानं सुहृदं काममुपनमन्नुपागच्छन् । तथा—अङ्कगतः समीपमागतः उडवो नक्षत्राण्येव परिग्रहो यस्य । अथ च—क्रोडादुत्सङ्गवर्तिनक्षत्रसमूहः । घनस्य चन्दनस्य चन्द्रतुल्यत्वं, बुद्बुदानां च नक्षत्रतुल्यत्वम् । अन्योऽपि सपरिग्रहो मित्रमुपागच्छति । हृदयेशयम्, 'शयवासवासिष्वकालात्' इति सप्तम्या अलुक्[2] ॥

स्मरहुताशनदीपितया तया बहु मुहुः सरसं सरसीरुहम् ।
श्रयितुमर्धपथे कृतमन्तरा श्वसितनिर्मितमर्मरमुज्झितम् ॥ २९ ॥

स्मरेति ॥ स्मर एव हुताशनोऽग्निस्तेन दीपितया तया भैम्या बह्वनेकं सरसमार्द्रं सरसीरुहं कमलं श्रयितुमाश्रयितुं मुहुर्वारंवारमर्धमार्गे कृतं श्वसितेन निःश्वासवायुना निर्मितो मर्मरः शुष्कपर्णध्वनितं यस्यैवंभूतं निरुपयोगित्वादन्तरा मध्य एव निकटमार्गे तयोज्झितं त्यक्तम् । अनेन संतापाधिक्यं सूचितम् । 'अथ मर्मरः । स्वनिते वस्त्रपर्णानाम्' इत्यमरः । अर्धपथे, 'अर्धं नपुंसकम्' इति समासः । 'ऋक्पूर्–' इति समासान्तः । 'अर्धपथम्' इति पाठे अत्यन्तसंयोगे द्वितीया ॥

प्रियकरग्रहमेवमवाप्स्यति स्तनयुगं तव ताम्यति किं न्विति ।
जगदतुर्निहिते हृदि नीरजे दवथुकुड्मलनेन पृथुस्तनीम् ॥ ३० ॥

प्रियेति ॥ हृदि निहिते स्थापिते नीरजे कमले दवथुना संतापेन कुड्मलनं संकोचः, तेन कृत्वा पृथुस्तनीं भैमीं प्रति इति जगदतुरिव । इति किम्—'भैमि, तव स्तनयुगं एतन्-मन्मुकुलत्वग्रहणशीलम् एवमनेन प्रकारेण मम यथा संकोचो जातस्तथा तदाकारेण वा प्रियकरमहं नलपाणिसंबन्धं प्राप्स्यति, किंतु ताम्यति ग्लायति । नुः प्रश्ने । ग्लानिर्न कर्तव्येत्यर्थः । संतापवशात्कमलसंकोचः[3] ॥

त्वदितरोऽपि हृदा न मया धृतः पतिरितीव नलं हृदयेशयम् ।
स्मरहविर्भुजि बोधयति स्म सा विरहपाण्डुतया निजशुद्धताम् ॥ ३१ ॥

त्वदिति ॥ सा हृदयेशयं नलं विरहेण या पाण्डुता तया स्मर एव हविर्भुक् तस्मिन् हविर्भुजि वह्नौ निजशुद्धतां स्वीयपातिव्रत्यमिति बोधयति स्म ज्ञापयति स्म । इति किम्—

---

१ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी । 'वस्तूत्प्रेक्षा' इति जीवातुः । २ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी । ३ 'हेतूत्प्रेक्षासंकीर्णोऽतिशयोक्तिभेदोऽलंकारः' इति जीवातुः । ४ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी ।

हे प्रिय, मया त्वदितरस्त्वत्तोऽन्यः पतिः हृदापि मनसापि न वृतः, क नु हस्तादिनेति। भैम्यन्तः कामः पाण्डुता च वियत इति। अन्यापि सती पत्नी स्वीयशुद्धतां पतिं बोधयति। बुद्ध्यर्थत्वादणि कर्तुर्णौ कर्मत्वम्॥

विरहतप्ततदङ्गनिवेशिता कमलिनी निमिषद्दलमुष्टिभिः।
किमपनेतुमचेष्टत किं पराभवितुमैहत तद्वथुं पृथुम्॥ ३२॥

विरहेति॥ विरहेण तप्ते तदङ्गे भैम्यङ्गे निवेशिता निक्षिप्ता कमलिनी निमिषन्ति संकुचन्ति दलानि पर्णान्येव मुष्टयस्तैः कृत्वा पृथु महान्तं तद्वथुं भैमीसंतापमपनेतुं दूरीकर्तुमचेष्टत किं उद्योगं चक्रे, वा पराभवितुं मोहयितुमैहत ऐच्छत् किम्। अन्यदपि दुःखदं मुष्टिभिरपनीयते। संतापवशात्कमलिनी संकुचितेति भावः॥

विवशतामाह—

इयमनङ्गशरावलिपन्नगक्षतविसारिवियोगविषावशा।
शशिकलेव खरांशुकरार्दिता करुणनीरनिधौ निदधौ न कम्॥ ३३॥

इयमिति॥ इयं भैमी खरांशोः सूर्यस्य करैरर्दिता पीडिता शशिकलेव करुणसमुद्रे कं न निदधौ चिक्षेप, अपि तु सर्वमपि। किंभूता—अनङ्गशरावलिलक्षणाः पन्नगास्तैः क्षतं दंशनं तेन विसारि प्रसरणशीलं वियोग एव संतापकारित्वाद्विषं, तेन अवशा विह्वला। एवंविधां दृष्ट्वा सर्वेऽपि शुशुचुः। अन्योऽपि सर्पदष्टो विषविह्वलः सँल्लोकं करुणायां क्षिपति। अथ च सर्पदष्ट एव विषनिरासार्थं जलाशये क्षिप्यते, तया त्वन्य एव निक्षिप्त इत्याश्चर्यम्। कलाशब्देन भैम्या अतितनुत्वं सूचितम्। पन्नगक्षता चासौ विसारिवियोगविषावशा चेति वा॥

ज्वलति मन्मथवेदनया निजे हृदि तयार्द्रमृणाललतार्पिता।
स्वजयिनोस्त्रपया सविधस्थयोर्मलिनतामभजद्भुजयोर्भृशम्॥ ३४॥

ज्वलतीति॥ तया मन्मथवेदनया मदनजनितपीडया ज्वलति संतप्ते निजे हृदि अर्पिता निहिता आर्द्रमृणाललता सरसा मृणालवल्ली स्वजयिनोः कान्त्या मृणालजेत्र्योः सविधस्थयोः हृदयसमीपस्थितयोर्भुजयोः सकाशात्त्रपया लज्जया भृशमतितरां मलिनतामभजत्। संतापशान्त्यर्थं सरसा मृणाललता हृदये स्थापिता तदङ्गसङ्गवशान्म्लाना जाता। मृणालजेत्रहृदयस्थितमृणालसमीपस्थयोर्भैमीभुजयोर्लज्जया म्लानत्वं जनितमिति प्रतीयमानोत्प्रेक्षा। अन्योऽपि स्वजयिना सहैकत्र स्थितौ सत्यां तन्मुखं पश्यन्मलिनो भवति। भुजयोः सविधस्थयोरिति सतिसप्तमी वा। अर्थात्ताभ्यामेव त्रपा॥

पिकरुतिश्रुतिकम्पिनि शैवलं हृदि तया निहितं विचलद्बभौ।
सततत‍द्गतहृच्छयकेतुना हृतमिव स्वतनूघनघर्षिणा॥ ३५॥

---

१ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी। २ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी। 'अचेष्टत किम्' इत्युत्प्रेक्षा। वस्तुवस्तु न किंचित्कर्तुं शशाक, प्रत्युत स्वयमेव दग्धेत्यर्थः। अत एवानर्थोत्पत्तिलक्षणो विषमालंकारः। तदुत्थापिता चेयमुत्प्रेक्षेति संकरः' इति जीवातुः। ३ 'अत्र रूपकोपमालंकारः' इति साहित्यविद्याधरी। ४ 'अत्र प्रतीयमानोत्प्रेक्षा' इति साहित्यविद्याधरी।

ष्पव्याजात्तदुज्झितमाग्नेयास्त्रविघातसमर्थं वारुणं वरुणदैवतं प्रतिशस्त्रं आग्नेयास्त्रशत्रुभूतमस्त्रमुपाददेऽङ्गीचकार । चन्द्रोदयेऽसह्यत्वाद्भृशमरोदीदित्यर्थः । वारुणम्, 'सास्य देवता' इत्यण् ॥

अतनुना नवमम्बुदमाम्बुदं सुतनुरस्त्रमुदस्तमवेक्ष्य सा ।
उचितमायतनिःश्वसितच्छलाच्छ्वसनशस्त्रममुञ्चदमुं प्रति ॥ ३९ ॥

अतनुनेति ॥ सा सुतनुर्विरहवशाच्च भैमी नवमम्बुदं मेघमेव आम्बुदं वारुणमस्त्रम् (अतनुना स्मरेण) उदस्तं स्वं प्रति क्षिप्तमवेक्ष्य दृष्ट्वा आयतस्य दीर्घस्य निःश्वसितस्य छलान्मिषादुचितमम्बुदास्त्रनिवारणसमर्थं श्वसनशस्त्रं वायव्यास्त्रममुं कामं प्रति उद्दिश्यामुञ्चत् । सुतनुत्वात्स्वस्य, अतनुत्वाद्वैरिणः किमपि कर्तुमशक्यत्वात्प्रावृट्काले नवमेघदर्शनमात्रेण दीर्घनिःश्वासं तत्याजेति भावः । योधानां जातिः वैर्यस्त्रघातार्थं प्रत्यस्त्रं क्षिपतीति[१] ॥

रतिपतिप्रहितानिलहेतितां प्रतियती सुदती मलयानिले ।
तदुरुतापभयात्तमृणालिकामयमियं भुजगास्त्रमिवादित ॥ ४० ॥

रतीति ॥ सुदती शोभनदन्ता इयं भैमी मलयानिले दक्षिणपवने रतिपतिना कामेन प्रहितानिलहेतितां प्रेषितवायव्यास्त्रतां प्रतियती प्रतिजानती अयं मलयानिलो न भवति, किंतु मां प्रति कामेन क्षिप्तं वायव्यास्त्रमिति जानती तदुरुतापभयान्मदनजनितबहुसंतापभयेन तापशान्त्यर्थमेवात्ताङ्गीकृता या मृणालिका तन्मयं तद्रूपं भुजंगास्त्रमिव पन्नगास्त्रमिवाददे स्वीचकार । वसन्ते मलयानिले वाति सति संतापबाहुल्यात्तच्छान्त्यर्थमङ्गेषु मृणालानि निहितानीति भावः । पन्नगाकारत्वात्पवनाशनत्वाच्च मृणालिकानां पन्नगास्त्रत्वम्[२] ॥

न्यधित तद्धृदि शल्यमिव द्वयं विरहितां च तथापि च जीवितम् ।
किमथ तत्र निहत्य निखातवान्रतिपतिः स्तनबिल्वयुगेन तत् ॥४१॥

न्यधितेति ॥ रतिपतिः कामस्तद्धृदि भैमीहृदये द्वयं शल्यमिव शङ्कुद्वयमिव न्यधित निक्षिप्तवान् । किं द्वयम्—विरहितां वियोगित्वं, तथापि वियोगित्वे सत्येव यज्जीवनम् । विरहितां च जीवितं चेति वा । चावन्योन्यसमुच्चये । अथ हृदयोपरि शल्यद्वयस्थापनानन्तरं तच्छल्यद्वयं स्तनलक्षणेन बिल्वयुगेन बिल्वफलद्वयेन कृत्वा निहत्य नितरां हत्वा तद्धृदये निखातवान् । शैथिल्यनिरासाय दृढं रोपयामास किमिति वितर्कः । विरहवशात्स्वल्पकालमपि जीवनं दुःखदं जातमिति भावः । अत्रोत्तरत्र च ग्लानेरनुभावः स्फुटो ज्ञेयः ॥

अतिशरव्ययता मदनेन तां निखिलपुष्पमयस्वशरव्ययात् ।
स्फुटमकारि फलान्यपि मुञ्चता तदुरसि स्तनतालयुगार्पणम् ॥ ४२ ॥

अतीति ॥ मदनेन तदुरसि भैमीहृदये स्तनलक्षणतालफलयुगार्पणमकारि, स्फुटमुत्प्रेक्षे । किंभूतेन—तां भैमीमतिशरव्ययता अतिवेध्यं कुर्वता । तथा—पुनः वेध्यकरणादेव निखिलाः पुष्पमयाः स्वशरास्तेषां व्ययान्नाशात्फलान्यपि तां प्रति मुञ्चता । वृक्षाणामन्येषां कुसुमाभावे

१ 'अत्रातिशयोक्तिरपह्नुतिश्च' इति साहित्यविद्याधरी । 'सापह्नवोत्प्रेक्षा' इति जीवातुः । २ 'अत्राप्यतिशयोक्तिरपह्नुतिश्च' इति साहित्यविद्याधरी । 'अत्रापि सापह्नवोत्प्रेक्षा' इति जीवातुः । ३ 'अत्र सापह्नवोत्प्रेक्षा' इति साहित्यविद्याधरी । ४ 'अत्रोत्प्रेक्षारूपकालंकारः' इति साहित्यविद्याधरी ।

फलवत्त्वानावात्तालस्य तु पुष्पाभावेऽपि फलवत्त्वात्तालकल्पद्रुमस्येव साम्यादज्ञोक्तिर्वेत्यर्थः । अन्योऽपि धानुष्को बाणव्यये पाषाणादिना वैरिणं हन्ति । अतिचरण्वं करोतीत्यर्थे 'तत्करोति-' इति ण्यन्ताच्छता । 'संनिपातलक्षणो-' इति न यलोपः ॥

अथ मुहुर्बहुनिन्दितचन्द्रया स्तुतविधुंतुदया च तया मुहुः ।
पतितया स्मरतापमये गदे निजगदेऽश्रुविमिश्रमुखी सखी ॥ ४२ ॥

अथेति ॥ अथ तया सखी निजगदे वक्ष्यमाणमुक्ता । किंभूतया—स्मरतापमये कामजनितसंतापज्वरे पतितया निमग्नया । अत एव—मुहुर्बहुवारं नितरां वक्ष्यमाणप्रकारेण निन्दितः कामनित्रं चन्द्रो यया । तथा—मुहुः स्तुतो विधुंतुदो राहुर्यया । किंभूता सखी—संतापविलोकनादेवाश्रुविमिश्रं बाष्पविमिश्रं मुखं यस्याः सा । अन्योऽपि रोगग्रस्तोऽसाधुं स्तौति साधुं च निन्दति । विधुंतुद इति 'विध्वरुषोस्तुदः' इति खशि मुम् ॥

त्रिभिः श्लोकैर्विरहस्य दुःसहत्वमाह—

नरसुराब्जभुवामिव यावता भवति यस्य युगं यदनेहसा ।
विरहिणामपि तद्गतयद्युवक्षणमितं न कथं गणितागमे ॥ ४३ ॥

नरेति ॥ तदिति संबन्धाद्यदिति लभ्यते । यावता परिमाणेन यदनेहसा येन नरसुराब्जभुवामनेहा कालस्तेन । यद्वा येनानेहसा कालेन नरसुराब्जभुवां मनुष्याणां देवानामब्जभुवो ब्रह्मणश्चेषां मध्ये यस्य नरस्य देवस्य ब्रह्मणो वा यद्युगं भवति तन्नरसुराब्जभुवां युगमिव विरहिणामपि वियोगिस्त्रीपुंससंबन्धि युगं गणितागमे ज्योतिःशास्त्रे [illegible] युवानः स्त्रीपुंसाः, तत्संबन्धिना निमेषचतुर्थांशरूपेण क्षणेन मितं गणितं सत् [illegible] न भवति नास्ति, अपितु तदपि ज्योतिःशास्त्रे [illegible] कथं न [illegible] । अनुचितमेतदित्याक्षेपः प्रश्नो वा । यद्वा यावता यदनेहसा यस्य युगं भवति तद्युगं [illegible] क्षणेन मितं गणितशास्त्रे विरहिणामपि कथं न भवति । [illegible]—नरसुराब्जभुवामिव । यथा [illegible] दिनानां [illegible] मनुष्याणां वर्षम्, तद्देवानामहोरात्रम्, एवं [illegible] चतुर्युगम्, तावती रात्रिः, तदेवं चतुर्युगसहस्रे [illegible], तावत्येव रात्रिः [illegible], [illegible] एवं [illegible] परमायुः । [illegible]

[illegible]

नरशब्दस्य पूर्वनिपातः । एवं ब्रह्मण इत्यपेक्षया सुराणां कालस्य । विरहिणां, रतगुरु, इति 'पुमान्स्त्रिया' इत्येकशेषः ॥

जनुरधत्त सती स्मरतापिता हिमवतो न तु तन्महिमादृता ।
ज्वलति भालतले लिखितः सतीविरह एव हरस्य न लोचनम् ॥ ४५ ॥

जनुरिति ॥ सती दाक्षायणी स्मरतापिता सती हिमवतः सकाशाज्जनुर्जन्म अधत्ताङ्गीचकार । तस्य हिमाचलस्य महिम्नि देवत्वरूपोऽयमिति महत्त्वे आदृता आदरयुक्ता नतु नैव जन्म धत्ते । हिमाकरत्वात्कामतापशान्त्यर्थं जन्माङ्गीकृतवती न तु देवत्वात् । किंच हरस्य भालतले ललाटे ब्रह्मणा लिखितः सतीविरह एव ज्वलति, नतु लोचनं तृतीयं नेत्रम् । भविष्यद्विपया दैवी लिपिर्ललाटे लिख्यते । ज्वलतीत्यसंबद्धं सूचितम् । यौ जगतो मातापितरौ तयोरपि विरहेणेदृश्यवस्था, मादृशी कथं जाता भविष्यतीति भावः । 'जनुर्जननजन्मानि' इत्यमरः । हिमवतः, नित्ययोगे निन्दायां वा मतुप् ॥

दहनजा न पृथुर्दवथुव्यथा विरहजैव पृथुर्यदि नेदृशम् ।
दहनमाशु विशन्ति कथं स्त्रियः प्रियमपासुमुपासितुमुद्धुराः ॥ ४६ ॥

दहनजेति ॥ दहनजाग्निजाता दवथुव्यथा दाहपीडा न पृथुर्गुर्वी किंतु विरहजैव दाहव्यथा पृथुः । असह्येत्यर्थः । अत्रार्थेऽन्यथानुपपत्तिं वा प्रमाणयति—यदीदृशं न स्याद्विपरीतमेव चेत्स्यात्, तर्हि अपगता असवः प्राणा यस्य तं मृतं प्रियमुपासितुं सेवितुमुद्धुरा उत्सुकाः सोल्लासाः स्त्रिय आशु झटिति कालविलम्बमकृत्वैव दहनमग्निं कथं प्रविशन्ति । तस्माद्वह्नेरपि सकाशाद्विरहपीडैव पृथुरिति । 'तथा' इति युक्तः पाठः ॥

हृदि लुठन्ति कला नितराममूर्विरहिणीवधपङ्ककलङ्किताः ।
कुमुदसख्यकृतस्तु वहिष्कृताः सखि विलोकय दुर्विनयं विधोः ॥४७॥

हृदीति ॥ हे सखि, एतादृशं विधोश्चन्द्रस्य दुर्विनयमविनीतत्वं विलोकय । कीदृशं तदाह—नितरां विरहिणीवध एव पङ्कः पातकं तेन कलङ्किता मलिनिता अमूर्दृश्यमानाः कला हृदि लुठन्ति क्रीडन्ति । तु पुनर्विशेषे वा । कुमुदसख्यकृतः कुमुदमैत्रीकारिण्यः कला वहिःकृता दूरत एव धृताः । याः कलाः कुमुदविकासकारिण्यः परोपकारशीलास्ता वहिःकृताः । पातकिन्यः परापकारपरास्ता एव हृदि क्रीडन्ति । यस्तु विनीतो भवति स तूपकारिणं हृदये धारयति, पापिनं वहिरेव स्थापयति । पापी तु विपरीतं करोति । 'अस्त्री पङ्कं पुमान्पाप्मा' इत्यमरः ॥

अयि विधुं परिपृच्छ गुरोः कुतः स्फुटमशिक्ष्यत दाहवदान्यता ।
ग्लपितशंभुगलाद्गरलात्त्वया किमुदधौ जड वा वडवानलात् ॥ ४८ ॥

अयीति ॥ अयि सखि, त्वं विधुं—इति स्फुटं स्पष्टं परिपृच्छ । इति किम्—हे चन्द्र, त्वया कुतः कस्माद्गुरोर्दाहवदान्यता दाहदातृत्वमशिक्ष्यत अभ्यस्ता । हे जड, अनुचिताभ्या-

---

१ 'अत्रोपमातिशयोक्तिश्च' इति साहित्यविद्याधरी । २ 'अत्रापह्नुतिः' इति साहित्यविद्याधरी । 'आरोप्यापह्नवालंकारः' इति जीवातुः । ३ 'अत्रानुमानम्' इति साहित्यविद्याधरी । 'कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः' इति जीवातुः । ४ 'अत्र समासोक्तिः' इति साहित्यविद्याधरी ।

ष्युदराग्नावपि जीर्णतां नाशं वातापिवन्न गतोऽसि । वत उभयत्रापि खेदः । जीर्णतामपीति वा अस्मदभाग्येन तद्द्वयमपि तव न जातम् । अतिदाहकत्वात्ताभ्यामपि परित्यक्तस्त्वम् ॥

किमसुभिर्ग्लपितैर्जड मन्यसे मयि निमज्जतु भीमसुतामनः ।
मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपरां विबुधः स्मरः ॥ ५२ ॥

किमसुभिरिति ॥ हे जड मूर्ख, त्वं किमिति मन्यसे । इति किम्—ग्लपितैः क्षतैःगतैरित्यर्थः । एवंविधैरसुभिः प्राणैः कृत्वा भीमसुतामनो मयि निमज्जतु निलीयतामिति । 'मनश्चन्द्रे निलीयते' इति श्रुतेः । प्राणेषु गतेषु भैमीमनो मयि निलीनं भविष्यतीति चित्ते मा कार्षीरित्यर्थः । श्रुतिरप्रमाणमित्यपि न मन्तव्यमित्याह—किल यस्मान्मेधावी कामो मम संबन्धिनीं तदर्थिकां चन्द्रे मनोलयप्रतिपादिकां श्रुतिं नलमुखेन्दुपरां नैषधवदनचन्द्रपरामाह वदति । पण्डितेन कामेन सामान्यापि श्रुतिर्विशिष्टविषयीकृता । अतिपीडायां कृतायामप्यहं त्वदधीना न भवामि, किं तु नलाधीनैवेति तात्पर्यम् । मूर्खस्त्वापाततः श्रुतेरर्थं गृह्णाति । पूर्वापरानुसंधानात्पण्डितस्तु श्रुतेरर्थं ब्रूते ॥

मुखरय स्वयशोनवडिण्डिमं जलनिधेः कुलमुज्ज्वलयाधुना ।
अपि गृहाण वधूवधपौरुषं हरिणलाञ्छन मुञ्च कदर्थनाम् ॥ ५३ ॥

मुखरयेति ॥ त्वमधुनास्मिन्समये स्वयशःसंबन्धि नवं नूतनं डिण्डिमनामकं वाद्यं मुखरय वादय । मादृशां प्राणनाशनेन महाकीर्तिर्भविष्यतीति स्वपितुर्जलनिधेः कुलं वंशमुज्ज्वलं कुरु । वधूवधपौरुषमपि गृहाण । जडनिधेर्वंशजातस्यैवं युक्तं, न त्वन्यस्य । अथ च दुष्टु अयशःसंबन्धि नवडिण्डिमं वादय, जलनिधेः कुलं दह । एतत्सर्वं कुरु पौरुषम् । हरिणलाञ्छन शशकलङ्क, कदर्थनां पीडां मुञ्च मा कार्षीः । पीडाया असह्यत्वाज्झटिति मारयेत्यर्थः ॥

निशि शशिन्भज कैतवभानुतामसति भास्वति तापय पाप माम् ।
अहमहन्यवलोकयितास्मि ते पुनरहर्पतिनिह्नुतदर्पताम् ॥ ५४ ॥

निशीति ॥ हे शशिन्, निशि त्वं कैतवभानुतां कपटसूर्यतां भजाङ्गीकुरु । हे पाप पापरूप, भास्वति सूर्ये असत्यविद्यमाने मां तापय ज्वालय । निशि, सूर्ये चाविद्यमाने इत्युभयत्रापि योजनीयम् । एतत्सुखेन कुरु । अहमहनि प्रभाते पुनस्ते तव अहर्पतिना सूर्येण निराकृतो दर्पो गर्वो यस्य तस्य भावस्तत्त्वमवलोकयितास्मि द्रष्टास्मि । सूर्यसमक्षं त्वयोभयमपि कर्तुं न शक्यते । तेन यद्यत्तव करिष्यते तन्मयैव द्रक्ष्यत इति लौकिक्युक्तिः । तापय, चुरादौ 'आधृशद्वा' इत्यत्र पठितस्य 'तप दैन्ये' इत्यस्य । अवलोकयितास्मि, लुट् । अहर्पतिः, 'अहरादीनाम्–' इति रेफः ॥

---

१ 'अत्र विभावनालंकारः' इति साहित्यविद्याधरी । २ 'अत्र रूपकमतिशयोक्तिश्च' इति साहित्यविद्याधरी । ३ 'अत्र स्तुतिनिन्दा' इति साहित्यविद्याधरी । 'अत्र वधूवधस्यानिष्टत्वेनाविधेयस्य विधानात् विषं भुङ्क्ष्व इतिवन्निषेधपरो विध्याभासः इष्टनिषेधाभासपराक्षेपालंकारभेदः । तथा चालंकारसूत्रम्—'अनिष्टं विध्याभासश्च' इति । ४ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी ।

काकुर्वा। सदामावास्यास्थितौ चन्द्रावलोकनं कदापि न स्यादित्यर्थः। करगता, गत्यर्थत्वात्कर्तरि क्तः। 'द्वितीया श्रिता–' इति समासः। उपैति, वर्तमानसामीप्ये वर्तमानवत्प्रत्ययः॥

अयि ममैष चकोरशिशुर्मुनेर्व्रजति सिन्धुपिबस्य न शिष्यताम्।
अशितुमब्धिमधीतवतोऽस्य च शशिकराः पिबतः कति शीकराः ५८

अयीति॥ चन्द्रादर्शने हेत्वन्तरसूचनार्थं चशब्दः। अयि हे सखि, ममैष चकोरशिशुः सिन्धुपिबस्य समुद्रपानकारिणो मुनेरगस्त्यस्य शिष्यतां न व्रजति गमिष्यति पृच्छ इति शेषः। बालत्वेऽभ्यासः सुकरः। तस्य शिष्यत्वे तव किं फलमित्यत आह—तच्छिष्यत्वेनाब्धिमशितुं पातुमधीतवतः समुद्रपानसमर्थस्य चकोरशिशोः पिबतः पानं कुर्वतोऽस्य शशिकराः कति शीकरा बिन्दवो भविष्यन्ति अपि तु स्वल्पा एव। यः समुद्रं पातुमिच्छति तस्य चन्द्रकिरणपानमतिसुकरमित्यर्थः। एवं सति कदापि चन्द्रदर्शनं न स्यादिति भावः। कति वेति संभावनार्थो वा वाशब्दः। वा यस्मादिति वा। सिन्धुपिबस्य, 'पाघ्रा–' इत्यनेन शः॥

कुरु करे गुरुमेकमयोघनं बहिरतो मुकुरं च कुरुष्व मे।
विशति तत्र यदैव विधुस्तदा सखि सुखादहितं जहि तं द्रुतम्॥ ५९॥

कुर्विति॥ हे सखि, गुरुं भारवन्तमेकमयोघनं लोहमुद्गरं करे कुरु स्थापय। इतो मद्गृहाद्बहिर्मे मुकुरं च दर्पणं कुरुष्व स्थापय। किमर्थमित्यत आह–विधुस्तत्र मुकुरे यदैव प्रतिबिम्बरूपेण विशति प्रविशति तदैव सुखादनायासेनैव तमहितं चन्द्रं वैरिणं द्रुतं शीघ्रं जहि मारय। चूर्णीकुर्वित्यर्थः। ततः पीडाशान्तिर्भविष्यतीति भावः। उन्मादोक्तिः। 'दर्पणे मुकुरादर्शौ' इत्यमरः। अयो हन्यतेऽनेनेत्ययोघनः 'करणेयोविद्रुषु–' इत्यप्प्रत्यये घनादेशः॥

उदर एव धृतः किमुदन्वता न विषमो वडवानलवद्विधुः।
विषवदुज्झितमप्यमुना न स स्मरहरः किममुं बुभुजे विभुः॥ ६०॥

उदर इति॥ उदन्वता विषमो दुःसहः। अथ च विषेण मीयते समीक्रियत इति विषमः। विधुश्चन्द्रो वडवानलवदुदर एव प्रागेव किं न धृतो विक्षिप्तः। एवं कर्तुं युक्तम्। परोपतापी वडवाग्निर्लोकोपकारार्थमुदर एव धृतस्तथायमपि किमिति न धृत इति व्यतिरेके दृष्टान्तः। अन्यच्च—अमुना समुद्रेण विषमिवोज्झितं विषादिनाशे विभुः समर्थः परोपकाराय प्रसिद्धः स स्मरहरो महादेवोऽमुं चन्द्रं किं न बुभुजे भुक्तवान्। विषं भुक्तवान्, विषवत्तमपि किमिति न भुक्तवान्। तस्माद्विषमो न, किंतु ततोऽपि विषम इति। 'उदन्वानुदधौ च' इति साधुः। बुभुजे, 'भुजोऽनवने' इति तङ्॥

असितमेकसुराशितमप्यभून्न पुनरेष विधुर्विशदं विषम्।
अपि निपीय सुरैर्जनितक्षयं स्वयमुदेति पुनर्नवमार्णवम्॥ ६१॥

---

१ 'अत्र अर्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी। २ 'अत्र वा' इति पाठस्तिलकजीवातुसुखावबोधासाहित्यविद्याधरीसंमतः। ३ 'अत्र विरोधालंकारः' इति साहित्यविद्याधरी। 'अत्र समुद्रपायिनो दण्डापूपिकया शशिकरपानसिद्धेरर्थापत्तिरलंकारः' इति जीवातुः। ४ 'अत्रानुप्रासः' इति साहित्यविद्याधरी। 'अत्र चन्द्रप्रहारादिप्रलापा मेघसंदेशादिवन्मदनोन्मादविकार इत्यनुसंधेयम्' इति जीवातुः। ५ 'अत्र संदेहालंकारः' इति साहित्यविद्याधरी।

असितेति ॥ सामुद्रं विषं द्विविधम्—कृष्णं, श्वेतं च । असितं कृष्णं कालकूटाख्यं विषं आर्णवं सामुद्रमेकेन सुरेण महादेवेनाशितं भक्षितं पुनरपि नाभूतो बभूव । एष चन्द्रः पुनर्विशदं श्वेतं सामुद्रं विषं सुरैर्देवैर्वह्न्यादिभिः प्रतिपदादितिथिषु निपीय निःशेषं पीत्वा जनितक्षयमपि कृतनाशमपि पुनर्नवं नूतनं सदमुदेति समुत्पद्यते । क्षययुक्तमपि बहुभिर्बहुधैव भक्षितमपि श्वेतं विषं पुनरुत्पद्यते । एकदैव एकेनैव भक्षितं कृष्णं विषं पुनर्नोत्पन्नम् । तस्मात्पूर्वविषात्कालकूटादप्यस्याधिक्यं दृढमित्यर्थः ॥

विरहिवर्गवधव्यसनाकुलं कलय पापमशेषकलं विधुम् ।
सुरनिपीतसुधाकमपापकं ग्रहविदो विपरीतकथाः कथम् ॥ ६२ ॥

विरहीति ॥ हे सखि, विरहिण्यश्च विरहिणश्च विरहिणस्तेषां वर्गस्य समूहस्य वध एव व्यसनं तस्मिन्नाकुलं केनोपायेनैव ते वध्या इति चिन्ताकुलमशेषकलं परिपूर्णं विधुं परापकारित्वात्पापं पापरूपं कलय जानीहि । व्यसनेन हेतुनाऽकुलं कुलरहितं पापं जानीहि । 'कुपुत्रेण कुलं नष्टम्' इति न्यायात् । तथा सुरैर्वह्न्यादिभिर्निपीता सुधामृतं यस्य एवंविधमनन्तकालाचन्द्रं विरहिणामतापकारित्वादपापकं पुण्यवन्तं जानीहि । ग्रहविदो ज्योतिर्विदः कथं कुतो विपरीता कथा भाषणं सिद्धान्तो येषां पूर्णेन्दुं शुभग्रहं क्षीणं च पापग्रहं 'क्षीणेन्दुर्कभूपुत्राः पापाः' इति न ज्ञायत इत्यर्थः । विपरीतं कथयन्तीति वा । अथ च चतुःषष्टिकलावान्त विधुः परापकारी पाप एव विद्यारहितः परोपकारी पुण्यवानित्युक्तिः । विरहीति, 'पुमान्स्त्रिया' इत्येकशेषः । निपीतसुधाकम्, 'शेषाद्विभाषा' इति कपि 'आपोऽन्यतरस्याम्' इति विकल्पाद्ध्रस्वत्वाभावः ॥

विरहिभिर्बहु मानमवापि यः स बहुलः खलु पक्ष इहाजनि ।
तदसितिः सकलैरपि यत्र तैर्व्यरचि सा च तिथिः किममीकृता ॥ ६३ ॥

विरहिभिरिति ॥ उत्प्रेक्षे । विरहिभिर्यः पक्षः बहु अत्यन्तं मानं संमानमवापि प्रापितः, तत्र चन्द्रक्षयात्स पक्ष इह लोके बहुलः कृष्णपक्षोऽजनि जातः । युक्तं चैतत्—यः सपक्षो (वा) लोके बहुपूजां बहुमानं प्रमाणं च लभते स प्रकृष्टो बहुल एव भवति बहु लाति आदत्त इति । इह बहुलपक्षे यस्यां तिथौ सकलैः समस्तैरपि तैर्विरहिभिस्तस्य बहुमानस्य असितिरपरिमितता व्यरचि रचिता सा च सैव तिथिः अमा कृता किम् । अमावास्या कृतेत्यर्थः । अमावास्यायां सर्वथा चन्द्राभावादपरिमितो मानः कृतः । तथा च मानपरिमाणराहित्यादमा अन्वर्था जाता, ननु 'अमा सह चरतोऽस्यां सूर्याचन्द्रमसौ' इति व्युत्पत्त्येत्यर्थः । विरहिणां कृष्णपक्षः सुखदः, तत्राप्यतितराममावास्येत्यर्थः । बहुलः, 'आतोऽनुपसर्गे कः' । 'अमाकृता' इति पाठः क्लिष्टकल्पनयेत्यर्थः ॥

---

१ 'अत्र व्यतिरेको विरोधश्च' इति साहित्यविद्याधरी । २ 'ग्रहविदो विपरीतकथं कथम्' इति पाठः साहित्यविद्याधरीसंमतः । ३ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । ४ 'किमना कृता' इति पाठः सुखावबोधासंमतः । ५ 'अमाकृता' इति पाठे तु अमया अमा कृता अमाकृता ; अमावास्या कृतेत्यर्थः । 'अत्र विभावना' इति सुखावबोधा । ६ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी ।

स्वरिपुतीक्ष्णसुदर्शनविभ्रमात्किमु विधुं ग्रसते स विधुंतुदः ।
निपतितं वदने कथमन्यथा बलिकरम्भनिभं निजमुज्झति ॥ ६४ ॥

स्वेति ॥ स प्रसिद्धो विधुंतुदो राहुः स्वस्य रिपुर्विष्णुस्तस्य तीक्ष्णस्य सुदर्शनाख्यस्य चक्रस्य भ्रमेण विभ्रमाद्भ्रान्तेर्विधुं ग्रसते किमित्युत्प्रेक्षा । अन्यथा चन्द्रबुद्ध्या नेत्थमिति तदा वदने निपतितं निजं स्वीयं ग्रासं वा बल्यर्थं पूजार्थं शुभ्रत्वात्करम्भाभिधं दधिमिश्रसक्तुपिण्डं चन्द्रं कथमुज्झति त्यजेत् त्यजति तावत् । अतः सुदर्शनबुद्ध्या पूर्वं ग्रस्तमपि [illegible] छेदभियेति ज्ञायते । राहोरुपहारः करम्भो भवति[1] ॥

वदनगर्भगतं न निजेच्छया शशिनमुज्झति राहुरसंशयम् ।
अशित एव गलत्ययमत्ययं सखि विना गलनालबिलाध्वना ॥ ६५ ॥

वदनेति ॥ हे सखि, राहुः वदनस्य गर्भे मध्ये गतं शशिनमसंशयं निःसंदेहं निजेच्छया स्वाभिलाषमात्रेण नोज्झति न त्यजति । किंतु राहुणा अशित एव भक्षित एवायं चन्द्रोऽत्ययं विना नाशं विना गलनालबिलाध्वना कण्ठकंदलविवरमार्गेण गलति निःसरति । उदराग्नेरभावादमृतरूपत्वाद्विनाशाभावः ॥

ऋजुदृशः कथयन्ति पुराविदो मधुभिदं खलु राहुशिरश्छिदम् ।
विरहिमूर्धभिदं निगदन्ति न क नु शशी यदि तज्जठरानलः ॥ ६६ ॥

ऋजुदृश इति ॥ ऋजुदृशो यथादृष्टग्राहिणः पुराविद ऐतिहासिका मधुभिदं श्रीकृष्णं राहुशिरश्छिदं कथयन्ति । किलेति श्रुतौ । विरहिमूर्धभिदं वियोगिशिरश्छिदं न निगदन्ति । एतद्वक्तुं युक्तम् । परं तीक्ष्णप्रज्ञत्वाभावादन्यथा वदन्ति । नु प्रश्ने, संबोधने वा । यदि तस्य राहोर्जठरानलो जठराग्निः स्यात्, तदा शशी चन्द्रः क, अपितु न कुतोऽपि । राहोः शिरश्छेदेन भक्षितोऽपि चन्द्रो जठराग्निं विना गच्छति । ततश्चन्द्रस्य विद्यमानत्वाद्विर(हि)णामपकारित्वाद्विचार्यमाणो विष्णुरेव विरहिमूर्धभिदित्याशयः ॥

स्मरसखौ रुचिभिः स्मरवैरिणा मखमृगस्य यथा दलितं शिरः ।
सपदि संदधतुर्भिषजौ दिवः सखि तथा तमसोऽपि करोतु कः ॥६७॥

स्मरेति ॥ हे सखि, रुचिभिः स्मरसखौ कामसदृशौ दिवो भिषजौ स्वर्वैद्यौ दस्रौ स्मरवैरिणा शिवेन दलितं खण्डितं मखमृगस्य शिरो यथा सपदि तत्क्षणमेव संदधतुर्घटयामासतुस्तथा तमसोऽपि राहोरपि कः करोतु । एतादृशः कोऽपि नास्ति । मदनारिणा यत्कार्यं कृतं तन्मदनमित्रेण मदनेन वा मोघीकर्तव्यम् । ततः स्मरमित्रत्वाद्विपक्षत्वाच्च कामारिणा छिन्नं मृगशिरस्ताभ्यां कबन्धेन मेलितम् । तथा विरहिवैरिणा विष्णुना च्छिन्नं राहुशिरः कः संघट्टयतु । विरहिमित्रस्याभावादिति भावः । तात्कालिकसंधानं दृढं भवतीति सपदीत्युक्तम् । 'तमस्तु राहुः स्वर्भानुः' इत्यमरः ॥

---

१ 'अत्रानुमानम्' इति साहित्यविद्याधरी । 'उत्प्रेक्षा' इति जीवातुः । २ 'अत्र विरोधाभासः' इति साहित्यविद्याधरी । 'अत्रोत्प्रेक्षार्थः' इति जीवातुः । ३ 'अत्र हेतुः' इति साहित्यविद्याधरी । ४ 'अत्रोपमा' इति साहित्यविद्याधरी ।

नलविमस्तकितस्य रणे रिपोर्मिलति किं न कबन्धगलेन वा ।
मृतिभिया भृशमुत्पततस्तमोग्रहशिरस्तदसृग्दृढबन्धनम् ॥ ६८ ॥

नलेति ॥ वाथवा रणे मृतेर्भिया मरणाद्भयेन दिवमाकाशमतितरामुत्पततः प्रच्छन्न आकाश एव नलेन विमस्तकितस्य च्छिन्नमूर्ध्नो रिपोर्नलशत्रोः कबन्धगलेन अपमूर्धकलेवरकण्ठेन सह तमोग्रहशिरः राहोः शिरस्तस्य कबन्धगलस्यासृग् रक्तं तेन दृढं बन्धनं यस्य एवंभूतं सत् किं न मिलति । मेलने हि वदनमध्यगते चन्द्रे राहुजठराग्नौ जीर्णेऽतितरां पीडा न भविष्यतीति भावः । आकाशे स्थितस्य राहुशिरसः कबन्धगलेन सह संबन्धार्थं रणमुत्पतत इत्युक्तम् । दृढबन्धनमिति क्रियाविशेषणं वा । 'धृतिभिया' इति पाठे नलधारणानिषेधेरर्थः ॥

सखि जरां परिपृच्छ तमःशिरः सममसौ दधतापि कबन्धताम् ।
मगधराजवपुर्दलयुग्मवत्किमिति न व्यतिसीव्यति केतुना ॥ ६९ ॥

सखीति ॥ हे सखि, त्वम् इति जरां राक्षसीं परिपृच्छ । असौ जरा कबन्धतामपमूर्धकलेवरत्वं दधता केतुना समं सह तमःशिरोऽपि राहुशिरोऽपि मगधराजस्य वपुषः शरीरस्य दलयुग्मं खण्डयुग्मं तद्वत्किमिति कुतो हेतोर्न व्यतिसीव्यति संयोजयति । यथा मगधराजः संधितस्तथा त्वया राहुरपि संधेय इति जरां प्रति त्वया वक्तव्यम् । एकस्यैव दैत्यस्य शिरसो राहुत्वं कबन्धस्य केतुत्वम् ॥

वद विधुंतुदमालि मदीरितैस्त्यजसि किं द्विजराजधिया रिपुम् ।
किमु दिवं पुनरेति यदीदृशः पतित एष निषेव्य हि वारुणीम् ॥ ७० ॥

वदेति ॥ हे आलि सखि, त्वं मदीरितैर्मद्वचनैः विधुंतुदं राहुं वद—हे राहो, त्वं रिपुं चन्द्रं द्विजराजधिया ब्राह्मणबुद्ध्या त्यजसि किम् । 'ब्राह्मणो न हन्तव्यः' इति बुद्धेः । [illegible] द्विजराजो ननु ब्राह्मणत्वेनेत्यर्थः । ब्राह्मणत्वेऽपि [illegible] न [illegible]—यदि ईदृशः श्रोत्रियो ब्राह्मणः स्यात्, तथैव वारुणीं [illegible] पीत्वा [illegible] च पतितो महापातकी [illegible] सन् पुनरेव [illegible] किमु [illegible] प्राप्नोति । पतितो ब्राह्मणः स्वर्गं [illegible], अयं पुनरेति । [illegible] न [illegible] । ततो हन्तव्य एवायम् । [illegible] ॥

[illegible] न हन्तव्य इत्यत आह—

दहति कण्ठमयं खलु तेन किं गरुडवद्द्विजवासलवोज्झितः ।
प्रकृतिरस्य विधुंतुद दाहिका मयि निरागसि का वद भिन्नता ॥ ७१ ॥

दहतीति ॥ [illegible]

[illegible]

[illegible]

१ [illegible]
२ [illegible]

सहचर इति ॥ रतेः स्वामिनाम्नः सहचरोऽस्मि यया [illegible] एकाकी [illegible]
धीति यदि वियुक्तिजनकाद्रः । अथ च रतेः प्रीतेः । [illegible] मे मम
रतिः प्रीतिः किमिति न नीयते । [illegible] नास्ति । [illegible]
भाव्यम् । [illegible] । अथवा [illegible]
[illegible] रतिर्मृतं [illegible] न कृतः [illegible]
संगतिर्मैत्री, [illegible]
[illegible] । 'रतिः [illegible] रागोऽपि सुरतेऽपि च' इति विश्वः ॥

रतिवियुक्तमनात्मपरज्ञ किं स्वमिव मामपि तापितवानसि ।
कथमतापभृतस्तव संगमादितरथा हृदयं मम दह्यते ॥ ७८ ॥

रतीति ॥ हे अनात्मपरज्ञ, आत्मानं स्वं परं चान्यं न जानातीत्यनात्मपरज्ञस्तत्सं-बुद्धिः । त्वं रतिवियुक्तं मामिव रतिवियुक्तं स्वमपि आत्मानमपि किमिति तापितवान् दग्धवान् असि । आत्मनः प्रतिकूलं कोऽपि नाचरति, किंतु त्वमाचरसि । त्वं तु स्वपरयोरज्ञा-नात्परज्ञो भवसीत्यर्थः । एवं कुतो ज्ञातमित्यत आह—इतरथा तथा आत्मन्यतापितेऽपि अतापभृतस्तापरहितस्य तव संगमात्संबन्धान्मम हृदयं कथं कस्मात्कारणाद्दह्यते संताप्यते । परापकारार्थमात्मानमपि संतापितवान् एवंविधः परापकारनिरतस्त्वमित्यर्थः । 'संसर्गजा दोषगुणा भवन्ति' । संतप्तसंबन्धात्संतप्तत्वं युक्तम् । दह्यत इति, कर्मकर्तरि यक्[1] ॥

अनुममार न मार कथं नु सा रतिरतिप्रथितापि पतिव्रता ।
इयदनाथवधूवधपातकी दयितयापि तयासि किमुज्झितः ॥ ७९ ॥

अन्विति ॥ नु संभावनायां संबोधने । हे मार काम, सा सती पतिव्रतात्वेनातिप्रथि-तातिविख्यातापि रतिस्तव प्रिया मृतं त्वामनु कथं न ममार । पतिव्रतया मरणं कर्तव्यमिति धर्मः । 'मृते म्रियेत या पत्यौ' इत्युक्तेः । न कृतं चेत्तत्रेदं कारणम्—तया दयितयापि इय-तीनां बह्वीनामनाथानां रक्षितृरहितानां वियोगिनीनां वधेन पातकी त्वमुज्झितस्त्यक्तोऽसि किम् । 'आशुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः' इति वचनात् । अत एवानुमरणं न कृत-मित्यर्थः । ममार, 'म्रियतेर्लुङ्लिङोश्च' इति नियमात्तङभावः[2] ॥

सुगत एव विजित्य जितेन्द्रियस्त्वदुरुकीर्तितनुं यदनाशयत् ।
तव तनूमवशिष्टवतीं ततः समिति भूतमयीमहरद्धरः ॥ ८० ॥

सुगत इति ॥ सुगत एव बौद्ध एव त्वां विजित्य त्वां पराभूय तव उरुर्महती कीर्तिरेव तनुः शरीरमनाशयन्नाशितवान् । यद्यस्माज्जितेन्द्रियः । 'भग्नं मारबलं तेन' इत्यादिव-चनात् । ततोऽनन्तरं जितेन्द्रियो हरोऽवशिष्टवतीं भूतमयीं पञ्चमहाभूतनिर्मितां तव तनूं शरीरं समित्यहरत् । ददाहेत्यर्थः । कीर्तिरूपं शरीरं सुगतश्चेन्नाशयिष्यत्तर्हि सर्वहर्ता हरोऽपि त्वां हर्तुं नाशक्ष्यत्, तस्मात्सर्वेषां वध्य इत्यर्थः । अथ च भूतमयीं पैशाचीमिति निन्दाप्राकट्यम्[3][4] ॥

---

१ 'अत्र विभावना हेतुश्चालंकारः' इति साहित्यविद्याधरी । २ 'अत्रोपमानुमानं चालंकारः' इति साहित्यविद्याधरी । ३ 'अत्रातिशयोक्त्युत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । ४ 'अत्र रूपक-मलंकारः' इति साहित्यविद्याधरी ।

फलमलभ्यत यत्कुसुमैस्त्वया विषमनेत्रमनङ्ग विगृह्णता ।
अहह नीतिरवाप्तभया ततो न कुसुमैरपि विग्रहमिच्छति ॥ ८१ ॥

फलमिति ॥ हे अनङ्ग, कुसुमैर्विषमनेत्रं त्रिलोचनं विगृह्णता विरुध्यता त्वया यत्फलमलभ्यत, ततः फलाद्रक्षितृरहितानामहह प्राप्तभीतिरिव नीतिः कुसुमैरपि विग्रहं युद्धं नेच्छति । 'पुष्पैरपि न योद्धव्यं किं पुनर्निशितैः शरैः' इति नीतिः । अनङ्ग इति निन्दा । विरोधस्तु अङ्गसहितेन क्रियते त्वं पुनः स्वयमनङ्गः, विषमो नेत्रो नेता नायकः, तेन दुःसहेन विरोधं कृतवतस्तव महन्मौर्ख्यमित्यर्थः । 'नेत्रो नेतरि नेत्रवत्' इति विश्वः ॥

अपि धयन्नितरामरवत्सुधां त्रिनयनात्कथमापिथ तां दशाम् ।
भण रतेरधरस्य रसादरादमृतमाप्तघृणः खलु नापिबः ॥ ८२ ॥

अपीति ॥ इतरामरवदिन्द्रादिदेववत्सुधामम‍ृतं धयन्नपि पिबन्नपि त्वं त्रिनयनात्सकाशाद्भूलतारूपां दशां कथं केन प्रकारेण आपिथ प्राप्तवानसि । अमृतपाने तु इन्द्रादिवत्त्वमप्यमरः कथं नाभूरित्यर्थः । रतेरधरस्याधरोष्ठस्य रसे स्वादे आदरादतितरामासक्तेर्हेतोः अमृते स(ता)दृङ्माधुर्याभावादाप्ता घृणा जुगुप्सा येनैवंभूतः सन् खलु प्रायेण अमृतं नापिबः न पीतवानसीति भण ब्रूहि । इति वाक्यार्थः कर्म । खलु संभावनायां वा । ओष्ठमाधुर्यलम्पटेन त्वयामृतकार्यमृतं न पीतम् । तेनेदृशी दशानङ्गत्वरूपा प्राप्ता । आपिथेति धातोः क्रादिनियमादिट् ॥

भुवनमोहनजेन किमेनसा तव बभूव परेत पिशाचता ।
यदधुना विरहाधिमलीमसामभिभवन्भ्रमसि स्मर मद्विधाम् ॥ ८३ ॥

भुवनेति ॥ हे परेत प्राप्तमरण, स्मर काम, भुवनमोहनाद्भवेनैनसा पापेन तव पिशाचता बभूव किम् । वदेत्यर्थः । यद्यस्मादधुना विरहाधिना वियोगपीडया मलीमसां मलिनां मद्विधां मादृशीं स्त्रियमभिभवन्पीडयन्भ्रमसि । अन्योऽपि परेतः पातकवशात्पिशाचः सन् बालकादीन्पीडयन्भ्राम्यतीति । त्रिभुवनापकारी त्वादृशः कोऽपि नास्तीति भावः । 'भ्रमति' इत्यन्विकल्पैः ॥

यत ददासि न मृत्युमपि स्मर स्खलति ते कृपया न धनुः करात् ।
अथ मृतोऽसि मृतेन च मुच्यते न खलु मुष्टिरुरीकृतबन्धनः ॥ ८४ ॥

यतेति ॥ हे स्मर, त्वं हितं न करोषि परं मृत्युमपि न ददासि यत कष्टम् । मरणे सतीयं पीडा नानुभूयेतेत्यर्थः । कृपया हेतुना ते करात्स्वकर्मधनुर्न स्खलति पतति । कृपया पतितुं युक्तम् । यत कष्टम्, कृपया मृत्युं न ददासि चेद्धनुः किमिति न त्यजसीत्यर्थः । अथवा जीवत एव करात्कृपया धनुः पतति, त्वं तु मृतः, तत्कथं पततु [illegible] [illegible] । अकृपयेति वा । धनुःपतनाभावे कारणमाह—अथ वा मृतोऽसि । मृतेन खलु निश्चितमुरीकृतमङ्गीकृतं स्वीकृतं बन्धनं येन एवंभूतो मुष्टिर्न मुच्यते । अतः कराद्धनुर्न स्खलति । मुष्टिरनपायिन्यः । 'बन्धनं बन्धुरं च स्यान्मुष्टीकृतमुरीकृतम्' इत्यनेकार्थध्वनिमञ्जरी ॥

---

१ 'अथ मृतोऽसि...' इति साहित्यविद्याधरी । २ '...' इति साहित्यविद्याधरी । ३ '...' इति साहित्यविद्याधरी । ४ '...' इति साहित्यविद्याधरी ।

दृगुपहत्यपमृत्युविरूपताः शमयतेऽपरनिर्जरसेविता।
अतिशयान्ध्यवपुःक्षतिपाण्डुताः स्मर भवन्ति भवन्तमुपासितुः ॥८५॥

दृगिति ॥ हे स्मर, त्वदन्ये ये निर्जरा देवाः सूर्यादयस्तेषां सेविता सेवको दृगुपहतिरान्ध्यम्, अपमृत्युरकालमरणं, विरूपता कुष्ठादिना वैरूप्यं च शमयते शान्तिं नयति। भवन्तं कामदेवमुपासितुः सेवितुरतिशयेनान्ध्यं प्रतिपत्तिराहित्यं नेत्रराहित्यं च वपुःक्षतिः शरीरकार्श्यम्, अकालमृत्युश्च। वपुषः पाण्डुता, विरहजनितपाण्डुरोगश्च एते भवन्ति। सूर्यादिभक्तस्यान्यसर्वरोगोपशमने सामर्थ्यम्। स्वरोगोपशान्तौ तव सामर्थ्यं नास्ति, त्वद्भक्तस्य नास्त्यत्र किं वाच्यम्। एवंविधस्त्वं देव इत्युपहासः। अपरनिर्जरान्सेवते तच्छीलस्तस्य भावः, सा कर्त्री। अन्यदेवसेवनमिति वा। अपमृत्युश्च विरूपता चेति पूर्वं द्वन्द्वः कार्यः, ततः पूर्वेण। शमयते, 'णिचश्च' इति तङ्, अमन्तत्वान्मित्वे ह्रस्वः। सेविता तृच्। अपरनिर्जरसेविता, अवतरत्त्वबोधिका इतिवत्समासः। द्वितीयपक्षे ताच्छील्ये णिनिः, तस्माद्भावे प्रत्ययः। अतिशयपदस्य प्रत्येकं संबन्धः। क्षयश्च पाण्डुता च, वपुषः क्षयपाण्डुते इति षष्ठीसमासं कृत्वा पूर्वेण समासः। अन्यथा पाण्डुताशब्दस्य पूर्वनिपातः स्यात्। उपासितुरिति तृन्नन्तयोगाद्भवन्तमिति द्वितीया ॥

स्मर नृशंसतमस्त्वमतो विधिः सुमनसः कृतवान्भवदायुधम्।
यदि धनुर्दृढमाशुगमायसं तव सृजेत्त्रिजगत्प्रलयं व्रजेत् ॥ ८६ ॥

स्मरेति ॥ हे स्मर, त्वं नृशंसतमोऽतिशयेन हिंस्रः, अतः कारणाद्विधिः सुमनसः पुष्पाणि भवदायुधं कृतवान्। ब्रह्मा यदि तव धनुर्दृढं कठिनम्, आशुगं बाणमायसं लोहमयं च सृजेत्, तर्हि त्रिजगत्प्रलयं व्रजेत्। अथ च तव दुष्टमनस्त्वाद्भवदायुधस्य सुमनस्त्वं कृतं विधिना। 'नृशंसो घातुको हिंस्रः' इत्यमरः। हिंसार्थाच्छंसेः कर्मण्यण्। आयसं विकारे रजतादित्वादञ्। त्रयाणां जगतां समाहार इति द्विगोरेकवचने नपुंसकत्वे च त्रिजगदिति साधुः ॥

स्मररिपोरिव रोपशिखी पुरां दहतु ते जगतामपि मा त्रयम्।
इति विधिस्त्वदिषून्कुसुमानि किं मधुभिरन्तरसिञ्चदनिर्वृतः ॥ ८७ ॥

स्मररिपोरिति ॥ हे काम, ते तवापि रोपशिखी बाणाग्निर्जगतां त्रयं मा दहतु मा स्म धाक्षीदिति हेतोरनिर्वृतः सचिन्तः सन् शङ्कितो वा विधिः कुसुमानि त्वदिषून्मधुभिर्मकरन्दैरन्तर्मध्येऽसिञ्चत्सिक्तवान्किम्। कः किमिव—स्मररिपोर्हरस्य रोपशिखी पुरां त्रयमिव। स यथा पुरां त्रयं ददाह तथा तवापीति। सिक्तं वस्तु दाहसमर्थं न भवतीति भावः। मा दहतु निषेधार्थवाचिनिरनुबन्धकमाशब्दयोगे लोट् ॥

---

१ 'अत्र व्यतिरेकालंकारः' इति साहित्यविद्याधरी। 'अत्रानर्थोत्पत्तिलक्षणो विषमालंकारभेदः' इति जीवातुः। २ 'अत्र हेतुरलंकारः' इति साहित्यविद्याधरी। ३ 'अथ किमर्थं आङ्माङोः सानुबन्धकयोर्निर्देशः क्रियते। आङो गतिकर्मप्रवचनीयसंप्रत्ययार्थः। माङः प्रतिषेधसंप्रत्ययार्थः। इह माभूत्—'आ छायामानयति, ममाछन्दः' इति 'आङ्माङोश्च' इति सूत्रभाष्यपर्यालोचने तु निरनुबन्धकमाशब्दस्य प्रतिषेधार्थत्वाभाव एव। तस्मात् 'तं पातयां प्रथममास' इत्यादिवन्निरङ्कुशप्रयोगएव। ४ 'अत्रोपमोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी।

विधिरनंशमभेद्यमवेक्ष्य ते जनमनः खलु लक्ष्यमकल्पयत् ।
अपि स वज्रमदास्यत चेत्तदा त्वदिषुभिर्व्यदलिष्यदसावपि ॥ ८८ ॥

विधिरिति ॥ विधिः—अणुपरिमाणत्वान्निरंशं निरवयवम् अतएवाभेद्यं भेत्तुमशक्यं जनमनोऽवेक्ष्य खलु निश्चितं ते लक्ष्यं वेध्यमकल्पयद्व्यरचयत् । अपि संभावनायाम् । स ब्रह्मा वज्रमिन्द्रायुधं, हीरकं वा चेददास्यतकल्पयिष्यत्, तर्हि असावपि वज्रोऽपि त्वदिषुभिस्त्वद्बाणैर्व्यदलिष्यद्विदीर्णोऽभविष्यदिति संभाव्यते । त्वादृशो हिंस्रः कोऽपि नेत्यर्थः । क्रियातिपत्तौ लृङ् । 'वज्रोऽस्त्री हीरके पवौ' इत्यमरः ॥

अपि विधिः कुसुमानि तवाशुगान् स्मर विधाय न निर्वृतिमाप्तवान् ।
अदित पञ्च हि ते स नियम्य तांस्तदपि तैर्बत जर्जरितं जगत् ॥ ८९ ॥

अपीति ॥ हे स्मर, विधिः कुसुमानि तव आशुगान्विधायापि निर्वृतिं सुखं नाप्तवान्, अतः स ब्रह्मा तान्कुसुमरूपान्बाणान्नियम्य गणयित्वा पञ्च हि पञ्चैव ते तुभ्यमदित न त्वधिकान्, तदपि तथापि तैः पञ्चसंख्याकैरपि बाणैर्जगत्त्रिलोकी जर्जरितं खण्डितम् । बत कष्टम् । अतिहिंस्रोऽसीति भावः ॥

उपहरन्ति न कस्य सुपर्वणः सुमनसः कति पञ्च सुरद्रुमाः ।
तव तु हीनतया पृथगेकिकां धिगियतापि न तेऽङ्ग विगर्हणा ॥ ९० ॥

उपहरन्तीति ॥ हे काम, पञ्चसंख्याकाः सुरद्रुमा मन्दारादयः कस्य सुपर्वणो देवमात्रस्य विशिष्टस्य सुतरां कति सुमनसः पुष्पाणि नोपहरन्ति उपायनीकुर्वन्ति । असंख्याताः सुमनसः प्रयच्छन्ति । देवस्यापि तव तु पुनर्हीनतयातिनिकृष्टत्वेनावज्ञया पृथक् प्रत्येकं एकिकामेकैकं पुष्पं प्रयच्छन्ति । अतएव पञ्चबाणत्वम् । अङ्ग कोमलामन्त्रणे । इयतापि धिक्कारेण ते विगर्हणा न लक्षणया लज्जा न । अतएव धिक् त्वामित्यर्थः । निर्लज्जो निर्गुणस्त्वमित्यर्थः । 'अङ्गविदारणम्' इति पाठे हृदयस्फोटो न भवतीत्यर्थः । सुमनःशब्दस्य नित्यस्त्रीलिङ्गबहुवचनान्तत्वेऽपि प्रत्येकैकत्वादेकिकामित्येकवचनम् ॥

कुसुममप्यतिदुर्णयकारि ते किमु वितीर्य धनुर्विधिरग्रहीत् ।
किमकृतैष तवैकतदास्पदे द्वयमभूदधुना हि नलभ्रुवौ ॥ ९१ ॥

कुसुममिति ॥ विधिः कुसुमरूपं धनुः ते तुभ्यं वितीर्य दत्त्वा पुनरग्रहीदगृहीतवान्किमु । यतोऽतिदुर्णयकारि त्रिजगदपकारित्वादतिदुर्विनीतमिति । किम्विति प्रश्ने संभावनायाम् । स्वयमेव पुनराह—हृतेऽपि धनुषि एष विधिस्तव किमकृत, अपितु किमप्यपकारं कर्तुं समर्थो नाभूदित्यर्थः । हि यस्मादधुना धनुष्यपहृतेऽपि एकतदास्पदे एकं च तत्तच्च एकतदं तस्य धनुषः स्थाने नलस्य भ्रुवौ द्वयमभूत् । तव तु धनुर्द्वयलाभात्तेन तवोपकार एव कृतो न त्वपकारः । विधिना परोपकारार्थं धनुर्हृतम्, परं लोकमन्येन विपरीतं जातमिति भावः ।

---

१ 'अत्र विरोधालंकारः' इति साहित्यविद्याधरी । २ 'अत्रापि विरोधोऽलंकारः' इति साहित्यविद्याधरी । ३ 'सुमनाः सुमनसः स्त्रियां ना धीरदेवयोः' इति मेदिन्यादिकोशात् [illegible] इव वर्तन्ते' इति मुकुटोक्तेर्बहुवचनान्तत्वे [illegible] एकवचनं चिन्त्यम् । ४ 'अत्र हेतुरलंकारः' इति साहित्यविद्याधरी ।

दुर्णय इति, 'उपसर्गादसमासेऽपि णोपदेशस्य' इति णत्वम्। दुर्नय इति च पाठः। तदोपसर्गप्रतिरूपकाव्ययत्वाण्णत्वाभावः[1] ॥

षडृतवः कृपया स्वकमेककं कुसुममक्रमनन्दितनन्दनाः।
ददति यद्भवते कुरुते भवान्धनुरिवैकमिषूनिव पञ्च तैः ॥ ९२ ॥

षडिति ॥ अक्रमं क्रममुल्लङ्घ्यैव नन्दितं वर्धितं नन्दनमिन्द्रोद्यानं यैस्ते षडपि ऋतवः स्वकं स्वीयमेककमेकैकं कुसुमं पुष्पं कृपया न तु प्रीत्या यद् भवते तुभ्यं ददति। भवान् तैः षड्भिः कुसुमैः कृत्वा एकं पुष्पं धनुरिव पञ्च पुष्पाणि इषूनिव कुरुते। भिक्षुणा त्वया ऋतवः षट्पुष्पाणि याचिताः, तैस्त्वया विभज्य धनुर्बाणाश्च कृताः। अतिदरिद्रो भिक्षया प्राप्तं स्वल्पमपि वस्तु विभज्य, अनेनैतत्कर्तव्यमनेनैतत्कर्तव्यमिति मनोरथः क्रियत इति लौकिक्युक्तिसूचनार्थमुभयत्रापीवशब्दप्रयोगः[2] ॥

यदतनुस्त्वमिदं जगते हितं क्व स मुनिस्तव यः सहते हतीः।
विशिखमाश्रवणं परिपूर्य चेदविचलद्भुजमुज्झितुमीशिषे ॥ ९३ ॥

तदिति ॥ हे स्मर, यत्त्वमतनुः शरीररहितोऽसि इदं जगते लोकाय हितम्। सशरीरत्वे तु त्वं विशिखं बाणमाश्रवणं परिपूर्याकृष्य अविचलद्भुजं दृढभुजं यथा स्यादेवं बाणमुज्झितुं त्यक्तुं चेदीशिषे समर्थः स्याः, तर्हि यस्तव हतीर्घातान्सहते स मुनिरपि क्व। त्वद्बाणपीडासहो मुनिरपि न विद्यते, अन्यो नास्तीति किं वाच्यम्। तस्मात्तवाशरीरत्वे लोकभाग्यं कारणम्। हितयोगे चतुर्थीसमासविधानसामर्थ्याज्जगते इति तद्योगे चतुर्थी। 'ईशः से' इति इटि ईशिष इति रूपम्[3] ॥

सह तया स्मर भस्म झटित्यभूः पशुपतिं प्रति यामिषुमग्रहीः।
ध्रुवमभूदधुना वितनोः शरस्तव पिकस्वर एव स पञ्चमः ॥ ९४ ॥

सहेति ॥ हे स्मर, त्वं पशुपतिं प्रति लक्ष्यीकृत्य तद्वधाय यामिषुमग्रहीः, तया इष्वा सह त्वं झटिति भस्म अभूः। जीवपालकेन हरेणास्मदादिहिताय सबाणस्त्वं दग्ध इति भावः। वितनोः शरीररहितस्य तवाधुना पिकस्वर एव कोकिलस्वर एव पञ्चानां पूरणः शरोऽभूत्। ध्रुवमुत्प्रेक्षे। अशरीरत्वेऽपि पञ्चबाणत्वं चावस्थितमेवेत्यर्थः। 'पञ्चमं प्राह कोकिलः' (इत्युक्तेः पञ्चमनामकः पिकस्वर एव शरोऽभूत्) इति शब्दच्छलम्—हरेण दग्धे शरे तत्स्थाने पञ्चमस्वर एव जातः। 'पत्री रोप इषुर्द्वयोः' इत्यमरः[4] ॥

स्मर स मद्दुरितैरफलीकृतो भगवतोऽपि भवद्दहनश्रमः।
सुरहिताय हुतात्मतनुः पुनर्ननु जनुर्दिवि तत्क्षणमापिथ ॥ ९५ ॥

स्मरेति ॥ रे स्मर स भगवतो, हरस्यापि भवद्दहने भवद्दाहे श्रमः मद्दुरितैर्ममैव पातकैरफलीकृतो निष्फलीकृतः। विफलत्वमेवाह—ननु यस्मात्सुराणां हिताय हुता त्यक्ता आत्म-

---

१ इदं च 'इदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु' इति वार्तिकस्य 'णत्वं—दुर्नयम्, दुर्नीतमिति।' 'उपसर्गाद—' इति णत्वं मा भूदिति' इति भाष्यस्य च विस्मरणमूलकम्। तन्नाणत्वरहित एव प्रयोगः साधुः। २ 'अत्रोत्प्रेक्षातिशयोक्तिश्चालंकारः' इति साहित्यविद्याधरी। ३ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी। ४ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी। ५ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी।

तनुः स्वशरीरं येन एवंविधस्त्वं तत्प्रसादात्स्वर्गं तत्कालमेव दिवि पुनर्जनुर्जन्म प्राप्य आप्तवानसि । नहि पापिनः स्वर्गे जन्म, तव तु परोपकारित्वात्स्वर्गे जन्म । सुरहिताय, 'चतुर्थी तदर्थार्थ-' इति समासः ॥

विरहिणो विमुखस्य विधूदये शमनदिक्पवनः स न दक्षिणः ।
सुमनसो नमयन्नटनी धनुस्तव तु बाहुरसौ यदि दक्षिणः ॥ ९६ ॥

विरहिण इति ॥ विधूदये चन्द्रोदये विमुखस्य दुःखितस्य विरहिणः स शमनस्य यमस्य दिक्पवनो मलयानिलः दक्षिणः सुखकारी न, किंतु वामो वक्र एव । प्रथमं विरहदुःखम्, ततश्चन्द्रोदयात्, ततो मलयानिलादिति भावः । पूर्णस्य चन्द्रस्य दुःखकारित्वाद्विमुखस्य पश्चिमाभिमुखस्य विरहिणोऽपसव्यो न भवति, किंतु वाम एव । पश्चिमदिङ्मुखस्य दक्षिणदिग्वामो वाम एवेत्यर्थः । ननु मलयानिलस्य प्रसिद्धं दक्षिणत्वं कथमपलप्यत इत्याशङ्क्याह—यदि असौ मलयानिलो दक्षिण एवेत्यभिमानः, तु तर्हि सुमनसो धनुः पुष्पमयं चापमटनी अग्रे नमयन्नाकुर्वंस्तव बाहुरेव । तुरेवार्थो वा । यथा तव बाहुर्विरहिणोऽनुकूलतया मलयानिलोऽपि । विरुद्धलक्षणया उभौ दुःसहावित्यर्थः । मलयानिलोऽप्यग्रे पुष्पाणि नमयति । सुमनसो देवानपि वा । शमयते सर्वान्मारयति, तद्दिग्गतो वायुरपि तथैव । अथ च दक्षिणः प्रहरणकुशलो धर्मयोद्धा न, पराङ्मुखस्यापि हननात् । अतो दक्षिणत्वे प्रसिद्धो विरहिणां शत्रुरेवेत्यर्थः[२] ॥

किमु भवन्तमुमापतिरेककं मदमुदान्धमयोगिजनान्तकम् ।
यदजयत्तत एव न गीयते स भगवान्मदनान्धकमृत्युजित् ॥ ९७ ॥

किमिति ॥ उमापतिर्मदमुदा गर्वहर्षेणान्धमयोगिजनानां वियोगिजनानामन्तकं मृत्युमेककं भवन्तं यदजयत्, तत एव हेतोः किमु स भगवान्हरो मदनान्धकमृत्युजिन्न गीयते । अपितु तत एव कीर्त्यते । एकस्यैव तव जयान्मदनजित्, अन्धकजित्, मृत्युजित्, इति नामत्रयं प्राप्तवान् । मदनत्वम्, अन्धकत्वम्, मृत्युत्वं, धर्मत्रयं त्वयि विद्यते । अन्धकासुर-मृत्यु-मदन—नामनिरपेक्षमेककस्यैवेत्यर्थः ॥

त्वमिव कोऽपि परापकृतौ कृती न ददृशे न च मन्मथ शुश्रुवे ।
स्वमदहो दहनाज्ज्वलतात्मना ज्वलयितुं परिरभ्य जगन्ति यः ॥ ९८ ॥

त्वमिवेति ॥ हे मन्मथ, परापकृतौ परापकारे विषये त्वमिव त्वत्सदृशः कोऽपि कृती कुशलो न ददृशे दृष्टः, न च शुश्रुवे श्रुतः । कोऽप्यर्थः । कथमित्यत आह—ज्वलता ज्वलता आत्मना स्वदेहेन जगन्ति त्रिभुवनानि परिरभ्यालिङ्ग्य ज्वलयितुं दहनात् हरनयनाग्नेः स्वमात्मानमदहोऽदाहयः । ज्वलन्नेव त्रिभुवनं ज्वलयेदित्यर्थः । परापकारार्थं स्वात्मापि येन दग्धः, एवंविधस्त्वं कुशल इत्युपहासः ॥

---

१ 'अयोगिजनान्तकम्' इति साहित्यविद्याधरी । २ [illegible] इति साहित्यविद्याधरी । [illegible] इति जीवातुः । ३ [illegible] इति साहित्यविद्याधरी । [illegible] इति जीवातुः । ४ [illegible] इति साहित्यविद्याधरी ।

त्वमुचितं नयनार्चिषि शंभुना भुवनशान्तिकहोमहविः कृतः ।
तव वयस्यमपास्य मधुं मधुं हतवता हरिणा बत किं कृतम् ॥ ९९ ॥

त्वमिति ॥ त्वं शंभुना नयनार्चिषि उचितं योग्यं भुवनशान्तिकहोमार्थं लोकपीडाशान्तिप्रयोजनकहोमार्थं हविर्हव्यं कृतः । महामार्यादिपीडाशान्त्यर्थं वह्नौ होमार्थं हविर्भवति, त्वज्जनितपीडाशान्त्यर्थं तु नयनवह्नावुचितं हविस्त्वमेव प्रक्षिप्त इत्यर्थः । त्वं नयनवह्नौ हविः कृतः, एतदुचितं कृतमिति वा । शं भवत्यस्मादिति शंभुपदेन सूचितम् । हरिणा विष्णुना तव वयस्यं मित्रं मधुं वसन्तमपास्य परित्यज्य मधुं मधुनामानं दैत्यं हतवता किं कृतम् । न किमपीत्यर्थः । अतिपीडाकारिणं वसन्तमुपेक्ष्य दैत्यं हतवता हरिणा किमपि नोपकृतमिति भावः । बत कष्टम् । किंकृतं कुत्सितं कृतमिति वा । शान्तिः प्रयोजनमस्य शान्तिकः 'प्रयोजनम्' इति ठक् ॥

इति कियद्वचसैव भृशं प्रियाधरपिपासु तदाननमाशु तत् ।
अजनि पांशुलमप्रियवाग्ज्वलन्मदनशोषणबाणहतेरिव ॥ १०० ॥

इतीति ॥ प्रियस्य नलस्याधरपिपासु अधरचुम्बनाभिलाषि तत्प्रसिद्धं विरहपाण्डुरं वा तस्या आननम् । इति पूर्वोक्तेन कियद्वचसैवाल्पवचनेनैव आशु शीघ्रं पांशुलमतितरां शुष्कमजनि जातम् । साकल्येन वक्तुं समर्थं नाभूदित्यर्थः । यच्च पिपासु तदल्पवचनेनैव शुष्ककण्ठं भवति । उत्प्रेक्षते—अप्रियवाचा सनिन्दवचनेन ज्वलन्क्रुद्धो यो मदनस्तस्य शोषणबाणेन शोषणाख्येन शरेण या हतिर्हननं तस्मादिव । शोषणबाणाहतं सच्छुष्कं जातमित्यर्थः । अधरपिपासु 'मधुपिपासुप्रभृतीनां गम्यादिपाठात्समासः' इति वामनाचार्यवचनात्समासः । पांशुलशब्दः सिध्मादि (लजन्तः) ॥

वक्रोक्तिमन्योक्तिं व्याख्यातुमुपक्रमते—

प्रियसखीनिवहेन सहाथ सा व्यरचयद्गिरमर्धसमस्यया ।
हृदयमर्मणि मन्मथसायकैः क्षततमा बहु भाषितुमक्षमा ॥ १०१ ॥

प्रियेति ॥ अथानन्तरं सा भैमी प्रियसखीनिवहेन स्वहृदयवेदिप्रियसखीनिवहेन सह अर्धया [illegible] समस्यया प्रत्युत्तरश्लोकार्धपरिपूरणेन गिरं व्यरचयत् । अर्धं स्वयं पूर्वमूचे, अनन्तरं सैन्यूचेत्यर्थः । एवं किमित्युचितत्वात् आह—किंभूता सा—हृदयमर्मणि हृदयरूपमर्मस्थाने मन्मथसायकैः क्षततमातितरां विद्धा । अत एव बहु भाषितुमक्षमासमर्था । 'समस्या तु समासार्था' इत्यमरः । अपूर्णस्याद्रिदितं समस्तं संक्षिप्यतेऽनयेति समस्या । बाहुलकात् 'संज्ञायां—' इति क्यप् ॥

अकदनादिव मूलवशादमूत्सहचरीपदि धीरतयात्मनः ।
अनय एव ननाय विरोधिनः कथमरीन्सखि रक्षितुमात्थ माम् १०२

अकदनादिति ॥ हे सखि, चन्द्र [illegible] संज्ञा [illegible] 'मिदि मेदिन्' इति वचनात् ।

---

१ 'अथ [illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी ।

इति सखीवचनम् हे सखि, ममाद्य असव एव प्राणा एव विरोधिनो वैरिणः, त्वमरीन्नाशयितुं कथमात्थ ब्रूषे । वैरिणो रुद्धमार्गा इक्षुदानेनापि नोपदिशन्ति, किंपुनर्मित्रम् । इति भैमीवचः । प्राणेषु गतेषु मम सुखं स्यादित्यर्थः । सूत्रपाठात् 'मैत्री-' इत्यादावत्वम् ॥

हितगिरं न शृणोषि किमाश्रवे प्रसभमप्यव जीवितमात्मनः ।
सखि हिता यदि मे भवसीदृशी मदरिमिच्छसि या मम जीवितम्॥१०३॥

हितेति ॥ हे आश्रवे वचनेऽवस्थानकारिणि, हितानां मादृशीनां, हितां वा गिरं वाचं किं न शृणोषि, अपितु आकर्णय । यद्यप्यतिपीडा भवति तथापि 'आत्मानं सततं गोपायेत्' इति श्रुतेः । प्रसभं बलात्कारेणापि धैर्यमवलम्ब्य आत्मनो जीवितमव इत्यन्यसखीवचः । (उत्तरम्)—हे सखि, या त्वं मदरिं मच्छत्रुभूतं मम जीवितमिच्छसि, ईदृशी यदि तर्हि हिता मे भवसि, कस्य हिता न भवसि । सखीत्वादेतादृशं वक्तुमनुचितमिति भावः । मे, चतुर्थी हितशब्दयोगे इति वा ॥

अमृतदीधितिरेष विदर्भजे भजसि तापममुष्य किमंशुभिः ।
यदि भवन्ति मृताः सखि चन्द्रिकाः शशभृतः क तदा परितप्यते॥१०४॥

अमृतेति ॥ हे विदर्भजे, एष पुरोवर्ती अमृतदीधितिः, न तु तीक्ष्णदीधितिः । त्वं अमुष्यांशुभिः सुधामयैः किरणैस्तापं दाहं किं भजसि—इति सखीवचः । छलेनोत्तरमाह—हे सखि, शशभृतः कलङ्किनः चन्द्रिका यदि मृता भवन्ति कृष्णपक्षवत्तदा क कुतो हेतोः परितप्यते संतप्येत, कारणान्तराभावात्संतापो न भवेदिति भैमीवचः ॥

व्रज धृतिं त्यज भीतिमहेतुकामयमचण्डमरीचिरुदञ्चति ।
ज्वलयति स्फुटमातपमुर्मुरैरनुभवं वचसा सखि लुम्पसि ॥ १०५ ॥

व्रजेति ॥ हे भैमि, धृतिं व्रज अङ्गीकुरु । [illegible] अहेतुकामकारणिकां भीतिं त्यज । अयमचण्डमरीचिश्चन्द्र उदयत्युदेति—इति सखीवचः । उत्तरम्—हे सखि, अयं आतपमुर्मुरैरातपकरीषा(तुषा)ग्निकणैः स्फुटं मां ज्वलयति, त्वं वचसानुभवं लुम्पसि । वचनादनुभवो बलीयानित्यर्थः । 'मुर्मुरस्तुषवह्नौ स्यात्' इति विश्वः ॥

अयि शपे हृदयाय तवैव तद्यदि विधोर्न रुचेरसि गोचरः ।
रुचिफलं सखि दृश्यत एव तज्ज्वलयति त्वचमुल्ललयत्यसून् ॥१०६॥

अयीति ॥ अयि भैमि, यदि त्वं विधोश्चन्द्रस्य रुचेर्दीप्तेर्गोचरो विषयो नासि, तर्हि तवैव हृदयाय शपे त्वद्धृदयं स्पृशामि चन्द्र एवायं न तु सूर्य इति शपथः क्रियते । 'अपि' इति पाठे वस्त्वर्थे तव निश्चयार्थं शपेऽपि शपथमपि करोमीत्यर्थः । छलेनोत्तरमाह—हे सखि, रुचेः फलं दृश्यत एव यत्त्वचं ज्वलयति असूनुल्ललयत्युन्मूलयति । तस्मात्सत्यमुक्तम् । रुचिफलं शरीरज्वलनं प्राणोन्मूलनं च प्रत्यक्षसिद्धमेव [illegible] इति भावः । शपे 'शप उपालम्भने' इति वचनादात्मनेपदम् । तद्योगे 'श्लाघह्नुङ्-' इति (संप्रदानत्वात्) चतुर्थी ॥

---

१ 'इक्षुः [illegible]' । [illegible] । २ '[illegible]' इति [illegible] ।

विधुविरोधितिथेरभिधायिनीं ननु न किं पुनरिच्छसि कोकिलाम् ।
सखि किमर्थगवेषणया गिरं किरति सेयमनर्थमयीं मयि ॥ १०७ ॥

विध्विति ॥ विधुविरोधितिथेश्चन्द्रशत्रुतिथेरमावास्याया अभिधायिनीमपि कुहूशब्दं कुर्वतीमपि कोकिलां पुनः किमिति नेच्छसि । अपि तु स्वशत्रुचन्द्रशत्रुत्वान्माननीयेयम् । अत्रोत्तरम्—हे सखि, कुहूशब्देनामावास्यामाह्वयतीयमित्यर्थगवेषणयार्थविचारणया किम्, अलम् । यस्मात्सेयं कोकिला मयि मद्विषयेऽनर्थमयीममावास्यालक्षणानर्थशून्यां । अथ च दुःसहदुःखप्रचुरां गिरं किरति वदति । शब्दमात्रमेतत्, न तु तामाह्वयतीति वञ्चकेयमिति भावः ॥

हृदय एव तवास्ति स वल्लभस्तदपि किं दमयन्ति विषीदसि ।
हृदि परं न बहिः खलु वर्तते सखि यतस्तत एव विषद्यते ॥ १०८ ॥

हृदय इति ॥ हे दमयन्ति, यद्यपि स वल्लभो नलस्तव हृदय एवास्ति तदपि तथापि किं विषीदसि खेदं कुरुषे, अपितु खेदो न करणीयः । इति सखीवचः ॥ हे सखि, यतः स हृद्येव परं वर्तते, बहिः खलु निश्चयेन न वर्तते, तत एव तस्मादेव हेतोर्विषद्यते विषादः क्रियत इत्युत्तरम् ॥

स्फुटति हारमणौ मदनोष्मणा हृदयमप्यनलंकृतमद्य ते ।
सखि हतासि तदा यदि हृद्यपि प्रियतमः स मम व्यवधापितः॥१०९॥

स्फुटतीति ॥ हे भैमि, मदनोष्मणा मदनजनितवियोगानलेन हारमणौ हारे विद्यमानो नायकमणिः । तत्सहित इत्यर्थः । तस्मिन्स्फुटति विदीर्यमाणे सति अद्य ते हृदयमपि अनलंकृतं न भूषितमलंकाररहितं जातमिति सखीवचः । मुखादि तु प्रागेव भूषारहितं जातमित्यपिशब्दार्थः । हे सखि, यदि स मम प्रियतमो हृद्यपि व्यवधापितोऽन्तर्धापितस्तर्हि हतासि, अनलं नलरहितं हृदयं कृतमिति त्वदुक्तेर्हृदयादप्यपाकृतः प्रेयानिति छलेन भैमीवचः । दधातेर्णौ 'अर्ति–' इत्यादिना पुकि व्यवधापितः 'निष्ठायां सेटि' इति णिचो लोपः ॥

मूर्च्छामाह—

इदमुदीर्य तदैव मुमूर्च्छ सा मनसि मूर्च्छितमन्मथपावका ।
क्व सहतामवलम्बलवच्छिदामनुपपत्तिमतीमतिदुःखिता ॥ ११० ॥

इदमिति ॥ मनसि मूर्च्छितः प्राप्तवृद्धिर्मन्मथ एव पावको यस्याः सा भैमी इदं पूर्वोक्तमुदीर्योक्त्वा तदैव तत्कालमेव मुमूर्च्छ नवमीमवस्थां प्राप । अनलंकृतमित्यत्रालीकया नलराहित्यप्रतीत्या कथं मूर्च्छां प्रापेत्याशङ्क्यार्थान्तरन्यासमाह—अतिदुःखिता सा अनुपपत्तिमतीमघटमानामलीकामप्यवलम्बस्य नललक्षणस्य जीवनाधारस्य यो लवो लेशस्तस्य या छिदा त्रुटिस्तां क्व कुतः सहतां सोढुं शक्ता स्यात् । न कुतोऽपि । दुःखितो दुःखहेतौ नालीकत्वं विचारयति । अलीकमेव नलराहित्यमविचार्यैवमपि मूर्च्छां प्रापेति युक्तमेव । 'तीमपि' पाठः[२] ॥

१ 'चन्द्रमुखत्वान्माननीयेयम्' इत्यपि पाठश्चिन्त्यः । २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्य- [illegible] । 'अर्थान्तरन्यासोऽलंकारः' इति जीवातुः ।

अधित कापि मुखे सलिलं सखी प्यधित कापि सरोजदलैः स्तनौ ।
व्यधित कापि हृदि व्यजनानिलं न्यधित कापि हिमं सुतनोस्तनौ ॥ १११ ॥

अधितेति ॥ कापि सखी सुतनोरतिकृशाया भैम्या मुखे सलिलमधित चिक्षेप । कापि काचित्सखी सरोजदलैः स्तनौ प्यधित आच्छादितवती । काचिद्धृदि व्यजनानिलं व्यधित चकार । काचिच्च हिमं चन्दनं तनौ शरीरे न्यधित निक्षिप्तवती । 'चन्दने च हिमं विदुः' इति विश्वः । 'बिसम्' इति पाठः ॥

उपचचार चिरं मृदुशीतलैर्जलजनालमृणालजलादिभिः ।
प्रियसखीनिवहः स तथा क्रमादियमवाप यथा लघु चेतनाम् ॥ ११२ ॥

उपचचारेति ॥ स प्रियो हितः सखीनिवहो मृदुभिः कोमलैः शीतलैर्हिमैश्च जलजैः पद्मैर्जलचन्दनव्यजनानिलाद्यैः चिरकालं क्रमात्परिपाट्या भैमीं तथा उपचचार यथा इयं लब्धोल्लासां चेतनामवाप । लघु शीघ्रं वा ॥

अथ कले कलय श्वसिति स्फुटं चलति पक्ष्म चले परिभावय ।
अधरकम्पनमुन्नय मेनके किमपि जल्पति कल्पलते शृणु ॥ ११३ ॥

रचय चारुमते स्तनयोर्वृतिं कलय केशिनि केशकदम्बकम् ।
अवगृहाण तरङ्गिणि नेत्रयोर्जलझराविति शुश्रुविरे गिरः ॥ ११४ ॥

अथेति ॥ रचयेति युग्मम् । इति सखीनां परस्परं गिरो वाचो [illegible] शुश्रुविरे आकर्णिताः । इति किम्—कले इत्यादीनि भैमीसखीनामानि । अथानन्तरं [illegible] हे कले सखि, इयं भैमी स्फुटं प्रकटं श्वसिति जीवति इति कलय विचारय । हे चले सखि, पक्ष्म अक्षिलोम चलतीति परिभावय विचारय । पक्ष्मचलनमपि जीवनचिह्नम् । हे मेनके सखि, अधरकम्पनमोष्ठस्फुरणमुन्नय तर्कय । कल्पलते सखि, इयं किमप्यस्फुटं [illegible] जल्पति वदति शृणु । एवं जीवनज्ञानानन्तरं हे चारुमते सखि, [illegible] कुरु । इयं स्तनयोरावृतिं न जानाति । हे केशिनि सखि, [illegible] कलय बधान । [illegible] हे तरङ्गिणि सखि, नेत्रयोर्जलझरौ [illegible] अवगृहाण [illegible] । तरङ्गिण्या हि [illegible] । [illegible] 'केसरान्ता [illegible]' इति [illegible] ॥

कलकलः स तदालिजनाननादुदलसद्विपुलस्त्वरितेरितः ।
यमधिगम्य सुतालयमाविशद्गुरुदरः स विदर्भपुरंदरः ॥ ११५ ॥

कलकल इति ॥ [illegible]

धृतदरो जातभयः स विदर्भपुरंदरो भीमः यं कोलाहलमधिगम्य आकर्ण्य सुतालयमीयिवा-नागतवान् । त्वरितानां धावकानामीरितैर्वचनैर्यमधिगम्येति वा ॥

कन्यान्तःपुरबाधनाय यदधीकारान्न दोषा नृपं
द्वौ मन्त्रिप्रवरश्च तुल्यमगदंकारश्च तावूचतुः ।
देवाकर्णय सुश्रुतेन चरकस्योक्तेन जानेऽखिलं
स्यादस्या नलदं विना न दलने तापस्य कोऽपि क्षमः ॥ ११६ ॥

कन्येति ॥ तौ द्वौ तुल्यं समकालं शब्दसारूप्यात्समानं च नृपमूचतुः । द्वौ कौ—मन्त्रि-प्रवरश्च अगदंकारो वैद्यश्च । तौ कौ—यदधीकारात्स्वाम्यान्नियोगात्पुरुषादिभ्यो वातादिरोगा-दिभ्यश्च कन्यान्तःपुरस्य बाधनाय निन्दायै, अथ च कन्याया अन्तःपुरस्य शरीरस्य मध्ये बाधनं पीडा तस्मै दोषा (न) व्यभिचारादयो, वातादयो रोगाश्च न समर्था भवन्तीत्यर्थः । किमूचतुस्तत्राह—हे देव राजन्, आकर्णय त्वं शृणु । सुश्रुतस्य अन्तःपुरस्थादिद्वारा, चर एव चरकः तस्य दूतस्योक्तेन वचनेनाखिलं रहस्यं जाने । किं रहस्यम्—नलदं विना नल-नामकराजप्रदं पुरुषं विनास्यास्तापस्य संतापस्य दलने नाशे कोऽपि क्षमः शक्तो न स्यान्न भवति । इति मन्त्रिवचः दूतमुखान्मया श्रुतम् । अस्या नलेऽनुरागः, तदप्राप्तिजनितोऽय-मस्याः संतापः, तत्प्राप्तौ शाम्येदित्युपायं रचयेत्यर्थः । अस्यास्तापस्य ज्वरस्य शमने नल-दमुशीरं विना कोऽपि क्वाथादिस्तापं शमयितुं क्षमो नेति, सुश्रुताख्यवैद्यकग्रन्थेन तथा चरकनाम्नायुर्वेदविदो वचनेन तत्प्रणीतेन ग्रन्थेन अखिलं निदानं चिकित्सां जाने इत्यगदंका-रवचनम् । अथच कोऽपि ब्रह्मापि न क्षमः । आकस्मिकशब्दश्रवणादाकुलस्य राज्ञोऽन्तःपुरे मन्त्रिवैद्ययोः प्रवेशो युक्तो भवति न काप्यनौचिती । 'पुरं पुरि शरीरे च' इति विश्वः । कन्या, प्रथमवयोवाचित्वेऽपि 'कन्यायाः कनीन च' इति निर्देशान्ङीबभावः । अधीकारात्, 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति [2]दीर्घः ॥

ताभ्यामभूद्युगपदप्यभिधीयमानं भेदव्यपाकृति मिथः प्रतिघातमेव ।
श्रोत्रे तु तस्य पपतुर्नृपतेर्न किंचिद्भैम्यामनिष्टशतशङ्कितयाकुलस्य ११७

ताभ्यामिति ॥ ताभ्यां मन्त्रिवैद्याभ्यां युगपदेककालमभिधीयमानां भेदस्य शब्द-स्वरूपविशेषस्य व्यपाकृतिर्निराकरणं यत्र (तत्) अभिन्नस्वरूपम् । एवंविधमपि वचनं मिथः परस्परं प्रतिघातो यत्र एवंविधं परस्परं भिन्नमेवाभूत् । भैम्यामनिष्टशतशङ्कितया अनर्थ-परम्पराशङ्कितया आकुलस्य तस्य नृपतेः श्रोत्रे तु कर्णौ पुनः किंचिदेकस्यापि वचनं न पपतुः शुश्रुवतुः । राजा भैम्यवस्थया नितरामाकुलोऽभूदित्यर्थः ॥

द्रुतविगमितविप्रयोगचिह्नामपि तनयां नृपतिः पदप्रणम्राम् ।
अकलयदसमाशुगाधिमग्नां झटिति पराशयवेदिनो हि विज्ञाः ॥११८॥

द्रुतविगमितेति ॥ नृपती राज्ञागमनमाकर्ण्य द्रुतं शीघ्रं विगमितं दूरीकृतं विप्रयोग-चिह्नं यया एवंभूतामपि पदप्रणम्रां चरणपतितां तनयां असमाशुगः कामस्तज्जनित आधिः

१ 'अत्रानुप्रासजात्यलंकारौ' इति साहित्यविद्याधरी । २ 'अत्र शार्दूलविक्रीडितं वृत्तम्' । 'अत्र तुल्ययोगिताश्लेषालंकारः' इति साहित्यविद्याधरी । 'अत्र द्वयोरपि नलदयोः प्रकृतत्वात्केवलप्रकृतश्ले-षोऽलंकारः' इति जीवातुः । ३ 'अत्र जातिरलंकारः । वसन्ततिलकावृत्तम्' इति साहित्यविद्याधरी ।

एवं यद्वदता नृपेण तनया नापृच्छि लज्जास्पदं
यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः।
यच्चाशीः कपटादवादि सदृशी स्यात्तत्र या सान्त्वना
तन्मत्वालिजनो मनोऽभिमतनोदानन्दमन्दाक्षयोः॥ १२२॥

एवमिति॥ एवं पूर्वोक्तं वदता नृपेण भीमेन तनया लज्जास्पदं यस्मिन्पृष्टे सति लज्जा भवति तद्विरहकारणं नापृच्छि न पृष्टा। लज्जास्पदं न पृष्टेति वा। अथ पाण्डुतातापादिभिः शरीरपाण्डिमकृत्रिमसंपादिभिः स्मराद्भवतीति स्मरभूः स्मरजन्यो मोहो मूर्च्छा अकल्पि (किं ततः) यच्चाशीः कपटाना(दा)शीर्वचनव्याजान(द)वादि आश्वासनसमर्थम् 'दयितमभिमतम्-' इत्यादि यदुक्तम्। तत्र संतापादिविषये सदृशी समुचिता या सान्त्वना उपचारः स्यात्स चावादि। आलिजनः सखीसमूहः तत्सर्वं मत्वा ज्ञात्वा मनोऽन्तःकरणं आनन्दश्च मन्दाक्षं च लज्जा तयोरभिमतनोदचकार। शीघ्रं भैम्याः स्वयंवरप्राप्तेरानन्दातिशयः, राज्ञा विरहपीडा ज्ञातेति लज्जाधिक्यं चाभूदित्यर्थः[1]॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तुर्यः स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महा-
काव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः॥ १२३॥

श्रीहर्षमिति॥ पूर्वार्धं पूर्ववत्। स्थैर्यविचारणं क्षणभङ्गनिराकरणेन स्थिरत्वस्य विचारणसूचकं प्रकरणं ग्रन्थः, तस्य भ्रातरि एककर्तृकत्वात्सोदरे काव्ये तुर्यश्चतुर्थः सर्गः समाप्तः। स्थैर्यविचाराख्यो ग्रन्थः श्रीहर्षेण कृतः। 'चतुरश्छयतौ चलोपश्च' इति चलोपे च तुर्य इति सिद्धम्॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे
चतुर्थः सर्गः समाप्तः॥

पञ्चमः सर्गः।

अथ 'व्यतरत्-' इति श्लोके पित्रोक्तं स्वयंवरोपक्रममुद्दिश्य तत्प्रसङ्गार्थं पञ्चमं सर्गं[2]

यावदागमयतेऽथ नरेन्द्रान्स स्वयंवरमहाय महीन्द्रः।
तावदेव ऋषिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम॥ १॥

यावदिति॥ अथ भैमीसमाश्वासनानन्तरं स महीन्द्रो भीमः स्वयंवर एव महस्तस्य[.], तदर्थं यावत् नरेन्द्रान्राज्ञ आगमयते प्रतीक्षते आनाययते वा स्वयंवरार्थमाहूतानां [.] प्रतीक्षां करोति तावदेव तस्मिन्नेव काले इन्द्रं दिदृक्षुर्द्रष्टुमिच्छुर्नारदनामा ऋषिस्त्रिदश-

१ 'अत्र रूपकसमुच्चयभावशबलतालंकारसंकरः' 'शार्दूलविक्रीडितम्' इति साहित्यविद्याधरी।
२ 'चारुणि नैषधीयचरिते' इति पुस्तकान्तरपाठः।

धाम स्वर्गं जगाम गतवान्। कलहद्वारा नरकमूहं वहतीति। कलहप्रवर्तक इत्यर्थः। आगमयते, 'आगमेः क्षमायामात्मनेपदम्' इति वचनात्तङ्। एव ऋषिः, 'ऋलकः'। इन्द्रादिदन्तुः, शेषषष्ठीसमासः। बहुलग्रहणाद्योगविभागाद्वा। अथर्वजुगुप्सुरितिवद्द्वितीयासमासो वा ॥

नात्र चित्रमनु तं प्रययौ यत्पर्वतः स खलु तस्य सपक्षः।
नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे ॥ २ ॥

नात्रेति ॥ पर्वत एतन्नामा ऋषिः तं नारदमनु पश्चाद्यत्प्रययौ अनुगतः। अत्र अस्मिन्विषये चित्रमाश्चर्यं न। कुतः—खलु यस्मात्स पर्वतः तस्य नारदस्य सपक्षो मित्रभूतः। यद्यपि कार्याक्षमः तथापि मित्रत्वादनुगमनं युक्तम्, अतो नाश्चर्यम्। तर्हि कुत्राश्चर्यमित्यत आह—उपदेष्टृत्वात्पूज्यत्वाच्च जगतो गुरुर्नारदस्तु पुनर्यद्गगनमाकाशं विललङ्घे लङ्घितवान् तद् उच्चैरतितरां विस्मयाय आश्चर्याय। जातमिति शेषः। अर्थाद्यत्तदोः संबन्धः। जगतो विस्मयायेति वा। वीनां पक्षिणामपि स्मयाय वेगातिशयेनाद्भुतायेति वा। अथ च पक्षसहितस्य शैलस्य गमनमाश्चर्यकारि न। सकलस्यापि जगतो दुर्वहो गुरुतः सकाशाद्वा भारवान्यदाकाशं लङ्घयति, तदतितरामाश्चर्याय भवति। गुरुत्वात्पतनं युक्तम्, ऊर्ध्वगमनमयुक्तमिति भावः। 'पर्वतः शैलदेवर्ष्योः' 'स्मयो गर्वेऽद्भुते' इति विश्वः। विस्मयाय तादर्थ्ये चतुर्थी। पक्षे, 'क्रियार्थो–' इति वा। लघिर्गतौ भौवादिकोऽनुदात्तेत्[2] ॥

गच्छता पथि विनैव विमानं व्योम तेन मुनिना विजगाहे।
साधने हि नियमोऽन्यजनानां योगिनां तु तपसाखिलसिद्धिः ॥ ३ ॥

गच्छतेति ॥ विमानं विनैव पथि गच्छता तेन मुनिना व्योमाकाशं विजगाहे आलोडितम्। हि यस्मात् साधने उपकरणेऽश्वादौ अन्यजनानां योगिव्यतिरिक्तानां जनानां नियमः वाहनं विना गन्तुं न शक्नुवन्ति। योगिनां तपस्विनां तु तपसैवाखिलसिद्धिः समस्तकार्यसिद्धिः। खिलं प्रतिबन्धः, तद्रहिता सिद्धिर्गतिः। तेषां गमनादिसाधनं तप एव, नान्यदश्वादि। एव इत्यर्थः। विनैव पक्षिणैव गच्छतेति वा। किंभूतं व्योम—विमानं विगतं मानमियत्तापरिमाणं यस्मादिति वा[3] ॥

खण्डितेन्द्रभवनाद्यभिमानानह्नुते स मुनिरेष विमानान्।
अर्थितोऽप्यतिथितामनुमेने नैव तत्पतिभिरङ्घ्रिविनम्रैः ॥ ४ ॥

खण्डितेति ॥ एष मुनिर्नारदो विमानानह्नुते स्म अतिचक्राम। किंभूतान्—खण्डितइन्द्रभवनादीनामभिमानो रमणीयताहंकारो यैस्तान्। 'इन्दुभवन' इति पाठे वस्तुत्वादतिशीतत्वाच्च लाञ्छितचन्द्रभवनादिस्थानदर्पान्। इन्दुभवनादीनां चन्द्रमण्डलादीनां वा।

---

१ 'अलिन्दगो [illegible]' [illegible] इति साहित्यविद्याधरी। २ 'अत्र [illegible]विरोधालंकारः' इति साहित्यविद्याधरी। 'गुरुद्रव्यस्योत्पतनानर्हस्योत्पतनं विरुद्धमिति विरोधाभासो विरोधालंकारः' इति जीवातुः। ३ 'विशेषोक्तिः [illegible] च' इति साहित्यविद्याधरी। '[illegible]' इति जीवातुः।

एवं यद्वदता नृपेण तनया नापृच्छि लज्जास्पदं
यन्मोहः स्मरभूरकल्पि वपुषः पाण्डुत्वतापादिभिः।
यच्चाशीः कपटादवादि सदृशी स्यात्तत्र या सान्त्वना
तन्मत्वालिजनो मनोऽधिमतनोदानन्दमन्दाक्षयोः ॥ १२२ ॥

एवमिति ॥ एवं पूर्वोक्तं वदता नृपेण भीमेन तनया लज्जासदं यस्मिन्पृष्टे सति लज्जा भवति तद्विरहकारणं नापृच्छि न पृष्टा। लज्जापदं न पृष्टेति वा। यच्च पाण्डुलतापादिभिः शरीरपाण्डिमकृशिमसंपादिभिः स्मराद्भवतीति स्मरभूः स्मरजन्यो मोहो मूर्च्छा अकल्पि (किं ततः) यच्चाशीः कपटाना(दा)शीर्वचनव्याजान(द)वादि आश्वासनसमर्थम् 'दयितमभिमतम्–' इत्यादि यदुक्तम्। तत्र संतापादिविषये सदृशी समुचिता या सान्त्वना उपचारः स्यात्स चावादि। आलिजनः सखीसमूहः तत्सर्वं मत्वा ज्ञात्वा मनोऽन्तःकरणं आनन्दश्च मन्दाक्षं च लज्जा तयोरधिमतनोच्चकार। शीघ्रं भैम्याः स्वयंवरप्राप्तेरानन्दातिशयः, राज्ञा विरहपीडा ज्ञातेति लज्जाधिक्यं चाभूदित्यर्थः[१] ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तुर्यः स्थैर्यविचारणप्रकरणभ्रातर्ययं तन्महा-
काव्येऽत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥ १२३ ॥

श्रीहर्षमिति ॥ पूर्वार्धं पूर्ववत्। स्थैर्यविचारणं क्षणभङ्गनिराकरणेन स्थिरत्वस्य विचारणसूचकं प्रकरणं ग्रन्थः, तस्य भ्रातरि एककर्तृकत्वात्सोदरे काव्ये तुर्यश्चतुर्थः सर्गः समाप्तः। स्थैर्यविचाराख्यो ग्रन्थः श्रीहर्षेण कृतः। 'चतुरश्छयतौ चलोपश्च' इति चलोपे च तुर्य इति सिद्धम् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे
चतुर्थः सर्गः समाप्तः ॥

पञ्चमः सर्गः।

अथ 'व्यतरत्–' इति श्लोके पित्रोक्तं स्वयंवरोपक्रममुद्दिश्य तत्प्रसङ्गार्थं पञ्चमं सर्गमारभते—

यावदागमयतेऽथ नरेन्द्रान्स स्वयंवरमहाय महीन्द्रः।
तावदेव ऋषिरिन्द्रदिदृक्षुर्नारदस्त्रिदशधाम जगाम ॥ १ ॥

यावदिति ॥ अथ भैमीसमाश्वासनानन्तरं स महीन्द्रो भीमः स्वयंवर एव मह उत्सवः, तदर्थं यावत् नरेन्द्रान्राज्ञ आगमयते प्रतीक्षते अनाययते वा स्वयंवरार्थमाहूतानां राज्ञां प्रतीक्षां करोति तावदेव तस्मिन्नेव काले इन्द्रं दिदृक्षुर्द्रष्टुमिच्छुर्नारदनामा ऋषिस्त्रिदश-

१ 'अत्र रूपकसमुच्चयभावशबलतालंकारसंकरः' 'शार्दूलविक्रीडितम्' इति साहित्यविद्याधरी।
...नि नैषधीयचरिते' इति पुस्तकान्तरपाठः।

धाम स्वर्गं जगाम गतवान् । कलहद्वारा नरसमूहं द्यतीति । कलहप्रवर्तक इत्यर्थः । आगमयते, 'आगमेः क्षमायामात्मनेपदम्' इति वक्तव्यात्तङ् । एव ऋषिः, 'ऋत्यकः' । इन्द्रादिदिदृक्षुः, शेषषष्ठीसमासः । बहुलग्रहणाद्योगविभागाद्वा । अयमेव जुगुप्सुरितिवद्द्वितीयासमासो वा ॥

नात्र चित्रमनु तं प्रययौ यत्पर्वतः स खलु तस्य सपक्षः ।
नारदस्तु जगतो गुरुरुच्चैर्विस्मयाय गगनं विललङ्घे ॥ २ ॥

नात्रेति ॥ पर्वत एतन्नामा ऋषिः तं नारदमनु पश्चात्प्रययौ अनुगतः । अत्र अस्मिन्विषये चित्रमाश्चर्यं न । कुतः—खलु यस्मात्स पर्वतः तस्य नारदस्य सपक्षो मित्रभूतः । यद्यपि कार्याक्षमः तथापि मित्रत्वादनुगमनं युक्तम्, अतो नाश्चर्यम् । तर्हि कुत्राश्चर्यमित्यत आह—उपदेष्टृत्वात्पूज्यत्वाच्च जगतो गुरुर्नारदस्तु पुनर्यद्गगनमाकाशं विललङ्घे लङ्घितवान् तद् उच्चैरतितरां विस्मयाय आश्चर्याय । जातमिति शेषः । अर्थाच्चत्तदोः संबन्धः । जगतो विस्मयायेति वा । वीनां पक्षिणामपि स्मयाय वेगातिशयेनाद्भुतायेति वा । अयं च पक्षसहितस्य शैलस्य गगनगमनमाश्चर्यकारि न । सकलस्यापि जगतो दुर्वहो जगतः सकाशाद्वा भारवान्यदाकाशं लङ्घयति, तदतितरामाश्चर्याय भवति । गुरुत्वात्पतनं युक्तम्, ऊर्ध्वगमनमयुक्तमिति भावः । 'पर्वतः शैलदेवर्ष्योः' 'स्मयो गर्वेऽद्भुते' इति विश्वः । विस्मयाय तादर्थ्ये चतुर्थी । पक्षे, 'क्रियार्थो—' इति वा । लघिर्गतौ भौवादिकोऽनुदात्तेत्[2] ॥

गच्छता पथि विनैव विमानं व्योम तेन मुनिना विजगाहे ।
साधने हि नियमोऽन्यजनानां योगिनां तु तपसाखिलसिद्धिः ॥ ३ ॥

गच्छतेति ॥ विमानं विनैव पथि गच्छता तेन मुनिना व्योमाकाशं विजगाहे आलोडितम् । हि यस्मात् साधने उपकरणेऽश्वादौ अन्यजनानां योगिव्यतिरिक्तानां जनानां नियमः वाहनं विना गन्तुं न शक्नुवन्ति । योगिनां तपस्विनां तु तपसैवाखिलसिद्धिः समस्तकार्यसिद्धिः । खिलं प्रतिबन्धः, तद्रहिता सिद्धिर्गतिः । तेषां गमनादिसाधनं तप एव, नान्यदश्वादि । एव इवार्थः । विनैव पक्षिणेव गच्छतेति वा । किंभूतं व्योम—विमानं विगतं मानमियत्तापरिमाणं यस्मादिति वा[3] ॥

खण्डितेन्द्रभवनाद्यभिमानान्ह्नुवते स मुनिरेष विमानान् ।
अर्थितोऽप्यतिथितामनुमेने नैव तत्पतिभिरङ्घ्रिविनम्रैः ॥ ४ ॥

खण्डितेति ॥ एष मुनिर्नारदो विमानान्ह्नुते स्म अतिचक्राम । किंभूतान्—खण्डितइन्द्रभवनादीनामभिमानो रमणीयताहंकारो यैस्तान् । 'इन्दुभवन' इति पाठे अत्युच्चत्वादतिधवलत्वाच्च लाञ्छितचन्द्रमण्डलादिस्थानदर्पान् । इन्दुभवनादीनां चन्द्रशालादीनां वा ।

---

१ 'अस्मिन्सर्गे स्वागता वृत्तम् । 'स्वागतेति रनभाद्गुरुयुग्मम्' इति लक्षणात् । अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । २ 'अत्र गुणक्रियाविरोधालंकारः' इति साहित्यविद्याधरी । 'गुरुत्वस्योत्पतनानर्हत्वेऽप्युत्पतनं विरुद्धमिति श्लिष्टोत्थापितो विरोधालंकारः' इति जीवातुः ।
३ 'विशेषोक्तिः काव्यलिङ्गं च' इति साहित्यविद्याधरी । 'साधनान्तरेण विशेषसमर्थनरूपोऽर्थान्तरन्यासः' इति जीवातुः ।

तत ऊर्ध्वं गत इत्यर्थः । अथवा नादृतवान् । अङ्घ्रिविनम्रैश्चरणनिपतितैः तत्पतिभिर्विमानस्वामिभिः आतिथ्यमङ्गीक्रियतां विमानमारुह्यतामित्यादि अर्थितोऽप्यतिथितां नैव अनुमेनेऽङ्गीचकार । विलम्बभियेति भावः । 'विमानोऽस्त्री' इत्यमरः ॥

तस्य तापनभिया तपनः स्वं तावदेव समकोचयदर्चिः ।
यावदेव दिवसेन शशीव द्रागतप्यत न तन्महसैव ॥ ५ ॥

तस्येति ॥ तपनः सूर्यः तस्य नारदस्य तापनं संतापनं तस्माद्भिया भयेन स्वं स्वकीयमर्चिस्तेजः, तावदेव प्रथममेव तावत्कालमेव तावत्परिमाणमेव वा समकोचयत्संकोचितवान् । सकलेन तेजसा यद्यहं तप्येय तर्हि मत्संनिधिमागतो मुनिः संतप्तो भवेदिति तन्माभूत्, इति तेजः संकोचितम् । परं तावत्कालमेव यावदेव यावत्कालमेव तन्महसैव मुनितेजसैव कृत्वा स तपनः द्राक् शीघ्रं स्वयं न अतप्यत संतप्तो नाभूत् । केन क इव—दिवसेन दिनतेजसा कृत्वा शशीव सूर्यस्तावदेव तावत्पर्यन्तमर्चिः समकोचयत् यावदेव यावत्पर्यन्तमेव तन्महसैव कृत्वा नारदो नातप्यतेति वा । शापभीत्या स्वस्य तत्कर्तृकतापभीत्या वा तावदेव तेजः प्रकटीकृतवान्, यावता तस्य क्रोधो नोत्पद्यते संतापो वा न भवति । अल्पस्य संकोचे स्वतेजसा तस्याभिभवः स्यात्, अधिकसंकोचे स्वस्यैव तन्महसाऽभिभवः स्यात् । तेन युक्तमेव संकोचितवानित्यर्थः । सूर्येण समतेजा नारद इत्यर्थः । अर्थान्तरं तु सुधिया बोद्धव्यम् ॥[1]

पर्यभूद्दिनमणिर्द्विजराजं यत्करैरहह तेन तदा तम् ।
पर्यभूत्खलु करैर्द्विजराजः कर्म कः स्वकृतमत्र न भुङ्क्ते ॥ ६ ॥

पर्यभूदिति ॥ खलूत्प्रेक्षे । यद्यस्मात्कारणाद्दिनमणिः सूर्यः द्विजराजं चन्द्रं करैः किरणैः कृत्वा पर्यभूत् । तेन खलु तेनैव कारणेन द्विजराजो ब्राह्मणश्रेष्ठो नारदः करैः स्वतेजोभिः कृत्वा तस्मिन् काले तं सूर्यं पर्यभूद्व्यजेष्ट । अहहेत्याश्चर्ये । युक्तमेतत्—अत्र लोके स्वेन कृतं कर्म शुभाशुभात्मकं को न भुङ्क्ते, अपि तु सर्वोऽपि । 'अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते' इति न्यायेन । सूर्येण निरपराधे द्विजराजे पराभूते अन्येन द्विजराजेन क्रोधवशादिव स पराभूतः । सूर्यतेजसोऽपि तत्तेजोऽधिकमिति भावः । सूर्यः स्वतेजसा पूर्वं नारदं पर्यतापयत्, अतो नारदः क्रुद्धः सन्स्वतेजसा सूर्यं पर्यतापयदिति वा ॥[2]

विष्टरं तटकुशालिभिरद्भिः पाद्यमर्घ्यमथ कच्छरुहाभिः ।
पद्मवृन्दमधुभिर्मधुपर्कं स्वर्गसिन्धुरदितातिथयेऽस्मै ॥ ७ ॥

विष्टरमिति ॥ अथानन्तरं स्वर्गसिन्धुर्मन्दाकिनी अतिथयेऽभ्यागतायास्मै नारदाय तटकुशालिभिस्तीरजातदर्भपङ्क्तिभिः विष्टरं कुशासनमदित ददौ । तथा—अद्भिरुदकैः पाद्यं पादार्थमुदकम् । तथा—कच्छरुहाभिः पुष्पितलताभिर्दूर्वाभिर्वा अर्घ्यमर्घार्थवस्तु । तथा—पद्मवृन्दस्य मकरन्दैः कृत्वा मधुपर्कं मधुपर्कार्थं मधुमिश्रं दध्यादि । अदितेति सर्वत्र संबध्यते ।[3]

---

१ 'अत्रोपमा विभावना च' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिरुपमा च' इति साहित्यविद्याधरी । ३ 'अत्रोत्प्रेक्षार्थान्तरन्यासश्च' इति साहित्यविद्याधरी ।

अतिथये विष्टरादिकं चेदयते । मन्दाकिनीं दृष्ट्वा तुतोषेत्यर्थः । पाद्यम्, अर्घ्यम् 'पादार्घाभ्यां च' इति यत् । मधुना पृच्यते मिश्रीक्रियते । कर्मणि यत् । 'चजोः—' इति कुत्वम् ॥

स व्यतीत्य वियदन्तरगाधं नाकनायकनिकेतनमाप ।
संप्रतीर्य भवसिन्धुमनादिं ब्रह्म शर्मभरचारु यतीव ॥ ८ ॥

स इति ॥ स नारदः अन्तरमध्ये अगाधं विशालं वियदाकाशं व्यतीत्यातिक्रम्य स्वर्गेऽपि कस्मिन्प्रदेशे वर्तमानं नाकनायकस्येन्द्रस्य निकेतनं गृहमाप प्राप्तवान् । कः किमिव—यती परिव्राड् ब्रह्मेव । किं कृत्वा—अनादिं प्रवाहनित्यं भवसिन्धुं संसारसमुद्रं सम्यगतिशयेन प्रतीर्य तीर्त्वा । किंभूतं ब्रह्म—शर्मणः सुखस्य भरः समूहस्तेन सुन्दरम् । 'आनन्दं ब्रह्मणो रूपम्' इति श्रुतेः । 'अनाद्य'मिति पाठे ब्रह्मविशेषणम् । 'यतयो यतिनश्च ते' इत्यमरः । यतं यमनमस्यास्तीति इनिः । 'नलोपः सुप्स्वर—' इति नियमात्सवर्णदीर्घः[2] ॥

अर्चनाभिरुचितोच्चतराभिश्चारु तं सदकृतातिथिमिन्द्रः ।
यावदर्हकरणं किल साधोः प्रत्यवायधुतये न गुणाय ॥ ९ ॥

अर्चनाभिरिति ॥ इन्द्र उचितादन्यो योग्यादन्योऽपि तत्काराद् उच्चतराभिः श्रेष्ठाभिरर्चनाभिः पूजाभिः तं अतिथिं चारु विधुशतमार्गेण सदकृत पूजितवान् । अधिकपूजाकरणे कारणमाह—साधोरतिथेर्यावदर्हं यथोचितं तत्करणमादरपूजादेः संपादनमतिथेर्यावती अर्हा योग्यतास्ति, तावत्याः करणं यावदर्हकरणं तद्धि प्रत्यवायधुतये अकरणजन्यप्रत्यवायपरिहारायैव, न गुणाय तदतिरिक्ताधिकाय फलविशेषायेति नारदयोग्यपूजान्योऽप्यधिकाः पूजाः कृतवान् । 'कर्मभूयस्त्वात्फलभूयस्त्वम्' इति न्यायादधिकफलप्राप्तय इति भावः । ततोऽर्हाभ्योऽन्याश्च ता उच्चतराश्च ताभिः पूजाभिः पूजितवान् । यावदर्हम्, इति पक्षे 'यावदवधारणे' इत्यव्ययीभावः । 'आदरानादरयोः सदसती' इति गतिसंज्ञा ॥

नामधेयसमतासखमद्रेरद्रिभिन्मुनिमथाद्रियत द्राक् ।
पर्वतोऽपि लभतां कथमर्चां न द्विजः सविबुधप्रभुलम्भी ॥ १० ॥

नामधेयेति ॥ अथ नारदपूजानन्तरमद्रिभिदिन्द्रः अद्रेः पर्वतस्य नामधेयेन पर्वत इति संज्ञया समता साम्यं तेन सखा मित्रं मुनिं पर्वताख्यं द्राक्शीघ्रमाद्रियत पूजितवान् । अद्रिभिदः पर्वतपूजानुचितेति छलेनाशङ्क्याह—स द्विजः ब्राह्मणरूपः पर्वतोऽपि विबुधप्रभुमिन्द्रं लम्भी प्राप्तः सन् अर्चां पूजां कथं न लभताम् । अपितु तेन पूजा प्राप्तुं युक्ता । शत्रोर्गृहागतं शत्रुमपि पूजयन्तीति भावः, इति छलम् । नामधेयेनायं पर्वतः, न तु तत्कर्मकर्ता । अयं तु द्विजः, न तु वैरी पर्वतः, तस्माद्युक्तैव पूजनम् । अथ च पर्वतः पर्वततुल्यो मूर्खोऽपि ब्राह्मणो विबुधानां पण्डितश्रेष्ठं प्राप्तः पूजां कथं न लभताम् । इति भावेन ब्राह्मणः पण्डितेनापि पूज्यः । नामधेय इति 'भागरूपनामभ्यो धेयः' इति धेयः । सनामत्वम्, सखादिना टच् ॥

---

१ 'अत्र वोत्कर्ष' इति साहित्यविद्याधरी । २ 'अत्रानुक्त [illegible] च' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी । ४ '[illegible]' [illegible] । अत्र [illegible] च' इति साहित्यविद्याधरी ।

तद्भुजादतिवितीर्णसपर्याद्दुद्रुमानपि विवेद मुनीन्द्रः।
स्वःसहस्थितिसुशिक्षितया तान्दानपारमितयैव वदान्यान् ॥ ११ ॥

तद्भुजादिति ॥ परमस्य भावः पारमं दानस्य पारमं दानपारमं तद्विद्यते यस्यासौ दानपारमी तस्य भावो दानपारमिता अतिवदान्यता मुनीन्द्रो नारदः अतिशयेन वितीर्णा कृता सपर्या पूजा येन एवंभूतात्तद्भुजादिन्द्रभुजात्, गुरोः स्वः स्वर्गे या इन्द्रेण तद्भुजेन वा सह स्थितिस्तया कृत्वा सुशिक्षितया सुतरामभ्यस्तया एवंभूतया दानपारमितया वदान्यतया कृत्वा तान्प्रसिद्धान्द्युद्रुमानपि कल्पवृक्षानपि वदान्यानेव दानशौण्डानेव विवेदामन्यत। कल्पवृक्षाणां दानशूरत्वं सहजं न, किंतु ते इन्द्रभुजाच्छिक्षितातिवदान्या जाता इति भावः। व्याख्यानान्तरं तु क्लिष्टत्वादुपेक्ष्यम्। युवादेराकृतिगणत्वाङ्गीकारेण भावेऽणि पारमः, तस्मादत इनौ 'यस्येति च' इति तद्धितनिमित्तेऽल्लोपे पारमीति सिध्यति[1] ॥

मुद्रितान्यजनसंकथनः सन्नारदं बलरिपुः समवादीत्।
आकरः स्वपरभूरिकथानां प्रायशो हि सुहृदोः सहवासः ॥ १२ ॥

मुद्रितेति ॥ मुद्रितं निवारितमन्यजनेननान्यजनस्य वा संकथनं संभाषणं येन एवंभूतः सन् बलस्य दैत्यस्य रिपुरिन्द्रो नारदं समवादीत्सादरमवोचत्, तेन सह संवादमकरोत्। अन्यभाषणनिवारणे हेतुमाह—हि यस्मात्सुहृदोः मित्रयोः सहवास एकत्र स्थितिः प्रायशो बाहुल्येन स्वसंबन्धिपरसंबन्धिन्यो भूर्योः बह्व्यः कथा गोष्ठ्यः, तासामाकरः खनिः तस्मादन्यकथां त्यक्तवान्। 'खनिः स्त्रियामाकरः स्यात्' इत्यमरः[2] ॥

तं कथानुकथनप्रसृतायां दूरमालपनकौतुकितायाम्।
भूभृतां चिरमनागतिहेतुं ज्ञातुमिच्छुरवदच्छतमन्युः ॥ १३ ॥

तमिति ॥ शतमन्युरिन्द्र आलपने संभाषणे कौतुकी तस्य भावस्तत्ता तस्यां दूरमत्यर्थं कथानुकथनेन वचनानुवचनेन प्रसृतायां प्रवृद्धायां सत्यां तं नारदमवददुवाच। किंभूत इन्द्रः—भूभृतां राज्ञां स्वर्गं प्रति चिरं दीर्घकालमनागतिहेतुमनागमनकारणं ज्ञातुमिच्छुः। पुनरुक्तौ कारणम्। राजानो युद्धेऽपराङ्मुखाः सन्तो युद्धं कृत्वा सांप्रतं किमिति स्वर्गं नागच्छन्तीति ज्ञातुमिच्छयावदिदित्यर्थः[3] ॥

प्रागिव प्रसुवते नृपवंशाः किं नु संप्रति न वीरकरीरान्।
ये परप्रहरणैः परिणामे विक्षताः क्षितितले निपतन्ति ॥ १४ ॥

प्रागिति ॥ हे मुने, नृपा एव वंशा वेणवो वीरा एव करीरा वंशाङ्कुराः, तान्प्रागिव पूर्वमिव संप्रतीदानीं किंनु न प्रसुवते जनयन्ति। किंन्विति प्रश्ने, वितर्के वा। करिण ईरयन्तीति करीरान्हस्तिपातनसमर्थान्वा, वीरयोधान्वा। प्रश्नेत्रानागमनं हेतुः। किं वितर्के च। यथा पूर्वं जनयन्ति स्म तथेदानीं नेति। ये वीरकरीराः परिणामे परिपूर्णे तारुण्ये वार्धकेवाऽन्तकाले वा शस्त्रविद्यापरिणतौ सत्यां वा परप्रहरणैः परेषां वैरिणामन्येषां च शस्त्रैः कुठारा-

---

१ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी। २ 'अत्रार्थान्तरन्यासो जातिश्च' इति साहित्यविद्याधरी। ३ 'अत्रानुप्रासः' इति साहित्यविद्याधरी।

दिभिश्च विक्षता हताः खण्डिताश्च सन्तः क्षितितले निपतन्ति, न लवीसारादिना । करिण ईरयन्तीति इगुपधत्वात्कः । 'द्वौ वंशौ कुलमस्करौ' 'वंशाङ्कुरे करीरोऽस्त्री' इति चामरः ॥

वीरा एव किमिति पृच्छयन्त इत्यत आह—

पार्थिवं हि निजमाजिषु वीरा दूरमूर्ध्वगमनस्य विरोधि ।
गौरवादपुरपास्य भजन्ते सत्कृतामतिथिगौरवऋद्धिम् ॥ १५ ॥

पार्थिवमिति ॥ वीराः पार्थिवं राजभूतं अणुत्वादिकमेण पृथिवीजन्यं च निजं स्वीयं वपुः आजिषु सङ्ग्रामेषु अपास्य त्यक्त्वा दिव्यं देहं प्राप्य सत्कृतां मद्रचितामतिथिगौरवऋद्धिमतिथिसत्कारसमृद्धिं हि यस्माद्भजन्ते प्राप्नुवन्ति ततः पृच्छयन्त इत्यर्थः । किंभूतं वपुः—गौरवात्पतनहेतोर्गुरुत्वाच्च दूरमतितरामूर्ध्वगमनस्य स्वर्गप्राप्तेः विरोधि प्रतिबन्धकम् । अन्योऽपि दूरगमनविरोधि गुरुतरं वस्तु त्यक्त्वा शीघ्रमेति । गौरवादादरातिशयाद्दत्तामतिथिगौरवऋद्धिमिति वान्वयः । गुरु वस्तु त्यक्त्वा गुरुतरं गृह्णाति तत्रापि स्वीयं त्यक्त्वान्यदीयं गृह्णातीति सुतरामाश्चर्यम् । गौरवऋद्धिम्, 'ऋत्यकः' इति प्रकृतिभावः ॥

साभिशापमिव नातिथयस्ते मां यदद्य भगवन्नुपयन्ति ।
तेन न श्रियमिमां बहु मन्ये स्वोदरैकभृतिकार्यकदर्याम् ॥ १६ ॥

साभिशापमिति ॥ हे भगवन्, ते वीरलक्षणा अतिथयः साभिशापमिव सकलङ्कमिव मामद्य इदानीं यद्यस्मान्नोपयन्ति न प्राप्नुवन्ति तेन तदनागमनेन कारणेन इमां श्रियमिन्द्रलक्ष्मीं बहु अतितरां न मन्ये न संमानयामि । अस्यास्तदातिथ्यायादुपयोगो न तावदस्या निष्प्रयोजनत्वान्मम संतोषो न । किंभूतां श्रियम्—स्वोदरस्यात्मोदरस्यैवैका केवला या भृतिर्भरणं सैव कार्यं प्रयोजनं यस्याः । अत एव—सा चासौ कदर्या च कुत्सिता । निन्दितेत्यर्थः । 'आत्मानं धर्मकार्यं च पुत्रदारांश्च पीडयेत् । लोभाद्यः पितरौ भृत्यान्स कदर्य इति स्मृतः' 'अथ निन्दाभिशंसनम् । अभिशापः' इत्यमरः ॥

पूर्वपुण्यविभवव्ययलब्धाः श्रीभरा विपद एव विमृष्टाः ।
पात्रपाणिकमलार्पणमासां तासु शान्तिकविधिर्विधिदृष्टः ॥ १७ ॥

पूर्वेति ॥ हे मुने, पूर्वं पुराकृतं यत्पुण्यं कृच्छ्रचान्द्रायणादि तस्य विभवो माहात्म्यं तस्य व्ययेन विनियोगेन । नाशेनेति यावत् । लब्धाः प्राप्ताः श्रीभरा लक्ष्मीविलासा विमृष्टा विचारिताः सत्यो विपद एव बहुदुःखक्षयफलत्वाद्दुर्दैवदुःखकारित्वाच्च विमृष्टा एव । तासु संपत्सु विपत्सु सतीषु आसां संपदां पात्रस्य पाणिरूपे कमले अर्पणं दानं शान्तिकः शान्तिप्रयोजनको विधिर्हेमादिः विधिना वेदेन शास्त्रेण, ब्रह्मणा वा दृष्ट उक्तः । विपत्सु हि शान्तिकं क्रियते । कमलस्य दानवत्त्वं वा । पात्रेभ्यो दानेन क्षयन्ते तावत्संपदो विपद एव । इमे

---

१ इदं तु '[illegible]' [illegible] । [illegible]—[illegible], [illegible] । [illegible]—[illegible], [illegible] । [illegible] [illegible]—[illegible] । [illegible] [illegible] [illegible] इति [illegible] । [illegible] '[illegible]' इति [illegible] [illegible] । २ '[illegible]' इति [illegible] । ३ '[illegible]' इति [illegible] पाठः । ४ '[illegible]' इति सुखावबोधासंमतः पाठः ।

पुण्यवृद्धे संपदां संपद्रूपता। पात्रे दानं विना मम चेतो न तुष्यतीत्यर्थः। 'न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम्॥' इति याज्ञवल्क्यः॥

तद्विमृज्य मम संशयशिल्पि स्फीतमत्र विषये सहसाघम्।
भूयतां भगवतः श्रुतिसारैरद्यवाग्भिरघमर्षणकृग्भिः॥ १८॥

तदिति॥ हे मुने, श्रुतिसारैः श्रवणयोः सारैः सुधाभूतैर्वेदेषु श्रेष्ठभूतैश्च भगवतो वाग्भिर्वचनैरद्य इदानीमघमर्षणस्य दुःखस्य पातकस्य च मार्जनस्य संबन्धिभिर्ऋग्भिर्भूयताम्। 'ऋतं च सत्यं च–' इत्यघमर्षणऋचः पापं नाशयन्ति। अघमर्षणसंबन्धिन्य ऋचः। अघं मर्षयन्ति क्षालयन्ति। नन्द्यादित्वाल्ल्युः। किं कृत्वा—ते मम सानिशापत्वादन्यहेतोर्वात्र नागच्छन्तीति अत्र विषये संशयशिल्पि संदेहकारि स्फीतं प्रवृद्धं मम अघं दुःखं, पातकं च सहसा झटिति विमृज्यापनीय। भूयतामिति भावे लकारः[१]॥

इत्युदीर्य मघवा विनयर्धिं वर्धयन्नवहितत्वभरेण।
चक्षुषां दशशतीमनिमेषां तस्थिवान्मुनिमुखे प्रणिधाय॥ १९॥

इतीति॥ मघवा इन्द्र इति पूर्वोक्तमुदीर्योक्त्वा अवहितत्वस्य सावधानत्वस्य भरेणाधिक्येन विनयर्धिं विनीतत्वसमृद्धिं वर्धयन्नधिकीकुर्वन्सन् अनिमेषां निमेषरहितां चक्षुषां दशशतीं नेत्रसहस्रं मुनिमुखे प्रणिधाय संस्थाप्य तस्थिवांस्तूष्णीं स्थितः। अमरत्वात्सावधानत्वाच्च निर्निमेषत्वम्[२]॥

वीक्ष्य तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि।
नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरःसरमूचे॥ २०॥

वीक्ष्येति॥ नारदः प्रमदेन हर्षेण गद्गदयास्पष्टया उक्त्या वाचा कृत्वा स्मितपुरःसरमूचे। महानुभावाः स्मितपूर्वभाषिणो हि। किंभूतः—पाकशासनपदमिन्द्रपदं स्पृशतोऽधितिष्ठतोऽपि तस्येन्द्रस्य विनये परिपाकं प्रकर्षं वीक्ष्य विस्मित आश्चर्ययुक्तः। अतिसमृद्धस्य विनीतत्वं दुर्लभम्, इन्द्रे तु विद्यत इत्याश्चर्यम्। अविनीतं दृष्ट्वा इन्द्रपदे स्थित इति लौकिक्युक्तिः। 'आख्यत्' इति पाठे 'अस्यति–' इत्यङ्[३]॥

भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वविभूतौ।
तत्फले यदि परं तव हेला क्लेशलब्धमधिकादरदं तु॥ २१॥

भिक्षितिते॥ हे इन्द्र, त्वया शतमखी सुकृतं पुण्यं भिक्षिता याच्यर्थत्वाद्द्विकर्मकः। यागशतं कृत्वा यत्पुण्यमुपार्जितं तस्या भिक्षायाः परिश्रमविद आयासवेदिनस्तव तस्य पुण्यस्य फले कार्ये स्वविभूतौ स्वाराज्यलक्षणायां विभूतौ स्वीयसंपदि यदि हेला बहु न मन्ये इति पूर्वश्लोके वचनादवज्ञा, तर्हि भिक्षायासवेदिनस्तव परं केवलं हेला नान्यस्य कस्यापि। बहुक्लेशार्जितायां संपदि अन्योऽवज्ञां नैव करोति तु यस्मात्क्लेशेन प्रयासेन लब्धं वस्तु स्वस्मिन्-

१ 'अत्रानुप्रासरूपकातिशयोक्तिसंकरः' इति साहित्यविद्याधरी। २ 'अत्रातिशयोक्तिः श्लेषश्च' इति साहित्यविद्याधरी। 'अत्र मुनिवाक्यारोपणस्याघमर्षणस्य प्रकृतावहरणोपयोगात्परिणामालंकारः' इति जीवातुः। ३ 'अत्र जातिः' इति साहित्यविद्याधरी। ४ 'अत्र छेकानुप्रासः' इति साहित्यविद्याधरी।

धिकमादरं ददाति करोतीति ज्योतिष्टोमादियज्ञजन्ये कालान्तरभाविनि फले स्वाराज्येऽश्रद्धा, अतिथिषु चादर इति त्वय्येव दृष्टं नान्यत्रापीति भावः । शतमखानां समाहारः शतमखी । 'हेलावज्ञाविलासयोः' इति विश्वः ॥

संपदस्तव गिरामपि दूरा यन्न नाम विनयं विनयन्ते ।
श्रद्दधाति क इवेह न साक्षादाह चेदनुभवः परमाप्तः ॥ २२ ॥

संपद इति ॥ इयत्तया वक्तुमशक्यत्वाद्गिरामपि वाचामपि दूरा अगोचरा अपि तव संपदो यद् नाम निश्चितं ते विनयं नम्रत्वं न विनयन्ते दूरीकुर्वन्ति । इहात्र विषये परमाप्तोऽतिविश्वस्तम्, अव्यभिचारी च साक्षादनुभवः प्रत्यक्षोपलब्धिश्चेद्यदि नाह न ब्रूते तर्हि क इव श्रद्दधाति विश्वसिति, अपि तु न कोऽपि । संपत्त्वविनयो नियत इति सर्वेषां मतम्, तत्तु त्वयि प्रत्यक्षेण विनयस्य दृष्टत्वाद्बाधितमिति भावः । साक्षात्स्वयं चेन्नाहेति वा । नाम संभावनायां वा । अन्यत्रापि वस्तुनि साक्षात्प्रतीत्यानुभवेनानुमानज्ञानेन परमाप्तवचनेन वा विश्वासो भवति । अत्र पूर्वोक्ते विषये परमाप्तोऽनुभवश्चेत्साक्षादाह तर्हि को वा न विश्वसितीति वा । स्तुतेः प्रायेणालीकत्वात्सर्वेणापि सर्वस्य स्तुतिः क्रियते, तव तु न तथा । अनुभवश्चेन्न कथयति तदिहास्तु विशिष्टासु संपत्सु विषये क इव विश्वसितीति वा । 'विनयन्ति' इति पाठः साधीयान् ॥

श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता न हितेति ।
पश्यतो बहिरिवान्तरपीयं दृष्टिसृष्टिरधिका तव कापि ॥ २३ ॥

श्रीति ॥ हे इन्द्र, इति अन्तरपि अन्तःकरणेऽपि बहिरिव बहिर्देश इव पश्यतो जानतोऽवलोकयतश्च तवैवेयं वर्णयितुमशक्या अधिका भूयसी काप्यनिर्वचनीया दृष्टिर्दृष्टिर्ज्ञानसृष्टिश्च । इति किम्—अहं श्रीभरान्श्रीसमूहानतिथिसाद्दियत्वेनातिथ्यधीनान्करवाणि कुर्याम् । तथा स्वोपभोगपरता आत्मन एवोपभोगतात्पर्यं हिता न श्रेयस्करं न भवतीति । यथा बहिर्बहुभिर्नेत्रैः सर्वमवलोकयसि, तथान्तःकरणेऽपि सर्वं करणीयं ज्ञानदृशावलोकयसि, एवंविधस्त्वमेव नान्य इति भावः । 'दृष्टिर्ज्ञानेऽक्ष्णि दर्शने' इत्यमरः ॥

आः स्वभावमधुरैरनुभावैस्तावकैरतितरां तरलाः स्मः ।
द्यां प्रशाधि गलितावधिकालं साधु साधु विजयस्व बिडौजः ॥ २४ ॥

आ इति ॥ हे बिडौजः इन्द्र, वयं स्वभावमधुरैर्निसर्गसुन्दरैः । तावकैस्त्वदीयैरनुभावैः स्वभावसूचनैः प्रभावैर्वा अतितरामत्यर्थं आः तरलाः साश्चर्याः स्मो भवामः । कृपणानस्माकं दरत्वमनुचितमिति पीडायां आःशब्दः, हर्षे वा । त्वं गलितोऽवधिर्मर्यादा यस्यैवंभूतः कालो यस्यां क्रियायां यथा तथा निरवधिकं द्यां स्वर्गं साधु सम्यक्प्रशाधि पालय । तथा साधु सम्यग्विजयस्व सर्वोत्कर्षेण वर्तस्व । 'अनुभावः प्रभावे स्यान्निश्चये भावसूचने' इति विश्वः । अनुगतो भाव इति समासः । प्रशाधि, शासः 'शा हौ' इति शादेशः । साधु साधु इति हर्षाद्विरुक्तिर्वा ।

---

१ 'अत्र काव्यलिङ्गम्' इति जीवातुसाहित्यविद्याधर्यौ । २ 'अत्रातिशयोक्तिः' इति जीवातुसाहित्यविद्याधर्यौ । ३ 'अत्रातिशयोक्त्यतिरेकयोरेकदेशानुप्रवेशात्संकरः' इति साहित्यविद्याधरी ।

पुण्यवृद्धे संपदां संपद्रूपता । पात्रे दानं विना मम चेतो न तुष्यतीत्यर्थः । 'न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥' इति याज्ञवल्क्यः ॥

तद्विमृज्य मम संशयशिल्पि स्फीतमत्र विषये सहसाघम् ।
भूयतां भगवतः श्रुतिसारैरद्य वाग्भिरघमर्षणऋग्भिः ॥ १८ ॥

तदिति ॥ हे मुने, श्रुतिसारैः श्रवणयोः सारैः सुधाभूतैर्वेदेषु श्रेष्ठभूतैश्च भगवतो वाग्भिर्वचनैरद्य इदानीमघमर्षणस्य दुःखस्य पातकस्य च मार्जनस्य संबन्धिभिर्ऋग्भिर्भूयताम् । 'ऋतं च सत्यं च–' इत्यघमर्षणऋचः पापं नाशयन्ति । अघमर्षणसंबन्धिन्य ऋचः । अघं मर्षयन्ति क्षालयन्ति । नन्द्यादित्वाल्ल्युः । किं कृत्वा—ते मम स्वामिशापत्वादन्यहेतोर्वात्र नागच्छन्तीति अत्र विषये संशयशिल्पि संदेहकारि स्फीतं प्रवृद्धं मम अघं दुःखं, पातकं च सहसा झटिति विमृज्यापनीय । भूयतामिति भावे लकारः ॥

इत्युदीर्य मघवा विनयर्धिं वर्धयन्नवहितत्वभरेण ।
चक्षुषां दशशतीमनिमेषां तस्थिवान्मुनिमुखे प्रणिधाय ॥ १९ ॥

इतीति ॥ मघवा इन्द्र इति पूर्वोक्तमुदीर्योक्त्वा अवहितत्वस्य सावधानत्वस्य भरेणाधिक्येन विनयर्धिं विनीतत्वसमृद्धिं वर्धयन्नधिकीकुर्वन्सन् अनिमेषां निमेषरहितां चक्षुषां दशशतीं नेत्रसहस्रं मुनिमुखे प्रणिधाय संस्थाप्य तस्थिवांस्तूष्णीं स्थितः । अमरत्वात्सावधानत्वाच्च निर्निमेषत्वम् ॥

वीक्ष्य तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि ।
नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरःसरमूचे ॥ २० ॥

वीक्ष्येति ॥ नारदः प्रमदेन हर्षेण गद्गदयास्पष्टया उक्त्या वाचा कृत्वा स्मितपुरःसरमूचे । महानुभावाः स्मितपूर्वभाषिणो हि । किंभूतः—पाकशासनपदमिन्द्रपदं स्पृशतोऽधितिष्ठतोऽपि तस्येन्द्रस्य विनये परिपाकं प्रकर्षं वीक्ष्य विस्मित आश्चर्ययुक्तः । अतिसमृद्धस्य विनीतत्वं दुर्लभम्, इन्द्रे तु विद्यत इत्याश्चर्यम् । अविनीतं दृष्ट्वा इन्द्रपदे स्थित इति लौकिकयुक्तिः । 'आलपत्' इति पाठे 'अस्यति–' इत्यङ् ॥

भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वर्विभूतौ ।
तत्फले यदि परं तव हेला क्लेशलब्धमधिकादरदं तु ॥ २१ ॥

भिक्षितेति ॥ हे इन्द्र, त्वया शतमखी सुकृतं पुण्यं भिक्षिता याच्यर्थत्वाद्द्विकर्मकः । शतयज्ञं कृत्वा यत्पुण्यमुपार्जितं तस्या भिक्षायाः परिश्रमविद आयासवेदिनस्तव तस्य पुण्यस्य फले कार्ये स्वर्विभूतौ स्वाराज्यलक्षणायां विभूतौ स्वीयसंपदि यदि हेला बहु न मन्ये इति पूर्वश्लोके वचनादवज्ञा, तर्हि भिक्षायासवेदिनस्तव परं केवलं हेला नान्यस्य कस्यापि । बहुक्लेशार्जितायां संपदि अन्योऽवज्ञां नैव करोति तु यस्मात्क्लेशेन प्रयासेन लब्धं वस्तु [illegible]-

१ 'अत्रानुमानकाव्यलिङ्गयोः संकरः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिः श्लेषश्च' इति साहित्यविद्याधरी । 'अत्र मुनि[illegible]' इति जीवातुः । ३ 'अत्र काकुः' इति साहित्यविद्याधरी । ४ 'अत्र च्छेकानुप्रासः' इति साहित्यविद्याधरी ।

मिकमादरं ददाति करोतीति ज्योतिष्टोमादियज्ञजन्ये कालान्तरभाविनि फले सारान्येऽवज्ञा, अतिथिषु चादर इति त्वय्येव दृष्टं नान्यत्रापीति भावः । शतमखानां यज्ञाहारः शतमखो । 'हेलावज्ञाविलासयोः' इति विश्वः ॥

संपदस्तव गिरामपि दूरा यन्न नाम विनयं विनयन्ते ।
श्रद्दधाति क इवेह न साक्षादाह चेदनुभवः परमाप्तः ॥ २२ ॥

संपद इति ॥ इयत्तया वस्तुनश्चन्द्रत्वाद्गिरामपि वाचामपि दूरा अगोचरा अपि तव संपदो यद् नाम निश्चितं ते विनयं नम्रत्वं न विनयन्ते दूरीकुर्वन्ति । इहात्र विषये परमाप्तोऽतिविश्वस्तः, अव्यभिचारी च साक्षादनुभवः प्रत्यक्षोपलब्धिश्चेद्यदि नाह न ब्रूते तर्हि क इव श्रद्दधाति विश्वसिति, अपि तु न कोऽपि । संपत्त्वविनयो नियत इति सर्वेषां मतम्, तत्तु त्वयि प्रत्यक्षेण विनयस्य दृष्टत्वाद्वाधितमिति भावः । वाङ्मात्रत्वयं चेन्नाहेति वा । नाम संभावनायां वा । अन्यत्रापि वस्तुनि साक्षात्प्रतीतस्तुनवेनानुमानज्ञानेन परमाप्तवचनेन वा विश्वासो भवति । अत्र पूर्वोक्ते विषये परमाप्तोऽनुभवश्चेत्साक्षादाह तर्हि को वा न विश्वसितीति वा । स्तुतेः प्रत्यक्षेणोक्तत्वेनापि तवैव स्तुतिः क्रियते, तत्र तु न तथा । अनुभवश्चेन्न कथयति तर्हिहास्तु निदिष्टस्तु संपत्तु विषये क इव विश्वसितीति वा । 'विनयन्ति' इति पाठः सार्वधातुके ॥

श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता न हितेति ।
पश्यतो बहिरिवान्तरपीयं दृष्टिदृष्टिरधिका तव कापि ॥ २३ ॥

श्रीति ॥ हे इन्द्र, इति अन्तरपि अन्तःकरणेऽपि बहिरिव बहिर्देश इव पश्यतो जानतोऽवलोकयतश्च तवैवेयं वर्णयितुमशक्या अधिका भूयसी काप्यनिर्वचनीया दृष्टिदृष्टिर्ज्ञानदृष्टिः । इति किम्—अहं श्रीभरान्संपत्समूहानतिथिसादतिथ्यधीनान्करवाणि कुर्याम् । यथा स्वोपभोगपरता आत्मन एवोपभोगतात्पर्यं हिता न श्रेयस्करं न भवतीति । यथा बहिर्नेत्रैर्बहिःस्थं सर्वं पश्यति, तथान्तःकरणेऽपि सर्वं करणीयं ज्ञानदृष्ट्यावलोकयति, एवंविधस्त्वमेव नान्य इति भावः । 'दृष्टिर्ज्ञानेऽक्ष्णि दर्शने' इत्यमरः ॥

आः स्वभावमधुरैरनुभावैस्तावकैरतितरां तरलाः स्मः ।
त्वां प्रशाधि गलितावधिकालं साधु साधु विजयस्व बिडौजः ॥ २४ ॥

आ इति ॥ हे बिडौजः इन्द्र, वयं स्वभावमधुरैर्निसर्गसुन्दरैः । तावकैस्त्वदीयैरनुभावैः स्वभावसुभगैः प्रभावैर्वा अतितरामत्यर्थं आः तरलाः साश्चर्याः स्मो भवामः । आश्चर्यमत्र आकं तरलत्वमनुचितमिति पीडायां वाक्यान्दः, हर्षे वा । त्वं गलितोऽवधिर्मर्यादा यस्यैवंभूतः कालो यस्यां क्रियायां यथा तथा निरवधिकं यां स्वर्गं साधु सम्यक्प्रकारेण पालय । तथा साधु सम्यगिन्द्रत्वेन सर्वोत्कर्षेण वर्तस्व । 'अनुभावः प्रभावे स्यान्निश्चये भावसूचने' इति विश्वः । अनुभवो भाव इति यादवः । प्रशाधि, शासः 'शा हौ' इति शादेशः । साधु साधु इति हर्षादरोक्तिः ।

---

१ 'अत्र चमत्कृतम्' इति जीवातुसाहित्यविद्याधर्यौ । २ 'अवलोकयितुं' इति जीवातुसाहित्यविद्याधर्यौ । ३ 'अवलोकयोरित्यतिरेकतदेकसंकेतं' इति साहित्यविद्याधरी ।

पुण्यवृद्धे संपदां संपद्रूपता । पात्रे दानं विना मम चेतो न तुष्यतीत्यर्थः । 'न विद्यया केवलया तपसा वापि पात्रता । यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥' इति याज्ञवल्क्यः ॥

तद्विमृज्य मम संशयशिल्पि स्फीतमत्र विपये सहसाघम् ।
भूयतां भगवतः श्रुतिसारैरद्यवाग्भिरघमर्षणऋग्भिः ॥ १८ ॥

तदिति ॥ हे मुने, श्रुतिसारैः श्रवणयोः सारैः सुधाभूतैर्वेदेषु श्रेष्ठभूतैश्च भगवतो वाग्भिर्वचनैरद्य इदानीमघमर्षणस्य दुःखस्य पातकस्य च मार्जनस्य संबन्धिभिर्ऋग्भिर्भूयताम् । 'ऋतं च सत्यं च–' इत्यघमर्षणऋचः पापं नाशयन्ति । अघमर्षणसंबन्धिन्य ऋचः । अघं मर्षयन्ति क्षालयन्ति । नन्द्यादित्वाल्ल्युः । किं कृत्वा—ते मम सानिशापत्वादन्यहेतोर्वात्र नागच्छन्तीति अत्र विपये संशयशिल्पि संदेहकारि स्फीतं प्रवृद्धं मम अघं दुःखं, पातकं च सहसा झटिति विमृज्यापनीय । भूयतामिति भावे लकारः[1] ॥

इत्युदीर्य मघवा विनयर्धिं वर्धयन्नवहितत्वभरेण ।
चक्षुषां दशशतीमनिमेषां तस्थिवान्मुनिमुखे प्रणिधाय ॥ १९ ॥

इतीति ॥ मघवा इन्द्र इति पूर्वोक्तमुदीर्योक्त्वा अवहितत्वस्य सावधानत्वस्य भरेणाधिक्येन विनयर्धिं विनीतत्वसमृद्धिं वर्धयन्नधिकीकुर्वन्सन् अनिमेषां निमेषरहितां चक्षुषां दशशतीं नेत्रसहस्रं मुनिमुखे प्रणिधाय संस्थाप्य तस्थिवांस्तूष्णीं स्थितः । अमरत्वात्सावधानत्वाच्च निर्निमेषत्वम्[2] ॥

वीक्ष्य तस्य विनये परिपाकं पाकशासनपदं स्पृशतोऽपि ।
नारदः प्रमदगद्गदयोक्त्या विस्मितः स्मितपुरःसरमूचे ॥ २० ॥

वीक्ष्येति ॥ नारदः प्रमदेन हर्षेण गद्गदयास्पष्टया उक्त्या वाचा कृत्वा स्मितपुरःसरमूचे । महानुभावाः स्मितपूर्वभाषिणो हि । किंभूतः—पाकशासनपदमिन्द्रपदं स्पृशतोऽधितिष्ठतोऽपि तस्येन्द्रस्य विनये परिपाकं प्रकर्षं वीक्ष्य विस्मित आश्चर्ययुक्तः । अतिसमृद्धस्य विनीतत्वं दुर्लभम्, इन्द्रे तु विद्यत इत्याश्चर्यम् । अविनीतं दृष्ट्वा इन्द्रपदे स्थित इति लौकिक्युक्तिः । 'आख्यत्' इति पाठे 'अस्यति–' इत्यङ्[3] ॥

भिक्षिता शतमखी सुकृतं यत्तत्परिश्रमविदः स्वविभूतौ ।
तत्फले यदि परं तव हेला क्लेशलब्धमधिकादरदं तु ॥ २१ ॥

भिक्षितेति ॥ हे इन्द्र, त्वया शतमखी सुकृतं पुण्यं भिक्षिता याच्यर्थत्वाद्द्विकर्मकः । यागशतं कृत्वा यत्पुण्यमुपार्जितं तस्या भिक्षायाः परिश्रमविद आयासवेदिनस्तव तस्य पुण्यस्य फले कार्ये स्वविभूतौ स्वाराज्यलक्षणायां विभूतौ स्वीयसंपदि यदि हेला बहु न मन्ये इति पूर्वश्लोके वचनादवज्ञा, तर्हि भिक्षायासवेदिनस्तव परं केवलं हेला नान्यस्य कस्यापि । बहुक्लेशार्जितायां संपदि अन्योऽवज्ञां नैव करोति तु यस्मात्क्लेशेन प्रयासेन लब्धं वस्तु स्वस्मिन्-

१ 'अत्रानुप्रासरूपकातिशयोक्तिसंकरः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिः श्लेपश्च' इति साहित्यविद्याधरी । 'अत्र मुनिवाक्यारोपणस्याघमर्षणस्य प्रकृतापहरणोपयोगात्परिणामालंकारः' इति जीवातुः । ३ 'अत्र जातिः' इति साहित्यविद्याधरी । ४ 'अत्र छेकानुप्रासः' इति साहित्यविद्याधरी ।

यतः—विषये अनिर्वचनीये वस्तुनि रसस्यानुरागस्य सेक आधिक्यं [illegible] ज्ञानाभावाय भवति । अनुरागवशात्किमपि न ज्ञायते । हन्त आश्चर्ये । ज्ञाने सत्यप्येवंभ्रम आश्चर्यहेतुः । रससेक उदकसेकश्चित्रादेर्मार्जनाय भवतीत्युक्तिः ॥

एवमुक्तवति देवऋषीन्द्रे द्रागभेदि मघवाननमुद्रा ।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥ २७ ॥

एवमिति ॥ देवऋषीन्द्रे नारदे एवं पूर्वोक्तमुक्तवति सति मघवाननमुद्रा इन्द्रमुखमौनं द्राक् झटिति अभेदि स्वयं भिन्ना । इन्द्रो बभाषे इत्यर्थः । पुनः किमित्युवाचेत्यत आह—हि यतो विभूनां प्रभूणां मञ्जुलतमो रम्यतमः कोऽपि लोकोत्तरः क्रमेण वादो वचनम् । उत्तरस्य प्रत्युत्तरेण पुरस्तात्पुरस्ताद्वा शुभः सुभगो भवति । अतः पुनरप्युवाचेत्यर्थः । अभेदि, कर्मकर्तरि[2] ॥

क्वानुजे मम निजे दनुजारौ जाग्रति स्वशरणे रणचर्चा ।
यद्भुजाङ्कमुपधाय जयाङ्कं शर्मणा स्वपिषि वीतविशङ्कः ॥ २८ ॥

केति ॥ हे मुने, स्वस्य मम शरणे गृहे रक्षितरि च स आत्मैव रक्षिता यस्य स्वशरणापार्थ परानपेक्षे वा निजे स्वीये सहजे वानुजे कनिष्ठभ्रातरि दनुजारौ दैत्यदानवशत्रौ तस्मिन्नुपेन्द्रे जाग्रति सावधाने जागरूके सति मम का रणस्य चर्चा विचारणा । मम रणचिन्ता नास्तीत्यर्थः । निजेऽनुजे इत्यनेन आज्ञावशवर्तित्वं वत्सलत्वात्स्वतः प्रवृत्तत्वं च सूचितम् । दनुजारावित्यनेन सामर्थ्यातिशयः सूचितः । स्वस्य शरणे गृहविषये जाग्रतीति वा । परानपेक्षणात्मनो रक्षके इति सर्वविशेषणतात्पर्यकथनम् । तस्मिन्कस्मिन्—यदधिष्ठं यस्य जयस्य चिह्नभूतं वा यस्योपेन्द्रस्य भुजाङ्कं दक्षिणभुजोत्सङ्गमुपधायोच्छीर्षकीकृत्य वीतविशङ्को गतभयः सन् शर्मणा सुखेन स्वपिषि निद्रासि पूर्वोक्तहेतोः ॥

विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये ।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय ॥ २९ ॥

विश्वेति ॥ हे मुने, तस्य मदनुजस्य विश्वरूपकलनात् 'सर्वं विष्णुमयं जगत्' इति विश्वेषां सर्वेषां रूपस्य स्वरूपस्य कलनात्स्वीकारात् । सर्वात्मकत्वाङ्गीकरणादित्यर्थः । [illegible] घटनात् जैमिनिमुनित्वमुदीये उक्तम् । जैमिनेर्विश्वरूपत्वाभावात्, विष्णोश्च विश्वरूपत्वाज्जैमिनिमुनित्वं युक्तमेवेत्यर्थः । यतस्तस्य जैमिनिमुनित्वम्, अतो जैमिनिरूपः सोऽनुजो मखभुजां देवानां विग्रहं शरीरं दैत्यैः सह युद्धं वा असहिष्णुरसहमानो मदशनिं मम वज्रं व्यर्थतां वैयर्थ्यं निनाय प्रापयत् । तदनुसारेण वज्रस्यापि [illegible] इत्यर्थः । वेदान्तादिमतदेवतानां विग्रहेण कर्मसमवायेऽङ्गीकृतमपि [illegible]

---

१ '[illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति [illegible] । ३ '[illegible]' इति साहित्यविद्याधरी । ४ '[illegible]' इति [illegible] दीपिके । [illegible] इति मल्लिनाथस्तु [illegible] ।

आधिक्यं स हि स एव क्षितिभृतां राज्ञां यस्मात्पुरुषार्थो धर्मादिस्तः भूषणगुणाभिरमयनेव पुरुषार्थत्वेनार्जयन्ति भैमीप्रीतिहेतुत्वान्न तु सङ्ग्रामवासनामिति भावः ॥

तदेवाह—

शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे ।
आदरादहरहः कुसुमेषोरुल्ललास मृगयाभिनिवेशः ॥ ३३ ॥

शैशवेति ॥ कुसुमेषोः कामस्य मृगयायामभिनिवेश आदरो यौवनोदयिनि यौवनोन्मुखे राज्ञां समाजे समूहे विषये तस्या भैम्याः शैशवव्ययदिनं बाल्यापगमदिनमवधिर्यस्यां क्रियायां तथा यौवनोदयमारभ्य अहरहः प्रत्यहमादरादतितरामुल्ललास प्रकटीबभूव । आदरादहरह इति कामपीडाधिक्यं तेषां सूच्यते । तत्प्राप्तिमेव पुरुषार्थत्वेन मन्यन्ते इति भावः ॥

प्रकृतमुपसंहरन्नाह—

इत्यमी वसुमतीं कमितारः सादरास्त्वदतिथीभवितुं न ।
भीमभूसुरभुवोरभिलापे दूरमन्तरमहो नृपतीनाम् ॥ ३४ ॥

इतीति ॥ अमी वसुमतीं पृथ्वीं कमितारो वाञ्छाशीला राजान इति कारणात्त्वदतिथीभवितुं तवातिथयो भवितुं सादराः साभिलाषा न । सङ्ग्रामाभावात्स्वर्गं प्रति नागच्छन्तीत्यर्थः। भैम्यर्थं वसुमतीमेव कमितारो न स्वर्गमिति वा । अहो आश्चर्ये । अभिलापे विषये भीमभूसुरभुवोर्भैमीदेवालययोर्दूरमतितरां नृपतीनामन्तरं तारतम्यं महान्विशेषः । यागादिभिः प्राप्यात्स्वर्गादपि भैमीप्राप्तिरधिका इति मन्वत इत्यर्थः । स्वर्गे सुरभूर्देवकन्या भोग्या, भैम्यास्तस्याश्च महान्विशेषः । अथ च—भीमस्य भूः प्रदेशः, तत्र भैम्या विद्यमानत्वात्कुण्डिनत्रिदिवयोर्महान्विशेषः । अतः स्वर्गाभिलापो नेत्यर्थः । अथ च—कुण्डिनस्य भूमौ विद्यमानत्वाद्राज्ञां भूमावेव निवासात्कुण्डिनमेव समीपं न तु स्वर्ग इति तयोर्महान्विशेषः । कमितारः, ताच्छील्ये तृन् । तस्यार्धधातुकत्वेऽपि न पाक्षिकत्वाण्णिङभावः । तद्योगाद्वसुमतीमिति द्वितीया ॥

तेन जाग्रदधृतिर्दिवमागां संख्यसौख्यमनुसर्तुमनु त्वाम् ।
यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके ॥ ३५ ॥

तेनेति ॥ हे इन्द्र, अहं तन्निमग्नमनसां भैम्यासक्तचित्तानां क्षितिभृतां भुवि लोके भूलोके मृधं संग्रामं यद् यस्मान्न विलोके न पश्यामि, तेन हेतुना जाग्रती स्फुरन्ती अधृतिरसंतोषो यस्यैवंभूतः सन् त्वामनु उद्दिश्य संख्यसौख्यं युद्धजनितं सुखमनुसर्तुमन्वेष्टुं प्राप्तुं दिवमागामागमम् । किंभूतोऽहम्—जाग्रद्वर्तमानः । तथा—न विद्यते धृतिर्धैर्यं सुखं वा यस्येति वा । लक्षणेऽनुः कर्मप्रवचनीयः ॥

वेद यद्यपि न कोऽपि भवन्तं हन्त हन्त्रकरुणं विरुणद्धि ।
पृच्छ्यसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ॥ ३६ ॥

वेदेति ॥ कोऽपि कश्चनापि हन्तृषु घातुकेषु अकरुणं निष्कृपं भवन्तं न विरुणद्धि त्वया सह विरोधं न करोतीति यद्यप्यहं वेद तदपि तथापि त्वं पृच्छ्यसे युद्धमस्ति न वेति ।

---

१ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । ३ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । ४ 'अत्र च्छेकानुप्रासः' इति साहित्यविद्याधरी ।

यतः—विषये अभिलषणीये वस्तुनि रसस्यानुरागस्य सेकः आधिक्यं [illegible]-
ऽज्ञानाय ज्ञानाभावाय भवति । अनुरागवशात्किमपि न ज्ञायते । हन्त आश्चर्ये । ज्ञाने सत्य-
प्येवंप्रश्न आश्चर्यहेतुः । रससेक उद्रेकस्तेकश्चित्रादेर्भञ्जनाय भवतीत्युक्तिः ॥

एवमुक्तवति देवऋषीन्द्रे द्रागभेदि मघवाननमुद्रा ।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥ २७ ॥

एवमिति ॥ देवर्षीन्द्रे नारदे एवं पूर्वोक्तमुक्तवति सति मघवाननमुद्रा इन्द्रमुखमौनं
द्राक् झटिति अभेदि स्वयं भिन्ना । इन्द्रो बभाषे इत्यर्थः । पुनः किमित्युवाचेत्यत आह—हि
यतो विभूनां प्रभूणां मञ्जुलतमो रम्यतमः कोऽपि लोकोत्तरः क्रमेण वादो वचनम् । उत्तरस्य
प्रत्युत्तरेण पुरस्तात्पुरस्ताद्वा शुभः सुभगो भवति । अतः पुनरप्युवाचेत्यर्थः । अभेदि,
कर्मकर्तरि[2] ॥

क्वानुजे मम निजे दनुजारौ जाग्रति स्वशरणे रणचर्चा ।
यद्भुजाङ्कमुपधाय जयाङ्कं शर्मणा स्वपिसि वीतविशङ्कः ॥ २८ ॥

केति ॥ हे मुने, स्वस्य मम शरणे गृहे रक्षितरि च स्व आत्मैव रक्षिता यस्य स्वशर-
णार्थे परानपेक्षे वा निजे स्वीये सहजे वानुजे कनिष्ठभ्रातरि दनुजारौ दैत्यदानवघ्ने तस्मि-
न्नुपेन्द्रे जाग्रति सावधाने जागरूके सति मम का रणस्य चर्चा विचारणा । मम रणचिन्ता
नास्तीत्यर्थः । निजेऽनुजे इत्यनेन आज्ञावशवर्तित्वं वत्सलत्वात्स्वतः प्रवृत्तत्वं च सूचितम् ।
दनुजारावित्यनेन सामर्थ्यातिशयः सूचितः । स्वस्य शरणे गृहविषये जाग्रतीति वा । परानपे-
क्षणात्मनो रक्षके इति सर्वविशेषणतात्पर्यम् । तस्मिन्कस्मिन्—जयचिह्नं यस्य जयस्य
चिह्नभूतं वा यस्योपेन्द्रस्य भुजाङ्कं दक्षिणभुजोत्सङ्गमुपधायोच्छीर्षकीकृत्य वीतविशङ्को गतभयः
सन् शर्मणा सुखेन स्वपिषि निद्रासि पूर्वोक्तहेतोः ॥

विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये ।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय ॥ २९ ॥

विश्वेति ॥ हे मुने, तस्य मदनुजस्य विश्वरूपकलनात् 'सर्वं विष्णुमयं जगत्' इति
विश्वेषां सर्वेषां रूपस्य स्वरूपस्य कलनात्स्वीकारात् । सर्वात्मकत्वाङ्गीकरणादित्यर्थः । उपपन्नं
घटमानं जैमिनिमुनित्वमुदीये उच्यताम् । जैमिनिमीमांसकत्वात्, विष्णोरपि विश्वरूपत्वाज्जै-
मिनिमुनिरूपत्वं युक्तमेवेत्यर्थः । यद्यस्य जैमिनिमुनित्वम्, अतो जैमिनिरिव स मदनुजो
मखभुजां देवानां विग्रहं शरीरं दैत्यैः सह युद्धं चासहिष्णुः [illegible] मम वज्रं
वैयर्थ्यं निनाय प्रापयत् । [illegible] इत्यर्थः । [illegible]
देवतानां विग्रहेण [illegible]

---

१ 'देवर्षीन्द्रे' इति साहित्यविद्याधरी । २ 'अभेदि कर्मकर्तरि' इति [illegible] ।
३ 'असहिष्णुः' इति साहित्यविद्याधरी । ४ [illegible]
[illegible]
[illegible] साहित्यविद्याधर्याम् [illegible] ।

आधिक्यं स हि स एव क्षितिभृतां राज्ञां यस्मात्पुरुषार्थो धर्मादिरूपः भूषणगुणाधिक्यमनेन पुरुषार्थत्वेनार्जयन्ति भैमीप्रीतिहेतुत्वान्न तु सङ्ग्रामवारानामिति भावः ॥

तदेवाह—

शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे ।
आदरादहरहः कुसुमेषोरुल्ललास मृगयाभिनिवेशः ॥ ३३ ॥

शैशवेति ॥ कुसुमेषोः कामस्य मृगयायामभिनिवेश आदरो यौवनोदयिनि यौवनोन्मुखे राज्ञां समाजे समूहे विषये तस्या भैम्याः शैशवव्ययदिनं बाल्यापगमदिनमवधिर्यस्यां क्रियायां तथा यौवनोदयमारभ्य अहरहः प्रत्यहमादरादतितरामुल्ललास प्रकटीबभूव । आदरादहरह इति कामपीडाधिक्यं तेषां सूच्यते । तत्प्राप्तिमेव पुरुषार्थत्वेन मन्यन्ते इति भावः ॥

प्रकृतमुपसंहरन्नाह—

इत्यमी वसुमतीं कमितारः सादरास्त्वदतिथीभवितुं न ।
भीमभूसुरभुवोरभिलापे दूरमन्तरमहो नृपतीनाम् ॥ ३४ ॥

इतीति ॥ अमी वसुमतीं पृथ्वीं कमितारो वाञ्छाशीला राजान इति कारणात्त्वदतिथीभवितुं तवातिथयो भवितुं सादराः साभिलाषा न । सङ्ग्रामाभावात्स्वर्गं प्रति नागच्छन्तीत्यर्थः । भैम्यर्थं वसुमतीमेव कमितारो न स्वर्गमिति वा । अहो आश्चर्ये । अभिलापे विषये भीमभूसुरभुवोर्भैमीदेवालययोर्दूरमतितरां नृपतीनामन्तरं तारतम्यं महान्विशेषः । यागादिभिः प्राप्यात्स्वर्गादपि भैमीप्राप्तिरधिका इति मन्वत इत्यर्थः । स्वर्गे सुरभूर्देवकन्या भोग्या, भैम्यास्तस्याश्च महान्विशेषः । अथ च—भीमस्य भूः प्रदेशः, तत्र भैम्या विद्यमानत्वात्कुण्डिनत्रिदिवयोर्महान्विशेषः । अतः स्वर्गाभिलापो नेत्यर्थः । अथ च—कुण्डिनस्य भूमौ विद्यमानत्वाद्राज्ञां भूमावेव निवासात्कुण्डिनमेव समीपं न तु स्वर्ग इति तयोर्महान्विशेषः । कमितारः, ताच्छील्ये तृन् । तस्यार्धधातुकत्वेऽपि न पाक्षिकत्वाण्णिङभावः । तद्योगाद्वसुमतीमिति द्वितीया ॥

तेन जाग्रदधृतिर्दिवमागां संख्यसौख्यमनुसर्तुमनु त्वाम् ।
यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके ॥ ३५ ॥

तेनेति ॥ हे इन्द्र, अहं तन्निमग्नमनसां भैम्यासक्तचित्तानां क्षितिभृतां भुवि लोके भूलोके मृधं संग्रामं यद् यस्मान्न विलोके न पश्यामि, तेन हेतुना जाग्रती स्फुरन्ती अधृतिरसंतोषो यस्यैवंभूतः सन् त्वामनु उद्दिश्य संख्यसौख्यं युद्धजनितं सुखमनुसर्तुमन्वेष्टुं प्राप्तुं दिवमागामागमम् । किंभूतोऽहम्—जाग्रद्वर्तमानः । तथा—न विद्यते धृतिर्धैर्यं सुखं वा यस्येति वा । लक्षणेऽनुः कर्मप्रवचनीयः ॥

वेद यद्यपि न कोऽपि भवन्तं हन्त हन्त्रकरुणं विरुणद्धि ।
पृच्छ्यसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ॥ ३६ ॥

वेदेति ॥ कोऽपि कश्चनापि हन्तृषु घातुकेषु अकरुणं निष्कृपं भवन्तं न विरुणद्धि त्वया सह विरोधं न करोतीति यद्यप्यहं वेद तदपि तथापि त्वं पृच्छ्यसे युद्धमस्ति न वेति ।

---

१ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी ।
३ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । ४ 'अत्र च्छेकानुप्रासः' इति साहित्यविद्याधरी ।

आविक्यं स हि स एव क्षितिभृतां राज्ञां यस्मात्पुरुषार्थो धर्मादिस्तः भूषणगुणाधिक्यनेव पुरुषार्थत्वेनार्जयन्ति भैमीप्रीतिहेतुत्वान्न तु सङ्ग्रामवासनामिति भावः ॥

तदेवाह—

शैशवव्ययदिनावधि तस्या यौवनोदयिनि राजसमाजे ।
आदरादहरहः कुसुमेषोरुल्ललास मृगयाभिनिवेशः ॥ ३३ ॥

शैशवेति ॥ कुसुमेषोः कामस्य मृगयायामभिनिवेश आदरो यौवनोदयिनि यौवनोन्मुखे राज्ञां समाजे समूहे विषये तस्या भैम्याः शैशवव्ययदिनं बाल्यापगमदिनमवधिर्यस्यां क्रियायां तथा यौवनोदयमारभ्य अहरहः प्रत्यहमादरादतितरामुल्ललास प्रकटीबभूव । आदरादहरह इति कामपीडाधिक्यं तेषां सूच्यते । तत्प्राप्तिमेव पुरुषार्थत्वेन मन्यन्ते इति भावः ॥

प्रकृतमुपसंहरन्नाह—

इत्यमी वसुमतीं कमितारः सादरास्त्वदतिथीभवितुं न ।
भीमभूसुरभुवोरभिलापे दूरमन्तरमहो नृपतीनाम् ॥ ३४ ॥

इतीति ॥ अमी वसुमतीं पृथ्वीं कमितारो वाञ्छाशीला राजान इति कारणात्त्वदतिथीभवितुं तवातिथयो भवितुं सादराः साभिलाषा न । सङ्ग्रामाभावात्स्वर्गं प्रति नागच्छन्तीत्यर्थः। भैम्यर्थं वसुमतीमेव कमितारो न स्वर्गमिति वा । अहो आश्चर्ये । अभिलापे विषये भीमभूसुरभुवोर्भैमीदेवालययोर्दूरमतितरां नृपतीनामन्तरं तारतम्यं महान्विशेषः । यागादिभिः प्राप्यात्स्वर्गादपि भैमीप्राप्तिरधिका इति मन्वत इत्यर्थः । स्वर्गे सुरभूर्देवकन्या भोग्या, भैम्यास्तस्याश्च महान्विशेषः । अथ च—भीमस्य भूः प्रदेशः, तत्र भैम्या विद्यमानत्वात्कुण्डिनत्रिदिवयोर्महान्विशेषः । अतः स्वर्गाभिलापो नेत्यर्थः । अथ च—कुण्डिनस्य भूमौ विद्यमानत्वाद्राज्ञां भूमावेव निवासात्कुण्डिनमेव समीपं न तु स्वर्ग इति तयोर्महान्विशेषः । कमितारः, ताच्छील्ये तृन् । तस्यार्धधातुकत्वेऽपि न पाक्षिकत्वाण्णिङभावः । तद्योगाद्वसुमतीमिति द्वितीया ॥

तेन जाग्रदधृतिर्दिवमागां संख्यसौख्यमनुसर्तुमनु त्वाम् ।
यन्मृधं क्षितिभृतां न विलोके तन्निमग्नमनसां भुवि लोके ॥ ३५ ॥

तेनेति ॥ हे इन्द्र, अहं तन्निमग्नमनसां भैम्यासक्तचित्तानां क्षितिभृतां भुवि लोके भूलोके मृधं संग्रामं यद् यस्मान्न विलोके न पश्यामि, तेन हेतुना जाग्रती स्फुरन्ती अधृतिरसंतोषो यस्यैवंभूतः सन् त्वामनु उद्दिश्य संख्यसौख्यं युद्धजनितं सुखमनुसर्तुमन्वेष्टुं प्राप्तुं दिवमागामागमम् । किंभूतोऽहम्—जाग्रद्वर्तमानः । तथा—न विद्यते धृतिर्धैर्यं सुखं वा यस्येति वा । लक्षणेऽनुः कर्मप्रवचनीयः ॥

वेद यद्यपि न कोऽपि भवन्तं हन्त हन्त्रकरुणं विरुणद्धि ।
पृच्छ्यसे तदपि येन विवेकप्रोञ्छनाय विषये रससेकः ॥ ३६ ॥

वेदेति ॥ कोऽपि कश्चनापि हन्तृषु घातुकेषु अकरुणं निष्कृपं भवन्तं न विरुणद्धि त्वया सह विरोधं न करोतीति यद्यप्यहं वेद तदपि तथापि त्वं पृच्छ्यसे युद्धमस्ति न वेति ।

---

१ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । ३ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । ४ 'अत्र च्छेकानुप्रासः' इति साहित्यविद्याधरी ।

यतः—विषये अनिलगोचरे वस्तुनि एतस्यानुरागस्य लेकं आधिक्यं [illegible] ज्ञानाय ज्ञानाभावाय भवति । अनुरागवशात्किमपि न ज्ञायते । हन्त आश्चर्ये । ज्ञाने सत- प्येवंभूत आश्चर्यहेतुः । एवमेक [illegible] नार्जनाय भवतीत्युचितैः ॥

एवमुक्तवति देवऋषीन्द्रे द्रागनेदि मघवानननुद्रा ।
उत्तरोत्तरशुभो हि विभूनां कोऽपि मञ्जुलतमः क्रमवादः ॥ २७ ॥

एवमिति ॥ देवऋषीन्द्रे नारदे एवं पूर्वोक्तमुक्तवति सति मघवाननुद्रा [illegible] द्राक् झटिति अनेदि [illegible] । इन्द्रो बभाषे इत्यर्थः । पुनः किमित्युवाचेत्यत आह—हि यतो विभूनां प्रभूणां मञ्जुलतमो रम्यतमः कोऽपि लोकोत्तरः क्रमेण वादो वचनम् । उत्तरस्य प्रत्युत्तरेण पुरस्तात्पुरस्ताद्वा शुभः सुभगो भवति । अतः पुनरप्युवाचेत्यर्थः । अनेदि कर्मकर्तरि ॥

कानुजे मम निजे दनुजारौ जाग्रति स्वशरणे रणचर्चा ।
यद्भुजाङ्कमुपधाय जयाङ्कं शर्मणा स्वपिमि वीतविशङ्कः ॥ २८ ॥

केति ॥ हे मुने, स्वस्य मम शरणे गृहे रक्षितरि च स्व आत्मैव रक्षिता यस्य [illegible] वा निजे स्वीये सहजे वानुजे कनिष्ठभ्रातरि दनुजारौ [illegible] उपेन्द्रे जाग्रति सावधाने जागरूके सति मम का रणस्य चर्चा विचारणा । मम [illegible] नास्तीत्यर्थः । निजेऽनुजे इत्यनेन आज्ञावशवर्तित्वं [illegible] च सूचितम् । दनुजारावित्यनेन सामर्थ्यातिशयः सूचितः । स्वस्य शरणे गृहविषये जाग्रतीति वा । [illegible] रक्षके इति सर्वविशेषणतात्पर्यम् । तस्मिन्कस्मिन्—यदीयं यस्य [illegible] सिंहभूतं वा यस्योपेन्द्रस्य भुजाङ्कं [illegible] वीतविशङ्को [illegible] सन् शर्मणा सुखेन स्वपिमि निद्रामि पूर्वोक्तहेतोः ॥

बिम्बरूपकलनानुपपन्नं तस्य जैमिनिमुनित्वमुदीये ।
विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय ॥ २९ ॥

बिम्बेति ॥ हे मुने, तस्य मखभुजस्य [illegible] जैमिनिमुनित्वमुदीये [illegible] ॥

मदनस्यौषधोपदेशे कुतः सामर्थ्यमित्यत आह—

नाकलोकभिषजोः सुषमा या पुष्पचापमपि चुम्बति सैव ।
वेद्मि तादृगभिषज्यदसौ तद्द्वारसंक्रमितवैद्यकविद्यः ॥ ४६ ॥

नाकेति ॥ नाकलोकस्य स्वर्लोकस्य भिषजोर्वैद्ययोर्या सुषमा परमा शोभा सैव शोभा पुष्पचापमपि काममपि चुम्बति स्पृशति । तयोरेव शोभा मदने समागतेति वेद्मि । यतोऽसौ मदनस्तादृक् स्ववैद्यरूपः सन् अभिषज्यदचिकित्सत् । किंभूतः—सैव सुषमैव द्वारं तेन कर्तृभूतेन संक्रमिता संक्रान्तिं प्रापिता समावेशिता वैद्यकविद्या आयुर्वेदशास्त्रं यस्मिन्मदने । शोभाद्वारेण करणेनात्मनि संक्रमिता वैद्यकविद्या येन वा । अतः कामस्य भिषक्त्वं संगतमिति भावः । अमन्तत्वात्क्रमो मित्त्वाद्ध्रस्वत्वे संक्रमितमिति साधुः । तारकादेराकृतिगणत्वादितचा वा । विद्यां वेत्तीति वैद्य इत्यणन्तात्तस्य कर्मेति 'योपधाद्गुरूपोत्तमात्–' इति वुञ् । अभिषज्यत्, 'भिषज रोगापनयने' कण्ड्वादित्वायक् ॥

इन्द्रे भैमीमभिलषति सतीन्द्राण्यादीनामिन्द्रपरित्यागजन्यामवस्थां षड्भिः श्लोकैराह—

मानुषीमनुसरत्यथ पत्यौ खर्वभावमवलम्ब्य मघोनी ।
खण्डितं निजमसूचयदुच्चैर्मानमाननसरोरुहनत्या ॥ ४७ ॥

मानुषीमिति ॥ अथ पत्याविन्द्रे खर्वभावं नीचत्वमवलम्ब्याङ्गीकृत्य मानुषीं भैमीमनुसरति जिगमिषति सति मघोनीन्द्राणी आननसरोरुहस्य चिन्तावशान्नत्या नम्रतया निजं स्वीयमुच्चैर्महान्तं मानमहङ्कारं पूजनं वा खण्डितमसूचयत् । आननसरोरुहनत्या कृत्वा खण्डितमिति वा । अथ च खर्वत्वं ह्रस्वत्वम् । यो हि वामनत्वमङ्गीकरोति तस्यैव परिमाणेन न्यूनत्वं भवितुं युक्तं नान्यस्येति, अत्र तु विपरीतम् । मानुषीम्, जातिवाचित्वान्ङीष् । मघोनी, 'पुंयोगात्–' इति ङीषि 'श्वयुव–' इति संप्रसारणम् ॥

यो मघोनि दिवमुच्चरमाणे रम्भया मलिनिमालमलम्भि ।
वर्ण एव स खलूज्ज्वलमस्याः शान्तमान्तरमभाषत भङ्ग्या ॥ ४८ ॥

य इति ॥ रम्भया देवाङ्गनया मघोनीन्द्रे दिवमुच्चरमाणे त्यक्त्वा गच्छति सति यो मलिनिमा मालिन्यमलमत्यर्थमलम्भि प्राप्तः[३] स मलिनिमरूपो वर्ण एव खलु निश्चयेनास्या रम्भाया उज्ज्वलं हर्षयुक्तमान्तरं हृदयं भङ्ग्या आकारविशेषेण शान्तं निर्विण्णं दुःखयुक्तमभाषतावोचत् । उज्ज्वलस्य मालिन्यमनुपपद्यमानं सदर्थापत्त्या दीप्ततायाः शान्ततां ब्रूते । त्यागदुःखवशाच्छ्यामत्वं जातं सर्वैरपि ज्ञातमित्यर्थः । अथच—अस्या उज्ज्वलं शृङ्गाररसप्रधानमान्तरं मनः शान्तं शान्तैकरसप्रधानं ब्रूते स्म । तस्या अपि वैराग्यमभूदित्यर्थः । अथ च—शान्तं कोपरहितम् । तदीयमन्तःकरणम् उदतिशयेन ज्वलतीत्युज्ज्वलं दीप्तं सकोपमभाषत । तत्त्यागात्तदानीं क्रुद्धा सा जातेत्यर्थः । कोपाच्छ्यामता भवति । अत्रापि शा-

---

१ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी । २ 'अत्र निर्वेदव्यभिचारिभावोदयोऽपह्नुतिरलंकारः' इति साहित्यविद्याधरी । ३ (स एव मलिनिमलक्षणो वर्णोऽस्या रम्भाया आन्तरं हृदयसंबन्धिनमुज्ज्वलं वर्णं धावल्यं शान्तमभाषत । यथा (अथ च । स एव वर्णः उज्ज्वलं धावल्यम् आन्तरं हृदयं शान्तमचष्ट इत्यन्वयः । बहिर्मालिन्येनान्तरमपि मालिन्यमनुमितमित्यर्थः । (अथ च) स एव मलिनिमा वर्ण उज्ज्वलं गर्विष्ठमन्तरं हृदयं शान्तं शीतलत्वमाह स) इति पुस्तकान्तरेऽधिकः पाठः ।

न्तस्य वीरत्वं शान्तरसस्य च शृङ्गाररसत्वमित्युभयमप्याश्चर्यकारि । श्यामवर्णस्य च शृङ्गारकथनं (त्वं) युक्तं तस्य तद्वर्णत्वात् । उच्चरमाणे, 'उदश्चरः सकर्मकात्' इत्यात्मनेपदम् ॥

जीवितेन कृतमप्सरसां तत्प्राणमुक्तिरिह युक्तिमती नः ।
इत्यनक्षरमवाचि घृताच्या दीर्घनिःश्वसितनिर्गमितेन ॥ ४९ ॥

जीवितेनेति ॥ घृताच्या देवाङ्गनया दीर्घनिःश्वसितस्य निर्गमितेन निःसरणेन कृत्वा इति अनक्षरं वर्णैर्विनैवावाचि । अथ च अनक्षरमवाच्यमवाचि । इति किम्—अप्सरसां नोऽस्माकमिह समये जीवितेन कृतमलम्, इन्द्रस्य नैन्यनुरागाज्जीवितं निष्फलं यतः, तत्तस्मान्नोऽस्माकं प्राणमुक्तिः प्राणत्याग एव युक्तिमती युक्तेति । दुःखेन तादृग्दीर्घो निःश्वासो मुक्तो यथा प्राणा अपि बहिर्निर्गच्छन्तीति भावः । प्राणा निःश्वासरूपाः, तत्त्वान्निर्गमनात्प्राणनिर्गमो युक्तः । 'अनक्षरमवाच्यम्' इत्यमरः ॥

साधु नः पतनमेवसितः स्यादित्यभण्यत तिलोत्तमयापि ।
चामरस्य पतनेन कराब्जात्तद्विलोलनचलद्भुजनालात् ॥ ५० ॥

साध्विति ॥ तद्विलोलनेन चामरचालनेन चलन् चपलो भुज एव नालो यस्य एवंविधात् कर एवाब्जं कमलं तस्माच्चामरस्य पतनेन कृत्वा तिलोत्तमया देवाङ्गनयापि इत्यनक्षरतयावादि । इति किम्—इतोऽस्मात्स्वर्गान्नोऽस्माकं चामरवत्पतनमेव युक्तं स्यादिति । दुःसहत्वादतिवैकल्यात्करकमलाच्चामरं पतितमिति भावः । चालिजो णिच्करणाज्ज्ञापकादनुदात्तेतोऽपि चलतेः परस्मैपदं शता ॥

मेनका मनसि तापमुदीतं यत्पिधित्सुरकरोदवहित्थाम् ।
तत्स्फुटं निजहृदः पुटपाके पङ्कलिप्तिमसृजद्बहिरुत्थाम् ॥ ५१ ॥

मेनकेति ॥ मेनका देवाङ्गना मनसि उदीतं जातं तापं विरहज्वरं पिधित्सुः पिधातुमिच्छुः अवहित्थामाकारगुप्तिमकरोदिति यत् तद् आकारगुप्तिकरणमेव फलीभूतं निजहृदः स्वहृदयस्य पुटरूपे यः पाकस्तद्विषये बहिरुत्थां बहिर्जातां पङ्कलिप्तिं पङ्कलेपनमेवासृजदकरोत् । स्फुटमुत्प्रेक्षे । अंतःपाकप्रसिद्धां तदुदरमविहतं पीडितम् । अंतस्तापः स्थितत्वादवहित्थाया उपरि स्थितत्वाद्धृदयस्य मध्ये स्थितत्वात्पुटपाकत्वम् । पुटपाके निरुद्धत्वान्न दुःखानन्त्यं सूचितम् । बाह्यलोके जानाति किंतु एव मनस्तया चिरं दुःखं समनुभूतमित्यर्थः । अन्योऽपि पुटपाके बहिः पङ्कलेपं करोति । स्फुटतो निजहृद इति वा । मेनकेति [illegible] ॥

उर्वशी गुणवशीकृतविश्वा तद्वपालितनितनावनिभेन ।
राङ्सौहृदसमापनतांमलमन्वकार्पणपुरःपुष्पेव ॥ ५२ ॥

---

१ '[illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ [illegible] । ४ '[illegible]' इति साहित्यविद्याधरी । ५ 'अ[illegible]' इति साहित्यविद्याधरी ।

मदनस्यौषधोपदेशे कुतः सामर्थ्यमित्यत आह—

नाकलोकभिषजोः सुषमा या पुष्पचापमपि चुम्बति सैव ।
वेद्मि तादृगभिषज्यदसौ तद्द्वारसंक्रमितवैद्यकविद्यः ॥ ४६ ॥

नाकेति ॥ नाकलोकस्य स्वर्लोकस्य भिषजोर्वैद्ययोर्या सुषमा परमा शोभा सैव शोभा पुष्पचापमपि काममपि चुम्बति स्पृशति । तयोरेव शोभा मदने समागतेति वेद्मि । यतोऽसौ मदनस्तादृक् स्ववैद्यरूपः सन् अभिषज्यदचिकित्सत् । किंभूतः—सैव सुषमैव द्वारं तेन कर्तृभूतेन संक्रमिता संक्रान्तिं प्रापिता समावेशिता वैद्यकविद्या आयुर्वेदशास्त्रं यस्मिन्मदने । शोभाद्वारेण करणेनात्मनि संक्रमिता वैद्यकविद्या येन वा । अतः कामस्य भिषक्त्वं संगतमिति भावः । अमन्तत्वात्क्रमो मित्त्वाद्ध्रस्वत्वे संक्रमितमिति साधुः । तारकादेराकृतिगणत्वादितचा वा । विद्यां वेत्तीति वैद्य इत्यणन्तात्तस्य कर्मेति 'योपधाद्गुरूपोत्तमात्—' इति वुञ् । अभिषज्यत्, 'भिषज रोगापनयने' कण्ड्वादित्वाद्यक् ॥

इन्द्रे भैमीमभिलषति सतीन्द्राण्यादीनामिन्द्रपरित्यागजन्यामवस्थां षड्भिः श्लोकैराह—

मानुषीमनुसरत्यथ पत्यौ खर्वभावमवलम्ब्य मघोनी ।
खण्डितं निजमसूचयदुच्चैर्मानमाननसरोरुहनत्या ॥ ४७ ॥

मानुषीमिति ॥ अथ पत्याविन्द्रे खर्वभावं नीचत्वमवलम्ब्याङ्गीकृत्य मानुषीं भैमीमनुसरति जिगमिषति सति मघोनीन्द्राणी आननसरोरुहस्य चिन्तावशान्नत्या नम्रतया निजं स्वीयमुच्चैर्महान्तं मानमहङ्कारं पूजनं वा खण्डितमसूचयत् । आननसरोरुहनत्या कृत्वा खण्डितमिति वा । अथ च खर्वत्वं ह्रस्वत्वम् । यो हि वामनत्वमङ्गीकरोति तस्यैव परिमाणेन न्यूनत्वं भवितुं युक्तं नान्यस्येति, अत्र तु विपरीतम् । मानुषीम्, जातिवाचित्वान्ङीष् । मघोनी, 'पुंयोगात्—' इति ङीषि 'श्वयुव—' इति संप्रसारणम्[१] ॥

यो मघोनि दिवमुज्झरमाणे रम्भया मलिनिमालमलम्भि ।
वर्ण एव स खलूज्ज्वलमस्याः शान्तमान्तरमभाषत भङ्ग्या ॥ ४८ ॥

य इति ॥ रम्भया देवाङ्गनया मघोनीन्द्रे दिवमुज्झरमाणे त्यक्त्वा गच्छति सति यो मलिनिमा मालिन्यमलमत्यर्थमलम्भि प्राप्तः स मलिनिमरूपो वर्ण एव खलु निश्चयेनास्या रम्भाया उज्ज्वलं हर्षयुक्तमान्तरं हृदयं भङ्ग्या आकारविशेषेण शान्तं निर्विण्णं दुःखयुक्तमभाषतावोचत् । उज्ज्वलस्य मालिन्यमनुपपद्यमानं सदर्थापत्त्या दीप्ततायाः शान्ततां ब्रूते । स्वत्यागदुःखवशाच्छ्यामत्वं जातं सर्वैरपि ज्ञातमित्यर्थः । अथच—अस्या उज्ज्वलं शृङ्गाररसप्रधानमान्तरं मनः शान्तं शान्तैकरसप्रधानं ब्रूते स्म । तस्या अपि वैराग्यमभूदित्यर्थः । अथ च—शान्तं कोपरहितम् । तदीयमन्तःकरणम् उदतिशयेन ज्वलतीत्युज्ज्वलं दीप्तं सकोपमभाषत । तत्त्यागात्तदानीं क्रुद्धा सा जातेत्यर्थः । कोपाच्छ्यामता भवति । अत्रापि शा-[२][३]

---

१ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी । २ 'अत्र निर्वेदव्यभिचारिभावोदयोऽपह्नुतिरलंकारः' इति साहित्यविद्याधरी । ३ (स एव मलिनिमलक्षणो वर्णोऽस्या रम्भाया आन्तरं हृदयसंबन्धिनमुज्ज्वलं वर्णं धावल्यं शान्तमभाषत । यथा (अथ च । स एव वर्णः उज्ज्वलं धावल्यन् आन्तरं हृदयं शान्तमचष्ट इत्यन्वयः । बहिर्मालिन्येनान्तरमपि मालिन्यमनुमितमित्यर्थः । (अथ च) स एव मलिनिमा वर्णं उज्ज्वलं गर्विष्ठमन्तरं हृदयं शान्तं शीतलत्वमाह स) इति पुस्तकान्तरेऽधिकः पाठः ।

लेनापि जनेनाधुनापि स देवः कालः कृष्णवर्ण एव, अथ च कालसंज्ञकः कीर्त्यते कथ्यते । नलरूपावलोकनजनितकालिम्नोऽद्यापि वर्तमानत्वाद्यमस्य कालत्वमन्वर्थं न तु नाममात्रेणेत्यर्थः । यमोऽपि सचिन्तोऽभूदिति भावः । रविवंशावतंसस्य श्यामत्वमाश्चर्यकारि । तथानिर्वचनीयस्वरूपस्य सौन्दर्यं विलोक्य दुःखाद्यमोऽपि कालिमानं प्राप तस्माज्जनैरेवं कीर्त्यत इति ॥

यं बभार दहनः खलु तापं रूपधेयभरमस्य विमृश्य ।
तत्र भूदनलता जनिकर्त्री मा तदप्यनलतैव तु हेतुः ॥ ६३ ॥

यमिति ॥ दहनोऽग्निरस्य नलस्य रूपधेयस्य सौन्दर्यस्य भरं बाहुल्यं विमृश्य विचार्य दुःखार्थं तापं बभार तत्र संतापेऽनलताग्निता खलु निश्चयेन जनिकर्त्री जन्मकारिणी मा भूत् । स्वेन स्वस्य तापकारणायोगादेकस्यैव कर्तृत्वकर्मत्वविरोधात् । तदपि तथापि तु पुनर्निश्चितमनलतैव नलान्यत्वमेव हेतुः कारणम् । अहं चेन्नलोऽभविष्यं तर्हि भैमी ममैवाभविष्यत् । तत्तु नाभूदिति दुःखवशात्संतप्तोऽभूदिति भावः । रूपधेय इत्यत्र 'रूप–' इत्यादिना स्वार्थे धेयः । जनिकर्त्रीत्यत्र तरत्वबोधिकेतिवत्साधुः ॥

कामनीयकमधःकृतकामं काममक्षिभिरवेक्ष्य तदीयम् ।
कौशिकः स्वमखिलं परिपश्यन्मन्यते स्म खलु कौशिकमेव ॥ ६४ ॥

कामेति ॥ कौशिक इन्द्रोऽखिलं स्वमात्मानं परिपश्यन्परितो विलोकयन् खलु निश्चितं कौशिकमेवोलूकमेव मन्यते स्म । किं कृत्वा—अधःकृतो न्यक्कृतः कामो येन तदीयं नलसंबन्धि कामनीयकं सौन्दर्यमक्षिभिः सहस्रेणापि नेत्रैः काममतितरामवेक्ष्य निपीय । 'नलाग्रेऽहमुलूकतुल्य एव' इतीन्द्रस्य बुद्धिरुदभूत् । प्रत्यवयवं स्वस्य नेत्रसद्भावात् । विसंस्थुलत्वादित्यर्थः । अक्षिभिरिति बहुवचनं तद्रूपावलोकने सौन्दर्यसूचनार्थम् । कौशिकस्य कौशिकत्वं युक्तमेव । 'महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः' इत्यमरः । कामनीयकम्, पूर्ववद्भावे 'योपधात्–' इति वुञ् ॥

रामणीयकगुणाद्वयवादं मूर्तमुत्थितममुं परिभाव्य ।
विस्मयाय हृदयानि वितेरुस्तेन तेषु न सुराः प्रबभूवुः ॥ ६५ ॥

रामेति ॥ सुरा इन्द्रादयोऽमुं नलं मूर्तमाकारवन्तमुत्थितमुदितं रामणीयकं सौन्दर्यं तल्लक्षणो गुणः तस्याद्वैत(द्वय)वादोऽद्वितीयवादस्तं परिभाव्य विचार्य हृदयान्यन्तःकरणानि विस्मयायाश्चर्याय यतो वितेरुर्दत्तवन्तः । आकारवत्सौन्दर्यमिदमेकमेव इदं नान्यदित्याश्चर्ययुक्ता यतो जातास्तेन कारणेन तेषु हृदयेषु विषये न प्रबभूवुः समर्था नाभूवन् । आश्चर्यपरत्वात्किं करणीयमनुनेति किमपि न स्फुरितमिति भावः । दानस्य स्वस्वत्वनिवृत्तिपरस्वत्वापादनत्वाद्विस्मयाय दत्तेषु हृदयेषु स्वामित्वं नाभूदिति युक्तमेव । रामणीयकं गुणो यस्य तस्याद्वयवाद एतादृशोऽयमेव नान्य इति वा । रामणीयकं कामनीयकवत् ॥

---

१ 'अत्र श्लेषानुप्राणितोत्प्रेक्षा' इति साहित्यविद्याधरी । २ 'अत्र विरोधाभासः' इति साहित्यविद्याधरी । ३ 'अत्र श्लेषानुप्राणितोऽतिशयोक्त्यलंकारः' इति साहित्यविद्याधरी । ४ '...रूपोक्ति...' इति साहित्यविद्याधरी ।

किं घनस्य जलधेरथवेदं नैव संशयितुमप्यलभन्त ।
स्यन्दनं परमदूरमपश्यन्निःस्वनश्रुतिसहोपनतं ते ॥ ५९ ॥

किमिति ॥ ते देवा इदं घनस्य मेघस्य ध्वनितं, समुद्रस्य किमिति संशयितुं संदेहमपि कर्तुमर्थात्समयं नैवालभन्त किंपुनर्निश्चेतुम् । किंतु निःस्वनस्य श्रुतिराकर्णनं तया सह तस्याः समये उपनतं प्राप्तमदूरं निकटवर्तिनं स्यन्दनं रथं परं केवलमपश्यन्ददृशुः । शब्दाकर्णनसमये एव रथोऽपि वेगादागत इत्यर्थः । नलस्याश्वहृदयवेदित्वं सूचितम् । प्रथमे क्षणे घनध्वनितस्य स्मरणम्, द्वितीये जलधेः, ततः क्रमेण द्वयोः समानधर्मस्मरणलक्षणः पञ्चमक्षणे संशयः । प्रथमक्षण एव रथे समागते कथं संशयः, कथंतरां च विचारः, कथंतमां च निर्णय इत्यर्थः । रथध्वनेर्गाम्भीर्यं सूचितम् ॥

सूतविश्रमदकौतुकिभावं भाववोधचतुरं तुरगाणाम् ।
तत्र नेत्रजनुषः फलमेते नैषधं बुबुधिरे विबुधेन्द्राः ॥ ६० ॥

सूतेति ॥ एते विबुधेन्द्रा नेत्रजनुषो नयनजन्मनः फलं नैषधं नलं तत्र रथे बुबुधिरे ज्ञातवन्तः । किंभूतम्—सूतस्य सारथेर्विश्रमं ददातीति विश्रमदः कौतुकिभावः कुतूहलित्वं यस्य । तथा तुरगाणां भाववोधे हृदयाशयज्ञाने चतुरम् । अत एव एवंविधस्य सुन्दरान्तरस्याभावादेतस्यावलोकने नेत्रजन्मनः साफल्यमित्यर्थः । सूतश्रमापनोदेनास्माकमप्यभीष्टं कृत्वा श्रममपनेष्यतीति सूचितम् । यः पशूनां हृदयं जानाति सोऽस्माकं हृदयस्थमभिप्रायं कथं न ज्ञास्यतीति भाववोधपदेन सूचितम् । विशिष्टं श्रमं द्यति नुदतीति । एतैश्चिह्नैर्नलोऽयमिति तैर्ज्ञातमिति भावः ॥

वीक्ष्य तस्य वरुणस्तरुणत्वं यद्बभार निबिडं जडभूयम् ।
नौचिती जलपतेः किमु सास्य प्राज्यविस्मयरसस्तिमितस्य ॥ ६१ ॥

वीक्ष्येति ॥ तस्मिन्समये वरुणस्तस्य नलस्य तरुणत्वं वीक्ष्य यत् निबिडं जडभूयं जडत्वं बभार प्राप्तवान् । एनं दृष्ट्वा भैमी मां कथं वरिष्यतीति चिन्तयातिखिन्नोऽभूदित्यर्थः । अथच जडत्वं, तयैव चिन्तया स्तब्धत्वमपि प्राप । सा नलसौन्दर्या(तारुण्या)वलोकेन प्राज्यो बहुतरो विस्मयरस आश्चर्यरसः, तेन स्तिमितस्य निश्चलस्य अस्य जलपतेर्वरुणस्य किमु न औचिती, अपित्वौचित्यमेव । जलपतेरुदकरूपत्वम्, जडपतेर्मूर्खश्रेष्ठस्य च मन्दभूयस्त्वं च युक्तमेव । अन्यस्यापि विशिष्टगर्वरसयुक्तस्य जडपतेर्जडत्वं युक्तमित्युक्तिः । तादृशं तमालोक्यातितरां सचिन्तोऽभूदित्यर्थः ॥

रूपमस्य विनिरूप्य तथातिम्लानिमाप रविवंशवतंसः ।
कीर्त्यते यदधुनापि स देवः काल एव सकलेन जनेन ॥ ६२ ॥

रूपमिति ॥ रविवंशस्य वतंसो भूषणं यमोऽस्य नलस्य रूपं सौन्दर्यं विनिरूप्य विशेषेण सादरमवलोक्य तथा तेन प्रकारेणातिम्लानिमधिकं कालिमानमाप । यद् येन कारणेन सक-

---

१ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी । २ 'अत्र च्छेकानुप्रासोऽतिशयोक्तिश्च' इति साहित्यविद्याधरी । ३ 'अत्र च्छेकानुप्रासः श्लेषश्च' इति साहित्यविद्याधरी ।

केनापि जनेनाधुनापि स देवः कालः कृष्णवर्ण एव, अथ च कालसंज्ञकः कीर्त्यते कथ्यते । नलरूपावलोकनजनितकालिम्नोऽद्यापि वर्तमानत्वाद्यमस्य कालत्वमन्वर्थं न तु नाममात्रेणे-त्यर्थः । यमोऽपि सचिन्तोऽभूदिति भावः । रविवंशावतंसस्य श्यामत्वमाश्चर्यकारि । तथानिर्व-चनीयस्वरूपस्य सौन्दर्यं विलोक्य यस्माद्यमोऽपि कालिमानं प्राप तस्माज्जनैरेवं कीर्त्यत इति ॥

यं बभार दहनः खलु तापं रूपधेयभरमस्य विमृश्य ।
तत्र भूदनलता जनिकर्त्री मा तदप्यनलतैव तु हेतुः ॥ ६३ ॥

यमिति ॥ दहनोऽग्निरस्य नलस्य रूपधेयस्य सौन्दर्यस्य भरं बाहुल्यं विमृश्य विचार्य दुःखार्थं तापं बभार तत्र संतापेऽनलताग्निता खलु निश्चयेन जनिकर्त्री जन्मकारिणी मा भूत् । स्वेन स्वस्य तापकारणायोगादेकस्यैव कर्तृत्वकर्मत्वविरोधात् । तदपि तथापि तु पुन-र्निश्चितमनलतैव नलान्यत्वमेव हेतुः कारणम् । अहं चेन्नलोऽभविष्यं तर्हि भैमी ममैवाभ-विष्यत् । तत्तु नाभूदिति दुःखवशात्संतप्तोऽभूदिति भावः । रूपधेय इत्यत्र 'रूप-' इत्या-दिना स्वार्थे धेयः । जनिकर्त्रीत्यत्र तरत्वबोधिकेतिवत्साधुः ॥

कामनीयकमधःकृतकामं काममक्षिभिरवेक्ष्य तदीयम् ।
कौशिकः स्वमखिलं परिपश्यन्मन्यते स्म खलु कौशिकमेव ॥ ६४ ॥

कामेति ॥ कौशिक इन्द्रोऽखिलं स्वमात्मानं परिपश्यन्परितो विलोकयन् खलु निश्चितं कौशिकमेवोलूकमेव मन्यते स्म । किं कृत्वा—अधःकृतो न्यक्कृतः कामो येन तदीयं नलसं-बन्धि कामनीयकं सौन्दर्यमक्षिभिः सहस्रेणापि नेत्रैः काममतितरामवेक्ष्य निरीक्ष्य । 'नलाग्रेऽहमुलूकतुल्य एवे'तीन्द्रस्य बुद्धिरुदभूत् । प्रत्यवयवं स्वस्य नेत्रसद्भावात् । विशेषतुल्-त्वादित्यर्थः । अक्षिभिरिति बहुवचनं तद्रूपावलोकने सौन्दर्यसूचनार्थम् । कौशिकस्य कौशि-कत्वं युक्तमेव । 'महेन्द्रगुग्गुलूलूकव्यालग्राहिषु कौशिकः' इत्यमरः । कामनीयकम्, पूर्व-द्भावे 'योपधात्—' इति वुञ् ॥

रामणीयकगुणाद्वयवादं मूर्तमुत्थितममुं परिभाव्य ।
विस्मयाय हृदयानि वितेरुस्तेन तेषु न सुराः प्रबभूवुः ॥ ६५ ॥

रामेति ॥ सुरा इन्द्रादयोऽमुं नलं मूर्तमाकारवन्तमुत्थितमुदितं रामणीयकं सौन्दर्यं तल्लक्षणो गुणः तस्याद्वैत(द्वय)वादोऽद्वितीयवादस्तं परिभाव्य विचार्य हृदयान्यन्तःकर-णानि विस्मयायाश्चर्याय यतो वितेरुर्दत्तवन्तः । आकारवत्सौन्दर्यमिदमेकमेव दृष्टं नान्यत्रेत्या-श्चर्ययुक्ता यतो जातास्तेन कारणेन तेषु हृदयेषु विषये न प्रबभूवुः समर्था नाभूवन् । आश्च-र्यवशात्किं करणीयमनुचितं किमपि न स्फुरितमिति भावः । दानस्य स्वस्वत्वनिवृत्तिपरस्वत्वो-त्पादनत्वाद्विस्मयाय दत्तेषु हृदयेषु स्वामित्वं नाभूदिति तु फलितम् । रामणीयकं गुणो यस्य तस्याद्वयवाद एकत्वोऽयमेव नान्य इति वा । रामणीयकं कामनीयकवत् ॥

---

१ 'अत्र श्लेषानुप्राणितोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । २ 'अत्र विशेषोक्तिः' इति साहित्यविद्याधरी । ३ 'अत्र श्लेषानुप्राणितोऽतिशयोक्त्यलंकारः' इति साहित्यविद्याधरी । ४ 'अत्रा-तिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।

प्रैयरूपकविशेषनिवेशैः संवदद्भिरमराः श्रुतपूर्वैः।
एष एव स नलः किमितीदं मन्दमन्दमितरेतरमूचुः ॥ ६६ ॥

प्रैयेति ॥ अमरा इति एवं इदमितरेतरं परस्परं मन्दमन्दमल्पस्वरं यथा तथा ऊचुः। एवमिदं कथम्—श्रुतपूर्वैः पूर्वं लोकमुखाच्छ्रुतैः संवदद्भिर्यादृशा गुणाः पूर्वं श्रुतास्तादृशा एवाधुना दृष्टा इति संवादं भजमानैः प्रैयरूपकस्य प्रियरूपकत्वस्य यो विशेषोऽतिशयस्तस्य निवेशैरवस्थानैः सौन्दर्यविशेषविन्यासैः कृत्वा स नल एष एव किम्। श्रुतानुरूपगुणावलोकनेन नलं व्यतर्कयन्नित्यर्थः। प्रैयरूपकम्, मनोज्ञादित्वाद्भावे वुञ्। मन्दमन्दम्, प्रकारे द्विरुक्तिः॥

तेषु तद्विधवधूवरणार्हं भूषणं स समयः स रथाध्वा।
तस्य कुण्डिनपुरं प्रतिसर्पन्भूपतेर्व्यवसितानि शशंसुः ॥ ६७ ॥

तेष्विति ॥ एते पदार्था भूपतेर्नलस्य व्यवसितानि उद्योगास्तेष्विन्द्रादिषु विषये शशंसुः। अथ भैमीवरणार्थं गच्छतीति तेभ्यः कथयामासुः। एते के—तद्विधातिसुन्दरी वधूर्भैमी तस्या वरणार्हं योग्यं भूषणमेकः पदार्थः, स समयः स्वयंवरकालश्चैकः, कुण्डिनपुरं प्रतिसर्पन्प्रतिगच्छन् स रथाध्वा रथमार्ग एकः। नलस्य भूषणादि विचार्य अयं भैमीवरणार्थं तत्र गच्छतीति तैर्निर्णीतमित्यर्थः॥

धर्मराजसलिलेशहुताशैः प्राणतां श्रितममुं जगतस्तैः।
प्राप्य हृष्टचलविस्तृततापैश्चेतसा निभृतमेतदचिन्ति ॥ ६८ ॥

धर्मराजेति ॥ तैर्धर्मराजसलिलेशहुताशैर्यमवरुणानलैश्चेतसा कृत्वा निभृतं गुप्तमेतद्वक्ष्यमाणमचिन्ति विचारितम्। किंभूतैः—जगतः सम्यक्पालनाल्लोकस्य प्राणतां श्रितं जीववत्प्रियम्। अथ च प्राणाख्यवायुभूतं वा अमुं प्राप्य यथासंख्यं हृष्टचलविस्तृततापैर्जगत्प्रियत्वाद्धर्मराजत्वाद्यमो हृष्टः, वरुणोऽपि सलिलेशत्वाद्धर्षवशादेव चपलः, वह्निरपि हुताशत्वाद्धर्षवशादेव विस्तृततापः परिपुष्टो जात इत्यर्थः। असूनां प्राप्तौ यमो हृष्यति लोकप्राणापहारित्वात्। वायूनां प्राप्तौ जलात्मकत्वान्मेघरूपत्वाच्च वरुणश्चञ्चलो भवति। तथा वायूनां प्राप्तौ वह्निरुदर्चिर्भवति। वचनभङ्ग्या यमः क्रुद्धोऽभूत्, वरुणोऽपि चिन्तावशाच्चञ्चलोऽभूत्, वह्निरपि चिन्तावशादतिसंतप्तोऽभूदिति भावः॥

यमचिन्तामाह—

नैव नः प्रियतमोभयथासौ यद्यमुं न वृणुते वृणुते वा।
एकतो हि धिगमूमगुणज्ञामन्यतः कथमदःप्रतिलम्भः ॥ ६९ ॥

नेति ॥ असौ भैमी यदि अमुं नलं न वृणुते, वाथवा वृणुते उभयथापि वरणेऽवरणे च नोऽस्माकं प्रियतमा प्राणेश्वरी पत्नी हितकारिणी च नैव भवेत्। कुतः—हि यस्मादेकतोऽवरणपक्षे अमूं भैमीमगुणज्ञां धिक्। मत्तो नलगुणाधिक्यं न जानाति सा कथं वरणीया। अन्यतो वरणपक्षे नलगुणाधिक्यज्ञानेन वृते नले अदःप्रतिलम्भः अमुष्या लाभो मम कथम्। उभयथापि न प्रियतमेति वचनेन धर्मप्रधाना चिन्ता कृता। एकतः, अन्यतः, सप्तम्यर्थे तसिः॥

---

१ 'अत्र जातिः' इति साहित्यविद्याधरी। २ 'अत्र समुच्चयालंकारः' इति साहित्यविद्याधरी।
३ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी।

वरुणचिन्तामाह—

मां वरिष्यति तदा यदि मत्तो वेद नेयमियदस्य महत्त्वम् ।
ईदृशी च कथमाकलयित्री मद्विशेषमपरान्नृपपुत्री ॥ ७० ॥

मामिति ॥ इयं भैमी मां तदा वरिष्यति यदि मत्तः सकाशादियदतिबहु अस्य महत्त्वं माहात्म्यं न वेद न जानाति न त्वन्यथा । ईदृशी च मत्तो नलस्य विशेषमजानानैव चेद्राजपुत्री तर्हि अपरादन्यस्मात्सजातीयाद्विजातीयाद्वा सकाशात् मद्विशेषं ममाधिक्यं कथमाकलयित्री ज्ञास्यति, अपि तु तदपि न ज्ञास्यतीति । उभयथाप्यलाभ इति वरुणेन चलं चिन्तितम् । मत्तो नले विशेषापरिज्ञानवदन्यस्मान्ममापि विशेषापरिज्ञानाम्मामपि वरिष्यतीति भाव इति वा ॥

वह्निचिन्तामाह—

नैषधे बत वृते दमयन्त्या व्रीडितो नहि बहिर्भवितास्मि ।
स्वां गृहेऽपि वनितां कथमास्यं ह्रीनिमीलि खलु दर्शयिताहे ॥ ७१ ॥

नैषध इति ॥ अहं दमयन्त्या नैषधे वृते सति व्रीडितः सन् न बहिर्भवितास्मि निर्गन्तास्मि । बत खेदे । गृहेऽपि स्वां वनितामास्यं मुखं कथं दर्शयिताहे दर्शयिष्यामि । ह्रियस्त्रपाया ह्रीनिमीलि लज्जासंकुचितम् । गृहे स्त्रीभयम्, बहिर्लोकदर्शनभयम्, [illegible] कष्टमिति वह्निना संतापेन चिन्तितम् । दर्शयिताहे, 'निगरण' इत्यात्मनेपदे [illegible] कर्तुर्णौ कर्मत्वम् ॥

इत्यवेत्य मनसात्मविधेयं किंचन त्रिविबुधी बुबुधे न ।
नाकनायकमपास्य तमेकं सा स्म पश्यति परस्परमास्यम् ॥ ७२ ॥

इतीति ॥ सा त्रिविबुधी देवत्रयी मनसा इति पूर्वोक्तप्रकारेणावेत्य किंचन आत्मविधेयं किमपि स्वीयं कार्यं न बुबुधे ज्ञातवती । किंतु तमेकं नाकनायकमिन्द्रमपास्य [illegible] परस्परमास्यं वदनं पश्यति स्म । किंकर्तव्यतामूढाभूदित्यर्थः । 'आत्मविधेयम्' इति [illegible] नलापेक्षया आत्मनो न्यूनत्वं विचिन्त्य मनसा विचिन्त्य किंचन न बुबुधे इत्यर्थः ॥

किं विधेयमधुनेति विमुग्धं स्वानुगाननमवेक्ष्य ऋभुक्षाः ।
शंसति स्म कपटे पटुर[illegible] ॥ ७३ ॥

किमिति ॥ ऋभुक्षा इन्द्रोऽधुना किं विधेयमित्यतो विमुग्धं [illegible] स्वानु-गानां मरुदादीनामाननमवेक्ष्य विलोक्य [illegible] कपटे पटुः कुशलः, अत एव [illegible] वचनं प्रकारेण मनसिकृत्य शंसति स्म कथयति स्म ॥

सर्वतः कुशलवानसि कश्चित्त्वं स नैषध इति प्रतिभा नः ।
स्वासनार्धसुहृद[illegible] ॥ ७४ ॥

---

१ [illegible] । २ [illegible]
[illegible]
[illegible] । ३ [illegible]
[illegible] ।

सर्वत इति ॥ त्वं सर्वतः सप्ताङ्गराज्यादौ कुशलवानसि कच्चित्कथय । कच्चित्कामप्रवेदनं स्वामिप्रायकथनम् । अपरिचितस्य कुशलप्रश्नो न युक्त इत्यत आह—स प्रसिद्धो नैषधस्त्वमिति नोऽस्माकं प्रतिभा आनुमानिकी बुद्धिः । कुत इत्यत आह—वयं त्वस्य नन आसनार्धे विषये सुहृदोऽतिमित्रस्य वीरसेननाम्नो नृपतेरिव त्वयि विद्यमानां रेखां शोभां चिह्नो जानीमः । वीरसेनतुल्यशोभत्वात्तत्पुत्रस्त्वम् । प्रायेण पितृसदृशः पुत्रो भवति । 'शोभाम्' इति वा पाठः । 'उपमानोपमानं या भूषणस्यापि भूषणम् । आङ्गर्थीः कथ्यते रेखा चक्षुःपीयूषवर्षिणी ॥' इत्यालंकारिकाः ॥

क्व प्रयास्यसि नलेत्यलमुक्त्वा यात्रयात्र शुभयाजनि यन्नः ।
तत्तयैव फलसत्वरया त्वं नाध्वनोऽर्धमिदमागमितः किम् ॥ ७५ ॥

केति ॥ हे नल, त्वं क्व प्रयास्यसि कं देशमुद्दिश्य गमिष्यसि इत्युक्त्वा अलं प्रश्नो नैव युक्तः । यद्यस्मात् नोऽस्माकमत्र पृथिव्यां मार्गविषये वा कार्यविशेषविषये वा पृथ्वीमार्गं वा उपदिश्य या यात्रा तया शुभया अजनि जातम् । तत् तस्मात् फले सत्वरयोन्मुख्या तयैव यात्रया त्वमिदमध्वनोऽर्धं न आगमितः प्रापितः किम् । अपि तु तयैव प्रापितोऽस्मत्कार्यार्थं न तु स्वकार्यार्थवशादत्र त्वमागतोऽसीत्यर्थः । अथ च गन्तारं प्रति क्व प्रयास्यसीति वक्तुं लोकेऽनुचितम् ॥

एष नैषध स दण्डभृदेष ज्वालजालजटिलः स हुताशः ।
यादसां स पतिरेष च शेषं शासितारमधिगच्छ सुराणाम् ॥ ७६ ॥

एष इति ॥ हे नैषध, एष पुरो दृश्यमानः स प्रसिद्धो दण्डभृद्यमः । तथा—एष ज्वालाजालेन जटिलः परीतः स हुताशोऽग्निः । एष स यादसां पतिर्वरुणः । शेषमवशिष्टं च मां सुराणां शासितारमिन्द्रमधिगच्छ त्वं जानीहि । दण्डभृदादिविशेषणमादराय भयाय च । 'वह्नेर्द्वयोर्ज्वालकीलौ' इति पुंलिङ्गो ज्वालशब्दः । पूर्ववाक्यत्रये अधिगच्छेति संबन्धे वाक्यार्थः कर्म । जटिलः मत्वर्थे पिच्छादित्वादिलच् ॥

अत्रागमने कारणमाह—

अर्थिनो वयममी समुपेमस्त्वां नलेति फलितार्थमवेहि ।
अध्वनः क्षणमपास्य च खेदं कुर्महे भवति कार्यनिवेदम् ॥ ७७ ॥

अर्थिन इति ॥ हे नल, इति त्वं फलितार्थं तात्पर्यमवेहि जानीहि । इति किम्—अमी वयमर्थिनः सन्तस्त्वां समुपेमो याचकत्वेन प्राप्ताः स्मः (किल) इति । तर्हि याच्यतामित्यत आह—अध्वनो जातं खेदं क्षणमपास्य भवति भवत्समीपे कार्यनिवेदं प्रयोजनज्ञापनं च इदानीमेव कुर्महे ॥

ईदृशीं गिरमुदीर्य विडौजा जोपमास न विशिष्य बभाषे ।
नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य ॥ ७८ ॥

---

१ 'अत्र हेतूपमे' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गम्' इति साहित्यविद्याधरी । ३ 'अवगच्छ' इति जीवातुसंमतः पाठः । ४ 'अत्र परिकर' इति साहित्यविद्याधरी ।

ईदृशीमिति ॥ बिडौजा इन्द्र ईदृशीं पूर्वोक्तां गिरमुदीर्योक्त्वा जोषं तूष्णीमास बभूव, परं निषिध्य न बभाषे । नैनोवरणार्थमागतानामस्माकं दूत्यं कुर्वीतेति विविच्य प्रकटं नावोचत् । निषेधमित्येवेति भावः । एतदेव नलवचनं ज्ञेयम् । अत्र ईदृशोऽभिधाकुशलत्वे वचनकौशलविषये चित्रमाश्चर्यं न । कुतः—यतो गुरुर्बृहस्पतिरस्येन्द्रस्य शैशवमवधिर्यथा भवति तथा शैशवमारभ्य गुरुः शिक्षकः, स एवं वदतीति किमाश्चर्यमित्यर्थः । 'आस' इति 'अस गतिदीप्त्यादानेषु' तेन न काप्यनुपपत्तिः । ईदृशीम्, 'त्यदादिषु—' इति कञि 'टिड्ढा—' इति ङीप् ॥

कपटाभिप्रायमजानतो नलस्य धीरोदात्ततां पञ्चदशभिः श्लोकैराह—

अर्थिनामहृषिताखिललोमा स्वं नृपः स्फुटकदम्बकदम्बम् ।
अर्चनार्थमिव तच्चरणानां स प्रणामकरणादुपनिन्ये ॥ ७९ ॥

अर्थीति ॥ दानशूरत्वात् अर्थी इति नाम्ना श्रुतेन हृषितानि विकसितान्यखिलानि लोमानि यस्य स नृपो नलः प्रणामकरणाद्भूमिनिपतदादिप्रकटननमस्कारकरणाद्धेतोः, तच्चरणानामर्चनार्थमर्चनायै स्वमात्मानमुपनिन्ये तच्चरणसमीप उपहृतवान् । कमिव—स्फुटकदम्बकदम्बमिव रोमाञ्चितत्वाद्विकसितनीपकुसुमसमूहमिवेति स्वपदविशेषणम् । तत्तुल्यमित्यर्थः । कदम्बपुष्पैरपि भक्तेन देवार्चना क्रियते । स्वमङ्गमेव पुलकितकदम्बपुष्पसदृशं कृत्वा निवेदितमित्यर्थः । हृषित इति 'हृषेर्लोमसु' इतीट् ॥

दुर्लभं दिगधिपैः किममीभिस्तादृशं कथमहो मदधीनम् ।
ईदृशं मनसिकृत्य विरोधं नैषधेन समशायि चिराय ॥ ८० ॥

दुर्लभमिति ॥ नैषधेन नलेन ईदृशं याच्ञादानयोः परस्परविरोधं मनसिकृत्य विचार्य चिराय चिरकालं वक्ष्यमाणप्रकारेण समशायि संशयितम् । ईदृशं कथम्—अमीभिर्दिगधिपैर्दिक्पालैः किं वस्तु दुर्लभम्, अपितु न किमपि तादृशम् । यदीदृशैर्दुर्लभं वस्तु तन्मदधीनं कथम्, अहो आश्चर्यमिति संशयः । दिगधिपैः । खलर्थयोगे षष्ठीनिषेधात्तृतीया । मनसिकृत्य 'अनत्याधान उरसिमनसी' इति वा गतिसंज्ञायां 'ते प्राग्धातोः' इति समासयोगे क्त्वाने समासे ल्यप् । अत्याधान उपश्लेषे तु गतिसंज्ञाभावात् उरसि कृत्वा पाणिं शेते इति व्यवस्थाभेदः ॥

तमेव संशयमाह—

जीवितावधि वनीयकमात्रैर्याच्यमानमखिलैः सुलभं यत् ।
अर्थिने परिवृढाय सुराणां किं वितीर्य परितुष्यतु चेतः ॥ ८१ ॥

जीवितेति ॥ अखिलैः समस्तैरपि वनीयकमात्रैरिन्द्रव्यतिरिक्तैः याचकमात्रैः केवलैर्याचकैर्जीवितमवधिर्यस्य एवंविधं जीवितपर्यन्तं याच्यमानं प्रार्थितं यद्वस्तु सुलभं सुकरं, यस्य लब्धुं सुलभं तत् । अर्थिनस्तस्मादर्थिने याचकाय सुराणां परिवृढाय स्वामिने इन्द्राय-

---

१ 'अत्र श्लेषमूलकः कल्पितोपमालङ्कारः' इति साहित्यविद्याधरी । २ 'अत्र [illegible] वदन्' इति साहित्यविद्याधरी । ३ 'दुर्लभं [illegible]' इति [illegible] । ४ [illegible]

न्ययाचकेभ्योऽधिकाय किं वितीर्य दत्त्वा ममास्य च चेतोऽन्तःकरणं परितुष्यतु संतुष्टं भवतु। जीवितपर्यन्तं यस्यैकस्मैचिद्दीयते, देवेन्द्राय दातुं योग्यं वस्तु जीवितादधिकं नास्त्येव यद्दातव्यम्। 'अखिलम्' इति वा पाठः। 'वनीयको याचनको मार्गणो याचकार्थिनौ' इत्यमरः॥

जीविताधिका भैमी तस्मै दीयतामित्याशङ्क्याह—

भीमजा च हृदि मे परमास्ते जीवितादपि धनादपि गुर्वी।
न स्वमेव मम सार्हति यस्याः षोडशीमपि कलां किल नोर्वी॥ ८२॥

भीमजेति॥ अपिशब्दश्चशब्दो वा किंचेत्यर्थे। उर्वी यस्या भैम्याः षोडशीमपि कलां षोडशभागं किल निश्चितं नार्हति। यत्संबन्धी षोडशोऽपि भागः समग्रपृथ्वीलक्षणमूल्यलभ्यो न भवति सा भीमजा जीवितादपि धनादपि गुर्वी मूल्यरहिता मे हृदि मम हृदये परं केवलमास्ते विद्यते। किल यतः सा भैमी मम स्वं नैव। केवलं तामभिलष्यामि परं सा मदधीना न भवत्येव। यत्र स्वकीयत्वं तदेव दातुं शक्यते भैम्यां स्वकीयत्वाभावात्तद्वितरणमशक्यमिति कथं चेतः संतुष्यतीति भावः। अथ च राजभिर्यन्निमित्तं बन्धुवित्तादिव्ययः क्रियते सा पृथ्वी राज्ञां परमं स्वं धनं तदपि यस्याः षोडशं भागं नार्हति सा राज्ञो मम स्वं कथम्। अपि तु न कथंचिदित्यर्थः। अथ च यस्याः षोडशीं कलां मम स्वमेव स्वरूपमेव नार्हति किं पुनः समग्रा उर्व्यपि। किल यस्मात्क्रमेण जीवितादपि गुर्वी पृथ्वीरूपाद्धनादपि परमतिशयेन गुर्वी सा मद्धृदये आस्तेऽतो दातुमयोग्या इन्द्रेण दुर्लभा वेति व्याख्येयम्[1]॥

मीयतां कथमभीप्सितमेषां दीयतां कथमयाचितमेव।
तं धिगस्तु कलयन्नपि वाञ्छामर्थिवागवसरं सहते यः॥ ८३॥

मीयतामिति॥ अर्थाद्यथा तयेति संबध्यते। मयाऽयाचितमेवाप्रार्थितमेव शीघ्रमेतेभ्यो यथा दीयतां तथा एषामभीप्सितं वस्तु कथं मीयतां ज्ञायताम्। अभीप्सितज्ञानेन विना दातुं न शक्यतेऽतो कथितमप्यभीप्सितं ज्ञातं भवति चेत्तर्हि अप्रार्थितमेव दीयत इत्यर्थः। ननु ज्ञातेऽप्ययाचितं किमिति दातव्यमित्यत आह—'गत्वा यद्दीयते दानं तदनन्तफलं स्मृतम्। सहस्रगुणमाहूय याचिते तु तदर्धकम्॥' इति वचनप्रामाण्याद्वाञ्छां याचकस्याभीष्टं कलयन्नपि जानन्नपि यः एतद्याचनानन्तरं दास्यामीति अर्थिवाचोऽवसरं सहते प्रतीक्षते तं धिगस्तु सोऽधमः। वाञ्छां ज्ञात्वापि प्रार्थनानन्तरं दास्यामीति विचारयति सोऽधम इति किं वाच्यम्। तस्मादयाचितमेव देयमिति भावः। एषाम्, 'क्तस्य च वर्तमाने' इति षष्ठी। अभीप्सितम्, 'मतिबुद्धि-' इति वर्तमाने क्तः। कलयन्निति हेतौ शता॥

प्रापितेन चटुकाकुविडम्बं लम्भितेन बहुयाचनलज्जाम्।
अर्थिना यदघमर्जति दाता तन्न लुम्पति विलम्ब्य ददानः॥ ८४॥

प्रापितेनेति॥ दाता अर्थिना कृत्वा यदघं पातकमर्जति विलम्ब्य चिराद्ददानो दाता तत्पातकं न हन्ति परिमार्ष्टुं न शक्नोति। अधिकस्य सुकृतस्य का कथेत्यर्थः। किंभूतेना-

---

१ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी। २ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी।

र्थिना—चटु प्रियवाक्यं, काकु दीनवाक्यं ताभ्यां विडम्बं पराभवं प्रापितेन स्वस्य प्रियं दैन्यं च वादितेन । तथा—बहु अनेकवारं याचनं, तेन कृत्वा या लज्जा तामपि लम्भितेन प्रापितेन । प्रियवचनाद्यवादयित्वैव झटित्यर्थिने देयं, अन्यथा पातकं स्यादिति भावः । अर्जति, 'अर्ज अर्जने' भ्वादिः, 'अर्जक् अर्जने' चुरादिः ॥

यत्प्रदेयमुपनीय वदान्यैर्दीयते सलिलमर्थिजनाय ।
सार्थनोक्तिविफलत्वविशङ्कात्रासमूर्च्छदपमृत्युचिकित्सा ॥ ८५ ॥

यदिति ॥ वदान्यैर्बहुप्रदैः प्रदेयं दातव्यं वस्तु उपनीय समीपे संस्थाप्य अर्थिजनाय यत्सलिलं दीयते देयसंकल्पार्थमुदकमर्थिहस्ते प्रक्षिप्यते सा सलिलदानरूपा क्रिया अर्थनोक्तिर्याचनवचनं तस्य विफलत्वविशङ्का वैफल्ये विशङ्का तया जातस्त्रासस्तज्जन्यं भयं तेन मूर्च्छन्नतिशयेन वर्धमानोऽपमृत्युरकालमरणं तस्य चिकित्सा प्रतिक्रिया । सलिलदानेन याच्ञासाफल्यनिश्चयात् 'मरणे यानि चिह्नानि तानि चिह्नानि याचके' इति वचनप्रमाणतो याच्ञावैफल्यशङ्काजन्योऽपमृत्युः शाम्यतीत्यर्थः । मूर्च्छतोऽपमृत्युः सलिलसेकेन शाम्यति । अर्थिन्युपस्थिते दानविधिसिद्धये जलानयनविलम्बोऽपि न कर्तव्य इति भावः ॥

अर्थिने न तृणवद्धनमात्रं किं तु जीवनमपि प्रतिपाद्यम् ।
एवमाह कुशवज्जलदायी द्रव्यदानविधिरुक्तिविदग्धः ॥ ८६ ॥

याचमानेति ॥ यस्य पुरुषस्य जन्म उत्पत्तिर्याचमानस्य जनस्य मानसवृत्तेर्मनोरथस्य पूरणाय समर्था न भवति तेन पुंसा इयं भूमिरतिभारवती बत कष्टम्। न द्रुमैः, न गिरिभिः, न समुद्रैः भारवती। तेन पुंसा यावान्भूमेर्भारः, तावान्वृक्षादिभिर्न। एते तु क्वचित्पुष्पादिना औषधादिना रत्नादिना चोपकुर्वन्ति, न त्वदाता। तस्माद्याचकाभिलाषपूरणं करणीयमिति भावः ॥

मा धनानि कृपणः खलु जीवंस्तृष्णयार्पयतु जातु परस्मै।
तत्र चैष कुरुते मम चित्रं यत्तु नार्पयति तानि मृतोऽपि ॥ ८९ ॥

मेति ॥ कृपणोऽतिलुब्धो जीवन् तृष्णयातिलोभेन परस्मै अर्थिने जातु कदाचिदपि धनानि खलु निश्चितं मार्पयतु मास्म दात्। जीवित्वा लोभसद्भावान्न ददातीत्यत्र नाश्चर्यम्, मृतोऽप्येष कृपणो यत्तु पुनः तानि धनानि नार्पयति न प्रयच्छति तत्र च तत्र पुनः तत्रैव वा विषये मम चित्रमाश्चर्यं कुरुते, मृतस्यापि लोभसद्भावात्। अथ च मृतः सन्नयं कृपणः धनानि नृपसंबन्धीनि राजायत्तानि नार्पाणि करोति नार्पयति तत्राश्चर्यम्। यो जीवन्कस्मैचिन्न ददाति स मृतोऽपि राज्ञे ददातीत्याश्चर्यम्। तस्माद्यावज्जीवति तावद्दातव्यं मृते राजा नेष्यतीति भावः ॥

माममीभिरिह याचितवद्भिर्दातृजातमवमत्य जगत्याम्।
यद्यशो मयि निवेशितमेतन्निष्क्रयोऽस्तु कतमस्तु तदीयः ॥ ९० ॥

मामिति ॥ इह जगत्यां भूलोके दातृजातं वदान्यमात्रमवमत्यानादृत्य मां याचितवद्भिर्याचमानैरमीभिरिन्द्रादिभिः मयि यद्यशो निवेशितम्। इन्द्रादयो यस्य याचका जाता इत्यसाधारण्येन मम कीर्तिः कृता एतस्याः कीर्तेर्निष्क्रयो विनिमयः तदीय इन्द्रादिसंबन्धी कतमस्तु कः पुनः तदार्थः अस्तु भवतु। इन्द्रादिभिः पूर्वमन्यः कोऽपि चेदयाचिष्यत तेन च तेभ्यः किंचिच्चेददास्यत तर्हि तदेव वस्तु कीर्तिविनिमयं समभविष्यत्, न त्वेवमित्येतत्कीर्तितुल्यमेतेभ्यो वितरणीयं विनिमयं वस्तु नास्तीति भावः। यदेतद्यश इति वा। स्वर्लोके वर्तमानं कल्पवृक्षादिदातृवर्गमिति वा। दानं तावत्तिष्ठतु, यशोवितरणस्य मूल्यमपि दातव्यमित्यर्थः ॥

लोक एष परलोकमुपेता हा विहाय निधने धनमेकः।
इत्यमुं खलु तदस्य निनीषत्यर्थिबन्धुरुदयद्दयचित्तः ॥ ९१ ॥

लोक इति ॥ एष लोको निधने मरणे प्राप्ते धनं विहाय एक एवासहाय एव परलोकमुपेता गमिष्यति हा कष्टम्। इति हेतोः खलु निश्चितमुदयन्ती उदिता दया यस्मिन्नेवंभूतं चित्तं मनो यस्य सोऽर्थिबन्धुर्याचकलक्षणः सुहृदस्य दातुर्लोकस्य तद् धनममुं परलोकं परलोकगतं जनं वा निनीषति नेतुमिच्छति। खलु उत्प्रेक्षे वा। अर्थिने दत्तं परलोके तदधिकमुपतिष्ठत इत्यर्थः। अन्योऽपि बन्धुः पूर्वस्थानं त्यक्त्वा स्थानान्तरं प्रत्येकाकिन एव गच्छतः सुहृदो धनादि तत्स्थानं प्रापयति। उपेता, 'इण् गतौ' उद् तृन्। द्विकर्मकः ॥

---

१ 'अत्रासम्बन्धे संबन्धातिशयोक्तिः' इति साहित्यविद्याधरी। २ 'अत्र श्लेषः' इति साहित्यविद्याधरी। 'विरोधाभासोऽलंकारः' इति जीवातुः। ३ 'अत्र छेकानुप्रासः' इति साहित्यविद्याधरी। ४ 'अत्र छेकानुप्रासोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी।

दानपात्रमधमर्णमिहैकग्राहि कोटिगुणितं दिवि दायि ।
साधुरेति सुकृतैर्यदि कर्तुं पारलौकिककुसीदमसीदत् ॥ ९२ ॥

दानेति ॥ इह भुवि एकग्राहि एकसंख्यायुक्तं देयं वस्तु गृह्णाति तच्छीलं दिवि स्वर्गे कोटिगुणितं कोटिपरिमितं दायि ददाति दास्यति वा एवंशीलं दानपात्रं अधमर्णं याचकलक्षणं ऋणग्रहीतारं सुकृतैः पुण्यैः कृत्वा पारलौकिकं स्वर्लोकभवं कुसीदं वृद्धिजीविकामसीदद्विनश्वरं कर्तुं यदि एति प्राप्नोति जानाति वा तर्हि साधुः सज्जन एव एति नान्यः । एवंविधं दानपात्रं साधुव्यतिरेकेण केनापि न लभ्यते । लब्धे च तस्मिन्साधुना चिरकालं स्वर्गे स्थीयते । तस्मा- याचकमनोरथः पूरणीय इति भावः । कुसीदमसीदत्कर्तुं साधुरेवैति तर्हि सुकृतैः कृत्वा, नान्येन प्रकारेणेति वा । अन्योऽधमर्णो द्विगुणाधिकं न ददाति, दानपात्रमधमर्णं तु वार्धुषिक एकगुणं गृहीत्वा कोटिपरिमितं ददाति ततश्चैतादृशमधमर्णं साधुरेव सुकृतैरेव प्राप्नोति नान्यो- ऽन्येन वोपायेनेति वा । 'कुसीदं वृद्धिजीविका' इत्यमरः । दायि, 'भविष्यति गम्यादयः' इति भविष्यदर्थे णिनिः, 'आवश्यकाधमर्ण्ययोः–' इत्याधमर्ण्ये वा । तद्योगे 'अकेनोर्भविष्यदाधम- र्ण्ययोः' इति षष्ठीनिषेधात्कोटिगुणितमिति कर्मणि द्वितीया । पारलौकिकम्, अध्यात्मादिषु 'लोकोत्तरपदाच्च' इति वक्तव्याट्ठञि अनुशतिकादिपाठादुभयपदवृद्धिः ॥

एवमादि स विचिन्त्य मुहूर्तं तानवोचत पतिर्निषधानाम् ।
अर्थिदुर्लभमवाप्य सहर्षान्याच्यमानमुखमुल्लसितश्रि ॥ ९३ ॥

एवमिति ॥ स निषधानां पतिर्नल एवमादि 'जीवितावधि–' इत्येवंप्रकारमिति मुहूर्तं क्षणं विचिन्त्य विचार्य तानिन्द्रादीनवोचत । किंभूतान्—अर्थिनां दुर्लभं याचनाविषयं मदनानलस्य मुखमुल्लसितश्रि उदितशोभमवाप्य सहर्षान् । याचकैर्दाता प्रसन्नमुखो दुर्लभः, तं तु प्रसन्नमु- खमवाप्य कार्यसिद्धिर्भविष्यतीति सहर्षैर्जातमित्यर्थः ॥

नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः ।
वीक्ष्य वः खलु तनूममृतादं दृङ्निमज्जनमुपैति सुधायाम् ॥ ९४ ॥

नास्तीति ॥ जन्यजनकयोः कार्यकारणयोः व्यतिभेदोऽतिशयो भेदो नास्ति, तथा— जनस्य देहः अयत इत्यर्थं सत्यं तेन जनितो जन्यः, इत्युक्तमपि सत्यम् । जनकमपि सुव- र्णजन्यं कुण्डले दृष्टान्तः । खलु यस्मात् अमृतमत्ति [illegible] वो युष्माकं तनूं वीक्ष्य मम दृक् सुधायाममृते निमज्जनमुपैति । अमृतमज्जनेन यथा सुखं भवति तथा भवद्दर्शनेनेति । यतो भवन्तोऽमृतभक्षिणः । अत्र पूर्वोक्त एव हेतुः । यद्वा अन्नजन्यो जनदेहः, [illegible] जन्यजनकयोर्भेदो नास्तीत्यसौ नास्ति जन्यजनकभेदः । [illegible] एवेति सत्यम् । [illegible]- दित्यादि पूर्ववत् । यद्वा अन्नजन्यो जनदेहः, अस्ति जन्यजनकयोर्व्यतिभेदो [illegible] जन्यजनकव्यतिभेदः एवंविधो न भवति किं [illegible] एव । [illegible] । [illegible] पूर्ववत् । [illegible] । 'अमृतादम्' इति पाठे [illegible]

१ '[illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी ।

याचमानेति ॥ यस्य पुरुषस्य जन्म उत्पत्तिर्याचमानस्य जनस्य मानसवृत्तेर्मनोरथस्य पूरणाय समर्था न भवति तेन पुंसा इयं भूमिरतिभारवती बत कष्टम्। न द्रुमैः, न गिरिभिः, न समुद्रैः भारवती। तेन पुंसा यावान्भूमेर्भारः, तावान्वृक्षादिभिर्न। एते तु कश्चित्पुष्पादिना औषधादिना रत्नादिना चोपकुर्वन्ति, न त्वदाता। तस्माद्याचकाभिलाषपूरणं करणीयमिति भावः॥

मा धनानि कृपणः खलु जीवंस्तृष्णयार्पयतु जातु परस्मै।
तत्र चैष कुरुते मम चित्रं यत्तु नार्पयति तानि मृतोऽपि॥ ८९॥

मेति ॥ कृपणोऽतिलुब्धो जीवन् तृष्णयातिलोभेन परस्मै अर्थिने जातु कदाचिदपि धनानि खलु निश्चितं मार्पयतु मास्म दात्। जीवित्वा लोभसद्भावान्न ददातीत्यत्र नाश्चर्यम्, मृतोऽप्येष कृपणो यत्तु पुनः तानि धनानि नार्पयति न प्रयच्छति तत्र च तत्र पुनः तत्रैव वा विषये मम चित्रमाश्चर्यं कुरुते, मृतस्यापि लोभसद्भावात्। अथ च मृतः सन्नयं कृपणः धनानि नृपसंबन्धीनि राजायत्तानि नार्पाणि करोति नार्पयति तत्राश्चर्यम्। यो जीवन्कस्मैचिन्न ददाति स मृतोऽपि राज्ञे ददातीत्याश्चर्यम्। तस्माद्यावज्जीवति तावद्दातव्यं मृते राजा नेष्यतीति भावः॥

माममीभिरिह याचितवद्भिर्दातृजातमवमत्य जगत्याम्।
यद्यशो मयि निवेशितमेतन्निष्क्रयोऽस्तु कतमस्तु तदीयः॥ ९०॥

मामिति ॥ इह जगत्यां भूलोके दातृजातं वदान्यमात्रमवमत्यानादृत्य मां याचितवद्भिर्याचमानैरमीभिरिन्द्रादिभिः मयि यद्यशो निवेशितम्। इन्द्रादयो यस्य याचका जाता इत्यसाधारण्येन मम कीर्तिः कृता एतस्याः कीर्तेर्निष्क्रयो विनिमयः तदीय इन्द्रादिसंबन्धी कतमस्तु कः पुनः तदार्थः अस्तु भवतु। इन्द्रादिभिः पूर्वमन्यः कोऽपि चेदयाचिष्यत तेन च तेभ्यः किंचिच्चेददास्यत तर्हि तदेव वस्तु कीर्तिविनिमयं समभविष्यत्, न त्वेवमित्येतत्कीर्तितुल्यमेतेभ्यो वितरणीयं विनिमयं वस्तु नास्तीति भावः। यदेतद्यश इति वा। स्वर्लोके वर्तमानं कल्पवृक्षादिदातृवर्गमिति वा। दानं तावत्तिष्ठतु, यशोवितरणस्य मूल्यमपि दातव्यमित्यर्थः॥

लोक एष परलोकमुपेता हा विहाय निधने धनमेकः।
इत्यमुं खलु तदस्य निनीषत्यर्थिबन्धुरुदयद्दयचित्तः॥ ९१॥

लोक इति ॥ एष लोको निधने मरणे प्राप्ते धनं विहाय एक एवासहाय एव परलोकमुपेता गमिष्यति हा कष्टम्। इति हेतोः खलु निश्चितमुदयन्ती उदिता दया यस्मिन्नेवंभूतं चित्तं मनो यस्य सोऽर्थिबन्धुर्याचकलक्षणः सुहृदस्य दातुर्लोकस्य तद् धनममुं परलोकं परलोकगतं जनं वा निनीषति नेतुमिच्छति। खलु उत्प्रेक्षे वा। अर्थिने दत्तं परलोके तदधिकमुपतिष्ठत इत्यर्थः। अन्योऽपि बन्धुः पूर्वस्थानं त्यक्त्वा स्थानान्तरं प्रत्येकाकिन एव गच्छतः सुहृदो धनादि तत्स्थानं प्रापयति। उपेता, 'इण् गतौ' लुट् तृज्वा। द्विकर्मकः॥

---

१ 'अत्राप्यसंबन्धे संबन्धातिशयोक्तिः' इति साहित्यविद्याधरी। २ 'अत्र क्षेपः' इति साहित्यविद्याधरी। 'विरोधाभासोऽलंकारः' इति जीवातुः। ३ 'अत्र च्छेकानुप्रासः' इति साहित्यविद्याधरी। ४ 'अत्र च्छेकानुप्रासोत्प्रेक्षारूपकसंकरः' इति साहित्यविद्याधरी।

दापि तनूमित्यस्य विशेषणत्वेन योजना । 'नास्ति–' इति अस्तिक्षीरादि(वदस्ति)ना समासं विधाय पश्चान्नशब्देन समासः । अमृतादम्, अमृतादामिति 'अदोऽनन्ने' इति विट् ॥

मत्तपः क न तनु क फलं वा यूयमीक्षणपथं व्रजथेति ।
ईदृशं परिणमन्ति पुनर्नः पूर्वपूरुषतपांसि जयन्ति ॥ ९५ ॥

मत्तप इति ॥ तनु अल्पं मम तपः क नु । अदृश्या अपि यूयमीक्षणपथं दृष्टिगोचरं व्रजथेति फलं वा क । अपि त्वसंभावितमेतत् । बहुतपोलभ्यस्य फलस्याल्पेनैव तपसा दुर्लभत्वात् । तर्हीदं फलं कथमित्यत आह—ईदृशं भवद्दर्शनलक्षणं फलं परिणमन्ति जनयन्ति भवद्दर्शनफलरूपेण वा परिणतानि एतदाकारकाणि नोऽस्माकं पूर्वपूरुषाणां पित्रादीनां तपांसि तदुपार्जितानि पुण्यानि पुनः जयन्ति सर्वोत्कर्षेण वर्तन्ते । मत्पूर्वजपुण्यैर्भवद्दर्शनं जातमिति भावः । जयन्ति सर्वोत्कर्षेण वर्तमानानि तपांसि पुनरीदृशं परिणमन्तीति वा । 'ईदृशान्यपि ददन्तीति' क्वचित्पाठः । तत्र फलशब्दस्य विभक्तिविपरिणामेनेदृशान्यपि दुर्लभान्यपि फलानि नोऽस्मभ्यं ददन्ति तानि पूर्वपूरुषतपांसि पुनर्जयन्तीति व्याख्या । 'परिणमन्ति फलं नः' इति केचित् । तत्र ईदृशं भवद्दर्शनलक्षणं फलं परिणमन्तीति व्याख्या । ददन्ति, 'वा नपुंसकस्य' इति शतुर्नुम् । 'अस्मदो द्वयोश्च' इत्येकत्वे 'नः' इति षष्ठीचतुर्थीबहुवचनस्य नसादेशः ॥

प्रत्यतिष्ठिपदिमां खलु देवीं कर्म सर्वसहनव्रतजन्म ।
यूयमप्यहह पूजनमस्या यन्निजैः सृजथ पादपयोजैः ॥ ९६ ॥

प्रतीति ॥ सर्वसहनं व्रतं सर्वभारादिसहनलक्षणो नियमः तस्माज्जन्मोत्पत्तिर्यस्य एवंविधं कर्म व्यापारः सुकृतरूपं कर्तृ इमां भूमिं खलु निश्चयेन देवीं प्रत्यतिष्ठिपत् प्रतिष्ठापयामास । खलु, उत्प्रेक्षायां वा । 'सर्वसहा वसुमती' इत्यभिधानाद्भूमेः सर्वसहत्वम् ततस्तेन सुकृतेन तस्या देवीत्वं कृतमित्यर्थः । तत्र प्रमाणमाह–अहह आश्चर्ये । यत् यूयमपि दिङ्नाथा अपि भूमिमस्पृशन्तोऽपि निजैः स्वीयैः पादपयोजैः चरणकमलैः कृत्वा अस्या भूमेः पूजनं सृजथ कुरुथ । भवन्तो यत्पूजां कुर्वन्ति सा देव्येवेति भवद्भिर्देवीत्वेन प्रतिष्ठापितेयम् । सर्वापराधसहोऽपि देवत्वं लभते पूजां च । पृथिव्यामागमने किं कारणमिति प्रश्नभावः । प्रत्यतिष्ठिपत्, णौ चङि 'तिष्ठतेरित्' इतीकारः ॥

जीवितावधि किमप्यधिकं वा यन्मनीषितमितो नरडिम्भात् ।
तेन वश्चरणमर्चतु सोऽयं ब्रूत वस्तु पुनरस्तु किमीदृक् ॥ ९७ ॥

जीवितेति ॥ जीवितमवधिर्मर्यादा यस्य तत् प्राणपर्यन्तं प्राणेभ्योऽप्यधिकं वा यत्किमपि वस्तु इतो मल्लक्षणात् नरडिम्भान्मनुष्यबालकाद्भवद्भिर्मनीषितमभिलषितम् । सोऽयं नृपालो वो युष्माकं चरणं तेन वस्तुनार्चतु पूजयतु । ईदृग्वस्तु किं पुनः अस्तु ब्रूत । वाक्यार्थः कर्म । बालोऽप्यहं प्राणाधिकमपि दास्यामि, याचने शङ्का न कार्या, ईप्सितं च कथनीयमिति भावः । चरणद्वयपूजने सामर्थ्याभावाच्चरणमित्येकवचनेन विनीतत्वं सूचितम् । अर्चतिर्भ्वादिः ॥

---

१ 'अर्थान्तरन्यासः' इति साहित्यविद्याधरी । २ 'अत्र विपनमतिशयोक्तिश्च' इति साहित्यविद्याधरी । ३ 'अत्रोत्प्रेक्षा रूपकं च' इति साहित्यविद्याधरी । ४ 'अत्र च्छेकानुप्रासो हेतुः' इति साहित्यविद्याधरी ।

एवमुक्तवति वीतविशङ्के वीरसेनतनये विनयेन।
वक्रभावविषमामथ शक्रः कार्यकैतवगुरुर्गिरमूचे ॥ ९८ ॥

एवमिति ॥ अथ कार्ये कैतवगुरुः कपटाचार्यो बृहस्पतिर्वा शक्रः नलं प्रति स्वीयानन्यादीनपि प्रति वक्रभावेन वक्रोक्त्या कुटिलाभिप्रायेण च विषमां दुष्टां दुर्बोधां च गिरमूचे। कस्मिन्सति—वीता गता विरुद्धा विविधा शङ्का वा यस्मात् विरुद्धमनेकं वा किं याचयिष्यन्तीति त्यक्तभये वीरसेनतनये नले विनयेन विनीतत्वेन एवं पूर्वोक्तमुक्तवति सतीति ॥

पाणिपीडनमहं दमयन्त्याः कामयेमहि महीमिहिकांशो।
दूत्यमत्र कुरु नः स्मरभीतिं निर्जितस्मर चिरस्य निरस्य ॥ ९९ ॥

पाणीति ॥ हे महीमिहिकांशो मही पृथ्वी तस्यां मिहिकांशुः चन्द्रः नल, सर्वे वयं दमयन्त्याः पाणिपीडनं विवाहः, तल्लक्षणं महमुत्सवं कामयेमहि इच्छामः। कान्त्या वर्धितया च नितरां जितः स्मरो येन तत्संबुद्धिः। चिरस्य चिरकालं स्मराद्भीतिं भयं निरस्य विरहजन्यं दुःखं विहाय अत्र भैमीविवाहोत्सवे विषये नोऽस्माकं दूत्यं कुरु। सा यथास्मान्वृणीते तथा प्रयत्नं कुर्वित्यर्थः। जितस्मरत्वात्तव ततो भीतिर्न। अतिसुन्दरस्य तव देवदूतत्वाद्भैमीं प्रति दूत्यं युक्तं नान्यं प्रति। अथ च स्वीयानपि वयमति—अहं दमयन्त्याः पाणिपीडनं कामये। किंभूतम्—मह उत्सवोऽस्त्यस्मिन्निति महि। नोऽस्माकं चतुर्णां मध्ये मम दूत्यं कुरु न त्वेषाम्। त्वं स्मरभीतिं निरस्य त्यज्य यस्मान्निर्जितस्मर। निरस्य, अस्यतेर्लोडन्तम्। दूत्यं कुरु, चिरस्य विलम्बमिति यावत्, निरस्य त्यजेति वा। दूत्ये विलम्बो न कार्य इत्यर्थः। भीतिं स्मर जानीहि दूत्याकरणे विलम्बे वा मत्तः शापादिर्भीतिः स्मरणीया। भीतिम्, कर्मत्वविवक्षया षष्ठ्यभावः। 'नः' पक्षे 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम् ॥

अस्मिन्विषये राजान्तरं याच्यतां, न त्वहमित्याशङ्क्याह—

आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः।
किं ग्रहा दिवि न जाग्रति ते ते भास्करस्य कतमस्तुलयास्ते ॥ १०० ॥

आसत इति ॥ हे नल, अधिक्षिति पृथिव्यां शतं बहुसंख्याका भूपाः राजान आसते तिष्ठन्ति। परं भूपत्वे तुल्येऽपि स्वनैर्दार्यादिगुणबाहुल्यान्महाशयत्वात्तोयराशिः समुद्रोऽसि। ते भूपाः खलु निश्चितं कूपा अगाधतामावात्। समुद्रापेक्षया कूपा यथा हीनाः, तथा त्वदपेक्षयान्ये राजान इति। तस्मात्त्वं याचित इति भावः। आधिक्यमेव समर्थयते—किंच सर्वे तेऽनेकसंख्याकाः प्रसिद्धाश्चन्द्रादयो ग्रहा न जाग्रति स्फुरन्ति किम्, अपि तु प्रकाशन्त एव। परं महत्वे सत्यपि भास्करस्य तुलया साम्येन कतमो ग्रहः पुनरास्ते, अपि तु सूर्यसदृशो ग्रहमध्ये कोऽपि नास्ति तथा त्वत्सदृशोऽन्यो भूपो न विद्यते, अतस्त्वमेव याच्यस इत्यर्थः। 'भास्करस्य कतमस्तु तुलास्ते' इति पाठे भास्करस्य तुलः समानः कतम आस्ते, अपि तु न कोऽपि। अधिक्षिति, सप्तम्यर्थेऽव्ययीभावः ॥

---

१ अत्र 'साहित्यविद्याधरी' [illegible] । २ [illegible] साहित्यविद्याधरी। ३ [illegible] । ४ [illegible] साहित्यविद्याधरी।

दापि तनूमित्यस्य विशेषणत्वेन योजना। 'नास्ति-' इति अस्तिक्षीरादि(वदस्ति)ना समासं विधाय पश्चान्नशब्देन समासः। अमृतादम्, अमृतादामिति 'अदोऽनन्ने' इति विट्॥

मत्तपः क न तनु क फलं वा यूयमीक्षणपथं व्रजथेति।
ईदृशं परिणमन्ति पुनर्नः पूर्वपूरुषतपांसि जयन्ति॥ ९५॥

मत्तप इति॥ तनु अल्पं मम तपः क नु। अदृश्या अपि यूयनीक्षणपथं दृष्टिगोचरं व्रजथेति फलं वा क। अपि त्वसंभावितमेतत्। बहुतपोलभ्यस्य फलस्याल्पेनैव तपसा दुर्लभत्वात्। तर्हीदं फलं कथमित्यत आह—ईदृशं भवद्दर्शनलक्षणं फलं परिणमन्ति जनयन्ति भवद्दर्शनफलरूपेण वा परिणतानि एतदाकारकाणि नोऽस्माकं पूर्वपूरुषाणां पित्रादीनां तपांसि तदुपार्जितानि पुण्यानि पुनः जयन्ति सर्वोत्कर्षेण वर्तन्ते। मत्पूर्वजपुण्यैर्भवद्दर्शनं जातमिति भावः। जयन्ति सर्वोत्कर्षेण वर्तमानानि तपांसि पुनरीदृशं परिणमन्तीति वा। 'ईदृशान्यपि ददन्तीति' क्वचित्पाठः। तत्र फलशब्दस्य विभक्तिविपरिणामेनेदृशान्यपि दुर्लभान्यपि फलानि नोऽस्मभ्यं ददन्ति तानि पूर्वपूरुषतपांसि पुनर्जयन्तीति व्याख्या। 'परिणमन्ति फलं नः' इति केचित्। तत्र ईदृशं भवद्दर्शनलक्षणं फलं परिणमन्तीति व्याख्या। ददन्ति, 'वा नपुंसकस्य' इति शतुर्नुम्। 'अस्मदो द्वयोश्च' इत्येकत्वे 'नः' इति षष्ठीचतुर्थीबहुवचनस्य नसादेशः[1]॥

प्रत्यतिष्ठिपदिमां खलु देवीं कर्म सर्वसहनव्रतजन्म।
यूयमप्यहह पूजनमस्या यन्निजैः सृजथ पादपयोजैः॥ ९६॥

प्रतीति॥ सर्वसहनं व्रतं सर्वभारादिसहनलक्षणो नियमः तस्माज्जन्मोत्पत्तिर्यस्य एवंविधं कर्म व्यापारः सुकृतरूपं कर्तृ इमां भूमिं खलु निश्चयेन देवीं प्रत्यतिष्ठिपत् प्रतिष्ठापयामास। खलु, उत्प्रेक्षायां वा। 'सर्वंसहा वसुमती' इत्यभिधानाद्भूमेः सर्वंसहत्वम् ततस्तेन सुकृतेन तस्या देवीत्वं कृतमित्यर्थः। तत्र प्रमाणमाह-अहह आश्चर्ये। यत् यूयमपि दिङ्नाथा अपि भूमिमस्पृशन्तोऽपि निजैः स्वीयैः पादपयोजैः चरणकमलैः कृत्वा अस्या भूमेः पूजनं सृजथ कुरुथ। भवन्तो यत्पूजां कुर्वन्ति सा देव्येवेति भवद्भिर्देवीत्वेन प्रतिष्ठापितेयम्। सर्वापराधसहोऽपि देवत्वं लभते पूजां च। पृथिव्यामागमने किं कारणमिति प्रश्नभावः। प्रत्यतिष्ठिपत्, णौ चङि 'तिष्ठतेरित्' इतीकारः[2]॥

जीवितावधि किमप्यधिकं वा यन्मनीषितमितो नरडिम्भात्।
तेन वश्चरणमर्चतु सोऽयं ब्रूत वस्तु पुनरस्तु किमीदृक्॥ ९७॥

जीवितेति॥ जीवितमवधिर्मर्यादा यस्य तत् प्राणपर्यन्तं प्राणेभ्योऽप्यधिकं वा यत्किमपि वस्तु इतो मल्लक्षणात् नरडिम्भान्मनुष्यबालकाद्भवद्भिर्मनीषितमभिलषितम्। सोऽयं नृपालो वो युष्माकं चरणं तेन वस्तुनार्चतु पूजयतु। ईदृग्वस्तु किं पुनः अस्तु ब्रूत। वाक्यार्थः कर्म। बालोऽप्यहं प्राणाधिकमपि दास्यामि, याचने शङ्का न कार्या, ईप्सितं च कथनीयमिति भावः। चरणद्वयपूजने सामर्थ्याभावाच्चरणमित्येकवचनेन विनीतत्वं सूचितम्। अर्चतिर्भ्वादिः[4]॥

---

१ 'अर्थान्तरन्यासः' इति साहित्यविद्याधरी। २ 'अत्र विषममतिशयोक्तिश्च' इति साहित्यविद्याधरी। ३ 'अत्रोत्प्रेक्षा रूपकं च' इति साहित्यविद्याधरी। ४ 'अत्र च्छेकानुप्रासो हेतुः' इति साहित्यविद्याधरी।

एवमुक्तवति वीतविशङ्के वीरसेनतनये विनयेन।
वक्रभावविषमामथ शक्रः कार्यकैतवगुरुर्गिरमूचे ॥ ९८॥

एवमिति॥ अथ कार्ये कैतवगुरुः कपटाचार्यो बृहस्पतिर्वा शक्रः नलं प्रति स्वीयानन-लादीनपि प्रति वक्रभावेन वक्रोक्त्या कुटिलाभिप्रायेण च विषमां दुष्टां दुर्बोधां च गिरमूचे। कस्मिन्सति—वीता गता विरुद्धा विविधा शङ्का वा यस्मात् विरुद्धमनेकं वा किं याचयिष्य-न्तीति त्यक्तभये वीरसेनतनये नले विनयेन विनीतत्वेन एवं पूर्वोक्तमुक्तवति सति ॥

पाणिपीडनमहं दमयन्त्याः कामयेमहि महीमिहिकांशो।
दूत्यमत्र कुरु नः स्मरभीतिं निर्जितस्मर चिरस्य निरस्य ॥ ९९॥

पाणीति॥ हे महीमिहिकांशो मही पृथ्वी तस्यां मिहिकांशुः चन्द्रः नल, सर्वे वयं दमय-न्त्याः पाणिपीडनं विवाहः, तल्लक्षणं महमुत्सवं कामयेमहि इच्छामः। कान्त्या वशितया च नितरां जितः स्मरो येन तत्संबुद्धिः। चिरस्य चिरकालं स्मराद्भीतिं भयं निरस्य विरहजन्यं दुःखं विहाय अत्र भैमीविवाहोत्सवे विषये नोऽस्माकं दूत्यं कुरु। सा यथास्मान्वृणीते तथा प्रयत्नं कुर्वित्यर्थः। जितस्मरत्वात्तव ततो भीतिर्न। अतिसुन्दरस्य तव देवदूतत्वाद्भैमीं प्रति दूत्यं युक्तं नान्यं प्रति। अथ च स्वीयानपि वञ्चयति—अहं दमयन्त्याः पाणिपीडनं कामये। किंभूतम्—मह उत्सवोऽस्त्यस्मिन्निति महि। नोऽस्माकं चतुर्णां मध्ये मम दूत्यं कुरु न त्वेषाम्। त्वं स्मरभीतिं निरस्य त्यज्य यस्मान्निर्जितस्मर। निरस्य, अस्यतेर्लोडन्तम्। दूत्यं कुरु, चिरस्य विलम्बमिति यावत्, निरस्य त्यजेति वा। दूत्ये विलम्बो न कार्य इत्यर्थः। भीतिं स्मर जानीहि दूत्याकरणे विलम्बे वा मत्तः शापादिभीतिः स्मरणीया। भीतिम्, कर्मत्वविवक्षया षष्ठ्यभावः। 'नः' पक्षे 'अस्मदो द्वयोश्च' इत्येकत्वे बहुवचनम् ॥

अस्मिन्विषये राजान्तरं याच्यतां, न त्वहमित्याशङ्क्याह—

आसते शतमधिक्षिति भूपास्तोयराशिरसि ते खलु कूपाः।
किं ग्रहा दिवि न जाग्रति ते ते भास्करस्य कतमस्तुलयास्ते ॥ १००॥

आसत इति॥ हे नल, अधिक्षिति पृथिव्यां शतं बहुसंख्याका भूपाः राजान आसते तिष्ठन्ति। परं भूपत्वे तुल्येऽपि त्वमौदार्यादिगुणबाहुल्यान्महाशयत्वात्तोयराशिः समुद्रोऽसि। ते भूपाः खलु निश्चितं कूपा अगाधताभावात्। समुद्रापेक्षया कूपा यथा हीनाः, तथा त्वदपे-क्षयान्ये राजान इति। तस्मान्न याचिता इति भावः। आधिक्यमेव समर्थयते—दिवि स्वर्गे तेऽनेकसंख्याकाः प्रसिद्धाश्चन्द्रादयो ग्रहा न जाग्रति स्फुरन्ति किम्, अपि तु प्रकाशन्त एव। परं ग्रहत्वे सत्यपि भास्करस्य तुलया साम्येन कतमो ग्रहः पुनरास्ते, अपितु सूर्यसदृशो ग्रह-मध्ये कोऽपि नास्ति तथा त्वत्सदृशोऽन्यो भूपो न विद्यते, अतस्त्वमेव याच्यस इत्यर्थः। 'भास्करस्य कतमस्तु तुलास्ते' इति पाठे भास्करस्य तुल्यः समानः कतम आस्ते, अपि तु न कोऽपि। अधिक्षिति, सप्तम्यर्थेऽव्ययीभावः ॥

---

१ अत्र साहित्यविद्याधरी महत्यपुस्तके त्रुटितास्ति। २ 'अत्र छेकानुप्रासो रूपकं च' इति साहित्यविद्याधरी। ३ 'भास्करस्तु' इति पाठो जीवातुसंमतः। ४ 'अत्र रूपकं दृष्टान्तश्च' इति साहित्यविद्याधरी।

विश्वदृश्वनयना वयमेव त्वद्गुणाम्बुधिमगाधमवेमः।
त्वामिहैवमनिवेश्य रहस्ये निर्वृतिं नहि लभेमहि सर्वे ॥ १०१ ॥

विश्वेति ॥ विश्वं पश्यन्ति विश्वदृश्वानि सर्वसाक्षीणि नयनानि येषामेवंभूता यतस्तस्माद्वयमेवागाधं गम्भीरं त्वद्गुणाम्बुधिं त्वद्गुणसमुद्रमवेमो जानीमः। त्वद्गुणसमुद्रं ज्ञातुं नान्यस्य सामर्थ्यं विश्वदृश्वनयनत्वाभावादित्यर्थः। सर्वे वयमिह भैमीपाणिग्रहणलक्षणे रहस्ये गोप्येऽर्थे एवं दूतत्वप्रकारेण त्वामनिवेश्य दूतत्वमप्राप्य निर्वृतिं परमं सुखं नहि नैव लभेमहि प्राप्नुमः। 'इहैकम्' इति पाठे एकं त्वामनिवेश्यानियुज्येत्यर्थः। त्वत्सदृशोऽन्यो नास्ति, इत्यतो दूत्ये नियो(यु)ज्यसे, न करिष्यसि चेच्छापं दास्याम इति भावः। अयमेव वक्रभावः। वयमपि गुणसमुद्रमगाधमेव जानीमः, अत एव गाहितुमसमर्था इति भावः। सर्वदर्शिभिरस्माभिस्त्वद्गुणसमुद्रो न दृष्ट इति वा। सर्वे इति पूर्वश्लोके कृतामपि सहचरवञ्चनां गोपायति। दृश इति दृशेः क्वनिप् ॥

शुद्धवंशजनितोऽपि गुणस्य स्थानतामनुभवन्नपि शक्रः।
क्षिप्नुरेनमृजुमाशु सपक्षं सायकं धनुरिवाजनि वक्रः ॥ १०२ ॥

शुद्धेति ॥ शक्रो धनुरिव वक्रोऽजनि क्रूरः कुटिलश्च जातः। किंभूतः शक्रो धनुश्च—शुद्धवंशजनितोऽपि विशिष्टकश्यपकुलोत्पन्नोऽपि दृढवेणुजनितोऽपि च गुणस्य विवेकवीर्यौदार्यादेः मौर्व्याश्च स्थानतामाश्रयतामनुभवञ्श्रयन्नपि आश्रयो भवन्नपि। ऋजुं शुद्धाशयमवक्रं च सपक्षं लोकपालांशसंभूतत्वात्, यज्ञे हविर्दानाद्वा सपक्षं मित्रं भैमीप्राप्तिरूपसमानसाध्यत्वादपि मित्रं पक्षसहितं च सायकमिव एनं नलं क्षिप्नुः प्रेरयितुकामः प्रतारयितुकामः त्यक्तुकामश्च। उत्तमवंशजस्य गुणाश्रयस्य च वक्रत्वे विरुद्धमित्यपिशब्दौ विरोधद्योतकौ। 'अथास्त्रियाम्। धनुश्चापौ' इत्यमरोक्तेर्धनुःशब्दः पुंलिङ्गोऽपि। क्षिप्नुः 'त्रसिगृधि–' इति क्नुः तद्योगे 'न लोका–' इति न षष्ठी ॥

तेन तेन वचसैव मघोनः स स्म वेद कपटं पटुरुच्चैः।
आचरत्तदुचितामथ वाणीमार्जवं हि कुटिलेषु न नीतिः ॥ १०३ ॥

तेनेति ॥ उच्चैरतितरां पटुः प्राज्ञः श्लेषवक्रोक्त्यादिचतुरः स नलो मघोन इन्द्रस्य तेन तेन 'पाणिपीडनमहं–' 'वामिहैकमनिवेश्य' इत्यादिवचसैव कपटं वेद स्म जानाति स्म। अथ तदुचितां कपटयोग्यां वाचमाचरदूचे। इन्द्रेण तथोक्तेऽपि नलः कथमुक्तवानित्यत आह—हि यस्मात्कुटिलेषु पुरुषेषु आर्जवमकापट्यं नीतिर्न भवति, किं तु कपटिषु कपटिनैव भवितव्यमिति न्यायः। 'व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः' इति भारव्युक्तेः नलेनापि कपटित्वमङ्गीकृतं युक्तमित्यर्थः ॥

सेयमुच्चतरता दुरितानामन्यजन्मनि मयैव कृतानाम्।
युष्मदीयमपि या महिमानं जेतुमिच्छति कथापथपारम् ॥ १०४ ॥

---

१ 'अत्र छेकानुप्रासो रूपकं च' इति साहित्यविद्याधरी। २ 'अत्रोपमा' इति साहित्यविद्याधरी। 'अत्र प्रकृताप्रकृतश्लेषः। स चोपमया संकीर्यते' इति जीवातुः। ३ 'अत्रार्थान्तरन्यासः' इति साहित्यविद्याधरी।

सेयमिति ॥ हे देवाः, सेयमन्यजन्मनि जन्मान्तरे मयैव कृतानां 'न तु पूर्वजैः' दुरितानामनुचततरता अतितरां श्रेष्ठता । सा का—या कथापथस्य कथनमार्गस्य पारं परतीरं कथापथं पारयति समाप्तिं नयति वागगोचरं युष्मदीयं यौष्माकीणमपि महिमानं माहात्म्यं जेतुनतिक्रमयितुमिच्छति । अनिलघ्यति आज्ञारूपं माहात्म्यं अकरणेन विरुद्धभाषणेन च विनाशयितुं वाञ्छति । भवदाज्ञाऽकरणीया दूषणीया चेति बुद्धिरस्यमेलर्थः । भवदाज्ञा दुष्कृतेन विना कर्तुं न शक्यते, तत्तु मम न विद्यत इति भावः । अथ च महो उत्सववान्यः स चासौ मानोऽहङ्कारश्च मैनी प्राप्तहङ्कारं पराभवितुं या वाञ्छति सेयं मयैवान्यजन्मनि कृतानां दुरितानामशुभकर्मणामनुचततरता सामर्थ्यातिशयः । भवदहङ्कारखण्डने शक्तोऽस्मि तस्माद्भीत्या न कार्या इतीन्द्रकपटोचितो विवक्षितोऽर्थः ॥

वित्थ चित्तमखिलस्य न कुर्यां धुर्यकार्यपरिपन्थि तु मौनम् ।
ह्रीगिरास्तु वरमस्तु पुनर्मा स्वीकृतैव परवागपरास्ता ॥ १०५ ॥

वित्थेति ॥ यूयं यदपि विश्वसाक्षित्वादखिलस्य सर्वस्य चित्तं वित्थ जानीथ मयैतन्न क्रियत इति, तथापि धुर्याणां श्रेष्ठानां कार्यपरिपन्थि कार्यप्रतिकूलं मैत्रीप्रातिलक्षणप्रधानकार्यविरोधि वा मौनं तु पुनः न कुर्याम् ज्ञातेऽपि ममाभिप्राये मौनं युक्तं न । तदेवाह—न करोमीति निष्ठुरवचनभाषणरूपा ह्रीर्लज्जा वरं मनागस्तु वरम् । मौनित्वादपरास्ताऽनिराकृता परस्य वाक् 'अप्रतिषिद्धमनुमतं भवति' इति न्यायात् स्वीकृतैव पुनर्मा भूत् । तस्माद्भवद्भिर्ज्ञातेऽपि मया स्पष्टः प्रतिषेधः क्रियत इति भावः । 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि' इति च्छन्दस्येव निपातितः, तथापि महाकविप्रयोगाद्भाषायामपि साधुः । 'प्रत्यर्थिपरिपन्थिनः' इत्यमरः । 'अनुपस्थितपरिपन्थिभिः' इत्युदयनाचार्यः । यद्वा परितः पन्थानमाप्नोति कार्यं तच्छीलः परिपन्थी इति मिश्रा समर्थयन्ति । सरे विशेषनिषातैरेदर्थे न शक्यम् । 'वित्त' इति पाठे लोट् ॥

यन्मतौ विमलदर्पणिकायां संमुखस्थमखिलं खलु तत्त्वम् ।
तेऽपि किं वितरथेदृशमाशां या न यस्य सदृशी वितरीतुम् ॥ १०६ ॥

यदिति ॥ येषां युष्माकं मतौ बुद्धावेव विमलायां निर्मलायां दर्पणिकायां खलु निश्चितमखिलं तत्त्वं यथार्थं करणीयाकरणीयं वस्तु संमुखस्थं प्रत्यक्षं स्फुटरूपम्, तेऽपि ईदृशा अपि यूयं ईदृशामेवंविधां तामाशां तस्मै मह्यं किं वितरथ दत्थ । तां काम्—याशा यस्य यस्मै वितरीतुं दातुं सदृशी युक्ता न । यो मैन्याः कामुकोऽतिसुन्दरश्च तस्मै मैन्याः दूत्यं कुर्विति दातुं नैव युक्तेति भावः ॥

यान्ति यान्तिह वरीतुमहो तद्दूततां नु करवाणि कथं वः ।
ईदृशां न महतां बत जाता वञ्चने मम तृषापि मृषापि ॥ १०७ ॥

यान्तीति ॥ इह [illegible] यां वरीतुमहं [illegible] । [illegible]
[illegible] । यो युष्मत्सदृश [illegible] पुनः [illegible], [illegible] कुर्याम् ।
[illegible]
[illegible] ।

१०५ [illegible] इति साहित्यविद्याधरी । १०६ [illegible] इति साहित्यविद्याधरी ।

महद्भिर्महानेव प्रतारयितुं युक्तो, न लघीयान्, तस्यायोग्यत्वादित्यपिशब्दार्थः। कपटोक्तिश्च—महतामन्येषां सत्पुरुषाणां जातौ समाजे ईदृशां परप्रतारकाणां भवतामञ्चने पूजने विषये तृणस्याल्पस्य ममापि घृणा न, अपि लज्जैव। किमुत महतामित्यर्थः। अथ च ईदृशां वञ्चकानां नमहताम्, नसमासेन असाधूनां तृणस्यापि जातौ पूजने तृणजातीयमध्येऽपि, पूजने मम घृणा भवति भवद्भ्योऽपि तृणजातिरेव श्रेयसी इति मम प्रतिभाति इति भावः॥

उद्भ्रमामि विरहात्खलु यस्या मोहमेमि च मुहूर्तमहं यः।
ब्रूत वः प्रभवितास्मि रहस्यं रक्षितुं स कथमीदृगवस्थः॥ १०८॥

उद्भ्रमामीति॥ योऽहं अस्या भैम्या विरहान्मुहुः पुनरुद्भ्रमाम्युन्मादयुक्तो भवामि, पुनः मुहूर्तं क्षणमात्रं मोहं मूर्च्छां च एमि प्राप्नोमि। अन्याः सप्तावस्था मयानुभूताः अधुना मूर्च्छोन्मादलक्षणे अवस्थे अनुभूयेते इत्यर्थः। ईदृगवस्थाद्वययुक्तः सोऽहं वो युष्माकं रहस्यं रक्षितुं गोपायितुमन्तःकरणेऽवधारयितुं कथं प्रभवितास्मि शक्तो भवितास्मि ब्रूत कथयत, अपितु न कथंचिदित्यर्थः। वाक्यार्थः कर्म। भ्रान्तो रहस्यं गोपायितुं समर्थो न भवति, सर्वस्याग्रे कथयति। योऽपि मूर्च्छालो मूर्खश्च स मनसि रहस्यं धारयितुं न शक्नोति किंतु विस्मरत्येवेति दूत्ययोग्यो न भवामीति भावः॥

यां मनोरथमयीं हृदि कृत्वा यः श्वसिम्यथ कथं स तदग्रे।
भावगुप्तिमविलम्बितुमीशे दुर्जया हि विषया विदुषापि॥ १०९॥

यामिति॥ योऽहं मनोरथमयीं संकल्परूपां यां भैमीं हृदि कृत्वा श्वसिमि जीवामि सोऽहं दूत्याङ्गीकारादथानन्तरं तदग्रे तस्याः पुरः भावानां स्वेदस्तम्भादिसात्त्विकानां गुप्तिं गोपनमवलम्बितुं कर्तुं ईशे शक्तोऽस्मि, अपि तु न कथंचित्। हि यस्माद्विदुषापि पण्डितेनापि विषया रूपादयो दुर्जया जेतुमशक्याः। अलीकाया अपि यस्याश्चिन्तनेन जीवामि तस्य मम तस्याः सत्यायाः साक्षात्कारे सात्त्विकभावाः स्फुटमुत्पद्येरन्, ततः कुतो युष्मद्दूत्यचिन्ता, इत्यतोपीयमाज्ञा ममानुचिता इति भावः। 'स्वपिमि' इति पाठे निद्रां करोमि॥

यामिकाननुपमृद्य च मादृक् तां निरीक्षितुमपि क्षमते कः।
रक्षिलक्षजयचण्डचरित्रे पुंसि विश्वसिति कुत्र कुमारी॥ ११०॥

यामिकानिति॥ च अपरं मादृक् कः पुरुषोऽतिसुन्दरो यामिकान्प्रहरजागरूकाननुपमृद्यानिष्पीड्याविनाश्य अन्तःपुरस्थां तां भैमीं निरीक्षितुमपि क्षमते शक्नोति। न कोऽपीत्यर्थः। वक्तुं तु दूरत इत्यपिशब्दार्थः। सुन्दरस्य यामिकमर्दनेन विनाऽन्तःप्रवेशो न घटत इत्यर्थः। तर्हि शूरेण त्वया तेऽपि मर्दनीया इत्यत आह—रक्षिणां लक्षं तस्य जयेन चण्डं दारुणं चरित्रं यस्यैवंभूते पुंसि पुरुषे कुमारी बाला मृद्वङ्गी कोमलहृदया च कुत्र कुतोऽपि विश्वसिति विश्वासं प्राप्नोति, अपितु न कुतोऽपि। एवंविधं चण्डमाकर्ण्य बाला पलायिष्यत एवेत्यतोऽपि मम दूत्यमयुक्तमिति भावः। एवंविधे कुत्र पुंसीति वा। रक्षणार्थं यामोऽस्यास्तीति यामिकः। अस्त्यर्थे ठन्, कालवाचित्वाद्भवार्थे ठञ्॥

---

१ 'अत्र च्छेकानुमासविरोधरूपकसंकरः' इति साहित्यविद्याधरी। २ 'अत्र काव्यलिङ्गम्' इति साहित्यविद्याधरी। ३ 'अत्रार्थान्तरन्यासः' इति साहित्यविद्याधरी। ४ 'अत्र काव्यलिङ्गम्' इति साहित्यविद्याधरी।

आदधीचि किल दातृकृतार्घं प्राणमात्रपणलीमं यशो यत् ।
आददे कथमहं प्रियया तत् प्राणतः शतगुणेन पणेन ॥ १११ ॥

आदधीचीति ॥ प्राणमात्रं जीवितमेव पणलीमा मूल्यावधिर्यस्यैवंविधं यद्यशः आदधीचि दधीचिनामकवदान्यपर्यन्तं दातृभिर्वदान्यैः कृतोऽर्घो मूल्यं यस्य किल श्रूयते यशः प्राणेभ्योऽप्यधिकं मूल्यं नार्हति । यशोऽर्थं दधीच्यादिभिः प्राणा एव दत्ताः, न तदधिकं किंचित् । अहं तद् यशः प्राणतः प्राणेभ्यः शतगुणेन अतितरामधिकेन प्रियया भैमीलक्षणेन पणेन मूल्येन कथमाददेऽङ्गीकुर्याम्, अपि तु न कथंचित् । यदल्पेन मूल्येन लभ्यते तद्बहुना केनापि न गृह्यते, अतो यशोवाञ्छयापि जीवादधिकत्यादेयत्वाद्भवतां भैमीप्राप्त्यर्थं मया यत्नो न क्रियत एवेति भावः । अतिथीभूय त्वया ब्राह्मणस्य दधीचेरपि प्राणा गृहीताः, किं पुनः क्षत्रियस्य ममेति भावः ॥

अर्थना मयि भवद्भिरिवास्यै कर्तुमर्हति मयापि भवत्सु ।
भीमजार्थपरयाचनचाटौ यूयमेव गुरवः करणीयाः ॥ ११२ ॥

अर्थनेति ॥ मयापि भवत्सु अस्यै भैम्यर्थमर्थना याञ्चा कर्तुमर्हति उचिता । कैः कलिमिव—भवद्भिर्मयीव । यथा भवद्भिर्मयि याञ्चा क्रियते तथा मयापि भवत्सु । यथा सा मां वरिष्यति तथा भवद्भिरपि कर्तव्यमिति भवन्तो याच्यन्त इत्यर्थः । क्षत्रियस्य दातृत्वमेव युक्तम्, न तु याचकत्वमित्यत आह—भीमजायो योऽर्थः प्रयोजनं तत्र परं तत्परं याचनचाटु प्रार्थनप्रियवचनं तस्मिन्यूयमेव गुरव उपदेष्टारः करणीयाः । दिक्पाला अपि याचन्ते चेत्तर्हि मादृशां का कथा । भवतां चेदेतद्युक्तं तर्हि ममापि युक्तमेव । गुरूपदिष्टमेव शिष्यः करोति । 'याचनवाचे' इति पाठे प्रार्थनवचनाय । अर्थनाशब्दस्य भाववचनत्वात्, मयेत्यस्यानुक्ते कर्तरि तृतीया 'न लोका–' इति षष्ठीनिषेधात् । एवं भवद्भिरित्यत्रापि कर्तुमित्यर्हतावुपपदे 'शकधृष–' इति तुमुन् । याचनचाटौ भाषितपुंस्कत्वम् ॥

अर्थिताः प्रथमतो दमयन्तीं यूयमन्वहमुपास्य मया यत् ।
ह्रीर्न चेद्व्यतियतामपि तद्वः सा ममापि सुतरां न तदस्तु ॥ ११३ ॥

अर्थिता इति ॥ मया यूयम् अन्वहं प्रतिदिनमुपास्य पूजां विधाय प्रथमत आदावेव दमयन्तीम् अर्थिता याचिताः तद्भैमीयाचनं व्यतियतामतिक्रमतामपि मां प्रति याचने भैमीयाचनव्यत्ययं कुर्वतां वो युष्माकं ह्रीश्चेद् नास्ति तर्हि सा लज्जा ममापि सुतरां मास्तु मा भूत् । अतो ममापि भवन्तो भैमीं याचितुं योग्याः । 'यत्रोभयोः समो दोषः परिहारोऽपि वा समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥' इति न्यायात् । 'अप्रधाने दुहादीनाम्–'

---

१ 'अत्र रूपकं नियमं च' इति साहित्यविद्याधरी । अत्र परिवृत्तिरलंकारः 'समन्यूनाधिकानां च यथा विनिमयो भवेत् । तादृक् समाधिकन्यूनैः परिवृत्तिरसौ मता ॥' इति लक्षणात् इति जीवातुः । २ 'कर्तुमित्यनेन योग्यतेति भावः । अर्हधातोः प्रशंसायामेव 'इत्यादौ वर्तते वा' इति षष्ठीनिषेधात् तृतीयेति जीवातौ' अर्थना मयेत्यर्थना कर्तुमर्हति भवद्भिः' इति ग्रन्थेन व्याख्यातम् इति । अस्मै इत्यस्य इमां प्राकृतत्वेन मया इमां याचनेन इत्यन्वयविवक्षायाम् 'देवे विमतः' इति कृत्यादिषु पदे । ३ 'अर्थिता' इति साहित्यविद्याधरी ।

लोपयतीत्यर्थः । अथ च, इदं रोहिणी गौस्तस्या रमणो बलीवर्दः, तत्कुलोत्पन्नेन बलीवर्दे-
न सदा भोक्तव्यम् । यो दुग्धं न करोति स गोसदृशो मूर्खः पशुश्च, तमपि ताडय इत्यर्थः ।
बलीवर्दोऽपि जिह्वया नासिकस्य तृणादेर्भक्षणाय लभते, एवं तव जिह्वा याच्यामि लभते तस्मा-
दनापि बलीवर्दोऽसीत्युपहासः । वानरस्य भावो वान्यं, ष्यञ् । पक्षे वमनं वलिवैलिरेव वान्यं,
तदुपेक्ष्योऽसीत्यर्थः ॥

भङ्गुरं न वितथं न कथं वा जीवलोकमवलोकयसीमम् ।
येन धर्मयशसी परिहातुं धीरहो चलति धीर तवापि ॥ ११८ ॥

भङ्गुरमिति ॥ हे धीर, त्वम् इमं जीवलोकं प्राणिवर्गं भङ्गुरं क्षणेन नश्वरं कथं न
अवलोकयसि बुध्यसे । वितथमलीकं वा कथं न बुध्यसे, अपि तु सदा एवं ज्ञेयम् । नहि
जानासि तत आह—येन(न)श्वरत्वलक्षणेन कारणेन धार्मिकस्यातिधीरस्यापि तव धीर्बुद्धिः
भङ्गुरविषये अपि धर्मयशसी पुण्यकीर्ती परिहातुं चलति चला भवति । [illegible]
इत्यर्थः । अहो इत्याश्चर्ये । नश्वरलोकस्यानित्यत्वेऽपि जीवलोके धर्मयशसी त्वया न हातव्ये
इत्यर्थः ॥

कः कुलेऽजनि जगन्मुकुटे वः प्रार्थकेप्सितमपूरि न येन ।
इन्दुरादिरजनिष्ट कलङ्की कष्टमत्र स भवानपि मा भूत् ॥ ११९ ॥

क इति ॥ येन प्रार्थकेप्सितं याचकाभिलषितं नापूरि न पूरितमेतादृक् कः पुरुषो जग-
न्मुकुटे लोकालंकारभूते वः कुलेऽजनि प्रसूतः, अपि तु न कोऽपि । अत्र कुले आदिर्वंशा-
दिरिन्दुः कलङ्की अजनिष्ट जातः । कष्टं स प्रसिद्धो भवानपि कलङ्की मा भूत् । अर्थ्युपेक्षणात्त्वं
कलङ्की भविष्यसि तत्कथं पावनेऽपि कुले नाभिप्रेतं स्यादित्युपहासः । तस्माद्यथा कुलस्य
कलङ्को न भवति तथा कार्यमिति भावः ॥

इदं यावन्ति कुलं कलङ्कितमित्युक्तम्, इदानीं तदेवाह—

याचदृष्टिरपि या मुखमुद्रा याचमानमनु या च न तुष्टिः ।
त्यागशास्य सकलः स कलङ्कः शीतभासि शशकः परमङ्कः ॥ १२० ॥

याचेति ॥ याचकानां यावदन्तु यत्किञ्चिद्वा अदृष्टिरनादरदर्शनम्, अदर्शनं वा या
च मुखमुद्रा मौनं या च न तुष्टिरसंतोषः स सकलः समस्तोऽपि त्यागिनः कलङ्कः, शीतस्य च
शशोऽङ्कः । शीतभासि चन्द्रे परं केवलं शशकोऽङ्कश्चिह्नम् । चन्द्रे कलङ्को न, किं तु
चिह्नं शशः । कलङ्करहितस्य तथा च कर्तव्यमिति भावः । तथाच, 'अङ्को' इति ब्रूते ॥

नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि ।
इत्थमर्थिचयसंशयदोलाखेलनं खलु चकार नकारः ॥ १२१ ॥

---

१ [illegible] इति पाठः [illegible] । २ [illegible]
[illegible] । ३ [illegible] इति पाठः [illegible] । [illegible]
[illegible]
[illegible]

नाक्षराणीति ॥ हे नल, अक्षराणि बाल्ये मातृकां पठता त्वया नकारः 'न' इत्ययं शब्दो नापाठि किं नाधीतः किम्। अथवा पठितोऽपि नकारः प्रस्मृतो विस्मृतः किम्। नकार इत्थमेवम् अर्थिचयस्य याचकसमूहस्य संशय एव दोला द्विकोट्यवलम्बना तस्यां खेलनं क्रीडनं चकार। खलूत्प्रेक्षायां, निश्चये वा। त्वया पूर्वं याचकाभिलापे नेति कदापि नोक्तमद्यापि न वक्तव्यमिति भावः ॥

अब्रवीत्तमनलः क नलेदं लब्धमुज्झसि यशः शशिकल्पम्।
कल्पवृक्षपतिमर्थिनमित्थं नाप कोऽपि शतमन्युमिहान्यः ॥ १२२ ॥

अब्रवीदिति ॥ अनलोऽग्निस्तं नलमब्रवीत्—हे नल, त्वं शशिकल्पं चन्द्रप्रभमिदमेवंविधं लब्धं करस्थितं यशः क हेतोरुज्झसि त्यजसि। इदं किम्—'इह भूलोके अन्यो नलादन्यः कोऽपि कल्पवृक्षस्य पतिं शतमन्युं शतक्रतुमित्थं पूर्वोक्तप्रकारेण अर्थिनं याचकं नाप न प्राप्तवान्। सर्वाभिलापकरः कल्पवृक्षोऽपि यद्वश(ग):, यश्च शतयज्ञकारी, तमिन्द्रं याचकं नल एव प्राप्तवान्नान्य इति यशो न त्याज्यम्' इति कल्पवृक्षोऽपि यन्मनोरथं पूर्णं कर्तुं न समर्थोऽभूत्, त्वं तु समर्थः। शतमन्युरिति पात्रत्वं सूचितम् ॥

न व्यहन्यत कदापि मुदं यः स्वःसदामुपनयन्नभिलापः।
तत्पदे त्वदभिषेककृतां नः स त्यजत्वसमतामदमद्य ॥ १२३ ॥

नेति ॥ अभीष्टसाधनात्स्वःसदां देवानां मुदं हर्षमुपनयन्नानयन् योऽभिलापः कदापि केनापि न व्यहन्यत व्यर्थीकृतः। तत्पदे अभिलापस्थाने त्वदभिषेकं तवाभिषेकं स्वाभीष्टसाधनाय कृतां कुर्वतां नोऽस्माकं सोऽभिलापो मादृशः कामपूरणसमर्थोऽन्यो न विद्यत इत्यसमतामदं असाम्यविषयगर्वम् अद्य त्यजतु। कामपूरणे त्वमेव समर्थ इत्यर्थः। व्यहन्यत, कर्मणि तङ् कर्मकर्तरि वा ॥

अब्रवीदथ यमस्तमहृष्टं वीरसेनकुलदीप तमस्त्वाम्।
यत्किमप्यभिबुभूषति तत्किं चन्द्रवंशवसतेः सदृशं ते ॥ १२४ ॥

अब्रवीदिति ॥ अथ यमो भैमीप्राप्तिविघ्नसंभावनयाऽहृष्टं दुःखितं तं नलमब्रवीत्—'हे वीरसेनकुलस्य दीप प्रकाशक नल, तमो भैम्यप्राप्त्य(प्ति)संभावनजन्यं दुःखं यत् त्वां किमपि अल्पमनिर्वाच्यं वाभिबुभूषत्यभिभवितुमिच्छति तत् चन्द्रवंशवसतेश्चन्द्रवंशोत्पन्नस्य ते तव किं सदृशमुचितम्, अपि त्वयुक्तम्। चन्द्रवंशोत्पन्नो हि प्राणानपि ददाति, तदुत्पन्नेन त्वयापि तथैव भवितव्यं, न त्वन्यथेति भावः। अथ च दीपरूपं त्वां यदन्धकारमभिबुभूषति तच्चन्द्रवंशवसतेस्ते किमुचितम्, अपि त्वनुचितम्। दीपस्य तमसाभिभवो न युक्तः, तत्रापि चन्द्रवंश-

---

१ 'अत्र संदेहो रूपकं च' इति साहित्यविद्याधरी। 'अत्रार्थिनांमीदृक्संशयासंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिः। सा चोक्तसंशयोत्थापिता इति संकरः' इति जीवातुः। २ 'अत्र च्छेकानुप्रासोपमाकाव्यलिङ्गम्' इति साहित्यविद्याधरी। ३ 'पदे स्थाने तस्य कल्पवृक्षस्य...अभिषेकम्' इति साहित्यविद्याधरी। संगतस्तु 'तदभिषेककृताम्' इति पाठः प्रतिभाति। 'पूर्वमस्माकमभिलाप एवाभीष्टपूरकोऽभूत्, अधुना तस्य स्थाने त्वमारोपितोऽसीत्यर्थः' इति सुखावबोधा। ४ 'अत्र व्यतिरेकः काव्यलिङ्गं च' इति साहित्यविद्याधरी।

वसतेः चन्द्रस्यान्धकारेणाभिभवो न युक्तः, अतस्त्वद्वंशोत्पन्नस्य तवापि तस्मात्पराभवो न युक्त इत्युपहासः ॥

रोहणः किमपि यः कठिनानां कामधेनुरपि या पशुरेव।
नैनयोरपि वृथाभवदर्थी हा विधित्सुरसि वत्स किमेतत् ॥ १२५ ॥

रोहण इति ॥ कठिनानां निष्ठुराणां पाषाणादीनां मध्ये यः किमपि लोकोत्तरो निष्ठुरो रोहणो विदूरोऽद्रिः मेरुः अथ च निष्कृपाणां कृपणानां मध्ये लोकोत्तरः कृपणो यो विदूराचलः, यापि कामधेनुः सापि पशुरेव गौरेव, अज्ञैव च, एनयो रोहणकामधेन्वोरपि संबन्धी अर्थी याचको वृथा निष्फलो नाभवत्, किं तु सफलो जातः। एनयोर्विषयो वा। हा कष्टं हे वत्स, किमेतत् अर्थिप्रातिकूल्यं विधित्सुर्विधिकीर्षुरसि। अचेतनेषु कृपणावधिः कठिनावधिश्च रोहणः, चेतनेषु पश्ववधिर्मूर्खावधिश्च कामधेनुः, ताभ्यामप्यर्थिनेऽभीष्टं दीयते। त्वं तु मृदुचित्तो बुधोऽपि, ततो देयमेवेति भावः। किमिति सामान्यनिर्देशान्नपुंसकत्वम्। एनयोः, अन्वादेश एनादेशः। रोहणो वैदूर्यः पर्वतो वा ॥

याचितश्चिरयति क नु धीरः प्राणने क्षणमपि प्रतिभूः कः।
शंसति द्विनयनी दृढनिद्रां द्राङ्निमेषमिषघूर्णनपूर्णा ॥ १२६ ॥

याचित इति ॥ धीरो याचितः सन् क नु कुतः चिरयति कालविलम्बं करोति, अपि तु न। कुतः—क्षणमपि मुहूर्तमात्रमपि प्राणने जीवने कः प्रतिभूर्लग्नकः, अपि तु न कोऽपि। अथ च को ब्रह्मा प्रतिभूः विष्णधीनं जगत्। को ब्रह्मा प्रतिभूरिति काकुर्वा। तत्कुतः—द्राग् झटिति निमेषमिषेण नेत्रसंकोचव्याजेन घूर्णनेन तन्द्र्या पूर्णा द्विनयनी दृढनिद्रां मरणं कथयति। द्रागदृढनिद्रामिति वा। यावता कालेन पुनरपि निमेषो भवति तावत्येव काले मरणं भवतीति निमेषतुल्यं मरणम्, तस्माद्विदुषा त्वयाऽविचारितं शीघ्रमेव दातव्यम्। मरणस्य शीघ्रप्राप्तिभयात्। अविनिद्रितोऽपि घूर्णते ॥

अभ्रपुष्पमपि दित्सति शीतं स्वार्थिना विमुखता यदभाजि।
स्तोककस्य खलु चञ्चुपुटेन म्लानिरुल्लसति तद्घनसङ्घे ॥ १२७ ॥

अभ्रेति ॥ स्तोककस्य चातकस्यार्थिना याचकेन चञ्चुपुटेन सा प्रसिद्धा विमुखता पराङ्मुखत्वं यदभाजि आश्रिता तत्खलु तस्मादिव हेतोः, तस्मादिव हेतोरित्युत्प्रेक्षा वा। म्लानिः चातकवैमुख्यजनिताकीर्तिः घनसङ्घे मेघसमूहे उल्लसति शोभते। किंभूते घनसङ्घे—शीतं शीतलमभ्रपुष्पं जलं दित्सति दातुमिच्छति अपि। चातकेन याचिते जले [illegible] [illegible]स्नानसंक्षालनपयसो जातमिति भावः। अथ च—स्तोक एव स्तोककोऽल्पोऽतिनिकृष्टः तस्यार्थिना मुखेन पराङ्मुखत्वं समाश्रितम्, तत्तस्माद् मेघतुल्ये पुरुषे म्लानिरुल्लसति। यतः शीतलं दारिद्र्यहारि अभ्रपुष्पमपि वस्तुमात्रमपि वस्तु दातुमिच्छतः परं [illegible]

---

१ 'अथ च [illegible]' [illegible]। २ 'अथ [illegible]' [illegible] साहित्यविद्याधरी। ३ 'अथ [illegible]' इति साहित्यविद्याधरी। ४ 'अथ [illegible]' इति साहित्यविद्याधरी।

नाक्षराणीति ॥ हे नल, अक्षराणि बाल्ये मातृकां पठता त्वया नकारः 'न' इत्यं शब्दो नापाठि किं नाधीतः किम्। अथवा पठितोऽपि नकारः प्रस्मृतो विस्मृतः किम्। नकार इत्यमेवम् अर्थिचयस्य याचकसमूहस्य संशय एव दोला द्विकोट्यवलम्बना तस्यां खेलनं क्रीडनं चकार। खलूत्प्रेक्षायां, निश्चये वा। त्वया पूर्वं याचकाभिलापे नेति कदापि नोक्तम-द्यापि न वक्तव्यमिति भावः ॥

अब्रवीत्तमनलः क्व नलेदं लब्धमुज्झसि यशः शशिकल्पम्।
कल्पवृक्षपतिमर्थिनमित्थं नाप कोऽपि शतमन्युमिहान्यः ॥ १२२ ॥

अब्रवीदिति ॥ अनलोऽग्निस्तं नलमब्रवीत्—हे नल, त्वं शशिकल्पं चन्द्रप्रभमिदमेवं-विधं लब्धं करस्थितं यशः क्व हेतोरुज्झसि त्यजसि। इदं किम्—'इह भूलोके अन्यो नला-दन्यः कोऽपि कल्पवृक्षस्य पतिं शतमन्युं शतक्रतुमित्थं पूर्वोक्तप्रकारेण अर्थिनं याचकं नाप न प्राप्तवान्। सर्वाभिलाषकरः कल्पवृक्षोऽपि यद्वश(ग)ः, यश्च शतयज्ञकारी, तमिन्द्रं याचकं नल एव प्राप्तवान्नान्य इति यशो न त्याज्यम्' इति कल्पवृक्षोऽपि यन्मनोरथं पूर्णं कर्तुं न समर्थोऽभूत्, त्वं तु समर्थः। शतमन्युरिति पात्रत्वं सूचितम्[1] ॥

न व्यहन्यत कदापि मुदं यः स्वःसदामुपनयन्नभिलाषः।
तत्पदे त्वदभिषेककृतां नः स त्यजत्वसमतामदमद्य ॥ १२३ ॥

नेति ॥ अभीष्टसाधनात्स्वःसदां देवानां मुदं हर्षमुपनयन्नयन् योऽभिलाषः कदापि केनापि न व्यहन्यत व्यर्थीकृतः। तत्पदे अभिलाषस्थाने त्वदभिषेकं तवाभिषेकं स्वाभीष्टसाध-नाय कृतां कुर्वतां नोऽस्माकं सोऽभिलाषो मादृशः कामपूरणसमर्थोऽन्यो न विद्यत इत्यसम-तामदं असाम्यविषयगर्वम् अद्य त्यजतु। कामपूरणे त्वमेव समर्थ इत्यर्थः। व्यहन्यत, कर्मणि तङ् कर्मकर्तरि वा[2] ॥

अब्रवीदथ यमस्तमहृष्टं वीरसेनकुलदीप तमस्त्वाम्।
यत्किमप्यभिबुभूषति तत्किं चन्द्रवंशवसतेः सदृशं ते ॥ १२४ ॥

अब्रवीदिति ॥ अथ यमो भैमीप्राप्तिविघ्नसंभावनयाऽहृष्टं दुःखितं तं नलमब्रवीत्—'हे वीरसेनकुलस्य दीप प्रकाशक नल, तमो भैम्यप्राप्त्य(प्ति)संभावनजन्यं दुःखं यत् त्वां किमपि अल्पमनिर्वाच्यं वाभिबुभूषत्यभिभवितुमिच्छति तत् चन्द्रवंशवसतेश्चन्द्रवंशोत्पन्नस्य ते तव किं सदृशमुचितम्, अपि त्वयुक्तम्। चन्द्रवंशोत्पन्नो हि प्राणानपि ददाति, तदुत्पन्नेन त्वयापि तथैव भवितव्यं, न त्वन्यथेति भावः। अथ च दीपरूपं त्वां यदन्धकारमभिबुभूषति तच्चन्द्र-वंशवसतेस्ते किमुचितम्, अपि त्वनुचितम्। दीपस्य तमसाभिभवो न युक्तः, तत्रापि चन्द्रवंश-

---

१ 'अत्र संदेहो रूपकं च' इति साहित्यविद्याधरी। 'अत्रार्थिनामीदृक्संशयासंबन्धेऽपि संबन्धोक्तेर-तिशयोक्तिः। सा चोक्तसंशयोत्थापिता इति संकरः' इति जीवातुः। २ 'अत्र च्छेकानुप्रासोपमा-काव्यलिङ्गम्' इति साहित्यविद्याधरी। ३ 'पदे रक्षगे तस्य कल्पवृक्षस्य...अभिषेकम्' इति साहि-त्यविद्याधरी। संमतस्तु 'तदभिषेककृताम्' इति पाठः प्रतिभाति। 'पूर्वमस्माकमभिलाष एवाभीष्टपूर-कोऽभूत्, अधुना तस्य स्थाने त्वमारोपितोऽसीत्यर्थः' इति सुखावबोधा। ४ 'अत्र व्यतिरेकः काव्य-लिङ्गं च' इति साहित्यविद्याधरी।

स्यापि जीवितपर्यन्तमयशो भवति किं पुनरिन्द्रादीनां पराङ्मुखत्वेन, तस्मात्त्वया शीघ्रमेव देयमिति भावः। पक्षिणोऽपि विमुखतया मेघेऽपि म्लानिमुत्पादयति, किं पुनरन्यत्रेत्यर्थः। तस्मादिन्द्रादीनां तत्त्वतो विमुखत्वेऽयशो भावि इति किं वक्तव्यमिति भावः। 'मेघपुष्पं घनरसः' इत्यमरः॥

ऊचिवानुचितमक्षरमेनं पाशपाणिरपि पाणिमुदस्य।
कीर्तिरेव भवतां प्रियदारा दाननीरझरमौक्तिकहारा॥ १२८॥

ऊचिवानिति॥ पाशपाणिरपि वरुणोऽपि पाणिमुदस्योद्यम्य एनं नलमुचितमक्षरं वचनमित्यूचिवान्। इति किम्—भवतां भवादृशां राज्ञां दाने क्रियमाणे यो नीरझरो जलप्रवाहः स एव मौक्तिकहारो यस्याः सा कीर्तिरेव प्रियदाराः प्रेयस्यः स्त्रियः, न तु राजकन्याः, ततः कीर्तिरेव त्वयोपार्जनीया नाकीर्तिः। पाणिमुदस्येति याचकजातिः॥

चर्म वर्म किल यस्य न भेद्यं यस्य वज्रमयमस्थि च तौ चेत्।
स्थायिनाविह न कर्णदधीची तन्न धर्ममवधीरय धीर॥ १२९॥

चर्मेति॥ यस्य कर्णस्य चर्म त्वक् न भेद्यमभेद्यं वर्म कवचं किल श्रुतौ। येन कवचनिर्माणार्थं त्वग्दत्ता, यस्य च अस्थि वज्रमयम्, वज्रनिर्माणार्थं येन दधीचिना स्वीयमस्थि दत्तं तौ एवंविधौ वदान्यौ कर्णदधीची अपि इह भूलोके चेद्यस्मात्स्थायिनौ न किंतु मृतावेव। तत्तस्मात् हे धीर प्राज्ञ, त्वं धर्मं नावधीरय मावज्ञासीः। धर्म एव स्थिरतरो ननु स्त्र्यादिसुखं चेति भावः॥

अद्ययावदपि येन निबद्धौ न प्रभू विचलितुं बलिविन्ध्यौ।
आस्थितावितथतागुणपाशस्त्वादृशा स विदुषा दुरपासः॥ १३०॥

अद्येति॥ येन सत्यप्रतिज्ञत्वगुणलक्षणेन पाशेन निबद्धौ बलिविन्ध्यौ दैत्याचलौ अद्ययावदपि एतावन्तमपि कालं विचलितुं प्रतिज्ञातमनिर्वोढुं न प्रभू समर्थौ न जातौ, किं तु ताभ्यामङ्गीकृतं यद्वशेन परिपालितम्। एकः पाताले स्थितः, अन्यश्च यद्वशेन न वर्धत इत्यर्थः। स आस्थितस्याङ्गीकृतस्यावितथता सत्यता तल्लक्षणो गुणः सूत्रं च तल्लक्षणः पाशो रज्जुः सत्यवादितागुणः त्वादृशा त्वद्विधेन विदुषा पण्डितेन दुरपासो दुर्लङ्घ्यः। अङ्गीकृतं परिपालयेत्यर्थः। दैत्यपाषाणाभ्यामप्यङ्गीकृतं सत्यं कृतम्, अतस्त्वयाङ्गीकृतं निर्वोढव्यमिति भावः॥

प्रेयसी जितसुधांशुमुखश्रीर्या न मुञ्चति दिगन्तगतापि।
भङ्गिसङ्गमकुरङ्गदृगर्थे कः कदर्थयति तामपि कीर्तिम्॥ १३१॥

प्रेयसीति॥ प्रेयसी प्रियतमा तथा—जिता तिरस्कृता उज्ज्वलत्वात्सुधांशुमुखानां सुधांशुश्चन्द्रस्तत्प्रमुखानां तारकादीनां श्रीः शोभा धवलिमा यया, जिता चन्द्रप्रारम्भशोभा यया एवंविधा वा, प्राणेश्वरी च जितचन्द्रा मुखश्रीर्यस्या एवंविधा या कीर्तिः दिगन्तगतापि दिक्प्रान्तगता न मुञ्चति त्यजति तामेवंविधामपि कीर्तिं भङ्गी विनश्वरः संगमो यस्याः सा भङ्गिसं-

---

१ 'अत्रोत्प्रेक्षा श्लेषश्च' इति साहित्यविद्याधरी। २ 'अत्र च्छेकानुप्रासो रूपकं च' इति साहित्यविद्याधरी। ३ 'अत्र विरोधो हेतुश्च' इति साहित्यविद्याधरी। ४ 'आश्रुता' इति जीवातुसंमतः पाठः। ५ 'अत्र रूपकमलंकारः' इति साहित्यविद्याधरी।

त्तमा एवंभूता कुरङ्गदृक् मृगाक्षी तस्या अर्थे निमित्तम्, अथ च—कुत्सितो रङ्गो रचना यस्या एवंविधा दृग् यस्याः तत्कृते कः कदर्थयति पीडयति, अपि तु नित्यां कीर्तिं विहायानित्यां प्रेयसीं कोऽपि न वाञ्छति। तस्मात्कीर्तिरेव त्वयाप्युपार्जनीयेति भावः। अथ च—कलिप्रभावाद्भाविसंगमत्वं भैम्याः सूचितम्। अन्योऽपि दुष्टस्वपक्ष्याः कृते गुणवतीं पत्नीं न पीडयति। स्त्रियः कृते कीर्तिर्न त्याज्येत्यर्थः। कुत्सितो दुःखरूपोऽर्थः कदर्थः, कोः कदादेशे तत्करोत्यर्थे णिचि मतुपि वा तद्वन्तं करोतीति णिचि 'णाविष्ठवत्–' इति टिलोपे मतुब्लोपे वा पीडयतीति तात्पर्यार्थः। एवं कदर्थनात्यर्थंतयेत्यादावपि ज्ञेयम्॥

यान्वरं प्रति परेऽर्थयितारस्तेऽपि यं वयमहो स पुनस्त्वम्।
नैव नः खलु मनोरथमात्रं शूर पूरय दिशोऽपि यशोभिः॥ १३२॥

यानिति॥ परे अन्ये पुरुषा यानस्मान्प्रत्युद्दिश्य वरमभीष्टमर्थयितारो याचनशीलाः वरमुद्दिश्यास्माननर्थयितार इति वा, तेऽपि वयं यं त्वामर्थयितारः। अहो आश्चर्यम्। येऽन्यस्मै वरं दातुं समर्थास्ते वयं तव याचका जाताः। स एवंभूतस्त्वं पुनः शूर दानशूर नल, खलु निश्चितं नोऽस्माकं मनोरथमात्रं केवलं मनोरथं पूरय परिपूर्णं कुर्विति नैव, किं तु इन्द्रादयोऽपि यस्यार्थिनो जाता इति यशोभिः दिशोऽपि दिगन्तानपि पूरय। अस्मन्मनोरथपूरणेन तव महती कीर्तिर्भविष्यतीति भावः। 'यान्वरम्' इति पाठे अन्ये यानस्मान्प्रति परं केवलमर्थयितारो न तु दातार इत्यर्थः। अर्थयितारः, ताच्छील्ये तृन्[१]॥

अर्थितां त्वयि गतेषु सुरेषु म्लानदानजनिजौरसयशःश्रीः।
अद्य पाण्डु गगनं सुरशाखी केवलेन कुसुमेन विधत्ताम्॥ १३३॥

अर्थितामिति॥ सुरशाखी कल्पतरुः सुरेषु त्वयि विषयेऽर्थितां याचकतां गतेषु सत्सु म्लाना विनष्टप्राया दानजा निजा स्वीया सहजा वा उर्वी महती यशःश्रीः यस्यैवंभूतः सन् अद्य केवलेन कीर्तिरहितेन कुसुमेन पुष्पेण कृत्वा गगनं पाण्डु श्वेतं विधत्तां करोतु। एतावन्तं कालं कीर्तिपुष्पाभ्यां श्वेतं कृतं, तदा कीर्तेरपहृतत्वात्केवलेन पुष्पेणेति भावः॥

'हास्यैव तुलना, न तु साम्यम्' इत्यस्योत्तरमाह—

प्रवसते भरतार्जुनवैन्यवत्स्मृतिधृतोऽपि नल त्वमभीष्टदः।
स्वगमनाफलतां यदि शङ्कसे तदफलं निखिलं खलु मङ्गलम्॥ १३४॥

प्रवसत इति॥ हे नल, भरतार्जुनवैन्यवत् भरतः शाकुन्तलेयः, अर्जुनः कार्तवीर्यः, पृथुर्वैन्यः तद्वत्स्मृतिधृतः स्मृतिगोचरः स्मृत इत्यर्थः। एवंभूतोऽपि नलः प्रवसते देशान्तरगामिने पुरुषायाभीष्टं ददातीत्यभीष्टदः स त्वं स्वगमनस्य अफलतां नैष्फल्यं यदि शङ्कसे संभावयसि तर्हि निखिलं समस्तं वैन्यादिस्मरणलक्षणं मङ्गलं शकुनादि च त्वद्व्यभिचारेण खलु निश्चितमफलं निष्फलम्। 'वैन्यं पृथुम्–' इत्यादीनां स्मरणस्यापि वैदर्भ्यप्रत्याख्यानात्स्वगमननैष्फल्यं त्वया नाशङ्कनीयम्, अतो गच्छेत्यर्थः। भरतादिवत्स्वमपीति वा। भरतादेरन्यथाहितत्वात्पूर्वनिपातः॥

---

१ 'अत्र व्यतिरेकसमासोक्त्युपमाविरोधसंकरः' इति साहित्यविद्याधरी। २ 'अत्र च्छेकानुप्रासः' इति साहित्यविद्याधरी। ३ 'म्लानदानजनितौरस' इति चण्डपण्डितजीवातुसाहित्यविद्याधरी-संमतः। ४ 'अत्र च्छेकानुप्रासः'। द्रुतविलम्बितं नाम वृत्तम्। 'द्रुतविलम्बितमाह नभौ भरौ' इति साहित्यविद्याधरी।

इष्टं नः प्रति ते प्रतिश्रुतिरभूदाद्य स्वराह्लादिनी
धर्मार्था सृज तां श्रुतिप्रतिभटीकृत्यान्विताख्यापदाम्।
त्वत्कीर्तिः पुनती पुनस्त्रिभुवनं शुभ्राद्वयादेशना-
द्रव्याणां शितिपीतलोहितहरिन्नामान्वयं लुम्पतु ॥ १३५ ॥

इष्टमिति ॥ हे नल, नोऽस्माकं इष्टमाकाङ्क्षितं प्रत्युद्दिश्य स्वराह्लादिनी अस्मदाह्लादनात्स्वर्गानन्ददायिनी स्वरेणाङ्गीकारसूचकमधुरस्वरेण वानन्दिनी तथा—धर्मार्था धर्मप्रयोजनिका या तव प्रतिश्रुतिः 'जीवितावधि किमप्यधिकं वा–' (५।९७) इत्यादिका प्रतिज्ञाऽभूज्जाता तां प्रतिश्रुतिमद्येदानीं सत्यत्वेन श्रुतिप्रतिभटीकृत्य वेदसदृशीं कृत्वा अन्वितं श्रुतेः प्रतिभटा प्रतिश्रुतिरिति सार्थकमाख्यापदं संज्ञापदं यस्या एवंभूतां सृज कुरु। सत्यां कुर्वित्यर्थः। श्रुतिप्रतिभटत्वे हि प्रतिश्रुतिशब्दः सार्थको भवति। सत्यत्वेन स्वीयं वचनं श्रुत्यन्तरं कुर्वित्यर्थः। अङ्गीकृतं परिपालयेति भावः। पुनः प्रतिज्ञासिद्धौ सत्यां त्रिभुवनं त्रिलोकीं पुनती पुनाना, अथ च उज्ज्वलं कुर्वाणा त्वत्कीर्तिः शुभ्रस्य श्वेतस्य अद्वयमद्वैतं तस्यादेशनात्करणाद् द्रव्याणां वस्तूनां शितिपीतलोहितहरितां कृष्णगौररक्तनीलानां वर्णानां नाम संज्ञा तस्य अन्वयः संबन्धः तं लुम्पतु विनाशयतु। सर्वस्य त्रिलोकस्य श्वेतीकरणात्कृष्णादिवर्णाभावो भवत्वित्यर्थः। प्रतिज्ञातपरिपालनाल्लोकत्रयेऽपि तवातिनिर्मलं यशः प्रसरिष्यतीति भावः। कर्मप्रतिपादिका श्रुतिरपि इष्टं यागमुद्दिश्य प्रवर्तते। स्वरैरुदात्तादिभिः, अः अकार आद्यो येषां ते आद्याः स्वरा अचस्तैर्वा, कर्मफलभूत आद्यः प्रथमभोक्तव्यः स्वः स्वर्गः—तेन वानन्ददायिनी। तथा—'चोदनालक्षणोऽर्थो धर्मः' इति वाक्यप्रतिपादितस्य धर्मस्य वेदैकगम्यत्वोक्तेर्धर्मोऽर्थोऽभिधेयं वाक्यार्थो वा यस्याः सा धर्मप्रतिपादिनी। तथा—श्रूयत इति श्रुतिरित्यन्वितमनुगतार्थमाख्यापदं नामपदं यस्या एवंभूता च। अथ च—प्रतिश्रुतिः प्रतिवचनरूपम् 'अस्तु श्रौषट्' इत्यादिवाक्यं सापि इष्टं यागं प्रति भवति, स्वरैरुदात्तादिभिराह्लादिनी च भवति। अथ च—त्वत्कीर्तिरूपा ब्रह्मप्रतिपादिका श्रुतिः, त्वया कीर्त्यमाना सदा पठ्यमाना वा वेदान्तश्रुतिः श्रवणमननादिद्वारा त्रैलोक्यं पवित्रं कुर्वाणा, यद्वा सत्त्वरजस्तमोरूपेभ्यस्त्रिभ्यो गुणेभ्यो भवतीति, त्रिभ्यो भूरुत्पत्तिर्यस्येति वा त्रिभु। सृष्ट्याद्यवस्थात्रयसहितत्वमिति यावत्। तच्च तद्वनं चातिगहनं संसाराख्यम्। पृथग्वा पदम्। निवृत्तिद्वारा पुनाना शुभ्रस्यातिनिर्मलस्य निर्दोषस्य ब्रह्माद्वैतस्योपदेशाद्द्रव्याणां दृश्यपदार्थानां कृष्णपीतादिनामसंबन्धं लुम्पति। 'वाचारम्भणं विकारो नामधेयम्' इति श्रुतेः 'एकमेवाद्वितीयं ब्रह्म' इत्यादिवचनाद्घटादेर्मिथ्यात्वसाधनान्नामादिविकारं निराकरोतीति ध्वनिः। धर्मार्थामिति क्वचित्। इष्टम्, 'इषु इच्छायाम्' अस्माद्यजेश्च कर्मणि भावे च क्तः। यजेः संप्रसारणं षत्वष्टुत्वे च। इष्टिमित्यमरादयः सर्वेऽपि व्याचक्षते 'इष्टिर्यागेच्छयोः' इत्यादिना, तत्तु शिष्टप्रयोगाज्ज्ञातव्यम्। विशेषस्तु ग्रन्थविस्तरभयान्न लिख्यते। 'इष्टम्' इत्येव पाठः साधीयानित्यलम् ॥

---

१ तिलकजीवात्वोस्तु 'इष्टिम्' इत्येव संमतः पाठः। २ 'अत्र श्लेषातिशयोक्तिः' इति साहित्यविद्याधरी। 'अत्र नीलादिवस्तूनां स्वगुणत्यागेन तत्कीर्तिगुणग्रहणात्तद्गुणालंकारः। 'तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः' इति लक्षणात्' इति जीवातुः।

यं प्रासूत सहस्रपादुदभवत्पादेन खञ्जः कथं
स च्छायातनयः सुतः किल पितुः सादृश्यमन्विच्छति ।
एतस्योत्तरमद्य नः समजनि त्वत्तेजसां लङ्घने
साहस्रैरपि पङ्गुरङ्घ्रिभिरभिव्यक्तीभवन्भानुमान् ॥ १३६ ॥

यमिति ॥ सहस्रपात्सहस्रचरणः अथ च सहस्रकिरणः सूर्यः यं प्रासूत प्रसूतवान् स छायानाम्न्याः सूर्यपत्न्याः तनयः पुत्रः शनैश्चरः पादेन चरणेन पङ्गुः कथमुदभवज्जातः । सहस्रचरणस्य पुत्रेण सहस्रचरणेन भवितव्यम्, अस्य तु नैकोऽपीति । किल यस्मात्सुतः पितुः सादृश्यमन्विच्छति । 'कारणगुणा हि कार्यगुणानारभन्ते' इति न्यायात्, तत्तस्माच्छनैश्चरस्यैकोऽपि पादो नास्तीत्येतस्य नोऽस्मदीयप्रश्नस्याद्य भानुमानुत्तरं समजनि जातः । किं कुर्वन्—त्वत्तेजसां लङ्घनेऽतिक्रमणविषये साहस्रैः सहस्रसंख्याकैरप्यङ्घ्रिभिश्चरणैः पङ्गुः पादरहितोऽभिव्यक्तीभवन्प्रकटीभवन् । अतः पितुः पङ्गुत्वात्पुत्रस्यापि पङ्गुत्वं युक्तमेवेत्यर्थः । त्वत्तेजः सूर्यतेजसोऽप्याधिकम्, तस्मात्त्वयास्मदिष्टं साधनीयमिति भावः । 'पादा रश्म्यङ्घ्रितुर्यांशाः' इत्यमरः । सहस्रपात्, 'संख्यासुपूर्वस्य' इति पादस्यान्तलोपः । पादेन खञ्जः, अङ्घ्रिभिः पङ्गुरिति 'येनाङ्ग–' इति तृतीया । साहस्रैः, 'तदस्य परिमाणम्' इत्यर्थे 'शतमानविंशतिकसहस्र–' इत्यण् ॥

इत्याकर्ण्य क्षितीशस्त्रिदशपरिषदस्ता गिरश्चाटुगर्भा
वैदर्भीकामुकोऽपि प्रसभविनिहितं दूत्यभारं बभार ।
अङ्गीकारं गतेऽस्मिन्नमरपरिवृढः संभृतानन्दमूचे
भूयादन्तर्धिसिद्धेरनुविहितभवच्चित्तता यत्र तत्र ॥ १३७ ॥

इत्याकर्ण्येति ॥ क्षितीशो राजा वैदर्भीकामुकोऽपि भैमीमभिलषुकोऽपि सन् प्रसभविनिहितं बलादारोपितं दूत्यलक्षणं भारं बभार । किं कृत्वा इति पूर्वोक्तप्रकारेणोपहासस्यापि करणाच्चाटुगर्भाः प्रियोक्तियुक्तमध्याः त्रिदशपरिषदो देवसभायाः ताः पूर्वोक्ता गिरो वाणीराकर्ण्य । त्रिदशपरिषदः सकाशाद्वा । अन्योऽपि बलान्निहितं भारं दुःखेन वहति । अस्मिन्नङ्गीकारं गते प्राप्ते सति करिष्यामीति तेनाभ्युपगते सति अमरपरिवृढो देवप्रभुरिन्द्रः संभृतानन्दं सानन्दं यथा तथा तं नलं प्रति इत्यूचे । इति किम्—अन्तर्धिसिद्धेः यत्र तत्र सर्वत्र देशे काले अनुविहितमनुसृतं भवच्चित्तं यया तस्या भावोऽनुविहितभवच्चित्तता कार्यसिद्धिः भूयात् । यत्रादृश्यो भवितुमिच्छसि तत्रान्तर्धिसिद्धिर्भूयात्, यत्र नेच्छसि तत्र माभूत् । 'यामिकाननुपमृद्य–' (५।११०) इत्यादि परिहृतमनेन ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्य श्रीविजयप्रशस्तिरचनातातस्य नव्ये महा-
काव्ये चारुणि नैषधीयचरिते सर्गोऽगमत्पञ्चमः ॥ ५ ॥

---

१ 'कथाकंलारहोः पङ्गुत्वोक्तिरतिशयोक्तिभेदः तत्पङ्गुत्वं च शनैश्चरे पङ्गुत्वलोकेप्रसिद्ध इति ...' इति जीवातुः । २ 'अत्र स्रग्धरा वृत्तम्' इति साहित्यविद्याधरी ।

चन्द्रसंबन्धि मण्डलमिव । अमावास्यायां सूर्ये प्रविष्टश्चन्द्रकिरणसमूहो यथा प्रतिपदि ततो निर्गत्य चन्द्रं प्रविशति । सूतं रथे संस्थाप्यैकाकी नगरं प्रविष्ट इत्यर्थः ॥

चित्रं तदा कुण्डिनवेशिनः सा नलस्य मूर्तिर्ववृते न दृश्या ।
बभूव तच्चित्रतरं तथापि विश्वैकदृश्यैव यदस्य मूर्तिः ॥ ८ ॥

चित्रमिति ॥ तदा तस्मिन्समये कुण्डिनवेशिनः पुरप्रवेशिनो नलस्य सा दृग्गोचरः, अथ चातिसुन्दरी मूर्तिः कायः दृश्या न ववृते दृग्गोचरः, अथ च सुन्दरी न ववृते नाभूदि-त्याश्चर्यम् । एतावन्तं कालं दृग्गोचरस्याकस्मादन्तर्हितत्वात्, सुन्दरस्य चेदानीमसुन्दरत्वादा-श्चर्यम् । 'भूयादन्तर्धिसिद्धेः–' इति वचनादिच्छावशादन्तर्हितोऽभूदित्यर्थः । यद्यपि दृश्या नाभूत्तथाप्यस्य मूर्तिर्विश्वस्य सर्वस्य लोकस्यैका मुख्याऽद्वयाया वा दृश्यैव दृग्गोचर एव बभू-वेति यत् तच्चित्रतरमतिशयितमाश्चर्यम् । अन्तर्हितस्याप्यनन्तर्हितत्वे विरोधादाश्चर्यम् । अथ च सर्वस्मिञ्जगति एका रमणीयाभूत्तदतिचित्रम् । एतादृक्सौन्दर्यस्यान्यत्राभावात् । नदृश्येति नसमासो वा ॥

जनैर्विदग्धैर्भवनैश्च मुग्धैः पदे पदे विस्मयकल्पवल्लीम् ।
तां गाहमानास्य चिरं नलस्य दृष्टिर्ययौ राजकुलातिथित्वम् ॥ ९ ॥

जनैरिति ॥ तां पुरं गाहमाना विलोकयन्ती अस्य नलस्य दृष्टिः राजकुलातिथित्वं राज-सदनातिथ्यं ययौ । राजमन्दिरं ददर्शेत्यर्थः । 'गाहमानस्य' इति पाठे राजविशेषणम् । राज-कुलाभिमुख्यमिति क्वचित् । किंभूताम्—विदग्धैश्चतुरैर्जनैः, मुग्धैः सुन्दरैर्भवनैश्च कृत्वा पदेपदे विस्मयस्य कल्पवल्लीं कल्पलताम् । कल्पवृक्षसंबन्धिनीं वल्लीमित्यर्थः । आतिशयाश्चर्यका-रिणीम् । 'कुलं जनपदे गृहे' इति विश्वः ॥

हेलां दधौ रक्षिजनेऽस्त्रसज्जे लीनश्चरामीति हृदा ललज्जे ।
द्रक्ष्यामि भैमीमिति संतुतोष दूतं विचिन्त्य स्वमसौ शुशोच ॥ १० ॥

हेलामिति ॥ असौ नलोऽस्त्रसज्जे शस्त्रसंनद्धे रक्षिजने राजगृहरक्षकलोके हृदा हेलामवज्ञां दधौ । एते मम किमपि कर्तुं न शक्नुवन्तीति । अहं लीनश्चौरवददृश्यो राजा सन् चरामीति विचार्य मनसा ललज्जे । तथा—अहमद्य भैमीं द्रक्ष्यामीति हेतोर्हृदा संतुतोष । तथा—अनन्तरं स्वमात्मानं दूतं विचिन्त्य हृदा शुशोच दुःखं कृतवान् । भैमीदर्शनेऽपि मम लोभो नास्तीति । हृदेत्यनेनावज्ञादिसूचका करादिचेष्टा न कृतेत्यर्थः । प्रथमतृतीयचरणाभ्यां पुरुषा-नुरागावुक्तौ, द्वितीयचतुर्थाभ्यां तौ प्रशान्तीकृतौ । दूतस्य मम तस्या अभिलाषोऽनुचित इत्यात्मानं निनिन्देति वा भावः । हेलाम् 'हेल अनादरे' इत्यस्मात् 'षिद्भिदादिभ्योऽङ्' ॥

अथोपकार्याममरेन्द्रकार्यात्कक्षासु रक्षाधिकृतैरदृष्टः ।
भैमीं दिदृक्षुर्बहुदिक्षु चक्षुर्दिशन्नसौ तामविशद्विशङ्कः ॥ ११ ॥

---

१ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी । २ 'अत्र विरोधाभासोऽलंकारः' इति साहित्य-विद्याधरी । ३ 'विगाहमाना पुरमस्य दृष्टिरथाददे' इति तिलकजीवातुसंमतः पाठः । ४ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी । ५ 'दूत्यम्' इति जीवातुसंमतः पाठः । ६ 'अत्र भावशबलतालंकारः' इति साहित्यविद्याधरी ।

चन्द्रसंबन्धि मण्डलमिव । अमावास्यायां सूर्यं प्रविष्टश्चन्द्रकिरणसमूहो यथा प्रतिपदि ततो निर्गत्य चन्द्रं प्रविशति । सूतं रथे संस्थाप्यैकाकी नगरं प्रविष्ट इत्यर्थः ॥

चित्रं तदा कुण्डिनवेशिनः सा नलस्य मूर्तिर्ववृते न दृश्या ।
बभूव तच्चित्रतरं तथापि विश्वैकदृश्यैव यदस्य मूर्तिः ॥ ८ ॥

चित्रमिति ॥ तदा तस्मिन्समये कुण्डिनवेशिनः पुरप्रवेशिनो नलस्य सा दृग्गोचरः, अथ चातिसुन्दरी मूर्तिः कायः दृश्या न ववृते दृग्गोचरः, अथ च सुन्दरी न ववृते नाभूदित्याश्चर्यम् । एतावन्तं कालं दृग्गोचरस्याकस्मादन्तर्हितत्वात्, सुन्दरस्य चेदानीमसुन्दरत्वादाश्चर्यम् । 'भूयादन्तर्धिसिद्धिः—' इति वचनादिच्छावशादन्तर्हितोऽभूदित्यर्थः । यद्यपि दृश्या नाभूत्तथाप्यस्य मूर्तिर्विश्वस्य सर्वस्य लोकस्यैका मुख्याऽसहाया वा दृश्यैव दृग्गोचर एव बभूवेति यत् तच्चित्रतरमतिशयितमाश्चर्यम् । अन्तर्हितस्याप्यनन्तर्हितत्वे विरोधादाश्चर्यम् । अथ च सर्वस्मिञ्जगति एका रमणीयाभूत्तदतिचित्रम् । एतादृक्सौन्दर्यस्यान्यत्राभावात् । नदृश्येति नसमासो वा ॥

जनैर्विदग्धैर्भवनैश्च मुग्धैः पदे पदे विस्मयकल्पवल्लीम् ।
तां गाहमानास्य चिरं नलस्य दृष्टिर्ययौ राजकुलातिथित्वम् ॥ ९ ॥

जनैरिति ॥ तां पुरं गाहमाना विलोकयन्ती अस्य नलस्य दृष्टिः राजकुलातिथित्वं राजसदनातिथ्यं ययौ । राजमन्दिरं ददर्शेत्यर्थः । 'गाहमानस्य' इति पाठे राजविशेषणम् । राजकुलाभिमुख्यमिति क्वचित् । किंभूताम्—विदग्धैश्चतुरैर्जनैः, मुग्धैः सुन्दरैर्भवनैश्च कृत्वा पदेपदे विस्मयस्य कल्पवल्लीं कल्पलताम् । कल्पवृक्षसंबन्धिनीं वल्लीमित्यर्थः । अतिशयाश्चर्यकारिणीम् । 'कुलं जनपदे गृहे' इति विश्वः ॥

हेलां दधौ रक्षिजनेऽस्त्रसज्जे लीनश्चरामीति हृदा ललज्जे ।
द्रक्ष्यामि भैमीमिति संतुतोष दूतं विचिन्त्य स्वमसौ शुशोच ॥ १० ॥

हेलामिति ॥ असौ नलोऽस्त्रसज्जे शस्त्रसंनद्धे रक्षिजने राजगृहरक्षकलोके हृदा हेलामवज्ञां दधौ । एते मम किमपि कर्तुं न शक्नुवन्तीति । अहं लीनश्चौरवददृश्यो राजा सन् चरामीति विचार्य मनसा ललज्जे । तथा—अहमद्य भैमीं द्रक्ष्यामीति हेतोर्हृदा संतुतोष । तथा—अनन्तरं स्वमात्मानं दूतं विचिन्त्य हृदा शुशोच दुःखं कृतवान् । भैमीदर्शनेऽपि मम लोभो नास्तीति । हृदेत्यनेनावज्ञादिसूचका करादिचेष्टा न कृतेत्यर्थः । प्रथमतृतीयचरणाभ्यां पुरुषानुरागावुक्तौ, द्वितीयचतुर्थाभ्यां तौ प्रशान्तीकृतौ । दूतस्य मम तस्या अभिलाषोऽनुचित इत्यात्मानं निनिन्देति वा भावः । हेलाम् 'हेलृ अनादरे' इत्यस्मात् 'षिद्भिदादिभ्योऽङ्' ॥

अथोपकार्यामभरेन्द्रकार्यात्कक्षासु रक्षाधिकृतैरदृष्टः ।
भैमीं दिदृक्षुर्बहुदिक्षु चक्षुर्दिशन्नसौ तामविशद्विशङ्कः ॥ ११ ॥

---

१ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी । २ 'अत्र विरोधाभासोऽलंकारः' इति साहित्यविद्याधरी । ३ 'विगाहमाना पुरमस्य दृष्टिरथाददे' इति तिलकजीवातुसंमतः पाठः । ४ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी । ५ 'दूत्यम्' इति जीवातुसंमतः पाठः । ६ 'अत्र भावशबलतालंकारः' इति साहित्यविद्याधरी ।

अथेति ॥ अथ असौ तानुपकार्यां पूर्वदृष्टानुपकारिकानविशत् । किंभूतः—अमरपक्षान्वेन्द्रः, इन्द्रश्च तेषां प्राधान्यादमरेन्द्रस्य वा कार्याद्धेतोः कार्याद्वरदानाद्धेतोः कक्षासु दृष्टप्रकोष्ठेषु स्थितै रक्षाधिकृतैः रक्षकैरन्तर्हितत्वाददृष्टः अत एव विशङ्को गतभयः । तथा—बहु वारंवारं दिक्षु चक्षुर्दिशन्ददानः । यतो भैमीं दिदृक्षुर्द्रष्टुकामः । 'कक्षा प्रकोष्ठे हर्म्यादेः' इत्यमरः ॥

अयं क इत्यन्यनिवारकाणां गिरा विभुर्द्वारि विभुज्य कण्ठम् ।
दृशं ददौ विस्मयनिस्तरङ्गां स लङ्घितायामपि राजसिंहः ॥ १२ ॥

अयमिति ॥ स विभुः प्रशस्तो राजा राजसिंहो नलः लङ्घितायामतिक्रान्तायामप्युपकार्याद्वार्यन्तर्हितोऽप्यहमेभिर्दृष्टः किमिति विस्मयेनाश्चर्येण निस्तरङ्गां निश्चलां दृशं ददौ दत्तवान् । किं कृत्वा—कोऽयमित्यन्यनिवारकाणां मदन्यनिषेधकारिणां रक्षकाणां गिरा कृत्वा मामेव किमेते निषेधन्तीति धिया कण्ठं विभुज्य वक्रीकृत्य । सिंह इत्यनेन दृष्टेऽप्यात्मनि निर्भयत्वं सूच्यते । सिंहोऽप्यवज्ञया ग्रीवां वक्रीकृत्य गर्वेण दृष्टिं पश्चाद्ददाति । राजसिंहः 'प्रशंसावचनैश्च' इति, 'उपमितम्–' इति वा समासः ॥

अन्तःपुरान्तः स विलोक्य बालां कांचित्समालम्भनसंवृतोरुम् ।
निमीलिताक्षः परया भ्रमन्त्या संघट्टमासाद्य चमच्चकार ॥ १३ ॥

अन्तरिति ॥ स नलः अन्तःपुरस्यान्तर्मध्ये समालम्भनमुद्वर्तनविलेपनं तदर्थमनाच्छादितोरुम् [illegible] बालां कांचित्स्त्रियं विलोक्य 'न नग्नां स्त्रियमीक्षेत' इति स्मृतेः [illegible] निमीलिताक्षः बभूवेति शेषः । तथा—यदृच्छया भ्रमन्त्या चलन्त्या परया अन्यया स्त्रिया सह निमीलितनयनत्वादेव संघट्टं संपर्कमासाद्य प्राप्य चमच्चकार । सचकितो बभूवेत्यर्थः । 'एकं संधित्सतोऽपरं प्रच्यवते' इति न्यायात् सजुगुप्सो जातः ॥

अनादिसर्गस्रजि वानुभूता चित्रेषु वा भीमसुता नलेन ।
जातेव यद्वा जितशम्बरस्य सा शाम्बरीशिल्पमलक्षि दिक्षु ॥ १४ ॥

अनादीति ॥ नलेन सा भैमी दिक्षु प्रतिदिशमलक्षि दृश्यते स्म । ननु चक्षुषाऽसंनिकृष्टा कथं दृष्टा । न च शुक्तौ रजतमिव तत्रासत्यपि सारोपात्कृतत इति वाच्यम् । अननुभूतपूर्वस्य वस्तुन आरोपासंभवादित्याशङ्क्य अनादिभानुभवपरम्परया पूर्वानुभवमुत्प्रेक्षते—अनादयो ये सर्गाः सृष्टयस्तेषां स्रक् परम्परा तस्यामनुभूता वा । ननु जन्मान्तरेऽपि भैम्याः प्रतिपदं स्मरणं वा प्रमाणं नास्तीत्यत आह—चित्रेष्वालेख्येषु वा अनुभूता । ननु चित्रेष्वपि [illegible] भूता । [illegible] पारोक्ष्ये भवति । [illegible], [illegible], [illegible], इत्यत इत्यत आह—यद्वा जितः शम्बरो येन स जितशम्बरो मदनः, तस्य या शाम्बरी शम्बरो दैत्यस्तदीयं शाम्बरी माया तस्याः शिल्पं निर्माणं जातेव । अनेन शम्बरं जयता तस्य मायाप्यङ्गीकृता तया मायया [illegible] ।

---

१ 'अथ [illegible]' इति [illegible] । २ '[illegible]' [illegible] । ३ '[illegible]' इति [illegible] विद्याधरौ ।

यद्वा—शम्बरारेः संबन्धिमाया निर्माणकौशलं सा जातेव। मदनस्यैवेदं शिल्पं तच्च मायामात्रहेतुकं, न तु प्रसिद्धबाह्यकारणरचितमिति। मायानिर्मितं चातिसुन्दरं भवति कारणगुणानुरोधाभावात्। यद्वा नलेन सा कामस्य शाम्बरीरूपं शिल्पं कौशलं जातेवालक्षि। शम्बरस्य जितत्वात्तन्मायेव भैमीरूपाऽपहृतेत्यर्थः। अथवा जातेवेत्युत्प्रेक्षान्तरम्। प्रागननुभूतापि तदानीं कामस्य शिल्पभूता सा जाता उत्पन्नेवालक्षि। यतोऽपरोक्षमनुभूयते, न च बाध्यते आलिङ्गनालापादिरूपसमर्थप्रवृत्तिजनकत्वादिति भावः। यद्वा शाम्बरीत्युत्प्रेक्षान्तरमेव व्याख्येयम्। विरहवशात्सर्वत्र भैमी दृष्टा सा पूर्वमनुभवतारतम्येन स्मृता सत्यारोपात्प्रतीयते शुक्तौ रजतवत्। यद्वा पूर्वमननुभूतैव स्मरेण प्रतिदिशमपूर्वैवोत्पादिता यथावियकं रजतम्। गन्धर्वनगरवन्मायावशादत्यन्तमसत्येवाननुभूतापि भासत इति समुदायतात्पर्यम्[1]॥

अलीकभैमीसहदर्शनान्न तस्यान्यकन्याप्सरसो रसाय।
भैमीभ्रमस्यैव ततः प्रसादाद्भैमीभ्रमस्तेन न तास्वलम्भि॥ १५॥

अलीकेति॥ मोहवशादवलोकिता अलीकभैमी मिथ्याभैमी तया सह तासामपि दर्शनादन्यकन्याप्सरसोऽन्तःपुरस्थिता अप्सरस्तुल्या भैमीव्यतिरिक्ता अबलास्तस्य नलस्य रसाय प्रीतये नाभूवन्। सहदर्शनात्तारतम्यज्ञानस्य संभवादलीकदृष्टाया अपि भैम्याः सकाशादन्या अतिहीना इति तास्वनुरक्तो नाभूत्। किंत्वलीकदृष्टायामपि तस्यामेवेत्यर्थः। तास्वेव भैमीबुद्धिः कथं नेत्यत आह—ततः षष्ठ्यर्थे तसिः। तस्य भैमीभ्रमस्यैव भैमीभ्रान्तेरेव प्रसादात्सामर्थ्यात्तेन नलेन तास्वन्यकन्याप्सरःसु भैमीभ्रमो नालम्भि न प्राप्तः। अलीकदृष्टायास्तस्याः सकाशात्तासामतिहीनत्वात्सादृश्यलक्षणभ्रान्तिकारणाभावाद्भैमीभ्रान्तिर्नोत्पन्नेत्यर्थः[2]॥

भैमीनिराशे हृदि मन्मथेन दत्तस्वहस्ताद्विरहाद्विहस्तः।
स तामलीकामवलोक्य तत्र क्षणादपश्यन्व्यपदद्विबुद्धः॥ १६॥

भैमीति॥ दूत्याङ्गीकाराद्भैमीविषये निराशे वितृष्णेऽपि हृदि विद्यमानान्मन्मथेन दत्तः स्वहस्तः स्वहस्तावलम्बनं यस्मै एवंभूताद्विरहाद्वियोगाद्विहस्तो विह्वलः। हृदि भैमीनिराशे सतीति वा। हृदि व्याकुले इति वा। एवंभूतः स नलः तत्र उपकार्यायामलीकां तामसत्यरूपां भैमीमवलोक्य क्षणात्तस्मिन्नेव क्षणे विबुद्धो भ्रान्तिरहितः तामपश्यन्ननवलोकयन्व्यपदद्विपादं प्राप। दूत्याङ्गीकाराद्भैम्यां निराशत्वेन शान्तोऽपि विरहः कामेन स्वहस्तं दत्त्वा पुनरुद्दीपितः। विरहजनितया भ्रान्त्या भैमी तेनावलोकिता, भ्रान्त्यपगमे च नावलोकितेत्यन्वेक्षणहेतुर्मम बोधो वृथा जातो यत्प्रसादान्मया भैमी विलोकिता, सा भ्रान्तिर्गता कष्टं जातमिति दुःखितोऽभूदित्यर्थः। येन हस्तो दत्तस्तस्य हस्तराहित्यं त्वयुक्तम्। अत्र विपरीतमित्याश्चर्यम्[3]। व्यपदत् लृदित्त्वादङ् 'प्राक्सितादड्व्यवायेऽपि' इत्यधिकारे 'सदिरप्रतेः' इति षत्वम्। 'विहस्तव्याकुलौ समौ' इत्यमरः॥

---

१ 'अत्र च्छेकानुप्रासरूपविशेषालंकारसंकरः' इति साहित्यविद्याधरी। 'हेतूत्प्रेक्षा' इति जीवातुः। २ 'अत्रोत्प्रेक्षारूपकालंकारौ' इति साहित्यविद्याधरी। ३ 'अत्र भावोदयालंकारः' इति साहित्यविद्याधरी।

प्रियां विकल्पोपहृतां स यावद्दिगीशसंदेशमजल्पदल्पम् ।
अदृश्यवाग्भीपितभूरिभीरुर्भवो रवस्तावदचेतयत्तम् ॥ १७ ॥

प्रियामिति ॥ स नलः विकल्पेन संकल्पेन उपहृतामुपनीतां प्रियां भैमीं प्रति दिगीशानां संदेशमल्पमपि यावदजल्पदवोचत्, तावदेव तस्मिन्नेव क्षणेऽदृश्यस्य तस्यैव वाचा भीषिता भयं प्राप्ता भूर्यो बहुयो भीरवो भयशीला या बालास्ताभ्यो भव उत्पन्नो रवः शब्दस्तं नलमचेतयत्सावधानं चकार । भ्रान्तिवीक्षितां भैमीं प्रति इन्द्रादिभिरेवमुक्तमिति यावद्वक्तुं प्रारब्धम्, तावदनेनैव शब्देन अदृश्यो भूतादिः कोऽप्यायात इति भीतानां बालानां कलकलेन पुनरभ्रान्तो भूत्वा तूष्णीं बभूवेति भावः । अल्पं संदेशमिति वा । भीषित इति 'भियो हेतुभये षुक्' । 'चिती संज्ञाने' चौरादिकाद्धेतुमण्णिचि अचेतयत् ॥

पश्यन्स तस्मिन्मरुताऽपि तन्व्याः स्तनौ परिस्प्रष्टुमिवास्तवस्त्रौ । [१]
अक्षान्तपक्षान्तमृगाङ्कमास्यं दधार तिर्यग्वलितं विलक्षः ॥ १८ ॥

पश्यन्निति ॥ तस्मिन्नन्तःपुरे अचेतनेन मरुता वायुनापि, अथ च देवेनापि परिस्प्रष्टुमिव मर्दयितुमिव अस्तवस्त्रौ क्षिप्तवस्त्रौ कस्याश्चित्तन्व्याः स्तनौ पश्यन्नबुद्धिपूर्वकमकस्माद्विलोकयन्परस्त्रीकुचदर्शनाद्विलक्षो विचित्तः सन्नलो मृगाङ्कत्वादेव न क्षान्तः सोढः पक्षान्तमृगाङ्कः पूर्णिमाचन्द्रो येन एवंभूतमास्यं वदनं तिर्यग्वलितं तिरश्चालितं दधार । पराङ्मुखोऽभूदित्यर्थः । नलान्यः कोऽप्युत्तमः पुरुषो नास्तीति भावः । प्रच्छन्नकामुकसंभोगे चन्द्रस्य तिरोधानं युक्तमिति ध्वन्यते ॥

अन्तःपुरे विस्तृतवागुरोऽपि बालावलीनां वलितैर्गुणौघैः । [२]
न कालसारं हरिणं तदक्षिद्वयं प्रभुर्बन्धुमभून्मनोभूः ॥ १९ ॥

अन्तरिति ॥ मनोभूः कामः कालः कृष्णः कनीनिकालक्षणः सारः श्रेष्ठभागो यस्य तत् । तथा—हरिणमभितः पाण्डुरं तस्य नलस्य अक्षिद्वयं बन्द्धुं सौन्दर्यस्य वशं कर्तुं प्रभुः समर्थो नाभूत् । अथ च नेत्रद्वयमेव हरिणं मृगं धर्तुम् । अरण्ये मृगयुना मृगो धर्तुं सुशकः । कामो मृगयुस्तु अन्तःपुरे नगरमध्ये हरिणं धर्तुं न शशाकेत्याश्चर्यम् । किंभूतः—बालावलीनामवरोधतरुणीपङ्क्तीनां वलितैः सविलासैः, पुनःपुनः प्रवृत्तैर्वा गुणौघैर्नृत्यगीतसौन्दर्यादिगुणसमूहैर्वलितैरङ्गमोटनैर्गुणौघैश्च वा कृत्वा अन्तःपुरे विस्तृता वागुरा लक्षणया वशीकरणद्रव्यं येन । गुणा एव वागुरास्थाने यस्य जाता इत्यर्थः । अथ च केशपङ्क्तीनां वलितैस्त्रिगुणितैर्दोरकसङ्घैर्नगरमध्ये विस्तृतवागुरोऽपि । बालां नलः साभिलाषं नापश्यदित्यर्थः ॥

दोर्मूलमालोक्य कचं रुरुत्सोस्ततः कुचौ तावनुलेपयन्त्याः ।
नाभीमथैष श्लथवाससोऽनु मिमील दिक्षु क्रमकृष्टचक्षुः ॥ २० ॥ [३]

दोरिति ॥ एष नलः कचं केशपाशं रुरुत्सोर्बन्धुमिच्छोः कस्याश्चित्केशसंयमनादेव दोर्मूलं बाहुमूलमालोक्य ततस्तस्माद्देशात्किंचिदधोनमितदृष्टिः, ततश्चन्दनादिनाऽनुलेपयन्त्या

१ 'अत्र च्छेकानुप्रासभ्रान्तिमावोदयालंकार संकरः' इति साहित्यविद्याधरी । २ 'अत्रोत्प्रेक्षोपमा-भावोदयालंकारसंकरः' इति साहित्यविद्याधरी । ३ 'अत्र विशेषोक्तिरूपकश्लेषालंकारसंसृष्टि' इति साहित्यविद्याधरी ।

यद्वा—शम्बरारेः संबन्धिमाया निर्माणकौशलं सा जातेव। मदनस्यैवेदं शिल्पं तच्च मायामात्रहेतुकं, न तु प्रसिद्धबाह्यकारणरचितमिति। मायानिर्मितं चातिसुन्दरं भवति कारणगुणानुरोधाभावात्। यद्वा नलेन सा कामस्य शाम्बरीरूपं शिल्पं कौशलं जातेवालक्षि। शम्बरस्य जितत्वात्तन्मायेव भैमीरूपाऽपहृतेत्यर्थः। अथवा जातेवेत्युत्प्रेक्षान्तरम्। प्रागननुभूतापि तदानीं कामस्य शिल्पभूता सा जाता उत्पन्नेवालक्षि। यतोऽपरोक्षमनुभूयते, न च बाध्यते आलिङ्गनालापादिरूपसमर्थप्रवृत्तिजनकत्वादिति भावः। यद्वा शाम्बरीत्युत्प्रेक्षान्तरमेव व्याख्येयम्। विरहवशात्सर्वत्र भैमी दृष्टा सा पूर्वमनुभवतारतम्येन स्मृता सत्यारोपात्प्रतीयते शुक्तौ रजतवत्। यद्वा पूर्वमननुभूतैव स्मरेण प्रतिदिशमपूर्वैवोत्पादिता यथाविषयकं रजतम्। गन्धर्वनगरवन्मायावशादत्यन्तमसत्येवाननुभूतापि भासत इति समुदायतात्पर्यम्॥

अलीकभैमीसहदर्शनान्न तस्यान्यकन्याप्सरसो रसाय।
भैमीभ्रमस्यैव ततः प्रसादाद्भैमीभ्रमस्तेन न तास्वलम्भि॥ १५॥

अलीकेति॥ मोहवशादवलोकिता अलीकभैमी मिथ्याभैमी तया सह तासामपि दर्शनादन्यकन्याप्सरसोऽन्तःपुरस्थिता अप्सरस्तुल्या भैमीव्यतिरिक्ता अबलास्तस्य नलस्य रसाय प्रीतये नाभूवन्। सहदर्शनात्तारतम्यज्ञानस्य संभवादलीकदृष्टाया अपि भैम्याः सकाशादन्या अतिहीना इति तास्वनुरक्तो नाभूत्। किंत्वलीकदृष्टायामपि तस्यामेवेत्यर्थः। तास्वेव भैमीबुद्धिः कथं नेत्यत आह—ततः पञ्चम्यर्थे तसिः। तस्य भैमीभ्रमस्यैव भैमीभ्रान्तेरेव प्रसादात्सामर्थ्यात्तेन नलेन तास्वन्यकन्याप्सरःसु भैमीभ्रमो नालम्भि न प्राप्तः। अलीकदृष्टायास्तस्याः सकाशात्तासामतिहीनत्वात्सादृश्यलक्षणभ्रान्तिकारणाभावाद्भैमीभ्रान्तिर्नोत्पन्नेत्यर्थः॥

भैमीनिराशे हृदि मन्मथेन दत्तस्वहस्ताद्विरहाद्विहस्तः।
स तामलीकामवलोक्य तत्र क्षणादपश्यन्व्यपदद्विबुद्धः॥ १६॥

भैमीति॥ दूत्याङ्गीकाराद्भैमीविषये निराशे वितृष्णेऽपि हृदि विद्यमानान्मन्मथेन दत्तः स्वहस्तः स्वहस्तावलम्बनं यस्मै एवंभूताद्विरहाद्वियोगाद्विहस्तो विह्वलः। हृदि भैमीनिराशे सतीति वा। हृदि व्याकुले इति वा। एवंभूतः स नलः तत्र उपकार्यायामलीकां तामसत्यरूपां भैमीमवलोक्य क्षणात्तस्मिन्नेव क्षणे विबुद्धो भ्रान्तिरहितः तामपश्यन्ननवलोकयन्व्यपदद्विपादं प्राप। दूत्याङ्गीकाराद्भैम्यां निराशत्वेन शान्तोऽपि विरहः कामेन स्वहस्तं दत्त्वा पुनरुद्दीपितः। विरहजनितया भ्रान्त्या भैमी तेनावलोकिता, भ्रान्त्यपगमे च नावलोकितेत्यन्वेक्षणहेतुर्मम बोधो वृथा जातो यत्प्रसादान्मया भैमी विलोकिता, सा भ्रान्तिर्गता कष्टं जातमिति दुःखितोऽभूदित्यर्थः। येन हस्तो दत्तस्तस्य हस्तराहित्यं स्वयुक्तम्। अत्र विपरीतमित्याश्चर्यम्। व्यपदत् लृदित्त्वादङ् 'प्राक्सितादड्व्यवायेऽपि' इत्यधिकारे 'सदिरप्रतेः' इति षत्वम्। 'विहस्तव्याकुलौ समौ' इत्यमरः॥

---

१ 'अत्र च्छेकानुप्रासरूपविशेषालंकारसंकरः' इति साहित्यविद्याधरी। 'हेतूत्प्रेक्षा' इति जीवातुः। २ 'अत्रोत्प्रेक्षारूपकालंकारौ' इति साहित्यविद्याधरी। ३ 'अत्र भावोदयालंकारः' इति साहित्यविद्याधरी।

विलेपयन्त्यास्तस्या एव तावतिसुन्दरौ कुचौ स्तनावालोक्य ततोऽपि किंचिन्नमितदृष्टिः, अथ कुचलेपनानन्तरं नाभीविलेपनार्थं श्लथवाससः श्लथीकृतवसनायास्तस्या एव नाभीमालोक्य ततोऽप्यधोनमितदृष्टिः। एवं दिक्षूर्ध्वदेशादधोदेशे क्रमेण कृष्टं समाकृष्टं चक्षुर्येन एवंभूतः सन् अनु पश्चादनवलोकनीयस्य कस्याप्यङ्गस्यावलोकनप्रसङ्गान्निमील नेत्रनिमीलनमेव चकार। अत्राप्युत्तमत्वं सूचितम्[१] ॥

मीलन्न शेकेऽभिमुखागताभ्यां धर्तुं निपीड्य स्तनसान्तराभ्याम्।
स्वाङ्गान्यपेतो विजगौ स पश्चात्पुमङ्गसङ्गोत्पुलके पुनस्ते ॥ २१ ॥

मीलन्निति ॥ मीलन्संकोचितनयनः स नलोऽभिमुखं संमुखमागताभ्यां स्त्रीभ्यां मध्ये विद्यमानो निपीड्य नितरां पीडनं कृत्वा धर्तुं न शेके न शक्तः। यतः—स्तनाभ्यां कृत्वा सान्तरे व्यवधानसहिते ताभ्याम्। उभयोरुच्चैः स्तनावेव परस्परमिलितौ, न तु तयोः परस्परसंश्लेषो जातः, स्तनसान्तरत्वात्, ताभ्यामपेतो निर्गतः सन् पश्चात्स्वाङ्गानि स्वीयानवयवान् परस्त्रीसंसर्गाद्विजगौ विशेषेण निनिन्द, एतेऽनुचितकारिण इति। ते स्त्रियौ पुनः पुंसोऽङ्गसङ्गेनोत्पुलके सात्त्विकभावोद्बोधाद्रोमाञ्चिते जाते। स्त्रीणां पापप्रधानत्वात्परपुरुषसंयोगेन तयो रोमाञ्चितत्वं जातम्। नलेन तूत्तमपुरुषत्वात्परस्त्रीसंसर्गादङ्गनिन्दा कृतेति भावः। धर्तुम्, शकियोगे तुम्[२] ॥

निमीलनस्पष्टविलोकनाभ्यां कदर्थितस्ताः कलयन्कटाक्षैः।
स रागदर्शीव भृशं ललज्जे स्वतः सतां ह्रीः परतोऽतिगुर्वी ॥ २२ ॥

निमीलनेति ॥ निमीलनं परस्त्रीसंसर्गात्प्रकटविलोकनं च विवस्त्रस्त्रीदर्शनात् निमीलनस्पष्टविलोकनाभ्यां कदर्थितः पीडितः अतस्तास्तरुणीरुभयपरिहारार्थं कटाक्षैः कलयन्नवलोकयन् स नलो रागेणानुरागेण दर्शीव पश्यन्निव भृशं ललज्जे लज्जितः। लज्जा तु अन्यतो भवति, तत्कथं लज्जित इत्यत आह—सतां साधूनां परतः सकाशात्स्वतो ह्रीर्लज्जातिगुर्व्यतिमहती भवति। स्वतो यावती लज्जा भवति तावती परतो न। तस्माददृश्यत्वेन कटाक्षावलोकनेन स्वयमेव ललज्जेत्यर्थः[३] ॥

रोमाञ्चिताङ्गीमनु तत्कटाक्षैर्भ्रान्तेन कान्तेन रतेर्निदिष्टः।
मोघः शरौघः कुसुमानि नाभूत्तद्धैर्यपूजां प्रति पर्यवस्यन् ॥ २३ ॥

रोमेति ॥ नलाङ्गसङ्गाद्रोमाञ्चिताङ्गीं स्त्रियमनु लक्षीकृत्य तस्य नलस्य कटाक्षैः एतावपि परस्परमनुरक्ताविति भ्रान्तेन रतेः कान्तेन कामेन परस्परसंभोगार्थं निदिष्टः क्षिप्तः कुसुमानि पुष्पलक्षणः शरौघः मोघो निष्फलो नाभूत्। यतः—तस्य नलस्य धैर्यपूजां प्रत्युद्दिश्य पर्यवस्यन्संजाततात्पर्यः। मुख्यप्रयोजनाभावेऽपि नलसदृशः कोऽपि धीरो नास्तीति तद्धैर्यपूजायामुपयोगात्पुष्पसाफल्यम्[४] ॥

---

१ 'अत्र दीपकभावोदयालंकारसंकरः' इति साहित्यविद्याधरी। २ 'अत्र हेतुभावोदयालंकारौ' इति साहित्यविद्याधरी। ३ 'अत्र काव्यलिङ्गोपमार्थान्तरन्यासालंकारसंकरः' इति साहित्यविद्याधरी। ४ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी। 'अत्र नलधैर्यभङ्गाय प्रयुक्तकुसुमशरजालस्य न केवलं तद्भञ्जकत्वम्, प्रत्युत तत्पूजकत्वमापन्नमित्यनर्थोक्तिरूपो विषमालंकारः' इति जीवातुः।

संघट्टयन्त्यास्तरसात्मभूपाहीराङ्कुरप्रोतदुकूलहारी।
दिशा नितम्बं परिधाप्य तन्व्यास्तत्पापसंतापमवाप भूपः ॥ २८ ॥

संघट्टेति ॥ भूपो नलः तन्व्याः कस्याश्चित् नितम्बं दिशा करणभूतया परिधाप्य। दिगम्बरं कृत्वेत्यर्थः। तेन परस्त्रीविवसनकरणेन जनितं यत्पापं तेन संतापं परमं दुःखमवाप प्राप। किंभूतायाः—संघट्टयन्त्याः संघट्टं कुर्वन्त्याः। अत एव किंभूतः—परस्त्रीसंस्पर्शभिया तरसा झटिति निवृत्तत्वादात्मनो भूषा अलंकाराः तेषु हीरकाः, तेषामङ्कुराः कोटयः तत्र प्रोतं स्यूतं दुकूलं हरति एवंशीलः। स्यूतत्वात्स्वत एवागच्छतो दुकूलस्य नेता। अबुद्धिकारित्वेऽप्यतितरां मयैतदनुचितं कृतमिति संतापादुत्तमत्वं सूचितम् ॥

हतः कयाचित्पथि कन्दुकेन संघट्ट्य भिन्नः करजैः कयापि।
कयाचनाक्तः कुचकुङ्कुमेन संभुक्तकल्पः स बभूव ताभिः ॥ २९ ॥

हत इति ॥ स नलः पथि चतुष्पथरूपे कयाचित्सुन्दर्या कन्दुकेन हतः अन्यस्यै प्रहितः कन्दुको मध्येमार्गमदृश्यरूपस्य तस्य लग्नः। कयाचित्तत्रैव संघट्य बुद्धिपूर्वं करजैर्भिन्नोऽङ्कितः। कयाचन तत्रैव संघट्य बुद्धिपूर्वमालिङ्गनवशात्कुचकुङ्कुमेनाक्तो म्रक्षितः। एवं ताभिरन्तःपुरसुन्दरीभिः संभुक्तकल्प ईषदूनः संभुक्तो बभूव। ग्राम्यधर्माभावादीषदूनत्वं संभोगस्य। ताभिरिति तृतीयया तासामेव बुद्धिपूर्वकारित्वम्, न तु नलस्येति सूचितम् ॥

छायामयः प्रैक्षि कयापि हारे निजे स गच्छन्नथ नेक्ष्यमाणः।
तच्चिन्तयान्तर्निरचायि चारु स्वस्यैव तन्व्या हृदयं प्रविष्टः ॥ ३० ॥

छायेति ॥ कौतुकिलाददृश्यस्यैव मम प्रतिबिम्बेन भवितव्यमितीच्छावशात्कयापि तन्व्या सुन्दर्या निजे स्वीये हारे छायामयः प्रतिबिम्बरूपः स नलः प्रैक्षि पूर्वमवलोकितः। अथानन्तरं गच्छन् ततः स्थानात्स्थानान्तरं गच्छन् अतो हारे न ईक्ष्यमाणः न दृश्यमानः अधुनैव कश्चित्सुन्दरो हारे मया दृष्टः क्वेदानीं गत इति तच्चिन्तया नलचिन्तया कृशा स नलः स्वस्यैव हृदये स्वीयमन्तःकरणे प्रविष्ट इति तन्व्या अन्तर्मनसि चारु सम्यङ्निरचायि निर्धारितः। हृदय एव हारस्य विद्यमानत्वात्तस्मात्स्थानात्तत्रैव प्रविष्ट इति निश्चयः कृत इत्यर्थः। प्रतिबिम्बरूपं तमालोक्य विरहपीडिता जातेति भावः ॥

तच्छायसौन्दर्यनिपीतधैर्याः प्रत्येकमालिङ्गदमूः रतीशः।
रतिप्रतिद्वन्द्वितमासु नूनं नामूषु निर्णीतरतिः कथंचित् ॥ ३१ ॥

तदिति ॥ रतीशः कामः हारादौ तच्छायस्य नलप्रतिबिम्बस्य सौन्दर्येण निपीतमपहृतं धैर्यं यासां ता अमूः अन्तःपुरसुन्दरीः प्रत्येकं पृथक्पृथगालिङ्गत्। ननु रतीशेन रत्या एवालिङ्गनं युक्तम्, न त्वन्यस्या इत्यत आह—नूनमुत्प्रेक्षते। स कामः रतेः प्रतिद्वन्द्वितमास्वतितरां प्रतिस्पर्धिनीषु रतितुल्यास्वमूषु मध्ये कथंचित्केनापि प्रकारेण सौन्दर्यशीलादिना न निर्णीता रतिर्येन एवंभूतो नूनम्। रतेरनिश्चयात्सर्वासामालिङ्गनेन रतेरप्यालिङ्गनं भविष्य-

---

१ 'अत्र श्लेषानुप्रासकाव्यलिङ्गभावोदयालंकारसंकरः' इति साहित्यविद्याधरी। २ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र भावोदयालंकारः' इति साहित्यविद्याधरी।

तीति बुध्येत्यर्थः। नलप्रतिबिम्बदर्शनमात्रेण सर्वा अपि कामपरवशा जाता इति भावः। तस्य छाया, 'विभाषा सेना–' इति नपुंसकत्वम्। प्रतिद्वन्द्वितमात्तु, 'तसिलादिषु–' इति पुंवत्॥

तस्माददृश्यादपि नातिबिभ्युस्तच्छायरूपाहितमोहलोलाः।
मन्यन्त एवाहतमन्मथाज्ञाः प्राणानपि स्वान्सुदृशस्तृणानि॥ २२॥

तस्मादिति॥ ताः सुदृशः तरुण्यः अदृश्यादपि तस्मान्नातिबिभ्युरतिशयं भयं न प्रापुः। यतः—हारादौ तच्छायस्य तत्प्रतिबिम्बस्य यद्रूपं सौन्दर्यं तेनाहितो जनितो मोहो मदनविकारविलासः तेन लोलाश्चञ्चलाः, मदनविकारविलासे आसक्ता वा। तत्प्रतिबिम्बदर्शनेन मदनपरवशत्वाददृश्यादपि तस्माद्भयं न प्रापुरित्यर्थः। एतदपि कुत इत्यत आह—आहतमन्मथाज्ञाः संमानितकामाज्ञाः सुदृशः स्वान्प्राणानपि तृणान्येव तृणतुल्यानेव मन्यन्ते यतः, अतो मदनपरवशत्वाद्भयं न प्रापुरिति युक्तम्। यस्य प्राणवाञ्छापि न विद्यते तस्य भयं दूरापास्तमिति भावः। 'लोलश्चलसतृष्णयोः' इत्यमरः॥

जागर्ति तच्छायदृशां पुरा यः स्पृष्टे च तस्मिन्विससर्प कम्पः।
द्रुते द्रुतं तत्पदशब्दभीत्या स्वहस्तितश्चारुदृशां परं सः॥ २३॥

जागर्तीति॥ तच्छायदृशां नलप्रतिबिम्बावलोकिनीनां चारुदृशां सात्त्विकभावोद्भावितः कम्पः पुरा जागर्ति अजागः। प्रतिबिम्बदर्शनमात्रेण यः कम्पः समुद्भूत्। तस्मिन्नले स्पृष्टे च सति यः कम्पो विससर्प। दर्शनापेक्षया स्पर्शनस्याधिकसात्त्विकजननसामर्थ्याद्दर्शनजन्यकम्पापेक्षया योऽधिको जातः स कम्पः स्पर्शनभयात् द्रुतं शीघ्रं द्रुते पलायिते तस्मिन् अदृश्यस्य तस्य पदशब्दभीत्या चरणशब्दभिया कर्त्र्या पूर्वापेक्षया परम् अतिशयेन स्वहस्तितो दत्तावलम्बनः। वृद्धिं प्रापित इत्यर्थः। अथ च परं केवलं स्वहस्तं प्रापितो दत्तावलम्बः कृतः। भयोत्थोऽयं कम्पो न सात्त्विकभावजनित इत्येवं तया कथित इत्यर्थः। [illegible] तासां दर्शनस्पर्शनजन्यः कम्पः श्रृङ्गारस्यानुभावः पश्चात्तु भयानकस्येति परिणाम [illegible] इति भावार्थः। स्वहस्तितः, तारकादिः। जागर्ति 'पुरि लुङ् चास्मे' इति भूते लट्॥

उल्लासयतां स्पृष्टनलाङ्गमङ्गं तासां नलच्छायपिपापि दृष्टिः।
अदृश्यैव रत्यास्तद्नाति पत्या छेदेऽप्यबोधं यदहारि रोम॥ २४॥

उल्लासयतामिति॥ रत्याः पत्या कामेन तासामन्तःपुरसुन्दरीणां स्पृष्टं नलाङ्गं येन एवंभूतमङ्गमुल्लासितं हर्षप्रकर्षात्पुलकितं नाम। न केवलं तदेव किंतु नलच्छायापिबा नलप्रतिबिम्बपिबा तासां दृष्टिरप्युल्लासिता हर्षवशात् प्रकाशिता नाम। अत्र [illegible] किं तर्हि छेदे कर्तने कृतेऽपि सति अबोधमचेतनं रोम यदहारि हर्षं नायितं तदश्चर्यम् [illegible] एव नर्तितः। अचेतनस्य रोम्णो हर्षं प्रापणमत्याश्चर्यमित्यर्थः। [illegible] इति भावः। उल्लासयताम्, [illegible] ॥ [illegible] 'रोम्णः–' इत्यादिना [illegible]॥

---

१ 'अथ [illegible]' इति साहित्यविद्याधरी। २ 'अथ [illegible]' इति साहित्यविद्याधरी। ३ 'अथ [illegible]' इति साहित्यविद्याधरी। ४ 'अथ [illegible]' इति साहित्यविद्याधरी। [illegible]

संघट्टयन्त्यास्तरसात्मभूषाहीराङ्कुरप्रोतदुकूलहारी ।
दृशा नितम्बं परिधाप्य तन्व्यास्तत्पापसंतापमवाप भूपः ॥ २८ ॥

संघट्टेति ॥ भूपो नलः तन्व्याः कस्याश्चित् नितम्बं दृशा करणभूतया परिधाप्य । दिगम्बरं कृत्वेत्यर्थः । तेन परस्त्रीविवसनकरणेन जनितं यत्पापं तेन संतापं परमं दुःखमवाप । किंभूतायाः—संघट्टयन्त्याः संघट्टं कुर्वन्त्याः । अत एव किंभूतः—परस्त्रीसंसर्गभिया तरसा झटिति निवृत्तत्वादात्मनो भूषा अलंकाराः तेषु हीरकाः, तेषामङ्कुराः कोटयः तत्र प्रोतं स्यूतं दुकूलं हरति एवंशीलः । स्यूतत्वात्सत एवागच्छतो दुकूलस्य नेता । अबुद्धिकारित्वेऽप्यतितरां मयैतदनुचितं कृतमिति संतापादुत्तमत्वं सूचितम् ॥

हतः कयाचित्पथि कन्दुकेन संघट्ट्य भिन्नः करजैः कयापि ।
कयाचनाक्तः कुचकुङ्कुमेन संभुक्तकल्पः स बभूव ताभिः ॥ २९ ॥

हत इति ॥ स नलः पथि चतुष्पथरूपे कयाचित्सुन्दर्या कन्दुकेन हतः अन्यस्यै प्रहितः कन्दुको मध्येमार्गमदृश्यरूपस्य तस्य लग्नः । कयाचित्तत्रैव संघट्य बुद्धिपूर्वं करजैर्नखैर्भिन्नोऽङ्कितः । कयाचन तत्रैव संघट्य बुद्धिपूर्वमालिङ्गनवशात्कुचकुङ्कुमेनाक्तो रञ्जितः । एवं ताभिरन्तःपुरसुन्दरीभिः संभुक्तकल्प ईषदूनः संभुक्तो बभूव । ग्राम्यधर्माभावादीषदूनत्वं संभोगस्य । ताभिरिति तृतीयया तासामेव बुद्धिपूर्वकारित्वम्, न तु नलस्येति सूचितम् ॥

छायामयः प्रैक्षि कयापि हारे निजे स गच्छन्नथ नेक्ष्यमाणः ।
तच्चिन्तयान्तर्निरचायि चारु स्वस्यैव तन्व्या हृदयं प्रविष्टः ॥ ३० ॥

छायेति ॥ कौतुकित्वाददृश्यस्यैव मम प्रतिबिम्बेन भवितव्यमितीच्छावशात्कयापि तन्व्या सुन्दर्या निजे स्वीये हारे छायामयः प्रतिबिम्बरूपः स नलः प्रैक्षि पूर्वमवलोकितः । अथानन्तरं गच्छन् ततः स्थानात्स्थानान्तरं गच्छन् अतो हारे न ईक्ष्यमाणः न दृश्यमानः अधुनैव कश्चित्सुन्दरो हारे मया दृष्टः क्वेदानीं गत इति तच्चिन्तया नलचिन्तया कृत्वा स नलः स्वस्यैव हृदयं स्वीयमन्तःकरणं प्रविष्ट इति तन्व्या अन्तर्मनसि चारु सम्यङ्निरचायि निर्धारितः । हृदय एव हारस्य विद्यमानत्वात्सामीप्यात्तत्रैव प्रविष्ट इति निश्चयः कृत इत्यर्थः । प्रतिबिम्बरूपं तमालोक्य विरहपीडिता जातेति भावः ॥

तच्छायसौन्दर्यनिपीतधैर्याः प्रत्येकमालिङ्गदमूः रतीशः ।
रतिप्रतिद्वन्द्वितमासु नूनं नामूषु निर्णीतरतिः कथंचित् ॥ ३१ ॥

तदिति ॥ रतीशः कामः हारादौ तच्छायस्य नलप्रतिबिम्बस्य सौन्दर्येण निपीतमपहृतं धैर्यं यासां ता अमूः अन्तःपुरसुन्दरीः प्रत्येकं पृथक्पृथगालिङ्गत् । ननु रतीशेन रत्या एवालिङ्गनं युक्तम्, न त्वन्यस्या इत्यत आह—नूनमुत्प्रेक्षते । स कामः रतेः प्रतिद्वन्द्वितमास्वतितरां प्रतिस्पर्धिनीषु रतितुल्यास्वमूषु मध्ये कथंचित्केनापि प्रकारेण सौन्दर्यशीलादिना न निर्णीता रतिर्येन एवंभूतो नूनम् । रतेरनिश्चयात्सर्वासामालिङ्गनेन रतेरप्यालिङ्गनं भविष्य-

---

१ 'अत्र छेकानुप्रासस्वभावोक्तिकाव्यलिङ्गोदात्तालंकाराणां संकरः' इति साहित्यविद्याधरी । २ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी । ३ 'अत्र भावोदयालंकारः' इति साहित्यविद्याधरी ।

यस्मिन्नलस्पृष्टकमेत्य हृष्टा भूयोऽपि तं देशमगान्मृगाक्षी।
निपत्य तत्रास्य धरारजःस्थे पादे प्रसीदेति शनैरवादीत्॥ ३५॥

यस्मिन्निति॥ नलसंमुखमनागच्छन्ती मृगाक्षी हरिणनेत्रा यस्मिन्देशे अन्यापदेशाद्गच्छतो नलस्य गात्रेण सह स्वगात्रसंघटलक्षणं स्पृष्टकाख्यमालिङ्गनमेत्य प्राप्य हृष्टा रोमाञ्चादियुक्ता जाता तं देशं भूयोऽपि पुनरप्यगाज्जगाम। तत्र देशे धरारजःस्थे पृथ्वीरजःसु स्थितेऽस्य नलस्य पादे चरणप्रतिबिम्बे निपत्य नमस्कारं कृत्वा प्रसीदेति अनुग्रहं मम कुर्विति आकम्पेनभीता शनैरवादीदवोचत्। नितरां नलाधीना जातेति भावः। 'यद्योषितः संमुखमनागताया अन्यापदेशाद्व्रजतो नरस्य। गात्रेण गात्रं घटते यदेतदालिङ्गनं स्पृष्टकमाहुरार्याः॥' इति कामशास्त्रम्॥

भ्रमन्नमुष्यामुपकारिकायामायस्य भैमीविरहात्कृशीयान्।
असौ मुहुः सौधपरम्पराणां व्यधत्त विश्रान्तिमधित्यकासु॥ ३६॥

भ्रमन्निति॥ असौ नलः सौधपरम्पराणां सप्तभूमिकप्रासादपरम्पराणामधित्यकासूर्ध्वभूमिषु मुहुः पुनःपुनः विश्रान्तिं व्यधत्त कृतवान्। किं कृत्वा—भैमीविरहात्कृशीयानतितरां कृशो यतः, तस्मादमुष्यामुपकारिकायां भ्रमन् आयस्य बहुश्रमं प्राप्य। श्रमापनोदार्थं क्षणमात्रं तत्र तत्र स्थित्वा ऊर्ध्वगृहान् विशति स्मेत्यर्थः। 'उपत्यकासु' इति पाठः साधीयान्। उपत्यकानां विश्रान्तियोग्यत्वात्। 'उपाधिभ्यां त्यकन्नासन्नारूढयोः' इत्युभयत्रापि त्यकन्॥

उल्लिख्य हंसेन दले नलिन्यास्तस्मै यथादर्शि तथैव भैमी।
तेनाभिलिख्योपहृतस्वहारा कस्या न दृष्टाजनि विस्मयाय॥ ३७॥

उल्लिख्येति॥ हंसेन नलिन्या दले पत्रे भैमीमुल्लिख्य लिखित्वा तस्मै नलाय यथा भैम्यदर्शि दर्शिता तथैव तत्र विश्रान्तेन नलेनाप्यभिलिख्य लिखिता उपहृतः कण्ठेऽर्पितः स्वहारः स्वीयमुक्ताहारो यस्या एवंभूता चित्ररूपा भैमी दृष्टा सती कस्याः शुद्धान्तसुन्दर्या विस्मयायाश्चर्याय न जाता। तथाभूतां तां दृष्ट्वा, केनेयमत्रातिसुन्दरी लिखिता कण्ठार्पितहारा चेति सर्वा अपि विस्मिता जाता इत्यर्थः। विश्रान्त्यर्थं भैमीं लिखित्वा साक्षाद्भैमीप्राप्तिबुद्ध्याऽनन्तरकरणीयसंकल्पवशात्तेन मुक्ताहारार्पणा कृतेति भावः॥

कौमारगन्धीनि निवारयन्ती वृत्तानि रोमावलिवेत्रचिह्ना।
सालिख्य तेनैक्ष्यत यौवनीयद्वाःस्थामवस्थां परिचेतुकामा॥ ३८॥

कौमारेति॥ तेन नलेन सा भैमी आलिख्य ऐक्ष्यत दृश्यते स्म। किंभूता—कौमारं शैशवं तस्य गन्धो लेशोऽपि विद्यते येषु तानि वृत्तानि खेलादीनि निवारयन्ती, निषेधयन्ती, यतः रोमावलिरेव वेत्रयष्टिचिह्नं यस्याः सा। तथा—यौवनीयायां यौवनसंबन्धिन्यां द्वारि तिष्ठतीति यौवनीयद्वाःस्था तामवस्थामाकारविशेषं परिचेतुकामाऽङ्गीकर्तुकामा। वयःसंधिं प्राप्तां लिखित्वा पश्यति स्मेत्यर्थः। अन्यापि वेत्रधारिणी कांश्चिन्निषेधति, द्वाःस्था च भवति। गन्धीनीति, 'अल्पाख्यायाम्' इति गन्धस्येदादेशः॥

---

१ 'अत्र हर्षभावोदयालंकारः' इति साहित्यविद्याधरी। २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी। ३ अस्य साहित्यविद्याधरी त्रुटितास्ति। ४ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी।

पुंसि स्वभर्तृव्यतिरिक्तभूते भूत्वाप्यनीक्षानियमव्रतिन्यः।
छायासु रूपं भुवि वीक्ष्य तस्य फलं दृशोरानशिरे महिष्यः॥ ४३॥

पुंसीति॥ महिष्यो राजपत्न्यः मणिबद्धायां भुवि तत्प्रतिबिम्बेषु केवलायां वा भूमौ आतपाभावरूपासु छायासु तस्य नलस्य रूपं स्वरूपं सौन्दर्यं वा वीक्ष्य दृशोर्नेत्रयोः फलं साफल्यमानशिरे प्रापुः। किं कृत्वा—स्वभर्ता भीमः, तस्माद्व्यतिरिक्तभूते व्यतिरिक्तरूपे पुंसि विषये अनीक्षानवलोकनं तस्यां यो नियमोऽवश्यंभावः तल्लक्षणं यद्व्रतं तद्विद्यते यासामेवंभूता भूत्वापि सुन्दरवस्त्ववलोकनात्तासां नेत्रसाफल्यं जातम्। प्रतिबिम्बस्य वातपाभावस्य वा पुरुषत्वाभावात्तदवलोकनेऽपि व्रतक्षतिर्नाभूदिति भावः॥

विलोक्य तच्छायमतर्कि ताभिः पतिं प्रति स्वं वसुधापि धत्ते।
यथा वयं किं मदनं तथैनं त्रिनेत्रनेत्रानलकीलनीलम्॥ ४४॥

विलोक्येति॥ ताभिर्महिषीभिः भुवि तच्छायं नलस्य छायां विलोक्य इत्यतर्कि उत्प्रेक्षितम्। इति किम्—यथा वयं स्वं भीमलक्षणं पतिं प्रत्युद्दिश्य मदनं धारयामः तथा वसुधापि त्रिनेत्रनेत्रानलस्य त्रिलोचनलोचनाग्नेः कीलेन ज्वालेन नीलं श्यामलंभूतमेनं मदनं भीमलक्षणं स्वं पतिं प्रति धत्ते धारयति किम्। छायायाः श्यामत्वात्त्रिनेत्रेत्यादि विशेषणं युक्तम्। यथा वयं भीमं प्रति मदनं पिदध्महे लज्जावशादन्तर्गूढतया धारयामः, तथा स्वं पतिं प्रति वसुधा मदनं पिधत्ते अन्तर्गूढतया धारयति किमिति वा। नलोऽतिसुन्दर इति भावः। 'वह्नेर्द्वयोर्ज्वालकीलौ' इत्यमरः॥

रूपं प्रतिच्छायिकयोपनीतमालोकि ताभिर्यदि नाम कामम्।
तथापि नालोकि तदस्य रूपं हारिद्रभङ्गाय वितीर्णभङ्गम्॥ ४५॥

रूपमिति॥ ताभिर्महिषीभिः प्रतिच्छायिकया प्रतिबिम्बेनोपनीतं रूपं नलस्वरूपं सौन्दर्यं वा यदि नाम यद्यपि काममालोकि दृष्टम्, तथापि तदतिप्रसिद्धं अस्य रूपं नालोकि न दृष्टम्। यतः हारिद्रभङ्गाय हरिद्राच्छेदाय सुवर्णच्छेदाय वातिगौरत्वाद्वितीर्णो दत्तो भङ्गः पराजयो येन तत्। छायायां गौरत्वादिवर्णानालोकनादिति भावः। अतिसौन्दर्यं सूचितम्॥

भवन्नदृश्यः प्रतिबिम्बदेहव्यूहं वितन्वन्मणिकुट्टिमेषु।
पुरं परस्य प्रविशन्वियोगी योगीव चित्रं स रराज राजा॥ ४६॥

भवन्निति॥ वियोगी स राजा नलः योगीव वियोगरहित इव, अथ च मुनिरिव विरराज। एतच्चित्रं विरहिणो विरहित्वाभावादाश्चर्यम्। यतोऽदृश्यो भवन्मणिकुट्टिमेषु मणिबद्धभूमिषु प्रतिबिम्बदेहव्यूहं प्रतिबिम्बरूपकायसमूहं वितन्वन्विस्तारयन्। तथा—परस्य पुरं नगरं गृहोपरिगृहं वा प्रविशन्। मुनिरप्यदृश्यो भवति, कायव्यूहं च करोति, परस्य जीवान्तरस्य शरीरं च प्रविशति, विषयेभ्यो निवृत्तत्वाद्वियोगी च भवति। 'पुरं पाटलिपुत्रे स्याद्गृहोपरिगृहे पुरम्। पुरं पुरि शरीरे च' इति विश्वः॥

---

१ 'अत्र क्रियाविरोधातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी। २ 'अत्र च्छेकानुप्रासोपनोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र विरोधाभासोपमालंकारः' इति साहित्यविद्याधरी।

पुमानिवास्पर्शि तया व्रजन्त्या छाया तया पुंस इव व्यलोकि ।
ब्रुवन्निवातर्कि तयापि कश्चिदिति स्म स स्त्रैणगिरः शृणोति ॥ ४७ ॥

पुमानिति ॥ स नल इति स्त्रैणगिरः स्त्रीसमूहवाणीः शृणोति स्म । इति किम्—व्रजन्त्या विचरन्त्या तया पुमानिवास्पर्शि स्पृष्टः, विचरन्त्या तया पुंस इव पुरुषस्येव छाया व्यलोकि दृष्टा, तया कश्चिद्ब्रुवन्निव वदन्निवातर्कि । सर्वत्रनासिः सर्वाभिः परस्परं भैमी अन्येन वा एवमुक्तमित्यर्थः । स्त्रैणं समूहे, 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' इति नञ् । स्त्रैणीः स्त्रीसम्बन्धिनीर्गिर इति वा ॥

अन्यां प्रणत्योपनता नताङ्गी नलेन भैमी पथि योगमाप ।
स भ्रान्तिभैमीषु न तां व्यविक्त सा तं च नादृश्यतया ददर्श ॥ ४८ ॥

अन्यामिति ॥ नताङ्गी सुन्दराङ्गी सा भैमी अन्यां मातरं प्रणत्य प्रणम्य उपनता आगता सती नलेन सह पथि योगं संबन्धमाप । स नलः भ्रान्त्या दृष्टासु भैमीषु मध्ये तां सत्यरूपां न व्यविक्त विवेकेन न ज्ञातवान् । सा चादृश्यतया तं न ददर्श । 'सा तं च नादर्शदृश्यमेव' इति पाठे नाद्राक्षीदित्यर्थः । अदर्शत्, 'ऋदृशोऽङि—' इति गुणः । प्रणत्य, 'वा ल्यपि' इत्यनुनासिकलोपे तुक् ॥

प्रसूप्रसादाधिगता प्रसूनमाला नलस्योरुनवीक्षितस्य ।
क्षिप्तापि कण्ठाय तयोपकण्ठं स्थितं तमालम्बत सत्यमेव ॥ ४९ ॥

प्रस्विति ॥ प्रसूप्रसादाधिगता मातृप्रसादप्राप्ता प्रसूनमाला कुसुममाला ऊरुभिः [illegible] वीक्षितस्यापि नलस्य कण्ठाय तया भैम्या क्षिप्ता उपकण्ठे समीपे स्थितं सत्यमेव तं [illegible] तत्कण्ठं चालिङ्गद् ॥

स्रग्दानतादृष्टजनप्रसादः सत्येयमित्यद्भुतमाप नृपः ।
क्षिप्तामदृश्यत्वमितां च मालामालोक्य तां विस्मयते स्म बाला ॥ ५० ॥

स्रगिति ॥ नृपो नल इत्यद्भुतमाश्चर्यमाप । इति किम्—[illegible] भैमीभ्रान्तस्य जनस्य प्रसादरूपेयं स्रक् माल्यं सत्या सत्यरूपेति । [illegible] कुत्रापि सत्यत्वं न दृष्टम्, अत्र तत्पूर्वं दृष्टम् । सा बाला च [illegible] मालामदृश्यत्वमितां प्राप्तामालोक्य विस्मयं विस्मयते स्म [illegible] । [illegible] क्षिप्ता मया स्रग्माला केन नीता किं वा जाता इत्यचिन्तयदित्यर्थः ॥

अन्योन्यमन्यत्रवदीक्षमाणौ परस्परेणाध्युषितेऽपि देशे ।

येन एवंभूतमन्तः अन्तःकरणं ययोरिति वा । सत्यमप्यलीकत्वभ्रान्त्यैवालिलिङ्गतुरिति भावः । परिपस्वजाते, 'सदिस्वजोः परस्य लिटि' इति परस्य षत्वनिषेधः ॥

स्पर्शं तमस्याधिगतापि भैमी मेने पुनर्भ्रान्तिमदर्शनेन ।
नृपः स पश्यन्नपि तामुदीतस्तम्भो न धर्तुं सहसा शशाक ॥ ५२ ॥

स्पर्शमिति ॥ भैमी सत्यरूपं तं अस्य स्पर्शमधिगता प्राप्तापि तस्यादर्शनेन पुनर्भ्रान्ति मेने । सत्यस्य दर्शनेन भाव्यम्, नच दृश्यते सः तस्मादलीकः स्पर्श इत्यमन्यत । स नृपः सत्यरूपां तां पश्यन्नपि झटित्युदीतो जातः सात्त्विकविकाररूपः स्तम्भो यस्य एवंभूतः सन् तां धर्तुं न शशाक ॥

स्पर्शातिहर्षार्द्रतसत्यमत्या प्रवृत्य मिथ्याप्रतिलब्धबाधौ ।
पुनर्मिथस्तथ्यमपि स्पृशन्तौ न श्रद्दधाते पथि तौ विमुग्धौ ॥ ५३ ॥

स्पर्शेति ॥ सत्यरूपपरस्परस्पर्शजनितेन हर्षेणाद्रतयाङ्गीकृतया सत्यमत्या सत्यबुद्ध्या पुनरप्यालिङ्गनादौ प्रवृत्य पुनरप्यलीकपरस्परस्पर्शाभावान्मिथ्यात्वेन प्रतिलब्धः सत्यमतेर्बाधो याभ्यामेवंभूतौ सन्तौ तृतीयस्थाने पथि मार्गे तथ्यं सत्यरूपं मिथः परस्परं पुनः स्पृशन्तावपि विमुग्धौ भ्रान्तौ न श्रद्दधाते सत्यत्वेन स्पर्शं न जानीतःस्म । प्रथमस्थले तात्त्विकोपा(प)लम्भात्, द्वितीयस्थले बाधोपा(प)लम्भात्, तद्दृष्टान्तावष्टम्भेन तृतीयस्थले किं प्रथमस्थल इव सत्यम्, उत द्वितीयस्थल इवासत्यमिति निर्णयाभावादनादरसहितौ जाताविति भावः । पुनरपि तृतीयस्थले सत्यालिङ्गने जातेऽपि विश्वासो नाभूदित्यर्थः ॥

सर्वत्र संवाद्यमबाधमानौ रूपश्रियातिथ्यकरं परं तौ ।
न शेकतुः केलिरसाद्विरन्तुमलीकमालोक्य परस्परं तु ॥ ५४ ॥

सर्वत्रेति ॥ रूपश्रिया परस्परसौन्दर्यशोभया परं अतितरां परस्परस्य आतिथ्यकरं सौख्यकरं सर्वत्र बहुषु स्थलेषु संवाद्यं स्पर्शादिना संवादयोग्यं सत्यरूपं परस्परं कर्मभूतमबाधमानौ सत्यत्वेन मन्यमानौ क्वचिदलीकं तु असत्यं पुनः, असत्यमपि वा परस्परमालोक्य तौ केलिरसात्क्रीडाप्रीतेः विरन्तुं विरतिं प्राप्तुं न शेकतुः समर्थौ नाभूताम् । क्वचिदलीकत्वेऽपि बहुषु स्थलेषु सत्यत्वादालिङ्गनादिक्रीडां चक्रतुरेवेति भावः । 'तथ्यकरम्' इति पाठे कीदृक्परस्परम्—केवलं तथ्यकरं सत्यबुद्धिजनकमिति वा ॥

परस्परस्पर्शरसोर्मिसेकात्तयोः क्षणं चेतसि विप्रलम्भः ।
स्नेहातिदानादिव दीपिकार्चिर्निमिष्य किंचिद्द्विगुणं दिदीपे ॥ ५५ ॥

परेति ॥ परस्परस्पर्शरसः अन्योन्यस्पर्शजनितोऽनुरागस्तस्य ऊर्मिरुद्रेकः तज्जनितात्सेकात्सेचनात्तयोश्चेतसि विप्रलम्भो वियोगः क्षणमात्रं किंचिन्निमिष्य पूर्वापेक्षया द्विगुणं द्वाभ्यां गुणनं यथा तथा दिदीपे प्रदीप्तः । कस्मात्किमिव—स्नेहातिदानात् तैलस्य बहुप्रक्षेपाद्दीपिका-

१ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गभावोदयालंकारौ' साहित्यविद्याधरी । ३ 'अत्र सत्यस्पर्शे श्रद्धायाः कारणे सत्यप्यलीकत्वेन निमित्तप्रतिपा- [illegible] इति साहित्यविद्याधरी । ४ 'अत्र काव्यलिङ्गमलंकारः' इति [illegible] ।

र्चिरिव दीपशिखेव । सा यथा किंचिन्मन्दीभूय द्विगुणं प्रकाशते । अप्राप्तौ सत्यां विप्रलम्भ- स्तादृक् दुःसहो न यथा संयोगपूर्वको वियोग इति भावः ॥

वेश्माप सा धैर्यवियोगयोगाद्बोधं च मोहं च मुहुर्दधाना ।
पुनःपुनस्तत्र पुरः स पश्यन्बभ्राम तां सुभ्रुवमुद्भ्रमेण ॥ ५६ ॥

वेश्मेति ॥ सा भैमी वेश्म स्वगृहम् । आप । किंभूता—धैर्यवियोगयोगात्संबन्धक्र- मेण अत्र नलसंभावना कुतस्त्येति बोधं सम्यग्ज्ञानम्, नल एवायमिति मोहं मिथ्याज्ञानं च मुहुर्दधाना । स नल उद्भ्रमेण भ्रान्तिवशेन तां सुभ्रुवं सुन्दरीं पुनःपुनः पुरोऽग्रे पश्यन् तत्रैव बभ्राम । अलीकतदालिङ्गनादिवाञ्छया तत्रैव विचचारेति भावः ॥

पद्यां नृपः संचरमाण एष चिरं परिभ्रम्य कथंकथंचित् ।
विदर्भराजप्रभवाभिरामं प्रासादमभ्रंकषमाससाद ॥ ५७ ॥

पद्यामिति ॥ पद्यां संचरमाणो विचरन् एष नृपः कथंकथंचित्परिचयाभावादतिमहता क्लेशेन चिरं परिभ्रम्य परितो भ्रमित्वा अभ्रंकषमत्युच्चम् [illegible] विदर्भराजप्रभवया भैम्या अभिरामं सुशोभनादिविशिष्टमित्यर्थः । प्रासादमाससाद प्राप । [illegible] भ्रमवशादेव प्रासादं प्राप्तवान्, न तु बुद्धिपूर्वकमिति भावः । संचरमाणः 'समस्तृतीयायुक्तात्' इति तङ् । कथंकथंचित् इति [illegible] । अभ्रंकषम्, 'सर्वकूलाभ्र-' इति खच् ॥

सखीशतानां सरलैर्विलासैः स्मरावरोधभ्रमनावहन्तीम् ।
विलोकयामास सभां स भैम्यास्तस्य प्रतोलीमणिवेदिकायाम् ॥ ५८ ॥

सखीति ॥ स नलः तस्य प्रासादस्य प्रतोल्यां पुरोमार्गे मणिवेदिकायां मणिबद्धभूमौ भैम्याः सभां विलोकयामास । किंभूताम्—सखीशतानां सरलैः [illegible] स्मरावरोधभ्रमम् [illegible] आवहन्तीं कुर्वतीम् । [illegible] ॥

कण्ठः किमस्याः पिकवेणुवीणास्तिस्रो जिताः सूचयति त्रिरेखः ।
[illegible] ॥ ५९ ॥

कण्ठ इति ॥ [illegible]

एतं नलं तं दमयन्ति पश्य त्यजार्तिमित्यालिकुलप्रबोधान्।
श्रुत्वा स नारीकरवर्तिसारीमुखात्स्वमाशङ्कत यत्र दृष्टम् ॥ ६० ॥

एतमिति ॥ यत्र सभायां स नलः नारी सुन्दरी तत्करवर्तिनी सारी सारिका तस्या मुखादित्येवं आलिकुलेन सखीसमूहेन पाठितान्प्रबोधान् सान्त्वनवाक्यानि श्रुत्वा स्वात्मानं ताभिर्दृष्टमाशङ्कत। इति किम्—हे भैमि दमयन्ति, त्वं तं मनसि स्थितमेतं पुरोवर्तिनमागतं वा नलं पश्य, आर्तिं तद्वियोगजनितां पीडां त्यजेति । अहमेताभिः प्रायोऽत्र दृष्टः अन्यथा सारिकामेवमेताः कुतः पाठयन्तीति ॥

यत्रैकयालीकनलीकृतालीकण्ठे मृषाभीमभवीभवन्त्या।
तद्दृक्पथे दौहदिकोपनीता शालीनमाधायि मधूकमाला ॥ ६१ ॥

यत्रेति ॥ यत्र सभायां मृषा मिथ्या भीमभवीभवन्त्या भैमीवेषं धारयन्त्या एकया अलीकनलीकृतालीकण्ठे असत्यनलाकारीकृतसखीकण्ठे दौहदिकोपनीता मालाकारेणानीता मधूकमाला तस्याद्दृश्यस्य नलस्य दृक्पथे दृग्गोचरे शालीनं सलज्जमाधायि निक्षिप्ता। भैमीविनोदार्थं तादृशीमेव क्रीडां सर्वाः कुर्वन्तीति भावः । दौहदिका धात्री वा। वृक्षादिदोहदे नियुक्तो दौहदिकः 'तत्र नियुक्तः' इति ठक् । 'शालीनकौपीने अधृष्टाकार्ययोः' इति निपातनाच्छालीनशब्दः साधुः ॥

चन्द्राभमाभ्रं तिलकं दधाना तद्वन्निजास्येन्दुकृतानुबिम्बम्।
सखीमुखे चन्द्रसमे ससर्ज चन्द्रानवस्थामिव कापि यत्र ॥ ६२ ॥

चन्द्रेति ॥ यत्र सभायां कापि काचित्सुन्दरी चन्द्राणामनवस्थामियत्तानवधारणानिर्णयाभावम्, अन्योन्यस्मिन्प्रतिबिम्बादनवस्थितिं वा ससर्ज इव। किंभूता—चन्द्रसमे चन्द्रतुल्ये निजसखीमुखेऽतिस्वच्छत्वाच्चन्द्राभं चन्द्रतुल्यम्, आभ्रमभ्रमतिस्वच्छद्रव्यविशेषः तत्संबन्धि आभ्रं तद्रूपं तिलकं ललाटाभरणं दधाना कुर्वाणा। किंभूतमाभ्रं तिलकं—तद्वच्चन्द्राकाराभ्रतिलकयुक्तं निजं स्वीयमास्यं तल्लक्षण इन्दुः तेन कृतमनुबिम्बं यत्र । चन्द्राकाराभ्रतिलकयुक्तस्वीयमुखचन्द्रे कृतमनुबिम्बं येनेति वा । यन्मुखे चन्द्राकारे चन्द्राकारोऽभ्रतिलकः क्रियते, तस्याश्चन्द्राकारोऽभ्रतिलको, मुखं च द्वौ चन्द्रौ अलंकारकारिण्याश्चन्द्राकाराऽभ्रतिलके प्रतिबिम्बितौ। यया चालंकारः क्रियते तस्या मुखं, तत्र विद्यमानोऽभ्रतिलकश्च द्वौ चन्द्रौ यस्याः क्रियतेऽलंकारस्तन्मुखचन्द्राभ्रतिलके प्रतिबिम्बितौ एवं प्रतिबिम्बितयोरपि परस्पराभिमुखमुखचन्द्राभ्रतिलकयोः प्रतिबिम्बरूपौ परस्परमुखचन्द्राभ्रतिलकौ प्रतिबिम्बितौ। एवं प्रतिबिम्बितप्रतिबिम्बादावित्येवं चन्द्रानवस्था द्रष्टव्या। तद्वियतेऽत्र—तद्वदित्यत्र मतुपो मकारस्य 'म्वयः' इति वः ॥

दलोदरे काञ्चनकेतकस्य क्षणान्मसीभावुकवर्णलेखम्।
तस्यैव यत्र स्मनङ्गलेखं लिलेख भैमी नखलेखिनीभिः ॥ ६३ ॥

---

१ 'अत्र शङ्काभावोदयालंकारः' इति साहित्यविद्याधरी। 'सारीवान्ये नारीवानयभ्रमाक्रान्तिमदलंकारो व्यज्यते इति वस्तुनालंकारध्वनिः' इति जीवातुः। २ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। ३ 'अत्र रूपकोपमोत्प्रेक्षालंकारसंकरः' इति साहित्यविद्याधरी।

दलोदरेति ॥ यत्र सभायां तत्रैव काञ्चनकेतकस्य सुवर्णकेतकीकुसुमस्य दलोदरे पत्रगर्भे क्षणालेखनानन्तरं क्षणमेव नवीनाबुका नवीनेवनशीला वर्णलेखा यस्मिन् तत्रैव नलसंबन्धिननेव मम नखक्षतादिवाञ्छा विद्यत इत्येवमादिरूपं स्वं स्वीयमनङ्गलेखं मदनोपदिष्टं लेखनं भैमी नखलेखिनीभिलिलेख । विरहिणीभिः स्वीयभावसूचनार्थं प्राणेशाय पत्रिका प्रेष्यते, तस्यां वर्णाश्च लिख्यन्ते । केतकीपुष्पेषु नखलेखानां श्यामीभवनं स्वभावः । भावुकइति, 'लषपत–' इति शीले उकञ् ॥

विलेखितुं भीमभुवो लिपीषु सख्याऽतिविख्यातिभृतापि यत्र ।
अशाकि लीलाकमलं न पाणिरपारि कर्णोत्पलमक्षि नैव ॥ ६४ ॥

विलेखितुमिति ॥ यत्र सभायां लिपीषु चित्रकर्मसु अतिविख्यातिभृताऽतिकुशलया अपि भैमीसख्या भीमभुवो भैम्या लीलाकमलं भित्तौ चित्रपटे वा विलेखितुमशाकि शक्तम्। पाणिः करो नैव लेखितुं शक्यः । तथा—कर्णोत्पलं कर्णाभरणीभूतं विलेखितुमपारि पर्याप्तम्। अक्षि तु लेखितुं नैवापारि । लीलाकमलावतंसोत्पलापेक्षया पाणिनयनयोरतिसुन्दरत्वाल्लेखितुं न शक्तमिति भावः । विलेखितुम्, 'शकधृष–' इति, 'पर्याप्तिवचन–' इति वा तुमुन्, लघूपधत्वाद्गुणः । लिपीषु, 'कृदिकारात्–' इति ङीष् ॥

भैमीमुपावीणयदेत्य यत्र कलिप्रियस्य प्रियशिष्यवर्गः ।
गन्धर्ववध्वः स्वरमध्वरीणतत्कण्ठनालैकधुरीणवीणः ॥ ६५ ॥

भैमीमिति ॥ यत्र सभायां कलिप्रियस्य नारदस्य गन्धर्ववधूलक्षणः प्रियः शिष्यवर्गः एत्यागत्य भैमीमुपवीणयद्वीणया उपागायत् । किंभूतः—स्वरमधुना स्वरमाधुर्येणाध्वरीणं पूर्णं तस्या भैम्याः कण्ठनालं तेन एकधुरां वहति एकधुरीणा तुल्या वीणा यस्य । प्रथमं गन्धर्ववध्वः, अनन्तरं नारदेन वीणावादनमध्यापिताः, अतिकौशलात्तस्यातिप्रियाः । एवंविधा अपि वीणावादने ततोऽप्यधिकं कौशलमभ्यसितुं तत्रागत्य भैमीं वीणयोपगायन्ति स्मेति भावः । वीणागन्धर्वापेक्षया भैमीकण्ठस्यातिमाधुर्यं सूचितम् । नालपदेन मुखस्य कमलत्वं च । 'स्व(ध्व)नं येनं क्रुतं छुटम्' इत्यमरः । वीणम्, 'वीरीङ् क्षरणे' इत्यादेरिव्याकिरणात्सन्। उपावीणयत्, 'सत्यापपाश–' इति णिच् । कलिः प्रियो यस्येति 'वा प्रियस्य' इति पूर्वनिपातामावः । एकधुरीणेत्यत्र 'एकधुराल्लुक्च' इति खः ॥

नाथा स्मरः किं हरभीतिगुप्ते पयोधरे खेलति कुन्त एव ।
इत्यर्धचन्द्राननखाङ्कचुम्बिकुचा सखी यत्र सखीभिरूचे ॥ ६६ ॥

नाथेति ॥ यत्र सभायां सखीभिः सखी इति पूर्वमूचे । किंभूता—अर्धचन्द्राकारो नखाङ्को नखक्षतं तेन चुम्बितावाश्लिष्टौ कुचौ यस्याः । इति किम्—हे सखि, स्मरस्य तव पयोधरे खेलन्नेव कुन्त एव, अथ च पयोधरे [illegible] कुन्त एव, [illegible] भीतिवशात् [illegible] गोपायतीति हरभीतिगुप् एवंभूतः सन् [illegible] । किं [illegible] । अर्धचन्द्राकार [illegible] कुन्तम् । [illegible]

१ [illegible] साहित्यविद्याधरी । २ [illegible] ३ [illegible] साहित्यविद्याधरी ।

प्रयासो मा भूत्। त्वं लक्ष्म्याः सकाशादतिसुन्दरी, एनं वृणीष्वेति भावः। अतिसौन्दर्येण लमेवेक्षुरससमुद्रसंभवा लक्ष्मीरित्यर्थः। इक्षुरस एवोदकं यस्य, 'उदकस्योदः संज्ञायाम्' इति उदभावः॥

लोकस्रजि द्यौर्दिवि चादितेया अप्यादितेयेषु महान्महेन्द्रः।
किंकर्तुमर्थी यदि सोऽपि रागाज्जागर्ति कक्षा किमतः परापि॥ ८१॥

लोकेति॥ हे भैमि, लोकस्रजि चतुर्दशभुवनमालायां द्यौर्महती स्वर्गोऽधिकः। दिवि च आदितेया युद्धसंमुखरणादिप्राप्तदेवत्वापेक्षया अदित्यपत्यानि ये देवास्ते महान्तः। आदितेयेष्वपि महेन्द्रो महान्। सोऽपि एवंविध इन्द्रोऽपि रागादनुरागात् यदि तव किंकर्तुं किंकरीभवितुमर्थी प्रार्थयत इत्यर्थः। नतु केनापि बलात्कारेण प्रवर्तितः। अतः परा अन्या कक्षा उत्कर्षः किं जागर्ति। नास्त्येवेत्यर्थः। इन्द्रोऽपि तव किंकरीभवितुमिच्छति अत एव तव तुल्या कापि सौभाग्यवती सुन्दरी च न विद्यत इति भावः। अदित्या अपत्यानि आदितेयाः, 'कृदिकारादक्तिनः' इति ङीपन्तात् 'दित्यदित्या—' इति ण्यं बाधित्वा 'स्त्रीभ्यो ढक्' इति ढक्॥

पदं शतेनाप मखैर्यदिन्द्रस्तस्मै स ते याचनचाटुकारः।
कुरु प्रसादं तदलंकुरुष्व स्वीकारकृद्भ्रूनटनश्रमेण॥ ८२॥

पदमिति॥ इन्द्रः शतेन मखैर्यज्ञशतेन यत्पदं प्राप स इन्द्रस्तस्मै पदाय ते तव याचने प्रार्थनाविषये चाटूनि प्रियवचनानि करोतीति कारः। त्वं प्रसादं कुरु, तथा तत् ऐन्द्रं पदं स्वीकारकृदङ्गीकारसूचकं भ्रूनटनं भ्रूचालनं तदेव श्रमस्तेन प्रयासमात्रेणालंकुरुष्व। भ्रूभङ्गेनाङ्गीकुरुष्वेत्यर्थः। इन्द्रवरणे स्वर्गाधिपत्यं तवैव भविष्यतीति भावः। प्रभोर्भ्रूविक्षेप एवाङ्गीकारसूचकः। चाटुकारः, 'कृञो हेतुताच्छील्य—' इति प्राप्तस्य टस्य 'न शब्दश्लोक—' इति निषेधादण्॥

मन्दाकिनीनन्दनयोर्विहारे देवे धवे देवरि माधवे वा।
श्रेयः श्रियां यातरि यच्च सख्यां तच्चेतसा भाविनि भावयस्व॥ ८३॥

मन्दाकिनीति॥ मन्दाकिनीनन्दनयोर्विहारे जलक्रीडादौ यच्छ्रेयो मङ्गलं भवेत्। तथा—देव इन्द्रे धवे भर्तरि च यच्छ्रेयः। तथा—माधवे नारायणे देवरि स्वामिनः कनीयसि भ्रातरि च यच्छ्रेयः। तथा—यातरि भर्तृभ्रातृजायायां सखीप्रायायां लक्ष्म्यां च यच्छ्रेयः। हे भाविनि विचारचतुरे भैमि, त्वं तत्सर्वं चेतसा भावयस्व विचारय। इन्द्रवरणे यत्केनापि दुर्लभं तत्सर्वं त्वया सुलभमितीन्द्रं वृणुष्वेति भावः। देवे माधवे च। अग्न्यादीनां वरणे मन्दाकिनीविहारमात्रम्, न तु नन्दनविहारः। तथा—अग्न्यादिर्देवो वरो, न तु माधवो देवरः। तथा—श्रीः संपद्रूपा सखी, न तु लक्ष्मीरूपयातृरूपा सखी। इन्द्रवरणेत्वेतद्द्वयप्राप्तिर्भविष्यति तस्माद्विचारय(र्य) अग्न्यादीन्परित्यज्येन्द्रमेव वृणीष्वेति भावः। भावाः शृङ्गारादयो वा। 'श्यालाः स्युर्भ्रातरः पत्न्याः स्वामिनो देवृदेवरौ', 'भार्यास्तु भ्रातृवर्गस्य

---

१ 'अत्रामराणां लक्ष्म्यन्तरोत्पादनप्रयत्नासंबन्धेऽपि तत्संबन्धोकेरतिशयोक्तिभेदः' इति जीवातुः।
२ 'अत्र लोकादिषु पूर्वपूर्वापेक्षयोत्तरोत्तरस्योत्कर्षोक्तिः' अतः सारालंकारः' इति जीवातुः। 'अत्र हेतुरलंकारः' इति साहित्यविद्याधरी।

यातरः स्युः परस्परम्' इत्यमरः । 'दिव ऋन्' इत्यौणादिक ऋन्प्रत्यये देवा तस्मिन्देवरि । 'यतेर्वृद्धिश्च' इति याता तस्यां यातरि ॥

रज्यस्व राज्ये जगतामितीन्द्राद्याच्ञाप्रतिष्ठां लभसे त्वमेव ।
लघूकृतस्त्वं बलियाचनेन तत्प्राप्तये वामनमामनन्ति ॥ ८४ ॥

रज्यस्वेति ॥ त्रयाणामपि जगतां बलिराज्ये त्वं रज्यस्व प्रीतिमती भवेति इन्द्रात्त्वत्तो याच्ञाप्रतिष्ठां याच्ञाजन्यं माहात्म्यं त्वमेव लभसे प्राप्नोषि नान्या । यस्य त्रैलोक्यराज्यस्य प्राप्तये बलियाचनेन लघूकृतः स आत्मा येन तं पुरुषं वामनं खर्वं महानुभावा आमनन्ति ब्रुवन्ति । याचनजन्यलघुत्वादेव तस्य वामनत्वं, न त्वन्यतः लघुत्वमाश्रित्य वामनेन यद्राज्यमिन्द्रार्थमर्थितं तद्राज्ये त्वं रज्यस्वेतीन्द्रेण स्वयं प्रार्थितायास्तव प्रतिष्ठा कथं न भवति, अपि तु भवत्येव । रज्यस्व, 'रञ्ज रागे' दिवादिः । स्वरितेत्त्वादात्मनेपदम् ॥

यानेव देवान्नमसि त्रिकालं न तत्कृतघ्नीकृतिरौचिती ते ।
प्रसीद तानप्यनृणान्विधातुं पतिष्यतस्त्वत्पदयोस्त्रिसंध्यम् ॥ ८५ ॥

यानिति ॥ त्वं यानेव देवांस्त्रिकालं त्रिसंध्यं नमसि नमस्करोषि तेषां कृतघ्नीकृतिः कृतघ्नीकरणं ते तव न औचिती । तेषामकृतज्ञताकरणं नोचितम् । तर्हि किं कर्तव्यमित्यत आह—त्रिसंध्यं तव पादयोः पतिष्यतः तान्देवानप्यनृणानृणरहितान्विधातुं कर्तुं प्रसीद प्रसन्ना भव । इन्द्रवरणे इन्द्रस्यैवार्थनागच्छद्भिर्देवैरिन्द्रं प्रणम्येन्द्राणीं विहाय तवापि प्रणतिः करिष्यते । त्वया पूर्वं नमस्कृतास्त्रिकालं त्वां नमस्यन्ति (पुरा), तेन तेषामनृणत्वं भविष्यति । इन्द्रं वृणीष्वेति भावः । त्रिकालम्, त्रिसंध्यं च [illegible] । उभयत्राप्यत्यन्तसंयोगे द्वितीया ॥

इत्युक्तवत्या निहितादरेण भैम्या गृहीता मघवत्प्रसादः ।
स्रक्पारिजातस्य ऋते नलाशां वासैरशेषानपुपूरदाशान् ॥ ८६ ॥

इतीति ॥ पारिजातस्य पुष्पस्रक् माला नलस्याशाप्राप्ते नलाभिलाषं विना वासैः परिमलैः कृत्वा अशेषा आशा सकला अपि दिशोऽपुपूरत्पूरयामास । किंभूता स्रक्—इति पूर्वोक्तमुक्तवत्या इन्द्रदूत्या निहिता दत्ता । तथा—आदरेण भैम्या गृहीता च । तथा—मघवत इन्द्रस्य प्रसादरूपा । सर्वा अपि दिशः परिमलबहुलाः कृता इत्यर्थः । आदरेण भैम्या गृहीतत्वादिन्द्रे भैम्यनुरागलेशाभावात् [illegible] शिथिलतो जातः, इन्द्रदूत्या देवानामपि तत एवाभिलषपूर्णं जातमिति भावः । 'न मां तथा [illegible]', '[illegible]' इत्यादिप्रयोगदर्शनात् [illegible] । [illegible] 'पूरी आप्यायने' [illegible] । न च '[illegible]—' इत्यादिना निषेधः [illegible] ।

---

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible]

विधिरनित्य इत्युपधाह्रस्वत्वाभाव इति वा। 'पूरी आप्यायने' इत्यस्य पूरणं पूरः। घञ्। तं करोतीति, 'तत्करोति–' इति णिचि अग्लोपित्वे सति 'नाग्लोपि–' इत्युपधाह्रस्वनिषेधात् अपुपूरदिति वा ॥

आर्ये विचार्यालमिहेति कापि योग्यं सखि स्यादिति काचनायि।
ओंकार एवोत्तरमस्तु वस्तु मङ्गल्यमत्रेति च काप्यवोचत् ॥ ८७ ॥

आर्ये इति ॥ हे आर्ये श्रेष्ठे, इह इन्द्रवरणविषये विचार्यालं विचारो न कर्तव्यः किंतु इन्द्रो वरणीय इति काप्यवोचत्। काचन अयि सखि भैमि, इदमिन्द्रवरणं योग्यमुचितं स्यादित्यवोचत्। कापि च इत्यवोचत्। इति किम्—अत्र इन्द्रवरणविषये [उत्तरं] अङ्गीकारसूचक ओंकार एव वस्तु तात्त्विकं मङ्गल्यमस्तु भवतु इति सखीनां संमतिः, मङ्गल्यमित्यर्हार्थे यत् ॥

अनाश्रवा वः किमहं कदापि वक्तुं विशेषः परमस्ति शेषः।
ईतीरिते भीमजया न दूतीमालिङ्गदालीश्च मुदामियत्ता ॥ ८८ ॥

अनेति ॥ भीमजया इति पूर्वोक्तमभिहिते सति मुदां हर्षाणामियत्ता परिमितता दूतीमालीः सखीश्च न आलिङ्गत्। अनयास्मद्वचनेनेन्द्रवरणमङ्गीकृतमिति बुद्ध्या ता अपरिमितहर्षा जाता इत्यर्थः। इति किम्—हे सख्यः, अहं कदापि कदाचिदपि वो युष्माकमनाश्रवा वचनकारिणी न किम्, अपितु सर्वदा भवद्वचनकारिण्येव भवदुक्तं मया क्रियत एव सर्वदा, परं किंतु वक्तुं शेष अवशिष्टो विशेषोऽस्ति। नालिङ्गत्, अपि त्वालिङ्गदेव। शेषपदश्रवणादल्प एव संतोषोऽभूदित्यर्थ इति वा। विशेषः शेषोऽस्ति किम्, अपितु नास्तीत्युभयत्रापि किमः संबन्धाद्भ्रान्तिवशादपरिमितहर्षा जाता इति वा। परं किंत्वर्थे ॥

भैमीं च दूत्यं च न किंचिदापमिति स्वयं भावयतो नलस्य।
आलोकमात्राद्यदि तन्मुखेन्दोरभून्न भिन्नं हृदयारविन्दम् ॥ ८९ ॥

भैमीमिति ॥ (अहं) भैमीं च दूत्यं च किंचिदपि द्वयोर्मध्ये किमप्यहं नापं न प्राप्तवानिति स्वयं भावयतश्चिन्तयतो नलस्य हृदयारविन्दं यदि यद् भिन्नं विदीर्णं नाभूत् तत् तन्मुखेन्दोर्भैमीमुखचन्द्रस्य आलोकमात्राद्दर्शनादेव नान्यतो हेतोः। पूर्वोक्तचिन्तावशात्तस्य हृदयस्फोटेन यद्यपि भवितव्यं, तथापि भैमीमुखालोकनतत्परतया तेन न भूतमित्यर्थः। हृदयस्फोटपर्यन्तं तस्य दुःखं जातमिति भावः। इन्द्रनारदसूचकभैमीमुखावलोकनान्न स्फुटितमिति भाव इति वा। अथ च कमलं चन्द्रप्रकाशाद्भिन्नं विकसितं न भवति किंतु संकुचत्येवेति युक्तम्। दूत्यप्राप्तौ कीर्तिर्भवति, दूत्याप्राप्तौ कीर्त्यभावाद्दुःखम् ॥

ईषत्स्मितक्षालितसृक्कभागा दृक्संज्ञया वारिततत्तदालिः।
स्रजा नमस्कृत्य तयैव शक्रं तां भीमभूरुत्तरयांचकार ॥ ९० ॥

---

१ 'द्वयोरप्याशयोरभेदाध्यवसायाद्विनोक्तिनिर्वाहः' इति जीवातुः। २ 'अत्र दीपकोऽलंकारः' इति **साहित्यविद्याधरी**। ३ 'अत्रोत्प्रेक्षारूपकमलंकारौ' इति **साहित्यविद्याधरी**। 'इन्दुप्रकाशात्कथमरविन्दविकास इति विरोधो ध्वन्यते' इति जीवातुः। ४ 'बभूव' इति पाठस्तिलकजीवातुसुखा**वबोधासाहित्यविद्याधरीसंमतः**।

ईषदिति ॥ मौनभूः भैमी तथैव लज्जा शक्रं सह वा नमस्कृत्य मालमेव महान्प्रसाद इति कृत्वा तामिन्द्रदूतीमुत्तरयांचकार उत्तरवतीं चकार । इन्द्रवाचिकस्य प्रत्युत्तरं ददावित्यर्थः । तां उत्तरमाचष्टेति वा । किंभूता—इन्द्रस्य दूत्यादीनामिन्द्रे स्वीयानुरागप्रतीतिसूचकहर्षप्रदर्शनात् ईषत्स्मितेनाल्पस्मितेन क्षालितो धौतः सृक्कभाग ओष्ठप्रान्तदेशो यस्याः सा । तथा—सखीसंज्ञया किंचित्कटाक्षविक्षेपलक्षणेन संकेतेन वारिता निषिद्धा 'आर्ये, विचार्यताम्' इति ब्रुवत्यास्तस्या आलापः तस्यै यया । लोकरीत्या नमस्कारोऽनङ्गीकारसूचकः । स्मितशब्देनैवेषत्त्वप्रतीतेरीषत्पदमत्यल्पसूचनार्थम् । 'प्रान्तावोष्ठस्य सृक्कणी' इत्यमरः । उत्तरवतीं करोति, 'तत्करोति—' इति णिचि मतुब्लोपः । तदाचष्टे इति वा णिच् ॥

स्तुतौ मघोनस्त्यज साहसिक्यं वक्तुं कियत्तं यदि वेद वेदः ।
त्रपोत्तरं साक्षिणि हृत्तु नृणामज्ञातृविज्ञापि ममापि तस्मिन् ॥ ९१ ॥

स्तुताविति ॥ हे दूति, 'लोकस्रजि द्यौः—' (६।८१) इत्यादि मघोनः स्तुतौ साहसिक्यमविचार्यकारित्वं त्यज मुञ्च । वर्णयितुमशक्यस्य तस्य वर्णनं त्वं मा कार्षीः । कुतः साहसिकत्वमित्यत आह—तं शक्रं वक्तुं वर्णयितुं यदि वेद जानाति, तर्हि वेदः कियत्किंचिद्वेद नान्यः । मानुषस्य का कथेत्यर्थः । तस्य वर्णनं त्वं करोषीति महत्साहसं तवेत्यर्थः । तस्य वर्णनं न कार्यम् । नृणां हृत्तु साक्षिणि मनुष्यहृदयविज्ञे तस्मिन्निन्द्रे अज्ञातृविज्ञापि अज्ञातारमजानानं विज्ञापयति बोधयत्येवंशीलं ममाप्युत्तरं प्रतिवचनं त्रपा अर्थाद्व्यर्थमेव । एवंविधमुत्तरमज्ञातारमेव प्रति सार्थकम्, न तु सकलहृदयवेदिनं प्रतीत्यर्थः । त्वत्कृतवर्णनं त्रपा, मया मनसि धृतं नलमिन्द्रोऽपि जानातीति प्रत्युत्तरं वृथेत्यर्थः ॥

आज्ञां तदीयामनु कस्य नाम नकारपारुष्यमुपैतु जिह्वा ।
प्रह्वा तु तां मूर्ध्नि विधाय मालां बालापराध्यामि विशेषवाग्भिः ॥९२॥

आज्ञामिति ॥ कस्य नाम जिह्वा तदीयामैन्द्रीमाज्ञामनु लक्षीकृत्य न करोमीत्येतद्रूपं पारुष्यं काठिन्यमुपैतु प्राप्नोतु, अपितु न कस्यापि । सर्वैरपि तदाज्ञा क्रियत एवेत्यर्थः । तु पुनः प्रह्वा नम्रा सती बालाऽहं तामाज्ञां माल्यस्वरूपां मालां मूर्ध्नि विधाय शिरसा स्वीकृत्य, अथ च नमस्कृत्य, विशेषवाग्भिर्विशेषवचनैरपराध्यामि । 'अदेवदेहमिन्द्रं वृणे' (६।१४)-इत्यादिवचनैः देवदेहं न वृण इति निश्चितत्वादपराध इत्यर्थः । 'अज्ञत्वादाज्ञाया अकरणेऽप्यपराधो न मन्तव्यः' इति बालपदेन सूचितम् । मूर्ध्नीन्द्रवरणात्किमस्याज्ञाङ्गीकृतेत्यर्थः । मालापि मूर्ध्नि विधीयते ॥

तपःफलत्वेन हरेः कृपेयमिमं तपस्येव जनं नियुङ्क्ते ।
भवत्युपायं प्रति हि प्रवृत्तावुपेयमाधुर्यमधैर्यसर्जि ॥ ९३ ॥

तप इति ॥ इयमीदृशी हरेः कृपा तपःफलत्वेन महत्तपसः फलं परिपाकः, तत्त्वेन इमं मल्लक्षणं जनं स्वकार्ये तपस्येव नियुङ्क्ते प्रेरयति । येन तपसेयं कृपा लब्धा तत्र एव त्वया कर्तव्यमिति मामाज्ञापयतीत्यर्थः । तपसः फले जाते पुनरपि तपस्येव स्थितिरिति प्रवर्त-

१ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी ।

यतीत्याशङ्क्याह—हि यस्मादुपेयस्य फलस्य माधुर्यं श्रेष्ठत्वमुपायं स्वसाधनं प्रत्युद्दिश्य प्रवृत्तौ अधैर्यकारि भवति। येनेदं फलं लब्धम्, तदेव पुनरपि कर्तव्यमिति पुरुषं स्वसाधने लम्पटं करोति। अत इयं कृपा तपस्येव प्रेरयतीत्यर्थः। 'स्वादुप्रियौ तु मधुरौ' इत्यमरः। यथा तपसोपायेनात्यन्तदुर्लभापीन्द्रकृपा प्राप्ता, तथैव तपसा नलप्राप्तिर्भविष्यतीति निश्चयात्तपसि मां पुनः प्रवर्तयतीति भावः। नियुङ्क्ते, 'स्वराद्यन्तोपसृष्टात्' इति वक्तव्यात्तङ्[१]॥

शुश्रूषिताहे तदहं तमेव पतिं मुदेऽपि व्रतसंपदेऽपि।
विशेषलेशोऽयमदेवदेहमंशागतं तु क्षितिभृत्तयेह॥ ९४॥

शुश्रूषिताह इति॥ यस्मादियमैन्द्री कृपा तपस्येव मां नियुङ्क्ते, तत्तस्मादहं मुदेऽपि हर्षार्थं व्रतसंपदेऽपि नियमसमूहसिद्ध्यर्थं च तमिन्द्रमेव पतिं प्राणेशं शुश्रूषिताहे तस्यैव सेवां कर्तुमिच्छामि। तर्हि अस्माकं मनोरथेन फलितमित्यत आह—अयं तु अयं पुनः विशेषलेशः स्वल्पो विशेषः इह भुवि क्षितिभृत्तया राजत्वेनांशेनागतं राज्ञो लोकपालांशत्वस्मरणादेवंविधमदेवदेहं मनुष्यशरीरम्। इन्द्रांशं भूमीन्द्रं नलमेव वृणे, नतु देवदेहमिन्द्रमिति भावः। शुश्रूषिताहे, 'ज्ञाश्रुस्मृदृशां सनः' इति तङ्। उत्तमैकवचने टेरेत्वे 'ह एति' तासेः सस्य हः[२]॥

अश्रौषमिन्द्रादरिणीर्गिरस्ते सतीव्रतातिप्रतिलोमतीव्राः।
स्वं प्रागहं प्रादिपि नामराय किंनाम तस्मै मनसा नराय॥ ९५॥

अश्रौषमिति॥ हे दूति, अहं ते तव गिरोऽश्रौषम्। किंभूता गिरः—इन्द्रे आदरोऽस्त्यासां ताः। तथा—सतीव्रतस्य पतिव्रताव्रतस्य अतिप्रतिलोमा अतिप्रतिकूलाः अत एव तीव्रा दुःसहाः। अनुचितमेतन्मया कृतमिति शेषः। अनूढायाः सतीत्वाभावाद्व्रतलोपः कुतस्तरामित्यत आह—अहं स्वं आत्मानं मनसान्तःकरणेन प्राक्पूर्वं अमराय देवेन्द्राय न प्रादिपि न दत्तवती, किंनाम किंतर्हि—नराय मनुष्याय तस्मै इन्द्राय इन्द्रांशत्वाद्भूमीन्द्राय मनसा आत्मानं दत्तवती, अथ च रलयोरभेदात्तस्मै प्रसिद्धाय नलाय। 'मनः पूर्वरूपम्, वागुत्तररूपम्' इति श्रुतेः कायिकवाचिकयोर्मनःपूर्वकत्वान्मानसस्यैव विवाहस्य मुख्यत्वादन्तःकरणेन पूर्वमेव नलस्य वृतत्वान्मम सतीत्वम्। सत्या च परपुरुषकथापि नाकर्णनीया, सा च मयाकर्णितेत्यनुचितं कृतमिति भावः। प्रादिपि, दाञो लुङ्युत्तमपुरुषैकवचने 'स्थाघ्वोरिच्च' इतीत्त्वकित्वे॥

तस्मिन्विमृश्यैव वृते हृदैषा मैन्द्री दया मामनुतापिकाभूत्।
निर्वातुकामं भवसंभवानां धीरं सुखानामवधीरणेव॥ ९६॥

तस्मिन्निति॥ तस्मिन्नले विमृश्यैव विचार्यैव हृदा मनसा वृते सति एषा दया मामनुतापिका पश्चात्तापयिष्यन्ती मा भूत्। यदि मया नलः पूर्वं न वृतः स्यात् तर्हीदानीमिन्द्रो व्रियेत। पूर्वमविचार्यैवाहं नलं वृतवती, अनुचितमेतत्कृतमिति पश्चात्तापो न विद्यत इत्यर्थः। का कमिव—भवे संसारे संभव उत्पत्तिर्येषां सुखानामापातरमणीयानामवधीरणा अवज्ञा निर्वातुकामं मुमुक्षुं धीरमिव यथा न संतापयति। कस्मिन्सति—कस्मिंस्त-

१ 'अत्र अर्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी। २ 'अत्र हेतुरलंकारः' इति सा॰ वि॰।

छन्दवाच्ये ब्रह्मणि हृदा विमृश्यमानीकृते सति । विषया मया तृषा लब्धा इति यथा धीरो न तप्यते तथाहमपि न तप्ये इत्यर्थः । मोक्षसुखस्य संसारसुखस्य च यावदन्तरं तावन्नलेन्द्रयोरिति भावः । नानुतापिका, भविष्यदकेन योगे 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठीनिषेधाद्द्वितीया ॥

'मुदेऽपि नतत्तत्पदेऽपि' (६।९४) इत्युक्तं विवृणोति—

वर्षेषु यद्भारतमार्यधुर्याः स्तुवन्ति गार्हस्थ्यमिवाश्रमेषु ।
तत्रास्मि पत्युर्वरिवस्ययेह शर्मोर्मिकिर्मीरितधर्मलिप्सुः ॥ ९७ ॥

वर्षेष्विति ॥ आर्येषु साधुषु मध्ये धुर्याः श्रेष्ठा मन्वादयः, वर्षेषु इलावृतादिखण्डेषु मध्ये यत् जम्बूद्वीपनवखण्डं भारतं खण्डम् अतिपुण्यभूमित्वात्स्तुवन्ति । केषु किमिव— आश्रमेषु ब्रह्मचर्यादिषु मध्ये गार्हस्थ्यं गृहस्थाश्रममिव । स्तुवन्तीत्यर्थः । 'यथारण्यं समाश्रित्य सर्वे जीवन्ति जन्तवः । वर्तन्ते गृहिणस्तद्वदाश्रित्येतर आश्रमाः ॥' इति । तत्र तस्मिन्निह भारते खण्डे पत्युः प्राणेशस्य नलस्य वरिवस्यया सेवया अहं शर्मणः सुखस्योर्मयः परम्परास्ताभिः किर्मीरितो मिश्रितो धर्मः, तं लिप्सुरभिलाषुकास्मि । नलस्येवयोभयमपि भविष्यतीति स एव वृत इति भावः । भरतस्य क्षत्रियस्येदं भारतम् । 'वरिवस्या तु शुश्रूषा' इत्यमरः ॥

नलवरणेनैव पूर्वोक्तं द्रढयति—

स्वर्गे सतां शर्म परं न धर्मा भवन्ति भूमाविह तच्च ते च ।
शक्या मखेनापि मुदोऽमराणां कथं विहाय त्रयमेकमीहे ॥ ९८ ॥

स्वर्ग इति ॥ स्वर्गे सतां स्थितिमतां जनानां परं केवलं शर्म अस्ति, न धर्माः पुण्यानि । तस्य केवलं भोगभूमित्वात् । इह भारतभूमौ पुनस्तच्च सुखं च ते धर्माश्च सन्ति । कर्मभोगभूमित्वाद्भारतस्येत्यर्थः । इन्द्रे वृते तत्सुखोत्पादनादर्मोऽपि नियत इत्याशङ्क्याह—अमराणां मुदो मखेनापि शक्याः । यज्ञकरणादिन्द्रप्रीतिरपि कर्तुं शक्या इति स्वर्गे केवलं सुखम्, अत्र तु सुखम् धर्मो, देवमुदश्च इत्येतत्त्रयं विहाय केवलमेकं सुखं कथमीहे इच्छामि । तस्मान्नले वृते सुखादित्रयप्राप्तेर्नलवरणमेव न्याय्यः । अन्योऽपि यत्र बहु प्राप्नोति तदेव गृह्णाति । इन्द्रवरणे तस्यैव सुखं, नान्येषाम् । नलवरणे सर्वेषां देवानामित्यभिप्रायेण बहुवचनम् ॥

पूर्वोक्तमेवान्वयव्यतिरेकाभ्यां समर्थयते—

साधोरपि स्वः खलु गामिताधो गमी स तु स्वर्गमितः प्रयाणे ।
इत्यायती चिन्तयतो हृदि द्वे द्वयोरुदर्कः किमु शर्करे न ॥ ९९ ॥

साधोरिति ॥ साधोर्धार्मिकस्यापि स्वः स्वर्गस्तस्मात्प्रयाणे खलु निश्चितमधोगामिता अधःपातिता । 'क्षीणे पुण्ये मर्त्यलोकं विशन्ति' इति भगवद्वचनात् । इतो भारतवर्षात्तु प्रयाणे मरणरूपे सति स साधुः स्वर्गं गमी पुण्यवत्त्वात् । इति द्वयोः स्वर्गमर्त्ययोः द्वे आयती उत्तरकालौ हृदि चिन्तयतो विचारयतः पुरुषस्य द्वयोस्तयोरुदर्क उत्तरं फलं उभे द्विविधे

---

१ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी । २ 'इयम्' इति पाठो जीवातुसंमतः । ३ 'अत्र तनुरूपालंकारः' इति साहित्यविद्याधरी ।

शर्करे न किमुकर्परलेशखण्डविकृती किं न, अपितु स्वर्गफलं कर्परांशतुल्यम्, मर्त्यलोकफलं खण्डविकृतितुल्यम्, अधोगामित्वात्, स्वर्गगामित्वाच्च । तस्मादत्र नलपरिचर्यैव ज्यायसीति भावः । 'शर्करा खण्डविकृतावुपलाशर्करांशयोः' इति विश्वः । गामिता, गमी इति 'भविष्यति गम्यादयः' इति भविष्यतीनौ कृते 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठीनिषेधात्स्वर्गमिति द्वितीया ॥

स्वर्गवाञ्छा सर्वथा न कर्तव्येत्याह—

प्रक्षीण एवायुषि कर्मकृष्टे नरान्न तिष्ठत्युपतिष्ठते यः ।
बुभुक्षते नाकमपथ्यकल्पं धीरस्तमापातसुखोन्मुखं कः ॥ १०० ॥

प्रक्षीण इति ॥ यः स्वर्गः कर्मकृष्टे कर्मार्जिते आयुषि प्रक्षीण एव नितरां क्षीणे सत्येव नरानुपतिष्ठते तैः संगतो भवति । तिष्ठति आयुषि नोपतिष्ठते प्राप्नोति । न तिष्ठति स्थिरो भवतीति वा । क्षणमात्रं न प्रतीक्षते पुनरप्यधोगामित्वात् 'क्षीणे पुण्ये–' इति भगवद्वचनात् । 'कर्मकृष्टेः' इति पाठे पुण्यक्षयादित्यर्थः । धीरः क आपातसुखोन्मुखमविचारितरमणीयसुखकारिणम् । प्रथमान्तपाठे अविचारितरमणीयसुखोद्युक्तः, अपथ्यकल्पमपथ्यतुल्यं तं नाकं बुभुक्षते भोक्तुमिच्छति, अपितु न कोऽपि । तस्मान्नल एव वरणीयो न त्विन्द्र इति भावः । उपतिष्ठते, 'उपाद्देवपूजा–' इत्यादिना संगतिकरणे तङ् पथोऽनपेतं पथ्यम् 'धर्मपथ्यर्थ–' इति यत् । ततो नञ्समासे ईषदसमाप्तौ कल्पप् ॥

इतीन्द्रदूत्याः प्रतिवाचमर्धे प्रत्युह्य सैषाभिदधे वयस्याः ।
किंचिद्विवक्षोल्लसदोष्ठलक्ष्मीजितापनिद्रद्दलपङ्कजास्याः ॥ १०१ ॥

इतीति ॥ इन्द्रदूत्या इति एवंप्रकारं प्रतिवाचं प्रत्युत्तरं अर्धे मध्य एव प्रत्युह्य समाप्य सैषा भैमी वयस्याः सखीरभिदधे उवाच । किंभूताः—किंचिद्विवक्षया इन्द्रवरणानुगुणं किंचिद्वक्तुमिच्छया उल्लसन्तौ स्फुरन्तौ यौ ओष्ठौ तयोर्लक्ष्म्या शोभया जितमपनिद्रद्दलं विकसत्पत्रं पङ्कजं येन एवंविधमास्यं यासां ताः । तस्याः प्रत्युत्तरं त्यक्त्वा मध्ये सखीनिषेधार्थमवददित्यर्थः । ओष्ठौ पद्मदलाधिकौ, मुखं पद्माधिकमित्यर्थः । प्रत्युह्य 'उपसर्गाद्ध्रस्व ऊहतेः' इति ह्रस्वः, अपगता निद्रा येभ्यस्तान्यपनिद्राणीवाचरन्तीति 'सर्वप्रातिपदिकेभ्यः–' इति क्विप् । तदन्ताच्छतृ ॥

अनादिधाविस्वपरम्पराया हेतुत्रजः स्रोतसि वेश्वरे वा ।
आयत्तधीरेष जनस्तदार्याः किमीदृशः पर्यनुयोगयोग्यः ॥ १०२ ॥

अनादीति ॥ अनादि आदिरहितं यथा तथा धाविन्या भ्रमन्त्याः पुनःपुनरावर्तमानायाः स्वस्य [illegible]नः परम्परायाः पद्धतेर्हेतूनां कारणानामदृष्टलक्षणानां शुभाशुभकर्मणां व्रजो [illegible] ईश्वरे वा एष सकलो लोको मल्लक्षणो वा यस्मादायत्ता प्रवाहाधीना [illegible] एवंभूतोऽस्ति । तस्माद्धो आर्या बुद्धिमत्यः सख्यः, ईदृशः परा-

[illegible]' इति साहित्यविद्याधरी । २ 'अत्रोपमालंकारः' इति साहित्यवि[illegible] इति साहित्यविद्याधरी । ४ 'पर्यनुयुज्य कार्यः' इति पाठान्तरं [illegible] परिपृच्छ्य वा कार्यः कारयितुं [illegible]' इति व्याख्यातं तिलकजीवातुसा-

धीनः सकलो महाजनो वा जनः स्तनैवं निश्चिनोतीति पर्यनुयोगं कालेऽपि युक्तो वा तदेव
तदर्हः किम्, अपितु न भवति । अदृष्टनान्दितो वा यथा यथा प्रेरितं प्रवर्तते तद
बुद्धिरेवेति । तथाच स्तनैवं किं निश्चिनोतीत्यादेशं प्रश्नं वा च प्रश्नो नार्हतीति तस्य स्वातन्त्र्या
भावात् । ततश्च अदृष्टवशवर्तित्वसाम्यात् नलेन्द्रयोर्व्यवहारेऽपि त्वं नले किमिति तुल्ये, इ
किमिति नेत्युभयथा पर्यनुयोज्या न भवामीति प्रकृते भवतीभिः किमपि न वक्तव्यमिति भाव
जगादिधायिनां स्वेच्छानियामकानां दर्शनैकदृष्टानां परम्परया हेतुत्वम् । प्रतिद्युतं
नलेनैवाभिसंबन्धः सूच्यते, न त्विन्द्रेणैवाभिसंबन्ध इति वा भावः । 'किं करोति नरः प्रा
प्रेर्यमाणः स्वकर्मभिः' इति, 'किं करोति कुशीलस्य चोदितोऽदृष्टवशंवदः' इति च वृद्धवचन
प्रवाहपतितं हि किमपि कर्तुमशक्यमिति नित्यपदेन सूचितम् ॥

पूर्वोक्तमेवाह—

नित्यं नियत्या परवत्यशेषे कः संविदानोऽप्यनुयोगयोग्यः ।
अचेतना सा च न वाचमर्हद्वक्ता तु वक्रश्रमकर्म भुङ्क्ते ॥ १०३ ॥

नित्यमिति ॥ अशेषे समस्ते जने नित्यं सर्वदा नियत्या दैवेन परवति अदृष्टाधी
सति संविदानोऽपि ज्ञाताऽपि कोऽनुयोगयोग्यः, अपितु न कोऽपि । दैवेन यथा प्रेर्यते त
सर्वोऽपि करोतीत्यर्थः । कुमार्गप्रवृत्त्युत्पादिका नियतिरेव प्रष्टव्येत्यत आह—सा च निय
रपि यतोऽचेतना, अतो वाच्यं नार्हेत् । पूर्वोक्तानियोगकारी पुरुषः पुनर्वक्रश्रमहेतुकं
भुङ्क्तेऽनुभवति, लोकस्य दैवाधीनत्वान्नियतेश्चाचेतनत्वात्तौ प्रतिवचनस्य वैयर्थ्याद्वक्तुः के
कण्ठशोषो भवति, तस्माद्भवतीभिर्मां प्रति किमपि प्रकृते न वक्तव्यमिति भावः । संविद
'समो गम्यृच्छिप्रच्छि—' इत्यादिना तङ् ॥

क्रमेलकं निन्दति कोमलेच्छुः क्रमेलकः कण्टकलम्पटस्तम् ।
प्रीतौ तयोरिष्टभुजोः समायां मध्यस्थता नैकतरोपहासः ॥ १०४ ॥

क्रमेलकमिति ॥ कोमलेच्छुर्मृदुवस्त्वभिलाषी पुरुषः क्रमेलकमुष्ट्रं कठिनवस्तुभक्ष
निन्दति । क्रमेलकः कण्टकलम्पटः कण्टकारी सन् तं कोमलेच्छुं निन्दति । इष्टभुजोः स्वे
भक्षणशीलयोस्तयोः समायां तुल्यायां प्रीतौ न एकतरोपहासः, किंतु मध्यस्थता । यद्यपि
द्वावपि परस्परनिन्दाकारित्वादनुचितकारिणौ तथाप्युदासीनेन पक्षपातो न कार्यः । त
न्मन नले पक्षपातः, दूत्यास्त्विन्द्रे इत्यावयोस्तुल्यायां प्रीतौ सत्यां भवतीभिर्माध्यस्थ्य
कार्यम्, न त्वेकतरोपहासः कार्यः । किमपि न कार्यमिति भावः । समायामिति तुल्
त्वात्पक्षपाताभावः ॥

गुणा हरन्तोऽपि हरेर्नरं मे न रोचनानं परिहापयन्ति ।
न लोकमालोकय थापवर्गात्त्रिवर्गमर्वाञ्चनमुञ्चमानम् ॥ १०५ ॥

गुणा इति ॥ हरन्तो मनोरमा अपि हरेरिन्द्रस्य दूत्युक्ता गुणा मे मह्यं रोचमानं
प्रीतिविषयं नलम्, अथ च नलं न परिहापयन्ति न त्याजयन्ति । अथ च रमणीया

१ '...

हरेरश्वस्य गुणा रोचमानाख्यमावर्तं न परिहापयन्ति । अन्यगुणापेक्षया तस्याधिकगुणत्वादित्यर्थः । ननु हरणशीलत्वेऽपि किमिति तं न त्याजयन्तीत्याशङ्क्य दृष्टान्तेन परिहरति—हे सख्यः, यूयमपवर्गान्मोक्षादर्वाञ्चं हीनमपि त्रिवर्गं धर्मार्थकामरूपममुच्यमानमत्यजन्तं लोकं नालोकयथ । लोको यथा परमसुखरूपं मोक्षं परित्यज्य त्रिवर्गं सेवते तथेन्द्रं परित्यज्य नलं सेवे । रुचिरेवात्र प्रमाणमिति भावः । मे, 'रुच्यर्थानाम्—' इति चतुर्थी ॥

आकीटमाकैटभवैरि तुल्यः स्वाभीष्टलाभात्कृतकृत्यभावः ।
भिन्नस्पृहाणां प्रति चार्थमर्थं द्विष्टत्वमिष्टत्वमपव्यवस्थम् ॥ १०६ ॥

आकीटमिति ॥ हे सख्यः, आकीटं हीनेषु कृमिमभिव्याप्य उत्तमेषु आकैटभवैरि पुरुषोत्तममभिव्याप्य स्वाभीष्टलाभात्सर्वेषां स्वीयस्वीयेप्सितप्राप्तेः कृतकृत्यभावः कृतकृत्यत्वं तुल्यो विष्णोर्यथा स्वाभीष्टलाभात्कृतकृत्यत्वम्, तथा कीटस्यापि स्वाभीष्टलाभात्कृतकृत्यत्वम् । अर्थान्तरन्यासेनैतदेवाह—च यस्माद्भिन्नस्पृहाणां स्वीयं स्वीयमीप्सितमभिलाषुकाणां सर्वेषामर्थमर्थं प्रति विषयं विषयमुद्दिश्य द्विष्टत्वं द्वेषविषयत्वं, इष्टत्वमिच्छाविषयत्वमपव्यवस्थं अपगता व्यवस्था नियमो यस्य (तादृगस्ति) । एकस्य यद्विष्टं तत्सर्वस्यापीति नियमो नास्ति । तस्माद्यस्मै रोचते तत्तस्येष्टम्, यन्न रोचते तत्तस्य द्विष्टमिति । तस्मात् मम नल एवानुरागाद्भवतीभिः किमपि न वक्तव्यमिति भावः । चकारो यस्मादर्थे समुच्चयार्थे वा द्विष्टत्वम्, इष्टत्वं चेति । आकीटम् आकैटभवैरीति 'आङ् मार्यादाभिविध्योः' इति समासः ॥

अध्वाग्रजाग्रन्निभृतापदन्धुर्बन्धुर्यदि स्यात्प्रतिबन्धुमर्हः ।
जोषं जनः कार्यविदस्तु वस्तु प्रच्छ्या निजेच्छा पदवी मुदस्तु ॥१०७॥

अध्वेति ॥ हे सख्यः, बन्धुः सुहृत् अध्वाग्रे पुरोमार्गे जाग्रद्वर्तमानो निभृत आच्छादित आपद्रूपोऽन्धुः कूपो यस्य एवंभूतो यदि स्यात्तर्हि सुहृत्प्रतिबन्धुं निषेद्धुमर्ह उचितः स्यात् । तेन पथा मा गच्छ, यदि गमिष्यसि तर्ह्यापद्रूपे गम्भीरे कूपे पतिष्यसि इति सुहृदा सुहृन्निषेद्धुमुचितः । प्रकृते तु नैवमित्यर्थः । तस्मात्कार्यविद्विपत्कूपाभावं जानानो भवल्लक्षणो जनो जोषं तूष्णीमस्तु भवतु । गुणिनो नलस्य वरणे ममानिष्टं किंचिदपि न भविष्यतीति भवतीभिरहं न निषेद्धव्येति मया नलो विचार्यैव वृतोऽस्ति तस्मात्तूष्णीं स्थातव्यमित्यर्थः । भवतीभिर्निजेच्छा स्वेच्छैव मुदो हर्षस्य पदवी वस्तु मार्गरूपं वस्तु प्रच्छ्या प्रष्टव्या भवतीनामपि यस्मिन्पुरुषादौ हर्षः, तत्रैव किमिति हर्ष इत्यनुयोगे भवतीभिरप्यनुराग एव कारणं वक्तव्यम्, तत्प्रकृतेऽपि तुल्यमिति भावः । मत्कार्यं जानानो जनो जोषमस्तु अजानानस्तु यत्किंचिद्वदत्वित्यर्थः । 'पुंस्येवान्धुः प्रहिः कूपः' इत्यमरः । प्रच्छिर्द्विकर्मा ॥

इत्थं प्रतीपोक्तिमतिं सखीनां विलुप्य पाण्डित्यबलेन बाला ।
अपि श्रुतस्वर्पतिमन्त्रिसूक्तिं दूतीं बभाषेऽद्भुतलोलमौलिम् ॥ १०८ ॥

इत्थमिति ॥ बाला भैमी सखीनां प्रतीपोक्तौ प्रतिकूलवचनविषयिणीं मतिं बुद्धिं पाण्डित्यस्य बलेन सामर्थ्येन इत्थं पूर्वोक्तप्रकारेण विलुप्य प्रमार्ज्य इन्द्रदूतीं बभाषे । किंभूतां

---

१ 'अत्र विभावना, उभयन्यासश्चालंकारः' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र छेकानुप्रासरूपककाव्यलिङ्गालंकारसंकरः' इति साहित्यविद्याधरी ।

सप्तमः सर्गः ।

इत्थमिन्द्रदूतीनिराकरणेन भैम्याः स्वस्मिन्ननुरागं दृढं परीक्ष्य तुष्टो नलो भैमीमेवावर्णयदिति वक्तुं सप्तमं सर्गमारभते—

अथ प्रियासादनशीलनादौ मनोरथः पल्लवितः पुरा यः ।
विलोकनेनैव स राजपुत्र्याः पत्या भुवः पूर्णवदभ्यमानि ॥ १ ॥

अथेति ॥ अथेन्द्रदूतीनिराकरणानन्तरं यो मनोरथः प्रियाया भैम्या आसादने प्राप्तिविषये शीलनादौ च तेन तेन विशेषेण रूपादिपरिकलने विषये आदिपदेनालिङ्गनादिसंभोगविषये पूर्वं पल्लवितः पल्लवयुक्तो जातः भैमीं कथं प्राप्नोमि, कथं वा तस्या विशिष्टं भावादिकं जानामीति चिरमुदितः पूर्वमासीत् । स मनोरथो भुवः पत्या राज्ञा नलेन राजपुत्र्या विलोकनेनैव पूर्णवत्परिपूर्ण इव फलित इवाभ्यमानि संमानितः । प्राप्तिं विनैव दर्शनमात्रेण प्राप्त्यादिजन्यमानन्दं प्रापेति भावः । पल्लवितशब्देन मनोरथस्य वृक्षत्वं सूचितम् । अन्योऽप्यारोपितं पल्लवितं फलितं च दृष्ट्वात्यन्तं संतुष्यति । आसादनं च शीलनादि चेति समास एकवद्भावः । अन्यथा शीलनशब्दस्य पूर्वनिपातापातात्[2] ॥

प्रतिप्रतीकं प्रथमं प्रियायामथान्तरानन्दसुधासमुद्रे ।
ततः प्रमोदाश्रुपरम्परायां ममज्जतुस्तस्य दृशौ नृपस्य ॥ २ ॥

प्रतीति ॥ तस्य नृपस्य दृशौ नेत्रे प्रथमं प्रतिप्रतीकं प्रत्यवयवं प्रियायां भैम्यां ममज्जतुर्निमग्ने । अथ पश्चादन्तरन्तःकरणे आन्तरो वा यः प्रत्यवयवदर्शनजन्य आनन्दस्तद्रूपा सुधामृतं तस्य समुद्रे ममज्जतुः । ततः पश्चात्प्रमोदाश्रुपरम्परायामानन्दजनितबाष्पप्रवाहे ममज्जतुः । अनया रीत्या सर्वेषामप्यवयवानामतिसौन्दर्यं सूचितम् । प्रत्यवयवसौन्दर्यदर्शनादानन्दः, तस्मादश्रुपरम्परा जाता, तया मज्जनदशायां किमपि न दृष्टमित्यर्थः । समुद्रे जलप्रवाहे च निमज्जनमुचितम् ॥

नेत्रप्रमोदमुक्त्वा मनःप्रमोदमाह—

अक्षाद्वयस्यान्वभवत्प्रमोदं रोमाग्र एवाग्रनिरीक्षितेऽस्याः ।
यथौचितीत्थं तदशेषदृष्टावथ स्मराद्वैतमुदं तथासौ ॥ ३ ॥

अक्षेति ॥ असौ नलोऽस्या भैम्या रोम्णोऽप्यग्र एव अग्रे प्रथमं निरीक्षिते सति न विद्यते द्वयं यस्य तदद्वयं, अक्ष च तदद्वयं च अक्षाद्वयं तस्य । चक्षुरेकस्येत्यर्थः । प्रमोदमानन्दं अन्वभवदनुबभूव । अथानन्तरं इत्थमनेन प्रकारेण तस्या भैम्या अशेषा सकला या दृष्टिर्दर्शनं तस्यां तस्यां अशेषभैमीदर्शने सति यथा यादृशी औचिती भवति तथा द्वैतं द्वयोर्भावो द्विता द्वितैव द्वैतं

---

१ 'अक्षिद्वयं' इति पाठो जीवातुसंमतः । २ 'दर्शनमात्रेणैव मनस्य इत्यादि अथ मनोरथस्य नष्टत्वे दमयन्तीविलोकनस्य कारणत्वस्य विरोधे सति इत्याविष्टेन समाधेयः । तेन विरोधाभासोऽलंकारः । अत्र सर्गे उपेन्द्रवज्रा वंशस्थविलसितेषु, तेषूपेन्द्रवज्रा वृत्तम्' इति साहित्यविद्याधरी । ३ 'अत्र दृष्टान्तालंकारस्य विशेषणवशादेवास्य संसृष्टिः' इति जीवातुः ।

तन्न विद्यते यस्यासावद्वैतः सारश्चासावद्वैतश्च, सारस्य द्वैतराहित्यं वा तस्य मुदं हर्षमन्वनवत्। मदनैक्यजनितमानन्दमनुवभूवेत्यर्थः । यस्या निकृष्टस्य रोमाग्रस्यैव निरीक्षणे ब्रह्माद्वैतानन्दो भवति, तस्या रमणीयसकलावयवदर्शने ब्रह्माद्वैतानन्दादधिको मदनाद्वैतानन्द एव भवितुं समुचित इत्यर्थः । सर्वावयवदर्शने मदनानन्देऽमज्जदिति भावः । तेषां रोम्णामशेषदृष्टौ सत्यामिति वा । द्वैतम्, प्रज्ञादित्वात्स्वार्थेऽण्[1] ॥

वेलामतिक्रम्य पृथुं मुखेन्दोरालोकपीयूषरसेन तस्याः ।
नलस्य रागाम्बुनिधौ विवृद्धे तुङ्गौ कुचावाश्रयतः स्म दृष्टी ॥ ४ ॥

वेलामिति ॥ नलस्य दृष्टी दृशौ तस्या मुखेन्दोः आलोको विलोकनं तल्लक्षणेन पीयूषरसेनामृतरसेन विलोकनलक्षणं यदमृतं तस्मिन् वा रसेन तद्विषयिण्या प्रीत्या कृत्वा पृथुं महतीं वेलां दूत्यसमयरूपामतिक्रम्य नलस्य रागाम्बुनिधावनुरागसमुद्रे विवृद्धे वृद्धिं गते सति तुङ्गावुच्चौ कुचौ आश्रयतः स्म । दूत्यसमयमविचार्य मुखचन्द्रावलोकनविवृद्धेनानुरागेण तुङ्गौ कुचौ नलोऽवलोकयति स्मेति भावः । चन्द्रस्य प्रकाशलक्षणेनामृतरसेन महतीं मर्यादामतिक्रम्य समुद्रे वृद्धिं गते सत्याप्लवनभयादन्योऽपि तुङ्गं स्थानमाश्रयति । 'दृष्टिः' इति क्वचित्पाठः[2] ॥

मग्ना सुधायां किमु तन्मुखेन्दोर्लग्ना स्थिता तत्कुचयोः किमन्तः ।
चिरेण तन्मध्यममुञ्चतास्य दृष्टिः कृशीयः स्खलनाद्भिया नु ॥ ५ ॥

मग्नेति ॥ अस्य नलस्य दृष्टिः कृशीयः अतिशयेन कृशं तस्या भैम्या मध्यं चिरेण चिरकालेन अमुञ्चतात्यजत् । मध्यं विलम्बेन तत्याजेत्यर्थः । अत्राप्युत्प्रेक्षते—स्खलनात्पतनाद् भिया भयेन नु किम् । अतिकृशमेतच्छीघ्रं चेत्त्यक्ष्यामि तर्हि पतिष्यामीति बुद्ध्या किं विलम्बेनात्यजत् । किंभूता दृष्टिः—तन्मुखेन्दोः सुधायां मग्ना किमु मुखेन्दावेव विलम्बिता । तथानन्तरं मृणालसूत्रेणापि दुर्लभावकाशे तत्कुचयोरन्तर्मध्ये लग्ना संबद्धा सती निर्गन्तुमशक्तत्वात्स्थिता विलम्बिता । पूर्वं यदङ्गं विलोकितं तदङ्गं सुन्दरत्वात्परित्यक्तुं न शक्ता, किंतु पुनःपुनस्तदेवावलोकयति स्मेति भावः । कृशीयसः सकाशात्स्खलनं कृशीयःस्खलनमिति वा[3] ॥

प्रियाङ्गपान्था कुचयोर्निवृत्त्य निवृत्त्य लोला नलदृग्भ्रमन्ती ।
बभौतमां तन्मृगनाभिलेपतमःसमासादितदिग्भ्रमेव ॥ ६ ॥

प्रियेति ॥ नलदृक् एवंभूता सती बभौतमामतितरां शुशुभे । किंभूता—प्रियाया भैम्या अङ्गस्य प्रत्यङ्गं पान्था नित्यपथिकी । अतएव लोला चञ्चला । अथ च सस्पृहा सती निवृत्त्य निवृत्त्य व्यावृत्य व्यावृत्य कुचयोः भ्रमन्ती । उत्प्रेक्षते, किंभूतेव—तयोः कुचयोर्मृगनाभिलेपः कस्तूरिकालेपस्तल्लक्षणं तमोऽन्धकारस्तेनकृत्वा समासादितः प्राप्तो दिग्भ्रमो दिग्मोहो

---

१ 'विषमोऽलंकारः । उपमापि' इति साहित्यविद्याधरी । अत्र ब्रह्मानन्दरसानन्दयोरेकस्मिन्नेव क्रमेण वृत्तिकथनात् 'एकमनेकस्मिन्' इत्युक्तलक्षणो द्वितीयः पर्यायालंकारभेदः' इति जीवातुः । २ 'अत्र श्लेषमूलातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । 'अत्र दृष्टिविशेषणसामर्थ्याच्चन्द्रोदये समुद्रवृद्धौ तन्निमज्जनभयादुच्चैराश्रयिजनप्रतीतेः समासोक्तिरलंकारः । तेन चाब्धिमज्जनभयादिवेत्युत्प्रेक्षा व्यज्यत इत्यलंकारेणालंकारध्वनिः' इति जीवातुः । ३ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । 'उत्प्रे… समानाधिकरण्यसंकरः' इति जीवातुः ।

यथा एवंभूतेव । अन्योऽपि पान्थस्तनतटप्रासादिद्धोद्दो गमनान्निवृत्त्य निवृत्त्य पूर्वेमेव स्थानं प्राप्नोति । सर्वावयवावलोकनतत्परापि कुचावेवावलोकयति स्म । कुचौ त्यक्तुं न शशाकेति भावः । 'लोलश्चलसतृष्णयोः' इत्यमरः । नित्यं पन्थानं गच्छति पान्थः 'पन्थो ण नित्यम्' इति णः । ततष्टाप् । वभौतमाम्, 'किमेत्तिङव्यय–' इत्यादिनामुः ॥

विभ्रम्य तच्चारुनितम्बचक्रे दूतस्य दृक्तस्य खलु स्खलन्ती ।
स्थिरा चिरादास्त तदूरुरम्भास्तम्भावुपाश्लिष्य करेण गाढम् ॥ ७ ॥

विभ्रम्येति ॥ तस्याश्चारुणि सुन्दरे नितम्बरूपे चक्रे विभ्रम्य परिभ्रम्य स्खलन्ती खलु पतन्तीव तस्य दूतस्य नलस्य दृग्दृष्टिः तदूरुलक्षणौ रम्भास्तम्भौ करेण रश्मिना कृत्वा गाढं निविडमुपाश्लिष्यालिङ्ग्य चिराच्चिरकालं स्थिरा निश्चला आस्त बभूव । अन्यापि चक्रभ्रमणं प्राप्य पतन्ती सती हस्तेन स्तम्भं गाढमालिङ्ग्य चिरं स्थिरा भवति । नितम्बं विलोक्यादरेण तदूरू पश्यति स्मेति भावः ॥

वासः परं नेत्रमहं न नेत्रं किमु त्वमालिङ्ग्य तन्मयापि ।
उरोनितम्बोरु कुरु प्रसादमितीव सा तत्पदयोः पपात ॥ ८ ॥

वास इति ॥ सा नलदृक् इतीव कारणात्तस्पदयोर्भैमीचरणयोः पपात प्रणामं चकार । इति किम्—हे भैमि, वासो वसनमुत्तमपट्टदुकूलविशेषः परं केवलं नेत्रम्, अथ च नेत्रशब्दवाच्यम् । अहं नेत्रं न किमु, अपितु अहमपि नेत्रं नेत्रशब्दवाच्यं यद्भवामि तत्तस्मादुभयोरपि नेत्रशब्दवाच्यत्वलक्षणाद्धेतोः (हे भैमि,) त्वं नेत्रेण वसनेनेव मयापि प्रयोज्येन उरो वक्षः, नितम्बो जघनपश्चाद्भागः, ऊरू च एतेषां समाहार उरोनितम्बोरु आलिङ्ग्य वेष्टय, अथच दर्शयस्व प्रसादं च कुरु तदालिङ्गनार्थं च ममोपरि प्रसन्ना भव इति । अन्योऽपि स्वसमानस्य कस्यचिद्राजादेः सकाशादुत्तमपदप्राप्तिं दृष्ट्वा स्वस्यापि तल्लाभार्थं तच्चरणयोः पतति ममाप्येतद्देयमिति प्रार्थयते च । उरोनितम्बोरु विलोक्य तच्चरणावपि विलोकयति स्मेति भावः । प्राण्यङ्गत्वादेकवद्भावे नपुंसकत्वं च ॥

दृशोर्यथाकाममथोपहृत्य स प्रेयसीमालिकुलं च तस्याः ।
इदं प्रमोदाद्भुतसंभृतेन महीमहेन्द्रो मनसा जगाद ॥ ९ ॥

दृशोरिति ॥ अथ स महीमहेन्द्रो भूमीन्द्रो नलः प्रमोदो भैमीविलोकनेनानन्दः, सौन्दर्यदर्शनादद्भुतमाश्चर्यं च ताभ्यां संभृतेन पूर्णेन मनसा इदं वक्ष्यमाणं जगाद चिन्तयत् । मनसैव तामवर्णयदित्यर्थः । किं कृत्वा—प्रेयसीं भैमीं तस्या आलिकुलं सखीसमूहं च दृशोर्नयनयोर्यथाकाममभिलाषमनतिक्रम्य नयनाभ्यामेव उपहृत्योपनीय ॥

तदेवाह—

पदे विधातुर्यदि मन्मथो वा ममाभिषिच्येत मनोरथो वा ।
तदा घटेतापि न वा तदेतत्प्रतिप्रतीकाद्भुतरूपशिल्पम् ॥ १० ॥

---

१ 'अत्र रूपकोत्प्रेक्षालङ्कारः' इति साहित्यविद्याधरी । २ 'अत्रोत्प्रेक्षा[illegible]लङ्कारः । [illegible] शिल्पम्' इति साहित्यविद्याधरी । 'अत्र [illegible] 'चारु (नितम्बचक्रे, ऊरू) रम्भास्तम्भौ' इति रूपकेण सङ्करः' इति जीवातुः । ३ 'अत्रोत्प्रेक्षालङ्कारः' इति साहित्यविद्याधरी ।

पद इति ॥ यदि जगन्निर्माणशीलस्य विधातुर्ब्रह्मणः पदेऽधिकारे मन्मथो वाभिषिच्येत, मम मनोरथो वाभिषिच्येत, तदापि तर्ह्यपि तदनिर्वचनीयम्, एतद्दृश्यमानं एतस्या वा प्रतिप्रतीकं प्रत्यवयवं अतिसुन्दरत्वादद्भुतमाश्चर्यकारि रूपं लावण्यं तस्य शिल्पं निर्माणं घटेत न वा घटेत । ब्रह्मणाप्येतत्प्रत्यवयवं सौन्दर्यं कर्तुं न शक्यत इत्यर्थः । ईदृक् सौन्दर्यं कदापि कुत्रापि न दृष्टमिति भावः ॥

तरङ्गिणी भूमिभृतः प्रभूता जानामि शृङ्गाररसस्य सेयम् ।
लावण्यपूरोऽजनि यौवनेन यस्यां तथोच्चैस्तनता घनेन ॥ ११ ॥

तरङ्गिणीति ॥ घनेन निबिडेन यौवनेन यस्यां भैमीलक्षणायां तरङ्गिण्यां लावण्यपूरोऽजनि जनितः । तथा उच्चैः स्तनौ यस्यां तस्या भाव उच्चकुचत्वमजनि । सेयं शृङ्गारलक्षणस्य रसस्य तरङ्ग उद्रेकस्तद्वती अथ च नदी एवंभूता भीमनाम्नो भूमिभृतो भूपतेः सकाशात्प्रभूता उत्पन्नेति जानामि । वाक्यार्थः कर्म । प्रथमं सहजसौन्दर्याच्छृङ्गाररूपा जाता, अनन्तरं निबिडयौवनेन सौन्दर्याधिक्यजननादुच्चकुचत्वजननाच्च पूर्वापेक्षया शृङ्गाररसस्याधिक्यात् शृङ्गाररसस्य मूर्तिमतीयं नदीति मन्य इति भावः । अथच रसस्योदकस्य नदी पर्वतादुत्पद्यते । तस्यामुच्चैःस्तनता शब्दायमानेनातितरां गर्जता घनेन मेघेन पूर्वं जलप्रवाहो जलोद्रेकोऽपि जन्यते । तथानिर्वचनीयप्रकारा या उच्चैस्तनता तया कृत्वा घनेन निरन्तरेणेत्येकं पदं, यौवनविशेषणं वा । 'पूरो जलप्रवाहे स्यात्' इति विश्वः । भूमिभृतः, 'भुवः प्रभवः' इत्यपादानत्वम् । प्रभूता, अकर्मकात्कर्तरि क्तः ॥

अस्यां वपुर्व्यूहविधानविद्यां किं द्योतयामास नवां स कामः ।
प्रत्यङ्गसङ्गस्फुटलब्धभूमा लावण्यसीमा यदिमामुपास्ते ॥ १२ ॥

अस्यामिति ॥ अङ्गमङ्गं प्रति प्रत्यङ्गं प्रत्यवयवं यः स्वस्यैव लावण्यस्य सङ्गः संबन्धस्तेन कृत्वा स्फुटं व्यक्तं लब्धो भूमा प्राचुर्यं यया एवंभूता लावण्यसीमा सौन्दर्यपरमकाष्ठा यद्यस्मादिमां भैमीमुपास्ते सेवते तस्मात्कारणाद्बाल्यापेक्षया नवां नूतनां स कामस्तदवस्थापूर्वा-मन्यस्यां वपुर्व्यूहस्य शरीरसमूहस्य विधानं निर्माणं तस्य विद्यां शास्त्रं कायव्यूहरचनाकौशलं अस्यां भैम्यामेव किं द्योतयामास प्रकाशयामास । न त्वन्यस्यामित्यर्थः । किं वितर्के । यस्मादेतस्या यदनन्यविधं सौन्दर्यं भवति सकलावयवेषु साकल्येन सौन्दर्यसीमा भैम्यामेव विद्यते, नान्यस्यामिति भावः । प्रत्यङ्गसङ्गमवयवसंधिं अवयवसंधिं प्रतीति वा । अस्यामित्यनेन भैम्या वैदुष्यं सूच्यते । विद्याप्रकाशनं हि विद्वत्समीपे भवति । स मदनोऽस्यां नवामपूर्वां कायव्यूहनिर्माणविद्यां द्योतयामास किम्, यस्मात्सौन्दर्यस्य परमा काष्ठा स कामः

---

१ 'अत्र भैमीतरङ्गिण्याः [illegible]', तथा [illegible] [illegible] इति जीवातुः । २ 'अथाधिक्योक्तिरूपकालंकारः' इति साहित्यविद्याधरी । 'यौवनेन घनेनेति व्यस्तरूपकम्', उच्चैस्तनता घनेनेति शब्दश्लेषः, [illegible] च भैम्याः [illegible] संकरः' इति जीवातुः । ३ 'नवभवनावाम्' इति पाठो जीवातु-सुखावबोधासाहित्यविद्याधरीसंमतः । अत्र 'सामान्यालंकारो [illegible]' इति जीवातुः । '[illegible]' इति सुखावबोधासाहित्यविद्याधर्यौ ।

देरपि केनचिद्गुणेन साम्ये सत्येव गुणान्तरेण बन्धूकाद्यपेक्षयाधिक्यं द्रष्टव्यम् । तथाच चन्द्राद्यपेक्षयाधिक्येनैतदीयवदनाद्यङ्गानामुपमानत्वम् । चन्द्रादेश्चैतदीयवदनाद्यपेक्षया न्यून-त्वेनोपमेयत्वमिति चन्द्रो भैमी मुखसदृशो, नीलोत्पलं च भैमीनयनसदृशमिति । एवं सदृशस्य चन्द्रादेर्भैमीवदनादिना समीकरणं साम्यं वा भवेदपि, भैमीवदनादेरुपमानत्वं चन्द्रादेश्चोपमेयत्वं युक्तमेवेत्यर्थः । अमीषामेतदीयानामङ्गानां तु पुनर्वस्तु चन्द्रादिलक्षण-मुपमा उपमानं अपमानो धिक्कार एव, अर्थादमीषामेव । हीनस्योपमानत्वाभावात्, अधिक-स्योपमेयत्वाभावादिति भावः । यत उत्कृपे ततो हेतोरस्या भैम्यास्तुलनापि स्यान्नाम । साम्यं विनोत्कर्षो न सिध्यतीति साम्यमप्यस्तु नाम, वस्तुतस्तु परमार्थतस्तु अमीषामङ्गाना-मुपमानं तिरस्कार इति वा । उपमीयतेऽनेनेत्युपमानं वा, 'उपमा' इति कारणे भावे वा 'आतश्चोपसर्गे' इत्यङ् ॥

पुराकृतिः स्त्रैणमिमां विधातुमभूद्विधातुः खलु हस्तलेखः ।
येयं भवद्भाविपुरंध्रिसृष्टिः सास्यै यशस्तज्जयजं प्रदातुम् ॥ १५ ॥

पुरेति ॥ पुरा प्रथमं कृतिर्निर्माणं यस्यैवंभूतं प्रथमनिर्मितं स्त्रैणं रम्भोर्वश्यादि इमां भैमीं विधातुं स्रष्टुं विधातुः खलु निश्चितं हस्तलेखः प्रथमोऽभ्यासोऽभूत् । अन्योऽपि शिल्पी प्रथमं हस्तलेखाः कृत्वा पश्चात्सुन्दरं वस्तु निर्माति । उत्तरशिल्पापेक्षया हस्तलेखस्यातिहीन-त्वाद्भैमीजन्मनः पूर्वं यः स्त्रीसमूहो हस्तलेखोऽभूत्स भैम्यपेक्षयातिहीनः भैमी चातिसुन्दरीति भावः । ननु यन्निर्माणार्थमभ्यासः कृतः सा निर्मिता, अग्रिमसृष्टिः किमिति कृता इत्या-शङ्क्याह—या इयं भवन्ती वर्तमाना भाविनी भविष्यन्ती च पुरंध्रिसृष्टिः स्त्रीनिर्मितिः सा अस्यै भैम्यै तज्जयजं तस्या भवद्भाविपुरंध्रिसृष्टेः भैमीकर्तृको यो जयस्तस्माज्जातं यशः प्रदातुं, न त्वन्यत्किमपि प्रयोजनमस्ति, तस्या भैम्यपेक्षयातिहीनत्वात्, मयापीदृशी निर्मातुं न शक्यत इति सर्वाञ्ज्ञापयितुं ब्रह्मणा भैमीजन्मानन्तरमपि स्त्रीनिर्मितिः कृता । अकरणे तु भैम्यनन्तरं चेदन्यां स्त्रियं धाता निरमास्यत, तर्ह्येतदपेक्षयापि सा रमणीयाभविष्यदिति लोकस्य संभावना भवेत् तन्निवारणार्थं ब्रह्मणैवं कृतमित्यर्थः । भूतभविष्यद्वर्तमानेषु भैमीसदृशी कापि नास्तीति भावः । खलु उत्प्रेक्षायां वा । पुरंध्रीति 'ङ्यापोः संज्ञा—' इति बाहुलकाद्ध्रस्वः । ह्रस्वान्त एव वा । भवद्भावीति प्रागेव स्त्रीत्वविवक्षाया द्वंद्वं कृत्वा पुरंध्रिशब्देन यथाकथंचित्कर्मधारयः । अन्यथा भवन्तीभावीति स्यात् । 'द्रुतमध्यविलम्बितासु' इति भाष्यकारप्रयोगस्य सामान्यापेक्ष-ज्ञापकतया वा समर्थनीयम् ॥

भव्यानि हानीरगुरेतदङ्गाद्यथा यथानर्ति तथा तथा तैः ।
अस्याधिकस्योपमयोपमाता दाता प्रतिष्ठां खलु तेभ्य एव ॥ १६ ॥

भव्यानिति ॥ भव्यानि शोभमानानि चन्द्रादीनि वस्तूनि एतस्या वदनाद्यङ्गात् सकाशात् यथा यथा येन येन प्रकारेण यावद् यावद् हानीरपकर्षान् अगुः प्रापुः । तैश्चन्द्रादिभिस्तथा तथा तावत्तावत् अनर्ति नृत्तम् । अपकर्षप्राप्तावपि कथं नृत्तमत आह—खलु यस्मादधिकस्यो-

---

१ 'अत्र प्रतीपमलंकारः' इति साहित्यविद्याधरी । २ 'नृत्तिषु' इति विशेष्यम् । ३ 'अत्रोत्प्रेक्षालं-कारः' इति साहित्यविद्याधरी ।

कूटस्य (अस्य) एतदीयाङ्गस्य उपमया साम्येन उपमाता कविर्न्यूनेभ्योऽपि तेभ्यश्चन्द्रादिभ्य एव प्रतिष्ठां माहात्म्यं दाता दास्यति । नेत्रमुखतदस्यचन्द्रादेरिति वर्णनात्तदुपमेयताप्रतिष्ठा- प्राप्त्या अधिकानि नेत्रादीन्यस्याङ्गानि वयं धन्या इति उपमानोऽलङ्कं प्रतियोगीसान- न्देन नृत्यन्तीति भावः । नेत्रमुखं किंवदिति पृष्टे चन्द्रस्य न्यूनत्वेऽप्यन्यस्योपमानस्याभावाच्च- न्द्रवदित्येव वक्तव्यं स्यात् । एवं नयनादावपि द्रष्टव्यम् । 'ग्लाज्याहाम्यो निः' । 'अगुः' 'इणो गा लुङि' इति गादेशे 'गातिस्था–' इति सिचो लुक् । दाता इति लुटि ॥

नास्पर्शि दृष्टापि विमोहिकेयं दोषैरशेषैः स्वभियेति मन्ये ।
अन्येषु तैराकुलितस्तदस्यां वसत्यसापत्न्यसुखी गुणौघः ॥ १७ ॥

नेति ॥ दृष्टापीयं भैमी द्रष्टुर्विमोहिका मदनविकारकारिणी अथ च मूर्च्छाकारिणीति कृत्वा स्वस्यात्मनो भिया अशेषैः सकलैरपि दोषैरियं नास्पर्शि न स्पृष्टेति मन्ये अहं शङ्के । या दर्शनमात्रेण मूर्च्छां जनयति, दर्शनापेक्षयातिनिकटेन स्पर्शेन किं करिष्यतीति भयेन दोषैर्न स्पृष्टेत्यहं मन्ये इति भावः । अशेषैरितिशब्दादपिशब्दोऽध्याहार्यो योज्यः । अन्यथा कियद्भिः स्पृष्टा इति विरुद्धप्रतीतिप्रसङ्गात् । यस्मादियं दोषैर्न स्पृष्टा तत्तस्मादन्येषु भैमीव्यति- रिक्तस्थानेषु तैर्दोषैराकुलितो गुणौघः सौन्दर्यादिर्न विद्यते सपत्नः शत्रुर्यस्य तस्य भावो- ऽसापत्न्यं तेन सुखी सन् अस्यां भैम्यां वसति । अन्यत्र वैरिभिः सह वसतौ महत्कष्टम्, अस्यां तु तदभावात्सुखेन वसतीत्यर्थः । अन्येषु गुणा दोषसंवलिताः सन्ति अस्यां तु दोषा न सन्त्येवेति गुणानां निःसापत्न्येन स्थितिः । अन्योऽपि सबाधं स्थानं त्यक्त्वा निर्बाधे स्थाने वसतीति ॥

औज्झि प्रियाङ्गैर्घृणयैव रूक्षा न वारिदुर्गात्तु वराटकस्य ।
न कण्टकैरावरणाच्च कान्तिर्धूलीभृता काञ्चनकेतकस्य ॥ १८ ॥

औज्झीति ॥ प्रियाङ्गैर्भैम्यवयवैर्वराटकस्य पद्मबीजस्य कान्तिः शोभा घृणयैव कृपयैव औज्झि त्यक्ता । यतो रूक्षा स्निग्धतारहिता । न वारिदुर्गाज्जलदुर्गहेतोः । अगाधं ज- लदुर्गमाश्रितेति ग्रहीतुमशक्येति बुद्ध्या त्यक्तेति न मन्तव्यम् । किंतु रूक्षत्वात् । अथवा आपणि दत्तानि सन्त्यस्य वराटकमण्डं जलदुर्गात् तन्मध्यवर्तित्वहेतोर्भैम्या नैव । अथ च न कण्टकैरिति मम्पुनयत्र संबन्ध नवा प्रसभा कान्तिरिति ज्ञातव्यम् । अथ च [illegible] लभ्य । तथा—काञ्चनकेतकस्यापि सुवर्णकेतकीकुसुमस्यापि कान्तिः प्रियाङ्गैर्घृणयैवौज्झि । यतो धूलीभिर्भृता पूरिता । योऽन्यदर्थः । कण्टकैः कृत्वा यदावरणं परिवेष्टनं तस्माद्धेतोर्न । किं तु घृणयैवेति ज्ञातव्यम् । वराटकसुवर्णकेतकस्थानमपि वक्तव्यादतिरिक्तगुणैरवनैर्मलिति भावः ॥

प्रत्यङ्गमस्यानिमिकेन रक्षां कर्तुं मघोनेव निजास्त्रमस्ति ।
वज्रं च भूषामणिभूतिधारि नियोजितं तद्द्युतिकार्मुकं च ॥ १९ ॥

प्रत्यङ्गमिति ॥ अनिमिकेन भैम्याः कार्मुकेन मघेनेन्द्रेण प्रत्यङ्गं प्रत्यवयवं दोषादेः रक्ष- णादक्षां कर्तुं भूषामणिभूतिधारि भैम्याभरणस्वरूपं निजास्त्रं स्वायुधं वज्रं च तथा तस्य वज्रस्य

---

१ 'अत्र [illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी ।

द्युतिस्तल्लक्षणं कार्मुकं च अस्यां भैम्यां विषये नियोजितमिव नियुक्तमिवास्ति । चौ परस्पर-समुच्चये । प्रत्यवयवमलंकारेषु हीरकाः सन्ति तेषां द्युतिश्च सर्वत्र प्रकाशते । तत्र वज्रशब्द-च्छलेन सहेतुकोत्प्रेक्षा । इन्द्रधनुषश्च वज्रद्युतिरूपत्वं प्रसिद्धम् । अन्योऽपि स्वामीष्टं वस्तु रक्षितुं किमपि निजं नियुङ्क्ते । अस्यामभिकेनेति वा ॥

अधुना मानुषीत्वात्केशानारभ्यापादं वर्णनमारभते—

अस्याः सपक्षैकविधोः कचौघः स्थाने मुखस्योपरि वासमाप ।
पक्षस्थतावद्बहुचन्द्रकोऽपि कलापिनां येन जितः कलापः ॥ २० ॥

अस्या इति ॥ सदृशत्वात्सपक्षो मित्रं सहायश्च एकः केवलो विधुश्चन्द्रो यस्य अस्या मुख-स्योपरि शिरसि कचौघः केशसमूहो वासं वसतिमाप तत् स्थाने युक्तम् । कथमित्यत आह— येन कचौघेन पक्षस्थाः पक्षेषु स्थितास्तावन्तो बहवश्चन्द्रका यस्यैवंविधः कलापिनां मयूराणां कलापः पिच्छभारो जितः पराजितः । उत्तमोऽपि मयूरपिच्छभारो येन जितस्तस्यात्युत्तमत्वा-च्छिरसि वसतिर्युक्तैवेत्यर्थः ॥

श्लोकद्वयेन केशानेव वर्णयति—

अस्या यदास्येन पुरस्तिरश्च तिरस्कृतं शीतरुचान्धकारम् ।
स्फुटस्फुरद्भङ्गिकचच्छलेन तदेव पश्चादिदमस्ति बद्धम् ॥ २१ ॥

अस्या इति ॥ अस्या भैम्या आस्येन वदनलक्षणेन शीतरुचा चन्द्रेण पुरोऽग्रतः तिर-स्तिर्यक्च वर्तमानं यदन्धकारं तिरस्कृतमपसारितं पराजितं च तदेवेदं स्फुटं प्रकटं स्फुरन्तो विलसन्तो भङ्गिनो निम्नोन्नताः कचास्तेषां छलेन व्याजेन पश्चान्मुखस्य पश्चाद्भागे बद्धमस्ति । पुरस्तिरश्च यत्तिमिरं स्थितं ततोपसारितत्वात्पश्चाद्भागादपसारणे चन्द्रस्यासामर्थ्यादागत्य सङ्घी-भूय पश्चाद्भागे स्थितिमकरोदित्यर्थः । विलसत्कौटिल्यो निबद्धकेशसमूहोऽयं न भवति, किं तु चन्द्रेण तिरस्कृतत्वाद्विलसत्पराजयचिह्नं पश्चाद्बद्धमन्धकारमेव । अन्योऽपि जातपराजयो धृत-पराजयचिह्नः पश्चाद्बाहुर्बध्यत इति अतिनीलोऽतिकुटिलश्च भैमीकचसङ्घ इति भावः । 'अन्ध-कारोऽस्त्रियाम्' इत्यमरः । 'भङ्ग' इत्यपि पाठः ॥

अस्याः कचानां शिखिनश्च किंनु विधिं कलापौ विमतेरगाताम् ।
तेनायमेभिः किमपूजि पुष्पैरभर्त्सि दत्त्वा स किमर्धचन्द्रम् ॥ २२ ॥

अस्या इति ॥ अस्याः कचानां केशानां शिखिनो मयूरस्य च कलापौ सङ्घपिच्छभारौ विमतेरहमुत्कृष्टोऽहमुत्कृष्ट इति विवादाद्धेतोर्मध्यस्थत्वेन विधिं ब्रह्माणमगातां जग्मतुः । किंनु इति समुदायो वितर्के । तेन ब्रह्मणा अयं पुरोदृश्यमानः केशपाशः पुरोदृश्यमानैरेभिः पुष्पैर-पूजि किं पूजितः किम् । स मयूरकलापश्चार्धचन्द्रं गलहस्तं दत्त्वा अभर्त्सि भर्त्सितः किम् । मध्यस्थेन ब्रह्मणा विवदमानयोस्तयोर्मध्ये केशकलापोत्युत्कृष्ट इति ज्ञापयितुं तस्य पुष्पपूजा कृता, मयूरकलापस्त्वतितरां हीनोऽतितरामधिकेन केशकलापेन सह स्पर्धमानोऽनुचितकारि-त्वाद्गलहस्तित इत्यर्थः । अर्धचन्द्राकाराश्चन्द्रका मयूरकलापे विद्यन्ते ततः शब्दच्छलेनेयमु-

---

१ 'अत्र सापह्नवोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । २ 'अत्र रूपकाद्यलंकारः' इति साहित्यविद्याधरी ।

त्प्रेक्षा । अन्योऽप्यधिको नम्रत्वेन पुष्पैः पूज्यते, यश्च हीन उत्तमेन सह स्पर्धते स भर्त्स्यते गलहस्त्यते चेति । अगमताम्, 'इणो गा लुङि' इति गादेशः ॥

भालं वर्णयति—

केशान्धकारादथ दृश्यभालस्थलार्धचन्द्रा स्फुटमष्टमीयम् ।
एनां यदासाद्य जगज्जयाय मनोभुवा सिद्धिरसाधि साधु ॥ २३ ॥

केशेति ॥ केशलक्षणादन्धकारात् अथानन्तरमधोदेशे दृश्यो दर्शनविषयो रमणीयश्च भालस्थललक्षणो ललाटपट्टलक्षणोऽर्धचन्द्रो यस्याः, अथ च भालस्थलेऽर्धचन्द्राकारतिलकविशेषो यस्याः सा इयं भैमी स्फुटं प्रकटमष्टमी । कृष्णाष्टमीरूपेयमित्यर्थः । कृष्णाष्टम्यपि प्रथमयामद्वयान्धकारानन्तरं दृश्यार्धचन्द्रा भवति । अत एव एनामासाद्य प्राप्य स्वयंवरे जगतो जयाय मनोभुवा कामेन सिद्धिर्जगद्वशीकरणलक्षणा यदसाधि साधिता तत्साधु युक्तमेव । अतिसुन्दरीं भैमीं कृत्वा मदनेन जगद्वशीकृतमित्यर्थः । कृष्णाष्टम्यां जगद्वशीकर्तुं गुटिकादिसिद्धिः साध्यते । अर्धचन्द्राकारभालस्थलेयमित्यर्थः । एतेन ललाटसौन्दर्यं सामुद्रिकलक्षणवत्त्वं च सूचितम् ॥

श्लोकद्वयेन भ्रुवौ वर्णयति—

पौष्पं धनुः किं मदनस्य दाहे श्यामीभवत्केसरशेषमासीत् ।
व्यधाद्द्विधेशस्तदपि क्रुधा किं भैमीभ्रुवौ येन विधिर्व्यधत्त ॥ २४ ॥

पौष्पमिति ॥ मदनस्य दाहसमये पौष्पं पुष्परूपं धनुस्तस्यैव सारं श्यामीभवन्तः श्यामायमानाः केसरा एव शेषा यस्यैवंविधं स्वरूपेण दग्धमपि श्यामीभवत्केसरशेषमासीत्किम् । मदनदाहानन्तरं ईशो महादेवः श्यामीभूतं धनुराकारं तत्केसरमपि क्रुधा क्रोधेन द्विधा व्यधाच्चकार मध्ये बभञ्ज किम् । द्विधाभूतेन येन कृत्वा विधिर्ब्रह्मा भैमीभ्रुवौ व्यधत्त चकार । अन्यथा तत्सादृश्यं भ्रुवोर्न घटत इत्यर्थः । अवक्रे धनुराकारे श्यामे च भैमीभ्रुवाविति भावः । अन्योऽपि वैरिणं हत्वा क्रोधेन तदायुधमपि भनक्ति ॥

भ्रूभ्यां प्रियाया भवता मनोभूचापेन चापे घनसारभावः ।
निजां यदग्रोपदशामपेक्ष्य संप्रत्यनेनाधिकवीर्यताऽर्जि ॥ २५ ॥

भ्रूभ्यामिति ॥ प्रियाया भैम्या भ्रूभ्यां कृत्वा भवता उत्पद्यमानेन भ्रूत्वं गच्छता मनोभूचापेन घनो दृढः सारो मज्जा यस्य तद्भावोऽतिदृढत्वं च आपे प्रापे । यदैव भ्रूत्वं तदैव दृढत्वमिति चकारार्थः । पुष्पत्वदशायां निःसारस्यापि धनुषो भैमीभ्रूभवनदशायां घनसारत्वं जातमित्यर्थः । कथं घनसारत्वमित्यत आह—यद्यस्मात् निजां स्वीयामग्रेतनदशामदग्धावस्थामपेक्ष्य संप्रति दग्धस्य भैमीभ्रूभवनसमये अनेन धनुषा अधिकवीर्यताऽधिकपराक्रमत्वं आर्जि अर्जितम् । अदग्धपुष्पमयचापापेक्षया दग्धस्य श्यामीभवत्केसरशेषस्य भैमीभ्रूभवदवस्थस्यैव चापस्य जगद्वशीकरणेऽधिकसामर्थ्यदर्शनादेवमुत्प्रेक्षा इति भावः ।

---

१ 'अथोनिशान्धतमसस्य...' इति साहित्यविद्याधरी । 'अथो...' [illegible] इति जीवातुः । २ 'दृश्य' इति पाठे जीवातुसुखावबोधासंमतः । ३ '[illegible] ...रन्धकारात्' इति साहित्यविद्याधरी ।

घनत्वं दृढत्वं सारत्वं श्रेष्ठत्वं च प्रापे इति वा । अथच घनसारभावः कर्पूरत्वं च । यतः—कर्पूरोऽपि निजामदाहावस्थामपेक्ष्य दाहावस्थायामधिकवीर्यतामतिशयितसौगन्ध्यं शीतलत्वं चार्जयति । 'अथ कर्पूरमस्त्रियाम् । घनसारः' इत्यमरः ॥

स्मारं धनुर्यद्विधुनोज्झितास्या यास्येन भूतेन च लक्ष्मलेखा ।
एतद्भ्रुवौ जन्म तदाप युग्मं लीलाचलत्वोचितबालभावम् ॥ २६ ॥

स्मारमिति ॥ यत् स्मारं मदनसंबन्धि धनुस्तदेकम्, अस्या आस्येन भूतेन वदनत्वं गतेन विधुना चन्द्रेण उज्झिता त्यक्ता या च लक्ष्मलेखा कलङ्करेखा भैम्या मुखस्य निष्कलङ्कत्वात्तन्मुखीभवनौचित्याय चन्द्रेण त्यक्ता या लक्ष्मलेखेति द्वितीयं त्यक्तम्, तत् मदनचापचन्द्रलक्ष्मलेखालक्षणं युग्मं द्वयं कर्तृ एतद्भ्रुवौ भैमीभ्रुवौ भैमीभ्रूरूपं जन्म आप । भैमीभ्रूस्वरूपेण तद्द्वयं परिणतमित्यर्थः । किंभूतं जन्म—लीलया विलासेन चञ्चलत्वं यत्र तदुचितो बालभावः केशसत्ता यस्मिन् । लीलात्वेन विलासत्वेन चपलत्वेन चेष्टया च उचितस्तदुभययोग्यो बालभावः केशसत्ता यस्मिञ्जन्मनि तत्तेन युग्मेन लब्धमित्यर्थ इति वा । जन्मप्राप्तौ क्रीडाचञ्चलत्वोचितो बालभावः शैशवं भवति । लेखापदं साम्यार्थम् । भैमीभ्रुवौ कामचापचन्द्रलक्ष्मलेखाकारे सविलासे कामजनिके चेति भावः । 'भावः सत्तास्वभावयोः' इत्यमरः ॥

नवभिर्दृशौ वर्णयति—

इषुत्रयेणैव जगत्त्रयस्य विनिर्जयात्पुष्पमयाशुगेन ।
शेषा द्विबाणी सफलीकृतेयं प्रियादृगम्भोजपदेऽभिषिच्य ॥ २७ ॥

इष्विति ॥ पुष्पमयाशुगेन पुष्परूपबाणेन कामेन कर्त्रा इषुत्रयेणैव पुष्परूपेण बाणत्रयेणैव जगत्त्रयस्य विनिर्जयाद्वशीकरणादेकैकेन बाणेन एकैकस्य जगतो जयाद्धेतोर्बाणत्रयस्य सार्थक्यात्संभावितवैयर्थ्या पञ्चबाणत्वाच्छेषावशिष्टा इयं पुरो दृश्यमाना द्विबाणी प्रियाया भैम्या दृगम्भोजपदे नयनद्वयरूपकमलस्थानेऽभिषिच्यारोप्य सफलीकृता सार्थकीकृता । उत्तमस्थानप्रापणेन तस्याः साफल्यं जातमित्यर्थः । पुष्पमयबाणत्वाद्दृगम्भोजयोरपि बाणत्वमुचितम् । अयमभिप्रायः—बाणत्रयेण जगत्त्रयीजयात्त्रयाणां साफल्यम्, अवशिष्टं बाणद्वयं भैमीनेत्राम्भोजयोरभिषिच्य कामेन सार्थकीकृतम् । तत्र त्रयेण जगत्त्रयं पराजितमित्याश्चर्यं न, किं तु वैयर्थ्यसंभावनापि । द्वयेन जगत्त्रयं जितमित्याश्चर्यम् । तस्मादेतद्बाणद्वयमेव सार्थकं यथा, तथा बाणत्रयं नेत्यभिप्रायः । विनिर्जयात् विनिर्जयं पर्यालोच्येति ल्यब्लोपो वा ॥

सेयं मृदुः कौसुमचापयष्टिः स्मरस्य मुष्टिग्रहणार्हमध्या ।
तनोति नः श्रीमदपाङ्गमुक्तां मोहाय या दृष्टिशरौघवृष्टिम् ॥ २८ ॥

सेयमिति ॥ मुष्टिग्रहणार्हो मध्यो यस्याः सेयं भैमी स्मरस्य कौसुमी चापयष्टिर्धनुर्लता । अतएव मृदुः कोमला । चापयष्टिरपि मध्ये मुष्टिना ध्रियते । सा का—या भैमी नोऽस्माकं

---

१ 'अत्रातिशयोक्तिरनुमानमलंकारः' इति साहित्यविद्याधरी । २ 'अत्र विषमातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।

त्वचः समुत्तार्य दलानि रीत्या मोचात्त्वचः पञ्चपपाटनायाम् ।
सारैर्गृहीतैर्विधिरुत्पलौघादस्यामभूदीक्षणरूपशिल्पी ॥ २१ ॥

त्वच इति ॥ मोचात्त्वचः कदलीगर्भत्वचः संबन्धिनीराद्यास्त्वचो वल्कलानि रीत्या प्रकारेण क्रमेण समुत्तार्य पृथक्कृत्य, तथा कमलवृन्दसंबन्धीनि आद्यानि दलानि पत्राणि क्रमेण पृथक्कृत्य पञ्चपपाटनायां पञ्च षट् वा परिमाणं येषां कदलीत्वक्कमलवृन्ददलानां तेषां पाटनायां सत्यां आद्याः पञ्चषास्त्वचो आद्यानि पञ्चषाणि दलानि चोत्सृज्य मोचात्त्वचः कदलीवल्कलात्, उत्पलौघाच्च गृहीतैः सारैः श्रेष्ठभागैः कृत्वा अस्यां भैम्यां विषये विधिर्ब्रह्मा ईक्षणे नेत्रे तयो रूपं रामणीयकं तस्य शिल्पी कारकोऽभूत् । कदलीगर्भगतं गौरत्वं गृहीत्वा नेत्रगतं गौरत्वं निर्मितम्, यद्वा कमलगर्भपत्रगतं गौरत्वं गृहीत्वा नेत्रसौन्दर्यं निर्मितमित्यर्थः । उत्पलशब्देन नीलोत्पलं वा । तथा च तत्सारेण नेत्रयोर्नीलिमा कृत इत्यर्थः । पञ्चष इति 'संख्ययाव्ययासन्ना–' इति बहुव्रीहौ 'बहुव्रीहौ संख्येये–' इति डच् ॥

चकोरनेत्रैणदृगुत्पलानां निमेषयन्त्रेण किमेष कृष्टः ।
सारः सुधोद्गारमयः प्रयत्नैर्विधातुमेतन्नयने विधातुः ॥ २२ ॥

चकोरेति ॥ एतन्नयने भैमीनेत्रे विधातुं निर्मातुं विधातुर्ब्रह्मणः प्रयत्नैः समुद्योगैः चकोरनेत्राणामेणदृशां हरिणीनेत्राणाम् उत्पलानां च संबन्धी सुधोद्गारमयः पीयूषनिर्झररूप एष प्रत्यक्ष(ः)दृश्यः सारः श्रेष्ठो भागो निमेषलक्षणेन यन्त्रेण कृष्ट आकृष्टः किमित्यूहः । निमेषः पक्ष्मसंकोचो दलसंकोचश्च । त्रयाणामपि निमेषयन्त्रेण निष्पीड्य गृहीतेन श्रेष्ठभागेनैतन्नेत्रे निर्मिते । सारस्य सुधोद्गाररूपत्वं च पीतचन्द्रचन्द्रिकाचकोरनयनसाराकर्षणात्, एणस्य च चन्द्रोत्सङ्गस्थत्वात्, तद्दृशोरप्यमृतसंबन्धात्तत्सारापकर्षणात्, उत्पलानां च सोमवंश्यत्वाद्रात्रौ चन्द्रामृतसंबन्धात्तत्साराकर्षणादिति अन्योऽपीक्ष्वादिसारो रसरूपः काष्ठयन्त्रेणाकृष्यते । निमेषरूपं ब्रह्मणा सारग्रहणार्थं यन्त्रमेव निर्मितम् । एणदृगुत्पलयोः पूर्वं द्वन्द्वः । तत्रैणदृशोरुत्पलापेक्षया दृगुपमानेऽन्तरङ्गत्वादभ्यर्हितत्वादेणदृक्पदस्य पूर्वनिपातः, अजाद्यदन्तस्याप्युत्पलशब्दस्य न । एणेति जातिमात्रविवक्षयों ॥

ऋणीकृता किं हरिणीभिरासीदस्याः सकाशान्नयनद्वयश्रीः ।
भूयोगुणेयं सकला बलाद्यत्ताभ्योऽनयाऽलभ्यत बिभ्यतीभ्यः ॥ २३ ॥

ऋणीति ॥ हरिणीभिरस्याः सकाशान्नयनद्वयस्य श्रीः शोभा ऋणीकृता वृद्ध्या गृहीता आसीत्किम् । कुतः—यद्यस्मादनया भैम्या बिभ्यतीभ्यस्ताभ्यो हरिणीभ्यः सकला संपूर्णा कलया विलासेन सहिता वा भूयोगुणा बहुगुणा इयं नयनद्वयश्रीः बलात्कारेणालभ्यत लब्धा । अथ च सकला धनवृद्धिसहिता भूयोगुणा त्रिगुणा चतुर्गुणा वा बिभ्यतीभ्यो बलात्कारेण लब्धा । उत्तमर्णेन हि त्रसद्भ्योऽधमर्णेभ्यो वृद्धिसहिता त्रिगुणा चतुर्गुणा वा संपत् बलात्कारेण [illegible] । भूयोगुणत्वं याज्ञवल्क्योक्तं व्यवहाराध्याये द्रष्टव्यम् 'अशीतिभागो वृद्धिः स्यात्'

---

१ 'अत्र यथासंख्यातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्र छेकानुप्रासरूपकोत्प्रेक्षातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।

इत्यादिना । अनयापि तादृशी लब्धा तत्स्मात्पूर्वेमृणमस्तत्वेण गृहीतेति सत्यम् । अन्यान्ती-भ्योऽतएव चञ्चलनयनाभ्योऽपि हरिणीभ्यः सकाशादेतन्नेत्रे सुन्दरे, अतिचञ्चले चेति भावः ॥

दृशौ किमस्याश्चपलस्वभावे न दूरमाक्रम्य मिथो मिलेताम् ।
न चेत्कृतः स्यादनयोः प्रयाणे विघ्नः श्रवःकूपनिपातभीत्या ॥ ३४ ॥

दृशाविति ॥ चपलस्वभावे अतिचञ्चलस्वभावे अस्या दृशौ दूरमाक्रम्य दूरं गत्वा शिरः परिक्रम्य मिथोऽन्योन्यं किं न मिलेताम्, अपि तु मिलिते भवेतामेव । परं चेद्यदि अनयोः प्रयाणे दूरगमने विषये श्रवःकूपयोः कर्णलक्षणकूपयोर्निपातः पतनं तस्माद्भीत्या भयेन विघ्नः कृतो न स्यात् । भयरूपेण प्रतिबन्धकेन न मिलिते । नेत्रे आकर्णपूर्णे चञ्चलतरे चेति भावः । अन्योऽपि कूपादिपतनभीत्या परावर्तते । क्रियातिपत्तिर्न विवक्षणीया ॥

केदारभाजा शिशिरप्रवेशात्पुण्याय मन्ये मृतमुत्पलिन्या ।
जाता यतस्तत्कुसुमेक्षणेयं यातश्च तत्कोरकदृक्चकोरः ॥ ३५ ॥

केदारेति ॥ केदारभाजा व्रीहिक्षेत्रभाजा आलवालभाजा वा, अथ च केदारारव्यदेव-सेविन्या उत्पलिन्या कमलिन्या शिशिरर्तोः प्रवेशादथ च शिशिरे हिमे प्रवेशाद्धिमचूर्णना-द्धेतोः पुण्याय मृतं पुण्यं प्राप्तुं मृतम् । तज्जन्यसुकृतविशेषजन्योत्तमफलप्राप्तय इत्यर्थः । इत्यहं मन्ये जानामि । यतो यस्मादियं तस्याः कमलिन्याः कुसुम इव ईक्षणे नेत्रे यस्याः एवंविधा जाता । यतश्च यस्माच्च चकोरस्तत्कोरकदृक् तस्या एव कोरकौ कलिके दृशौ यस्यै-वंविधो जातः । तस्मादेतदनुमीयते । नहि सुकृतातिशयेन विना मैमीनयनत्वं चकोरनय-नत्वं च तदुत्तमकुसुमकोरकाभ्यां लभ्यते । अन्योऽपि केदारदेवसंनिधौ हिमचूर्णनाद्युत्तमे वंशे जायते । शिशिरर्तोः प्रवेशे कमलिनी नश्यति । भैमीनेत्रे च कमलतुल्ये । कलिकापे-क्षया कुसुमत्वादिवयाश्चकोरनेत्रापेक्षया भैमीनेत्रे अतिसुन्दरे इति सूचितम् । 'केदारः पर्वते शंभोः क्षेत्रभेदालवालयोः', 'शिशिरः स्यादृतोर्भेदे तुषारे' इति च विश्वः ॥

नासां वर्णयति—

नासादसीया तिलपुष्पतूणं जगत्त्रयव्यस्तशरत्रयस्य ।
श्वासानिलामोदभरानुमेयां दधद्द्वियाणीं कुसुमायुधस्य ॥ ३६ ॥

नासेति ॥ अदसीया अमुष्याः संबन्धिनी नासा नासिका जगत्त्रये त्रिभुवने व्यस्तं क्षिप्तं शरत्रयं येन तस्य कुसुमायुधस्य स्मरस्य [illegible] द्वियाणीं [illegible] इदम् तिलपुष्परूपितं तूणं भस्त्रा । पुष्पबाणस्येषुधिरपि पुष्पमयो युक्तः । तिलपुष्पं च तूणाका-रम् । किंभूतां द्वियाणीम्—श्वासानिलस्य निःश्वासपवनस्य [illegible] तुल्ये[illegible]नु-मेयामनुमातुमर्हाम् । बाणद्वयेन अवशिष्टं [illegible] भैमीनासा[illegible]कु[illegible]सुम-तूणीरत्वमूपे स्थितमिति भावः ॥

---

१ 'अत्र [illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी ।

श्लोकसप्तकेनाधरोष्ठं वर्णयति—

बन्धूकबन्धूभवदेतदस्या मुखेन्दुनानेन सहोज्जिहाना।
रागश्रिया शैशवयौवनीयां स्वमाह संध्यामधरोष्ठलेखा ॥ ३७ ॥

बन्धूकेति ॥ अनेन प्रत्यक्षदृश्येन मुखेन्दुना सहैवोज्जिहाना उत्पद्यमाना अस्या अधरोष्ठलेखा लेखाकारोऽधरोष्ठ एतत्प्रत्यक्षदृश्यं स्वयमात्मानं शैशवयौवनीयां बाल्यतारुण्यसंबन्धिनीं संध्यां ब्रूते अहमेव संध्येति । बाल्यतारुण्ययोः संधौ भवनात्संध्यात्वम् । शैशवान्ते यौवनादौ चाधरोष्ठे भूयात्रक्तिमा भवतीति भावः । किंभूतं स्वम्—रागश्रिया लोहितिमशोभया कृत्वा बन्धूकस्य मध्याह्नविकसितपुष्पस्य बन्धूभवत्समानं भवत् अतिरक्तमित्यर्थः । अथ च रात्रिदिनसंधौ संध्या भवति । संध्यापि चन्द्रेण सहैवोदेति रक्ता च भवति ॥

अस्या मुखेन्दावधरः सुधाभूविम्बस्य युक्तः प्रतिविम्ब एषः।
तस्याथवा श्रीर्द्रुमभाजि देशे संभाव्यमानस्य तु विद्रुमे सा ॥ ३८ ॥

अस्या इति ॥ अस्या मुखेन्दौ वदन एव चन्द्रे विद्यमान एषोऽधरोष्ठः सुधाभुव्यमृतभूमौ जातस्य विम्बस्य विम्बीफलस्य प्रतिविम्बः युक्तः सदृशः । विम्बीफलस्य भैम्यधरसाम्यं नास्त्येव रक्तत्वे सत्यमृतवत्त्वाभावात् । यदि स्यात्तर्ह्यमृतभूमावुत्पन्नस्यैव नान्यस्य । अथ च निर्मलत्वाच्चन्द्रे प्रतिविम्बोऽन्यस्य युक्त इत्यर्थः । अतएव मुखेन्दौ इति निर्देशः । अथ च चन्द्रविम्बस्य प्रतिविम्बो भवतीति युक्तमेवेत्यर्थः । अथवेत्यपरितोषेणैतद्दूषयति—तस्य श्रीः शोभा द्रुमभाजि देशे द्रुमसहिते देशे । अस्य तु एतदधरस्य सा श्रीर्विद्रुमे प्रवाले संभाव्यमाना । संभाव्यत इत्यर्थः । सुधाभूसमुत्पन्नस्यापि विम्बफलस्य रसवत्त्वेन साम्यं स्यात् । तथापि तस्य वृक्षाश्रयत्वाद्रक्तशोभाया अतिरूक्षत्वात्, भैम्यधरस्य स्निग्धत्वात् । तर्ह्यधरस्येव स्निग्धरक्तशोभा कुत्रास्तीति विचारे विद्रुमेऽस्ति । रक्तिम्ना कृत्वा विद्रुमस्याधरस्य च साम्यं विद्यते यद्यपि तथापि विद्रुमस्य सुधाभूमावनुत्पन्नत्वादधरतुल्यरसत्वाभावाद्विद्रुमेणापि साम्यं न विद्यत इत्यर्थः । विम्बीफलस्यैवंविधरक्तिमाभावाद्विद्रुमस्यामृतवत्त्वाभावात्, एतदधरस्य चैतदुभययुक्तत्वादेतदधरो न ताभ्यां तुल्य इति भावः । द्रुमसहिते देशे वर्तमानस्य परस्परविरुद्धत्वात्साम्याभाव इत्यर्थः । अन्यरमणीरदनच्छदस्य विम्बीफलस्य च यद्यपि साम्यमस्ति, तथाप्येतस्या नास्तीति अस्या इति पदेन सूचितम् । मुखेन्दाविति सुधासंभवसूचनं भैम्यधरस्यैव । यद्वा—अथवा अन्यस्मादपि हेतोरिति यावत् । तस्य विम्बीफलस्य शोभा वृक्षसहिते देशे बहुवृक्षे वने वर्तते । विम्बीफललताया वृक्षाद्याश्रयत्वात् । अस्य तु पुनः संभाव्यमाना विचार्यमाणा सा विगतवृक्षे नगरे संभाव्यते । नगर एव भैम्याः सत्त्वात् । द्रुमभाजि साधारणकन्दकवृक्षसहिते देशेऽरण्ये तस्य श्रीः, अस्य तु विशिष्टाम्रादिवृक्षे नगरे सा संभाव्यत इति वा । आरण्यकस्य नागरिकस्य च बहुन्तरमित्यर्थः । इति विस्तरेणालम् । प्रतिविम्बशब्दोऽर्धर्चादिषु द्रष्टव्यः ॥

---

१ 'षट्श्लोक्या' इति सुखाववोधा । २ 'अत्रातिशयोक्तिरूपकालंकारः' इति साहित्यविद्याधरी । ३ 'मुखेन्दोः' इति पाठः । ४ 'अत्र रूपकातिशयोक्तिव्यतिरेकाक्षेपालंकारसंकरः' इति साहित्यविद्याधरी ।

जानेऽतिरागादिदमेव बिम्बं बिम्बस्य च व्यक्तमितोऽधरत्वम् ।
द्वयोर्विशेषावगमाक्षमाणां नाम्नि भ्रमोऽभूदनयोर्जनानाम् ॥ ३९ ॥

जान इति ॥ रदनच्छदोपमानत्वेन प्रसिद्धं यद्बिम्बं बिम्बीफलं तत् इदमेव भैम्योष्ठलक्षणमेव नान्यदिति जाने । कुतः—अतिरागादतिलौहित्यादत्यनुरागाच्च । लोकप्रसिद्धस्य बिम्बस्य तादृग्लौहित्याभावात्तस्योपमानत्वाधिक्याच्चाधर उपमानमभूत् । यद्बिम्बफलं तद्भैमीरदनच्छदरूपमेव नान्यदित्यर्थः । भैमीरदनच्छदस्योपमानत्वं युक्तमिति भावः । लौकिकस्य बिम्बस्य च इतः सकलाद्भैमीरदनच्छदात्सकाशादधरत्वं हीनत्वं व्यक्तं स्पष्टम् । तादृग्लौहित्याभावान्न्यूनत्वादुपमेयत्वमित्यर्थः । अथ च इदं पुरोदृश्यमानमेव बिम्बम्, इतः पुरोदृश्यमानादत्यन्तलौहित्याद्धेतोर्बिम्बस्य च प्रसिद्धबिम्बीफलस्याधरत्वमोष्ठत्वम् । नन्वेवं सति लोकप्रसिद्धव्यत्ययः कुत इत्यत आह—द्वयोर्बिम्बफलाधरयोर्विशेषावगमे तारतम्यज्ञाने अक्षमाणामसमर्थानां पामराणां जनानां द्वयोरनयोर्बिम्बाधरयोर्नाम्नि भ्रमोऽभूत् । तारतम्यास्फुरणात्लौहित्याधिक्येन परीक्षकाभिमतस्याधरसंज्ञा कृता, अधरत्वेन च परीक्षकाभिमतस्य बिम्बसंज्ञा कृता । अतः पामरप्रसिद्धव्यपलापः, न तु परीक्षकप्रसिद्धव्यपलाप इत्यर्थः । बिम्बापेक्षया भैम्योष्ठोऽधिक एवेति भावः ॥

मध्योपकण्ठावधरोष्ठभागौ भातः किमप्युच्छ्वसितौ यदस्याः ।
तत्स्वप्नसंभोगवितीर्णदन्तदंशेन किं वा न मयापराद्धम् ॥ ४० ॥

मध्योपेति ॥ अस्या भैम्या अधरोष्ठस्य मध्योपकण्ठौ मध्यसमीपवर्तिनौ अधरोष्ठभागावधरोष्ठप्रदेशौ किमपि किंचित् उच्छ्वसितावुच्छूनौ यद्यस्मात् भातः शोभेते, तत्तस्माद्धेतोः स्वप्ने यो भैमीसंभोगस्तत्र वितीर्णो दत्तो दन्तदंशो दन्तक्षतं येन एवंविधेन मया वा मयैव किं नापराद्धम् । किंतु तादृगपराधो मयैव कृतः । वाशब्दः संभावनायां वा । स्वप्नसंभोगे वितीर्णेन दन्तक्षतेन कृत्येति वा । अधरोष्ठस्य मध्यसमीपवर्तिनोः पार्श्वदेशयोः किंचिदुच्छूनता सामुद्रिके गुणः, दन्तक्षतेनाप्युच्छूनता भवति । स्वप्ने प्रत्यहं मयैवं संभुक्तेति ॥

भिदा विदर्भेन्द्रसुताधरोष्ठे नृत्यन्ति कत्यन्तरभेदभाजः ।
इतीव रेखाभिरपश्रमस्ताः संख्यातवान्कौतुकवान्विधाता ॥ ४१ ॥

भिदा इति ॥ अन्तरभेदभाजः अवान्तरभेदसहिताः कति भिदाः कियत्यो भिदा विदर्भेन्द्रसुताधरोष्ठे नृत्यन्ति स्फुरन्ति सम्यग्रूपेण वर्तन्ते इतीव इति स्वयमेव संदिहानः, इति लोकसंदेहनिवृत्त्यर्थं वा, कौतुकवान् अपश्रमः श्रमरहितो विधाता ब्रह्मा अधरोष्ठवर्तिनीभी रेखाभिः कृत्वा इयत्यो भिदा भिदन्त इति ता भिदाः संख्यातवान्गणितवान् । उत्तमोष्ठ इहैतदनुरूपा रेखा भिदागणनार्थत्वेनोत्प्रेक्षिताः । अन्तरे ओष्ठमध्य इति वा ॥

संभुज्यमानाद्य मया निशान्ते स्वप्नेऽनुभूता मधुराधरेयम् ।
अतीतलावण्यरदच्छदेत्थं कथं मयैव प्रतिपद्यते वा ॥ ४२ ॥

संभुज्येति ॥ निशान्ते रात्र्यन्ते [illegible] वा अद्य स्वप्ने मया संभुज्यमाना

---

१ '[illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति पाठः साहित्यविद्याधरीसंमतः । ४ '[illegible]' इति साहित्यविद्याधरी ।

कृतोपभोगा इयं भैमी चुम्बनवशान्मधुराधरा अमृतोष्ठी सुन्दराधरा वानुभूता। इत्थमनिर्वच-नीयप्रकारेण असीमलावण्यो निर्मर्यादसौन्दर्यो रदच्छदोऽधरोष्ठो यस्याः सेयं मयैव कथं वा प्रतिपद्यते प्रतीयते। आश्चर्यमेतदित्यर्थः। स्वप्ने यादृशी सुन्दराधरत्वेनानुभूता तादृश्येव जाग्रदवस्थायामपीत्याश्चर्यम्। अत्र हेतुर्निशान्तपदम्। 'गोविसर्जनवेलायां दृष्टा सद्यः फलं भवेत्' इति। अथ च या मया मधुरसंयुक्ताधरानुभूता सा निर्मर्यादो लवणरसभावो यस्यैवंविधोऽधरोष्ठो यस्याः सा मयैव कथमनुभूयत इत्याश्चर्यम्। मधुररसलवणरसयोः परस्परविरोधादित्यर्थः[1]॥

स्मितं वर्णयति—

यदि प्रसादीकुरुते सुधांशोरेषा सहस्रांशमपि स्मितस्य।
तत्कौमुदीनां कुरुते तमेव निमिच्छ्य देवः सफलं स जन्म॥ ४३॥

यदीति॥ एषा स्मितस्य सहस्रांशं सहस्रपरिपूरकं लेशमपि सुधांशोर्यदि चेत्प्रसादीकुरुते चन्द्रस्य प्रसन्ना भूत्वा प्रसादत्वेन स्मितलेशत्वमपि ददाति तर्हि स चन्द्रो देवस्तमेव स्मित-सहस्रांशमेव निमिच्छ्य[2] अर्थात्कौमुदीभिरेव पूजयित्वा नीराजनं कृत्वा कौमुदीनां जन्म सफलं कृतकृत्यं कुरुते। अत्युत्तमस्य तस्य नीराजनस्थाने तासां भवनयोग्यत्वात्। अन्यदप्युत्तमं वस्तूत्तमेन वस्त्रादिना नीराज्यते। कौमुद्यस्तत्स्मितसहस्रांशस्यापि सदृश्यो नेति भावः[3]। सहस्रं चासावंशश्चेति व्युत्पत्तिः। सहस्रपूरणोंऽश इति लक्षणया व्याख्येयम्। अन्यथा 'नित्यं शतादि—' इत्यादिना डटस्तमडागमे सहस्रतम इति स्यात्। निपूर्वो मिच्छतिर्नीराजनार्थः॥

श्लोकत्रयेण दन्तपङ्क्तिद्वयं वर्णयति—

चन्द्राधिकैतन्मुखचन्द्रिकाणां दरायतं तत्किरणाद्घनानाम्।
पुरःसरस्रस्तपृषद्द्वितीयं रदावलिद्वन्द्वति विन्दुवृन्दम्॥ ४४॥

चन्द्रेति॥ तस्य चन्द्रस्य किरणात्। जात्यभिप्रायेणैकवचनम्। किरणेभ्यः सकाशाद्घ-नानां मुखचन्द्रस्य चन्द्रादुत्कृष्टत्वाद्घनानामतिनिविडानां चन्द्राधिकं चन्द्रोत्कृष्टम् एतन्मुखं भैमीमुखचन्द्रस्तस्य चन्द्रिकाणां दरायतमीषद्दीर्घम्, अथ च चन्द्राधिकैतन्मुखचन्द्रचन्द्रि-कारूपाणमेव घनानां मेघानां तेभ्यो मेघेभ्यः क्षरणाद्धेतोः ईषदायतम्। पुरःसराण्यग्रे-सराणि स्रस्तानि निःसृतानि पृषन्ति विन्दवः तान्येव द्वितीयानि यस्य तत् बिन्दुवृन्दम् रदावलिद्वन्द्वति दन्तपङ्क्तिद्वयमिवाचरति। अग्रनिःसृतबिन्दूनां सूक्ष्मत्वादधोदन्तत्वम्, पश्चाद-व्यवधानेन निःसरतां बिन्दूनामीषदायतत्वादूर्ध्वदन्तत्वमित्यर्थः। पर्जन्यवशात्पटलान्ता-त्प्रथममनेका बिन्दुपङ्क्तिः पतति, तदनु द्वितीया, तथैव संलग्नेषदायता पतति। तद्वदिदं दन्त-पङ्क्तिद्वयमिति दन्तानामीषदायतत्वं घनत्वं सूक्ष्मत्वं सामुद्रिको गुणः। रदावलिद्वन्द्वतीत्यत्र 'सर्वप्रातिपदिकेभ्यः क्विबाचारे' इति क्विप्॥

सेयं ममैतद्विरहार्तिमूर्च्छातमीविभातस्य विभाति संध्या।
महेन्द्रकाष्ठागतरागकर्त्री द्विजैरमीभिः समुपास्यमाना॥ ४५॥

---

१ 'अत्र विरोधाभासोऽलंकारः' इति साहित्यविद्याधरी। २ 'निमिच्छ्य' इति पठित्वा 'प्रक्षिप्य' इति व्याख्यातं जीवातौ। ३ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। ४ 'अत्रातिशयो-त्प्रेक्षारूपकालंकाराः' इति साहित्यविद्याधरी।

सेयमिति ॥ सेयं भैमी मम एतया सह विरहो वियोगः, तज्जन्या यार्तिः पीडा तज्जन्या या मूर्च्छा सैव तमी रजनी तस्या विभातस्य प्रातःकालसमयस्य संबन्धिनी संध्या विभातीति प्रकाशते । कीदृशी—महेन्द्रस्य काष्टामुत्कर्षं गतः प्राप्तः काष्ठां मर्यादामागतः प्राप्तो वा रागोऽनुरागस्तस्य कर्त्री जनिका । तथा—अमीभिः प्रत्यक्षदृश्यैर्द्विजैर्दन्तैः समुपास्यमाना सेव्यमाना । विभातस्य संध्येयमित्यनेन भैमीदर्शनान्मूर्च्छापगमः सूचितः । प्रातःसंध्यापि प्राचीप्रत्यलौहित्यजनिका ब्राह्मणैः सेव्यते । 'रजनी यामिनी तमी' इत्यमरः ॥

राजौ द्विजानामिह राजदन्ताः संबिभ्रति श्रोत्रियविभ्रमं यत् ।
उद्वेगरागादिमृजावदाताश्चत्वार एते तदवैमि मुख्याः ॥ ४६ ॥

राजाविति ॥ इह इदमनायां द्विजानां दन्तानां राजौ पङ्क्तौ एते इदमनायाश्चत्वारो राजदन्ता दन्तश्रेष्ठा यद्यस्मात् श्रोत्रियाणां विभ्रमं विलासमुज्ज्वलत्वलक्षणं धारयन्ति तत् तस्मात् मुख्याः । एतान्राजदन्तान्मौक्तिकानि मन्ये । किंभूताः—उद्वेगरागाः क्रमुकजन्यो लौहित्येन च आदिर्यस्य खादिरादेस्तस्य शोधनेन कृत्वा अवदाता उज्ज्वलाः । क्रमुकत्वचा मलीभूतेन वा क्रमुकेन कृतमार्जना दन्ता अत्युज्ज्वला भवन्तीति चतुर्णामेव मार्जनं क्रियते तेषामेव दर्शनविषयत्वात् । ततश्चात्युज्ज्वलत्वान्मुख्यत्वमुच्यते । अथ च राजवत् सत्त्वः-स्वरूपं येषां ते राजदन्ताः । एवंभूता ब्राह्मणानां पङ्क्तौ श्रोत्रियविभ्रमं पङ्क्तिपावनत्वं बिभ्रति । उद्वेगस्योद्वेजनस्य चित्तक्षोभस्य रागस्याभिलाषस्य आदिशब्देन द्वेषादेश्च मार्जनं त्यागः, तेन निष्कल्मषाश्च भवन्ति । तद् उत्कृष्टो वेगो येषां रागादीनाम् इति वा । एवंविधा ब्राह्मणा मुख्या भवन्तीति मुख्यैर्वेत्यर्थः । 'घोण्टा तु पूगः क्रमुको गुवाकः खपुरोऽस्य तु । फलमुद्वेगम्' इत्यमरः । दन्तानां राजानो राजदन्ताः राजदन्तादित्वात्परनिपातः ॥

श्लोकचतुष्टयेन वाणीं वर्णयति—

शिरीषकोषादपि कोमलाया वेधा विधायाङ्गमशेषमस्याः ।
प्राप्तप्रकर्षः सुकुमारसर्गे समापयद्वाचि मृदुत्वमुद्राम् ॥ ४७ ॥

शिरीषेति ॥ वेधाः शिरीषस्य कोषात्कुड्मलादपि कोमलाया अस्या भैम्या अशेषं सकलमङ्गं सुकुमारतरं विधाय निर्माय सुकुमारसर्गे मृदुवस्तुसृष्टौ प्राप्तप्रकर्षः सन् वाचि अस्या एव वाण्यां मृदुत्वमुद्रां सौकुमार्यमुद्रां समापयत् । ब्रह्मा सुकुमारवस्त्वन्तरदृष्टानि कृत्वा सौकुमार्यमर्यादां भैमीवाण्यामेव समाप्तिं नीतवान् । अतिमधुरस्वरेयमिति भावः । अन्योऽपि कृपि शिल्पे सोत्कर्षं समाप्तिं नयतीति ॥

प्रसूनबाणाद्वयवादिनी सा काचिद्द्विजेनोपनिषत्पिकेन ।
अस्याः किमास्यद्विजराजतो वा नाधीयते नैसभुजा तदन्यः ॥ ४८ ॥

प्रसूनेति ॥ तदन्यः अब्राह्मणादिकेभ्यो नैसभुजा कल्मषादिरहितोपनिषदधीतिना पिकेन कोकिलेन द्विजेन पक्षिणा प्रसूनबाणः कामः, तस्य अद्वैतवादिनी सा भैमीवाग्रूपा काचिदपूर्वा उपनिषद् रहस्यग्रन्थः, अस्या भैम्या आस्यद्विजराजतो मुखचन्द्रात् नाधीयते

---

१ 'अत्र [illegible]' इति साहित्यविद्याधरी । २ 'अत्र [illegible]' इति साहित्यविद्याधरी । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

न पठ्यते किम्, अपि तु पठ्यत एव । कषायरसाम्रादिमञ्जरीभक्षणेन पिकस्य मधुरस्वरत्वं सूचितम् । पिकः पञ्चमं स्वरं पठति स भैमीस्वर एवेदानीमपि तेनाभ्यस्यते परं तु नायातीत्यर्थः । कोकिलस्वराधिकभैमीस्वराकर्णनमात्रेण मदनाद्वैतमेव भवतीति भावः । अन्येनापि भिक्षाभुजा ब्राह्मणेनाद्वैतप्रतिपादिका 'एकमेवाद्वितीयं ब्रह्म' इत्यादिकोपनिषत् ब्राह्मणश्रेष्ठादधीयते । न विद्यते द्वयं यस्य तदद्वयं प्रसूनवाणलक्षणं यदद्वयमिति समासः । द्विजराजतः, 'आख्यातोपयोगे' इत्यपादानत्वम् । भिक्षाणां समूहः 'भिक्षादिभ्योऽण्' ॥

पद्माङ्कसद्मानमवेक्ष्य लक्ष्मीमेकस्य विष्णोः श्रयणात्सपत्नीम् ।
आस्येन्दुमस्या भजते जिताब्जं सरस्वती तद्विजिगीषया किम् ॥ ४९ ॥

पद्मेति ॥ सरस्वती अस्या भैम्याः तस्याः सपत्न्या विजिगीषया जेतुमिच्छया, सपत्नीगृहादुत्तमं गृहं मम कथंकारं स्यादिति मनीषया सौन्दर्येण जिताब्जं जितपद्ममास्येन्दुं मुखचन्द्रं भजते सेवते । किं वितर्के । किं कृत्वा—एकस्य विष्णोरुभाभ्यां श्रयणादात्मनः सपत्नीं लक्ष्मीं पद्मस्याङ्कः क्रोडः स एव सद्म स्थानं यस्यास्तामवेक्ष्य । चन्द्रोदये कमलसंकोचाच्चन्द्रोऽपि जिताब्जो भवति । यद्वा जितोऽब्जश्चन्द्रो येन चन्द्रेण कमलं जितं सोऽप्यनेन जित इति तदाश्रयणाल्लक्ष्मीर्वाण्यातितरां जितेत्यर्थः । वक्रोक्त्यादिचातुर्यमस्यामेवास्ति नान्यस्यामिति भावः । अन्यापि सपत्नीगृहाद्युत्तमं विलोक्येर्ष्यया स्वगृहादि तस्मादप्युत्तमं करोति । 'अब्जो जैवातृकः सोमः' इत्यमरः ॥[1]

कण्ठे वसन्ती चतुरा यदस्याः सरस्वती वादयते विपञ्चीम् ।
तदेव वाग्भूय मुखे मृगाक्ष्याः श्रोतुः श्रुतौ याति सुधारसत्वम् ॥५०॥

कण्ठ इति ॥ अस्याः कण्ठे वसन्ती वीणावादने चतुरा सरस्वती यत् विपञ्चीं वीणां वादयते तदेव वीणावादनमेव मृगाक्ष्या मुखे वाग्भूय वाणीत्वेन परिणम्य श्रोतुः श्रुतौ कर्णे सुधारसत्वं याति । वीणावन्मधुरस्वरेयमिति भावः । वाग्भूयेत्यत्र च्व्यन्तत्वाद्गतिसंज्ञायां समासः ॥[2]

चिबुकं वर्णयति—

विलोकितास्या मुखमुन्नमय्य किं वेधसेयं सुषमासमाप्तौ ।
धृत्युद्भवा यच्चिबुके चकास्ति निम्ने मनागङ्गुलियन्त्रणेव ॥ ५१ ॥

विलोकितेति ॥ विधिना इयं भैमी सुषमासमाप्तौ मुखनिर्माणशोभासमाप्तौ सत्यां मुखमुन्नमय्य कियदूर्ध्वीकृत्य विलोकितमास्यं यस्या एवंभूता किम् । अलंकरणसमाप्तौ शृङ्गारकारिणि मुखमुन्नमय्यालंकारशोभां विलोकयति, विधिनापि तथैव कृतमिति वितर्कः, अस्या मुखमुन्नमय्येति वा योजना । कथं ज्ञातमित्यत आह—यद्यस्मात् मनाक् ईषन्निम्ने [illegible]रे चिबुके हन्वग्रसंधौ धृत्युद्भवाङ्गुलिधारणजन्याङ्गुल्या कृत्वा या यन्त्रणा नियमना चकास्ति शोभते । अतिमार्दवादङ्गुलिधारणादपि हन्वग्रसंधौ निम्नत्वं जातमित्यर्थः । [illegible]णां स्वभावादेव चिबुकं निम्नं भवतीति[3] ॥[4]

[1] 'अत्र समासोक्तिरूपकव्यतिरेकालंकारसंकरः' इति साहित्यविद्याधरी । २ 'अत्र रूपकसमासोक्त्यलंकारसंकरः' इति साहित्यविद्याधरी । ३ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । 'अत्रानुमानोत्प्रेक्षानुप्रासालंकारसंकारः' इति साहित्यविद्याधरी ।

पुनरपि श्लोकनवकेन सावयवं मुखं वर्णयति—

प्रियामुखीभूय सुखी सुधांशुर्जयत्ययं राहुभयव्ययेन ।
इमां दधाराधरविम्बलीलां तस्यैव वालं करचक्रवालम् ॥ ५२ ॥

प्रियेति ॥ अयं सुधांशुश्चन्द्रः प्रियामुखीभूय भैमीमुखत्वं प्राप्य मुखाकारेण परिणम्य राहुभयस्य व्ययेनाभावेन सुखी निश्चिन्तः सन् जयति सर्वोत्कर्षेण वर्तते । मुखचन्द्रस्य राहुबाधा नास्तीति सुखित्वम् । यतश्चायं चन्द्र एव, तस्मात्तस्यैव चन्द्रस्य वालं उदयसमय-भावि करचक्रवालं किरणमण्डलं इमां प्रत्यक्षाधरविम्बलीलामधरोष्ठबिम्बविलासं दधार । चन्द्रतुल्यं मुखम्, उदितमात्ररक्तचन्द्रकिरणतुल्योऽधरोष्ठश्चेति भावः । अन्योऽपि वैरि-सकाशाद्भीतस्तदीयः परिजनोऽपि भीतः सन् तदनवबोधार्थमन्यमाकारं कृत्वा धारयन्सुखी भवति । बालश्च लीलां धारयति ॥

अस्या मुखस्यास्तु न पूर्णमास्यं पूर्णस्य जित्वा महिमा हिमांशुम् ।
भ्रूलक्ष्म खण्डं दधदर्धमिन्दुर्भालस्तृतीयः खलु यस्य भागः ॥ ५३ ॥

अस्या इति ॥ पूर्णस्य सर्वावयवपरिपूर्णस्य, अथ च वर्तुलस्य अस्या मुखस्य महिमा श्रेष्ठत्वं कीर्तिः, अथ च चन्द्रापेक्षयाऽधिकपरिमाणत्वं नास्तु अपि त्वस्त्येवेत्यर्थः । किंभूतम्—पूर्णमा आस्यं प्रारम्भो यस्य, यदुदये पूर्णिमास्ति, पूर्णिमास्या आस्यमिव वा तथाभूतं हिमांशुं पूर्णचन्द्रं जित्वा स्थितस्य । कुतोऽधिकत्वमत आह—खलु यस्मात् यस्य मुखस्य तृतीयो भागोऽसौ भालो ललाटमर्धखण्डं इन्दुः सन्नर्धकलरूपचन्द्रः । किंभूत इन्दुः—भ्रूरेव लक्ष्म कलङ्कं दधत् धारयन् । मुखस्य तृतीयो भागो भालो यस्य चन्द्रार्धम्, [illegible] मुखम् । भालोऽर्धचन्द्रतुल्यः, तदधोभागः पूर्णचन्द्रतुल्य इत्यर्थः । चन्द्राधिकमुखी चन्द्रा-र्धतुल्यभाला चेयमिति भावः । [illegible] । अन्यथा त्रिक-वर्तुलत्वानुपपत्तिः ॥

व्यधत्त धाता वदनाब्जमस्याः सम्राजमम्भोजकुलेऽखिलेऽपि ।
सरोजराजौ सृजतोऽदसीयां नेत्राभिधेयावत एव सेवाम् ॥ ५४ ॥

व्यधत्तेति ॥ धाता अखिलेऽपि अम्भोजकुलेऽस्या मुखपद्मं सम्राजं [illegible] धीशं व्यधत्त चक्रे । अथ च तदपेक्षया सम्यग्राजितं राजत इति सम्राजम् । अत एव नेत्राभिधेयौ नेत्रसंज्ञौ सरोजराजौ अम्बुजराजापेक्षया [illegible] सरोजराजौ अदसीयमुखाम्बुजस्य [illegible] सेवां सृजतः कुरुतः । [illegible]

दिवारजन्यो रविसोमभीते चन्द्राम्बुजे निक्षिपतः स्वलक्ष्मीम्।
आस्ये यदास्या न तदा तयोः श्रीरेकश्रियेदं तु कदा न कान्तम् ॥५५॥

दिवेति ॥ दिवारजन्योः क्रमेण दिनरात्र्यो रविसोमाभ्यां सकाशाद्भीते भयं प्राप्ते भीते-भयाद्वा चन्द्राम्बुजे स्वलक्ष्मीं स्वशोभां अस्या आस्ये मुखे यदा निक्षिपतः स्थापयतः तदा तयोश्चन्द्रपद्मयोः श्रीर्न। सूर्याद्भीतेन चन्द्रेण दिने चन्द्राद्भीतेन कमलेन रात्रौ यदा स्वस्वशोभा भैमीमुखे निक्षिप्ता तदा तद्द्वयमपि निःशोभं जातम्। अथ च निक्षिपतो न्यासीकुरुतः, तदा चन्द्राम्बुजयोः श्रीः शोभा नास्ति। इदं तु भैमीमुखं पुनरेकस्य चन्द्रस्य अम्बुजस्य वा श्रिया शोभया कृत्वा कदा कस्मिन्समये दिने रात्रौ वा न कान्तम्, अपि तु दिने रात्रौ च। चन्द्रशोभया कमलशोभया च सशोभम्। चन्द्रस्य शोभा रात्रावेव, न दिने। कमलस्य सा दिन एव, न रात्रौ। भैमीमुखं दिवा रात्रौ च सशोभमित्यर्थः। भैमीमुखं चन्द्रस्य लक्ष्मीरूपं निक्षेपं रात्रौ तस्मै प्रयच्छति दिने भीतत्वात्तस्य, एवं कमलस्य लक्ष्मीरूपं निक्षेपं दिने प्रयच्छति रात्रौ भीतत्वात्। धनादिनिक्षेपोऽपि धनिना यदा याच्यते तदैव दातव्यो भवति न स्थापनीयश्च भवति। यावच्चास्ति तावत्तेनैव स्वस्यालंकारः क्रियते। दिवा चन्द्रदीप्त्या रात्रौ कमलदीप्त्या चात्मानमलंकरोतीत्यर्थः ॥

अस्या मुखश्रीप्रतिबिम्बमेव जलाच्च तातान्मुकुराच्च मित्रात्।
अभ्यर्थ्य धत्तः खलु पद्मचन्द्रौ विभूषणं याचितकं कदाचित् ॥ ५६ ॥

अस्या इति ॥ खलूत्प्रेक्षते। पद्मं चन्द्रश्चोभौ तातात् पितुर्जलान्मित्रान्मुकुरादादर्शाच्चा-भ्यर्थ्य, अर्थात्प्रतिबिम्बमेव याचित्वा अस्या भैम्या मुखश्रीप्रतिबिम्बमेव सशोभमुखप्रतिबि-म्बलक्षणमेव याचितकं याच्ञया प्राप्तं विभूषणं कदाचित् दिने रात्रौ च धत्तः धारयतः। जलो-त्पन्नत्वात्पद्मस्य पिता जलम्। वृत्तत्वोज्ज्वलत्वादिगुणयुक्तत्वाद्दर्पणस्य चन्द्रसखत्वम्। पितृमि-त्राभ्यां याचितं दीयते याचितकालंकारः। कदाचिद्ध्रियते न सर्वदा। उदके यदा प्रतिबि-म्बितं भैमीमुखं तदैव पितरं जलं याचित्वा दिने कमलं शोभते। दर्पणे यदा प्रतिबिम्बितं भैमीमुखं तदैव दर्पणं मित्रं याचित्वा रात्रौ चन्द्रः शोभते नान्यथैतयोः शोभेत्यर्थः। भैमीमुखप्रतिबिम्बेनापि सदृशौ यदि पद्मचन्द्रौ न भवतः तदा भैमीमुखसदृशौ कुततरां भवे-ताम्, अपि तु न कुतोऽपीति भावः। चौ परस्परसमुच्चये। याचितकं याचितेन प्राप्तमित्यर्थे 'अपमित्ययाचिताभ्यां कक्नौ' इति कन् ॥

अर्काय पत्ये खलु तिष्ठमाना भृङ्गैर्मितामक्षिभिरम्बुकेलौ।
भैमीमुखस्य श्रियमम्बुजिन्यो याचन्ति विस्तारितपद्महस्ताः ॥ ५७ ॥

अर्कायेति ॥ अर्काय सूर्याय पत्ये प्रियाय तिष्ठमानाः स्वप्रकाशनेन सूर्यं स्वीयं भावं ज्ञापयितुकामा अम्बुजिन्यः अम्बुकेलौ जलक्रीडासमये भृङ्गरूपैरक्षिभिर्नेत्रैः कृत्वा मितां ज्ञातां भैम्या एव मुखस्य श्रियं विस्तारिताः पद्मलक्षणा हस्ता याभिस्ता एवंभूताः सत्यो भैमीं [illegible]न्ति। खलूत्प्रेक्षते। अस्मत्पतिः सूर्योऽधुना समागमिष्यतीति स्वमुखशोभयापि रुचिरा [illegible] इति भैमीमुखं शोभां भैमीं याचन्त इत्यर्थः। कमलभैमीमुखयोः सर्वथा साम्यं

१ 'अत्र यथा संख्यमनेतदयोक्तिमानोक्तिव्यतिरेकालंकाराः' इति साहित्यविद्याधरी। २ 'अत्रा-[illegible]योक्तिश्चार्थात्सत्वमनमोऽम्बुजेऽलंकाराः' इति साहित्यविद्याधरी।

दर्शनादत्र मदनो वसतीत्यनुमीयत इत्यर्थः। भैमीमुखावलोकनात्सबलस्य कामस्योत्पत्तिर्भवतीति भावः। रज्यदिति, 'कुषिरजोः–' इति श्यन्परस्मैपदे ॥

श्लोकपञ्चकेन कर्णौ वर्णयति—

वियोगबाष्पाञ्चितनेत्रपद्मच्छद्मार्पितोत्सर्गपयःप्रसूनौ।
कर्णौ किमस्या रतितत्पतिभ्यां निवेद्यपूपौ विधिशिल्पमीदृक् ॥ ६१ ॥

वियोगेति ॥ अस्याः कर्णौ रतिश्च तत्पतिः कामश्च ताभ्यां निवेद्यस्योपहारस्य संबन्धिनौ पूपौ मण्डकौ ईदृक् किं विधिशिल्पं ब्रह्मनिर्माणम् इति संभावना एतदर्थं ब्रह्मणा किमेतौ निर्मितावित्यर्थः। किंभूतौ—वियोगजनिता ये बाष्पा अश्रूणि तैरञ्चितस्य पूजितस्य नेत्रपद्मस्य छद्मना व्याजेनार्पिते वितीर्णे उत्सर्गार्थं दानार्थं पयःप्रसूने जलपुष्पे ययोस्तौ। अश्रु दानजलम्, नेत्रे च दानपुष्पे ययोः समीपे तिष्ठतः। नैवेद्यसमीपे जलपुष्पे भवतः। आकर्णनेत्रत्वादित्यर्थः। कर्णदर्शनादपि मदनोत्पत्तिरिति भावः। 'पूपोऽपूपः पिष्टकः स्यात्' इत्यमरः। निवेद्यम्, अर्हार्थे ण्यत् ॥

इहाविशद्येन पथातिवक्रः शास्त्रौघनिष्यन्दसुधाप्रवाहः।
सोऽस्याः श्रवःपत्रयुगे प्रणालीरेखैव धावत्यभिकर्णकूपम् ॥ ६२ ॥

इहेति ॥ अतिवक्रो वैषम्यादतिकुटिलो व्यङ्ग्यगूढार्थयुक्तो दुर्बोधोऽनृजुश्च शास्त्रौघस्य शास्त्रसमूहस्य निष्यन्दः सारभाग एव सुधाप्रवाहो येन पथा इह अस्याः कण्ठकूपेऽविशत्स पन्था अस्या भैम्याः श्रवःपत्रयुगे कर्णताटङ्कद्वये प्रणालिकाया रेखेवाभिकर्णकूपं कर्णरन्ध्रं लक्षीकृत्य कर्णकूपसंमुखं वा धावति। यादृशी प्रणालिका तादृश एव प्रवाहो भवति। अत्र च ताटङ्कप्रणालिके कुण्डलाकारत्वाद्वक्रे, अतस्तत्र गच्छन्प्रवाहोऽपि वक्रो युक्तः। यद्वा वक्रगामिनो हि प्रवाहस्य प्रणालीरूपो मार्गो वक्र एव भवति, कूपं चानुधावति। अतो वक्रकर्णरेखारूपया प्रणाल्या कृत्वा वक्रः शास्त्रसुधाप्रवाहः कर्णयुगे भैम्यां वा प्रविष्ट इत्यर्थः। वक्रोक्तिः सुधारूपा भवति, सकलकलाप्रवीणेयमिति भावः। निष्यन्दत इति निष्यन्दः। पक्षे पचाद्यच्। 'अनुविपर्यभिनिभ्यः स्यन्दतेः–' इति षत्वम्। अभिकर्णकूपमिति 'लक्षणेनाभिप्रती आभिमुख्ये' इति समासः ॥

अस्या यदष्टादश संविभज्य विद्याः श्रुती दध्रतुरर्धमर्धम्।
कर्णान्तरुत्कीर्णगभीररेखः किं तस्य संख्यैव नवानवाङ्कः ॥ ६३ ॥

अस्या इति ॥ अस्याः श्रुती कर्णौ अष्टादश विद्याः संविभज्य द्विधाकृत्य यदर्धमर्धं प्रत्येकं धारयामासतुस्तस्यार्धस्य कर्णान्तः कर्णमध्ये उत्कीर्णा उद्धृता गभीरा निम्ना रेखा यस्य एवंभूतो नवसंख्याद्योतकोऽङ्को नवा अपूर्वाश्चर्यरूपा संख्या किं न, अपि तु भवत्येव। नवसंख्याका विद्या एका श्रुतिर्धारयति, अपरापि नवसंख्याका इति द्योतनार्थं ब्रह्मणैव कर्णमध्ये रेखारूपोऽष्टादशार्धगणनानुरूपो नवाङ्को निर्मित इत्यर्थः। तस्यैवार्धसंख्या नवा किं नवाङ्क इत्यर्थं इति वा। नवेति निषेधार्थः। अस्याः कर्णरेखा नवाङ्कतुल्या सलक्षणेति भावः ॥

---

१ 'अत्रातिशयोक्तिरूपकालंकारौ' इति साहित्यविद्याधरी। २ 'अत्र छेकानुप्रासरूपकापह्नुत्युत्प्रेक्षालंकाराः' इति साहित्यविद्याधरी। ३ 'अत्रापह्नुत्युपमालंकारौ' इति साहित्यविद्याधरी। ४ 'अत्र छेकानुप्रासोत्प्रेक्षालंकाराः' इति साहित्यविद्याधरी।

मन्येऽमुना कर्णलतामयेन पाशद्वयेन च्छिदुरेतरेण।
एकाकिपाशं वरुणं विजिग्येऽनङ्गीकृतायासततो रतीशः॥ ६४॥

मन्य इति॥ रतीशः कामोऽमुना एतदीयेन कर्णलतामयेन छिदुरेतरेण दृढतरेण पाशद्वयेन पाशरूपशस्त्रद्वयेन कृत्वा एक एव एकाकी पाशो यस्यैवंविधं वरुणं सुखेन विजिग्ये जितवान्मन्ये। किंभूतः—न अङ्गीकृता आयासततिः श्रमसाहित्यं येन। पाशद्वयेनैकस्य पाशस्य जयः सुकर इत्यायासराहित्यम्। कर्णयुगं दृष्ट्वा वरुणादयः सर्वेऽपि कामपरवशा भवन्तीति भावः। 'पाशो बन्धनशस्त्रयोः' इत्यमरः। विजिग्ये, 'विपराभ्यां जेः' इति तङ्॥

आत्मैव तातस्य चतुर्भुजस्य जातश्चतुर्दोरुचितः स्मरोऽपि।
तच्चापयोः कर्णलते भ्रुवोर्ज्ये वंशत्वगंशौ चिपिटे किमस्याः॥ ६५॥

आत्मेति॥ स्मरोऽपि तस्माच्चतुर्दोः—चत्वारो दोषो बाहवो यस्य एतादृश उचितो युक्तः। यतः—चतुर्भुजस्य कृष्णस्य तातस्य पितुरात्मैव स्वरूपमेव। 'आत्मा वै पुत्रनामासि' इति श्रुतेः पितुः सदृशः पुत्रो युक्त एव। तस्य चतुर्भुजत्वे अस्या भ्रुवौ तच्चापयोर्भ्रूरूपयोर्द्वयोः स्मरधनुषोः चिपिटे विस्तृते कर्णलते एव वंशत्वगंशौ वेणुत्वग्भागौ ज्ये किम्। भ्रुवौ कामधनुषी। कर्णौ मौर्व्यौ। द्वयोर्धनुषोर्मौर्वीद्वयं युक्तम्। निर्व्यापारस्य धनुषोऽवतारिता मौर्वी कोणे तिष्ठति, कर्णलते अपि भ्रूधनुषोः कोणे वर्तेते इत्यर्थः। 'चिपिटौ' इत्यपि पाठः॥

ग्रीवां वर्णयति—

ग्रीवाद्भुतैवावटुशोभितापि प्रसाधिता माणवकेन सेयम्।
आलिङ्ग्यतामप्यवलम्बमाना सुरूपताभागखिलोर्ध्वकाया॥ ६६॥

ग्रीवेति॥ सेयं ग्रीवा अद्भुतैव आश्चर्यभूतैव सर्वाङ्गेभ्यः। अद्भुतत्वमेव विशेषणैराह— किंभूता—अवटुना कृकाटिकया ग्रीवापश्चाद्भागेनालंकृता। अपिः समुच्चये। माणवकेनार्धहाररूपेण हारविशेषेण वा प्रसाधिताऽलंकृता। तथा—आलिङ्ग्यतामपि आलिङ्गनयोग्यतां सौन्दर्यमवलम्बमाना आश्रयन्ती। अत एव सुरूपतां शोभनरूपत्वं भजत्याश्रयति एवंविधोऽखिल ऊर्ध्वकायः शरीरोर्ध्वदेशो यया। कण्ठसौन्दर्यात्सकलः शरीरोर्ध्वदेशः शोभते। ईदृशी ग्रीवा नान्यस्या इत्यर्थः। अनुरूपताभागिति प्रियत्वात्सुरूपताभागखिलोर्ध्वकायो यया करोति वा। याऽवटुशोभिता न सा माणवकेन बालेन प्रसाधितेति विरोधादाश्चर्यम्। अथ च याऽऽलिङ्ग्यतां मर्दलविशेषत्वं तद्रूपत्वमवलम्बते सा सुरूपताभागोऽखिल ऊर्ध्वको मृदङ्गविशेषो यस्या यया वा। 'हरीतक्याकृतिस्त्वङ्क्यो यवमध्यस्तथोर्ध्वकः। आलिङ्ग्यश्चैव गोपुच्छ[illegible]' । 'मृदङ्गा मुरजा भेदास्त्वङ्क्यालिङ्ग्योर्ध्वकास्त्रयः' इत्यमरः। 'सरूपता' इति पाठे वा। ग्रीवया [illegible] कृतेत्येकपदे [illegible]। 'अवटुर्घाटा कृकाटिका। अर्धहारो माणवकः' इत्यमरः। 'माणवको बाले हारभेदे कुपूरुषे' इत्यनेकार्थः॥

कण्ठं वर्णयति—

कवित्वगानप्रियवादसत्यान्यस्या विधाता व्यधिताधिकण्ठम्।
रेखात्रयन्यासमिषादमीषां वासाय सोऽयं विबभाज सीमाः॥ ६७॥

---

१ 'अथ [illegible]' इति साहित्यविद्याधरी। २ '[illegible]' इति साहित्यविद्याधरी। ३ '[illegible]' इति साहित्यविद्याधरी।

कवित्वेति ॥ विधाता अस्या अधिकण्ठं कण्ठे कवित्वं गानं प्रियवादः प्रियवचनं सत्यं वा एतानि चत्वारि व्यधित रचितवान्। कुतो ज्ञातमित्यत आह—सोऽयं विधाता कण्ठे रेखात्रयस्य न्यासस्य मिषाच्चतुर्णाममीषां कवित्वादीनां पृथग्वासाय स्थित्यर्थं सीमाश्चतस्रो विवभाज विभक्तवान्। रेखात्रयेण चत्वारि स्थानानि भवन्ति। कवित्वादिकलावती कम्बुकण्ठी चेयमिति भावः। 'रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते' ॥

श्लोकद्वयेन बाहू वर्णयति—

बाहू प्रियाया जयतां मृणालं द्वन्द्वे जयो नाम न विस्मयोऽस्मिन्।
उच्चैस्तु तच्चित्रममुष्य भग्नस्यालोक्यते निर्व्यथनं यदन्तः ॥ ६८ ॥

बाहू इति ॥ प्रियाया बाहू मृणालं जयताम्। अनुमतमेतत्। यतोऽस्मिन् भुजलक्षणे द्वन्द्वे जयो नाम यत् स न विस्मयः। अतिगौरवा(त्वा)दतिमृदुत्वाच्च बाहुभ्यां मृणालं जितम्। किमाश्चर्यमित्यर्थः। अथ च द्वाभ्यामेकः सुखेन पराजीयते। अथ च द्वन्द्वे युद्धे जयो भवत्यत्र नाश्चर्यम्। एकस्य युद्धे जयो भवत्येव। तत्तु तत्पुनरुच्चैरतिशयितं चित्रमाश्चर्यम्। यत् भग्नस्य जितस्यामुष्यान्तरन्तःकरणं निर्व्यथनं व्यथारहितमालोक्यते। पराजितस्यान्तःकरणं सव्यथं भवति, अस्य तु नेत्याश्चर्यम्। द्विधाकृतमृणालमध्ये छिद्राणि दृश्यन्ते। भैमीभुजौ मृणालादपि गौरतरौ। कोमलतराविति भावः। 'द्वन्द्वं कलहयुग्मयोः', 'छिद्रं निर्व्यथनम्' इत्यमरः। पक्षे निर्गतं व्यथनान्निर्व्यथनम्, 'निरादयः–' इति तत्पुरुषः ॥

अजीयतावर्तशुभंयुनाभ्यां दोर्भ्यां मृणालं किमु कोमलाभ्याम्।
निःसूत्रमास्ते घनपङ्कमृत्सु मूर्तासु नाकीर्तिषु तन्निमग्नम् ॥ ६९ ॥

अजीयतेति ॥ आवर्तेन दक्षिणावर्तेन शुभंयुः शुभान्विता रमणीया नाभिर्यस्यास्तया भैम्या कोमलाभ्यां दोर्भ्यां भुजाभ्यां कृत्वा मृणालमजीयत पराजितम्। किमु संभावनायाम्। अत एव निःसूत्रं निर्व्यवस्थं स्फूर्तिरहितं निरुपायं सत्। अथ च तन्तुरहितं तन्मृणालं घनपङ्कमृत्सु निबिडकर्दममृत्तिकारूपासु मूर्तासु शरीरधारिणीषु अकीर्तिष्वयशःसु निमग्नं किमु नास्ते, अपि तु ताभ्यां जितत्वादेवैवंविधमास्ते। अयशसः श्यामरूपत्वान्मृद्रूपत्वम्। अतिकोमलं मृणालं तन्तुरहितं भवति। अन्योऽपि केनचिज्जितो निरुपायः सन्नकीर्तिषु निमज्य तिष्ठति। कोमलमपि मृणालं भैमीभुजसदृशं नेति भावः। 'सूत्रं तु सूचनाग्रन्थे सूत्रं तन्तुव्यवस्थयोः' इति विश्वः। शुभंयुः, मत्वर्थे 'अहंशुभमोर्युस्' ॥

श्लोकत्रयेण पाणिं वर्णयति—

रज्यन्नखस्याङ्गुलिपञ्चकस्य मिषादसौ हैङ्गुलपत्त्रतूणे।
हैमैकपुङ्खास्ति विशुद्धपर्वा प्रियाकरे पञ्चशरी स्मरस्य ॥ ७० ॥

रज्यदिति ॥ असौ प्रत्यक्षदृश्या स्मरस्य पञ्चशरी रज्यन्तः स्वयमेव रक्ता भवन्तो नखा यस्य अङ्गुलीनां पञ्चकस्य मिषाद्व्याजात् प्रियाया भैम्याः करे अस्ति। किंभूते—रङ्गत् हैङ्गुलं हिङ्गुलेन रक्तं पत्त्रं तन्निर्मितो यस्तूण इषुधिस्तद्रूपे। किंभूता पञ्चशरी। हेमाः सुवर्णमया एके श्रेष्ठाः पुङ्खा मूलानि यस्याः सा। तथा—विशुद्धानि स्वच्छानि पर्वाणि ग्रन्थयो

१ 'अत्र श्लेषानुप्राणितापह्नुत्यलंकारः' इति साहित्यविद्याधरी। २ 'अत्र रूपकोपमोत्प्रेक्षालंकारौ' इति साहित्यविद्याधरी। ३ 'अत्र श्लेषानुप्राणितरूपकोक्तिरूपश्लेषालंकाराः' इति साहित्यविद्याधरी।

तारुण्यतेजसा कृत्वा शुष्यत्तरमतितरां विनश्यदवस्थं बाल्यमेव वार्जलं यस्याः । बाल्यनाशात्तारुण्योद्गमाच्च द्वीपतुल्यावत्युच्चौ कुचावस्था इति भावः । जलशोषान्नर्मदायां द्वीपयोरुन्मज्जनं युक्तम् । बाहुलता इति पृथग्वा । 'आपः स्त्री भूम्नि वार्वारि' इत्यमरः । अन्तरीपे 'द्व्यन्तरुपसर्गेभ्योऽप ईत्', 'ऋक्पूर्-' इति समासान्तः ॥

तालं प्रभु स्यादनुकर्तुमेतावुत्थानसुस्थौ पतितं न तावत् ।
परं च नाश्रित्य तरुं महान्तं कुचौ कृशाङ्ग्याः स्वत एव तुङ्गौ ॥ ७४ ॥

तालमिति ॥ तालफलं द्विविधम्, पतितमपतितं च । तालं कर्तृ एतौ कृशाङ्ग्या भैम्याः कुचौ अनुकर्तुं प्रभु समर्थं स्यात् । यतः—पतितं भैम्या कुचावनुकर्तुं न तावत्प्रभु समर्थम् । यत उत्थानेन परस्परसंश्लेषोद्गमनेन सुस्थौ । निरन्तरत्वेन सुन्दरावित्यर्थः । तस्य पतितत्वात्तयोरुन्नतत्वात्साम्यं न युज्यत इत्यर्थः । अन्योऽपि पातित्यदोषयुक्तोऽन्यं सुकृतिनं समीकर्तुं न शक्नोत्येवेत्यर्थः । द्वितीयस्यापतितस्याप्यसामर्थ्यमाह—परम् अतिशयेन महान्तमुच्चम्, अथ च परमन्यं उच्चं तालवृक्षमाश्रित्य तुङ्गमपि कुचौ समीकर्तुं न समर्थम् । यतः कुचौ स्वत एव परानपेक्षमेव तुङ्गौ उच्चतरौ । स्वतस्तुङ्गस्य पराश्रयेण तुङ्गस्य च कुतः साम्यम् । तालफलादप्यतिवृत्तावुच्चतरौ च भैमीकुचाविति भावः ॥

एतत्कुचस्पर्धितया घटस्य ख्यातस्य शास्त्रेषु निदर्शनत्वम् ।
तस्माच्च शिल्पान्मणिकादिकारी प्रसिद्धनामाजनि कुम्भकारः ॥ ७५ ॥

एतदिति ॥ एतस्या भैम्याः कुचस्पर्धितया स्तनस्पर्धया ख्यातस्य प्रसिद्धस्य घटस्य न्यायशास्त्रादिषु 'यत्कृतकं तदनित्यं यथा घटः' इति, 'यन्नित्यं न तदकृतकमपि न यथा घटः' इत्यन्वयव्यतिरेकाभ्यां निदर्शनत्वं दृष्टान्तत्वमजनि जातम् । प्रसिद्धस्य हि दृष्टान्तत्वम् । अन्योऽप्यप्रसिद्धः प्रसिद्धस्पर्धया ख्यातो भवति । मणिकादिकारी अलिंजरादिकारी च तस्माच्छिल्पात् भैमीकुचस्पर्धिघटनिर्माणादेव प्रसिद्धं नाम यस्यैवंविधः सन् कुम्भकारोऽजनि जातः । मणिकादिकारित्वात्कुम्भकारस्य कुम्भकारत्वप्रसिद्धिर्न किंतु भैमीकुचस्पर्धया ख्यातस्य कुम्भस्य निर्माणात्कुम्भकारत्वप्रसिद्धिः । नान्यत्किंचित्कारणम् । 'वरं विरोधोऽपि समं महात्मभिः' इति भारविवचनात् । कुम्भपरिमाणावेतत्कुचाविति भावः । 'अलिंजरः स्यान्मणिकः' इत्यमरः ॥

गुच्छालयस्वच्छतमोदबिन्दुवृन्दाभमुक्ताफलफेनिलाङ्के ।
माणिक्यहारस्य विदर्भसुभ्रूपयोधरे रोहति रोहितश्रीः ॥ ७६ ॥

गुच्छेति ॥ माणिक्यमयस्य हारस्य रोहितश्रीः लोहिता कान्तिः विदर्भसुभ्रूपयोधरे भैमीकुचे रोहति प्रादुर्भवति । किंभूते—गुच्छो हारविशेष आलय आश्रयो येषां तानि स्वच्छतमानि निर्मलतराणि उदबिन्दुवृन्दवज्जलबिन्दुसमूहवदाभा येषां तानि मुक्ताफलानि तैः फेनिलः फेनयुक्त इव उज्ज्वलतरोऽङ्को मध्यो यस्य । मुक्ताहारमाणिक्यहाराभ्यां भैमीकुचौ

१ 'अत्र छेकानुप्रासोत्प्रेक्षालंकारौ' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गविरोधाभाससमासोक्त्यलंकाराः' इति साहित्यविद्याधरी । ३ 'अत्रासंबन्धे संबन्ध इति रूपकातिशयोक्तिच्छेकानुप्रासालंकाराः' इति साहित्यविद्याधरी ।

शोभेते इति भावः। अथ च पयोधरे मेघे रोहितश्रीः ऋजुशक्रधनुःशोभा प्रादुर्भवतीत्युक्तिः। 'हारभेदा यष्टिभेदाद्गुच्छगुच्छार्धगोस्तनाः', 'इन्द्रायुधं शक्रधनुस्तदेव ऋजु रोहितम्', 'रोहितो लोहितो रक्तः' इत्यमरः। फेनिलः, मत्वर्थे 'फेनादिलच' इतीलच् ॥

निःशङ्कसंकोचितपङ्कजोऽयमस्यामुदीतो मुखमिन्दुबिम्बः।
चित्रं तथापि स्तनकोकयुग्मं न स्तोकमप्यञ्चति विप्रयोगम् ॥ ७७ ॥

निःशङ्केति ॥ यदेतन्मुखं अस्यां भैम्यामयं इन्दुबिम्ब एवोदितः। किंभूतः—निःशङ्कं यथातथा बलात्कारेण संकोचितानि निमीलितानि, अथ च जितानि कमलानि येन। इदं मुखं न, किंतु चन्द्रोऽयमित्यर्थः। चन्द्रेण हि कमलानि संकोच्यन्ते। मुखमैक्यात्संकुचिते कमले एवैते, नतु कुचावित्यर्थः। तथाप्युदितेऽपि चन्द्रे स्तनलक्षणं कोकयुग्मं चक्रवाकयुग्मं कर्तृ स्तोकमप्यल्पमपि विप्रयोगं वियोगं नाञ्चति न प्राप्नोति। मिलितमेव यत्तिष्ठति तच्चित्रमाश्चर्यम्। चक्रवाकयुग्मं चन्द्रोदये वियोगं प्राप्नोति, कुचलक्षणं नेत्याश्चर्यम्। चक्रवाककमलकलिकाकारावतिसंश्लिष्टौ चैतत्कुचाविति भावः ॥

आभ्यां कुचाभ्यामिभकुम्भयोः श्रीरादीयतेऽसावनयोर्न ताभ्याम्।
भयेन गोपायितमौक्तिकौ तौ प्रव्यक्तमुक्ताभरणाविमौ यत् ॥ ७८ ॥

आभ्यामिति ॥ आभ्यां प्रत्यक्षदृश्याभ्यां कुचाभ्यामिभकुम्भयोः श्रीः शोभा, संपच्च बलादादीयते गृह्यते। इभकुम्भश्रियोऽत्र दर्शनादित्यर्थः। ताभ्यामिभकुम्भाभ्यां अनयोः कुचयोः असौ नादीयते। कुतो ज्ञातमेतदित्यत आह—यद्यस्मात् तौ इभकुम्भौ भयेन अर्थात्स्तनसकाशादेव भीत्या गोपायितमौक्तिकौ, इमौ कुचौ तु प्रव्यक्तमुक्ताभरणौ प्रकटमुक्तालंकरणौ। मुक्ताग्रहणभयेनकुम्भाभ्यां स्वमुक्ता गोपिताः। इभकुम्भाभ्यामप्यधिकं भैमीकुचौ रमणीयाविति भावः। अन्योऽपि भीतः स्वरत्नानि गोपायति, निर्भयश्च प्रकटयति ॥

कराग्रजाग्रच्छतकोटिरर्थी ययोरिमौ तौ तुलयेत्कुचौ चेत्।
सर्वं तदा श्रीफलमुन्मदिष्णु जातं वटीमप्यधुना न लब्धुम् ॥ ७९ ॥

करेति ॥ कराग्रे जाग्रद्दिप्यमानः शतकोटिर्वज्रो यस्य स इन्द्रः ययोः कुचयोरर्थी याचकः कुचमर्दनाभिलाषी। उन्मदिष्णुलक्षणया पक्वं सर्वं श्रीफलं बिल्वफलं कर्तृ चेद्यदि तौ इमौ कुचौ तुलयेत्समीकुर्यात् साम्याभिलाषि यदि भवेत् तदा तर्हि तद्बिल्वफलमधुना वटीमपि लक्षणया स्वमलवण्डकेसमपि लब्धुं न जातं योग्यमभूत्। [illegible] यस्मादिन्द्रोऽप्येतयोरभिलाषी तस्मादिमौ सुन्दराभ्यां कुचाभ्यां पक्वमपि बिल्वफलं तुल्यं कथं भवेदित्यर्थः। यदीत्तमसर्वदा [illegible] न लभेत [illegible] जातमित्यर्थः। [illegible] सर्वदैव [illegible]। अथ च—कराग्रे जाग्रत् शतं कोटयो द्रव्यसंख्या यस्य सोऽपि ययोरर्थी [illegible] तौ कुचौ सर्वं लक्ष्मीफलं तुलयेच्चेत्, तदा उन्मदिष्णुरप्युन्मत्तं वराटिकामपि लब्धुं न शक्तम्।

१ 'अत्र [illegible]' इति साहित्यविद्याधरी। अत्र [illegible]।
२ 'अत्र [illegible]' इति साहित्यविद्याधरी। '[illegible]' इति जीवातुः। ३ 'अत्र [illegible]' इति साहित्यविद्याधरी।

न योग्यमित्यर्थः । 'वटः कपर्दे न्यग्रोधे' इति विश्वः । 'स्त्री स्यात्काचिन्मृणाल्यादिर्विवक्षापचये यदि' इत्यमरसिंहवचनादल्पो वटो वटी । उन्मदिष्णिरित्यत्र 'अलंकृञ्–' इतीष्णुच् ॥

स्तनावटे चन्दनपङ्किलेऽस्या जातस्य यावद्युवमानसानाम् ।
हारावलीरत्नमयूखधाराकाराः स्फुरन्ति स्खलनस्य रेखाः ॥ ८० ॥

स्तनेति ॥ चन्दनेन पङ्किले आर्द्रचन्दनयुक्तेऽस्याः स्तनावटे गम्भीरे स्तनमध्ये जातस्य निष्पन्नस्य यावद्युवमानसानां सर्वतरुणान्तःकरणानां स्खलनस्य पतनस्य हारावल्यां रत्नानि तेषां मयूखधाराः किरणपरम्परा आकारः स्वरूपं यासां ता रेखाः स्फुरन्ति प्रतिभासन्ते। किरणपरम्परेयं न भवति, किंतु पतनरेखा एवेति । एवंभूतं स्तनमध्यं दृष्ट्वा सर्वेऽपि मुह्यन्तीति, तत्र स्खलनस्योक्तत्वात्तत्रालब्धावकाशा इति भावः । पङ्किले गर्ते लोकस्य पतनं तद्रेखाश्चोत्पद्यन्ते । 'अवटः स्यात्त्रिले गर्ते कूपे कुहकजीविनि' इति विश्वः । पङ्किलः पिच्छादिः । यावन्तो युवानस्तावतामिति यावद्युवं, साकल्येऽव्ययीभावः ॥

वलीसहितमुदरं वर्णयति—

क्षीणेन मध्येऽपि सतोदरेण यत्प्राप्यते नाक्रमणं वलिभ्यः ।
सर्वाङ्गशुद्धौ तदनङ्गराज्यविजृम्भितं भीमभुवीह चित्रम् ॥ ८१ ॥

क्षीणेनेति ॥ मध्येऽवलग्नेऽपि सता विद्यमानेन क्षीणेन कृशतरेणोदरेण यत् वलिभ्यस्त्रिवलिभ्यः सकाशादाक्रमणमभिभवो न प्राप्यते तत् सर्वाङ्गशुद्धौ सर्वाङ्गाणां शुद्धिः यस्या एवंभूतायामिहास्यां भीमभुवि भैम्यां चित्रमाश्चर्यरूपं अनङ्गराज्यस्य कामराज्यस्य विजृम्भितं विलसितम् । अद्भुततारुण्यवशात्सूक्ष्माणां वलीनामपतितत्वात्ताभिरतिकृशमुदरं नाक्रान्तमित्यर्थः । अन्येनापि क्षीणेन दुर्बलेनोभयोः सीमायां विद्यमानेनापि स्वाम्यमात्यादीनां सप्ताङ्गानां शुद्धौ सत्यामपि वलिष्ठेभ्यो भयानकायां भूमौ पराभवो न प्राप्यते, तत् सप्ताङ्गरहितस्य दुर्बलस्य विलसितमाश्चर्यरूपम् । वलिनां सर्वाङ्गशुद्धेर्विद्यमानत्वात्, स्वस्य च सर्वाङ्गराहित्यात्सीमनि वर्तमानत्वादिपराभवकारणे सत्यपि यत्पराभवो न प्राप्तस्तदाश्चर्यमित्यर्थः । तथा—भीमस्य भुवि राज्येऽनङ्गस्य राज्यं कथम् । अन्यभूमावन्यराज्यभावासंभवात् । अथ च भीमस्य महादेवस्य भुवि कामस्य राज्यमित्यप्याश्चर्यम् । परैर्ग्रहीतुमशक्यत्वादतिविषमायां भूमौ पराभवो न प्राप्यते अत्र चित्रं, अपि तु नेति काकुर्वा ॥

मध्यं वर्णयति—

मध्यं तनूकृत्य यदीदमीयं वेधा न दध्यात्कमनीयमंशम् ।
केन स्तनौ संप्रति यौवनेऽस्याः सृजेदनन्यप्रतिमाङ्गयष्टेः ॥ ८२ ॥

मध्यमिति ॥ वेधाः इदमीयमेतदीयं मध्यं तनूकृत्यातिकृशं कृत्वा मध्यसंबन्धिनं कमनीयमंशं भागं यदि न दध्यात्क्वापि न स्थापयेत् तर्हि संप्रति यौवने अनन्यप्रतिमाऽनन्यतुल्याङ्गयष्टिरङ्गकान्तिर्यस्या एवंभूताया अस्याः स्तनौ केनांशेन प्रकारेण वा सृजेत् ।

---

१ 'अत्र श्लेषसमासोक्त्यलंकारौ' इति साहित्यविद्याधरी। २ 'स्तनातटे' इति जीवातुसंमतः पाठः। ३ 'अत्र समासोक्त्यपह्नुत्यलंकारौ' इति साहित्यविद्याधरी। 'उत्प्रेक्षा' इति जीवातुः। ४ 'अत्र समासोक्तिविरोधाभासालंकारौ' इति साहित्यविद्याधरी।

तृतीयस्यातिसुन्दरस्य मध्यांशस्य संग्रहं कृत्वा तेनैवांशेन यौवने कुचौ कृतावित्यर्थः । मध्योऽतिकृशः स्तनौ चातिसुन्दराविति भावः ॥

रोमावलीं वर्णयति—

गौरीव पत्या सुभगा कदाचित्कर्तेयमप्यर्धतनूसमस्याम् ।
इतीव मध्ये विदधे विधाता रोमावलीमेचकसूत्रमस्याः ॥ ८३ ॥

गौरीति ॥ विधाता अस्या मध्ये रोमावलीलक्षणं मेचकसूत्रं नीलसूत्रम् इतीव विदधे कृतवान्किम् । इति किम्—सुभगा सौभाग्यवतीयमपि पत्या प्रियेण कृत्वा कदाचिदर्धतनूसमस्यां शरीरार्धपूरणं कर्ता करिष्यति । केव—गौरीव । पार्वती ईश्वरेणार्धतनुसमस्यां यथा कृतवती तथेयमपि । इयं रोमावली न, किंत्वर्धशरीरघटनार्थं नीलसूत्रं निहितम् । 'कर्ता' इति लुट् ॥

पुनरपि सनाभि रोमावलीं वर्णयति—

रोमावलीरज्जुरुरोजकुम्भौ गम्भीरमासाद्य च नाभिकूपम् ।
मद्दृष्टितृष्णा विरमेद्यदि स्यान्नैषां बतैषा सिचयेन गुप्तिः ॥ ८४ ॥

रोमावलीति ॥ मद्दृष्टितृष्णा मम दर्शनवाञ्छा रोमावलीलक्षणां रज्जुम्, उरोजलक्षणौ कुम्भौ, गम्भीरं नाभिलक्षणं कूपं चासाद्य तर्हि विरमेच्छाम्येत्, यदि एषां रोमावल्यादीनां सिचयेन वस्त्रेण एषा गुप्तिर्वेष्टनं न स्यात् । बत खेदे 'एवं तु न जातम्' इति खेदः । अवेष्टितानां सुखेन द्रष्टुं शक्यत्वाद्दर्शनवाञ्छा शाम्येत्, वस्त्रावृतत्वात्तु नेत्यर्थः । अथच—अनावृतदर्शनाद्विरागः, आवृतदर्शनात्त्वनुरागवशात्पुनः पुनर्दिदृक्षैव वर्धत इत्यर्थः । रोमावल्यादेर्वस्त्रेण गोपनादौचित्यं सूचितम् । अथच—लोके रज्जुं, कुम्भौ, गम्भीरं कूपं च प्राप्य तृष्णा पिपासा तदा शाम्येत्, यद्येषां सिचयेन लक्षणया [illegible] रक्षणं न स्यात्, यद्येकतमोऽप्यः कूपः [illegible] रक्ष्यते, अतो जलहरणसामग्रीसद्भावेऽपि पिपासा न शाम्यतीति । अतिगम्भीरनाभिरियमिति भावः । 'तृष्णे स्पृहापिपासे द्वे' इत्यमरः । विरमेत् 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् ॥

उन्मूलितालानबिलाभनाभिश्छिन्नस्खलच्छृङ्खलरोमराजिः ।
मत्तस्य सेयं मदनद्विपस्य प्रस्वापवप्रोच्चकुचास्तु वास्तु ॥ ८५ ॥

उन्मूलितेति ॥ सेयं भैमी मत्तस्य उद्धतस्य अथच गलन्मदजलस्य, मदनरूपस्य द्विपस्य वास्तु वसतिस्थानमस्तु । किंभूता—उन्मूलितमुत्पाटितं यदालानं गजबन्धनस्तम्भः तत्संबन्धि यद्बिलं गर्तस्तदाभा तत्तुल्या नाभिर्यस्याः सा । तथा—छिन्नं त्रुटितं स्खलत्पतितं शृङ्खलं तत्तुल्या रोमराजिर्यस्याः । तथा—[illegible] गजस्य [illegible] उच्चकुचा । [illegible] मत्तोऽतिमत्तो [illegible] इति भावः । [illegible] मत्तस्य गजस्य वसतिस्थानमेतादृशं भवति । [illegible] इत्यमरः ॥

---

१ 'अनुकूलमनस्कः' इति साहित्यविद्याधरी । २ [illegible] इति साहित्यविद्याधरी । ३ [illegible] इति साहित्यविद्याधरी । ४ 'रोमराजिः' इति पाठो [illegible] । ५ [illegible] इति साहित्यविद्याधरी ।

रोमावलिभ्रूकुसुमैः स्मरौर्वीचापेषुभिर्मध्यललाटमूर्ध्नि ।
व्यस्तैरपि स्थास्नुभिरेतदीयैर्जैत्रः स चित्रं रतिजानिवीरः ॥ ८६ ॥

रोमेति ॥ स रतिजानिवीरः रतिर्जाया यस्य स रतिजानिः स्मरः स चासौ वीरः शूरश्च एतदीयैः क्रमेण रोमवलिश्च भ्रुवौ च कुसुमानि च तद्रूपैः स्मरौर्वीचापेषुभिः कृत्वा जैत्रः जेता । लोकत्रयमपि जयतीत्यर्थः । एतच्चित्रम् । किंभूतैः रोमावलिभ्रूकुसुमैः । मध्यललाटमूर्ध्नि व्यस्तैः परस्परासंबद्धैः स्थास्नुभिरपि स्थितैरपि । रोमावलीरूपा ज्या मध्ये, भ्रूरूपं चापं ललाटे, मूर्ध्नि कुसुमरूपा बाणाश्च विद्यन्ते । एवं पृथक्स्थितैरपि लोकत्रयजयादाश्चर्यम् । अन्यो हि धानुष्को मौर्वीधनुर्बाणैः संमिलितैरेव जयति न तु पृथक्स्थितैः, नैकैकेन, अत्र तु विपरीतदर्शनादाश्चर्यम् । प्रत्येकं भैमीरोमावलीभ्रूकुसुमदर्शनात्कामप्रादुर्भावो भवतीति भावः । मूर्ध्नीति । प्राण्यङ्गत्वादेकवद्भावः । स्थास्नुभिः 'ग्लाजिस्थश्च ग्स्नुः' । रतिजानिः 'जायाया निङ्' ॥

'पुष्पाणि बाणाः कुचमण्डनानि भ्रुवौ धनुर्भालमलंकरिष्णु ।
रोमावली मध्यविभूषणं ज्या तथापि जेता रतिजानिरेतैः ॥ ८७ ॥

इति श्लोकान्तरमपि व्याख्यातप्रायम् ॥

पृष्ठस्थलीं वर्णयति—

अस्याः खलु ग्रन्थिनिबद्धकेशमल्लीकदम्बप्रतिबिम्बवेषात् ।
स्मरप्रशस्ती रजताक्षरेयं पृष्ठस्थलीहाटकपट्टिकायाम् ॥ ८८ ॥

अस्या इति ॥ अस्या ग्रन्थ्या निबद्धाः केशाः केशपाशः तत्र मल्लीकदम्बानि विकसितमल्लीकदम्बपुष्पसमूहास्तेषां प्रतिबिम्बस्य वेषात् व्याजात्पृष्ठस्थलीलक्षणायां हाटकपट्टिकायां सुवर्णघटितपट्टिकायां इयं दृश्यमाना रजताक्षरा रूप्यमयाक्षरा स्मरप्रशस्तिः कामयशःप्रशस्तिः । उत्तमस्य प्रशस्तिः सुवर्णपट्टिकायां रजताक्षरैर्लिख्यते । भैमीपृष्ठं सुवर्णपट्टिकारूपम्, तत्र केशग्रन्थिषु निबद्धमल्लीपुष्पाणां प्रतिबिम्बितत्वाद्रजताक्षरत्वम् । वेणीनिबद्धकेशपुष्पाणां पृष्ठे प्रतिबिम्बासंभवाद्ग्रन्थिनिबद्ध इत्युक्तम् । सुवर्णपट्टिकातुल्या मदनजनिका च भैमीपृष्ठस्थलीति भावः । खलु निश्चये ॥

श्लोकद्वयेन नितम्बं वर्णयति—

चक्रेण विश्वं युधि मत्स्यकेतुः पितुर्जितं वीक्ष्य सुदर्शनेन ।
जगज्जिगीषत्यमुना नितम्बमयेन किं दुर्लभदर्शनेन ॥ ८९ ॥

चक्रेणेति ॥ मत्स्यकेतुः कामः पितुः श्रीकृष्णस्य सुदर्शनेन चक्रेण युधि विश्वं जितं वीक्ष्य वस्त्राच्छादितत्वाद्दुर्लभदर्शनेनामुना नितम्बमयेन नितम्बरूपेण चक्रेण कृत्वा जगज्जिगीषति किम् । किमिवार्थः । सुलभदर्शनेन पितुश्चक्रेण युधि जगज्जितम् । मया तु दुर्लभदर्शनेन सुदर्शनादधिकेन चक्रेण जेतव्यम् । पुत्रेण पित्रपेक्षयाधिकेन भवितव्यमिति मनीषया कृतमित्यर्थः । कामजनको भैमीनितम्ब इति भावः । जिगीषति, 'सँल्लिटोर्जेः' इति ॥

१ 'पाठान्तरमिदम्, पूर्वश्लोकेनैव गतार्थत्वात् । प्रथमेऽपि न पठन्ति' इति सुखावबोधा । 'अत्र छेकानुप्रासोत्प्रेक्षापह्नुतिरूपकालंकाराः' इति साहित्यविद्याधरी । २ 'अत्रोत्प्रेक्षाव्यतिरेकालंकारौ' इति साहित्यविद्याधरी ।

रोमावलीदण्डनितम्बचक्रे गुणं च लावण्यजलं च बाला ।
तारुण्यभूतेः कुचकुम्भकर्तुर्बिभर्ति शङ्के सहकारिचक्रम् ॥ ९० ॥

रोमेति ॥ बाला भैमी तारुण्यभूतेस्तारुण्यसम्पदः (तारुण्यकुलालस्य) कुचकुम्भकर्तुः कुचकुम्भकारस्य एतत् सहकारिचक्रं सहकारिकारणवृन्दं बिभर्ति, अहं शङ्के । एतत्किम्— रोमावल्येव चक्रभ्रामकं दण्डम्, नितम्बरूपं चक्रम्, गुणं च शीलादिलक्षणमेव गुणं दोरकं च, लावण्यरूपं जलं च । कुम्भकारस्यापि दण्डचक्रजलदोरकलक्षणं सहकारिकारणं भवति । तारुण्ये सत्येतानि प्रादुर्भूतानीति भावः ॥

वराङ्गं वर्णयति—

अङ्गेन केनापि विजेतुमस्या गवेष्यते किं चलपत्रपत्रम् ।
न चेद्विशेषादितरच्छदेभ्यस्तस्यास्तु कम्पस्तु कुतो भयेन ॥ ९१ ॥

अङ्गेनेति ॥ अस्याः केनाप्यतिसौन्दर्यादनिर्वचनीयेन, अथ च [illegible] वक्तुमयोग्येन अङ्गेनावयवेन योन्याख्येन चलपत्रस्याश्वत्थस्य पत्रं विशेषेण जेतुं गवेष्यते किमित्युत्प्रेक्षे । कुतो ज्ञातमित्यत आह—न चेदेवं तर्हि इतरच्छदेभ्योऽन्यवृक्षदलेभ्यः [illegible] विशेषादाधिक्यात्तस्य चलदलस्य कम्पः कुतः कस्मात्तु भयेन अस्तु भवतु । अन्यतरदलापेक्षयाऽश्वत्थदले भूयान्कम्पो दृश्यते तदनेन जेतुं गवेष्यते । आकारेणाश्वत्थदलतुल्यमस्या वराङ्गमित्यर्थः ॥

पञ्चभिः श्लोकैरूरू वर्णयति—

भ्रूश्चित्रलेखा च तिलोत्तमास्या नासा च रम्भा च यदूरुसृष्टिः ।
दृष्टा ततः पूरयतीयमेकानेकाप्सरःप्रेक्षणकौतुकानि ॥ ९२ ॥

भ्रूरिति ॥ अस्या भैम्याः भ्रूः चित्रा आश्चर्यरूपा लेखा चिह्नं यस्याः सा, अथ च चित्रलेखाऽप्सरोविशेषः । तथा—अस्या नासा तिलपुष्पतुल्यत्वात्तिलोत्तमा, अथ च सैव तिलोत्तमाऽप्सरोविशेषः । तथा—अस्या ऊरुसृष्टिः रम्भा सर्वं कदली, अथ च ऊरुसृष्टिः रम्भाप्सरोविशेषः । यद्यस्मात् । ततः तस्मादियमेकैव दृष्टा सती अनेकाप्सरसां प्रेक्षणजनितानि कौतुकानि पूरयति जनयति । तास्वोऽप्सरसः अतिसौन्दर्यं दृष्टुः कौतुकं जनयतीत्यर्थः । एतदूरू कदलीतुल्याविति भावः । तिलपुष्पेति 'पञ्चमी' इति [illegible] पाठान्तरम् ॥

रम्भापि किं चिह्नयति प्रकाण्डं न चात्मनः स्वेन न चैतदूरू ।
स्वस्यैव देहोपरि सा दधाना पत्राणि आगर्भमपत्रपेण ॥ ९३ ॥

रम्भेति ॥ रम्भापि [illegible] आत्मनः प्रकाण्डं स्वस्य [illegible] [illegible] चिह्नयति स्वेनैव न जानाति किम् । एतदूरू च न चिह्नयति [illegible] न जानाति किम् । [illegible] न जानाति, रम्भापि न [illegible] । [illegible] [illegible] च [illegible] [illegible] । कुतो [illegible]—[illegible]

---

१ [illegible] [illegible] इति साहित्यविद्याधरी । २ [illegible] इति साहित्यविद्याधरी । [illegible] इति [illegible] ।

अस्या इति ॥ चारुतया सौन्दर्येण कृत्वा महान्तौ उत्तमौ अस्याः पादावपेक्ष्य यत्तौ-क्ष्म्यमल्पत्वम्, एतस्याः सुन्दरपदापेक्षया स्वस्य यदल्पत्वम्। तादृक्सौन्दर्याभावादित्यर्थः। तस्मात् लवभावभाजः पदशोभालेशरूपत्वं भजतः महीरुहाणां प्रवालस्य बालकिसलयस्य 'पल्लव' इति शब्दस्तस्य लब्धिर्लाभो जात इति वयं जानीमहे। पदो लवः भैम्याश्चरण-संबन्धी लवो लेशो यस्य, पदो लवरूपो वायमिति पल्लवशब्दः। प्रवालशब्दस्य पल्लवशब्द-प्राप्तिरतो जातेत्यर्थः। प्रवालादप्यधिकरमणीयौ चरणाविति भावः। लब्धिरिति 'क्त्रिा-वादिभ्यः' इति क्तिन् ॥

जगद्वधूमूर्धसु रूपदर्पाद्यदेनयादायि पदारविन्दम्।
तत्सान्द्रसिन्दूरपरागरागैर्द्वयं प्रवालप्रबलारुणं तत् ॥ १०० ॥

जगदिति ॥ एतया (सु)रूपदर्पात्सौन्दर्यगर्वाज्जगद्वधूमूर्धसु लोकत्रयसुन्दरीशिरःसु पदा-रविन्दं यद्यस्माददायि दत्तम्। तत्पदारविन्दद्वयं तेषु मूर्धसु सान्द्रं यत्सिन्दूरं तस्य पराग-स्तेषां रागैर्लोहित्यैः कृत्वा प्रवालात्पल्लवात्, विद्रुमाद्वा प्रबलमधिकम् अरुणमारक्तं जातं ध्रुवमुत्प्रेक्षे। भैमीचरणावत्यरुणाविति भावः ॥

रुपारुणा सर्वगुणैर्जयन्त्या भैम्याः पदं श्रीः स्व विधेर्वृणीते।
ध्रुवं स तामच्छलयद्यतः सा भृशारुणैतत्पदभाग्विभाति ॥ १०१ ॥

रुपेति ॥ श्रीर्लक्ष्मीः शोभा च विधेर्ब्रह्मणः सकाशाद्भैम्याः पदं स्थानं स्वरूपत्वं अधि-कारं वा वृणीते स्म। यतः—सर्वैः स्त्रीगुणैः कृत्वा श्रियं जयन्त्याः। अत एव किंभूता—रुपा क्रोधेन अरुणा स ब्रह्मा ध्रुवं निश्चितं तां श्रियमच्छलयत्प्रतारितवान्। यतो यस्माद्भृ-शारुणातिरक्ता सा श्रीः एतत्पदभाग्भैमीचरणसेविनी विभाति शोभते। यद्वा भृशारुण इति पदविशेषणत्वेनैकं पदम्। पदशब्दच्छलेन भैमीचरणं दत्तवान्, न स्वरूपादि। शत्रुणा जितोऽन्योऽपि देवतां प्रसन्नीकृत्य तत्पदं याचते। भैमीचरणशोभा लोकोत्तरेति भावः ॥

यानेन तन्व्या जितदन्तिनाथौ पादाब्जराजौ परिशुद्धपार्ष्णी।
जाने न शुश्रूषयितुं स्वमिच्छू नतेन मूर्ध्ना कतरस्य राज्ञः ॥ १०२ ॥

यानेनेति ॥ तन्व्याः पादाब्जराजौ श्रेष्ठकमलतुल्यौ चरणौ कतरस्य राज्ञः कस्य नृपस्य प्रणयकलहे नमस्कारार्थं नतेन नम्रेण मूर्ध्ना प्रयोज्येन स्वमात्मानं शुश्रूषयितुमात्मसेवां कारयितुम् इच्छू अभिलाषुकाविति न जाने। किंभूतौ—यानेन गमनेन कृत्वा जितो दन्तिनाथो हस्तिश्रेष्ठो याभ्याम्। तथा—परिशुद्धो रमणीयः पार्ष्णिश्चरणपश्चाद्भागो ययोस्तौ। एतादृक् महत्तपः केन राज्ञा कृतमिति न जाने इत्यर्थः। गजगमनेयमिति भावः। भैमीचरणावेव राजानौ यानेन विजययात्रया जितः गजपतिः गौडेश्वरो याभ्यां तौ। तथा—परिशुद्धः पार्ष्णिः पार्ष्णिग्राहो ययोरेवंभूतौ सन्तौ कस्य राज्ञः भीतत्वान्नमस्कारार्थं नम्रेण शिरसा स्वसेवां कारयितुमिच्छू न जाने। अन्योऽप्येवंविधो राजा गूढमन्त्रत्वात्स्वसेवां केन कारयिष्यतीति न ज्ञायते। तेन प्रसिद्धेनोर्जितेन मूर्ध्ना न जाने इति न, अन्यत्पूर्ववदिति वा ॥

१ 'अत्रोत्प्रेक्षातिशयोक्तिश्चालंकारः' इति साहित्यविद्याधरी। २ 'अत्र छेकानुप्रासः, असंबन्धे संब-न्धरूपातिशयोक्तिश्च' इति साहित्यविद्याधरी। ३ 'अत्रोत्प्रेक्षा' इति साहित्यविद्याधरी। ४ 'अत्र [illegible]श्लेषालंकारः। अर्थान्तरप्रतीतिस्तु रूपकादेव, तेन न समासोक्तिः' इति साहित्यविद्याधरी।

कर्णाक्षिदन्तच्छदबाहुपाणिपादादिनः स्वाखिलतुल्यजेतुः ।
उद्वेगभागद्वयताभिमानादिहैव वेधा व्यधित द्वितीयम् ॥ १०३ ॥

कर्णेति ॥ स्वस्य आत्मनोऽखिलं समग्रं यत्तुल्यं पद्मनीलोत्पलादि तस्य जेतुः जैत्रस्य कर्णादेः कर्णः, अक्षि नेत्रम्, दन्तच्छद ओष्ठः, बाहुः पाणिः, पादश्चरणः, एतेषां समाहारः, तद् आदिर्यस्य । आदिशब्दात्स्तनादेरवयवस्य प्रत्येकमद्वयताभिमानात् मत्सदृशं सुन्दरमन्यन्नास्तीति अहमेवैकं सुन्दरमित्यद्वैताभिमानाद्धेतोः उद्वेगभाक् खेदयुक्तः वेधाः इहैवास्यां भैम्यामेव द्वितीयं द्वयोः पूरणं कर्णादि कृतवान् । हे कर्णादयः, एवं गर्वं चेत्कुरुथ तर्हि भवद्वैरस्यापनार्थं भवत्सदृशमन्यमत्रैव करिष्यामीति द्वितीयं कर्णादि कृतवानित्यर्थः । अतिक्रुद्धो हि तद्वैरस्यापने तत्रैव प्रतिद्वन्द्विनं रचयति । भैमीकर्णो भैमीकर्ण इव, नान्येन तुल्यः । एवं नेत्रादावपि ज्ञातव्यम् । 'कर्णाक्षि–' इत्यादौ प्राण्यङ्गत्वादेकवद्भावः । 'स्वा-खिल–' इति भावितपुंस्कम् ॥

तुषारनिःशेषितनलसर्गं विधातुकामस्य पुनर्विधातुः ।
पद्मेष्विहास्याङ्घ्रिकरेष्वभिख्याभिक्षाधुना माधुकरीसदृक्षा ॥ १०४ ॥

तुषारेति ॥ विधातुः इह एषु पद्मेषु आस्यम्, अङ्घ्री, करौ च एतेषु भैमीवदन-चरणद्वन्द्वपाणिद्वन्द्वेषु विषये अभिख्याभिक्षा शोभायाच्ञा माधुकरीसदृक्षा यतिभिक्षातुल्या भवतीति शेषः । किम्भूतस्य विधातुः—तुषारेण हिमेन निःशेषितमात्यन्तिकं निराकृत-मब्जसर्गं कमलसृष्टिमधुना इदानीं पुनः विधातुकामस्य निर्मातुकामस्य । भिक्षा हि गृह-पञ्चक एव भवति । मधुकरो ह्यनेकानि पुष्पाणि मधु पायित्वा स्वोदरभरणं करोति, तत्सम्बन्धिनी माधुकरी । कमलान्येतद्वदनादितुल्यानि नेति भावः । आस्यादीनां प्राण्यङ्गत्वेऽपि पद्मत्वेन तत्स्वरूपापन्नत्वात् 'अभिख्यानैश्वर्ये च' इत्येकवद्भावाभावः ॥

अङ्गुलीर्वर्णयति—

एष्यन्ति यावद्गणनादिगन्तान्नृपाः स्मरार्ताः शरणे प्रवेष्टुम् ।
इमे पदाब्जे विधिनापि सृष्टास्तावत्य एवाङ्गुलयोऽत्र लेखाः ॥ १०५ ॥

एष्यन्तीति ॥ स्मरार्ता नृपा इमे पदाब्जे भैमीचरणकमले अनन्यत्र शरणे रक्षके प्रवेष्टुं कामदुःखान्रक्षतं कुर्विति वदन्तो यावद्गणनादिगन्तेभ्यो दिगन्तादेष्यन्ति आगमिष्यन्ति, विधिनापि तावत्यः तावत्संख्याका अङ्गुल्योऽङ्गुलिरूपा रेखा एवात्र चर-णद्वन्द्वे सृष्टा निर्मिताः । एता अङ्गुल्यो रेखाः । दिगन्तान्तानि दशसंख्यात्वाद्दिगन्तेभ्यः कामार्ता नृपाः समागमिष्यन्तीति सूचनार्थं ब्रह्मणा दश रेखारूपा अङ्गुल्य एव निर्मिताः । 'न रेखाः' इति पाठे अङ्गुल्यो न भवन्ति, किंतु रेखा इत्यर्थः । पादद्वन्द्वादिसम्बन्धी-भावे 'आयत्यः' इति वचनादन्यपदार्थैः ॥

नखान्वर्णयति—

मिथो नखेन्दूत्करतो नुदेदं व्यधाद्विधिः साधुदशत्वमिन्दोः ।
एतत्पदच्छद्मसरागपद्मसौभाग्यभाग्यं कथमन्यथा स्यात् ॥ १०६ ॥

---

१ '[illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्य-विद्याधरी ।

प्रियेति ॥ विधिः मुदा स्वेच्छया प्रियाया नखीभूतवतो नखत्वं प्राप्तवत इन्दोः इ
दशत्वं दशसंख्यात्वं साधु उचितं व्यधात्कृतवान् । अथ च साध्वी शोभना दशावस्
यस्य एवंविधत्वं कृतवान् । कथमित्यत आह—अन्यथा अस्य इन्दोः एतस्याः पदच्
द्मना चरणव्याजेन सरागपद्मसौभाग्यं रक्तोत्पलसौभाग्यं तस्य भाग्यं लाभः कथं स्यात्
दशसंख्यत्वेन भैमीसमीचीनावस्थत्वेन च विनैतच्चरणसेवा न लभ्यते । अनेन तावल्लब्ध
तस्मादस्य साधुदशत्वं कृतमिति ज्ञायत इत्यर्थः । चन्द्रपद्मयोर्विरोधाच्चन्द्रोदये कमल
संकोचात्समीचीनावस्थत्वेन विना रक्तोत्पलसंबन्धश्चन्द्रस्य न युज्यते, स तु जातः, तस
च रक्तत्वं लब्धम् तस्मादेतदनुमीयत इत्यर्थः । अन्योऽपि साधुदशत्वेनाप्राप्यमपि प्राप्नोति
दशापि चरणनखाश्चन्द्रतुल्या इति भावः ॥

अङ्गुष्ठनखौ च पुनः पृथक्त्वेन वर्णयति—

यशः पदाङ्गुष्ठनखौ मुखं च बिभर्ति पूर्णेन्दुचतुष्टयं या ।
कलाचतुःषष्टिरुपैतु वासं तस्यां कथं सुभ्रुवि नाम नास्याम् ॥ १०७

यश इति ॥ या भैमी यशः कीर्तिः पदाङ्गुष्ठनखौ मुखं च एतद्रूपं पूर्णेन्दुचतुष्टयं षोड
शकलचन्द्रचतुष्टयं बिभर्ति, तस्यां अस्यां सुभ्रुवि भैम्यां चतुरधिका षष्टिः कला कथं ना
वासं नोपैतु, अपि तु प्राप्नोतीति युक्तमेतत् । षोडशकलचन्द्रचतुष्टयधारणात्षोडशकलाश्च
तुर्गुणिताश्चतुःषष्टिर्भवन्तीति युक्तमित्यर्थः । गीतवाद्यादिकलाप्रवीणेयमित्यर्थः । कलेति
जात्येकवचनम् । कलानां चतुःषष्टिरिति वा । 'कलाः' इति पाठे कलारूपा चतुःषष्टिरिति[3] ॥

अथ वर्णयितुमशक्येयमिति निगमयति—

सृष्टातिविश्वा विधिनैव तावत्तस्यापि नीतोपरि यौवनेन ।
वैदग्ध्यमध्याप्य मनोभुवेयमवापिता वाक्पथपारमेव ॥ १०८ ॥

सृष्टेति ॥ विधिनैव इयं तावत् आदौ अतिविश्वा जितत्रैलोक्या सृष्टा । अतिसुन्दरं
कृतेत्यर्थः । अनन्तरं यौवनेन तस्याप्यतिविश्वसर्गस्यापि विधेर्वा उपरि नीता शैशवसौन्दर्यापे
क्षयाधिकं सौन्दर्यं प्रापिता । तारुण्येऽतिसौन्दर्यं भवति । ततोऽप्यनन्तरं मनोभुवा कामे
वैदग्ध्यं सर्वव्यापारचातुर्यमध्याप्य शिक्षयित्वा वाक्पथस्य पारं परतीरमवापिता । वर्णयितुम
शक्यत्वाद्वागगोचर इत्यर्थः । अथ च विद्यापारं प्रापितेत्यर्थः । मदनवशादतिचतुरेयमित्यर्थः
अन्योऽपि प्राज्ञोऽध्यापितः सन्वाङ्मयपारं प्राप्नोति ॥

इति स चिकुरादारभ्यैनां नखावधि वर्णय-
न्हरिणरमणीनेत्रां चित्राम्बुधौ तरदन्तरः ।
हृदयभरणोद्वेलानन्दः सखीवृतभीमजा-
नयनविषयीभावे भावं दधार धराधिपः ॥ १०९ ॥

इतीति ॥ स धराधिपो नलः सखीभिर्वृता भीमजा तस्या नयनविषयीभावे नयनगो-

१ 'अत्र च्छेकानुप्रासश्लेषानुमानापह्नुत्यलंकाराः' इति साहित्यविद्याधरी । २ 'कराङ्गुष्ठ' इति
पाठः साहित्यविद्याधरीसंमतः । ३ 'अत्रातिशयोक्तिश्लेषालंकाराः' इति साहित्यविद्याधरी ।
४ 'अत्रातिशयोक्तिः' इति साहित्यविद्याधरी ।

चरत्वे भावमभिलाषं दधार । इदानीमात्मानं सखीसहितभैम्यै दर्शयिष्यामीति तस्य बुद्धि-रुत्पन्नेत्यर्थः । प्रकटो जात इति भावः । इन्द्रवरदानात्सखीसहितयैव भैम्या द्रष्टव्यो नान्येन केनचिदित्यभिप्रायः सूचितः । किं कुर्वन्—इति पूर्वोक्तप्रकारेण चिकुरादारभ्य केशपाशमा-रभ्य नखावधि नखपर्यन्तं हरिणनयनाविशेषेण चलाक्षीं भैमीं वर्णयन् । तथा—निम्ना-न्तुर्वी अद्भुतसौन्दर्यदर्शनादेवाश्चर्यसमुद्रे तरङ्गमानमन्तरं मानसं यस्य सः साश्चर्यः । भैमीदर्शनादेव हृदयस्य भरणेन परिपूरणेन उद्वेलः वेलां मर्यादां तीरं चातिक्रान्तोऽतिबहुल आनन्दो यस्य सः । उद्वेलत्वेनानन्दस्य बहुत्वं सूचितम् । अन्यदप्युदकं गम्भीरं स्थाने परिपूर्य बहिर्निर्गच्छति । 'आरभ्यार्थयोगेऽपीति केचित्' इति चिकुरादिति पञ्चमी ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
गौडोर्वीशकुलप्रशस्तिभणितिभ्रातर्ययं तन्महा-
काव्ये चारुणि वैरसेनिचरिते सर्गोऽगमत्सप्तमः ॥ ७ ॥

श्रीहर्षमिति ॥ गौडोर्वीशकुलस्य गौडदेशभूपालवंशस्य प्रशस्तिवर्णना तस्या भणिती रचना तस्या भ्रातरि एककर्तृकत्वात् । सापि येन रचितेत्यर्थः । वैरसेनिचरिते चारुणि महा-काव्येऽयं सप्तमः सर्गः अगमत् समाप्तिं प्राप्तः । भ्रातरीति भाषितपुंस्कत्वम् ॥

इति श्रीनरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे सप्तमः सर्गः ॥

अष्टमः सर्गः ।

इदानीं नलो दिक्पालदूत्यं करोतीति वस्तुनाष्टमं सर्गमारभते—

अथाद्भुतेनात्तनिमेषमुद्रमुच्चिद्रलोमाननमुं युवानम् ।
दृशा पपुस्ताः सुदृशः समस्ताः सुता च भीमस्य महीमघोनः ॥ १ ॥

अथेति ॥ अथ भैमीवर्णनविषयाविर्भावानन्तरं ताः समस्ताः सुदृशः स्त्रियो महीमघोनो भीमस्य सुता भैमी च अमुं युवानं दृशा दृष्ट्या पपुः साभिलाषं ददृशुः । कीदृ-शम्—अद्भुतेन नलसौन्दर्यदर्शनोत्थेनाश्चर्येण हेतुना आत्ता लब्धा निमेषमुद्रा नेत्रसंकोच-रीतिर्येन । अत एव सात्त्विकभावत्वादुच्चिद्रलोमानमुद्भूतरोमाञ्चम् । दृशेत्येकवचनेन सकृदव-लोकनं सूचितम् । अचिन्तितसुन्दरदर्शनादर्थेन अस्तनिमेषमुद्रं यथा तथा पपुरिति वा । युवपदेन दर्शनयोग्यत्वं सूचितम् । भैमीमुख्याः सर्वा अपि तत्पराः जाता इति भावः ॥

कियच्चिरं दैवतमायितानि निह्नोतुमेनं प्रभवन्तु नाम ।
पलालजालैः पिहितः स्वयं हि प्रकाशमासादयतीक्षुडिम्भः ॥ २ ॥

कियदिति ॥ देवतासंबन्धीनि दैवतानां वा मायाविलसितानि मायितानि कियच्चिरं

---

१ 'अनोन्नतोद्रेकरोमाञ्चितदेहः' इति साहित्यविद्याधरी । २ [illegible] इति जीवातुसंमतः पाठः । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

कियन्तं कालं एनं नलं निह्नोतुं गोपायितुं प्रभवन्तु नाम समर्थानि भवन्तु । अपि तु क्षणमात्रं गोपायितुं समर्थानि जातानि न, बहुकालमित्यर्थः । नामेति शिरश्चालने । अर्थान्तरन्यासमाह—हि प्रसिद्धं यस्मात् वा पलालजालैः नीरसतृणसमूहैः पिहित इक्षोर्डिम्भोऽङ्कुरः स्वयमात्मनैव प्रकाशं प्राकट्यं दृश्यत्वमासादयति प्राप्नोति । 'वृन्दारका दैवतानि' इत्यमरः ॥

अपाङ्गमप्याप दृशोर्न रश्मिर्नलस्य भैमीमभिलष्य यावत् ।
स्मराशुगः सुभ्रुवि तावदस्यां प्रत्यङ्गमापुङ्खशिखं ममज्ज ॥ ३ ॥

अपाङ्गमिति ॥ नलस्य दृशोर्नेत्रयोः रश्मिर्दीप्तिः भैमीमभिलष्य अपाङ्गमप्यतिनैकट्याद‌विलम्बप्राप्यमपि नेत्रप्रान्तं यावन्नाप न प्राप तावदादावेव स्मराशुगः सुभ्रुवि सुन्दर्यामस्यां प्रत्यङ्गं प्रत्यवयवं पुङ्खस्य शिखा अग्रं तत् आ मर्यादीकृत्य, अभिव्याप्य (वा) ममज्ज । नलकर्तृकसाभिलाषदर्शनोपक्रममात्रेण प्रत्यङ्गं भैमी अतितरां कामाधीना जातेति भावः । अभिलाषं प्रति दृशेरुपचारात्कर्तृत्वे समानकर्तृकत्वात् क्त्वो ल्यप् । आपुङ्खशिखम्, 'आङ् मर्यादाभिविध्योः' इत्यव्ययीभावः ॥

यदक्रमं विक्रमशक्तिसाम्यादुपाचरद्द्वावपि पञ्चबाणः ।
कथं न वैमत्यममुष्य चक्रे शरैरनर्धार्धविभागभाग्भिः ॥ ४ ॥

यदिति ॥ पञ्चबाणः कामो द्वावपि नलभैम्यौ अक्रमं परिपाटीरहितं युगपद्विक्रमरूपायाः शक्तेः सामर्थ्यस्य साम्यात् विक्रमो मनउत्साहः शक्तिः शारीरं बलं तयोः साम्यात्तुल्यत्वाद्वा यद्यस्मादुपाचरदात्मवशीचकार, तत्तस्मात्पञ्चबाणत्वेऽप्यमुष्य कामस्य अर्धेनार्धेन अर्धाधिकाभ्यां द्वाभ्यां द्वाभ्यां विभागः तद्भाजो न भवन्ति तैरनर्धार्धविभागभाग्भिः एवंभूतैरपि बाणैर्वैमत्यं वैषम्यं न कृतम् । पञ्चभिरपि प्रथमं नलस्य व्यधं कृत्वानन्तरं तावद्भिरेव भैम्या व्यधं चेदकरिष्यत्तर्ह्युभयोस्तुल्योऽनुरागोऽघटिष्यत । तत्तु तेन न कृतम्, तुल्यकालमेवोभयोरनुरागदर्शनात् । यद्येकसमयावच्छेदेन व्यधं कुर्यात्तर्हि बाणानां दशत्वात्पञ्चत्वं भज्येत । यस्मादर्धाधिकौ द्वौ द्वौ बाणौ चेत्संभवतस्तर्ह्यप्यनुरागसाम्यं संभाव्येतापि । न त्वेवं युज्यते । भग्नस्य बाणस्य व्यधेऽसामर्थ्यात् । द्वाभ्यां नलस्य त्रिभिर्भैम्या व्यधे वैपरीत्येन वा, अनुरागे वैषम्येण भवितव्यम् । तच्च यौगपद्ये बाणवैषम्ये च सत्यपि न जातम् । तत्र पराक्रमशक्तिसाम्यमेव हेतुरित्यर्थः । द्वयोरप्येककालमेव तुल्य एवानुरागो जात इति भावः । यद्वा वैमत्यं कलहः विषमसंख्यत्वाद्बाणानां विभागो न घटते । एकस्य द्वैधीकरणे तत्सर्वेषामपि प्राप्नोति, यस्य च प्राप्नोति स एव वैमत्यमाचरतीत्यर्थः । बाणानां वैमत्यभिया स्वविक्रमशक्तिसाम्यादेवोपाचरदिति वा । यथा राजा स्वसेवकानां वैमत्यभियान्यप्रकारेण कार्यं साधयति तथैवेत्यर्थः । तस्मादेव तैर्वैमत्यं न कृतमिति भावः । अथ च—वेः पक्षिणः क्रम आक्रमणं ग्रहणं तत्र या शक्तिः सामर्थ्यं तेन साम्यात्तुल्यत्वात् । 'खलेकपोतन्यायेन' इति यावत् । यथा कपोतः खले पतितान्कणान्युगपच्चञ्च्वा गृह्णाति तथा पञ्चबाणोऽपि युगपद्द्वावपि तेन न्यायेन यस्मादुपाचरत्, तस्मादस्य बाणैरपि विषमसंख्यत्वेऽपि विरुद्धत्वं नाकारि ।

---

१ 'अत्रार्थान्तरन्यासः' इति साहित्यविद्याधरी । 'अत्र नलेक्षुडिम्भयोर्बिम्बप्रतिबिम्बभावेन सनाधर्मनिर्देशाद्दृष्टान्तालंकारः' इति जीवातुः । २ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।

अयं च कामेनायं न्यायोऽङ्गीकृतः अत एव वेनैविरिव मतिर्यस्य तद्भावो वैमत्यं खलेकपो-
तन्याय एव । स कामबाणैरपि न कृतः, अपि तु कृत एवेति काका व्याख्येयम् । तैरपि
पञ्चभिरेकदैव मिलित्वा युगपदेव तौ वशीकृतौ । कालस्य सूक्ष्मत्वात् । विक्रमतुल्यो नलः,
शक्तितुल्या भैमी, ततो विक्रमशक्तितुल्यौ तौ सकृदेव स्ववाणैः कुसुमैरपूजयदित्यर्थं इति वा ॥

अनुरागसाम्यमेवाह—

तस्मिन्नलोऽसाविति सान्वरज्यत्क्षणं क्षणं क्वेह स इत्युदास्त ।
पुनः स तस्यां वलतेऽस्य चित्तं दूत्यादनेनाथ पुनर्न्यवर्ति ॥ ५ ॥

तस्मिन्निति ॥ सा भैमी तस्मिन्पुरुषे असौ नल इति हेतोः अन्वरज्यदनुरक्ता ।
अनन्तरं सोऽतिसुन्दरो नलोऽतिसुरक्षिते इहास्मिन्नन्तःपुरे क्व कुत इति क्षणं क्षणं प्रतिक्षणं
विचार्य उदास्तोदासीनाभवत् । क्षणमन्वरज्यत् क्षणमुदास्तेति वा । अस्य चित्तमस्यां पुनर्मु-
हुर्वलते स्म चञ्चलमभूत् । अथानन्तरमनेन नलेनास्य चित्तेन वा दूत्याद्धेतोः पुनर्न्यवर्ति
परावृत्तम् । दूत्याङ्गीकारे भैम्यभिलाषो न युक्त इति परावृत्तमित्यर्थः । उभयोरपि भूयाननु-
रागोऽभूदित्यर्थः । 'पुरः स' इति पाठे प्रथमम् ॥

कयाचिदालोक्य नलं ललज्जे कयापि तद्धाम्नि हृदा ममज्जे ।
तं कापि मेने स्मरमेव कन्या भेजे मनोभूवशभूयमन्या ॥ ६ ॥

कयेति ॥ कयाचिद्भैम्या नलमालोक्य ललज्जे अनुरागवशात्प्रकटितलज्जानुभावया
भूतम् । कयाचित्सख्या तद्धाम्नि नलकान्तौ हृदान्तःकरणेन ममज्जे निमग्नम् । सौन्दर्यदर्शन-
मात्रेणाश्चर्यपरया सामिलाषया स्मरपरवशया जातम् । कापि कन्या कुमारी तं स्मरमेव
मेने । अतिसौन्दर्यात्स्मरभ्रमकृतेत्यर्थः । अन्या मनोभूवशभूयं कामवशत्वमेव भेजेऽवलम्बि-
तवत् । अननुभूतसंभोगरसापि नले सानुरागा जातेति भावः । 'तं वीक्ष्य कान्तिस्तुकन्या
ललज्जे' इत्यपि पाठः ॥

कस्त्वं कुतो वेति न जातु शेकुस्तं प्रष्टुमप्यप्रतिभातिभारात् ।
उत्तस्थुरभ्युत्थितिवाञ्छयेव निजासनान्निकरस्ताः कृशाङ्ग्यः ॥ ७ ॥

क इति ॥ कृशाङ्ग्यः अप्रतिभया अप्रागल्भ्यस्यातिभारादतिबाहुल्याद्धेतोः इति तं प्रष्टु-
मपि जातु कदाचित्तत्र कंचित्कालं स्थिता अपि न शेकुः । इति किम्—त्वं कोऽसि, किंनामकः,
कुतो वा देशादागत इति । तर्हि किं चक्रुरत आह—नैकरसा [illegible] सद्यः
अभ्युत्थितिवाञ्छयेवाभ्युत्थानकृतेव निजासनात्स्वोपवेशनासनादुत्तस्थुरुत्थिताः । अन्योऽप्यप्र-
तिभोऽतिभारेऽपि किमपि वक्तुं न शक्नोति । इहाभ्युत्थानेऽपूर्वकमेतादुत्तस्थुरित्यत्र उत्प्रेक्षा ॥

---

१ 'अत्र [illegible]' इति साहित्यविद्याधरी । 'अत्र [illegible]' इति जीवातुः । २ [illegible] इति सुखावबोधासाहित्यविद्याधरीसंमतः पाठः । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी । ४ 'न शकुवन्' इति पाठः सुखावबोधासाहित्यविद्याधरीसंमतः । ५ '[illegible]' इति साहित्यविद्याधरी ।

स्वाच्छन्द्यमानन्दपरम्पराणां भैमी तमालोक्य किमप्यवाप।
महारयं निर्झरिणीव वारामासाद्य धाराधरकेलिकालम्॥ ८॥

स्वाच्छन्द्यमिति॥ भैमी तमालोक्य किमप्यनिर्वाच्यमानन्दपरम्पराणां स्वाच्छन्द्यमाधिक्यमवाप। 'छन्दः पद्येऽभिलाषे च' इत्यभिधानात्स्व आत्मीयश्छन्दोऽभिलाषो यस्य सः स्वच्छन्दो निरवग्रहः तस्य भावः स्वाच्छन्द्यम्। का कमिव—निर्झरिणी नदी धाराधरो मेघः तस्य केलिकालः क्रीडासमयः तं वर्षासमयमासाद्य प्राप्य वारां जलानां महारयं महावेगमाधिक्यमिव लभते स्म। दर्शनमात्रेण लोकोत्तरमानन्दं प्रापेति भावः॥

तत्रैव मग्ना यदपश्यदग्रे नास्याद्दगस्याङ्गमयास्यदन्यत्।
नादास्यदस्यै यदि बुद्धिधारां विच्छिद्य विच्छिद्य चिरान्निमेषः॥ ९॥

तत्रेति॥ अस्या दमयन्त्या दृक् यदस्य नलस्याङ्गमग्रे प्रथममपश्यत्, तत्रैव तस्मिन्नेवाङ्गेऽनुरागवशान्निमग्ना सती प्रथमदृष्टमङ्गं विहाय अन्यदङ्गं तर्हि नायास्यत् न प्राप्स्यत्, यदि चिराच्चिरकालात्संजातो निमेषो नेत्रसंकोचः विच्छिद्य विच्छिद्य पूर्वदृष्टाङ्गविच्छेदं कृत्वा कृत्वा अस्यै भैम्यै बुद्धिधारामन्यामन्यां बुद्धिं दर्शनेच्छासंततिं नादास्यत्। तेन तु बुद्ध्यन्तरं दत्तं तद्वशादेवान्यदङ्गं प्रापदित्यर्थः। अतिसुन्दराङ्गदर्शनस्य निमेषेण विच्छेदे कृते सत्यनन्तरं तस्यैवाङ्गस्य दर्शनेच्छया पुनरप्यङ्गान्तरदर्शनं, न तु प्रथमाङ्गदर्शनविरक्त्येत्यर्थः। सर्वेऽप्यवयवा अतिसुन्दरा इति भावः। क्रियातिपत्तौ लृङ्॥

दृशापि सालिङ्गितमङ्गमस्य जग्राह नाग्रावगताङ्गहर्षैः।
अङ्गान्तरेऽनन्तरमीक्षिते तु निवृत्य सस्मार न पूर्वदृष्टम्॥ १०॥

दृशेति॥ सा दृशा आलिङ्गितं स्पृष्टमप्यस्य नलस्य प्रथमदृष्टादन्यदङ्गं अग्रे प्रथमतोऽवगतानि दृष्टान्यङ्गानि तज्जनितैर्हर्षैरानन्दैर्हेतुभिर्न जग्राह। दृष्टमप्यङ्गं हर्षभरान्न ददर्शेत्यर्थः। हर्षानुभवादनन्तरं निमेषादिवशादङ्गान्तरे ईक्षिते तु पुनः निवृत्य परावृत्य पूर्वदृष्टं प्रथमदृष्टमङ्गं न सस्मार। प्रथमदृष्टादप्यनन्तरदृष्टस्याङ्गस्यातिरमणीयत्वात्, दृश्यमानाच्च प्रथमदृष्टस्यातिरम्यत्वात्, सुखपरवशत्वाद्वानुभूय प्रथमदृष्टमङ्गं न स्मृतवती। नालोकतेति भावः। अन्यत्र हि पूर्वदृष्टं स्मर्यते, अत्र तु नेत्याश्चर्यम्। पूर्वोक्त एव भावः॥

हित्वैकमस्यापघनं विशन्ती तद्दृष्टिरङ्गान्तरमुक्तिसीमाम्।
चिरं चकारोभयलाभलोभात्स्वभावलोला गतमागतं च॥ ११॥

हित्वेति॥ तस्या भैम्या दृष्टिः स्वभावलोला सती उभयोः प्रथमदृष्टानन्तरदृष्टयोरङ्गयोर्लाभः तत्र लोभाल्लोलुपत्वाद्धेतोः चिरं गतं गमनम्, आगतमागमनं च चकार। द्वयोरप्यङ्गयोरतिसौन्दर्यादन्यतरान्यतरं विवेक्तुं कर्तुमशक्ता द्वयमपि कर्तुं नाशकदिति भावः। किंभूता दृष्टिः—अस्य एकमपघनमङ्गं हित्वा तदन्तरस्य मुक्तिस्त्यजनं तस्याः सीमां मर्यादां विशन्ती अङ्गान्तरमनवलोकयन्ती। स्वभावलोलं च गमनागमने करोति। अन्योऽपि वणिग्देशान्तरस्थं वस्तु ग्रहीतुं स्वदेशस्थं विक्रेतुं गमनागमने करोति। 'अपघनोऽङ्गम्' इति निघण्टुः॥

---

१ 'अत्र हेत्वलङ्कारोऽलङ्कारः' इति साहित्यविद्याधरी। २ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। ३ 'अत्राङ्गस्य दृष्टिरङ्गाने दृष्टे सत्यपि तद्दर्शनमुक्तम्। अत्र च स्वभावलोलैव सतो दृष्टिरेवं नोक्तिविशेषोक्तिरलंकारः' इति साहित्यविद्याधरी।

निरीक्षितं चाङ्गमवीक्षितं च दृशा पिबन्ती रभसेन तस्य ।
समानमानन्दमियं दधाना विवेद भेदं न विदर्भसुभ्रूः ॥ १२ ॥

निरीति ॥ सा विदर्भसुभ्रूः भैमी तस्य नलस्य प्रथमं नितरां सादरमीक्षितमेकमङ्गम्, अवीक्षितं विशेषाकारेणानवलोकितं चान्यदङ्गम्, दृशा रभसेनौत्सुक्येन हर्षेण पिबन्ती सादरं विलोकयन्ती सती किंचिद्दृष्टाङ्गदर्शनविषयेऽपि सादरं दृष्टाङ्गजनितानन्देन समानं तुल्यमानन्दं दधाना धारयन्ती किं सर्वं दृष्टम्, किं चेषद्दृष्टम्, यद्वा किं सादरदृष्टम्, किं च सर्वथैवादृष्टमित्युभयोर्भेदं तारतम्यं न विवेद । तुल्यसौन्दर्यत्वाद्द्वयोरपि दर्शने तुल्यानुरागाभूदिति भावः । लोकस्य दृष्टेऽनादरः, अदृष्टे चोत्साहो भवति, तथात्र तु न । उभयोरपि लोकोत्तरत्वादिति भावः । अन्यापि योगिनी दृष्टं घटादि, अदृष्टं वागगोचरं श्रुतिगम्यं ब्रह्मस्वरूपं च दृशा ज्ञानेन किं सारं किमसारमिति सादरं विचारयन्ती घटादिनिरसनेन श्रुत्यादिप्रमाणगम्यमानन्दस्वरूपं ब्रह्मसाक्षात्कारदशायामङ्गीकरोतीत्युक्तिः ॥

सूक्ष्मे घने नैषधकेशपाशे निपत्य निस्पन्दतरीभवद्भ्याम् ।
तस्यानुबन्धं न विमोच्य गन्तुमपारि तल्लोचनखञ्जनाभ्याम् ॥ १३ ॥

सूक्ष्म इति ॥ तल्लोचनलक्षणाभ्यां खञ्जनाभ्यां तस्य केशपाशस्य सादरावलोकनलक्षणमनुबन्धं संबन्धम्, अथ च तन्निर्मितं बन्धनं विमोच्य त्यक्त्वा नापारि नाशाकि । किंभूताभ्याम्—सूक्ष्मे घने निबिडे च नैषधकेशपाशे सादरावलोकनार्थं निपत्य नितरां पतित्वा सादरावलोकनादेव निस्पन्दतरीभवद्भ्यां नेत्रसंकोचरहिताभ्याम् । खञ्जनोऽपि पाशे पतितो बन्धनं विमोच्य पदमपि चलितुं न शक्नोति । भैमीदृष्टिश्चिरकालं केशपाशमेवालोकयतीति भावः । केशाः सूक्ष्मा घनाश्च । 'सूक्ष्मास्तु पाणिदशनाङ्गुलिपर्वकेशाः' इत्यादि लक्षणम् । 'पाशः कचान्ते सङ्घार्थः कर्णान्ते शोभनार्थकः । छात्राद्यन्ते च निन्दार्थः पाशः पक्ष्यादिबन्धने ॥' इति विश्वः ॥

भूलोकभर्तुर्मुखपाणिपादपद्मैः परीरम्भमवाप्य तस्य ।
दमस्वसुर्दृष्टिसरोजराजिश्चिरं न तत्याज सबन्धुबन्धम् ॥ १४ ॥

भूलोकेति ॥ दमस्वसुः भैम्याः दृष्टिसरोजराजिर्नेत्रकमलपङ्क्तिः तस्य भूलोकभर्तुर्नलस्य मुखपाणिपादलक्षणैः पद्मैः परीरम्भं संश्लेषमवाप्य सबन्धुबन्धं सगोत्रसम्बन्धं सजातीयस्नेहं चिरं न तत्याज । मुखादीनां कमलत्वात्सगोत्रत्वम् । अन्योऽपि चिराद्बन्धुभिरालिङ्गनं प्राप्य झटिति न मुञ्चति । भैमीदृष्टिर्नलमुखादीनतिरमणीयत्वाच्चिरमालोकयतीति भावः । सबन्धुः, 'ज्योतिर्जनपद—' इति सः । 'सगन्ध—' इति पाठे 'सगन्धो बन्धुरुच्यते' ॥

तत्कालमानन्दमयीभवन्ती भवत्परानिर्वचनीयमोहा ।
सा मुक्तसंसारिदशारसाभ्यां द्विस्वादमुल्लासमभुङ्क्त मिष्टम् ॥ १५ ॥

तत्कालमिति ॥ सा भैमी पूर्वोक्तक्रमेण मुक्तसंसारिणोः ये दशे अवस्थे तयो रसाभ्यां प्रीतिभ्यां कृत्वा द्वौ स्वादौ रसौ यत्र एवंविधं मिष्टमतिस्वादुतिमधुरमुल्लासं हर्षमभुङ्क्तानुबभूव ।

---

१ 'अत्रातिशयोक्तिः काव्यलिङ्गं चालंकारः' इति साहित्यविद्याधरी । २ 'अत्र [illegible]' इति साहित्यविद्याधरी । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

क्रममाह—किंभूता। तत्कालं तस्मिन्नलदर्शनकाले नलोऽयमिति बुद्ध्या आनन्दमयी आनन्दरूपा भवन्ती। तथा—सुरक्षितेऽन्तःपुरे नलागमनं कथमिति हेतोः अतिशयेन भवन् भवत्तरोऽतितरामनिर्वचनीयो लोकोत्तरो मोहो भ्रान्तिर्यस्याः। तद्दर्शनेनैवोत्पद्यमानमूर्च्छा वा। आनन्दरूपत्वं मुक्तदशा। 'आनन्दो ब्रह्मणो रूपम्' इति श्रुतेः। अनिर्वचनीयमोहवत्त्वं संसारिदशा। तुल्यकालमेव मुक्तसंसारिदशे तयानुभूते इत्याश्चर्यं च। अभुङ्क्त इति लङ्। 'अभुक्त' इति पाठे लुङ्॥

नलत्वनिश्चयं विना तत्रानुरक्ताया भैम्याः पातिव्रत्यभङ्गलक्षणामनौचितीमाशङ्क्य कविः परिहरति—

दूते नलश्रीभृति भाविभावा कलङ्किनीयं जनि मेति नूनम्।
न संव्यधान्नैषधकायमायं विधिः स्वयंदूतमिमां प्रतीन्द्रम्॥ १६॥

दूत इति॥ विधिः इमां भैमीं प्रत्युद्दिश्य नैषधस्य कायो नलदेह एव माया यस्य एवंविधं कपटनलवेषधारिणमिन्द्रमेव स्वयं दूतं न संव्यधान्नाकरोत्। अपि तु इति हेतोः सत्यमेव नलं दूतमकरोत्, नूनमुत्प्रेक्षे। इति किम्—नलश्रीभृति नलकान्तिधारिणि दूते भाविभावा नलबुद्ध्यैव भविष्यदनुरागेयं भैमी नलव्यतिरिक्तेऽनुरागात्कलङ्किनी पातकिनी, अकीर्तिमती च मा जनि मा भूत्। कपटनलरूपधारणसामर्थ्ये सत्यपि इन्द्रो नलरूपं धृत्वा स्वीयदूत्यार्थं न गतवान्, तत्रेदमाकूतम्—ब्रह्मा भैम्याः पातिव्रत्यभङ्गो मा भूदितीन्द्राय बुद्धिं नादत्तेत्यर्थः। नलनिश्चयाभावेऽपि सत्य एव नलेऽनुरागान्न पातिव्रत्यक्षतिरिति भावः। 'जनिता' इति पाठे नूनं निश्चितं कलङ्किनी जनिता भविष्यतीति लुटा व्याख्येयम्॥

नन्वतिसुन्दरस्य नलस्यान्तःपुरे प्रवेशासंभवनिश्चयान्नलसदृशेऽन्यस्मिन्भैमीमनोवृत्तेः कथं पातिव्रत्यभङ्गप्रसङ्ग इत्याशङ्कां परिहरति—

पुण्ये मनः कस्य मुनेरपि स्यात्प्रमाणमास्ते यदघेऽपि धावत्।
तच्चिन्ति चित्तं परमेश्वरस्तु भक्तस्य दृष्यत्करुणो रुणद्धि॥ १७॥

पुण्य इति॥ आस्तां भैमी, परित्यक्तविषयस्य मुनेरपि कस्य मनः पुण्ये विषये प्रमाणं निश्चितं स्यात्, अपि तु न स्यात्। कुतः—यद्यस्मात् अघेऽपि परदारगमनादौ पातकेऽपि विषये धावत् शीघ्रं गच्छत् आस्ते। मुनेर्मनः पुण्ये एव नियतं प्रवर्तत इति न, किंतु पातकेऽपि। तत्राप्ययं विशेषः—शीघ्रमविचार्यैव प्रवर्तते। एतच्च धावत्पदेन सूचितम्। शीघ्रगतावेव धावादेशविधानात्। अत्र तु नलस्य सत्यत्वाद्भैम्याः पातिव्रत्यरक्षणार्थं ब्रह्मैवं कृतवानिति। तर्हि सर्वेऽपि मुनयः पापिनः स्युरित्याशङ्कां परिहरति—परमेश्वरः तु पुनः दृष्यत्करुण उद्यत्कृपः सन् तच्चिन्ति तदघं चिन्तयति कर्तुमिच्छतीत्येवंशीलं भक्तस्य चित्तं रुणद्धि पातकात्परावर्तयति। येषामुपरि रघुनाथकृपा ते पातके सर्वथैव न प्रवर्तन्त इति न सर्वेषां पातकित्वप्रसङ्ग इति तात्पर्यार्थः। तच्चिन्ति परमेश्वरचिन्ति वा॥

---

१ 'अत्र भावोदयातिशयोक्त्यलंकारौ' इति साहित्यविद्याधरी। २ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ३ 'प्रमागमेनेनत्स्यपि दृश्यवृत्ति' इति पाठः सुखावबोधासाहित्यविद्याधरीसंमतः। ४ 'अत्रार्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी।

सालीकदृष्टे मदनोन्मदिष्णुर्यथाप शालीनतमा न मौनम् ।
तथैव तथ्येऽपि नले न लेभे मुग्धेषु कः सत्यमृषाविवेकः ॥ १८ ॥

सेति ॥ स्वभावतः शालीनतमातिलज्जापि मदनेनोन्मदिष्णुरुन्मादवती सती सा भैमी अलीकदृष्टे मिथ्यादृष्टे नले विषये यथा मौनं नाप यथा पूर्वं किमप्यवादीत् तथैव तथ्ये सत्येऽपि नले मौनं न लेभे । अलीकबुद्ध्यैव सत्येऽपि नलेऽवोचदित्यर्थः । तत्कथमित्याशङ्क्याह— मुग्धेषु मूढेषु सत्यस्य मृषा असत्यस्य विवेको विचारः कः, अपि तु न । अतो न धृष्टतया वचनं दोषायेति भावः । 'शालीनतया' इति वा पाठः । अपशालीनतयापगतशालीनतया यथा मौनं न लेभे तथैव तथ्येऽपीति व्याख्येयम् ॥

व्यर्थीभवद्भावपिधानयत्ना स्वरेण साथ श्लथगद्गदेन ।
सखीचये साध्वसबद्धवाचि स्वयं तमूचे नमदाननेन्दुः ॥ १९ ॥

व्यर्थीभवदिति ॥ अथ सा भैमी स्वयमात्मना तं नलमूचे । क सति— सखीनां चये समूहे साध्वसेनान्तःपुरे परपुरुषप्रवेशाज्जातेन साध्वसेन कृत्वा बद्धा वाक् येन कृतमौने सति । किंभूता सा— श्लथो विरलः, गद्गदश्च छिन्नस्तेन स्वरेण शब्देन कृत्वा व्यर्थीभवन् भावपिधानयत्नः सात्त्विकभावगोपनप्रयासो यस्याः । तथा— अत एव नमन्नम्रीभूत आननेन्दुर्मुखचन्द्रो यस्याः सा । 'अथ स्वरेणैव विभावयन्ती भावं निजं सा मृदुगद्गदेन' इत्यपि पाठः स्पष्टार्थः[1] ॥

स्वधार्ष्ट्यं परिहरति—

नत्वा शिरोरत्नरुचापि पाद्यं संपाद्यमाचारविदातिथिभ्यः ।
प्रियाक्षरालीरसधारयापि वैधी विधेया मधुपर्कतृप्तिः ॥ २० ॥

नत्वेति ॥ त्रिभिर्विशेषकम् । हे पुरुषश्रेष्ठ, आचारविदा सदनुष्ठानज्ञेन, धर्मशास्त्रविदा वा पुंसा नत्वा शिरोरत्नरुचा चूडामणिदीप्त्याप्यतिथिभ्यः पाद्यं पादार्थं वारि संपाद्यं देयम् । जलाभावे नत्वापि तच्चरणक्षालनसंभावना कर्तव्या । तस्या रत्नरुचो जलतुल्यत्वादित्यर्थः । आदौ नमस्कारः कर्तव्य इति भावः । 'आचारविदातिथिभ्यः' इति प्रतिवाक्यं श्लोकत्रयेऽपि ज्ञेयम् । वैधी विधिसंबन्धिनी चोदनावाक्यादागता मधुपर्कजन्या तृप्तिः प्रियाक्षरालीः प्रियवचनपङ्क्तिस्तस्या रसधारया माधुर्यधारयापि विधेया करणीया । मधुपर्कसंपादनाभावे प्रियवचन(मेव)मपि वक्तव्यमित्यर्थः । पाद्यं पूर्ववत्[2] ॥

स्वात्मापि शीलेन तृणं विधेयं देया विहायासनभूर्निजापि ।
आनन्दबाष्पैरपि कल्प्यमम्भः पृच्छा विधेया मधुभिर्वचोभिः ॥ २१ ॥

स्वात्मेति ॥ आचारविदा शीलेन विनीतत्वादिना स्वभावेन सद्वृत्तेन वा कृत्वा स्वात्मापि स्वशरीरमपि तृणं विधेयम् । तृणं यथा नम्रीक्रियते, तथातिथीनामग्रे सेवार्थं स्वात्मापि नम्री-

---

१ 'अत्र भावोदयो नामालंकारः' इति साहित्यविद्याधरी । २ 'उत्तमाति पुरुष मधुपर्कतृप्तिं विदित्याहुरिति पृष्टा मे' इति पठित्वा [illegible] 'पृष्टा [illegible] न भवति' इति व्याख्यातं सुखावबोधासाहित्यविद्याधर्योः । चतुर्थपादो[illegible] इति चिन्त्यम् । ३ 'अत्र छेकानुप्रासस्वभावोक्त्यलंकारौ' इति साहित्यविद्याधरी ।

कर्तव्य इत्यर्थः । अथ च तृणाभावे स्वात्मैव तृणस्थाने विधेय इत्यर्थः । विष्टराद्यभावे निजापि स्वीयाप्यासनलक्षणा या भूः स्थानं सिंहासनादि तदप्यादराज्झटिति त्यक्त्वा विहाय देया । भूस्थाने आसनमेव कल्प्यमित्यर्थः । चरणक्षालनार्थं यदि जलं न संभवति तर्ह्यानन्दबाष्पैरपि हर्षाश्रुभिरप्यम्भः कल्प्यम् । अतिथिदर्शनमात्रेण हृष्टेन भवितव्यमित्यर्थः । अथ च जलस्थाने आनन्दबाष्पा एव कल्प्या इत्यर्थः । मधुभिरतिप्रियैर्वचोभिः पृच्छापि कुशलप्रश्नोऽपि विधेया । प्रियं वक्तव्यमित्यर्थः । मधुपर्कस्थाने मधुरं वचनमेव कर्तव्यमित्यर्थः । आचारवशान्मयापि प्रियवचनादि क्रियत इति भावः । 'शीलं स्वभावे सद्वृत्ते' इति विश्वः । 'अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः' इति स्मृतेः । पृच्छा पूर्ववत् ॥

पदोपहारेऽनुपनम्रतापि संभाव्यतेऽपां त्वरयापराधः ।
तत्कर्तुमर्हाञ्जलिसञ्जनेन स्वसंभृतिः प्राञ्जलतापि तावत् ॥ २२ ॥

पदेति ॥ पदोपहारे चरणक्षालनविषये त्वरया झटिति अपामनुपनम्रता जलानामनानयनमपि अपराधः संभाव्यते यतो लोकेनेत्यर्थात् । विलम्बादानयनेऽपि झटित्यनानयनाद्यतोऽपराधः संभाव्यते तत्तस्मादाचारविदा अञ्जलिसञ्जनेन करपुटसंयोजनेन कृत्वा स्वस्य संभृतिरूपा स्वकरणीयातिथ्यसामग्री यावत्संपाद्यते, तावदञ्जलिसंयोजनेन स्वीया प्राञ्जलता ऋजुता कर्तुमर्हा । प्रकटीकर्तुमुचितेत्यर्थः । तावतापि पूर्वापराधशान्तिर्भवतीति भावः । यावत्स्वसंभृतिः स्वकरणीयातिथ्यसामग्री संपाद्यते तावदञ्जलिसञ्जनेन प्राञ्जलतापि कर्तुमर्हेति वान्वयः । यद्वा अपां त्वरया जलानयनार्थं संभ्रमेणानुपनम्रता नमस्काराभावोऽपराधः संभाव्यते । जलानयनात्पूर्वं कृतेन नमस्कारेण सर्वोऽप्यातिथ्यसंभारः कृतो भवतीत्यर्थः । तया एतत्सर्वं कृतमिति तात्पर्यम् । प्राञ्जल इति, 'अच्'प्रत्यन्वव–' इत्यत्र अच् इति योगविभागात्पद्मनाभ इतिवत्समासान्त इति ज्ञेयम् ॥

पुरा परित्यज्य मयात्यसर्जि स्वमासनं तत्किमिति क्षणं न ।
अनर्हमप्येतदलंक्रियेत प्रयातुमीहा यदि चान्यतोऽपि ॥ २३ ॥

पुरेति ॥ अर्थात्पूर्वोक्ताचारदर्शनादाराच्च पुरा आदावेव मया स्वमासनं परित्यज्य अत्यसर्जि भवते दीयते स्म तदेतदनर्हमपि योषिदासनत्वाद्राजानर्हत्वादयोग्यमप्यासनं क्षणं क्षणमात्रं किमिति कुतो हेतोः नालंक्रियेत । किंत्वलंक्रियतामित्यर्थः । यदिच यद्यपि अन्यतोऽपि प्रयातुमन्यदेशमपि गन्तुं ईहा वाञ्छा विद्यते तथाप्येतदलंक्रियतामित्यर्थः । त्वामेवोद्दिश्यागतमिति चेत्, न, ममैतादृग्भागधेयाभावात् । अन्यत्र गमनेच्छायामपि क्षणमात्रमलंक्रियतामित्यर्थः । क्रियेत, प्रार्थनायां लिङ् ॥

निवेद्यतां हन्त समापयन्तौ शिरीषकोषम्रदिमाभिमानम् ।
पादौ कियद्दूरमिमौ प्रयासे निधित्सते तुच्छदयं मनस्ते ॥ २४ ॥

निवेद्यतामिति ॥ हे पुरुषश्रेष्ठ, तुच्छदयं कृपाशून्यं ते मनः कियद्दूरं किंपरिमाणं दूरगमनलक्षणे प्रयासे इमौ पादौ निधित्सते हन्त इत्यनुकम्पया निवेद्यतां मदग्रे कथ्य-

---

१ 'अत्रातिशयोक्तिरूपकालंकारौ' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र विभावनालंकारः' इति साहित्यविद्याधरी ।

तान् । किंभूतौ—शिरीषाणां शिरीषपुष्पाणां कोषः समूहस्तस्य म्रदिम्नि मार्दवविषये योऽभिमानः मत्तोऽधिकं कोमलं वस्तु नास्त्येवेति यो गर्वस्तद्विषये लोकस्य वा गर्वः तं समापयन्तौ नाशयन्तौ । अन्धोऽपि निष्कृपः पुरुषः सुकुमारं जनं प्रवासे प्रेरयति । अत्रागमनेनैव श्रान्तोऽसि, इदानीमितः क्व गन्तासीति भावः । 'शून्यं तु वशिकं तुच्छरिक्तके' इत्यमरः ॥

अनायि देशः कतमस्त्वयाद्य वसन्तमुक्तस्य दशां वनस्य ।
त्वदाप्तसंकेततया कृतार्था श्रव्यापि नानेन जनेन संज्ञा ॥ २५ ॥

अनायीति ॥ त्वया अद्य कतमः किंसंज्ञको देशो वसन्तेन मुक्तस्य त्यक्तस्य वनस्य दशामवस्थामनायि प्रापितः । वसन्तेन विना यथा वनं निःशोभं, तथा त्वया विना स देशोऽपीत्यर्थः । कस्माद्देशादागतोऽसीति कथयेति भावः । तथा—अनेन मल्लक्षणेन जनेन त्वयि आप्तः विषयं प्राप्तः संकेतः समयः संबन्धो यया तस्या भावेन हेतुना कृतार्था चरितार्था संज्ञापि नामापि न श्रव्या, अपितु श्रोतुमर्हा । स्वनामापि कथयेत्यर्थः । श्रव्या, आवश्यकाभावात् 'अचो यत्' इति यत्[1] ॥

तीर्णः किमर्णोनिधिरेव नैष सुरक्षितेऽभूदिह यत्प्रवेशः ।
फलं किमेतस्य तु साहसस्य न तावदद्यापि विनिश्चिनोमि ॥ २६ ॥

तीर्ण इति ॥ हे नरश्रेष्ठ, सुरक्षिते इह अन्तःपुरे तव प्रवेशोऽभूदिति यत्, एष अर्णोनिधिः समुद्र एव किं न तीर्णः, किं तु बाहुभ्यामर्णवतरणतुल्य इति एतस्यान्तःपुरप्रवेशरूपस्य साहसस्याविचार्यकारित्वस्य तु पुनः किं फलं प्रयोजनमित्यद्यापीदानीमपि न विनिश्चिनोमि । किमर्थमत्रागतमित्यपि कथयेत्यर्थः[2] ॥

तव प्रवेशे सुकृतानि हेतुर्मन्ये मदक्ष्णोरपि तावदत्र ।
न लक्षितो रक्षिभटैर्यदाभ्यां पीतोऽसि तन्वा जितपुष्पधन्वा ॥ २७ ॥

तवेति ॥ तव अत्र प्रवेशे मदक्ष्णोर्मदीयनेत्रयोः सुकृतानि पुण्यान्यपि तावदादौ हेतुः कारणमित्यहं मन्ये । कारणान्तरे संभवत्यपि मन्नेत्रपुण्यमादिकारणमित्यर्थः । कथमित्यत आह—यद्यस्मात् रक्षिभटैरतिसुन्दरस्त्वं न लक्षितः । तथा—तन्वा वपुषा जितः पुष्पधन्वा कामो येन एवंभूतो यत् आभ्यां नेत्राभ्यां पीतोऽसि । स्वेच्छमवलोकितोऽसीत्यर्थः । रक्षणार्थमेव नियुक्तैः भटैर्न दृष्टः, आभ्यां च दृष्टः, तत्र मन्नेत्रपुण्यमेवात्र प्रवेशे हेतुरिति भावः[3] ॥

यथा कृतिः काचन ते यथा वा दौवारिकान्धंकरणी च शक्तिः ।
रुच्यो रुचीभिर्जितकाञ्चनाभिस्तथासि पीयूषभुजां समानः ॥ २८ ॥

यथेति ॥ यथा येन कारणेन ते आकृतिराकारः काचन लोकोत्तरातिरमणीया । यथा वा ते काचन अपूर्वा शक्तिश्च दौवारिकाणां रक्षिजनानामन्धंकरणी अन्धत्वकारिणी । तथा—गौरत्वेन जिता काञ्चनी हरिद्रा याभिस्ताभी रुचीभिः कान्तिभिः कृत्वा रुच्योऽभिलषणीयो-

---

१ 'अत्र उत्प्रेक्षानुमानोल्लेखोपमालंकारः' इति साहित्यविद्याधरी । २ 'अत्र निदर्शनाकाव्यलिङ्गालंकारः' इति साहित्यविद्याधरी । ३ 'अत्र निदर्शनाकाव्यलिङ्गालंकारः' इति साहित्यविद्याधरी । ४ 'दक्षः' इति पाठः साहित्यविद्याधरीसंमतः । ५ 'अत्रातिशयोक्तिकाव्यलिङ्गोपमालंकारः' इति साहित्यविद्याधरी ।

च्योऽसि । तथा तेन कारणेन पीयूषभुजां देवानां सनाभि सगोत्रोऽसि । देवत्वेन विनैतन्न घटतेऽतः प्रायस्त्वं कश्चन देवोऽसीति मन्ये । चकारो रुच्य इत्यनेन योज्यः । रुच्यश्चासि यथा इति संबन्ध इति वा । 'निशाह्वया काञ्चनी पीता हरिद्रा वरवर्णिनी' इत्यमरः । 'काञ्चना' इति पाठे सुवर्णम् । दौवारिक इत्यत्र 'द्वारे नियुक्तः' इत्यर्थे 'तत्र नियुक्तः' इति ठकि 'द्वारादीनां च' इत्यैचि, अभूततद्भावे 'आढ्यसुभग–' इति ख्युनि खित्त्वात्पूर्वपदस्य मुमि 'टिड्ढा–' इति ङीप् । रुचिमर्हति रुच्यः । 'तदर्हति' इति यत् । 'राजसूय–' इति निपातो वा । 'जितकाञ्चनीभिः' इति पाठे समासान्तविधेरनित्यत्वात् 'नद्यृतश्च' इति न कप् । सनाभिः, 'ज्योतिर्जनपद–' इति समानस्य सभावः ॥

न मन्मथस्त्वं स हि नास्तिमूर्तिर्न चाश्विनेयः स हि नाद्वितीयः ।
चिह्नैः किमन्यैरथवा तवेयं श्रीरेव ताभ्यामधिको विशेषः ॥ २९ ॥

नेति ॥ त्वं मन्मथो न । हि यतः स कामो नास्तिमूर्तिरशरीरी । त्वं आश्विनेयोऽश्विनीकुमारश्च न । चोऽप्यर्थः । हि यतः सः अद्वितीयो नास्ति, किंतु द्वितीयसहित एव । त्वं सशरीर एककश्च । अथवेति पूर्वापरितोषे । अन्यैश्चिह्नैः किम्, अपितु न किमपि । किं तर्हि—ताभ्यां कामाश्विनेयाभ्यां सकाशादधिका तव इयं श्रीः शोभैव विशेषः । तयोरीदृक्शोभाभावादियमेव तदन्यत्वज्ञापिकेत्यर्थः । नास्तिमूर्तिः, 'अस्तिक्षीरादयश्च' इति बहुव्रीहौ पश्चान्नकारेण समासः[१] ॥

आलोकतृप्तीकृतलोक यस्त्वामसूत पीयूषमयूखमेनम् ।
कः स्पर्धितुं धावति साधु सार्धमुदन्वता नन्वयमन्ववायः ॥ ३० ॥

आलोकेति ॥ हे आलोकेन दर्शनेन तृप्तीकृतः कृतार्थीकृतो लोको येन तत्संबोधनम् । यः त्वाम् एवं त्वद्रूपं पीयूषमयूखं चन्द्रमसूत स कः । अयमन्ववायो वंश उदन्वता सार्धं स्पर्धितुं स्पर्धां कर्तुं साधु युक्तं धावति । समुद्रसाम्यार्थं झटिति बुद्ध्यपारूढो भवतीत्यर्थः । समुद्रोऽप्यालोकेन प्रकाशेन तृप्तीकृतभुवनं सुधाकरं सूते । कस्मिन्वंशे समुत्पन्नोऽसीत्यपि कथयेति भावः । 'आलोकौ दर्शनोद्द्योतौ', 'लोकस्तु भुवने जने' इत्यमरः ॥

भूयोऽपि बाला नलसुन्दरं तं मत्वामरं रक्षिजनाक्षिबन्धात् ।
आतिथ्यचाटून्यपदिश्य तस्थां श्रियं प्रियस्यास्तुतव स्तुतः सा ॥३१॥

भूयोऽपीति ॥ सा बाला तं नलं रक्षिजनानां दौवारिकाणामक्षिबन्धान्नेत्रबन्धनात् अदृष्टीकरणान्नलवत्सुन्दरं नलसदृशममरं देवं मत्वा निखिल आतिथ्यसंबन्धीनि चाटूनि प्रियवचनान्यपदिश्य व्याजीकृत्य तद्व्याजेन तस्थां तस्मिन्नमरे विद्यमानां प्रियस्य नलस्य श्रियं शोभां वस्तुतस्तत्त्वतः अस्तुत पुनरपि वर्णयति स्म । प्रियवचनव्याजेन तत्त्वतो नलशोभावर्णनतत्परैव बभूवेति भावः ।

---

१ इदं च काशिकानुसारेण । भाष्यमते तु सूत्रे ख्युनोऽपाठात् 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानाम्' इति वार्तिकेन बोध्यः । २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । ३ 'तवैवम्' इति साहित्यविद्याधरीसंमतः पाठः । ४ 'अत्र निश्चयगर्भसंदेहो व्यतिरेकालंकारः' इति साहित्यविद्याधरी । ५ 'अत्र श्लेषरूपकोपमालंकारः' इति साहित्यविद्याधरी । ६ 'इतीरयन्ती' इति पाठः सुखावबोधासाहित्यविद्याधरीसंमतः । ७ 'अत्र श्लेषरूपकोपमालंकाराः' इति साहित्यविद्याधरी ।

पुनरपि किमित्यस्तुवेत्याशङ्क्य कविराह—

वाग्जन्मवैफल्यमसह्यशल्यं गुणाद्भुते वस्तुनि मौनिता चेत् ।
खलत्वमल्पीयसि जल्पिते तु तदस्तु बन्दिभ्रमभूमितैव ॥ ३२ ॥

वागिति ॥ गुणैरद्भुते आश्चर्यभूते वस्तुनि मौनिता मूकीभावश्चेत्, गुणाद्भुतं वस्तु न वर्ण्यते चेत्, तर्हि वाग्जन्मनो वैफल्यमसह्यशल्यमतिदुःखदायि दुःसहशल्यतुल्यं भवतीत्यर्थः । मूकस्य तस्य च न कोऽपि विशेष इत्यर्थः । तर्ह्यल्पमेव वक्तव्यमित्यत आह—अल्पीयसि जल्पिते तु भाषिते तु खलत्वं दुर्जनत्वमायाति लोकस्तं दुर्जन इति वदति । तस्माद्बन्दिनः स्तुतिपाठकस्य यो भ्रमः स्तुतिपाठकोऽयमिति भ्रान्तिस्तस्या भूमितैव स्थानतैवास्तु भवतु । गुणाद्भुतं वस्तु यथैव वर्णनीयमिति कवेरभिप्रायवचः । तस्मात्तथा तुभ्यं स्तुतिरारभ्यत इति भावः । तस्मान्मयि स्तुतिपाठकभ्रान्तिर्लोकस्य भवत्विति मेऽभिवचो वेति भावः ॥

कंदर्प एवेदमविन्दत त्वां पुण्येन मन्ये पुनरन्यजन्म ।
चण्डीशचण्डाक्षिहुताशकुण्डे जुहाव यन्मन्दिरमिन्द्रियाणाम् ॥ ३३ ॥

कंदर्प इति ॥ कंदर्प एव महता पुण्येन त्वामेव त्वद्रूपमेव इदं दृश्यमानं पुनरन्यजन्मान्तरमविन्दत लेभ इत्यहं मन्ये जाने । कुतः—यद्यस्मात् मदनः चण्डीशः शिवः, तस्य चण्डं दुःसहमक्षि तृतीयं नेत्रं तदेव हुताशकुण्डं तस्मिन्निन्द्रियाणां मन्दिरं स्वं शरीरं जुहाव । पूर्वापेक्षयाधिकसौन्दर्यप्राप्त्याशया बुद्धिपूर्वं कामेनाग्निकुण्डे स्वशरीरे हुते, तेनैव पुण्येन त्वद्रूपं जन्म प्राप्तम् । अन्येनापि तथैव क्रियते । स एव त्वमिति भावः ॥

शोभायशोभिर्जितशैवशैलं करोषि लज्जागुरुमौलिमेनम् ।
दस्रौ हठाभ्याहरणादुदस्रौ कंदर्पमप्युज्झितरूपदर्पम् ॥ ३४ ॥

शोभेति ॥ त्वं शोभायशोभिः कान्तिकीर्तिभिः [illegible] कैलासो येन एवंविधमेनं पुरस्थं हठेन बलात्कारेण [illegible] गुरुमौलिः शिरो यस्य एवंविधं करोषि । तथा—[illegible] हठेनाहरणादुदस्रौ गलदश्रू करोषि । तथा—[illegible] कंदर्पः सौन्दर्यगर्वो येन एतादृशं करोषि । [illegible] इति भावः । अन्योऽपि बलाद्गृहीतधनः सलज्जो गलदश्रुः [illegible] भवतीति ॥

अयन्ति हंसावलयो वलक्षास्त्वत्कान्तिकीर्तिप्रचलाः पुलाकाः ।
उड्डीय युक्तं पतिताः स्रवन्तीवेशान्तपूरं परितः स्फुरन्ति ॥ ३५ ॥

अयन्तीति ॥ [illegible]

---

१ [illegible] साहित्यविद्याधरी । [illegible]
[illegible] साहित्यविद्याधरी । [illegible] सर्वङ्कषा ।

ग्योऽसि । तथा तेन कारणेन पीयूषभुजां देवानां सनाभि सगोत्रोऽसि । देवत्वेन विनैतन्न घटतेऽतः प्रायस्त्वं कश्चन देवोऽसीति मन्ये । चकारो रुच्य इत्यनेन योज्यः । रुच्यश्चासि यथा इति संबन्ध इति वा । 'निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनी' इत्यमरः । 'काञ्चना' इति पाठे सुवर्णम् । दौवारिक इत्यत्र 'द्वारे नियुक्तः' इत्यर्थे 'तत्र नियुक्तः' इति ठकि 'द्वारादीनां च' इत्यैचि, अभूततद्भावे 'आढ्यसुभग—' इति ख्युनि खित्त्वात्पूर्वपदस्य मुमि 'टिड्ढा—' इति ङीप् । रुचिमर्हति रुच्यः । 'तदर्हति' इति यत् । 'राजसूय—' इति निपातो वा । 'जितकाञ्चनीभिः' इति पाठे समासान्तविधेरनित्यत्वात् 'नद्यृतश्च' इति न कप् । सनाभिः, 'ज्योतिर्जनपद—' इति समानस्य सभावः ॥

न मन्मथस्त्वं स हि नास्तिमूर्तिर्न चाश्विनेयः स हि नाद्वितीयः ।
चिह्नैः किमन्यैरथवा तवेयं श्रीरेव ताभ्यामधिको विशेषः ॥ २९ ॥

नेति ॥ त्वं मन्मथो न । हि यतः स कामो नास्तिमूर्तिरशरीरी । त्वं आश्विनेयोऽश्विनीकुमारश्च न । चोऽप्यर्थः । हि यतः सः अद्वितीयो नास्ति, किंतु द्वितीयसहित एव । त्वं सशरीर एककश्च । अथवेति पूर्वापरितोषे । अन्यैश्चिह्नैः किम्, अपितु न किमपि । किं तर्हि—ताभ्यां कामाश्विनेयाभ्यां सकाशादधिका तव इयं श्रीः शोभैव विशेषः । तयोरीदक्शोभाभावादियमेव तदन्यत्वज्ञापिकेत्यर्थः । नास्तिमूर्तिः, 'अस्तिक्षीरादयश्च' इति बहुव्रीहौ पश्चान्नकारेण समासः[२] ॥

आलोकतृप्तीकृतलोक यस्त्वामसूत पीयूषमयूखमेनम् ।
कः स्पर्धितुं धावति साधु सार्धमुदन्वता नन्वयमन्ववायः ॥ ३० ॥

आलोकेति ॥ हे आलोकेन दर्शनेन तृप्तीकृतः कृतार्थीकृतो लोको येन तत्संबोधनम् । यः त्वाम् एवं त्वद्रूपं पीयूषमयूखं चन्द्रमसूत स कः । अयमन्ववायो वंश उदन्वता सार्धं स्पर्धितुं स्पर्धां कर्तुं साधु युक्तं धावति । समुद्रसाम्यार्थं झटिति बुद्ध्यारूढो भवतीत्यर्थः । समुद्रोऽप्यालोकेन प्रकाशेन तृप्तीकृतभुवनं सुधाकरं सूते । कस्मिन्वंशे समुत्पन्नोऽसीत्यपि कथयेति भावः । 'आलोकौ दर्शनोद्द्योतौ', 'लोकस्तु भुवने जने' इत्यमरः[५] ॥'

भूयोऽपि[६] बाला नलसुन्दरं तं मत्वामरं रक्षिजनाक्षिबन्धात् ।
आतिथ्यचाटून्यपदिश्य तत्स्थां श्रियं प्रियस्यास्तुतवस्तुतः सा ॥३१॥

भूयोऽपीति ॥ सा बाला तं नलं रक्षिजनानां दौवारिकाणामक्षिबन्धान्नेत्रबन्धनात् अदृष्टीकरणान्नलवत्सुन्दरं नलसदृशममरं देवं मत्वा निश्चित्य आतिथ्यसंबन्धीनि चाटूनि प्रियवचनान्यपदिश्य व्याजीकृत्य तद्व्याजेन तत्स्थां तस्मिन्नमरे विद्यमानां प्रियस्य नलस्य श्रियं शोभां वस्तुतस्तत्त्वतः अस्तुत पुनरपि वर्णयति स्म । प्रियवचनव्याजेन तत्त्वतो नलशोभावर्णनतत्परैव बभूवेति भावः[७] ।

---

१ इदं च काशिकानुसारेण । भाष्यमते तु सूत्रे ख्युनोऽपाठात् 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानाम्' इति वार्तिकेन बोध्यः । २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । ३ 'तवैवम्' इति साहित्यविद्याधरीसंमतः पाठः । ४ 'अत्र निश्चयगर्भसंदेहो व्यतिरेकालंकारः' इति साहित्यविद्याधरी । ५ 'अत्र श्लेषरूपकोपमालंकारः' इति साहित्यविद्याधरी । ६ 'इतीरयन्ती' इति पाठः सुखावबोधासाहित्यविद्याधरीसंमतः । ७ 'अत्र श्लेषरूपकोपमालंकाराः' इति साहित्यविद्याधरी ।

त्वयेति ॥ त्वया उचितो गृहीतः कान्तिसारः शोभाश्रेष्ठभागो यस्य यस्माद्वा एवंविधे जगति भुवने मध्ये इन्दुना शिलं चोञ्छश्च क्षेत्रादिपतितकणादानधान्यादानलक्षणौ शिलोञ्छौ तावेव वृत्तिर्जीविका यद्यस्मादशीलि अभ्यस्ता कृता तत्तस्मात्कारणान्महेश्वरेण माणवकोऽपि बालः कलारूपोऽपि स चन्द्रो मौलौ शिरस्यारोपि धृतः, यज्वनां याजकानां राज्येऽपि चाभिषिक्तः । द्विजराजोऽपि तत एव कृत इत्यर्थः । त्वद्गृहीतात्कान्तिसारादवशिष्टं कान्तिभागं कथंचिन्मेलयित्वा चन्द्रेण स्वस्य सौन्दर्यं यस्मादर्जितं तस्मात्कलामात्रस्यापि सुन्दरत्वादीश्वरेण बालोऽपि शिरसि भूषणत्वेन धृतो यज्वनां मध्ये श्रेष्ठश्च कृतः, अत्युज्ज्वलत्वाच्छिलोञ्छवृत्त्युपादानाचेत्यर्थः । बालोऽप्यन्यस्तपस्वी महता राज्ञा नमस्क्रियते द्विजराज्ये स्थाप्यते च । महाधनिकेन माणवको हारविशेषो मौलावारोप्यत इत्याश्चर्यम् । स तु कण्ठे धार्यते न तु शिरसि । चन्द्रे त्वच्छोभालेश एव विद्यते, त्वादृशः सुन्दरः कोऽपि नास्तीति भावः । 'जीवेद्वापि शिलोञ्छेन' इति स्मृत्या शिलोञ्छवृत्तिजीविनोऽतिप्रशस्तत्वोक्तिः ॥

आदेहदाहं कुसुमायुधस्य विधाय सौन्दर्यकथादरिद्रम् ।
त्वदङ्गशिल्पात्पुनरीश्वरेण चिरेण जाने जगदन्वकम्पि ॥ ४३ ॥

आदेहदाहमिति ॥ कुसुमायुधस्य कामस्य आदेहदाहं देहदाहमारभ्य सकलं जगत्सौन्दर्यकथया दरिद्रं विहीनं विधाय इदानीं त्वदङ्गस्य शिल्पान्निर्माणाद्धेतोः ईश्वरेण पुनरपि चिरेण चिरकालाज्जगत् अन्वकम्पि कृपया दृष्टमिति जाने अहमुत्प्रेक्षे । कामा(मदाहा)दनन्तरमियन्तं कालं सौन्दर्यवार्तापि नाभूत्, इदानीं तत्स्थाने तवाभिषेककरणादीश्वरेण जगतः कृपा कृतेत्यर्थः । अन्योऽपि राजा दुःसहदारिद्र्यपीडितानां दयते । मदनादप्यधिकोऽसीति भावः ॥

मही कृतार्था यदि मानवोऽसि जितं दिवा यद्यमरेषु कोऽपि ।
कुलं त्वयालंकृतमौरगं चेन्नाधोऽपि कस्योपरि नागलोकः ॥ ४४ ॥

महीति ॥ त्वं यदि कोऽपि मानवो मनुष्योऽसि, तर्हि मही कृतार्था कृतकृत्या । त्वयालंकृतत्वादित्यर्थः । अथच कृतः पर्याप्तोऽर्थोऽभिधेयं यस्याः सा मह्यते पूज्यते महीयत इति महीशब्दार्थः । यदि अमरेषु देवेषु मध्ये त्वं कोऽपि देवस्तर्हि दिवा स्वर्गेण जितं सर्वोत्कृष्टेन जातम् । पूर्वस्मादेव हेतोः । दीव्यति विजिगीषत इति द्यौरिति पूर्वं दिवो विजयेच्छैवाभूत्, इदानीं तया जितमित्यर्थः । त्वया औरगं सर्पसंबन्धि कुलमलंकृतं चेत्कश्चन नागस्त्वम्, तर्हि अधोप्यधोदेशस्थितोऽपि त्वयाधिष्ठितो नागलोकः पातालं कस्योपरि न ऊर्ध्वदेशे न, अपितु सर्वस्यापि । पूर्व एव हेतुः । न गच्छन्तीत्यगाः न अगा नागास्तेषां लोकः । इदानीमप्रतिहतप्रसरत्वात्सर्वस्याप्युपरि गन्तुं योग्य इत्यर्थः । पूर्वोक्तेषु मध्ये कस्त्वमिति कथयेति भावः । संभावनया स्वाभिलषितत्वाच्च प्रथमं मानवोक्तिः ॥

---

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'सर्गात्' इति पाठः साहित्यविद्याधरीसंमतः । ३ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । ४ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।

कस्यापि धन्यस्य लोकोत्तरभागधेयस्य गृहेऽतिथिर्भविष्यसि प्रायेण नतु मम। एतादृग्भागधेयाभावादिति भावः। 'कस्यासि' इति पाठे गृहातिथिरसि वदेत्यर्थः ॥

प्राप्तैव तावत्तव रूपसृष्टिं निपीय दृष्टिर्जनुषः फलं मे।
अपि श्रुती नामृतमाद्रियेतां तयोः प्रसादीकुरुषे गिरं चेत् ॥ ४९ ॥

प्राप्तेति ॥ मे दृष्टिस्तव रूपसृष्टिं रामणीयकातिशयं निपीय सादरं विलोक्य तावत्प्रथमतः जनुषो जन्मनः फलं साफल्यं प्राप्तैव। परं श्रुती अपि कर्णावपि अमृतं नाद्रियेताम्, अपि तु ते अप्यमृतपानं कुरुताम्। चेद्यदि स्वीयां गिरं तयोः श्रुत्योः प्रसादीकुरुषे। प्रसन्नो भूत्वा किमपि वदिष्यसि तर्ह्यमृतपानजन्यं सुखमनयोर्भविष्यतीत्यर्थः। सर्वस्यापि प्रश्नस्योत्तरं प्रयच्छेति भावः ॥

इत्थं मधूत्थं रसमुद्गिरन्ती तदोष्ठबन्धूकधनुर्विसृष्टा।
कर्णात्प्रसूनाशुगपञ्चबाणी वाणीमिषेणास्य मनो विवेश ॥ ५० ॥

इत्थमिति ॥ प्रसूनाशुगः कामः तस्य पञ्चबाणी वाणीमिषेण कर्णात्कर्णं प्रविश्यास्य नलस्य मनो विवेश। किंभूता—इत्थं पूर्वोक्तप्रकारेणातिस्वादुत्वान्मधूत्थं माक्षिकोद्भवममृतोद्भवं वा रसमुद्गिरन्ती प्रकटयन्ती पुष्परसं च क्षरन्ती। तथा—तस्या ओष्ठलक्षणं बन्धूकं तल्लक्षणं कामधनुस्तेन विसृष्टा युगपन्मुक्तानां कामबाणानां युगपदन्तःप्रवेशे यथा कामव्यथा भवति, तथा तद्वाणीसमाकर्णनमात्रेण तस्याभूदिति भावः। कर्णात्, ल्यब्लोपे पञ्चमी ॥

अमज्जदाकण्ठमसौ सुधासु प्रियं प्रियाया वचनं निपीय।
द्विषन्मुखेऽपि स्वदते स्तुतिर्या तन्मि(न्मृ)ष्टता नेष्टमुखे त्वमेया ॥५१॥

अमज्जदिति ॥ असौ नलः प्रियायाः प्रियं मधुरं सानुरागं च स्वीयस्तुतिरूपं वचनं निपीय सादरमाकर्ण्य आकण्ठं कण्ठावधि, 'आमज्जम्' इति पाठे मज्जापर्यन्तं, सुधास्वमृतेष्वमज्जत्। सर्वाङ्गीणानन्दमयोऽभूदित्यर्थः। स्वस्तुतिश्रुत्या कथमानन्दो युक्त इत्यत आह—या स्तुतिः द्विषन्मुखेऽपि विद्यमाना सती स्वदते रोचते तस्याः स्तुतेः मि(मृ)ष्टता मधुरता इष्टमुखे तु पुनरमेया (न) अपरिमिता न भवति, अपि तु भवत्येव वैरिसमाश्रयेणान्यदरुच्यं भवति, स्तुतिस्तु रुच्यैव भवति सा स्वप्रियाश्रया रुच्यतरा कथं न भवतीत्याशयः। आमज्जं, 'अनश्च' इति टच् ॥

पौरस्त्यशैलं जनतोपनीतां गृह्णन्यथाह्नः पतिरर्घ्यपूजाम्।
तथातिथेयीमथ संप्रतीच्छन्प्रियार्पितामासनमाससाद ॥ ५२ ॥

पौरस्त्येति ॥ अथ अह्नः पतिः सूर्यः जनतया जनसमूहेनोपनीतामर्पितामर्घलक्षणां पूजां गृह्णन्नङ्गीकुर्वन् यथा पुरोभवं पौरस्त्यं शैलमुदयाचलमासादयति, तथा प्रियार्पितां भैम्या वितीर्णामातिथेयीमतिथिषु साध्वीं पूजां संप्रतीच्छन्स्वीकुर्वन् स नलः अस्या भैम्या (आसनम् 'अस्या वयस्यासनम्' इति पाठे अस्या भैम्याः) वयस्यासनं सख्यासनमाससाद भेजे। स्वस्य दूतला-

१ 'अत्राक्षेपोऽलंकारः' इति साहित्यविद्याधरी। २ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। ३ 'अत्र च्छेकानुप्रासरूपकापह्नुतिरलंकारः' इति साहित्यविद्याधरी। ४ 'अर्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी। 'केनुत्वेन स्वादुत्वोत्कर्षप्रतिपादनादर्थापत्त्यलंकारः तस्य वाक्यभूतस्य आमज्जं सुधामज्जनहेतुत्वाद्वाक्यार्थहेतुकं काव्यलिङ्गमिति संकरः' इति जीवातुः।

द्भैम्यासनं त्यक्त्वा सख्यासनं भेजे इत्यर्थः । पौरस्त्यम्, भवार्थे 'दक्षिणापश्चात्–' इति त्यक् । आतिथेयीम्, साध्वर्थे 'पथ्यतिथि–'इति ढञि ङीप् ॥

अयोधि तद्धैर्यमनोभवाभ्यां तामेव भैमीमवलम्ब्य भूमिम् ।
आह स्म यत्र स्मरचापमन्तश्छिन्नं भ्रुवौ तज्जयभङ्गवार्ताम् ॥ ५३ ॥

अयोधीति ॥ तद्धैर्यमनोभवाभ्यां तस्य नलस्य धैर्यकामाभ्यां कर्तृभ्यां तां भैमीमेव भूमिं स्थानमवलम्ब्याश्रित्य भैमीमेव विषयं कृत्वा च परस्परमयोधि युद्धमकारि । भैमीविषयं धैर्यं कर्तृ भैमीविषयमदनजिगीषया युद्धं चकार, मदनश्च धैर्यजिगीषयेत्यर्थः । यत्र भैमीलक्षणायां युद्धभूमावन्तर्मध्ये छिन्नं भ्रूरूपं कामचापं कर्तृ तयोर्धैर्यकामयोर्यथाक्रमं जयस्य भङ्गस्य पराजयस्य च वार्तां कथामाह स्म ब्रवीति स्म । भैमीरूपायां सङ्ग्रामभूमौ पतितं भैमीभ्रूरूपं कामचापं छिन्नं धैर्यस्य विजयं, कामस्य पराजयं कथयति स्मेति भावः । यस्य धनुर्भङ्गस्तस्य पराजयोऽन्यस्य च जय इति लोकप्रसिद्धिः । भैम्यामुत्पन्नमपि कामं धैर्येण नाजीगणदिति भावः । भ्रुवोरसंलग्नत्वं सामुद्रिकोक्तं लक्षणम्[1] ॥

अथ स्मराज्ञामवधीर्य धैर्यादूचे स तद्वागुपवीणितोऽपि ।
विवेकधाराशतधौतमन्तः सतां न कामः कलुषीकरोति ॥ ५४ ॥

अथेति ॥ अथ तस्या भैम्या वाग्रूपया वीणया उपवीणितोऽप्युपगीतोऽपि स नलो धैर्यात्स्मराज्ञामवधीर्य ऊचे । वीणयोपगायने हि कामाधीनत्वं युक्तम् । धैर्यात्तत्र जातमित्यर्थः । धैर्याधिक्यात्कामो व्यवहितो नतु सर्वथा शान्त इति ज्ञातव्यम् । अन्यथा रसभङ्गः स्यात् । अर्थान्तरन्यासमाह—कामो विवेकधारया विचारप्रवाहेण शतवारं धौतमुज्ज्वलीकृतं सतामन्तः मानसं न कलुषीकरोति । तस्मादुचितमेतदित्यर्थः । अवधीर्येति पूर्ववत्[2] ॥

हरित्पतीनां सदसः प्रतीहि त्वदीयमेवातिथिमागतं माम् ।
वहन्तमन्तर्गुरुणादरेण प्राणानिव स्वःप्रभुवाचिकानि ॥ ५५ ॥

हरिदिति ॥ हे भैमि, त्वं मां हरितां दिशां पतयः तेषां दिक्पालानां सदसः सभात आगतं त्वदीयमेवातिथिं प्रतीहि जानीहि । किंभूतं माम्—स्वःप्रभवो दिक्पालास्तेषामिन्द्रादीनां वाचिकानि संदेशवचनानि गुरुणा आदरेण प्राणानिव अन्तः हृदये वहन्तं धारयन्तम् । अहं त्वदर्थं देवैर्दूतः प्रेषित इत्यर्थः । कुत आगतः, कस्यातिथिरिति प्रश्नस्योत्तरं दत्तम् । गुरुणादरेणेत्यनेन दूतधर्मो दर्शितः ॥

विरम्यतां भूतवती सपर्या निविश्यतामासनमुज्झितं किम् ।
या दूतता नः फलिना विधेया सैवातिथेयी पृथुरुद्भवित्री ॥ ५६ ॥

विरम्यतामिति ॥ हे भैमि, त्वया विरम्यतां निर्व्यापारतया स्थीयताम् । यतः—सपर्या पूजा भूतवती जाता । निविश्यतामुपविश्यताम् । दूतदर्शनमात्रेणासनं किमित्युज्झितं

---

१ 'अत्र श्लेषानुप्राणितोपमालंकारः' इति साहित्यविद्याधरी । २ 'अत्र रूपकप्रमाणोक्त्यलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र विशेषोक्त्यर्थान्तरन्यासालंकारः' इति साहित्यविद्याधरी । 'अत्र पूर्वार्धे स्मरधैर्ययोर्धावित्वविवक्षितस्य धैर्यनियमनात्परिसंख्यालंकारः । तस्योत्तरार्धे सामान्येन समर्थनात्सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यास इति संकरः' इति जीवातुः । ४ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी । ५ [illegible] मम फलितं विधेयम्' इति साहित्यविद्याधरी ।

त्यक्तम्, अतिथिदर्शने एतत्कर्तव्यमिति कृतमिलाशङ्क्याह—या नोऽस्माकं दूतता फलिना फलवती विधेया करणीया सैव पृथुर्महती आतिथेयी अतिथिपूजा उत् उच्चैस्तरां भवित्री भविष्यति। आसनादिपरित्यागस्तूपचार एव। स न कार्यः, किं तु यदर्थमागतोऽस्मि तत्स-फलयेत्यर्थः। 'फलिता' इत्यपि पाठः। फलिनेति 'फलबर्हाभ्यामिनच्' अस्त्यर्थे॥

कल्याणि कल्यानि तवाङ्गकानि कच्चित्तमां चित्तमनाविलं ते।
अलं विलम्बेन गिरं मदीयामाकर्णयाकर्णतटायताक्षि॥ ५७॥

कल्याणीति॥ हे कल्याणि शोभनरूपे, तव अङ्गकानि कोमलान्यङ्गानि कल्यानि समर्थानि नीरोगाणि कच्चित्तमाम्। अतिशयेन नीरोगाणि किं कथयेत्यर्थः। ते चित्तं अनाविलं कालुष्यरहितं कच्चित्तमां विद्यते। विलम्बेनालम्। एतावानेव कुशलप्रश्नोऽस्तु, अन्यत्प्रष्टुमनुचितम्। प्रकृतकार्यविरोधात्। प्रकृतमेवाह—हे आकर्णतटायताक्षि आकर्णपूर्णनयने भैमि, त्वं मदीयां वक्ष्यमाणां गिरमाकर्णय। 'निरामयः कल्यः' इत्यमरः। कच्चित्तमाम्, 'किमेत्तिङ्व्यय-' इत्यामुः॥

श्लोकत्रयेण चतुर्णामपि साधारण्येन दूत्यं करोति—

कौमारमारभ्य गणा गुणानां हरन्ति ते[3] दिक्षु धृताधिपत्यान्।
सुराधिराजं सलिलाधिपं च हुताशनं चार्यमनन्दनं च॥ ५८॥

कौमारमिति॥ हे भैमि, कौमारमारभ्य बाल्यादारभ्य ते गुणानां गणाः सौन्दर्यशीलत्वादयो दिक्षु धृतमाधिपत्यं यैस्तान्देवेन्द्रान्हरन्ति। तानेवाह—सुराधिराजमिन्द्रम्, सलिलाधिपं वरुणं च, हुताशनमग्निम्, अर्यम्णः सूर्यस्य नन्दनं पुत्रं यमं च। त्वद्गुणाकर्णनाच्चत्वारोऽपि त्वय्यनुरक्ता इत्यर्थः॥

चरच्चिरं शैशवयौवनीयद्वैराज्यभाजि त्वयि खेदमेति।
तेषां रुचश्चौरतरेण चित्तं पञ्चेषुणा लुण्ठितधैर्यवित्तम्॥ ५९॥

चरदिति॥ शैशवं यौवनं (च) तत्संबन्धि शैशवयौवनीयं द्वैराज्यं भजते तस्या वयःसंधौ वर्तमानायां त्वयि चिरं चरत् तव शैशवमारभ्य चञ्चलमासक्तं सत् तेषां चित्तं खेदं दुःखमेति प्राप्नोति। किंभूतं चित्तम्—पञ्चेषुणा कामेन लुण्ठितं धैर्यमेव वित्तं यस्य। किंभूतेन कामेन—अतिपीडितत्वाद्रुचः शरीरकान्तेः चौरतरेण। विरहातुरस्याङ्गकान्तिर्हीना भवति। त्वय्यासक्तत्वाद्धैर्यापगमात्त्वद्विरहपीडया असह्यत्वम्। अन्योऽपि राज्यद्वयमध्ये सीमायां [illegible]ति, स धनुर्धरेण केनचिदपहृतधनो दुःखं प्राप्नोति। द्वैराज्य इति टचि भावे ष्यञ्॥

तेषामिदानीं किल केवलं सा हृदि त्वदाशा विलसत्यजस्रम्।
आशास्तु नासाद्य तनूदरास्ताः पूर्वादयः पूर्वदारमदाराः॥ ६०॥

---

१ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी। २ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। ३ 'ते भैमि दिशामधीशान्' इति सुखावबोधा-साहित्यविद्याधरीसंमतः [illegible]। ४ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। ५ 'त्वयि चिरमेव' इति [illegible]साहित्यविद्याधरीसंमतः पाठः। ६ 'अन्योक्तिरलंकारः' इति साहित्यविद्याधरी। [illegible] 'पञ्चेषुचौरेण धैर्यं धैर्यमिव हृतम्' इति [illegible]। '[illegible] काव्यलिङ्गालंकारः' इति [illegible]।

तेषामिति ॥ किल निश्चये । इदानीं त्वत्तदन्यदशासमये सा तदाशा त्वत्प्राप्तितृष्णा तेषां हृदि केवलं निश्चितं अजस्रं सर्वदा विलसति स्फुरति । उदारा महतीः सुन्दरीश्च तनूः शरीराण्यात्ताय कृत्वा आत्मदाराः स्वीयाः स्त्रियः पूर्वादय आशा दिशास्तु पुनः पूर्ववन्न स्फुरन्ति । प्राच्यादीनां शरीरमपि विद्यते । त्वय्येवासक्तत्वात्सुन्दरीरपि दिशो यथा पूर्वं पालितवन्तः तथेदानीं नेति, एकया त्वदाशया भूयसोऽप्याशाः परित्यक्ता इति च भावः । अन्योऽपि नवीनायां कस्यांचिदनुरक्तः सन् जीर्णशरीरां प्रथमां स्त्रियं त्यजति ॥

सामान्यतः सर्वेषां दूत्यं कृत्वेदानीं मुख्यत्वात्पूर्वमिन्द्रं स्तौति—

अनेन सार्धं तव यौवनेन कोटिं परामच्छिदुरोऽध्यरोहत् ।
प्रेमापि तन्वि त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ॥ ६१ ॥

अनेनेति ॥ हे तन्वि, त्वयि विषये अच्छिदुरोऽतिदृढः अक्षीणो निर्मर्यादो वासवस्य प्रेमानुरागोऽप्यनेन प्रत्यक्षदृश्येन तव यौवनेन सार्धं सह परां कोटिं परमां काष्ठामध्यरोहत्प्राप । यथा तव यौवनमुत्कर्षं प्राप्तं, तथा त्वय्यनुरागोऽपीत्यर्थः । यदाप्रभृति तव यौवनप्रादुर्भाव-स्तदाप्रभृति त्वयीन्द्रानुराग इत्यर्थः । न केवलमिन्द्रप्रेमैव किं तु सुमनःशरस्य कामस्याच्छिदुरो गुणोऽपि मौर्व्यपि चापे धनुषि परां द्वितीयां कोटिमटनिमारूढा । त्वद्यौवनमारभ्येन्द्रं पराभ-वितुं कामेन चापे गुणः समारोपीत्यर्थः । तदाप्रभृति कामेनेन्द्रः पीड्यत इति भावः[1] ॥

प्राचीं प्रयाते विरहादयं ते तापाच्च रूपाच्च शशाङ्कशङ्की ।
परापराधैर्निदधाति भानौ रुषारुणं लोचनवृन्दमिन्द्रः ॥ ६२ ॥

प्राचीमिति ॥ अयमिन्द्रः परापराधैश्चन्द्रापराधैर्लोचनवृन्दं नेत्रसमूहं रुषा क्रोधेन अरुणं रक्तं प्राचीं प्रयाते उदितमात्रे भानौ निदधाति निक्षिपति । किंभूतः—ते विरहा-द्धेतोः तापात्संतापजनकत्वात्, रूपाच्च रक्तवर्तुलस्वरूपत्वाच्च हेतोः भानावेव शशाङ्कशङ्की कृतचन्द्रशङ्कः सन् । स्वरूपाच्चन्द्रकार्यकारित्वाच्च ममापकारकश्चन्द्र एवायमिति बुद्ध्या चन्द्रा-पराधस्मरणात्त्वद्दिवि वर्तमानं सूर्यं क्रोधरक्तैरीक्षणैः पश्यतीत्यर्थः । अन्यापराधेनान्यस्मिन्रोप इत्याश्चर्यं च । चन्द्रस्त्वद्विरहात्तं पीडयतीति भावः । 'विरहं दधत्ते' इति च पाठः । ते विरहं दधदितीन्द्रविशेषणम्[2] ॥

त्रिनेत्रमात्रेण रुषा कृतं यत्तदेव योऽद्यापि न संवृणोति ।
न वेद रुष्टेऽद्य सहस्रनेत्रे गन्ता स कामः खलु कामवस्थाम् ॥ ६३ ॥

त्रिनेत्रेति ॥ त्रिनेत्र एव त्रिनेत्रमात्रं तेन नेत्रत्रयसहितेन हरेणैव रुषा क्रोधेन कृत्वा यत् अशरीरत्वरूपं दुःखं कृतं, यः कामस्तदेव अल(न)ल्पं दुःखमद्यापि एतावद्दिनपर्यन्तं न संवृणोति निश्चितं निस्तरति, स कामोऽद्य ईश्वरादधिके नेत्रसहस्रसहिते सहस्रनेत्रे महेन्द्रे रुष्टे क्रुद्धे सति कतमां कामवस्थां दशां गन्ता गमिष्यतीत्यहं न वेद न जाने । नेत्रत्रयस-हितेन हरेण भस्मसात्कृतः सहस्रनेत्रसहितेनेन्द्रेण कीदृशीमवस्थां नेष्यत इत्यहं न जाने

---

१ 'अत्रासंबन्धे संबन्धरूपातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्र सहोक्तिरुे-पतुल्ययोगितालंकारः' इति साहित्यविद्याधरी । ३ 'अत्र कविसंमतसादृश्येन भानौ शशाङ्कभ्रा-न्तिमानलंकारः' इति जीवातुः ।

त्यक्तम्, अतिथिदर्शने एतत्कर्तव्यमिति कृतमित्याशङ्क्याह—या नोऽस्माकं दूतता फलिना फलवती विधेया करणीया सैव पृथुर्महती आतिथेयी अतिथिपूजा उत् उच्चैस्तरां भवित्री भविष्यति । आसनादिपरित्यागस्तूपचार एव । स न कार्यः, किं तु यदर्थमागतोऽस्मि तत्सफलयेत्यर्थः । 'फलिता' इत्यपि पाठः । फलिनेति 'फलबर्हाभ्यामिनच्' अस्त्यर्थे ॥

कल्याणि कल्यानि तवाङ्गकानि कच्चित्तमां चित्तमनाविलं ते ।
अलं विलम्बेन गिरं मदीयामाकर्णयाकर्णतटायताक्षि ॥ ५७ ॥

कल्याणीति ॥ हे कल्याणि शोभनरूपे, तव अङ्गकानि कोमलान्यङ्गानि कल्यानि वर्तानि नीरोगाणि कच्चित्तमाम् । अतिशयेन नीरोगाणि किं कथयेत्यर्थः । ते चित्तं अनाविलं कालुष्यरहितं कच्चित्तमां विद्यते । विलम्बेनालम् । एतावानेव कुशलप्रश्नोऽस्तु, अन्यत्वनुपयुक्तम् । प्रकृतकार्यविरोधात् । प्रकृतमेवाह—हे आकर्णतटायताक्षि आकर्णपूर्णनयने भैमि, त्वं मदीयां वक्ष्यमाणां गिरमाकर्णय । 'निरामयः कल्यः' इत्यमरः । कच्चित्तमाम्, 'किमेत्तिङ्व्यय—' इत्यामुः ॥

श्लोकत्रयेण चतुर्णामपि साधारण्येन दूत्यं करोति—

कौमारमारभ्य गणा गुणानां हरन्ति ते[3] दिक्षु धृताधिपत्यान् ।
सुराधिराजं सलिलाधिपं च हुताशनं चार्यमनन्दनं च ॥ ५८ ॥

कौमारमिति ॥ हे भैमि, कौमारमारभ्य बाल्यादारभ्य ते गुणानां गणाः सौन्दर्यशीलत्वादयो दिक्षु धृतमाधिपत्यं यैस्तान्देवेन्द्रान्हरन्ति । तानेवाह—सुराधिराजमिन्द्रम्, सलिलाधिपं वरुणं च, हुताशनमग्निम्, अर्यम्णः सूर्यस्य नन्दनं पुत्रं यमं च । त्वद्गुणाकर्णनाच्चत्वारोऽपि त्वय्यनुरक्ता इत्यर्थः ॥

चरच्चिरं शैशवयौवनीयद्वैराज्यभाजि त्वयि[5] खेदमेति ।
तेषां रुचश्चौरतरेण चित्तं पञ्चेषुणा लुण्ठितधैर्यवित्तम् ॥ ५९ ॥

चरदिति ॥ शैशवं यौवनं (च) तत्संबन्धि शैशवयौवनीयं द्वैराज्यं भजते तस्या वयःसंधौ वर्तमानायां त्वयि चिरं चरत् तव शैशवमारभ्य चञ्चलमासक्तं सत् तेषां चित्तं खेदं दुःखमेति प्राप्नोति । किंभूतं चित्तम्—पञ्चेषुणा कामेन लुण्ठितं धैर्यमेव वित्तं यस्य । किंभूतेन कामेन—अतिपीडितत्वाद्रुचः शरीरकान्तेः चौरतरेण । विरहातुरस्याङ्गकान्तिर्हीना भवति । त्वय्यासक्तत्वाद्धैर्यापगमात्त्वद्विरहपीडाया असह्यत्वम् । अन्योऽपि राज्यद्वयमध्ये चिरं चरति, स धनुर्धरेण केनचिदपहृतधनो दुःखं प्राप्नोति । द्वैराज्य इति ष्यञि भावे ष्यञ् ॥

तेषामिदानीं किल केवलं सा हृदि त्वदाशा विलसत्यजस्रम् ।
आशास्तु नासाद्य तनूदरास्ताः पूर्वादयः पूर्वदात्तदाराः ॥ ६० ॥

---

१ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । २ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । ३ 'ते भैमि दिक्पालधीशान्' इति सुखावबोधा-साहित्यविद्याधरीसंमतः पाठः । ४ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । ५ 'त्वयि स्थितेऽव' इति सुखावबोधासाहित्यविद्याधरीसंमतः पाठः । ६ 'अन्योक्तिरलंकारः' इति साहित्यविद्याधरी । अत्र पञ्चेषुचौरेण तेषां धैर्यवित्तं हृतम्' इति रूपकम् । 'दंदुल्लालादेरस्य वाक्यार्थहेतुकं काव्यलिङ्ग-रूपकसंकरः' इति जीवातुः ।

तेषामिति ॥ किल निश्चये । इदानीं त्वत्तारुण्यदशासमये सा त्वदाशा त्वत्प्राप्तितृष्णा तेषां हृदि केवलं निश्चितं अजस्रं सर्वदा विलसति स्फुरति । उदारा महतीः सुन्दरीश्च तनूः शरीराण्यात्मसात्कृत्वा आत्मदाराः स्वीयाः स्त्रियः पूर्वादय आशा दिशस्तु पुनः पूर्ववन्न स्फुरन्ति । प्राच्यादीनां शरीरमपि म्रियते । त्वय्येवासक्तत्वात्सुन्दरीरपि दिशो यथा पूर्वं पालितवन्तः तथेदानीं नेति, एकया त्वदाशया भूयस्योऽप्याशाः परित्यक्ता इति च भावः । अन्योऽपि नवीनायां कस्यांचिदनुरक्तः सन् जीर्णशरीरां प्रथमां स्त्रियं त्यजति ॥

सामान्यतः सर्वेषां दूत्यं कृत्वेदानीं मुख्यत्वात्पूर्वमिन्द्रं स्तौति—

अनेन सार्धं तव यौवनेन कोटिं परामच्छिदुरोऽध्यरोहत् ।
प्रेमापि तन्वि त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ॥ ६१ ॥

अनेनेति ॥ हे भैमि, त्वयि विषये अच्छिदुरोऽतिदृढः अक्षीणो निर्मर्यादो वासवस्य प्रेमानुरागोऽप्यनेन प्रत्यक्षदृश्येन तव यौवनेन सार्धं सह परां कोटिं परमां काष्ठामध्यरोहत्प्राप । यथा तव यौवनमत्युत्कर्षं प्राप्तं, तथा त्वय्यनुरागोऽपीत्यर्थः । यदाप्रभृति तव यौवनप्रादुर्भाव-स्तदाप्रभृति त्वयीन्द्रानुराग इत्यर्थः । न केवलमिन्द्रप्रेमैव किं तु सुमनःशरस्य कामस्याच्छिदुरो गुणोऽपि मौर्व्यपि चापे धनुषि परां द्वितीयां कोटिमटनिमारूढा । त्वद्यौवनमारभ्येन्द्रं पराभ-वितुं कामेन चापे गुणः समारोपित इत्यर्थः । तदाप्रभृति कामेनेन्द्रः पीड्यत इति भावः[1] ॥

प्राचीं प्रयाते विरहाद्दयं ते तापाच्च रूपाच्च शशाङ्कशङ्की ।
परापराधैर्निदधाति भानौ रुषारुणं लोचनवृन्दमिन्द्रः ॥ ६२ ॥

प्राचीमिति ॥ अयमिन्द्रः परापराधैश्चन्द्रापराधैर्लोचनवृन्दं नेत्रसमूहं रुषा क्रोधेन अरुणं रक्तं प्राचीं प्रयाते उदितमात्रे भानौ निदधाति निक्षिपति । किंभूतः—ते विरहा-द्धेतोः तापात्संतापजनकत्वात्, रूपाच्च रक्तवर्तुलस्वरूपत्वाच्च हेतोः भानावेव शशाङ्कशङ्की कृतचन्द्रशङ्कः सन् । स्वरूपाच्चन्द्रकार्यकारित्वाच्च ममापकारकश्चन्द्र एवायमिति बुद्ध्या चन्द्रा-पराधस्मरणात्स्वदिशि वर्तमानं सूर्यं क्रोधरक्तैरीक्षणैः पश्यतीत्यर्थः । अन्यापराधेनान्यस्मिन्रोष इत्याश्चर्यं च । चन्द्रस्त्वद्विरहात्तं पीडयतीति भावः । 'विरहं दधत्ते' इति च पाठः । ते विरहं दधदितीन्द्रविशेषणम्[2] ॥

त्रिनेत्रमात्रेण रुषा कृतं यत्तदेव योऽद्यापि न संवृणोति ।
न वेद रुष्टेऽद्य सहस्रनेत्रे गन्ता स कामः खलु कामवस्थाम् ॥ ६३ ॥

त्रिनेत्रेति ॥ त्रिनेत्र एव त्रिनेत्रमात्रं तेन नेत्रत्रयसहितेन हरेणैव रुषा क्रोधेन कृत्वा यत् अशरीरत्वरूपं दुःखं कृतं, यः कामस्तदेव अल्प(न)त्वं दुःखमद्यापि एतावद्दिनपर्यन्तं न संवृणोति निश्चितं निस्तरति, स कामोऽद्य ईश्वरादधिके नेत्रसहस्रसहिते सहस्रनेत्रे महेन्द्रे रुष्टे क्रुद्धे सति कतमां कामवस्थां दशां गन्ता गमिष्यतीत्यहं न वेद न जाने । नेत्रत्रयस-हितेन हरेण भस्मसात्कृतः सहस्रनेत्रसहितेनेन्द्रेण कीदृशीमवस्थां नेष्यत इत्यहं न जाने

---

१ 'अत्रासंबन्धे संबन्धरूपातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्र सहोक्त्युपजीवितुल्ययोगितालंकारः' इति साहित्यविद्याधरी । ३ 'अत्र कविसंमतसादृश्येन भानौ शशाङ्कभ्रान्तिमानलंकारः' इति जीवातुः ।

त्यक्तम्, अतिथिदर्शने एतत्कर्तव्यमिति कृतमित्याशङ्क्याह—या नोऽस्माकं दूतता फलिना फलवती विधेया करणीया सैव पृथुर्महती आतिथेयी अतिथिपूजा उत् उच्चैस्तरां भवित्री भविष्यति । आसनादिपरित्यागस्तूपचार एव । स न कार्यः, किं तु यदर्थमागतोऽस्मि तत्सफलयेत्यर्थः । 'फलिता' इत्यपि पाठः । फलिनेति 'फलबर्हाभ्यामिनन्' अस्त्यर्थे ॥

कल्याणि कल्यानि तवाङ्गकानि कच्चित्तमां चित्तमनाविलं ते ।
अलं विलम्बेन गिरं मदीयामाकर्णयाकर्णतटायताक्षि ॥ ५७ ॥

कल्याणीति ॥ हे कल्याणि शोभनरूपे, तव अङ्गकानि कोमलान्यङ्गानि कल्यानि समर्थानि नीरोगाणि कच्चित्तमाम् । अतिशयेन नीरोगाणि किं कथयेत्यर्थः । ते चित्तं अनाविलं कालुष्यरहितं कच्चित्तमां विद्यते । विलम्बेनालम् । एतावानेव कुशलप्रश्नोऽस्तु, अन्यत्प्रश्नमयुक्तम् । प्रकृतकार्यविरोधात् । प्रकृतमेवाह—हे आकर्णतटायताक्षि आकर्णपूर्णनयने भैमि, त्वं मदीयां वक्ष्यमाणां गिरमाकर्णय । 'निरामयः कल्यः' इत्यमरः । कच्चित्तमाम्, 'किमेत्तिङव्यय-' इत्यामुः ॥

श्लोकत्रयेण चतुर्णामपि साधारण्येन दूत्यं करोति—

कौमारमारभ्य गणा गुणानां हरन्ति ते[३] दिक्षु धृताधिपत्यान् ।
सुराधिराजं सलिलाधिपं च हुताशनं चार्यमनन्दनं च ॥ ५८ ॥

कौमारमिति ॥ हे भैमि, कौमारमारभ्य बाल्यादारभ्य ते गुणानां गणाः सौन्दर्यशीलत्वादयो दिक्षु धृतमाधिपत्यं यैस्तान्देवेन्द्रान्हरन्ति । तानेवाह—सुराधिराजमिन्द्रम्, सलिलाधिपं वरुणं च, हुताशनमग्निम्, अर्यम्णः सूर्यस्य नन्दनं पुत्रं यमं च । त्वद्गुणाकर्णनाच्चत्वारोऽपि त्वय्यनुरक्ता इत्यर्थः ॥

चरच्चिरं शैशवयौवनीयद्वैराज्यभाजि त्वयि खेदमेति ।
तेषां रुचश्चौरतरेण चित्तं पञ्चेषुणा लुण्ठितधैर्यवित्तम् ॥ ५९ ॥

चरदिति ॥ शैशवं यौवनं (च) तत्संबन्धि शैशवयौवनीयं द्वैराज्यं भजते तस्या वयःसंधौ वर्तमानायां त्वयि चिरं चरत् तव शैशवमारभ्य चञ्चलमासक्तं सत् तेषां चित्तं खेदं दुःखमेति प्राप्नोति । किंभूतं चित्तम्—पञ्चेषुणा कामेन लुण्ठितं धैर्यमेव वित्तं यस्य । किंभूतेन कामेन—अतिपीडितत्वाद्रुचः शरीरकान्तेः चौरतरेण । विरहातुरस्याङ्गकान्तिर्हीना भवति । त्वय्यासक्तत्वाद्धैर्यापगमात्त्वद्विरहपीडाया असह्यत्वम् । अन्योऽपि राज्यद्वयमध्ये सीमायां चरति, स धनुर्धरेण केनचिदपहृतधनो दुःखं प्राप्नोति । द्वैराज्य इति टचि भावे ष्यञ् ॥

तेषामिदानीं किल केवलं सा हृदि त्वदाशा विलसत्यजस्रम् ।
आशास्तु नासाद्य तनूरुदाराः पूर्वादयः पूर्ववदात्मदाराः ॥ ६० ॥

---

१ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । २ 'अत्र च्छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । ३ 'ते भैमि दिशामधीशान्' इति सुखावबोधा-साहित्यविद्याधरीसंमतः पाठः । ४ 'अत्र च्छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । ५ 'त्वयि खिद्यतेऽद्य' इति सुखावबोधासाहित्यविद्याधरीसंमतः पाठः । ६ 'अन्योक्तिरलंकारः' इति साहित्यविद्याधरी । 'अत्र पञ्चेषुचौरेण तेषां धैर्यवित्तं हृतम्' इति रूपकम् । 'तद्धेतुत्वात्खेदस्य वाक्यार्थहेतुकं काव्यलिङ्गमलंकार संकरः' इति जीवातुः ।

तेषामिति ॥ किल निश्चये । इदानीं त्वत्ताकण्यदशासमये सा त्वदाशा त्वत्प्राप्तितृष्णा तेषां हृदि केवलं निश्चितं अजस्रं सर्वदा विलसति स्फुरति । उदारा महतीः सुन्दरीश्च तनूः शरीराण्यासाद्य कृत्वा आत्मदाराः स्वीयाः स्त्रियः पूर्वादय आशा दिशस्तु पुनः पूर्ववन्न स्फुरन्ति । प्राच्यादीनां शरीरमपि विद्यते । त्वय्येवासक्तत्वात्सुन्दरीरपि दिशो यथा पूर्वं पालितवन्तः तथेदानीं नेति, एकया त्वदाशया भूयस्योऽप्याशाः परित्यक्ता इति च भावः । अन्योऽपि नवीनायां कस्यांचिदनुरक्तः सन् जीर्णशरीरां प्रथमां स्वस्त्रियं त्यजति ॥

सामान्यतः सर्वेषां दूत्यं कृत्वेदानीं मुख्यत्वात्पूर्वमिन्द्रं स्तौति—

अनेन सार्धं तव यौवनेन कोटिं परामच्छिदुरोऽध्यरोहत् ।
प्रेमापि तन्वि त्वयि वासवस्य गुणोऽपि चापे सुमनःशरस्य ॥ ६१ ॥

अनेनेति ॥ हे भैमि, त्वयि विषये अच्छिदुरोऽतिदृढः अक्षीणो निर्मर्यादो वासवस्य प्रेमानुरागोऽप्यनेन प्रत्यक्षदृश्येन तव यौवनेन सार्धं सह परां कोटिं परमां काष्ठामध्यरोहत्प्राप । यथा तव यौवनमत्युत्कर्षं प्राप्तं, तथा त्वय्यनुरागोऽपीत्यर्थः । यदाप्रभृति तव यौवनप्रादुर्भावस्तदाप्रभृति त्वयीन्द्रानुराग इत्यर्थः । न केवलमिन्द्रप्रेमैव किं तु सुमनःशरस्य कामस्याच्छिदुरो गुणोऽपि मौर्व्यपि चापे धनुषि परां द्वितीयां कोटिमटनिमारूढा । त्वद्यौवनमारभ्येन्द्रं पराभवितुं कामेन चापे गुणः समारोपीत्यर्थः । तदाप्रभृति कामेनेन्द्रः पीड्यत इति भावः[1] ॥

प्राचीं प्रयाते विरहाद्यं ते तापाच्च रूपाच्च शशाङ्कशङ्की ।
परापराधैर्निदधाति भानौ रुपारुणं लोचनवृन्दमिन्द्रः ॥ ६२ ॥

प्राचीमिति ॥ अयमिन्द्रः परापराधैश्चन्द्रापराधैर्लोचनवृन्दं नेत्रसमूहं रुषा क्रोधेन अरुणं रक्तं प्राचीं प्रयाते उदितमात्रे भानौ निदधाति निक्षिपति । किंभूतः—ते विरहाद्धेतोः तापात्संतापजनकत्वात्, रूपाच्च रक्ततुल्यरूपत्वाच्च हेतोः भानावेव शशाङ्कशङ्की कृतचन्द्रशङ्कः सन् । स्वरूपाच्चन्द्रकार्यकारित्वाच्च ममापकारकश्चन्द्र एवायमिति बुद्ध्या चन्द्रापराधस्मरणात्स्वदिशि वर्तमानं सूर्यं क्रोधरक्तैरीक्षणैः पश्यतीत्यर्थः । अन्यापराधेनान्यस्मिन्रोष इत्याश्चर्यं च । चन्द्रस्त्वद्विरहात्तं पीडयतीति भावः । 'विरहं दधत्ते' इति च पाठः । ते विरहं दधदितीन्द्रविशेषणम्[2] ॥

त्रिनेत्रमात्रेण रुषा कृतं यत्तदेव योऽद्यापि न संवृणोति ।
न वेद रुष्टेऽद्य सहस्रनेत्रे गन्ता स कामः खलु कामवस्थाम् ॥ ६३ ॥

त्रिनेत्रेति ॥ त्रिनेत्र एव त्रिनेत्रमात्रं तेन नेत्रत्रयसहितेन हरेणैव रुषा क्रोधेन कृत्वा यदशरीरत्वरूपं दुःखं कृतं, यः कामस्तदेव अल(न)त्यं दुःखमद्यापि एतावद्दिनपर्यन्तं न संवृणोति निश्चितं निस्तरति, स कामोऽद्य ईश्वरादधिके नेत्रसहस्रसहिते सहस्रनेत्रे महेन्द्रे रुष्टे क्रुद्धे सति कतमां कामवस्थां दशां गन्ता गमिष्यतीत्यहं न वेद न जाने । नेत्रत्रयसहितेन हरेण भस्मीकृतः सहस्रनेत्रसहितेनेन्द्रेण कीदृशीमवस्थां नेष्यत इत्यहं न जाने

---

१ 'अत्रातंरन्ये संबन्धरूपातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्र सहोक्तिः तुल्ययोगितालंकारः' इति साहित्यविद्याधरी । ३ 'अत्र कोपेनेतरहस्तेन कामो दग्धस्तत्र भ्रान्तिमानलंकारः' इति जीवातुः ।

इत्यर्थः । कामस्तमतितरां पीडयतीति भावः । 'मात्रं कार्त्स्न्येऽवधारणे' इत्यमरः । वेद, 'विदो लटो वा' इति णल् ॥

इदानीं विभावानुभावव्यभिचारिभावानाह—

पिकस्य वाङ्मात्रकृताद्व्यलीकान्न स प्रभुर्नन्दति नन्दनेऽपि ।
बालस्य चूडाशशिनोऽपराधान्नाराधनं शीलति शूलिनोऽपि ॥ ६४ ॥

पिकस्येति ॥ स प्रभुः समर्थ इन्द्रः पिकस्य कोकिलस्य वागेव वाङ्मात्रं तेन कृतादुचिताद्व्यलीकादप्रियाद्वाग्रूपादप्रियाद्धेतोः नन्दने वनेऽपि न नन्दति आनन्दं न प्राप्नोति । नन्दयतीति नन्दनं तस्मिन्यदनन्दनं तदाश्चर्यमित्यर्थः । अन्योऽपि प्रभुर्वाङ्मात्रकृताद्विप्रियाभिमुखभाषणाद्धेतोर्नन्दने पुत्रेऽपि न नन्दति । तथा बालस्यैककलस्य चूडाशशिनः शिरश्चन्द्रस्यापराधात्तत्कृतात्पीडनाद्धेतोः शूलिनोऽपि सेवनीयस्य हरस्याप्याराधनं सेवां न शीलति न करोति । पूर्वं प्रत्यहमीश्वरसेवायै गच्छति, इदानीं तु त्वद्विरहाच्चन्द्रपीडाभयात्तत्सेवा परित्यक्तेत्यर्थः । अन्योऽपि तेजस्वी स्ववैरिपुरस्कारिणः शस्त्रपाणेरपि सेवां न करोति । त्वद्विरहाच्चन्द्रकलाकोकिलालापावतितरां तस्यासह्यौ जाताविति भावः । शीलति, 'शील समाधौ' इति भ्वादिः । दुःखदैन्यादयो व्यभिचारिभावाः स्वयमूह्याः ॥

तमोमयीकृत्य दिशः परागैः स्मरेषवः शक्रदृशां दिशन्ति ।
कुहूगिरश्चञ्चुपुटं द्विजस्य राकारजन्यामपि सत्यवाचम् ॥ ६५ ॥

तम इति ॥ स्मरेषवः पुष्परूपत्वात्परागैः कृत्वा दिशस्तमोमयीकृत्यान्धकारबहुलाः कृत्वा शक्रस्य दृशां नेत्राणां कुहूरिति स्वभावत एव गीर्यस्य कुहूगिरो द्विजस्य कोकिलस्य चञ्चुपुटं राकारजन्यामपि पूर्णिमारात्रावपि सत्यां वाग्यस्यैतादृशं दिशन्ति कथयन्ति । पूर्णचन्द्रां पूर्णिमामपि नष्टचन्द्रा कुहूरमावास्येयमिति कथयत्पिकचञ्चुपुटमिन्द्रं प्रति सत्यवचनं जातमित्यर्थः । त्वद्विरहादिन्द्रे मदनान्धो जात इति भावः । अन्योऽपि ब्राह्मणः कमप्यन्धं प्रति पूर्णिमाममावास्यां वदति, सोऽपि मूर्खत्वात्तद्वाचमन्यं प्रति सत्यां कथयति । 'पूर्णे राका निशाकरे' इत्यमरः । 'कुहूः स्यात्कोकिलालापनष्टेन्दुकलयोरपि' इति विश्वः । पुटशब्दः पुंलिङ्गोऽपि । वाचाचक्षुःश्रवन्तोऽपि [illegible] ॥

शरैः प्रसूनैस्तुदतः स्मरस्य स्मर्तुं स किं नाशनिना करोति ।
अभेद्यमस्याहह वर्म न स्यादनङ्गता चेद्गिरिशप्रसादः ॥ ६६ ॥

शरैरिति ॥ स इन्द्रः प्रसूनैः पुष्परूपैः शरैस्तुदतः पीडयतः स्मरस्य स्मर्तुं कामं स्मृतिविषयं कर्तुं अशनिना वज्रेण किं न करोति, अपितु मारयेदेव । अहह खेदे । यदि अस्य कामस्य गिरिशस्य हरस्य प्रसादोऽनङ्गतालक्षणमभेद्यं वर्म अच्छेद्यं कवचं न स्यात् । हरेणानङ्गतालक्षणो निग्रहोऽप्यनुग्रह एव कृतो यत्तल्लक्षणाद्धेतुमवयवस्य [illegible] मारयितुं न शक्यत इत्यर्थः । कामस्य [illegible], वधा [illegible] भवतीति भावः । स्मरस्य, 'अधीगर्थ—' इति कर्मणि षष्ठी ॥

---

१ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । २ 'अत्र हेतुसमासोक्त्यलंकारौ' इति साहित्यविद्याधरी । 'अत्रानन्द[illegible]विरोधोऽलंकारः' इति जीवातुः । ३ 'अत्र विरोध[illegible]संकरः' इति साहित्यविद्याधरी । '[illegible]अलंकारः' इति जीवातुः । ४ 'अत्र [illegible]अलंकारः' इति साहित्यविद्याधरी ।

धृताधृतेस्तस्य भवद्वियोगादन्यान्यशय्यारचनाय लूनैः ।
अप्यन्यदारिद्र्यहराः प्रवालैर्जाता दरिद्रास्तरवोऽमराणाम् ॥ ६७ ॥

धृतेति ॥ अमराणां देवानां तरवो मन्दारादयोऽन्येषां दारिद्र्यहरा दारिद्र्यनाशका अपि प्रवालैः पल्लवैर्दरिद्रा जाताः । किंभूतैः प्रवालैः—भवद्वियोगात्त्वद्विरहाद्धेतोः धृता अधृतिरधैर्यं येन तस्येन्द्रस्यातितप्तस्य अन्यान्याः प्रतिक्षणं नूतनाः शय्यास्तासां रचनाय निर्माणाय लूनैरवचितैः पल्लवरहिता जाता इत्यर्थः । अन्येषां नन्दनवृक्षाणां का कथा, येऽकल्पितस्यापि दाने समर्थास्ते स्वस्यार्थिनः शय्यार्थं पल्लवदानेऽप्यसमर्था जाता इत्यर्थः । अन्यदारिद्र्यहरस्यापि दारिद्र्यमाश्चर्यकारीत्यर्थः । त्वद्विरहेणात्यन्तं पीड्यत इति भावः । अन्यान्य इति वीप्सायां द्वित्वे पूर्वपदस्य न प्रथमैकवचनान्तत्वम् ॥

रवैर्गुणास्फालभवैः स्मरस्य स्वर्णाथकर्णौ बधिरावभूताम् ।
गुरोः शृणोतु स्मरमोहनिद्राप्रबोधदक्षाणि किमक्षराणि ॥ ६८ ॥

रवैरिति ॥ स्वर्णाथकर्णाविन्द्रकर्णौ स्मरस्य गुणास्फालनैर्मौर्वीस्फालनसंभूतै रवैर्धनुष्टंकारैः कृत्वा बधिरावभूताम् । एवंसति स इन्द्रो गुरोर्बृहस्पतेः स्मरमोहनिद्रा कामजन्यमूर्छालक्षणा, अज्ञानलक्षणा वा निद्रा तस्याः सकाशाद्यः प्रबोधो जागरणं तत्र दक्षाणि समर्थानि काममोहहराण्यक्षराण्युपदेशवचनानि बधिरत्वात्, मदनपीडितत्वाच्च किं कथं शृणोतु । किं उपालम्भे, आक्षेपे वा । स्वर्णाथ इति, 'पूर्वपदात्संज्ञायामगः' इति णत्वम् ॥

अनङ्गतापप्रशमाय तस्य कदर्थ्यमाना मुहुराम्मृणालम् ।
मधौमधौ नाकनदीनलिन्यो वरं वहन्तां शिशिरेऽनुरागम् ॥ ६९ ॥

अनङ्गेति ॥ नाकनदीनलिन्यः स्वर्नदीकमलिन्यः स्वशत्रुभूतेऽपि शिशिरे ऋतावनुरागं प्रीतिं वहन्तां धारयन्ताम् । एतद्वरम्, नतु वसन्ते । किंभूता नलिन्यः—तस्यास्येन्द्रस्य अनङ्गतापप्रशमाय कामजनितसंतापशान्तये मधौमधौ वसन्तेवसन्ते पुष्पाद्यारभ्य बिसमभिव्याप्य मुहुर्वारंवारं कदर्थ्यमानाः पीड्यमानाः । शिशिरतौ हिमेन पुष्पमात्रं नश्यति मूलभूतं मृणालं त्ववशिष्यते । वसन्ते तस्य कामज्वरशान्त्यर्थं मृणालमपि समुन्मूलनात् कालान्तरेऽप्युत्पत्त्यसंभवादात्यन्तिकविनाशप्रसङ्गादिति भावः । वसन्ते कामपीडा भूयसीति मतः । वहन्तां स्वरितेत्त्वात्तङ् ॥

दमस्वसः सेयमुपैति तृष्णा हरेर्जगत्यग्रिमलेख्यलक्ष्मीम् ।
दशां यदङ्घ्रिस्तव नाम दृष्टित्रिभागलोभार्तिमसौ बिभर्ति ॥ ७० ॥

दमस्वस इति ॥ हे दमस्वसः, सेयमतिप्रसिद्धा हरेरिन्द्रस्य तृष्णा जगति लोकत्रयमध्ये अग्रिमलेख्यस्यादिगणनीयवस्तुनो लक्ष्मीं शोभामुपैति प्राप्नोति । लोके कस्य तृष्णा महतीति प्रश्ने इन्द्रतृष्णा प्रथमं गणनीयेत्यर्थः । कुतः—यदसावद् दशानङ्घ्रिमान् सहस्रनेत्रः सन्नसमुद्रोऽप्यसाविन्द्रस्तव दृष्टेस्तृतीयो भागस्तस्य लोभोऽभिलाषस्तन्मात्रे पीडां बिभर्ति ।

---

१ 'दमार्द्रतृष्णा' इति जीवातुसंमतः पाठः । २ 'अत्रातिशयोक्तिविरोधालंकारः' इति साहित्यविद्याधरी । ३ 'यथानुरागातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी । ४ 'अत्रातिशयोक्तिकाव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । ५ 'बिभर्ति' इति पाठो जीवातुसुखावबोधासाहित्यविद्याधरीसंमतः ।

सहस्रनेत्रोऽप्यन्यदीयनेत्रस्य तृतीयमपि भागं प्राप्तुं चेद्वाञ्छति तर्हि तादृशो लोभवानन्यो नास्तीति तस्य तृष्णा प्रथमं गणनीयेत्यर्थः । त्वत्कटाक्षविक्षेपं वाञ्छतीति भावः । नाम अप्यर्थे, अहो इत्यर्थे वा । अग्रिम इति 'अग्रादिपश्चाड्डिमच्' । त्रिषु भागः 'सप्तमी' इति योगविभागात्समासे तृतीयो भाग इत्यर्थात् ॥

अग्न्याहिता नित्यमुपासते यां देदीप्यमानां तनुमष्टमूर्तेः ।
आशापतिस्ते दमयन्ति सोऽपि स्मरेण दासीभवितुं न्यदेशि ॥ ७१ ॥

अग्नीति ॥ हे दमयन्ति, स्मरेण सोऽप्याशापतिरग्निस्ते दासीभवितुं न्यदेशि त्वं भैम्या दासो भवेत्यादिष्ट आज्ञप्तः । स कः—अग्न्याहिता दीक्षिता देदीप्यमानां यामष्टमूर्तेरीश्वरस्य तनुं मूर्तिमग्निरूपां नित्यं सर्वदा उपासते सेवन्ते । स्मरहरमूर्तित्वात्स्वयमेव स्मरस्य दग्धत्वाच्च स्मरवैरित्वेऽपि स्मराज्ञाकारित्वमाश्चर्यरूपमित्यपिशब्दो द्योतयति । कामो वह्निमपि पीडयतीति भावः । अग्न्याहिताः, 'वाहिताग्न्यादिषु' इति परनिपातः ॥

त्वद्गोचरस्तं खलु पञ्चबाणः करोति संताप्य तथा विनीतम् ।
स्वयं यथा स्वादितताभूयः परं न संतापयिता स भूयः ॥ ७२ ॥

त्वद्गोचर इति ॥ खलु उत्प्रेक्षे, निश्चये वा । त्वद्गोचरस्त्वद्विषयः पञ्चबाणस्तं वह्निं संताप्यातितरां तापयित्वा पीडयित्वा तथा विनीतं भयात्त्यक्तोपद्रवं करोति । स्वयं तेन स्वादितमनुभूतं तप्तभूयं तप्तभावो येनैवंविधः सन् वह्निः परमन्यं पुनर्यथा न संतापयिता तस्य पीडानुभवादद्यप्रभृति मया कस्यापि संतापो न कार्य इति बुद्ध्या विनीतो जात इत्यर्थः । अन्यदपि लोहादि संताप्य विनीतं क्रियते । अन्योऽपि साधुः स्वेनानुभूतपीडः परं न पीडयति । मदनस्तमतितरां पीडयतीति भावः ॥

अदाहि यस्तेन दशार्धबाणः पुरा पुरारेर्नयनालयेन ।
[illegible] निर्दहंस्तं भवदक्षिवासी न वैरशुद्धेरधुनाधमर्णः ॥ ७३ ॥

अदाहीति ॥ पुरारेरस्य नयनमेवालयो यस्य एवंभूतेन तेन वह्निना पुरा पूर्वं यो दशार्धबाणः पञ्चबाणोऽदाहि दग्धः स [illegible] कदाचिदपि [illegible] अधिवासी नेत्रवासी सन् न [illegible] अधुना इदानीं [illegible] पीडयन् [illegible] अधमर्णो ऋणको न भवति । अन्यनयनालयस्यास्य [illegible] नयनालयेनैवात्मना [illegible] ऋणमुक्त इत्यर्थः । पुरुषं [illegible] वह्नेः [illegible], [illegible] कामो [illegible] महत्त्वमुक्तं सूचितम् । पूर्वोक्त एव भावः ॥

सोमाय कुप्यन्निव विप्रयुक्तः स सोममाचामति हूयमानम् ।
नामापि जागर्ति हि यत्र शत्रोस्तेजस्विनस्तं कतमे सहन्ते ॥ ७४ ॥

सोमायेति ॥ [illegible] वियोगी च स वह्निः सोमाय चन्द्राय कुप्यन्निव हूयमानं [illegible] सोमलतां [illegible] आचामति पिबति । ननु चन्द्रापराधे सोमलता किमिति भक्षिता-

---

१ 'अथ [illegible]' इति साहित्यविद्याधरी । २ 'अथ [illegible]' इति [illegible] । ३ '[illegible]' इति साहित्यविद्याधरी । ४ 'अथ [illegible] । [illegible] काव्यप्रकाशे—[illegible] । [illegible] इति [illegible]' इति साहित्यविद्याधरी ।

नित्याशङ्कायार्थान्तरन्यासेनापनुदति—हि यस्माद्यत्र जने शत्रोर्नाम अपि जागर्ति, कतमे के तेजस्विनस्तं जनं सहन्ते सोढुं शक्नुवन्ति अपि तु न कोऽपि। स्ववैरिचन्द्रस्य सोमनाम्न्यां लतायां नामसद्भावात्तेजस्विनाऽग्निना सा भक्षितेति युक्तमेव। चन्द्रस्तं पीडयतीति भावः। सोमाय 'क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' इति संप्रदानत्वे 'चतुर्थी संप्रदाने' इति चतुर्थी ॥

शरैरजस्रं कुसुमायुधस्य कदर्थ्यमानस्तरुणि त्वदर्थे ।
अभ्यर्चयद्भिर्विनिवेद्यमानादप्येष मन्ये कुसुमाद्बिभेति ॥ ७५ ॥

शरैरिति ॥ तरुणि, त्वदर्थे त्वत्कृते कुसुमायुधस्य शरैरजस्रं निरन्तरं कदर्थ्यमानः पीड्यमानः सन् स एष वह्निरभ्यर्चयद्भिः पूजकैः पूजार्थमेव विनिवेद्यमानादेकस्मादपि कुसुमाद्बिभेति मदनशरबुद्ध्या त्रस्यतीत्यहं मन्ये। 'एष देवः' इत्यपि पाठः। मदनेन वह्निः पीड्यत इति भावः ॥

स्मरेन्धने वक्षसि तेन दत्ता संवर्तिका शैवलवल्लिचित्रा ।
रराज चेतोभवपावकस्य धूमाविला कीलपरम्परेव ॥ ७६ ॥

स्मरेति ॥ तेन वह्निना स्मरस्येन्धने (नभूते) मदनानलस्य दह्यमानत्वात्काष्ठतुल्ये स्ववक्षसि दत्ता निहिता शैवलवल्ल्या कृत्वा चित्रवर्णा, आश्चर्यरूपा च संवर्तिका नवदलं (पद्मं) चेतोभवः कामस्तल्लक्षणस्य पावकस्याग्नेर्धूमाविला धूममिश्रिता कीलपरम्परेव ज्वालासमुदाय इव चकास्ति शोभते। मदनज्वरशान्त्यर्थं शैवालं नवदलं कमलं च वक्षसि निक्षिप्तम्। पिङ्गस्य कमलस्य हृदयोपरि विद्यमानत्वात्कामपावककीलत्वम्। शैवलस्य च श्यामत्वाद्धूमत्वम्। 'संवर्तिका नवदलम्' इत्यमरः। 'वह्नेर्द्वयोर्ज्वालकीलौ' इत्यमरवचनात्कीलशब्दः पुंलिङ्गोऽपि ॥

पुत्री सुहृद्येन सरोरुहाणां यत्प्रेयसी चन्दनवासिता दिक् ।
धैर्यं विभुः सोऽपि तयैव हेतोः स्मरप्रतापज्वलने जुहाव ॥ ७७ ॥

पुत्रीति ॥ विकासकारित्वात्सरोरुहाणां सुहृत् सूर्यो येन कृत्वा पुत्री पुत्रवान्, चन्दनेन वासिता परिमलाढ्या दिक् दक्षिणा यत्प्रेयसी यस्य प्रियतमा, सोऽपि यमलक्षणो विभुस्तयैव हेतोः स्मरप्रतापज्वलने कामजन्यसंतापरूपेऽनले धैर्यं जुहाव। कामज्वरवशाद्धैर्यं त्यक्तवानित्यर्थः। पितृमित्रत्वाच्छीतलानि कमलानि, प्रियायाश्चन्दना वशवर्तिनो यद्यपि, तथापि त्वद्विषयं यमस्य विरहदाहं शमयितुं न शक्नुवन्तीत्याश्चर्यम्। कुलं स्थानं च कथितम्। यमोऽपि त्वद्वशो जात इत्यर्थः। तयैव हेतोः, 'षष्ठी हेतुप्रयोगे' इति षष्ठी ॥

तं दह्यमानैरपि मन्मथैधं हस्तैरुपास्ते मलयः प्रवालैः ।
कृच्छ्रेऽप्यसौ नोज्झति तस्य सेवां सदा यदाशामवलम्बते यः ॥ ७८ ॥

तमिति ॥ मलयः पर्वतः जाज्वल्यमानत्वान्मदनस्य एधमिन्धनं तं यमं कामेन्धनत्वादे-

१ 'अर्थान्तरन्यासोत्प्रेक्षाक्षेपालंकारः' इति साहित्यविद्याधरी। २ 'त्वत्कारणाय' इति पाठो जीवातुसंमतः। ३ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। ४ 'अत्र छेकानुप्रासोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ५ 'अथ यमस्य विरहावस्थां वर्णयति—' इति जीवातुः। ६ 'अत्रापि 'यम' इति पदे वक्तव्ये 'पुत्री—' इत्यादिवाक्यम्। तेन नात्रौजोगुणः' इति साहित्यविद्याधरी।

वार्तिशयेन दह्यमानैर्ज्वल्यमानैरपि यदर्थमवचितैः प्रवालैः पल्लवरूपैस्तैः कृत्वा उपास्ते सेवते। युक्तमेतत्—यः सदा यदाशां यत्संबन्धिनीं तृष्णामवलम्बते धारयति। यो यदधीनजीविक इत्यर्थः। असौ स तस्य सेवया स्वस्य कृच्छ्रे कष्टे जायमानेऽपि तस्य सेवां नोज्झति न त्यजति। 'अदः परस्मिन्नत्रापि' इति वचनादसावित्यस्य स इत्यर्थः। अयमपि सदा यमदिशमवलम्बते ततो हस्तसंतापे सत्यपि सेवां चक्रे इत्युचितमित्यर्थः। अन्योऽप्यनुजीवी स्वामिनो दारिद्र्येऽपि सेवां करोति। एधशब्दोऽकारान्तोऽपि ॥

स्मरस्य कीर्त्येव सितीकृतानि तद्दोःप्रतापैरिव तापितानि।
अङ्गानि धत्ते स भवद्वियोगात्पाण्डूनि चण्डज्वरजर्जराणि ॥ ७९ ॥

स्मरस्येति ॥ स यमो भवत्या वियोगाद्धेतोरङ्गानि पाण्डूनि चण्डस्तीव्रो ज्वरस्तेन जर्जराणि, विशीर्णानि च धत्ते। तत्र हेतूत्प्रेक्षे यथाक्रमम्—किंभूतान्यङ्गानि—स्मरस्य कीर्त्या यशसा श्वेतीकृतानीव। तथा—तस्य कामस्य दोःप्रतापैः बाहुक्षत्रतेजोभिः तापितानीव। संतापितं हि जर्जरितं भवति। कामस्तमतितरां पीडयतीति भावः ॥

यस्तन्वि भर्ता घुसृणेन सायं दिशः समालम्भनकौतुकिन्याः।
तदा स चेतः प्रजिघाय तुभ्यं यदा गतो नैति निवृत्य पान्थः ॥ ८० ॥

य इति ॥ हे तन्वि कृशाङ्गि, यः सायं घुसृणेन कुङ्कुमेन समालम्भनेऽङ्गरागविषये कौतुकिन्याः सायंसंध्यानुरागयुक्ताया दिशः प्रतीच्या भर्ता वरुणः (समये) तदा चिरात्व्यतीपातादौ समये तुभ्यं त्वदर्थं चेतः प्रजिघाय प्राहिणोत्। यदा समये गतः पान्थो विवृत्य परावृत्य नैति नागच्छति। यदाप्रभृति तस्य मनस्त्वयि लग्नं, तदाप्रभृति व्याघुट्य तं प्रति न गतम्। सोऽपि त्वदधीनो जातोऽस्तीति भावः। प्रजिघाय, हिनोतेर्लिटि 'हेरचङि' इति कुत्वम् ॥

तथा न तापाय पयोनिधीनामश्वामुखोत्थः क्षुधितः शिखावान्।
निजः पतिः संप्रति वारिपोपि यथा हृदिस्थः स्मरतापदुःस्थः ॥ ८१ ॥

तथेति ॥ यतः स्मरदाहेन कामज्वरेण दुःस्थः पीडितः, अतो वारि पाति रक्षतीत्येवंविधोऽपि हृदिस्थः स्मरणगोचरः, अथ च मध्ये विद्यमानो निजः स्वीयः पतिर्वरुणः संप्रति त्वद्विपयविरहदशायां यथा येन प्रकारेण पयोनिधीनां संतापाय भवति तथा तेन प्रकारेण क्षुधितो बुभुक्षितो मध्ये विद्यमानः संनिहितो वारि पिबतीति वारिपः एवंभूतोऽपि अश्वामुखोत्थो वडवामुखोत्थः शिखावानग्निः पयोनिधीनां तापाय नाभूत्। वारिपत्वे हृदिस्थत्वे तुल्येऽपि कामदाहदुःस्थत्वाभावात्तथा न तापकारित्वमित्यर्थः। कामज्वरपीडितजलप्रविष्टवरुणसंस्पर्शात्पयोनिधयोऽपि संतप्तावभूवुरित्यतो हेतोर्वरुणोऽतितरां कामेन पीडित इति भावः। वडवानलादपि विरहानलोऽधिक इति भावः। अन्योऽपि साधुर्दासः पीडितं स्वामिनं स्मरन्संतप्यते। क्षुधितः 'वसतिक्षुधोरिट्' ॥

---

१ 'अत्र रूपकः श्लेषाविद्धोऽर्थान्तरन्यासश्चालंकारः' इति साहित्यविद्याधरी। २ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ३ 'अथ वरुणस्य विरहं वर्णयति—' इति जीवातुः। ४ 'अत्रापि वरुणपदे वक्तव्ये वाक्प्यन्। तेनात्रौजो गुणः' इति साहित्यविद्याधरी। ५ 'अत्रातिशयोक्तिभेदः' इति जीवातुः।

प्रस्थितान्स्वपतीन्दृष्ट्वा तत्पत्नीभिर्दुःखान्नासावायवो मुक्ता इति भावः । अन्योऽपि पान्थः पान्थैः सह प्रस्थानं करोति । चण्डवायुभिः सार्धमिलनेनाशकुनं सूचितम् ॥

अपास्तपाथेयसुधोपयोगैस्त्वच्चुम्बिनैव स्वमनोरथेन ।
क्षुधं च निर्वापयता तृषं च स्वादीयसाऽध्वा गमितः सुखं तैः ॥८७॥

अपास्तेति ॥ तैरिन्द्रादिभिस्त्वच्चुम्बिना त्वत्संबन्धिना स्वमनोरथेन भैमीं प्राप्स्याम इति स्वीयेनाभिलाषेणैव कृत्वा अध्वा मार्गः सुखमनायासेन गमितोऽतिवाहितः । किंभूतेन— स्वादीयसातिस्वादुना । अत एव–क्षुधं तृषं च निर्वापयता शमयता । अत एव अपास्तस्त्यक्तः पाथेयो मार्गशम्बलरूपः सुधोपयोगोऽमृतोपयोगो यैस्तैः । त्वयि निविष्टचित्तत्वात्क्षुधा तृषा च नाभूत्, अत एव मार्गशम्बलममृतमपि त्यक्तं, ततोऽप्यधिका तव प्राप्त्याशेत्यर्थः । सुखं प्रत्यागमने मनोलक्षणेन रथेन भुवमागताः । 'सुधोपभोगैः' इति पाठे उपभोगः साफल्यम- पास्तं यैः । पाथेयं, साध्वर्थे 'पथ्यतिथि–' इति ढञ् ॥

प्रिया मनोभूशरदावदाहे देवीस्त्वदर्थेन निमज्जयद्भिः ।
सुरेषु सारैः क्रियतेऽधुना तैः पादार्पणानुग्रहभूरियं भूः ॥ ८८ ॥

प्रिया इति ॥ तैः सुरेषु सारैः श्रेष्ठैरिन्द्रादिभिरधुना इयं भूः भूमिः पादानामर्पणं तदेवानुग्रहः कृपा तस्य भूः स्थानं क्रियते । किंभूतैः—प्रियाः स्त्रिय इन्द्राणीप्रमुखा देवी- स्त्वदर्थेन त्वत्कारणेन मनोभूशराः कामबाणास्त एव दावो वनवह्निस्तज्जनितदाहे निमज्ज- यद्भिः । कामपिडिताः कुर्वद्भिरित्यर्थः । इदानीं भूमौ वर्तन्त इत्यर्थः । तेषामत्रागमना- द्देवीनां विरहसंतापः ॥

अलंकृतासन्नमहीविभागैरयं जनस्तैरमरैर्भवत्याम् ।
अवापितो जङ्गमलेखलक्ष्मीं निक्षिप्य संदेशमयाक्षराणि ॥ ८९ ॥

अलमिति ॥ तैरमरैः भवत्यां त्वद्विषयेऽयं मल्लक्षणो जनः संदेशमयाक्षराणि निक्षिप्य जङ्गमलेखलक्ष्मीं चलत्पत्रिकाशोभामवापितः प्रापितः । किंभूतैः—अलंकृत आसन्नो मही विभागो यैः । समीपस्थितैस्तैस्त्वां प्रार्थयितुमहं प्रेषित इत्यर्थः । 'भवत्यै' इति वा पाठः ॥

एकैकमेते परिरभ्य पीनस्तनोपपीडं त्वयि संदिशन्ति ।
त्वं मूर्च्छतां नः स्मरभिल्लशल्यैर्मुदे विशल्यौषधिवल्लिरेधि ॥ ९० ॥

एकैकमिति ॥ हे भैमि, एते देवा एकैकं पृथक्पृथक् पीनस्तनयोरुपपीड्य संश्लिष्य तद्यथा (भवति) तथा, त्वत्पीनस्तनाभ्यामात्मानमुपपीड्य वा [परिरभ्य गाढमालिङ्ग्य] त्वयि इति संदिशन्ति । इति किम्—हे भैमि, त्वं स्मरभिल्लशल्यैः कामलक्षणपापर्धिकना-

१ 'अत्रानुप्राससहोक्त्यलंकारौ' इति साहित्यविद्याधरी । 'अत्र पवनामरप्रस्थानयोः कार्यकारण- भावात्तदङ्गलक्षणातिशयोक्त्युत्थापितः सहोक्त्यलंकारः' इति जीवातुः । २ 'त्वच्चुम्बिनैव स्वमनोरथेन स्वादीयसाऽस्त्वंगमितसुखेन । अपास्तपाथेयसुधोपयोगैरध्वा सुखस्तैरयमत्यवाहि' इति पाठः साहित्य- विद्याधरीसंमतः । ३ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । ४ 'देवी' इति पाठः साहित्यविद्याधरीसंमतः । ५ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । ६ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी । ७ 'प्रत्येकम्' इति पाठः । ८ 'त्वं नः प्रसूनाशुगवज्रघ- स्मरजुषान्' इति च पाठः सुखावबोधासाहित्यविद्याधरीसंमतः ।

रावैः कृत्वा मूर्च्छितां नोऽस्माकं मुदे प्रीतये शल्योद्धरणान्मूर्च्छापहाराय विशल्यानाम्नी ओषधिवाद्भिः एधि भव । त्वां विनास्माकं काममूर्च्छा न शाम्यतीत्यस्मान्प्रीणीष्वेति भावः । एकैकम्, वीप्सायां द्विः । स्तनोपपीडम्, 'सप्तम्यां चोपपीडरुधकर्षः' इति णमुलि 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति समासः । एधि 'घ्वसोरेद्धावभ्यासलोपश्च' इत्येत्वम् ॥

त्वत्कान्तिमस्माभिरयं पिपासन्मनोरथाश्वासनयैकयैव ।
निजः कटाक्षः खलु विप्रलभ्यः कियन्ति यावद्भण वासराणि ॥९१॥

त्वदिति ॥ त्वत्कान्तिं त्वत्सौन्दर्यं पिपासन्पातुमिच्छन् अयं निजः स्वीयः कटाक्ष एकया मुख्यया भैमीकान्तिमवश्यं वयं पाययामहे इत्येवंरूपया मनोरथाश्वासनया मनोराज्यजन्ययाश्वासनयैव सान्त्वनेनैव कृत्वा कियन्ति वासराणि यावत्कियद्दिनपर्यन्तं विप्रलभ्योऽस्माभिः प्रतारणीयः खलु निश्चितं भण कथय । पथि गच्छन्बालकादिरिदमुदकमिति प्रतारणं सहते, न तु द्वित्राणि दिनानि । तथा कटाक्षोऽपि । अस्मान्प्रीणीष्वेति भावः । अवधौ यावच्छब्दः । वासराणि, अत्यन्तसंयोगे द्वितीया ॥

निजे सृजास्मासु भुजे भजन्त्यावादित्यवर्गे परिवेषवेषम् ।
प्रसीद निर्वापय तापमङ्गैरनङ्गलीलालहरीतुषारैः ॥ ९२ ॥

निज इति ॥ हे भैमि, त्वं निजे स्वीये भुजे आदित्यवर्गे आदित्यप्रायसमूहेऽस्मासु परिवेषस्य वेष्टनस्य वेषमाकारं भजन्तौ सृज कुरु । अङ्कपालीं देहीति भावः । आदित्ये च परिवेषः परिधिर्युक्तः । तथा—अनङ्गलीलैव लहर्यस्ताभिस्तुषारैः शीतलैरङ्गैः कृत्वास्माकं तापं कामज्वरं निर्वापय शमय । प्रसीद प्रसन्ना भव । त्वदङ्गसंपर्कादस्माकं कामज्वरः शान्तिं प्रयास्यतीति भावः । शीतलेन तापशान्तिर्युक्ता । 'चार्वङ्गि निर्वापय' इति वा पाठः । 'अनुग्रहोऽस्मासु यदि त्वदीयस्तद्देहि देहि द्रुतमङ्कपालीम्' इति (पूर्वार्धे) पाठः क्वचित् । स स्पष्टार्थः । भुजाशब्द आबन्तोऽपि । 'परिवेषो रवेः पार्श्वमण्डले वेष्टने तथा' इत्यजयपालः ॥

दयस्व किं घातयसि त्वमस्माननङ्गचण्डालशरैरदयैः ।
भिन्ना वरं तीक्ष्णकटाक्षबाणैः प्रेमस्तव प्रेमरसात्पवित्रैः ॥ ९३ ॥

दयस्वेति ॥ हे भैमि, दयस्व त्वं दयां कुरु । अदयैरकारुणिकत्वैः अनङ्ग एव चण्डालस्तस्य शरैः प्रयोज्यैः प्रयोजिका त्वं अस्मान्किमिति घातयसि, अपितु नैवं तथा न कार्यम् । अन्योऽपि स्ववैरिणं चण्डालेनादयैर्बाणैर्मारयति । तर्हि किं कार्यमित्यत आह— वयं प्रेमरसात्प्रीतिरूपाद्रसात्पवित्रैः पूर्णैः पूतैश्च तव तीक्ष्णकटाक्षलक्षणैर्बाणैर्भिन्ना विदीर्णाः सन्तो यत् प्रेमः म्रियामहे प्राणांस्त्यक्ष्यामः तद् वरं मनाक्प्रियमिष्टम् । चण्डालबाण(प्रयोज्य)मरणमपेक्ष्य तव पवित्रकटाक्षलक्षणैर्बाणैर्मरणं श्रेष्ठमित्यर्थः । कटाक्षैरस्मान्पश्य । तृप्तिर्भवेदिति भावः । रसादुदकात्पवित्रत्वं युक्तम् । प्रेमः, प्रवृत्तिरिति मरणवाचिनो [illegible] ॥

१ 'भिव इति सकारलोपः' इति जीवातुः । [illegible] इति साहित्यविद्याधरी । २ 'दिनानि' इति सुखावबोधासंमतः पाठः । ३ 'अत्र काकोक्त्यलंकारः' इति साहित्यविद्याधरी । ४ 'निजे भुजे त्वं परिवेषमादित्यसमवर्गे [illegible]' इति [illegible] इति सुखावबोधा । ५ 'अत्र [illegible]लंकारः' इति साहित्यविद्याधरी । ६ 'दयस्व मे [illegible]' इति जीवातुपाठः । ७ 'अत्र [illegible]लंकारौ' इति साहित्यविद्याधरी ।

त्वदर्थिनः सन्तु परस्सहस्राः प्राणास्तु नस्त्वच्चरणप्रसादः ।
विशङ्कसे कैतवनर्तितं चेदन्तश्चरः पञ्चशरः प्रमाणम् ॥ ९४ ॥

त्वदर्थिन इति ॥ परस्सहस्रा बहवस्त्वदर्थिनस्त्वदभिलाषुकाः सन्तु, नोऽस्माकं प्राणास्तु पुनस्त्वच्चरणयोः प्रसादः । त्वच्चरणौ चेत्प्रसन्नौ भवतस्तर्ह्येव नः प्राणनं, नान्यथेत्यर्थः । इदं कैतवनर्तितमलीकभाषितमिति चेत् विशङ्कसे मन्यसे तर्ह्यन्तश्चरोऽन्तर्वर्ती पञ्चशरः कामः प्रमाणमत्र साक्षी । त्वन्निमित्तमस्माकं कियती पीडा भवतीति काम एव त्वया पृच्छयताम् । वयं चेन्मिथ्याभाषिण इत्यर्थः । कामोऽन्तर्वर्तित्वात्सर्वं वेत्ति । कूटसाक्ष्यं करोतीत्यर्थः । अतो वयमेवानुग्राह्या नान्य इति भावः । परस्सहस्राः परश्शता इतिवत् ॥

अस्माकमध्यासितमेतदन्तस्त्वावद्भवत्या हृदयं चिराय ।
बहिस्त्वयालंक्रियतामिदानीमुरो मुरं विद्विषतः श्रियेव ॥ ९५ ॥

अस्माकमिति ॥ हे भैमि, भवत्या अस्माकमेतद्धृदयमन्तः आन्तरदेशे तावत् पुनः चिरायाध्यासितमधिष्ठितम् । चिरकालं चित्तमध्ये धृतासीत्यर्थः । परमिदानीं तद् उरः त्वया बहिर्देशेऽप्यलंक्रियताम् । आलिङ्ग्यतामित्यर्थः । कया कस्येव—श्रिया मुरं विद्विषतो विष्णोरिव । 'द्विषः शतुर्वा' इति मुरमिति द्वितीया ॥

दयोदयश्चेतसि चेत्तवाभूदलंकुरु द्यां विफलो विलम्बः ।
भुवः स्वरादेशमथाचरामो भूमौ धृतिं यासि यदि स्वभूमौ ॥ ९६ ॥

दयोदय इति ॥ तव चेतसि अस्माकमुपरि दयाया उदयश्चेदभूदुद्भूत् तर्हि त्वं द्यां स्वर्गमलंकुरु । विलम्बो विफलः । न कर्तव्य इत्यर्थः । अथ यदि स्वस्य भूमावुत्पत्तिस्थाने भूमौ भूलोके धृतिं प्रीतिं यासि प्राप्नोषि तर्हि वयं भुवो भूलोकस्य स्वरादेशं स्वर्गसंज्ञामाचरामः कुर्मः । यत्र वयं स एव स्वर्गः । सर्वेऽप्यागत्य स्वर्गभोगानत्रैव कुर्म इति भावः । 'क्षमामेव देवालयतां नयामो भूमौ रतिश्चेत्तव जन्मभूमौ' इति च पाठः ॥

धिनोति नास्माञ्जलजेन पूजा त्वयान्वहं तन्वि वितन्यमाना ।
तव प्रसादोपनते तु मौलौ पूजास्तु नस्त्वत्पदपङ्कजाभ्याम् ॥ ९७ ॥

धिनोतीति ॥ हे तन्वि, त्वया अन्वहं प्रत्यहं जलजेन वितन्यमाना क्रियमाणा पूजा अस्मान्न धिनोति न प्रीणयति । किंतु तव प्रसादाय प्रीतिकलहे प्रसन्नत्वाय नमस्कारकरणवशादुपनते नम्रे नोऽस्माकं मौलौ शिरसि त्वत्पदपङ्कजाभ्यां चरणाघातवशात्त्वच्चरणकमलाभ्यां तु पूजास्तु । कमलपूजापेक्षया त्वच्चरणकमलयोरुत्कृष्टत्वात्साऽस्माकं सुखायालं, न कमलपूजा । त्वच्चरणाघातेन वयं यथा सुखिनो भवामः तथा कुर्विति भावः ॥

---

१ 'नार्चितम्' इति सुखावबोधासाहित्यविद्याधरीस्थपाठः । २ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।

३—'अस्माकमस्लानमदनापमृत्योस्त्राणाय पीयूषरसायनानि ।
सुधारसादप्यधिकं प्रयच्छ प्रसीद वैदर्भि निजाधरं नः ॥'

इति (१०४) श्लोकोऽपि क्वचिन्मूलेऽस्मात्प्राक् पठित उपलभ्यते । ४ 'अत्रानुप्रासोपमालंकारः' इति साहित्यविद्याधरी । ५ 'अत्रानुप्रासकाव्यलिङ्गालंकारः' इति साहित्यविद्याधरी । ६ 'तव प्रसादाय नते तु' इति जीवातुस्थपाठः । ७ 'अत्रातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी ।

तस्या वाप्याः पन्था गमनमार्गः तस्मिन्न शर्करा कर्परांशरूपैव शर्कराख्य इक्षुविकारः किम् । कर्परांशनामसाम्याच्छर्करेति नाम जातं माधुर्यं च । पथि शर्करा भवन्ति । तस्या वाण्या भङ्गिर्वक्रोक्त्यादिरचना तज्जनितः शृङ्गारादिरसस्तस्मात्, अथ च तल्लक्षणादुदकात् उत्थमुत्थितं यत्कच्छतृणं जलप्रायप्रदेशतृणं तदेव दिक्षु इक्षुरिति प्रथितं नु । कच्छतृणस्य च इक्षुरिति संज्ञा । तद्रससंबन्धान्माधुर्यं जातं किमित्यर्थः । खण्डादिभ्योऽप्यधिकं त्वद्वाणी मधुरतरेति भावः । 'शर्करा खण्डविकृतावुपलाकर्परांशयोः' इति विश्वः ॥

ददाम किं ते सुधयाऽधरेण त्वदास्य एव स्वयमास्यते हि[२] ।
चन्द्रं विजित्य स्वयमेव भावि त्वदाननं तन्मखभागभोजि ॥ १०२ ॥

ददामेति ॥ हे भैमि, वयं ते तुभ्यं किं ददाम । अपितु त्वद्दानयोग्यं वस्तु किमपि न विद्यत इत्यर्थः । अमृतामरत्वयज्ञभागेषु मध्ये एकं देयमित्याशङ्क्याह—अधरेण सुधया ओष्ठलक्षणेनामृतेन त्वदास्य एव स्वयं हि यस्मादास्यते स्थीयते । ओष्ठेन त्वन्मुखे सुधीभूयैव स्थीयते यत इति वा । यतश्च त्वदाननं चन्द्रं विधुं विजित्य स्वयमेव तस्य चन्द्रस्य मखभागभोजि यज्ञभागग्राहि भावि भविष्यति । तत्तदपि न देयमित्यर्थः । अमृतयज्ञभागदानद्वारोपकर्तुं न शक्नुम इत्यर्थः । सुधाचन्द्राभ्यां राकाशात्त्वदोष्ठमुखमधिकमिति भावः ॥

अमरत्वमपि दातुमशक्यमित्याह—

प्रिये वृणीष्वामरभावमस्मदिति त्रपाकृद्वचनं न किं नः ।
त्वत्पादपद्मे शरणं प्रविश्य स्वयं वयं येन जिजीविषामः ॥ १०३ ॥

प्रिय इति ॥ नोऽस्माकं वचनमस्माकमेव त्रपाकृल्लज्जावहं किं न, अपितु लज्जावहमेव । इति किम्—हे प्रिये, त्वमस्मत्सकाशादमरभावमविनाशत्वं वृणीष्वेति । येन कारणेन वयं त्वत्पादपद्मे (द्वितीयाद्विवचनम्) शरणं प्रविश्य तल्लक्षणमेव रक्षितारं प्राप्य स्वयं आत्मनैव जिजीविषामः जीवितुमिच्छामः । स्वयं तीर्णो हि परांस्तारयति न त्वतीर्णः । त्वच्चरणशरणेनैव जीवतामस्माकं तुभ्यममरत्वं दातुं का शक्तिः । अत एव पूर्वोक्तं वचनं लज्जावहमेवेत्यर्थः । अत एव नत्वोपकर्तुमसमर्थानस्मान् दया विधाय वृणीष्वेति भावः ॥

नास्माकमस्मान्मदनापमृत्योस्त्राणाय पीयूषरसायनानि ।
प्रसीद तस्मादधिकं निजं तु प्रयच्छ पातुं रदनच्छदं नः ॥ १०४ ॥

नेति । अस्मत्पीयूषरसायनानि अस्मान्मदनलक्षणात्, तज्जनिताद्वा अपमृत्योः सकाशादस्माकं त्राणाय न भवन्ति, तस्मात्प्रसीद अस्माकमुपरि प्रसन्ना भव । तस्मादधिकम- मृतरसायनेभ्योऽप्यधिकतरं स्वादुम्, अधिकसामर्थ्यं वा निजं स्वीयं रदनच्छदमोष्ठं तु पुनः पातुं नोऽस्मभ्यं प्रयच्छ देहि । अनेन मदनापमृत्युः शान्तिं प्राप्स्यतीति भावः । सामान्यपी- यूषं यस्यापमृत्युशान्त्यै न प्रभवति तत्र तदधिकबलाढ्यमौषधं दीयते तेनापमृत्युः शाम्यति

---

१ '[illegible]' इति साहित्यविद्याधरी । २ 'यतः' इति जीवातुसंमतः पाठः । ३ '[illegible]' इति जीवातुसंमतः पाठः । ४ 'अत्र [illegible]' इति साहित्यविद्याधरी । ५ '[illegible]' इति जीवातुः पाठः । ६ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

तद्वदस्माकम् । '–रसोऽपि नास्तौ' इति पाठे तस्मादस्मादित्यर्थः । अर्थाच्च यत्तदौ । अपमृत्योः, 'मीत्रा–' इत्यपादानत्वम् ॥

प्लुष्टः स्वैश्चापरोपैः सह स हि मकरेणात्मभूः केतुनाऽभू-
द्धत्तां नस्त्वत्प्रसादादथ मनसिजतां मानसो नन्दनः सन् ।
भ्रूभ्यां ते तन्वि धन्वी भवतु तव सितैर्जैत्रभल्लः स्मितैः स्ता-
दस्तु त्वन्नेत्रचञ्चत्तरशफरयुगाधीनमीनध्वजाङ्कः ॥ १०५ ॥

प्लुष्ट इति ॥ य आत्मभूः कामः स्वैश्चापरोपैर्धनुर्बाणैर्मकरेण मीनरूपेण केतुना ध्वजेनापि सह प्लुष्टो दग्धोऽभूत् स कामः, अथानन्तरम् । इदानीमिति यावत् । त्वत्प्रसादात् नोऽस्माकं मानसो मनःसंबन्धी नन्दनो हर्षकः, अथ च मानसः पुत्रः सन् मनसि जायतेऽसौ मनसिजस्तद्भावं धत्तां धारयतु । 'तव संगमवशादानन्दकः कामोऽस्मन्मनसि पुनरुत्पद्यताम् । अत एव मनसिजत्वमपि धारयत्वित्यर्थः । हे तन्वि, स कामस्ते भ्रूभ्यां धन्वी भवतु । भ्रूभ्यामिति द्विवचनेन पूर्वापेक्षया चापद्वयं सूचितम् । तव सितैः श्वेतैस्तीक्ष्णैश्च स्मितैः कृत्वा जेतार एव जैत्रा एवंभूता भल्ला बाणशल्यानि यस्य एवंविधः स्याद्भवतु । अत्रापि पूर्वापेक्षयाऽधिकं तीक्ष्णत्वं जैत्रत्वं अनियतसंख्यत्वं च सूचितम् । तव नेत्रे एव चञ्चत्तरं अतिशयेन शोभमानं चपलतरं वा शफरयुगं तस्य अधीनो मीनध्वजलक्षणोऽङ्कः चिह्नं यस्य एवंभूतोऽस्तु । पूर्वमेक एव ध्वजोऽभूत्, इदानीं तु द्वौ मीनध्वजाविति शफरयुगपदेन सूचितम् । त्वयाऽलंकरणे कृते सति पूर्वापेक्षयाऽधिकसामर्थ्यः साक्षी मदनः पुनरुत्पत्स्यते तस्मादस्मान्वृणीष्वेति भावः । अन्योऽपि विनष्टो देवताप्रसादात्पुनरुत्पत्तावधिकशक्तिश्च भवति । 'नन्दनो हर्षके सुते' इति विश्वः । धन्वी व्रीह्यादिः[2] ॥

स्वप्नेन प्रापितायाः प्रतिरजनि तव श्रीषु मग्नः कटाक्षः
श्रोत्रे गीतामृताब्धौ त्वगपि ननु तनूमञ्जरीसौकुमार्ये ।
नासा श्वासाधिवासेऽधरमधुनि रसज्ञा चरित्रेषु चित्तं
तन्नस्तन्वङ्गि कैश्चिन्न करणहरिणैर्वागुरा लङ्घितासि ॥ १०६ ॥

स्वप्नेति ॥ ननु यस्मात्त्वं बुद्धौ वा, नः अस्माकं कटाक्षः प्रतिरजनि रजन्यां रजन्यां स्वप्नेन प्रापिताया विषयीकृतायास्तव श्रीषु शोभासु यस्मान्मग्नः । तथा यस्मात् नः श्रोत्रे कर्णौ गीतामृताब्धौ गानरूपसुधासमुद्रे मग्ने । यस्माच्च नस्त्वगपि सुकुमारत्वात् तनूमञ्जरी शरीररूपा मञ्जरी तस्याः सौकुमार्ये मग्ना । यस्माच्च नः नासा तव श्वासाधिवासे निःश्वासरूपे गन्धमाल्यादिपरिमले मग्ना । यस्माच्च नः रसज्ञा जिह्वा अधररूपेऽधरसंबन्धिनि वाऽमृते निमग्ना । यस्माच्च नः चित्तं तव चरित्रेषु विलासादिसर्वव्यापारेषु मग्नम् । तत्तस्मात् हे तन्वङ्गि कृशाङ्गि, नोऽस्माकं कैश्चिदपि करणहरिणैरिन्द्रियरूपैर्मृगैर्वागुरा मृगबन्धनरज्जुः न लङ्घितासि नातिक्रान्तासि । वागुरातुल्यया त्वया बद्धानि चक्षुरादीनि षडिन्द्रियाणि त्वद्रूपं स्वं स्वं विषयं प्राप्य स्थानान्तरं गन्तुं न शक्नुवन्तीत्यर्थः । अनेनऽन्यकामिन्या न [illegible]

---

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्र [illegible] अलंकारः स्फुट एव' इति साहित्यविद्याधरी । ३ '[illegible]' इति पाठः 'न लङ्घिता न [illegible]' इति जीवातुसंमतः ।

वृणीष्वेति भावः। देवानामस्वप्नत्वेऽपि स्वानुभवसिद्धत्वेनैव दूतेनैवमुक्तम्। प्रतिरजनि स्वप्नेन प्रापिताया इत्यनौचिती नाशङ्कनीया। यद्वा विरहवशात्प्रतिकूला रजनी रात्रिर्यस्यास्तादृशी भैमी स्वप्न इव स्वप्नो विपर्ययज्ञानम्। उन्मादावस्थेति यावत्। तया प्रापितायाः सर्वत्र दृश्यमानायास्तवेति व्याख्येयम्। रजन्या हरिद्रायाः प्रतिकूला। यद्वा प्रतिकूला रजनी यस्याः गौरत्वातिशयेन जितहरिद्रे भैमीति वा। वागुरापि मृगैर्लङ्घितुं न शक्यते। प्रतिरजनि, वीप्सायामव्ययीभावः। पक्षे समासान्तविधेरनित्यत्वात्कबभावः। कैश्चिच्छन्दादपिशब्दो द्रष्टव्यः। तन्वङ्गी 'अङ्गगात्र—' इति ङीप्॥

इति धृतसुरसार्थवाचिकस्रङ्जिरसनातलपत्त्रहारकस्य।
सफलय मम दूततां वृणीष्व स्वयमवधार्य दिगीशमेकमेषु॥ १०७॥

इतीति॥ हे भैमि, त्वं मम दूततां सफलय कृतार्थीकुरु। एषु इन्द्रादिषु मध्ये एकं दिगीशं स्वयमवधार्य विचार्य न तु सखीभिः सार्धमित्यर्थः। यस्मिन्ननुरागस्तं वृणीष्व। कस्यचिदेकस्य वरणान्मम दूत्यसाफल्यं कुर्वित्यर्थः। किंभूतस्य मम—इति पूर्वोक्तप्रकारेण धृता सुरसार्थानामिन्द्रादिदेवसङ्घानां वाचिकस्रक् संदेशवचनपरम्परा येनैवंविधं निजं स्वीयं रसनातलं जिह्वास्वरूपं तद्रूपं यत् पत्रं तस्य हारक आनायकस्तस्य। अन्योऽपि लेखपत्रानायकस्य दूतस्य दूत्यं सफलयति॥

आनन्दयेन्द्रमथ मन्मथमन्नमर्मि केलीभिरुद्धर तनूदरि नूतनाभिः।
आसादयोदितदयं शमने मनो वा नो वा यदीत्थमथ तद्वरुणं वृणीथाः १०८

आनन्दयेति॥ हे तनूदरि भैमि, त्वं वरणेनेन्द्रमानन्दय। अथवा नूतनाभिर्नवनवाभिः केलीभिः सुरतक्रीडाभिः मन्मथमग्नं मदनजनितपीडामग्नमर्मि कामपीडायाः सकाशादुद्धर पृथक्कुरु। प्रवाहादिमग्नमन्यदपि नूतनकलत्र्यादिभिरुद्ध्रियते। वा अथवा शमने यमे मन उदिता दया यस्यैवंविधं सकृपमासादय कुरु। वा अथवा यदि इत्थम् एवं नो इन्द्रादिवरणं न क्रियते अथ तर्हि वरुणं वृणीथाः वृणीष्व। चतुर्णां मध्ये यस्य कस्यापि वरणान्मम दूत्यं सफलयेति भावः॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तस्यागादयमष्टमः कविकुलादृष्टाध्वपान्थे महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥ १०९॥

श्रीहर्षमिति॥ किंभूते महाकाव्ये—कविकुलेन कालिदासादिमहाकविसमूहेन अदृष्टोऽध्वा प्रमेयमार्गस्तस्य पान्थे नित्यं पथिके। अपूर्वप्रमेयपरिपुष्टे काव्येऽयमष्टमः सर्गः समगात्समाप्तिं प्रातः॥

इति श्रीवेदरकरोपनामकश्रीनरसिंहपण्डितात्मजनारायणकृते
नैषधीयप्रकाशेऽष्टमः सर्गः॥

---

१ 'अत्र छेकानुप्रास[illegible]लंकाराः। [illegible]वृत्तम्' इति साहित्यविद्याधरी। 'अत्र [illegible] [illegible]' इति जीवातुः। २ 'अत्र रूपकालंकारः। पुष्पिताग्रा वृत्तम्' इति साहित्यविद्याधरी।

नुयोगे प्रश्ने उत्तरादानाददृश्यमाना गुप्ता, क्वचित् कुत आगतोऽसीति मम प्रश्ने ईक्षिता उत्तरदानात्प्रकटा। कुलनामप्रश्नस्याप्युत्तरं प्रयच्छतीति भावः। 'सरस्वती नदीभेदे गोवाग्देवतयोरपि' इति विश्वः ॥

गिरः श्रुता एव तव श्रवःसुधाः श्लथा भवन्नाम्नि तु न श्रुतिस्पृहा।
पिपासुता शान्तिमुपैति वारिजा न जातु दुग्धान्मधुनोऽधिकादपि॥५॥

गिर इति ॥ अतिमधुरत्वात् श्रवसोः कर्णयोः सुधा अमृतरूपास्तव गिरः श्रुता एव यद्यपि श्रुतास्तथापि तु पुनस्तव नाम्नि विषये श्रुतिस्पृहा श्रवणेच्छा न श्लथा शान्ता नाभूत्। अतस्तदपि कथयेति भावः। अतिमधुरवाणीसमाकर्णने कथं न शान्तेत्याशङ्कायां हेतुमाह—वारिजा उदकसंबन्धिनी पिपासुता पानेच्छा अधिकादुदकापेक्षयाऽतिमधुराद्दुग्धान्मधुनोऽपि जातु कदाचिदपि शान्तिं नोपैतीत्याभाणकः। तस्माद्युक्तमेतदित्यर्थः। अधिकादपि जलापेक्षया बहुपीतादपि दुग्धान्मधुनो वेति वा दुग्धापेक्षयाऽधिकान्मधुनोऽपीति वा। दुग्धान्न शाम्यति, नापि मधुनः, अधिकादप्यमृतादपि न शाम्यतीति वा। दुग्धमधुभ्यामधिकादमृतादपि न शाम्यति। अतिबहु किं वक्तव्यम् ॥

बिभर्ति वंशः कतमस्तमोपहं भवादृशं नायकरत्नमीदृशम्।
तमन्यसामान्यधियावमानितं त्वया महान्तं बहु मन्तुमुत्सहे ॥ ६ ॥

विभर्तीति ॥ सूर्यादिवंशमध्ये कतमो वंशः भवादृशमीदृशं हस्ताद्यभिनयनमात्रेण वर्णयितुं शक्यं न त्ववयववत्, तम ईश्वरगुणस्तदपहन्ति तिरस्करोति क्रोधरहितमज्ञानविनाशिनं, शोकापनुदं वा, नायकरत्नं बिभर्ति। यस्मिंस्त्वमुत्पन्नः स कतमो वंश इति प्रश्नः। अन्यसामान्यधियान्यवंशतुल्यत्वबुद्ध्यावमानितं तिरस्कृतमेवंगुणविशिष्टेन त्वया कृत्वा महान्तमत्युत्तमं तं वंशं बहु अतितरां मन्तुं संमानयितुमुत्सहे उत्साहवत्यस्मि। अनन्यतुल्यत्वेन पूजयितुमिच्छामि। वंशं कथयेति भावः। अथ च—स्वतेजसा तमःस्तोमनिराकरणसमर्थं लोकोत्तरं हारमध्ययोग्यं रत्नं (यो) वंशो धारयति तं वंशमन्यतुल्यत्वबुद्ध्या प्रथमं तिरस्करोति, पश्चात्तद्रत्नं दृष्ट्वा तस्य वेणोर्भूयान्मानः क्रियते तद्वत्। वेणोरपि रत्नोत्पत्तिरुक्ता। 'तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तरे,' 'नायको नेतरि श्रेष्ठे हारमध्यमणावपि' इति विश्वः। 'रत्नं स्वजातिश्रेष्ठेऽपि' इत्यमरः। तमोपहम्, 'अपे क्लेशतमसोः' इति डः ॥

इतीरयित्वा विरतां स तां पुनर्गिरानुजग्राहतरां नराधिपः।
विलम्ब्य विश्रान्तवतीं तपात्यये घनाघनश्चातकमण्डलीमिव ॥ ७ ॥

इतीति ॥ स नराधिपो नल इति पूर्वोक्तमीरयित्वोक्त्वा विरतां विश्रान्तां तां भैमीं गिरा वाचा पुनरनुजग्राहतरामतिशयेनानुगृहीतवान्। उवाचेत्यर्थः। तां प्रति तस्य वचनमनवचनमेवानुग्रहः। कः कामिव—तपात्यये ग्रीष्मान्ते प्रावृषि घनाघनो वर्षुको मेघः चातकमण्ड-

---

१ 'अत्र [illegible]' इति जीवातुः। २ 'भवतो नाम्नि मनागपि केषांचिदास्थानं 'तु' इति [illegible] नाडीरनन्तरम्' इति। सुखावबोधाकारस्तु 'अत्र [illegible]' इति चेत्। ३ 'अत्र [illegible]' इति साहित्यविद्याधरी। 'दृष्टान्तोऽलंकारः' इति जीवातुः। ४ 'अत्र श्लेषोऽलंकारः' इति साहित्यविद्याधरी।

यदिति ॥ मम कुलं स्वभावाद्यदि उज्ज्वलं निर्मलं न ततस्तर्हि सदोषस्य तस्य कुलस्योद्भावनं कथनं मम कुतः कथमौचिती, अपितु तादृशस्य कथनमयुक्तमित्यर्थः । अथ अवदातं तत्कुलं तत्तर्हि प्रेष्यतया परदूतत्वेनोपसेदुष आगतस्य मम तथा तादृशी कथा तादृक्प्रसिद्धनिर्दोषवंशकथा सा विडम्बना, अहो आश्चर्यम् । महानुपहास इत्यर्थः । उपहासभिया तत्कथनं प्रेष्यस्य ममानुचितमित्यर्थः । अवदातम्, 'दैप् शोधने' । उपसेदुषः, 'भाषायां सद-' इति क्वसुः ॥

उपसंहरति—

इति प्रतीत्यैव मयावधीरिते तवापि निर्बन्धरसो न शोभते ।
हरित्पतीनां प्रतिवाचिकं प्रति श्रमो गिरां ते घटते हि संप्रति ॥ ११ ॥

इतीति ॥ पूर्वोक्तप्रकारेण वैयर्थ्येनानौचित्येन च हेतुना प्रतीत्यैव विचार्यैव मयावधीरिते कुलनामप्रश्नरूपेऽर्थे तवापि निर्बन्ध आग्रहे रसः प्रीतिः न शोभते । न युक्तेत्यर्थः । तर्हि किम्—हि यस्मात्संप्रति इदानीं हरित्पतीनामिन्द्रादीनां प्रतिवाचिकं प्रत्युत्तरं प्रत्युद्दिश्य ते तव गिरां श्रमः प्रयासो घटते । युक्त इत्यर्थः । निरर्थककुलनामप्रश्ने आग्रहं त्यक्त्वा शीघ्रं दिक्पालानां प्रत्युत्तरं देहीति भावः ॥

तथापि निर्बध्नति तेऽथवा स्पृहामिहानुरुन्धे मितया न किं गिरा ।
हिमांशुवंशस्य करीरमेव मां निशम्य किं नासि फलेग्रहिग्रहा ॥ १२ ॥

तथेति ॥ अथवा हे तथापि कुलनामाकथनकारणे कथितेऽपि एतत्कथनविषये निर्बध्नति ... मि, अहं इह कुलनामप्रश्ने तव स्पृहामिच्छां मितया गिरा स्वल्पेन वचनेन किं ..., अपि तु पूरयामि । द्वयोर्मध्य एकेनाग्रहः परित्याज्यः, त्वया तु न परित्यज्यते इति अथवेत्यनेन सूचितम् । मितमाह—त्वं हिमांशुवंशस्य ... बालमेव मां निशम्याकर्ण्य फलं गृह्णातीति फलेग्रहिः फलितः ग्रहो निर्बन्धो यस्याः एवंभूता किं नासि न भवसि, अपितु फलितनिर्बन्धा भव निशम्यैवेति वा योजना । ...षो विख्यातास्तन्मध्येऽहं प्रसिद्धो न भवामीति करीरपदेन स्वं गोपायति । ...रिश्च' इति साधुः । 'स्याद्वन्ध्यः फलेग्रहिः' इत्यमरः ॥

...स्वन्तमकथनीयत्वमाह—

महाजनाचारपरम्परेदृशी स्वनाम नामाददते न साधवः ।
अतोऽभिधातुं न तदुत्सहे पुनर्जनः किलाचारमुचं विगायति ॥ १३ ॥

महेति ॥ नाम प्रसिद्धौ । यत् साधवः स्वनाम न आददते न कथयन्ति ईदृशी महाजनानामाचारपरम्परा यतः, अतः कारणात्स्वनामाभिधातुं वक्तुं नोत्सहे नेच्छामि । ... कथितं, नाम न कथनीयमित्यर्थः । अत्र हेतुः—किल यस्मात् जन आचारमुचं पुरुषं पुनः विगायति निन्दति । अतो न कथ्यत इत्यर्थः । 'आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।

---

१ 'अत्र हेतुरलंकारः' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी ।

हृदेति ॥ स नलः सस्मितं यथा तथा तां भैमीमाह सावोचत् । किं कृत्वा—प्रिया- गिरः भैमीवचांसि प्रिया मनोज्ञा वा गिरः साधूक्तमिति हृदा मनसाभिनन्द्य स्तुत्वा । किंभूतः— कुलस्त्रीणामाचारानुचितं परपुरुषसंवादमहमपि न करोमीति प्रतिवन्दी तया तस्याः सका- शाद्वा अनुत्तर उत्तरहीनः । ईदृग्वक्रोक्तिप्रतिवन्द्यादिचातुर्यं कस्या अपि नास्तीत्याश्चर्यवशा- त्स्मितपूर्वाभिभाषितम् । तदेवाह—हे वामाक्षि सुनेत्रे, कटाक्षविक्षेपाद्वक्रनेत्रे वा अहं वदा- म्युपदिशामि—त्वं माक्षिकं मधु आक्षिपत्तिरस्कुर्वत् अतिमधुरमीदृशं प्रतिवन्द्यादिरूपं वचनं परेष्विन्द्रादिव्यतिरिक्तेषु मादृशेषु मा क्षिप । तानेव प्रत्येवं वदितुं युक्तम्, न तु मां प्रतीति प्रतिवन्दीं मुक्त्वा ऋजुमार्गेणैव प्रत्युत्तरं देहीति भावः । सस्मितं यथा तथा माक्षिकमाक्षि- पत् वचनमाह स्मेत्यन्वयः । ईदृशं स्वं इन्द्रादिदूतत्वेनात्मीयं पुरुषं परपुरुषेषु मध्ये मा क्षिप । येन सह संकथया पातिव्रत्यभङ्गप्रसङ्गस्तादृशोऽहं न भवामि । किं त्विन्द्रादिदूतत्वा- त्त्वदीय एवेति मह्यमुत्तरे दत्तेऽपि न पातिव्रत्यक्षतिरिति भाव इति वा । माक्षिकमाक्षिपद्वचः परेषु मा क्षिप । किं तु मयि क्षिपेति वा । मयि परबुद्धिं मा कुर्विति नल एवाहमिति अर्थान्नाम कथितमिति वा । वदामि नाम कथयापि परेष्वन्येषु अयं नलादन्य इति मा क्षिपेति वा । सर्वथाऽहं नल एवेत्यर्थः । व्याख्यानान्तरं क्लिष्टत्वादुपेक्ष्यम् । वामाक्षि, बहु- व्रीहौ षच्चि षित्त्वान्ङीपि नदीत्वाद्ध्रस्वः । मा क्षिप पूर्ववल्लोट् ॥

करोषि नेमं फलिनं मम श्रमं दिशोऽनुगृह्णासि न कंचन प्रभुम् ।
त्वमित्थमर्हासि सुरानुपासितुं रसामृतस्नानपवित्रया गिरा ॥ १८ ॥

करोषीति ॥ त्वम् इमं (स्वं स्वीयं) मम श्रमं फलिनं सफलं न करोषि प्रश्नकाकुः । अपितु कुर्विति । तथा—दिशः कंचन प्रभुं नानुगृह्णासि, अपि तु स्वयंवरेणानुगृहाण । चतुर्णां मध्येऽन्यतमस्यापि वरणेन मम श्रमं सफलयेत्यर्थः । इत्थं प्रतिवन्दीरूपेण प्रकारेण रसो माधुर्यं तल्लक्षणममृतं तेन यत्स्नानं तेन पवित्रया गिरा सुरान् त्वमुपासितुमर्हा योग्यासि । एवंविधां वाणीं तान् प्रति संदेशयेति भावः । यथा गिरा मां संतोषयसि तथा देवानपि संतोषयेत्यर्थः ॥

सुरेषु संदेशयसीदृशीं वक्तुं रसस्रवेण स्तिमितां न भारतीम् ।
मदर्पिता दर्पकतापितेषु या प्रयाति दावार्दितदाववृष्टिताम् ॥ १९ ॥

सुरेष्विति ॥ हे भैमि, त्वं वक्तुं विपुलार्थां रसस्रवेण माधुर्यद्रवेण स्तिमितामार्द्राम् अतिश- यरसानुरागबाहुल्येन चार्द्रां वक्रोक्तिप्रतिवन्द्यादिरूपां भारतीं वाणीं सुरेषु देवेषु न संदेशयसि, अपि तु तान्प्रत्येव संदेशं कुरु । या वाणी त्वयार्पिता संदेशरूपेण, मया चार्पिता सती दर्पकतापितेषु कामपीडितेषु सुरेषु दवेन वनवह्निनार्दितो दग्धो वनं तस्य वृष्टितां प्रयाति । दह्यमानस्य वनस्य यथा वृष्टिर्यथा सुखाय भवति, तथा कामपीडितानां तेषां तव वाणी सुखाय भविष्यति । तस्मादेवं कुर्विति भावः । प्रयाति, वर्तमानसामीप्ये लट् ॥

---

१ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । २ 'अत्र काकुरलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । 'निदर्शनालंकारः' इति जीवातुः ।

तेषां कानपीडां सनिन्दां चाह—

यथायथेह त्वदुपेक्षयानया निमेषमप्येष जनो विलम्बते ।
रुषा शरव्यीकरणे दिवौकसां तथातथाद्य त्वरते रतेः पतिः ॥ २० ॥

यथेति ॥ एष मल्लक्षणो जनोऽनया प्रत्युत्तरादानरूपया त्वदुपेक्षया त्वत्कृतयावज्ञया निमेषपरिमितं कालमपि यथायथा यावद्यावत् इह तव संनिधौ विलम्बते कालक्षेपं करोति तथातथा तावत्तावत् रतेः पतिः रुषा दिवौकसां शरव्यीकरणे लक्ष्यीकरणे अद्यास्मिन्समये त्वरते सत्वरो भवति तस्मात्सत्वरं प्रत्युत्तरं देहीति भावः । इहोत्तरविषये त्वदुपेक्षयेति वा ॥

इयच्चिरस्यावदधन्ति मत्पथे किमिन्द्रनेत्राण्यशनिर्न निर्ममौ ।
धिगस्तु मां सत्वरकार्यमन्थरं स्थितः परप्रेष्यगुणोऽपि यत्र न ॥२१॥

इयदिति ॥ अशनिर्वज्र इयच्चिरस्य एतावद्बहुकालं मत्पथेऽवदधन्ति निर्निमेषं सावधानानि एवंभूतानीन्द्रनेत्राणि किं न निर्ममौ, अपि तु तेनैव निर्मितानि । अन्यथा तेषां विलम्बसहनदार्ढ्यं कथम् । तस्माद्वज्रनिर्मितानीति सत्यम् । सत्वरे त्वरया कर्तुमर्हे कार्ये मन्थरं मन्दं मां धिगस्तु । अहमपि निन्द्य इति यावत् । यतः—यत्र मयि परस्य प्रेष्यो दूतः तस्य गुणो दूतलक्षणः सोऽपि न स्थितः न विद्यते । पर उत्कृष्टो यो दूतगुण इति वा । सत्वरकार्यकारित्वं दासधर्मः । प्रेषितेन दासेन शीघ्रं कार्यं संपाद्यागन्तव्यम्, कार्याभावेऽपि शीघ्रमागत्य कार्यं न भवतीति झटिति निवेदनीयम् । ते यस्मान्मां प्रतीक्षन्ते, तस्माज्झटिति प्रत्युत्तरं दत्त्वा मां प्रेषयेति भावः । अवदधन्ति, 'वा नपुंसकस्य' इति नुमे ॥

इदं निगद्य क्षितिभर्तरि स्थिते तयाभ्यधायि स्वगतं विदग्धया ।
· अधिस्त्रि तं दूतयतां भुवः स्मरं मनो दधत्या नयनैपुणव्यये ॥ २२ ॥

इदमिति ॥ क्षितिभर्तरि नले इदं पूर्वोक्तं निगद्योक्त्वा स्थिते तूष्णींभावं प्राप्ते सति तया भैम्या स्वगतमप्रकाशमभ्यधायि अवादि । किंभूतया—भुवो भूलोकस्य स्मरं कामरूपमतिसुन्दरं तम् अधिस्त्रि स्त्रीविषये दूतयतां दूतं कुर्वतामिन्द्रादीनां नये नैपुणं कौशलं तस्य व्यये अभावे स्वमनो दधत्या धारयन्त्या । स्त्रीष्वभव्यः सामान्यो दूतः प्रेषणीय इति नीतिः । अयं चातिसुन्दरः प्रेषित इति तेष्वनभिज्ञता । सर्वथा नीतिशास्त्रं न जानन्तीति मनसि निश्चितवत्या । अतो—विदग्धया नीतिशास्त्रादौ चतुरया । यद्वा—तेषां मनो नयकौशलाभावे दधत्या । तेषां मनसि नयकौशलं नास्तीति निश्चितवत्येति योज्यम् । 'नोज्ज्वलं रूपवन्तं च नार्थवन्तं न चातुरम् । दूतं वापि हि दूतीं वा नरः कुर्यात्कदाचन ॥' इति नीतिः । अधिस्त्रि, इति सप्तम्यर्थेऽव्ययीभावः । नैपुणम्, भावे युवादित्वादण् ॥

स्वगतं तं प्रति किमाहेत्याह—

जलाधिपस्त्वामदिशन्मयि ध्रुवं परेतराजः प्रजिघाय स स्फुटम् ।
मरुत्वतैव प्रहितोऽसि निश्चितं नियोजितश्चोर्ध्वमुखेन तेजसा ॥ २३ ॥

---

१ 'त्वदपेक्षया' इति जीवातुसंमतः पाठः । २ 'अत्रातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी । ३ 'स्थिरः' इति सुखावबोधासाहित्यविद्याधरीसंमतः पाठः । ४ 'अत्रातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी । ५ 'अत्र व्यतिरेकालंकारः' इति साहित्यविद्याधरी ।

जलेति ॥ जलाधिपो वरुणो मयि विषये त्वां ध्रुवं निश्चितमादिशदादिष्टवान् । परेतराजः स यमः स्फुटं निश्चितं प्रजिघाय प्रेषितवान् । मरुत्वता इन्द्रेणैव निश्चितं प्रहितोऽसि । ऊर्ध्वमुखेन तेजसा वह्निना नियोजितश्च । चतुर्ष्वप्यन्वयेष्वापाततः काकुवक्रयेत्यस्य योजना । अथ चातिसुन्दर्यां मयि अतिसुन्दरं त्वां यः समादिष्टवान् स पूर्वोक्तनीतिलक्षणान्निश्चितं जडानां स्वामी । अतिमूर्ख इत्यर्थः । यश्च तादृश्यां मयि तादृशमेव त्वां प्रेषितवान् स परेतानां मृतानां राजैव । न चेतन इत्यर्थः । येन तादृश्यां मयि तादृशस्त्वं प्रेषितः स मरुत्वान्वातूलो भवति । येन तादृश्यां मयि तादृशस्त्वं नियोजितः स ऊर्ध्वमुखः पिशाचः प्रतिभारहितश्च । पिशाचश्चोर्ध्वमुखो भवति अप्रतिभश्च भवति । ऊर्ध्वमुखत्वेन त्वन्मुखसौन्दर्यं तेन न दृष्टमित्यपि सूचितम् । अवज्ञात्वरत्वान्मनसैव नलं संबोध्येयमुक्तिः ॥

अथ प्रकाशं निभृतस्मिता सती सतीकुलस्याभरणं किमप्यसौ ।
पुनस्तदाभाषणविभ्रमोन्मुखं मुखं विदर्भाधिपसंभवा दधौ ॥ २४ ॥

अथेति ॥ अथ असौ सती निभृतस्मिता गुप्तस्मितेषत्स्मिता सतीकुलस्य पतिव्रतासमूहस्य किमपि लोकोत्तरमाभरणं एवंभूता विदर्भाधिपसंभवा भैमी स्वमुखं पुनस्तेन सह यद् आभाषणं तत्र यो विभ्रमो विलासस्तल्लक्षणो वा तत्रोन्मुखं संमुखमेवंभूतं दधौ प्रकाशं स्फुटम् । सखीभिरपि यथाकर्ण्यते तथावददित्यर्थः । प्रकाशमत्युज्ज्वलं प्रसन्नं चेति मुखविशेषणं वा । अयोग्या अपीन्द्रादयो मां वाञ्छन्तीति गूढस्मिता । सतीपदेन यो मनसा पूर्वं वृतः स एव पतिरिति सूचितम् । 'तदाभाषण-' इत्यादिना तेन सह नलबुद्ध्या आभाषणं मुख्यं, उत्तरदानं प्रासङ्गिकमिति सूचितम् ॥

वृथा परीहास इति प्रगल्भता न नेति च त्वादृशि वाग्विगर्हणा ।
भवत्यवज्ञा च भवत्यनुत्तरादतः प्रदित्सुः प्रतिवाचमस्मि ते ॥ २५ ॥

वृथेति ॥ हे देवदूत, इति इयं प्रगल्भता धृष्टत्वम् । इति किम्—वृथा निष्प्रयोजनः परीहास उपहासः । इयम् अपरिचितेन सहोपहासं करोति । अत्यन्तं धृष्टेयमिति सखीजनो वदिष्यति । त्वादृशि प्रतिवन्ध्यादिरूपः क्रीडावाद इति कारणं वृथा । इति किम्—प्रगल्भतेति वा । तथा—यत्त्वयोपदिश्यते तन्मया न क्रियत इति न नेति त्वादृशि निषेधवाक् त्वत्सदृशस्य विगर्हणा विशेषेण निन्दैव भवति । भव्यं प्रति सोपपत्तिकमेव वक्तव्यम्, निरुपपत्तिकं तु विगर्हणा । तर्हि तूष्णीं स्थातव्यमिति चेदत आह—भवति त्वयि अनुत्तरादुत्तरादानात् तव देवानां चावज्ञा भवति । अतः अहं प्रतिवाचं तुभ्यं प्रदित्सुः प्रदातुमिच्छुरस्मि । न नेति देवानां पृथङ्निषेधसूचनार्थम् । तादृशि—भवतीतिपदाभ्यां तवैव माहात्म्यादुत्तरं दीयते, न त्विन्द्रादिमाहात्म्यादिति सूचितम् । अन्यस्मिन्दूते नेत्यर्थः । परीहासः, 'उपसर्गस्य घञि-' इति दीर्घः ॥

कथं नु तेषां कृपयापि वागसावसावि मानुष्यकलाञ्छने जने ।
स्वभावभक्तिप्रवणं प्रतीश्वराः कया न वाचा मुदमुद्गिरन्ति वा ॥ २६ ॥

---

१ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । २ 'अत्र छेकानुप्रासरूपकालंकारः' इति साहित्यविद्याधरी । 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी ।

कथमिति ॥ मानुष्यकमेव लाञ्छनं यस्य एवंविधे मल्लक्षणे जने कृपयापि हेतुना असौ अस्मान्वृणीष्वेति देवानां वाक् कथं नु केन वा प्रकारेणासावि प्रसूता । मानव्या देवतानर्हत्वात्तेषां तां प्रत्येवं कृपया वक्तुमनुचितम् । कथंन्विति निपातसमुदायः । पृथग्वा नुशब्दः स्थाने प्रश्ने वा । तेषां कृपया कर्त्र्या वाक् कथमसावीति वा । मानुष्यकलाञ्छन इति स्वनिन्दया देववरणनिषेधे तात्पर्यम् । वाशब्दः पूर्वोक्तानौचित्योपरीहासार्थः । अथवेति वा ईश्वराः प्रभवः स्वभावेन भक्त्या प्रवणं नम्रं जनमुद्दिश्य कया वाचा मुदं हर्षं नोद्गिरन्ति प्रकटयन्ति । अपितु यया कयापि । भक्त्या मां प्रति स्वहर्षप्रकटने तेषां तात्पर्यम्, न तु मद्वरण इति सोल्लुण्ठं वचनमिति भावः । ते केवलं नमस्कारार्हाः, न तु वरणार्हा इत्यपि सूचितम् । प्रथमपक्षेऽसावीति कर्मकर्तरि 'अचः कर्मकर्तरि' इति चिण् । 'पक्षे भावकर्मणोः' इति चिण् । मानुष्यक इति, 'योपधाद्' इति वुञ् ॥

अहो महेन्द्रस्य कथं मयौचिती सुराङ्गनासंगमशोभिताभृतः ।
ह्रदस्य हंसावलिमांसलश्रियो बलाकयेव प्रबला विडम्बना ॥ २७ ॥

अहो इति ॥ सुराङ्गनानामुर्वशीप्रभृतीनां संगमेन शोभितामृतः शोभाशालित्वं बिभ्राणस्य महेन्द्रस्य मानुष्या मया कृता विडम्बना कथमौचिती । अपितु न कथंचित् । अहो आश्चर्ये, संबोधने वा । अत्यन्तमनौचितीत्यर्थः । उचितैवौचिती । कया कस्येव—बलाकया कृता हंसावल्या मांसला बहला श्रीः शोभा यस्य ह्रदस्येव । प्रबला विडम्बना जुगुप्सिताकारता । हंसापेक्षया यथा बलाका हीना, तथा रम्भाद्यपेक्षयाऽहमितीन्द्रवरणनिषेधे तात्पर्यम् ॥

पूर्वोक्तमेव द्रढयति—

पुरः सुरीणां भण केव मानवी न यत्र तास्तत्र तु शोभिकापि सा ।
अकाञ्चनेऽकिंचननायिकाङ्गके किमारकूटाभरणेन न श्रियः ॥ २८ ॥

पुर इति ॥ सुरीणां देवाङ्गनानां पुरोऽग्रे मानवी केव भण कथय । अपितु न कापि । अतितुच्छेत्यर्थः । इवशब्दो वाक्यालंकारे । 'केन' इति पाठे मानवी सुरीणां पुरः केन गुणेन शोभिका शोभते भण । एतादृशः कोऽपि गुणो मानुष्यां न विद्यत इत्यर्थः । तर्हि कुत्र शोभत इत्यत आह—यत्र ता देव्यो न विद्यन्ते तत्र तु पुनः पृथिव्यां सा अपि मानव्यपि शोभिका शोभते । मानुष्यपेक्षयाहं सुन्दरी न तु देव्यपेक्षया । तत्र दृष्टान्तः—यथा अकाञ्चने सुवर्णालंकाररहितेऽकिंचनस्य दरिद्रस्य नायिकायाः तस्या अङ्गकेऽल्पेऽल्पधने एतादृशस्यवयवे आरकूटस्य कृतेनालंकारेण श्रियः शोभाः किं न भवन्ति । अपि तु भवन्त्येव । तथा देवीरहितायां भुवि अन्यरम्यपेक्षया ममापि शोभा युक्तेत्यर्थः । पूर्वोक्तमेव तात्पर्यम् । 'रीतिः स्त्रियामारकूटम्' इत्यमरः । लोके पित्तलमिति वदन्ति । सुरीणाम्, 'पुंयोगे ङीष्' । मानवी, अल्पत्वात् शोभिका, कर्तरि ण्वुल् । किंचन किमपि भवति

१ 'यत्र देवाङ्गनासनिहितास्तत्र' इति साहित्यविद्याधरी । २ 'अल्पधनायाः दरिद्रस्य' इति साहित्यविद्याधरी । ३ 'पुरः केन' इति पाठः साहित्यविद्याधरीसम्मतः ।

यस्य नास्ति सोऽकिंचनः, मयूरव्यंसकादित्वात्समासः । अल्पके इत्यल्पत्वे कन् । अल्पत्वं संख्याकृतम् । यद्वा स्वार्थिकः कन् ॥

यथातथा नाम गिरः किरन्तु ते श्रुती पुनर्मे बधिरे तदक्षरे ।
पृषत्किशोरी कुरुतामसंगतां कथं मनोवृत्तिमपि द्विपाधिपे ॥ २९ ॥

यथेति ॥ ते देवा यथातथा येनतेन प्रकारेणाभिलापेण कृपया वा वरणविषये गिरो वाणीः किरन्तु विक्षिपन्तु नाम सुखेन ब्रुवन्तु । तथापि मे श्रुती कर्णौ पुनस्तासां गिरामक्षरे एकस्मिन्नपि वर्णे विषये बधिरे । एकमप्यक्षरं नाकर्णयतः किमु बहूनि, कितरां चार्थमित्यर्थः । श्रुतमप्यननुष्ठेयत्वादश्रुतमेवेत्यर्थः । दृष्टान्तेन हेतुमाह—पृषतो हरिणस्य किशोरी हरिणी द्विपाधिपे ऐरावते हस्तिश्रेष्ठे वा विषये असंगतामयोग्यां मनोवृत्तिमपीच्छामात्रमपि कथं कुरुताम् । इच्छामपि न धारयति, नानुतिष्ठतीति किं वाच्यमित्यर्थः । पशुरपि बालापि सती या मृगी योग्यायोग्यविभागं जानाति, ततोऽप्यज्ञा किमहम् । तान्न वृणे इति भावः ॥

अदो निगद्यैव नतास्यया तया श्रुतौ लगित्वाभिहितालिरालपत् ।
प्रविश्य यन्मे हृदयं ह्रियाह तद्विनिर्यदाकर्णय मन्मुखाध्वना ॥ ३० ॥

अद इति ॥ आलिः काचित्सखी आलपदवोचत् । किंभूता । अदो निगद्यैव एवमुक्त्वैव नतास्यया लज्जावशान्नम्रमुख्या तया भैम्या श्रुतौ लगित्वाभिहिता एवं वद इति उक्ता । हे दूत, इयं ह्रिया मे हृदयं प्रविश्य यदाह ब्रवीति, तत् त्वं मन्मुखाध्वना विनिर्यद्विनिर्गच्छद् आकर्णय । इयं लज्जया किमपि स्वयं वक्तुं न शक्नोति, मन्मनसि रहस्यं निवेश्य यदाह, तन्मयानूद्यते, न तु स्वस्फूर्त्या किमप्युच्यते तदाकर्णयेत्यर्थः ॥

बिभेमि चिन्तामपि कर्तुमीदृशीं चिराय चित्तार्पितनैषधेश्वरा ।
मृणालतन्तुच्छिदुरा सतीस्थितिर्लवादपि त्रुट्यति चापलात्किल ॥ ३१ ॥

बिभेमीति ॥ यतोऽहं चिराय बहुकालं चित्तेऽर्पितो नैषधेश्वरो यया अत एव ईदृशीं इन्द्रादीन्वृणे, न वृणे इति चिन्तामपि कर्तुं बिभेमि भयं प्राप्नोमि, निश्चयं कर्तुं किमुत । मनोव्यापारेऽपि भयम्, किं पुनः कायव्यापारे इत्यपिशब्दार्थः । चिन्तापि हि मानसो व्यापारः । मनसश्च नलेनाधिष्ठितत्वादन्यविषयविचारस्यावकाशोऽपि नास्ति । इदं विचारे क्रियमाणे तत्स्थो नलः समाकर्णयेत् । स चेश्वरः प्रभुः । तस्मादेवं विचारमपि कर्तुं न शक्नोमीति भावः । मनसैव वृतो न तु साक्षात् । बिभेमीत्यर्थः । मनसा नलस्य वृतत्वान्न्यवरणस्यावकाशो नास्ति तस्मादन्यवरणविषयविचारे क्रियमाणे क्षतिरिति भयमित्याशयेनाह—किल यस्मात् मृणालतन्तुवच्छिदुरा लघुनैव छिद्रा सतीस्थितिः पतिव्रतामर्यादा लवादप्यल्पादपि चापलात्त्रुट्यति । बिसतन्तुर्यथा इत्यल्पेनापि छिद्यते तथा । साक्षाद्वरणादपि मनसा यदन्यं वृणे तदेव [illegible] अल्पस्मादन्यविषयध्यानादपि सतीस्थितिर्भज्यते । तस्मादन्यं न वृणे इति भावः ॥

---

१ 'अत्र दृष्टान्तालंकारः' इति जीवातुसाहित्यविद्याधर्यौ । २ 'अत्र [illegible]' इति साहित्यविद्याधरी । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

ममाशयः स्वप्नदशाज्ञयापि वा नलं विलङ्घयेतरमस्पृशद्यदि।
कुतः पुनस्तत्र समस्तसाक्षिणी निजैव बुद्धिर्विबुधैर्न पृच्छयते ॥ ३२ ॥

ममेति ॥ वाशब्दो यदीत्यस्यानन्तरं संभावनार्थो द्रष्टव्यः। ममाशयोऽभिप्रायः स्वप्नदशायाः स्वप्नावस्थाया आज्ञयापि वशेनेत्यर्थः। अज्ञा इव अज्ञा, तत्कृतो मोहस्तेनापीति वा नलं विलङ्घ्येतरं यदि वास्पृशत्, तर्हि विबुधैरिन्द्रादिभिः पण्डितैश्च तत्र तस्मिन्विषये समस्तसाक्षिणी समस्तलोकवृत्तसाक्षात्कारिणी निजैव बुद्धिः कुतः पुनः न पृच्छयते। स्वप्नदशायामपि नलादन्यं न चिन्तयामीति सर्वज्ञत्वाद्देवा अपि जानन्तीति भावः ॥

निजैव बुद्धिः पृच्छयतामिति पूर्वमुक्तम्, इदानीं स्वयमेवाह—

अपि स्वमस्वप्नमसूषुपन्नमी परस्य दारानवैतुमेव माम्।
स्वयं दुरध्वार्णवनाविकाः कथं स्पृशन्तु विज्ञाय हृदापि तादृशीम् ॥ ३३ ॥

अपीति ॥ अमी देवा मां परस्य नलस्य दारान्स्त्रियं अनवैतुमनवज्ञातुमेव अस्वप्नमपि निद्रारहितमपि स्वमात्मानमसूषुपन्निद्रापयन्ति स्म। देवास्त्वस्वप्नाः, अपि संभावनायाम्। एतदर्थमेवास्वप्नं स्वमसूषुपन्नित्यहं संभावयामीत्यर्थः। अस्मिन्नर्थे गूढोपहासानन्दमानुपपत्तिं प्रमाणयति—स्वयमात्मनैव दुष्टोऽध्वा दुरध्वः परदारवाञ्छामार्गः स एवार्णवस्तमुत्तारयितुं नाविकाः कर्णधारा दुराचारप्रवृत्तजननिवारका एते तादृशीं परस्त्रियं विज्ञाय विशेषेण ज्ञात्वा हृदापि कथं स्पृशन्तु मनसापि परस्त्रियं कथमिच्छन्त्वपि। सदाचाराणां ज्ञात्वैतत्कर्तुमनुचितमित्यर्थः। 'स्वप्नवशादेवाहं तैर्नलस्वबुद्धिपूर्वं धृतेति तेषां न दोषः। अन्यथा येऽन्याननुपदिशन्ति ते स्वयं कथं परदारान्वाञ्छन्तीति भावः। एवंविधा अपि परदारानिच्छन्तीत्युपहासः। समुद्रकर्णधारत्वेन ते स्पर्शनयोग्या अपि न भवन्तीति सूचितम्। असूषुपन्, ण्यन्तात्स्वपेश्चङि 'स्वापेश्चङि' इति संप्रसारणम्। दुरध्वः, 'उपसर्गादध्वनः' इत्यच्। 'व्यध्वो दुरध्वो विपथः' इत्यमरः। नाविकाः, 'तरति' इत्यर्थे 'नौ द्व्यचष्ठन्' इति ठन् ॥

अनुग्रहः केवलमेष मादृशे मनुष्यजन्मन्यपि यन्मनो जने।
स चेद्विधेयस्तदमी तमेव मे प्रसद्य भिक्षां वितरीतुमीशताम् ॥ ३४ ॥

अनुग्रह इति ॥ (मादृशे) मनुष्यजन्मन्यपि मादृशे मद्रूपे जने यत् तेषां मनः अनुरक्तमित्यर्थात्। एष केवलं तेषामनुग्रहः कृपा, न तु तत्त्वतोऽनुरक्ताः। ममायोग्यत्वात्। सोऽनुग्रहः चेत् यदि विधेयः कर्तव्यः, तत्तर्हि अमी देवाः प्रसद्य प्रसन्नीभूय मे मह्यं तमेव नलमेव भिक्षां वितरीतुमीशतां समर्था भवन्तु। अहं तानेव नलं याचे, तैः प्रसन्नीभूय नल एव दातव्यो, न त्वन्योऽभिलापः। मनुष्याज्जन्म यस्येति बहुव्रीहिः। अन्यादेशत्वाभावे मनुष्याणामादेशः। वितरीतुम्, 'वृतो वा' इतीटो दीर्घः ॥

---

१ 'अत्र हेत्वनुप्रासहेत्वलंकाराः' इति साहित्यविद्याधरी। २ 'दधाति' इति पठित्वा 'समेति' इति व्याख्यातं साहित्यविद्याधर्याम्। ३ 'ऽछिलान्तोः—' इति मल्लिनाथस्तु [illegible]। अन्यो- [illegible] संप्रसारणाभावमतत्वाद। ४ 'अत्र विरोधरूपहेत्वलंकाराः' इति साहित्यविद्याधरी। ५ 'केवल एव'। ६ 'तन्मनः' इति पाठः साहित्यविद्याधरीजनतः। ७ 'अत्र हेत्वलंकारः' इति साहित्यविद्याधरी।

नलावरणे स्वप्रतिज्ञामाह—

अपि द्रढीयः शृणु मत्प्रतिश्रुतं स पीडयेत्पाणिमिमं न चेन्नृपः ।
हुताशनोद्बन्धनवारिकारितां निजायुषस्तत्करवै स्ववैरिताम् ॥ ३५ ॥

अपीति ॥ अपिः अन्यच्चेत्यर्थे । त्वं द्रढीयः दृढतरं केनाप्यनिराकार्यं मम प्रतिश्रुतं प्रतिज्ञातमपि शृणु । तदेवाह—स नलः नृपः इमं पाणिं चेत् न पीडयेन्मदीयपाणिग्रहणं न कुर्यात्, तत्तर्हि हुताशनेनोद्बन्धनेन शाखादौ रज्ज्वा कण्ठोर्ध्वबन्धनेन वारिणा च प्रयोज्येन कारितां विधापितां निजायुषः स्वजीवितस्य स्वेनैवात्मनैव वैरितां शत्रुतां करवै । ममादृष्टवशाद्देवानुरोधाद्वा चेन्मां नलो नाङ्गीकुर्यात्तर्हि वह्न्यादिष्वन्यतमेनोपायेन स्वजीवितं त्यक्ष्यामि, अन्यं कंचन न वृणे इति । पूर्वनिपातानित्यत्वं पूर्वोक्तं ज्ञातव्यम् । 'वारिताम्' इति पाठे निषिद्धाम् । अग्न्यादिभिर्मरणं निषिद्धम् ॥

आत्मघातोऽनुचित इत्यत आह—

निषिद्धमप्याचरणीयमापदि क्रिया सती नावति यत्र सर्वथा ।
घनाम्बुना राजपथे हि[1] पिच्छिले क्वचिद्बुधैरप्यपथेन गम्यते ॥ ३६ ॥

निषिद्धमिति ॥ यत्र यस्यामापदि सती श्रुत्याद्यविरोधिनी क्रिया सर्वथा केनापि प्रकारेणात्मानं नावति न रक्षति, तस्यामापदि सत्यां निषिद्धमपि कर्माचरणीयम् । अचिकित्स्यव्याध्यादौ भृगुपतनादिभिर्मरणमापद्धर्मनिरूपणप्रस्तावेऽभिहितम् । नलं विना कामज्वरपीडायामापदि निषिद्धमप्याचरणीयमेवेति भावः । तदेवार्थान्तरन्यासेनाह—हि यस्मात् घनाम्बुना सान्द्रजलेन मेघजलेन वा राजपथे राजमार्गे पिच्छिले पङ्किले सति बुधैरपि पण्डितैरपि क्वचित् किंचिदुद्दिश्य अपथेन कापथेन गम्यते । राजमार्गस्य पङ्किलत्वाद्गत्यन्तराभावादमार्गगामित्वेऽपि न दोष इत्यर्थः । पिच्छिले, पिच्छादित्वादिलच् । अपथेन, 'पथो विभाषा' इति समासान्तः ॥

स्वोक्तं निगमयन्ती दूतं प्रार्थयते—

ह्रिया मया वाग्मिषु तेषु शक्यते न जातु सम्यग्वितरीतुमुत्तरम् ।
तदत्र मद्भापितसूत्रपद्धतौ प्रबन्धृतास्तु प्रतिबन्धृता न ते ॥ ३७ ॥

ह्रियेति ॥ ह्रिया मया वाग्मिषु पण्डितेषु तेषु देवेषु सम्यक् संतोषकारि उत्तरं जातु कदाचिदपि वितरीतुं न शक्यते यस्मात्, तत्तस्मात् अत्रास्यां मम भाषितमेव सूत्रं तस्य पद्धती रचना तस्यां विषये ते तव प्रबन्धृता प्रबन्धकारित्वं भाष्यकारित्वं वार्तिककारित्वं वास्तु । प्रतिबन्धृता तु दूषकत्वं नास्तु । सूत्रप्रायं मद्वचनं स्वकल्पितैर्विवरणपदैः सोपस्कारं कृत्वा देवास्त्वया बोधनीयाः, न तु मद्वचने दूषणं कर्तव्यम् । यथा भाष्यकर्त्रा सूत्रं समर्थ्यते न तु दूष्यते । उभयत्रापि तृजन्ताद्बन्धेस्तल् । उपसर्गवशादर्थभेदः[2] ॥

निरस्य दूतः स तथा विसर्जितः प्रियोक्तिरप्याह कटूष्णमक्षरम् ।
कुतूहलेनेव मुहुः कुहूरवं विडम्ब्य डिम्भेन पिकः प्रकोपितः ॥ ३८ ॥

---

१ 'अतिपिच्छिले' इति जीवातुसाहित्यविद्याधरीसंमतः पाठः । २ 'अत्रार्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी ।

निरस्येति ॥ तथा पूर्वोक्तेन प्रकारेण निरस्य निराकृत्य प्रियोक्तिरपि मधुरवचनोऽपि विसर्जितः प्रेषितः दूतः कटुष्णं संतापकरमक्षरं वक्ष्यमाणप्रकारेणाह वदति स्म । क इव— डिम्भेन बालकेन मुहुः पुनःपुनः कुतूहलेन कौतुकेन कुहूरितिरवं शब्दं विडम्ब्यानुकृत्य प्रकर्षेण कोपितो मधुरवचनोऽपि पिक इव । तथा तेन प्रकारेण प्रस्थापितो, यथा प्रियवचनोऽपि परुषवचनं ब्रूते स्म । अवज्ञया प्रस्थापित इत्यर्थ इति वा योजना । 'तया' इति वा पाठः । बालेन विडम्बितः पिकः कुपितः सन् परुषं रटतीति जातिः । 'सर्ज अर्जने' इत्यतः क्तः । स चोपसर्गवशात्प्रेषणार्थः ॥

अहो मनस्त्वामनु तेऽपि तन्वते त्वमप्यमीभ्यो विमुखीति कौतुकम् ।
क्व वा निधिर्निर्धनमेति किंच तं स वाक्कवाटं घटयन्निरस्यति ॥ २९ ॥

अहो इति ॥ हे भैमि, अत्युत्तमाः तेऽपि देवा अपि त्वामनु मनः तन्वते । मानुषीं त्वामभिलष्यन्ति । अहो आश्चर्यम् । मानुष्यतिहीना त्वमपि उत्तमेभ्योऽप्यमीभ्यो देवेभ्यो विमुखी पराङ्मुखीति चाश्चर्यम् । अहो कौतुकम्, महदाश्चर्यमिति चोभयत्र योजनीयम् । उत्तमो हीनां नाभिलष्यतीति हीना तत्र नानुरज्यत इति युक्तम् । 'उत्तमे कामयमानेऽपि हीना तं न कामयते' इति कुत्रचिन्न दृष्टचरमिति महदाश्चर्यम् । उत्तमाय हि सर्वोऽपि स्पृहयतीति भावः । एतदेव परुषं वचनम् । दृष्टान्तमाह— निधिः महापद्मादिः निर्धनं दरिद्रं क्व वा कुतोऽपि दैवादायाति । किंच अन्यच्च स दरिद्रः प्रतिषेधकत्वाद्वाग्रूपं कपाटं घटयन् मत्समीपे त्वया नागन्तव्यमिति विशेषवचनं ब्रुवन् तं निधिं निराकरोति तादृगेतदित्यर्थः । निधिर्निर्धनमेति स च वाक्कवाटं घटयंस्तं निरस्यतीति क्व वा कुत्र वा । दृष्टमित्यर्थोऽह । अपितु कुत्रचिदेति वा । 'स वा कवाटम्' इति वा पाठः । निर्धनस्य निधिनिराकरणं यथाऽनुचितम्, तथा दिक्पालानां त्वय्यनुराग एवानुचितः, कृतेऽप्यनुरागे त्वं तत्र नानुरज्यस इति महदनुचितमिति भाव इति वा ॥

सहाखिलस्त्रीषु वहेऽवहेलया महेन्द्ररागाद्गुरुमादरं त्वयि ।
त्वमीदृशि श्रेयसि संमुखेऽपि तं पराङ्मुखी चन्द्रमुखि न्यवीवृतः ॥ ३० ॥

सहेति ॥ हे चन्द्रमुखि, महेन्द्रस्य त्वय्यनुरागाद्धेतोः अखिलास्विन्द्राणीप्रमुखासु अवहेलयावज्ञया सह त्वयि यं गुरुमादरं संमानं वहे धारये । इन्द्रस्य त्वय्यनुरागात्, त्वदन्यासु मदनुरागात्त्वदन्या कापि धन्या नास्तीति त्वामेव बहु मन्ये इति भावः । ईदृशि इन्द्रस्य त्वदभिलाषलक्षणे संमुखे त्वामनु स्वयमागच्छत्यपि श्रेयसि कल्याणे विषये पराङ्मुखी तदनङ्गीकुर्वाणा त्वं तं ममादरं न्यवीवृतः व्यवर्तयः इत्यर्थः । त्वत्सदृशी न हि दुर्मतिरस्तीत्यर्थः । न्यवीवृतः, व्यन्ताल्लुङि रूपम् ॥

दिवौकसं कामयते न मानवी नवीनमश्रावि तवाननादिदम् ।
कथं न वा दुर्ग्रहदोष एष ते हितेन सम्यग्गुरुणाऽपि शम्यते ॥ ३१ ॥

---

१ 'अत्र देवानुरागे भैमी निःसंदेहं सात्त्विकभाववती' । २ 'अत्र देवस्य पारम्यं रहस्यं' ।
३ 'अत्र कामविकारादिरवंशं रसं सात्त्विकभावतो' ।

दिवौकसमिति ॥ मानवी दिवौकसं न कामयते इतीदं नवीनमपूर्वं तवाननादश्रावि श्रुतम्। उत्तमस्य वस्तुनोऽनभिलाषाच्चित्रमित्यर्थः। एष ते दुर्ग्रहदोषः दुष्टाग्रहलक्षणो दोषः सम्यगतितरां हितेनाप्तेन गुरुणा पित्रापि कथं वा न शम्यते नापनीयते। अपि लपनेतु मर्हः। अपत्यहितमभिलष्यता पित्रा ह्यपत्यदुष्टाग्रहः केनाप्युपायेन निराक्रियते। तव तु नेत्यपि चित्रमित्यर्थः। अथ च—दुष्टग्रहाः शनैश्चरादयः तज्जनितो दोषः पीडा सम्यक् हितेन केन्द्रस्थानस्थितत्वादनुकूलतरेण गुरुणा बृहस्पतिनापनीयते, नापनीयते चेच्चित्रम्। 'किं कुर्वन्ति ग्रहाः सर्वे यदि केन्द्रे बृहस्पतिः' इति ज्योतिर्विदः। सर्वथा आग्रहं परित्यज्ये न्द्रादिष्वन्यतमं वृणीष्वेति भावः। अथ च त्वद्वरणसंबन्धी देवानामाग्रहो मन्त्रिणा बृहस्पतिना कथं न शम्यते इति चित्रम्। दिवौकसमिति पृषोदरादिः। आङ्प्रश्लेषे वृद्धिर्वा। नवीनम्, 'नवस्य नू त्नप्तनप्खाश्च' इति खो नूरादेशः ॥

अनुग्रहादेव दिवौकसां नरो निरस्य मानुष्यकमेति दिव्यताम्।
अयोविकारे स्वरितत्वमिष्यते कुतोऽयसां सिद्धरसस्पृशामपि ॥४२॥

अन्विति ॥ नरः दिवौकसामनुग्रहादेव अनुग्रहमात्रेण मानुष्यकं मनुष्यत्वं निरस्य परित्यज्य दिव्यतां देवत्वमेति प्राप्नोति। तत्र दृष्टान्तः—सिद्धरसस्पृशामपि औषधसाधितपारदस्पृशां सुवर्णभूतानामप्ययसां लोहानामयोविकारे लोहविकारभूते पदार्थे मध्ये स्वरितत्वमाक्षिप्तत्वं कुतो हेतोरिष्यते, अपि तु न कुतोऽपि। सिद्धरसस्पृष्टानि सुवर्णभूतानि लोहानि अयोविकृतेषु मध्ये केन क्षिप्यन्ते, एतानि लोहजन्यानीति लोह(जन्य)पातीनि केन क्रियन्ते। किंतु सुवर्णमध्य एवेत्यर्थः। 'अयोधिकारे स्वरितत्वम्' इति पाठे अधिकारे प्रस्तावे। 'स्वरितेनाधिकारः' इति पाणिनिवचनात्स्वरितत्वाभावे कुतस्त्योऽधिकार इत्यर्थः। यथा सिद्धरसस्पृष्टं लोहं सुवर्णत्वेन वर्ण्यते, न तु लोहत्वेन। तथा देवानुग्रहात्त्वमपि दैव्येव, न तु मानुषीति देवान्वृणीष्वेति भावः। स्वरित इति 'स्वर आक्षेपे' इति चौरादिकाददन्तान्निष्ठा। रसशब्दो विश्वप्रकाशे पारदवाच्युक्तः। स्पृशाम्, 'स्पृशोऽनुदके—' इति क्विन्। अनेन 'मानुष्यकलाञ्छने जने' इत्यादेरुत्तरं दत्तम् ॥

हरिं परित्यज्य नलाभिलाषुका न लज्जसे वा विदुषिब्रुवा कथम्।
उपेक्षितेक्षोः करभाच्छमीरतादुरुं वदे त्वां करभोरु भोरिति ॥ ४३ ॥

हरिमिति ॥ हे भैमि, त्वं हरिमिन्द्रं परित्यज्य नलनामकं राजानं नलाख्यतृणविशेषं च अभिलाषुकाभिलाषिणी तथा विदुषिब्रुवा आत्मानं विदुषीं पण्डितां ब्रुवाणा सती कथं वा न लज्जसे। अपि तु त्वया लज्जितव्यम्। महेन्द्रं त्यक्त्वा तृणतुल्यं नरं प्रियं वाञ्छसि अहं ज्ञात्रीति च ब्रूषे एतन्महच्चित्रम्। त्वादृशी दुर्बुद्धिर्निर्लज्जा च क्वापि नास्तीत्यर्थः। भोः करभोरु, करस्य कनिष्ठामणिबन्धमध्यदेशवदनुवृत्तौ कोमलौ ऊरू यस्या एवंविधे भैमि, इति पूर्वार्धोक्तात्कारणात् अहं त्वां उपेक्षितेक्षोस्त्यक्तस्वादुरसेक्षोः शमीरतात्कटुरसशमीकण्टकल-

१ 'अत्र छेकानुप्रासहेतुकश्लेषालंकारः' इति साहित्यविद्याधरी। 'अत्राभिधायाः प्रकृतार्थनियमनादप्रकृतार्थप्रतीतिर्ध्वनिरेव न श्लेषः' इति जीवातुः। २ 'अत्रार्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी। 'दृष्टान्तालंकारः स्पष्टः' इति जीवातुः।

त्वं पुनः न वलसे नाभिमुखीभवसि । चित्रमित्यर्थः । कर्पतीवेति वा । जन्मान्तरभाविफलार्थं बुधाः शरीरमपि त्यजन्ति, तच्च फलं प्रत्युत त्वत्प्राप्त्यर्थं स्वयमेव साभिलाषं सदस्मिन्नेव जन्मनि एतच्छरीरसहितामेव त्वां स्वसमीपं नेतुमिच्छति, त्वं तु तत्संमुखी न भवसीति मूर्खतरा बालिशेत्यनेन सूचितम् । आग्रहं त्यक्त्वा इन्द्रादिष्वन्यतमं वृणीष्वेति भावः । 'अज्ञे च बालिशः' इत्यमरः। जुहति । 'अदभ्यस्तात्' इति झेरत् 'हुश्नुवोः–' इति यणादेशः। 'भुवश्च' इतीष्णुचः छन्दस्येव विधानमिति वृत्तिकारादिवचनाद्भाषायां 'भविष्णवे' इति चिन्त्यम् । यद्वा 'भूष्णुर्भविष्णुर्भविता', 'जगत्प्रभोरप्रभविष्णु वैष्णवम्' इत्यादिप्रामाणिकप्रयोगदर्शनाच्च 'भुवश्च' इति चकारं 'भुवश्छन्दसि च' इति संबध्य चकारात् 'भाषायामपि क्वचिद्भवति' इति व्याख्यानात्समर्थनीयम् । गत्यन्तरं वा गवेषणीयम् ॥

'हुताशनोद्बन्धन–' इत्यादि यदुक्तं, तच्छ्लोकत्रयेण दूषयति—

यदि स्वमुद्बन्धुमना विना नलं भवेर्भवन्तीं हरिरन्तरिक्षगाम् ।
दिविस्थितानां प्रथितः पतिस्ततो हरिष्यति न्याय्यमुपेक्षते हि कः ॥ ४६ ॥

यदीति ॥ त्वं नलं विना यदि स्वम् आत्मानं उद्बन्धुमना भवेः, ततः तर्हि अन्तरिक्षगामन्तरालस्थां त्वां ततोऽन्तरिक्षात् हरिरिन्द्रो हरिष्यति नेष्यति । यस्माद्दिविस्थितानामन्तरिक्षस्थानां पतिः स्वामी प्रथितः ख्यातः । युक्तमेतत्–कः न्याय्यं न्यायादनपेतं स्वीयं भागमुपेक्षते नाङ्गीकरोति । अपितु सर्वोऽप्यङ्गीकरोति । तत इति तदर्थे वा । न्याय्यं, 'धर्मपथ्यर्थ' इति यत् ॥

निवेक्ष्यसे यद्यनले नलोज्झिता सुरे तदस्मिन्महती दया कृता ।
चिरादनेनार्थनयापि दुर्लभं स्वयं त्वयैवाङ्ग यदङ्गमर्प्यते ॥ ४७ ॥

निवेक्ष्यस इति ॥ नलेनोज्झिताऽपरिणीता त्वं यदि अनलेऽग्नौ निवेक्ष्यसे आत्मानं क्षेप्स्यसि । तत्तर्हि अस्मिन्सुरे वह्नौ त्वया महती दया कृता । यद्यस्मात् हे अङ्ग भैमि, अनेनाग्निना चिराद्बहुकालमर्थनया प्रार्थनयापि कृत्वा दुर्लभमङ्गं त्वयैव स्वयमर्प्यते दीयते । यच्चिरकालं याचितमपि दुष्प्रापं, तद्दात्रा स्वयमेव यदि दीयते तत्र दयैव निमित्तमिति ज्ञायते । स्वयमेव स्वाङ्गदानात्त्वया गुर्वी दया कृता । तथा च वह्निप्रवेशोऽपि त्वया कर्तुं न शक्यत इति भावः । कस्मिन्कृते किं भविष्यतीति न जानासीत्युपहासः अङ्गेति संबुद्ध्या सूचितः ॥

जितंजितं तत्खलु पाशपाणिना विनानलं वारि यदि प्रवेक्ष्यसि ।
तदा त्वदाख्यान्वहिरप्यसूनसौ पयःपतिर्वेक्षसि वक्ष्यतेतराम् ॥ ४८ ॥

---

१ 'अत्र काव्यलिङ्गोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । २ 'अन्तरिक्षगां भवन्तीं अन्तरालस्थां जल्पनामान्' इति सुखावबोधा । 'प्रतिज्ञावृत्ते उद्बन्धनप्रतिज्ञा द्वितीया, तथापि, अन्तरिक्षसंचरत्वात् निकलादिन्द्रस्य च प्राधान्यात्प्रथमं दूषिता' इति सुखावबोधा । ३ 'अत्र छेकानुप्रासकाव्यलिङ्गार्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी । ४ 'दयाकृता' इति जीवातौ, 'दया कृता' इति साहित्यविद्याधर्यां पाठः । ५ 'अर्थितया' इति पाठः साहित्यविद्याधर्याम् । ६ 'अत्र छेकानुप्रासकाव्यलिङ्गालंकारौ' इति साहित्यविद्याधरी । 'अत्र नलालाभे जीवत्त्यागादर्शनतः [illegible] इति जीवातुः ।

जितमिति ॥ हे भैमि, यदि त्वं नलं विना पूर्वोक्तदोषादनलमपि विना वारि प्रवेक्ष्यसि वारिप्रवेशलक्षणमन्यं मरणोपायं चेत्करिष्यसि, तत्तर्हि खलु निश्चितं पाशपाणिना वरुणेन जितंजितम् । अतितरां जितमित्यर्थः । संभ्रमे द्विरुक्तिः । अतिदुर्लभस्य त्वदेप्सितस्य स्वत एवागमनात्सर्वोत्कर्षेण वृत्तमित्यर्थः । यतः—असौ पयःपतिः तदा त्वयि प्रविष्टायां सत्यां त्वदाश्लेषात्त्वगानन्दसौभाग्यसुखभानात् बहिरपि वक्षति । हृदयोपर्यपीत्यर्थः । वक्ष्यतेतरां धारयिष्यतितराम् । इदानीमन्तःकरणे तावच्चिरकालं वहत्येव, तदानीमालिङ्गनवशाद्बहिरपि वक्ष्यतेतराम् । अतस्तेन जितमित्यर्थः । अत्र पयःपतित्वमेव हेतुः । अयमप्युपायः कर्तुं न शक्य इत्यर्थः । वक्षति वक्ष्यतेतरामित्यन्वयः । ततो बहिर्योगाभावान्न पत्नी । स्वर्थाच्च वक्षोपेक्षमेव बहिष्ट्वम् । वक्ष्यते, वहेः स्वरितेत्त्वात्तङि स्ये 'हो ढः' इति हस्य ढत्वे 'षढोः कः सि' इति कत्वे 'आदेशप्रत्यययोः' इति षत्वम् ॥

मरणोपायान्तरं च दूषयति—

करिष्यसे यद्यत एव दूषणादुपायमन्यं विदुषी स्वमृत्यवे ।
प्रियातिथिः स्वेन गृहागता कथं न धर्मराजं चरितार्थयिष्यसि ॥४९॥

करिष्यस इति ॥ हे भैमि, त्वम्, अत एव दूषणात् उद्बन्धनादिमरणे इन्द्राद्यधीनमनिष्पन्नत्वाद्दूषणाद्विदुषी अन्योपायस्फुरणे प्रतिभावती सती स्वमृत्यवे अन्यमुपायं कर्पूरभक्षणादिलक्षणं यदि चेत्करिष्यसे तर्हि स्वेन स्वयमेव गृहान्प्रत्यागता प्रिया प्राणेश्वरी अतिथिरूपा त्वं धर्मराजं यमं कथं न चरितार्थयिष्यसि । कृतार्थं करिष्यसीत्यर्थः । यमगृहे सर्वेणापि गन्तव्यमेव । स्वयं गृहागतायाश्च वरणे न दोषः । तस्मान्मरणे उपायान्तरमपि कर्तुं न शक्यत इति भावः । विदुषः पूर्वोक्तपक्षदूषणे उपायान्तरं स्फुरति । 'गृहाः पुंसि च भूम्न्येव' इत्यमरः ॥

तवाभिप्रायमजानानेनैव मया 'इन्द्रादीन्वृणीष्व' इत्युक्तम्, त्वया तु 'न' इति वचनभङ्ग्योक्तम् । इदानीं तवाभिप्रायो ज्ञात इत्याह—

निषेधवेषो विधिरेष तेऽथवा तवैव युक्ता खलु वाचि वक्रता ।
विजृम्भितं यस्य किल ध्वनेरिदं विदग्धनारीवदनं तदाकरः ॥ ५० ॥

निषेधेति ॥ अथवा इन्द्रादीन्न वृणे इति एष ते तव निषेधो वेषो रूपं यस्यैतादृशो विधिरेव । न वृणे इति यथाश्रुतार्थग्राहिणा मया पूर्वं न ज्ञातः, इदानीं वृणे इति विधिरेव ज्ञातः । लौकिकवचनरीतिरप्येवम् । निषेधे विधिप्रतीतिः कथमित्यत आह । खलु यस्मात् तवैव वाचि वक्रता युक्ता । वक्रोक्तिरूपवचनविषयैव युक्तेत्यर्थः । एतदपि कुत इत्याशङ्क्याह— खलु यस्मात् यस्य ध्वनेः ध्वनिसंज्ञकस्योत्तमकाव्यस्य इदं निषेधविधिरूपं किल प्रसिद्धं विजृम्भितं विलसितम्, तस्य आकरः खनिः उत्पत्तिस्थानं विदग्धनारीवदनं चतुरवनितामुखम् । वक्रोक्त्यादिध्वनिविलसितं वक्तुं विदग्धा नार्येव जानाति, न त्वन्या । तादृशी वक्रोक्त्यादि

---

१ 'अत्रोत्प्रेक्षोत्थेयमनुमानतोऽलंकारः' इति साहित्यविद्याधरी । २ 'करिष्यते' इति । ३ 'विदुषीति दूषणे' इति च साहित्यविद्याधरीसंमतः पाठः । ४ 'अत्र समासोक्तिरलंकारः' इति साहित्यविद्याधरी ।

वक्तुं चतुरा ना(अ)स्तीत्यर्थः । 'इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः' इति काव्यप्रकाशः । 'विस्पष्टं क्रियमाणादक्लिष्टा स्वरविशेषतो भवति । अर्थान्तरप्रतीतिर्यत्रासौ काकुवक्रोक्तिः ॥' इति 'वापीं स्नातुमितो गतासि न पुनस्तस्य प्रियस्यान्तिकम्' इत्यत्र स्नाननिषेधे स्नानविधिः, प्रियोपसरणविधौ तन्निषेध इति । तथा—'प्राणेश विज्ञप्तिरियं मदीया तत्रैव नेया दिवसाः कियन्तः । संप्रत्ययोग्यस्थितिरेष देशः कला यदिन्दोरपि तापयन्ति ॥' इति । तत्रैव दिवसा नेयाः नात्रागन्तव्यमिति निषेधो व्यज्यते । स निषेधोऽपि भङ्ग्या आगमविधिरेव । यतस्त्वया आत्मनो भर्तृविरहासहत्वं भङ्ग्या सूचितमिति निषेधवेषो विधिर्ज्ञातव्यः । अन्यदपि ग्रन्थान्तराज्ज्ञातव्यं सुधियां ॥

भ्रमामि ते भैमि सरस्वतीरसप्रवाहचक्रेषु निपत्य कत्यदः ।
त्रपामपाकृत्य मनाकुरु स्फुटं कृतार्थनीयः कतमः सुरोत्तमः ॥ ५१ ॥

भ्रमामीति ॥ हे भैमि, अहं ते तव सरस्वत्या रसो माधुर्यं तत्संबन्धिषु वक्रोक्त्यादिरूपप्रवाहचक्रेषु समूहेषु । आवर्तेष्वित्यर्थः । निपत्य कति कियन्तं कालं कति वारान् वा भ्रमामि भ्रान्तो भवामि । निषेधरूपेणोच्यते विधिरूपेण वेति निश्चयाभावात्कियत्कालं मया भ्रमितव्यमित्यर्थः । अन्योऽपि नदीजलप्रवाहावर्तेषु बहुवारं बहुकालं वा भ्राम्यति । कुलालचक्रनिपतितो घटादिर्वा । त्रपां लज्जां मनाक् ईषदपाकृत्य इन्द्रादिषु मध्ये कतमः सुरोत्तमः स्वयंवरेण त्वया कृतार्थनीयः । इन्द्रः, अग्निः, यमः, वरुणो वेति अद एतत्स्फुटं कुरु । नामग्राहमेकं वृण इति कथयेत्यर्थः । मनाक् प्रकटं कुर्विति वा । कति, 'कालाध्वनोः' इति कालवाचित्वेऽत्यन्तसंयोगे द्वितीयाबहुवचनान्तम् । सुरोत्तमः पुरुषोत्तमवत् । दिक्पतित्वाच्चतुर्णामपि सुरोत्तमत्वम् । भैमीवरणाभिप्रायं वा ॥

कतम इत्युक्तं तदेवोपन्यस्यति—

मतः किमैरावतकुम्भकैतवप्रगल्भपीनस्तनदिग्धवस्तव ।
सहस्रनेत्रान्न पृथग्मते मम त्वदङ्गलक्ष्मीमवगाहितुं क्षमः ॥ ५२ ॥

मत इति ॥ ऐरावतकुम्भस्थलस्य कैतवेन व्याजेन तत्कुम्भावेव प्रगल्भौ कठिनौ पीनौ मांसलौ स्तनौ यस्या दिशः प्राच्या धवः पतिः इन्द्रः तव मत ईप्सितः किम् । प्रायेणैवमेव त्वया विचारितं स्यादित्यर्थः । युक्तं चैतत्—त्वदङ्गलक्ष्मीं त्वच्छरीरशोभामवगाहितुं सामस्त्येनेक्षितुं सहस्रनेत्रादिन्द्रात्पृथक् अन्यो द्विनेत्रः मम मते क्षमो न । नेत्रद्वयेन तव सौन्दर्यं द्रष्टुं न शक्यते इति सहस्रनेत्रत्वादिन्द्र एव तव सौन्दर्यदर्शनयोग्य इति ममाप्ययमेवाशय इति भावः । तव मतो, मम मत इति 'क्तस्य च वर्तमाने' इति कर्तरि षष्ठी । सहस्रनेत्रात्, 'पृथग्विना—' इति पञ्चमी ॥

---

१ काव्यप्रकाशे सुखावबोधायां साहित्यविद्याधर्यां च 'वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम्' इत्येव पाठ उपलभ्यते । २ 'अत्र हेत्वाक्षेपालंकारः' इति साहित्यविद्याधरी । ३ 'अत्रानुप्रासश्लेषालंकारः' इति साहित्यविद्याधरी । ४ 'अत्रापह्नुतिसमासोक्त्यलंकारः' इति साहित्यविद्याधरी । 'अत्रोत्तरवाक्यार्थेन पूर्ववाक्यार्थनादानयार्थहेतुकं काव्यलिङ्गमलंकारः । तस्यापह्नवेन संसृष्टिः' इति जीवातुः ।

प्रसीद तस्मै दमयन्ति संततं त्वदङ्गसङ्गप्रभवैर्जगत्प्रभुः ।
पुलोमजालोचनतीक्ष्णकण्टकैस्तनुं घनामातनुतां स कण्टकैः ॥ ५३ ॥

प्रसीदेति ॥ हे दमयन्ति, तस्मै इन्द्राय प्रसीद त्वं प्रसन्ना भव । तं वृणीष्वेत्यर्थः । अनन्तरं स जगत्प्रभुरिन्द्रः त्वदङ्गसङ्गात्प्रभवो येषां तैः कण्टकै रोमाञ्चैः कृत्वा तनुं शरीरं संततं सर्वदा घनां निबिडां परिपूर्णामातनुतात् । किंभूतैः—पुलोमजाया इन्द्राण्या लोचनयोरतितरां सोढुमशक्यत्वात् तीक्ष्णकण्टकैस्तद्रूपकण्टकरूपैः सूच्यग्रतुल्यैः क्षुद्रशत्रुरूपैर्वा । त्वया वृते सतीन्द्राणीपरित्यागेन त्वय्येवानुरक्तो भविष्यतीति भावः । सपत्नीभूतत्वान्नर्तुरङ्गगतान्कण्टकान् दृष्ट्वाऽन्यस्या नेत्रयोः कण्टकविद्धवेदना भवतीत्युक्तिः । 'सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टकः' इत्यमरः । तस्मै 'क्रियया यमभिप्रैति' इति संप्रदानम् ॥

वह्निवरणे कारणमाह—

अबोधि तत्त्वं दहनेऽनुरज्यसे स्वयं खलु क्षत्रियगोत्रजन्मनः ।
विना तनोजस्विनमन्यतः कथं मनोरथस्ते वलते विलासिनि ॥ ५४ ॥

अबोधीति ॥ त्वं स्वयमप्रवर्तितैव दहनेऽग्नौ अनुरज्यसेऽनुरक्तासीति मया तत्त्वं परमार्थोऽबोधि अज्ञायि । हे विलासिनि, खलु यस्मात्क्षत्रियाणां गोत्रे वंशे जन्म यस्यास्तस्याः ते तव मनोरथः तं ओजस्विनं तेजस्विनं वह्निं विना परिहृत्य अन्यतोऽन्यस्मिन्पुरुषे कथं वलते । अपितु परेऽन्यत्र न यात्येव । तेजो हि तेजस्येवानुरज्यते । त्वं तेजस्विनी, वह्निरपि तेजस्वीति वह्नावनुरक्तासीति युक्तमिति मया ज्ञातमिति भावः । अन्यस्यापि क्षत्रियकुलोत्पन्नस्य मन इव शोभमानो रथः तेजस्विनमन्यं क्षत्रियं विहाय ब्राह्मणादिषु न वलते । अनुरज्यसे, श्यनो ङित्त्वात् 'अनिदिताम्—' इति नलोपः । अन्यतः, सप्तम्यर्थे तसिः ॥

त्वयैकतत्या तनुतापशङ्कया ततो निवर्त्यं न मनः कथंचन ।
हिमोपमा तस्य परीक्षणक्षणे सतीषु वृत्तिः शतशो निरूपिता ॥ ५५ ॥

त्वयेति ॥ सकलपतिव्रतानामाद्या एका चासौ सती च तया मुख्यपतिव्रतया त्वया तनोः शरीरस्य तापाद्धेतोः देहदाहनयं करिष्यतीति शङ्कया भिया संतापभिया च तस्मादग्नेः सकाशात् कथंचन केनापि प्रकारेण मनो न निवर्त्यं परावर्तनीयम् । यस्मात् परीक्षणक्षणे साधुत्वासाधुत्वपरीक्षार्थं दिव्यसमये, सीतादहनगमनादिसमये, सीतादिपतिव्रतापरीक्षासमये, तस्याग्नेः वृत्तिः स्थितिः शतशः अनल्पवारं हिमोपमा तुषारसदृशी निरूपिता दृष्टा च । त्वं चापि सती । शतशः सतीष्विति वा ॥

---

१ 'अत्रानुमानालंकारः' इति साहित्यविद्याधरी । २ 'अत्र हेतुरूपकालंकारः' इति साहित्यविद्याधरी । 'वाक्यार्थहेतुकं काव्यलिङ्गं व्यङ्ग्यमेव' इति जीवातुः । ३ 'सतीषु सर्वासु नारीषु निरूपे तस्य' इति साहित्यविद्याधरी । ४ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । 'अत्र पूर्ववाक्यस्यैकार्थनिवर्तनार्थहेतुकत्वात्पदार्थहेतुकमेकं काव्यलिङ्गम् । तस्यानुपमस्य पदार्थहेतुकत्वाद्वाक्यार्थहेतुकं चेत्यनयोः संकरः' इति जीवातुः ।

यमवरणे कारणमाह—

स धर्मराजः खलु धर्मशीलया त्वयास्ति चित्तातिथितामवापितः।
ममापि साधुः प्रतिभात्ययं क्रमश्चकास्ति योग्येन हि योग्यसंगमः॥५६॥

स धर्मेति॥ खलु निश्चये संभावनायां वा। स प्रसिद्धो धर्मराजो यमः त्वया चित्तातिथितां गोचरत्वमवापितः प्रापितोऽस्ति। यतः—धर्मप्रधानं शीलं यस्याः, धर्मं शीलयत्यभ्यस्यति वा एवंभूतया। धर्मशीलो हि धर्मशील एवानुरज्यत इति। अयं क्रम इयं परिपाटी ममापि साधुः समीचीना प्रतिभाति। एतन्ममापि संमतम्। हि यस्मात् कुलशीलादिभिर्योग्येन उत्तमेन सह योग्यस्यैव संगमश्चकास्ति, न त्वयोग्येन योग्यस्य। तस्माद् धर्मराजेन धर्मशीलायाः संबन्धो युक्त इति भावः॥

अजातविच्छेदलवैः स्मरोद्भवैरगस्त्यभासा दिशि निर्मलत्विषि।
धुतावधि कालममृत्युशङ्किता निमेषवत्तेन नयस्व केलिभिः॥५७॥

अजातेति॥ हे भैमि, त्वम् अगस्त्यभासाऽगस्त्यनक्षत्रदीप्त्या निर्मलत्विषि उज्ज्वलकान्तौ संभोगयोग्यायां दक्षिणस्यां दिशि तेन यमेन सह न जातो विच्छेदलवो वियोगलेशो येषु तैः स्मरोद्भवैः केलिभिः कृत्वा यमस्यैव पतित्वात् अमृत्युशङ्किता मृत्युभयरहिता सती निमेषवत्। धुतावधि निर्मर्यादम् आचन्द्रार्कं कालं नयस्वातिवाहय। अन्यवरणे विच्छेदः संभाव्यते, एतद्वरणे तु मरणाभावादाचन्द्रार्कं कामसुखमनुभवेति भावः। 'स्मरोत्सवैः' इति पाठे स्मरस्य उत्सवरूपैः कामसंबन्धिभिरुत्सवैश्चुम्बनादिभिः कृत्वा अजातविच्छेदलवैश्चुम्बनादिभिर्निरन्तरैरित्यर्थः। नयस्वेति ञित्त्वात्कर्त्रभिप्राये क्रियाफले तङ्। 'नय' इति वा॥

वरुणवरणे कारणमाह—

शिरीषमृद्वी वरुणं किमीहसे पयःप्रकृत्या मृदुवर्गवासवम्।
विहाय सर्वान्वृणुते स किं न सा निशापि शीतांशुमनेन हेतुना॥५८॥

शिरीषेति॥ शिरीषमृद्वी शिरीषपुष्पवत्कोमलाङ्गी त्वं वरुणमीहसे इच्छसि किम्। प्रायेणैवं संभावयामि। यतः—किंभूतम्—पयःप्रकृत्या उदकस्वभावेन, पयोलक्षणया प्रकृत्या उपादानकारणेन वा मृदुवर्गस्य मृदुवस्तुसङ्घस्य वासवम्। किंचित्पार्थिवावयवसहितस्याप्यशारीरस्य वरुणलोके विद्यमानत्वान्मृदुतममित्यर्थः। त्वमपि मृद्वी, सोऽपि मृदुरिति उभयोर्योग्यत्वम्। दृष्टान्तेनैतदेवोपपादयति—सा अतिशीतातिमृद्वी निशा अप्यनेन मृदुतरत्वेनैव हेतुना सर्वान्देवान् विहाय शीतांशुं चन्द्रं किं न वृणुते स्म अपितु वव्रे। योग्यत्वादित्यर्थः। हेतुना, 'सर्वनाम्नस्तृतीया च' इति तृतीया॥

असेवि यस्त्यक्तदिवा दिवानिशं श्रियः प्रियेणानणुरामणीयकः।
सहामुना तत्र पयः पयोनिधौ कृशोदरि क्रीड यथामनोरथम्॥५९॥

१ 'अत्र छेकानुप्रासार्थान्तरन्यासालंकारः' इति साहित्यविद्याधरी। २ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी। ३ 'अत्रोभयन्यासोऽलंकारः' यदुक्तं रुद्रटे—'ससामान्यावर्थौ स्फुटमुपमाया स्वरूपतोपेतौ। निर्दिश्येते यस्मिन्नुभयन्यासः स विज्ञेयः' इति साहित्यविद्याधरी। 'दृष्टान्तालंकारः' इति जीवातुः।

असेवीति ॥ लक्ष्मा चौः स्वर्गो येन श्रियः प्रियेण नारायणेन ननु महद् रत्नकं यस्यैवंभूतो यः क्षीरोदो दिवानिशं रात्रिंदिवमसेवि । हे कृशोदरि, त्वं तत्र पवनो दुग्धस्य पयोनिधौ तत्पतित्वादमुना सह सार्धं यथामनोरथं स्वेच्छया क्रीड । श्रीसहितो विष्णुर्यथा तत्र क्रीडति तथा त्वमप्यनेन सहेत्यर्थः । दिवानिशम्, 'कालाध्वनोः' इति द्वितीया । यथा-मनोरथम्, 'यथासादृश्ये' इति समासः ॥

इति स्फुटं तद्वचसस्तथादरात्सुरस्पृहारोपविडम्बनादपि ।
कराङ्कसुप्तैककपोलकर्णया श्रुतं च तद्भाषितमश्रुतं च तत् ॥ ६० ॥

इतीति ॥ कराङ्के हस्तक्रोडे सुप्तं स्थितमेकं कपोलकर्णं यस्याः एवंविधया तया तस्य दूतस्य इति पूर्वोक्तं भाषितं श्रुतं चाश्रुतं च । इन्द्रियपाटवाच्छ्रुतम्, अनङ्गीकाराच्च अश्रुतमिति भावः । स्फुटमुत्प्रेक्षायाम् । श्रवणे हेतुः—तस्य नलाकारस्य दूतस्य आदराच्छ्रुतम् । अश्रवणे हेतुः—सुरेषु इन्द्रादिषु स्पृहारोपोऽभिलाषारोपः, तद्रूपाद्विडम्बनाद् दूषणादश्रुतम् । पतिव्रताया मम अन्याभिलाषारोपवचनं दुष्टमिति नाकर्णितमित्यर्थः ॥

चिरादनध्यायमवाङ्मुखी मुखे ततः स सा वासयते दमस्वसा ।
कृतायतश्वासविमोक्षणाथ तं क्षणाद्बभाषे करुणं विचक्षणा ॥ ६१ ॥

चिरादिति ॥ ततोऽनन्तरं सचिन्तत्वादवाङ्मुखी विचक्षणा चतुरा सा दमस्वसा भैमी मुखे चिरकालमनध्यायं वचनाभावं वासयते स्म । मुहूर्तं तूष्णीं बभूवेत्यर्थः । अथ यथा कृतमायतं दीर्घं श्वासविमोक्षणं यया एवंभूता सती क्षणान्मुहूर्तादनन्तरं करुणं करुणरसयुक्तं वचनं, करुणं यथा तथा वा बभाषे । अकरुणमिति वा । निष्ठुरमुवाचेत्यर्थः । अन्तकदूतनोचितम् इत्यादिवक्ष्यमाणत्वात् । अनादरसूचकमौनावाङ्मुखत्वदीर्घनिःश्वासकरणात् विचक्षणेति साभिप्रायम् । प्रचण्डवायौ वाति सति तात्कालिकोऽनध्यायः क्रियते, अनन्तरं पुनः पठ्यते तद्वदुवाचेत्यर्थः । सचिन्तस्य जातिः स्वभावो वा । 'अनध्यायमवाङ्–' इत्यत्रैवा अध्यायशब्दः साधुः । वासयते 'णिचश्च' इति तङ् । 'अणावकर्मकात्–' इति न परस्मैपदम्, अणौ चित्तवत्कर्तृकत्वाभावात् अनध्यायस्य कर्तृत्वात् । विचक्षणा, 'अनुदात्तेतश्च हलादेः' इति युच् ॥

विनिन्दता दुष्कृतिनीं मम श्रुतिं दिगिन्द्रदुर्वाचिकसूचिसंचयैः ।
प्रयातजीवामिव मां प्रति स्फुटं कृतं त्वयाप्यन्तकदूततोचितम् ॥ ६२ ॥

विनिन्दतेति ॥ त्वयापि अतिसुन्दरेण नलतुल्याकारेणापि सता मां प्रति स्फुटमन्तकदूततोचितं यमदूतत्वोचितं कर्म कृतम् । किंभूतेन—[illegible]

---

१ 'अत्र [illegible]' । [illegible] इति साहित्यविद्याधरी । [illegible] सुखावबोधार्था साहित्यविद्याधरी । [illegible] इति जीवातुः । [illegible] इति साहित्यविद्याधरी ।

नादुष्कृतिर्नी दुष्कर्मकारिणीं मम श्रुतिं दिगिन्द्रा इन्द्रादिदिक्पालास्तेषां दुर्वाचिकानि दुष्टसंदेशवचनानि तद्रूपैः सूचिसंचयैः सूचिसङ्घैः कृत्वा विभिन्दता पीडयता। अत एव—प्रयातजीवामिव गतप्राणामिव मृतं पापिनं कर्णे सर्वत्र चाङ्गे सूचिसङ्घैर्यमदूतो यथा निष्ठुरं पीडयति। चतुर्णामपि दूतत्वाद्यमदूतोचितमेव त्वया कृतमित्यर्थः। अतिसुन्दरस्य विशेषतो नलतुल्याकारस्य सौम्याकारस्य मां प्रत्यतिपीडाकारित्वमयुक्तमिति त्वयापीत्यपिना सूचितम्। अन्योऽपि बौद्धादिरदुष्कृतिर्नी दोषलेशरहितां श्रेयोरूपां श्रुतिं वेदं दुष्टवचनैर्दूषयति। प्रयातो यातुमारब्धः, प्रशब्द आदिकर्मणि, तत्रैव निष्ठा॥

उक्तमेवार्थं सोपस्करमाह—

त्वदास्यनिर्यन्मदलीकदुर्यशोमषीमयं सल्लिपिरूपभागिव।
श्रुतिं ममाविश्य भवद्दुरक्षरं सृजत्यदः कीटवदुत्कटा रुजः॥ ६३॥

त्वदास्येति॥ अदः भवद्दुरक्षरं त्वयोक्तं दुष्टमक्षरं मम श्रुतिमाविश्य कीटवदुत्कटा दुःसहा रुजः पीडाः सृजति। किंभूतम्—तव आस्यान्निर्यन्निर्गच्छत् इन्द्राद्यनुरागरूपं मदलीकदुर्यशोरूपं मदीयमिथ्यापयशोरूपं मषीमयं मषीप्रचुरं सत् भवत्। अत एव लिपिरूपभागिव लेखनस्वरूपं भजदिव। सती चासौ लिपिश्च तद्रूपभाग् वा। कीटो यथा कर्णं प्रविश्य दुःसहां पीडां करोति। अन्यदप्यक्षरं मषीभाजननिर्यन्मषीलिखितं लिपिरूपं भवति॥

तमालिरूचेऽथ विदर्भजेरिता प्रगाढमौनव्रतयैकया सखी।
त्रपां समाराधयतीयमन्यया भवन्तमाह स्वरसज्ञया मया॥ ६४॥

तमिति॥ अथ विदर्भजेरिता भैमीप्रेरिता आलिः सखी तं ऊचे। हे दूत, इयं सखी भैमी प्रगाढमौनव्रतया दृढतरमौनलक्षणव्रतया एकया स्वस्य रसज्ञया जिह्वया त्रपां समाराधयति भजते, अन्यया मया मद्रूपया स्वस्य रसज्ञया जिह्वया, अथ च स्वरसं भैम्यभिलापविषयं जानत्या मया, कृत्वा भवन्तमाह। इयं लज्जावशात्स्वाभिप्रायं त्वां साक्षान्न बोधयति तस्मादेतत्प्रेरिता अहमेतदभिप्रायमेव ब्रवीमि तमाकर्णयेति भावः। मया लक्ष्म्या सह वर्तमानः तत्संबुद्धिः मम। आवन्तं भैमीविशेषणं वा। अन्योऽपि मौनी काञ्चिद्देवतामाराधयति॥

किमाहेत्याह—

तमर्चितुं मद्वरणस्रजा नृपं स्वयंवरः संभविता परेद्यवि।
ममासुभिर्गन्तुमनाः पुरःसरैस्तदन्तरायः पुनरेष वासरः॥ ६५॥
तदद्य विश्रम्य दयालुरेधि मे दिनं निनीषामि भवद्विलोकिनी।
नखैः किलाख्यायि विलिख्य पक्षिणा तवैव रूपेण समः स मत्प्रियः॥ ६६॥

---

१ 'अत्र रूपकोपमासमासोक्त्यलंकारः' इति साहित्यविद्याधरी। २ 'अत्र रूपकश्लेषोपमालंकारः' इति साहित्यविद्याधरी। 'रूपकोत्प्रेक्षासंकीर्णेयमुपमा' इति जीवातुः। ३ 'अत्र समासोक्तिश्लेषालंकारः' इति साहित्यविद्याधरी।

तमिति ॥ तदेवेति । मद्वरणलज्जा मदीयवरणमधूकमाल्या कृत्वा तं मलनामानं नृपमर्चितुं परेद्यवि श्वः स्वयंवरः सम्भविता । एष वासरः पुनः तस्य स्वयंवरस्यान्तरायो विघ्नरूपः । एतावानेव विलम्बोऽस्ति । किम्भूतः—पुरःसरैः एतद्दिवसात्पूर्वमेव गन्तुकामैः मम असुभिः प्राणैः सह गन्तुमना जिगमिषुः । तस्मान्मया इन्द्रादयो न वरीतव्या इति भावः । अयं दिवसः कथं निर्विघ्नो यास्यतीति चिन्तया मम प्राणा अतिव्याकुलाः । यस्मात् तत्तस्मादद्य विघ्नम्ये मम त्वं दयालुरेधि भव । त्वय्यत्र स्थिते सति मम प्राणा अपि स्थास्यन्तीत्यर्थः । नो चेन्न । तदेवाह—भवद्विलोकिनी भवन्तमवलोकयन्ती सती वर्तमानं दिनं निनीषामि अतिवाहयितुमिच्छामि । त्वदवलोकनव्याजात्प्राणधारणात्त्वया मम कृपा कृता भविष्यतीति भावः । परपुरुषविलोकनेन कथं पातिव्रत्यं तवेत्यत आह । किल यस्मात्तत्तेन राजहंसेन नलिनीदले नखैर्विलिख्य स मम प्रियो नलस्त्वमेव रूपेण समस्तुल्यः तादृशः सुन्दर आख्यायि कथितः । तस्मात्तव नलाकारत्वान्नलबुद्ध्यैव त्वदवलोकनान्मम प्राणधारणं त्वद्दर्शनेन पातिव्रत्यक्षतिर्मम नास्तीत्यर्थः । श्लोकद्वयमेकान्वयम् । अर्चितुम्, भौवादिकस्यार्चते रूपम् । 'सद्यःपरुत्परारि—' इति परेद्यवीति साधुः । पुरःसरैः, 'पुरोऽग्रतोऽग्रेषु—' इति टः ॥

अथ स्थितौ तवापि कार्यं स्यादित्याह—

दृशोर्द्वयी ते विधिनास्ति वञ्चिता मुखस्य लक्ष्मीं तव यन्न वीक्षते ।
असावपि श्वस्तदिमां नलानने विलोक्य साफल्यमुपैतु जन्मनः ॥९७॥

दृशोरिति ॥ विधिना ब्रह्मणा दैवेन वा तव दृशोः द्वयी नेत्रद्वयी वञ्चितास्ति । कथम्—यद्यस्मात् तवातिसुन्दरस्य मुखस्य लक्ष्मीं शोभां न वीक्षते आत्मना साक्षादित्यर्थः । आदर्शादौ तु प्रतिबिम्बस्यैव दर्शनात् । तत्तस्मादसावपि नेत्रद्वयी श्वो नलानने इमां त्वन्मुखशोभां विलोक्य जन्मनः साफल्यं कृतार्थत्वमुपैतु । सुन्दरवस्तुदर्शनेन नेत्रयोः साफल्यं भवति तस्मादद्यात्र स्थित्वा श्वो नलमुखलक्ष्मीविलोकनान्नेत्रसाफल्यं भविष्यति । त्वन्मुखं नलमुखसदृशमिति भावः । अथ च अहमेव इमां नलानने दृष्ट्वा जन्मसाफल्यं लप्स्ये इति न, किं त्वसावपि लप्स्यते इत्यपिशब्दार्थः ॥

कारणान्तरमप्याह—

ममैव पाणीकरणेऽग्निसाक्षिकं प्रसङ्गसंपादितमङ्ग संगतम् ।
न हा सहाधीतिधृतः स्पृहा कथं तवार्यपुत्रीयमजर्यमर्जितुम् ॥ ९८ ॥

ममेति ॥ अङ्ग दूत, मम पाणीकरण एव विवाहसमय एव अग्निः साक्षी यस्मिन् अग्निसाक्षिकमविनश्वरं संगतं मैत्रम्, अर्थान्नलेन सह त्वया प्रसङ्गसंपादितमनायासमर्जितं स्यादिति शेषः । अन्यार्थमागतेनापि त्वयाद्यात्र स्थितेन श्वस्तने अग्निसाक्षिकमविनाशिकमतुलं नलेन सह मैत्र्यमपि संपादितं स्यात् । तदर्थमप्यत्र स्थातव्यमित्यर्थः । तदपि मैत्र्या मम किं प्रयोजनमित्यत आह—हा खेदे । सहाधीतिधृतो लक्षणया बृहस्पत्यादिना सहपठनस्य तव आर्यपुत्रीयं विशिष्टकुलोत्पन्नत्वेन मत्पतिसंबन्धि अजर्यं मैत्रमर्जितुं संपादयितुं स्पृहा-

१ 'अत्र पूर्वश्लोके सहोक्त्यनुप्राणितोऽतिशयोक्त्यलंकारः, उत्तरश्लोके [illegible]लंकारः' इति साहित्यविद्याधरी । २ 'अत्र हेतुविशेषोक्तिरलंकारः' इति साहित्यविद्याधरी ।

कामो हरनेत्राग्निजनितं तत्प्रसिद्धं भस्म । अनात्मरूपः पदार्थः किमपि कर्तुं न शक्नोति । कामस्त्वभावरूपत्वादन्यस्यापि किमपि कर्तुं न शक्नोति किं पुनः पतिव्रताया मनेति भावः । यः पुनः स्मरो भस्म, तत्किं वस्त्वस्तु इति वान्वयः ॥

मदनाधीनत्वे दोषमाह—

न्यवेशि रत्नत्रितये जिनेन यः स धर्मचिन्तामणिरुज्झितो यया ।
कपालिकोपानलभस्मनः कृते तदेव भस्म स्वकुले स्तृतं तथा ॥ ७१ ॥

न्यवेशीति ॥ जिनेन बुद्धेन यो धर्मचिन्तामणिः धर्मरूपश्चिन्तामणिः सम्यग्दर्शन—सम्यग्ज्ञान—सम्यक्चारित्रलक्षणे रत्नत्रितये न्यवेशि चारित्रशब्दवाच्यो यः प्रक्षिप्तः सः सकलाभिलाषपूरकत्वात्सातिशयलक्षणधर्मरूपश्चिन्तामणिः यया स्त्रिया कपाली हरस्तस्य कोपलक्षणोऽनलोऽग्निः तस्य भस्मनः कामस्य कृते कामनिमित्तं उज्झितः परित्यक्तः, तया स्वकुले तद्भस्म एव स्तृतं विस्तारितम् । धर्मत्यागो नाम स्वकुले भस्मप्रक्षेपतुल्य इत्यर्थः । धर्मद्रोहिणा बौद्धेनापि यो धर्मोऽङ्गीकृतः स मदनपीडितत्वेन यया परित्यज्यते, तया स्वकुलं सकलङ्कमेव क्रियत इति मदनपीडया पातिव्रत्यं परित्यक्ष्यामीति दुराशां मा कृथा इति भावः । उन्मत्तेनापि भस्मार्थं चिन्तामणिर्न त्यज्यते, स यया त्यक्तः तया स्ववंशे भस्मैव क्षिप्तमिति युक्तम् । 'सद्दृष्टिज्ञानवृत्तानि धर्मं धर्मेश्वरा जगुः' इति बौद्धसिद्धान्ते रत्नत्रयमुक्तम् ॥

निपीय पीयूषरसौरसीरसौ गिरः स्वकंदर्पहुताशनाहुतीः ।
कृतान्तदूतं न तथा यथोदितं कृतान्तमेव स्वममन्यतादयम् ॥ ७२ ॥

निपीयेति ॥ असौ नलः पीयूषरसस्यौरस्यः पुत्र्योऽमृतरसोत्पन्नाः तद्वदतिमधुराः, अत एव स्वस्य नलस्य कंदर्प एव हुताशनोऽग्निस्तस्य आहुतीरुद्दीपिका गिरो निपीय सादरमाकर्ण्य स्वमात्मानं तथा मेन्या यथा येन प्रकारेणोदितमुक्तम् कृतान्तदूतं यमदूतं नामन्यत किंतु अदयं निष्कृपं स्वं कृतान्तं यममेवामन्यत । अनयोक्तं यमदूतत्वं त्वया प्रकटीकृतमिति, तदसत्यमुक्तम् । किंतु निर्दयत्वाद्यम एवाहमित्यमन्यत । मादृशः कोऽपि निर्दयो नास्तीति स्वात्मानं निन्दितवानित्यर्थः । निर्दयं दूत्ये करोमि इन्द्रादिष्वननुरागात्स्वस्मिन्नेव तस्यास्त्वात्मनोद्दीपनत्वं युक्तम् । औरसीः उरसा निर्मिता इत्यर्थे 'उरसोऽण् च' इत्यणन्तान्ङीपि ॥

स निम्नमर्मापि तदार्तिकाकुभिः स्वदूतधर्मान्न विरन्तुमैहत ।
शनैरशंसन्निभृतं विनिःश्वसन्विचित्रवाक्चित्रशिखण्डिनन्दनः ॥ ७३ ॥

स इति ॥ तदार्तिः तस्याः व्यथा तया व्यथया काकुभिर्दीनवाक्यैः निम्नमर्मा स्फुटितकामोऽपि स नलः स्वदूतधर्मान्न विरन्तुमैहत ऐच्छत् । धीरोदात्तत्वात्स्वधर्मं त्यक्तुं नैच्छदित्यर्थः । किं तर्हि चकारेत्याह—निभृतं यथा न ज्ञायते तथा गुप्तं यथा तथा कामपीडितत्वाद्विनिःश्वसन् शनैः पीडितत्वादेव मन्दमशंसदवोचत् । यतः—विचित्रवाचि सामर्थ्यम्-

---

१ 'अत्र ...' इति साहित्यविद्याधरी । २ '...' इति साहित्यविद्याधरी । ३ 'अत्र ...' इति साहित्यविद्याधरी ।

त्रिगुणत्वाभिप्राये चित्रशिखण्डिनन्दनो बृहस्पतिः बृहस्पतिरिव । 'वाचस्पतिश्चित्रशिखण्डिजः' इत्यमरः ॥

पूर्वसर्गे भैम्यां देवानुरागप्रतिपादनेन सामोक्त्वा, अस्मिन्सर्गे 'अहो मनस्त्वाम्–' (९।२१) इत्यादिभिः सप्तभिः श्लोकैर्देवानुग्रहज्ञापनेन दानमुक्त्वा, यदि स्वमुद्बन्धुम्–'(९४६) इत्यादिश्लोकचतुष्केण भेदं प्रदर्श्य भेददण्डौ प्रतिपिपादयिषुरागामिचतुष्टयेन नल आह—

दिवो धवस्त्वां यदि कल्पशाखिनं कदापि याचेत निजाङ्गणालयम् ।
कथं भवेरस्य न जीवितेश्वरा न मोघयाच्ञः स हि भीरु भूरुहः ॥७४॥

दिव इत्यादि श्लोकचतुष्टयेन भेदः प्रतिपाद्यते । हे भैमि, दिवो धव इन्द्रः निजाङ्गणमेव आलयः स्थानं यस्य एवंभूतं कल्पशाखिनं यदि चेत्कदापि त्वां भैमी मह्यं दातव्येति याचेत तदा हे भीरु भयशीले, अस्येन्द्रस्य जीवितेश्वरा प्राणेश्वरा कथं न भवेः । अभीष्टदः स्वामिना न याचितः सदा संनिहितः सोऽस्मै त्वां दास्यत्येवेति भावः । हि यस्मात् स भूरुहः कल्पवृक्षः मोघा निष्फला याच्ञा यस्य एवंभूतो न भवति याचितमवश्यं ददात्येव । 'निजाजिरालयम्' इति वा पाठः । जीवितेश्वरेति समासो दिनेश्वरवज्ज्ञेयः । भीरुः 'भियः क्रुक्लुकनौ' 'ऊङुतः' इत्यूङ्[1] ॥

शिखी विधाय त्वदवाप्तिकामनां स्वयंहुतस्वांशहविः स्वमूर्तिषु ।
क्रतुं विधत्ते यदि सार्वकामिकं कथं स मिथ्यास्तु विधिस्तु वैदिकः ॥

शिखीति ॥ शिखी वह्निः त्वदवाप्तिकामनां त्वत्प्राप्त्यभिलाषं विधाय स्वमूर्तिषु स्वावयवेष्वाहवनीयादिषु स्वयमात्मनैव हुतम् 'अग्नये स्वाहा' इत्यादिमन्त्रेणान्यैर्यजमानैर्दत्तं स्वस्यांशभूतं हविर्येन एवंविधः सन् सार्वकामिकं सर्वकामप्रयोजनकम् । सर्वकामदातारमित्यर्थः । क्रतुं यदि विधत्ते स वैदिको विधिः तु पुनः मिथ्या असत्यः कथमस्तु । अन्येनानुष्ठितो यज्ञस्तस्मै सर्वान्कामान्ददाति, किं पुनर्वह्निनानुष्ठितः । तेन वह्नेस्त्वत्प्राप्तिर्भविष्यतीति भावः । सार्वकामिकम्, 'प्रयोजनम्' इति ठञ्[2] ॥

सदा तदाशामधितिष्ठतः करं वरं प्रदातुं चलिताद्बलादपि ।
मुनेरगस्त्याद्वृणुते स धर्मराड्यदि त्वदाप्तिं भण तत्र का गतिः ॥७६॥

सदेति ॥ स धर्मराट् यमः अगस्त्यान्मुनेः सकाशाद्भैमीं मह्यं देहीति त्वदाप्तिं यदि वृणुते तदा का गतिः कः प्रकारः भण वद । अपितु न कोऽपि । किंभूतात्—सदा तदाशां यमदिशमधितिष्ठतः । तथा अत एव—वरमभीष्टलक्षणं श्रेष्ठं करं राजग्राह्यभागं यमाय प्रदातुं बलादपि स्वयमेव चलितात्प्रवृत्तात् । यमदिशि वसताऽस्मै राजभागोऽवश्यं देय इति स्वयमेव विचार्य स्वयमेव दातुमागतेन त्वां याचमानाय यमाय मुनित्वाद्यत्किंचिद्दातुं समर्थेनागस्त्येन त्वमवश्यं दातव्या । अगस्त्यनिवारकः कोऽपि नास्तीत्यर्थः । त्वदाप्तिमपि बलाद्यदि वृणुते इति वा । बलादपि वृणुते इति वा । तदाशाम्, 'अधिशीङ्–' इति कर्मत्वम्[3] ॥

१ 'अत्र विभावनातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गालंकारः' इति साहित्यविद्याधरी । ३ 'अत्र काव्यलिङ्गालंकारः' इति साहित्यविद्याधरी । ४ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी ।

र्तियुक्तवाग्विषये चित्रशिखण्डिनन्दनो बृहस्पतिः बृहस्पतिरिव । 'वाचस्पतिश्चित्रशिखण्डिजः' इत्यमरः ॥

पूर्वसर्गे भैम्यां देवानुरागप्रतिपादनेन सामोक्त्वा, अस्मिन्सर्गे 'अहो मनस्त्वाम्–' (९।३९) इत्यादिभिः सप्तभिः श्लोकैर्देवानुग्रहज्ञापनेन दानमुक्त्वा, यदि स्वमुद्बन्धुम्–'(९।४६) इत्यादिश्लोकचतुष्केण भेदं प्रदर्श्य भेददण्डौ प्रतिपिपादयिषुरुपायचतुष्टयज्ञो नल आह—

दिवो धवस्त्वां यदि कल्पशाखिनं कदापि याचेत निजाङ्गणालयम् ।
कथं भवेरस्य न जीवितेश्वरा न मोघयाञ्चः स हि भीरु भूरुहः ॥७४॥

दिव इत्यादि श्लोकचतुष्टयेन भेदः प्रतिपाद्यते । हे भैमि, दिवो धव इन्द्रः निजाङ्गणमेव आलयः स्थानं यस्य एवंभूतं कल्पशाखिनं यदि चेत्कदापि त्वां भैमी मह्यं दातव्येति याचेत तदा हे भीरु भयशीले, अस्येन्द्रस्य जीवितेश्वरा प्राणेश्वरा कथं न भवेः । अभीष्टदः स्वामिना च याचितः सदा संनिहितः सोऽस्मै त्वां दास्यत्येवेति भावः । हि यस्मात् स भूरुहः कल्पवृक्षः मोघा निष्फला याञ्चा यस्य एवंभूतो न भवति याचितमवश्यं ददात्येव । 'निजाजिरालयम्' इति वा पाठः । जीवितेश्वरेति समासो दिनेश्वरवज्ज्ञेयः । भीरुः 'भियः क्रुक्लुकनौ' 'ऊङुतः' इत्यूङ्[१] ॥

शिखी विधाय त्वदवाप्तिकामनां स्वयंहुतस्वांशहविः स्वमूर्तिषु ।
क्रतुं विधत्ते यदि सार्वकामिकं कथं स मिथ्यास्तु विधिस्तु वैदिकः ॥

शिखीति ॥ शिखी वह्निः त्वदवाप्तिकामनां त्वत्प्राप्त्यभिलाषं विधाय स्वमूर्तिषु स्वावयवेष्वाहवनीयादिषु स्वयमात्मनैव हुतम् 'अग्नये स्वाहा' इत्यादिमन्त्रेणान्यैर्यजमानैर्दत्तं स्वस्यांशभूतं हविर्येन एवंविधः सन् सार्वकामिकं सर्वकामप्रयोजनकम् । सर्वकामदातारमित्यर्थः । क्रतुं यदि विधत्ते स वैदिको विधिः तु पुनः मिथ्या असत्यः कथमस्तु । अन्येनानुष्ठितो यज्ञस्तस्मै सर्वान्कामान्ददाति, किं पुनर्वह्निनानुष्ठितः । तेन वह्नेस्त्वत्प्राप्तिर्भविष्यतीति भावः । सार्वकामिकम्, 'प्रयोजनम्' इति ठञ् ॥

सदा तदाशामधितिष्ठतः करं वरं प्रदातुं चलिताद्बलादपि ।
मुनेरगस्त्याद्वृणुते स धर्मराड्यदि त्वदाप्तिं भण तत्र का गतिः ॥७६॥

सदेति ॥ स धर्मराड् यमः अगस्त्यान्मुनेः सकाशाद्भैमीं मह्यं देहीति त्वदाप्तिं यदि वृणुते तदा का गतिः कः प्रकारः भण वद । अपितु न कोऽपि । किंभूतात्—सदा तदाशां यमदिशमधितिष्ठतः । तथा अत एव—वरमभीष्टलक्षणं श्रेष्ठं करं राजग्राह्यभागं यमाय प्रदातुं बलादपि स्वयमेव चलितात्प्रवृत्तात् । यमदिशि वसताऽस्मै राजभागोऽवश्यं देय इति स्वयमेव विचार्य स्वयमेव दातुमागतेन त्वां याचमानाय यमाय मुनित्वाद्यत्किंचिद्दातुं समर्थेनागस्त्येन त्वमवश्यं दातव्या । अगस्त्यनिवारकः कोऽपि नास्तीत्यर्थः । त्वदाप्तिमपि बलाद्यदि वृणुते इति वा । बलादपि वृणुते इति वा । तदाशाम्, 'अधिशीङ्–' इति कर्मत्वम् ॥

१ 'अत्र विभावनातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी । २ 'अत्र काव्यलिङ्गालंकारः' इति साहित्यविद्याधरी । ३ 'अत्र काव्यलिङ्गालंकारः' इति साहित्यविद्याधरी । ४ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी ।

क्रतोः कृते जाग्रति वेत्ति कः कति प्रभोरपां वेश्मनि कामधेनवः ।
त्वदर्थमेकामपि याचते स चेत्प्रचेतसः पाणिगतैव वर्तते ॥ ७७ ॥

क्रतोरिति ॥ हे भैमि, अपां प्रभोर्वरुणस्य वेश्मनि क्रतोः कृते यागहविरर्थं कति कतिसंख्याकाः कामधेनवो जाग्रति सन्तीति को वेत्ति । अपि त्वियत्तया ताः कोऽपि न जानातीत्यर्थः । ततः किमत आह—स वरुणः भैमी मह्यं दातव्येति त्वदर्थं तासु मध्ये एकामपि चेद्याचते तर्हि प्रचेतसो वरुणस्य पाणिगतैव हस्तप्राप्तैव वर्तते । नत्वेषा चतुर्षु मध्ये एको वरणीयः, नान्यः प्रकारोऽस्तीति भावः ॥

दण्डमाह—

न संनिधात्री यदि विघ्नसिद्धये पतिव्रता पत्युरनिच्छया शची ।
स एव राजव्रजवैशसात्कुतः परस्परस्पर्धिवरः स्वयंवरः ॥ ७८ ॥

नेति ॥ शची इन्द्राणी भर्तुरन्यासक्तत्वेऽपि पतिव्रता पत्युरनिच्छया त्वत्कृतेन्द्रवरणेन । इन्द्रवरणव्यतिरेकेणेत्यर्थः । विघ्नसिद्धये यदि न संनिधात्री संनिहिता न भवेत् । भैम्याः स्वयंवरे ममानागमनाद्विघ्नो भवत्विति । तर्हि स तव स्वयंवर एव राजव्रजस्य त्वदर्थमन्योन्यस्पर्धिनो राजसमूहस्य वैशसात्कलहान्मरणाद्धेतोः कुतः क्व । यतः—परस्परमन्योन्यं स्पर्धिनः वराः वरयितारो राजानो यत्र । स्वयंवर एव न भविष्यति, कलहप्राप्तेस्तु दूरतो निरस्त इत्यर्थः । विवाहे गौर्याः सांनिध्यम्, स्वयंवरे शच्या इतीतिहासः ॥

तमेवार्थं सप्रपञ्चमाह—

निजस्य वृत्तान्तमजानतां मिथो मुखस्य रोषात्परुषाणि जल्पतः ।
मृधे किमच्छत्रकदण्डताण्डवं भुजाभुजि क्षोणिभुजां दिदृक्षसे ॥ ७९ ॥

निजस्येति ॥ त्वं क्षोणिभुजां राज्ञां भुजाभ्यां भुजाभ्यां प्रहृत्येदं युद्धं प्रवृत्तमिति भुजाभुजि भग्नानां छत्राणां अच्छत्रका ये दण्डास्तेषां ताण्डवं नृत्यं क्रियायां यस्मिन् तथा युद्धं किं दिदृक्षसे द्रष्टुमिच्छसि । किंभूतानां राज्ञाम्—रोषात् मिथोऽन्योन्यं परुषाणि जल्पत अत एव निजस्य स्वीयस्य मुखस्य वृत्तान्तं व्यापारमजानतां कं प्रति किमहं ब्रवीमीत्यविदुषाम् । अनेन राजयुद्धदर्शनार्थिन्येव त्वं, न तु स्वयंवरार्थिनीत्यर्थः । ... भावि राजन्यवैशसमेव भवेत्, न तु स्वयंवर इत्यर्थः । भुजाभुजि, 'तत्र तेनेदमिति—' इति समासे 'इच् कर्मव्यतिहारे' इतीच् 'अन्येषामपि—' इति दीर्घः । ... दिदृक्षसे, 'ज्ञाश्रुस्मृदृशां सनः' इति तङ् ॥

वाणि' इति विश्वः। श्रुवेः शोकस्य इति पक्षे इक् धातुनिर्देशे। स्वास्य रवेण निर्गन्तुम्, 'तुमर्थाच्च–' इति चतुर्थी। रवेण आस्यो निर्गमनं यत्र कण्ठादस्येति वा॥

अथोन्मदन्ती रुदती गतक्षमा ससंभ्रमा लुप्तरतिः स्खलन्मतिः।
व्यधात्प्रियप्राप्तिविघातनिश्चयान्मृदूनि दूना परिदेवितानि सा॥८७॥

अथेति॥ अथ सा भैमी मृदूनि श्रोतुः करुणोत्पादकानि परिदेवितानि विलापवचनानि व्यधात्। किंभूता—प्रियस्य नलस्य प्राप्तेः विघातस्य मम नलप्राप्तिः सर्वथा न भवित्रीति निश्चयात् दूना दुःखिता। तथा—उन्मदन्ती उन्माद्यन्ती। तथा—रुदती। तथा—गता क्षमा सहनशक्तिर्यस्याः सा। किमपि सोढुमसमर्था क्षणमपि जीवितुमसहा। तथा—ससंभ्रमा अधुना मम जीवनं न स्यात्, दुःखरूपं वा भवेदिति भयसहिता। तथा—लुप्तरतिः गतसुखा। तथा-स्खलन्ती किंकर्तव्यतामूढा मतिर्बुद्धिर्यस्याः सा। विप्रलम्भाख्यशृङ्गाररसस्य पोषकं वचनमुवाचेत्यर्थः॥

त्वरस्व पञ्चेषुहुताशनात्मनस्तनुष्व मद्भस्ममयं यशश्चयम्।
विधे परेहाफलभक्षणव्रती पताद्य तृप्यन्नसुभिर्ममाफलैः॥८८॥

त्वरस्वेति॥ हे अतिसंतापकत्वात्पञ्चेषुहुताशन कामाग्ने, त्वं त्वरस्व सवेगो भव। मां दग्ध्वा मद्भस्ममयम् आत्मनो यशश्चयं कीर्तिसमूहं तनुष्व विस्तारय शीघ्रं नाशय। मा स पिपीड इति भावः। स्त्रीवधेन तव महद्यशो भविष्यतीति सोपहासम्, हे विधे धातः, परस्य ईहा इच्छा तद्विषये यत् फलमभीष्टं तस्य भक्षणं अन्तरायकरणादनिष्पादनं तदेव व्रतमस्यास्तीति पराभिलाषहनने प्रयत्नशीलस्त्वम् अद्य नलप्राप्तेरभावादफलैर्व्यर्थैः ममासुभिः तृप्यन्सन् पत (अधो गच्छ। नरकं याहीत्यर्थः। तव परफलभक्षणव्रतं न तु प्राणभक्षणव्रतम् एतद्व्रतलोपेन) पतितो भव। स्त्रीवधजनितात्पातकात्स्वर्गात्पतितो भवेत्याक्रोशः। एतच्चानर्थकत्वात्प्रलापरूपम्॥

भृशं वियोगानलतप्यमान किं विलीयसे न त्वमयोमयं यदि।
स्मरेषुभिर्भेद्य न वज्रमप्यसि ब्रवीषि न स्वान्त कथं न दीर्यसे॥८९॥

भृशमिति॥ हे भृशं सुतरां वियोगानलतप्यमान स्वान्त हृदय, त्वं यदि अयोमयं लोहरूपं, तर्हि किं न विलीयसे द्रवीभवसि। वह्निना भृशं तप्यमानं लोहं विलीयते त्वं चेत्तत् तर्हि किमिति न विलीयसे, न च विलीयसे, तस्माल्लोहादपि त्वमतिकठिनमित्यर्थः। हे स्मरेषुभिर्भेद्य, त्वं वज्रमपि नासि। त्वं तु पुष्पबाणैर्भेद्यत्वात्कथं न दीर्यसे न ब्रवीषि, अपितु कथयेत्यर्थः। त्वं यदि वज्रमपि नासि तदा त्वं कथं न स्फुटसि तस्माद्वज्रमेव त्वमिति वा। दीर्यसे, कर्मकर्तरि तङ्॥

विलम्बसे जीवित किं द्रव द्रुतं ज्वलत्यदस्ते हृदयं निकेतनम्।
जहासि नाद्यापि मृषा सुखासिकामपूर्वमालस्यमिदं तवेदृशम्॥९०॥

---

१ 'अत्र भैम्याः शृङ्गारसरसीत्वेन ग्रीष्माम्बुसरसीत्वेन च रूपणाद्रूपकालंकारः। तस्य श्लेषोपमाभ्यां संकरः स्पष्टः' इति जीवातुः। २ 'अत्रानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। ३ 'अत्रातिशयोक्तिसमासोक्त्यलंकारः' इति साहित्यविद्याधरी। ४ 'अत्र निश्चयगर्भसंदेहालंकारः' इति साहित्यविद्याधरी।

वापि' इति विश्वः । शुचेः शोकस्य इति पक्षे इक् धातुनिर्देशे । रयाय रयेण निर्गन्तुम्, 'तुमर्थात्–' इति चतुर्थी । रयेण आयो निर्गमनं तत्र बद्धादरयेति वा ॥

अथोन्क्रमन्ती रुदती गतक्षमा ससंभ्रमा लुप्तरतिः स्खलन्मतिः ।
व्यधात्प्रियप्राप्तिविघातनिश्चयान्मृदूनि दूना परिदेवितानि सा ॥८७॥

अथेति ॥ अथ सा भैमी मृदूनि श्रोतुः करुणोत्पादकानि परिदेवितानि विलापवचनानि व्यधात् । किंभूता—प्रियस्य नलस्य प्राप्तेः विघातस्य मम नलप्राप्तिः सर्वथा न भवित्रीति निश्चयात् दूना दुःखिता । तथा—उन्क्रमन्ती उन्मादवती । तथा—रुदती । तथा—गता क्षमा सहनशक्तिर्यस्याः सा । किमपि सोढुमसमर्था क्षणमपि जीवितुमसहा । तथा—ससंभ्रमा अधुना मम जीवनं न स्यात्, दुःखरूपं वा भवेदिति भयसहिता । तथा—लुप्तरतिः गतसुखा । तथा-स्खलन्ती किंकर्तव्यतामूढा मतिर्बुद्धिर्यस्याः सा । विप्रलम्भाख्यशृङ्गाररसस्य पोषकं वचनमुवाचेत्यर्थः ॥

त्वरस्व पञ्चेषुहुताशनात्मनस्तनुष्व मद्भस्ममयं यशश्चयम् ।
विधे परेहाफलभक्षणव्रती पताद्य तृप्यन्नसुभिर्ममाफलैः ॥ ८८ ॥

त्वरस्वेति ॥ हे अतिसंतापकत्वात्पञ्चेषुहुताशन कामाग्ने, त्वं त्वरस्व सवेगो भव । मां दग्ध्वा मद्भस्समयम् आत्मनो यशश्चयं कीर्तिसमूहं तनुष्व विस्तारय शीघ्रं मारय । मा स्म पिपीड इति भावः । स्त्रीवधेन तव महद्यशो भविष्यतीति सोपहासम्, हे विधे धातः, परस्य ईहा इच्छा तद्विषये यत् फलमभीष्टं तस्य भक्षणं अन्तरायकरणादनिष्पादनं तदेव व्रतमस्यास्तीति पराभिलाषहनने प्रयत्नशीलस्त्वम् अद्य नलप्राप्तेरभावादफलैर्व्यर्थैः ममासुभिः तृप्यन्सन् पत (अधो गच्छ । नरकं याहीत्यर्थः । तव परफलभक्षणव्रतं न तु प्राणभक्षणव्रतम् एतद्व्रतलोपेन) पतितो भव । स्त्रीवधजनितात्पातकात्स्वर्गात्पतितो भवेत्याक्रोशः । एतच्चानर्थकत्वात्प्रलापरूपम् ॥

भृशं वियोगानलतप्यमान किं विलीयसे न त्वमयोमयं यदि ।
स्मरेषुभिर्भेद्य न वज्रमप्यसि ब्रवीपि न स्वान्त कथं न दीर्यसे ॥८९॥

भृशमिति ॥ हे भृशं सुतरां वियोगानलतप्यमान स्वान्त हृदय, त्वं यदि अयोमयं लोहरूपं, तर्हि किं न विलीयसे द्रवीभवसि । वह्निना भृशं तप्यमानं लोहं विलीयते त्वं चेत्तत् तर्हि किमिति न विलीयसे, न च विलीयसे, तस्माल्लोहादपि त्वमतिकठिनमित्यर्थः । हे स्मरेषुभिर्भेद्य, त्वं वज्रमपि नासि । त्वं तु पुष्पबाणैर्भेद्यत्वात्कथं न दीर्यसे न ब्रवीपि, अपितु कथयेत्यर्थः । त्वं यदि वज्रमपि नासि तदा त्वं कथं न स्फुटसि तस्माद्वज्रमेव त्वमिति वा । दीर्यसे, कर्मकर्तरि तङ् ॥

विलम्बसे जीवित किं द्रव द्रुतं ज्वलत्यदस्ते हृदयं निकेतनम् ।
जहासि नाद्यापि मृषा सुखासिकामपूर्वमालस्यमिदं तवेदृशम् ॥९०॥

---

१ 'अत्र भैम्याः शृङ्गारसरसीत्वेन ग्रीष्माम्बुसरसीत्वेन च रूपणाद्रूपकालंकारः । तस्य श्लेषोपमाभ्यामङ्गाभ्यां संकरः स्पष्टः' इति जीवातुः । २ 'अत्रानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । ३ 'अत्रातिशयोक्तिसमासोक्त्यलंकारः' इति साहित्यविद्याधरी । ४ 'अत्र निश्चयगर्भसंदेहालंकारः' इति साहित्यविद्याधरी ।

विलम्बसे इति ॥ हे जीवित जीव, किं विलम्बसे कालक्षेपं करोषि । अपि तु मा कार्षीः । द्रुतं शीघ्रं व्रज गच्छ । अदः ते तव निकेतनं निवासस्थानं हृदयं ज्वलति मदनाग्निना दह्यते । अद्यापि गृहे दह्यमानेऽपि त्रपा सुखासिकां सुखासनं निश्चिन्तत्वेनावस्थानं न जहाति लज्जसे । अपितु गृहज्वलनेऽपि सुखासनरूपमपूर्वं लोकोत्तरं तव इदमालस्यम् । अलसतोऽप्यन्यो गृहे दह्यमाने सुखासनं हित्वा पलाय्य गच्छति, त्वं तु ज्वलत्यपि गृहे बहिर्न निर्गच्छसि, अन्तरेव तिष्ठसि, एतत्तव लोकोत्तरमाश्चर्यकार्यालस्यमित्यर्थः । त्वयि निर्गते मम पीडा न भवेत्, तस्माच्छीघ्रं निर्गच्छेति भावः । आसिकाम्, 'धात्वर्थनिर्देशे ण्वुल् वक्तव्यः' इति ण्वुल् ॥

दृशौ मृषा पातकिनौ मनोरथाः कथं पृथू वामपि विप्रलेभिरे ।
प्रियश्रियः प्रेक्षणघाति पातकं स्वमश्रुभिः क्षालयतं शतं समाः ॥९१॥

दृशाविति ॥ हे दृशौ, पातकिनो लोकानां सर्वदा प्रतारकत्वात्पातकयुक्ताः मनोरथाः पृथू अपि वां मृषालीकेन कथं विप्रलेभिरे वञ्चितवन्तः । युवयोर्नलोऽलाभिः प्रदर्शित इत्यलीकपातकोपेता वामपीति वा । मृषा व्यर्था वां मनोरथा वा । अतिविशालयोरपि युवयोस्तैः प्रतारणा कुवेलमुचितं कृतमित्यर्थः । विप्रलम्भकारणादपि तेषां पातकित्वम् । पातकी अवश्यं परं प्रतारयति । अल्पोऽपि प्रतारयितुमनर्हः किंपुनर्महानिति, नलदर्शनयोग्यत्वं च पृथू इत्यनेन सूचितम् । अयुक्तान्मनसो मनोरथैः प्रतारणा युक्ता, युवां तु पृथू, अतः प्रतारणाऽनुचितेति वा । इदानीं युवां प्रियश्रियः नलशोभायाः प्रेक्षणघातकं विघ्नकारि स्वं स्वीयं सहजं पातकं मनोरथसंसर्गजनितं च शतं समाः । यावज्जीवमित्यर्थः । अश्रुभिः क्षालयतम् । यावत्पातकं तावन्नलदर्शनं नेति पातकं सर्वथा निराकुरुतमित्यर्थः । अन्यदपि मलिनमुदकेन क्षाल्यते, नलदर्शनं विना यावज्जीवं रोदनमेव युवयोः प्राप्तमिति भावः । मृषा निष्कारणं क्रीडादिना विना कथं विप्रलेभिरे, क्रीडायां विप्रलम्भो युक्त इति वा योजनीयम् । शतं समाः, अत्यन्तसंयोगे द्वितीया ॥

प्रियं न मृत्युं न लभे त्वदीप्सितं तदेव न स्यान्मम यत्त्वमिच्छसि ।
वियोगमेवेच्छ मनः प्रियेण मे तव प्रसादान्न भवत्वसौ मम ॥ ९२ ॥

प्रियमिति ॥ हे मनः, अहं त्वदीप्सितं प्रियं नलं न लभे, तदभावे त्वदीप्सितं मृत्युं च न लभे । किमिति त्वं यद्यदेवेप्सितमिच्छसि तदेवेप्सितं मम न स्यात् । नैव भवेदिति वा । तस्मात् त्वं प्रियेण नलेन सह मे वियोगमेव इच्छ । एवं सति तव प्रसादान्ममासौ वियोगो न भवतु । त्वं यदभिलषितं यद्यदिच्छसि तत्तन्न भवति । एवं सति वियोगमेवेच्छ यथा स न भविष्यति त्वां प्रार्थये । असौ मम, 'अदूरितः [illegible]—' इति [illegible] ॥

न काकुवाक्यैरतिवाममङ्गजं द्विषत्सु याचे पवनं तु दक्षिणम् ।
दिशापि मद्भस्म किरत्वयं तया प्रियो यया वैरविधिर्वधावधिः ॥९३॥

१ 'अत्र [illegible]' इत्यत्र साहित्यविद्याधरी । २ 'अत्र [illegible]' इति साहित्यविद्याधरी । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी । '[illegible]' इति [illegible] ।

वापि' इति विश्वः । शुचेः शोकस्य इति पक्षे इक् धातुनिर्देशो । रयाय रयेण निर्गन्तुम्, 'तुमर्थात्–' इति चतुर्थी । रयेण आयो निर्गमनं तत्र बद्धादरयेति वा ॥

अथोन्भ्रमन्ती रुदती गतक्षमा ससंभ्रमा लुप्तरतिः स्खलन्मतिः ।
व्यधात्प्रियप्राप्तिविघातनिश्चयान्मृदूनि दूना परिदेवितानि सा ॥८७॥

अथेति ॥ अथ सा भैमी मृदूनि श्रोतुः करुणोत्पादकानि परिदेवितानि विलापवचनानि व्यधात् । किंभूता—प्रियस्य नलस्य प्राप्तेः विघातस्य मम नलप्राप्तिः सर्वथा न भवित्रीति निश्चयात् दूना दुःखिता । तथा—उन्भ्रमन्ती उन्मादवती । तथा—रुदती । तथा—गता क्षमा सहनशक्तिर्यस्याः सा । किमपि सोढुमसमर्था क्षणमपि जीवितुमसहा । तथा—ससंभ्रमा अधुना मम जीवनं न स्यात्, दुःखरूपं वा भवेदिति भयसहिता । तथा—लुप्तरतिः गतसुखा । तथा–स्खलन्ती किंकर्तव्यतामूढा मतिर्बुद्धिर्यस्याः सा । विप्रलम्भाख्यशृङ्गाररसस्य पोषकं वचनमुवाचेत्यर्थः ॥

त्वरस्व पञ्चेषुहुताशनात्मनस्तनुष्व मद्भस्समयं यशश्चयम् ।
विधे परेहाफलभक्षणव्रती पताद्य तृप्यन्नसुभिर्ममाफलैः ॥ ८८ ॥

त्वरस्वेति ॥ हे अतिसंतापकत्वात्पञ्चेषुहुताशन कामाग्ने, त्वं त्वरस्व सवेगो भव । मां दग्ध्वा मद्भस्समयम् आत्मनो यशश्चयं कीर्तिसमूहं तनुष्व विस्तारय शीघ्रं मारय । मा स्म पिपीड इति भावः । स्त्रीवधेन तव महद्यशो भविष्यतीति सोपहासम्, हे विधे धातः, परस्य ईहा इच्छा तद्विषये यत् फलमभीष्टं तस्य भक्षणं अन्तरायकरणादनिष्पादनं तदेव व्रतमस्यास्तीति पराभिलापहनने प्रयत्नशीलस्त्वम् अद्य नलप्राप्तेरभावादफलैर्व्यर्थैः ममासुभिः तृप्यन्सन् पत (अधो गच्छ । नरकं याहीत्यर्थः । तव परफलभक्षणव्रतं न तु प्राणभक्षणव्रतम् एतद्व्रतलोपेन) पतितो भव । स्त्रीवधजनितात्पातकात्स्वर्गात्पतितो भवेत्याक्रोशः । एतच्चानर्थकत्वात्प्रलापरूपम् ॥

भृशं वियोगानलतप्यमान किं विलीयसे न त्वमयोमयं यदि ।
स्मरेषुभिर्भेद्य न वज्रमप्यसि ब्रवीपि न स्वान्त कथं न दीर्यसे ॥८९॥

भृशमिति ॥ हे भृशं सुतरां वियोगानलतप्यमान स्वान्त हृदय, त्वं यदि अयोमयं लोहरूपं, तर्हि किं न विलीयसे द्रवीभवसि । वह्निना भृशं तप्यमानं लोहं विलीयते त्वं चेत्तत् तर्हि किमिति न विलीयसे, न च विलीयसे, तस्माल्लोहादपि त्वमतिकठिनमित्यर्थः । हे स्मरेषुनिर्भेद्य, त्वं वज्रमपि नासि । त्वं तु पुष्पबाणैर्भेद्यत्वात्कथं न दीर्यसे न ब्रवीषि, अपितु कथयेत्यर्थः । त्वं यदि वज्रमपि नासि तदा त्वं कथं न स्फुटसि तत्माद्वज्रमेव त्वमिति वा । दीर्यसे, कर्मकर्तरि तङ् ॥

विलम्बसे जीवित किं द्रव द्रुतं ज्वलत्यदस्ते हृदयं निकेतनम् ।
जहासि नाद्यापि मृषा सुखासिकामपूर्वमालस्यमिदं तवेदृशम् ॥९०॥

---

१ 'अत्र भैम्याः शृङ्गाररसत्वेन शोकानुभवत्वेन च रूपकाद्युपकालंकारः । तस्य श्लेषोपमान्याम् सहान्यां संकरः स्पष्टः' इति जीवातुः । २ 'अत्रानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । ३ 'अत्रातिशयोक्तिरनालोक्यलंकारः' इति साहित्यविद्याधरी । ४ 'अत्र निश्चयगर्भसंदेहालंकारः' इति साहित्यविद्याधरी ।

नेति ॥ द्विपस्तु विरहिवैरिषु चन्द्रादिषु मध्ये काकुवाक्यैः दीनवचनैः कृत्वा अङ्गजं कामं न याचे नार्थये । यतोऽतिवाममतिसुन्दरम्, अतिवक्रं च, अतिक्रान्ता वामाः स्त्रियो येन—स्त्रीवचनाकारिणं च । वैरिणामनेकत्वेऽप्यतिप्रगल्भत्वाद्भावितौ याचनयोग्यत्वेन संभावितौ कामो दक्षिणवायुश्च । तत्र याचने दक्षिणत्वमेवोपयोगि, न तु सौन्दर्यं, न च प्रतिकूलत्वम्, न च स्त्रीकृतयाञ्चायां स्त्रीवचनाकारित्वमिति वैयर्थ्यभिया कामो याचितुमयोग्यः । अथ च रतिर्वामा स्त्री यस्य । अथ च रतौ प्रीतौ वामं वक्रम् । विरहित्वात्प्रीतिविरोधिनमित्यर्थः । तस्मात्कामं नार्थये । तु पुनः किंतु दक्षिणं पवनं याचे । यतः—परच्छन्दानुवर्तिनमुदारं च सरलमृजुगामिनं च मलयानिलं दीनवचनैर्याचे । दानशीलोत्पन्नत्वात्परवचनकारित्वात्स्वयं-दातृत्वादृजुमार्गगामित्वात्पवित्रत्वाच्च मलयानिल एव याचितुं योग्य इत्यर्थः । अथ च अङ्गजः पुत्रोऽपि अतिवक्रो न याचितुमर्हः । द्विपन्नप्येतैर्गुणैर्दक्षिणो याचितुमर्हः । दक्षिण-हस्तस्य दानार्हत्वाद्याचनयोग्यत्वम् वामहस्तस्य दानानर्हत्वान्न याचनयोग्यत्वं यथा, तथा प्रकृ-तेऽपि । याञ्चामाह—अयं मलयानिलो यया दिशा प्रियो नलो लक्षितः यस्यां दिशि वर्तते, तया दिशा उपलक्षितं तस्यां दिशि मद्भस्मापि किरतु क्षिपतु । दक्षिणानिलः कुण्डिनपुरा-दुत्तरस्यां वर्तमानां नलराजधानीं प्रति मद्भस्म नयत्वित्यर्थः । मरणानन्तरं मद्भस्मनो नल-संबन्धं कुर्विति मलयानिलं प्रार्थय इत्यर्थः । एतच्च कामेन कर्तुमशक्यम् । वैरी त्वद्वचनं कथं स करिष्यतीत्याशङ्क्याह—यतो वैरविधिर्वैरकरणं वधावधिर्मरणावधिः । वैरं मरणपर्यवसायि एतच्च कारणं सर्वत्र साधारणम् । दक्षिणत्वं त्वसाधारणमिति ज्ञेयम् । मद्भस्मनो नलदिक्सं-बन्धे सति मम धन्यत्वं स्यादिति भावः । दिशापीति यथास्थितैव वा योजना । 'अङ्गजं रुधिरेऽनङ्गकेशपुत्रमदेऽङ्गजः' इति विश्वः ॥

अमूनि गच्छन्ति युगानि न क्षणः कियत्सहिष्ये न हि मृत्युरस्ति मे ।
न मां तु कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः ॥९४॥

अमूनीति ॥ अमूनि क्षणरूपाणि युगानि गच्छन्ति, न स्वयं क्षणलक्षणः कालः । अमूनि युगानि दुःखरूपाणि गच्छन्ति, न क्षण उत्सवरूपाणि गच्छन्तीति वा । एक एव क्षणो बहुयुगरूपतया गच्छतीत्यर्थः । सोऽपि न गतो, वर्तत एवेति लटा सूचितम् । कथं युगरूप-त्वमित्याशङ्क्याह—कियत् किंपरिमाणं दुःखमहं सहिष्ये । अपितु तस्यावधिर्नास्तीत्यर्थः । [illegible]तावधि भविष्यतीत्यत आह—हि यस्मान्मे मृत्युर्नास्ति । ततश्च दुःखावधेरभावात्क्षण-युगरूपत्वं युक्तम् । मरणाभावः कथमित्यत आह—स्फुटं यस्मान्निश्चितं वा कान्तो नलः [illegible]न्तः स्थूलशरीरमध्ये अहंशब्दवाच्यं मां नोज्झिता न त्यजति । मनः तं नलं न [illegible] । प्राणाख्याः कायवायवः तच्च मनो न त्यजन्ति । एतावत्याः परम्पराया अविच्छेदे मरणं स्यादित्यर्थः । उज्झिता उज्झिष्यतीति वा 'बुद्धीन्द्रियाणि खलु पञ्च तथाऽ-पराणि कर्मेन्द्रियाणि मनआदिचतुष्टयं च । प्राणादिपञ्चकमथो वियदादिकं च कामश्च कर्म च तमः पुनरष्टमी पूः ॥' इति वचनाल्लिङ्गशरीरस्योपलक्षकं मनः । तथावल्लिङ्गशरीरम्, ताव-त्स्थूलशरीरं न त्यजति । जीवे ह्युत्क्रामतीन्द्रियाण्युत्क्रामन्ति, लिङ्गे चोत्क्रामति स्थूलशरीरं

१ 'अत्रातिशयोक्त्यर्थान्तरन्यासालंकारः' इति साहित्यविद्याधरी ।

नेति ॥ द्विपत्तु विरहिवैरिषु चन्द्रादिषु मध्ये काकुवाक्यैः दीनवचनैः कृत्वा अङ्गं कामं न याचे नार्थये । यतोऽतिवाममतिसुन्दरम्, अतिवक्रं च, अतिक्रान्ता वामाः स्त्रियो येन—स्त्रीवचनाकारिणं च । वैरिणामनेकत्वेऽप्यतिप्रगल्भत्वाद्भावितौ याचनयोग्यत्वेन संभावितौ कामो दक्षिणवायुश्च । तत्र याचने दक्षिणत्वमेवोपयोगि, न तु सौन्दर्यं, न च प्रतिकूलत्वम्, न च स्त्रीकृतयाच्ञायां स्त्रीवचनाकारित्वमिति वैयर्थ्यभिया कामो याचितुमयोग्यः । अथ च रतिर्वामा स्त्री यस्य । अथ च रतौ प्रीतौ वामं वक्रम् । विरहित्वात्प्रीतिविरोधिनमित्यर्थः । तस्मात्कामं नार्थये । तु पुनः किंतु दक्षिणं पवनं याचे । यतः—परच्छन्दानुवर्तिनमुदारं च सरलमृजुगामिनं च मलयानिलं दीनवचनैर्याचे । दानशीलोत्पन्नत्वात्परवचनकारित्वात्स्वयं दातृत्वादृजुमार्गगामित्वात्पवित्रत्वाच्च मलयानिल एव याचितुं योग्य इत्यर्थः । अथ च अङ्गजः पुत्रोऽपि अतिवक्रो न याचितुमर्हः । द्विपक्षप्येतैर्गुणैर्दक्षिणो याचितुमर्हः । दक्षिणहस्तस्य दानार्हत्वाद्याचनयोग्यत्वम् वामहस्तस्य दानानर्हत्वान्न याचनयोग्यत्वं यथा, तथा अङ्गेऽपि । याच्ञामाह—अयं मलयानिलो यया दिशा प्रियो नलो लक्षितः यस्यां दिशि वर्तते, तया दिशा उपलक्षितं तस्यां दिशि मद्भस्मापि किरतु क्षिपतु । दक्षिणानिलः कुण्डिनपुरादुत्तरस्यां वर्तमानां नलराजधानीं प्रति मद्भस्म नयत्वित्यर्थः । मरणानन्तरं मद्भस्मनो नलसंबन्धं कुर्विति मलयानिलं प्रार्थय इत्यर्थः । एतच्च कामेन कर्तुमशक्यम् । वैरी तद्वचनं कथं स करिष्यतीत्याशङ्क्याह—यतो वैरविधिर्वैरकरणं वधावधिर्मरणावधिः । वैरं मरणपर्यन्तमायि एतच्च कारणं सर्वत्र साधारणम् । दक्षिणत्वं त्वसाधारणमिति ज्ञेयम् । मद्भस्मनो नलदिक्संबन्धे सति मम धन्यत्वं स्यादिति भावः । दिशापीति यथास्थितैव वा योजना । 'अङ्गं रुधिरेऽनङ्गकेशपुत्रमदेऽङ्गजः' इति विश्वः ॥

अमूनि गच्छन्ति युगानि न क्षणः कियत्सहिष्ये न हि मृत्युरस्ति मे ।
न मां तु कान्तः स्फुटमन्तरुज्झिता न तं मनस्तच्च न कायवायवः ॥९३॥

अमूनीति ॥ अमूनि क्षणरूपाणि युगानि गच्छन्ति, न त्वयं क्षणलक्षणः कालः । अमूनि युगानि दुःखरूपाणि गच्छन्ति, न क्षण उत्सवरूपाणि गच्छन्तीति वा । एक एव क्षणो बहुयुगरूपतया गच्छतीत्यर्थः । सोऽपि न गतो, वर्तत एवेति लटा सूचितम् । कथं युगरूपत्वमित्याशङ्क्याह—कियत् किंपरिमाणं दुःखमहं सहिष्ये । अपितु तस्यावधिर्नास्तीत्यर्थः । जीवितावधि भविष्यतीत्यत आह—हि यस्मान्मे मृत्युर्नास्ति । ततश्च दुःखावधेरभावात्क्षणस्यापि युगरूपत्वं युक्तम् । मरणाभावः कथमित्यत आह—स्फुटं व्यक्तं निश्चितं वा कान्तो नलः तु पुनरन्तः स्थूलशरीरमध्ये अहंशब्दवाच्यं मां नोज्झिता न त्यजति । मनः तं नलं न त्यजति । प्राणाख्याः कायवायवः तच्च मनो न त्यजन्ति । एतावन्तः परम्परया अविच्छेदे कथं मरणं स्यादित्यर्थः । उज्झिता उज्झिष्यतीति वा 'बुद्धीन्द्रियाणि खलु पञ्च तथाऽपराणि कर्मेन्द्रियाणि मनआदिचतुष्टयं च । प्राणादिपञ्चकमथो वियदादिकं च कामश्च कर्म च तमः पुनरष्टमी पूः ॥' इति वचनाल्लिङ्गशरीरस्योपलक्षकं मनः । तथाच लिङ्गशरीरम्, तावत्स्थूलशरीरं न त्यजति । जीवे ह्युत्क्रामतीन्द्रियाण्युत्क्रामन्ति, लिङ्गे चोत्क्रामति स्थूलशरीरं

१ 'अत्राविद्यवोक्त्यर्थान्तरन्यासालंकारः' इति साहित्यविद्याधरी ।

तदा तव दयोदयो भवेत् स मास्त्विति वेधसो वैधर्म्यमिति भावः। 'एकतानोऽनन्यवृत्तिः' इत्यमरः॥

ममापि किं नो दयसे दयाधन त्वदङ्घ्रिमग्नं यदि वेत्थ मे मनः।
निमज्जयन्संतमसे पराशयं विधिस्तु वाच्यः क्व तवागसः कथा॥९८॥

ममेति॥ हे दयाधन नल, त्वं मम मनो यदि त्वदङ्घ्रिमग्नं त्वच्चरणशरणं यदि वेत्थ जानासि तर्हि ममापि किं नो दयसे ममाप्युपरि कृपां किं न करोषि। दयाधनत्वात्कुर्वित्यर्थः। कृपाऽकरणे तवापराधो नास्तीत्याह—तु पुनः परस्याशयमन्तःकरणं संतमसेऽज्ञाने निमज्जयन्त्रुडयन् विधिः दैवं वाच्य उपालब्धव्यः। तव आगसोऽपराधस्य कथा क्व। तत्रापराधो नास्ति ममैवादृष्टं तथाविधमित्यर्थः। तवान्तःकरणं हंसनिषेधद्वारा मम दुःखबोधनमकुर्वन्ब्रह्मैवोपालब्धव्यो, न तु त्वमित्यर्थ इति वा। मम, 'अधीगर्थ–' इति षष्ठी कर्मणि। संतमसम्, 'अवसमन्धेभ्यस्तमसः' इत्यच्[1]॥

कथावशेषं तव सा कृते गतेत्युपैष्यति श्रोत्रपथं कथं न ते।
दयाणुना मां समनुग्रहीष्यसे तदापि तावद्यदि नाथ नाधुना॥९९॥

कथेति॥ सा भैमी तव कृते कथावशेषं गता त्वय्यनुरक्ता सती त्वत्प्राप्त्यभावाज्जन्मान्तरेऽपि त्वत्प्राप्त्यर्थं मृतेति ते श्रोत्रपथं कथं नोपैष्यति। जनमुखात्त्वमपि श्रोष्यस्येव। तदा श्रुतेऽपि किमित्यत आह—हे नाथ प्राणेश, यद्यप्यधुना मां नानुगृह्णासि तथापि तदापि तस्मिन्नपि समये तावत् दयाणुना कृपालेशेन मां समनुग्रहीष्यसे। तावच्छब्दः संभावनायाम्। सा मदर्थं मृतेति तदा यद्वदिष्यसि तेनैव कृपालेशेनाहं धन्या भविष्यामीति भावः। अन्योऽपि स्वामी स्वीयं पूर्वमननुगृह्णन्नपि तदर्थे कष्टां दशां प्राप्तमनुगृह्णाति। अनुग्रहीष्यसे, स्वरितेत्त्वात्तङ्, 'ग्रहोऽलिटि–' इति दीर्घः[3]॥

ममादरीदं विदरीतुमान्तरं तदर्थिकल्पद्रुम किंचिदर्थये।
भिदां हृदि द्वारमवाप्य मा स मे हतासुभिः प्राणसमः समं गमः॥१००॥

ममेति॥ मम इदमान्तरं हृदयं विदरीतुं स्फुटितुं यस्मादादरि सादरम्, तत्तस्मात् हे अर्थिनां कल्पद्रुम, अहं किंचिदर्थये याचे। कल्पवृक्षत्वात्त्वया तद्दातव्यमित्यर्थः। किं तदित्याह—हृदि भिदां विदारणलक्षणं द्वारं मार्गमवाप्य मे हतैः विनष्टैः अथ च निष्फलैरसुभिः प्राणैः समं सार्धं प्राणसमः प्राणप्रियः स त्वं मा गमः। प्राणा मद्धृदयाद्गच्छन्तु, त्वं मा गमः। जन्मान्तरेऽपि मम त्वय्येवासक्त्या भवितव्यमिति त्वां प्रार्थय इति भावः। विदरीतुम्, 'वृतो वा' इति दीर्घः[5]॥

इति प्रियाकाकुभिरुन्मिषन्भृशं दिगीशदूत्येन हृदि स्थिरीकृतः।
नृपं स योगेऽपि वियोगमन्मथः क्षणं तमुद्भ्रान्तमजीजनत्पुनः॥१०१॥

इतीति॥ दिगीशानां दूत्येन हृदि अस्थिरोऽप्येतावत्कालपर्यन्तं स्थिरीकृतः स दर्शन-

---

१ 'अत्र च्छेकानुप्रासालंकारः' इति साहित्यविद्याधरी। २ 'अत्रातिशयोक्तिसममलंकारः' इति साहित्यविद्याधरी। ३ 'अत्र च्छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। ४ 'मैव मे' इति जीवातुसुखावबोधासंमतः पाठः। ५ 'अत्र हेतुरूपकालंकारः' इति साहित्यविद्याधरी।

कुशला नास्तीत्यलीकरोदनं कर्तुं त्वमेव जानासि नान्येत्यर्थः। अलीकरोदनेऽप्यतितरां शोभस इत्यर्थः। अनुस्वारच्यवनाद्यत्रार्थान्तरप्रतीतिः तद्बिन्दुच्युतकम्। 'कान्तो नयनानन्दी बाले दुःखेन भवति तदा' इति तदुदाहरणम्। च्युतम्, 'नपुंसके भावे क्तः' स्वार्थे कन्॥

अपास्तपाथोरुहि शायितं करे करोपि लीलाकमलं किमाननम्।
तनोपि हारं कियदस्रुणः स्रवैरदोषनिर्वासितभूषणे हृदि॥ १०५॥

अपास्तेति॥ अपास्तं विरहवशात्त्यक्तं पाथोरुट् लीलाकमलं येन एवंविधे करे शायितं चिन्तावशात्स्थापितमाननं लीलाकमलं किमिति करोषि। मुखमेव लीलाकमलस्थाने जातमित्यर्थः। तन्मा कुरु, लीलाकमलं गृहाण, चिन्तां मा कार्षीरिति भावः। तथा—अदोषाणि त्रासादिदोषरहितानि, अथ च अपराधेन विनैव विरहवशान्निर्वासितानि भूषणानि मुक्ताहारादीनि येन तादृशे हृदि अस्रुणः स्रवैरस्रुबिन्दुभिः कियत्किंपरिमाणं कियन्तं कालं च हारं मुक्ताहारं तनोषि। अपि तु मा स्म तानीः। अस्रुबिन्दवो हारस्थाने भवन्तीत्यर्थः। तन्मा कुरु, भूषणान्यङ्गीकुरु। रोदनं मा कार्षीरिति भावः। अन्यत्र सापराधो निर्वास्यत इति दृष्टम्। कियत्, क्रियाविशेषणम्॥

दृशोरमङ्गल्यमिदं मिलज्जलं करेण तावत्परिमार्जयामि ते।
अथापराधं भवदङ्घ्रिपङ्कजद्वयीरजोभिः सममात्ममौलिना॥ १०६॥

दृशोरिति॥ हे भैमि, अहं तावत्प्रथमतः करेण कृत्वा ते तव दृशोर्नेत्रयोः मिलत्संबद्धं निरन्तरं गलत् इदममङ्गल्यमशुभरूपं जलं बाष्पं परिमार्जयामि। प्रोञ्छामीत्यर्थः। अथ पश्चाद्भवत्या अङ्घ्रिपङ्कजद्वय्याः रजोभिः समं सह आत्ममौलिना स्वमस्तकेन स्वीयमपराधमपि प्रोञ्छामि। मत्कृतादपराधाद्यदि रोदिषि, तर्ह्यमङ्गल्यं रोदनमादावपनेष्यामि पश्चान्मस्तके तव चरणरजो यावल्लगति तावत्तव चरणौ शरणं प्रविश्यापराधमपनेष्यामि। प्रसन्ना भवेति भावः। मङ्गल्यम्, अर्हार्थे यत्। परिमार्जयामि, वर्तमानसामीप्ये लट्॥

मम त्वदच्छाङ्घ्रिनखामृतद्युतेः किरीटमाणिक्यमयूखमञ्जरी।
उपासनामस्य करोतु रोहिणी त्यज त्यजाकारणरोषणे रुषम्॥ १०७॥

ममेति॥ हे भैमि, मम रोहिणी रक्तवर्णा किरीटमाणिक्यमयूखानां मञ्जरीतुल्या दीर्घाकारा दीप्तिरस्य पुरोवर्तिनः तवाङ्घ्रिनखलक्षणस्यामृतद्युतेश्चन्द्रस्योपासनां सेवां करोतु। हे निष्कारणं रुष्यसीत्यकारणरोषणे भैमि, रोषं त्यज त्यज। सदाहं त्वच्चरणसेवकोऽस्मि। कोपं मुञ्च मुञ्चेति भावः। सौम्यस्य सेवा कर्तुं शक्या, न तु रोषणस्य। चन्द्रप्रिया रोहिणी तारका चन्द्रं सेवते, समीपवर्तिनी च भवतीत्युचितमेव। रोहिणी, 'वर्णादनुदात्तात्—' इति

१ 'अत्रानुप्रासापह्नुत्यतिशयोक्त्यलंकारः' इति साहित्यविद्याधरी। 'अत्र कैतवशब्देनास्रुबिन्दुच्युतेस्ताद्रूप्यापह्नवेन वर्णात्मकबिन्दुच्युतकत्वारोपादपह्नवभेदः। तदुपजीवनेन ससारमिति श्लिष्टपदोपात्तप्रागुक्तार्थद्वयाभेदाध्यवसायेन बिन्दुच्युतकाख्यकार्यकारणोत्प्रेक्षणाच्छेषमूला सापह्नवोत्प्रेक्षा सा च 'असंशयम्' इति व्यञ्जकप्रयोगाद्वाच्या' इति जीवातुः। २ 'अत्रातिशयोक्त्याक्षेपालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र सहोक्तिरूपकतुल्ययोगितालंकारः' इति साहित्यविद्याधरी।

येत्यर्थः । अङ्कापेक्षयाधोतनस्य निकृष्टत्वात्, तव चातिप्रियत्वान्ममाङ्क एवोपवेशनयोग्य इति भावः । अङ्ग भो ! अहं इत्येतद्गदनादुन्मादवशादालपम् । त्वया मृष्यतां क्षम्यताम् । यतः मम उरोविना कतमत् अङ्गं तव आसनं भवितुं योग्यम्, अपि तु न किमपि । अङ्कापेक्षयापि वक्षस उत्कृष्टत्वात्तत्रैवोपविश्यतामिति भावः । ज्ञनात्कृतोऽपराधः क्षन्तुमर्हः । अङ्गेति कोमलामन्त्रणे । 'ज्ञनाङ्कनात्' इति च पाठः । न न, ज्ञनाङ्कनाद्, इति च संभ्रमे द्विरुक्तिः ॥

अधीतपञ्चाशुगबाणवञ्चने स्थिता मदन्तर्बहिरेपि चेदुरः ।
स्मराशुगेभ्यो हृदयं बिभेतु न प्रविश्य तत्त्वन्मयसंपुटे मम ॥ ११५ ॥

अधीतेति ॥ हे कामपीडाया अदर्शनादधीताभ्यस्ता पञ्चाशुगस्य कामस्य बाणवञ्चना यया तत्संबुद्धिः, मदन्तः मन्मनसि स्थिता त्वं बहिर्देशेऽपि उरश्चेदेषि प्राप्नोषि तत् तर्हि कृतमदनबाणवञ्चनायास्तवान्तर्बहिश्च वर्तमानत्वात्त्वन्मयसंपुटे तद्रूपे संपुटे मम हृदयं प्रविश्य स्मराशुगेभ्यो न बिभेतु । चिरकालं मनसि स्थितापि हृदयं बहिश्चेदालिङ्गसि तर्हि त्वदालिङ्गनवशान्मम कामज्वरोऽपि शान्तिमुपैष्यतीति भावः ॥

परिष्वजस्वानवकाशबाणता स्मरस्य लग्ने हृदयद्वयेऽस्तु नौ ।
दृढा मम त्वत्कुचयोः कठोरयोरुरस्तटीयं परिचारिकोचिता ॥ ११६ ॥

परीति ॥ हे भैमि, त्वं मां परिष्वजस्वालिङ्ग । किमिति—नौ आवयोः गाढालिङ्गनवशान्निरन्तरं मिथो लग्ने मिलिते हृदयद्वये वक्षसि स्मरस्य अनवकाशबाणता निरवकाशबाणत्वमस्तु । निबिडसंलग्ने वस्तुद्वये ह्यवकाशलेशोऽपि न लभ्यत इत्यर्थः । मम दृढातिकठोरा विशाला चेयमुरस्तटी वक्षस्तटी कठोरयोस्त्वत्कुचयोः परिचारिका सेवाकर्त्री समुचिता । तुल्ययोरेव सेव्यसेवकभावो घटत इत्यर्थः । आलिङ्गनयोग्यत्वमनेन सूचितम् । द्वयोरपि यथा कामपीडा न भवति तथा विधेयम् । गाढालिङ्गनं देहीति भावः । परिष्वजस्वेति, 'परिनिविभ्यः—' इति षत्वम् ॥

तवाधराय स्पृहयामि यन्मधुस्रवैः श्रवःसाक्षिकमाक्षिका गिरः ।
अधित्यकासु स्तनयोस्तनोतु ते ममेन्दुलेखाभ्युदयाद्भुतं नखः ॥ ११७ ॥

तवेति ॥ हे भैमि, अहं तव तस्मै अधराय स्पृहयामि तदीयमधरपानमिच्छामि । तव गिरः यन्मधुस्रवैर्यस्याधरस्य मधुनिर्झरैः कृत्वा श्रवसी कर्णौ साक्षिणौ यस्य तत् श्रवःसाक्षिकं तादृशं माक्षिकं मधु यासु एवंभूताः सन्ति । ओष्ठस्यामृतमयत्वात्तत्संसर्गाद्वाचः कर्णयोरमृततुल्या भवन्तीत्यर्थः । तथा—मम नखः ते स्तनयोरधित्यकासूर्ध्वदेशेषु इन्दुलेखाया अभ्युदय उदयस्तेन यदद्भुतमाश्चर्यं तत् तनोतु करोतु । नखक्षतस्यार्धचन्द्राकारत्वात् [illegible] चन्द्रलेखोदितेति तस्मादद्भुतमित्यर्थः । ओष्ठपानं नखक्षतं च [illegible] भावः । अधित्यकेति स्तनयोरुपरिभागस्य [illegible] भवति । [illegible], 'स्पृहेरीप्सितः' इति संप्रदानत्वम् ॥

---

१ 'अत्राक्षिरत्नोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र [illegible]लंकारः' इति साहित्यविद्याधरी ।

स्मितस्येति ॥ हे भैमि, त्वं सृक्कणा ओष्ठप्रान्तेन स्मितस्येषद्धासस्य कणाल्लेशान्संभावय धन्यान्कुरु । तथा—भ्रुवोऽञ्चलं प्रान्तं लीलया विलासेन चलं विधेहि । तथा—अपाङ्गरथ्यायाः नेत्रप्रान्तमार्गस्य पथिकीं नित्यचारिणीं दृशं च प्रसद्य प्रसन्नीभूय हेलया विलासेन ममोपरि संधेहि । स्मितभ्रूचलनरूपैः प्रसद्य मां सविकासं कृपाकटाक्षैर्विलोकयेति भावः । पथिकीम्, 'पथः ष्कन्' षित्त्वान्ङीप् । 'उपर्युपरिष्टात्' इत्यतसर्थत्वादुपरियोगे 'षष्ठ्यतसर्थ–' इति ममेति षष्ठी ॥

समापय प्रावृषमस्रुविप्रुषां स्मितेन विश्राणय कौमुदीमुदः ।
दृशावितः खेलतु खञ्जनद्वयी विकासि पङ्केरुहमस्तु ते मुखम् ॥११२॥

समापयेति ॥ त्वं अविच्छिन्नत्वाविलादस्रुविप्रुषामस्रुविन्दूनां प्रावृषं समापय । तथा अत्युज्ज्वलत्वादत्याह्लादकत्वाच्च स्मितेन कौमुदीमुदः चन्द्रिकासंबन्धिनो हर्षान्विश्राणय मह्यं वितर । तथा–अतिचञ्चलत्वात्खञ्जनाकारत्वाच्च दृशावेव खञ्जनद्वयी इतो मल्लक्षणेऽस्मिञ्जने खेलतु ममोपरि क्रीडतु । तथा—लक्ष्मीस्थानत्वाद्वर्तुलत्वाच्च ते मुखं विकासि विकस्वरं पङ्केरुहं कमलमस्तु भवतु । रोदनं त्यक्त्वा प्रसन्ना भूत्वा स्मितपूर्वकटाक्षविलोकनपूर्वं किंचिद्ब्रूहीति भावः । प्रावृषि गतायां शरदि कौमुदीमुदः खञ्जनक्रीडा कमलविकासश्च भवति ॥[1]

सुधारसोद्वेलनकेलिमक्षरस्रजा सृजान्तर्मम कर्णकूपयोः ।
दृशौ मदीये मदिराक्षि कारय स्मितश्रिया पायसपारणाविधिम् ॥११३॥

सुधेति ॥ हे भैमि, मम कर्णकूपयोरन्तर्मध्येऽक्षरस्रजा वर्णमालया वाक्यरचनया कृत्वा सुधारसस्यामृतरसस्योद्वेलना निर्मर्यादा या केलिः क्रीडा तां सृज रचय अतिमधुरवागमृतपूर्णौ मम कर्णौ विधेहि । किमपि ब्रूहीति भावः । कूपशब्दोऽत्र जलाशयाभिप्रायः । ततश्च वाप्यादौ स्वादूदकेन यथा तीरमतिक्रम्यते तथा क्रीडा क्रियत इति चोक्तिः । मदयत इति मदिरे उन्मादजनके अक्षिणी यस्यास्तत्संबुद्धिर्हे मदिराक्षि, मदीये दृशौ स्वीयया स्मितश्रिया कृत्वा पायसेन दुग्धसंस्कृतपायसेन कृत्वा या पारणा उपवासानन्तरभोजनं तस्य विधिं कारय । स्मितस्य शुभ्रत्वात्पायसत्वम् । उपोषितस्य पायसपारणया यथा तृप्तिः, तथा त्वदीयस्मितशोभावलोकनेन मन्नेत्रयोरिति स्मितपूर्वं किमपि ब्रूहि । मामनुगृहाणेति भावः । उद्गतो वेलामुद्वेलः, 'अत्यादयः–' इति समासः । तस्य करणमुद्वेलनम् । मदिर इत्यत्र 'इषिमदि–' इत्यादिनौणादिकः किरच्प्रत्ययः । रामायणे—'नार्यो मदिरलोचनाः' इति दृशौ, 'हृक्रोरन्यतरस्याम्' इत्यणौ कर्तुर्णौ कर्मत्वम् । 'परमान्नं तु पायसम्' इत्यमरः संस्कृतार्थेऽण्[2] ॥

ममासनार्धे भव मण्डनं न न प्रिये मदुत्सङ्गविभूषणं भव ।
अहं भ्रमादालपमङ्ग मृष्यतां विना ममोरः क्व तवासनम् ॥ ११४ ॥

ममेति ॥ हे प्रिये, मम आसनार्धे सिंहासनार्धे मण्डनमलंकरणं भव । आसनस्येत्यर्थात् । एवं न न । अविचार्य मयैतदुक्तम् । किंतु त्वं मदुत्सङ्गविभूषणं भव । ममाङ्कं नाऽ-

---

१ 'अत्रानुप्रासरूपकोपमालंकारः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिरूपकालंकारः' इति साहित्यविद्याधरी । ३ 'अत्रातिशयोक्तिश्लेषालंकारः' इति साहित्यविद्याधरी ।

चेत्यर्थः । अङ्गापेक्षयाधोतनस्य निकृष्टत्वात्, तव चातिप्रियत्वान्ममाङ्क एवोपवेशनयोग्य इति भावः । अङ्ग भो ! अहं इत्येतद्गमनादुन्मादवशादालपम् । त्वया नृप्यतां क्षम्यताम् । यतः मम उरोविना कतमत् अङ्गं तव आसनं भवितुं योग्यम्, अपि तु न किमपि । अङ्गापेक्षयापि वक्षस उत्कृष्टत्वात्तत्रैवोपविश्यतामिति भावः । अनाकृतोऽपराधः क्षन्तुमर्हः । अङ्गेति कोमलामन्त्रणे । 'अनाङ्गमाद' इति च पाठः । न न, अनाङ्गमाद्, इति च संभ्रमे द्विरुक्तिः ॥

अधीतपञ्चाशुगबाणवञ्चने स्थिता मदन्तर्बहिरेषि चेदुरः ।
स्मराशुगेभ्यो हृदयं बिभेतु न प्रविश्य तत्त्वन्मयसंपुटे मम ॥ ११५ ॥

अधीतेति ॥ हे कामपीडाया अदर्शनादधीतान्यस्ता पञ्चाशुगस्य कामस्य बाणवञ्चना यया तत्संबुद्धिः, मदन्तः मन्मनसि स्थिता त्वं बहिर्देशेऽपि उरश्चेदेषि प्राप्नोषि तत् तर्हि कृतमदनबाणवञ्चनायास्तवैवमयत्र वर्तमानत्वात्त्वन्मयसंपुटे तद्रूपे संपुटे मम हृदयं प्रविश्य स्मराशुगेभ्यो न बिभेतु । चिरकालं मनसि स्थितापि हृदयं बहिश्चेदालिङ्गसि तर्हि त्वदालिङ्गनवशान्मम कामज्वरोऽपि शान्तिमुपैष्यतीति भावः ॥

परिष्वजस्वानवकाशवाणता स्मरस्य लग्ने हृदयद्वयेऽस्तु नौ ।
दृढा मम त्वत्कुचयोः कठोरयोरुरस्तटीयं परिचारिकोचिता ॥ ११६ ॥

परीति ॥ हे भैमि, त्वं मां परिष्वजस्वालिङ्ग । किमिति—नौ आवयोः गाढालिङ्गनवशान्निरन्तरं मिथो लग्ने मिलिते हृदयद्वये वेध्ये स्मरस्य अनवकाशबाणता निरवकाशबाणत्वमस्तु । निबिडसंलग्ने वस्तुद्वये ह्यवकाशलेशोऽपि न लभ्यत इत्यर्थः । मम दृढातिकठोरा विशाला चेयमुरस्तटी वक्षस्तटी कठोरयोस्त्वत्कुचयोः परिचारिका सेवाकर्त्री समुचिता । तुल्ययोरेव सेव्यसेवकभावो घटत इत्यर्थः । आलिङ्गनयोग्यत्वमेव सूचितम् । द्वयोरपि यथा कामपीडा न भवति तथा विधेयम् । गाढालिङ्गनं देहीति भावः । परिष्वजस्वेति, 'परिनिविभ्यः—' इति षत्वम् ॥

तवाधराय स्पृहयामि यन्मधुस्रवैः श्रवःसाक्षिकमाक्षिका गिरः ।
अधित्यकासु स्तनयोस्तनोतु ते नखेन्दुलेखान्युदयाद्भुतं नखः ॥ ११७ ॥

तवेति ॥ हे भैमि, अहं तव तस्मै अधराय स्पृहयामि तदर्पणमभिलषामि । तव गिरः यन्मधुस्रवैर्यस्याधरस्य मधुनिर्झरैः कृत्वा श्रवसी कर्णौ साक्षिणौ यस्य तत् श्रवःसाक्षिकं तादृशं माक्षिकं मधु यासु एवंभूताः सन्ति । ओष्ठस्यामृतरूपत्वात्तदुत्थाः शब्दाः कर्णयोरमृततुल्या भवन्तीत्यर्थः । तथा—मम नखः ते स्तनयोरधित्यकासूर्ध्वदेशेषु इन्दुलेखा अन्तु-दय उदयत्वेन यदद्भुतमाश्चर्यं तद् तनोतु करोतु । स्तनयोरुपरि नखचन्द्रकलाकारक्षतं इत्यत्र चन्द्रकलोदितेति सख्यादेर्नुद्धिर्नभवितुमर्हः । ओष्ठपानमुखक्षतेच्छुरस्मीति भावः । अधित्यकेति स्तनयोरदयमानत्वाच्चन्द्रकलायास्तनोदयस्तत्नोदयसमये दृष्ट भवति । अधरम्, 'स्पृहेरीप्सितः' इति संप्रदानत्वम् ॥

१ 'अमाङ्गिदत्वोसितसेच्छतः' इति साहित्यविद्याधरी । २ 'अमाङ्गिरसोसितसेच्छतः' इति साहित्यविद्याधरी । ३ 'अत्र टेककुमाणामितिमेनकुमारेण ...' इति साहित्यविद्याधरी ।

न वर्तसे मन्मथनाटिका कथं प्रकाशरोमावलिसूत्रधारिणी।
तवाङ्गहारे रुचिमेति नायकः शिखामणिश्च द्विजराड्विदूषकः ॥ ११८॥

नेति ॥ हे भैमि, प्रकर्षेण काशते शोभते प्रकाशा शोभमाना रोमावलिरेव सूत्रं धारयत्येवंशीला त्वं मन्मथनाटिका कामस्योन्मादयित्री कथं न वर्तसे। अपि तु कामं सहर्षं करोपि। अङ्ग संबोधने, तव हारे मुक्ताहारे नायको मध्यमणिः रुचिमेति देदीप्यते। न परं उज्वलतरत्वाद्वर्तुलतरत्वादाह्लादकतरत्वाच्च द्विजराड्विदूषकः चन्द्रतिरस्करणशीलः शिखामणिर्मुकुटमणिः शिखायां निबद्धो वा मणिरपि रुचिमेति। द्विजराड्विदूषकत्वमुभयोरपि वा। तव विलोकनान्मदीयः कामः सहर्षो भवति। वर्धतेतरामिति भावः। नाटिकापक्षे—प्रकाशरोमावलिरेव सूत्रधारो नान्दीश्लोकानन्तरसंचारी कथाप्रस्तावकः पात्रविशेषः सोऽस्या अस्तीति। तथा—तवाङ्गहारेऽङ्गविक्षेपे नृत्ये नायकः सभापती रुचिं प्रीतिमेति। तथा—द्विजराट् ब्राह्मण एव विदूषकश्च परिहासकं मित्रं रुचिमेति। शिखायां मणिरस्य विदूषकस्य नायकस्य वा सः। 'अङ्गहारोऽङ्गविक्षेपः' इत्यमरः। 'पीठमर्दो विटश्चैव विदूषक इति त्रिधा'। 'हारकृच्च विदूषकः' इत्यालंकारिकाः ॥

शुभाष्टवर्गस्त्वदनङ्गजन्मनस्तवाधरेऽलिख्यत यत्र लेखया।
मदीयदन्तक्षतराजिरञ्जनैः स भूर्जतामर्जतु बिम्बपाटलः ॥ ११९ ॥

शुभेति ॥ हे भैमि, तव अनङ्गस्य कामस्य जन्मन उत्पत्तेः शुभसूचकोऽष्टवर्गः ज्योतिःशास्त्रप्रसिद्धः स लेखया यत्र तवाधरेऽलिख्यत। ज्योतिर्विदा ब्रह्मणेत्यर्थः। बिम्बफलपाटलवर्णः सोऽधरः मदीया दन्तक्षतराजिः, तया कृत्वा रञ्जनानि, तैः कृत्वा भूर्जतामर्जतु। न अङ्गजन्माऽनङ्गजन्मा मानसः पुत्रः। तस्योत्तमत्वात्तज्जन्मपत्रिका ज्योतिर्विदा भूर्जपत्र एव लिख्यते। पुत्रे जाते ज्योतिर्विदा तस्य जन्मकालीनः शुभाष्टकवर्गो लिख्यते। [illegible] तावान् दन्तक्षतसुन्दरो भूर्जपत्रेणोपमीयते। अष्टकवर्गस्तु ज्योतिःशास्त्रोक्तो [illegible] लेखया। लेखाभिरित्यर्थः ॥

गिरानुकम्पस्व दयस्व चुम्बनैः प्रसीद शुश्रूषयितुं मया कुचौ।
निशेव चान्द्रस्य करोत्करस्य यन्मम त्वमेकासि नलस्य जीवितम् ॥ १२० ॥

गिरेति ॥ त्वं गिरानुकम्पस्वानुगृहाण। चुम्बनैर्दयस्वानुकम्पस्व। मया प्रयोजकेन कुचौ शुश्रूषयितुं प्रसीद। यस्मात्त्वं एका केवला नलस्य मम जीवितमसि। कस्य केव—चान्द्रस्य करोत्करस्य किरणसमूहस्य निशेव रात्रिरिव। तस्य जीवनं नान्या तथेति [illegible] नर्मोक्तिं प्रवदन्, चुम्बनादिना मामनुगृहाण, अन्यथा जीवनमेव न भविष्यतीति भावः ॥

मुनिर्यथात्मानमथ प्रबोधवान् प्रकाशयन्तं स्वमसावबुध्यत।
अपि प्रपन्नां प्रकृतिं विलोक्य तामवाप्तसंस्कारतया[illegible] ॥ १२१ ॥

मुनिरिति ॥ अथ प्रबोधवान् [illegible] नल इति 'भवोऽहं' [illegible] प्रकाशयन्तं स्वमात्मानमनुभवन् [illegible]। आत्मानं [illegible] मया [illegible]

[illegible]

नलमिति ॥ स हंसः तस्य हंसस्य पक्षरवः पक्षवातभवः शब्दस्तेन किमेतदायातीति बुद्ध्या ऊर्ध्वंवीक्षिणमुपरिविलोकिनम्, अनन्तरं च इति भणन्तं तं नलमभ्यधादवदत् । इति किम्—कृतमहोपकारः स एवैष पक्षी हंस इति । हे अदय निष्कृप नल, एनां भैमीं निराशतानाशारहिततां अतितरां मा नय मा स्म नैषीः । स्वप्रकाशनकृतस्वनिन्दया मय्यस्यानुरागो न विद्यत इति प्रतीत्या एषा निराशा भविष्यति, तथा मा कार्षीरिति भावः । अस्या निराशत्वे जाते मम किमनिष्टमित्याशङ्क्याह—या त्वया निन्दा कृता सा कृतैव, अतः परं चेत्करिष्यसि तर्हीयं भैमी परं केवलमसून्प्राणान्विहाता त्यक्ष्यति । स्त्रीवधजन्यं पातकं तव भविष्यति, तस्मादेवं मा कार्षीरिति भावः । अतेरुपसर्गत्वात् 'ते प्राग्धातोः' इति नियमात्पूर्वमेव प्रयोगस्यौचित्येऽपि महाकविप्रयोगाद्व्यवहितानामपि प्रयोगः साधुः । 'आविश्चचुपोऽभवदसाविव रागः', 'विलोलजिह्वायुगलीढोभयसृक्कभागमाविः' इत्यादयः प्रयोगाः । अतिशयिता मा शोभा राजलक्ष्मीर्वा यस्याः सा अतिमा इत्यनित्यस्य विशेषणम् । एनामनिराशतां नयेत्यन्वयः । हे अतिम अतिशयिता मा शोभा राज्यलक्ष्मीर्वा यस्येति । 'अतिसुन्दरत्वाद्बहुधनत्वाच्च त्वमेवास्या योग्यो नान्यः' इति सूचितम्, इति वा । अतिक्रान्ता माम् अतिसुन्दरी केवलमतः परं प्राणांस्त्यक्ष्यति त्वद्धिना । एवंविधं सुन्दरं वस्तु वृथैव यास्यतीति सूचितमिति वा । विहाता, लुट् ॥

सुरेषु पश्यन्निजसापराधतामियत्प्रयस्यापि तदर्थसिद्धये ।
न कूटसाक्षीभवनोचितो भवान्सतां हि चेतःशुचितात्मसाक्षिका १२९

सुरेष्विति ॥ हे नल, भवान् तेषां देवानामर्थसिद्धये प्रयोजनसिद्धये इयदेतावत्प्रयस्यापि बहुतरं प्रयासं कृत्वेत्यर्थः । सुरेषु देवविषये अनुचितमेतन्मया कृतमिति निजसापराधतां स्वीयमनुचितकारित्वं पश्यञ्जानन् कूटसाक्षीभवनोचितो न भवति कूटोऽसत्यस्तथा साक्षीव सत्येऽपि परकीयेऽर्थेऽलीकं भाषते स कूटसाक्षी अकूटसाक्षिणः कूटसाक्षिणो यद्भवनं तत्कूटसाक्षीभवनम् । तदुचितो न भवतीत्यर्थः । हि यस्मात् सतां चेतःशुचिता आत्मैव साक्षी यस्यामेवंविधा, न तु परसाक्षिका मया निष्कपटं दूत्यं कृतमिति त्वं तावज्जानासि, सन्तश्चालीकं भाषितुमपि स्वचेतस एव लज्जन्ते । तव च सत्यत्वं लोकत्रयप्रसिद्धम् । देवा अपि सर्वसाक्षित्वात्स्वयमेव त्वदीयं शुद्धत्वं ज्ञास्यन्ति, किमनेन लोकेनेति भावः । आत्मसाक्षिका, 'शेषाद्विभाषा' इति कप् ॥

इतीरिणापृच्छ्य नलं विदर्भजामपि प्रयातेन खगेन सान्त्वितः ।
मृदुर्बभाषे भगिनीं दमस्य स प्रणम्य चित्तेन हरित्पतीन्नृपः ॥ १३० ॥

इतीति ॥ स नृपः चित्तेन हरित्पतीन्प्रणम्य अतः परं मम करणीयमपि नावशिष्टम्, क्षन्तव्यमिति मनसैव देवाननत्वा मृदुः सदयः सन् दमस्य भगिनीं बभाषे । किंभूतः—इति पूर्वोक्तमीरिणा ब्रुवाणेन नलं विदर्भजामपि आपृच्छ्य प्रयातेन गन्तुमारब्धेन खगेन हंसेन सान्त्वितः । प्रयातेन, 'आदिकर्मणि क्तः कर्तरि च' इति क्तः ॥

---

१ 'अत्रानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। २ 'अत्रार्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी।

तदहं वेद। दुर्जनो हि यथावृत्तं न वदति किंतु विपरीतमेव वदति, इति जाने इत्यर्थः। तदेव विशेषणेनाह। किंभूतः परः—जनानामवनाय पालनायोद्यमिनं कृतोद्यमं जनानर्दयति पीडयतीत्येवंशीलं वदन्। तथा—क्षये प्रलये जगज्जीवपिबं जगत्प्राणहरं महादेवं शिवं मृडं वदन्। अनर्गलो लोक इत्यर्थः। लोकोक्तेर्निवारणे कश्चन प्रतीकारो नास्तीति भावः। नन्द्यादित्वाज्जनार्दनः। जीवपिबम्, 'पाघ्रा-' इत्यादिना शः॥

स्फुटत्यदः किं हृदयं त्रपाभराद्यदस्य शुद्धिर्विबुधैर्विबुध्यते।
विदन्तु ते तत्त्वमिदं तु दन्तुरं जनानने कः करमर्पयिष्यति ॥ १२५॥

स्फुटतीति ॥ आत्मप्रकाशनादकृतकार्यत्वाच्च यस्त्रपाभरो लज्जाबाहुल्यं तस्मात् अदो हृदयं किमर्थं स्फुटति। यद्यस्मात् विबुधैर्देवैरस्य हृदयस्य शुद्धिः विबुध्यतां ज्ञायताम्। तु पुनस्ते विबुधा इदं दन्तुरं विषमं तत्त्वं मया बुद्धिपूर्वकं कृतं, अबुद्धिपूर्वकं वेति विदन्तु जानन्तु। लोका जानन्तु वा मा जानन्तु। 'अत्र लौकिकमाभाणकमाह—जनानने कः करं हस्तमर्पयिष्यति त्वयैवं न वक्तव्यमिति मुखहस्तदानेन लोकं प्रतिषेद्धुं कः शक्नोति। अपितु न कोऽपि। लोको यत्किंचिद्वदतु नामेति भावः। हृदयस्फोटनाभावेऽपि ते देवास्तत्त्वं यथार्थं जानन्तु। अन्यदपि संदिग्धं प्रमेयं पण्डितैः परीक्ष्य तत्त्वतो निर्णीयते, न तु सामान्यैर्जनैः॥

मम श्रमश्चेतनयानया फली बलीयसालोपि च सैव वेधसा।
न वस्तु दैवस्वरसाद्विनश्वरं सुरेश्वरोऽपि प्रतिकर्तुमीश्वरः ॥ १२६॥

ममेति ॥ अनया चेतनया दूतोऽहमिति प्रतिपत्त्या कृत्वा मम श्रम इत्थंलक्षणः फली सफलो जातः स्यात्। बलीयसा वेधसा च दैवेन सैव चेतना अलोपि नाशिता। दैववशाद्भ्रान्त्यात्मकथनाच्छ्रमो व्यर्थ एव जात इत्यर्थः। चेतनारक्षणे त्वया यत्नः किमिति न कृत इत्यत आह—स्वश्चासौ रसश्च स्वरसः स्वेच्छा दैवस्य स्वरसात्स्वेच्छया विनश्वरं विनाशि वस्तु प्रतिकर्तुं चिकित्सितुं सुरेश्वरोऽपि शक्रोऽपि ईश्वरो न समर्थो न किं पुनरन्यः। ममाऽबुद्धिपूर्वमेवात्मप्रकाशनं कृतमिति भावः। तस्मान्ममापराधो नास्तीत्यर्थः॥

इति स्वयं मोहमहोर्मिनिर्मितं प्रकाशनं शोचति नैषधे निजम्।
तथाव्यथामग्नतदुद्दिधीर्षया दयालुरागाल्लघु हैमहंसराट् ॥ १२७॥

इतीति ॥ नैषधे नले स्वयमात्मनैव मोहमहोर्मिनिर्मितं भ्रान्तिबाहुल्यवशात्कृतं निजं स्वीयं प्रकाशनं प्रकटनमिति पूर्वोक्तप्रकारेण शोचति निन्दति सति तद्विषयं पश्चात्तापं [illegible] सति दयालुः हैमहंसानां राट् राजा तथानिर्वचनीया व्यथा पीडा तस्यां मग्नस्य [illegible] तस्योद्धर्तुमिच्छया लघु शीघ्रमागात्॥

नले स तत्प्रा[illegible] स एव पश्यति [illegible]।
[illegible] परं पदम् ॥ १२८॥

१ 'अत्र [illegible]' इति साहित्यविद्याधरी। २ '[illegible]' इति साहित्यविद्याधरी। ३ '[illegible]' इति साहित्यविद्याधरी। ४ '[illegible]' इति साहित्यविद्याधरी।

नलमिति ॥ स हंसः तस्य हंसस्य पक्षरवः पक्षवातभवः शब्दस्तेन किमेतदायातीति श्रुत्वा ऊर्ध्वेक्षिणमुपरिविलोकिनम्, अनन्तरं च इति भणन्तं तं नलमभ्यधादवदत् । इति किम्—कृतमहोपकारः स एवैष पक्षी हंस इति । हे अदय निष्कृप नल, एनां भैमीं निराशतामाशारहिततां अतितरां मा नय मा स्म नैषीः । त्वत्प्रार्थनकृतनिन्दया भैम्यास्त्वदनुरागो न विद्यत इति प्रतीत्या एषा निराशा भविष्यति, तथा मा कार्षीरिति भावः । अस्या निराशत्वे जाते मम किमनिष्टमित्याशङ्क्याह—या त्वया निन्दा कृता सा कृतैव, अतः परं चेत्करिष्यसि तर्हीयं भैमी परं केवलमसून्प्राणान्विहाता त्यक्ष्यति । स्त्रीवधजन्यं पातकं तव भविष्यति, तस्मादेवं मा कार्षीरिति भावः । अवैलक्षण्यात् 'वे प्राणघातोः' इति निषेधा-त्पूर्वेणैव प्रयोगस्यौचित्येऽपि महाकविप्रयोगाद्व्यवहितत्वानामपि प्रयोगः साधुः । 'आविश्चकुपोऽभवदस्याविव रागः', 'विलोलजिह्वायुगलीढोम्भदरक्तनागणनाविः' इत्यादयः प्रयोगाः । अतिशयिता मा शोभा राज्यलक्ष्मीर्वा यस्याः सा अतिमा इत्यभिमस्य विशेषणम् । एनामनिराशतां नयेत्यन्वयः । हे अतिम अतिशयिता मा शोभा राज्यलक्ष्मीर्वा यस्येति । 'अतिसुन्दरत्वाद्बहुधनत्वाच्च त्वमेवास्या योग्यो नान्यः' इति सूचितम्, इति वा । अतिक्रान्ता माम् अतिसुन्दरी केवलमतः परं प्राणांस्त्यक्ष्यति त्वद्विना । एवंविधं सुन्दरं वस्तु त्वय्येव यात्यतीति सूचितमिति वा । विहाता, लुट् ॥

सुरेषु पश्यन्निजसापराधतामियत्प्रयत्नस्यापि तदर्थसिद्धये ।
न कूटसाक्षीभवनोचितो भवान्सतां हि चेतःशुचितात्मसाक्षिका १२९

सुरेष्विति ॥ हे नल, भवान् तेषां देवानामर्थसिद्धये प्रयोजनसिद्धये इयदेतावत्प्रयत्नस्यापि बहुतरं प्रयासं कृत्वेत्यर्थः । सुरेषु देवविषये अनुचितमेतन्मया कृतमिति निजसापराधतां स्वीयमनुचितकारित्वं पश्यञ्जानन् कूटसाक्षीभवनोचितो न भवति कूटोऽसत्यस्तथाभूतो साक्षीव सत्येपि परच्छेदेऽर्थेऽलीकं भाषते स कूटसाक्षी अकूटसाक्षिणः कूटसाक्षिणो यद्भवनं तत्कूटसाक्षीभवनम् । तदुचितो न भवतीत्यर्थः । हि यस्मात् सतां चेतःशुचिता आत्मैव साक्षी यस्यामेवंविधा, न तु परसाक्षिका मया निष्कपटं दूत्यं कृतमिति त्वं जानासि, सन्तश्चालीकं भाषितुमपि स्वचेतस एव लज्जन्ते । तत्र च सत्यत्वं लोकप्रत्ययोत्पादनम् । देवा अपि सर्वसाक्षित्वात्त्वयैव त्वदीयं शुद्धत्वं ज्ञास्यन्ति, किमनेन लोकेनेति भावः । आत्मसाक्षिका, 'शेषाद्विभाषा' इति कप् ॥

इतीरिणापृच्छ्य नलं विदर्भजामपि प्रयातेन खगेन सान्त्वितः ।
मृदुर्यमापे भगिनीं दमस्य स प्रणम्य चित्तेन हरित्पतीन्नृपः ॥ १३० ॥

इतीति ॥ स नृपः चित्तेन हरित्पतीन्प्रणम्य अतः परं मम कर्णोदनमपि नावशिष्टम्, क्षन्तव्यमिति मनसैव देवाननम्य मृदुः सदयः सन् दमस्य भगिनीं ययाचे । किंभूतः— इति पूर्वोक्तमीरिणा ब्रुवाणेन नलं विदर्भजामपि आपृच्छ्य प्रयातेन यथागतं खगेन हंसेन सान्त्वितः । प्रयातेन, 'आदिकर्मणि क्तः कर्तरि च' इति क्तः ॥

---

१ 'स्वानुभावतोऽङ्गीकारः' इति साहित्यविद्याधरी । २ 'अप्रार्थनारम्भतोऽङ्गीकारः' इति साहित्यविद्याधरी ।

ददेऽपि तुभ्यं कियतीः कदर्थनाः सुरेषु रागप्रसवावकेशिनीः।
अदम्भदूत्येन भजन्तु वा दयां दिशन्तु वा दण्डममी ममागसाम् ॥१३१॥

ददेऽपीति ॥ हे भैमि, अहं तुभ्यमपि अतिनिर्दयदूत्यकरणजनिताः कियतीः कतिसंख्याकाः कदर्थनाः पीडा अहं ददे ददामि, अतः परं तद्विषयं किमपि न वदिष्यामीत्यर्थः। यतः–सुरेषु रागोऽनुरागः, तल्लक्षणः, तस्य वा प्रसवोऽङ्कुर उत्पत्तिर्वा तस्यावकेशिनीर्निष्फलाः। अनुरागानुत्पादिका इत्यर्थः। उद्यमः कार्यजनकश्चेद्भवति तर्हि दुःखमपि दातुमुचितम्। प्रकृते तावति दूत्ये कृतेऽपि तव तेष्वनुरागाङ्कुरोऽपि नोत्पन्नः तस्मात्तव पीडाकरमतः परं किमपि न वदिष्यामीति भावः। यत्राङ्कुरोत्पत्तिरपि नोदेति तत्र फलाशा कुतस्त्या। तव पीडादाने ममापि पीडा भवतीत्यपिशब्दार्थः। गर्हायां वाऽपिः। अनुचितमेतदित्यर्थः। एवं सति अमी देवा अदम्भदूत्येन निष्कपटदूत्येन कृत्वा दयां मम कृपां वा भजन्तु कुर्वन्तु। कार्यासाधनरूपेणागसा अस्मदीयं कार्यं विनाश्य स्वीयं कृतमित्यपराधेन दण्डं शासनं वा दिशन्तु कुर्वन्तु। तत्कृतं दण्डमपि सहिष्ये, परं तुभ्यं दुःखं दातुं नोत्सहे इति भावः॥

अयोगजामन्वभवं न वेदनां हिताय मेऽभूदियमुन्मदिष्णुता।
उदेति दोषादपि दोषलाघवं कृशत्वमज्ञानवशादिवैनसः॥ १३२॥

अयोगजामिति ॥ इयं उन्मदिष्णुता मे मह्यं हितायाभूत्। यतः—अहं अयोगजविरहजां वेदनां नान्वभवम्। किंतु परमानन्दमन्वभवम्। उन्मादेन सुखवशान्मया विरहपीडा विस्मृता तस्मादियमुन्मदिष्णुता मम गुणायैव जातेति भावः। अथ च न योग अयोगः, तज्जां संसारसंबन्धिनीं पीडां नान्वभवम्। किंतु परमानन्दमन्वभवमित्यर्थः तत्रार्थान्तरन्यासं सोपमानमाह—दोषादपि दोषभूतादपि एकस्माद्धेतोः दोषभूतस्याप्यन्यस्य लाघवं अल्पत्वलक्षणो गुण उदेति। कस्मात् कस्य किमिव—अज्ञानवशादज्ञानलक्षणदोषवशाद्दोषभूतस्याप्येनसः पातकस्य कृशत्वमल्पत्वमिव। अल्पत्वलक्षणो गुणो भवति। ज्ञानपूर्वे ब्रह्महत्यादौ 'कामात्तद्द्विगुणं भवेत्' इति बहुप्रायश्चित्ताम्नानात्पातकगौरवमवगम्यते, अज्ञानकृते लघुप्रायश्चित्ताम्नानात्पातकलाघवमिति। अज्ञानलक्षणाद्दोषाद्दोषभूतस्य पातकस्य लाघवलक्षणो गुणो यथा लभ्यते, तथोन्मादलक्षणाद्दोषाद्विरहवेदनादोषस्य लाघवलक्षणो गुणो मयापि लब्ध इति भावः। उन्मादितायां कियतोऽपि दुःखस्य शेषत्वसूचनार्थं वेदनापदम्। मे। हितयोगे चतुर्थी। भावप्रत्ययान्तस्य गुणवाचिनः शब्दस्य 'पूरणगुण–' इति समासनिषेधाद्दोषलाघवमित्यत्र समासाप्राप्तेः 'तदशिष्यं संज्ञाप्रमाणत्वात्' इति ज्ञापकाद्बुद्धिमान्द्यं, करणपाटवमित्यादिमहाकविप्रयोगदर्शनाच्च निषेधस्यानित्यत्वात्समासो द्रष्टव्यः। एवमेवमादिषु प्रयोगेषु ज्ञातव्यम्॥

तवेत्ययोगस्मरपावकोऽपि मे कदर्थनात्यर्थतयाऽगमद्दयाम्।
प्रकाशमुन्माद्य यदद्य कारयन्मयात्मनस्त्वामनुकम्पते स्म सः॥१३३॥

---

१ 'अत्रातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी। २ 'अत्रोपमालंकारः' इति साहित्यविद्याधरी। ३ 'न वा' इति साहित्यविद्याधरीसंमतः पाठः। ४ 'मयात्मनो मामनु–' इति साहित्यविद्याधरीपाठः।

तवेति ॥ तव त्वत्संबन्धी त्वद्विषयो मन्मिष्टः स प्रसिद्धः पूर्वं कृतपीडः अयोगो वियोगस्तन्मानितः स्मरपावको ममैव कदर्थनासमर्थतया पीडाबाहुल्येनाप्यतिपीडाकारित्वेनापि इति पूर्वोक्तप्रकारेण मे मम दयामगमत् । चकारेत्यर्थः । इति किम्—यद्यस्मात् अद्य त्वद्विलम्बप्रत्यये मामुन्मादोन्मादं प्रापय्य मया प्रयोज्येनात्मनो ममैव नलोऽहमिति प्रकारां प्राकट्यं कारयन् त्वामनुकम्पते स्म सेवते स्म । तेन ममैव कृपा कृतेत्यर्थः । त्वद्विषयो वियोगाग्निर्यदि ममातिपीडां नाकरिष्यत्, तदोन्मादाभावान्मयात्मप्रकाशनमपि नाकरिष्यत, ततश्च मत्प्राप्तिविघातनिश्चयात्त्वन्मरणमेव स्यात्, त्वद्वियोगान्ममापि मरणं स्यात् । तस्मात्पीडयोन्मादाधिक्यान्मयात्मनः प्राकट्ये कृते मत्प्राप्तिनिश्चयात्तवप्राणा रक्षिताः, तस्माच्च मत्प्राणा अपि तेन रक्षिता इति स स्मराग्निर्मम दयामेव चकारेति भावः । कामाग्निः कदर्थनासमर्थतयापि मे दयां चकार । कुतः तवेति, 'त्वदीयोऽहमिति त्वां पीडयत्येव, त्वत्संबन्धान्मामपि पीडयति । इयं तस्य कृपैव मैनां मामेव वरिष्यति, नान्यमिति निश्चयात् । योजनान्तरमुपेक्षणीयम् ॥

अमी समीहैकपरास्त्वया नराः स्वकिंकरं मामपि कर्तुमीशिषे ।
विचार्य कार्यं सृज मा विधान्मुधा कृतानुतापस्त्वयि पार्ष्णिविग्रहम् ॥१२४॥

अमी इति ॥ अमी अमरास्तव समीहैकपरास्त्वदभिलापकेवलनिष्ठाः त्वामेवाभिलष्यन्तीत्यर्थः । तव तेष्वनुरागो न । त्वं मामपि स्वकिंकरं कर्तुं ईशिषे, मां स्वीयं दासं कर्तुं समर्थेच्छसीत्यर्थः । ममानुरागोऽप्रयोजकः किंतु तव मय्यनुरागः प्रयोजक इति भावः । एवंसति त्वं कार्यं करणीयं विचार्य सृज । विचारे कारणमाह—कृतो यः पश्चात्तापः स त्वयि पार्ष्णेः पश्चात्स्थस्य वैरिणो विग्रहं तद्वत्कलहम् । दुःखमिति यावत् । मुधा वृथा मा विधान्मा कार्षीत् । अविचार्य देवे वृते मल्लमहं किमिति नावरिषम्, मयि वा वृते कंचन देवं किमिति नावरिषमिति पश्चात्तापस्तव भविष्यति तस्माद्विचार्यैव विधेयं कुर्विति भावः । संधिमकृत्वा यहिर्निर्गते विजिगीषौ पार्ष्णिग्राहो वैरायते । ईशिषे, 'ईशः से' इतीट् । मा विधात्, भविष्यति 'माङि लुङ्,' 'न माङ्योगे' इत्यडभावः ॥

उदासितेनैव मयेदमुच्यते भिया न तेभ्यः स्मरतानवान्न वा ।
हितं यदि स्यान्मदनुव्ययेन ते तदा तव प्रेमणि शुद्धिलब्धये ॥ १२५ ॥

उदासितेनेति ॥ हे भैमि, उदासितेनैवोदासीनेनैव मया 'अमी समीहैकपराः–' (९।१२४) इत्यादिना विचार्य सृज इत्येवमिदं मयोच्यते, तेभ्यो देवेभ्यो भिया देवान्तर्भीत्येति नोदये । तथा–स्मरेण कृतं स्वस्य तानवं कार्श्यं, तस्माद्वा 'स्वकिंकरम्' (९।१२४) इत्यादिना मां वृणीष्वेति न वोदये । निषेधुमथवा योज्यम् । त्वद्धितार्थमेव विचार्य कुर्विति मयोक्तम् । ममान्येनायमेनेति भावः । मया देवे वृते सति नाद्विषो [illegible] त्यादिलाभकृपामाह—मदनुव्ययेन मदीयमरणमार्गेण ते तुभ्यं यदि हितं स्यात्, [illegible] तदन्ते काले मत्स्व प्रेमाऽनुरागः तस्मिन्विषये एतदेव प्रागल्भ्यमनेन तव [illegible]

¹ 'काव्यलिङ्गोपमालंकारः' इति साहित्यविद्याधरी । ² 'अत्र [illegible]' इति साहित्यविद्याधरी ।

अन्यत्रानुरक्तस्योत्तमेनान्यवर्णने कृतेऽपि तत्रानुरागो नोत्पद्यत इत्यर्थः । यतः—अप्
कृताप्लवैः कृतस्नानैः पुरुषै रवेः सूर्यस्य स्तवे कृतेऽपि कुमुद्वती कुमुदिनी जातु कदाचिदपि
मुद्वती सूर्यविषये हर्षवत्यनुरागिणी न भवेत् । तस्याश्चन्द्र एवानुरागात्, तद्वन्ममेत्यर्थः ॥

कथासु शिष्यै वरमद्य न म्रिये ममावगन्तासि न भावमन्यथा ।
त्वदर्थमुक्तासुतया सुनाथ मां प्रतीहि जीवाभ्यधिकं त्वदेकिकाम् ॥१४९

कथास्विति ॥ हे नल, अद्य एतावत्यामपि पीडायां सत्यां कथासु शिष्यै गोष्ठीशेषी
भवानि म्रियै । वरमेतन्मनागिष्टम् । न म्रिये न तिष्ठामि । न जीवामीत्यर्थः । अन्यथा
मरणेन विना त्वं मम भावमनुरागं नावगन्तासि नावगमिष्यसि । अत एव सुनाथ सुस्वा-
मिन्, अत एव जीवाभ्यधिक प्राणेभ्योऽप्यतिप्रिय त्वदर्थमुक्तासुतया त्वदर्थं त्यक्तप्राणतया
कृत्वा मां त्वदेकिकां त्वं एकः केवलो यस्या एवंविधां त्वदेकशरणां प्रतीहि जानीहि । यत्प्रा-
णेभ्योऽधिकं तदर्थमेव प्राणास्त्यज्यन्ते । त्वं च मम प्राणाधिकः शोभनस्वामी च । शोभ-
नश्च स्वामी सेवकं स्वार्थे त्यक्तप्राणं ज्ञात्वानुकम्पत इत्यर्थः । त्वदर्थं भैम्या प्राणास्त्यक्ता
इति लोकमुखादाकर्ण्य स्वस्मिन्ममानुरागं ज्ञास्यति नान्यथेति मरणमेव युक्तमिति भावः ।
असूनां नाथ 'अत एव जीवाभ्यधिक, इति वा । न सुनाथोऽसुनाथः । सुनाथः केनचिद्व्या-
पारेण सेवकं स्वानुरागिणं जानाति । त्वं तु असुनाथत्वात्प्राणव्ययेन विना न जानासीत्यु-
पालम्भोऽपि सूचितः । आशु नाथ इति क्वचित् । शिष्यै, दैवादिकस्य शिषेर्लोडुत्तमैकवच-
नम् । म्रिये, लडुत्तमैकवचनम् । त्वदेकिकाम्, 'शेषाद्विभाषा' इति कप्[1] ॥

महेन्द्रहेतेरपि रक्षणं भयाद्यदर्थिसाधारणमस्त्रभृद्व्रतम् ।
प्रसूनबाणादपि मामरक्षतः क्षतं तदुच्चैरवकीर्णिनस्तव ॥ १५० ॥

महेन्द्रेति ॥ महेन्द्रहेतेरिन्द्रायुधादपि यद्भयं तस्माद्यद्रक्षणम्, यद्वा भयहेतोर्वज्राद्र-
क्षणम्, तत् अस्त्रभृतां शूराणां व्रतं अर्थिषु शरणागतेषु साधारणम् । पुरुषो रक्षणीयो, न
तु स्त्रीति, स्त्री रक्षणीया, न तु पुमानिति पक्षपातरहितं क्षत्रियाणां व्रतं नियमः । तत्
अवकीर्णिनो भग्नव्रतस्य तव व्रतमुच्चैरतितरां क्षतं विनष्टम् । यतः—प्रसूनबाणात्कामात्,
प्रसूनरूपाद्बाणाद्वा मामरक्षतो रक्षणमकुर्वाणस्य । यः पुष्पादपि रक्षितुं न शक्नोति, स वज्रा-
त्कथं रक्षितुं शक्नोतीति संभावनापि कुतस्त्येत्यपिशब्दार्थः[2] ॥

तवास्मि मां घातुकमप्युपेक्षसे मृषामरं हाऽमरगौरवात्स्मरम् ।
अवेहि चण्डालमनङ्गमङ्ग तं स्वकाण्डकारस्य मधोः सखा हि सः ॥१५१॥

तवेति ॥ अहं तवास्मि । त्वं तु मां घातुकं हन्तारं मृषामरं मिथ्यादेवं स्मरममरगौ-
रवात् देवत्वबुद्ध्या उपेक्षसे । हा कष्टम् । अनुचितमेतत् । देवत्वबुद्धिं त्यक्त्वा एनं मार-
येति भावः । अन्योऽपि स्वीयं मारयन्तं नोपेक्षते, किं तु तं हन्ति । कामस्य मृषामरत्व-
माह—अङ्ग प्रियतम, तं अनङ्गं चण्डालमेवावेहि जानीहि । चण्डाले दया नोचिता

---

१ 'अत्र दृष्टान्तोऽलंकारः' इति जीवानुसाहित्यविद्याधर्यौ । २ 'अत्रातिशयोक्तिरलंकारः' इति
साहित्यविद्याधरी । ३ 'न सूनबाणादपि' इति जीवातुसाहित्यविद्याधरीसंमतः पाठः ।
४ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।

हि यस्माद् स कामः स्वकाण्डकारस्य स्वस्य काण्डाः पुष्पलक्षणा बाणास्तेषां निष्पादकस्य मधोर्वसन्तस्य सखा । वसन्ते पुष्पबाहुल्यात्स एव कामकाण्डकारः । चण्डाल एव काण्डकारो भवति । 'तत्संसर्गी च पञ्चमः' इति वचनात्कामस्यापि चण्डालत्वम्, तस्मान्नृपा-मरत्वं कामस्य । तत्तुल्याचरणकर्तृत्वाच्चण्डालोऽप्यनर्हो भवति । तस्मान्मारयैनमिति भावः । चण्डालोऽपि मारणार्थं विश्वासजनकं वेषं गृह्णाति । मां, 'न लोका–' इति षष्ठीनिषेधः । काण्डकारः, 'कर्मण्यण्' ॥

लघौ लघावेव पुरः परे बुधैर्विधेयमुत्तेजनमात्मतेजसः ।
तृणे तृणेढि ज्वलनः खलु ज्वलन्क्रमात्करीषद्रुमकाण्डमण्डलम् ॥१५२॥

लघाविति ॥ बुधैः पण्डितैः लघौ लघौ अल्पतरे परे शत्रौ पुरः प्रथममात्मतेजस उत्तेजनं संधुक्षणं विधेयं करणीयम् । अल्पवैरिजयाभ्यासेन महान्वैरी जेतव्यः । अल्पतरः शत्रुः सर्वथा नोपेक्षणीय इत्यर्थः । खलु यस्माज्ज्वलनोऽग्निः तृणे निःसारेऽधिकरणे ज्वलन् क्रमात्परिपाट्या करीषं शुष्कगोमयचूर्णं द्रुमकाण्डमण्डलं वृक्षस्कन्धसमूहं च तृणेढि हिनस्ति ज्वलयति । यथा तेजस्विनामवधिरग्निरप्यादावल्पं शत्रुं नाशयति, पश्चान्महान्तमिति तथा त्वयापि कर्तव्यम् । मदनो नोपेक्षणीय इति भावः । तृणेढि, 'तृणह इम्' इत्यादि । हीनव-यापि कामस्यावगणना न कर्तव्येत्यर्थः ॥

सुरापराधस्तव वा कियानयं स्वयंवरायामनुकम्पता मयि ।
गिरापि वक्ष्यन्ति मखेषु तर्पणादिदं न देवा मुखलज्जयैव ते ॥ १५३ ॥

सुरेति ॥ वा संभावनायाम् । स्वयं स्वानुरागेणैव या वृणुते, न तु केनचित्प्रेरिता तादृशी स्वयंवरा तस्यां मयि मदङ्गीकारलक्षणा याऽनुकम्पता दयालुत्वं अयं तव सुरेषु विषयेऽपराधः कियान्वा । अपि त्वल्पतरः । मयि यज्ञेभ्यो मखेषु त्वत्कृतात्तर्पणात्तृप्तिहेतोः मुख-लज्जयैव मुखदाक्षिण्येनैव ते देवा इदं त्वया कृतेऽप्यलीकमपराधनिवेदनं गिराऽपि न वक्ष्यन्ति । अन्तःकरणे न धारयिष्यन्तीति किं वाच्यम् । मयैव स्वेच्छावरणात्त्वल्पोऽपि तवापराधो नास्तीत्यर्थः । सर्वथा त्वयाहमनुग्राह्येति भावः । ते तव मुखलज्जयेति वा । अन्योऽपि बहूपकारिण्यल्पतरेऽपराधे कृतेऽपि तन्मुखदाक्षिण्यात्किमपि न वदति । स्वयं-वरा, पचाद्यच् ॥

भजन्तु ते तेऽपि वरं स्वयंवरं प्रसाद्य तानेव मया वरिष्यसे ।
न सर्वथा तानपि न स्पृशेदियं न तेऽपि तावन्मदनस्त्वमेव वा ॥१५४॥

भजन्त्विति ॥ ते देवा अपि त्वत्संबन्धिनं वरं श्रेष्ठं स्वयंवरदेशं वरं काम्यं वा भजन्तु । तानेवेन्द्रादीन्प्रसाद्य प्रसन्नान्कृत्वा मया त्वं वरिष्यसे । [illegible] प्रत्युक्तः स्वयं प्रहसन् स्वचित्त आह—नेति । इयं [illegible] देवानपि न स्पृशेदिति न, अपितु स्पृशेदेव । ते [illegible] वरिष्यन्तीत्यर्थः । [illegible]

---

१ 'अन्यादृक्...' इति साहित्यविद्याधरी । २ 'अत्र [illegible]' इति साहित्यविद्याधरी । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

देवाः तावत् मदनो न भवन्ति, त्वमेव वा भवन्ति । जगति द्वावेव युवां निष्कृपौ यु[illegible] विना सकलं जगत् सदयमेव । ते सकृपाः स्वयंवरे कौतुकावलोकनार्थं सुखेनागच्छन्ति[illegible] भावः । त्वं वा नैवेति वान्वयः ॥

इतीयमालेख्यगतेऽपि वीक्षिते त्वयि स्मरव्रीडसमस्ययानया ।
पदे पदे मौनमयान्तरीपिणी प्रवर्तिता सारघसारसारणी ॥ १५५ ॥

इतीति ॥ हे नल, (इति राखीवचनम्) अनया भैम्या इयं इति पूर्वोक्तप्रकारेण मयो दिता सरघाभिर्मधुमक्षिकाभिः कृतस्य मधुनः सारस्य श्रेष्ठविभागभूतस्यातिमधुरस्य सारणी नदी प्रवर्तिता । किंभूता—पदे पदे वचने वचनेऽन्तरायकारित्वान्मौनमयान्तरीपिणी मौन-रूपद्वीपवती । किंभूतयाऽनया—आलेख्यगते पटादिलिखितचित्रप्राप्ते चित्ररूपेऽचेतनेऽपि वीक्षिते त्वयि विषये स्मरव्रीडयोः कामलज्जयोः समस्या संक्षेपो मिथोभावो यस्यां सा तया। कामलज्जावत्यैवेत्यर्थः । कामवशाद्वक्ति, लज्जावशाच्च तूष्णीमास्त इति भावः । नद्यपि स्थाने स्थानेऽन्तरीपिणी भवति । अनयापि विषमया समस्यया पदे पदे मौनं भवति। चित्ररूपेऽचेतनेऽपि त्वयि दृष्टेऽनुरागेणोन्मादवशाद्यथैवमुक्तं, तस्याः सचेतनस्य तव साक्षा-त्कारे जाते सत्यन्यवरणे शङ्कापि कथंकारं कर्तुमर्हा । अपि तु न कथंचित् । तस्मादिन्द्रा-दिवरणविषयमतः परं त्वयापि किमपि न वाच्यमिति भावः । 'सरघा मधुमक्षिका' इत्य-मरः । सरघाभिः कृतमित्यर्थे 'मक्षिकादिभ्योऽण्' इति प्रकृते 'तद्विशेषेभ्यश्च' इति वार्तिकायोगविभागाद्वाण् । सारयति पातयति तीरमिति सारणी । बहुलवचनात्क-र्तरि ल्युट् ॥

चण्डालस्ते विषमविशिखः स्पृश्यते दृश्यते न
ख्यातोऽनङ्गस्त्वयि जयति यः किंनु कृत्ताङ्गुलीकः ।
कृत्वा मित्रं मधुमधिवनस्थानमन्तश्चरित्वा
सख्याः प्राणान्हरति हरितस्त्वद्यशस्तज्जुपन्ताम् ॥ १५६ ॥

चण्डाल इति ॥ विषमविशिखः कामः ते तव त्वत्संबन्धी चण्डालः किंतु चण्डान्क्रूरान् शरान् आ समन्ताल्लाति आदत्ते । चण्डालोऽपि विषमविशिखो भवति क्रूरबाणः । अथ च विषेण मीयन्ते इति विषमा विशिखा यस्य । विषलिप्तबाण इत्यर्थः । न स्पृश्यते न दृश्यते । यतः—त्वयि जयति सर्वोत्कर्षेण विद्यमाने । अथ च सौन्दर्येण पराभवितरि । सोऽनङ्ग इति ख्यातः । चण्डालत्वादनङ्गत्वाच्च न स्पृश्यते न दृश्यते । अनङ्गत्वमाह—यतः—कृत्ता छिन्ना कनिष्ठाङ्गुली यस्य छिन्नाङ्गुलीकः । चण्डालो हि छिन्नाङ्गुलीको भवतीति चण्डाल-जातिः । तस्य चण्डालकर्माह—अधिवनस्थानं वनस्थानमध्ये मधुं वसन्तं मित्रं कृत्वा वस-न्तेनोद्दीपितः अन्तः हृदयं चरित्वा प्रविश्य, अथ च वनेषु मधुप्रधानं मद्यं मित्रं कृत्वा स्वयं पीत्वा गृहमध्ये प्रविश्य, सख्या भैम्याः प्राणान्हरति । सख्या अन्तश्चरित्वेति वा। प्राणगमनपर्यवसायिनीं पीडां करोति, अथ च प्राणानेव मुष्णाति । तत्तस्माद् हरितो दिशः

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्र छेकानुप्रासातिशयोक्त्यलंकारौ' इति साहित्यविद्याधरी ।

त्वयशो लुपन्तां सेवन्ताम् । त्वद्दासेन तेनैवं कृते सर्वदिग्व्यापिनी तव कीर्तिर्भवत्विति सोल्लुण्ठनं वचनम् । त्वय्यनुरागबाहुल्यात्त्वल्लाभनाशात्त्वद्विषयो मदनः सर्वो पीडयतितराम् । ततश्च तवाकीर्तिर्भवति, तत्नाशयाऽस्याः पीडा शाम्यति, तव चाकीर्तिर्न भवति, तथैव त्वया विधेयम्, न त्वन्यथेति भावः । 'जगति' इति पाठे जगति अनङ्गः स्यात्तः । तु पुनः अयि नल, इति पदम् ॥

अथ भीमभुवैव रहोऽभिहितां नतमौलिरपत्रपया स निजाम् ।
अमरैः सह राजसमाजगतिं जगतीपतिरभ्युपगत्य ययौ ॥ १५७ ॥

अथेति ॥ अथ स जगतीपतिर्ययौ जगाम । किं कृत्वा—देवैः सह त्वया आगन्तव्यमिति भीमभुवैव भैम्यैवाभिहितां रह एकान्ते उक्तां निजां स्वीयाममरैः सह राजसमाजं स्वयंवरदेशं प्रति गतिमभ्युपगत्याङ्गीकृत्य । किंभूतः—अपत्रपया इन्द्रादिकार्यकरणात्लज्जया नतमौलिरधोमुखः ॥

श्वस्तस्याः प्रियमाप्तुमुद्धुरधियो धाराः सृजन्त्या रया-
न्नेत्रोत्सङ्गकपोलपालिपुलकैर्वेतस्वतीरश्रुणः ।
चत्वारः प्रहराः स्मरार्तिभिरभूत्सापि क्षपा दुःक्षया
तत्तस्यां कृपयाखिलैव विधिना रात्रिस्त्रियामा कृता ॥ १५८ ॥

श्व इति ॥ तस्या भैम्याश्चत्वारः प्रहराः सापि एकापि क्षपा चतुष्प्रहरस्वा रात्रिः वियोगस्य दुःसहत्वात्स्मरार्तिभिः कामपीडाभिः कृत्वा यत्नाद् दुःक्षयातिवाहयितुमशक्यामूत्, तत्तस्माद्धेतोः विधिना ब्रह्मणा तस्यां भैम्यां कृपयेवाखिला चतुःप्रहरापि रात्रिः, अथ च प्रतिदिनभाविनी सर्वापि रात्रिः, त्रियामा त्रिप्रहरा कृता । रात्रेरेकः प्रहरो हृत इत्यर्थः । आद्यन्तयोरर्धतत्त्वयु घटीषु दिनव्यवहारात्त्रियामेति क्षीरस्वामी । सा सा रात्रिस्तया महता कष्टेनातिक्रान्तेति भावः । किंभूतायास्तस्याः—श्वः परेद्युः प्रियं नलमाप्तुं प्राप्तुमुद्धुरोत्कण्ठिता धीर्यस्याः उत्सुकायाः । तथा—अश्रुणो धाराः (सृजन्त्याः) वियोगवशाद्रयाद्वेगात्सृजन्त्याः [illegible] (सृजन्त्याः) विस्तारयन्त्याः । किंभूता धाराः—नेत्रोत्सङ्गैर्नयनप्रान्तैः कपोलपाल्याः पुलकैः रोमाञ्चैः कृत्वा वेतस्वतीर्बहुवेतसयुक्ताः । स्यादा नद्यो वेतस्वत्यः [illegible] वेतसा भवन्ति । वेतस्वतीः 'कुमुदनड्वेतसेभ्यो ड्मतुप्' इति ड्मतुप् ॥

तदखिलमिह भूतं भूतगत्या जगत्याः पतिरनिलपति स स्वात्मदूत्यव्रतत्वम् ।
त्रिभुवनजनयावद्वृत्तवृत्तान्तसाक्षात्कृतिकृतिषु निरस्तानन्दमिन्द्रादिषु द्राक् ॥

तदखिलमिति ॥ जगत्याः पतिर्नल इह भैमीविषये (यं)भूतं [illegible] [illegible] स्वीयं दूत्यं तस्य तत्त्वं [illegible] भूतस्य [illegible] [illegible] [illegible] प्रथमं मया [illegible] दूत्यं कृतम्, अनन्तरमुन्मादिन्या [illegible] [illegible] [illegible] भूतस्य [illegible] [illegible] वा इन्द्रादिषु द्राक् शीघ्रं निरस्तानन्दम् [illegible]

---

१ '[illegible]' [illegible] इति साहित्यविद्याधरी । २ '[illegible]' [illegible] इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी ।

त्यक्तहर्षं यथा तथाभिलपति स्म कथयति स्म । यथावृत्तमेवाकथयदित्यर्थः । किंभूतेष्विन्द्रादिषु—त्रिभुवने जनानां यावान्वृत्तो निष्पन्नो वृत्तान्तः समाचारस्तस्य साक्षात्कृतौ प्रत्यक्षीकरणे कृतिषु कुशलेषु । त्रिभुवन—इत्यादिना निष्कपटं दूत्यं कृतमित्यादावेव तैर्ज्ञातमिति सूचितम् ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
संदृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ १६० ॥

श्रीहर्षमिति ॥ अर्धं पूर्ववत् । संदृब्धो गुम्फितः अर्णववर्णनाख्यो ग्रन्थो येन । अर्णववर्णनाख्योऽपि ग्रन्थस्तेन कृत इत्यर्थः । व्यरंसीत्, 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । 'यमरमनमातां सक् च' इतीट्सगागमौ ॥

इति श्रीवेदरकरोपनामश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे नवमः सर्गः ॥

दशमः सर्गः ।

इदानीं स्वयंवरस्य पूर्वरङ्गवर्णनार्थं दशमं सर्गमारभते—

रथैरथायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च दृष्टपाराः ।
स्वयंवरं शंबरवैरिकायव्यूहश्रियः श्रीजितयक्षराजाः ॥ १ ॥

रथैरिति ॥ अथ कुमाराः प्रादुर्भूततरुणिमानो राजानो रथैः कृत्वा प्रारब्धवरं स्वयंवरमायुराजग्मुः । किंभूताः—(पूर्वमाकारिताः) कुलजाः कुलीनाः शस्त्रेषु धनुरादिषु, शास्त्रेषु वेदादिशास्त्रेषु च दृष्टपाराः प्राप्तपर्यन्ताः समन्त्रकशस्त्रप्रयोगोपसंहारविदो वेदादिशास्त्रविदश्च । तथा शंबरवैरी कामस्तस्य कायव्यूहः शंबरजयार्थं मायया गृहीतो यः शरीरसङ्घः तद्वच्छ्रीः शोभा येषाम् । कामशरीरसङ्घा एव ते युवान इत्यर्थः । तथा—श्रिया लक्ष्म्या कृत्वा जितो यक्षराट् कुबेरो यैस्ते । कुबेरादप्यधिकसंपद इति यावत् । स्वयंवरस्थानं कुण्डिनं प्राप्ता इत्यर्थः । अन्यवाहनादिसद्भावेऽपि संपदाधिक्यसूचनार्थं महारथत्वादिप्रशंसासूचनार्थं च रथपदम् । एतैर्विशेषणैर्वरोचिता गुणाः कथिताः । यदुक्तम्—'कन्या वरयते रूपं माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥' प्रथमतः शस्त्रग्रहणं क्षत्रियाणां शास्त्रापेक्षयाऽभ्यर्हिततरत्वसूचनार्थम् । आयुः, आङ्पूर्वस्य यातेर्लङि ॥

नाभूदभूमिः स्मरसायकानां नासीदगन्ता कुलजः कुमारः ।
नास्थादपन्था धरणेः कणोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु ॥ २ ॥

नाभूदिति ॥ कुलजः कुलीनः कोऽपि कुमारः स्मरसायकानामभूमिरगोचरो नाभूत् । किंतु स्वयंवरश्रवणेन कामबाणपीडित एवाभूत् । तथा—अगन्ता नासीत् । सर्वोऽपि स्वं-

---

१ 'अत्र छेकानुप्रासोऽलंकारः, मालिनी वृत्तम्' इति साहित्यविद्याधरी । २ 'अत्रानुप्रासरूपकोपमातिशयालंकारः, इन्द्रवज्रोपेन्द्रवज्रालक्षणस्य मिश्रितत्वादुपजातिर्वृत्तम्' इति साहित्यविद्याधरी ।

वरे गत एवेत्यर्थः । राज्ञां मनेषु युगपद्गच्छत्सु सत्सु धरणेः पृथिव्याः कणोऽप्यणुरूपोऽपि देशः सपत्न्या नास्थात्र स्थितः किंतु बहुनागोऽभूदित्यर्थः । अस्थादिति 'गातिस्था-' इति सिचो लुक् ॥

योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरनर्हैः प्रसभेन हर्तुम् ।
द्रष्टुं परैस्तान्परिकर्तुमन्यैः स्वमात्रशेषाः ककुभो बभूवुः ॥ ३ ॥

योग्यैरिति ॥ कुलादिना योग्यैर्नृपजां भैमीं वरीतुं व्रजद्भिर्नृपैः, तथा—अनर्हैः कुलादिना अयोग्यैः प्रसभेन हठेन हर्तुं व्रजद्भिः वीरैः शूरैः, तथा—स्वयंवरकौतुकं द्रष्टुं व्रजद्भिः परैरुदासीनैः, तथा—तान्सर्वानपि परिकर्तुं सेवितुं व्रजद्भिरन्यैः वेतनग्राहिभिः दासीभूतैर्जनैः कृत्वा तैर्निर्गलितैः ककुभो दिशः स्वमात्रशेषाः स्वमात्रावशिष्टाः बभूवुः । सर्वेऽपि जनाः स्वयंवरे गता इति भावः । 'अनुरोद्धुम्' इति पाठे स एवार्थः ॥

पूर्वोक्तमेवार्थमाह—

लोकैरशेषैरवनिश्रियं तामुद्दिश्य दिश्यैर्विहिते प्रयाणे ।
स्ववर्तितत्तज्जनयन्त्रणार्तिविश्रान्तिमापुः ककुभां विभागाः ॥ ४ ॥

लोकैरिति ॥ अशेषैः सकलैः दिश्यैर्दिग्भवैर्लोकैरवनेः पृथिव्याः श्रियं लक्ष्मीं तां भैमीमुद्दिश्य प्रयाणे विहिते सति ककुभां दिशां विभागाः स्वस्मिन्वर्तिनो वर्तमानाः ते ते जना अनेकजातीया बहुसंख्याका ये जनास्तैः कृत्वा या यन्त्रणा संकटता तया आर्तिः पीडा ततो विश्रान्तिं सुखावस्थानमापुः । भाररहितत्वात्सोच्छ्वासा जाता इत्यर्थः । दिश्यैः दिगादित्वाद्यत् ॥

तलं यथेयुर्न तिला विकीर्णाः सैन्यैस्तथा राजपथा बभूवुः ।
भैमीं स लब्धामिव तत्र मेने कः प्राप भूभृद्भवितुं पुरस्तात् ॥ ५ ॥

तलमिति ॥ ऊर्ध्वं विकीर्णा अतिलघुत्वात्तिला अपि यथा तलं भूतलं न ईयुरधो न पेतुः तथा सैन्यैः कृत्वा राजपथा राजमार्गा बभूवुः । सैन्यबाहुल्यादतिसंकीर्णा जाता इति भावः । तत्रातिसंकटेषु राजपथेषु यो भूभृत् राजा पुरस्तादग्रे भवितुं गन्तुं प्राप शशाक स भैमीं लब्धामिव लब्धप्रायामिव मेने । एते यावदागच्छन्ति तावत्पुरोगतं मामेव भैमी वरीष्यत इति मेने इत्यर्थः । सर्वोऽप्यहमहमिकयाऽग्रे गन्तुमैच्छदिति भावः । 'तथा पथाऽमानि महीमहेन्द्रैः' इति पाठे राजभिः पथा मार्गेण तथा ज्ञातमिति व्याख्येयम् ॥

नृपः पुरःस्थैः प्रतिबद्धवर्त्मा पश्चात्तनैः कश्चन नुद्यमानः ।
यन्त्रस्थसिद्धार्थपदाभिषेकं लब्ध्वाप्यसिद्धार्थममन्यत स्वम् ॥ ६ ॥

नृप इति ॥ पुरःस्थैरग्रे स्थितैः मनुष्यादिभिः प्रतिबद्धवर्त्मा तथा पश्चात्तनैः पश्चात्स्थितैः नुद्यमानः पुरःप्रेर्यमाणः कश्चन नृपः यन्त्रस्थाः तैलकर्षणयन्त्रस्थाः सिद्धार्थाः सर्षपास्तेषां पदे स्थानेऽभिषेकं लब्ध्वाप्यूर्ध्वाधःस्थितपाषाणनिष्पीडितसर्षपावस्थां लब्ध्वापि स्वमात्मानमसिद्धार्थमकृतकार्यममन्यत । सर्षपपदाभिषिक्तोऽपि सर्षपो न भवतीति विरोधद्योतकोऽपि-

---

१ 'अत्र ककुभां स्वमात्रशेषत्वासंबन्धेऽपि संबन्धोक्तेरतिशयोक्तिभेदः' इति जीवातुः । २ 'अ...शेषत्वेऽतिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । ३ 'अत्रोत्प्रेक्षा व्यङ्ग्या' इति जी... ४ 'अत्र हेत्वनुमानोत्प्रेक्षालंकारौ' इति साहित्यविद्याधरी ।

त्यक्तहर्षं यथा तथाभिलपति स्म कथयति स्म । यथावृत्तमेवाकथयदित्यर्थः । किंभूतेष्विन्द्रादिषु—त्रिभुवने जनानां यावान्वृत्तो निष्पन्नो वृत्तान्तः समाचारस्तस्य साक्षात्कृतौ प्रत्यक्षीकरणे कृतिषु कुशलेषु । त्रिभुवन–इत्यादिना निष्कपटं दूत्यं कृतमित्यादावेव तैर्ज्ञातमिति सूचितम् ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
संदृब्धार्णववर्णनस्य नवमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ १६० ॥

श्रीहर्षमिति ॥ अर्थं पूर्ववत् । संदृब्धो गुम्फितः अर्णववर्णनाख्यो ग्रन्थो येन । अर्णववर्णनाख्योऽपि ग्रन्थस्तेन कृत इत्यर्थः । व्यरंसीत्, 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् । 'यमरमनमातां सक् च' इतीट्सगागमौ ॥

इति श्रीवेदरकरोपनामश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे नवमः सर्गः ॥

दशमः सर्गः ।

इदानीं स्वयंवरस्य पूर्वरङ्गवर्णनार्थं दशमं सर्गमारभते—

रथैरथायुः कुलजाः कुमाराः शस्त्रेषु शास्त्रेषु च दृष्टपाराः ।
स्वयंवरं शंवरवैरिकायव्यूहश्रियः श्रीजितयक्षराजाः ॥ १ ॥

रथैरिति ॥ अथ कुमाराः प्रादुर्भूततरुणिमानो राजानो रथैः कृत्वा प्रारब्धवरं स्वयंवरमाजग्मुः । किंभूताः—(पूर्वमाकारिताः) कुलजाः कुलीनाः शस्त्रेषु धनुरादिषु, शास्त्रेषु वेदादिशास्त्रेषु च दृष्टपाराः प्राप्तपर्यन्ताः समन्त्रकशस्त्रप्रयोगोपसंहारविदो वेदादिशास्त्रविदश्च । तथा शंवरवैरी कामस्तस्य कायव्यूहः शंवरजयार्थं मायया गृहीतो यः शरीरसङ्घः तद्वच्छ्रीः शोभा येषाम् । कामशरीरसङ्घा एव ते युवान इत्यर्थः । तथा—श्रिया लक्ष्म्या कृत्वा जितो यक्षराट् कुबेरो यैस्ते । कुबेरादप्यधिकसंपद इति यावत् । स्वयंवरस्थानं कुण्डिनं प्राप्ता इत्यर्थः । अन्यवाहनादिसद्भावेऽपि संपदाधिक्यसूचनार्थं महारथत्वादिप्रशंसासूचनार्थं च रथपदम् । एतैर्विशेषणैर्वरोचिता गुणाः कथिताः । यदुक्तम्—'कन्या वरयते रूपं माता वित्तं पिता श्रुतम् । बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ॥' प्रथमतः शस्त्रग्रहणं क्षत्रियाणां शास्त्रापेक्षयाऽभ्यर्हिततरत्वसूचनार्थम् । आयुः, आङ्पूर्वस्य यातेर्लङि ॥

नाभूदभूमिः स्मरसायकानां नासीदगन्ता कुलजः कुमारः ।
नास्थादपन्था वरणैः कणोऽपि व्रजेषु राज्ञां युगपद्व्रजत्सु ॥ २ ॥

नाभूदिति ॥ कुलजः कुलीनः कोऽपि कुमारः स्मरसायकानामभूमिरगोचरो नाभूत् । किंतु स्वयंवरश्रवणेन कामबाणपीडित एवाभूत् । तथा—अगन्ता नासीत् । सर्वोऽपि गं-

---

१ 'अत्र केऽप्यनुप्रासोऽलंकारः, मालिनी वृत्तम्' इति साहित्यविद्याधरी । २ 'अत्रानुप्रासोऽलं-[illegible] इन्द्रवज्रा [illegible]' इति साहित्यविद्याधरी ।

वरे गत एवेत्यर्थः । राज्ञां व्रजेषु युगपद्व्रजत्सु सत्सु धरणेः पृथिव्याः कणोऽप्यणुरूपोऽपि देशः जनपन्था नास्थान्न स्थितः किंतु बहुमार्गोऽभूदित्यर्थः । अस्थादिति 'गातिस्था-' इति सिचो लुक् ॥

योग्यैर्व्रजद्भिर्नृपजां वरीतुं वीरैरनर्हैः प्रसभेन हर्तुम् ।
द्रष्टुं परैस्तान्परिकर्तुमन्यैः स्वमात्रशेषाः ककुभो बभूवुः ॥ ३ ॥

योग्यैरिति ॥ कुलादिना योग्यैर्नृपजां भैमीं वरीतुं व्रजद्भिर्नृपैः, तथा—अनर्हैः कुलादिना अयोग्यैः प्रसभेन हठेन हर्तुं व्रजद्भिः वीरैः शूरैः, तथा—स्वयंवरकौतुकं द्रष्टुं व्रजद्भिः परैरुदासीनैः, तथा—तान्सर्वानपि परिकर्तुं सेवितुं व्रजद्भिरन्यैः वेतनग्राहिभिः दासीभूतैर्जनैः कृत्वा तैर्निर्गमितैः ककुभो दिशः स्वमात्रशेषाः स्वमात्रावशिष्टाः बभूवुः । सर्वेऽपि जनाः स्वयंवरे गता इति भावः । 'अनुरोद्धुम्' इति पाठे स एवार्थः ॥

पूर्वोक्तमेवार्थमाह—

लोकैरशेषैरवनिश्रियं तामुद्दिश्य दिश्यैर्विहिते प्रयाणे ।
स्ववर्तितत्तज्जनयन्त्रणार्तिविश्रान्तिमापुः ककुभां विभागाः ॥ ४ ॥

लोकैरिति ॥ अशेषैः सकलैः दिश्यैर्दिग्भवैर्लोकैरवनेः पृथिव्याः श्रियं लक्ष्मीं तां भैमीमुद्दिश्य प्रयाणे विहिते सति ककुभां दिशां विभागाः स्वस्मिन्वर्तिनो वर्तमानाः ये ते जना अनेकजातीया बहुसंख्याका ये जनास्तैः कृत्वा या यन्त्रणा संकटता तया आर्तिः पीडा ततो विश्रान्तिं सुखावस्थानमापुः । भारराहित्यात्सोच्छ्वासा जाता इत्यर्थः । दिश्यैः दिगादित्वाद्यत् ॥

तलं यथेयुर्न तिला विकीर्णाः सैन्यैस्तथा राजपथा बभूवुः ।
भैमीं स लब्धामिव तत्र मेने कः प्राप भूभृद्भवितुं पुरस्तात् ॥ ५ ॥

तलमिति ॥ ऊर्ध्वं विकीर्णा अतिसूक्ष्मास्तिला अपि यथा तलं भूतलं न ईयुरधो न पेतुः तथा सैन्यैः कृत्वा राजपथा राजमार्गा बभूवुः । सैन्यबाहुल्यादतिसंकीर्णा जाता इति भावः । तत्रातिसंकटेषु राजपथेषु यो भूभृद् राजा पुरस्तादग्रे भवितुं गन्तुं प्राप शशाक स भैमीं लब्धामिव लब्धप्रायामिव मेने । एते यावदागच्छन्ति तावत्पुरोगतं मामेव भैमी वरिष्यत इति मेने इत्यर्थः । सर्वोऽप्यहमहमिकयाऽग्रे गन्तुमैच्छदिति भावः । 'तथा पथ [illegible] महीमहेन्द्रैः' इति पाठे राजभिः पथा मार्गेण तथा जातमिति व्याख्येयम् ॥

नृपः पुरःस्थैः प्रतिबद्धवर्त्मा पश्चात्तनैः कश्चन नुद्यमानः ।
यन्त्रस्थसिद्धार्थपदाभिषेकं लब्ध्वाप्यसिद्धार्थममन्यत स्वम् ॥ ६ ॥

नृप इति ॥ पुरःस्थैरग्रे स्थितैः मनुष्यादिभिः प्रतिबद्धवर्त्मा तथा पश्चात्तनैः पश्चात्स्थितैः नुद्यमानः पुरःप्रेर्यमाणः कश्चन नृपः यन्त्रस्थाः तैलकर्षणयन्त्रस्थाः सिद्धार्थाः सर्षपास्तेषां पदे स्थाने [illegible] लब्ध्वाप्यपूर्व[illegible] लब्ध्वापि स्वमात्मानमसिद्धार्थमकृतार्थममन्यत । सर्षपवत्[illegible] [illegible]

---

१ 'अत्र ककुभां [illegible]' [illegible] २ [illegible] ३ [illegible] ४ 'अत्र [illegible]' [illegible]

शब्दः। कथंचिदपि पुरो गन्तुमशक्तत्वाद्भैमीप्राप्तिर्मम न भविष्यतीति मृतप्रायत्वाच्चातिदुःखितोऽभूदिति भावः। 'दक्षिणापश्चात्पुरसस्त्यक्' इति विशेषविहितेन त्यका व्युत्पत्तेर्बाधस्य युक्तत्वात्पाश्चात्यैरिति भाव्यम्। पैश्चात्तनैरिति शिष्टप्रयोगदर्शनान्महाविभाषानुवृत्त्या समर्थनीयम्[१] ॥

राज्ञां पथि स्त्यानतयानुपूर्व्या विलङ्घनाशक्तिविलम्बभाजाम्।
आह्वानसंज्ञानमिवाग्रकम्पैर्ददुर्विदर्भेन्द्रपुरीपताकाः ॥ ७ ॥

राज्ञामिति ॥ विदर्भेन्द्रपुरीपताका अग्रकम्पैः कृत्वा राज्ञामाह्वानसंज्ञानमाह्वानसंकेतं ददुरिव। झटित्यायात, विलम्बं मा कार्ष्टेत्यादिष्टवत्य इवेत्यर्थः। किंभूतानां राज्ञाम्—पथि स्त्यानतयातिसंकटतया निमित्तभूतया कृत्वा आनुपूर्व्या कृत्वा या विलङ्घना गतिः, तत्राशक्त्याऽसामर्थ्येन विलम्बभाजाम्। अन्योऽपि विलम्बेन पश्चादायान्तं हस्तादिनाह्वयति। दूरात्कुण्डिननगरीपताकास्तैर्दृष्टा इति भावः। स्त्यानम्, 'स्त्यै शब्दसंघातयोः' इत्यस्य 'संयोगादेरातो धातोः–' इति निष्ठानत्वम्। पूर्वं पूर्वमनुगतोऽनुपूर्वः तस्य भाव आनुपूर्वी औचितीवत्[२] ॥

प्राग्भूय कर्कोटक आचकर्ष सकम्बलं नागबलं यदुच्चैः।
भुवस्तले कुण्डिनगामि राज्ञां तद्वासुकेश्चाश्वतरोऽन्वगच्छत् ॥ ८ ॥

प्रागिति ॥ कर्कः श्वेतोऽश्वः, अटतीत्यटकः हृयगतिः सन्प्राग्भूय पुरो भूत्वा उच्चैरतिशयेन भुवस्तले भूपृष्ठे कुण्डिनगामि सकम्बलं नानावर्णकुथसहितं सप्रावरणं च यद् राज्ञां नागबलं हस्तिसैन्यमाचकर्ष, तन्नागबलमश्वतरो वेसरोऽन्वगच्छत्। करिसैन्यस्य पुरतः पश्चाच्चाश्वा गच्छन्तीति सेनारीतिः। अथ च—कर्कोटकः सर्पविशेषः प्राग्भूय पुरस्तात् भूत्वा उच्चैः सकम्बलं कम्बलाख्येन सर्पेण सहितं भुवः तले पाताले स्थितं कुण्डिनगामि वासुकेः यन्नागबलं सर्पबलमाचकर्ष पातालतः कुण्डिनपुरमानीतवान्। अश्वतरनामा सर्पः तन्नागबलमन्वगच्छत्। सर्वं सर्पबलं वृद्धानुक्रमेण कुण्डिनमायातम्। सर्वेऽपि राजानो वासुकिप्रमुखाः सर्पाश्च स्वयंवरार्थं ससैन्याः कुण्डिनमागता इति भावः। 'कम्बलो। नागभेदे स्यात्कृप्यप्रावारयोरपि' इति विश्वः। प्राग्भूय, च्व्यन्त(गति)समासत्वाल्ल्यप्। अश्वतरः, पक्षे 'वत्सोक्षाश्वर्षभेभ्यश्च तनुत्वे' इति तरप्। 'अधःस्वरूपयोरस्त्री तलं स्यात्' इत्यमरः[३] ॥

आगच्छदुर्विन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता मुखश्रीः।
विस्पष्टमाचष्ट हरिद्वधूनां रूपं पतित्यागदशानुरूपम् ॥ ९ ॥

आगच्छदिति ॥ हरिद्वधूनां दिग्वधूनां मुखश्रीः प्रारम्भशोभा मुखशोभा च पतिभिः कृतस्त्यागस्त्येन या दशा तस्या अनुरूपं योग्यं रूपं विस्पष्टमाचष्ट। किंभूता—आगच्छदुर्विन्द्रचमूसमुत्थैर्भूरेणुभिः पाण्डुरिता। स्वप्रियत्यागेनैतादृशवस्था श्रीणां भवतीति। दिग्वधूनामिन्द्रादयो राजानश्च पतयः। सर्वा अपि दिशो राजशून्याः सैन्यबाहुल्याद्धूलीधूसराश्च जाता इति भावः ॥

१ 'स्वादन्नन्नि अर्थात्मनादीनि स्थाननाः' इति 'अथा समर्थनीयम्' इति सुखावबोधा। २ 'अत्र [illegible]ऽलंकारः' इति साहित्यविद्याधरी। ३ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ४ 'अत्र [illegible]ऽलंकारः' इति साहित्यविद्याधरी। ५ 'दिशां वधूनां' इति [illegible] [illegible]। ६ 'अत्र [illegible]ऽलंकारः' इति साहित्यविद्याधरी।

भैमीति ॥ या गिरिजा पार्वती आत्मभर्तुर्हरस्यार्धं तनुः सती (वा) हरकर्तृकं भैमीविवाहं कस्मात्सहते स्म । अपि तु न सहते स्म । विदर्भान् अग्रजन्त्या तया पार्वत्या ईशानयानाय हरगमनाय तेन कारणेनान्तरायो विघ्नो विदधे कृतः । शरीरार्धत्वात्पार्वत्याः कथं स गच्छतु । 'पुंस्यर्धोऽर्धं समेंऽशके' इत्यमरः ॥

स्वयंवरं भीमनरेन्द्रजाया दिशः पतिर्न प्रविवेश शेषः ।
प्रयातु भारं स निवेश्य कस्मिन्नहिर्महीगौरवसासहिर्यः ॥ १५ ॥

स्वयंवरमिति ॥ अधरदिशः पतिः शेषः भीमनरेन्द्रजायाः स्वयंवरं न प्रविवेश । कुतः—स शेषः कस्मिन्स्वसदृशे पृथ्वीभारं निवेश्य प्रयातु । योऽहिः सर्पो महीगौरवं भृशं सहत इति महीगौरवसासहिः । सासहिवावदिचाचलिपापतिप्रभृतय इकारान्ता निपातिताः ॥

ययौ[2] विमृश्योर्ध्वदिशः पतिर्न स्वयंवरं वीक्षितधर्मशास्त्रः ।
व्यलोकि लोके श्रुतिषु स्मृतौ वा समं विवाहः क्व पितामहेन ॥ १६ ॥

ययाविति ॥ वीक्षितं पर्यालोचितं धर्मशास्त्रं येनैवंविध ऊर्ध्वदिशः पतिर्ब्रह्मा विमृश्य धर्मतत्त्वं विचार्य स्वयंवरं न ययौ । विचारमेव—पितामहेन, अथ च पितृपित्रा समं विवाहः क्व लोके श्रुतिषु स्मृतौ वा व्यलोकि । लोकस्मृतिश्रुतिविरुद्ध इत्यर्थः । 'असमानार्षगोत्रजाम्' इति स्मृतिनिषेधात्पितृपित्रा सह विवाहस्याननुज्ञातत्वात्पितामहेन तत्र न गतमिति भावः । मन्वादिद्वारा स्वयमेव धर्मशास्त्रं प्रणीय कथमेवं कुर्यादिति भावः[3] ॥

भैमीनिरस्तं स्वमवेत्य दूतीमुखात्किलेन्द्रप्रमुखा दिगीशाः ।
स्यदे मुखेन्दौ च वितत्य मान्द्यं चित्तस्य ते राजसमाजमीयुः ॥ १७ ॥

भैमीति ॥ ते इन्द्रप्रमुखा दिगीशा इन्द्रादयो दिक्पालाः दूतीमुखात्स्वमात्मानं भैम्या निरस्तं निराकृतं किल निश्चयेनावेत्य ज्ञात्वा स्यदे गमने किमर्थमस्माभिस्तत्र गन्तव्यमित्युत्साहभङ्गान्मुखेन्दौ च चित्तस्य मान्द्यमालस्यं वितत्य विस्तीर्य राजसमाजमीयुर्जग्मुः । 'चिरस्य' इति पाठे शनैः शनैः । स्यदे मान्द्यं शनैस्त्वम्, मुखेन्दौ मान्द्यं मलिनता । एतन्मान्द्यद्वयेन चित्तस्यापि मान्द्यं प्रकाशितमिति भावः । 'स्यदो जवे' इति साधुः ॥

नलभ्रमेणापि भजेत भैमी कदाचिदस्मानिति शेषिताशा ।
अभून्महेन्द्रादिचतुष्टयी सा चतुर्नली काचिदलीकरूपा ॥ १८ ॥

नलेति ॥ सा महेन्द्रादिचतुष्टयी काचिदनिर्वचनीयालीकरूपा मिथ्यास्वरूपा चतुर्नल्यभूत् । किंभूता—दूतीमुखात्स्वस्मिन् भैमीविरागमाकर्ण्यापि इति शेषिताशावशिष्टाशा । इति

---

१ 'अत्रोत्प्रेक्षाहेत्वनुप्रासालंकाराः' इति साहित्यविद्याधरी । २ 'स्वयं विमृश्यैव सधर्मशास्त्रं स्वयंवरं प्रास्थित न स्वयंभूः । व्यलोकि लोके मुनिभिः स्मृतो वा' इति पाठः सुखावबोधासाहित्यविद्याधरीसंमतः । ३ 'अत्र हेतुश्लेषालंकारः' इति साहित्यविद्याधरी । 'सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः' इति जीवातुः । ४ 'श्रुत्वा निजं भीमजया निरासं दूतीमुखादिन्द्रमुखाः' इति पाठः सुखावबोधासाहित्यविद्याधरीसंमतः । ५ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी ।

नाभूदिति भावः। अन्यस्याप्यसमर्थस्याप्रतिभस्याननं पुनरुक्तिदोषं परिहर्तुं न शक्नोतीत्युक्तिः।
'बर्हिः कुशहुताशयोः' इति विश्वः॥

प्रियावियोगकथितादिवैलाच्चन्द्राच्च राहुग्रहपीडिताच्चे।
ध्मातादृवेन स्मरतोऽपि सारैः स्वं कल्पयन्ति स्म नलानुकल्पम्॥२२॥

प्रियेति॥ ते देवाः प्रियावियोगेनोर्वशीविरहेण कथितादिव ऐलात्पुरूरवसः, तथा—राहुग्रहपीडितादिव चन्द्राच्च, तथा—ध्मातादिव (ईश्वरेणेत्यर्थात्) दग्धादिव स्मरतोऽपि गृहीतैः सारैः श्रेष्ठभागैः कृत्वा स्वमात्मानं नलानुकल्पं नलस्य प्रतिनिधिं कल्पयन्ति स्म। प्रियावियोगादयः साराकर्षणोपायत्वेनोत्प्रेक्षिताः। अन्यस्यापि सारः क्वथनपीडिताग्निदाहादिभिः समाकृष्यते। प्रियावियोगक्वथनरहितैल—ग्रहपीडनरहितचन्द्र—ईश्वरकृतदाहरहितकामतुल्यस्य नलस्य त्रिभ्योऽप्यधिकत्वादिति भावः। 'मुख्यः स्यात्प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः' इत्यमरः। 'किलैलात्' इति पाठे किल उत्प्रेक्षायाम्॥

ननु भैम्या नले निरतिशयमनुरागं ज्ञात्वा श्रुत्वा चेन्द्रादयो राजानश्च कथं तत्रागता इत्यत आह—

नलस्य पश्यत्वियदन्तरं तैर्भैमीति भूपान्विधिराहृतास्यै।
स्पर्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमाख्यत्॥२३॥

नलस्येति॥ विधिः ब्रह्मा अस्यै भूपान् इति मनसि धृत्वा आहृत आनीतवान्। इति किम्—भैमी तैः भूपैः सह नलस्य इयत् अन्तरं हस्ताद्यभिनयमात्रेणानिर्वचनीयं विशेषतः पश्यतु। तथा—दिगीशानपि नलरूपधारणद्वारा नलस्य स्पर्धां कारयित्वा तस्यैव नलस्यैव प्रथिमानं तेभ्यो दिगीशेभ्य आख्यत्। भैमीं प्रतीत्यर्थात्। साक्षाद्दर्शनात्तारतम्यं ज्ञायते, नतु परोक्षमिति कारणाद्राजानः समाहृताः। अधिकेन सह स्पर्धा भवति। यतो दिगीशैर्नलत्वेन विना भैमीप्राप्त्यभावात्तत्प्राप्त्यर्थं नलरूपधारणान्नलाधिक्यमेव ब्रह्मणोक्तमित्यर्थः। उभयेभ्योऽपि नल एवाधिक इति भावः। नलरूपे धृतेऽपि तत्तुल्या न जाताः। 'इदमन्तरम्' इत्यपि पाठः। दिगीशान्, 'हृक्रोः—' इति कर्मत्वम्॥

सभा नलश्रीयमकैर्यमाद्यैर्नलं विनाभूद्धृतदिव्यरत्नैः।
भामाङ्गणप्राघुणिके चतुर्भिर्देवद्रुमैर्द्यौरिव पारिजाते॥२४॥

सभेति॥ सा स्वयंवरसभा नलश्रियो यमकैः प्रतिनिधिभिः यमाद्यैश्चतुर्भिः नलं विना द्यौरिव अभूत्। किंभूता द्यौः—पारिजाते भामायाः सत्यभामाया अङ्गणस्य प्राघुणिकेऽतिथौ सति चतुर्भिर्मन्दार—संतान—कल्पवृक्ष—हरिचन्दन—संज्ञकैर्देवद्रुमैरुपलक्षिता। किंभूतैरुभयैः—धृतदिव्यरत्नैर्धृतदिव्यरत्नाभरणैः मूलादारभ्याग्रपर्यन्तं धृतमुक्तादिदिव्यरत्नैश्च। पारिजातं विना मन्दारादिषु सत्स्वपि यथा द्यौर्न शोभते, तथा नलरूपधारिष्विन्द्रादिषु सत्स्वपि मुख्यं नलं विना सभा न शुशुभे। इन्द्रादयः सभायामागताः, नलो नागत इति भावः॥

---

१ 'अत्र रूपोतिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्रोत्प्रेक्षादीपकालंकारः' इति साहित्यविद्याधरी। ३ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ४ 'अत्रानुप्रासोपमालंकारः' इति साहित्यविद्याधरी।

तत्रागमद्वासुकिरीशभूषाभस्मोपदेहस्फुटगौरदेहः।
फणीन्द्रवृन्दप्रणिगद्यमानप्रसीदजीवाद्यनुजीविवादः ॥ २५ ॥

तत्रेति ॥ वासुकिस्तत्र स्वयंवरसभायामगमत्। किंभूतः—ईशस्य भूषार्थं भस्मैव उपदेहोऽङ्गरागः, तेन स्फुटं प्रकटं गौर उज्ज्वलो देहो यस्य। तथा—फणीन्द्रवृन्दैः कर्कोटकादिसर्पश्रेष्ठसमूहैः प्रणिगद्यमान उच्यमानः प्रसीद, जीव इत्यादिशब्दो यत्र ईदृशोऽनुजीविनां सेवकानां वादः कोलाहलो यस्य। 'प्राग्भूय'-इत्यनेन वासुकेः पातालाच्चलनमात्रमेवोक्तं, इदानीं तु सभागमनमिति न पौनरुक्त्यम्। 'ईशवासात्' इति पाठे ईश्वरशरीरे योगरूढिभवननिमित्तवसतेर्हेतोः[1] ॥

द्वीपान्तरेभ्यः पुटभेदनं तत् क्षणादवापे सुरभूमिभूपैः।
तत्कालमालम्बि न केन यूना स्मरेषुपक्षानिलतूललीला ॥ २६ ॥

द्वीपेति ॥ सुरभूमिषु देवभूमिषु द्वीपान्तरलक्षणासु ये भूपा राजानस्ते द्वीपान्तरेभ्यः प्लक्षादिभ्यः सकाशात्तत् पुटभेदनं नगरं कुण्डिनाख्यं क्षणाज्झटिति अवापे प्रापम्। झटित्यागमने हेतुमाह—केन यूना तत्कालं तस्मिन् भैमीस्वयंवरसमये स्मरेषुपक्षानिलतूललीला कामबाणपक्षवातसंबन्धात्कार्पासविलासो नालम्बि नाङ्गीकृतः, अपितु सर्वैरपि तूललीलाङ्गीकृता। वातेरितस्तूलो यथा दूराज्झटित्यायाति तथा तेऽपि कामपीडिताः सन्तः दूराज्झटित्यनायासेनायाता इति भावः ॥

रम्येषु हर्म्येषु निवेशनेन सपर्यया कुण्डिननाकनाथः।
प्रियोक्तिदानादरनम्रताद्यैरुपाचरच्चारु स राजचक्रम् ॥ २७ ॥

रम्येष्विति ॥ स कुण्डिनमेव नाकस्तस्य नाथो भीमो रम्येषु हर्म्येषु निवेशनेन स्थापनेन, तथा—सपर्ययातिथ्येन, तथा—प्रियोक्त्या प्रियवचनेन, दानेनोत्सवकालादरदानेन आदरेण, नम्रतया च, आदरकृतया नम्रतया वा एतदाद्यैः कृत्वा चारु सम्यग्यथा तथा राजचक्रमुपाचरदतूतुपत् ॥

नाभूदिति भावः। अन्यस्याप्यसमर्थस्याप्रतिभस्याननं पुनरुक्तिदोषं परिहर्तुं न शक्नोतीत्युक्तिः। 'बर्हिः कुशहुताशयोः' इति विश्वः॥

प्रियावियोगक्वथितादिवैलाच्चन्द्राच्च राहुग्रहपीडितात्ते।
ध्मातान्द्रवेन स्मरतोऽपि सारैः स्वं कल्पयन्ति स्म नलानुकल्पम्॥२२॥

प्रियेति॥ ते देवाः प्रियावियोगेनोर्वशीविरहेण क्वथितादिव ऐलात्पुरूरवसः, तथा—राहुग्रहपीडितादिव चन्द्राच्च, तथा—ध्मातादिव (ईश्वरेणेत्यर्थात्) दग्धादिव स्मरतोऽपि गृहीतैः सारैः श्रेष्ठभागैः कृत्वा स्वमात्मानं नलानुकल्पं नलस्य प्रतिनिधिं कल्पयन्ति स्म। प्रियावियोगादयः साराकर्षणोपायत्वेनोत्प्रेक्षिताः। अन्यस्यापि सारः क्वथनपीडिताग्निदाहादिभिः समाकृष्यते। प्रियावियोगक्वथनरहितैल—ग्रहपीडनरहितचन्द्र—ईश्वरकृतदाहरहितकामतुल्यस्य नलस्य त्रिभ्योऽप्यधिकत्वादिति भावः। 'मुख्यः स्यात्प्रथमः कल्पोऽनुकल्पस्तु ततोऽधमः' इत्यमरः। 'किलैलात्' इति पाठे किल उत्प्रेक्षायाम्॥

ननु भैम्या नले निरतिशयमनुरागं ज्ञात्वा श्रुत्वा चेन्द्रादयो राजानश्च कथं तत्रागता इत्यत आह—

नलस्य पश्यत्वियदन्तरं तैर्भैमीति भूपान्विधिराहृतास्यै।
स्पर्धां दिगीशानपि कारयित्वा तस्यैव तेभ्यः प्रथिमानमाख्यत्॥२३॥

नलस्येति॥ विधिः ब्रह्मा अस्यै भूपान् इति मनसि धृत्वा आहृत आनीतवान्। इति किम्—भैमी तैः भूपैः सह नलस्य इयत् अन्तरं हस्ताद्यभिनयमात्रेणानिर्वचनीयं विशेषतः पश्यतु। तथा—दिगीशानपि नलरूपधारणद्वारा नलस्य स्पर्धां कारयित्वा तस्यैव नलस्यैव प्रथिमानं तेभ्यो दिगीशेभ्य आख्यत्। भैमीं प्रतीत्यर्थात्। साक्षाद्दर्शनात्तारतम्यं ज्ञायते, नतु परोक्षमिति कारणाद्राजानः समाहृताः। अधिकेन सह स्पर्धा भवति। यतो दिगीशैर्नलत्वेन विना भैमीप्राप्त्यभावात्तत्प्राप्त्यर्थं नलरूपधारणान्नलाधिक्यमेव ब्रह्मणोक्तमित्यर्थः। उभयेभ्योऽपि नल एवाधिक इति भावः। नलरूपे धृतेऽपि तत्तुल्या न जाताः। 'इदमन्तरम्' इत्यपि पाठः। दिगीशान्, 'हृक्रोः—' इति कर्मत्वम्॥

सभा नलश्रीयमकैर्यमाद्यैर्नलं विनाभूद्धृतदिव्यरत्नैः।
भामाङ्गणप्राघुणिके चतुर्भिर्देवद्रुमैर्द्यौरिव पारिजाते॥२४॥

सभेति॥ सा स्वयंवरसभा नलश्रियो यमकैः प्रतिनिधिभिः यमाद्यैश्चतुर्भिः नलं विना द्यौरिव अभूत्। किंभूता द्यौः—पारिजाते भामायाः सत्यभामाया अङ्गणस्य प्राघुणिकेऽतिथौ सति चतुर्भिर्मन्दार—संतान—कल्पवृक्ष—हरिचन्दन—संज्ञकैर्देवद्रुमैरुपलक्षिता। किंभूतैः उभयैः—धृतदिव्यरत्नैर्धृतदिव्यरत्नाभरणैः मूलादारभ्याग्रपर्यन्तं धृतमुक्तादिदिव्यरत्नैश्च। पारिजातं विना मन्दारादिषु सत्स्वपि यथा द्यौर्न शोभते, तथा नलरूपधारिष्विन्द्रादिषु सत्स्वपि मुख्यं नलं विना सभा न शुशुभे। इन्द्रादयः सभायामागताः, नलो नागत इति भावः॥

१ 'अत्र रूपोतिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्रोत्प्रेक्षादीपकालंकारः' इति साहित्यविद्याधरी। ३ 'अत्रोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ४ 'अत्रानुप्रासोपमालंकारः' इति साहित्यविद्याधरी।

तत्रागमद्वासुकिरीशभूषाभस्मोपदेहस्फुटगौरदेहः।
फणीन्द्रवृन्दप्रणिगद्यमानप्रसीदजीवाद्यनुजीविवादः ॥ २५ ॥

तत्रेति ॥ वासुकिस्तत्र स्वयंवरसभायामगमत्। किंभूतः—ईशस्य भूषायै भस्मैव उप-देहोऽङ्गरागः, तेन स्फुटं प्रकटं गौरं उज्ज्वलो देहो यस्य। तथा—फणीन्द्रवृन्दैः कर्कोटकादि-सर्पश्रेष्ठसमूहैः प्रणिगद्यमान उच्यमानः प्रसीद, जीव इत्यादिशब्दो यत्र ईदृशोऽनुजीविनां सेवकानां वादः कोलाहलो यस्य। 'शम्भुव'–इत्यनेन वासुकेः पातालचलनमात्रमेवोक्तं, इदानीं तु सभागमनमिति न पौनरुक्त्यम्। 'ईशवासाद्' इति पाठे ईश्वरशरीरे योगपट्टादि-भवननिमित्तवसतेर्हेतोः[1] ॥

द्वीपान्तरेभ्यः पुटभेदनं तत् क्षणादवापे सुरभूमिभूपैः।
तत्कालमालम्बि न केन यूना स्मरेषुपक्षानिलतूललीला ॥ २६ ॥

द्वीपेति ॥ सुरभूमिषु देवभूमिषु द्वीपान्तरलक्षणासु ये भूपा राजानस्तैर्द्वीपान्तरेभ्यः प्लक्षादिभ्यः सकाशात्तत् पुटभेदनं नगरं कुण्डिनाख्यं क्षणाज्झटिति अवापे प्राप्तम्। क्षणमा-त्रागमने हेतुमाह—केन यूना तत्कालं तस्मिन् भैमीस्वयंवरसमये स्मरेषुपक्षानिलतूललीला कामबाणपक्षवातसंपर्कात्कार्पासविलासो नालम्बि नाङ्गीकृतः, अपितु सर्वेणापि तूललीलाङ्गी-कृता। वातेरितस्तूलो यथा दूराज्झटित्यायाति तथा तेऽपि कामपीडिताः सन्तः सर्वेऽपि झटित्यनायासेनायाता इति भावः ॥

रम्येषु हर्म्येषु निवेशनेन सपर्यया कुण्डिननाकनाथः।
प्रियोक्तिदानादरनम्रताद्यैरुपाचरच्चारु स राजचक्रम् ॥ २७ ॥

रम्येष्विति ॥ स कुण्डिनमेव नाकस्तस्य नाथो भीमो रम्येषु हर्म्येषु निवेशनेन स्थाप-नेन, तथा—सपर्ययातिथ्येन, तथा—प्रियोक्त्या प्रियवचनेन, दानेनोपहारादिदानेन आदरेण, नम्रतया च, आदरकृतया नम्रतया वा एवमादिः कृत्वा चारु सम्यग्यथा तथा राजचक्रमुपाचरदसेवत ॥

सार्वभौमेन तेन ते कथं पूजिता इत्याशङ्क्याह—

चतुःसमुद्रीपरिखे नृपाणामन्तःपुरे वासितकीर्तिदारे।
दानं दया सूनृतमातिथेयी चतुष्टयी रक्षणसौविदल्ला ॥ २८ ॥

चतुरिति ॥ चतुर्णां समुद्राणां समाहारश्चतुःसमुद्री सा परिखा यस्य एवंविधे वासिता स्थापिताः कीर्तय एव दारा यत्र एवंभूते नृपाणामन्तःपुरे [illegible] दानं, दया, सूनृतं प्रियसत्यवचनम्, आतिथेयी अतिथिपूजा, एवंरूपा चतुष्टयी रक्षणार्थं सौविदल्लाः कञ्चु-किनः। दानादिचतुष्टयेन राज्ञां कीर्तिः परिरक्ष्यते, [illegible] हेतोः [illegible] क्षणाय [illegible] परिशोभिता इति भावः। 'सौविदल्लाः कञ्चुकिनः स्थापत्याः [illegible]' इति च [illegible]। अन्यत्राप्यन्तःपुरे परिखा भवति, दाराश्च तिष्ठन्ति, रक्षकाश्च भवन्ति ॥

---

१ 'अत्र [illegible]' इति साहित्यविद्याधरी। २ 'अत्र [illegible] [illegible]' इति साहित्यविद्याधरी। ३ 'अत्र [illegible]' इति साहित्यविद्याधरी। ४ 'अत्र [illegible]' इति साहित्यविद्याधरी।

अभ्यागतैः कुण्डिनवासवस्य परोक्षवृत्तेष्वपि तेषु तेषु।
जिज्ञासितस्वेप्सितलाभलिङ्गं स्वल्पोऽपि नाापि नृपैर्विशेषः ॥ २९ ॥

अभ्यागतैरिति ॥ अभ्यागतैः समागतैरतिथिभूतैर्वा नृपैः कुण्डिनवासवस्य भीमस्य तेषु तेषु परोक्षेष्वप्रत्यक्षेष्वनिर्वचनीयेषु परस्परेणाज्ञातेषु वृत्तेषु प्रियोक्त्याद्याचरणेष्वपि विषये, परोक्षं वृत्तेषु निष्पन्नेषु प्रियोक्त्यादिषु वा स्वल्पोऽपि विशेषः प्रियोक्त्यादौ तारतम्यं नालम्भि न प्राप्तः। किंभूतः—जिज्ञासितस्य ज्ञातुमिष्टस्य स्वेप्सितस्य भैमीलक्षणस्य लाभः प्राप्तिः, तस्य चिह्नम्। अनेनैतस्य मदपेक्षया प्रियोक्त्यादि सादरं कृतं तर्हि भैमीमेतस्मै दास्यतीति विशेषतः कस्मानेन महानादरः क्रियत इति जिज्ञासायां विशेषस्तैर्न बुद्ध इत्यर्थः। प्रत्यक्षं यस्य प्रियोक्त्यादि कृतं तत्र विशेषो न प्राप्तः, किं पुनः परोक्षवृत्तेष्वित्यपिशब्दार्थः। सर्वेषामपि पूजादि सममेव कृतमिति भैमी ममैव भविष्यतीति सर्वेऽप्यमंसतेति भावः। 'जिज्ञासितः' इति सविसर्गोऽपि पाठः क्वचित् ॥

अङ्के विदर्भेन्द्रपुरस्य शङ्के न संममौ नैष तथा समाजः।
यथा पयोराशिरगस्त्यहस्ते यथा जगद्वा जठरे मुरारेः ॥ ३० ॥

अङ्क इति ॥ पयोराशिरगस्त्यहस्ते यथा ममौ, यथा वा मुरारेर्जठरे जगत्त्रैलोक्यं, तथा विदर्भेन्द्रपुरस्याङ्के मध्ये एष समाजो राजसङ्घो न संममाविति न किंतु तथैव संममावित्यहं शङ्के मन्ये। एतेन नगरस्यातिविस्तृतत्वमुक्तम् ॥

पुरे पथि द्वारगृहाणि तत्र चित्रीकृतान्युत्सववाञ्छयेव।
नभोऽपि किर्मीरमकारि तेषां महीभुजामाभरणप्रभाभिः ॥ ३१ ॥

पुर इति ॥ तत्र पुरे पथि राजमार्गसमीपे द्वारगृहाणि मुख्यपुरोभागे रचितानि द्वाराणि राजमार्गमुभयतो गृहाणि, यद्वा पन्थानो राजमार्गा द्वाराणि गृहाणि च। यद्वा पथिषु द्वाराणि येषां तानि गृहाण्युत्सववाञ्छया विवाहोत्सवाभिलाषेण लेख्यादिना कृत्वा लोकेन चित्रीकृतान्येवा-श्चर्यरूपाणि कृतान्येव। तत्राश्चर्यं न किंतु-तेषां महीभृतामाभरणप्रभाभिस्तत्रत्यं नभोऽप्याकाशमपि किर्मीरं नानावर्णमकारि कृतम्। गृहादीनि चित्रीकृतानीति किं वाच्यमित्यर्थः ॥

विलासवैदग्ध्यविभूषणश्रीस्तेषां यथासीत्परिचारकेऽपि।
अज्ञासिषुः स्त्रीशिशुबालिशास्तं यथागतं नायकमेव कंचित् ॥ ३२ ॥

विलासेति ॥ विलासः कटाक्षविक्षेपादिशृङ्गारचेष्टा, तथा—वैदग्ध्यं वक्रोक्त्यादिभाषणे चातुर्यम्, विभूषणं सुवर्णाद्यलंकारः, एतज्जनिता श्रीः शोभा तेषां राज्ञां परिचारके सेवकेऽपि तथासीत्, यथा येन प्रकारेण स्त्रीशिशुबालिशास्तं परिचारकमपि कंचिदागतं नायकमेव मुख्यं राजानमेवाज्ञासिषुर्बुध्यन्ते स्म। सेवकस्य विलासादिशोभां दृष्ट्वा अयं राजविशेष एवेति सेवके स्त्र्यादीनां भ्रान्तिरभूदिति भावः। 'शिशावज्ञे च बालिशः' इत्यमरः ॥

न स्वेदिनश्चामरमारुतैर्न निमेषनेत्राः प्रतिवस्तुचित्रैः।
म्लानस्रजो नातपवारणेन देवा नृदेवा विभिदुर्न तत्र ॥ ३३ ॥

---

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्र छेकानुप्रासोपमोत्प्रेक्षालंकार' इति साहित्यविद्याधरी। ३ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। ४ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी।

नेति ॥ तत्र राजसमाजे देवा नृदेवा राजानो न विभिदुः भेदं न प्रापुः । कथम्—स्वभावत एव न स्वेदिनश्चलच्चामरैनास्वेदत्वेनोपलक्षिताः । तथा—स्वभावतो न निमेषनेत्राः । निर्निमेषा इत्यर्थः । प्रतिवस्तुचित्रैः वस्तुनि वस्तुन्याश्चर्यैरुपलक्षिताः । तथा—न म्लानस्रजः, सातपवारणेन छत्रेण उपलक्षिता एवंभूता इन्द्रादयः । राजानश्च—चलच्चामरौघैः कृत्वा अस्वेदगात्राः प्रतिवस्तुचित्रैरनिमीलनेत्राः, विधृतातपत्रैरम्लानमालाः । सर्वथा राजानो देवतुल्या बभूवुरिति भावः । 'अस्वेदगात्रा(श्चलच्चामरौघैः)', 'अनीलनेत्राः (प्रतिवस्तुचित्रैः)', 'अम्लानमाला (विधृतातपत्रैः)' इत्यपि पाठाः । 'भिदां न नेत्रुः' इति च पाठः ॥

अन्योन्यभाषानवबोधभीतेः संस्कृत्रिमाभिर्व्यवहारवत्सु ।
दिग्भ्यः समेतेषु नृपेषु तेषु सौवर्गवर्गो न जनैरचिह्नि ॥ ३४ ॥

अन्योन्येति ॥ जनैः कुण्डिनस्थैर्लोकैः दिग्भ्यः समेतेषु समागतेषु नरेषु राजसु मध्ये सौवर्गवर्गो देवसमूहो नाचिह्नि नातर्कि । देवत्वेन न ज्ञात इत्यर्थः । किंभूतेषु नरेषु—अन्योन्यभाषानवबोधात्परस्परभाषापरिज्ञानाभावाद् या भीतिस्तस्या हेतोः संस्कृत्रिमाभिः प्रकृतिप्रत्ययनिर्वचनरूपेण संस्कारेण निर्वृत्ताभिः सर्वसाधारणीभिर्वाग्भिः कृत्वा व्यवहारवत्सु परस्परं व्यवहारं कुर्वत्सु । परस्परं (देश)भाषानवबोधभयात्संस्कृतमेव वदन्ति । संस्कृतस्य देवमनुष्यसाधारणत्वाद् एते देवाः, एते मनुष्या इति तत्रत्यैर्न ज्ञाता इति भावः । 'संस्कृत्रिमाभिः', 'संपर्युपेभ्यः—' इति सुट् । गुणाधानस्य भूषणशब्दार्थत्वमत्र । स्वर्गे भवाः सौवर्गाः, भवार्थे 'तत्र भवः' इत्यण् । 'द्वारादीनां च' इत्यैजागमो वृद्धिनिषेधश्च । 'स्वर्गीय—' इति पाठे भवार्थे 'वा नामधेयस्य वृद्धसंज्ञा' इति वृद्धसंज्ञत्वात् 'वृद्धाच्छः' ॥

ते तत्र भैम्याश्चरितानि चित्रे चित्राणि पौरैः पुरि लेखितानि ।
निरीक्ष्य निन्युर्दिवसं निशां च तत्स्वप्नसंभोगकलाविलासैः ॥ ३५ ॥

त इति ॥ ते देवा राजानश्च तत्र पुरि तस्यां पुर्यां पौरैर्लोकैर्लेपिकरैः कृत्वा चित्रे लेखितानि चित्राणि नानाविधान्याश्चर्यरूपाणि वा भैम्याश्चरितानि निरीक्ष्य दिवसं निन्युः । तस्या भैम्याः स्वप्ने यः संभोगो रतं तत्संबन्धिभिः कलाविलासैश्चुम्बनादिकलाकौशलैश्च निशां निन्युरतिवाहयांबभूवुः । स तैरहोरात्रः कथंचिदतिक्रान्त इति भावः । अस्वप्नानामपि देवानां काम‍भ्रान्तिरेव स्वप्नस्थाने द्रष्टव्या ॥

सा विभ्रमं स्वप्नगतापि तस्यां निशि स्वलाभस्य ददे यदेभ्यः ।
तदर्थिनां भूमिभुजां वदान्या सती सती पूरयति स्म कामम् ॥ ३६ ॥

सेति ॥ तस्यां निशि स्वयंवरपूर्वदिनरात्रौ स्वप्नगता स्वप्नस्था सा वदान्या [illegible] एभ्यो देवेभ्यो राजभ्यश्च स्वलाभस्य स्वप्राप्तिविभ्रमं भ्रान्तिम् । यद् ददे दत्तवती । तद्

---

१ 'पाठक्रमस्तावेन [illegible] देवत्वे [illegible] तत्संज्ञे [illegible]' । २ 'अस्वादि[illegible]' इति साहित्यविद्याधरी । [illegible] इति जीवातुः । ३ 'अस्वादि[illegible]' इति साहित्यविद्याधरी । ४ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

स्वयमेवार्थिनामर्थयमानानां भूमिभुजां देवानां राज्ञां च वदान्या दानशूरा सती कामं मदनमभिलाषं च पूरयति स्म । स्वलाभविभ्रमदानमेव कामपूरणमित्यर्थः । 'यत् यस्मात्, तद् तस्मात्' इति केचित् । पतिव्रतायाः सर्वकामपूरकत्वं विरुद्धम् । भ्रान्तिदृष्टाया अलीकत्वात्सर्वकामपूरणेऽपि दोषाभावात्परिहारः ॥

वैदर्भदूतानुनयोपहूतैः शृङ्गारभङ्गीरनुभावयद्भिः ।
स्वयंवरस्थानजनाश्रयस्तैर्दिने परत्रालमकारि वीरैः ॥ ३७ ॥

वैदर्भेति ॥ तैर्वीरैः शूरै राजपुत्रैः परत्र परस्मिन्दिने स्वयंवरस्य स्थानं देशस्तस्य जनाश्रयो मण्डपः अलमकारि अलंकृतः । सर्वेऽपि वीरास्तत्रागता इति भावः । किंभूतैः—वैदर्भस्य भीमस्य दूतैः कर्तृभिरनुनयेन विनयेन कृत्वोपहूतैराकारितैः । तथा—शृङ्गारभङ्गीः शृङ्गारप्रकारविशेषाननुभावयद्भिः प्रकाशयद्भिः । 'भङ्गीष्वनुभावविद्भिः' इति पाठे शृङ्गारविच्छित्तिषु निपुणैरित्यर्थः । 'अनुभावः प्रभावे स्यान्निश्चये भावसूचने' इति विश्वः । 'मण्डपोऽस्त्री जनाश्रयः' इत्यमरः ॥

भूषाभिरुच्चैरपि संस्कृते यं वीक्ष्याकृत प्राकृतवुद्धिमेव ।
प्रसूनवाणे विबुधाधिनाथस्तेनाथ साऽशोभि सभा नलेन ॥ ३८ ॥

भूषाभिरिति ॥ अथ तेन नलेन सा सभाऽशोभि । स कः—विबुधाधिनाथ इन्द्रो यं नलं वीक्ष्य, भूषाभिरलंकारैः उच्चैरतितरां संस्कृतेऽपि मण्डितेऽपि प्रसूनवाणे कामे विषये प्राकृतवुद्धिमेव नीचवुद्धिमेवाकृत । उच्चैः प्राकृतवुद्धिमिति वा । सालंकृतो मदनोऽप्येतत्सदृशो नास्ति, किमन्य इति । नलोऽपि तत्रागत इति भावः । पण्डितोऽपि संस्कृते प्राकृतवुद्धिमकृतेति विरोधाभासः । 'प्राकृतश्च पृथग्जनः' इत्यमरः ॥

धृताङ्गरागे कलितद्युशोभां तस्मिन्सभां चुम्बति राजचन्द्रे ।
गता वताक्ष्णोर्विषयं विहाय क क्षत्रनक्षत्रकुलस्य कान्तिः ॥ ३९ ॥

धृतेति ॥ धृताङ्गरागे कुङ्कुमचन्दनकृताङ्गानुलेपने तस्मिन् राजचन्द्रे नले कलिताकृता द्युशोभा स्वर्गशोभा यया एवंविधां सभां चुम्बति प्राप्ते सति क्षत्राण्येव नक्षत्राणि तेषां कुलस्य समूहस्य कान्तिः अक्ष्णोर्विषयं गोचरं विहाय विलङ्घ्य क कुत्र गता । वत खेदे । तन्न ज्ञायत इत्यर्थः । नक्षत्राणीति नशब्देन समासः । क्षत्राणि नक्षत्राणि च । ये क्षत्रियाः, ये च नक्षत्रियाः क्षत्रियव्यतिरिक्ताश्च तेषां कुलमिति वा । उदयसमये आरक्तवर्णे चन्द्रे समीपस्थानि नक्षत्राणि यथा निःश्रीकाणि भवन्ति, तथा नलसमीपे तेऽपीत्यर्थः । अतिसुन्दरं नलं दृष्ट्वा भैमी एनमेव वरिष्यतीति निश्चित्य सर्वेऽपि निःश्रीका जाता इति भावः । कलिता व्याप्ता द्यौर्यया एवंविधा शोभा रत्नादिदीप्तिर्यस्या इति वा ॥

द्राग्दृष्टयः क्षोणिभुजाममुष्मिन्नाश्चर्यपर्युत्सुकिता निपेतुः ।
अनन्तरं दन्तुरितभ्रुवां तु नितान्तमीर्ष्याकलुषा दृगन्ताः ॥ ४० ॥

---

१ 'अत्र विरोधाभासोऽलंकारः छेकानुप्रासोऽपि' इति साहित्यविद्याधरी । २ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी । ३ 'अत्र छेकानुप्रासातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । ४ 'अत्र छेकानुप्रासातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी ।

कतीति दुष्टैर्दृष्टान्तितालीकनलावली तैः' इत्यपि पाठः स्पष्टार्थः। मत्सरशब्दोऽर्शआदिर्द्रष्टव्यः। स्पर्धनं स्पर्धेति घञन्तात् 'तत्करोति' इति ण्यन्तात्स्त्रियां भावे युच्[1]॥

गुणेन केनापि जनेऽनवद्ये दोषान्तरोक्तिः खलु तत्खलत्वम्।
रूपेण तत्संसददूषितस्य सुरैर्नरत्वं यददूषि तस्य॥ ४३॥

गुणेनेति॥ रूपेण सौन्दर्येण कृत्वा तस्यां संसदि, तया संसदा सभया वा अदूषितस्यानिन्दितस्यातिसुन्दरस्य तस्य नलस्य सुरैः सुन्दरोऽपि मनुष्योऽयं नतु देव इति नरत्वं यददूषि निन्दितं तत् खलत्वं खलु। तत्तैर्दौर्जन्यमेव कृतमित्यर्थः। खलत्वस्वरूपमेवाह—केनापि लोकोत्तरेण गुणेन सौन्दर्यसुशीलत्वादिना कृत्वा अनवद्ये पूज्ये पुंसि दोषान्तरारोपणम्। यद्वा सुरैस्तत्संसददूपितस्य तस्य नरत्वं रलयोरभेदात् नलस्य रूपेण स्वरूपेण नलत्वमदूषि तत्खलत्वम्। तेषां देवानां दौर्जन्यं खल्विति योजना। तत्खलत्वमेकं पदम्। अतिसुन्दरं तं दृष्ट्वा देवा अपि सेर्ष्या जाता इति भावः[2]॥

नलानसत्यानवदत्स सत्यः[3] कृतोपवेशान्सविधे सुवेषान्।
नोर्मी[4]विलाभूः किमु दर्पकश्च भवन्ति नासत्ययुतौ भवन्तः॥ ४४॥

नलानिति॥ स सत्यो नलः सविधे समीपे कृतोपवेशान्कृतस्थितीन्सुवेषाञ्छोभनाकारान् असत्यान्नलानिन्द्रादीनित्यवदत्। इति किम्—भवन्तश्चत्वार एते न भवन्ति किमु। एके, इलाभूः पुरूरवाः, दर्पकः कामश्च उभौ किमु। किंभूतावुभौ—नासत्ययुतौ आश्विनेयसहितौ। पुरूरवाः कामः अश्विनीकुमारौ च यूयमिति नलप्रश्नः। यथा नलं दृष्ट्वाऽन्येषां विस्मयस्तथा नलस्यापि मिथ्यानलदर्शनेन विस्मयो जात इत्यर्थः[5]॥

अमी तमीदृग्जगुरत्र[6] मध्ये कस्यापि नोत्पत्तिरभूदिलायाम्।
अदर्पकाः स्मः सविधे स्थितास्ते नासत्यतां नात्र बिभर्ति कश्चित्॥४५॥[7]

अमी इति॥ अमी मिथ्यानलास्तं सत्यं नलमीदृगेतादृशं जगुः—आहुः स्म वदन्ति स्म। यद्यस्मादत्रास्मासु मध्ये इलायां पृथिव्याम्, अथ च—इलायां पुरूरवसो मातरि कस्याप्युत्पत्तिर्नाभूत्। तथा—ते तव सविधे समीपे स्थिता वयमदर्पकाः दर्पकात्कामात् अन्ये। अथ च—अतिरमणीयत्वत्कान्तिदर्शनाद्दर्पो गर्वस्तद्रहितास्तिष्ठामः। तथा—अत्रास्मासु मध्ये कश्चित् नासत्यतामाश्विनेयत्वम्, अथ चासत्यत्वम्। न बिभर्ति। अथवा—अस्मासु कश्चित् ना नरः सत्यतां न बिभर्ति। वयं त्वद्रूपधारणादसत्या एवेति छलेन पूर्वोक्तं नलप्रश्नमुत्तरयन्तीत्यर्थः। नात्र पुरूरवाः, कामः, दस्रौ वास्मासु सन्तीति। नासत्य इति, 'नभ्राण्-' इति प्रकृत्या॥

---

१ 'अत्रार्थान्तरन्यासजात्यलंकारः' इति साहित्यविद्याधरी। २ 'अत्रार्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी। ३ 'मिथ्यानलांस्तत्र नलो द्विपार्श्वीकृतोपवेशानवदत्सुवेषान्' इति पाठः सुखावबोधालिखितः। 'नलानतत्यानवदद्द्विपार्श्वीकृतोपवेशान्' इति पाठः साहित्यविद्याधरीसंमतः। ४ 'उभौ किमैलश्च न दर्पकश्च' इति सुखावबोधासाहित्यविद्याधरीसंमतः पाठः। ५ 'अर्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी। ६ 'अमी तमाहुः स्म वदन्न मध्ये' इति जीवातुसंमतः पाठः। ७ 'अत्र वक्रोक्त्यलंकारः' इति साहित्यविद्याधरी।

कतीति दुष्टैर्दंष्ट्रान्तितालीकनलावली तैः' इत्यपि पाठः स्पष्टार्थः। मत्सरशब्दोऽर्शआदिर्द्रष्टव्यः। स्पर्धनं स्पर्धेति घञन्तात् 'तत्करोति' इति ण्यन्तात्स्त्रियां भावे युच् ॥

गुणेन केनापि जनेऽनवद्ये दोषान्तरोक्तिः खलु तत्खलत्वम्।
रूपेण तत्संसददूषितस्य सुरैर्नरत्वं यददूषि तस्य ॥ ४३ ॥

गुणेनेति ॥ रूपेण सौन्दर्येण कृत्वा तस्यां संसदि, तया संसदा सभया वा अदूषितस्यानिन्दितस्यातिसुन्दरस्य तस्य नलस्य सुरैः सुन्दरोऽपि मनुष्योऽयं नतु देव इति नरत्वं यददूषि निन्दितं तत् खलत्वं खलु। तत्तैर्दौर्जन्यमेव कृतमित्यर्थः। खलत्वस्वरूपमेवाह—केनापि लोकोत्तरेण गुणेन सौन्दर्यसुशीलत्वादिना कृत्वा अनवद्ये पूज्ये पुंसि दोषान्तरारोपणम्। यद्वा सुरैस्तत्संसददूषितस्य तस्य नरत्वं रलयोरभेदात् नलस्य रूपेण स्वरूपेण नलत्वमदूषि तत्खलत्वम्। तेषां देवानां दौर्जन्यं खल्विति योजना। तत्खलत्वमेकं पदम्। अतिसुन्दरं तं दृष्ट्वा देवा अपि सेर्ष्या जाता इति भावः ॥

[३]नलानसत्यानवदत्स सत्यः कृतोपवेशान्सविधे सुवेषान्।
[४]नोभौ विलाभूः किमु दर्पकश्च भवन्ति नासत्ययुतौ भवन्तः ॥ ४४ ॥

नलानिति ॥ स सत्यो नलः सविधे समीपे कृतोपवेशान्कृतस्थितीन्सुवेषाञ्छोभनाकारान् असत्यान्नलानिन्द्रादीनित्यवदत्। इति किम्—भवन्तश्चत्वार एते न भवन्ति किमु। एते के, इलाभूः पुरूरवाः, दर्पकः कामश्च उभौ किमु। किंभूतावुभौ—नासत्ययुतौ आश्विनेयसहितौ। पुरूरवाः कामः अश्विनीकुमारौ च यूयमिति नलप्रश्नः। यथा नलं दृष्ट्वाऽन्येषां विस्मयस्तथा नलस्यापि मिथ्यानलदर्शनेन विस्मयो जात इत्यर्थः ॥

[६]अमी तमीदृग्जगुरत्र मध्ये कस्यापि नोत्पत्तिरभूदिलायाम्।
अदर्पकाः स्मः सविधे स्थितास्ते नासत्यतां नात्र बिभर्ति कश्चित् ॥४५॥

अमी इति ॥ अमी मिथ्यानलास्तं सत्यं नलमीदृगेतादृशं जगुः—आहुः स्म वदन्ति स्म। यद्यस्मादत्रास्मासु मध्ये इलायां पृथिव्याम्, अथ च—इलायां पुरूरवसो मातरि कस्याप्युत्पत्तिर्नाभूत्। तथा—ते तव सविधे समीपे स्थिता वयमदर्पकाः दर्पकात्कामात् अन्ये। अथ च—अतिरमणीयत्वत्कान्तिदर्शनाद्दर्पो गर्वस्तद्रहितास्तिष्ठामः। तथा—अत्रास्मासु मध्ये कश्चित् नासत्यतामाश्विनेयत्वम्, अथ चासत्यत्वम्। न बिभर्ति। अथवा—अस्मासु कश्चित् ना नरः सत्यतां न बिभर्ति। वयं त्वद्रूपधारणादसत्या एवेति छलेन पूर्वोक्तं नलप्रश्नमुत्तरयन्तीत्यर्थः। नात्र पुरूरवाः, कामः, दस्रौ वास्मासु सन्तीति। नासत्य इति, 'नभ्राण्-' इति प्रकृत्या ॥

---

१ 'अत्रार्थान्तरन्यासजात्यलंकारः' इति साहित्यविद्याधरी। २ 'अत्रार्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी। ३ 'मिथ्यानलांस्तथ्यनलो द्विपार्श्वीकृतोपवेशानवदत्सुवेषान्' इति पाठः सुखावबोधालिखितः। 'नलानसत्यानवदद्द्विपार्श्वीकृतोपवेशान्' इति पाठः साहित्यविद्याधरीसंमतः। ४ 'उभौ किमैलश्च न दर्पकश्च' इति सुखावबोधासाहित्यविद्याधरीसंमतः पाठः। ५ 'अर्थान्तरन्यासोऽलंकारः' इति साहित्यविद्याधरी। ६ 'अमी तमाहुः स्म यदत्र मध्ये' इति जीवातुसंमतः पाठः। ७ 'अत्र वक्रोक्त्यलंकारः' इति साहित्यविद्याधरी।

य इति ॥ यः पुरुषो येन पुरुषेण सह स्पर्धया निजप्रतिष्ठां स्वस्य गौरवं लिप्सुः प्राप्तुमिच्छुः, स एव पुरुषः तस्योन्नतत्वं स्वस्मादाधिक्यं यस्मादाह ब्रूते तस्मात्स्वेनात्मनाभिहिता उक्ता स्वस्य हानिर्न्यूनता येनैवंविधस्य स्पर्धितुः स्थाने विषये बहुलामवहेलामवज्ञां को न कुर्यात्। अपि तु सर्वोऽपि करोत्येव। योऽन्यस्पर्धया स्वस्य प्रतिष्ठां लिप्सति स स्वस्य न्यूनतां तस्य चाधिकतां स्वयमेव वदति। अतोऽधिकेन हीनस्यावज्ञा कर्तुं युक्तैवेत्यर्थः। प्रकृते भैम्यर्थं नलरूपं दधद्भिर्देवैर्नलस्यैवाधिकता स्वस्य च न्यूनतोक्तैव। तस्मात्तेन नलेन तेषामवज्ञा युक्तैव कृतेति भावः। स्थानेऽव्ययत्वादुचितमित्यर्थ इति वा। अवहेला इति क्षीरस्वामी। प्रतिष्ठामितिः 'न लोका—' इति षष्ठीनिषेधः ॥

गीर्देवतागीतयशःप्रशस्तिः श्रिया तडित्त्वल्ललिताभिनेता।
मुदा तदाऽवैक्षत केशवस्तं स्वयंवराडम्बरमम्बरस्थः ॥ ५० ॥

गीरिति ॥ केशवस्तदा तस्मिन्समये तं स्वयंवरस्याडम्बरं संभ्रमं मुदा हर्षेणावैक्षत। तथा—किंभूतः—गीर्देवतया सरस्वत्या गीता कीर्तिता यशःप्रशस्तिर्यशोगौरवं यस्य। तथा—श्रिया लक्ष्म्या देहशोभया च कृत्वा तडित्त्वतो विद्युत्सहितसजलमेघस्य ललितं विलासस्तस्याभिनेताभिनयकारी। तादृशमेघतुल्य इत्यर्थः। तथा—अम्बरस्थो व्योमस्थः। स्वयंवरदर्शनार्थं विष्णुरपि तत्रागत इति भावः ॥

अष्टौ तदाष्टासु हरित्सु दृष्टीः सदो दिदृक्षुर्निदिदेश देवः।
लैङ्गीमदृष्ट्वापि शिरःश्रियं यो दृष्टौ मृषावादितकेतकीकः ॥ ५१ ॥

अष्टाविति ॥ सदः स्वयंवरसभां दिदृक्षुर्द्रष्टुमिच्छुः देवो ब्रह्मा तदाष्टासु हरित्सु दिक्षु अष्टौ दृष्टीर्नेत्राणि निदिदेशादिष्टवान्। किंभूतः—लैङ्गीं शिवसंबन्धिनीं शिरःश्रियं मस्तकशोभामदृष्ट्वा अविलोक्यापि दृष्टौ लिङ्गशिरोदर्शनविषये मृषावादितानृतभाषणं कारिता केतकी येन। लिङ्गरूपस्य शिवस्य पादौ शिरश्चावलोकनार्थमहमधिकोऽहमधिक इति विवदमानौ विष्णुब्रह्माणौ पातालं सत्यलोकं च गतौ। विष्णुः पाताले गत्वा शिवचरणौ नापश्यत्। ब्रह्मापि शिरो नापश्यत्। अनन्तरं विष्णुना चरणौ नाद्राक्षमिति सत्यमुक्तम्। ब्रह्मणा तु शिरो दृष्टमित्यलीकमुक्तम्। तत्र साक्षित्वेन शिवशिरःस्थाहमानीतेति कूटसाक्षिणी केतकी कृतेति पौराणिकी कथा ॥

एकेन पर्यक्षिपदात्मनाद्रिं चक्षुर्मुरारेरभवत्परेण।
तैर्द्वादशात्मा दशभिस्तु शेषैर्दिशो दशालोकत लोकपूर्णाः ॥ ५२ ॥

एकेनेति ॥ द्वादश आत्मानो देहा यस्य द्वादशदेहः सूर्य एकेनात्मना वपुषाद्रिं मेरुं पर्यक्षिपत्प्रदक्षिणीचकार। परेणात्मना देहेन मुरारेश्चक्षुर्दक्षिणनेत्रमभवत्। शेषैस्तु दशभिर्देहैः कृत्वा लोकैः पूर्णा दशापि दिश आलोकत। 'विधातृमित्रार्यमणो वरुणेन्द्रभगांशवः। पूषा विवस्वान्पर्जन्यस्त्वष्टा विष्णुर्दिनेश्वराः ॥' इति ॥

---

१ 'अत्र हेत्वलंकारः' इति साहित्यविद्याधरी। २ 'अत्र छेकानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। ३ 'अत्रानुप्रासोऽलंकारः' इति साहित्यविद्याधरी। ४ 'अत्र छेकानुप्रासो यथासंख्यमलंकारः' इति साहित्यविद्याधरी।

प्रदक्षिणं दैवतहर्म्यमद्रिं सदैव कुर्वन्नपि शर्वरीशः ।
द्रष्टा महेन्द्रानुजदृष्टिमूर्त्या न प्राप तद्दर्शनविघ्नतापम् ॥ ५३ ॥

प्रदक्षिणमिति ॥ सदैव दैवतानां हर्म्यं वसतिस्थानमद्रिं मेरुं प्रदक्षिणं कुर्वन्नपि शर्वरीशश्चन्द्रो महेन्द्रानुजस्य मुरारेर्दृष्टिमूर्त्या वामनयनरूपेण द्रष्टा सन् तस्य स्वयंवरस्य दर्शने यो विघ्नस्तेन तापं दुःखं न प्राप ॥

आलोकमाना वरलोकलक्ष्मीं तात्कालिकीमप्सरसो रसोत्काः ।
जनाम्बुधौ यत्र निजाननानि वितेनुरम्भोरुहकाननानि ॥ ५४ ॥

आलोकेति ॥ रसोत्का दर्शनरसोत्कण्ठितास्तात्कालिकीं स्वयंवरसमयजातां वरलोकलक्ष्मीं राजसङ्घशोभामालोकमाना विलोकयन्त्योऽप्सरसस्तत्र जनाम्बुधौ निजाननान्यम्भोरुहकाननानि कमलवनानि वितेनुश्चक्रुः । अप्सरसोऽपि तं समाजं सादरं पश्यन्ति स्मेति भावः । जलाशयेऽपि कमलानि भवन्ति ॥

न यक्षलक्षैः किमलक्षि नो वा सिद्धैः किमध्यासि सभाप्तशोभा ।
सा किंनरैः किं न रसादसेवि नादर्शि हर्षेण महर्षिभिर्वा ॥ ५५ ॥

नेति ॥ आप्तशोभातिसुन्दरा सा सभा यक्षलक्षैः रसात् प्रीत्या किं न अलक्षि दृष्टा । तथा—सिद्धैर्वा रसात् किं नोऽध्यासि । तथा—किंनरैः रसात् न असेवि । तथा—महर्षिभिर्वा हर्षेण न अदर्शि । रसादिति सिद्धे हर्षेणेति पदमनुप्रासार्थम् ॥

वाल्मीकिरश्लाघत तामनेकशाखत्रयीभूरुहराजिभाजा ।
क्लेशं विना कण्ठपथेन यस्य दैवी दिवः प्राग्भुवमागमद्वाक् ॥ ५६ ॥

वाल्मीकिरिति ॥ स वाल्मीकिराद्यकविस्तां सभामश्लाघत स्तौति स्म । स कः—दैवी वाक् पद्यमयी यस्य वाल्मीकेः कण्ठपथेन क्लेशं विना दिवः स्वर्गात् प्राक् 'मा निषाद—' इत्यादिरूपेण भुवमागमदागता । प्रथमं भूमौ यः संस्कृतप्रवर्तकः । किंभूतेन कण्ठपथेन—अनेकाः शाखा आश्वलायनादयो यस्याः सा वेदत्रयी तल्लक्षणा भूरुहस्तेषां राजिः पङ्क्तिस्तां भजते एवंभूतेन । सशाखवेदत्रयीपाठकेनेत्यर्थः । अन्येनापि बहुवृक्षच्छायासुखेन मार्गेण दूरदेशोऽप्यनायासेन गम्यते ॥

प्राशंसि संसद्गुरुणापि चार्वी चार्वाकतासर्वविदूषकेण ।
आस्थानपट्टं रसनां यदीयां जानाति वाचामधिदेवतायाः ॥ ५७ ॥

प्राशंसीति ॥ चार्वी सुन्दरा संसत् सभा गुरुणा बृहस्पतिनापि प्राशंसि । किंभूतेन—चार्वाकतया नास्तिकतया सर्वस्य वेदादेर्विदूषकेण दूषकेन । अयं यदीयां रसनां जिह्वां वाचामधिदेवतायाः सरस्वत्या आस्थानपट्टं सिंहासनं जानाति मन्ये तस्य जिह्वायां सरस्वती वर्तते । नास्तिकमतप्रवर्तनार्थं बृहस्पतिना चार्वाकरूपं धृत्वा वेदादि दूषितम् ॥

नाकेऽपि दीव्यन्न[illegible] वधः[illegible]कविर्यः ।
द्वैतन्नीतेः पथि सार्थवाहः काव्यः स काव्येन सभामभाणीत् ॥ ५८ ॥

---

१ 'अत्र [illegible]' इति साहित्यविद्याधरी । २ 'अत्र [illegible]' इति साहित्यविद्याधरी । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी । ४ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

नाकेऽपीति ॥ स काव्यः शुक्रः दोषरहितप्रबन्धरूपेण काव्येन कृत्वा तां सभामभाणीद्वर्णयत् । स कः—यः कविः प्रबन्धकर्ता दीव्यत्तमा विराजमाना दिव्या संस्कृतवाग्यस्मिन्नेवंभूतेऽपि नाके स्वर्गे वचःस्रजि वचनमालागुम्फने विषये आचार्यकं संस्कृतवचनचातुर्योपदेशः तं वेत्तीति वित् । तथा—दैतेयनीतेः दैत्यनीतिशास्त्रस्य पथि मार्गे सार्थवाहः मार्गप्रदर्शकः । दैत्यनीतिशास्त्रप्रवर्तकः । सुरासुरमध्ये श्रेष्ठतम इत्यर्थः । आचार्यकम्, योपधाद्वुञ् । दैतेय इति, 'कृदिकारात्–' इति ङीषन्तात् 'स्त्रीभ्यो ढक्' समर्थनीयः ॥

तदेव सभावर्णकं काव्यमाह—

अमेलयद्भीमनृपः परं न नाकर्षदेतान्दमनस्वसैव ।
इदं विधातापि विचिन्त्य यूनः स्वशिल्पसर्वस्वमदर्शयन्नः ॥ ५९ ॥

अमेलयदिति ॥ भीमनृपः परं केवलमेतान्नृपान्भैमीस्वयंवरार्थं नामेलयत् । तथा—दमनस्वसैव एतान्केवलं स्वगुणशीलादिना नाकर्षत् । किंतु विधातापि इदं स्वयंवरप्रस्तावादिकं विचिन्त्य स्वशिल्पसर्वस्वं स्वीयनिर्माणकौशलसारभूतानेतान् यूनस्तरुणानेकत्र स्थाने पुञ्जीकृत्य नोऽस्माकमदर्शयत् ॥

एकाकिभावेन पुरा पुरारिर्यः पञ्चतां पञ्चशरं निनाय ।
तद्भीसमाधानममुष्य काय निकायलीलाः किममी युवानः ॥ ६० ॥

एकेति ॥ यः पुरारिः हरः पुरा पूर्वमेकाकिभावेनासहायत्वेन पञ्चशरं कामं पञ्चतां निनाय मारयामास । अमुष्य कामस्य कायनिकायलीलाः शरीरसमूहकान्तयः अमी युवानस्तरुणाः तस्माद्धरात् भियो भयस्य समाधानं प्रतीकारः । किं वितर्के । असहायत्वात्पूर्वं कामस्य हराद्भयमभूत् । इदानीमेतद्रूपेण बहुलाद्भयं गतम् । सर्वेऽप्येते कामरूपा इति भावः ॥

पूर्णेन्दुबिम्बाननुमासभिन्नानस्थापयत्क्वापि निधाय वेधाः ।
तैरेव शिल्पी निरमादमीषां मुखानि लावण्यमयानि मन्ये ॥ ६१ ॥

पूर्णेति ॥ विधिर्ब्रह्मा अनुमासभिन्नान्प्रतिमासं भिन्नान् पूर्णेन्दुबिम्बान्पूर्णचन्द्रबिम्बान्क्वापि कुत्रचित्प्रदेशे निधाय तिरोहितीकृत्यास्थापयत् । तैरेव पूर्णचन्द्रबिम्बैः कृत्वा अमीषां लावण्यमयानि मुखानि स शिल्पी ब्रह्मा निरमान्निर्ममे इत्यहं मन्ये । चन्द्रतुल्यान्येतेषां वदनानीति भावः । अन्योऽपि शिल्पी सुन्दरवस्तुनिर्माणार्थमपूर्वं वस्तु कुत्रचिद्गुप्तं स्थापयति ॥

मुधार्पितं मूर्धसु रत्नमेभिर्यन्नाम तानि स्वयमेत एव ।
स्वतःप्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणार्थमर्थ्यम् ॥ ६२ ॥

मुधेति ॥ एभिर्नृपैः मूर्धसु रत्नं हीरकादि मुधा वृथा अर्पितं स्थापितम् । यस्मात् एते एव स्वयं तानि रत्नानि नाम प्रसिद्धानि । रत्नानां शिरसि रत्नार्पणं वृथेत्यर्थः । अर्थान्तर-

---

१ 'अत्रानुप्रासातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्त्यनुप्रासावलंकारौ' इति साहित्यविद्याधरी । ३ 'अत्र छेकानुप्रासोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । ४ 'अत्रानुप्रासोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी ।

न्यासमाह—स्वतःप्रकाशे स्वप्रकाशे परमात्मबोधे परमात्मज्ञाने सति स्फुरणार्थं तज्ज्ञानार्थं बोधान्तरं न अर्थ्यं न याचनीयम् । स्वप्रकाशत्वात्तस्येत्यर्थः । परमात्मज्ञाने जाते ज्ञानान्तरं यथा वृथा तथा रत्नानामुपरि रत्नान्तरारोपणमित्यर्थः । अतिसुन्दरा एत इति भावः । परमात्मबोधस्य स्वतःप्रकाशत्वं वेदान्तेभ्योऽवसेयम् ॥

प्रवेक्ष्यतः सुन्दरवृन्दमुच्चैरिदं मुदा चेदितरेतरं तत् ।
न शक्ष्यतो लक्षयितुं विमिश्रं दस्रौ सहस्रैरपि वत्सराणाम् ॥ ६३ ॥

प्रवेक्ष्यत इति ॥ दस्रौ अश्विनीकुमारौ मुदा उच्चैरुत्कृष्टं सहर्षमित्यर्थः । एवंभूतमिदं सुन्दरवृन्दं चेत्प्रवेक्ष्यतः प्रविष्टौ भविष्यतः तर्हि अनेन राजवृन्देन विशेषेण मिश्रं मिश्रितमितरेतरमन्योन्यं वत्सराणां सहस्रैरपि लक्षयितुं चिह्नितुं न शक्ष्यतः समर्थौ न भविष्यतः । अयं मे भ्रातेति परस्परं ज्ञातुमसमर्थौ भविष्यतः । सर्वेषां दस्रतुल्यत्वादिति भावः ॥

स्थितैरियद्भिर्युवभिर्विदग्धैर्दग्धेऽपि कामे जगतः क्षतिः का ।
एकाम्बुबिन्दुव्ययमम्बुराशेः पूर्णस्य कः शंसति शोषदोषम् ॥ ६४ ॥

स्थितैरिति ॥ विदग्धैश्चतुरैर्दाहरहितैर्वा इयद्भिर्बहुसंख्याकैः स्थितैः विद्यमानैरेतैर्युवभिस्तरुणैः हेतुभिः हरेण एकस्मिन्कामे दग्धेऽपि जगतः का क्षतिः का हानिः । कामसदृशानामेतेषां बहूनां स्थितत्वात् । एतदेवार्थान्तरन्यासेन समर्थयते—कः पूर्णस्याम्बुराशेरेकाम्बुबिन्दुव्ययं शोषरूपं दोषं शंसति वदति । अपितु एकस्मिन्कणे व्ययिते समुद्रः शुष्को जात इति न कोऽपि वदतीत्यर्थः ॥

इति स्तुवन्हुंकृतिवर्गणाभिर्गन्धर्ववर्गेण स गायतेव ।
ओंकारभूम्ना पठतेव वेदान्महर्षिवृन्देन तथाऽन्वमानि ॥ ६५ ॥

इतीति ॥ इति पूर्वोक्तप्रकारेण स्तुवन् स शुकः गायतेव गानं कुर्वतेव गन्धर्वाणां वर्गेण समूहेन हुंकृतिवर्गणाभिर्हुंकारसमूहैः कृत्वा अन्वमान्यनुमतः । तथा—वेदान्पठता महर्षिवृन्देन ओंकारस्य भूम्ना बाहुल्येनान्वमानि अनुमतः । गन्धर्वैर्महर्षिभिश्च [illegible] अनुमतः समीचीनं वदतीति । [illegible] ॥

न्यवीविशत्तानथ राजसिंहान्सिंहासनौघेषु विदर्भराजः ।
शृङ्गेषु यत्र त्रिदशैरिवैभिरशोभि कार्तस्वरभूधरस्य ॥ ६६ ॥

न्यवीविशदिति ॥ अथ विदर्भराजः तान्राजसिंहान् सिंहासनौघेषु न्यवीविशदुपवेशयामास । यत्र सिंहासनेषूपविष्टैरेभी राजसिंहैः कार्तस्वरभूधरस्य सुवर्णपर्वतस्य मेरोः शृङ्गेषु त्रिदशैरिवाशोभि अशोभि । [illegible] सिंहासनानां [illegible] च [illegible] सूचितम् ॥

१ '[illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी । ४ '[illegible]' इति साहित्यविद्याधरी । ५ '[illegible]' इति साहित्यविद्याधरी ।

नाकेऽपीति ॥ स काव्यः शुक्रः दोषरहितप्रबन्धरूपेण काव्येन कृत्वा तां सभामभाणीदवर्णयत् । स कः—यः कविः प्रबन्धकर्ता दीव्यत्तमा विराजमाना दिव्या संस्कृतवाग्यस्मिन्नेवंभूतेऽपि नाके स्वर्गे वचःस्रजि वचनमालागुम्फने विषये आचार्यकं संस्कृतवचनचातुर्योपदेशः तं वेत्तीति वित् । तथा—दैतेयनीतेः दैत्यनीतिशास्त्रस्य पथि मार्गे सार्थवाहः मार्गप्रदर्शकः । दैत्यनीतिशास्त्रप्रवर्तकः । सुरासुरमध्ये श्रेष्ठतम इत्यर्थः । आचार्यकम्, योपधाद्वुञ् । दैतेय इति, 'कृदिकारात्–' इति ङीषन्तात् 'स्त्रीभ्यो ढक्' समर्थनीयः ॥

तदेव सभावर्णकं काव्यमाह—

अमेलयद्भीमनृपः परं न नाकर्षदेतान्दमनस्वसैव ।
इदं विधातापि विचिन्त्य यूनः स्वशिल्पसर्वस्वमदर्शयन्नः ॥ ५९ ॥

अमेलयदिति ॥ भीमनृपः परं केवलमेतान्नृपान्भैमीस्वयंवरार्थं नामेलयत् । तथा—दमनस्वसैव एतान्केवलं स्वगुणशीलादिना नाकर्षत् । किंतु विधातापि इदं स्वयंवरप्रस्तावादिकं विचिन्त्य स्वशिल्पसर्वस्वं स्वीयनिर्माणकौशलसारभूतानेतान् यूनस्तरुणानेकत्र स्थाने पुञ्जीकृत्य नोऽस्माकमदर्शयत् ॥

एकाकिभावेन पुरा पुरारिर्यः पञ्चतां पञ्चशरं निनाय ।
तद्भीसमाधानममुष्य काय निकायलीलाः किममी युवानः ॥ ६० ॥

एकेति ॥ यः पुरारिः हरः पुरा पूर्वमेकाकिभावेनासहायत्वेन पञ्चशरं कामं पञ्चतां निनाय मारयामास । अमुष्य कामस्य कायनिकायलीलाः शरीरसमूहकान्तयः अमी युवानस्तरुणाः तस्माद्धरात् भियो भयस्य समाधानं प्रतीकारः । किं वितर्के । असहायत्वात्पुरा कामस्य हराद्भयमभूत् । इदानीमेतद्रूपेण बहुलाद्भयं गतम् । सर्वेऽप्येते कामतुल्या इति भावः ॥

पूर्णेन्दुबिम्बाननुमासभिन्नानस्थापयत्क्वापि निधाय वेधाः ।
तैरेव शिल्पी निरमादमीषां मुखानि लावण्यमयानि मन्ये ॥ ६१ ॥

पूर्णेति ॥ विधिर्ब्रह्मा अनुमासमनुमासं प्रतिमासं भिन्नान् पूर्णेन्दुबिम्बान्पूर्णचन्द्रबिम्बान्क्वापि कुत्रचित्प्रदेशे निधाय तिरोहितीकृत्यास्थापयत् । तैरेव पूर्णचन्द्रबिम्बैः कृत्वा अमीषां लावण्यमयानि मुखानि स शिल्पी ब्रह्मा निरमासीन्निर्ममे इत्यहं मन्ये । चन्द्रतुल्यानि तेषां वदनानीति भावः । अन्योऽपि शिल्पी सुन्दरवस्तुनिर्माणार्थमपूर्वं वस्तु कुत्रचिद्गुप्तं स्थापयति ॥

मुधार्पितं भूषसु रत्नमेभिर्यन्नाम तानि स्वयमेव एव ।
स्वतःप्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणार्थमर्थ्यम् ॥ ६२ ॥

मुधेति ॥ एभिर्नृपैः भूषसु रत्नं हीरकादि मुधा वृथा अर्पितं स्थापितम् । यदस्मात् एते एव स्वयं तानि रत्नानि नाम प्रसिद्धानि । रत्नानां [illegible] । अथ [illegible]

---

१ '[illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी । ४ '[illegible]' इति साहित्यविद्याधरी ।

नाकेऽपीति ॥ स काव्यः शुक्रः दोषरहितप्रबन्धरूपेण काव्येन कृत्वा तां सभामम-णीदवर्णयत्। स कः—यः कविः प्रबन्धकर्ता दीव्यत्तमा विराजमाना दिव्या संस्कृतवाग-स्मिन्नेवंभूतेऽपि नाके स्वर्गे वचःस्रजि वचनमालागुम्फने विषये आचार्यकं संस्कृतवचनचा-तुर्योपदेशः न वेत्तीति वित्। तथा—दैतेयनीतेः दैत्यनीतिशास्त्रस्य पथि मार्गे सार्थवाहः मार्गप्रदर्शकः। दैत्यनीतिशास्त्रप्रवर्तकः। सुरासुरमध्ये श्रेष्ठतम इत्यर्थः। आचार्यकम्, योपधाद्वुञ्। दैतेय इति, 'कृदिकारात्–' इति ङीषन्तात् 'स्त्रीभ्यो ढक्' समर्थनीयः ॥

तदेव सभावर्णकं काव्यमाह—

अमेलयद्भीमनृपः परं न नाकर्षदेतान्दमनस्वसैव।
इदं विधातापि विचिन्त्य यूनः स्वशिल्पसर्वस्वमदर्शयन्नः ॥ ५९ ॥

अमेलयदिति ॥ भीमनृपः परं केवलमेतान्नृपान्भैमीस्वयंवरार्थं नामेलयत्। तथा—दमनस्वसैव एतान्केवलं स्वगुणशीलादिना नाकर्षत्। किंतु विधातापि इदं स्वयंवरप्रस्तावा-दिकं विचिन्त्य स्वशिल्पसर्वस्वं स्वीयनिर्माणकौशलसारभूतानेतान् यूनस्तरुणानेकत्र स्थाने पुञ्जीकृत्य नोऽस्माकमदर्शयत् ॥

एकाकिभावेन पुरा पुरारिर्यः पञ्चतां पञ्चशरं निनाय।
तद्भीसमाधानममुष्य काय निकायलीलाः किममी युवानः ॥ ६० ॥

एकेति ॥ यः पुरारिः हरः पुरा पूर्वमेकाकिभावेनासहायत्वेन पञ्चशरं कामं पञ्चतां निनाय मारयामास। अमुष्य कामस्य कायनिकायलीलाः शरीरसमूहकान्तयः अमी युवान-स्तरुणाः तस्माद्धरात् भियो भयस्य समाधानं प्रतीकारः। किं वितर्के। असहायत्वात्पूर्वं कामस्य हराद्भयमभूत्। इदानीमेतद्रूपेण बहुलाद्भयं गतम्। सर्वेऽप्येते कामरूपा इति भावः ॥

पूर्णेन्दुबिम्बाननुमासभिन्नानस्थापयत्क्वापि निधाय वेधाः।
तैरेव शिल्पी निरमादमीषां मुखानि लावण्यमयानि मन्ये ॥ ६१ ॥

पूर्णेति ॥ विधिर्ब्रह्मा अनुमासमनुमासप्रतिमासं भिन्नान् पूर्णेन्दुबिम्बान्पूर्णचन्द्रबिम्बा-न्क्वापि कुत्रचित्प्रदेशे निधाय तिरोहितीकृत्यास्थापयत्। तैरेव पूर्णचन्द्रबिम्बैः कृत्वा अमीषां लावण्यमयानि मुखानि स शिल्पी ब्रह्मा निरमान्निर्ममे इत्यहं मन्ये। चन्द्रतुल्यान्ये-तेषां वदनानीति भावः। अन्योऽपि शिल्पी सुन्दरवस्तुनिर्माणार्थमपूर्वं वस्तु कुत्रचिद्गुप्तं स्थापयति ॥

मुधार्पितं मूर्धसु रत्नमेभिर्यन्नाम तानि स्वयमेव एव।
स्वतःप्रकाशे परमात्मबोधे बोधान्तरं न स्फुरणार्थमर्थ्यम् ॥ ६२ ॥

मुधेति ॥ एभिर्नृपैः मूर्धसु रत्नं हीरकादि मुधा वृथा आर्पितं स्थापितम्। यद्यस्मात् एते एव स्वयं तानि रत्नानि नाम प्रसिद्धानि। रत्नानां शिरसि स्थापनं वृथैवेत्यर्थः। अर्थान्तर-

---

१ 'अत्रानुप्रासातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्रातिशयोक्त्युत्प्रेक्षा' इति साहित्यविद्याधरी। ३ 'अत्र छेकानुप्रासोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ४ 'अत्रानुप्रासोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी।

विचिन्त्य नानाभुवनागतांस्तानमर्त्यसंकीर्त्यचरित्रगोत्रान्।
कथ्याः कथंकारममी सुतायामिति व्यपादि क्षितिपेन तेन॥ ६७॥

विचिन्त्येति॥ तेन क्षितिपेन भीमेन इति पूर्वोक्तेन प्रकारेण व्यपादि विषण्णम्। किं कृत्वा—नानाभुवनेभ्यः स्वर्गमर्त्यपातालेभ्य आगतान् अमर्त्यैर्देवैः संकीर्त्यानि वर्णनीयानि चरित्रगोत्राणि शीलकुलानि येषां तान्विचिन्त्य विचार्य। इति किम्—अमी पूर्वोक्ता राजसिंहाः सुतायां विषये कथंकारं केन प्रकारेण कथ्याः वर्णयितुं शक्या इति। एतेषां कुलशीलादि भैमी कथं ज्ञास्यतीत्यर्थः॥

श्रद्धालुसंकलिपतकल्पनायां कल्पद्रुमस्याथ रथाङ्गपाणेः।
तदाकुलोऽसौ कुलदैवतस्य स्मृतिं ततान क्षणमेकतानः॥ ६८॥

श्रद्धेति॥ अथ तदा तस्मिन्समये आकुलः सचिन्तोऽसौ भीमः कुलदैवतस्य स्वीयवंशपरम्परापूज्यस्य रथाङ्गपाणेः श्रीविष्णोः स्मृतिं क्षणं मुहूर्तमात्रम् एकतानोऽनन्यवृत्तिः सन् ततान। किंभूतस्य विष्णोः—श्रद्धालोर्भक्तस्य संकल्पितं वस्तु तस्य कल्पनायां सिद्धौ कल्पद्रुमस्य। सकलाभिलाषपूरककुलदैवतस्मरणं विनान्यः को वाभिलाषपूरणं करोतीति विष्णुं सस्मारेत्यर्थः। 'एकतानोऽनन्यवृत्तिः' इत्यमरः॥

तच्चिन्तनानन्तरमेव देवः सरस्वतीं सस्मितमाह स स्म।
स्वयंवरे राजकगोत्रवृत्तवक्त्रीमिह त्वां करवाणि वाणि॥ ६९॥

तदिति॥ स देवो विष्णुः तेन भीमेन कृतस्य स्वचिन्तनस्यानन्तरमेव सस्मितं सरस्वतीमिति आह स्म उवाच। इति किम्—हे वाणि सरस्वति, अहं त्वामिह स्वयंवरे राजकं राजवृन्दं तस्य गोत्रवृत्तवक्त्रीं कुलनामशीलादिवर्णयित्रीं करवाणि। राजवर्णनार्थं त्वया गन्तव्यमिति मम मनीषितम्। राजकम्, 'गोत्र–' इति वुञ्॥

कुलं च शीलं च बलं च यूनां जानासि नानाभुवनागतानाम्।
एषामतस्त्वं भव वावदूका मूकायितुं कः समयस्तवायम्॥ ७०॥

कुलमिति॥ हे सरस्वति, त्वं नानाभुवनेभ्य आगतानामेषां यूनां कुलं च शीलं च बलं च यतो जानासि अतस्त्वमेव तेषां वावदूका अतितरां वर्णनशीला भव। तव मूकायितुमयं कः समयोऽवसरः। अपितु न कोऽपि। एषां कुलादि वर्णयेत्यर्थः। चाः परस्परसमुच्चयार्थाः। 'वैदेश्व' इति वार्तिकेन वदेर्यङ्लुगन्तादूकः 'वावदूकस्तु वक्तरि' इति क्षीरस्वामी॥

जगत्त्रयीपण्डितमण्डितैषा सभा न भूता च न भाविनी च।
राज्ञां गुणज्ञापनकैतवेन संख्यावतः श्रावय वाङ्मुखानि॥ ७१॥

जगदिति॥ हे सरस्वति, यस्माज्जगत्त्रयीसंबन्धिभिः पण्डितैर्मण्डिता एषा सभा पूर्वं न च भूता, पश्चात् न च भाविनी जनिष्यते तस्माद्राज्ञां गुणानां ज्ञापनं बोधनं तस्य कैतवेन

१ 'अत्र छेकानुप्रासहेत्वलंकारः' इति साहित्यविद्याधरी। २ 'अत्र छेकानुप्रासोपमालंकारः' इति साहित्यविद्याधरी। ३ 'अत्रानुप्रासोपमालंकारः' इति साहित्यविद्याधरी। ४ 'इदं वार्तिकं न कुत्राप्युपलभ्यते। अतएव कुर्वादिगणे वावदूकशब्दपाठाद्यन्तादूदेरूकः' इति माधवेनोक्तम्। ५ 'अत्र छेकानुप्रासकाव्यलिङ्गालंकारः' इति साहित्यविद्याधरी।

एवेत्यर्थः । कल्प इतिकर्तव्यताबोधको ग्रन्थस्तस्य श्रिया कृला यदीय आकल्पविधिरलंका-रविधिः पर्यणंसीत्परिणतः । यदीयान्यलंकरणानि कल्पेनैव रचितानीत्यर्थः । तथा—यस्याः समस्तार्थानां सकलाभिधेयानां निरुक्तिरूपैः निर्वचनस्वरूपैः कृला वेदश्रोत्रस्थानीया निरुक्ति-विद्या पर्यणंसीत्परिणता । खलु निश्चयार्थः सर्वत्र योजनीयः ॥

जात्या च वृत्तेन च भिद्यमानं छन्दो भुजद्वन्द्वमभूद्यदीयम् ।
श्लोकार्धविश्रान्तिमयीभविष्णु पर्वद्वयीसन्धिसुचिह्नमध्यम् ॥ ७६ ॥

जात्येति ॥ जात्या मात्रावृत्तेन वृत्तेन वर्णवृत्तेन च भिद्यमानं द्विधाभूतं वेदचरणस्था-नीयं छन्दः यदीयं भुजद्वन्द्वमभूत् । किंभूतं छन्दः—श्लोकार्धे विश्रान्तिः अवसानं तद्रूपो भविष्णुः श्लोकार्धविश्रान्तिमयीभविष्णुः पर्वद्वयीसन्धिः पूर्वोत्तरपर्वद्वयसन्धिः स एव सुचिह्नं मध्ये यस्य । यस्या भुजपर्वद्वयीसन्धिरेखाद्वयं श्लोकार्धयोर्विच्छेदद्योतकेन रेखाद्वयेनैव रचितमित्यर्थः ॥

असंशयं सा गुणदीर्घभावकृता दधाना विततिं यदीया ।
विधायिका शब्दपरम्पराणां किं वाररुचि व्याकरणेन काञ्ची ॥ ७७ ॥

असंशयमिति ॥ किंच अन्यच्च सातिप्रसिद्धा यदीया काञ्ची मेखलासंशयं निश्चितं वेदमुखभूतेन व्याकरणेनाररुचि रचिता । किंभूता—गुणस्य पट्टसूत्रस्य दीर्घभावेन दैर्घ्येण कृतां विततिं विस्तारं दधाना—शिञ्जितरूपाणां शब्दपरम्पराणां विधायिका । व्याकरणमपि—गुणाश्च दीर्घाश्च भावाश्च कृतश्च एतेषां विततिं दधानम् । भावा भावप्रत्ययाः, कृतः कृत्सं-ज्ञकाः प्रत्ययाश्च । तथा शब्दानां रामकृष्णादीनां भवत्यादिशब्दपरम्पराणां च विधायकं साधकम् । अर्थवशाद्विभक्तिवचनविपरिणामः ॥

स्थितैव कण्ठे परिणम्य हारलता बभूवोदिततारवृत्ता ।
ज्योतिर्मयी यन्द्रजनाय विद्या मध्येङ्कमङ्केन भृता विराङ्के ॥ ७८ ॥

स्थितेति ॥ ज्योतिर्मयी ज्योतीरूपा ग्रहनक्षत्रादिचारसहिता विद्या यन्द्रजनाय यस्या देव्याः सेवनाय कण्ठे स्थितैव परिणम्य रूपान्तरं प्राप्य हारलता बभूवेत्यहं [illegible] । किंभू-ता—उदितमुक्तं तारं तारासंबन्धि वृत्तं शुभाशुभफलकथनरूपं यस्याम् । तथा—[illegible]-त्राना शिक्षादीनां मध्येऽङ्केन गणनया भृता धृता । पञ्चमध्ये गणितेत्यर्थः । हारलतापि—उदितः प्रकाशीभूतः तारो मध्यमणिर्यस्यां, मुक्ताशुद्धिर्वा यस्यां सा एवंभूता [illegible] च । वर्तुलमौक्तिकेत्यर्थः । तथा—मध्येऽङ्कं शरीरमध्ये अङ्केन क्रोडेन वक्षसा भृता [illegible] । तारणामिदं तारं संबन्धेऽण् । यद्वा द्राविडे रागे तारशब्दस्यापि नक्षत्रवाचित्वमुक्तम् । [illegible] ताराणां वृत्तं यस्यां, यथा वा ॥

अवैमि वादिप्रतिवादिगाढस्वपक्षरागेण विराजमाने ।
ते पूर्वपक्षोत्तरपक्षशास्त्रे रदच्छदौ भूतवती यदीयौ ॥ ७९ ॥

---

१ 'अत्र [illegible]' इति साहित्यविद्याधरी । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्यविद्याधरी । ४ '[illegible]' इति मुद्रितपुस्तकम् । ५ '[illegible]' साहित्यविद्याधरी ।

तीर्णेना क्व शक्तिः प्रभुत्वं सामर्थ्यम्। अपि तु न। तत्कंबलेन विना पत्रादिखण्डनं कर्तुमप्रच पत्रमित्यर्थः। गुणैः कषायादिभिः शालते इति देदृशं पूगं खण्डयितुं वा क्व शक्तिः। नहि दन्तहीनेन पर्णानि पूगानि च भक्षयितुं शक्यन्ते। अथ च वादतो वादेन गुणशालिन विदुषां पूगं वृन्दं खण्डयितुं क्व सामर्थ्यम्। 'पदादयः पृथक्शब्दाः' इति मतेन न विद्यन्ते दन्ता यस्य दन्तरहितस्य। नञा बहुव्रीहिणा द्वितीयपक्षे व्याख्येयम्। दन्तानां कर्कशता तत्कठोरत्वकनिर्माणस्य युक्तम्। 'पूगः क्रमुकवृन्दयोः' इत्यमरः॥

सपल्लवं व्यासपराशराभ्यां प्रणीतभावादुभयीभविष्णु।
तन्मत्स्यपद्माद्युपलक्ष्यमाणं यत्पाणियुग्मं वव्रृते पुराणम्॥ ८३॥

सपल्लवमिति॥ पुराणं तत्प्रसिद्धं यस्याः पाणियुग्मं वव्रृते जातम्। किंभूतम्—सपल्लवं कथाख्यायिकादियुक्तम्। अथ च सशृङ्गारम्। अलक्तकरागतुल्यमित्यर्थः। किसलयसदृशं वा। तथा—व्यासपराशराभ्यां मुनिभ्यां प्रणीतभावान्निर्मितत्वादुभयीभविष्णु पुराणोपपुराणतां प्राप्तं मत्स्यकूर्मपद्मवाराहादिपदैरुपलक्ष्यमाणं निर्दिश्यमानम्। अथ च रेखारूपमत्स्यपद्मचक्रादिसामुद्रकलक्षणैर्लक्ष्यमाणम्। पुराणमेव करयुगाकारेण परिणतमित्यर्थः। तत्पुराणमिति वा। सपल्लवमिति पक्षे सादृश्येऽव्ययीभावः॥

आकल्पविच्छेदविवर्जितो यः स धर्मशास्त्रव्रज एव यस्याः।
पश्यामि मूर्धा श्रुतिमूलशाली कण्ठस्थितः कस्य मुदे न वृत्तः॥८४॥

आकल्पेति॥ य आकल्पं विच्छेदविवर्जितः प्रलयपर्यन्तमुच्छेदरहितः। अथ च आकल्पोऽलंकारः तत्सहितः सर्वदा सालंकारः स धर्मशास्त्रस्य व्रजः समूह एव यस्याः सरलता मूर्धा कस्य मुदे प्रीत्यै न वृत्तः। अथच—वृत्तो वर्तुलः कस्य मुदे न। अपि तु सर्वस्यापि मुदे स्यादेवेत्यहं पश्यामि जाने। किंभूतः—श्रुतिः वेद एव मूलं तेन शालते। अथ च—कर्णयोर्मूले शोभते एवंशीलः। श्रुतिः शब्दः तस्य ग्रहणे मूलं कारणं कर्णौ ताभ्यां शालत इति वा। तथा—कण्ठस्योपरि स्थितः। अथ च—कण्ठे पाठतो न्यस्तः। धर्मशास्त्रमेव यदीयमूर्धाकारेण परिणतमिति भावः॥

भ्रुवौ दलाभ्यां प्रणवस्य यस्यास्तद्बिन्दुना भालतमालपत्रम्।
तदर्धचन्द्रेण विधिर्विपञ्ची निक्वाणनाकोणधनुः प्रणिन्ये॥ ८५॥

भ्रुवाविति॥ विधिः प्रणवस्योंकारस्य दलाभ्यां खण्डाभ्यां यस्या भ्रुवौ प्रणिन्ये निर्ममे। तद्बिन्दुना प्रणवानुस्वारेण भालतमालपत्रं ललाटतिलकम्। तदर्धचन्द्रेण यस्या विपञ्ची वीणा तस्या निक्वाणनायै वादनार्थं कोणधनुः कोणसंज्ञकं धनुः प्रणिन्ये। 'तमालपत्रतिलकचित्रकाणि विशेषकम्' इत्यमरः। अत्र नागरलिप्या ओंकारो ज्ञातव्यः। 'कोणो वीणादिवादनम्' इति कोणशब्देनैव गतार्थत्वात्पूर्वपदं प्रशंसार्थत्वादपुनरुक्तम्। पूर्वपदेनैव गतार्थत्वात्कोणपदं धनुःप्रशंसार्थम्॥

१ 'अत्रोत्प्रेक्षाश्लेषालंकारः' इति साहित्यविद्याधरी। २ 'अत्र रूपकश्लेषालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र श्लेषोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ४ 'अत्र छेकानुप्रासातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी।

द्विकुण्डली वृत्तसमाप्तिलिप्या कराङ्गुली काञ्चनलेखनीनाम् ।
कैश्यं मषीणां सितभा कठिन्याः काये यदीये निरमायि सारैः ॥८६॥

द्विकुण्डलीति ॥ विधिना यदीये काये वृत्ता वर्तुला या समाप्तिज्ञापिका लिपिर्विसर्गलिपि, मातृकाग्रन्थस्य समाप्तिलिपिर्वा तस्याः सारैः श्रेष्ठभागैः कृत्वा द्विकुण्डली निरमायि निर्मिता । तथा—काञ्चनलेखनीनां सुवर्णमयलेखनीनां सारैः कराङ्गुली निर्मिता । मषीणां सारैः केशानां समूहः कैश्यं निर्मितम् । तथा—कठिन्याः खटिकायाः सारैः सितस्य भा शोभा निर्मिता । सर्वेषां तत्तदाकारत्वात्तदीयैरेव सारैर्निर्मितानीत्यर्थः । कराङ्गुलीति जातावेकवचनम् । यदुक्तम्—'श्रृङ्गवद्वालवत्तस्य बालिकाकुचयुग्मवत् । नेत्रवत्कृष्णसर्पस्य स विसर्ग इति स्मृतः' इति । 'खटिकायां तु कठिनी' इति विश्वः । कैश्यं, समूहार्थे 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' इति यञ् ॥

या सोमसिद्धान्तमयाननेव शून्यात्मतावादमयोदरेव ।
विज्ञानसामस्त्यमयान्तरेव साकारतासिद्धिमयाखिलेव ॥ ८७ ॥

येति ॥ या सरस्वती सोमसिद्धान्तः कापालिकदर्शनं तन्मयं तद्रूपम् । अथ च चन्द्रस्य याथार्थ्यं पूर्वपक्षभूतस्य पूर्णिमाजातस्य वा चन्द्रस्य सिद्धान्तरूपं मुखकल्पमाननं यस्या एवंभूतेव । तथा शून्यात्मतावादो माध्यमिकदर्शनं तन्मयं तद्रूपमुदरं यस्याः सेव । आत्मानो न सन्तीति शून्यात्मतावादो बौद्धसिद्धान्तः । तथा-विज्ञानस्य विशिष्टज्ञानस्य सामस्त्यं संपूर्णत्वं तन्मयं तत्प्रचुरमान्तरं चित्तं यस्या एवंभूतेव । तथा-साकारविज्ञानवादी सौत्रान्तिकः । विज्ञानस्य साकारतासिद्धिस्तद्दर्शनम् । अथ च—सौन्दर्यलाभप्रचुरम् । अखिलं समस्तं रूपं यस्या एवंभूतेव । सोमसिद्धान्तादिदर्शनैर्यदीया मुखावयवा निर्मिताः । चन्द्रानना, अतिकृशोदरी, सर्वविज्ञानमयी, अतिसुन्दरी चेति भावः । इवशब्द उत्प्रेक्षायाम्, वाक्यालंकारे वा । एवंभूता मध्येसभमवततारेत्यादि कुलकम् । शून्यात्मतेत्यादिषु 'नासिकोदर-' इति वा ङीष् ॥

भीमस्त्वयागद्यत मोदितुं ते वेला किलेयं तदलं विषद्य ।
मया निगाद्यं जगतीपतीनां गोत्रं चरित्रं च विचित्रमेषाम् ॥ ८८ ॥

भीम इति ॥ तदा देव्या भीम इत्यगद्यत उक्तः । इति किम् । इयं वेलायं समयस्ते मोदितुं हर्षं प्राप्तुमुचितः किल यस्मात्, तत्तस्माद् विषद्य विषादं कृत्वालं दुःखं न कार्यम् । मया एषां जगतीपतीनां राज्ञां विचित्रं गोत्रं चरित्रं च निगाद्यं गदितुमर्हम् । मोदितुम्, 'कालसमयवेलासु तुमुन्' इति तुमुन् । अलं विषद्य 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वा । ततः क्त्वो ल्यप् ॥

अविन्दतासौ मकरन्दलीलां मन्दाकिनी यच्चरणारविन्दे ।
अत्रावतीर्णा गुणवर्णनाय राज्ञां तदाज्ञावशगास्मि कापि ॥ ८९ ॥

अविन्दतेति ॥ असौ मन्दाकिनी यस्य श्रीविष्णोः चरणारविन्दे मकरन्दलीलां पुष्परसशोभामविन्दत प्राप । कमले हि मकरन्दो युक्तः । तस्य श्रीविष्णोराज्ञावशगा निदेशकारिणी

---

१ 'अथाशिवदोषितोकसलंकार' इति साहित्यविद्याधरी । २ 'अत्रोत्प्रेक्षालंकार' इति साहित्यविद्याधरी ।

कापि राज्ञां गुणवर्णनायात्र स्वयंवरेऽवतीर्णा। तेन प्रेपिता तदाज्ञया च मम सामर्थ्यमपि युक्तमित्यर्थः। कापीत्यनेन मदधिकास्तन्निदेशकारिण्यो वह्व्यः सन्तीति स्वनाम्नोऽकथनीयत्वं सूचितम्। 'विन्दत्यसव्ये' इति पाठे-असव्ये दक्षिणपादे विन्दति लभते ॥

तत्कालवेद्यैः शकुनस्वराद्यैराप्तामवाप्तां नृपतिः प्रतीत्य।
तां लोकपालैकधुरीण एष तस्यै सपर्यामुचितां दिदेश ॥ ९० ॥

तत्कालेति ॥ लोकपालानामेकधुरं वहतीति लोकपालतुल्य एष नृपतिस्तस्यै देव्यै उचितां योग्यां सपर्यामर्घादिपूजां दिदेशाकृत। किं कृत्वा—तत्कालवेद्यैः तदागमज्ञेयैः शकुनस्वराद्यैः काकस्वरादिशकुननासिकास्वरदक्षिणचक्षुःस्पन्दाद्यैः कृत्वा तां देवीमाप्तामभीष्टां अवाप्तां प्राप्तां प्रतीत्य ज्ञात्वा। एकधुरीणः, 'एकधुराल्लुक् च' इति खः। आप्तागमनसमये भुजस्पन्दादयो भवन्ति ॥

दिगन्तरेभ्यः पृथिवीपतीनामाकर्षकौतूहलसिद्धविद्याम्।
ततः क्षितीशः स निजां तनूजां मध्येमहाराजकमाजुहाव ॥ ९१ ॥

दिगिति ॥ ततो देवीसपर्यानन्तरं स क्षितीशः निजां स्वीयां तनूजां भैमीं मध्येमहाराजकं राजसमूहमध्ये आजुहावाकारयति स्म। किंभूतां तनूजाम्। दिगन्तरेभ्यो दिक्प्रान्तेभ्यः सकाशात्पृथिवीपतीनामाकर्ष आकर्षणं तद्विषयं यत्कौतूहलं तस्य सिद्धविद्यां जपादिपुरश्चरणेनात्मवशीकृतमन्त्ररूपां स्वसौन्दर्येण सर्वाकर्षणकारिणीम्। राजन् शब्दाद्वुञि 'महच्च तद्राजकं च' इति कर्मधारय एव। आजुहाव 'अभ्यस्तस्य च' इति संप्रसारणम् ॥

दासीषु नासीरचरीषु जातं स्फीतं क्रमेणालिषु वीक्षितासु।
स्वाङ्गेषु रूपोत्थमथाद्भुताब्धिमुद्वेलयन्तीमवलोककानाम् ॥ ९२ ॥

दासीष्विति ॥ नासीरचरीष्वग्रेसरीषु दासीषु चेटीषु विषये जातं पूर्वं समुत्पन्नम्, क्रमेणानन्तरं वीक्षितास्वालीषु सखीषु विषये स्फीतमभिवृद्धिं गतम्, अथ पश्चात्स्वाङ्गेषु भैम्यवयवेषु विषये रूपोत्थं सौन्दर्यादुत्थितं चलितुमारब्धं अवलोककानां प्रेक्षकाणामद्भुताब्धिमुद्वेलयन्तीमतिक्रान्तमर्यादं कुर्वतीम्। दास्यादिक्रमेण सुन्दर-सुन्दरतर-सुन्दरतमत्वदर्शनेन राजानोऽतिसाश्चर्या जाता इति भावः। 'भैमीं पपावपाङ्गैरथ राजराजिः' (१०।१०७) इतः षोडशेनान्वयः ॥

स्निग्धत्वमायाजललेपलोपसयत्नरत्नांशुमृजांशुकाभाम्।
नेपथ्यहीरद्युतिवारिवर्तिस्वच्छायसच्छायनिजालिजालाम् ॥ ९३ ॥

स्निग्धेति ॥ किंभूताम्—स्निग्धत्वं तैलाभ्यक्ताभासत्वम्, मायाजलं कृत्रिमोदकम्, लेपः ... वर्णोत्कर्षकारी द्रव्यान्तरसंयोगः, एतेषां त्रयाणां दोषाणां लोपे अभावे सयत्नानि ... ने। अपनीतदोषाणीत्यर्थः। तेषां रत्नानामंशुमृजा किरणशुद्धिः सैवांशुकाभा वस्त्र-

१ 'अत्र निदर्शनरूपकातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र षोडशभिः कुलकेन दमयन्तीं वर्णयति'। ४ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। अत्रैकस्मिन्नद्भुताब्धौ क्रमेणानेकेषां जातत्वस्फीतत्वोद्वेलत्वादीनां वृत्तिकथनात्पर्यायालंकारभेदः,' इति ।

दीप्तिर्यस्यास्ताम् । स्निग्धत्वाय नैर्मल्याय मायाजलस्य कृत्रिमोदकस्य लेपः प्रक्षेपस्तस्य लोपेना-पाकरणेन यद्रत्नानां कृतगुणाधानानां निर्मलानां नैर्मल्यार्थमाणिपादसंस्कृतमायाजलप्रक्षेपेण विनैव निर्मलानामिति यावत् । एवंभूतानां रत्नानामंशवः तद्वन्मृद्वी शुद्धिर्यस्या एवंविधा रत्न-किरणशुद्धियुक्ता वा अंशुकाना वस्त्रदीप्तिर्यस्याः । एवंविधेनांशुकेनाभाति, एवंविधां वा । तथा—नेपथ्येष्वलंकारेषु हीराः षट्कोणमणयस्तेषां द्युतिरेव वारि तत्र वर्तत इति वर्ति स्वच्छायं भैम्या एव प्रतिबिम्बं तस्य स्वच्छायं घनानच्छायं सदृशं तत्तुल्यं निजं स्वीयमा-लिबालं सखीवृन्दं यस्यास्ताम् । प्रतिबिम्बतुल्यत्वाद्भैम्यपेक्षया हीनाः, अन्यापेक्षया चाधिकाः सख्यो यस्या एवंभूतामित्यर्थः । स्वच्छायं, 'विभाषा सेना—' इति नपुंसकत्वम् । व्याख्या-नान्तरं कष्टकल्पनया ग्रन्थगौरवभिया चोपेक्षितम् ॥

विलेपनामोदमुदागतेन तत्कर्णपूरोत्पलसर्पिणा च ।
रतीशदूतेन मधुव्रतेन कर्णे रहः किंचिदिवोच्यमानाम् ॥ ९४ ॥

विलेपनेति ॥ विलेपनस्य यक्षकर्दमचन्दनाङ्गरागस्यामोदेन परिमलेन या मुद् हर्षस्तेन हेतुना आगतेन । तथा—तस्या भैम्याः कर्णपूरोत्पले सर्पति एवंशीलेन समीपगतेन च । तथा—रतीशदूतेन कामसंदेशहरेण मधुव्रतेन भ्रमरेण रह एकान्ते नल एव रमणीयो वर-णीयश्चेति कर्णे किंचिदुच्यमानामिव । अन्योऽपि दूतो रहसि कर्णे कथयति ॥

विरोधिवर्णाभरणाश्मभासां मल्लाजिकौतूहलमीक्षमाणाम् ।
स्मरस्वचापभ्रमचालिते नु भ्रुवौ विलासाद्वलिते वहन्तीम् ॥ ९५ ॥

विरोधीति ॥ विरोधिनोऽन्योन्यविरुद्धाः शुभ्रकृष्णनीलादयो वर्णा येषामाभरणानामलं-कारस्य रत्नानां वा भासो दीप्तयस्तासां मल्लाजिकौतूहलं मल्लयुद्धकौतुकमीक्षमाणाम् । परस्प-रोपमर्दं कुर्वतो रश्मीन् विलोकयन्तीमित्यर्थः । अन्योऽपि मल्लयुद्धकौतुकमीक्षते । तथा—विलासात्कटाक्षविक्षेपवशाद्वलिते वक्रिते भ्रुवौ वहन्तीं धारयन्तीम् । किंभूते भ्रुवौ —स्मरेण [illegible] स्वचापभ्रमचालिते नु वितर्के ॥

सामोदपुष्पाशुगवासिताङ्गीं किशोरशाखाग्रशयालिमालाम् ।
वसन्तलक्ष्मीमिव राजभिस्तैः कल्पद्रुमैरप्यभिलष्यमाणाम् ॥ ९६ ॥

सामोदेति ॥ तथा—अतिसुन्दरत्वात्कामेन सामोदः सहर्षः पुष्पाशुगः कामस्तेन वासि-तमधिष्ठितमङ्गं यस्यास्ताम् । अथ च—सामोदानि सुगन्धीनि पुष्पाणि, आशुगो मलयानि-लस्तैर्वासिताङ्गीं सुरभीकृतशरीराम् । तथा—किशोराणि नूतनानि शाखाग्राणि भुजाग्रा येषा-मेवंविधाः शया हस्ता यस्या एवंविधा आलिमाला सखीपङ्क्तिर्यस्याः । पक्षे—नूतनशाखा-ग्रपल्लवशाखिस्थाः शया यस्या एवंभूता आलिमाला यस्यास्ताम् । अथ च—[illegible]

१ 'अनुमानाद्भेदपोषितोऽलंकारः' इति साहित्यविद्याधरी । 'अत्र [illegible] इति जीवातुः । २ '[illegible]' इति साहित्यविद्याधरी । ३ '[illegible]' इति साहित्य-विद्याधरी ।

कापि राज्ञां गुणवर्णनायात्र स्वयंवरेऽवतीर्णा। तेन प्रेषिता तदाज्ञया च मम सामर्थ्यमपि युक्तमित्यर्थः। क्वापीत्यनेन मदधिकास्तन्निदेशकारिण्यो बह्वयः सन्तीति स्वनाम्नोऽकथनीयत्वं च सूचितम्। 'विन्दत्यसव्ये' इति पाठे-असव्ये दक्षिणपादे विन्दति लभते॥

तत्कालवेद्यैः शकुनस्वराद्यैराप्तामवाप्तां नृपतिः प्रतीत्य।
तां लोकपालैकधुरीण एष तस्यै सपर्यामुचितां दिदेश॥ ९०॥

तत्कालेति॥ लोकपालानामेकधुरं वहतीति लोकपालतुल्य एष नृपतिस्तस्यै देव्यै उचितां योग्यां सपर्यामर्घादिपूजां दिदेशाकृत। किं कृत्वा—तत्कालवेद्यैः तदागमज्ञेयैः शकुनस्वराद्यैः काकस्वरादिशकुननासिकास्वरदक्षिणचक्षुःस्पन्दाद्यैः कृत्वा तां देवीमाप्तामभीष्टां अवाप्तां प्राप्तां प्रतीत्य ज्ञात्वा। एकधुरीणः, 'एकधुराल्लुक् च' इति खः। आप्तागमनसमये भुजस्पन्दादयो भवन्ति॥

दिगन्तरेभ्यः पृथिवीपतीनामाकर्षकौतूहलसिद्धविद्याम्।
ततः क्षितीशः स निजां तनूजां मध्येमहाराजकमाजुहाव॥ ९१॥

दिगिति॥ ततो देवीसपर्यानन्तरं स क्षितीशः निजां स्वीयां तनूजां भैमीं मध्येमहाराजकं राजसमूहमध्ये आजुहावाकारयति स्म। किंभूतां तनूजाम्। दिगन्तरेभ्यो दिक्प्रान्तेभ्यः सकाशात्पृथिवीपतीनामाकर्ष आकर्षणं तद्विषयं यत्कौतूहलं तस्य सिद्धविद्यां जपादिपुरश्चरणेनात्मवशीकृतमन्त्ररूपां स्वसौन्दर्येण सर्वाकर्षणकारिणीम्। राजन् शब्दाद्वुञि 'महच्च तद्राजकं च' इति कर्मधारय एव। आजुहाव 'अभ्यस्तस्य च' इति संप्रसारणम्[2]॥

दासीषु[3] नासीरचरीषु जातं स्फीतं क्रमेणालिषु वीक्षितासु।
स्वाङ्गेषु रूपोत्थमथाद्भुताब्धिमुद्वेलयन्तीमवलोककानाम्॥ ९२॥

दासीष्विति॥ नासीरचरीष्वग्रेसरीषु दासीषु चेटीषु विषये जातं पूर्व समुत्पन्नम्, क्रमेणानन्तरं वीक्षितास्वालीषु सखीषु विषये स्फीतमभिवृद्धिं गतम्, अथ पश्चात्स्वाङ्गेषु भैम्यवयवेषु विषये रूपोत्थं सौन्दर्यादुत्थितं चलितुमारब्धं अवलोककानां प्रेक्षकाणामद्भुताब्धिमुद्वेलयन्तीमतिक्रान्तमर्यादं कुर्वतीम्। दास्यादिक्रमेण सुन्दर-सुन्दरतर-सुन्दरतमत्वदर्शनेन राज्ञोऽतिसाश्चर्या जाता इति भावः। 'भैमीं पपावपाङ्गैरथ राजराजिः' (१०।१०७) इतः षोडशेनान्वयः॥

स्निग्धत्वमायाजललेपलोपसयत्नरत्नांशुमृजांशुकाभाम्।
नेपथ्यहीरद्युतिवारिवर्तिस्वच्छायसच्छायनिजालिजालाम्॥ ९३॥

स्निग्धेति॥ किंभूताम्—स्निग्धत्वं तैलाभ्यक्ताभासत्वम्, मायाजलं कृत्रिमोदकम्, लेपः अधोभागी वर्णोत्कर्षकारी द्रव्यान्तरसंयोगः, एतेषां त्रयाणां दोषाणां लोपे अभावे सयत्नानि कृतप्रयत्नानि। अपनीतदोषाणीत्यर्थः। तेषां रत्नानामंशुमृजा किरणशुद्धिः सैवांशुकाभा का-

---

१ 'अत्र निदर्शनरूपकातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्र रूपकालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र षोडशभिः कुलकेन दमयन्तीं वर्णयति'। ४ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। अत्रैकस्मिन्नद्भुताब्धौ क्रमेणानेकेषां जातत्वस्फीतत्वोद्वेलत्वादीनां वृत्तिकथनात्पर्यायालंकारभेदः,' इति जीवातुः।

शाकिसलयशयालिमाला भ्रमरपङ्क्तिर्यस्यां सा ताम्। तथा—तै राजभिरभिलष्यमाणाम् कामिव स्थिताम्—कल्पद्रुमैरप्यभिलष्यमाणां वसन्तलक्ष्मीमिव स्थिताम्। वासित इ मतुवन्तात् 'तत्करोति–' इतिण्यन्ताद्वासशब्दान्निष्ठा ॥

पीतावदातारुणनीलभासां देहोपदेहात्किरणैर्मणीनाम्।
गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपान्पुनरुक्तयन्तीम् ॥ ९७ ॥

पीतेति ॥ तथा—पीता अवदाता श्वेता अरुणा नीला भा येषां मणीनां किरणैः कृ देहोपदेहाच्छरीरानुलेपनाद्धेतोः यथाक्रमं गोरोचना चन्दनं कुङ्कुमं एणनाभी कस्तूरी ए कृतान्विलेपान्पुनरुक्तयन्तीम्। निरर्थकान्कुर्वतीमित्यर्थः। 'बहुष्वनियमः' इति नीलशब्द पूर्वनिपाताभावः। गोरोचनेत्यादि चन्दनादिभिः पूर्वं समासः कार्यः ॥

स्मरं प्रसूनेन शरासनेन जेतारमश्रद्दधतीं नलस्य।
तस्मै स्वभूषाद्दृषदंशुशिल्पं बलद्विषः कार्मुकमर्पयन्तीम् ॥ ९८ ॥

स्मरमिति ॥ तथा—स्मरं प्रसूनेन कुसुमरूपेणातिपेशलेन शरासनेन धनुषा नलस्य जेतारं जैत्रमश्रद्दधतीमसंभावयन्तीम्। अतः कारणात्तस्मै कामायातिदृढं बलद्विष इन्द्रस्य कार्मुकमर्पयन्तीं ददतीम्। किंभूतं कार्मुकम्—स्वभूषासु स्वीयकर्णाद्यलंकारेषु दृषदो रत्नानि तेषामंशवस्तेषां शिल्पं निर्माणरूपम्। भैमीभूषारत्नकिरणैरेव साधनैः स्मरेण नलो जय्यो नान्यैरित्यर्थः। नानावर्णेन्द्रधनुर्वत्तदीया रत्नशोभेति भावः ॥

विभूषणेभ्योऽवरमंशुकेषु ततोऽवरं सान्द्रमणिप्रभासु।
सम्यक्पुनः क्वापि न राजकस्य पातुं दृशा धातृधृतावकाशाम् ॥ ९९ ॥

विभूषणेभ्य इति ॥ तथा—विभूषणेभ्योऽवरमर्वाग्भागे वर्तमानेष्वंशुकेषु राजकस्य राजसमूहस्य दृशा पातुं न धात्रा धृतः कृतोऽवकाशोऽन्तरालं यस्यां सा। अनेनैव भूषणे- ष्वपि न धृतावकाशामित्यप्युक्तम्। तथा—ततः अंशुकेभ्योऽवरं सान्द्रमणिप्रभासु राजकस्य दृशा पातुं न धातृधृतावकाशाम्। एवं क्वापि कस्मिन्नप्यवयवप्रदेशे पुना राजकस्य दृशा सम्यक्सामस्त्येन यथावस्थितरूपेण च द्रष्टुं धातृधृतावकाशाम्। विभूषणांशुकमणिप्रभाच्छा- दितत्वात्किमप्यङ्गं राजदृष्टिगोचरो नाभूदित्यर्थः। यावद्यावद्वस्तु गोप्यते तावत्तावदवलोक- नार्थमुत्कण्ठा भवतीति सर्वेऽपि तदवलोकनार्थं सोत्कण्ठा जाता इति भावः ॥

प्रकारान्तरेणाप्यमुमर्थमाह—

प्राक्पुष्पवर्षैर्विचितः पतद्भिर्द्रष्टुं न दत्तामथ न द्विरेफैः।
वन्दीतिमुखेन ततो मुखेन विधेरहो वाञ्छितविघ्नयत्नः ॥ १०० ॥

१ 'अत्रोपमाविशेषोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्र यथासंख्यमलंकारः' इति साहित्यविद्याधरी। 'अत्र गोरोचनादिचतुष्टयस्य यथासंख्यसंबन्धेन पीतादिकिरणैरलंकृत- वस्तुनामर्थान्तरन्यासे ह्येतदलंकारः' इति जीवातुः। ३ 'अत्राविशेषोक्तिरलंकारः' इति साहि- त्यविद्याधरी। ४ 'अत्राविशेषोक्तिरलंकारः' इति साहित्यविद्याधरी। 'अत्र विभूषणादिनां क्रमशो- [illegible] जीवातुः।

प्रागिति ॥ तथा—पिपतो गगनात्पतद्भिरतिसौन्दर्यदर्शनेन संतुष्टैर्देवैः भैमीशिरसि मुक्तैः पुष्पवर्षैः प्राक्प्रथमतः राजकस्य द्रष्टुं न दत्ताम्। अथ पश्चात्तदनुगामिभिर्मिलिन्दैर्द्रष्टुं न दत्ताम्। ततोऽपि पश्चात्तेभ्यो भ्रमरेभ्यो भीत्या भयेन मुखं वक्रीकृतं तेन मुखेन द्रष्टुं न दत्ताम्। विधेर्वाञ्छितस्य विघ्ने यत्नः अहो आश्चर्यरूपः कष्टरूपो वा। यद्वा येन केनचित्प्रकारेण सर्वाभिलाषं नाशयितुमेव प्रयतते। असाधुर्विधिव्यापार इत्यर्थः ॥

एतद्वरं स्यामिति राजकेन मनोरथातिथ्यमवापिताय ।
सखीमुखायोत्सृजतीमपाङ्गात्कर्पूरकस्तूरिकयोः प्रवाहम् ॥ १०१ ॥

एतदिति ॥ तथा—सखीमुखाय अपाङ्गान्नेत्रप्रान्तात्कर्पूरकस्तूरिकयोः श्वेतश्यामकान्तिपूर-मुत्सृजन्तीम्। कटाक्षैरवलोकयन्तीमित्यर्थः। किंभूताय सखीमुखाय—अहमेतत्सखीमुखं वरं भवानिष्टं स्यां भूयासमिति प्रत्येकं राजकेन मनोरथातिथ्यमभिलाषविषयमवापिताय प्रापिताय। सखीमुखत्वेन विना भैमीकटाक्षलाभो न भवतीति राजत्वापेक्षया भैमीसखीमुखत्वमेव श्लाघ्यं वरं न राजत्वमित्यर्थः। कटाक्षस्य सितासितरूपत्वं कर्पूरकस्तूरिकापदेनोक्तम् ॥

स्मितेच्छुदन्तच्छदकम्पकिंचिद्दिगम्बरीभूतरदांशुवृन्दैः ।
आनन्दितोर्वीन्द्रमुखारविन्दैर्मन्दं नुदन्तीं हृदि कौमुदीनाम् ॥ १०२ ॥

स्मितेति ॥ स्वस्मिन्प्रसादवशादानन्दितानि उर्वीन्द्राणां राज्ञां मुखारविन्दानि यैः [illegible], स्मितेच्छू ईषद्धास्यं कर्तुकामौ दन्तच्छदावोष्ठौ तयोः कम्पेन किंचिद्दिगम्बरी-भूता ईषत्प्रकटीभूता रदा दन्तास्तेषामंशुवृन्दैः कृत्वा कौमुदीनां ज्योत्स्नानां हृदि चित्ते मन्दं नुदन्तीम्। अथ च—'अंशुरंशौ रवौ रश्मौ' इत्यभिधानाद्रदा [illegible] सहायैः नन्दितारविन्दत्वात्कौमुदीमदहरणं युक्तम्। [illegible] कमलानामानन्दः, चन्द्रिकाणां च तदभावः क्रियते ॥

स्राकिसलयशयालिमाला भ्रमरपङ्क्तिर्यस्यां सा ताम् । तथा—तै राजभिरभिलष्यमाणाम् । कामिव स्थिताम्—कल्पद्रुमैरप्यभिलष्यमाणां वसन्तलक्ष्मीमिव स्थिताम् । वासित [illegible] मतुबन्तात् 'तत्करोति–' इतिण्यन्ताद्वासशब्दान्निष्ठा ॥

पीतावदातारुणनीलभासां देहोपदेहात्किरणैर्मणीनाम् ।
गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपान्पुनरुक्तयन्तीम् ॥ ९७ ॥

पीतेति ॥ तथा—पीता अवदाता श्वेता अरुणा नीला भा येषां मणीनां किरणैः [illegible] देहोपदेहाच्छरीरानुलेपनाद्धेतोः यथाक्रमं गोरोचना चन्दनं कुङ्कुमं एणनाभी कस्तूरी [illegible] कृतान्विलेपान्पुनरुक्तयन्तीम् । निरर्थकान्कुर्वतीमित्यर्थः । 'बहुष्वनियमः' इति नीलशब्दस्य पूर्वनिपाताभावः । गोरोचनेत्यादि चन्दनादिभिः पूर्वं समासः कार्यः ॥

स्मरं प्रसूनेन शरासनेन जेतारमश्रद्दधतीं नलस्य ।
तस्मै स्वभूषाद्दषदंशुशिल्पं वलद्विषः कार्मुकमर्पयन्तीम् ॥ ९८ ॥

स्मरमिति ॥ तथा—स्मरं प्रसूनेन कुसुमरूपेणातिपेशलेन शरासनेन धनुषा नलस्य जेतारं जैत्रमश्रद्दधतीमसंभावयन्तीम् । अतः कारणात्तस्मै कामायातिदृढं वलद्विषः इन्द्रस्य कार्मुकमर्पयन्तीं ददतीम् । किंभूतं कार्मुकम्—स्वभूषासु स्वीयकर्णाद्यलंकारेषु दृषदो रत्नानि तेषामंशवस्तेषां शिल्पं निर्माणरूपम् । भैमीभूषारत्नकिरणैरेव साधनैः स्मरेण नलो जय्यो नान्यैरित्यर्थः । नानावर्णेन्द्रधनुर्वैमदीया रत्नशोभेति भावः ॥

विभूषणेभ्योऽवरमंशुकेषु ततोऽवरं सान्द्रमणिप्रभासु ।
सम्यक्पुनः क्वापि न राजकस्य पातुं दृशा धातृधृतावकाशाम् ॥९९॥

विभूषणेभ्य इति ॥ तथा—विभूषणेभ्योऽवरमर्वाग्भागे वर्तमानेष्वंशुकेषु राजकस्य राजसमूहस्य दृशा पातुं न धात्रा धृतः कृतोऽवकाशोऽन्तरालं यस्यां सा । अनेन भूषणेष्वपि न धृतावकाशमित्यप्युक्तम् । तथा—ततः अंशुकेभ्योऽवरं सान्द्रमणिप्रभासु राजकस्य दृशा पातुं न धातृधृतावकाशाम् । एवं क्वापि कस्मिन्नप्यवयवप्रदेशे पुनः राजकस्य दृशा सम्यक्प्रमातृत्वेन यथावस्थितरूपेण च द्रष्टुं धातृधृतावकाशाम् । विभूषणांशुकमणिप्रभाभि[illegible] [illegible] राजदृष्टिगोचरो नाभूदित्यर्थः । यद्यद्वस्तु गोप्यते तत्तदवलोकनार्थमुत्कण्ठा भवतीति सर्वेऽपि तदवलोकनार्थं सोत्कण्ठा जाता इति भावः ॥

प्रकारान्तरेणाप्यमुमर्थमाह—

प्राक्पुष्पवर्षैर्वियतः पतद्भिर्द्रष्टुं न दत्तामथ न द्विरेफैः ।
वन्द्यातिसूक्ष्मेण ततो मुखेन विधेरहो वाञ्छितविघ्नपत्रः ॥ १०० ॥

१ '[illegible]' इति साहित्यविद्याधरी । २ 'अत्र [illegible]' साहित्यविद्याधरी । 'अत्र गोरोचनादनुक्रमवत्[illegible]' [illegible] इति जीवातुः । ३ '[illegible]' साहित्यविद्याधरी । ४ '[illegible]' इति साहित्यविद्याधरी । 'अत्र [illegible]' [illegible] इति जीवातुः ।

प्रागिति ॥ तथा—वियतो गगनात्पतद्भिरतिसौन्दर्यदर्शनेन संतुष्टैर्देवैः भैमीशिरसि मुक्तैः पुष्पवर्षैः प्राक्प्रथमतः राजकस्य द्रष्टुं न दत्ताम्। अथ पश्चात्तदनुगामिभिर्भ्रमरैर्द्रष्टुं न दत्ताम्। ततोऽपि पश्चात्तेभ्यो भ्रमरेभ्यो भीत्या भयेन मुग्धं वक्रीकृतं तेन मुखेन द्रष्टुं न दत्ताम्। विधेर्वाञ्छितस्य विघ्ने यत्नः अहो आश्चर्यरूपः कष्टरूपो वा। ब्रह्मणा येन केनचित्प्रकारेण सर्वाभिलाषं नाशयितुमेव प्रयत्यते। असाधुर्विधिव्यापार इत्यर्थः ॥

एतद्वरं स्यामिति राजकेन मनोरथातिथ्यमवापिताय।
सखीमुखायोत्सृजतीमपाङ्गात्कर्पूरकस्तूरिकयोः प्रवाहम् ॥ १०१ ॥

एतदिति ॥ तथा—सखीमुखाय अपाङ्गान्नेत्रप्रान्तात्कर्पूरकस्तूरिकयोः श्वेतश्यामकान्तिपूरमुत्सृजन्तीम्। कटाक्षैरवलोकयन्तीमित्यर्थः। किंभूताय सखीमुखाय—अहमेतत्सखीमुखं वरं मनागिष्टं स्यां भूयासमिति प्रत्येकं राजकेन मनोरथातिथ्यमभिलाषविषयत्वमवापिताय प्रापिताय। सखीमुखत्वेन विना भैमीकटाक्षलाभो न भवतीति राजत्वापेक्षया भैमीसखीमुखत्वमेवास्माकं वरं न राजत्वमित्यर्थः। कटाक्षस्य सितासितरूपत्वं कर्पूरकस्तूरिकापदेनोक्तम् ॥

स्मितेच्छुदन्तच्छदकम्पकिंचिद्दिगम्बरीभूतरदांशुवृन्दैः।
आनन्दितोर्वीन्द्रमुखारविन्दैर्मन्दं नुदन्तीं हृदि कौमुदीनाम् ॥ १०२ ॥

स्मितेति ॥ स्वस्मितप्रसादवशादानन्दितानि उर्वीन्द्राणां राज्ञां मुखारविन्दानि यैरेवंभूतैः, स्मितेच्छु ईषद्धास्यं कर्तुकामौ दन्तच्छदावोष्ठौ तयोः कम्पेन किंचिच्चलनेन किंचिद्दिगम्बरीभूता ईषत्प्रकटीभूता रदा दन्तास्तेषामंशुवृन्दैः कृत्वा कौमुदीनां ज्योत्स्नानां हृदि स्थितं मन्दं नुदन्तीम्। अथ च—'अंशुर्लेशे रवौ रश्मौ' इत्यभिधानाद्रदा एवांशुवृन्दानि सूर्यसमूहास्तैः नन्दितारविन्दत्वात्कौमुदीमदहरणं युक्तम्। ततोऽप्यधिककान्तित्वाच्च। सूर्येण हि कमलानामानन्दः, चन्द्रिकाणां च तदभावः क्रियते ॥

प्रत्यङ्गभूषाच्छमणिच्छलेन यल्लग्नतन्निश्चललोकनेत्राम्।
हाराग्रजाग्रद्गरुडाश्मरश्मिपीनाभनाभीकुहरान्धकाराम् ॥ १०३ ॥

प्रत्यङ्गेति ॥ प्रत्यङ्गं प्रत्यवयवं भूषाणां भूषणानामच्छा निर्मला मणयो रत्नानि तेषां छलेन व्याजेन यस्मिन्नवयवे लग्नानि तत्रैव निश्चलानि लोकनेत्राणि यस्यास्ताम्। यत्र लोकलोकस्य नेत्रं यत्र यत्र यस्मिन्नवयवे लग्नं तत्रैव विलोकनविच्छेदभिया [illegible] निश्चलीभूतं यस्यामेवंभूतामित्यर्थः। दर्शनोत्सुकनेत्राण्येवैतानि, न तु [illegible]। अतिसुन्दरी प्रत्यङ्गं रत्नैरलंकृतामिति भावः। तथा—हाराग्रे मुक्ताहारमध्ये [illegible] जाग्रत् गरुडोद्गारमणिस्तस्य रश्मिभिः पीना वर्धिता आभा यस्य [illegible] नाभीकुहरान्धकारो नाभीदरीतिमिरं यस्या एवंभूताम् ॥

---

१ 'अत्र दर्शनाभावप्रतिपादनादतिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्र हृदयं सितासितकटाक्षयोः [illegible] इति जीवातुः।
१ 'अत्र स्वभावोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्रापह्नुतिरलंकारः' इति साहित्यविद्याधरी। 'अत्र [illegible]' इति जीवातुः।

तद्गौरसारस्मितविस्मितेन्दुप्रभाशिरःकम्परुचोऽभिनेतुम्।
विपाण्डुतामण्डितचामरालीनानामरालीकृतलास्यलीलाम् ॥ १०४ ॥

तदिति ॥ तथा—तस्या गौरवस्तु सारभूतमतिगौरं स्मितं तेन विस्मिता साश्चर्यीभूता इन्दुप्रभा तस्याः शिरःकम्परुचोऽभिनेतुं तत्स्मितदर्शनजनितविस्मयवशाचन्द्रदीप्तिरेवं शिरःकम्पं करोतीति दर्शयितुं विपाण्डुतया मण्डिताश्चामराल्यश्चामरपङ्क्तिरूपा नानामराल्योऽनेका हंसस्ताभिः कृता लास्यलीला यस्यास्ताम्। चन्द्रिकाचामरमराल्तुल्यस्मितां चामरैर्वीज्यमानां चेति भावः ॥

तदङ्गभोगावलिगायनीनां मध्ये निरुक्तिक्रमकुण्ठितानाम्।
स्वयं धृतामप्सरसां प्रसादं ह्रियं हृदो मण्डनमर्पयन्तीम् ॥ १०५ ॥

तदिति ॥ तथा—तस्या अङ्गानां भोगावलिः भुज्यन्त इति भोगाश्चन्दनादयस्तत्प्रतिपादको ग्रन्थस्तद्गायनीनां प्रारब्धस्तुतीनां मध्ये असमाप्तायामेव स्तुतौ निरुक्तिक्रमे निर्वचनपरिपाट्यां विषये कुण्ठितानां कतिपयानामेवाङ्गानां स्तुतिः कृता, अनन्तरं स्तुत्यभावाद्धतशक्तीनां तूष्णींभूतानां मेनकादीनामप्सरसां स्वयं स्वेन धृतां हृदः स्वीहृदयस्य मण्डनं भूषणीभूतां ह्रियं लज्जां प्रसादं लज्जारूपं प्रसादमर्पयन्तीं ददतीम्। अतिसौन्दर्यस्तुतिकरणाशक्तेरप्सरसोऽपि लज्जिता इति भावः। 'मध्ये उदरे विषये निरुक्तिक्रमकुण्ठितानां तद्वर्णयितुमशक्तानाम्' इति वा। अन्यापि भोगावली पाठकानां स्वयं धृतमुत्तमहारादि हृदयमण्डनमर्पयति। प्रसादमण्डनशब्दावाश्लिष्टलिङ्गौ ॥

तारा रदानां वदनस्य चन्द्रं रुचा कचानां च नभो जयन्तीम्।
आकण्ठमक्ष्णोर्द्वितयं मधूनि महीभुजः कस्य न भोजयन्तीम् ॥ १०६ ॥

तारा इति ॥ तथा—रदानां रुचा ताराः, वदनस्य रुचा चन्द्रम्, कचानां रुचा नभः, जयन्तीमिति सर्वत्रान्वयः। कस्य महीभुजः अक्ष्णोर्द्वितयं नयनद्वयं आकण्ठमुपचारादवितरां मधूनि न भोजयन्तीम्। अपि तु सर्वस्यापि पाययमानाम्। अतिसुन्दरतद्दर्शनेन राजनेत्राणाममृतेनेव तृप्तिर्जातेति भावः ॥

अलंकृताङ्गाद्भुतकेवलाङ्गीं स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीम्।
इमां विमानेन सभां विशन्तीं पपावपाङ्गैरथ राजराजिः ॥ १०७ ॥

अलंकृतेति ॥ तथा—अलंकृतादप्यङ्गादवयवादद्भुतमाश्चर्यरूपं केवलं अनलंकृतमङ्गं यस्यास्ताम्। तथा—स्तवात्स्तुतेरधिका अध्यक्षनिवेद्या प्रत्यक्षदृश्या लक्ष्मीर्यस्यास्ताम्। स्तूयमानाया लक्ष्म्याः सकाशादनुभूयमाना लक्ष्मीरधिकेत्यर्थः। अथ विमानेन नरवाह्यचतुरस्रयानेन स्वयंवरसभां विशन्तीमिमां भैमीं राजराजी राजपङ्क्तिरपाङ्गैः कटाक्षैः पपौ सादरं पश्यति स्म। कुलकम् ॥

---

१ 'अत्र छेकानुप्रासरूपकातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्र रूपकप्रतीयमानोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी। ३ 'अत्र दीपकातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। 'अत्रोत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुकत्वात्काव्यलिङ्गम्। तच्च संसृष्टामिस्ताराद्युपमाभिः संकीर्यते। तस्य 'नभोजयन्तीम्' इति यमकेन संसृष्टिः' इति जीवातुः। ४ 'अत्र छेकानुप्रासातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी।

आसीदसौ तत्र न कोऽपि भूपस्तन्मूर्तिरूपोद्भवदद्भुतस्य ।
उल्लेसुरङ्गानि मुदा न यस्य विनिद्ररोमाङ्कुरदन्तुराणि ॥ १०८ ॥

आसीदिति ॥ तस्या मूर्तिर्देहः तस्या रूपं सौन्दर्यं तद्विलोकनेनोद्भवज्जातमद्भुतमाश्चर्यं यस्य एवंभूतस्य यस्याङ्गानि नोल्लेसुः हर्षं न प्रापुः । असौ ईदृशः कोऽपि भूपः तत्र सभायां नासीत् । किंभूतान्यङ्गानि—मुदा अनुरागेण कृत्वा विनिद्रैः रोमाङ्कुरैः दन्तुराणि नतोन्नतानि । सर्वेऽपि तत्सौन्दर्यदर्शनात्साश्चर्याः सानुरागा जाता इति भावः ॥

अङ्गुष्ठमूर्ध्ना विनिपीडिताया मध्येन भागेन च मध्यमायाः ।
आस्फोटि भैमीमवलोक्य तत्र न तर्जनी केन जनेन नाम ॥ १०९ ॥

अङ्गुष्ठेति ॥ तत्र केन नाम केन पुनः जनेन भैमीमवलोक्य तर्जनी दक्षिणकरप्रदेशिनी नास्फोटि अपि तु सर्वेणास्फाल्यते स्म । किंभूताम्—अङ्गुष्ठस्य मूर्ध्ना अग्रेण मध्यमाया अङ्गुलेर्मध्येन भागेन च विनिपीडितं नम्रीकृतमग्रं यस्याः सा । लोकरीतिरियमनुभवैकवेद्या ॥

अलिन्समाजे मनुजेश्वरेण तां खञ्जनाक्षीमवलोक्य केन ।
पुनः पुनर्लोलितमौलिना न भ्रुवोरुदक्षेपितरां द्वयी वा ॥ ११० ॥

अलिन्निति ॥ अलिन्दसमाजे पुनः पुनः लोलितमौलिना कम्पितशिरसा केन वा केन पुनः मनुजेश्वरेण राज्ञा तां खञ्जनाक्षीं खञ्जरीटतुल्यनेत्रामवलोक्य भ्रुवोर्द्वयी नोदक्षेपितराम् । अतिशयेनोत्क्षिप्तैवेत्यर्थः । आश्चर्यवशाच्छिरःकम्पो भ्रुवोरुत्क्षेपश्च कृत इति भावः ॥

स्वयंवरस्याजिरमाजिहानां विभाव्य भैमीमथ भूमिनाथैः ।
इदं मुदा विह्वलचित्तभावादवापि खण्डाक्षरजिह्मजिह्मम् ॥ १११ ॥

स्वयंवरस्येति ॥ अथ भूमिनाथैः राजभिः स्वयंवरस्याजिरमाजिहानामागच्छन्तीं भैमीं विभाव्य दृष्ट्वानुरागवशाद्विह्वलचित्तभावाद्विह्वलचित्तत्वात्खण्डाक्षरैरपौनरुक्त्यैर्हेतुभिः जिह्मा कुटिला जिह्वा यस्यां क्रियायां यथा तथा मुदा हर्षेण इदं वक्ष्यमाणमवापि उदीरितम् । भैमीदर्शनमात्रेण कामपरवशत्वादस्फुटमब्रुवन्तोऽपि हर्षवशाद्वर्णमात्रमब्रुवन्नित्यर्थः । आजिहानाम्, '[illegible]' ॥

रम्भादिलोभात्कृतकर्मभिर्ना शून्यैव भूर्भूत्सुरभूमिपान्यैः ।
इत्येतयालोपि दिवोऽपि पुंसां वैमत्यमत्यप्सरसा रसायाम् ॥ ११२ ॥

रम्भेति ॥ अत्यप्सरसा सौन्दर्येणातिक्रान्ता अप्सरसो यया एवंभूतया तया भैम्या इति विचार्य दिवः स्वर्गस्य पुंसामिन्द्रादीनां रसायां वैमत्यमनादरः अलोपि । [illegible] । [illegible] । इति किम्—रम्भादिष्वप्सरःसु [illegible] [illegible] पैः सुरभूमिपान्यैः [illegible] [illegible] ना भूरिति । [illegible]

---

१ 'अत्र काव्यलिङ्गमलंकारः' इति साहित्यविद्याधरी । २ 'अत्र [illegible]' इति साहित्यविद्याधरी । ३ 'अत्र [illegible]' इति साहित्यविद्याधरी । ४ 'अत्र [illegible]' इति साहित्यविद्याधरी ।

तद्गौरसारस्मितविस्मितेन्दुप्रभाशिरःकम्परुचोऽभिनेतुम् ।
विपाण्डुतामण्डितचामरालीनानामरालीकृतलास्यलीलाम् ॥ १०४ ॥

तदिति ॥ तथा—तस्या गौरवस्तु सारभूतमतिगौरं स्मितं तेन विस्मिता साश्चर्यभूता इन्दुप्रभा तस्याः शिरःकम्परुचोऽभिनेतुं तत्स्मितदर्शनजनितविस्मयवशाच्चन्द्रदीप्तिरेवं शिरःकम्पं करोतीति दर्शयितुं विपाण्डुतया मण्डिताश्चामराल्यश्चामरपङ्क्तिरूपा नानामराला अनेका हंसस्ताभिः कृता लास्यलीला यस्यास्ताम् । चन्द्रिकाचामरमरालतुल्यास्मितां चामरैर्वीज्यमानां चेति भावः ॥

तदङ्गभोगावलिगायनीनां मध्ये निरुक्तिक्रमकुण्ठितानाम् ।
स्वयं धृतामप्सरसां प्रसादं ह्रियं हृदो मण्डनमर्पयन्तीम् ॥ १०५ ॥

तदिति ॥ तथा—तस्या अङ्गानां भोगावलिः भुज्यन्त इति भोगाश्चन्दनादयस्तत्प्रतिपादको ग्रन्थस्तद्गायनीनां प्रारब्धस्तुतीनां मध्ये असमाप्तायामेव स्तुतौ निरुक्तिक्रमे निर्वचनपरिपाट्यां विषये कुण्ठितानां कतिपयानामेवाङ्गानां स्तुतिः कृता, अनन्तरं स्तुत्यभावाद्धतशक्तीनां तूष्णींभूतानां मेनकादीनामप्सरसां स्वयं स्वेन धृतां हृदः स्त्रीहृदयस्य मण्डनं भूषणीभूतां ह्रियं लज्जां प्रसादं लज्जारूपं प्रसादमर्पयन्तीं ददतीम् । अतिसौन्दर्यस्तुतिकरणाशक्तेरप्सरसोऽपि लज्जिता इति भावः । 'मध्ये उदरे विषये निरुक्तिक्रमकुण्ठितानां तद्वर्णयितुमशक्तानाम्' इति वा । अन्यापि भोगावली पाठकानां स्वयं धृतमुत्तमहारादि हृदयमण्डनमर्पयति । प्रसादमण्डनशब्दावाश्लिष्टलिङ्गौ ॥

तारा रदानां वदनस्य चन्द्रं रुचा कचानां च नभो जयन्तीम् ।
आकण्ठमक्ष्णोर्द्वितयं मधूनि महीभुजः कस्य न भोजयन्तीम् ॥ १०६ ॥

तारा इति ॥ तथा—रदानां रुचा ताराः, वदनस्य रुचा चन्द्रम्, कचानां रुचा नभः, जयन्तीमिति सर्वत्रान्वयः । कस्य महीभुजः अक्ष्णोर्द्वितयं नयनद्वयं आकण्ठमुपचारादतितरां मधूनि न भोजयन्तीम् । अपि तु सर्वस्यापि पाययमानाम् । अतिसुन्दरतद्दर्शनेन राजनेत्राणाममृतेनेव तृप्तिर्जातेति भावः ॥

अलंकृताङ्गाद्भुतकेवलाङ्गीं स्तवाधिकाध्यक्षनिवेद्यलक्ष्मीम् ।
इमां विमानेन सभां विशन्तीं पपावपाङ्गैरथ राजराजिः ॥ १०७ ॥

अलंकृतेति ॥ तथा—अलंकृतादप्यङ्गादवयवादद्भुतमाश्चर्यरूपं केवलं अनलंकृतमङ्गं यस्यास्ताम् । तथा—स्तवात्स्तुतेरधिका अध्यक्षनिवेद्या प्रत्यक्षदृश्या लक्ष्मीर्यस्यास्ताम् । स्तूयमानाया लक्ष्म्याः सकाशादनुभूयमाना लक्ष्मीरधिकेत्यर्थः । अथ विमानेन नरवाह्यचतुरस्रयानेन स्वयंवरसभां विशन्तीमिमां भैमीं राजराजी राजपङ्क्तिरपाङ्गैः कटाक्षैः पपौ सादरं पश्यति स्म । कुलकम् ॥

---

१ 'अत्र छेकानुप्रासरूपकातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'अत्र रूपकोपमानोत्प्रेक्षालंकारः' इति साहित्यविद्याधरी । ३ 'अत्र दीपकातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । 'अत्रोत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुकत्वात्काव्यलिङ्गम् । तच्च संसृष्टालिस्तारा[illegible] संकीर्यते । तस्य 'नभोजयन्तीम्' इति यमकेन संसृष्टिः' इति जीवातुः । ४ 'अत्र छेकानुप्रासातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी ।

न्मुखं सुधांशुपदेनाभिधावृत्त्याभिधेयम् । चन्द्रस्तु शशाङ्कपदेनाभिधीयत इत्यनयोर्महदन्तरमिति भावः । एतद्द्योतनार्थं सुधांशुशशाङ्कपदे । तथा—एतद्भ्रुवौ मुख्यमनङ्गस्य कामस्य चापमभिधावृत्त्या । अथ च—मुखे भवं मुख्यम् । भ्रूरूपं कामचापं मुखे भवत्वान्मुख्यम् । यत् पुनः पुष्पमनङ्गचापत्वेन व्यवह्रियते तत्तयोर्भ्रुवोर्वैकत्वोन्मादकत्वलक्षणो यो गुणः तन्मात्रस्य तदेकदेशभूतस्य उन्मादकत्वस्यैव वृत्त्या वर्तनेन । न तु तत्र वक्रत्वं वर्तते । ततश्चैकदेशसादृश्यलक्षणाद्गौणीनिमित्ताद्गौण्यैव वृत्त्यानङ्गचापत्वेन व्यवहर्तव्यम् । अथ च तत्पुष्पं पुनः दोरकमात्रे यद्वर्तनं तेन कामचापमित्युत्प्रेक्ष्यते । नालात्वस्य कामचापस्य कविनिरुक्तत्वात् । अतस्तस्यानङ्गचापत्वं सापेक्षम् । भ्रुवोस्तु निरपेक्षम् । 'भ्रुवौ' इति द्विवचनेनासंलग्नत्वम्, चापमित्येकवचनेन समुदितयोश्चापत्वं न तु प्रत्येकमिति च सूचितम् । अथ च—गुणस्तन्तुः सौगन्ध्यादिर्वा । तन्मात्रस्य या वृत्तिस्तया पुष्पस्य गुणवत्त्वसद्भावाच्चापस्य गुणवत्त्वात्पुष्पं कामचापमित्युच्यत इत्यर्थः । अभिधावृत्तेर्लक्षणापेक्षयाभ्यर्हितत्वाद्गौण्यपेक्षया चाभ्यर्हिततरत्वान्मुख्यत्वम् । ततश्च 'गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः' इति 'सापेक्षनिरपेक्षयोर्निरपेक्षं बलवत्' इति न्यायद्वयेनोक्तवृत्त्युपनेय मुख्यं चन्द्रानङ्गचापत्वाभिलापयोग्यम्, अतिसुन्दरं मदजनकं चेति भावः । 'तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ।'अभिधेयाविनाभूतप्रतीतिर्लक्षणेष्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥' इति अभिधानादीनां लक्षणम् । 'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥' इति । लक्षणया लक्षणेनैव संदष्ट इत्यर्थे 'संदष्टे' इति ठक् । मुख्यम्, मुखमिव भवतीत्यर्थे 'शाखादिभ्यो यत्', पक्षे 'शरीरावयवाच्च' इति यैवार्थे ॥

लक्ष्ये धृतं कुण्डलिके सुदत्या ताटङ्कयुग्मं स्मरधन्विने किम् ।
सव्यापसव्यं विशिखा विसृष्टास्तेनानयोर्यान्ति किमन्तरेव ॥ ११६ ॥

लक्ष्य इति ॥ सुदत्या भैम्या कर्णभूषणीभूतं ताटङ्कयुग्मं स्मरधन्विने कामधनुष्मते कुण्डलिके कुण्डलाकारे लक्ष्ये कृत्वा धृतं किम् । तेन कामेन सव्यापसव्यं विसृष्टा मुक्ता विशिखा अनयोः कुण्डलिकयोरन्तरेव मध्य एव यान्ति किं वितर्के । भूयसाभ्यासवशात् कटाक्षबाणाः कर्णताटङ्ककुण्डलाभ्यन्तरेण निर्यान्तीति भावः । प्रवीणस्य धनुष्मतो बाणा लक्ष्यमध्यमन्तरेण यान्ति । ताटङ्कयुग्मदर्शनमात्रेण कामोद्दीपकत्वं संभाव्यत इति भावः । अन्तः, एव इति पदच्छेदः । सव्यापसव्यं यथाकर्णमिति क्रियाविशेषणम् ॥

तनोत्यकीर्तिं कुसुमायुधस्य सैषा धृतेन्दीवरकर्णपूरा ।
यतः श्रवःकुण्डलिकापराद्धशरं खलः ख्यापयिता जनान्यान् ॥ ११७ ॥

तनोतीति ॥ सा एषा भैमी कुसुमायुधस्य कामस्येन्दीवराभ्यां कर्णपूराभ्यां ... अकीर्तिं तनोति । यत आश्चर्यम् । यतो दुर्जनः ... कर्णकुण्डलिकापराद्धं ...

---

१ '...' इति साहित्यविद्याधरी । '...' इति साहित्यविद्याधरी । २ '...' इति ... साहित्यविद्याधरीसंमतः । ३ '...' इति साहित्यविद्याधरी ।

अभावादिन्द्रादयोऽपि स्वर्गं परित्यज्य भूमिमेव स्वर्गाधिकां मत्वाऽत्र समागताः। राजानस्तु ज्योतिष्टोमादि परित्यज्य स्वर्गे न गता इति किं वाच्यमिति भावः ॥

रूपं यदाकर्ण्य जनाननेभ्यस्तत्तद्दिगन्ताद्वयमागमाम ।
सौन्दर्यसारादनुभूयमानादस्यास्तदस्माद्बहु नाकनीयः ॥ ११३ ॥

रूपमिति ॥ वयं अस्या यद्रूपं जनाननेभ्य आकर्ण्य तस्मात्तस्मादतिदूराद्दिगन्तात्प्राच्यादि-दिक्प्रान्तात्सकाशादागमाम आगतवन्तः, तत् अस्याः सौन्दर्यमनुभूयमानात्प्रत्यक्षदृश्यादस्मात्सौन्दर्यसारात् लावण्योत्कर्षाद्बहु अतिशयेनाकनीयो न कनीय एव। अन्यदीयं स्वल्पमपि लोकमुखाद्बहु श्रूयते, ऐतदीयं याथात्म्येन वर्णनाशक्तैर्बह्वपि सत् अल्पमेव श्रुतमित्यर्थः। इति भावः। आगमाम इति लृदित्त्वादङ्। कनीयः, 'युवाल्पयोः—' इति कनादेशः ॥

रसस्य शृङ्गार इति श्रुतस्य क नाम जागर्ति महानुदन्वान् ।
कस्मादुदस्थादियमन्यथा श्रीर्लावण्यवैदग्ध्यनिधिः पयोधेः ॥ ११४ ॥

रसस्येति ॥ नवरसमध्ये शृङ्गार इति श्रुतस्य ख्यातस्य रसस्य महानुदन्वान्समुद्रः क जागर्ति कस्मिन्देशे विद्यते। नाम प्रश्ने अप्यर्थे वा—क नाम कस्मिन्नपि प्रदेशे संभावनायां वा अस्ति इति। कथमवगतमित्यत आह—अन्यथा शृङ्गाररससमुद्राभावे लावण्यस्य सौन्दर्यस्य वैदग्ध्यस्य निधिः इयं भैमी श्रीर्लक्ष्मीः कस्मात्पयोधेरुदस्थादुत्पन्ना। श्रीः समुद्रादुत्पन्नेति पुराणादौ प्रसिद्धम्। इयं तु श्रियोऽप्यधिका यस्माच्छृङ्गाररससमुद्रादुत्पन्ना, स क्वापि देशे विद्यत एव इति कार्यात्कारणानुमानमिति भावः ॥

साक्षात्सुधांशुर्मुखमेव भैम्या दिवः स्फुटं लाक्षणिकः शशाङ्कः ।
एतद्भ्रुवौ मुख्यमनङ्गचापं पुष्पं पुनस्तद्गुणमात्रवृत्त्या ॥ ११५ ॥

साक्षादिति ॥ भैम्या मुखमेव साक्षान्मुख्य उपमानभूतः सुधांशुरमृतांशुः कविसंकेते उपमानत्वेन प्रसिद्धश्चन्द्रो भैमीमुखलक्षण एव। अतिवृत्तलाकलङ्कत्वाह्लादकत्वादधरलक्षणगतामृतमसुधावत्त्वादिना चन्द्रादधिकत्वादित्यर्थः। अथ च—साक्षात् प्रत्यक्षः संनिहिततर इति यावत्। अथ च—भैमीमुखमेव साक्षादभिधावृत्त्या सुधांशुः। ओष्ठलक्षणमुख्यसुधासंबन्धात्सुधांशुपदेन भैमीमुखमेव मुख्यवृत्त्याभिधेयमिति भावः। दिवः गगनसंबन्धी शशाङ्कः स्फुटं निश्चितं लाक्षणिकः लक्षणेन कलङ्केन संसृष्टः। अतः साक्षान्मुख्य उपमानभूतो न भवति, किंतु न्यूनगुणत्वादुपमेयमेवेत्यर्थः। अथ च—साक्षादस्मदादिरसनप्रत्यक्षग्रहणयोग्यसुधावत्त्वात्। दिवि स्थितस्तु चन्द्रो लाक्षणिक आनुमानिकः। तदीयसुधाया देवैकभोग्यत्वादस्मदाद्यप्रत्यक्षत्वात्। प्रत्यक्षानुमानयोर्मध्ये प्रत्यक्षस्यैव बलवत्त्वादित्यर्थः। अथ च—लाक्षणिको लक्षणावृत्तिवशात्सुधांशुपदेनाभिधेयो, न त्वभिधावृत्त्या। एत-

१ 'अत्र काव्यलिङ्गातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। 'अत्र छेकानुप्रासात्यन्तानुप्राससोत्प्रेक्षासंसृष्टिः' इति जीवातुः। २ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। ३ 'अत्रानुमानमलंकारः' इति साहित्यविद्याधरी। 'अत्र 'इयं श्रीः' इति विषयनिगरणेन विषयिमात्रनिर्देशान्द्भेदेऽप्यभेदात्त्वातिशयोक्तिः। एतन्मूला च पूर्वोक्त 'शृङ्गाररससद्भावोत्प्रेक्षा' इत्यनयोरङ्गाङ्गिभावेन संकरः' इति जीवातुः।

न्मुखं सुधांशुपदेनाभिधावृत्त्याभिधेयम् । चन्द्रस्तु शशाङ्कपदेनाभिधीयत इत्यनयोर्महदन्तरमिति भावः । एतद्द्योतनार्थं सुधांशुशशाङ्कपदे । तथा—एतद्भ्रुवौ मुख्यमनङ्गस्य कामस्य चापमभिधावृत्त्या । अथ च—मुखे भवं मुख्यम् । भ्रूरूपं कामचापं मुखे भवत्वान्मुख्यम् । यत् पुनः पुष्पमनङ्गचापत्वेन व्यवह्रियते तत्तयोर्भ्रुवोर्वक्रत्वोन्मादकत्वलक्षणो यो गुणः तन्मात्रस्य तदेकदेशभूतस्य उन्मादकत्वस्यैव वृत्त्या वर्तनेन । न तु तत्र वक्रत्वं वर्तते । ततश्चैकदेशसादृश्यलक्षणाद्गौणीनिमित्ताद्गौण्यैव वृत्त्यानङ्गचापत्वेन व्यवहर्तव्यम् । अथ च तत्पुष्पं पुनः दोरकमात्रे यद्वर्तनं तेन कामचापमित्युत्प्रेक्षते । मालात्मकस्य कामचापस्य कविभिरुक्तत्वात् । अतस्तस्यानङ्गचापत्वं सापेक्षम् । भ्रुवोस्तु निरपेक्षम् । 'भ्रुवौ' इति द्विवचनेनातंत्रत्वम्, चापमित्येकवचनेन समुदितयोश्चापत्वं न तु प्रत्येकमिति च सूचितम् । अथ च—गुणस्तन्तुः सौगन्ध्यादिर्वा । तन्मात्रस्य या वृत्तिस्तया पुष्पस्य गुणवत्त्वसद्भावाच्चापस्य गुणवत्त्वात्पुष्पं कामचापमित्युच्यत इत्यर्थः । अभिधावृत्तेर्लक्षणापेक्षयाभ्यर्हितत्वाद्गौण्यपेक्षया चाभ्यर्हिततरत्वान्मुख्यत्वम् । ततश्च 'गौणमुख्ययोर्मुख्ये कार्यसंप्रत्ययः' इति 'सापेक्षनिरपेक्षयोर्निरपेक्षं बलवत्' इति न्यायाद्भैमीमुखभ्रूयुगमेव मुख्यं चन्द्रानङ्गचापत्वाभिलापयोग्यम्, अतिसुन्दरं मदजनकं चेति भावः । 'तत्र मुख्यो व्यापारोऽस्याभिधोच्यते ।'अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यते । लक्ष्यमाणगुणैर्योगाद्वृत्तेरिष्टा तु गौणता ॥' इति अभिधानादीनां लक्षणम् । 'मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात् । अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया ॥' इति । लक्षणया लक्षणेन संसृष्ट इत्यर्थे 'संसृष्टे' इति ठक् । मुख्यम्, मुखमिव भवतीत्यर्थे 'शाखादिभ्यो यत्', पक्षे 'शरीरावयवाच्च' इति भवार्थे ॥

लक्ष्ये धृतं कुण्डलिके सुदत्या ताटङ्कयुग्मं स्मरधन्विने किम् ।
सव्यापसव्यं विशिखा विसृष्टास्तेनानयोर्यान्ति किमन्तरेव ॥ ११६ ॥

लक्ष्य इति ॥ सुदत्या भैम्या कर्णभूषणीभूतं ताटङ्कयुग्मं स्मरधन्विने कामधानुष्काय कुण्डलिके कुण्डलकारे लक्ष्ये कृत्वा धृतं किम् । तेन कामेन सव्यापसव्यं विसृष्टा मुक्ता विशिखा अनयोः कुण्डलिकयोरन्तरेव मध्य एव यान्ति किं वितर्के । भ्रूचापयोजिताः कटाक्षमार्गाः कर्णताटङ्ककुण्डलाभ्यन्तरेण निर्यान्तीति भावः । प्रवीणस्य धानुष्कस्य बाणा लक्ष्यमन्तरेव यान्ति । ताटङ्कयुग्मदर्शनमात्रेण कामोद्रेकादेवं संभाव्यत इति भावः । अन्तः, एव इति पदच्छेदः । सव्यापसव्यं यथाक्रमंविलिक्रियाविशेषणम् ॥

तनोत्यकीर्तिं कुसुमाशुगस्य सैषा वतेन्दीवरकर्णपूरी ।
यतः श्रवःकुण्डलिकापराद्धशरं खलः ख्यापयिता तमाभ्याम् ॥ ११७ ॥

तनोतीति ॥ सा एषा भैमी कुसुमाशुगस्य कामस्येन्दीवरयोर्नीलोत्पलयोः कर्णपूरं स्थानत्वादकीर्तिं तनोति । वत आश्चर्ये । खलो दुर्जनः पुरुष आभ्यां नीलोत्पलकर्णपूराभ्यां कृत्वा ।

---

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । 'अत्रोत्प्रेक्षातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी । २ 'लक्ष्यम्' इति प्रथमान्तः पाठः साहित्यविद्याधरीस्थः । ३ 'अत्र उत्प्रेक्षालंकारः' इति साहित्यविद्याधरी ।

श्रवसोः कर्णयोः कुण्डलिकारूपाल्लक्ष्यद्वयात् अपराद्धौ च्युतौ शरौ नीलोत्पले एव बाणौ यस्य तं कामं ख्यापयिता कथयिष्यति । कर्णद्वये नीलोत्पलद्वयं कर्णपूरीकृतं, कुण्डलिके लक्ष्ये । कामस्य च पुष्पाशुगत्वादिन्दीवरयोस्तद्बाणत्वं युक्तम् । धानुष्कस्य बाणाभ्यां लक्ष्यमन्तरा गन्तव्यम् । इन्दीवरलक्षणौ बाणौ कर्णयोरुपरि वर्तेते इति कामो लक्ष्याच्युतसायक इति खलो वदिष्यतीत्यपकीर्तिरूपौ जाताविलर्थः । कर्णपूरदर्शनान्मदनोद्रेको भवतीति भावः ॥

रजःपदं षट्पदकीटजुष्टं हित्वात्मनः पुष्पमयं पुराणम् ।
अधात्मभूराद्रियतां स भैम्या भ्रूयुग्ममन्तर्धृतमुष्टि चापम् ॥ ११८ ॥

रज इति ॥ स आत्मभूः कामो भैम्याः भ्रूयुग्ममेव अन्तः मध्ये आधेयत्वेन धृतो मुष्टिर्येन । मुष्टिना मध्ये धृतत्वाददृश्यमध्यम् । एवंभूतं चापमद्य आद्रियतां नूतनं धनुः करोतु । किं कृत्वा—पुष्पमयं पुराणं जीर्णमात्मनश्चापं हित्वा । यतः—रजःपदं परागस्थानं काष्ठचूर्णस्थानं च । तथा—षट्पदा एव कीटास्तैः सेवितं घुणादिकीटसेवितं च । पुष्पचापापेक्षया चास्याधिकसामर्थ्यान्नूतनत्वम् ॥

पद्मान्हिमे प्रावृषि खञ्जरीटान्क्षिप्नुर्यमादाय विधिः क्वचित्तान् ।
सारेण तेन प्रतिवर्षमुच्चैः पुष्णाति दृष्टिद्वयमेतदीयम् ॥ ११९ ॥

पद्मानिति ॥ विधिः ब्रह्मा पद्मेभ्यः, खञ्जरीटेभ्यः यं सारमादाय तान्प्रसिद्धान्नीलोत्पलादीन्हिमे शीतकाले, खञ्जरीटान्प्रावृषि वर्षाकाले क्वचिदनिरूपितस्थाने क्षिप्नुः क्षेपणशीलः सन् प्रतिवर्षं प्रतिसंवत्सरं तेन पद्मखञ्जनेभ्यो गृहीतेन सारेण एतदीयं दृष्टिद्वयमुच्चैरतितरां पुष्णाति वर्धयति । प्रतिवर्षं पद्मावभावान्नेत्रद्वये च शोभाधिक्यात्तदीयेनैव सारेण शोभावृद्धिरिति भावः । पद्मानित्यादौ 'न लोका–' इति षष्ठीनिषेधः । 'वा पुंसि पद्मं नलिनम्' इत्यमरः[3] ॥

एतादृशोरम्बुरुहैर्विशेषं भृङ्गौ जनः पृच्छतु तद्गुणज्ञौ ।
इतीव धाताकृत तारकालिस्त्रीपुंसमाध्यस्थ्यमिहाक्षियुग्मे ॥ १२० ॥

एतादृशोरिति ॥ धाता इतीव हेतोः, अमुमर्थं कथयन्निवेति वा, अनेन कारणेन वा, इहास्मिन्नेत्रयुगे तारके एवालिस्त्रीपुंसौ भ्रमरदंपती तयोः माध्यस्थ्यं मध्यभागवर्तित्वम् । अत्र च—साक्षित्वं अकृत । इति किम्—जनः एतादृशोर्भैमीनेत्रयोः अम्बुरुहैः पद्मैः विशेषं तारतम्यं तयोः पद्मनेत्रयोः गुणज्ञौ तारतम्यवेदिनौ भृङ्गौ भृङ्गी च भृङ्गश्च तौ कमलानि रमणीयानि, भैमीनेत्रे वा इति पृच्छतु । मध्यस्थो हि संशयं छिनत्ति । कमलानि परैस्त्यज्यालिजायापत्योरत्रागमान्नेत्रयोरेव रमणीयत्वं ताभ्यां कथितम् । भैमीदृशौ कमलादधिके अतिनीलकनीनिके चेति भावः । भृङ्गाविति 'पुमान्स्त्रिया' । पृच्छिर्द्विकर्मा । स्त्रीपुंसौ इति, 'अचतुर–' इति साधु ॥

---

१ 'अत्र रूपहेत्वलंकारः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिरलंकारः' विद्याधरी । ३ 'अत्रातिशयोक्त्यलंकारः' इति
इति साहित्यविद्याधरी ।

श्रवसोः कर्णयोः कुण्डलिकारूपाल्लक्ष्यद्वयात् अपराद्धौ च्युतौ शरौ नीलोत्पले एव बाणौ .. कामं ख्यापयिता कथयिष्यति । कर्णद्वये नीलोत्पलद्वयं कर्णपूरीकृतं, कुण्डलिके लक्ष्ये । च पुष्पाशुगत्वादिन्दीवरयोस्तद्बाणत्वं युक्तम् । धानुष्कस्य बाणाभ्यां लक्ष्यमन्तरा गन्तव्यम् इन्दीवरलक्षणौ बाणौ कर्णयोरुपरि वर्तेते इति कामो लक्ष्याच्च्युतसायक इति खलो व ल्पकीर्तिरूपौ जाताविलर्थः । कर्णपूरदर्शनान्मदनोद्रेको भवतीति भावः ॥

रजःपदं षट्पदकीटजुष्टं हित्वात्मनः पुष्पमयं पुराणम् ।
अधात्मभूराद्रियतां स भैम्या भ्रूयुग्ममन्तर्धृतमुष्टि चापम् ॥ ११८ ॥

रज इति ॥ स आत्मभूः कामो भैम्याः भ्रूयुग्ममेव अन्तः मध्ये आधेयत्वेन मुष्टिर्येन । मुष्टिना मध्ये धृतत्वाददृश्यमध्यम् । एवंभूतं चापमद्य आद्रियतां नूतनं करोतु । किं कृत्वा—पुष्पमयं पुराणं जीर्णमात्मनश्चापं हित्वा । यतः—रजःपदं पराग स्थानं काष्ठचूर्णस्थानं च । तथा—षट्पदा एव कीटास्तैः सेवितं घुणादिकीटसेवितं च । पुष्पचापापेक्षया चास्याधिकसामर्थ्यान्नूतनत्वम् ॥

पद्मान्हिमे प्रावृषि खञ्जरीटान्क्षिमुर्यमादाय विधिः क्वचित्तान् ।
सारेण तेन प्रतिवर्षमुच्चैः पुष्णाति दृष्टिद्वयमेतदीयम् ॥ ११९ ॥

पद्मानिति ॥ विधिः ब्रह्मा पद्मेभ्यः, खञ्जरीटेभ्यः यं सारमादाय तान्प्रसिद्धान्नीलोत्पलादीन्हिमे शीतकाले, खञ्जरीटान्प्रावृषि वर्षाकाले क्वचिदनिरूपितस्थाने क्षिमुः क्षेपणशीलः सन् प्रतिवर्षं प्रतिसंवत्सरं तेन पद्मखञ्जनेभ्यो गृहीतेन सारेण एतदीयं दृष्टिद्वयमुच्चैरतितरां पुष्णाति वर्धयति । प्रतिवर्षं पद्माद्यभावान्नेत्रद्वये च शोभाधिक्यात्तदीयेनैव सारेण शोभावृद्धिरिति भावः । पद्मानित्यादौ 'न लोका—' इति षष्ठीनिषेधः । 'वा पुंसि पद्मं नलिनम्' इत्यमरः ॥

एतादृशोरम्बुरुहैर्विशेषं भृङ्गौ जनः पृच्छतु तद्गुणज्ञौ ।
इतीव धाताकृत तारकालिस्त्रीपुंसमाध्यस्थ्यमिहाक्षियुग्मे ॥ १२० ॥

एतादृशोरिति ॥ धाता इतीव हेतोः, अमुमर्थं कथयन्निवेति वा, अनेन कारणेन वा, इहास्मिन्नेत्रयुगे तारके एवालिस्त्रीपुंसौ भ्रमरदंपती तयोः माध्यस्थ्यं मध्यभागवर्तित्वम् । अथ च—साक्षित्वं अकृत । इति किम्—जनः एतादृशोर्भैमीनेत्रयोः अम्बुरुहैः पद्मैः विशेषं तारतम्यं तयोः पद्मनेत्रयोः गुणज्ञौ तारतम्यवेदिनौ भृङ्गौ भृङ्गी च भृङ्गश्च तौ कमलानि रमणीयानि, भैमीनेत्रे वा इति पृच्छतु । मध्यस्थो हि संशयं छिनत्ति । कमलानि परित्यज्यालिजायापत्योरन्यागमान्नेत्रयोरेव रमणीयत्वं ताभ्यां कथितम् । भैमीदृशौ कमलादधिके अतिनीलकनीनिके चेति भावः । भृङ्गाविति 'पुमान्स्त्रिया' । पृच्छिर्द्विकर्मा । स्त्रीपुंसौ इति, 'अचतुर—' इति साधु ॥

---

१ 'अत्र रूपहेत्वलंकारः' इति साहित्यविद्याधरी । २ 'अत्रातिशयोक्तिरलंकारः' इति विद्याधरी । ३ 'अत्रातिशयोक्त्यलंकारः' इति साहित्यविद्याधरी । ४ 'अत्रोत्प्रेक्षारूपकालंकारः' इति साहित्यविद्याधरी ।

निजामृतोद्यन्नवनीतजाङ्गीमेतां क्रमोन्मीलितपीतिमानम् ।
कृत्वेन्दुरस्या मुखमात्मनाभून्निद्रालुना दुर्घटमम्बुजेन ॥ १२८ ॥

निजेति ॥ इन्दुः एतां कृत्वा नवनीतेन एनां निर्माय आत्मना स्वेनैव रूपेणास्या मुखमभूत् । किंभूतामेनाम्—निजामृतात्स्वीयामृतात् उद्यत्समुत्पन्नं तत्सारभूतं नवनीतं तस्माज्जातं अङ्गं यस्यास्ताम् । अतएव दिनवृद्धिक्रमेणोन्मीलितः प्रकटीकृतः पीतिमा गौरत्वं यस्यां ताम् । नवनीते हि क्रमेण पीतिमा भवति । तन्निर्मितत्वाच्चास्या अपि पीतत्वं जातम् । यावद्यावत्तारुण्यं तावदस्यामधिकं गौरत्वं दृश्यत इत्यर्थः । यतः—चन्द्रकिरणसंबन्धान्निद्रालुना संकोचशीलेनाम्बुजेन कमलेन दुर्घटं दुष्करम् । कमलेन निर्माणे सर्वावयवानां चन्द्रकिरणैरेव निर्मितत्वात्तत्संबन्धात्कमलं संकुचेदेव । अथ च—रात्रौ सर्वदा कमलसंकोचात्स्वेनैव वदनाकारेण जातम् । चन्द्र एवास्या निर्मातेत्यर्थः । अतिसुकुमारा अतिगौरी, चन्द्रवदना चेयमिति भावः ॥

अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन ।
अमूनि सूनैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ॥ १२९ ॥

अस्या इति ॥ स प्रसिद्धो मधुरेव वसन्त एवास्याः कारुः शिल्पी चारुर्योग्यो नान्यः । यतः—सः अस्याः श्वासं मलयानिलेन वितेने निर्ममे । तथा—अमूनि मलयजदन्दाम्पातिमृदून्यङ्गकानि कृत्वाम्यङ्गानि चम्पकादिपुष्पैः विदधे निर्ममे । वाचं पिकस्य पञ्चमस्वरेण चकार । एतत्सर्वं वसन्ताधीनमेवेति तेनैवेयं निर्मिता । सुगन्धिश्वासा पुष्पवन्मृद्वङ्गी कोकिलालापा चेति भावः। 'षड्जं मयूरो वदति स चेन्मत्तस्तु पञ्चमम् । पुष्पसाधारणे काले पिकः कूजति पञ्चमम्' ॥

कृतिः स्मरस्यैव न धातुरेषा नास्या हि शिल्पीतरकारुजेयः ।
रूपस्य शिल्पे वयसाऽपि वेधा निर्जीयते स स्मरकिङ्करेण ॥ १३० ॥

कृतिरिति ॥ एषा स्मरस्यैव कृतिर्निर्माणं, न धातुः । हि यस्मात् (द)स्याः शिल्पी इतरकारुनिर्जेयो न । यतः—वेधाः रूपस्य शिल्पे निर्माणविषये स्मरस्य किङ्करेण वयसा कन्दर्पोद्दीपकेन तारुण्येन नितरां जीयते । तारुण्यापेक्षया तारुण्ये रूपसौन्दर्याधिक्यात्मदर्शनेन जीयत इति किं वाच्यमित्यर्थः । तस्मात्मदनस्यैव कृतिः, तारुण्येन कामदर्शनानिरन्तरेण च कृतेयमिति भावः ॥

गुरोरपीमां भणतोऽष्ठकण्ठं निरुक्तिगर्वच्छिदया विनेतुम् ।
ध्रुवः स्मरस्यैव भवं विहाय मुक्तिं गतानामनुतापनाय ॥ १३१ ॥

गुरोरिति ॥ इमां भैमीं भणतः वर्णयतः बृहस्पतेरपि ओष्ठकण्ठं अतिशैत्यव्याकुलत्वात्निरुक्तिसामर्थ्यात्तद्वस्तुनिर्वचनं कर्तुमहमेव कुशलं न त्वन्य इति निरुक्तौ निर्वचनविषये गर्वस्य छिदया निराकरणेन कृत्वा विनेतुं विनीतं कर्तुं अथ च इति तथा निर्वचनं न शक्यमिति शिक्षयितुं निर्मातुर्निर्माणकरः स्मरस्यैव धर्मो न विध्यादेः । तथा—भवं संसारं त्यक्त्वा मुक्तिं गतानां पुरुषाणामनुतापनाय स्मरस्यैव धर्मः भैमीनिर्माणस्य कारणं एव मोक्षः, एवं सति

---

१ 'अलोकसौन्दर्यलिलंकार' इति साहित्यविद्याधरी । २ 'धातुः', 'कुमे' इति च पाठः । ३ 'अस्य स्वयं कन्दर्पस्योत्कर्षलकारः' इति साहित्यविद्याधरी । ४ अतस्तस्यैव स्मरस्य संतोषिकालंकारः' इति साहित्यविद्याधरी ।

जागर्तीति ॥ अस्याः तुलार्थं साहश्यार्थं योग्या समुचिता मर्त्येषु मर्त्यलोकेषु त्यर्थे नोऽस्माकं राज्ञां योग्यायाः सत्या अनुपलम्भनमनुपलब्धिरेव प्रमाणम्। यदि विद्येत तर्ह्युपलभ्येत, नोपलभ्यते तस्मान्मर्त्यलोके नास्तीति वाच्यमिति भावः। तर्हि पाताले वा भवेदित्यत आह—यदि नाके, अथवा अधोभुवने पाताले एतत्सदृशी अस्ति, कुतः कुत आगतः कौतस्कुतः तस्य सर्वतः समागतस्य लोकस्य स्वर्गपातालालोकान्त समागतस्य देवनागलोकस्य बाधोऽतिसंमर्दो न स्यात्। जातश्च संमर्दः तस्माल्लोकत्रये दृशी नास्ति। अन्यथा देवा नागाश्च नात्रागच्छेयुरिति भावः। कुतः कुत आगत इत्यर्थे आगतः' इत्यणि कस्कादित्वात्सः। 'ततस्तत–' इति पाठे ततस्तत आगत इत्यर्थे तेनैवाणि

नमः करेभ्योऽस्तु विधेर्न वास्तु स्पृष्टं धियाप्यस्य न किं पुनस्तैः।
स्पर्शादिदं स्याल्लुलितं हि शिल्पं मनोभुवोऽनङ्गतयानुरूपम्॥ १२५॥

नम इति ॥ विधेः करेभ्यो नमः अस्तु, वा अथवा न अस्तु। कुतः—अस्य विधेः धिया बुद्ध्या अपि ईदृशं शिल्पं न स्पृष्टं तैः हस्तैः न स्पृष्टमिति किं पुनर्वाच्यम्। श्रोत्रिय त्वादीदृशशिल्पनिर्माणे स्फूर्तिरेव नाभूत् किमिति हस्तैः स्पृशेत्। अथ च—निरवयवया बुद्ध्या यन्न स्पृष्टं तत् सावयवैर्हस्तैः कथं स्पृश्येतेत्यर्थः। तैर्न स्पृष्टमित्यत्र हेतुः-हि यस्मादि दमतिमृदु शिल्पं हस्तस्पर्शाल्लुलितमतिघृष्टं स्यात्। तर्हि केन निर्मितमित्यत्राह-इदं शिल्प मनङ्गतया निरवयवतया मनोभुवः कामस्यानुरूपम्। काम एवास्य कर्ता न विधिः तस्मा त्कामायैव नमोऽस्त्वित्यर्थः॥

इमां न मृद्वीमसृजत्कराभ्यां वेधा कुशाध्यासनकर्कशाभ्याम्।
शृङ्गारधारां मनसा न शान्तिविश्रान्तिधन्वाध्वमहीरुहेण॥ १२६॥

इमामिति ॥ वेधा मृद्वीमिमां कराभ्यां नासृजत्। यतः—कुशाध्यासनेन दर्भधार णेन कर्कशाभ्याम्। तर्हीयं मानसी स्यात्तत्राह—शृङ्गारधारां शृङ्गारनदीप्रणालिकां नद सापि नासृजत्। यतः—शान्तिरसस्य विश्रान्त्यै धन्वाध्वा मरुदेशमार्गः तत्र महीरु हेण वृक्षरूपेण। अतिनीरसेनातिकठिनेनेत्यर्थः। अतिकठिनेनातिमृद्वी शृङ्गाररसरूपा न निर्मातुमशक्येत्यर्थः॥

उल्लास्य धातुस्तुलिता करेण श्रोणौ किमेषा स्तनयोर्गुरुर्वा।
तेनान्तरालैस्त्रिभिरङ्गुलीनामुदीतमध्यत्रिवलीविलासा॥ १२७॥

उल्लास्येति ॥ एषा श्रोणौ नितम्बदेशे गुरुः स्तनयोर्वा गुरुरिति गुरुलतारतम्यज्ञा नार्थं धातुः करेण उल्लास्योत्क्षिप्य तुलिता किमिति तर्कः। श्रोणौ किं गुरुः स्तनयोर्वा किं गुरुरिति वा। तेनैव हेतुना चतसृणामङ्गुलीनां त्रिभिरन्तरालैरवकाशैः कृत्वा उदितो मध्य देशे त्रिवलीविलासो यस्याः सा। उदीतमध्यत्रिवलीविलासा किमिति वा किंशब्दो योज्यः। गुरुश्रोणी गुरुस्तनी चेयमिति भावः॥

---

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। 'उपमानलोपाल्लुप्तोपमालंकारः' इति जीवातुः। २ 'अत्र संबन्धेऽप्यसंबन्धरूपातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। 'अतिशयो क्तिसापेक्षा चेयमनङ्गत्वहेतुत्वोत्प्रेक्षेति संकरः' इति जीवातुः। ३ 'अत्र विरोधाविशयोक्तिरलंकारः' इति साहित्यविद्याधरी। ४ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी।

निजामृतोद्यन्नवनीतजाङ्गीमेतां क्रमोन्मीलितपीतिमानम् ।
कृत्वेन्दुरस्या मुखमात्मनाभून्निद्रालुना दुर्घटमम्बुजेन ॥ १२८ ॥

निजेति ॥ इन्दुः एतां कृत्वा नवनीतेन एनां निर्माय आत्मना स्वेनैव रूपेणास्या मुखमभूत् । किंभूतामेनाम्—निजामृतात्स्वीयामृतात् उद्यत्समुत्पन्नं तक्रसारभूतं नवनीतं तस्माज्जातं अङ्गं यस्यास्ताम् । अतएव दिनवृद्धिक्रमेणोन्मीलितः प्रकटीकृतः पीतिमा गौरत्वं यस्यां ताम् । नवनीते हि क्रमेण पीतिमा भवति । तन्निर्मितत्वादत्रापि पीतत्वं जातम् । यावद्यावत्तारुण्यं तावदस्या अधिकं गौरत्वं दृश्यत इत्यर्थः । यतः—चन्द्रकिरणसंबन्धान्निद्रालुना संकोचशीलेनाम्बुजेन कमलेन दुर्घटं दुष्करम् । कमलेन निर्माणे सर्वावयवानां चन्द्रकिरणैरेव निर्मितत्वात्तत्संबन्धात्कमलं संकुचेदेव । अथ च—रात्रौ सर्वदा कमलसंकोचात्स्वेनैव वदनाकारेण जातम् । चन्द्र एवास्या निर्मातेत्यर्थः । अतिसुकुमारा अतिगौरी, चन्द्रवदना चेयमिति भावः ॥

अस्याः स चारुर्मधुरेव कारुः श्वासं वितेने मलयानिलेन ।
अमूनि सूनैर्विदधेऽङ्गकानि चकार वाचं पिकपञ्चमेन ॥ १२९ ॥

अस्या इति ॥ स प्रसिद्धो मधुरेव वसन्त एवास्याः कारुः शिल्पी चारुर्योग्यो नान्यः । यतः—सः अस्याः श्वासं मलयानिलेन वितेने निर्ममे । तथा—अमूनि प्रत्यक्षदृश्यमानानि अङ्गकानि हस्ताद्यङ्गानि चम्पकादिपुष्पैः विदधे निर्ममे । वाचं पिकस्य पञ्चमस्वरेण चकार । एतत्सर्वं वसन्ताधीनमेवेति तेनैवेयं निर्मिता । सुगन्धिश्वासा पुष्पवन्मृद्वङ्गी कोकिलालापा चेति भावः । 'षड्जं मयूरो वदति स चेन्मत्तस्तु पञ्चमम् । पुष्पसाधारणे काले पिकः कूजति पञ्चमम् ॥'

कृतिः स्मरस्यैव न धातुरेषा नास्या हि शिल्पीतरकारुजेयः ।
रूपस्य शिल्पे वयसाऽपि वेधा निर्जीयते स स्मरकिङ्करेण ॥ १३० ॥

कृतिरिति ॥ एषा स्मरस्यैव कृतिर्निर्माणं, न धातुः । हि यस्माद(द)स्याः शिल्पी इतरकारुजेयो न । यतः—वेधाः रूपस्य शिल्पे निर्माणविषये स्मरस्य किङ्करेण वयसा कामोद्दीपकेन तारुण्येन नितरां जीयते । बाल्यापेक्षया तारुण्ये रामणीयकस्याधिक्यादन्यदेन जीयत इति किं वाच्यमित्यर्थः । तस्मात्स्मरस्यैव कृतिः, तारुण्येन समदनातिरमणीया च जातेयमिति भावः ॥

गुरोरपीमां भणदोष्ठकण्ठं निरुक्तिगर्वच्छिदया विनेतुम् ।
धनः स्मरस्यैव भवं विहाय मुक्तिं गतानामनुतापनाय ॥ १३१ ॥

गुरोरिति ॥ इमां भैमीं भणदुच्चैर्धनुर्हस्तस्तरुणि ओष्ठकण्ठं अतिसौन्दर्यादुर्णयितुमशक्य-त्वाद्वस्तुनिर्वचनं कर्तुमशक्यमेव कुशलं न स्यादिति निरुक्तौ निर्वचनविषये गर्वस्य छिदया निराकरणेन कृत्वा विनेतुं विनीतं कर्तुं अशक्यति यथा निर्वचनं न कर्तुमिति शिक्षयितुं भैमीनिर्माणकर्ता स्मरस्यैव धनो न विध्यादेः । तथा—भवं नितरां संसारं त्यक्त्वा मुक्तिं गतानां पुरुषाणामनुतापनाय स्मरस्यैव धनः भैमीरूपस्य एव भोक्तुं, [illegible]

१ 'अन्यजितोत्सितसंस्कार' इति साहित्यविद्याधरी । २ 'चम्पकैः', 'पुष्पैः' इति च पाठः । ३ 'अस्पन्दनपे तत्स्मारितोज्जितसंस्कार' इति साहित्यविद्याधरी । ४ [illegible] सिंहसंस्कार' इति साहित्यविद्याधरी ।

त्यक्त्वा किमिति मुक्ता जाता इति तेषां पश्चात्तापः। अतिसौन्दर्याद्वाचस्पतेरपि वागगोचर अन्येनापि समर्थेन सगर्वस्य गर्वशातनं क्रियते। ओष्ठकण्ठम्, प्राप्यङ्गत्वादेकवद्भावः॥

आख्यातुमक्षित्रजसर्वपीतां भैमीं तदेकाङ्गनिखातदृक्षु।
गाथासुधाश्लेषकलाविलासैरलंचकाराननचन्द्रमिन्द्रः॥ १३२॥

आख्यातुमिति॥ इन्द्रस्तस्या एकाङ्गे एकैकस्मिन्नवयवे निखाता समारोपिता दृग्‌ दृ यैस्तेषु राजसु मध्ये अक्षित्रजैः सर्वाङ्गेषु पीतां दृष्टां नेत्रसहस्रेण दृष्टसर्वावयवां भैमीमाख्‌ वर्णयितुं गाथा श्लोक एव सुधा तस्या आश्लेषाख्याः कला अलंकारविद्यास्तासां विलासैः श्ले लंकारयुक्तश्लोकनिर्माणकौशलैः। अथ च—गाथारूपायाः सुधाया आ सामस्त्येन यः श्ले संबन्धस्तेन पञ्चदशकलाविलासैः सुधासंबन्धस्य कलानां च विलासैर्वा आननचन्द्रमलंचका वक्ष्यमाणप्रकारेण श्लेषेण वर्णयामासेत्यर्थः॥

स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा।
हेमेव कायप्रभयाङ्गशेषैस्तन्वी मतिं क्रामति मे न कापि॥ १३३॥

स्मितेनेति॥ इयं भैमी स्मितेन कृत्वा गौरी अप्सरोविशेषः पार्वती वा, तथा—दृ हरिणी कुरङ्गी देवाङ्गना च, तथा—सुस्वरकण्ठभासातिमधुरस्वरकण्ठश्रिया वीणावती दे ङ्गना वीणायुक्ता च, तथा—कायप्रभयाङ्गकान्त्या हेमा देवाङ्गना सुवर्णं च, तथा—अङ्गाना वयवानां शेषैर्भागैः। शिष्टैरवयवैरित्यर्थः। तैः कृत्वा नेनकापि तन्वी सुन्दरी मतिं क्रामति बुद्धिस्था भवतीत्यर्थः। कापि तन्वी मे मतिं न क्रामति। बुद्धिस्था न भवतीत्यर्थः। केनचि दंशेन कासांचित्साम्यम्, न तु सर्वथेति सर्वाभ्योऽप्यप्सरोभ्यः सकाशादियं रमणीयतर निरुपमेयमिति भावः॥

इति स्तुवानः सविधे नलेन विलोकितः शङ्कितमानसेन।
व्याकृत्य मर्त्योचितमर्थमुक्तेराखण्डलस्तस्य नुनोद शङ्काम्॥ १३४॥

इतीति॥ आखण्डल इन्द्रः तस्य नलस्य समीपे इति एवं गौर्याद्यप्सरस्त्वेन भैमीं स्तुवा वर्णयन् नूनमयं भैमीमप्सरस्त्वेन वर्णयति चेन्मदीयं रूपं गृहीत्वा भैमीप्रार्थनार्थमागत इन्द्रोऽ मिति शङ्कितमानसेन नलेन विलोकितः सन् तस्य नलस्य इन्द्रोऽयमितीमां शङ्कां नुनोद स्फो यामास। किं कृत्वा—उक्तेर्गौर्याद्यप्सरःप्रतिपादिकाया अर्थं मर्त्योचितं मनुष्ययोग्यं 'स्मितेन धवला' इत्यादिरूपमर्थं व्याकृत्य व्याख्याय। ममैवान्यथाबुद्धिर्जाता, न त्वयमिन्द्रः, किं कश्चन राजा इति तस्येन्द्रत्वशङ्कां दूरीकृतवानिति भावः॥

स्वं नैषधादेशमहो विधाय कार्यस्य हेतोरपि नानलः सन्।
किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः॥ १३५॥

स्वमिति॥ अहो आश्चर्ये विषादे वा। स इन्द्रः भैमीप्राप्तिलक्षणस्य कार्यस्य हेतोः स्वं आनं नैषधादेशं नैषधरूप आदेशो यस्य एवंविधं कृत्वा अनलो नलव्यतिरिक्तो न सन्। अपि तु नल एव भवन्। अथ च—नलो ना मनुष्यो भवन्नपि स्थानिवदिन्द्रवद् दुष्टं भावमाधत्त

---

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्र श्लेषातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। 'अत्रैकस्या भैम्या गौरीत्यादिरूपेणोल्लेखनादुल्लेखालंकारः स च श्लेषप्रतिभोत्थापित इति संकर' इति जीवातुः।

किं किमर्थमधत्त धृतवान्। कुतोऽवगतमित्यत आह—यतः स इन्द्रः पुनः पश्चान्नलशङ्कानन्तरं तादृक् मर्त्योचितं कृतं व्याकरणं व्याख्यानं येन सः। इन्द्रस्वरूपत्वे दुष्टाशयत्वं युक्तं सर्वदा तस्य प्रतारकस्वभावत्वात्। नलस्वरूपे धृतेऽपि यत्स्वीयं दुष्टाशयत्वमधत्त तदनुचितम्। नलस्यादुष्टाशयत्वात्तत्स्वरूपे धृतेऽदुष्टाशयत्वस्यैवाङ्गीकर्तुं युक्तत्वादित्यर्थः। नलरूपधारणेनान्यथा-व्याख्यानेन च नलं वृथैव प्रतारितवानिति भावः। अथ च—सन् विद्वान् एव तादृक्कृतव्याकरणशास्त्रोऽपि स शक्रः स्वं निजकर्तृकं धादेशं 'नहो धः' इत्येवमादिनादेशं विधाय न अल् अनल्, न विद्यतेऽनल् यस्मिन्कार्ये तन्नानल् तस्य। अल्संबन्धिन इत्यर्थः। कार्यस्य कृते दुष्टं स्थानिवद्भावं किं नाधत्त। अपितु चकार। 'स्थानिवदादेशोऽनल्विधौ' इत्यलाश्रितकार्ये स्थानिवद्भावो निषिद्धः। तेन 'पयिसम्पृमुक्षानात्' इत्यात्वे कृते आकारगतस्थानिवद्भावागतं हल्त्वमाश्रित्य 'हल्ङ्याब्भ्यः—' इति सुलोपो न भवति। विद्वानिन्द्रस्तु तत्रापि स्थानिवद्भावं व्यधत्तेत्याश्चर्यम्। अथ च—स इन्द्रो दुष्टं स्थानिवद्भावमादेशित्वं किमधत्त देवत्वं विहाय मनुष्यत्वं किमिति कृतवान्। कीदृशः—ना पुरुषः। तादृक् अपूर्वं कृतं विशिष्टमाकरणमाकारो येन सः। इन्द्रमूर्तिरेव नलरूपेण परिणतेत्यर्थः। किं कृत्वा—स्वमात्मानं नैषधादेशं कृत्वा। दमयन्तीप्राप्तिलक्षणकार्यस्य हेतोः प्रयोजने सत्यप्ययुक्तं न कर्तव्यमिति भावः। कीदृशः सन् —नलः अनलः सन्। देवत्वं त्यक्त्वा मनुष्याकारादाश्चर्यम्। सर्वे देवताय यतन्त इत्यादि यथाज्ञानं ज्ञातव्यम्॥

इयमियमधिरथ्यं याति नेपथ्यमञ्जुर्विशतिविशति वेदीमुर्वशी सेयमुर्व्याः।
इति जनजनितैः सानन्दनादैर्विजघ्ने नलहृदि परभैमीवर्णनाकर्णनार्तिः १३६

इयमिति॥ जनजनितैः लोककृतैरिति सानन्दैर्नादैः कर्तृभिः नलहृदि नलान्तःकरणे वर्तमाना परा श्रेष्ठा परैः कृता वा या भैमीवर्णना तस्या आकर्णनेन श्रवणेन या आर्तिः प्राप्तिः सा विजघ्ने विघ्निता। इति किम्—नेपथ्यमञ्जुः अलंकाररुचिरा इयमियमधिरथ्यं रथ्यायां याति गच्छति। सेयमतिप्रसिद्धा उर्व्याः उर्वशी देवाङ्गना इवातिसुन्दरी वेदीं स्वयंवरभूमिं विशतिविशति। आनन्दयुक्तैर्नादैः सा परभैमीवर्णनाकर्णनाप्तिरिति वा। भैमीदर्शनविषये ससंभ्रमं लोकं दृष्ट्वा स्वयमपि ससंभ्रमो भूत्वा भैमीस्तुतिं नाश्रौषीदिति भावः। नलहृदीत्यनेनाकर्णितमपि हृदयस्यान्यत्र गतत्वादनाकर्णितप्रायमेवेति सूचितम्। इयमियमित्यादौ संभ्रमाद्द्विरुक्तिः॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
तर्केष्वप्यसमश्रमस्य दशमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥ १३७॥

श्रीहर्षमिति॥ न केवलं काव्यनिर्माण एव कुशलः, किं तु तर्कशास्त्रेऽप्यनन्यसमः श्रमाभ्यासो यस्य॥

इति श्रीवेदरकरोपनामकश्रीमन्नृसिंहपण्डितात्मजनारायणकृते
नैषधीयप्रकाशे दशमः सर्गः॥

त्यक्त्वा किमिति मुक्ता जाता इति तेषां पश्चात्तापः। अतिसौन्दर्याद्वाचस्पतेरपि वागगोचरः। अन्येनापि समर्थेन सगर्वस्य गर्वशातनं क्रियते। ओष्ठकण्ठम्, प्राप्यङ्गत्वादेकवद्भावः॥

आख्यातुमक्षित्रजसर्वपीतां भैमीं तदेकाङ्गनिखातदृक्षु।
गाथासुधाश्लेषकलाविलासैरलंचकाराननचन्द्रमिन्द्रः॥ १३२॥

आख्यातुमिति॥ इन्द्रस्तस्या एकाङ्गे एकैकस्मिन्नवयवे निखाता समारोपिता दृक् यैस्तेषु राजसु मध्ये अक्षित्रजैः सर्वाङ्गेषु पीतां दृष्टां नेत्रसहस्रेण दृष्टसर्वावयवां भैमीमाख्यातुं वर्णयितुं गाथा श्लोक एव सुधा तस्या आश्लेषाख्याः कला अलंकारविद्यास्तासां विलासैः श्लेषालंकारयुक्तश्लोकनिर्माणकौशलैः। अथ च—गाथारूपायाः सुधाया आ सामस्त्येन यः श्लेषः संबन्धस्तेन पञ्चदशकलाविलासैः सुधासंबन्धस्य कलानां च विलासैर्वा आननचन्द्रमलंचकार। वक्ष्यमाणप्रकारेण श्लेषेण वर्णयामासेत्यर्थः॥

स्मितेन गौरी हरिणी दृशेयं वीणावती सुस्वरकण्ठभासा।
हेमेव कायप्रभयाङ्गशेषैस्तन्वी मतिं क्रामति मे न कापि॥ १३३॥

स्मितेनेति॥ इयं भैमी स्मितेन कृत्वा गौरी अप्सरोविशेषः पार्वती वा, तथा—दृशा हरिणी कुरङ्गी देवाङ्गना च, तथा—सुस्वरकण्ठभासातिमधुरस्वरकण्ठश्रिया वीणावती देवाङ्गना वीणायुक्ता च, तथा—कायप्रभयाङ्गकान्त्या हेमा देवाङ्गना सुवर्णं च, तथा—अङ्गानामवयवानां शेषैर्भागैः। शिष्टैरवयवैरित्यर्थः। तैः कृत्वा मेनकापि तन्वी सुन्दरी मतिं क्रामति। बुद्धिस्था भवतीत्यर्थः। कापि तन्वी मे मतिं न क्रामति। बुद्धिस्था न भवतीत्यर्थः। केनचिदंशेन कासांचित्साम्यम्, न तु सर्वथेति सर्वाभ्योऽप्यप्सरोभ्यः सकाशादियं रमणीयतरा, निरुपमेयमिति भावः॥

इति स्तुवानः सविधे नलेन विलोकितः शङ्कितमानसेन।
व्याकृत्य मर्त्योचितमर्थमुक्तेराखण्डलस्तस्य नुनोद शङ्काम्॥ १३४॥

इतीति॥ आखण्डल इन्द्रः तस्य नलस्य समीपे इति एवं गौर्याद्यप्सरस्त्वेन भैमीं स्तुवन् वर्णयन् नूनमयं भैमीमप्सरस्त्वेन वर्णयति चेन्मदीयं रूपं गृहीत्वा भैमीप्राप्त्यर्थमागत इन्द्रोऽयमिति शङ्कितमानसेन नलेन विलोकितः सन् तस्य नलस्य इन्द्रोऽयमितीमां शङ्कां नुनोद स्फोटयामास। किं कृत्वा—उक्तेर्गौर्याद्यप्सरःप्रतिपादिकाया अर्थं मर्त्योचितं मनुष्ययोग्यं 'स्मितेन धवला' इत्यादिरूपमर्थं व्याकृत्य व्याख्याय। ममैवान्यथाबुद्धिर्जाता, न त्वयमिन्द्रः, किंतु कश्चन राजा इति तस्येन्द्रत्वशङ्कां दूरीकृतवानिति भावः॥

स्वं नैषधादेशमहो विधाय कार्यस्य हेतोरपि नानलः सन्।
किं स्थानिवद्भावमधत्त दुष्टं तादृक्कृतव्याकरणः पुनः सः॥ १३५॥

स्वमिति॥ अहो आश्चर्ये विषादे वा। स इन्द्रः भैमीप्राप्तिलक्षणस्य कार्यस्य हेतोः स्वात्मानं नैषधादेशं नैषधरूप आदेशो यस्य एवंविधं कृत्वा अनलो नलव्यतिरिक्तो न सन्। अपि तु नल एव भवन्। अथ च—नलो ना मनुष्यो भवन्नपि स्थानिवदिन्द्रवद् दुष्टं भावमधत्त

---

१ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। २ 'अत्र हेत्वतिशयोक्तिरलंकारः' इति साहित्यविद्याधरी। 'अत्र कला मेनका गौरीत्यादिरूपं गोठेलनाड्डेरालंकारः न न हेत्वतिशयोक्ति इति संकर' इति जीवातुः।

किं किमर्थमवत्त धृतवान् । कुतोऽवगतमित्यत आह—यतः स इन्द्रः पुनः पश्चान्नलरूपानन्तरं तादृक् नलोचितं कृतं व्याकरणं व्याख्यानं येन सः । इन्द्रस्वरूपत्वे दुष्टाशयत्वं युक्तं सर्वदा तस्य प्रतारकस्वभावत्वात् । नलरूपे धृतेऽपि यत्कीयं दुष्टाशयत्वमधत्त तदनुचितम् । नलस्यादुष्टाशयत्वात्तत्स्वरूपे धृतेऽदुष्टाशयत्वस्यैवानुकर्तुं युक्तत्वादित्यर्थः । नलरूपधारणेनान्यथाव्याख्यानेन च नलं धृत्वैव प्रतारितवानिति भावः । अथ च—सन् विद्वान् एव तादृक् तत्कृतव्याकरणशास्त्रोऽपि स शक्रः स्वं निजकर्तृकं षादेशं 'नहो धः' इत्येवमादिनादेशं विधाय न अल् अनल्, न विद्यतेऽनल् यस्मिन्नर्थे तथानल् तस्य । अल्संबन्धिन इत्यर्थः । षादेशस्य कृते दुष्टं स्थानिवद्भावं किं नाधत्त । अपितु चकार । 'स्थानिवदादेशोऽनल्विधौ' इत्यत्राश्रितकार्ये स्थानिवद्भावो निषिद्धः । तेन 'पथिमथ्यृभुक्षामात्' इत्यात्वे कृते आकारस्थानिकत्वात्तदन्तं हल्त्वनाश्रित्य 'हल्ङ्याब्भ्यः—' इति सुलोपो न भवति । विद्वानिन्द्रस्तु तत्रापि स्थानिवद्भावं व्यधत्तेत्यर्थः । अथ च—स इन्द्रो दुष्टं स्थानिवद्भावमनादिदिव्यं किमधत्त देवत्वं विहाय मनुष्यत्वं किमिति कृतवान् । कीदृशः—ना पुरुषः । तादृक् अपूर्वं कृतं [illegible] येन सः । इन्द्रमूर्तिरेव नलरूपेण परिणतेत्यर्थः । किं कृत्वा—[illegible] । दमयन्तीप्राप्तिलक्षणकार्यस्य हेतोः प्रयोजने तत्स्पृहयुक्तं न कर्तव्यमिति भावः । [illegible] —नलः अनलः सन् । देवत्वं त्यक्त्वा मनुष्याकारदर्शनम् । [illegible] यथाज्ञानं ज्ञातव्यम् ॥

इत्यलिपनधिरथ्यं याति नैपथ्यमद्य विंशतिविशति वेदीमुर्वशी [illegible] ।
इति जनजनितैः सानन्दनादैर्विजघ्ने नलहृदि परमेनोवर्णनादर्शनाशिः ॥ १३६ ॥

इत्यलीति ॥ जनजनितैः लोककृतैरिति सानन्दनादैः [illegible] काला परा [illegible] सा निकटे विलिता । [illegible] । [illegible] ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्याऽन्वयजनस्य दशमस्तस्य व्यरंसीन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ १३७ ॥

श्रीहर्षमिति ॥ [illegible]

[illegible]

[illegible]

एकादशः सर्गः ।

इदानीं राजवर्णनार्थमेकादशं सर्गमारभते—

तां देवतामिव मुखेन्दुवसत्प्रसादामक्ष्णा रसादनिमिषेण निभालयन्तीम् ।
लाभाय चेतसि धृतस्य वरस्य भीमभूमीन्द्रजा तदनु राजसभां बभाज ॥१॥

तामिति ॥ तदनु अनन्तरं भीमभूमीन्द्रजा भैमी चेतसि धृतस्य नलस्य लाभाय तां राजसभां देवतामिव इष्टदेवतामिव बभाज विवेश सिषेवे च । किंभूताम्—मुखेन्दुषु वसन् वर्तमानः प्रसादः प्रसन्नता यस्याः । तां वरं दातुमुद्यताम् । तथा—रसादनुरागादनिमेषेणाक्ष्णा भैमीं निभालयन्तीम् । अथ च देवतात्वात्स्वभावादेव निमेषरहितेन नेत्रेण रसात्स्नेहेन भक्तं विलोकयन्तीम् ॥

तन्निर्मलावयवभित्तिषु तद्विभूषारत्नेषु च प्रतिफलन्निजदेहदम्भात् ।
दृष्ट्या परं न हृदयेन न केवलं तैः सर्वात्मनैव सुतनौ युवभिर्ममज्जे ॥२॥

तदिति ॥ तैर्युवभिः सुतनौ भैम्यां परं केवलं दृष्ट्या ममज्जे निमग्नमिति न । तथा-केवलं हृदयेन निमग्नमिति न । किंतु तस्याः निर्मलावयवभित्तिषु निर्मलाङ्गकुड्येषु तद्विभूषा-रत्नेषु च प्रतिफलन् प्रतिबिम्बितो निजदेहः तस्य दम्भाद्व्याजात् सर्वात्मनैव सर्वेणापि शरीरेण निमग्नम् । तेषां नयनमानसे एव तदायत्ते जाते इति न । किंतु सर्वमपि शरीरं तदायत्तं जातम् । तदीयावयवभूषारत्नेषु सर्वेषामपि शरीराणि प्रतिफलितानीति भावः । सर्वेऽपि सर्वथा तत्परवशा जाता इत्यर्थः । निर्मलत्वादवयवेष्वपि प्रतिबिम्बो युक्तः । भित्तिशब्दः प्रशंसार्थो वा ॥

द्यामन्तरा वसुमतीमपि गाधिजन्मा यद्यन्यमेव निरमास्यत नाकलोकम् ।
चारुः स यादृगभविष्यदभूद्विमानैस्तादृक्तदभ्रमवलोकितुमागतानाम् ॥३॥

द्यामिति ॥ गाधिजन्मा विश्वामित्रो द्यां वसुमतीमपि अन्तरा स्वर्गभूम्योर्मध्ये यदि अन्यमेव नाकलोकं निरमास्यताकरिष्यत तर्हि स स्वर्गलोको यादृक् यादृशः चारुः सुन्दरोऽभविष्यत्, तर्हि स्वयंवरमवलोकितुमागतानां देवादीनां विमानैः कृत्वा तत् स्वयंवरदेशात् उपरि वर्तमानं अभ्रं गगनं तादृक्तादृशमभूत् । गाधिजो यदि स्वर्गमर्त्यमध्येऽन्यं स्वर्गमकरिष्यत्तर्हि भुवि उत्कृष्टानि विमानानि भैमीवरणार्थं भूमिमागतानां देवानां विमानानि तानि न भवन्ति अमूनि विमानानि अन्तरिक्षगानि । तैर्विमानैः कृत्वा तद्गगनं यादृक् चारु, तादृगभविष्यदिति वा । अन्तरिक्षनिर्मितस्वर्गतुल्यं तदाकाशमभूदिति भावः । पूर्वव्याख्याने विश्वामित्रोऽभूदित्यत्र क्रियातिपत्तौ लृङ् न, तावन्मात्रक्रियातिपत्तेः पर्यवसानात् ॥

कुर्वद्भिरात्मभवसौरभसंप्रदानं भूपालचक्रचलचामरमारुतौघम् ।
आलोकनाय दिवि संचरतां सुराणां तत्रार्चनाविधिरभूदधिवासधूपैः ॥४॥

---

१ 'अत्र छेकानुप्रासोपमालंकारः । अत्र सर्गे वसन्ततिलका वृत्तम्' इति साहित्यविद्याधरी ।
२ 'अत्र सापह्नवोत्प्रेक्षा' इति जीवातुः । ३ 'अत्रातिशयोक्तिरलंकारः' इति साहित्यविद्याधरी ।
'अभूतोपमेति केचित्' इति जीवातुः ।

कुर्वद्भिरिति ॥ तत्र स्वयंवरदेशे आलोकनाय दिवि संचरतां सुराणामधिवासार्थं सौगन्ध्यार्थं ज्वालितैः कृष्णागर्वादिधूपैः कृत्वा अर्चनाविधिः पूजाविधानमभूत् । किंभूतैः—भूपालानां चक्रं तस्य बलानि वाहनानि तेषां नासत्यौ वायुवह्नी आत्मनस्तौरभ्यसंप्रदानं दानपात्रं कुर्वद्भिः । बलवाहनवायुवशाद्गगनचारितैर्धूपैर्देवाः परितुष्य बभूवुरित्यर्थः ॥

तत्रावनीन्द्रचयचन्दनचन्द्रलेपनेपथ्यगन्धवहगन्धवहप्रवाहम् ।
आलीभिरापतदनङ्गशरानुसारी संरुध्य सौरभमगाहत भृङ्गवर्गः ॥ ५ ॥

तत्रेति ॥ तत्र स्वयंवरदेशे भृङ्गवर्गः भ्रमरसङ्घः सौरभं सौगन्ध्यमगाहत बुभुजे । किं कृत्वा—अवनीन्द्रचयस्य राजसमूहस्य चन्दनचन्द्रः चन्दनयुक्तः कर्पूरः । बहुकर्पूरं चन्दनमिति यावत् । तेन कृतं लेपनेपथ्यमङ्गरागभूषणं तस्य गन्धवहः सौगन्ध्यवाही गन्धवहो वायुस्तस्य प्रवाहं सङ्घं आलीभिः स्वपङ्क्तिभिः संरुध्य कुत्रचिद्गन्तुमदत्त्वा । किंभूतः—आपतन्त आगच्छन्तो येऽनङ्गशरास्ताननुसरत्यनुकरोति एवंशीलः । आपतन्तः स्वर्गात्पतन्तः कुसुमशराः पुष्पाणि तदनुगामी वा । सौगन्ध्यबाहुल्यात्तत्रैव भ्रमरा विचरन्ति स्मेति भावः । अन्योऽपि दलादिना वायुं संरुध्य सौरभं गाहते । बद्धपङ्क्तीनां भ्रमराणां दैर्घ्यात्कृष्णोद्दीपकत्वाच्च कामबाणतुल्यत्वम् ॥

उत्तुङ्गमङ्गलमृदङ्गनिनादभङ्गीसर्वानुवादविधिबोधितसाधुमेधाः ।
सौधस्रजः स्रुतपताकतयाभिनिन्युर्मन्ये जनेषु निजताण्डवपण्डितत्वम् ॥ ६ ॥

उत्तुङ्गेति ॥ सौधस्रजः धवलगृहपङ्क्तयः स्रुतपताकतया चलत्पताकतया जनेषु । जनानां समीप इत्यर्थः । निजताण्डवपाण्डित्यं स्वीयनृत्यचातुर्यमभिनिन्युरभिनयेन दर्शयामासुरित्यहं मन्ये । किंभूताः—उत्तुङ्गोऽतितारः मङ्गलमृदङ्गनिनादो विवाहमर्दलध्वनिस्तस्य भङ्गयः प्रकारविशेषास्तासां सर्वः सकलोऽनुवादविधिरनूच्चारणविधिः । सकलस्य मृदङ्गशब्दस्य यः प्रतिशब्दविधिरिति यावत् । तेन बोधिता ज्ञापिता साध्वी मेधा धारणया गम्भीरता याभिः । अन्या अपि नर्तक्यो मङ्गलमृदङ्गनिनादभङ्गीनामनुवादेन स्वीयं नृत्तकौशलं हस्ताद्यभिनयेन लोकेषु प्रदर्शयन्ति । अन्यो मेधावी गुरुणा व्याख्यातस्यार्थस्यानुवादेन बोधितसाधुमेधः सन् जनेषु स्वीयं पाण्डित्यं प्रकाशयति । एतच्छ्लोकार्थोऽनुमानैकगम्यः । मन्ये हुन्द्रुम एव परं मेधाविशारदत्वेन नान्येभ्यः परासीति मन्तिवे ॥

संभाषणं भगवती सदृशं विधाय वाग्देवता विनयबन्धुरकंधरायाः ।
ऊचे चतुर्दशजगज्जनतामनस्या तत्राश्रिता सदसि दक्षिणपक्षमस्याः ॥ ७ ॥

संभाषणमिति ॥ भगवती षड्गुणैश्वर्यसंपन्ना । तथा—चतुर्दशसु जगत्सु जनतया जनसमूहेन नमस्या पूज्या वाग्देवता तत्र सदसि अस्या भैम्या दक्षिणं पक्षं पार्श्वम् । अथ च—अनुकूलपक्षम् । आश्रिता सती ऊचे । किं कृत्वा—सदृशं देशादिवर्णनविषयं भैम्या सह सदृशमनुरूपं संभाषणं विधाय । किंभूताया अस्याः—विनयेन बन्धुरा नम्रा कन्धरा शिरोधरा यस्याः । भगवती इत्यादिविशेषणैर्देवादिवर्णनसामर्थ्यं दक्षिणपक्षाश्रितत्वेन भैम्यनुकूलत्वं च सूचितम् ॥

१ 'अथाभिमतस्थल सुराणां स्वर्लोकाद्दिवं व्योमेवेति' इति जीवातुः । २ 'अथ सुरलोकमध्यवर्त्ति' इति साहित्यविद्याधरी । ३ साहित्यविद्याधरी तु 'परं मन्तव्येन मन्तिवेनेश' इति जीवातुः ।

किमुवाचेत्याह—

अभ्यागमन्मुखभुजामिह कोटिरेषा येषां पृथक्कथनमब्दशतातिपाति।
अस्यां वृणीष्व मनसा परिभाव्य कंचिद्यं चित्तवृत्तिरनुधावति तावकीना॥

अभ्यागमदिति ॥ हे दमयन्ति, इह स्वयंवरे मखभुजां देवानामेषा कोटिः अभ्यागमदाययौ। कोटिसंख्याका देवाः समागता इत्यर्थः। येषां देवानां पृथक्कथनं पार्थक्येन कथनं अब्दशतं वर्षशतमतिपतत्यतिक्रामति एवंशीलम्। वर्षशतेनापि कर्तुं न शक्यत इत्यर्थः। तस्मात् त्वं मनसा परिभाव्य विचार्य अस्यां देवकोटौ मध्ये यं कंचित्तावकीना चित्तवृत्तिरनुधावत्यभिलष्यति तं वृणीष्व। मनसा विचार्य वृणीष्व वा। तावकीना चित्तवृत्तिर्मनसा विचार्य इत्यनेन सरस्वत्या अनादरः सूचितः। तावकीना, 'युष्मदस्मदोरन्यतरस्यां खञ्' इति खञ् 'तवकममकावेकवचने' इति तवकादेशः॥

एषां त्वदीक्षणरसादनिमेषतैषा स्वाभाविकानिमिषतामिलिता यथाभूत्।
आस्ये तथैव तव नन्वधरोपभोगैर्मुग्धे विधावमृतपानमपि द्विधास्तु॥१॥

एषामिति ॥ ननु मुग्धे सुन्दरि, एषां देवानां त्वदीक्षणे रसात्प्रीतेर्हेतोः एषा प्रत्यक्षदृश्या अनिमेषता निर्निमेषता स्वाभाविकी सहजानिमिषता तया मिलिता संयुक्ता सती यथा द्विधा द्विप्रकाराभूत् तथैवामृतपानमपि तवास्ये विधौ मुखचन्द्रेऽधरोपभोगैरधरचुम्बनैः कृत्वा द्विधा द्विप्रकारमस्तु भवतु। तथा देवा देवत्वादनिमिषा अपि त्वदवलोकनप्रमादात्पुनरप्यनिमिषा जाताः। तथा देवत्वात् चन्द्रामृतादा अपि त्वदधरामृतास्वदादमृतादाः पुनरुक्ता भवन्त्वित्यर्थः। एतेनास्याश्चन्द्रास्ययोस्तुल्यत्वं सूचितम्। मुखे त्वोष्ठोपभोगैः चन्द्रे तु धराव्यतिरिक्तोपभोगः। स्वर्गोपभोगैरित्यर्थः॥

एषां गिरेः सकलरत्नफलस्तरुः स प्राग्दुग्धभूमिसुरमेः खलु पञ्चशाखः।
मुक्ताफलं फलनसान्वयनाम तन्वन्नाभाति बिन्दुभिरिव च्छुरितः पयोधेः॥

एषां गिरेरिति ॥ सकलानि रत्नान्येव फलानि यस्य। तानि फलति इति वा। सकलरत्नफलः स प्रसिद्धः तरुः कल्पवृक्ष एषां देवानां गिरेः सुमेरोः पञ्चशाखः [illegible] हस्त इव आभाति शोभते। किंभूतस्य मेरोः—प्राक् पूर्वं दुग्धा भूमिरेव सुरभिर्[illegible] येन। धृतगोरूपा भूमिरेव रत्नादीनि दुग्धा येन तस्य। किंभूतस्तरुः—पयोधेः [illegible] इव बिन्दुभिः तत उत्पन्नत्वाच्छुरितः। 'पयोभिः' इति पाठे दुग्धरूपैर्बिन्दुभिरित्यर्थः [illegible] यम्। उत्प्रेक्षते–मुक्ताफलं फलनेन सान्वयं सार्थकमेतदेव नाम यस्यैवंविधं तन्वन्निव। [illegible] [illegible] हि फलशब्देन व्यपदिश्यते, तथा मुक्ताफलस्यापि फलत्वं कल्पवृक्षत्वादिति भावः। प्रारब्धगोदोहनस्य पाणिना विना दोग्धुमशक्तः कल्पवृक्षो मेरोः कर आसीत्। दोहने [illegible] [illegible] संभवात्, तेन च रत्नानामेव दुग्धत्वादस्य च रत्नसहितत्वात्प्राग्मेरोः पाणि[illegible] [illegible]त्यर्थः। क्षीरोदात्तस्योत्पन्नत्वान्मुक्तादीनि रत्नानि दुग्धबिन्दुतुल्यानि शोभन्त इत्यर्थः। अथ च—पञ्च शाखाः स्कन्धा यस्य स कल्पवृक्षः [illegible] पञ्च (शाखाः) [illegible] [illegible] पञ्चशाखः। पृथुरादिष्ट पृथ्वीं मेरुणा रत्नानि महौषधीश्च दुग्धा इत्यागमः। [illegible]

१ '[illegible]' इति पाठान्तरः।

न वितीर्णधनैः। अतिकृपणैरित्यर्थः। 'भैम्याः' इति पाठे तस्याः सकाशाल्लज्जयेति योज्यम्। यक्षेषु धनाधिपत्वं प्रसिद्धं लज्जा किमिति जातेत्याशङ्क्याह—ते यक्षाः तां भैमीमधिक्षिति पृथिव्यामवतीर्णां सुरशाखिनः पत्युः कल्पवृक्षस्य पत्युरिव दानशूरत्वलक्षणं व्रतं यस्यास्तां कल्पवीरुधं श्रियं कल्पवल्लीमतिबहुदात्रीम्। अथ च सुरशाखी नल एव तस्य पतिव्रतां कल्पवल्लीम्। किं न जानते स्म। अतिवदान्यां तां प्रति अतिकृपणस्यात्मनोऽयोग्यत्वात्तैर्मुखं नादर्शीति भावः। अन्योऽपि कृपणो वदान्यमुखनिरीक्षणेऽपि लज्जते॥

जन्यास्ततः फणभृतामधिपः सुरौघान्माञ्जिष्ठमञ्जिमवगाहिपदोष्ठलक्ष्मीम्।
तां मानसं निखिलवारिचयान्नवीना हंसावलीमिव घना गमयांबभूवुः॥१५॥

जन्यास्तत इति॥ ततः जनीं वहन्तीति जन्या वाहकाः तां भैमीं सुरौघाद्देवसमूहात्सकाशात्फणभृतामधिपं सर्पराजं वासुकिं गमयांबभूवुः प्रापयामासुः। किंभूताम्—मञ्जिष्ठया रक्तं वस्त्रं माञ्जिष्ठं तस्य मञ्जिमानं रम्यतामवगाहते एवंशीला पदोष्ठलक्ष्मीः चरणाधरशोभा यस्याः सा। के कस्मात्कां किमिव—नवीना नूतना घना मेघा निखिलवारिचयात्कृत्स्नजलौघात्सकाशाद्धंसावलीं राजहंसपङ्क्तिं मानसं सर इव। 'यान्याः' इति पाठे याने यानवाहने साधुरिति। माञ्जिष्ठम्, 'तेन रक्तम्' इत्यण्॥

यस्या विभोरखिलवाङ्मयविस्तरोऽयमाख्यायते परिणतिर्मुनिभिः पुनः सा।
उद्वत्वरामृतकरार्धपरार्ध्यभालां बालामभाषत सभासततप्रगल्भा॥१६॥

यस्या इति॥ सा पुनः बालां भैमीमभाषत। किंभूता—सभायां सततं प्रगल्भा। सा का—वाल्मीकिप्रमुखैर्मुनिभिरयं वेदादिरखिलवाङ्मयविस्तरः विभोः सर्वव्यापिन्याः यस्या देव्याः परिणतिः परिणाम आख्यायते कथ्यते। तद्रूपेणैव या व्यवस्थिता। किंभूताम्—उद्वत्वर उदयाचलस्थोऽमृतकरश्चन्द्रः तस्यार्धं तद्वत्परार्ध्यं तत्सदृशं भालं यस्यास्ताम्। भया दीप्त्या सह वर्तमानेति भिन्नं वा। वाङ्मयम्, 'एकाचो नित्यम्' इति मयट्। 'गत्वरश्च' इति निपातनादुद्वत्वरः साधुः॥

आश्लेषलग्नगिरिजाकुचकुङ्कुमेन यः पट्टसूत्रपरिरम्भणशोणशोभः।
यज्ञोपवीतपदवीं भजते स शंभोः सेवासु वासुकिरयं प्रसितः सितश्रीः॥१७॥

आश्लेषेति॥ सोऽयं वासुकिः। किंभूतः—शंभोः सेवासु प्रसित आसक्तः। तथा सितश्रीः श्वेतशोभश्च। स कः—यः शंभोर्यज्ञोपवीतपदवीं लभते। किंभूतः—य आश्लेषेणालिङ्गनेन लग्नं यद्गिरिजाकुचकुङ्कुमं तेन कृत्वा पट्टसूत्रस्य परिरम्भणेनेव संबन्धेनेव शोणशोभो रक्तशोभः। यज्ञोपवीतमपि श्वेतं ग्रन्थिस्थाने पट्टसूत्रेण शोणशोभं भवति। सर्वदा शंभुसेवया संभोगाभावादेनं मा वृणीष्वेति भावः। पुराणे देवानां चातुर्वर्ण्यमित्युक्तं 'ब्रह्मा विप्रः, रुद्रः क्षत्रियः, विष्णुर्वैश्यः, दस्रौ शूद्रौ' 'माञ्जिष्ठं क्षत्रियः' इति वचनात्क्षत्रियत्वात्पर्वोत्सवादिसारकत्वं कथितमिति वा। 'प्रथितः' इति पाठे सेवासु ख्यातः॥

पाणौ फणी भजति कङ्कणभूयमेष सोऽयं मनोहरमणीरमणीयमुच्चैः।
कोटीरबन्धनधनुर्गुणयोगपट्टव्यापारपारगममुं भज भूतभर्तुः॥१८॥

---

१ 'विभाति' इति जीवातुसंमतः पाठः। २ 'भूतेः' इति जीवातुसंमतः पाठः।

इत्यर्थः । 'तद्विस्फुरत्–' इति तस्यां विशेषणं वा । भूता भीतिर्यस्या इति विग्रहः । साम्य-भिलापे पूर्णे मृत्वा नृत्यन्ति । 'भयेनास्याः कम्पादि प्रवृत्तं न त्वनुरागादिति' नृत्यं मैवं कृद्धमिति न्यषेधदित्यर्थः । मृत्यमौख्यात्, भैम्या चावृतत्वात्सलज्जत्वम् । 'फणा द्वयोः' इति फणशब्दः पुंलिङ्गेऽपि । ततोनु, निपातसमुदायः । नृत्यात्, क्रुदुपधात्क्यप् ॥

**तद्दर्शिभिः स्ववरणे फणिभिर्निराशैर्निःश्वस्य तत्किमपि सृष्टमनात्मनीनम् ।
यत्तान्प्रयातुमनसोऽपि विमानवाहा हा हा प्रतीपपवनाशकुनान्न जग्मुः ॥**

तद्दर्शिभिरिति ॥ तद्दर्शिभिरवृतस्वामिविलोककैर्वासुकिवैलक्ष्यदर्शिभिर्वा अत एव स्ववरणे निराशैः फणिभिः कर्कोटकादिभिः निःश्वस्य फूत्कृत्य तत् किमप्यपूर्वमनात्मनीनं स्वीयमहितं सृष्टं कृतम् । यत् तान्सर्पान्प्रयातुमनसोऽपि गन्तुकामा अपि विमानवाहाः प्रतीपपवनः प्रतिकूलवातः तद्रूपं यदशकुनं तस्माद्धेतोः हा हा कष्टं अशुभमेतदिति कृत्वा न जग्मुः । प्रतिकूलस्य वायोरशकुनत्वात्सर्पसंमुखं न जग्मुः । अयोग्यत्वान्न गता इति भावः । आत्मने हितमात्मनीनम्, 'आत्मन्विश्वजन–' इति खः ॥

**ह्रीसंकुचत्फणगणादुरगप्रधानात्तां राजसङ्घमनयन्त विमानवाहाः ।
संध्यानमद्दलकुलात्कमलाद्विनीय कह्लारमिन्दुकिरणा इव हासभासम् ॥**

ह्रीति ॥ विमानवाहाः ह्रिया संकुचत्फणवृन्दं यस्य तस्मादुरगप्रधानात्सर्पराजाद्वासुकेः विनीयापनीय तां राजसङ्घमनयन्त प्रापयामासुः । के कस्मात्कां कामिव—इन्दुकिरणाः संध्यायां नमन्ति संकुचन्ति दलकुलानि पत्रसमूहा यस्य तस्मात्कमलाद्विनीय हासभासं विकसन्तीं दीप्तिं कह्लारं सौगन्धिकमिव ॥

**देव्याभ्यधायि भव भीरु धृतावधाना भूमीभुजो भजत भीमभुवो निरीक्षाम् ।
आलोकितामपि पुनः पिबतां दृशैनामिच्छा विगच्छति न वत्सरकोटिभिर्वः ॥**

देव्येति ॥ सा भैमी देव्या अभ्यधायि वक्ष्यमाणमुक्ता । हे भीरु, चलत्फणदर्शनभयशीले, त्वं धृतावधाना सावधाना भव । भयं परित्यज्य राज्ञो विलोकयेत्यर्थः । हे भूमीभुजो राजानः, यूयं भीमभुवो भैम्याः निरीक्षां दर्शनं भजत भैमीं पश्यत । दृष्टायाः पुनर्दर्शनेन किमित्यत आह—आलोकितामप्येनां पुनर्दृशा पिबतां सादरं पश्यतां वो युष्माकमेतद्दर्शनेच्छा वत्सराणां वर्षाणां कोटिभिरपि न गच्छति न शाम्यति । अतः पुनर्यथेच्छं विलोकयतेत्यर्थः । 'त्यजत' इति पाठे भैमीविलोकनं मा कुरुत । युष्मासु पश्यत्सु लज्जावशादियं युष्मान्न पश्येत् । तस्माल्लज्जां विहाय यथा पश्यति तथा कुरुतेत्यर्थः । वरणे तु तद्दर्शनमपि कथं त्याज्यमित्यत आलोकितामिति वा ॥

**लोकेशकेशवशिवानपि यश्चकार शृङ्गारसान्तरभृशान्तरशान्तभावान् ।
पञ्चेन्द्रियाणि जगतामिषुपञ्चकेन संक्षोभयन्वितनुतां वितनुर्मुदं वः ॥२५॥**

लोकेशेति ॥ यो वितनुः कामः लोकेशो ब्रह्मा, केशवः शिवश्च एतानपि त्रीन् शृङ्गारेण रसेन सान्तरो व्यवहितः भृशोऽतिशयित आन्तरो मानसः शान्तभावो विरक्तत्वं येषां तान्विरक्तानप्यनुरक्तांश्चकार स कामो वो युष्माकं मुदं वितनुतां विस्तारयतु । किं कुर्वन्–

१ 'अत्र मृत्यानां भैमीभयसात्त्विकेषु शृङ्गारभ्रान्त्या भ्रान्तिमदलंकारः' इति जीवातुः ।

त्वलक्षणमनन्यकल्पमनन्यसदृशं निजशिल्पं निजनिर्माणं विलोक्य सर्वेषु कारुषु ... विषये करेण दर्पं गर्वं करोतु । एवं सुन्दरतरशिल्पनिर्माणकुशलो मदन्यस्य हस्तो न ... इति त्वां वीक्ष्य तस्य बुद्धिरुदेष्यतीति भावः । अन्येन कल्प्यते निर्मीयत इत्यन्यकल्पं ... भवति । अन्येन निर्मातुमशक्यमित्यर्थः । अन्यस्मान्नीपदूनमेवं न भवति । कल्पवन्तं वा ॥

न्यग्रोधनादिव दिवः पतदातपादेर्न्यग्रोधमात्मभरधारमिवावरोहैः ।
तं तस्य पाकिफलनीलदलद्युतिभ्यां द्वीपस्य पश्य शिखिपत्रजमातपत्रम्

न्यग्रोधेति ॥ हे भैमि, त्वं तं न्यग्रोधं वटं तस्य द्वीपस्यातपत्रमिवातपत्रं छत्रतुल्यं पश्य । किंभूतं न्यग्रोधम्—दिव आकाशात्पतत आतपादेरुष्णवृष्ट्यादेः न्यक् अधोदेशे रोधनान्निराकरणादिव न्यग्रोधं 'न्यक् रुणद्धि' इति न्यग्रोधः इति सान्वयम् । अतिशीतलच्छायमित्यर्थः । तथा—अवरोहैः शाखोत्पन्नमूलैः कृत्वा आत्मभरं धारयति एवंभूतमेव स्थितम् । किंभूतमातपत्रम्—पाकीनि फलानि नीलानि दलानि पर्णानि च तेषां द्युतिभ्यां रक्तनीलशोभाभ्यां कृत्वा शिखिपत्रजं रक्तनीलमयूरपत्रविरचितम् । समस्तमपि द्वीपं तच्छाये वर्तत इति शेषः । अन्योऽपि बहुतरं भारं हस्तादिना धारयति । 'न्यग्रोधस्य च केवलस्य' इति निपातान्न्यग्रोधशब्दः साधुः ॥

न श्वेततां चरतु वा भुवनेषु राजहंसस्य न प्रियतमा कथमस्य कीर्तिः ।
चित्रं तु यद्विशदिमाद्वयमाविशन्ती क्षीरं च नाम्बु च मिथः पृथगातनोति ॥

नेति ॥ अस्य राजहंसस्य राजसु श्रेष्ठस्य प्रियतमात्यन्तमभिमता कीर्तिः श्वेततां शुभ्रतां कथं न चरतु गच्छतु । अपितु गच्छत्वेव । तथा–भुवनेषु लोकत्रयेऽपि कथं न गच्छतु । लोकत्रयमपि व्याप्नोत्येव । यद्वा–कथं न श्वेततां श्वेता भवतु । अपितु श्वेता भवत्वेव । त्रैलोक्ये चरत्वेव । हंसस्यापि प्रियतमा योषिदपि श्वेता भवति । तथा—भुवनेषूदकेषु च क्रीडति विषादि भक्षयति वा अत्र नाश्चर्यम् । विशदिम्नो धवलताया अद्वैतं ऐक्यमादिशन्ती त्रैलोक्यं श्वेतीकुर्वती क्षीरं दुग्धं चाम्बु च मिथः परस्परस्मात्पृथक् नातनोति भिन्नं न करोति इदं तु चित्रम् । हंसी हि मिश्रं क्षीरनीरं विविक्तं करोति इयं तु तयोरभेदं करोतीत्याश्चर्यम् । अतिशुभ्रा त्रैलोक्यव्यापिनी चास्य कीर्तिः, वदान्यश्चायमिति भावः । अद्वैते चानेदम एव युक्तः । 'जीवनं भुवनं वनम्', 'विष्टपं भुवनम्' इत्यमरः । पक्षे 'श्विता वर्णे' इत्यस्माल्लोटेस्तङ् ॥

शूरेऽपि सूरिपरिषत्प्रथमार्चितेऽपि शृङ्गारभङ्गिमधुरेऽपि कलाकरेऽपि ।
तस्मिन्नवद्यमियमाप तदेव नाम यत्कोमलं न किल तस्य नलेति नाम ॥

शूर इति ॥ इयं भैमी तस्मिन्राज्ञि तदेवावद्यं दूषणं नामेति प्रसिद्धौ । आप । तत्किम्—

१ 'प्रसिद्धमातपत्रं तद्वदस्थितम्' इति निमित्तगुणजातिस्वरूपोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या । अलङ्कारः प्रथमोत्प्रेक्षया अङ्गाङ्गिभावेन सजातीयसंकरः । द्वितीयया सजातीयसंसृष्टिः' इति जीवातुः । २ '... चाविवेको धावल्यगुणतो, न स्वरूपत इति विरोधसमाधानाद्विरोधाभासोऽलंकारः । तथा–'विशदिमाद्वयमादिशन्ती' इत्यनेन सामान्यालंकारः । तस्य विशेषणगत्या क्षीरनीराविवेकहेतुत्वात्पदार्थहेतुकं काव्यलिङ्गम् । पूर्वार्धे च श्वैत्यभुवनचारित्वराजहंसप्रियतमात्वाख्यश्लिष्टौ श्लिष्टप्रस्तुतकीर्तिविशेषणसाम्यादप्रस्तुतराजहंसप्रतीतेः श्लेषसंकीर्णार्धसमासोक्तिरित्येतैस्त्रिभिः सहाङ्गाङ्गिभावेन पूर्वोक्तस्य विरोधाभासस्य संकरः' इति जीवातुः ।

यतस्तस्य सवनस्य किलेति प्रविदं नल इत्यामन्त्रणयोग्यं संयुक्ताक्षरं कोमलं मधुराक्षरं नाम नास्तीत्येतदेव दूषणम् । किंभूते—शूरेऽपि । तथा—सूरिपरिषदि विद्वत्सभायां प्रथनार्थितेऽपि प्रथनगण्येऽपि । तथा शृङ्गारभङ्ग्या शृङ्गाररचनया मधुरे मनोज्ञेऽपि । यथा—कलानां गीतादि-चतुःषष्टिकलानामाकरेऽपि । शौर्यपाण्डित्यशृङ्गारित्वकलाकौशलादिगुणयुक्तेऽपि । वरगुणेषु सत्स्वपि नलेऽनुरागात्तं नावरीष्टेति भावः ॥

भ्रूवल्लिवेल्लितमथाकृतिभङ्गिमेषा लिङ्गं चकार तदनादरणस्य विज्ञा ।
राज्ञोऽपि तस्य तदलाभजतापवह्निश्चिह्नीबभूव मलिनच्छविभूमधूमः ॥३३॥

भ्रूवल्लीति ॥ अथ विज्ञा ज्ञात्री एषा भैमी तदनादरणस्य सवनानादरणस्य लिङ्गं चिह्नं भ्रूवल्लिवेल्लितं भ्रूलताचेष्टितमेवाकृतिभङ्गिमाकारविच्छित्तिम् । यद्वा पूर्वं भ्रूवल्लिचेष्टितं तदन-न्तरं आकृतिभङ्गिमङ्गमोटनं च चकार । भ्रूचलनेनाङ्गमोटनेन च तं निराचकारेत्यर्थः । तस्य राज्ञोऽपि मलिनच्छवेर्मलिनकान्तेः यो भूमा बाहुल्यमेव धूमस्तस्या अलाभाज्जातस्तापलक्ष-णो वह्निस्तस्य चिह्नीबभूव लिङ्गमासीत् । श्यामशोभां दृष्ट्वा जनेन तस्य विरहज्वरोऽनुमित इत्यर्थः । धूमोऽग्नेर्लिङ्गम् ॥

राजान्तराभिमुखमिन्दुमुखीमथैनां जन्या जनीं हृदयवेदितयैव निन्युः ।
अन्यानपेक्षितविधौ न खलु प्रधानवाचां भवत्यवसरः सति भव्यभृत्ये ॥३४॥

राजेति ॥ अथ जन्या यानवाहाः इन्दुमुखीमेनां जनीं वधूं हृदयवेदितयैव [illegible]-देव 'पुरो गच्छत' इत्यादिर्भैमीवचनमन्तरेणैव राजान्तरस्याभिमुखं निन्युः । [illegible] । खलु यस्मादन्येन स्वामिवचनादिनास्यापप्रवर्तनादिविषयेणानपेक्षितो विधिर्व्यापारो यस्य तस्मिन् स्वामिवचनानपेक्षकारिणि भव्ये कुशलतरे भृत्ये सेवके सति प्रधानवाचां स्वामिवचसामवसरः प्रस्ताव एव न भवति । तस्मात्तदभिप्रायं ज्ञात्वान्यत्र निन्युरिति युक्तम् । अनपेक्षितमन्यत्स्वा-मिवचनादि येन एवंविधो विधिर्यस्येति वा । [illegible] ॥

ऊचे पुनर्भगवती नृपमन्यमस्यै निर्दिश्य दृश्यतमतावमताश्विनेयम् ।
आलोक्यतामयमये कुलशीलशाली शालीनतानततनुः [illegible] ॥३५॥

ऊच इति ॥ भगवती देवी दृश्यतमतया सुन्दरतमत्वेनावमतौ तिरस्कृतावश्विनौ [illegible] येन एवंभूतमन्यं नृपमस्यै निर्दिश्य दर्शयित्वा पुनरूचे । किंरूपं इत्यत आह—अयि भैमि, शालीनतया लज्जया आनतं नम्रं [illegible] ... [illegible] तोऽयं राजा आलोक्यताम् ॥

एतत्पुरःपटदपघ्नदविघ्नपुन्[illegible]रनवकाशतरेऽम्बरेऽस्मिन् ।
उत्पत्तुमस्ति पदमेव न सत्पदानामर्थोऽपि नार्थिपुनरर्थिषु यातुकानाम् ॥३६॥

एतदिति ॥ हे भैमि, एतस्य पुरः [illegible] ... [illegible]

[illegible]

[illegible]

[illegible]

---

१ '[illegible]' इति पाठः । [illegible]

२ '[illegible]' इति पाठः ।

कानां मत्पदानामर्थोऽपि नास्ति । मयाभिधेयाः शब्दास्तेषामर्थाश्चैतद्वीयैर्नामधेयैरेवोच्यन्ते । ततश्च शब्दपौनरुक्त्यमर्थपौनरुक्त्यं च दोषो मम आपतस्तत इत्यर्थः । एतद्वर्णनं ममापि तन्निरोगं गुणीभवतीति भावः । बहुभिर्व्याप्तेऽन्यस्मिन्नपि स्थाने चरणावकाशो न भवति उत्पत्तुम्, अनिटः पततेस्तुमुन् ॥

नन्वत्र हव्य इति विश्रुतनाम्नि शाकद्वीपप्रशासिनि सुधीषु सुधीभवन्त्या ।
एतद्भुजाविरुदवन्दिजयानयापि किं रागि राजनि गिराजनि नान्तरं ते ३७

नन्विति ॥ ननु भैमि, ते आन्तरं मानसमेतस्य राज्ञो भुजयोर्विरुदं प्रतापः तस्य स्तुति-पाठका ये वन्दिनस्तेभ्यो जाता एवंभूतयाप्यनया गिरा हव्य इति विश्रुतनाम्नि अत्रास्मि-न्नपि राजनि रागि अनुरागयुक्तं किं नाजनि । प्रश्नकाकुः । कुतो नाजनीति वा । किंभूते—शाकद्वीप-प्रशासिनि शाकद्वीपाधिपे । किंभूतया गिरा । सुधीषु पण्डितेषु सुधीभवन्त्या अमृतीभवन्त्या । आकर्णयतां विदुषाममृतरूपया । विदुषामेवामृतरूपया न त्वन्यजनानामिति विरागसूचनम् ॥

शाकः शुकच्छदसमच्छविपत्रमालभारी हरिष्यति तरुस्तव तत्र चित्तम् ।
यत्पल्लवौघपरिरम्भविजृम्भितेन ख्याता जगत्सु हरितो हरितः स्फुरन्ति ३८

शाक इति ॥ तत्र द्वीपे स शाकनामा तरुस्तव चित्तं हरिष्यति । किंभूतः—शुकच्छदैः कीरपक्षैः समा छविर्येषामेवंभूतानि पत्राणि तेषां मालां बिभर्तीति । स कः—यस्य शाकस्य पल्लवौघानां परिरम्भः संबन्धस्तस्य विजृम्भितेन विलसितेन हरितो नीलवर्णाः सत्यो जगत्सु हरित इति ख्याताः स्फुरन्ति । एतत्पत्रसंबन्धेन दिशां हरित इति सान्वयं नाम जातमित्यर्थः । मालभारी, 'इष्टकेषीका—' इति ह्रस्वः ॥

स्पर्शेन तत्र किल तत्तरुपत्रजन्मा यन्मारुतः कमपि संमदमादधाति ।
कौतूहलं तदनुभूय विधेहि भूयः श्रद्धां पराशरपुराणकथान्तरेऽपि ॥ ३९ ॥

स्पर्शेनेति ॥ तत्र शाकद्वीपे स चासौ तरुश्च तत्तरुः शाकः तस्य पत्रेभ्यो जन्म यस्य एवंभूतो मारुतः स्पर्शेन कृत्वा कमप्यपूर्वं संमदं हर्षमादधाति करोतीति यत् किल भूयते त्वं तत् कौतूहलमनुभूय भूयः पुनः पराशरपुराणस्य विष्णुपुराणस्य कथान्तरेऽप्याख्यानान्तरेऽपि श्रद्धामास्तिक्यबुद्धिं विधेहि कुरु । 'यत्पत्रवातसंसर्गादाह्लादो जायते परः' इति विष्णुपुराण-वचनम् । अस्य श्रवणात्सत्यत्वं विद्यते । अनुभवादपि सत्यत्वं जानीहीत्यपि भूयःशब्दार्थः । भूयसी चासौ श्रद्धा चेति वा ॥

क्षीरार्णवस्तवकटाक्षरुचिच्छटानामन्वेतु[2] तत्र विकटायितमायताक्षि ।
वेलावनीवनततिप्रतिबिम्बचुम्बिकिर्मीरितोर्मिचयचारिमचापलाभ्याम् ४०

क्षीरेति ॥ हे आयताक्षि विशालनयने, क्षीरार्णवः वेलावन्यां वेलाभूमौ वनततिर्वनपङ्क्ति-स्तस्याः प्रतिबिम्बचुम्बी प्रतिबिम्बधारी । अत एव किर्मीरितः नानावर्णो जातः विचित्रित ऊर्मिचयस्तरङ्गसङ्घस्तस्य चारिमा सौन्दर्यं चापलं चञ्चलत्वं च ताभ्यां कृत्वा तव कटाक्षस्य रुचीनां कान्तीनां छटाः परम्परास्तासां विकटायितं विलसितमन्वेत्वनुकरोतु । क्षीरमयला-

---

१ 'दिक्षु हरिच्छब्दप्रवृत्तेर्हरितवर्णनिमित्तायाः शाकतरुपल्लवच्छायाच्छुरणनिमित्तत्वासंबन्धेऽपि संब-न्धोक्तेस्तद्रूपातिशयोक्तिः तया च तस्य तरो(र्वि)स्तारो व्यज्यत इत्यलंकारेण वस्तुध्वनिः' इति जीवातुः । २ 'अध्येतु' इति जीवातुस्थपाठः ।

एतेन ते विरहपावकमेत्य तावत्कामं स्वनाम कलितान्वयमन्वभावि।
अङ्गीकरोषि यदि तत्तव नन्दनाद्यैर्लब्धान्वयं स्वमपि नन्वयमातनोतु॥४

एतेनेति॥ हे भैमि, एतेन राज्ञा ते तव विरहपावकमेत्य प्राप्य कामं निश्चितं ता थमं हव्य इति स्वनाम कलितान्वयमनुगतार्थमन्वभाव्यन्वभूयत। हव्येनाग्निं प्राप्य यथा यते तद्वदनेनानुभूतमित्यर्थः। अतो हूयते इति हव्यम्। यदि अधुना त्वमेनमङ्गीक वृणुषे तत्तर्हि अयं तव नन्दनाद्यैः पुत्रपौत्राद्यैः कृत्वा स्वमात्मानमपि लब्धान्वयं ननु नि प्राप्तवंशमातनोतु ननु संबोधने वा। अन्वयः संबन्धो वंशश्च। यदीत्यनेन स्वीकारस्य पा कत्वं द्योतयति॥

लक्ष्मीलतासमवलम्बभुजद्रुमेऽपि वाग्देवतायतनमञ्जुमुखाम्बुजेऽपि।
सामुत्र दूषणमजीगणदेकमेव नार्थी बभूव मघवा यदमुष्य देवः॥४६॥

लक्ष्मीति॥ सा भैमी अमुत्र हव्ये एकमेव दूषणमजीगणत् यत्—मघवा देवोऽमु अर्थी याचको न बभूव। किंभूते—लक्ष्मीरूपाया लतायाः समवलम्ब आधारभूतो भुजल द्रुमो यस्य तस्मिन्समृद्धराज्येऽपि। तथा—वाग्देवतायाः सरस्वत्या आयतनं स्थानं म सुन्दरं मुखाम्बुजं यस्य एवंविधेऽपि चतुःषष्टिकलाप्रवीणेऽपि। इन्द्रो नलस्य याचको जा न त्वस्य। नलस्यास्य महदन्तरमित्यर्थः॥

लक्ष्मीविलासवसतेः सुमनःसु मुख्यादस्माद्विकृष्य भुवि लब्धगुणप्रसिद्धिम
स्थानान्तरं तदनु निन्युरिमां विमानवाहाः पुनः सुरभितामिव गन्धवाहाः४

लक्ष्मीति॥ विमानवाहा अस्मात् राज्ञो विकृष्यापनीय तदनु तदनन्तरं पुनः स्थान न्तरं इमां भैमीं निन्युरन्यं राजानं प्रापयामासुः। के कस्मात्कामिव—गन्धवाहा वायव सुमनःसु पुष्पेषु मुख्यात्पद्माद्विकृष्य सुगन्धितामिव। स्थानान्तरं नयन्ति तथेत्यर्थः किंभूतादस्मात्—लक्ष्मीविलासस्य वसतेर्गृहात्। पद्ममपि तथा। तथा—सुमनःसु पण्डिते मुख्यात्। किंभूतामिमाम्—भुवि लब्धा गुणेन सौन्दर्यादिना प्रसिद्धिर्यया॥

भूयस्ततो निखिलवाङ्मयदेवता सा हेमोपमेयतनुभा समभाषतैनाम्।
एतं स्वबाहुबहुवारनिवारितारिं चित्ते कुरुष्व कुरुविन्दसकान्तिदन्ति॥४८

भूय इति॥ ततः सा निखिलवाङ्मयदेवता हेमा नाम देवाङ्गना तदुपमेया तत्सदृ तनुभाः कायकान्तिर्यस्यास्तामेनां सुवर्णसदृशकायकान्ति वा भैमीं भूयोऽभाषत ऊचे। हे कु विन्दैः माणिक्यमणिभिः सकान्तयः सदृशा दन्ता यस्यास्तत्संबुद्धिः, त्वं स्वबाहुभ्यां बहुवा निवारिता अरयो येन तमेनं पुरोवर्तिनं नृपं चित्ते कुरुष्व। वृणीष्वेत्यर्थः। 'स्वबाहु—' इत्य नेन परानपेक्षं शौर्यं सूचितम्। 'कुरुविन्द—' इत्यनेन बहुताम्बूलभक्षणाद्दन्तानामारक्तत्वं सूचि तम्। सकान्तीत्यत्र सदृशशब्दपर्यायेण सहपदेनास्वपदविग्रहः समासः कार्यः। तत्र 'तोपंच इति सभावः। दन्ती इत्यत्र संयोगोपधत्वेऽपि 'नासिकोदर' इति ङीप्॥

द्वीपस्य पश्य दयितं द्युतिमन्तमेनं क्रौञ्चस्य चञ्चलदृगञ्चलविभ्रमेण।
यन्मण्डले स परिमण्डलसंनिवेशः पाण्डुश्चकास्ति दधिमण्डपयोधिपूरः४९

द्वीपस्येति॥ हे भैमि, त्वं क्रौञ्चस्य द्वीपस्य दयितं पतिं द्युतिमन्नामानम्। अथ च तेज

१ 'समवलम्ब्य—' इति सुखावबोधासम्मतः पाठः। २ 'तदेव' इत्यपि पाठः।

छिनत्त्वपनयतु अपहरतु। शीतलवायुसंसर्गात्सुरतश्रमजातं घर्मोदकं शाम्यतीत्यर्थः। चौरो ऽप्यपरद्वारेण प्रविश्य मुक्ताद्याभरणं हरति। उदविन्दिदित्यत्र 'नन्दौदन—' इत्युदाहरणः॥

एतद्यशो नवनवं खलु हंसवेषं वेशान्तसंतरणदूरगमक्रमेण।
अभ्यासमर्जयति संतरितुं समुद्रान्गन्तुं च निःश्रममितः सकलान्दिगन्तान्॥

एतदिति॥ हंसस्य वेष आकारो यस्य नवनवं प्रतिदिनमपूर्वं भवत् एतस्य यशः वेशान्तस्य पल्वलस्य संतरणदूरगमनयोः क्रमेण परिपाट्या, पल्वलस्य संतरणे विषये दूरगमनक्रमेण पूर्वं सरसोऽर्धं पश्चात्कियदधिकं ततोऽपि परतीरं अनया परिपाट्या वा समुद्रान्संतरीतुमुत्तरीतुं इतः समुद्रेभ्य एतद्देशाद्वा निःश्रमं श्रमरहितं यथातथा सकलान्दिगन्तान्दिगन्तांश्च गन्तुं प्राप्तुमभ्यासमर्जयति। खलु निश्चये उत्प्रेक्षायां वा। श्वेतत्वाद्धंसानां त्वद्यशसा धृतम्। हंसा न भवन्ति किं त्वेतद्यश एव। अन्योऽपि महानद्यादितरणार्थं वाप्यादितरणेनाभ्यासं करोति। नवं चाभ्यासयोग्यं भवति। वालाभ्यासो हि दृढतर इत्यर्थः। नवनवमिति प्रकारे द्विरुक्तिः। अर्जयतीति वर्तमानप्रयोगाद्यशसोऽल्पत्वसूचनादलितनादरः सूचितः॥

तस्मिन्गुणैरपि भृते गणनादरिद्रैस्तन्वी न सा हृदयबन्धमवाप भूपे।
दैवे निरुन्धति निबन्धनतां वहन्ति हन्त प्रयासपरुषाणि न पौरुषाणि॥५५॥

तस्मिन्निति॥ सा तन्वी भैमी गणनादरिद्रैरसंख्यैर्गुणैः भृते पूर्णेऽपि तस्मिन्भूपे धृतिमति हृदयबन्धं मनोऽभिलाषं नावाप। गुणवति तस्मिन्कथं न प्रापेत्यत आह—दैवे निरुन्धति कार्यप्रतिबन्धके सति प्रयासेन युद्धादियत्नेन परुषाणि दुःसहान्यपि पौरुषाणि पुरुषकाराः कार्यं प्रति निबन्धनतां कारणतां न वहन्ति न धारयन्ति। हन्त खेदे। दैवनिरोधाद्गुणवत्ताप्यनुरागहेतुर्नाभूदित्यर्थः। वागुरादिगुणेषु हरिणादिर्बन्धनं प्राप्नोति। अस्यास्तु हृदयं गुणेषु पतितमपि बन्धनं न प्रापेत्याश्चर्यमित्यर्थः॥

ते निन्यिरे नृपतिमन्यमिमाममुष्मादंसावतंसशिबिकांशभृतः पुमांसः।
रत्नाकरादिव तुषारमयूखलेखां लेखानुजीविपुरुषा गिरिशोत्तमाङ्गम्॥५६॥

त इति॥ अंसयोः स्कन्धयोरवतंसा भूषणीभूताः शिबिकांशास्तान्बिभ्रति ते पुमांसो यानवाहाः इमां भैमीममुष्माद्राज्ञः सकाशादन्यं नृपतिं निन्यिरे। तत्र दृष्टान्तः—लेखा देवा एवानुजीविपुरुषाः सेवकपुरुषा रत्नाकरात्तुषारमयूखलेखां चन्द्रकलां गिरिशोत्तमाङ्गं शंकरमूर्धानमिव। 'लेखा अदितिनन्दनाः' इत्यमरः॥

एकैकमद्भुतगुणं धुतदूषणं च हित्वान्यमन्यमुपगत्य परित्यजन्तीम्।
एनां जगाद जगदञ्चितपादपद्मा पद्मामिवाच्युतभुजान्तरविच्युतां सा ५७

एकैकमिति॥ जगदञ्चितपादपद्मा त्रिलोकीपूजितचरणकमला सा सरस्वती एनां भैमीं जगाद। किंभूताम्—अद्भुता गुणा यस्य तम्, तथा—धुतदूषणं गतदूषणमेकैकं नृपं हित्वा ...न्यमन्यं तादृशमेव नृपमुपगत्य प्राप्य परित्यजन्तीम्। तथा—अच्युतभुजान्तराद्विष्णुवक्षःस्थलाद्विच्युतां समागतां पद्मां लक्ष्मीमिव स्थिताम्। लक्ष्मीरपि चाञ्चल्यादेकैकं लक्षणं...

१ उद्धतगुणम्।

यन्त्रितान्याक्रान्तानि शीर्षाणि मस्तका यस्य स शेषो नागराजस्तस्य शेषेणावशिष्टेनाङ्गेन वेष्टित तनुस्तस्य भ्रममातनोतु। किंभूतः—भुजगप्रभुर्वासुकिस्तस्य वेष्टेन घृष्टिर्घर्षणं तया कृत वलयाकारासु लेखासु वलयाकारेण वलन्त्यो धवलनिर्झरवारिधारा यस्मिन्। शेषस्य शुभ्रत्व द्वारिधाराणां च रेखासु वलितत्वाद्भ्रान्तिः। शिरसि गाढं येनाक्रान्तः सर्पोऽवशिष्टेन तस्य जङ्घादि वेष्टयतीति सर्पजातिः। मन्थदोरकः शेष इति केचित् ॥

एतेन ते स्तनयुगेन सुरेभकुम्भौ पाणिद्वयेन दिविषद्द्रुमपल्लवानि।
आस्येन स स्मरतु नीरधिमन्थनोत्थं स्वच्छन्दमिन्दुमपि सुन्दरि मन्दराद्रिः॥६३॥

एतेनेति ॥ हे सुन्दरि, स मन्दराद्रिः ते एतेन स्तनयुगेन कृत्वा सुरेभ ऐरावतस्तस्य कुम्भौ, तथा–ते पाणिद्वयेन दिविषद्द्रुमः कल्पवृक्षस्तस्य पल्लवानि, तथा—ते आस्येनेन्दुमपि स्वच्छन्दं यथेच्छं स्मरत्विति सर्वत्र संबन्धः। किंभूतमेतत्सर्वम्–नीरधिमन्थनोत्थं समुद्रमन्थनादुत्थितम्। समुद्रमथनसमये एतत्सर्वं दृष्टमासीत्। इदानीं त्वां दृष्ट्वा तत्सर्वं स्मरतु। ऐरावतकुम्भसदृशौ ते स्तनौ, कल्पवृक्षपल्लवसदृशं ते पाणिद्वयं, चन्द्रसदृशं ते मुखमिति भावः। अतः सुन्दरीति संबोधनम्। स्वच्छन्दमिति सर्वत्र संबन्धः। 'छन्दः पद्येऽभिलाषे च' इत्यमरः। 'नपुंसकमनपुंसकेन–' इत्येकवद्भावो नपुंसकत्वं च ॥

वेदैर्वचोभिरखिलैः कृतकीर्तिरत्ने हेतुं विनैव धृतनित्यपरार्थयत्ने।
मीमांसयेव भगवत्यमृतांशुमौलौ तस्मिन्महीभुजि तयानुमतिर्न भेजे॥६४॥

वेदैरिति ॥ तया भैम्या तस्मिन्महीभुजि अनुमतिः संमतिर्न भेजे। कया कस्मिन्निव—पूर्वमीमांसया भगवत्यमृतांशुमौलौ शिव इव। किंभूते—अखिलैर्लौकिकैर्वेदतुल्यैः सत्यैर्वचोभिः कृत्वा कृता कीर्तिः स्तुतिर्यस्य स कृतकीर्तिश्चासौ रत्नं चेति। कृतं कीर्तिरत्नं यस्येति वा। तथा–हेतुं कारणं विनैव धृतो नित्यं परार्थे परकार्ये यत्नो येन। स्वोपकारानपेक्षं कृतोपकार। किंभूते शिवे। अखिलैश्चतुर्भिर्वेदैः वचोभिर्महावाक्यैः कृत्वा कृतं कीर्तिरत्नं यशोरत्नं यस्येति। तथा–हेतुं कारणमन्तरेण धृतनित्यपरार्थयत्ने। परमकारुणिक इत्यर्थः। मीमांसापि वेदं प्रति कर्तृत्वमात्रेणेश्वरमङ्गीकृतवती न तु सर्वथा नास्तीति। 'विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे। श्रेयःप्राप्तिनिमित्ताय नमः सोमार्धधारिणे ॥' इति नमस्कारश्रवणात् ॥

तस्मादिमां नरपतेरपनीय तन्वीं राजन्यमन्यमथ जन्यजनः स निन्ये।
धीभावधावितपदामविमृश्य यात्रामर्थी निवर्त्य विधनादिव वित्तवित्तम्॥६५॥

तस्मादिति ॥ अथ अनन्तरं स जन्यजनो वाहकलोकः धीभावेन धीत्वेन [illegible] चालितचरणां गच्छेति चरणचालनेन संज्ञापयन्तीमिमां तन्वीं कृशाङ्गीं भैमीं तस्मान्नरपतेर[illegible] नीयाकृष्य अन्यं राजन्यं निन्ये प्रापयामास। तत्र दृष्टान्तः—अर्थी याचकः अविमृश्य [illegible] निर्धनत्वमविचार्य यात्रां विधनाद्दरिद्रान्निवर्त्य वित्तेन धनेन वित्तं प्रथितं धनिनम्। वित्तं [illegible] वित्तं यस्य इति वा। एवंभूतमिव प्रापयन्तीत्यर्थः। किंभूतां यात्राम् 'यत्नयात्वयतोऽविच्छन्द'

१ 'अत्र कविसंमतत्वादृतस्यमूलाभ्रान्तिवर्णनाद्भ्रान्तिमदलंकारः' इति जीवातुः। २ 'अत्र [illegible] [illegible]स्मरणात्स्मरणालंकारः' इति जीवातुः। ३ 'पूर्वोक्तना' इति जीवातुः। ४ 'धीभाव' इति पठित्वा 'संकल्पमात्रेण' इति व्याख्यातं सुखावबोधाकारः।

रक्षो नङ् इत्यस्मिन्सूत्रे सर्वेषु पुंलिङ्गेषु पदेषु यात्राशब्दो नकारान्तो व्युत्पादितः । शक्तिलाभा- द्यात्रियां वर्तते इति स्त्रीत्वभावेन स्त्रीलिङ्गतया धावितं पदं रूपं यस्यास्ताम् ॥

देवी पवित्रितचतुर्भुजवामभागा वागालपत्पुनरिमां गरिमाभिरामाम् ।
अस्यारिनिष्कृपकृपाणसनाथपाणेः पाणिग्रहादनुगृहाण गणं गुणानाम् ६६

देवीति ॥ पवित्रितः शोभितः चतुर्भुजवामभागो यया एवंभूता वाग्रूपा देवी पुनरिमां भैमीमालपदुवाच । किंभूताम्—गरिम्णा कुलशीलसौन्दर्यादिगौरवेण तरस्त्यागगमनाद्वा गौरवेण अभिरामां मनोज्ञाम् । हे भैमि, अरिषु निष्कृपः कृपाणेन खड्गेन सनाथो युक्तः पाणिर्यस्य एवंभूतस्यास्य पाणिग्रहात्परिणयात्स्वीयं गुणानां सौन्दर्यादीनां गणम् । अस्य गुण- सङ्घं वानुगृहाण । तुल्यगुणस्यास्य लाभात् ॥

द्वीपस्य शाल्मल इति प्रथितस्य नाथः पाथोधिना वलयितस्य सुराम्बुनायम् ।
अस्मिन्वपुष्मति न विस्मयसे गुणाब्धौ रक्ता तिलप्रसवनासिकि नासि किं वा ॥

द्वीपस्येति ॥ सुरा एव मदिरैवाम्बु यस्य एवंभूतेन पाथोधिनाब्धिना वलयितस्य वेष्टि- तस्य शाल्मल इति प्रथितस्य द्वीपस्य पतिरयम्, हे तिलस्य प्रसवः पुष्पं तत्तुल्यनासिके, त्वं गुणाब्धौ गुणसमुद्रे वपुष्मत्यस्मिन् । अथ च सुन्दरशरीरेऽस्मिन्राजनि न विस्मयसेऽद्भुतं किमिति न प्राप्नोषि । अपि त्वाश्चर्यं प्राप्तुमुचितम् । एवंविधेऽस्मिन् रक्ता वा किं नासि । अपि तु रक्ता भव । एनं वृणीष्वेत्यर्थः । सुरासमुद्रपतित्वं दोषः । शरीरधारिणि गुणसमुद्रे विस्मयो युक्तः । वपुष्मति, अतिशायने मतुप् । नासिकीति, 'नासिकोदर-' इति ङीष् ॥

विप्रे धयत्युदधिमेकतमं त्रसत्सु यस्तेषु पञ्चसु बिभाय न सीधुसिन्धुः ।
तस्मिन्ननेन च निजालिजनेन च त्वं सार्धं विधेहि मधुरा मधुपानकेलीः ६८

विप्र इति ॥ यः सीधुसिन्धुः सुरासमुद्रः विप्रेऽगस्त्ये एकतमं क्षारजलधिं धयति पिबति सति तेषु पञ्चसु दधिमण्डादिसमुद्रेषु अस्मानयं पास्यतीति त्रसत्सु सत्सु न बिभाय तत्रसे । ब्राह्मणस्य सुरापाननिषेधात् मां न पास्यतीति यो भयं तत्याज । त्वं तस्मिन्मध्ये सीधुसमुद्रे- ऽनेन च राज्ञा सार्धं निजालिजनेन च सार्धं मधुरा रम्या मधुपानकेलीः मधुपानक्रीडा विधेहि कुरु । एतद्वरणे मधुपानं सुलभम् ॥

द्रोणः स तत्र वितरिष्यति भाग्यलभ्यसौभाग्यकार्मणमहौषधमुपदां गिरिस्ते ।
तद्द्वीपदीप इव दीप्तिभिरोषधीनां चूडास्खलज्ज्वलदकज्जलदर्शनीयः ॥ ६९ ॥

द्रोण इति ॥ तत्र द्वीपे स प्रसिद्धः लक्ष्मणविशल्यीकरणार्थं हनूमता नीतो द्रोणनामा गिरिः भाग्येन सुकृतविशेषेण लभ्यं सौभाग्यसंबन्धि कार्मणं औषधीभिर्मूलैः वशीकरणं तदु- पायभूतमुपादानं अन्यपरित्यागेन स्वमेव पतिर्बध्नीयादिति तथा वशीकरणमहौषधमुपदारूपं ते तुभ्यं वितरिष्यति । एवंविधमौषधं महता पुण्येन विना न लभ्यते तत्र तु तत्प्रतिग्रहणेन [illegible] भविष्यति धन्या त्वमित्यर्थः । किंभूतः—ओषधीनां [illegible] दीप्तिभिः तस्य द्वीपस्य दीप इव स्थितः । [illegible] शिखरेषु [illegible] एव [illegible] तेन दर्शनीयः सुन्दरः । 'मूलकर्म तु कार्मणम्' इत्यमरः । वशीकरणे [illegible] ॥

१ अत्र 'कार्मणमहौषधमुपदाम्' इति [illegible] । [illegible] 'रूपकेण संकरः' इति जीवातुः ।

तद्वीपलक्ष्मपृथुशाल्मलितूलजालैः क्षोणीतले मृदुनि मारुतचारुकीर्णैः।
लीलाविहारसमये चरणार्पणानि योग्यानि ते सरससारसकोशमृद्वि ॥७०॥

तदिति ॥ हे सरसं नूतनं सारसं कमलं तस्य कोशो मुकुलं राशिर्वा तद्वन्मृद्वि मृदु राजि, मारुतेन चारु संनिवेशविशेषेण निबिडं वा कीर्णैः प्रस्तारितैस्तस्य द्वीपस्य लक्ष्म चिह्नभूतः पृथुर्महाञ्शाल्मलिर्वृक्षस्तस्य तूलजालैः कार्पाससमूहैः कृत्वा मृदुनि क्षोणीतले लीलाविहारसमये विलासगमनकाले ते तव चरणार्पणानि योग्यानि। भवन्तीति शेषः। अतिमृद्व्याः हि अतिमृदुनि स्थले गतिर्युक्ता ॥

एतद्गुणश्रवणकालविजृम्भमाणतल्लोचनाञ्चलनिकोचनसूचितस्य।
भावस्य चक्रुरुचितं शिबिकाभृतस्ते तामेकतः क्षितिपतेरपरं नयन्तः ॥७१॥

एतदिति ॥ ते शिबिकाभृतः भावस्य भैम्यभिप्रायस्योचितं योग्यं व्यापारं चक्रुः। किंभूतस्य—एतस्य राज्ञो गुणश्रवणकाले विजृम्भमाणा सा भैमी तस्या लोचनाञ्चलनिकोचनेन नेत्रप्रान्तसंकोचनेन सूचितस्य नृपालंकरणरक्षेपु दृष्टेन भैमीनेत्रसंकोचेन ज्ञापितस्य। किंभूतास्ते—एकतः क्षितिपतेरेकस्मान्नृपात्। अस्माद्भूपुष्मत इत्यर्थः। तां भैमीमपरं राजानं नयन्तः प्रापयन्तः। नयतिर्द्विकर्मा ॥

तां भारती पुनरभाषत नन्वमुष्मिन्काश्मीरपङ्कनिभलग्नजनानुरागे।
श्रीखण्डलेपमयदिग्जयकीर्तिराजिराजद्भुजे भज महीभुजि भैमि भावम् ॥७२॥

तामिति ॥ भारती तां पुनरभाषत। ननु भैमि, त्वं अमुष्मिन्महीभुजि भावमनुरागं भज कुरु। किंभूते—काश्मीरपङ्कनिभेन कुङ्कुमानुलेपनव्याजेन लग्नः जनानामनुरागो यस्मिन्। तथा—श्रीखण्डलेपनमयी चन्दनानुलेपनरूपा दिग्जयजनिता कीर्तिराजिः कीर्तिपरम्परा तया राजन्तौ भुजौ यस्य। रागस्य लौहित्यात्कीर्तेश्च शुभ्रत्वात्कुङ्कुमत्वं चन्दनत्वं च युक्तम्। जनानुरागेणातिसमृद्धित्वं सूचितम् ॥

द्वीपं द्विपाधिपति मन्दपदे प्रशास्ति प्लक्षोपलक्षितमयं क्षितिपस्तदस्य।
मेधातिथेस्त्वमुरसि स्फुर सृष्टसौख्या साक्षाद्यथैव कमला यमलार्जुनारेः ॥७३॥

द्वीपमिति ॥ हे द्विपाधिपवन्मत्तमातङ्गराजवन्मन्दपदेऽलसगमने भैमि, क्षितिपः प्लक्षाख्येन वृक्षेणोपलक्षितं द्वीपं प्रशास्ति पालयतितराम्। तत्तस्मात् त्वं अस्य मेधातिथिनाम्नो राज्ञ उरसि आलिङ्गनेन सृष्टसौख्या सती तथैव स्फुर राजस्व। यथा यमलार्जुनारेर्विष्णोरुरसि साक्षात्कमला सृष्टसौख्या सती स्फुरति। मेधा धारणावती बुद्धिरतिथिर्यस्य। अस्यैव त्वं योग्येत्येवकारो योज्यः। सृष्टसौख्यैवेति वा ॥

प्लक्षे महीयसि महीवलयातपत्रे तत्रेक्षिते खलु तवापि मतिर्भवित्री।
खेलां विधातुमधिशाखविलम्बिदोलालोलाखिलाङ्गजनताजनितानुरागे ॥७४॥

प्लक्ष इति ॥ तत्र द्वीपे महीवलयस्यातपत्ररूपे छत्ररूपे महीयस्यतिमहति प्लक्षे ईक्षिते सति खलु निश्चितं तवापि खेलां दोलारूपां क्रीडां विधातुं कर्तुं बुद्धिर्भवित्री भविष्यति। किंभूते—अधिशाखं शाखासु विलम्बिन्यो लोलास्ताभिर्लोलं अखिलमङ्गं यस्याः तया जन-

१ 'अत्रानुरूपयोगोक्तेः समालंकारः' इति जीवातुः।

तया जनितोऽनुरागो यस्मिन् । तस्यां समुदितोऽनुरागो येन वा । लोके दोलारूढं दृष्ट्वा दोला-
क्रीडायां तवापीच्छा समुदेष्यतीत्यर्थः ॥

पीत्वा तवाधरसुधां वसुधासुधांशुर्न श्रद्दधातु रसमिक्षुरसोदधाराम् ।
द्वीपस्य तस्य दधतां परिवेषवेषं सोऽयं चमत्कृतचकोरचलाचलाक्षि ॥७५॥

पीत्वेति ॥ हे चमत्कृतो भीतश्चकोरः तद्वच्चलाचले चञ्चले अक्षिणी यस्यास्तत्संबुद्धिः ।
सोऽयं वसुधायां सुधांशुर्भूचन्द्रो राजा तवाधरसुधानोष्ठामृतं पीत्वा इक्षुरसोदधारामिक्षुरसस-
मुद्रोदकानां रसं स्वादं न श्रद्दधातु नाभिलषतु । किंभूतानां धाराम्—तस्य द्वीपस्य परिवेषवेषं
परिवेषाकारं दधतां बिभ्रताम् । अन्यत्र चकोराश्चन्द्रस्य सुधां पिबन्ति, अत्र चन्द्र एव चको-
रास्यात्तवाधरसुधां पिबतीति चमत्कृतत्वेन सूचितम् ॥

सूरं न सौर इव नेन्दुमवीक्ष्य तस्मिन्नाश्नाति यस्तदितरत्रिदशानभिज्ञः ।
तस्यैन्दवस्य भवदास्यनिरीक्षयैव दर्शोऽश्नतोऽपि न भवत्ववकीर्णिभावः ॥७६॥

सूरमिति ॥ तस्मिन्द्वीपे यश्चन्द्रभक्तो जन इन्दुमदृष्ट्वा नाश्नाति । यतः तस्मादितरोऽन्यो
यस्त्रिदशो देवस्तस्यानभिज्ञश्चन्द्रातिरिक्तदेवतानभिज्ञः । कः कमिव—सौरः सूर्यभक्तो जनः
सूर्यव्यतिरिक्तदेवतानभिज्ञः सूरं सूर्यमदृष्ट्वा नैव नाश्नाति । तस्य ऐन्दवस्य इन्दुभक्तस्य चन्द्र-
लेखारहितेऽपि दर्शोऽश्नतोऽपि भुञ्जानस्यापि भवदास्यनिरीक्षयैव भवन्मुखचन्द्रदर्शनेनैवावकी-
र्णिभावो न भवति लुप्तव्रतत्वं न भवतु । चन्द्राधिकं भवन्मुखं दृष्ट्वैव भोजनादित्यर्थः । एवदेव
चन्द्रस्थाने भविष्यतीति भावः । सौरः, ऐन्दवः, इत्यत्र 'भक्तिः' इत्यण् ॥

उत्सर्पिणी न किल तस्य तरङ्गिणी या त्वन्नेत्रयोरहह तत्र विपाशि जाता ।
नीराजनाय नवनीरजराजिरास्तामत्राञ्जसानुरज राजनि राजमाने ॥ ७७ ॥

उत्सर्पिणीति ॥ तस्य द्वीपस्य या तरङ्गिणी विपाड्नाम्नी नदी सा त्वद्दृक्स्पृगुत्सर्पिणी
कूलंकषा नेति अहह आश्चर्यं किलेति । अन्यद्वीपे प्रवहन्ती इत्यर्थे, अत्र तु नेति पुराणज्ञ-
विदः । तत्र तस्यां विपाशि नद्यां जाता नवा तत्काले विकसिता नीरजराजिः कमलपङ्क्तिस्त्व-
न्नेत्रयोर्नीराजनादास्तां भवतु । त्वं राजमाने शोभमानेऽत्रास्मिन्राजनि अञ्जसा सत्वरं एवानुरक्त
अनुरागं प्राप्नुहि । अस्यां नद्यां भूपभावात्तदा कमलानां दरचनीराजनमभ्युत्थितं भविष्य-
तीति नोत्सर्पिणीत्यनेन सूचितम् । अत एवैनं भजेत्यर्थः । नीराजनायेति नेत्रापेक्षया कम-
लानां हीनत्वं सूचितम् । अनुरज इति, 'रञ्जेश्च' इति नलोपः ॥

एतद्यशोभिरखिलेऽम्बुनि सन्तु हंसा दुग्धीकृते तदुभयव्यतिभेदमुग्धाः ।
क्षीरे पयस्यपि पदे द्वयवाचिभूयं नानार्थकोषविषयोऽद्य नृपोऽद्य नस्तु ॥७८॥

एतदिति ॥ हंसाः अखिलेऽम्बुनि एतद्यशोभिर्दुग्धीकृते सति तयोरम्बुदुग्धयोः क्षीरनीरयो-
र्व्यतिभेदः परस्परभेदस्तत्रापि मुग्धा मूढाः सन्तु । यदेयमपि दुग्धरूपे जाते सति प्रति-
योगिनोऽभावात्सर्वं दुग्धत्वेन जानन्त्वित्यर्थः । तथा—नानार्थकोषविषयः नानार्थाभिधायके-
भिधानकोशपादेविषयः प्रतिपाद्यं क्षीरे पदे पयस्यपि पदे नित्ये द्वयवाचिभूयमनुभवत्वर्थ-
मित्यम् । 'पयः क्षीरं पयोऽम्बु च' इति । अद्य यदा एतद्यशोभिर्जलं दुग्धीकृते सति भूयस्तं भिन्ना

१ अत्र 'नवनहृदीपजनकतयैव इन्दुरिन्दुमनस्कतयाभिलक्ष्यते' इति क्षेपकः ।

तद्वीपलक्ष्मपृथुशाल्मलितूलजालैः क्षोणीतले मृदुनि मारुतचारुकीर्णैः।
लीलाविहारसमये चरणार्पणानि योग्यानि ते सरससारसकोशमृद्वि ॥७७॥

तदिति ॥ हे सरसं नूतनं सारसं कमलं तस्य कोशो मुकुलं राशिर्वा तद्वन्मृद्वि मुकुल-राशि, मारुतेन चारु संनिवेशविशेषेण निबिडं वा कीर्णैः प्रस्तारैस्तस्य द्वीपस्य लक्ष्म चिह्नभूतः पृथुर्महाञ्शाल्मलिर्वृक्षस्तस्य तूलजालैः कार्पाससमूहैः कृत्वा मृदूनि क्षोणीतले लीलाविहारसमये विलासगमनकाले ते तव चरणार्पणानि योग्यानि । भवन्तीति शेषः । अतिमृद्व्या हि अतिमृदुनि स्थले गतिर्युक्ता ॥

एतद्गुणश्रवणकालविजृम्भमाणतल्लोचनाञ्चलनिकोचनसूचितस्य ।
भावस्य चक्रुरुचितं शिबिकाभृतस्ते तामेकतः क्षितिपतेरपरं नयन्तः ॥७८॥

एतदिति ॥ ते शिबिकावाहनः भावस्य भैम्यभिप्रायस्योचितं योग्यं व्यापारं चक्रुः। किंभूतस्य—एतस्य राज्ञो गुणश्रवणकाले विजृम्भमाणा सा भैमी तस्या लोचनाञ्चलनिकोचनेन नेत्रप्रान्तसंकोचनेन सूचितस्य नृपालंकरणरत्नेषु दृष्टेन भगीनेत्रसंकोचेन ज्ञापितस्य । किंभूतास्ते—एकतः क्षितिपतेरेकस्मान्नृपात् । अस्माद्युष्मत इत्यर्थः । तां भैमीमपरं राजानं नयन्तः प्रापयन्तः । नयतिर्द्विकर्मा ॥

तां भारती पुनरभाषत नन्वमुष्मिन्काश्मीरपङ्कनिभलग्नजनानुरागे ।
श्रीखण्डलेपमयदिग्जयकीर्तिराजिराजद्भुजे भज महीभुजि भैमि भावम् ॥७९॥

तामिति ॥ भारती तां पुनरभाषत । ननु भैमि, त्वं अमुष्मिन्महीभुजि भावमनुरागं भज कुरु । किंभूते—काश्मीरपङ्कनिभेन कुङ्कुमानुलेपनव्याजेन लग्नः जनानामनुरागो यस्मिन् तथा—श्रीखण्डलेपनमयी चन्दनानुलेपनरूपा दिग्जयजनिता कीर्तिराजिः कीर्तिपरम्परा तया राजन्तौ भुजौ यस्य । रागस्य लौहित्यात्कीर्तेश्च शुभ्रत्वात्कुङ्कुमत्वं चन्दनत्वं च युक्तम् । जनानुरागेणातिसमृद्धित्वं सूचितम् ॥

द्वीपं द्विपाधिपति मन्दपदे प्रशास्ति प्लक्षोपलक्षितमयं क्षितिपस्तदस्य ।
मेधातिथेस्त्वमुरसि स्फुर सृष्टसौख्या साक्षाद्यथैव कमला यमलार्जुनारेः ॥८०॥

द्वीपमिति ॥ हे द्विपाधिपवन्मत्तमातङ्गराजवन्मन्दपदेऽलसगमने भैमि, क्षितिपः प्लक्षाख्येन वृक्षेणोपलक्षितं द्वीपं प्रशास्ति पालयतितराम् । तत्तस्मात् त्वं अस्य मेधातिथिनाम्नो राज्ञ उरसि आलिङ्गनेन सृष्टसौख्या सती तथैव स्फुर राजस्व । यथा यमलार्जुनारेर्विष्णोरुरसि साक्षात्कमला सृष्टसौख्या सती स्फुरति । मेधा धारणावती बुद्धिरतिथिर्यस्य । अस्यैव योग्येत्येवकारो योज्यः । सृष्टसौख्यैवेति वा ॥

प्लक्षे महीयसि महीवलयातपत्रे तत्रेक्षिते खलु तवापि मतिर्भवित्री ।
खेलां विधातुमधिशाखविलम्बिदोलालोलाखिलाङ्गजनताजनितानुरागे ॥८१॥

प्लक्ष इति ॥ तत्र द्वीपे महीवलयस्यातपत्ररूपे छत्ररूपे महीयस्यतिमहति प्लक्षे ईक्षिते सति खलु निश्चितं तवापि खेलां दोलारूपां क्रीडां विधातुं कर्तुं बुद्धिर्भवित्री भविष्यति किंभूते—अधिशाखं शाखासु विलम्बिन्यो लोलास्ताभिर्लोलं अखिलमङ्गं यस्याः तया ज

१ 'अत्रानुरूपयोगोक्तेः समालंकारः' इति जीवातुः ।

यन्मौलिरत्नमुदितासि स एष जम्बूद्वीपस्त्वदर्थमिलितैर्युवभिर्विभाति ।
दोलायितेन बहुना भवभीतिकम्प्रः कंदर्पलोक इव खात्पतितस्त्रुटित्वा ॥८३॥

यन्मौलीति ॥ हे भैमि, यस्य मौलिरत्नं शिरोरत्नं त्वं उदितास्युत्पन्नासि, स एष जम्बूद्वीपः त्वदर्थमिलितैस्त्वदर्थमागतैर्युवभिः कृत्वा भवाद्धराद्भीत्या कम्प्रः कम्पनशीलः बहुना दोलायितेन दोलनेन कृत्वा त्रुटित्वा विच्छिद्य खात्पतितः कंदर्पलोक इव विभाति । सर्वेऽपि युवानः कामतुल्या इत्यर्थः । द्वीपे रत्नमुत्पद्यते । अन्यदप्यान्तरालिकं वस्तु बहुना दोलनेन गगनात्त्रुटित्वा पतति ॥

विष्वग्वृतः परिजनैरयमन्तरीपैस्तेषामधीश इव राजति राजपुत्रि ।
हेमाद्रिणा कनकदण्डमहातपत्रः कैलासरश्मिचयचामरचक्रचिह्नः ॥ ८४ ॥

विष्वगिति ॥ हे राजपुत्रि, अयं जम्बूद्वीपः तेषां शाकद्वीपादीनामधीश इव राजेव राजति । राजचिह्नेनैवाह—किंभूतः—अन्तरीपैः सिंहलादिद्वीपैरेव परिजनैः सेवकैर्विष्वक् सर्वतो वृतः । तथा–हेमाद्रिणा मेरुणा कृत्वा कनकदण्डं सुवर्णदण्डं महातपत्रं महच्छत्रं यस्य । तथा—कैलासस्य रश्मिचयः किरणसमूहरूपं चामरचक्रं चामरसमूहश्चिह्नं यस्य । अन्योऽपि राजा परिजनैः सेव्यते । कनकदण्डातपत्रश्च चामरचिह्नितश्च भवति ॥

एतत्तरुस्तरुणि राजति राजजम्बूः स्थूलोपलानिव फलानि विमृद्य यस्याः ।
सिद्धस्त्रियः प्रियमिदं निगदन्ति दन्तियूथानि केन तरुमारुरुहुः पर्येति ॥८५॥

एतदिति ॥ हे तरुणि, एतस्य जम्बूद्वीपस्य चिह्नं तरु राजजम्बू राजति । एष कः सिद्धस्त्रियो यस्या जम्ब्वाः फलानि स्थूलोपलानिव स्थूलपाषाणतुल्यानि विमृद्य दृष्ट्वा प्रियं भर्तारं प्रति इदं इतीदृशं निगदन्ति पृच्छन्ति । इति किम्—हे प्रिय, दन्तियूथानि हस्तिसमूहाः केन पथा तरुं जम्बूवृक्षमारुरुहुरारूढाः । जम्बूसंबन्धादेवास्य जम्बूद्वीप इति नाम । राजजम्बूः, राजदन्तादित्वात्परनिपातः ॥

जाम्बूनदं जगति विश्रुतिमेति मृत्स्ना कृत्स्नापि सा तव रुचा विजितापि यस्याः
तज्जाम्बवद्रवभवास्य सुधाविधाम्बुर्जम्बूसरिद्वहति सीमनि कम्बुकण्ठि ॥८६॥

जाम्बूनदमिति ॥ भोः कम्बुकण्ठि शङ्खवद्रेखात्रययुक्तकण्ठि, 'रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते' इति हलायुधः । सा जम्बू सरित् अस्य जम्बूद्वीपस्य सीमनि मर्यादायां वहति । किंभूता—तस्या जम्ब्वाः जाम्बवानि फलानि तेषां द्रवो रसः तस्माद् भवा जाता । तथा–सुधाया विधा प्रकारो यस्य तादृशमम्बु यस्याः पीयूषतुल्यजला । सा का—यस्या जम्बू-नद्याः कृत्स्ना सकलापि मृत्स्ना प्रशस्ता मृत्तिका जगति तव रुचा कान्त्या विजितापि विजि-[illegible] जम्बूनद्या इदं जाम्बूनदं सुवर्णमिति विश्रुतिमेति । [illegible] सुवर्णं [illegible] [illegible] । 'प्रशस्ता तु मृत्स्ना मृत्स्ना च मृत्तिका' इत्यमरः । [illegible] [illegible] इति [illegible] । [illegible], 'जम्ब्वा वा' इत्यण् । कम्बुकण्ठि '[illegible]—'
[illegible] ॥

[illegible] इति [illegible] ।

वाच्यमस्तु भवतु। अस्य यशसा क्षीरनीरयोरेकत्वे कृते प्रतियोगिनो जलस्याभावादि... अभिधेयस्याभावाद्व्यर्थंवानित्वमनुक्तमित्यर्थः। एवंविधं यशोऽन्यस्य कस्यापि न विद्यत इति भावः॥

ब्रूमः किमस्य नलमप्यलमाजुहूषोः कीर्तिं स चैष च समादिशतः स्म कर्तुम्।
स्वद्वीपसीमसरिदीश्वरपूरपारवेलाचलाक्रमणविक्रममक्रमेण॥ ७९॥

ब्रूम इति॥ हे भैमि, वयं सर्वोत्कृष्टं नलमपि अलमत्यर्थमाजुहूषोः स्पर्धमानस्यास्य संबन्धि किं ब्रूमः। अस्य चरितं वागगोचरमित्यर्थः। स्पर्धामेवाह—स च नलः, एष च मेधातिथिश्चोभौ कीर्तीः स्वयशांस्यक्रमेण युगपत्स्वद्वीपयोर्जम्बूप्लक्षद्वीपयोः सीमायां मर्यादारूपे वा यः सरिदीश्वरः समुद्रस्तस्य पूरः प्रवाहस्तस्य पारवेलायां परतीरमर्यादायां योऽचलः पर्वतस्तस्याक्रमणविक्रममारोहणलक्षणं पराक्रमं कर्तुं समादिशतः स्म संदिष्टवन्तौ। त्वदीया कीर्तिर्दूरगामिनी मदीया वेति निर्णेतुं युगपत्कीर्ति प्रेपितवन्तावित्यर्थः। नलस्पर्धयैतस्य न्यूनत्वं सूचितम्। आहातुमिच्छति, न त्वाहूयते इति वा। 'वेलावला-' इति पाठे वेलाया वलेनाक्रमणमित्यर्थः। नलम्, 'न लोका-' इति षष्ठीनिषेधः॥

अम्भोजगर्भरुचिराथ विदर्भसुभ्रूस्तं गर्भरूपमपि रूपजितत्रिलोकम्।
वैराग्यरूक्षमवलोकयति स्म भूपं दृष्टिः पुरत्रयरिपोरिव पुष्पचापम्॥ ८०॥

अम्भोजेति॥ अथ अम्भोजस्य गर्भो मध्यस्तद्वद्रुचिरा सातिगौरी विदर्भसुभ्रूः रूपेण सौन्दर्येण जितत्रिलोकं गर्भरूपं वयःसंधौ वर्तमानं युवानमपि तं भूपं वैराग्येणाननुरागेण रूक्षं यथा तथावलोकयति स्म। अनुरक्ता नासीदित्यर्थः। का कमिव—पुरत्रयरिपोर्हरस्य दृष्टिः पुष्पचापं काममिव। स्वप्रियनलस्पर्धितया सक्रोधत्वात्परुषेक्षणं ज्ञेयम्। 'द्विगोः' इति ङीब्विधेः संज्ञापूर्वकत्वेनानित्यत्वाद्बहुव्रीहिणा वा जितत्रिलोकमिति समर्थनीयम्॥

ते तां ततोऽपि चकृषुर्जगदेकदीपादंसस्थलस्थितसमानविमानदण्डाः।
चण्डद्युतेरुदयिनीमिव चन्द्रलेखां सोत्कण्ठकैरववनीसुकृतप्ररोहाः॥ ८१॥

त इति॥ ते अंसस्थले स्थिताः समानास्तुल्या विमानदण्डा येषां ते शिबिकावाहास्तां भैमीं तेजस्वित्वाज्जगदेकदीपाल्लोकत्रयैकदीपरूपात्ततोऽपि तस्मादपि राज्ञः सकाशाच्चकृषुः। अन्यं प्रापयामासुरित्यर्थः। के कस्मात्कामिव—सोत्कण्ठा उत्सुका कैरववनी कुमुदवनी तस्याः सुकृतप्ररोहाः पुण्याङ्कुराः चण्डद्युतेः सूर्याद्दर्शे सूर्यं प्रविष्टामुदयिनीमुदयोन्मुखां शुक्लपक्षे प्रतिपदादिक्रमेण चन्द्रलेखामिव समाकर्षन्ति॥

भूपेषु तेषु न मनागपि दत्तचित्ता विस्मेरया वचनदेवतया तयाथ।
वाणीगुणोदयतृणीकृतपाणिवीणानिक्वाणया पुनरभाणि मृगेक्षणा सा॥ ८२॥

भूपेष्विति॥ अथ तया वचनदेवतया सरस्वत्या मृगेक्षणा पुनरभाणि उक्ता। किंभूता—तेषु भूपेषु मनागपि न दत्तचित्ता। अत एव किंभूतया—विस्मेरया विस्मितया। तथा—वाण्याः गुणोदयेन माधुर्यादिगुणोदयेन कृत्वा तृणीकृतो जितः पाणौ स्थिताया वीणाया निक्वाणः स्वनो यया॥

---

१ अत्र 'अखिलेऽम्बुनि दुग्धीकृते' इति सामान्यालंकारः। तदुपजीवनेन हंसानां क्षीरनीरविवेकत्वंस्येऽपि क्षीरपयःपदयोरप्यर्थद्वयसंबन्धे तदसंबन्धरूपातिशयोक्तिद्वयोत्थापनात्संकरः' इति जीवातुः।

आगश्शतं विदधतोऽपि समिद्धकामा नाधीयते परुषमक्षरमस्य वामाः।
चान्द्री न तत्र हरमौलिशयालुरेकानध्यायहेतुतिथिकेतुरपैति लेखा ॥ ९२ ॥

आग इति ॥ वामाः स्त्रियः आगश्शतं सपत्नीसंभोगादिनापराधसहस्रं विदधतोऽपि कुर्वतोऽप्यस्य राज्ञः परुषं निष्ठुरमक्षरं नाधीयते न ब्रुवते। यतः—समिद्धकामाः। सकामत्वात्तस्यापराधं न गणयन्तीति भावः। वामा इत्यनेन वक्रस्वभावत्वात्परुषभाषणयोग्यत्वेऽपि सकामत्वान्नोचुरित्यर्थः। अनध्याये हेतुमाह—तत्रोत्तमचिन्त्यां हरमौलौ शयालुः स्थिता अनध्यायहेतुस्थितिः प्रतिपत् तस्याः केतुश्चिह्नं चान्द्री एका लेखा कला नापैति न गच्छति। सदा तत्र शंभोः सत्वाच्चन्द्रकलाया अपि सत्त्वाच्चन्द्रकलादर्शनात्समुत्पन्नकामाः सत्यः परुषं न भाषन्त इति भावः। अथ च 'प्रतिपत्पाठशीलस्य' इति वचनात्सर्वानध्यायापेक्षया प्रतिपदो मुख्यत्वम्। सर्वास्वपि तिथिषु शुक्लप्रतिपद्वदेकाक्षरमपि न पठन्तीति युक्तमित्यर्थः। आगश्शतकारित्वेनैवास्य दोषः ॥

भूपं व्यलोकत न दूरतरानुरक्तं सा कुण्डिनावनिपुरंदरनन्दिनी तम्।
अन्यानुरागविरसेन विलोकनाद्धा जानामि सम्यगविलोकनमेव रम्यम् ९३

भूपमिति ॥ सा कुण्डिनावनिपुरंदरस्य भीमस्य नन्दिनी पुत्री दूरतरं सुतरामनुरक्तम् (अपि) सानुरागमपि तं भूपं न व्यलोकयत्। सा यस्मादन्यस्मिन्नलेऽनुरागेण तदतिरिक्ते विरसेन विगतेन रसेन अननुरागेण विलोकनात् विलोकनापेक्षयाऽविलोकनं सर्वथानवेक्षणमेव रम्यं श्रेष्ठं जानामि मन्ये। यत्रानुरागो नास्ति तद्विलोकनेनापि प्रयोजनं नास्तीत्यर्थः ॥

भैमीङ्गितानि शिबिकामधरे वहन्तः साक्षान्न यद्यपि कथंचन जानते स्म।
जज्ञुस्तथापि सविधस्थितसंमुखीनभूपालभूषणमणिप्रतिबिम्बितेन ॥ ९४ ॥

भैमीति ॥ अधरेऽधोभागे शिबिकां वहन्तो दधाना भैमीङ्गितानि भ्रूनर्तनादीनि अननुरागचिह्नानि यद्यपि साक्षात् कथंचन केनापि प्रकारेण न जानते स्म, तथापि सविधे समीपे स्थिताः संमुखीना भूपालास्तेषां भूषणमणिषु रत्नादिषु प्रतिबिम्बितेन हेतुना जज्ञुः। अननुरागचिह्नानि प्रतिबिम्बवशाज्जानते स्मेत्यर्थः। संमुखं दृश्यतेऽस्मिन्निति अत्र प्रतिबिम्बाधिकरणे रत्नादौ 'यथामुखसंमुखस्य दर्शनः खः' इति खः। भूपालानां विशेषणं वा ॥

भैमीमवापयत जन्यजनस्तदन्यं गङ्गामिव क्षितितलं रघुवंशदीपः।
गाङ्गेयपीतकुचकुम्भयुगां च हारचूडासमागमवशेन विभूषितां च ॥ ९५ ॥

भैमीमिति ॥ जन्यजनः वाहकलोकः भैमीं तस्मादन्यं नृपमवापयत। कः कामिव—रघुवंशदीपो भगीरथः गङ्गां क्षितितलमिव। किंभूतां भैमीं गङ्गां च—गाङ्गेयं सुवर्णं तद्वत्पीतं गौरं कुचकुम्भयुगं यस्याः। गाङ्गेयाभ्यां स्कन्दभीष्माभ्यां पीतं कुचकुम्भयुगं यस्याः उभयोः [illegible]त्वात्। तथा–हारो मुक्ताभूषणं कण्ठस्थितम्, चूडा बाहुभूषणं शिरःस्थितं वा भूषणं तयोः [illegible]गमवशेन विभूषितां शोभमानाम्। हरस्येयं हारी चूडा शिरोगङ्गायास्तस्याः समागमवशेन [illegible]। विशेषेण भुवि उषितां च। गाङ्गेयः, 'स्त्रीभ्यो ढक्'। हारी चासौ [illegible] ॥

आवबोधात्तेनकः पाठः।

अस्मिञ्जयन्ति जगतीपतयः सहस्रमस्राम्बुसार्द्ररिपुतद्वनितेषु तेषु।
रम्भोरु चारु कतिचित्तव चित्तवन्धिरूपान्निरूपय मुदाहमुदाहरामि॥ ८०॥

अस्मिन्निति ॥ अस्मिन्द्वीपे सहस्रमनेके जगतीपतयो राजानो जयन्ति सर्वोत्कर्षेण वर्तन्ते। हे रम्भोरु, अस्रासुभ्यां रक्तनेत्राम्बुभ्यां यथाक्रमं सार्द्रा रिपवस्तेषां वनिताश्च येषु तेष्वतिशूरेषु राजसु मध्येऽहं कतिचिद्राज्ञ उदाहरामि चारु वदामि। त्वं चारु वा तान् [illegible] निरूपय पश्य। किंभूतान्—तव चित्तवन्धिरूपान्मनोहारिसौन्दर्यान् ॥

प्रत्यर्थियौवतवतंसतमालमालोन्मीलत्तमःप्रकरतस्करशौर्यसूर्ये।
अस्मिन्नवन्तिनृपतौ गुणसंततीनां विश्रान्तिधामनि मनो दमयन्ति किं ते ॥ ८१॥

प्रत्यर्थीति ॥ हे दमयन्ति, गुणसंततीनां सौन्दर्यादिगुणसङ्घानां विश्रान्तिधामनि विश्रान्तिस्थानेऽस्मिन्नवन्तिनृपतौ मनः किं वर्तत इति शेषः। किंभूते—प्रत्यर्थिनां यौवतं स्त्रीसमूहः तस्य वतंसभूतास्तमालमाला एवोन्मीलन्ति प्रकटीभूतानि तमांसि तेषां प्रकरः समूहस्तस्य तस्करो विनाशकः शौर्यमेव सूर्यो यस्य। वैरिणां मृत्युरूपः। वीरानुरागिण्यो हि योषित इति प्रायेणास्मिन्ननुरक्तासीति मम प्रतिभातीति युक्तमिति भावः ॥

तत्रानुतीरवनवासितपस्विविप्रा शिप्रा तवोर्मिभुजया जलकेलिकाले।
आलिङ्गनानि ददती भविता वयस्या हास्यानुवन्धिरमणीयसरोरुहास्या ॥ ८२॥

तत्रेति ॥ तत्र अवन्त्यां शिप्रा नदी तव वयस्या सखी भविता भविष्यति। (किंभूता—) अनुतीरं तीरसमीपे वनेषु वासिनस्तपस्विनो विप्रा यस्याः। तथा—जलकेलिकाले जलक्रीडासमये ऊर्मिभुजया तरङ्गवाहुना तवालिङ्गनादि ददती। तथा—हास्यस्य विकासस्यानुबन्धो नैरन्तर्यं तेन रमणीयं सरोरुहं कमलमेवास्यं यस्याः। तीरमनु समया तीरवदायताने [illegible] 'अनुर्यत्समया' 'यस्य चायामः' इति वाव्ययीभावः ॥

अस्याधिशय्य पुरमुज्जयिनीं भवानी जागर्ति या सुभगयौवतमौलिमाला।
पत्याऽर्धकायघटनाय मृगाक्षि तस्याः शिष्या भविष्यसि चिरं वरिवस्ययापि ॥ ८३॥

अस्येति ॥ हे मृगाक्षि, या भवानी पार्वती अस्य उज्जयिनीपुरम् अधिशय्य [illegible] स्फुरद्रूपा वर्तते। किंभूता—सुभगं सुन्दरं यौवनं स्त्रीवृन्दं तस्य मौलि[illegible] तस्या भवान्या वरिवस्यया शुश्रूषया एतेन पत्या अर्धकायघटनाय शिष्य[illegible] द्वारेण प्राणेशार्धशरीरत्वं सुलभमित्यर्थः। रूपेण शिष्या जातैव सेवयापि [illegible] चापेरर्थः। स्वीयं प्राणेशार्धत्वं तवापि करिष्यतीत्यर्थः। पुरम्, 'अधि[illegible]र्थ' कर्मत्वम्। भवानी, 'इन्द्रवरुण—' इति पुंयोगे ङीषानुकौ ॥

निःशङ्कमङ्कुरितता रतिवल्लभस्य देवः स्वचन्द्रकिरणामृतसेचनेन [illegible]
तत्रावलोक्य सुदृशां हृदयेषु रुद्रस्तद्देहदाहफलमाह स किं न वि[illegible]

निःशङ्कमिति ॥ तत्रोज्जयिन्यां स देवो रुद्रः स्वचन्द्रकिरणामृतसेचनेन सु[illegible] रतिवल्लभस्य कामस्य निःशङ्कं निर्भयमङ्कुरिततां प्रादुर्भावमवलोक्य तद्देहदाहस्य [illegible] फलमाह किं ब्रूते वयं तत् न विद्मः। तत्रत्याः स्त्रियः सर्वदा सकामा दृष्ट्वा [illegible] दाहो व्यर्थ एव जात इत्यर्थः। पुनः सद्यलघोत्पत्तेः ॥

१ 'तस्मिन्' इति जीवातुसंमतः पाठः।

पल्लवः, अथवा नखयुक्तो भैमीकर इति संदेहविषयत्वयोग्योऽपीत्यपिशब्दार्थः । यतः—अन्तः मध्ये त्वदास्येन हृततारत्वधीपमुखनिर्माणार्थे हृतः मध्यदेशसंबन्धिश्रेष्ठभागो यस्य एवंभूतो वा तुषारभानुश्चन्द्रस्तस्य शोभानुकारित्वात्तदाकारं करिदन्तजकङ्कणं तदेवाङ्कश्चिह्नं यस्य । हस्तिदन्तवलययुक्तो भैमीकरः, तद्रहितश्च पल्लव इति पल्लवमध्ये करः सुखेन ज्ञायत इत्यर्थः । तत्रत्याः स्त्रियः प्रायशो दन्तवलयानि बिभ्रति ॥

तत्त्यः श्रमाम्बु सुरतान्तमुदा नितान्तमुत्कण्टके स्तनतटे तव संचरिष्णुः ।
खञ्जन्प्रभञ्जनजनः पथिकः पिपासुः पाता कुरङ्गमदपङ्किलमप्यशङ्कम् ॥१०९॥

तत्त्य इति ॥ हे भैमि, तत्त्यः वृन्दावने जातः प्रभञ्जनजनो वायुलक्षः, वायुलक्षणो वा जनः कुरङ्गमदेन कस्तूरिकया पङ्किलं कलुषमपि श्रमाम्बु सुरतश्रमजनितं घर्मोदकं अशङ्कं निःशङ्कं पाता पास्यति । अपनेष्यतीत्यर्थः । किंभूतः—सुरतान्तमुदा सुरतावसानहर्षेण नितान्तमुत्कण्टके रोमाञ्चिते तव स्तनतटे संचरिष्णुः संचरणशीलः । तथा—खञ्जन्वृक्षादिबाहुल्येन मन्दीभवन् । पथिको नित्यं मार्गस्थः । अत एव पिपासुस्तृषार्तः । अन्योऽपि पान्थः कण्टकिते देशे संचरिष्णुः । अत एव श्रमकण्टकत्वात्खञ्जन्पथि दुरवस्थानेष्वनिर्मलोदकप्राप्त्यभावात्कर्दमयुक्तमपि जलं निर्विचारं पिबति ॥

पूजाविधौ मखभुजामुपयोगिनो ये विद्वत्कराः कमलनिर्मलकान्तिभाजः ।
लक्ष्मीमनेन दधतेऽनुदिनं वितीर्णैस्ते हाटकैः स्फुटवराटकगौरगर्भाः ॥११०॥

पूजेति ॥ ये विदुषां पण्डितानां कराः मखभुजां देवानां पूजाविधावुपयोगिनः तत्पराः । तथा—कमलेन दानसंबन्धिना जलेन निर्मलकान्तयः । अथ च पद्मतुल्याः । ते विद्वत्करा अनेन राज्ञानुदिनं प्रतिदिनं वितीर्णैर्दत्तैर्हाटकैः सुवर्णैः कृत्वा लक्ष्मीं दधते धारयन्ति । किंभूताः—सुवर्णधारणादेव स्फुटः प्रकटः बीजकोशस्तद्वद्गौरगर्भा गौरमध्याः । पद्मा अपि देवपूजाविधावुपयोगिनः, स्फुटेन बीजकोशेन गौरमध्याः । अतितरां दातायमिति भावः । 'बीजकोशो वराटकः' इत्यमरः । कमलमध्यस्थिता बीजगर्भा कर्णिकेत्यर्थः ॥

वैरिश्रियं प्रतिनियुद्धमनाप्नुवन्यः किंचिन्न तृप्यति धरावलयैकवीरः ।
स त्वामवाप्य निपतन्मदनेषुवृन्दस्यन्दीनि तृप्यतु मधूनि पिबन्निवायम् १११

वैरीति ॥ यः राजा वैरिश्रियं वैरिराजलक्ष्मीं प्रति लक्ष्यीकृत्य वैरिभिः सह नियुद्धं नितरां युद्धमनाप्नुवन् अप्राप्नुवन् किंचिदल्पमपि न तृप्यति न तुष्यति । यतः—धरावलये एकः वीरः शूरः । युद्धमकृत्वैव वैरिभिर्दत्ताः श्रियो लब्ध्वापि [illegible] । सोऽयं अद्य त्वामवाप्य [illegible] नितरां पतन्तो मदनेषवः पुष्पाणि तेषां वृन्दानि तेभ्यः स्यन्दीनि मधूनि पुष्परसानिव पिबन्निव तृप्यतु । [illegible] । एवं [illegible] भावः । 'अनाप्नुवन्' इति पाठे (प्रति) नियुद्धं युद्धं युद्धं प्रति [illegible] वैरिश्रियमनुपभुञ्जानः तृप्यति स त्वां प्राप्य तृप्यतु । [illegible] । अन्योऽपि [illegible] ॥

---

१ [illegible] इति जीवातुः ।

करणं मणिं कङ्कणरत्नं पश्य । किंभूतं मणिम्—ज्याघातजेन किणेनोपरज्य रक्तीकृत्य ... जकस्य रिपुनृपवृन्दस्य तदर्थं धूमकेतुतारावनाणं धूमकेतुनक्षत्रवदाचरितम् । धूमकेतुः ... मुदितं सद्यथा राजक्षयं करोति तथेति । नैकविधं विविधं प्रवालं यथेति वा । ... तद्राजकं च । अन्यथा आदिवृद्धिः स्यात् । संज्ञापूर्वकविधेरनित्यत्वाद्वृद्ध्यभावः ॥

एतद्भुजारणिसमुद्भवविक्रमाग्निचिह्नं धनुर्गुणकिणः खलु धूमलेखा ।
जातं ययारिपरिपन्मशकार्थयाश्रुविश्राणनाय रिपुदारदृगम्बुजेभ्यः ॥ १०५ ॥

एतदिति ॥ धनुर्गुणकिणः ज्याघातजः किणः एतस्य भुज एवारणिर्वह्न्युत्पत्तिकाष्ठं तस्मा-त्समुद्भवविक्रमाग्निः समुत्पन्नप्रतापवह्निस्तस्य चिह्नं चिह्नभूता धूमलेखा खलु निश्चये । 'त-धूमोऽग्नेर्लिङ्गम् । यया धूमलेखया रिपूणां दारास्तेषां दृगम्बुजेभ्योऽश्रुविश्राणनाय रोदनवि-तरणाय जातम् । पतिवधादित्यर्थः । किंभूतया—अरिपरिषद्वैरिसङ्घस्तद्रूपा मशकास्तेषां निरासः ... पोऽर्थः प्रयोजनं यस्याः सा तया । अत्रार्थशब्दो निवृत्तिवचनः । धूमलेखा हि दृशां बाष्पं जनयति । अतिशूरोऽयमिति भावः । 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः ॥

श्यामीकृता मृगमदैरिव माथुरीणां धौतैः कलिन्दतनयामधिमध्यदेशम् ।
तत्रात्तकालियमहाह्रदनाभिशोभा रोमावलीमिव विलोकयितासि भूमेः ॥ १०६ ॥

श्यामीति ॥ तत्र मथुरायां अधिमध्यदेशे कलिन्दतनयां यमुनां भूमेः रोमावलीमिव त्वं विलोकयितासि । किंभूताम्—माथुरीणां मथुरास्त्रीणां धौतैर्जलक्रीडासु क्षालितैर्मृगमदैः कस्तूरीभिरिव श्यामीकृतां न तु स्वतः श्यामामित्यर्थः । तथा—आत्ता प्राप्ता कालियस्य सर्पराजस्य महाह्रदेन कृत्वा नाभिशोभा यया ताम् । रोमराजिः स्वतः श्यामापि मृगमदैः श्यामतरा, कालियमहाह्रदवद्गम्भीरया नाभ्या प्राप्तशोभा च, मध्यप्रदेशे च भवति । अनेन सह कालिन्द्यां जलक्रीडां कुर्विति भावः ॥

गोवर्धनाचलकलापिचयप्रचारनिर्वासिताहिनि घने सुरभिप्रसूनैः ।
तस्मिन्ननेन सह निर्विश निर्विशङ्कं वृन्दावने वनविहारकुतूहलानि ॥ १०७ ॥

गोवर्धनेति ॥ हे भैमि, तस्मिन् श्रीकृष्णक्रीडयातिप्रसिद्धे ब्रजस्थे वृन्दस्य ... वृन्दावनं मथुरासमीपवनं तस्मिन् । वृन्दस्य गोपालसङ्घस्य वने वा । त्वं अनेन राज्ञा सह निर्विशङ्कं सर्पादिभयरहितं यथा तथा पुष्पावचयादीनि वनविहारकुतूहलानि वनक्रीडाकौतु-कानि निर्विशोपभुङ्क्ष्व । किंभूते—गोवर्धननामाचलो गिरिस्तत्र वर्तमानाः कलापिचयाः मयू-रसङ्घास्तेषां प्रचारेण संचरणेन निर्वासिता निष्कासिता अहयः सर्पा यस्मात् । तथा—घने निबिडच्छाये । तथा—सुरभीणि सुगन्धीनि प्रसूनानि पुष्पाणि यस्मिन् । वृन्दावने 'वनं गिर्योः संज्ञायाम्' इति कोटरादित्वाद्दीर्घः ॥

भावी करः कररुहाङ्कुरकोरकोऽपि तद्वल्लिपल्लवचये तव सौख्यलक्ष्यः ।
अन्तस्त्वदास्यहृतसारतुषारभानुशोकानुकारिकरिदन्तजकङ्कणाङ्कः ॥ १०८ ॥

भावीति ॥ हे भैमि, तस्य वृन्दावनस्य वल्लिपल्लवचये लताकिसलयवृन्दमध्ये करः ... एव नखा एवाङ्कुरास्त एव कोरका यस्य एवंभूतस्तव करः सौख्येनानायासेन लक्ष्यो दृश्यः भावी भविष्यति । रक्तत्वादतिमृदुलत्वात्कोरकाकारनखत्वात्कोरकयुक्तत्वाच्च किसलयं कोरकयुक्तः ...

१ 'सामान्यविशेषभावात्परिकरालंकारः' इति जीवातुः ।

तस्मादियं क्षितिपतिक्रमगम्यमानमध्वानमैक्षत नृपादवतारिताक्षी।
तद्भाववोधबुधतां निजचेष्टयैव व्याचक्षते स शिविकानयने नियुक्ताः ११२

तस्मादिति ॥ तस्मान्नृपादवतारिताक्षी इयं भैमी क्षितिपतिनी राजभिः क्रमेण पर्यायेण गम्यमानं राजसंनिधिगं क्रमेण गम्यमानं वा अध्वानमैक्षत। शिविकानयने नियुक्ता जन्याः निजचेष्टयैवान्यप्रापणरूपेण स्वव्यापारेणैव नृपरत्नेषु प्रतिबिम्बवशेन तस्या भैम्या भावोऽभिप्रायस्तस्य बोधो ज्ञानं तेन बुधतां पण्डिततां व्याचक्षते स ज्ञापितवन्तः। तामन्यं नृपं प्रापयामासुरित्यर्थः। अन्योऽपि भावबोधेन निजं पाण्डित्यं प्रकटयति ॥

भूयोऽपि भूपमपरं प्रति भारती तां त्रस्यच्चमूरुचलचक्षुषमाचचक्षे।
एतस्य काशिनृपतेस्त्वमवेक्ष्य लक्ष्मीमक्ष्णोः सुखं जनय खञ्जनमञ्जुनेत्रे ११३

भूय इति ॥ भारती त्रस्यन् यश्चमूरुर्मृगः तद्वच्चलचक्षुषं चञ्चलनेत्रां तां भैमीं प्रत्यपरं भूयोऽप्याचचक्षे। हे खञ्जननेत्रवन्मञ्जुनेत्रे सुन्दरनेत्रे, त्वं एतस्य काशिनृपतेर्लक्ष्मीं कायकान्तिमवेक्ष्य अक्ष्णोः सुखं जनय। एतदीयाक्षिलक्ष्मीमवेक्ष्येति वा। काशिका इत्यादिप्रयोगदर्शनाद्ध्रस्वोऽपि काशिशब्दः ॥

एतस्य सावनिभुजः कुलराजधानी काशी भवोत्तरणधर्मतरिः स्मरारेः।
यामागता दुरितपूरितचेतसोऽपि पापं निरस्य चिरजं विरजीभवन्ति॥११४॥

एतस्येति ॥ हे भैमि, या काशी स्मरारेर्हरस्य भवोत्तरणेऽस्य संसारसमुद्रस्य तरणे मूल्यानपेक्षत्वाद्धर्मनौका, सा एतस्यावनिभुजो राज्ञः कुलराजधानी वंशपरम्परानिवासस्थानम्। संसारोत्तारणत्वमेवाह—यां काशीमागताः प्राप्ताः दुरितपूरितचेतसोऽप्यतिपापिनोऽपि चिरजं चिरकालसंचितं पापं निरस्य विरजीभवन्ति विगतरजस्का भवन्ति विगतरजोगुणाः सत्त्वप्रधाना भवन्ति। मोक्षं लभन्त इत्यर्थः। धर्मतरीत्यनेन सर्वस्याप्यनिवारणं सूचितम्। अविरजसोऽपि विरजसो भवन्ति। 'अरुर्मनः–' इति च्विः सलोपश्च ॥

आलोक्य भाविविधिकर्तृकलोकसृष्टिकष्टानि रोदिति पुरा कृपयैव रुद्रः।
नामेच्छयेति सिपमात्रमधत्त यत्तां संसारतारणतरीमसृजत्पुरीं सः॥११५॥

आलोक्येति ॥ रुद्रः भावीनि भविष्यन्ति विधिकर्तृकाया ब्रह्मकर्तृकाया लोकसृष्टेः कष्टानि दुःखान्यालोक्य विचार्य पुरा कृपयैव रोदिति अरोदीत्। ब्रह्मललाटादुत्पन्नो रुदन् ब्रह्मणा किमिति रोदिषीति पृष्टः सन् नामेच्छया रोदिमीत्युक्तेन ब्रह्मणा कृतं नामेति। नामेच्छया सिपमात्रमधत्त। वस्तुतस्तु लोकानां दुःखं दृष्ट्वारुदत्, नतु रुद्रनामेच्छयेत्यर्थः। यत् यतः स रुद्रः तां पुरीं संसारसागरतरीं संसारसमुद्रतारणनौकां मोक्षदायिनीमसृजत्। काशीमागतस्य संसारदुःखानि पराभवं कर्तुं न शक्नुवन्ति। मोक्ष एव भवतीति भावः। पुरा रोदिति, 'पुरि लुङ् चास्मे' इति लट् ॥

१ दीर्घस्यापि 'केणः' इति ह्रस्वादेशे 'काशिका' इति रूपसिद्धौ तत्प्रयोगस्य ह्रस्वान्तकाशिशब्दप्रमाणप्रतारणमात्रम्। काशधातोः 'सर्वधातुभ्य इन्' इति (उणादि) सूत्रेण सिद्धात् काशिशब्दात् 'कृदिकारात्–' इति ङीष्विकल्पे रूपद्वयसिद्धिर्निर्बाधा। तथा च केशवः–'पुरी श्रेष्ठा तीर्थराजी जितरी ...। काशी वाराणसी काशिर्वरणासी वराणसी' इति ॥

निष्कृपोऽयमिति भावः । त्वदुग्रविरहविदारिहृदयावस्थमेनमनुगृहाणेति भावः । 'कन्दलं तु
कपाले स्यादुपरागे नवाङ्कुरे' इति विश्वः ॥

किं न द्रुमा जगति जाग्रति लक्षसंख्यास्तुल्योपनीतपिककाकफलोपभोगाः।
स्तुल्यस्तु कल्पविटपी फलसंप्रदानं कुर्वन्स एष विबुधानमृतैकवृत्तीन् ॥१२५॥

किमिति ॥ तुल्यः समान उपनीतो दत्तः पिकानां कोकिलानां काकानां फलैः
उपभोगो जीवनवृत्तिर्यैरेवंविधा आम्रादयो लक्षसंख्या द्रुमाः जगति भुवनमध्ये किं
जाग्रति विद्यन्ते । अपितु विद्यन्त एव, परं वर्णनीया न भवन्तीत्यर्थः । तु पुनः
तैकवृत्तीन्सुधैकजीविनो विबुधान्देवान्फलसंप्रदानं स्वीयफलानां दानपात्रं कुर्वन्स एष
विटपी स्तुत्यः स्तोतुमर्हः । अतिप्रसिद्धत्वेन कल्पवृक्षः पुरः स्थित इव एष इत्यभिनय
दिष्टः । उत्तमजातीयानामुत्तमफलवृत्तीनां पिकानां हीनजातीयानां कदर्यवृत्तीनां काकानां
तुल्यदानात्साम्यापादनादतिमूर्खत्वादाम्रादयो न स्तुत्याः । कल्पवृक्षस्तु रसाधिक
नेभ्यो देवेभ्य एव स्वफलानि ददानो विशेषज्ञत्वात्स्तोतुमर्ह इत्यर्थः । अथ च—पण्डितेषु
मूर्खेषु च तुल्यदानात्तारतम्याज्ञानादचेतनद्रुमतुल्या बहवो राजानः कति न सन्ति, परं
कवृत्तीनयाचितवृत्तीन्वा मोक्षैकवृत्तीन्मुमुक्षून्वान्नादिदानपात्रं कुर्वन्नतिवितरणशीलत्वात्कल्प
क्षतुल्यः काशीश्वर एव विशेषज्ञः स्तोतव्य इति भङ्ग्या निहितम् । सर्वनृपाधिकः सर्वेभ्
दाता पण्डितश्चायं तस्मादेनं वृणीष्वेति भावः । 'द्वे याचितायाचितयोर्यथासंख्यं मृतामृते
अमृतं यज्ञशेषे स्यात्' इत्यमरः ॥

अस्मै करं प्रवितरन्तु नृपा न कस्मादस्यैव तत्र यदभूत्प्रतिभूः कृपाणः ।
दैवाद्यदा प्रवितरन्ति न ते तदैव नेदंकृपा निजकृपाणकरग्रहाय ॥ १२६ ॥

अस्मा इति ॥ सर्वे नृपाः अस्मै नृपाय करं बलिं कस्मात्कथं न प्रवितरन्तु प्रयच्छन्तु
अथ च—दासभूतत्वात्स्वामिनेऽस्मै हस्तं कथं न वितरन्तु । दासेन हि स्वामिने ह
दीयते । यद्यस्मात् तत्र द्विविधेऽपि करदाने कृपाणः खड्गः अस्यैव प्रतिभूरभूत् । ते राजा
दैवाद्विनाशकाले विपरीतदैववशाद्यदा न द्विविधमपि करं प्रवितरन्ति ददति तदा निज
कृपाणस्य हस्तेन धारणाय इदंकृपा अस्य कृपा नैव भवति तदा क्रुद्धः सन् खड्गेन
तान्निहत्य बलात्करं गृह्णात्येव । तदैवेत्यविलम्बार्थ एवकारो वा । हस्ते गृहीतखड्गमेनं
भीताः सन्तस्ते बलिमस्मै प्रयच्छन्ति । अथ च—दासा भूत्वा हस्तदानं प्रयच्छन्ति
उभयविधकरदाने तव खड्गस्य प्रतिभूत्वात्ते चेन्न प्रयच्छन्ति तर्हि त्वत्त एवोभयविधं
गृह्णामीत्युक्त्वा बलात्करं गृह्णातीति भावः । लोके ऋणी चेन्न प्रयच्छति तदा बलात्
लग्नक एव गृह्यते । अस्य कृपा इति षष्ठीसमासः ॥

एतद्बलैः क्षणिकतामपि भूखुराग्रस्पर्शायुषां रयरसाद्समापयद्भिः ।
सहस्रदृगर्वगर्वः ॥ १२७ ॥

तस्य अर्वाश्च उच्चैःश्रवा

एतदिति ॥ एतद्बलैरेतस्य

१ अत्र तु

इति जीवातुः ।

निष्कृपोऽयमिति भावः। त्वदुग्रविरहविदारिहृदयावस्थमेनमनुगृहाणेति भावः। 'अन्तं कपाले स्यादुपरागे नवाङ्कुरे' इति विश्वः॥

किं न द्रुमा जगति जाग्रति लक्षसंख्यास्तुल्योपनीतपिककाकफलोपभोगाः।
स्तुत्यस्तु कल्पविटपी फलसंप्रदानं कुर्वन्स एष विबुधानमृतैकवृत्तीन्॥१२५॥

किमिति॥ तुल्यः समान उपनीतो दत्तः पिकानां कोकिलानां काकानां फलैः उपभोगो जीवनवृत्तिर्यैरेवंविधा आम्रादयो लक्षसंख्या द्रुमाः जगति भुवनमध्ये किं न जाग्रति विद्यन्ते। अपितु विद्यन्त एव, परं वर्णनीया न भवन्तीत्यर्थः। तु पुनः अमृतैकवृत्तीन्सुधैकजीविनो विबुधान्देवान्फलसंप्रदानं स्वीयफलानां दानपात्रं कुर्वन्स एष कल्पविटपी स्तुत्यः स्तोतुमर्हः। अतिप्रसिद्धत्वेन कल्पवृक्षः पुरः स्थित इव एष इत्यनिर्दिष्टः। उत्तमजातीयानामुत्तमफलवृत्तीनां पिकानां हीनजातीयानां कदर्यवृत्तीनां काकानां तुल्यदानात्साम्यापादनादतिमूर्खत्वादाम्रादयो न स्तुत्याः। कल्पवृक्षस्तु रसाधिकामृतभोजिभ्यो देवेभ्य एव स्वफलानि ददानो विशेषज्ञत्वात्स्तोतुमर्ह इत्यर्थः। अथ च—पण्डितेषु मूर्खेषु च तुल्यदानात्तारतम्याज्ञानादचेतनद्रुमतुल्या बहवो राजानः कति न सन्ति, परं मोक्षैकवृत्तीनयाचितवृत्तीन्वा मोक्षैकवृत्तीन्मुमुक्षून्वान्नादिदानपात्रं कुर्वन्नतिवितरणशीलत्वात्कल्पवृक्षतुल्यः काशीश्वर एव विशेषज्ञः स्तोतव्य इति भङ्ग्यानिहितम्। सर्वनृपाधिकः सर्वेभ्यो दाता पण्डितश्चायं तस्मादेनं वृणीष्वेति भावः। 'द्वे याचितायाचितयोर्यथासंख्यं मृतामृते। अमृतं यज्ञशेषे स्यात्' इत्यमरः॥

अस्मै करं प्रवितरन्तु नृपा न कस्मादस्यैव तत्र यदभूत्प्रतिभूः कृपाणः।
दैवाद्यदा प्रवितरन्ति न ते तदैव नेदंकृपा निजकृपाणकरग्रहाय॥१२६॥

अस्मा इति॥ सर्वे नृपाः अस्मै नृपाय करं बलिं कस्मात्कथं न प्रवितरन्तु प्रयच्छन्तु। अथ च—दासभूतत्वात्स्वामिनेऽस्मै हस्तं कथं न वितरन्तु। दासेन हि स्वामिने हस्तो दीयते। यद्यस्मात् तत्र द्विविधेऽपि करदाने कृपाणः खड्गः अस्यैव प्रतिभूरभूत्। ते राजानो दैवाद्विनाशकाले विपरीतदैववशाद्यदा न द्विविधमपि करं प्रवितरन्ति ददति तदा निजस्य कृपाणस्य हस्तेन धारणाय इदंकृपा अस्य कृपा नैव भवति तदा क्रुद्धः सन् खड्गेनैव तान्निहत्य बलात्करं गृह्णात्येव। तदैवेत्यविलम्बार्थ एवकारो वा। हस्ते गृहीतखड्गेनैव नीताः सन्तस्ते बलिमस्मै प्रयच्छन्ति। अथ च—दासा भूत्वा हस्तदानं प्रयच्छन्ति। उभयविधकरदाने तव खड्गस्य प्रतिभूत्वात्ते चेन्न प्रयच्छन्ति तर्हि त्वत्त एवोभयविधं गृह्णामीत्युक्त्वा बलात्करं गृह्णातीति भावः। लोके ऋणी चेन्न प्रयच्छति तदा बलात्कारेण लग्नक एव गृह्यते। अस्य कृपा इति षष्ठीसमासः॥

पतद्बलैः क्षणिकतामपि भूखुराग्रस्पर्शायुषां रयरसादसमापयद्भिः।
दर्पैकपेयकेवलनभःक्रमणप्रवाहैर्वाहैरलुप्यत सहस्रदृगवेगर्वः॥१२७॥

पतदिति॥ पतद्बलैरेतस्य सैन्यभूतैर्वाहैरश्वैः सहस्रदृगिन्द्रः तस्य अश्वः उच्चैःश्रवाः

१ 'अत्र मुमुक्षोरनन्यसाधारणेन वत्रादितदक्षम्.....' इति जीवातुः। २ 'अत्रास्य तु कल्पवृक्षाद्.....' इति जीवातुः।

गर्वः खुराग्रैर्भूमिं न स्पृशामि, गगने चरामि, वेगवांश्च मादृशोऽन्यो न विद्यत इत्येवंरूपः अलुप्यत लुप्तो विनाशितः। किंभूतैर्वाहैः—भुवः खुराग्रैः कृत्वा यः स्पर्शस्तद्रूपाणि यान्यायूंषि स्थितयस्तेषां क्षणिकतामपि क्षणमात्रं वा स्थापिता तामपि स्वरसाद्वेगाभिनिवेशादसमापयद्भिः। क्षणमात्रमपि खुराग्रैर्भूमिमस्पृशद्भिरित्यर्थः। तथा—दृग्भिर्नेत्रैः पेयाः सादरमवलोकनीयाः केवलं नभःक्रमणप्रवाहाः गगनगमनपरम्परा येषाम्। वेगवशादलक्ष्यभूगमनैः। केवलं नभसि क्रमणं येषां तेषां वायूनां प्रवाहाः सङ्घाः। दृक्पेया दृश्याश्च ते वायुसङ्घाश्च तद्रूपैरिति वा। वायोः सवेगत्वेऽप्यचाक्षुषत्वादेतेषां तत्तुल्यवेगत्वेऽपि चाक्षुषत्वाचाक्षुषवायुतुल्यैः वायोरप्याधिकैरेवंविधैर्वा। 'सहस्रगर्वगर्वः' इति पाठे सूर्याश्वानामित्यर्थः॥

तद्वर्णनासमय एव समेतलोकशोभावलोकनपरा तमसौ निरासे।
मानी तया गुणविदा यदनादृतोऽसौ तद्भूभृतां सदसि दुर्यशसेव मम्लौ १२८

तद्वर्णनेति॥ तस्य काशीश्वरस्य वर्णनासमय एव समेताः समागता लोका नूतनराजलोकास्तेषां शोभा तस्या अवलोकनपरा असौ भैमी तं काशीश्वरं निरासे निराचकार। अन्यावलोकनेनैव निराकरणं जातमित्यर्थः। तया गुणविदातिविदुष्या भूभृतां सदसि राजसभायां यद्यस्मान्मानी अभिमानवान् असावनादृतोऽवज्ञातः, ततस्माद् दुर्यशसेवाकीर्त्येव मम्लौ। लज्जावशात्कालिमानं प्राप्त इत्यर्थः। गुणिना हि राजसमक्षं कृताऽवज्ञाभिमानिनो दुर्यशसे भवति, न तु मूर्खेण कृता। निरासे, 'उपसर्गादस्यत्यूह्योः' इति तङ्। 'परासे' इति क्वचित्पाठः॥

सानन्तानाप्यतेजःसखनिखिलमरुत्पार्थिवान्दिष्टभाज-
श्चित्तेनाशाजुषस्तान्सममसमगुणान्मुञ्चती गूढभावा।
पारेवाग्वर्तिरूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गी
निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः॥ १२९॥

सेति॥ सा भैमी एवंभूतं नललक्षणं पुरुषमनु लक्ष्यीकृत्य भूयोऽतिशयेन बहु अत्यर्थं तत्परीभूय नल एव तात्पर्यं यस्या एवंविधा भूत्वा उपनिषदो रहस्यभूतायाः श्रुतेरुपमा यस्या एवंविधा उपनिषत्तुल्या आसीत्। किंभूता सा—तेजसः सखायस्तेजःसखाः तेजस्विनो निखिलाः सकला मरुतश्च देवाः पार्थिवाश्च राजानस्तानाप्य प्राप्य एतत्समीपं गत्वा समं युगपत्त्यजन्ती। यतो—गूढभावा गूढाशया नलविषयमनुरागं गोपायन्ती। किंभूतांस्तान् —अनन्तानवधीन्गणयितुमशक्यान्। तथा—दिष्टभाजः स्वयंवरकाले समागतान्दैवभाजो बहुसंपदो वा। तथा—चित्तेन चेतसा आशाजुषो भैमीप्राप्त्यभिलाषिणः सस्निग्धनिलाषिणः। तथा—असमगुणानतुल्यसौन्दर्यादिगुणान्परस्पराद्गुणैराधिकान्। पुनः किंभूता सा—शुभाङ्गी सुन्दरी। किंभूतं पुरुषम्—पारेवाग्वर्तिरूपम्। वाचःपारे परतीरे वर्तमानशीलं वागगोचरं वर्णयितुमशक्यं सौन्दर्यं यस्य। अतिसुन्दरम्। तथा—चिदम्भोधिं ज्ञानसमुद्रं सकलशास्त्रपारगम्। तथा—निःसीमानन्दमपरिमितानन्दं, सदोत्साहशालिसुखं, भैमीप्राप्तिनिश्चयाद्वा निःसीमानन्दम्। एकं मुख्यम्। निःसीमानन्दे यथा तथा तत्परीभूतेति वा। समं प्राप्येति वा। सममाशाजुष इति वा। मया राज्यलक्ष्म्या सह वर्तमानमिति पुरुषविशेषणं वा। उपनिषदपि—अनन्तेनाकाशेन सहितान्सानन्तान्। तथा—दिष्टमावः

कालसहितान्, चित्तेन मनसा समं सार्धमाशाजुषो दिग्भाजो दिङ्मनोयुक्तान्, असमगुणान् तुल्यसंख्यरूपरसगन्धादिगुणयुक्तान्। तथा—वैशेषिकादिप्रक्रियासिद्धा आप्या उदकजन्याः पदार्थाः, तेजः तैजसाः पदार्थाश्च, आप्यतेजसां सखाय आप्यतेजःसखाः आप्यतैजसपदार्थसहिता निखिलाः सकला ये मरुतो वायवः पृथिवीसंबन्धिनः पार्थिवाश्च पदार्थास्तान्। यद्वा अनन्तान्विनाशरहितान् आप्यतेजांसि च खेनाकाशेन सहिताश्च ते निखिलमरुत्पार्थिवाश्च तान्। पृथिव्यप्तेजोवाय्वाकाशकालदिङ्मनोलक्षणानष्टौ पदार्थान्युगपदद्वैतप्रतिपादनेन निराकुर्वती। अविद्यमानोऽन्तो विनाशो येषां तेऽनन्ता नित्याः सामान्यविशेषसमवायास्तैः सहितानाप्यादीनष्टौ पदार्थान्। तथा—न सममसमं पञ्चसंख्यायोगित्वाद्विषमसंख्यं कर्म च गुणाश्च रूपादयस्तांश्च षडपि पदार्थान् हेयत्वेन प्रतिपादयन्ती वा। तथा—गूढभावा अतिगहनत्वाद्दुर्ज्ञेयाभिप्राया। गूढस्तिरस्कृतो भावः सत्ता यया, कस्यापि वस्तुनः सत्त्वमनङ्गीकुर्वतीति वा। गूढो रक्षितः ब्रह्मणः सत्तालक्षणो भावो ययेति वा। तथा—शुभाङ्गी व्याकरणादिषडङ्गयुक्ता। उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गयुक्ता वा। यमनियमाद्यङ्गोपेता वा। 'यतो वाचो निवर्तन्ते' इत्यादिश्रुतिप्रामाण्याद्वागगोचरस्वरूपम्। तथा—चितो ज्ञानस्य समुद्रम्। चिच्चासावम्भोधिश्चेति वा। निःसीमश्चासावानन्दश्च एवंभूतं परमानन्दरूपमात्मलक्षणनवमद्रव्यपदार्थरूपम्। 'एकमेवाद्वितीयं ब्रह्म' इति श्रुतिप्रामाण्याददद्वितीयं एकं ब्रह्मरूपं परमपुरुषमुद्दिश्य अलयं तत्रैव परब्रह्मस्वरूपपरमपुरुषे तात्पर्यं यस्या एवंभूता भवति। 'अनन्तं सुखलं खम्' इत्यमरः। आप एव आप्यमिति चातुर्वर्ण्यादित्वात्ष्यञ्। शुभाङ्गी, 'अङ्गगात्र-' इति ङीष्। उपनिषत्पक्षे शुभाङ्गीव शुभाङ्गी॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
शृङ्गारामृतशीतगावयमगादेकादशस्तन्महा-
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः॥ ११॥

श्रीहर्षमिति॥ शृङ्गारलक्षणस्यामृतस्य शीतगौ चन्द्ररूपे। शीतगौ भाषितपुंस्कत्वम्॥

इति श्रीवेदरकरोपनामकश्रीमन्नृसिंहपण्डितात्मजनारायणकृते
नैषधीयप्रकाशे एकादशः सर्गः॥

द्वादशः सर्गः।

इदानीं नूतनसमागतराजवर्णनार्थं द्वादशं सर्गमारभते—

प्रियाह्रियालम्ब्य विलम्बमाविला विलासिनः कुण्डिनमण्डनायितम्।
समाजमाजग्मुरथो रथोत्तमास्तमा समुद्रादपरेऽपरे नृपाः॥ १॥

प्रियेति॥ अथो अनन्तरं अपरे अपरे अन्ये अन्ये नृपाः आसमुद्रात्समुद्रमर्यादीकृत्य। दिगन्तेभ्यः सकाशादित्यर्थः। कुण्डिनस्य मण्डनायितं भूषणवदाचरितं अलंकारं तमनं

स्वयंवरसमाजमनु । किंभूताः—प्रियान्यः स्वनायिकान्यः सकाशाद्या हीः तया तासामनुरागजनितसुखदाक्षिण्येन कृत्वा विलम्बं स्थैर्यमालम्ब्य आविला व्याकुलान्तःकरणाः । प्रियासुखदाक्षिण्यानुरोधेनास्माकं विलम्बे जाते भैमीस्वयंवरो जातो मा भूदिति बुद्ध्या नातिसोत्साहाः । तथा—विलासिनः शृङ्गारसमीलसहिताः । तथा—रथोत्तमाः श्रेष्ठरथाः । इत्यनेन विलम्बे जातेऽपि शीघ्रागमनं सूचितम् । विलासिनः, 'वौ कषलस–' इति घिनुण् । रथेषूत्तमा इति समासः । अपरे अपरे, वीप्सायां द्विरुक्तिः ॥

ततः स भैम्या ववृते वृते नृपैर्विनिःश्वसद्भिः सदसि स्वयंवरः ।
चिरागतैस्तर्कितनद्विरागितैः स्फुरद्भिरानन्दमहार्णवैर्नवैः ॥ २ ॥

तत इति ॥ ततः सदसि समाजे स भैम्याः स्वयंवरो ववृते । किंभूते सदसि—भैम्याः स्वस्मिन्वैराग्येण विनिःश्वसद्भिर्विशेषेण सुकश्वासैः चिरागतैः पूर्वमागतैर्नृपैः वृते । तथा—तर्किता ऊहिता तेषु पूर्वागतेषु राजसु विरागिता । अर्थाद्भैम्याः । यैस्तैः, स्फुरद्भिः शृङ्गारभङ्ग्या प्रकाशमानैः । तथा—एते न वृताः स्वयंवरशेषं प्राप्तानस्मानियं प्रायेण परिष्यतीति बुद्ध्या आनन्दस्य महार्णवैरगाधसमुद्रैः प्रमुदिततरैर्नवैस्तत्कालागतैर्नृपैः वृते ॥

चलत्पदस्तत्पदयन्त्रणेङ्गितस्फुटाशयामासयति स राजके ।
श्रमं गता यानगतावपीयमित्युदीर्य धुर्यः कपटाज्जनीं जनः ॥ ३ ॥

चलदिति ॥ चलन्ति पदानि यस्य पुरस्ताद्गच्छन् धुरं वहतीति धुर्यः शिबिकावाहकादिर्जनः जनीं भैमीं राजके राजसमूहमध्ये आसयति स्म आस्थापयत् । किं कृत्वा—यानगतौ अपि शिबिकारोहणेनापि गमने सत्यपि इयं भैमी श्रमं गता निःसहा जातेति कपटाद्व्याजादुदीर्य उक्त्वा । किंभूताम्—शिबिकापटान्तरितेन तत्पदेन भैमीचरणेन यद् यन्त्रणं यन्त्रणा वा पीडनं धुर्यजनस्य तदेव यद् इङ्गितमवस्थापनसूचिका चेष्टा तेन स्फुट आशयो यस्याः [illegible]दशानात्रविषयोऽभिप्रायो यस्यास्ताम् । जनी जायतेऽस्यां गर्भ इति 'जनिघसिभ्यां च' इत्यौणादिके 'जनिवध्योः–' इति वृद्धिनिषेधे 'कृदिकारात्–' इति ङीष् ॥

नृपानुपक्रम्य विभूषितासनान्सनातनी सा सुषुवे सरस्वती ।
विहारमारभ्य सरस्वतीः सुधासरःस्वतीवार्द्रतनूरनूत्थिताः ॥ ४ ॥

नृपानिति ॥ सा सनातनी नित्या सरस्वती देवता विभूषितं स्वसौन्दर्येणालंकृतमासनं यैस्तान्नृपानुपक्रम्य उद्दिश्य सरस्वतीः वाचः सुषुवे । उत्पादितवती । किंभूता वाचः—सुधासरःसु अमृतसमुद्रेषु विहारं जलक्रीडामारभ्य कृत्वा अतीवार्द्रतनूः । तथा—अनु पश्चाद्विलम्बेनोत्थिताः तस्मान्निर्गताः । अतिमधुरा इत्यर्थः । सनातनी, [illegible] च ॥

सुपीप्य वर्णेन सुवर्णकेतकीप्रसूनपर्णादनुपर्णनादयम् ।
निजाननोक्ष्यामपि पावनीमयं मदन्नयो स्थापति नाकिनीपतिः ॥ ५ ॥

सुपीप्येति ॥ [illegible] वर्णेन सुवर्णकेतकीप्रसूनस्य [illegible] प्रका[illegible] [illegible] [illegible]

[illegible]

१ [illegible] २ [illegible]

मयोध्यां मुक्तिपुरीमपि न ध्यायति न स्मरति। परमानन्दरूपत्वान्मुक्तेः सकाशादपि त्वत्प्राप्तिरेतस्याधिकेत्यर्थः। अन्योऽपि विलासी गुणवतीमपि निजां प्रियामचिन्तयन्नन्यामेव ध्यायतीत्युक्तिः। त्वय्यतितरामनुरक्तोऽयमेनं वृणीष्वेति भावः। वर्णात्, 'पञ्चमी विभक्ते' इति पञ्चमी। भवन्मयः, 'सर्वनाम्नो वृत्तिमात्रे–' इति पुंवद्भावः॥

नं पीयतां नाम चकोरजिह्वया कथंचिदेतन्मुखचन्द्रचन्द्रिका।
इमां किमाचामयसे न चक्षुषी चिरं चकोरस्य भवन्मुखस्पृशी॥ ६॥

नेति॥ हे भैमि, चकोरजिह्वया एतस्य ऋतुपर्णस्य मुखमेव चन्द्रस्तस्य चन्द्रिका प्रसन्नतारूपा ज्योत्स्ना कथंचित्केनापि प्रकारेण न पीयतां नाम। चकोरजिह्वया सत्यचन्द्रचन्द्रिका पीयते, इयं त्वलीकमुखचन्द्रिकेति पीयतां मा वा। अत्रास्माकमौदासीन्यमित्यर्थः। परं तु चिरं भवन्मुखस्पृशी त्वदीयमुखसेवनतत्परे चकोरस्य चक्षुषी इमामेतन्मुखचन्द्रचन्द्रिकां किमिति नाचामयसे पाययसे। अपि तु पाययस्व। अलीकत्वात्तादृग्रसाभावाच्चकोरजिह्वापानेऽकृतेऽपि तथा सुन्दरत्वाद्वर्णनायामस्मदादीनामशक्तत्वेऽपि तादृगाह्लादकत्वस्य सौन्दर्यस्य च प्रत्यक्षेण द्रष्टुं शक्यत्वादेतन्मुखचन्द्रचन्द्रिकां चक्षुषी पाययस्वेत्यर्थः। अथ च चकोरजिह्वया भवन्मुखसेवाया अकृतत्वादेतन्मुखचन्द्रचन्द्रिकापानं कर्तुमशक्यमिति युक्तम्। तदीयचक्षुर्भ्यां तु चिरकालमुत्तमस्य भवन्मुखस्य सेवनात्तयोरेतन्मुखचन्द्रचन्द्रिकापानं युक्तम्। उत्तमसेवया हि दुष्प्रापमपि वस्तु सुप्रापं भवतीत्याशयः। चिरकालमेतन्मुखकान्ति सादरं किं न पश्यसि। अपितु पश्य। एनं वृणीष्वेति भावः। यद्वा जिह्वया अल्प एव स्वाद्ये सामर्थ्यादेतन्मुखचन्द्रचन्द्रिकायाश्चातिबहुलाच्चकोरजिह्वयेयं कथंचिन्न पीयतां नाम। त्वन्मुखस्पृशोश्चकोरनेत्रयोस्तु पानं युक्तम्। अल्पीयसोरपि नेत्रयोर्भूयसो विषयस्य ग्रहणे सामर्थ्यसद्भावात्। किं पुनर्विशालयोरनयोरिति भावः। एते चकोरस्यैव नेत्रे भवन्मुखं स्पृशत इति नेत्रयो रम्यत्वं चन्द्रिकापानयोग्यत्वं विलोकनचातुर्यं च सूचितम्। अत्राचमेः प्रत्यवसानार्थत्वात् 'गतिबुद्धि–' इत्यादिना चक्षुषोः कर्मत्वम्। 'णिचश्च' इति कर्त्रभिप्राये क्रियाफले विवक्षिते आत्मनेपदे प्राप्तेऽपि 'निगरणचलनार्थेभ्यश्च' इति परस्मैपदप्राप्तेः आचामयसे इति चिन्त्यम्। एवं सति चकोरस्य चक्षुषी चिरं भवन्मुखस्पृशी वर्तेते। यतस्त्वन्मुखसेवां बहुकालं कुर्वते(ते) इत्यर्थः। अत एव इमामेतन्मुखचन्द्रिकां किं न आचामयसे। सामर्थ्यात् चक्षुर्भ्यामिति शेषः। इति समाधानम्। आचमनमाचामः सोऽस्या अस्तीत्याचामवती करोति इत्यर्थे 'तत्करोति–' इति ण्यन्तस्य लक्षणप्रतिपदोक्तपरिभाषया प्रतिपदोक्तप्रत्यवसानार्थत्वाभावात्परस्मैपदाभावः। निगरणादिसूत्रेणानुवृत्तपरस्मैपदसंज्ञया परस्मैपदस्य विधानात् 'संज्ञापूर्वको विधिरनित्यः' इति परिभाषयात्र परस्मैपदं न भवतीति वा। आचाम इति, 'न कम्यमिचमाम्' इति वृद्ध्यभावः॥

---

१ 'नेति[illegible]' इति जीवातुसुखावबोधासंमतः पाठः। २ 'आचामय' इति [illegible] [illegible] संहिता [illegible]। [illegible] 'पादकलाप–' इति [illegible] इति महोपाध्याय[illegible] '[illegible] इति चक्षुषी [illegible] आचामय—इति [illegible]' इति [illegible] '[illegible]' इति [illegible] [illegible]—इति [illegible]। ३ 'अत्र 'भवन्मुखस्पृशोश्चकोरचक्षुषोः' इति [illegible] चक्षुषोरन्[illegible]' इति जीवातुः।

अपां विहारे तव हारविभ्रमं करोतु नीरे पृषदुत्करस्तरन्।
कठोरपीनोच्चकुचद्वयीतटत्रुटत्तरः सारवसारवोर्मिजः ॥ ७ ॥

अपामिति ॥ हे भैमि, आरवेण सहिताः सारवाः, सरय्वा इमे सारवाः एवंभूता ऊर्मयस्तेभ्यो जातः पृषदुत्करो बिन्दुसमूहः अपां विहारे अनेन सह जलक्रीडायां सत्यां तव हारविभ्रमं त्वत्संबन्धिहारविलासं करोतु। किंभूतः—नीरे तरन्प्लवमानः। तथा—कठोरातिकठिना पीना उच्चा त्वदीया कुचद्वयी तस्यास्तटे परिसरे त्रुट्यत्तरोऽतिशयेन त्रुट्यन्विशीर्यमाणतरः। जलक्रीडावशाद्विच्छिन्नसूत्रस्थो मुक्ताहार इव शोभताम्। अथ च—पश्यतो लोकस्य मनोहारः कियदनेनेति विशिष्टां भ्रान्तिं जनयतु। विगतहारे देशे हारविलास इति विरोधश्च। अथ च—पृषदुत्करः हरिणसङ्घः क्रीडाप्रदेशे क्रीडां करोतु सुखम्। सरयूक्रीडाप्राप्त्यर्थमेनं वृणीष्वेति भावः। 'देविकायां सरय्वां च भवे दाविकसारवौ' इत्यमरः। दाण्डिनायनादिसूत्रेण साधुः ॥

अखानि सिन्धुः समपूरि गङ्गया कुले किलास्य प्रसभं स भन्त्स्यते।
विलङ्घ्यते चास्य यशःशतैरहो सतां महत्संमुखधावि पौरुषम् ॥ ८ ॥

अखानीति ॥ अस्य कुले वंशे पूर्वजैः सगरपुत्रैरिन्द्रनीताश्वहरणार्थं सिन्धुः समुद्रः पातालपर्यन्तमखानि खातः। कपिलशापदग्धानां तेषामेवोद्धरणार्थं भगीरथेनानीतया गङ्गया समपूरि पूर्णः कृतः। तथा—श्रीरघुनाथेन रावणवधार्थं प्रसभं हठेन स सिन्धुः भन्त्स्यते बन्धनं नेष्यते। किलेति पुराणप्रसिद्धमेतत्। स एव इदानीमस्य यशःशतैर्विलङ्घ्यते च। सर्वे समुद्रमेव प्रतिवैरं किमिति कृतवन्त इत्यत आह—अहो दुष्करमेतत्सतां महतां पौरुषं महतामेव संमुखं धावति प्रसरतीत्येवंशीलम्। क्षुद्रान्कृपयोपेक्षत एवेत्यर्थः। एवंविधा अस्य पूर्वजाः, श्रीरघुनाथश्च यस्मिन्वंशे समुत्पन्नस्तस्मिन्वंशे समुत्पन्नोऽयम्। अस्य यशांसि समुद्रमतिक्रामन्तीत्येनं वृणीष्वेति भावः। भन्त्स्यते, बन्धेः कर्मणि लृटि भष्भावे चर्त्वे च रूपम् ॥

एतद्यशःक्षीरधिपूरगाहि पतत्यगाधे वचनं कवीनाम्।
एतद्गुणानां गणनाङ्कपातः प्रत्यर्थिकीर्तीः खटिकाः क्षिणोति ॥ ९ ॥

एतदिति ॥ एतस्य यशस एव क्षीरधेर्दुग्धाब्धेः पूरस्तं गाहते एवंशीलं एतद्वर्णनपरं कवीनां वचनमगाधेऽतलस्पर्शे स्थाने पतति निमज्जति। [illegible] इत्यर्थः। अन्योऽपि समुद्रप्रवाहावगाही अगाधे ब्रुडति। तथा—एतस्य शौर्यादीनां गुणानां गणनार्थं कृतोऽङ्कविन्यासः प्रत्यर्थिनां वैरिणां कीर्तीरेव खटिकाः क्षिणोति हिनस्ति। बहुलेखने हि खटिकाक्षयो भवति। एतद्गुणा [illegible] गणयितुमशक्याः। एतद्गुणानां गुरुत्वादरिकीर्तिर्न प्रतिभासत इत्यर्थः। एनं वृणीष्वेत्यर्थः। क्षिणोति, [illegible] ॥

नाल्पं जस्य शरीरतां दृषदयं धीरः कथं कथ्यता-
मम्बुध्यापि हि कोटिरस्य समरे रोमाणि सर्वाङ्कुराः।
नीतः संप्रति वन्दिभिः श्रुतिपथं यस्यानवद्यावली-
नम्रः [illegible] प्रतिक्षितिभृतां [illegible] ॥ १० ॥

---

१ [illegible]

ा देहं त्यक्त्वा रम्भापरीरम्भानन्दस्य निकेते नन्दनवने देवोद्याने क्रीडायां च आदर सक्तिस्तस्य आडम्बरो बाहुल्यमारम्भि आरब्धम्। योऽपि प्रयाणे निमज्जति सोपि 'चितोऽचिते रते' इत्यादिश्रुत्वा नन्दनवने रम्भाद्यप्सरोभिः सह क्रीडति। 'बाहुजः क्षत्रियो विराट्' मरः। आरम्भि, 'रभेरशब्लिटोः' इति नुम्। परीरम्भ इति, 'उपसर्गस्य घञि' इति दीर्घः॥

इति श्रुतिस्वादिततद्गुणस्तुतिः सरस्वतीवाङ्मयविस्मयोत्थया ।
शिरस्तिरःकम्पनयैव भीमजा न तं मनोरन्वयमन्वमन्यत ॥ १३ ॥

इतीति॥ भीमजा शिरसः तिरःकम्पनयैव वक्रचालनयैव तं मनोरन्वयं सूर्यपुत्रमनुवंश-नुत्पन्नं ऋतुपर्णं नान्वमन्यत नाङ्गीचकार। किंभूता—इति पूर्वोक्तप्रकारेण श्रुतिभ्यां कर्णाभ्यां ादिता सादरमाकर्णिता तद्गुणस्तुतिर्यया। किंभूतया (कम्पनया-) सरस्वत्या वाङ्मयेन नितो विस्मय आश्चर्यं तस्मादुत्पन्नोत्पन्नया। शिरःकम्पस्योभयसूचकत्वादाश्चर्याभिनयकृतः म्पत्वनिराकरणार्थो जात इत्यर्थः। अस्य मनुवंशत्वात्तस्य सोमवंशे सामिलाषत्वात्कन्या-लपितसौन्दर्यायवर्णनाद्वानुरागः॥

युवान्तरं सा वचसामधीश्वरा स्वरामृतन्यक्कृतमत्तकोकिला ।
शशंस संसत्ककुभं तदिशा निशापतिज्ञातिमुखीमिमां प्रति ॥ १४ ॥

युवेति॥ सा वचसामधीश्वरा सरस्वती निशाकरस्य ज्ञातिसदृशं मुखं यस्यास्तां चन्द्रान-निनां प्रति युवान्तरमन्यं वरं शशंस वर्णयामास। किंभूता—स्वरामृतेन न्यक्कृतस्तिरस्कृतो त्तो वसन्तहृष्टः कोकिलो यया। तथा—तदिशा यस्यां दिशि वर्णनीयो युवा तिष्ठति तद्दिशा र्धयया दिशाभिमुख्येन संसत्ककुभं संसदहस्ता। हस्तेन तं निर्दिश्येति यावत्। सरस्वती-र्गी माधुर्येणवाक्योमतु राजन्यादुरगेणेति स्वरामृतपदेन सूचितम्। ईश्वरेति, 'स्थेश-' ति वरच्। अथ प्राणेश्वरीत्यादेः कथं साधुत्वम्। 'अन्येभ्योऽपि दृश्यन्ते' इत्येकेनेति ोश्वयोः सतोरित्यपेहि ॥

न पाण्ड्यभूमण्डनमेणलोचने विलोचनेनापि नृपं पिपासति ।
शशिप्रकाशाननमेनमीक्षितुं तदङ्गपाङ्गदिशा दृशोऽस्त्विमः ॥ १५ ॥

नेति॥ हे एणलोचने मृगाक्षि, त्वं पाण्ड्यभूमण्डनं पाण्ड्यदेशस्य भूषणभूतं नृपं सुन्दरमनुं ं विलोचनेन पिपासत्यपि न न पश्यसि तावत्। परं पातुमिच्छस्यपि नेत्रमेरर्थः। अनुभि-नितारित्यर्थः। अपरेण तावत् पिपासति, परं विलोचनेनापि न पिपासतीति। द्वाभ्यां ाम्यां न पिपासति परमेकेनापि न पिपासतीति वा। तस्मात्त्वं शशिवत्प्रकाशं प्रसन्नमनं स्य तं एनं मृगमीक्षितुं दृशोऽस्त्विमो नेत्रस्यान्तर्ङ्गदिशा नेत्रप्रान्तदेशेन तदङ्ग। अतिसु-न्दरमेनं कटाक्षैरवलोकयेति भावः॥

भुवि भ्रमित्वानवलम्बमम्बरे विहर्तुमभ्यासपरम्परापरा ।
अहो महावंशममुं समाश्रिता सकौतुकं नृत्यति कीर्तिनर्तकी ॥ १६ ॥

भुवीति॥ हे भैमि, महावंशं बृहत्कुलोत्पन्नममुं समाश्रिता। एतदीयेति यावत्। एतदीय कीर्तिरेषा नर्तकी सकौतुकं यथा तथा भ्रमित्वा वर्तते इव नृत्यति। अहो आश्चर्यम्।

---

१ [illegible]
[illegible]

भास्वदिति ॥ हे भैमि, भास्वतः वंशः तस्य करीरतां तदङ्कुरत्वं दधद्दधानः सूर्यवंशोत्पन्नः वयःसंधौ वर्तमानः। अथ च मुक्तायुक्तत्वाद्भास्वान् यो वंशो वेणुस्तदङ्कुरत्वं दधदतितेजस्वी अयं ऋतुपर्णनामा वीरः कथं केन प्रकारेण कथ्यतां वर्ण्यताम्। अपितु वर्णयितुं न शक्यत इत्यर्थः। हि यस्मात् समरे वर्तमानस्याध्युष्टापि सार्धत्रयीति प्रसिद्धापि कोटिः सार्धत्रयकोटीनि मानुषशरीरे स्थितानि रोमाणि सत्त्वस्यान्तरवीररसोत्सेकस्याङ्कुरा इवाङ्कुराः। वीररसोत्साहेन सङ्ग्रामे रोमाञ्चयुक्तोऽयं भवतीत्यर्थः। तथा यस्य नामवर्णावलीमन्त्रः ऋतुपर्ण इति नामाक्षरपङ्क्तिरूपी मन्त्रः संयति वन्दिभिः श्रुतिपथं कर्णपथं नीतः प्रापितः सन् प्रतिक्षितिभृतां रिपूणां दोषो बाहव एव स्तम्भास्त एव क्रौर्याद्दैर्घ्याच्च ये कुम्भीनसाः सर्पास्तान्स्तम्भयति। एतन्नाममात्राकर्णनाद्भीतानां शत्रूणां बाहवो युद्धाय न प्रसरन्तीत्यर्थः। सिद्धवैदिकमन्त्रश्रवणाच्च फणिनां स्तम्भो भवति। अध्युष्टेति सार्धकोटित्रयस्य संज्ञा। अङ्कुरो नित्यपुंलिङ्गः। 'कुम्भीनसो लेलिहानः' इत्यमरः॥

> तादृग्दीर्घविरिञ्चिवासरविधौ जानामि यत्कर्तृतां
> शङ्के यत्प्रतिबिम्बमम्बुधिपयःपूरोदरे वाडवः।
> व्योमव्यापिविपक्षराजकयशस्तारा: पराभावुकः
> कासामस्य न स प्रतापतपनः पारं गिरां गाहते ॥ ११ ॥

तादृगिति ॥ हे भैमि, अस्य राज्ञः स प्रताप एव तपनः सूर्यः कासां गिरां पारं परतीरं न गाहते। कस्यापि वर्णयितुमशक्य इत्यर्थः। स कः। अहं तादृक् दीर्घं चतुर्दशमन्वन्तरपरिमितत्वान्महापरिमाणं विरिञ्चिवासरं ब्रह्मदिनं तस्य विधौ करणे यस्य यदीयक्षात्रतेजोरूपसूर्यस्य कर्तृतां निर्मातृतां जानामि। सूर्यस्य दिनकर्तृत्वाद्ब्राह्ममपि दिनं दिनत्वात्सूर्येण कर्तव्यम्। तच्चतुर्युगसहस्रपरिमाणत्वादेतद्दिननिर्मात्रा सूर्येण निर्मातुमशक्यमिति तद्भिन्नेन चिरकालावस्थायिनातिदीप्रेणैतदीयप्रतापतपनेनैव निर्मातुं शक्यं न त्वन्येनेत्यहमुत्प्रेक्षे इत्यर्थः। तथा—अहं अम्बुधिपयःपूरे प्रवाहमध्ये वाडवो वडवानलो यस्य एतदीयप्रतापतपनस्य प्रतिबिम्बरूप इति शङ्के। जलानलयोः सहावस्थानविरोधाद्वाडवोऽग्निर्न भवति। किंभूतः सः—व्योमव्यापिन्यो विपक्षराजकस्य रिपुराजकस्याल्पत्वाद्यशांस्येव तारा नक्षत्राणि स्वप्रभावेण पराभावुकस्तिरस्कर्ता। सूर्येणापि व्योमव्यापिवैरिचन्द्रस्य चन्द्रिकायशो नक्षत्राणि च पराभूयन्ते। एतत्प्रतापसूर्यस्य पुरस्ताद्वैरियशांसि न प्रसरन्तीत्यर्थः। पराभावुकः, 'लषपत—' इत्युकञ्। तद्योगे, 'न लोका—' इति षष्ठीनिषेधात्तारा इति द्वितीया।

> द्वेष्याकीर्तिकलिन्दशैलसुतया नद्यास्य यद्दोर्द्वयी
> कीर्तिश्रेणिमयी समागममगाद्गङ्गा रणप्राङ्गणे।
> तत्तस्मिन्विनिमज्ज्य बाहुजभटैरारम्भि रम्भापरी-
> रम्भानन्दनिकेतनन्दनवनक्रीडादराडम्बरः ॥ १२ ॥

द्वेष्येति ॥ अस्य राज्ञः दोर्द्वयी बाहुद्वयं तया जनिता कीर्तिश्रेणिः कीर्तिपरम्परा तन्मयी तद्रूपा श्वेतत्वाद्गङ्गा द्वेष्याणां रिपूणां पलायनाज्जनिता अकीर्तिः सैव कलिन्दशैलसुता यमुना तया नद्या सह यद्यस्माद्रणप्राङ्गणे सङ्ग्रामभूमौ समागममगात्संयोगं प्राप तस्मात् कारणात् तस्मिन्गङ्गायमुनासंगमे बाहुजभटैः क्षत्रिययोधैः विशेषेण निमज्ज्य [illegible]

भङ्गाकीर्तिमसीमलीमसतमप्रत्यर्थिसेनाभट-
श्रेणीतिन्दुककाननेषु विलसत्यस्य प्रतापानलः ।
तस्मादुत्पतिताः स्फुरन्ति जगदुत्सङ्गे स्फुलिङ्गाः स्फुटं
भालोद्भूतभवाक्षिभानुहुतभुग्जम्भारिदम्भोलयः ॥ १९ ॥

भङ्गेति ॥ अस्य प्रतापानलो भङ्गेन पराजयेन जनिता अकीर्तिः सैव श्यामत्वान्मषी तया मलीमसतमा अतितरां मलिनीभूताः प्रत्यर्थिसेनाभटाः शत्रुसैनिकशूरास्तेषां श्रेणी समूहः सैव श्यामत्वात्तिन्दुककाननानि तेषु विलसति विशेषेण दीप्यते । तस्मादेतदीयात्प्रतापानलादुत्पतिता उत्थिता भालतलं ललाटं तदुद्भूतं भवाक्षि हरतृतीयनेत्रं, भानुः सूर्यः, हुतभुग्वह्निः, जम्भारेरिन्द्रस्य दम्भोलिर्वज्रः, एते स्फुलिङ्गाः स्फुटं अग्निकणा इव जगदुत्सङ्गे जगतां भूम्यादीनां मध्ये स्फुरन्ति शोभन्ते । तिन्दुकवनानि हि श्यामानि भवन्ति । तत्र पतितो वह्निश्चटचटाशब्दं कुर्वन्स्फुलिङ्गानुद्वमति । महत्स्वपि हरनेत्रादिषु स्फुलिङ्गत्वारोपेण प्रतापानलस्यातितरां माहात्म्यं सूचितम्—यस्य कणा एवंभूताः स कथंभूतो भवतीति[1] ॥

पतद्दन्तिदलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुवं
सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः ।
पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामर-
श्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियम् ॥ २० ॥

पतदिति ॥ हे भैमि, एतस्य [illegible] प्रेक्षायै उपनम्रा [illegible] अमरश्रेणी देवसमूहः तन्मध्यचरो मध्ये वर्तमानः । केवलं प्रात इति यावत् । एवंभूतः पृथुर्नाम पृथ्वीन्द्रः पुनः क्षितिधराणां पर्वतानां क्षेपाय प्रोत्सारणाय धियं बुद्धिं धत्ते । किं कृत्वा—सङ्ग्रामाङ्गणस्य सीम्नि मर्यादायां जङ्गमानां स्थानात्स्थानान्तरं गच्छतां गिरीणां स्तोमस्य भ्रमाधायिभिर्भ्रान्तिजनकैः पतद्भिरेतस्य दन्तिदलैर्निखिलां भुवम् [illegible] व्याप्तदेहां विलोक्य । पूर्वं पृथुना [illegible] ततः एतद्युद्धे [illegible] पर्वता इति बुद्ध्या [illegible] पुनरपि बुद्धिः कृतेत्यर्थः । [illegible] च सूचितम् ॥

शशंस दासीङ्गितविद्विदर्भजामितो ननु स्वामिनि पश्य कौतुकम् ।
यदेष सौधाग्रनटे पटाञ्चले चलेऽपि काकस्य पदार्पणग्रहः ॥ २१ ॥

शशंसेति ॥ [illegible] काचिद्दासी विदर्भजां शशंस कथयामास । ननु हे स्वामिनि, इतः अस्यां दिशि त्वं कौतुकं पश्य । किं तत्—[illegible]

---

१ [illegible] इति पाठः ।

(आश्चर्य) लोकगतं कौतुकं नर्तकीगतमिति न पौनरुक्त्यम्। किंभूता—पूर्वं भ्रमिता। सकलं भूमण्डलं व्याप्येत्यर्थः। पश्चादवलम्बं यथा तथा अम्बरे गगने विहर्तुं चरणयोरभ्यासपरम्परायां परा आसक्ता। अभ्यासपरम्परायां वा परा उत्कृष्टा। एतदीया कीर्तिर्भूलोकं पूर्वमेव व्याप्य लोकान्तरं व्याप्नोतीत्यर्थः। सेनायनवलम्बेन सदोत्साहवन्तममुमिति वा। नर्तक्यपि पूर्वं भूमौ भ्रमिता निराश्रयं गगने नर्तितुमभ्यासपरा सती महान्तं वेणुमाश्रित्य वेगोद्गतं सकौतुकं नृत्यति। अथ च महान्तं पृष्ठवंशमाश्रिता नर्तकीति वा। या हि झटिति भूमावपि गन्तुमपि न शक्नोति सा निरालम्बं महान्तं वेणुमाश्रित्य नृत्यतीत्यतिचित्रमित्यादि ज्ञातव्यम्। 'वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि च' इति विश्वः॥

इतो भिया भूपतिभिर्वनं वनादटद्भिरुच्चैरटवीत्वमीयुषी।
निजापि सावापि चिरात्पुनः पुरी पुनः समध्यासि विलासमन्दिरम्॥१७॥

इत इति॥ इतः अस्माद्राज्ञः सकाशाद्भिया भयेन वनाद्वनान्तरमटद्भिर्गच्छद्भिर्भूपतिभिः उच्चैरतिशयेन अटवीत्वमरण्यानीत्वमीयुषी प्राप्ता सा प्रसिद्धा निजा स्वीयापि पुरी चिरात्कालान्तरभ्रमात्पुनर (वापि) ध्यासि प्राप्ता। तथा—पुर्यां स्वीयं विलासमन्दिरं रतिगृहं पुनरध्यासितम्। वनवुद्ध्यैवेत्यर्थः। राज्यभ्रंशदशापेक्षयानेकवारं तत्रागत्य पुनरन्यत्र गत्वा पुनस्तत्रागच्छन्तीत्यर्थः। अनेन वैरिनगराण्युद्वासितानीति भावः। 'उपेयिवान्–' इत्यत्र सूत्रे उपसर्गस्यातन्त्रत्वादीयुषीत्यत्र कर्तुः[२]॥

आसीदासीमभूमीवलयमलयजालेपनेपथ्यकीर्तिः
सप्ताकूपारपारीसदनजनघनोद्गीतचापप्रतापः।
वीरादस्मात्परः कः पदयुगयुगपत्पातिभूपातिभूय-
श्चूडारत्नोडुपत्नीकरपरिचरणामन्दनन्दन्नखेन्दुः॥१८॥

आसीदिति॥ हे भैमि, अस्माद्वीरातपर उत्कृष्टः अन्यो वा क आसीद्वा। अपि तु एवंविधोऽयमेव, न त्वन्यः कश्चिदित्यर्थः। किंभूतः—सीमां समुद्रलक्षणां आ अभिव्याप्य सीमासहितं भूवलयं तस्य मलयजालेपनेपथ्यं चन्दनाङ्गरागरूपं नेपथ्यं भूषणं तदिव कीर्तिर्यस्य। यदीयकीर्तिचन्दनधवलितसमुद्रमण्डितमण्डलम्। तथा—सप्तानामकूपारपाराणां समुद्रपाराणां समाहारः सप्ताकूपारपारी सैव सदनं निवासस्थानं तस्य सप्तसमुद्रपरतीरवासी यो जनो लोकस्तेन घनमविच्छिन्नं उद्गीत उच्चैर्गीयमानश्चापप्रतापो यस्य, चापश्च प्रतापश्च वा यस्य सः। तथा—पदयुगे चरणयुगले युगपत्समकालमेव पातिनः पतनशीला नमस्कारकारिणो भूपालानां अतिभूयांस्यतिबहूनि यानि चूडारत्नानि तान्येव वर्तुलत्वादुडुपत्न्यो नक्षत्ररूपाश्चन्द्रप्रियतमास्तासां कराणां किरणानां परिचरणं सर्वतः संचरणं तेन। अथ च तासां हस्तैर्यत्परिचरणं चरणसेवा तया कृत्वा अमन्दं नन्दन्तोऽतितरां समृद्धकान्तयो नखा एवेन्दवश्चन्द्रा यस्य। चरणपतितवसुधापालराजशिरोमणिकिरणसंवर्धितनखकान्तिः। यशस्वी प्रतापवानत एव सर्वनृपतिवन्द्यचरण एतादृशः कोऽपि नास्ति तस्मादेनं वृणीष्वेति भावः। अन्योऽपि पत्नीकरकृतचरणसंवाहनेन नन्दति॥

१ 'रूपकालंकारः' इति जीवातुः। २ 'अत्रैकस्यारिवर्गस्य क्रमादनेकास्वटवीष्वटवीभूतपुरीषु च वृत्तेन, तथा पुरीष्वपि पुरीत्वाटवीत्वयोः क्रमसंबन्धोक्त्या च, एकमनेकस्मिन्, अनेकमेकस्मिन्वा क्रमेण पर्यायद्वयलक्षणं पर्यायभेदद्वयं द्रष्टव्यम्' इति जीवातुः।

भङ्गाकीर्तिमषीमलीमसतमप्रत्यर्थिसेनाभट-
श्रेणीतिन्दुककाननेषु विलसत्यस्य प्रतापानलः ।
तस्मादुत्पतिताः स्फुरन्ति जगदुत्सङ्गे स्फुलिङ्गाः स्फुटं
भालोद्भूतभवाक्षिभानुहुतभुग्जम्भारिदम्भोलयः ॥ १९ ॥

भङ्गेति ॥ अस्य प्रतापानलो भङ्गेन पराजयेन जनिता अकीर्तिः सैव श्यामत्वान्मषी तया मलीमसतमा अतितरां मलिनीभूताः प्रत्यर्थिसेनाभटाः शत्रुसैनिकशूरास्तेषां श्रेणी समूहः सैव श्यामत्वात्तिन्दुककाननानि तेषु विलसति विशेषेण दीप्यते । तस्मादेतदीयात्प्रतापानलादुत्पतिता उत्थिता भालतलादुद्भूतं भवाक्षि हरतृतीयनेत्रं, भानुः सूर्यः, हुतभुग्वह्निः, जम्भारेरिन्द्रस्य दम्भोलिर्वज्रः, एते स्फुलिङ्गाः स्फुटं अग्निकणा इव जगदुत्सङ्गे जगतां भूम्यादीनां मध्ये स्फुरन्ति शोभन्ते । तिन्दुकवनानि हि श्यामानि भवन्ति । तत्र पतितो वह्निश्चटचटाशब्दं कुर्वन्स्फुलिङ्गान्मुञ्चति । महत्स्वपि हरनेत्रादिषु स्फुलिङ्गत्वारोपेण प्रतापानलस्यातितरां माहात्म्यं सूचितम्—यस्य कणा एवंभूताः स कथंभूतो भवतीति[1] ॥

एतद्दन्तिबलैर्विलोक्य निखिलामालिङ्गिताङ्गीं भुवं
सङ्ग्रामाङ्गणसीम्नि जङ्गमगिरिस्तोमभ्रमाधायिभिः ।
पृथ्वीन्द्रः पृथुरेतदुग्रसमरप्रेक्षोपनम्रामर-
श्रेणीमध्यचरः पुनः क्षितिधरक्षेपाय धत्ते धियम् ॥ २० ॥

एतदिति ॥ हे भैमि, एतस्य [illegible] उग्रसमरस्य प्रेक्षायै उपनम्रा समागता अमरश्रेणी देवसङ्घः तन्मध्यचरो मध्ये वर्तमानः । देवत्वं प्राप्त इत्येतावत् । एवंभूतः पृथुर्वैन्यः पृथ्वीन्द्रः पुनः क्षितिधराणां पर्वतानां क्षेपाय प्रोत्सारणाय धियं बुद्धिं धत्ते । किं कृत्वा—सङ्ग्रामाङ्गणस्य सीम्नि मर्यादायां जङ्गमानां स्थानात्स्थानान्तरं गच्छतां गिरीणां स्तोमस्य भ्रमाधायिभिर्भ्रान्तिं कुर्वाणैरत्युन्नततरगात्रैस्तुल्यैरेतस्य दन्तिबलैर्निखिलां भुवमालिङ्गिताङ्गीं व्याप्तावयवां विलोक्य । पूर्वं पृथुना स्वधनुष्कोट्या [illegible] पर्वतानुत्सार्य क्षेमा[illegible] कृतः एतद्गजान्दृष्ट्वा सङ्ग्रामदर्शनार्थमागतेन एते पर्वता इति बुद्ध्या तदुत्सारणे पुनरपि बुद्धिः कृतेत्यर्थः । एतेनैतद्रणस्य दुर्दर्शत्वमतिस्थूलत्वं च सूचितम् ॥

शशंस दासीङ्गितविद्विदर्भजामितो ननु स्वामिनि पश्य कौतुकम् ।
यदेष सौधाग्रनटे पटाञ्चले चलेऽपि काकस्य पदार्पणग्रहः ॥ २१ ॥

शशंसेति ॥ इङ्गितविद्भैम्यभिप्रायज्ञा काचिद्दासी विदर्भजां शशंस कथयामास । ननु हे स्वामिनि, इतः अस्यां दिशि त्वं कौतुकं पश्य । किं तत्—[illegible] [illegible] ॥

---

१ [illegible]
२३ [illegible] ।

ततस्तदप्रस्तुतभापितोत्थितैः सदस्तदश्वेति हसैः सदःसदाम् ।
स्फुटाजनि म्लानिरतोऽस्य भूपतेः सिते हि जायेत शितेः सुलक्ष्यता ॥२१॥

तत इति ॥ ततस्तस्या दास्याः पूर्वोक्तमप्रस्तुतं भापितं वचनं तस्मादुत्थितैः सदःसदां सभ्यानां हसैर्हसितैस्तत् सदः सा सभा अश्वेति श्वेतीकृतम् । तद्वचनं श्रुत्वा सभ्या हसन्ति स्मेत्यर्थः । अतः सदःश्वेतीकरणाद्धेतोरस्य भूपतेर्म्लानिः लज्जा वैवर्ण्यं स्फुटाजनि । अर्था-न्तरन्यासमाह—हि यस्मात् सिते शुभ्रवस्तुनि शितेः कृष्णवर्णस्य सुलक्ष्यता प्रकटता भवति । सभ्यहास्यवशात्सोऽधिकं विवर्णो जात इत्यर्थः । स स्वत एव श्यामः सभ्यहास्यवशादधिक-श्यामो जात इति वार्थः । अश्वेति, 'श्वितीङ् शौक्ल्ये' इत्यस्माण्ण्यन्तात्कर्मणि लुङ्यात्मनेपदम् ।

ततोऽनु देव्या जगदे महेन्द्रभूपुरंदरं सा जगदेकवन्द्यया ।
तदार्जवावर्जिततर्जनीकया जनी कयाचित्परचित्स्वरूपया ॥ २२ ॥

तत इति ॥ ततः कयाचिल्लोकोत्तरयाऽनिरूपितस्वरूपया देव्या वाण्या महेन्द्रभुवो महेन्द्रा-ख्यपर्वतसंबन्धिनो देशस्य पुरंदरं स्वामिनं अनु लक्षीकृत्य सा जनी स्वयंवरा जगदे उक्ता । किंभूतया—जगतः एका देवतान्तरपरित्यागेन वन्द्या तया । यतः परा श्रेष्ठा चित् ज्ञानं स्वरूपं यस्यास्तया । तथा तस्या भैम्या यदार्जवं ऋजुत्वं तेनावर्जिता वर्णनार्थमनुकूलीकृता तर्जनी यया । तस्मिन्वर्णनीये नृपे विपये वा । देव्या एव वा यदार्जवं कृपा तया । जगदे इति तङ् । 'वाचंयमपुरंदरौ च' इति निपातनात्पुरंदरः साधुः । तर्जनीक इति, 'नद्यृतश्च' इति कप् । अनोर्लक्षणे कर्मप्रवचनीयत्वात्पुरंदरमिति द्वितीया ॥

स्वयंवरोद्वाहमहे वृणीष्व हे महेन्द्रशैलस्य महेन्द्रमागतम् ।
कलिङ्गजानां स्वकुचद्वयश्रिया कलिं गजानां शृणु तत्र कुम्भयोः ॥२३॥

स्वयमिति ॥ हे भैमि, स्वयंवरेण य उद्वाहस्तल्लक्षणे महे उत्सवे आगतं महेन्द्रशैलस्य महेन्द्रं स्वामिनं वृणीष्व । त्वं तत्र पर्वतोपलक्षिते देशे कलिङ्गदेशे जातानां गजानां कुम्भयोः स्वकुचद्वयश्रिया सह कलिं समानशोभाख्यद्रव्याभिलापनिमित्तं कलहं शृणु । हस्तिकुम्भाः स्तनशोभामभिलपिष्यन्ति परं न प्राप्स्यन्तीति भावः । स्वयंवरोद्वाह एव महः उत्सवो महे-न्द्रमहोत्सवो [illegible] वा ॥

अयं किलायात इतोऽरिपौरवाग्भयाद्ययावस्य रिपुर्यथा वनम् ।
श्रुतात्ततस्त्वापगिरस्तदस्ततः पटद्भिरत्रास्ति शुकैर्वनेऽपि सः ॥ २४ ॥

अयमिति ॥ अयं कलिङ्गदेशाधिप आयातः किल श्रूयते इति [illegible] [illegible] पलायनं [illegible] रिपुः वनं ययौ [illegible] [illegible] । रिपुरिति [illegible] । [illegible] हेतुमाह—[illegible] अयं [illegible] [illegible] श्रुतः [illegible] [illegible] [illegible] पठद्भिः शुकैर्वनेऽपि च [illegible] [illegible] वने [illegible] रिपुः [illegible] शुकैः पठद्भिः शुकैर्वनेऽपि [illegible] [illegible] न [illegible] । [illegible] भावः ॥

इतस्त्रसद्विद्रुतभूभृदुज्झिता प्रियाथ दृष्टा वनमानवीजनैः ।
शशंस पृष्टाद्भुतमात्मदेशजं शशित्विषः शीतलशीलतां किल ॥ २६ ॥

इत इति ॥ इतः अस्माद्राज्ञः सकाशात्त्रसन्तो भीताः अत एव विद्रुताः पलायिताः भूभृतो राजानस्तैः परित्यक्ता प्रिया स्वस्वप्राणेश्वरी वनमानवीजनैर्भिल्लीजनैर्दृष्टा । अथ पश्चादात्मदेशजं अद्भुतं पृष्टा सती भवत्या देशे किमपूर्वमिति, शशित्विषश्चन्द्रस्य शीतलशीलतां किल प्रसिद्धं हिमस्वभावत्वमेव स्वदेशजातमाश्चर्यं शशंसाकथयत् । स्वदेशे वियोगाभावाच्चन्द्रकराणां शीतलत्वं, वने च वियोगादुष्णत्वमित्यर्थः । प्रियेति जात्येकवचनम् । भर्तृत्यक्ता वियोगज्वरभराक्रान्ता सती वने चन्द्रकान्तिमुष्णामनुभवतीत्यर्थः ॥

इतोऽपि किं वीरयसे न कुर्वतो नृपान्धनुर्बाणगुणैर्वशंवदान् ।
गुणेन शुद्धेन विधाय निर्भरं तमेनमुर्वीवलयोर्वशी वशम् ॥ २७ ॥

इत इति ॥ हे भैमि, त्वं इतोऽपि राज्ञः सकाशात् किमिति न वीरयसे शूरा न भवसि । अपितु तस्मादपि शूरा भव । किं वीरा न भवसि अपि तु वीरा भवस्येवेति वा । किंभूतादितः । नृपाञ्शत्रून् धनुश्च बाणाश्च गुणाश्च चापकरमौर्व्यस्तैर्बहुभिरुपकरणैः कृत्वा वशंवदान्वश्यान्कुर्वतः । किंभूता त्वम् । उर्वीवलये उर्वशीवत्यतिसुन्दरी । किं कृत्वा—तमेनं बहुभिर्धनुरादिभिरुपकरणैर्विद्विषां जेतारं शुद्धेन केवलेन चापादिसंसर्गरहितेन सौन्दर्यादिना गुणेन मौर्व्या च कृत्वा निर्भरमतितरामायासरहितं वा यथा तथा वशं विधाय । बहुसाधनैः पराजयतोऽप्येकेनैव साधनेन जयकरणादित्यर्थः । मौर्वीमात्रेण जयादाश्चर्यं च । अयं सर्वेभ्योऽपि वीरः अस्मादपि त्वमतिशयेरथाः । वीरयसे, 'शूर वीर विक्रान्तौ' इति चुरादिः ॥

एतद्भीतारिनारी गिरिबिलविगलद्वासरा निःसरन्ती
स्वःक्रीडाहंसमोहग्रहिलशिशुभृशप्रार्थितोऽसिद्धचन्द्रा ।
आक्रन्दद्भूरि यत्तद्वनजलनिलयच्चन्द्रहंसानुबिम्ब-
भ्रान्त्यासक्तिप्रदृप्यत्तनयविहसितैराश्वसीदत्यतीव ॥ २८ ॥

लङि 'रुदश्च पञ्चभ्यः' इत्यपृक्तसार्वधातुकस्येडागमः । लुङि वा 'ह्यन्तक्षण-' इति वृद्धिनिषेधे रूपम् । न्यश्वसी(स)त्, लङि 'अड्गार्ग्यगालवयोः' इत्यपृक्तसार्वधातुकस्याडागमः ॥

अस्मिन्दिग्विजयोद्यते पतिरयं मे स्तादिति ध्यायिनी
कम्पं सात्त्विकभावमञ्चति रिपुक्षोणीन्द्रदारा धरा ।
अस्यैवाभिमुखं निपत्य समरे यास्यद्भिरूर्ध्वं निजः
पन्था भास्वति दृश्यते विलमयः प्रत्यर्थिभिः पार्थिवैः ॥ २९ ॥

अस्मिन्निति ॥ हे भैमि, अस्मिन्राज्ञि दिग्विजयोद्यते सति रिपवश्च ते क्षोणीन्द्रा राजानस्तेषां दाराः प्रिया वशवर्तिनी धरा पृथ्वी अयं राजा मे पतिः स्वामी स्तादिति ध्यायिनी चिन्तयन्ती सती सात्त्विकेषु मध्ये कम्पलक्षणं सात्त्विकभावमञ्चति गच्छति । अन्यस्वामिसूचकं भूकम्पलक्षणं भौममुत्पातं प्राप्नोतीत्यर्थः । एवमन्याप्येवं ध्यायन्ती सती सात्विकं भावं प्राप्नोति । तथा—समरेऽस्यैवाभिमुखं शस्त्राघातैर्निपत्य ऊर्ध्वमूर्ध्वदेशम् । अथ च—उत्तमं स्वर्गलोकं, यास्यद्भिर्गमिष्यद्भिः प्रत्यर्थिभिः पार्थिवैः भास्वति सूर्यमण्डले निजः स्वीयो विलमयः पन्था दृश्यते । 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥' इति वचनात् । अथ च—सूर्ये बिलरूपोऽप्युत्पातो म्रियमाणैर्दृश्यते । अतिशूरोऽयमिति भावः ॥

विद्राणे रणचत्वरादरिगणे त्रस्ते समस्ते पुनः
कोपात्कोऽपि निवर्तते यदि भटः कीर्त्या जगत्युद्भटः ।
आगच्छन्नपि संमुखं विमुखतामेवाधिगच्छत्यसौ
द्रागेतच्छुरिकारयेण टणिति च्छिन्नापसर्पच्छिराः ॥ ३० ॥

विद्राण इति ॥ त्रस्ते भीते अत एव रणचत्वराद्रणाङ्गणाद्विद्राणे पलायिते समस्तेऽरिगणे मध्ये कोऽपि भटः शूरः कोपाद्यदि पुनः निवर्तते । यतो जगति कीर्त्या यशसा उद्भटः ख्यातः । असौ भटः अस्य संमुखमागच्छन्नपि विमुखतामेव विगतमुखलक्षणशिरस्कतां प्राप्नोति । अथ च—संमुखमागच्छन्नपि पराङ्मुखो जात इति विरोधाभासः । यतः—द्राक् शीघ्रमेतस्य छुरिकाया रयेण 'टण्' इति यथा तथा खण्डितमपसर्पदधःपतच्छिरो यस्य सः । 'टण्' इति लोहकण्ठास्थिसंघट्टनशब्दानुकरणम् । अतिशूरोऽयमिति भावः ॥

ततस्तदुर्वीन्द्रगुणाद्भुतादिव स्ववक्त्रपद्मेऽङ्गुलिनालदायिनी ।
विधीयतामाननमुद्रणेति सा जगाद वैदग्ध्यमयेङ्गितैव ताम् ॥ ३१ ॥

तत इति ॥ ततः सा भैमी तां वाणीं प्रति वचनमन्तरेणैव इति जगाद । इति किम्—आननमुद्रया मौनं विधीयतामिति । किंभूता—तस्य उर्वीन्द्रस्य गुणाकर्णनजनितात् अद्भुतादाश्चर्यादिव स्ववक्त्रपद्मे अङ्गुलिरूपं नालं तस्य दायिनी । अत एव वैदग्ध्यमयं चतुरं बहुलनिर्मितं चेष्टितं यस्याः सा । वचननिषेधार्थं, आश्चर्यानिनयार्थं च मुखे अङ्गुलिदानं वचननिषेधार्थं दत्ताङ्गुलिस्तद्गुणाद्भुतादिवेति लोकैरुत्प्रेक्षितमित्यर्थः । पद्मे च नालं भवति ।

१ 'अथ नार्दासिकोर्वीन्द्रासिन्धे दत्तवदिन्धे च निर्सनतस्य दृश्यत्वमान्लिनेन [illegible]' इति जीवातुः । २ 'अत्रास्योर्ध्वगमनमतेनोलियाः [illegible]' इति [illegible]

सिन्दूरेति ॥ नु भैमि, समरस्य आरम्भे उद्धुरं उद्युक्ते अस्य सिन्धुरे गजे [illegible] सति समस्ता बाहुजाः क्षत्रियास्तेषां भुजातेजांस्येव सहस्रांशवः सूर्या यदि तत् अस्तं विनाशं अस्ताचलं च यान्ति गच्छन्ति । तत् प्रदोषतिमिरेण रजनीमुखसंबन्धिना [illegible] सा व्यामिश्रा मिलिता या संध्या तस्या धिया बुद्ध्या भ्रान्त्येवेति वयं जानीमः । [illegible] कर्म । दिवारजन्योः संधौ भवः सांध्यो रागः तद्भ्रान्त्येत्यर्थः । किंभूते सिन्धुरे—सिन्दूरेण मुग्धो मनोज्ञो मूर्धा यस्य । तथा—धृता स्कन्धावबधीकस्य श्यामिका स्वाभाविकी कज्जल-लेपमण्डनजा वा कालता येन । तथा—उच्चतया व्योमान्तःस्पृशि गगनमध्यस्पर्शिनि । तथा—समरारम्भाद्रणतुर्यश्रवणात्कोपदुःसहे वा । यदि अस्तं यान्ति तर्हि सायंकालतिमि-रसंपृक्तसंध्याधियेति वा । संध्यापि किंचित्कज्जलतुल्यतिमिरयुक्ता सिन्दूरवच्च रक्ता [illegible] वरुणदिगन्तस्पर्शिनी चेति पूर्वोक्तविशिष्टहस्तिदर्शने सति इयं सायंसंध्येति बुद्ध्यैव तेजसां [illegible] र्याणामस्तगमनं युक्तम् । एवंविधं गजं दृष्ट्वा सर्वेऽपि पलायन्त एवेत्यर्थः । 'जानीमोऽथ तदा' इति पाठे अथशब्दो यदित्यर्थे, तदा तदित्यर्थे ज्ञेयः । श्यामैव श्यामिकेति स्वार्थे कप्रत्यये 'प्रत्ययस्थात्' इतीत्त्वम् ॥

हित्वा दैत्यरिपोरुरः स्वभवनं शून्यत्वदोषस्फुटा-
सीदन्मर्कटकीटकृत्रिमसितच्छत्त्रीभवत्कौस्तुभम् ।
उज्झित्वा निजसद्म पद्ममपि तद्व्यक्तावनद्धीकृतं
लूतातन्तुभिरन्तरद्य भुजयोः श्रीरस्य विश्राम्यति ॥ ३७ ॥

हित्वेति ॥ श्रीः लक्ष्मीः अद्यास्य भुजयोरन्तः मध्ये विश्राम्यति शोभते । किं कृत्वा—दैत्यरिपोर्विष्णोः स्वभवनं स्वस्य गृहं उरः हित्वा । तथा—तत् निजसद्म पद्ममप्युज्झित्वा । किंभूतमुरः—लक्ष्म्या त्यक्तत्वाच्छून्यत्वलक्षणेन दोषेण स्फुटमासीदन्तः स्थिरीभवन्तो मर्कट-कीटा ऊर्णनाभकीटास्तेषां करणेन निर्वृत्तं तै रचितं कृत्रिमं सितच्छत्रमिव सितछत्रा[illegible] लाकारं श्वेतं गर्भाण्ड(न्तः) स्थापनस्थानं तद् भवंस्तद्रूपीभवन्कौस्तुभाख्यो मणिर्यत्र । किंभूतं पद्मम्—लूतातन्तुभिः मर्कटीसूत्रैर्मर्कटसदृशैः । कमलसूत्रैरित्यर्थः । व्यक्तं प्रकटं [illegible] बद्धम् । बिसतन्तूनामेव लूतातन्तुत्वेनोक्तिः परस्परमतिदूरे द्वे अपि भवने [illegible] ताभ्यां श्रान्ता सती गृहद्वयं परित्यज्य अतिसमीपवर्तिनोरस्य भुजयोरेव भवनयोः [illegible] निषीदति । अत्रैव स्थिरा भवतीत्यर्थः । कौस्तुभस्य धवलत्वाल्लूताच्छत्रत्वेन, कमलसूत्राणां च सादृश्याल्लूतातन्तुत्वेनोत्प्रेक्षा । 'लूता स्त्री तन्तुवाये स्यात्' इत्यमरः ॥

सिन्धोर्जैत्रमयं पवित्रमसृजत्तत्कीर्तिपूर्ताद्भुतं
यत्र स्नान्ति जगन्ति सन्ति कवयः के वा न वाचंयमाः ।
यद्विन्दुश्रियमिन्दुरञ्चति जलं चाविश्य दृश्येतरो
यस्यासौ जलदेवतास्फटिकभूर्जागर्ति यागेश्वरः ॥ ३८ ॥

सिन्धोरिति ॥ अयं सिन्धोर्जैत्रं समुद्रस्य जेतृ पवित्रमुज्ज्वलं पावनं च [illegible]

---

१ '[illegible]' इति जीवातुः । २ 'अचैतन्यात् [illegible] [illegible] [illegible] [illegible]' इति जीवातुः ।

यशोरूपतडागाधर्दनरूजमितेन । यत्र कीर्तितडागे जगन्ति स्नान्ति उज्ज्वलीभवन्ति स्नानं च कुर्वन्ति । यद्वर्णनविषये के वा कवयः स्फुटं (?) रतनार्थतापी अपि वाचंयमा मौनिनो न सन्ति । अपि तु सर्वेऽपि मौनिन एव भवन्तीत्यर्थः । अथ च—के वयो जलपक्षिणः के वा तापसा न सन्ति । अपि तु तडागे बहवः पक्षिणस्तापसाश्च विद्यन्ते । इन्दुः यस्य कीर्तितडागस्य बिन्दुश्रियमन्वति प्राप्नोति । यदपेक्षया चन्द्रोऽल्पीयानित्यर्थः । अथ च—महतस्तडागस्य जलबिन्दुशोभामिन्दुरन्वेति । यदीयो बिन्दुरेवेन्दुरित्यर्थः । यस्य च जलमाविश्य प्रविश्येव दृश्येतरः अस्पष्टादिनेत्रयोरविषयभूतः असौ जगति विद्यमानः स्फटिक एव भूः यस्य स कैलास एव या(गा)गेश्वरः स्फटिकश्रीशिवलिङ्गरूपी जलदेवता जागर्ति स्फुरति । स्वच्छत्वाज्जले क्षिप्तः स्फटिको न दृश्यते । इयमेव स्फटिकपरीक्षा । उज्ज्वलतरैतत्कीर्तिकल्लोलप्लावित इव कैलासो न दृश्यते । इन्दुर्जले चाविश्य जले प्रतिबिम्बितः सन् यद्विन्दुश्रियमन्वेतीति वा । असौ इन्दुरेव यस्य जलमाविश्यादृश्यः स्फटिकनिर्मितो यागेश्वरः सन् जलदेवता जागर्ति । कीर्तिमध्यपाती चन्द्रोऽपि स्वच्छत्वान्न दृश्यत इत्यर्थ इति वा । 'यागेश्वरः स्फटिकः' इति प्रसिद्धिः । समुद्राद्वैषम्यं तु 'सागरं पर्वणि स्पृशेत्' इति वचनात्पर्वातिरिक्ते काले समुद्रस्यास्पृश्यत्वादस्य तु सर्वदा पवित्रत्वात् । समुद्रस्य भूलोकस्यैव कतिपयस्यैव जनस्य स्नानार्हत्वादस्य तु लोकत्रयस्य स्नानार्हत्वात् । तस्य वर्णयितुं शक्यत्वादस्य चाशक्यत्वात् । तस्य च चन्द्रकलर्पत्वादस्य च बिन्दुरूपचन्द्रत्वात् समुद्रे च श्रीविष्णुरूपाया जलदेवतायाः सुप्तत्वादत्र च यागेश्वरस्य जागरत्वात् । एवंविधो यशोब्धिः कोऽपि नास्तीति भावः । यागेश्वर इति । असौ जलदेवता जागर्ति । असौ का—या स्फटिकभूर्यागेश्वरः कैलासो जागर्तीति वा । 'वाचि यमो व्रते' इति खचि 'वाचंयमपुरंदरौ च' इति साधुः ॥

अन्तःसंतोषबाष्पैः स्थगयति न दृशस्तामिराकर्णयिष्य-
न्नङ्गे नानन्तरोमा रचयति पुलकश्रेणिमानन्दकन्दाम् ।
न क्षोणीभङ्गभीरुः कलयति च शिरःकम्पनं तन्न विद्मः
शृण्वन्नेतस्य कीर्तीः कथमुरगपतिः प्रीतिमाविष्करोति ॥ ६२ ॥

अन्तरिति ॥ यस्माद् उरगपतिः शेषः अन्तः संतोषबाष्पैरानन्दाश्रुभिः कृत्वा दृशो नेत्राणि न स्थगयत्याच्छादयति । यतः—ताभिर्दृग्भिः एतद्गुणानाकर्णयिष्यन्नस्ति । चक्षुःश्रवस्त्वाच्चक्षुर्भिर्नेत्राच्छादनेन गुणाकर्णनबाधया आनन्दाश्रुभिर्दृशौ नाच्छादयति । तथा—आनन्द एव कन्दो मूलं यस्यास्तां पुलकश्रेणिं रोमाञ्चपङ्क्तिमपि अङ्गे न रचयति करोति । यतः—अनन्तरोमानविद्यमानरोमा । तथा—शिरःकम्पनं न करोति । यतः—क्षोणीभङ्गभीरुः यदहं मूर्धानं कम्पयिष्यामि तर्हि भूमिः पतिष्यतीति भिया । तस्मात्स्वकार्यसंभवेनास्य कीर्तीः शृण्वन् शेषोऽन्तःकरणे समुत्पन्नां प्रीतिं हर्षं केनाप्यन्येन प्रकारेणाविष्करोतीति यद्वयं तद् न विद्मः । आश्चर्यमस्य कीर्तिरिति भावः । तदहनुरुक्ता तुल्या इति वृत्तमेव ॥

आचूडाग्रमनल्पजयपटुर्दण्डं ज्वलद्दण्डानयं
संरम्भे रिपुराजकुञ्जरघटाकुम्भस्थलेषु स्थिरान् ।
सा सेवास्य दृढः प्रतीरति तथा नालं कुलक्ष्माभृच-
स्पर्धामिषु तेषु वासुरतनते दृष्टान्तदृष्टान्तरे ॥ ६३ ॥

आचूडेति ॥ संरम्भे युद्धसंरम्भे सति जये पटुरयं राजा रिपवश्च ते. राजानश्च तेषां कुञ्जरघटाकुम्भस्थलेषु दूरनिखाततया स्थिरान् शल्यस्य अग्रलोहस्य संबन्धिनो दण्डखण्ड- न्प्रासान्या आचूडाग्रं पुङ्खाग्रं मर्यादीकृत्य मदमज्जयन्निचखान सा अस्य एतत्कर्तृका तथैव महती सेवा । तया सेवया त्वं अस्मै कुतो न प्रसीदसि । यतः—किंभूताय—तव कुचतुल्यत्वा- गर्धिषु कुचसाम्याभिलाषिषु तेषु कुम्भस्थलेषु तान्पूर्वोक्तान्प्रचण्डान्दण्डान्कृतवतेऽपि कुचार्थे- ऽपि । येन हि महती सेवा क्रियते तस्मै प्रसन्नीभूयते । अतिशूरोऽयं तस्माद्वृणीष्वेत्यर्थः ॥

स्मितश्रिया सृक्कणि लीयमानया वितीर्णया तद्गुणशर्मणेव सा ।
उपाहसत्कीर्त्यमहत्त्वमेव तं गिरां हि पारे निषधेन्द्रवैभवम् ॥ ४१ ॥

स्मितेति ॥ सा भैमी स्मितश्रिया तं राजानमुपाहसदुपहसितवती । यतः—कीर्त्य वर्णयितुं शक्यं महत्त्वं यस्य एवंभूतमेव । हि यस्मात्—निषधेन्द्रवैभवं नलसामर्थ्यं गिरां पारे वागगोचरः । वर्णयितुमपि न शक्यत इत्यर्थः । नलादेतस्य न्यूनत्वादुपहास इत्यर्थः । किंभूतया स्मितश्रिया—तद्गुणशर्मणा तदीयगुणाकर्णनसमुत्पन्नेन सुखेन वितीर्णयेव दत्तयेव इत्युत्प्रेक्षा । तया—सृक्कणि ओष्ठप्रान्ते लीयमानया संसर्गिण्या । कीर्त्यमित्यसद्गुणारोपणार्थसूचकं पदम् ॥

निजाक्षिलक्ष्मीहसितैणशावकामसावभाणीदपरं परंतपम् ।
पुरैव तद्दिग्वलनश्रियां भुवा भ्रुवा विनिर्दिश्य सभासभाजितम् ॥ ४२ ॥

निजेति ॥ असौ वाणी अपरमन्यं परंतपं राजानं भ्रुवा पुरैव पूर्वमेव विनिर्दिश्य दर्शयित्वा तां भैमीमभाणीदुवाच । किंभूता—निजाक्ष्णोर्लक्ष्म्या नेत्रकान्त्या हसित एणशावको मृगशिशुर्यया । किंभूतया भ्रुवा—तस्य वर्णनीयस्य राज्ञो दिशा तत्संमुखं वलनेन ईषद्वक्री- कृत्य याः श्रियस्तासां भुवा स्थानभूतया । किंभूतमेनम्—सभया सभास्थैः सभाजितं समा- जितं दृष्टं पूजितं वा, रिपुतापकरत्वादन्वर्थनामानं वा ॥

कृपा नृपाणामुपरि क्वचिन्न ते नतेन हा हा शिरसा रसादृशाम् ।
भवन्तु तावत्तव लोचनाञ्चला निपेयनेपालनृपालपालयः ॥ ४३ ॥

कृपेति ॥ हे भैमि, ते तव नृपाणां मध्ये क्वचिदप्युपरि कस्याप्युपरि कृपा नास्ति । हा हा कष्टं कष्टम् । कमप्यवलोकयस्यपि नेति न युक्तमित्यर्थः । किंभूतानाम्—त्वत्कृतावज्ञाजन्य- लज्जया नतेन शिरसा रसायां भूमौ दृश्येषाम् । रसां पश्यन्तीति वा । अन्यत्र कृपा मा भून्नाम तावत् । किंतु तव लोचनाञ्चला अपाङ्गदर्शाः निपेयः सादरावलोकनार्हो यो नेपा- लानां देशानां नृपालो राजा तं पिबन्ति सादरं पश्यन्ति एवंभूता अलयो भ्रमरभूता भवन्तु । एनं तावत्कटाक्षैर्विलोकयेत्यर्थः ॥

ऋजुत्वमौनश्रुतिपारगामिता यदीयमेतत्परमेव हिंसितुम् ।
अतीव विश्वासविधायि चेष्टितं बहुर्महानस्य स दाम्भिकः शरः ॥ ४४ ॥

ऋजुत्वेति ॥ ऋजुत्वमवक्रता नम्रत्वप्रियवादित्वादित्वादिरूपा विनीतता च । तथा— मौनं निःशब्दत्वं वाङ्नियमश्च । श्रुतिपारगामिता आकर्णपूर्णता वेदपारगामिता च । एवंरूपं अतीवातितरां विश्वासकारि विगतश्वासकारि मनसि हितप्रलयकारकं च अलीकपवनान्त-

---

१ 'अत्र नलगुणानुरागाख्येन कारणेनैतदपरागरूपकार्यसमर्थनाच्चद्रूपार्थान्तरन्यासः' इति जीवातुः ।

वशाद्वा श्वासाभावकारि यदीदमेतच्चेष्टितं परं शत्रुं तद्व्यतिरिक्तं च सर्वं जनं हिंसितुमेव हन्तु-मेव प्राणप्रियधनग्रहणार्थमेव च न तु लब्धव्यधनमात्रप्रयोजनं, न चार्जवादिगुणार्जनं प्रयो-जनम् । सः अस्य बहुसंख्यः महानक्षयोऽतिदीर्घश्च शरः दाम्भिकः । 'दम्भेन चरति' इति रूपकम् । अतिक्रूरोऽयमिति भावः । दाम्भिके यावद्वृत्तं तत्सर्वमेतस्य शरे विद्यत इत्यर्थः । दाम्भिकेन यत्क्रियते तदेतच्छरेण क्रियत इत्यर्थः इति वा । दम्भो हिंसा माया च प्रयोजनमस्य, 'प्रयोजनम्' इति ठक् । तेन चरति वा, 'चरति' इति ठक् ॥

रिपूनवाप्यापि गतोऽवकीर्णितामयं न यावज्जनरञ्जनव्रती ।
भृशं विरक्तानपि रक्तवत्तरानिकृत्य यत्तानसृजात्सृजद्युधि ॥ ४५ ॥

रिपूनिति ॥ यावन्तो जनास्तावतां रञ्जनं तदेव व्रतं तदस्यास्तीति एवंभूतोऽयं राजा रिपूनप्यवाप्य रिपून्प्राप्यापि वा । अवकीर्णितां क्षतव्रतत्वं न गतः प्राप्तः । यत् यस्मा-त्स्वशरीरादिविषये भृशं विरक्ताननुरागिणोऽपि । अथ च—एनं दृष्ट्वा विगतरक्तेरागानपि तानरिसृन् युधि निकृत्य यदिष्ठत्वा अद्धना रुधिरेण कृत्वा रक्तवत्तरानत्यन्तोऽनुरागिणः । अथ च रक्तं विद्यते येषु ते रक्तवन्तः, अतिशयेन रक्तवन्तो रक्तवत्तराः एवंभूतांस्तानसृज-चकार । वैरिणामपि रञ्जनात्क्षतव्रतत्वं न जातमित्यर्थः । रक्तवत्तरान्, रूपतुमंतुप् च ॥

पतत्येतत्तेजोहुतभुजि कदाचिद्यदि तदा
पतङ्गः स्यादङ्गीकृततनपतङ्गापदुदयः ।
यशोऽनुप्यैवोपार्जयितुमलमर्थेन विधिना
कथंचित्क्षीराम्भोनिधिरपि कृतस्तत्प्रतिनिधिः ॥ ४६ ॥

पततीति ॥ पतङ्गः सूर्यः एतस्य तेज एव हुतभुगग्निस्तस्मिन् यदि कदाचित्कस्मिंश्चित् समये पतति तदा तर्हि अङ्गीकृततनः स्वीकृतदेहः पतङ्गानां शलभानां देहस्य आपद् उदयो येन एवंभूत एव स्यात् । एतत्तेजसातितरां संतापनपीडितः स्यात् । एत-त्तेजोपेक्षया सूर्यो हीनः बहुप्रेक्षया शलभतुल्य इत्यर्थः । तथा—अनुप्य यशः कथंचित्के-नापि प्रकारेणोपार्जयितुमलमर्थेनेव विधिना ब्रह्मणा अतिमहत्क्षीराम्भोनिधिरपि तस्य एत-दीययशसः प्रतिनिधिरनुकल्पः कृतः । कथंचित्कृत इति वा । यश एव यशःसदृशमिति वा । मुख्याभावे हि प्रतिनिधिरपि क्रियते । क्षीराम्बुधिरमलस्य यशसः इत्यर्थः । एवंविधः समान-मान्यसर्जो न कोऽपि नास्तीति भावः । मुख्यापेक्षया प्रतिनिधेर्न्यूनत्वात् [illegible] क्षीरो-दादप्येतदीयमपि यशः कीर्तेरधिकत्वात् ॥

यावत्पौलस्त्यवास्तूभयदुभयहरिद्वैनिलेखोत्तरीये
सेतुप्रालेयशैलौ चरति नरपतेस्तावदेतस्य कीर्तिः ।
यावच्चाकल्पनाशापरिवृढनगरारम्भपल्यङ्कमुद्रा-
वज्री संध्यापताकारचितशिखरसौमेरवाकुनौ च ॥ ४७ ॥

यावदिति ॥ हे भैमि, सेतुप्रालेयशैलौ [illegible]
[illegible] तावत् [illegible] ॥ [illegible]

---

१ 'अत्र [illegible]' इति पाठः ।

आचूडेति ॥ संरम्भे युद्धसंभ्रमे सति जये पट्ठुरयं राजा रिपवश्च ते . राजानश्च तेषां कुञ्जरघटाकुम्भस्थलेषु दूरनिखाततया स्थिरान् शल्यस्य अग्रलोहस्य संबन्धिनो दण्डान्प्रासान्वा आचूडाग्रं पुङ्खाग्रं मर्यादीकृत्य मदमज्जयन्निचखान सा अस्य एतत्कर्तृका तवैवाग्रे महती सेवा । तया सेवया त्वं अस्मै कुतो न प्रसीदसि । यतः—किंभूताय—तव कुचस्पर्धिषु कुचसाम्याभिलाषिषु तेषु कुम्भस्थलेषु तान्पूर्वोक्तान्प्रचण्डान्दण्डान्धृतवतेऽपि कुचद्वेषेऽपि । येन हि महती सेवा क्रियते तस्मै प्रसन्नीभूयते । अतिशूरोऽयं तस्मादेनं वृणीष्वेत्यर्थः ॥

स्मितश्रिया सृक्कणि लीयमानया वितीर्णया तद्गुणशर्मणेव सा ।
उपाहसत्कीर्त्यमहत्त्वमेव तं गिरां हि पारे निषधेन्द्रवैभवम् ॥ ४१ ॥

स्मितेति ॥ सा भैमी स्मितश्रिया तं राजानमुपाहसदुपहसितवती । यतः—कीर्तवर्णयितुं शक्यं महत्त्वं यस्य एवंभूतमेव । हि यस्मात्—निषधेन्द्रवैभवं नलसामर्थ्यं गिरां पारे वागगोचरः । वर्णयितुमपि न शक्यत इत्यर्थः । नलादेतस्य न्यूनत्वादुपहास इत्यर्थः । किंभूतया स्मितश्रिया—तद्गुणशर्मणा तदीयगुणाकर्णनसमुत्पन्नेन सुखेन वितीर्णयेव दत्तयेव कृतया । तथा—सृक्कणि ओष्ठप्रान्ते लीयमानया संसर्गिण्या । कीर्त्यमित्यसद्गुणारोपणार्थसूचकं पदम् ॥

निजाक्षिलक्ष्मीहसितैणशावकामसावभाणीदपरं परंतपम् ।
पुरैव तद्दिग्वलनश्रियां भुवा भ्रुवा विनिर्दिश्य सभासभाजितम् ॥ ४२ ॥

निजेति ॥ असौ वाणी अपरमन्यं परंतपं राजानं भ्रुवा पुरैव पूर्वमेव विनिर्दिश्य दर्शयित्वा तां भैमीमभाणीदुवाच । किंभूता—निजाक्ष्णोर्लक्ष्म्या नेत्रकान्त्या हसित एणशावको मृगशिशुर्यया । किंभूतया भ्रुवा—तस्य वर्णनीयस्य राज्ञो दिशा तत्संमुखं वलनेन इतरेतरकृत्वा याः श्रियस्तासां भुवा स्थानभूतया । किंभूतमेनम्—सभया सभास्थैः मनोज्ञतया सभाजितं दृष्टं पूजितं वा, रिपुतापकरत्वादन्वर्थनामानं वा ॥

कृपा नृपाणामुपरि क्वचिन्न ते नतेन हा हा शिरसा रसादृशाम् ।
भवन्तु तावत्तव लोचनाञ्चला निपेयनेपालनृपालपालयः ॥ ४३ ॥

कृपेति ॥ हे भैमि, ते तव नृपाणां मध्ये क्वचिदप्युपरि कस्याप्युपरि कृपा नास्ति । हा हा कष्टं कष्टम् । कमप्यवलोकयस्यपि नेति न युक्तमित्यर्थः । किंभूतानाम्—त्वल्लब्धलज्जया नतेन शिरसा रसायां भूमौ दृग्येषाम् । रसां पश्यन्तीति वा । अन्यत्र कृपा नाभूनाम तावत् । किंतु तव लोचनाञ्चला अपाङ्गदृगंशाः निपेयः सादरावलोकनार्हो यो नेपालानां देशानां नृपालो राजा तं पिबन्ति सादरं पश्यन्ति एवंभूता अलयो भ्रमरभूता भवन्तु । एनं तावत्कटाक्षैर्विलोकयेत्यर्थः ॥

ऋजुत्वमौनश्रुतिपारगामिता यदीयमेतत्परमेव हिंसितुम् ।
अतीव विश्वासविधायि चेष्टितं बहुर्महानस्य स दाम्भिकः शरः ॥ ४४ ॥

ऋजुत्वेति ॥ ऋजुत्वमवक्रता नम्रत्वप्रियवादित्वादित्वादिरूपा विनीतता च । तथा—मौनं निःशब्दत्वं वाङ्नियमश्च । श्रुतिपारगामिता आकर्णपूर्णता वेदपारगामिता च । एतदतीवातितरां विश्वासकारि विगतश्वासकारि मनसि हितप्रत्ययकारकं च अलोकपवनान्धक-

१ 'अत्र नलगुणानुरागास्येन कारणेनैतदपरागरूपकार्यसमर्थनादर्थान्तरन्यासः' इति जीवातुः।

स्तावत्पर्यन्तं चरति भ्रमति। किंभूतौ शैलौ—पुलस्त्यगोत्रापत्ययो रावणकुबेरयोः अगृहभूमिभूते अपि वास्तूभवन्त्यौ गृहभूमित्वं प्राप्ते उभे द्वे अपि ये हरितौ दक्षिणोत्तरे दिशौ तयोः क्रमेण श्यामत्वाच्छुभ्रत्वाच्च लोमरेखा रोमावली उत्तरीयं पूर्वकालवरणतद्रूपौ। समुद्रबन्धनशिलापरम्परा दक्षिणदिशो रोमस्थानीया। हिमाचलश्चोत्तरदिशः स्थानीयः। तथा—प्राक्च प्रत्यक्च आशे प्राचीप्रतीच्यौ दिशौ तयोः परिवृढौ स्वामिनौ इन्द्रवरुणौ तयोः ये नगरे तयोर्यदारम्भणमारम्भस्तल्लिन् स्तम्भयोरिव सुन्दरो गुरुः आकारो ययोस्तौ उभावद्री उदयास्ताचलौ च यावन्तं देशमभिव्याप्य तिष्ठतः। पूर्वेऽद्रीः किंभूतावद्री—प्रातः-सायंसंध्ये एव रक्तत्वात्पताकारुची ताभ्यां रचिता निर्मिता शिखानां शिखरे शोणा रक्ता शोभा ययोस्तौ। पौलस्त्य इति, गोत्रापत्ये गर्गादित्वाद्यञ्। वास्तूभवेदिति, 'च्वौ च' इति दीर्घः। उभौ अवयवौ ययोस्ते उभय्यौ ते च ते हरितौ चेति उभयत्र पुंवद्भाव इति वा॥

युद्धा चाभिमुखं रणस्य चरणस्यैवादसीयस्य वा
बुद्ध्वाऽन्तः स्वपरान्तरं निपततामुन्मुच्य बाणावलीः।
छिन्नं वावनतीभवन्निजभियः खिन्नं भरेणाथ वा
राज्ञानेन हठाद्विलोठितमभूद्भूमावरीणां शिरः॥ ४८॥

युद्धेति॥ अनेन राज्ञा अरीणां शिरः भूमौ हठाद्बलात्कारेण विलोठितं झटिति छेदात्स्फुरद्भ्रमणमभूत्। किंभूतानामरीणाम्—अदसीयस्यामुष्यायं अदसीयस्तस्य रणस्याभिमुखं संमुखम्। प्रारम्भमभि लक्ष्यीकृत्य वा। बाणावलीः शरपङ्क्तीरुन्मुच्य मुक्त्वा युद्धा वा निपतताम्। बाणपङ्क्तिवर्षणेन युद्धं कृत्वा रणभूमौ पततामिति यावत्। अथ च—अन्तःकरणे स्वपरान्तरं स्वस्य आत्मनः परस्य चान्तरं न्यूनाधिकत्वतारतम्यं बुद्ध्वा वा अदसीयस्य चरणस्यैवाभिमुखं बाणावलीरुन्मुच्य निरायुधीभूय निपतताम्। एतच्चरणयोर्दण्डवन्नमस्कारं कुर्वताम्। किंभूतं शिरः-(रणसंमुखपक्षे) छिन्नं वा बाणैः खण्डितं सत् वा अवनतीभवत् नतग्रीवं भूमौ पतितं सत्। तथा—(चरणपक्षे)—अथवा निजभियो भरेण स्वीयभयबाहुल्येन वा खिन्नं सत् अवनतीभवत्। (द्वितीयपक्षे-) बलाद्विलोठितं वामदक्षिणभागलग्नकारिकृतम्। वैरिणो यदि युध्यन्ते तर्हि म्रियन्त एव। ये तु विचारका भीरवश्च, ते शस्त्राणि परित्यज्य एनमेव शरणं गच्छन्ति जीवन्तीति। एवकारेणान्यः शरण्यो न विद्यत इति सूचितम्। अन्यनपि भाराक्रान्तं नम्रं भवति। वाशब्दः प्रत्येकविकल्पे॥

न तूणादुद्धारे न गुणघटने नाश्रुतिशिखं
समाकृष्टौ दृष्टिर्न वियति न लक्ष्ये न च भुवि।
नृणां पश्यत्यस्य क्वचन विशिखान्किं तु पतित-
द्विपद्वक्षःश्वभ्रैरनुमितिरसून्गोचरयति॥ ४९॥

नेति॥ युद्धकौतुकदर्शिनां नृणां मनुष्याणां दृष्टिः अस्य विशिखान् क्वचन कस्मिन्नपि तूणादुद्धारे निष्कासने उपादानकाले न पश्यतीति सर्वत्र संबन्धः। तथा—कस्मिन्नपि गुणे मौर्व्यां संधानकाले न। आश्रुतिशिखं कर्णाग्रं मर्यादीकृत्य समाकृष्टौ कस्मिन्नपि सन्धानकाले न। तथा—मोचनानन्तरं वियति कस्मिन्नपि गगनदेशे न। तथा—लक्ष्ये

भिद्य ततो निर्गत्य भुवि कस्मिन्नपि भूप्रदेशे पतितान्न पश्यति । तर्हि किंतु पतितानां बाणा- घातकृतमर्मवेधवशाद्गतप्राणानां भूपिष्ठानां द्विषतां वक्षसः श्वभ्रैर्दैर्दण्डं प्रहस्य बहिर्निर्गतशरकृत- च्छिद्रैः कृत्वा या अनुमितिरनुमानज्ञानं तस्यन्बाणान्गोचरयति ज्ञापयति । वेदनेन बाणा न मुक्ताश्चेत्तेषां वक्षसि छिद्राणि कथं भवेयुरित्याद्यनुमितिः । 'चक्षुःश्वभ्रैः' इति पाठे चक्षुष्येव विध्यतीति भावः ॥

दमस्वसुश्चित्तमवेत्य हासिका जगाद देवीं कियदस्य वक्ष्यसि ।
भण प्रभूते जगति स्थिते गुणैरिहाप्यते संकटवासयातना ॥ ५० ॥

दमेति ॥ हासयतीति हासिका अतिनीचा चेटी दमस्वसुः चित्तं तद्गुणवर्णनबाहुल्यनिरपेक्षं तच्चित्तमनुरक्तं चावेत्य ज्ञात्वा देवीं सरस्वतीं जगाद । हे देवि, अस्य कियत् एतावत्कियच्चरितं वक्ष्यति वर्णयिष्यति । अपि तु बहुत्वात्प्रत्येकं वर्णयितुं न शक्यत इत्यर्थः । गुणैः सौन्दर्यादिभिः प्रभूते महति जगति स्थितेऽपि इह नृपे संकटवासरूपा संमर्दवसतिरूपा यातना संकटवासेन वा यातना तीव्रवेदना आप्यते प्राप्यत इति मम कथय । सर्वे गुणाः सर्वं जगत्परित्यज्यास्मिन्नेव संमर्देन निवसन्तीत्येकेनैवाकारेण वर्णय । पृथग्वर्णनात्तावत्स्यादि- त्यर्थः । वाक्यार्थः कर्म । अथ च भूपति वर्तमाने जगति मध्ये गुणैरिहैव कष्टरूपा वसति- पीडा प्राप्यते न त्वन्यत्र । एतन्निवासे गुणा उद्विजन्त एवानर्हत्वादेकोऽपि गुणोऽत्र नास्तीति भणित्युपहासः । अस्य कियद्वक्ष्यति कथय । अतःपरं मा स्म वादीः । तस्मान्निर्गुणत्वेनैनं गुणि- त्वेन कियन्तं कालं वर्णयिष्यसीति कथयेति वा । 'स्थितैः' इति पाठे गुणविशेषणम् । प्रभूतैरिति च ॥

ब्रवीति दासीह किमप्यसंगतं ततोऽपि नीचेयमति प्रगल्भते ।
अहो सभा साधुरितीरिणः क्रुधा न्यषेधदेतत्क्षितिपानुगाञ्जनः ॥ ५१ ॥

ब्रवीतीति ॥ जनः प्रेक्षकः क्रुधा स्वस्वामिवर्णनविघातजनुलक्षेन क्रोधेन इतीरिणो भाष- माणान् एतस्य क्षितिपस्यानुगाननुचरान् न्यषेधन्निवारयामास । इति किम्—इह सभायां मैन्या दासी किमपि असंगतमयुक्तं ब्रवीति 'चलेऽपि काकस्य' इत्यादि भाषते । ततोऽपि दास्या अपि सकाशान्नीचा इयं चेटी अतिप्रगल्भते नितरां धृष्टतया भाषते । नियामकः कोऽपि नास्ति । अहो अयुक्तत्वादाश्चर्यं साधुः सभा । विरुद्धलक्षणया काक्वा अकारप्रश्लेषेण वासाधुरेतादृशी सभा न कुत्रापीति । ब्रवीति, वर्तमानसामीप्ये भूते लट् । 'वदति' इति वा पाठः समीचीनः । गल्भङ् धार्ष्ट्ये ॥

अथान्यमुद्दिश्य नृपं कृपामयी मुखेन तद्दिङ्मुखसंमुखेन सा ।
दमस्वसारं वदति स्म देवता गिरामिलाभूवदतिस्मराश्रियम् ॥ ५२ ॥

अथेति ॥ अथ कृपामयी बहुकृपा सा गिरां देवता मुखेन अन्यं नृपमुद्दिश्य निर्दिश्य दमस्वसारं वदति स्म । किंभूतेन—तस्योद्दिष्टस्य नृपस्य दिङ्मुखं दिग्भागस्तस्य संमुखेन । किंभूतं नृपम्—इलाभूरुरवसमिव अतिक्रान्तस्मरा श्रीर्यस्य तम् ॥

---

१ 'वेगाविद्धपीठैः' इति जीवातुः । २ 'तेन तुल्यं क्रिया चेद्वतिः' । किंवा यत्र सप्तम्यन्तात्' इति जीवातुः । [illegible] इति सुखिन् ।

विलोचनेन्दीवरवासवासितैः सितैरपाङ्गाध्वगचन्द्रिकाञ्चलैः।
अपाममपाकृत्य निभान्निभालय क्षितिक्षितं मालयमालयं रुचः॥ ५३॥

विलोचनेति॥ हे भैमि, त्वं अपाङ्गाध्वगाया नेत्रप्रान्तरूपमार्गगामिन्याश्चन्द्रिकाया नेत्रमध्यगनीलगोलकस्य अञ्चलैरिवाञ्चलैरतिदीर्घावलोकनव्यापारैः। कटाक्षैरिति यावत्। ... कृत्वा निभाद्धस्त्वन्तरविलोकनव्याजादपाममपाकृत्य मालयं मलयाद्रिवासिनं मावाः चन्द्रस्य लक्ष्म्या आलयं वा क्षितिक्षितं निभालय विलोकय। किंभूतैरञ्चलैः—विलोचने एव इन्दीवरे नीलोत्पले नीलोत्पलतुल्ये नेत्रे तयोर्मध्ये वासः स्थितिस्तया वासितैर्भावितैः। नयनकालिम्ना नीलीकृतैरित्यर्थः। तथा—सितैः शुभ्रैर्नाऽश्वेतकान्तिभिः। कटाक्षैर्विलोकनैस्तैः। अथ च—विलोचनतुल्यानां नीलोत्पलानां वासेन परिमलेन सुगन्धीकृतैः सितैश्चिर्विकास-शीलत्वादपाङ्गतुल्यमार्गगामिन्या ज्योत्स्नाया अञ्चलैः करैरुपलक्षितम्। तथा—चन्द्रस्थानम्। तथा—मः शिव आलयो यस्य। शिवमौलिनिवासिनं चन्द्रमेवैनं राजानं अपा-पाकृत्य पश्येत्यर्थः। 'मः शिवे मा च पद्मायाम्' इति विश्वः। निभालय, चुरादावात्मने-दिनः पाठात्परस्मैपदं चिन्त्यम्। निभालनं निभालस्तद्वान्निभालवान्, तादृशं करोति 'तत्क-रोति—' इति णिचि मतुब्लोपे साधनीयम्॥

इमं परित्यज्य परं रणादरिः स्वमेव भग्नः शरणं मुधाविशत्।
न वेत्ति यत्त्रातुमितः कृतस्मयो न दुर्गया शैलभुवापि शक्यते॥ ५४॥

इममिति॥ हे भैमि, रणाद्भग्नः पलायितः कृतस्मयः कृतगर्वोऽरिः एतस्य शत्रुः परं शत्रुभूतम्। अथ च महान्तम्। इमं परित्यज्य स्वमेव स्वीयमेव शरणं गृहं मुधा वृथा अविशत्। त्वदीयोऽहं मां रक्षेत्युक्त्वा एनमेव शरणं रक्षितारं कृतगर्वत्वादप्राप्य स्वगृहं वृथैव गत इत्यर्थः। यद्यस्मात् दुर्गया विषमया शैलस्य भूस्तया। गिरिदुर्गेणेत्यर्थः। तथापि इतोऽस्मान्नृपात्त्रातुं न शक्यत इति न वेत्ति। गिरिदुर्गं प्रविष्टोऽपि बलात्ततोऽपकृष्य हन्यते। स्वगृहं प्रविष्टो हन्यत इति किं वाच्यम्। अतः स्वगृहप्रवेशो व्यर्थ इत्यर्थः। अथ च पर्वत-पुत्र्या दुर्गयापि त्रातुं न शक्यते धृतदर्प, हन्त्येव शरणागतं रक्षत्येवायमिति भावः। 'शरणं गृहरक्षित्रोः' इत्यमरः॥

अनेन राज्ञार्थिषु दुर्भगीकृतो भवन्घनध्वानजरत्नमेदुरः।
तथा विदूराद्रिरदूरतां गमी यथा स गामी तव केलिशैलताम्॥ ५५॥

अनेनेति॥ एतद्दरणेन सः अतिप्रसिद्धो विशेषेण दूरोऽद्रिः। अथ च विदूरनाम रोहणाचलः। तथा तेन प्रकारेणादूरतां सामीप्यं गमी गन्ता। यथा येन प्रकारेण तव केलिशैलतां क्रीडापर्वतत्वं गमी गमिष्यति। किंभूतः—अतिवदान्येनानेन राज्ञार्थिषु याचकेषु विषये दुर्भगीकृत उपेक्षाविषयतामयाचनीयतां प्रापितः। अत एव व्ययाभावाद्भवन् घना मेघास्तेषां ध्वानः शब्दस्तस्माज्जातै रत्नैर्मेदुरः परिपुष्टो भवन्। विदूराद्रौ हि नवमेघ-शब्दाद्रत्नशलाका उत्पद्यन्ते ताश्च याचकैर्नीयन्ते। अस्मिंस्तु बहुप्रदे सति तत्र कस्यापि याचकस्यागमनाद्व्ययाभावाद्रत्नैः कृत्वा त्वदुपवनं यावन्मेदुरो भवति स एव रत्नमयत्वात्तव क्रीडापर्वतस्थाने भविष्यति। अतिवदान्योऽन्यमिति भावः। 'भवद्घनध्वान—' इति पाठे भवद्भ्य उत्पन्नेभ्यो घनध्वानेभ्य इति व्याख्येयम्। गमी गामी इति पूर्ववत्॥

राज्ञामस्य शतेन किं कलयतो हेतिं शतघ्नीं कृतं
लक्षैर्लक्षभिदो दृशैव जयतः पद्मानि पद्मैरलम्।
कर्तुं सर्वपरिच्छिदः किमपि नो शक्यं परार्धेन वा
तत्संख्यापगमं विनास्ति न गतिः काचिद्बतैतद्द्विषाम् ॥ ५८ ॥

राज्ञामिति ॥ नाम्ना शतघ्नीं चतुःशतीलोककण्टकसंचितां हेतिं शस्त्रं कलयतो धारयतोऽ राज्ञां शतेन किम्। तेन शस्त्रेण मारणात्तैरनेकैरप्यस्य किमपि कर्तुं न शक्यत इत्यर्थः। अ च यः शतमारणसमर्थं शस्त्रं गृह्णाति तस्य शतसंख्यामितै राजभिः किमपि कर्तुं न शक्यते तथा—राज्ञां लक्षैः पूर्यताम्। यतः—लक्षं वेध्यं भिनत्तीति लक्षभित्तस्य लक्षभिदः। हि कुत्रचिदप्यप्रतिहतसायकस्तस्य लक्षसंख्यैरपि किमपि कर्तुं न शक्यत इत्यर्थः। तथा— राज्ञां पद्मैः पद्मसंख्यै राजभिरपि किम्। तैरप्यस्य किमपि कर्तुं न शक्यते। यतः— दृशैव पद्मानि कमलानि पद्मसंख्याकान्वैरिणश्च जयतः। यो हि कमलतुल्यनेत्रस्तस्य शत्रु पराभवो न। अथ च भ्रूक्षेपमात्रेण पद्मसंख्यापरिमितान्राज्ञो जयति तस्य पद्मसंख्यै राजभि किमपि कर्तुं न शक्यते। तथा—वा समुच्चये। राज्ञां परार्धेनापि परार्धसंख्यै राजभिरप्य किमपि कर्तुं नो शक्यम्। यतः—सर्वे च ते परे शत्रवश्च ताञ्छिनत्ति तस्य। यो हि वैरिमात्रहनने समर्थस्तस्य परार्धसंख्याः शत्रवः किं कुर्वन्तु। तत्तस्मात् एतस्य द्वि संख्याद्रणादपगमं पलायनम्। अथ च—परार्धरूपायाः संख्याया अप्यपगमं परित्य असंख्यत्वं विना काचिद्गतिः प्रकारो नास्ति। वत खेदे। असंख्येयाश्चेदभविष्यंस्तर्ह्यजेष्य ध्यन्। असंख्येयं नास्ति तस्मात्पलायनमेव जीवनोपायः। पलायितान्न हन्तीत्यर्थः। 'लक्षं शरव्ये संख्यायाम्'। शतघ्नीम्, 'अमनुष्यकर्तृके च' इति टक् ॥

वयस्ययाकूतविदा दमस्वसुः स्मितं वितत्याभिदधेऽथ भारती।
इतः परेषामपि पश्य याचतां भवन्मुखेन स्वनिवेदनत्वराम् ॥ ५९ ॥

वयस्ययेति ॥ अथ दमस्वसुः आकूतविदाभिप्रायज्ञया वयस्यया सख्या स्मितं वितत्य हसितं कृत्वा भारती इत्यभिदधे उक्ता। इति किम्—हे भारति, त्वं भवन्मुखेन त्वन्मुखेन स्ववर्णनं याचतां प्रार्थयमानानां इतोऽस्मान्नृपात्परेषामन्येषां स्वनिवेदने स्ववर्णने एव लग्नं कालविलम्बासहनत्वं पश्य। एतद्वर्णनाद्विरमेति भावः। अन्यानपि वर्णयेत्यर्थः ॥

कृतात्र देवी वचनाधिकारिणी त्वमुत्तरं दासि ददासि कासती।
इतीरिणस्तन्नृपपारिपार्श्विकान्स्वभर्तुरेव भ्रुकुटिर्न्यवर्तयत् ॥ ६० ॥

कृतेति ॥ स्वभर्तुः स्वस्वामिन एव भ्रुकुटिः कोपवशाद्भ्रूभङ्ग इति पूर्वोक्तं इरिणो भाष माणान् तान्नृपपारिपार्श्विकान्निजसेवकान् न्यवर्तयन्न्यषेधयत्। भ्रूक्षेपमात्रेण तेनैव ते नि रिता इत्यर्थः। इति किम्—हे दासि, अत्र राजवर्णने वचनाधिकारिणी भाषणाधिकारिणी देवी कृता, त्वं का सती का भवन्ती केन प्रयुक्ता सती। अथ च—असती कुल्टा त्वमुत्तरं ददासि अत्र वक्तुमयोग्येति। पारिपार्श्विकान्, परिपार्श्वे वर्तन्ते पारिपार्श्विका 'परिमुखं च' इति चकाराट्ठक् ॥

---

१ 'अत्रैव द्विषद्गतिमत्त्वस्य संख्यापगमतदपगमयोरुभयोः प्राप्तस्य पूर्वस्य निषेधस्योत्तरत्र नियमनात्प रिसंख्या। तथा च लक्षणम्—'एकस्यानेकत्र नियमनं परिसंख्या' इति जीवातुः।

धराधिराजं निजगाद भारती तदुन्मुखेषद्वलिताङ्गसूचितम् ।
दमस्वसारं प्रति सारवत्तरं कुलेन शीलेन च राजसूचितम् ॥ ६१ ॥

धरेति ॥ भारती दमस्वसारं प्रति धराधिराजं नृपं निजगाद । कथयति स्मेत्यर्थः । किंभूतम्—तस्य वर्णनीयनृपस्योन्मुखं संमुखं ईषद्वलितेन किंचित्परिवर्तितेनाङ्गेन करादिना सूचितं ज्ञापितम् । तथा—सारवत्तरमतिबलिष्टम् । तथा—कुलेन शीलेन स्वभावेनाचरणेन वा राजसु मध्ये उचितं योग्यं श्रेष्ठम् । कुलशीलाभ्यां सारवत्तरं श्रेष्ठतरं वा ॥

कुतः कृतैवं वरलोकमागतं प्रति प्रतिज्ञाऽनवलोकनाय ते ।
अपीयमेनं मिथिलापुरंदरं निपीय दृष्टिः शिथिलास्तु ते वरम् ॥ ६२ ॥

कुत इति ॥ हे भैमि, ते त्वया स्वयंवरार्थमागतं वरलोकं परिणेतृवृन्दं प्रति लक्षीकृत्य एवममुना दृश्यमानप्रकारेण अनवलोकनायादर्शनाय प्रतिज्ञा कुतः कस्मात्कारणात्कृता । अपि त्वयुक्तमेवैतत् । 'वा' इति पाठे कुतो वेत्यन्वयः । अनवलोकनायैवेत्यवधारणार्थो वा । न केवलमव(धा)रणायैव, किंतु—अनवलोकनायापीत्यप्यर्थो वा । किं तर्हि कर्तव्यमित्यत आह—हे भैमि, ते इयं दृष्टिः एनं मिथिलानगर्याः पुरंदरं स्वामिनं निपीयैव शिथिलास्तु । एतद्वरम् । सर्वथानवलोकनाद्विलोकनं वरमिति राजान्तरवदनुरागेणाप्येनं विलोकयेत्यर्थः । अन्ये यद्यपि नावलोकितास्तथाप्येनं विलोकय । विलोकनेनाप्येनं संभावयेत्यर्थः । पूर्वश्लोके सामान्यत उक्तत्वादन्वादेशे एनमिति समर्थनीयम् ॥

न पाहि पाहीति यदब्रवीरमुं ममौष्ठ तेनैवमभूदिति क्रुधा ।
रणक्षितावस्य विरोधिमूर्धभिर्विदश्य दन्तैर्निजमोष्ठमास्यते ॥ ६३ ॥

न पाहीति ॥ अस्य विरोधिमूर्धभिर्वैरिशिरोभिः इति क्रुधा रणक्षितौ निजमोष्ठं दन्तैर्विदश्य विशेषेण दष्ट्वा आस्यते स्थीयते । इति किम्—हे ओष्ठ, त्वं अमुं नृपं प्रति पाहि पाहीति यद् नाब्रवीः तेन कारणेन ममैवं भूमौ विलुण्ठनपूर्वं मरणमभूदिति । पाहि पाहीति यो वदति तमयं रक्षति । पाहीति पदोच्चारणे प्रथमं तवैव सामर्थ्यम् । पकारस्यौष्ठ्यत्वात् । त्वया च सदर्पत्वात्तदनुच्चारणान्मामयं मारितवानिति त्वमेवापराधीत्यर्थः । शवमुष्टिन्यायेना-धरोष्ठो दष्ट एव तिष्ठति न तु मुक्त इति आस्यते इत्यनेन सूचितम् ॥

भुजेऽपसर्पत्यपि दक्षिणे गुणं सहेषुणादाय पुरःप्रसर्पिणे ।
धनुः परीरम्भमिवास्य संमदान्महाहवे दित्सति वामबाहवे ॥ ६४ ॥

भुज इति ॥ महाहवे महति रणसंमर्दे दक्षिणेऽपसव्ये । अथ च—सरलेऽनुकूलेऽपि भुजे इषुणा सह गुणं मौर्वीमप्यादाय गृहीत्वा अपसर्पति कर्णपर्यन्तं गच्छति सति पुरःप्रसर्पिणे रिपुसंमुखं यायिने दृढतरमुष्टये अस्य वामबाहवे सव्यभुजाय धनुः संमदादिव दृढतर-त्वजातादुर्षादिव परीरम्भमालिङ्गनं दित्सति दातुमिच्छति । दित्सतीवेति वा । अतिसरलमपि गुणिनि विश्वासपात्रे सङ्ग्रामात्स्वजनमादाय पलायिते सति सङ्ग्रामं कर्तुं संमुखाय वामाय दुष्टायापि अयमेव साधुरिति मत्वा सुवंशजेन केनचिन्मध्यस्थेनालिङ्गनं दीयते । दृढमुष्टिरिति-

---

१ 'अवधारणाय' इत्यत्र धकारो लेखकप्रमादस्खलितः । २ 'अत्र दृढमुष्टित्वं ... ...' इति जीवातुः ।

शूरोऽयमित्यर्थः । सङ्ग्रामे कर्णान्तपर्यन्तमाकर्षणाद्धनुश्चक्रीकृत्य शरान्मुञ्चतेनात्र इति नामः वामवाहवे, ददातियोगाच्चतुर्थी ॥

अस्योर्वीरमणस्य पार्वणविधुद्वैराज्यसज्जं यशः
सर्वाङ्गोज्ज्वलशर्वपर्वतसितश्रीगर्वनिर्वासि यत् ।
तत्कम्बुप्रतिबिम्बितं किमु शरत्पर्जन्यराजिश्रियः
पर्यायः किमु दुग्धसिन्धुपयसां सर्वानुवादः किमु ॥ ६५ ॥

अस्येति ॥ अस्य उर्वीरमणस्य राज्ञो यत् यश एतादृशम् । कीदृशं यशः—पर्वणि ... पार्वणः पूर्णो विधुश्चन्द्रस्तस्य द्वैराज्ये द्वयो राज्ञोः कर्म तत्र सज्जं तत्परम् । पार्वणचन्द्र... मित्यर्थः । तथा—सर्वेष्वङ्गेषूज्ज्वलस्य धवलस्य शर्वपर्वतस्य हरनिवासभूतकैलासस्य सित... श्वेतकान्तिस्तद्विषये यो गर्वस्तस्य निर्वासि निराकारकम् । कैलासादपि धवलतरम् । एवं... यद्यशः । तत्कम्बुप्रतिबिम्बितं समुद्रशङ्खप्रतिबिम्बः किमु । तथा—शरदि पर्जन्यराजि... पङ्क्तिस्तस्याः श्रीः धवलिमशोभा तस्याः पर्यायः किमु । शब्दस्य शब्दान्तरेणोच्चारः पर्याय... तथा—दुग्धसिन्धोः क्षीरोदस्य पयसां दुग्धानां सर्वेण प्रकारेणानुवादः पुनरभिधानं किमु ... चन्द्रादितुल्यमेतद्यश इति भावः । अन्योऽप्यधिष्ठितद्वैराज्यः प्रतिपक्षं निरस्यति ॥

निस्त्रिंशत्रुटितारिवारणघटाकुम्भास्थिकूटावट-
स्थानस्थायुकमौक्तिकोत्करकिरः कैरस्य नायं करः ।
उन्नीतश्चतुरङ्गसैन्यसमरत्वङ्गत्तुरंगक्षुरा-
क्षुण्णासु क्षितिषु क्षिपन्निव यशःक्षोणीजबीजव्रजम् ॥ ६६ ॥

निस्त्रिंशेति ॥ अस्य नृपस्यायं दृश्यमानः करः कैः एवंभूत इव नोन्नीतस्तर्कितः । अ... तु सर्वैरप्येवमेव तर्कितः । कीदृशः करः निस्त्रिंशेन खड्गेन कृत्वा । त्रुटितायाः खण्डनं प्राप्ता... अरिवारणघटाया वैरिगजपरम्परायाः कुम्भानां गण्डस्थलानामस्थिकूटा अस्थिसमूहास्तेषाम... टस्थाने गर्तलक्षणस्थाने स्थायुकः स्थितिशीलो मौक्तिकोत्करो मुक्तासङ्घस्तस्य किरः विक्षिप... तथा—चत्वारि करिनररथतुरगलक्षणान्यङ्गानि येषामेवंभूतानि सैन्यानि येषु ते समराः स... मास्तेषु त्वङ्गन्तश्चित्रं गच्छन्तः तुरंगास्तेषां खुरैः चरणाग्रनखतीक्ष्णभागैः क्षुण्णासु वि... तासु कृष्टासु क्षितिषु रणक्षेत्रभूमिषु यशोलक्षणस्य क्षोणीजस्य वृक्षस्य तदुत्पादकं बीज... बीजसङ्घं क्षिपन्निव वपन्निव । यशोवृक्षस्य शुभ्रत्वात्तत्कारणेन बीजेन शुभ्रेणैव भवितव्य... अरिकरिकुम्भस्थमुक्ताफलानि बीजस्थाने जातानीत्यर्थः । अन्योऽपि पात्रस्थं बीजसङ्घं कर... कृष्य हलकृष्टासु भूमिषु वपति वैरिकरिणां हननादेतस्य बहु यशो जातमिति ... इव क्षुराः खुरा इति लक्षणाशब्दः । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः इति, ... प्रकरणे संख्यायास्तत्पुरुषस्योपसंख्यानं निस्त्रिंशाद्यर्थम्' इति डच् । स्थायुकम्, 'लष... इत्युकञ् । किरतीति किरः, 'इगुपध—' इति कः ॥

अर्थिभ्रंशवहृद्भवत्फलभरव्याजेन कुब्जायितः
सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुमः ।

---

१ 'उत्प्रेक्षात्रयस्य संसृष्टिः' इति जीवातुः । २ 'उत्प्रेक्षा' इति जीवातुः ।

स इति ॥ स एष कामरूपस्य देशविशेषस्य अधिपः । अथ च मदनरूपस्यापि तादृग्रूपधारणादित्यर्थः । स कः—यः त्वया ईक्ष्यतेऽपि न । न अभिलष्यत इति तु वाच्यमित्यर्थः । हा कष्टम् अनुचितमेतत् । यतः—कामाद्रूपेणाधिकोऽतिसुन्दरः । अथ कामाद्रूपेणाधिको नेति काकुर्वा । यतः—अयं कामादधिकस्तस्मादस्य सा त्वं योग्यत्वाद्वल्लभासि नितरामुचिता प्रेयसी भवसि । सा का—परा उत्कृष्टा यस्यास्तव प्रतिमल्ला तुल्या भा कान्तिः सुतरां दुर्लभा । यस्याः सदृशी कान्तिः कस्यांचिदपि न दृष्टचरी । अत्यन्त(ति)सुन्दरत्वादित्यर्थः । अथ च—परान्या स्त्री यस्यास्तुल्यकान्तिर्दुर्लभा, सातिसुन्दरी त्वमित्यर्थः । त्वमतिसुन्दरी अस्य सुतरामयोग्येत्यर्थ इति वा । व्याख्यानान्तरं क्लिष्टत्वादुपेक्ष्यम् । सुदुर्लभा, 'न सुदुर्भ्यां केवलाभ्याम्' इति नुन्निषेधः ॥

> अकर्णधाराशुगसंभृताङ्गतां गतैररित्रेण विनास्य वैरिभिः ।
> विधाय यावत्तरणेर्भिदामहो निमज्ज्य तीर्णः समरे भवार्णवः ॥ ७१ ॥

अकर्णेति ॥ अस्य वैरिभिः समरे निमज्ज्य निपत्य यावान्सकलस्तरणिः सूर्यस्तस्य तन्मण्डलस्येत्यर्थः । भिदां भेदं विधाय कृत्वा भवः संसार एव दुस्तरत्वादर्णवः तीर्णः मोक्षप्राप्तेरपुनरावृत्तेरित्यर्थः । अहो आश्चर्यम् । शूरतरोऽयमित्यर्थः । किंभूतैः—अरिभ्यस्त्रायत इत्यरित्रं कवचं तेन विना । अथवा—अरेः अस्मात्सकाशाद्रक्षकेणान्येन शूरतरेण विना । न विद्यन्ते कर्णाः कर्णाकारा लोहकण्टका यासां एवंविधा धारा येषामेवंभूताः । कर्णान्धारयन्ति कर्णधाराः न कर्णधारा अकर्णधारा एवंभूता वा । ये आशुगा बाणा अदृढाः शरास्तैः संभृतानि प्रोतान्यङ्गान्यवयवा येषां तेषां भावस्तत्तां गतैः प्राप्तैः । प्रत्यवयवं विद्धैरित्यर्थः । यावत् साकल्ये । अथ च—कर्णधारो नाविकः, आशुगो वायुः ताभ्यां कृत्वा संभृतानि परिपुष्टान्यङ्गानि रज्जुस्तम्भादीनि तरणोपायभूतानि च येषाम् । कर्णधारानुकूलवायुना संभृतान्यङ्गानि येषामेवंभूता ये न भवन्ति तद्भावं गतैः । अरित्रेण जलक्षेपणकाष्ठेन विना तस्याप्यभावे यावत्तरणेः सकलाया नौकाया भेदं विधाय सकलां नौकां स्फोटयित्वा निमज्ज्य त्रुडित्वार्णवस्तीर्णः । हे भव शिव, अहो अत्याश्चर्यम् । कर्णधाराद्यभावे नौकाभावे त्रुडित्वा तरणं तत्रापि समुद्रस्येत्यत्याश्चर्यम् । अघटमानघटनेन चाश्चर्यसूचकं शिवनामोच्चारणं क्रियते । 'कर्णधारस्तु नाविकः', 'नौकादण्डः क्षेपणी स्यादरित्रम्', 'स्त्रियां नौस्तरणिस्तरिः', 'द्युमणिस्तरणिर्मित्रः' इत्यमरः ॥

> यदस्य भूलोकभुजो भुजोष्मभिस्तपर्तुरेव क्रियतेऽरिवेश्मनि ।
> प्रपां न तत्रारिवधूस्तपस्विनी ददातु नेत्रोत्पलवासिभिर्जलैः ॥ ७२ ॥

यदिति ॥ भूलोकभुजो भूपालस्यास्य भुजोष्मभिर्बाहुप्रतापैः अरिवेश्मनि अतिसंतापकारित्वात्तपर्तुरेव ग्रीष्मर्तुरेव यद्यस्मात्क्रियते तस्मात्तत्र ग्रीष्मर्तौ तपस्विनी दीना अरिवधूः नेत्राण्येवोत्पलानि तेषु वासिभिर्जलैरश्रुभिः । अथ च—नेत्रतुल्यकमलानां यो वासः परिमलः स विद्यते येषु तैर्जलैः कृत्वा प्रपां पानीयशालां न ददातु । अपितु ददात्येव । तपस्विनी ग्रीष्मर्तौ सुगन्धिभिरुदकैः प्रपां करोति । अनेन पतिमारणाच्छोकव्याप्ता सर्वाऽप्यरिनारी रुरोदैवेति भावः । 'प्रपा पानीयशालिका' इत्यमरः ॥

एतद्दत्तासिघातस्रवदसृगसुहृद्वंशसार्द्रेन्धनैत-
द्दोर्द्दामप्रतापज्वलदनलमिलद्भूमधूमभ्रमाय ।
एतद्दिग्जैत्रयात्रासमसमनरभरं पश्यतः कस्य नासी-
देतस्यासीरवाजिव्रजखुरजरजोराजिराजिस्थलीषु ॥ ७३ ॥

एतदिति ॥ आजिस्थलीषु संग्रामभूमिषु एतस्यासीरस्य एतत्सेनामुखस्य पुरो गच्छन्तो वाजिव्रजा अश्वसंघास्तेषां खुरेभ्यः शफेभ्यो जाता तदुद्धूलिता रजोराजी रेणुपङ्क्तिः एतस्य दिग्जैत्रयात्रा दिग्जयकारिण्यो या यात्रा वैरिसंमुखगतयस्तासु असमनतुल्यं नरस्य भरं संमर्दं पश्यतः कस्य जनस्य । एतेन राज्ञा दत्तस्तोऽसिघातेभ्यः स्रवत् असृग्रक्तं येषाम् । एतेन दत्तोऽसिघातो येभ्यः अत एव स्रवदसृजो ये असुहृद्वंशा अरिकुलाः । अथ च—तद्रूपा वेणवः त एव सार्द्राणीन्धनानि दाहकाष्ठानि यस्य एवंभूत एव दोष्णोर्बाह्वोरुद्दामप्रतापस्तोऽग्निप्रतापः स एव ज्वलन् देदीप्यमानोऽनलः तस्य मिलन्संभवन् भूम्ना बाहुल्यं यस्य एवंभूतो बहुतरो धूमस्तस्य भ्रमाय सादृश्यादधूमेऽपि रजसि 'धूमः' इति बुद्धये नासीत् । अपि तु सर्वस्यापि । आर्द्रवेणुरूपेन्धनं दहतो वह्नेर्भूमान्धूमो भवति । सर्वेऽप्यरय एतत्प्रतापवह्निना दग्धाः । अश्वपतिश्चायमिति भावः । आर्द्रं सार्द्रं पर्यायः । 'मिलद्भूमधूम—' इति पाठे मिलतो धूमस्य बाहुल्यं तद्भ्रान्तये ॥

क्षीरोदन्वदपाः प्रमथ्य मथितादेशेऽमरैर्निर्मिते
स्वाकल्पं सृजतस्तदस्य यशसः क्षीरोदसिंहासनम् ।
केषां नाजनि वा जनेन जगतामेतत्कवित्वामृत-
स्रोतःप्रोतपिपासुकर्णकलशीभाजाभिषेकोत्सवः ॥ ७४ ॥

क्षीरेति ॥ केषां जगतां भुवनानां संबन्धिनां जनेनास्य राज्ञो यशसोऽभिषेक एवोत्सवो नाजनि नाकारि । अपि तु स्वर्गादिस्थितेन सर्वेणापि लोकेन एतदीययशसोऽभिषेकः कृतः । विशेषणेनाधिष्ठानमाह—किंभूतस्य यशसः—क्षीरोदन्वदपाः क्षीरोदन्वान्क्षीरसमुद्रस्तस्य अपो जलानि दुग्धरूपाणि प्रमथ्य मन्दराचलेन कृत्वा प्रकर्षेण विलोड्य अमरैर्देवैः मथनक्रियायोगात् मथितमिति आदेशे निर्मिते संज्ञायां कृतायाम् । अथ च—निर्जलं मन्थनमथितं दधि मथितमित्युच्यते । ततश्च क्षीरस्यापि मथनक्रियायोगाद्देवैर्भुवन्मथितरूपे आदेशे निर्मिते सति । जडे स्थिरसंभवात्क्षीरोदन्वदुदके दुग्धरूपेऽतिघने कृते सतीत्यर्थः । क्षीरोदरूपं सिंहासनं शुभ्रवस्तुनामपेक्षया तस्यातिशुभ्रत्वात्पद्मपीठं तत् स्वेनात्मना । अथ च—सुखेनायासरहितं यथा तथा । आकल्पमुपवेशनयोग्यं सृजतः कुर्वतः । क्षीरोदमधितिष्ठत इत्यर्थः । किंभूतेन जनेन—एतद्रचितं कवित्वम्, एतत्संबन्धि कविभिर्निर्मितं कीर्तिवर्णनरूपं वा कवित्वं तदेव स्वादुतरत्वादमृतं तस्य स्रोतसि प्रवाहे प्रोतौ स्यूतौ धृतौ सादरमाकर्णनेच्छू । अथ च—जलमपेच्छू । कर्णावेव कलश्यौ महान्तौ भवतीति भाजा भजता । लोके हि कस्मिंश्चिद्राजनि केनचिन्मथिते तदीयं सिंहासनमधितिष्ठतोऽन्यस्य केनचिद्वारिपूर्णेन कलशेनाभिषेकः क्रियते । यशोऽस्य तदुपवेशनयोग्यतां सूचयितुं मथितादेशे कृते

१ 'अत्र स्त्रोतसो कवित्वमलाइस्याद्भुतमनोज्ञा ज्ञान्विमदलंकारः' इति जीवातुः ।

सतीत्युक्तम् । जलोपर्युपवेशनासंभवात् । क्षीरोदादपि विमलतरं महीयश्चैतद्यशो वैदेशिकैर्ज कत्रयसंचारि कृतमिति भावः । 'तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्धाम्बु निर्जलम्' इत्यमरः । क्षीरोदन्वदपाः, 'उदन्वानुदधौ च' इति साधुः । 'ऋक्पूर्–' इत्यप्रत्ययः । त्याज्यम्, 'ऋ दुपधात्' इति यत् । अजनि, कर्मणि च्विर्ण् ॥

समिति पतिनिपाताकर्णनद्रागदीर्णप्रतिनृपतिमृगाक्षीलक्षवक्षःशिलासु । रचितलिपिरिवोरस्ताडनव्यस्तहस्तप्रखरनखरटङ्कैरस्य कीर्तिप्रशस्तिः ॥ ७७ ॥

समितीति ॥ अस्य राज्ञः कीर्तिप्रशस्तिर्विर्णनपङ्क्तिः समिति सङ्ग्रामे पतीनां स्वामिनां निपातो मरणं तस्य आकर्णनेन द्राक् शीघ्रं अदीर्णानि प्रतिनृपतिमृगाक्षीणां लक्षस्य ... तान्येव तत्क्षणमेवाविदीर्णत्वाच्छिलास्तासु शोकवशादुरस्ताडने व्यस्तयोर्दृढनिवेशितयोर्हस्तयोः प्रखरा अतितीक्ष्णा नखरा नखा एव टङ्काः पाषाणदारणलोहविकारास्तैः रचितलिपिरिव रचितलेखनेव अस्तीति शेषः । अन्यस्यापि कीर्तिप्रशस्तिः शिलासु टङ्किकाभिरेव लिख्यते । सर्वेऽप्यरयोऽनेन हताः तन्नार्यश्च शोकवशादुरस्ताडनं कुर्वन्ति । अतिशूरत्वादस्य कीर्तिर्भवतीत्यर्थः । दृढशोकेऽप्यदीर्णत्वाच्छिलात्वम् । शोकातुरस्योरस्ताडनं जातिः । 'टङ्कः पाषाणदारणः' इत्यमरः । 'समित्याजिसमिद्युधः' इति (च) ॥

विधाय ताम्बूलपुटीं कराङ्कगां बभाण ताम्बूलकरङ्कवाहिनी । दमस्वसुर्भावमवेत्य भारतीं नयानया वक्रपरिश्रमं शमम् ॥ ७८ ॥

विधायेति ॥ ताम्बूलस्य करङ्कः सुवर्णरचितहंसाद्याकारं ताम्बूलधारणपात्रम् 'पेटी' इति लोके, तस्य वाहिनी धारिणी काचित्सखी दमस्वसुर्भावं तद्वर्णननिषेधरूपमभिप्रायं ज्ञात्वा इति बभाण । किं कृत्वा—ताम्बूलपुटीं पूगीफलचूर्णखादिरपर्णानि यत्रैकत्र क्रियन्ते तां यां मध्यदेशे भाषया 'गुलवडा' इति व्यवहरन्ति तां देव्यै दातुं कराङ्कगां स्वकरतलमध्यगतां, देवीकरतलमध्यगतां वा कृत्वा । कराङ्के गृहीत्वेत्यर्थः । इति किम्—देवि, त्वं अनया वीटिकया एतदीयबहुवर्णनजनितं वक्त्रस्य सकलं परिश्रमं शमं नय । वर्णनजनितं शोषं शान्तिं प्रापयेति । एतत्स्तुतेर्विरमेत्यर्थः । अन्योऽपि शुष्कमुखो वीटिकया श्रमं शमयति ॥

समुन्मुखीकृत्य बभार भारती रतीशकल्पेऽन्यनृपे निजं भुजम् । ततस्त्रसद्बालमृगद्विलोचनां शशंस संसज्जनरञ्जनीं जनीम् ॥ ७९ ॥

समितीति ॥ भारती रतीशकल्पे कामतुल्येऽन्यनृपे निजं बाहुं सम्यगुन्मुखीकृत्य भैम्यै तं दर्शयितुं तदभिमुखं चकार । ततोऽनन्तरं त्रसद्बालमृगद्विलोचनां गीतवत्कंदर्पमपि संसज्जनानां सभ्यानां रञ्जनीमनुरागजनिकां जनीं वरार्थिनीं तां भैमीं शशंस वर्णयामास । 'रती शतुल्ये' इति वा पाठः । रञ्जनीं मृगरमणाभावान्नलोपाभावः ॥

अयं गुणौघैरनुरज्यदुत्कलो भवन्मुखालोकरसोत्कलोचनः । स्पृशन्तु रूपामृतवापि नन्वमुं तवापि दृक्कारतरङ्गभङ्गयः ॥ ८० ॥

१ 'अत्र क्षीरोदन्वानिति ... , ... क्षीरोदत्वात्सितः ... , ... ' इति जीवातुः । २ 'वरं' इति पाठः ।

अयमिति ॥ हे भैमि, गुणैः सौन्दर्यादिगुणैः अनुरज्यन्तोऽनुरक्ता भवन्तः उत्कला उत्कण्ठा तद्देशनिवासिनो लोका यत्र । अयं च गुणैः सौन्दर्यादिगुणैरनुरज्यन्त उत्कलप्रभृतुःपाटिकला यत्र तैरुत्कलैरक्षितो वा अयं नृपः यस्याङ्कवन्मुखालोके रसेनानुरागेणोत्कलेदनोत्कण्ठितनेत्रः । अस्तीति शेषः । तस्मात् ननु हे रूपान्तवापि सौन्दर्यान्तवीचिके सुन्दरि, तवापि दृशोस्तारा उज्ज्वला विशालाः चञ्चला वा तरङ्गाः पुनःपुनर्व्यापाररूपाः कल्लोलास्तेषां भङ्गयः प्रकारविशेषाः अनुं स्पृशन्तु । अयं त्वां पश्यति, त्वमप्येनं कटाक्षैः पश्य योग्यत्वादिति भावः । अनुरज्यदुत्कल इत्यनेन जनानुरञ्जनात्स्वंपदाधिक्यं सूचितम् । अन्यस्यानपि जलवाप्यां चञ्चलतरङ्गभङ्गयो भवन्ति । अनुरज्यदिति श्यनो ङित्त्वान्नलोपः ॥

अनेन सर्वार्थिकृतार्थताकृताहतार्थिनौ काननवीरुद्द्रुमौ ।
मिथः पयःसेचनपल्लवाशने प्रदाय दानव्यसनं समाप्नुतः ॥ ७९ ॥

अनेनेति ॥ काननवीरुद्द्रुमौ कामधेनुकल्पवृक्षौ मिथः अन्योन्यं क्रमेण पयःसेचनपल्लवाशने दुग्धसेचनपल्लवभोजने प्रदाय प्रकर्षेण दत्त्वा दानस्य व्यसनमतिशये प्रसहनवृत्त्यकरणीयतया प्रातस्यमहं समाप्नुतः समाप्तिं नयतः । कस्मादित्यत आह—किंभूतौ—सर्वार्थिनां सर्वयाचकानामभीष्टदानात् या कृतार्थता जन्मसाफल्यं कृतार्थत्वं तां करोत्येवंभूतः कृत् तेन । अनेनातिदानात्स्वं प्रति आहृता आनीता अर्थिनो याचका ययोस्तौ । अर्थान्तराभावात्काननव्या कल्पवृक्षस्य दुग्धसेकः कृतः, तेनच स्वपल्लवा भक्षयितुं तस्यै दत्ता इत्यर्थः । दानस्पृहोऽप्यस्तीति भावः ॥

नृपः कराभ्यामुदतोलयन्निजे नृपानयं यान्पततः पदद्वये ।
तदीयचूडाकुरुविन्दरश्मिभिः स्फुटेयमेतत्करपादरञ्जना ॥ ८० ॥

नृप इति ॥ अयं नृपः निजे पदद्वये प्रणामवशात्पततो नृपान्याभ्यां कराभ्यां कृपया शिरसि धृत्वा उदतोलयदुत्थापयामास । तदीया राजकीया याः चूडा मुकुटास्तासां कुरुविन्दरश्मिभिर्माणिक्यशोणशोभाभिः कृत्वा इयमेतस्य करपादयोः रञ्जना रक्तिमा स्फुटं दृश्यत इति शेषः ॥

यत्कल्यामपि भानुनाथ ककुभि स्थेनाननालम्बते
जातं यद्वनकाननैकशरणप्राप्तेन दावाग्निना ।
एषैतद्भुजतेजसा विजितयोस्तावत्तयोरौचिती
विक्तं वाडवमम्भसि द्विपि भिया येन प्रविष्टं पुनः ॥ ८१ ॥

यदिति ॥ भानुना सूर्यः कस्यामपि ककुभि दिशि स्थैनानं स्थिरत्वं यद् नालम्बते नाङ्गीकरोति किंतु सर्वदा परिभ्रमत्येव । दावाग्निना वनवह्निना च घनं अतिगहनं काननं तदूपं एकं केवलं शरणं रक्षितारं प्राप्तेन तदेकाश्रयेण यद् जातम् । एतस्य भुजतेजसा विशेषेण जितयोस्तयोः सूर्यदावानलयोः तावदुचितं एषा औचिती युक्तता । तौतस्य व्याकुलता वनाश्रयणं च युक्तमित्यर्थः । भग्नो हि जितः सन् तन्वया मुखमदर्शयन्पुनर्दर्शने

---

१ 'स्थानादिकस्यपदशौ ताडकेरिप्रमादिस्वपदूपश्चैनात्स्वनुमोदनैस्थानान्नभूपद्वनिचनां अन्यत्र इत्यंकारेण वस्तुमतिः' इति जीवातुः ।

भयेनैकस्मिन्देशे वासं त्यक्त्वा सर्वत्र परिभ्रमति । सर्वथान्यस्य प्रवेष्टुमशक्यं घनं वनं वा विशति । ताभ्यां युक्तमेव कृतमित्यर्थः । तं वाडवं वडवानलं पुनः धिक् । येन अस्माद्रिपौ द्विषि सहजशत्रौ अम्भसि समुद्रजले प्रविष्टं निमग्नम् । मानी पराजितोऽपि वैरिणं शरणं नैति, अयं तु गत इत्यभिमानित्वाभावान्निन्द्य एवेत्यर्थः । अथ च वाडवो ब्राह्मणः । ततश्च ब्राह्मणत्वाच्छत्रावपि भयेन प्रवेशो युक्तः । शत्रुणा च तस्य रक्षणं युक्तमिति सूचितम् । सूर्यादेरप्येतदीयं तेजोऽधिकमिति भावः । स्थेमा इति, स्थिरशब्दाद्भावे पृथ्वादित्वादिमनिचि 'प्रियस्थिर–' इति स्थादेशः । शरणं प्राप्तेन, 'द्वितीया श्रिता–' इति समासः ॥

अमुष्योर्वीभर्तुः प्रसृमरचमूसिन्धुरभवै-
रवैमि प्रारब्धे वमथुभिरवश्यायसमये ।
न कम्पन्तामन्तः प्रतिनृपभटा म्लायतु न त-
द्वधूवक्त्राम्भोजं भवतु न स तेषां कुदिवसः ॥ ८२ ॥

अमुष्येति ॥ अमुष्य उर्वीभर्तू रणसंभवात् । प्रसृमरा प्रसरणशीलाश्चमूसिन्धुराः सेनागजास्तेभ्यो भवैः समुत्पन्नैर्वमथुभिः करिकराग्रजातैर्मदजलविन्दुभिः, जलबिन्दुभिः वा अवश्यायसमये नीहारकाले वा हिमर्तौ प्रारब्धे निर्मिते सति प्रतिनृपभटा वीरा अपि रिपुनृपा अन्तः तन्मध्ये स्वीये मनसि वा न कम्पन्ताम् । अपि तु अस्माद्भयेन युक्त एव कम्पस्तेषाम् । तथा—तेषां वध्वो रमण्यस्तासां वक्त्राम्भोजं न म्लायतु । अपितु भाविनः प्राणेशवधस्य निश्चितत्वात्तासां मुखस्य म्लानिरुचितैव । तथा—स प्रसिद्धो रणवासरस्तेषां वैरिणां तत्स्त्रीणां च कुत्सितो दिवसोऽशुभरूपो वासरो न भवतु । अपितु भवत्येव । वध-निश्चयाद्वैरिणां तत्स्त्रीणां च शोकवशादित्यहमवैमि । हिमर्तौ शरीरकम्पः कमलम्लानिर्दुर्दिनं च भवति । शूरतरोयं गजपतिरिति भावः । 'सिन्धुरभरैः–' इति पाठे गजसमूहैः कर्तृभिर्वमथुभिः कृत्वेति व्याख्येयम् । 'वमथुः करशीकरः', 'अवश्यायस्तु नीहारः' इत्यमरः । प्रसृमर इति 'सृघस्यदः' इति क्मरच् । अवश्याय इति, 'श्याद्व्यधा–' इति णः । तेषां 'पुमान्स्त्रिया' इत्येकशेषः ॥

आत्मन्यस्य समुच्छ्रितीकृतगुणस्याहोतरामौचिती
यद्गात्रान्तरवर्जनादजनयद्भूजानिरेष द्विषाम् ।
भूयोऽहं क्रियते स्म येन च हृदा स्कन्धो न यश्चानम-
त्तन्मर्माणि दलंदलं समिदलंकर्मीणबाणव्रजः ॥ ८३ ॥

आत्मनीति ॥ आत्मनि स्वीये स्वरूपे समुच्छ्रितीकृतगुणस्य गेलितसौन्दर्यादिसर्वगुणस्यास्य अहोतरामतिशयेनौचितीयम् । यत् एष भूजानिर्भूपतिः द्विषां गात्रान्तराणां हृत्स्कन्धेतराणां वर्जनादवयवान्तरं परित्यज्येत्यर्थः । येन च हृदा भूयः पुनःपुनः अतितरां अहं अहंकारः क्रियते स्म । अहंकारिणा जातमित्यर्थः । यश्च स्कन्धः नानमत् नम्रो न भूतः

---

१ 'भीत्रार्थानाम्–' इत्यपादानत्वे पञ्चमी । 'अस्य' इति मुद्रयतां बालानां प्रमादः । २ 'अत्र स्वाभाविकस्य सूर्यादिपर्यटनादेरेतद्भीहेतुकत्वोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः । ३ 'अत्र करशीकरादौ नीहारा दिरूपणाद्रूपकालंकारः' इति जीवातुः । ४ 'समुच्छ्रितीकृत–' इति जीवातु-सुखावबोधासंमतः पाठः ।

तस्यैव हस्तकन्धस्यैव नर्माण्यतिमृदूनि जीवस्थानानि खण्डं खण्डमजनयच्चकार नान्येषाम् । किंभूतः—अलमिति सञ्ज्ञाने अलं कर्मणे अलंकर्माणः अरिमारणसमर्थः बाणव्रजो यस्य । अपराधी हि राज्ञा दण्ड्यः । हस्तकन्धस्यैवापराधो नान्येषां तस्यैव दण्डं कृतवान् नान्येषामित्यतितरामस्यौचितीत्यर्थः । अयं च सगुणः सदर्पानन्नत्रांश्च मारयति, शरणागतांस्तु रक्षतीति भावः । 'कर्मक्षमोऽलंकर्मीणः' इत्यमरः । अलं कर्मणे, 'पर्यादयो ग्लानाद्यर्थे चतुर्थ्या' इति समासेऽलंकर्मशब्दात् 'अपडक्षाशितंग्वलंकर्म—' इति खः ॥

दूरं गौरगुणैरहंकृतिभृतां जैत्राङ्ककारे चर-
त्येतद्वीर्यशालि प्रयाति कुमुदं विभ्यन्न निद्रां निशि ।
धम्मिल्ले तव मल्लिकासुमनसां माल्यं भिया लीयते
पीयूषस्रवकैतवाद्धृतदरः शीतद्युतिः स्विद्यति ॥ ८४ ॥

दूरमिति ॥ गौरगुणैर्धवलत्वगुणैः कृत्वा दूरं भृशं अहंकृतिभृतामहंकारवतां वस्तूनां जैत्रं च तदङ्ककारि च तल्लिअपकारिणि बाणचरणे तृणकाष्ठादिनिर्मितशत्रुप्रतिनाधारिणि सकलधवलवस्तुषु विरुदावलीधारिणि एतद्वीर्यशालि एतस्य बाहुयशसि सकलेषु जगत्सु चरति प्रसरति सति । अथ च—स्वप्रतिमल्लगवेषणाय भुवनं परिभ्रमति सति बिभ्यद् भीतं कुमुदं निशि निद्राम् । अथ च—संकोचं न प्रयाति । तथा—मल्लिकासुमनसां माल्यं माला अस्माद्भिया ते तव धम्मिल्ले केशपाशग्रन्थिविशेषे लीयते आत्मानं गोपायते । अथ च—अदृश्यं तिष्ठति । तथा—शीतद्युतिश्चन्द्रो धृतदरः प्राप्तभयः सन् पीयूषलवकैतवादमृतलवणव्याजात्स्विद्यति स्वेदं मुञ्चति । अथ च—हिमकणान्मुञ्चति । 'एकदोद्रा अङ्ककारः' इति वा । कुमुदादिभ्योऽप्यधिकं धवलमेतद्वीर्यं यश इति भावः । 'बहिर्न धारयेन्माल्यम्' इति केशान्तर्गतमाल्यधारणाद्भैम्याः सदाचारत्वं सूचितम् ॥

एतद्गन्धगजस्तृषाम्भसि भृशं कण्ठान्तमज्जत्तनुः
फेनैः पाण्डुरितः स्वदिक्करिजयक्रीडायशःस्पर्धिभिः ।
दन्तद्वन्द्वजलानुबिम्बनचतुर्दन्तः कराम्भोवसि-
व्याजादभ्रमुवल्लभेन विरहं निर्वापयत्यम्बुधेः ॥ ८५ ॥

एतदिति ॥ एतस्य गन्धगजः यः सप्तसु स्थानेषु स्रवति स गन्धगजः । सदाननकुम्भादिगन्धेन जितान्यकरी विरोधकारिगन्धमदवान इति वा गन्धगजः । कराम्भोविन्दुव्याजाच्छुण्डादण्डाग्रेण शुण्डधृतगण्डूषजलक्षणनिपातादम्बुधेः समुद्रस्य अभ्रमुनाम्न्याः करिण्याः वल्लभस्य ऐरावणस्य विरहं पुत्रवियोगजनितं शोकं निर्वापयति शमयति । किंभूतः—भृशं नितरां तृषा पिपासया सफेनजलापूरपुण्या पुरःपुरः प्रसर्पणेन कण्ठान्तं यावत् नदीदीकूल मज्जन्ती जले क्रीडन्ती अत एवादरस्वमना तनुर्देहो यस्य एवंभूतः । तथा—स्वकीया दिक् प्राची तस्याः करी ऐरावणः, अन्ये वा तस्याः करिणस्तेषां जयक्रीडा तया उपार्जितैः यशोभिः सह स्पर्धिभिः तद्वद्धवलैः फेनैः जलसम्भवसद्योद्भूतैडिंडिमकैः पाण्डुरितः

---

१ 'नवमल्लिका—' इति पाठेऽपि सुखावबोधोऽत्र । २ '...' इति जीवातुः ।

पाण्डुरितो धवलितः । तथा—दन्तद्वन्द्वस्य दन्तद्वयस्य जलेऽनुबिम्बं प्रतिबिम्बस्तेन कृत्वा चत्वारो दन्ता यस्य सः । जलमध्ये विद्यमानत्वाद्धवलत्वाच्चतुर्दन्तत्वाच्च ऐरावण एवायमिति भ्रान्त्या समुद्रः सुखी भवतीत्यर्थः । आसमुद्रं दिग्विजयीत्यर्थः ॥

अथैतदुर्वीपतिवर्णनाद्भुतं न्यमीलदास्वादयितुं हृदीव सा ।
मधुस्रजा नैषधनामजापिनी स्फुटीभवद्ध्यानपुरःस्फुरन्नला ॥ ८६ ॥

अथेति ॥ अथ सा भैमी न्यमीलदक्षिपक्ष्मसंकोचं चकार । किंभूता—अतिप्रेमा मधुस्रजा वरणमधूकमालया नैषधस्य नाम जपति तच्छीला । अत एव स्फुटीभवन्प्रत्यक्षायमाणः ध्यानेन चिन्तनातिशयेन पुरःस्फुरन्नग्रथिततयावभासमानो नलो यस्याः सा । तत्रोत्प्रेक्षते—एतस्योर्वीपतेर्वर्णनया समुत्पन्नमद्भुतमाश्चर्यं हृदि विद्यमानं आस्वादयितुमनुभवितुमिव । आश्चर्यस्य चेतसि वर्तमानत्वात्तदनुभवार्थं नेत्रेऽप्यन्तःप्रविष्टे इवेत्यर्थः । नले एवानुरक्ता सती नेत्रनिमीलनेनैव तं नृपं निराचकारेति भावः । अन्योऽपि जपमालयाभीष्टदेवतानन्यजपं कुर्वंस्तां साक्षात्कर्तुं नेत्रे निमील्य ध्यानेन तां साक्षात्करोति ॥

प्रशंसितुं संसदुपान्तरञ्जिनं श्रिया जयन्तं जगतीश्वरं जिनम् ।
गिरः प्रतस्तार पुरावदेव ता दिनान्तसंध्यासमयस्य देवता ॥ ८७ ॥

प्रशंसितुमिति ॥ दिनान्तसंध्यासमयस्य देवता सरस्वती पुरावदेव पूर्ववदेव ताः अतिगम्भीरमधुरा गिरः प्रतस्तार उवाच । किं कर्तुम्—संसदः सभाया उपान्तावुभयपार्श्वौ रञ्जयत्येवंशीलं श्रिया शरीरशोभया कृत्वातिसुन्दरं जिनं बुद्धदेवं जयन्तं जगत्याः पृथिव्या ईश्वरं राजानं प्रशंसितुं वर्णयितुम् । श्रिया संसदुपान्तरञ्जिनं जयन्तं जगति शौर्यादिना इन्द्रपुत्रतुल्यं कीकटदेशप्रभुत्वाज्जिनं बौद्धं राजानमिति वा । जयन्तनामानं वा । 'जगदीश्वरम्' इति पाठे जिनविशेषणम् ॥

तथाधिकुर्या रुचिरे चिरेप्सिता यथोत्सुकः संप्रति संप्रतीच्छति ।
अपाङ्गरङ्गस्थललास्यलम्पटाः कटाक्षधारास्तव कीकटाधिपः ॥ ८८ ॥

तथेति ॥ हे रुचिरे सुन्दरि, त्वं तथा तेन प्रकारेण अधिकुर्या अधिकारं कुर्याः । तथा कथम्—यथा येन प्रकारेण कीकटाधिपः मगधदेशस्वामी त्वत्कटाक्षेषूत्सुकः सन् चिरेप्सिताः तव कटाक्षधाराः तिर्यगवलोकनपरम्पराः संप्रति इदानीं संप्रतीच्छति अङ्गीकरोति । किंभूता धाराः—अपाङ्गो नेत्रप्रान्तस्तल्लक्षणं रङ्गस्थलं नाट्यशाला तत्र लास्ये सविलासनर्तने लम्पटाः । चिरेप्सिता त्वमिति वा । चिर इत्यकारान्तमप्यव्ययं तेन समासः । एवमेतच्चतुर्थीयेऽन्यत्रापि ज्ञातव्यम् ॥

इदंयशांसि द्विषतः सुधारुचः किमङ्कमेतद्द्विपतः किमाननम् ।
यशोभिरस्याखिललोकधाविभिर्विभीषिता धावति तामसी मसी ॥ ८९ ॥

इदमिति ॥ अखिलेषु लोकेषु धाविभिः प्रसरणशीलैः लोकत्रयमुज्ज्वलं कुर्वाणैरस्य यशोभिर्विशेषेण भीषिता लोकत्रयान्निर्वासिता सती तामसी कृष्णपक्षरात्रिः एव मसी इदंय-

१ सापह्नवोत्प्रेक्षा व्यञ्जकाप्रयोगाद्गम्या' इति जीवातुः । २, ३ 'मषी' इत्यत्र मूर्धन्यान्तमेव बहुत्र दृश्यते । तथापि वर्णसाम्याद्दन्त्यपाठः स्थापितः । सुखावबोधाजीवात्वोरपि दन्त्यान्तमेव दृश्यते ।

शांत्ति अस्य कीर्तिद्विपतः असहमानस्य सुधारुचेश्चन्द्रस्य अङ्कं कलङ्कम्, अथच—संनिधिं धावति शीघ्रं गच्छति प्रविशति किम् । किं वा एतद्विपतः एतच्छत्रोः आननं प्राप्नोतीति संशयः । एतद्यशोभिश्चन्द्राङ्कशत्रुमुखातिरिक्तस्य सकलस्यापि जगतः श्वेतीकरणमाश्रयतीत्यर्थः । अयमतितरां यशस्वीति भावः । अन्योऽपि भीषितः स्वगोत्रं याति, श्यामस्य च श्यामं वस्तु स्वगोत्रमिति । तामसी तमःसंबन्धिनी रात्रिः, मषी (सी) श्यामवस्तुमात्रगता श्यामिका च यथाक्रमं चन्द्राङ्कं शत्रुमुखं धावति किमिति वा । निरन्तरोद्द्योतकरणादेतत्कीर्त्या निष्कासितेव तामसी स्त्रीस्वभावभीरुर्भर्तुश्चन्द्रस्योत्सङ्गं गता अत एव रात्रिकालिमा चन्द्राङ्के दृश्यते । सर्वस्यापि श्वेतीकरणाच्छ्यामिकापि निर्वासितान्यत्र स्थातुमशक्ततयेव रिपुमुखं गता । अत एव विवर्णीभूतेषु वैरिमुखेषु कालिमा दृश्यते । एतद्विपतः, 'द्विपः शत्रुर्वा' इति षष्ठ्या समासः ॥

इदंनृपप्रार्थिभिरुज्झितोऽर्थिभिर्मणिप्ररोहेण विवृध्य रोहणः ।
कियद्दिनैरम्बरमावरिष्यते मुधा मुनिर्विन्ध्यमरुन्ध भूधरम् ॥ ९० ॥

इदमिति ॥ अविवदान्यस्य अस्य नृपस्य प्रार्थनशीलैरर्थिभिः याचकैः अनेनैव सकलकामानां पूरितत्वादुज्झितः परित्यक्तः । अत एव रत्नव्ययाभावात् मणिप्ररोहेण विवृध्य अङ्कुरोत्पत्त्या विशेषेण वृद्धिं प्राप्य रोहणो मेरुः कियद्भिः कतिपयैरल्पैरेव दिनैरम्बराकारां आवरिष्यते आच्छादयिष्यति यतः, मत्तात् मुनिरगस्तिः विन्ध्यनामानं भूधरं मुधैवारुन्ध मदागमनपर्यन्तं त्वया न वर्धितव्यमिति नियमेन वृथैव वाग्बद्धमकरोत् । तद्रुन्धनाभावेऽपि रोहणेनैव सूर्यगतेः प्रतिबन्धस्य करिष्यमाणत्वादगस्त्यप्रयासस्य वैयर्थ्यमेव जातमित्यर्थः । अगस्त्येन विन्ध्यरोधस्तु पुराणप्रसिद्धः । आवरिष्यते, विकल्पत्वादिटो दीर्घो न । अरुन्ध, रुधात्मनेपदे ॥

भूशक्रस्य यशांसि विक्रमभरेणोपार्जितानि क्रमा-
देतस्य स्तुमहे महेभरदनस्पर्धीनि कैरक्षरैः ।
लिम्पद्भिः कृतकं कृतोऽपि रजतं राज्ञां यशःपारदै-
रस्य स्वर्णगिरिः प्रतापदहनैः स्वर्णं पुनर्निर्मितः ॥ ९१ ॥

भूशक्रस्येति ॥ वयं विक्रमस्य भरेण बाहुल्येन क्रमात्परिपाट्या उपार्जितानि एतस्य भूशक्रस्य पृथ्वीन्द्रस्य यशांसि कैरक्षरैर्वर्णैः स्तुमहे वर्णयामः । यशसां भूयस्त्वाद्गुणानां यथावत्स्तोतुं न शक्नुमः । सामान्याकारेण कथंचित्स्तुमहे इत्यर्थः । किंभूतानि—महेभाः पट्टहस्तिनो गजाः, ऐरावतो वा तेषां दन्तैः सह स्पर्धन्ते एवंशीलानि तद्वच्छुभ्राणि । स्वर्णगिरिर्मेरुः अन्येषां राज्ञां मेरुमेव लिम्पद्भिः यशोलक्षणैः पारदै रसैः कृतकत्वं रजतं रूप्यं कृतोऽपि प्रलेपनिर्मितपाण्डुरतां नीतोऽपि सन् अस्य प्रतापरूपैर्दहनैः अग्निभिः पुनः स्वर्णं निर्मितः कृतः । प्रतापस्य पीतत्वात्स्वर्णरूपतां प्रापितः । पारदलेपेन सुवर्णं श्वेतीभवति, वह्नितापने सोढेऽपि पारदे पुनः काञ्चनमेव भवतीत्यर्थः । एतद्यशसामग्रे परेषां यशांसि न प्रकाशन्ते । यशस्वी प्रतापवांश्चान्यः कोऽपि नास्तीत्यर्थः ॥

---

१ अत्र रोहणाद्रेरहङ्कारविन्ध्यस्तम्भने [illegible] इति जीवातुः । २ 'क्रमानुसारेण [illegible] संकल्पीकृतानि[illegible]' इति जीवातुः ।

यद्भर्तुः कुरुतेऽभिषेणनमयं शक्रो भुवः सा ध्रुवं
　दैग्दाहैरिव भस्मभिर्मघवता वृष्टैर्धृतोद्धूलना।
शंभोर्मा वत सांधिवेलनटनं भाजि व्रतं द्रागिति
　क्षोणी नृत्यति मूर्तिरष्टवपुषोऽसृग्वृष्टिसंध्याधिया ॥ १२ ॥

यदिति ॥ अयं भुवः शक्रो भूमीन्द्रः यस्या भूमेर्भर्तुः अभिषेणनं सेनयाभिगमनं कुरुते सा क्षोणी भूमिः इति मनसि कृत्वा लोहितत्वेनौत्पातिकी असृग्वृष्टी रुधिरवृष्टिलक्षणा या सायंसंध्या तस्या धिया भ्रमबुद्ध्या द्राक् शीघ्रं नृत्यति गात्रविक्षेपं करोति। कम्पते इत्यर्थः। वत खेदे। ध्रुवमुत्प्रेक्षे। किंभूता सा भूः—दाहात् इन्धनज्वलनाद्भस्म [illegible] दिग्दाहाद्दिशामौत्पातिकैर्निर्हेतुकलोहितदीप्तैः भस्मभिरिव मघवता इन्द्रेण वृष्टैर्भस्मभि[illegible] कृत्वा धृतं कृतमुद्धूलनमङ्गलेपो यया सा। इति किम्—शंभोः दिनरात्रिसंधिरूपायां [illegible] काले भवं सांधिवेलं सायंसंध्याकालसमुचितं नटनं नृत्तरूपं व्रतं नियमो मा [illegible] भूदिति स्वयं नृत्यतीत्यर्थः। यतः—अष्टमूर्तेर्जलाद्यष्टमूर्तेः शंभोरेका मूर्तिः पृथिवी। शिवो हि संध्यासमये नृत्यं करोति तन्मूर्तित्वात्तयापि नृत्तमारब्धमित्यर्थः। यमुद्दिश्य [illegible] करोति तस्मिन्देशे दिग्दाहभस्मवृष्टिभूकम्परक्तवृष्टिलक्षणास्तदा राजयसूचका [illegible] अयमेव विजयत इत्यर्थः। 'जलाग्नीन्द्वात्मसूर्याम्बरानिलाः शिवमूर्तयः'। '[illegible] तदभिषेणनम्' इत्यमरः। यद्भर्तुः भर्तृशब्दस्य पदान्तर्वर्तित्वा[illegible]। [illegible] अभिगमनमभिषेणनम्, 'सत्यापपाश–' इति णिचि ल्युट्। '[illegible]–' [illegible] पत्वम्। दैग्दाहैरित्यत्र 'तस्येदम्' इत्यण्। संधिवेलायां भवं सांधिवेलम्, '[illegible]' इत्यण्। इन्द्रः शिवस्य भस्माहरणेऽधिकारी। अत एव दिशां दाहं [illegible] [illegible]निति केचित् ॥

प्रागेतद्वपुरमुखेन्दु सृजतः स्रष्टुः समस्तात्त्विषां
　कोशः शोषमगादगाधजगतीशिल्पेऽप्यनल्पायितः।
निःशेषद्युतिमण्डलव्ययवशादीषत्तमैरेष वा
　रागः केशमयः किमन्धतमसस्तोमैस्ततो निर्मितः ॥ १३ ॥

ईपल्लभैः, अकृच्छ्रार्थे खल्। 'उपसर्गादेव खल्घञोः, नान्यत्र' इति नियमाल्लुमभावः। अन्धतमसम्, 'अवसमन्धेभ्यस्तमसः' ईत्यच्॥

तत्तद्दिग्जैत्रयात्रोद्धुरतुरगखुराग्रोद्धतैरन्धकारं
निर्वाणारिप्रतापानलजमिव सृजत्येष राजा रजोभिः।
भूगोलच्छायमायामयगणितविदुन्नेयकायोऽभियाभू-
देतत्कीर्तिप्रतानैर्विधुभिरिव युधे राहुराहूयमानः॥ ९४॥

तदिति॥ एष राजा तासां तासां प्राच्यादीनां सर्वासां दिशां जैत्रा जयकारिण्यो यात्रास्तासूद्धुरा उत्साहवन्तोऽतिबलिनस्तुरगास्तेषां खुराग्रैरुद्धतै रजोभिः कृत्वा अन्धकारं सृजति। कथंभूतमिव—निर्वाणः शान्तोऽरिप्रतापानलस्तस्मादनन्तरं जातमिव। अन्धकारं सूर्यप्रकाशस्याच्छादितत्वात्तमः सृजति। अनले शान्ते भाभावरूपोऽन्धकारो भवति। एतस्य दिग्जययात्रायां प्रारब्धायां सर्वेषामपि वैरिणां प्रतापः शान्तो भवतीति भावः। तुरंगबाहुल्यं च। तथा—एतस्य कीर्तिप्रतानैर्यशोविस्तारैरेव विधुभिर्बहुभिश्चन्द्रैः युद्धे युद्धार्थमाहूयमानः स्पर्धापूर्वमाकारित एव राहुः भियेव भयेनेव भूगोलस्य भूमण्डलस्य छायायां मायामयेन मायारूपेण व्याजेन गणितविद्भिर्ज्योतिषिकैर्गणितशास्त्रप्रामाण्येनोन्नेयस्तर्क्यः कायः शरीरं यस्य एवंभूतोऽभूत्। एतत्कीर्तिसमूहचन्द्रान्दृष्ट्वा एकस्य चन्द्रस्य जेतुं शक्यत्वादेषां तु बहूनां जेतुमशक्यत्वाद्राहुणा स्वं गोपायितुं भूगोलच्छायारूपं मायामयं शरीरं धृतमित्यर्थः। ज्योतिःशास्त्रे च भूगोलच्छायैव राहुत्वेनोक्ता। अन्योऽपि शत्रोर्भीतः स्वं गोपायितुं रूपान्तरं धारयति। एतादृशो यशस्वी कोऽपि नास्तीति भावः। निर्वाण इति, 'निर्वाणोऽवाते' इति निपातः। 'छायमाया—' इति, 'विभाषा सेना—' इति षण्डत्वम्॥

आस्ते दामोदरीयामियमुदरदरीं यावलम्ब्य त्रिलोकी
संमातुं शक्नुवन्ति प्रथिमभरवशादत्र नैतद्यशांसि।
तामेनां पूरयित्वा निरगुरिव मधुध्वंसिनः पाण्डुपद्म-
च्छद्मापद्मानितानिद्विपदशनसनाभीनि नाभीपथेन॥ ९५॥

आस्ते इति॥ येयं त्रिलोकी लोकत्रयी दामोदरीयामुदरदरीं श्रीविष्णोर्जठरकंदरामवलम्ब्याश्रित्य आस्ते। अत्रास्यां दामोदरोदरस्थितायां त्रिलोक्यां प्रथिमभरवशान्महत्त्वबाहुल्यादतिसंमर्दात् संमातुं सुखेन स्थातुं न शक्नुवन्त्यसमर्थानि सन्ति, तान्यतिप्रसिद्धानि द्विपदशनैः सनाभीनि सदृशान्यतिगौराणि एतस्य यशांसि तामेतां विष्णूदरदरीस्थितां तत्सहितां त्रिलोकीं पूरयित्वावशिष्टानि तामुदरदरीं तस्यां त्रिलोकीं च परिपूर्य अवशिष्य वा पाण्डुपद्मच्छद्मापन्नानि नाभिसमुत्पन्नधवलकमलच्छद्मापन्नानि तदाकाराणि सन्ति मधुध्वंसिनो विष्णोर्नाभिरूपेण पथा मार्गेण निरगुरिव निर्जग्मुरिव। संकटत्वात्स्थानाभावात् बहिर्निर्गता-

---

१ 'अनोरेखालंकारेण लोकालिशयविशेषो व्यज्यते' इति जीवातुः। २ 'ज्योतिःशास्त्रज्ञानामङ्क युद्धराहोर्भूच्छायात्मकत्वम्। तदेतत्कीर्तिचन्द्रभिया' इत्युत्प्रेक्षा। इता च राहुजीवकत्वेन कीर्तिचन्द्राणां प्रतिद्वन्द्वव्यतिरेको व्यज्यते' इति जीवातुः। ३ 'शक्नुवन्ति' इति जीवातुसुखावबोधासंमतपाठः।

नीव । श्रीविष्णोर्नाभौ धवलं कमलमन्यथोत्प्रेक्षितम् । पाण्डुरं पद्मं न किंत्वेतद्यशांस्येव । करिदन्तधवलकमलतुल्यान्यतिभूयांसि चास्य यशांसीति भावः । दामोदरीयाम्, 'पृथ्वादि' । पृथ्वादिलात्प्रथिमा । नाभीपथेन, ऋगादिना समासान्तः ॥

अस्यासिर्भुजगः स्वकोशसुषिराकृष्टः स्फुरत्कृष्णिमा
कम्पोन्मीलदराललीलवलनस्तेषां भिये भूभुजाम् ।
सङ्ग्रामेषु निजाङ्गुलीमयमहासिद्धौषधीवीरुधः
पर्वास्ये विनिवेश्य जाङ्गुलिकता यैर्नाम नालम्बिता ॥ ९६ ॥

अस्येति ॥ अस्य असिरेव भुजगस्तेषां भूभुजां राज्ञां भिये भवतीति शेषः । किंभूतः—स्वकोश एव चर्ममयं पिधानं तदेव सुषिरं वल्मीकविवरं तस्मादाकृष्टो बहिः कृत सद्यो धृतश्च । तथा स्फुरन्प्रकाशमानः उत्तमलोहजातिविशेषत्वात्कृष्णिमा श्यामत्वं यस्य । सर्पोऽपि सद्योधृतत्वात्स्फुरत्कालिमा । तथा—कम्पेन तलहस्तान्दोलनेन कृत्वा उन्मीलन्तः प्रकटीभूता अराला वक्रा लीला येषु तादृशानि वलनानि गतिविशेषा यस्य । सर्पोऽपि वक्रगतिर्भवति । तेषां केषाम्—यैः सङ्ग्रामेषु निजाङ्गुलीमय्याः स्वीयाङ्गुलीरूपाया महासिद्धौषध्या वीरुधो वल्ल्याः स्पर्शमात्रेण विपघ्न्याः पर्वग्रन्थिमङ्गुष्ठाग्रपर्वग्रन्थिद्वयं चास्ये मुखे विनिवेश्य जाङ्गुलिकता विषवैद्यता गारुडिकता नालम्बिता नाङ्गीकृता । नाम प्रसिद्धौ । सर्पोऽपि येन स्वमुखे सिद्धौषधीपर्व न निक्षिप्यते तमेव यथा मारयति, तथा एतदीयः खड्गोऽपि ये शस्त्राणि न त्यजन्ति दैन्याच्च मुखे अङ्गुलीपर्व न धारयन्ति तानेव हन्ति नान्यान्भीतान्शरणागतांश्च । 'विषवैद्यो जाङ्गुलिकः' इत्यमरः ॥

यः पृष्ठं युधि दर्शयत्यरिभटश्रेणीषु यो वक्रता-
मस्मिन्नेव बिभर्ति यश्च किरति क्रूरध्वनिं निष्ठुरः ।
दोषं तस्य तथाविधस्य भजतश्चापस्य गृह्णन्गुणं
विख्यातः स्फुटमेक एष नृपतिः सीमा गुणग्राहिणाम् ॥ ९७ ॥

य इति ॥ अरिभटश्रेणीषु शूरनरवैरिसङ्घेषु विषये यः पृष्ठं दर्शयति पराङ्मुखः [illegible] यते । अथ च—यं प्रत्याकृष्यते तस्य स्वभावात्पृष्ठं दर्शयति । यः अस्मिन्नत्वाभिमुखो [illegible] वक्रतामनृजुत्वं स्वाश्रय एव कृतघ्नत्वं बिभर्ति । अथ च—अन्यस्यैतादृग्बलाभावात् [illegible] वक्रतां बिभर्ति । नान्येन नम्रीकर्तुं शक्यत इत्यर्थः । तथा—यो निष्ठुरो निर्दयो [illegible] हितः सन् क्रूरध्वनिमनेन सहाप्रियभाषणं किरति । अथ च—परिगत [illegible] वैरिणां भयावहं शब्दं टङ्कारं क्षिपति । दोषं दूषणम् । अथ च—बाहुं [illegible] तस्य चापस्य तथाविधस्यान्यस्य वा कस्यचिद्गुणं श्रुतशौर्यादिकं गृह्णन्वर्णयन् । अथ [illegible] मौर्वीमाकर्षन् एष एको नृपतिः स्फुटं निश्चितं गुणग्राहिणां परदोषख्यापननिपुणानां [illegible] गुणारोपणं कुर्वतां सज्जनानाम् । अथ च—मौर्वीग्राहिणां धनुर्धराणां सीमा [illegible]

---

१ 'अत्र [illegible] निष्ठुरेति [illegible] [illegible]' इति जीवातुः । २ '[illegible]' इति [illegible]

स्फुटं विख्यातः प्रसिद्धः। एवंविधो धनुर्धरः सज्जनश्च कोऽपि नास्तीत्यर्थः। धनुःपृष्ठदर्शनेनै- तस्य पलायनाभावः सूचितः ॥

अस्यारिप्रकरः शरश्च नृपतेः संख्ये पतन्तावुभौ
सीत्कारं च न संमुखौ रचयतः कम्पं च न प्राप्नुतः।
तद्युक्तं न पुनर्निवृत्तिरुभयोर्जागर्ति यन्मुक्तयो-
रेकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतम् ॥ ९८ ॥

अस्येति ॥ अस्य नृपतेः उभौ संख्ये सङ्ग्रामे क्रमेण संमुखौ एतत्संमुखं वैरिसंमुखं च पतन्तौ सन्तौ सीत्कारं दुःखाभिव्यञ्जकं दन्तरन्ध्रनिर्गतं पक्षवातजनितं च ध्वनिविशेषं यथा रचयतः न कुरुतः। यच्च मरणभीतिजनितं दुर्निर्गतत्वजनितं च कम्पं न प्राप्नुतः। उभौ कौ—अरिप्रकरो वैरिसङ्घः, शरश्च एतौ द्वौ। तथा—मुक्तयोः आत्मनोऽथ धनुश्च्युतयोः यत् पुनर्निवृत्तिः जन्म प्रत्यागमनं च न जागर्ति भवति तत्सर्वं युक्तं उचितमेव। द्वयोरपि तुल्यधर्म- त्वात्। तर्हि विलक्षणं किमित्याशङ्क्याह—तत्र तयोर्द्वयोर्मध्ये एको वैरिसङ्घः मित्रं सुहृदम्। अथ च—सूर्यं भिनत्ति। अपरश्च शरोऽमित्रं सूर्यव्यतिरिक्तम्। अथ च—वैरिणं भिनत्ति द्विधाकरोतीत्यद्भुतमाश्चर्यम्। तुल्यकर्मणोरतुल्यकर्मारम्भकत्वस्य विरुद्धत्वादित्यर्थः। शत्रुभ्यो- न्यदनुचये। दुःखमपराङ्मुखत्वेन रणे संमुखः पतितः शत्रुसङ्घः 'द्वाविमौ पुरुषौ लोके सूर्य- मण्डलभेदिनौ' इति वचनात्सूर्यमण्डलं भित्त्वा मुक्तिं प्राप्तः। अदृढमुष्टितया मुक्तो बाणः कम्पसीत्कारौ रचयति। तदकरणाच्च दृढमुष्टितास्य सूचिता। दृढमुष्टित्वेन मुक्तो वैरिमध्ये न पुनरुद्याति। वैरिणं हन्तीत्यर्थः। शूरतरोऽयं धनुर्नाम्ने दत्तवानिति भावः। अमरस्तु—'मित्रं सुखं सुहृन्मित्रं वा' दैत्येति ॥

धूलीभिर्दिवमन्धयन्बधिरयन्नाशाः खुराणां रवै-
र्वातं संयति खञ्जयञ्जवजवैस्तोतॄन्गुणैर्मूकयन्।
धर्माराधनसंनियुक्तजगता राज्ञामुनाधिष्ठितः
सान्द्रोत्फालमिषाद्विगायति पदा स्पष्टं तुरंगोऽपि गाम् ॥ ९९ ॥

धूलीभिरिति ॥ धर्माराधने सम्यक् नियुक्तं प्रेरितं जगत् येन एवंभूतेन अमुना राज्ञाधि- ष्ठित आरूढस्तुरंगोऽपि पशुरपि धूलीभिः खुरक्षोभितैर्दिवं स्वर्गलोकमन्धयन्नन्धं कुर्वन्। चक्षुःप्रतिबद्धत्व एव निमीलितनयनं कुर्वन्नित्यर्थः। तथा—खुराणां रवैः शब्दैः आशाः दिशः दिक्प्रान्तनिवासिनो जनान्बधिरयन्बधिरान् शब्दग्रहणासमर्थान्कुर्वन्। तथा—संयति संग्रामे जवस्य वायोरिव जवैर्वेगैः वातं खञ्जयन् पङ्गुं कुर्वन्। तथा—गुणैः शौर्यधैर्यादिभिः स्तोतॄन् मूकयन् [illegible]

१ इतः परम् 'दीप्यन्तौ ...' इति [illegible]
[illegible]

कत्वेन सामस्त्येन स्तोतुमसमर्थान्मूकानिव कुर्वन् । एवंभूतः सन् अनन्तरं सान्द्राणां नि- राणामुत्फालानां चतुर्भिश्चरणैरुत्पतनानां मिषात्पदा एकेनापि चरणेन गां भुवम् । अथ च धेनुं स्प्रष्टुं तस्याः स्पर्शनं कर्तुं विगायति विशेषेण जुगुप्सते । धार्मिको राजा निषिद्धमाच- स्वाधीनान्पापिनो दण्डयति । अहं तु तदधिष्ठितः पदा गोः स्पर्शलक्षणं पापं कुर्वन्द- स्यामिति बुद्ध्या पदा न स्पृशतीवेत्यर्थः । धार्मिको जवनाश्वश्चायमेवेत्यर्थः । अन्वयन्निव 'तत्करोति–' इति णिजन्ताच्छता ॥

एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां
कष्टं द्रष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेऽपि ।
अश्वैरस्वैरवेगैः कृतखुरखुरलीमङ्क्षु विक्षुद्यमान-
क्ष्मापृष्ठोत्तिष्ठदन्धंकरणरणधुरारेणुधारान्धकारात् ॥ १०० ॥

एतेनेति ॥ समरसमालोकिनो ये लोकास्तेषामास्पदे स्थानभूतायामपि भुवि संग्रामभूमौ समरसमालोकलोकानां देवानामास्पदे गगनेऽपि वा एतेन राज्ञा उत्कृत्तकण्ठाश्छिन्नग्रीवाः कबन्धरूपाः प्रतिसुभटा रिपुवीरास्त एव नटा नर्तकास्तैरारब्धानां नाट्याद्भुतानां नृत्ताश्चर्याणां द्रष्टा नाभूदेव । कष्टमतिदुःखमेतत् । तत्र हेतुः—अस्वैरवेगैः शीघ्रजवैरश्वैः कृता खुरैः कृता खुरली अभ्यासभूमिः पुनः पुनः न्यासो वा तया मङ्क्षु मनोज्ञं शीघ्रं वा विशेषेण क्षुद्यमानं चूर्णीभवत्क्ष्मापृष्ठं भूतलं तस्मादुत्तिष्ठन्नुत्पतन् अनन्धमन्धंकरण एवंभूतो रणधुरारेणुः रण- प्रारम्भ एव समुत्पन्नो रेणुस्तस्य धाराः प्रवाहास्तज्जनितादन्धकारात् । रणविलोकनार्थं नभः- गतैरपि मानवैर्देवैरप्यश्वखुरोत्थितरजःपूरितनेत्रैः कबन्धनृत्तं नालोकीत्यर्थः । 'मन्दस्वच्छ- न्दयोः स्वैरम्' । 'एतत्कृत्तोत्तमाङ्ग–' इति पाठः साधीयान् । द्रष्टा, तृच् । रणधुरा, ऋगा- दिना अः । धुरा भर इति वा ॥

उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्द्विजालीगलदुदितमरुत्स्फालवाचालवीचिः ।
एतेनाखानि शालानिचदनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः ॥ १०१ ॥

उन्मीलदिति ॥ एतेन राज्ञा एतादृशस्तडागोऽखानि निखानितः । किंभूत — उन्मी- लन्तो विकसन्तो लीला विलासो येषां तानि नीलोत्पलानि तेषां [illegible] तेन दलि- [illegible] तदुद्भवेन आमोदेन परिमलेन मेदस्वी पुष्टो बहुलपरिम[illegible] पूर [illegible] क्रीडन्तो द्विजालिर्हंसादिपक्षिसमूहा गलद्भिः पक्षैरन्य उदित उत्पन्नो मरुत् [illegible] [illegible] वाचालाः शब्दायमाना वीचयस्तरङ्गा यस्य । तथा [illegible] [illegible] द्रुमाली [illegible] [illegible] पथिका [illegible] तासां पथिकदृशां,–'[illegible]' [illegible], ततो रागः संतोषो येन । [illegible] नेत्रं तृप्तिदम् ॥

कत्वेन सामस्त्येन स्तोतुमसमर्थान्मूकानिव कुर्वन् । एवंभूतः सन् अनन्तरं सान्द्राणां निरन्त-राणामुत्फालानां चतुर्भिश्चरणैरुत्पतनानां मिषात्पदा एकेनापि चरणेन गां भुवम् । अथ च—धेनुं स्प्रष्टुं तस्याः स्पर्शनं कर्तुं विगायति विशेषेण जुगुप्सते । धार्मिको राजा निषिद्धाचरतः स्वाधीनान्पापिनो दण्डयति । अहं तु तदधिष्ठितः पदा गोः स्पर्शलक्षणं पापं कुर्वन्दण्ड्यः स्यामिति बुद्ध्या पदा न स्पृशतीवेत्यर्थः । धार्मिको जवनाश्वश्चायमेवेत्यर्थः । अन्यथानिलादौ 'तत्करोति–' इति णिजन्ताच्छता ॥

एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां
कष्टं द्रष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेऽपि ।
अश्वैरश्वैरवेगैः कृतखुरखुरलीमञ्जुविक्षुद्यमान-
क्ष्मापृष्ठोत्तिष्ठदन्धंकरणरणधुरारेणुधारान्धकारात् ॥ १०० ॥

एतेनेति ॥ समरसमालोकिनो ये लोकास्तेषामासदे स्थानभूतायामपि भुवि संग्रामभूमौ समरसमालोकलोकानां देवानामासदे गगनेऽपि वा एतेन राज्ञा उत्कृत्तकण्ठाश्छिन्नग्रीवाः कबन्धरूपाः प्रतिसुभटा रिपुवीरास्त एव नटा नर्तकास्तैरारब्धानां नाट्याद्भुतानां नृत्ताश्चर्याणां द्रष्टा नाभूदेव । कष्टमतिदुःखमेतत् । तत्र हेतुः—अश्वैरवेगैः शीघ्रजवैरश्वैः कृता खुरैः कृता खुरली अभ्यासभूमिः पुनः पुनः न्यासो वा तया मञ्जु मनोज्ञं शीघ्रं वा विशेषेण क्षुद्यमानं चूर्णीभवत्क्ष्मापृष्ठं भूतलं तस्मादुत्तिष्ठन्नुत्पतन् अनन्धमन्धंकरण एवंभूतो रणधुरारेणु रण-प्रारम्भ एव समुत्पन्नो रेणुस्तस्य धाराः प्रवाहास्तज्जनितादन्धकारात् । रणविलोकनार्थमा-गतैरपि मानवैर्देवैरप्यश्वखुरोत्थितरजःपूरितनेत्रैः कबन्धवृत्तं नालोकीत्यर्थः । 'मन्दस्वच्छ-न्दयोः स्वैरम्' । 'एतत्कृत्तोत्तमाङ्ग–' इति पाठः साधीयान् । द्रष्टा, तृच् । रणधुरा, ऋगा-दिना अः । धुरा भर इति वा ॥

उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्द्विजालीगरुदुदितमरुत्स्फालवाचालवीचिः ।
एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः ॥ १०१ ॥

उन्मीलदिति ॥ एतेन राज्ञा एतादृशस्तडागोऽखानि निष्पादितः । किंभूतः—उन्मी-लन्ती विकसन्ती लीला विलासो येषां तानि नीलोत्पलानि तेषां दलानि पत्राणि तेषां दलनं विकसनं तदुद्भवेन आमोदेन परिमलेन मेदस्वी पुष्टो बहुलपरिमलः पूरः प्रवाहस्तस्य क्रोड उत्सङ्गे क्रीडन्ती द्विजालिर्हंसादिपङ्क्तिस्तस्या गरुद्भ्यः पक्षेभ्य उदित उत्पन्नो मरुद्वायुस्तस्य स्फालः सवेगगमनं संघट्टो वा तेन वाचालाः शब्दायमाना वीचयस्तरङ्गा यस्य । तथा–शाखानिवहे नवहरित्पर्णैर्नूतनश्यामपर्णैश्च पूर्णा द्रुमाल्यो वृक्षपङ्क्तयस्ताभिर्व्यालीढो व्याप्त उपान्तस्तीरप्रदेशः तेन शान्ता व्यथा ग्रीष्मोष्मपीडा यासां तासां पथिकदृशां,–'ग्रीष्मोष्मपीडा येषां पथिकानां वा दृशस्तासां, दत्तो रागः संतोषो येन । तडागस्यातिरमणीयत्वं सुजनत्वं च धार्मिकत्वं सूचितम् ॥

कत्वेन सामस्त्येन स्प्रष्टुमसमर्थान्मूर्च्छानिव कुर्वन्। एवंभूतः सन् अनन्तरं सान्द्राणां तिरस्काराणामुत्फालानां चतुर्भिश्चरणैरुत्पतनानां मिषात्पदा एकेनापि चरणेन गां भुवम्। अथ च धेनुं स्प्रष्टुं तस्याः स्पर्शनं कर्तुं विगायति विशेषेण जुगुप्सते। धार्मिको राजा निषिद्धानाचरतः स्वाधीनान्पापिनो दण्डयति। अहं तु तदधिष्ठितः पदा गोः स्पर्शलक्षणं पापं कुर्वन्दण्ड्यः स्यामिति बुद्ध्या पदा न स्पृशतीवेत्यर्थः। धार्मिको जवनाश्वश्चायमेवेत्यर्थः। अन्वयाविति 'तत्करोति-' इति णिजन्ताच्छता॥

एतेनोत्कृत्तकण्ठप्रतिसुभटनटारब्धनाट्याद्भुतानां
कष्टं द्रष्टैव नाभूद्भुवि समरसमालोकिलोकास्पदेऽपि।
अश्वैरस्वैरवेगैः कृतखुरखुरलीमञ्जुविक्षुद्यमान-
क्ष्मापृष्ठोत्तिष्ठदन्धंकरणरणधुरारेणुधारान्धकारात्॥ १००॥

एतेनेति॥ समरसमालोकिनो ये लोकास्तेषामासदे स्थानभूतायामपि भुवि संग्रामभूमौ समरसमालोकलोकानां देवानामासदे गगनेऽपि वा एतेन राज्ञा उत्कृत्तकण्ठाश्छिन्नग्रीवाः कबन्धरूपाः प्रतिसुभटा रिपुवीरास्त एव नटा नर्तकास्तैरारब्धानां नाट्याद्भुतानां नृत्तपर्वणां द्रष्टा नाभूदेव। कष्टमतिदुःखमेतत्। तत्र हेतुः—अस्वैरवेगैः शीघ्रजवैरश्वैः कृता खुरैः कृता खुरली अभ्यासभूमिः पुनः पुनः न्यासो वा तया मञ्जु मनोज्ञं शीघ्रं वा विशेषेण क्षुद्यमानं चूर्णीभवत्क्ष्मापृष्ठं भूतलं तस्मादुत्तिष्ठन्नुत्पतन् अनन्धमन्धंकरण एवंभूतो रणधुरायां रणप्रारम्भ एव समुत्पन्नो रेणुस्तस्य धाराः प्रवाहास्तज्जनितादन्धकारात्। रणविलोकनार्थमागतैरपि मानवैर्देवैरप्यश्वखुरोत्थितरजःपूरितनेत्रैः कबन्धवृत्तं नालोकितमित्यर्थः। 'स्वन्दस्वच्छन्दयोः स्वैरम्'। 'एतत्कृत्तोत्तमाङ्ग-' इति पाठः साधीयान्। द्रष्टा, तृच्। रणधुरा, ऋक्पूरादिना अः। धुरा भर इति वा॥

उन्मीलल्लीलनीलोत्पलदलदलनामोदमेदस्विपूर-
क्रोडक्रीडद्द्विजालीगरुदुदितमरुत्स्फालवाचालवीचिः।
एतेनाखानि शाखानिवहनवहरित्पर्णपूर्णद्रुमाली-
व्यालीढोपान्तशान्तव्यथपथिकदृशां दत्तरागस्तडागः॥ १०१॥

उन्मीलदिति॥ एतेन राज्ञा एतादृशस्तडागोऽखानि निष्पादितः। किंभूतः—उन्मीलन्ती विकसन्ती लीला विलासो येषां तानि नीलोत्पलानि तेषां दलानि पत्राणि तेषां दलनं विकसनं तदुद्भवेन आमोदेन परिमलेन मेदस्वी पुष्टो बहुलपरिमलः पूरः प्रवाहस्तस्य क्रोडे उत्सङ्गे क्रीडन्ती द्विजालिर्हंसादिपक्षिपङ्क्तिस्तस्या गरुद्भ्यः पक्षेभ्य उदित उत्पन्नो मरुद्वायुस्तस्य स्फालः सवेगगमनं संघट्टो वा तेन वाचालाः शब्दायमाना वीचयस्तरङ्गा यस्य। तथा-शाखानिवहस्य नवहरित्पर्णैर्नूतनश्यामपर्णैश्च पूर्णा द्रुमाल्यो वृक्षपङ्क्तयस्ताभिर्व्यालीढो व्याप्त उपान्तः प्रदेशस्तेन शान्ता व्यथा ग्रीष्मोष्मपीडा यासां तासां पथिकदृशां,-'ग्रीष्मोष्मपीडा' येषां पथिकानां वा दृशस्तासां, दत्तो रागः संतोषो येन। तडागस्याभिरमणीयत्वं सुखजनकत्वमस्य च धार्मिकत्वं सूचितम्॥

त्वदीयमुखकमलस्य च जलक्रीडावशादभिषेकः । अथ च—पट्टाभिषेको भवतु । नीलोत्पल-जलदेवताफुल्लकमलापेक्षया भैमीनेत्रशरीराननमधिकमिति सूचितम् । तनुच्छायम्, 'विभाषा सेना–' इति षण्ढत्वम् ॥

एतत्कीर्तिविवर्तधौतनिखिलत्रैलोक्यनिर्वासितै-
र्विश्रान्तिः कलिता कथासु जगतां श्यामैः समग्रैरपि ।
जज्ञे कीर्तिमयादहो भयभरैरस्मादकीर्तिः पुनः
सायन्नास्य कथापथेऽपि मलिनच्छाया ववन्ध स्थितिम् ॥ १०४ ॥

एतदिति ॥ जगतां स्थावरजङ्गमात्मकानां भुवनानां संबन्धिभिः समग्रैरपि श्यामैः कृष्णैः कज्जलादिपदार्थैर्गुणैर्वा कथासु वार्तासु एव विश्रान्तिः कलिता आश्रयोऽङ्गीकृतः । किंभूतैः—श्यामैः—एतस्य कीर्तेर्यशसः विवर्तेन परिणामेन विशेषेण वर्तनं विवर्तः स्थितिर्वा तेन धौता-द्धवलीकृतान्निखिलात् त्रैलोक्यात्कंदरादिसहितात् निर्वासितैर्निष्कासितैः कीर्त्या लोकत्रयस्य श्वेतीकरणात्तत्तच्छ्यामगुणानां सांप्रतमदर्शनात् 'पूर्वं श्यामानि वस्तून्यभूवन्' इति वार्तामात्र-शेषाणि श्यामानि जातानि सर्वथा न सन्तीत्यर्थः । तथा—कीर्तिमयात्कीर्तिप्रचुरादस्मादस्मा-अकीर्तेः पुनः भयभरैर्भीतिबाहुल्यैर्जज्ञे जातम् । अहो आश्चर्यम् । कीर्तेरकीर्तेश्च विरोधात्की-र्तिरूपादस्मादकीर्तेर्भयं युक्तमित्यर्थः । एतत्कुतः—यद्यस्मात् मलिनच्छायाऽतिकृष्णा सा अपकीर्तिः अस्य कथापथेऽपि स्थितिमाश्रयं न ववन्ध नाकरोत् । एतत्कथाप्रारम्भेऽकीर्तिले-शस्याप्यभावात्कीर्तिरेव वर्ण्यत इत्यर्थः । यश्च यस्माद्बिभेति स तदीयकथाप्रारम्भ एव मलिनो भूत्वान्यत्रैव गच्छति । अविद्यमानमपि शशविषाणादि वचनादिगोचरो भवति, अकीर्तिस्तु वचनगोचरोऽपि नाभूदित्याश्चर्यम् । अचेतनाया अप्यकीर्तेर्भयोत्पादनादपि चित्रम् । 'श्र-ताम्' इति पाठे वृद्धानां कथास्विति व्याख्येयम् । जज्ञे, भावे लकारः ॥

अथावदद्भीमसुतेङ्गितात्सखी जनैरकीर्तिर्यदि वास्य नेष्यते ।
मयापि सा तत्खलु नेष्यते परं सभाश्रवःपूरतमालवल्लिताम् ॥ १०५ ॥

अथेति ॥ अथ सखी भीमसुताया इङ्गितादननुरागसूचकात् भ्रूवेल्लनादिचेष्टितात्सरस्वती-मित्यवदत् । इति किम्—हे वाणि, जनैः अस्याकीर्तिर्यदि नेष्यते वा नाभिलष्यत एव तर्हि मयापि सा अस्य अकीर्तिः खलु निश्चितं नेष्यते नाभिलष्यते । यद्यपि तुल्यं तथापि तु कश्चिद्विशेषोऽस्ति सभायाः सभालोकस्य श्रवःपूरतमालवल्लितां कर्णाभरणतमालवल्लितां नेष्यते प्रापयिष्यते । जनानामसंमतां शशविषाणादिवदसतीमप्यस्याकीर्तिमेव सर्वां सभां श्रावयिष्या-मीत्यर्थः । वाण्यास्तद्वर्णननिवारणं चकारेति भावः । अकीर्तेर्नीलत्वात्तमालवल्लित्वम् । इष्यते, इषेः कर्मणि । नेष्यते, णीञः प्रधानकर्मणि लृट् ॥

अकीर्तिमेव वर्णयति—

अस्य क्षोणिपतेः परार्धपरया लक्षीकृताः संख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः ।

प्रातेरतिगौरीरिति स्यात्। तथापि 'कृदिकारादक्तिन' इति न्यायेन ह्रस्वान्तादपि पक्षे ङीपि अतिगौरीति संगच्छते ॥

तन्नालीकनले चलेतरमनाः साम्यान्मनागप्यभू-
दप्यग्रे चतुरः स्थितान्न चतुरा पातुं दृशा नैषधान्।
आनन्दाम्बुनिधौ निमज्ज्य नितरां दूरं गता तत्तला-
लंकारीभवनाज्जनाय ददती पातालकन्याभ्रमम् ॥ १११ ॥

तदिति ॥ न अलीको नालीकः स चासौ नलश्च नालीकनलः सत्यनलः तस्मिन्नदृष्टवशा-घटितदुर्घटदर्शने सत्यनले चलेतरत् निश्चलं मनो यस्याः सा तत्रैवानुरक्ता सती सा भैमी अग्रे स्थितानपि चतुरश्चतुःसंख्याकानलीकान्नैषधान्नलान् साम्यात्सत्यनलसाम्येन दृशा नयन-व्यापारेण पातुं कटाक्षैर्विलोकयितुं मनागल्पमपि चतुरा कुशला नाभूत्। किंभूता—आन-न्दाम्बुनिधावानन्दरूपे समुद्रे निमज्ज्य ब्रुडित्वा। नलावलोकनान्निश्चला भूत्वेति यावत्। नितरां दूरं गता हर्षस्य परमकाष्ठां प्राप्ता, तलं गता च। तथा—तस्य आनन्दसमुद्रस्य तलं तत्स्यालंकारीभवनाज्जनाय पातालकन्याभ्रमं अतिसौन्दर्यादानन्दवशाच्च निर्निमेषत्वात् समुद्रे निमज्ज्य तलगमनेन च किमियं नागकन्येति भ्रमं बुद्धिं ददती जनयन्ती। 'अलंकारीभवते' इति पाठे तस्य तलस्य भूतलस्योपवेशनेन अलंकारभूतायेन्द्रादिलोकाय नलरूपाय जनाय वा। पातालतलस्यालंकारीभवते वासुक्यादिनागलोकाय वा। पुरस्थितान्नलाकारानपीन्द्रादी-नन्यराजवत् ऋजुदृष्ट्यैव विलोकयति स्म। अदृष्टवशाच्च व्यवहितमपि सत्यनलं कटाक्षैर्वि-लोकयति स्मेति भावः। 'तन्नल-' इति पाठे तेषामलीकनलानां स्वीयेन रूपेणालंकारभूताय जनाय। सत्यनलायेत्यर्थः ॥

सर्वस्वं चेतसस्तां नृपतिरपि दृशे प्रीतिदायं प्रदाय
प्रापत्तद्दृष्टिसिध्यातिथिममरदुरापामपाङ्गोत्तरङ्गाम्।
आनन्दाब्धेन वन्ध्यानकृत तदपराकूतपातान्स रत्याः
पत्या पीयूषधारावलनविरचितेनाशुगेनाशु लीढः ॥ ११२ ॥

सर्वस्वमिति ॥ स नृपतिः नलोऽपि चेतसः सर्वस्वं प्राणवल्लभां तां भैमीं दृशे स्ने-हाय प्रीतिदायं संतोषजनितं दानं प्रदाय प्रकर्षेण दत्त्वा कटाक्षेण तां सादरं दृष्ट्वा अमरदुरा-पामिन्द्रादिभिर्दुर्लभां लोकोत्तररूपाम्। अथ च—तेषां कटाक्षेणावलोकनात्तैर्दुरापाम्। अपाङ्गे नेत्रप्रान्ते उत्तरङ्गां [illegible] कटाक्षरूपां तद्दृष्टिं भैमीदृष्टिमेव दृशोऽति-थिमभ्यागतं प्रापत्प्राप्तवान्। भैम्या पूर्वं कटाक्षैर्विलोकितः, अनन्तरं तेन सावलोकिता, अनन्तरं पुनरपि तया विलोकित इत्यर्थः। अनन्तरं च रत्याः पत्या कामेन पीयूषधारा[illegible]-[illegible] बहुलं भैमीकृतं [illegible] तेन कृत्वा [illegible] कटा-क्षरूपेण बाणेन आशु शीघ्रं लीढो विद्धः स नलः [illegible] [illegible] [illegible] आनन्दाब्धेन [illegible]

१ [illegible] इति क्वचित्।

रक्तत्वयोग्यां सेवां चकार । धवलरक्तत्वलक्षणसामुद्रकलक्षणयुक्तोऽपाङ्गस्तु नल एव संलग्नोऽभूदित्यर्थः । अथ च—शुचेः पापभीरोरनुरक्तस्य च भावेन स्वामिभक्त्योचितामिति वा । स्वामिभक्तो हि स्वामिनमेव सेवते नत्वन्यमित्यर्थः । कटाक्षेणान्यावलोकने दोषः ऋजुदृष्ट्या त्वन्यविलोकने दोषो नेति न पातिव्रत्यक्षतिः क्वापि । नलमेव कटाक्षैर्विलोकयति स्मेति भावः । इन्द्रादिषु चतुर्ष्वलीकनलेषु सत्स्वपि सत्यनलत्वेऽज्ञातेऽपि तत्रैव सत्यनल एवानुरागवाहुल्याददृष्टवशात्कटाक्षनिरीक्षणं युक्तम् ॥

इदानीं श्लोकचतुष्टयेन परस्परानुरागं वर्णयति—

दृशा नलस्य श्रुतिचुम्बिनेपुणा करेऽपि चक्रच्छलनम्रकार्मुकः ।
स्मरः पराङ्गैरनुकल्प्य धन्वितां जनीमनङ्गः स्वयमार्दयत्ततः ॥ १०९ ॥

दृशेति ॥ ततो भैमीकटाक्षविलोकनानन्तरं स्वयमनङ्गोऽङ्गरहितः । अत एव नलस्य दृशा नेत्रव्यापारेणैव श्रुतिचुम्बिनापाङ्गसंचारिणा कटाक्षरूपेण कर्णपूर्णेनेपुणा कृत्वा स्मरः परस्य नलस्यैव दृगादिभिरङ्गैरवयवैः धन्वितां धनुर्धरत्वमनुकल्प्य जनीं भैमीमार्दयदपीडयत् । किंभूतः स्मरः—करे नलस्यैव हस्ते रेखामयराज्यलक्षणरूपचक्रच्छलेन नम्रं चक्राकारं कार्मुकं यस्य सः । नलेक्षिता सती कामातुरा जातेति भावः । मुख्याङ्गाभावे चानुकल्पोऽप्यङ्गीक्रियते । आर्दयत्, 'अर्द हिंसायाम्' ण्यन्ताल्लङ् । 'आर्दिदत्' इति पाठे लुङ् ॥

उत्कण्टका विलसदुज्ज्वलपत्रराजिरामोदभागनपरागतराऽतिगौरी ।
रुद्रक्रुधस्तदरिकामधिया नले सा वासार्थितामधृत काञ्चनकेतकी वा ॥ ११० ॥

उत्कण्टकेति ॥ सा भैमी रुद्रक्रुधः रुद्रकृतशापपरित्यागसमुद्भवात्कोपाद्धेतोः तस्य रुद्रस्यारिः कामः तस्य बुद्ध्या अयं काम एवेति बुद्ध्या नले विषये वासस्य स्वयंवरेण स्थितेरर्थितामभिलाषुकत्वमधृत दधार । नले स[...]भिलाषा जातेति भावः । स्वशत्रुसमाश्रयणं च युक्तम् । केव—काञ्चनकेतकीव । किंभूता सा [...] केतकी च—उत्कण्टका उदितरोमाञ्चा ऊर्ध्वीभूतसूच्यग्रा च । तथा—विलस[...]न्ती शोभमाना नीलपीतादिभिर्वर्णैरुज्ज्वला प्रकाशमाना, उज्ज्वलेन शृङ्गारेण वा प्रकाशमानो [...] विलोकनानां शृङ्गारो यया एवंभूता वा, कस्तूर्यादिरचिता कपोलवक्षोजादौ पत्रराजिः पत्रव[...] पत्रपङ्क्तिर्यस्याः । शोभमानोज्ज्वलवर्णपङ्क्तिश्च यस्याः । तथा—आमोदं विलेपनजं सुरभिगन्धं [...] हर्षं वा, स्वाभाविकं परिमलं च भजतीति भाक् । तथा—अपगतोऽनुरागो यस्याः एवंभूता न [...] भवति अतितरामनपरागतरा । नयेऽतितरामनुरागिणी । न विद्यते परागः पुष्परजो यस्याम् [...] एवंविधा न भवति । नितरामनपरागा अनपरागतरा । अतितरां परागसहिता । तथा—अतितरां गौरी गौरवर्णा उभय्यपि । गौरीं पार्वतीमतिक्रान्ता वा भैमी । सुवर्णकेतकी यथा रुद्रकोपस्य वसत्यभिलाषुकत्वं दधार तस्य स्थानं बभूव [...] । तथा भैम्यपि नलविषये नलवैरिकामबुद्ध्या नलशत्रुः काम एव नलसंबन्धित्वेन मां पीडयतीति धिया रुद्रकोपस्यात्मनि यो वासस्तदर्थितां दधार रुद्रकोपस्य स्थानं जाता । नितरां रुद्रकोपा जातेत्यर्थः । कामसाम्यं नलस्योक्तम् । नलेन कटाक्षवीक्षणे कृते साऽतितरां रुद्रपीडिता जातेति भाव इति वा । गौरीमतिक्रान्तेति तत्पुरुषे 'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्व-

यदान्ध्यमदर्शनं तेन वन्ध्यानिष्फलानकृत । भैमीद्वितीयकटाक्षवीक्षणेनैव अतितृप्तः अत एव विवशः सन् तस्याः तृतीयादिकटाक्षनिरीक्षणानि न ददर्शेति भावः । अन्योऽपि तुष्टः कश्चित्सर्वस्वं ददाति प्रियं चातिथिं प्राप्यानन्दबाष्पाम्बुपूर्णो भवति ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
तस्य द्वादश एष मातृचरणाम्भोजालिमौलेर्महा-
काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥ १२ ॥

श्रीहर्षमिति ॥ माता वागीश्वरी जननी च तस्याश्चरणौ एवाम्भोजे तयोरलिर्भ्रमररूपो मौलिर्यस्य । यद्वा—मातृचरणसंबन्धिनी पूजार्थं चरणयोरुपढौकिता अम्भोजालिः कमलमाला तद्युक्तो मौलिर्यस्य । वागीश्वर्या जनन्या वा प्रसादरूपेण धृतनिर्माल्यकमलत्वेत्यर्थः । द्वादशानां पूरणः सर्गः व्यगलत्समाप्तः ॥

इति श्रीवेदरकरोपनामकश्रीनरसिंहपण्डितात्मजनारायणकृते
नैषधीयप्रकाशे द्वादशः सर्गः ॥

त्रयोदशः सर्गः ।

इदानीमिन्द्रादिपञ्चनलीसंज्ञं त्रयोदशं सर्गमारभते—

**कल्पद्रुमान्परिमला इव भृङ्गमालामात्माश्रयामखिलनिन्दनशाखिवृन्दात् ।
तां राजकादपगमय्य विमानधुर्या निन्युर्नलाकृतिधरानथ पञ्चवीरान् ॥ १ ॥**

कल्पद्रुमेति ॥ अथ विमानधुर्याः शिबिकावाहिनः तां भैमीं राजकाद्राजसमूहादपगमय्य निवर्त्य नलाकृतिधरान्नलवेषधारिणः पञ्च वीरान्नलसहितानिन्द्रादीन्निन्युः प्रापयामासुः । शिबिकावाहिनां तेषु पञ्चसु नलोऽस्ति न वेत्यपरिज्ञानान्नलस्यापि नलरूपधारकत्वं घटते । यस्य यद्रूपं तद्धारित्वं तस्यापि युक्तमेवेति कव्यपेक्षयापि युज्यते । वीरपदेन शौर्यं नायकगुणः । के कस्मात्कां कानिव—परिमला मनोहरगन्धा अखिलाः समस्ता नन्दनशाखिनो देवोद्यानतरवः तेषां वृन्दादात्माश्रयां परिमलाश्रितां भृङ्गमालां भ्रमरपङ्क्तिं परावर्त्य अतिशयात्कल्पद्रुमानिव । कल्पद्रुमा नन्दनस्थितवृक्षापेक्षयाधिकाः, तथान्यराजापेक्षया तेऽपीत्यर्थः । सर्वानिन्द्रपपूरकत्वसाम्यान्मन्दारादिष्वपि चतुर्षु कल्पद्रुमशब्दप्रयोगः । भैम्याप्यात्माश्रया[1] विमाने स्थितत्वात् । नयतिर्द्विकर्मा ॥

**साक्षात्कृताखिलजगज्जनताचरित्रा तत्राधिनाथमधिकृत्य दिवस्तथा सा ।
ऊचे यथा स च शचीपतिरभ्यधायि प्राकाशि तस्य न च नैषधकायमाया ॥ २ ॥**

---

१ 'आत्माश्रयात्' इति लिखितपाठः ।

एकादश रुद्रास्तेषां गणः समूहः हरसंबन्धिनो वा ये गणा नन्दिप्रभृतयः, तान्सर्वा
हरन्ति आत्मना सह नयन्ति । तत्सहिता इति यावत् । एवंविधाः पयोधरा मेघाः । हरस्य
पत्यं हारिः स्कन्दो, गणपतिः, मेघश्चेति वा । तेषामङ्कचुम्बी स्वामित्वान्मध्यवर्ती यः इन्द्रः
शुभ्रांशुहारगणान्हरति आत्मना सह नयति एवंशीलः, पयोधराङ्कचुम्बी च एवंविधो वा
इन्द्रस्तस्य चापं तेन खचिता संबद्धा द्युमणिप्रभा सूर्यशोभा यासु ताभिः । शुभ्रांश्वादिभि
शक्रधनुर्व्याप्तेन सूर्येण च भान्ति ताभिर्वा । तथा—बहुः प्रचुरो लाभो धनादिप्राप्तिर्येषु ते
रणेष्वर्चिताभिः पूजिताभिः । दैत्यजयाद्बहुला आभा दीप्तिर्यासां ताश्च ता रणार्चिताश्चे
वा । मेघानामपि कामरूपत्वात्सैनिकत्वं युज्यते । चन्द्रादिभिः विशिष्टेन्द्रचापेन च
आकाशे चिता वृद्धिं प्रापिता सूर्यशोभा यास्विति वा । तैः कृत्वा वृद्धिं प्राप्ता वा चन्द्रादय
स्तेजस्विनः तत्तेजःसंबन्धेन सूर्यतेजः प्रचुरं यत्र जातमित्यर्थः ॥

नलपक्षे—एष नलः सभायां दण्डयात्रासु च चामरधारिणीभिरन्वास्यते सेव्यते । किंभू
ताभिः । शुभ्राः सिताः अंशवो यस्य तेन हारगणेन मुक्ताहारसमूहेन कृत्वा हारी सुन्दरः
पयोधराङ्कः स्तनमध्यः तच्चुम्बिनी तत्संबद्धा इन्द्रचापसंबद्धसूर्यप्रमेव प्रभा यासां ताभिः ।
चोऽप्यर्थः । यात्रास्वपीति योजना । हारमध्यमणीनामनेकवर्णत्वादिन्द्रचापसंबद्धसूर्यप्रभासा
म्यम् । तथा—अतएव बहुलानि प्रचुराणि आभरणानि तैरर्चिताभिरलंकृताभिः । प्राधान्या
द्धाराणां ग्रहणं, आभरणग्रहणं तद्व्यतिरिक्तालंकाराणां, अतो न पौनरुक्त्यम् । एतेन यथा
सभायां निर्भय आस्ते तथा संग्रामयात्रास्वपीति व्यज्यते । 'शुभ्र उद्दीप्तशुक्लयोः', 'द्युमणिस्त
णिर्मित्रः', 'समित्युधः' इत्यमरः । हरशब्दात् 'तस्येदम्' इत्यण् । हारि, ताच्छील्ये णिनिः ।
अपत्ये वा 'अत इञ्' । यद्वा—शुभ्रांशुहारगणेन हारिणः पयोधराः स्तना मेघास्तेषामङ्कः
पार्श्वप्रदेशस्तच्चुम्बी इन्द्रचापो नखपदविशेषः तेन संबद्धा दिव्यरत्नप्रभा यासां ताभिः ।
इन्द्रचापवदाकाशव्याप्ता दिव्यमणिप्रभा यासां ताभिरिति वा । चित्रमणिप्रभा[illegible]
शक्रधनुःसदृशा भवन्तीति बहुलैराभरणैर्भूषिताभिरित्यर्थः । 'लच दीप्तिसंवरणयोः' ॥

क्षोणीभृतामतुलकर्कशविग्रहाणामुद्दामदर्पहरिकुञ्जरकोटिभाजाम् ।
पक्षच्छिदामयमुदग्रबलो विधाय मग्नं विपज्जलनिधौ जगदुज्जहार ॥ ५ ॥

क्षोणीति ॥ अयं क्षोणीभृतां पर्वतानां पक्षच्छिदां विधाय कृत्वा विपज्जलनिधा[illegible]
[illegible]द्रे मग्नं जगदुज्जहार उदकर्षेदित्यर्थः । पर्वतपक्षच्छेदनाद्विपद्रहितं कृत्वा[illegible]
[illegible]णाम्—अतुला अतुल्याः कर्कशाश्च विग्रहा देहा येषाम् । तथा—उद्दामदर्पा[illegible]
[illegible]नां हरिकुञ्जराणां सिंहहस्तिनां कोटिं भजताम् । एकस्मिन्प्रदेशेऽनेक[illegible]
[illegible]त्यर्थः । किंभूतोऽयम्—बलाद्दिलादुदग्र उदग्रबलः । [illegible]
[illegible] यस्य सः ॥

नलपक्षे—अतुलानसुखान्सलक्षणांश्च कर्कशेतास्वान् [illegible] मारयन्ति [illegible]
[illegible] वा येषाम् । तथा—उद्दामदर्पा हरयोऽश्वा गजाश्च तेषा [illegible]

[illegible] । [illegible] । २ [illegible] '[illegible]' [illegible]
पाठः ।

वैरिनृपाणां पक्षच्छिदां सहायच्छेदं कुलिच्छेदं वा कृत्वा उदग्रं बलं पौरुषं सैन्यं वा यस्य स्वयं नलो वैरिकृतापत्सनुदे नमं जगदुज्जहार । वैरिणो हत्वा विपद्रहितमकरोदित्यर्थः ॥

भूमीभृतः समिति जिष्णुमपव्यपायं जानीहि न त्वमघवन्तममुं कथंचित् ।
गुप्तं घटप्रतिभटस्तनि बाहुनेत्रं नालोकसेऽतिशयमद्भुतमेतदीयम् ॥ ६ ॥

भूमीभृत इति ॥ हे घटस्य प्रतिभटौ सादृशौ स्तनौ यस्याः तत्संबुद्धिः भैमि, त्वं समिति संग्रामे भूमीभृतः पर्वतान् जिष्णुं जेतारम् । तथा—न विद्यते पर्वैर्जस्यापायो नाशो यस्य तममुं अनघवन्तममिन्द्रं न तु नैव जानीहि । अपि तु इन्द्र एवायम् । इन्द्रस्य सहस्रनेत्रत्वानायं तथेत्यत आह—त्वं एतदीयं शयं पाणिमतिक्रान्तं प्रस्तुतादपि दीर्घमत एवाद्भुतमाश्चर्यकारि कथंचिद्गुप्तं नलरूपधारणादाच्छादितं बहुनेत्रस्य भावो बाहुनेत्रं न आलोकसे न पश्यसि । गुप्तत्वात्, न त्वविद्यमानत्वादित्यर्थः । शयादतिक्रान्तम् । हस्ततलयोर्नेत्राणि न सन्तीत्यर्थः इति वा । बहुनेत्रसमूहं वा । बहुनेत्रसंबन्धिनमेतदीयमद्भुतमतिशयमुत्कर्षं वा आश्चर्यमिति वा ॥

नलपक्षे—त्वं अमुं अघवन्तं सपापं न जानीहि पुण्यश्लोकत्वात् । रणे राज्ञो जेतारम् । तथा—अपगतो विशिष्टोऽपायो यस्मात्तं, अपगतो व्यपायः पलायनं यस्य । अपलायनमानमित्यर्थः । एतदीयमतिशयमपरिमितहस्तपरिमाणमाश्चर्यरूपं प्रावरणवशाद्बाहौ हस्ते स्थितं नेत्रं चीनांशुकं गुप्तं यथा तथा द्रव्यान्तरविलोकनव्याजेन न आलोकसे । अपि तु आलोकयेत्यर्थः । बाहू च नेत्रे च बाहुनेत्रं शयमतिक्रान्तम् । बाहू हस्तपरिमाणाधिकपरिमाणौ, नेत्रे च प्रस्तुतादभ्यधिके इत्यर्थः । तद्गुप्तं यथा तथा नालोकते । अपि त्वालोकयेति वा । अतिशयं बाहुनेत्रम् । बाहू अतिशयितौ वदान्यौ शयौ यदोस्तावतिशयौ । नेत्रे च शयमतिक्रान्ते । अतिशयौ च अतिशये चेति नपुंसकैकशेषेण वा व्याख्येयम् । एतदीयं गुप्तमनेन पालितम् । बहवश्च ते नेतारश्च बहूनां वा नेतारस्तेषां समूहम् । अतिशयितः शयो हस्तो यस्य । लक्षणया वदान्यमुत्कृष्टमालोकय । शूरा वदान्या अप्यनेन पोषिता इत्युत्कृष्टत्वं व्यज्यते । 'कुलिशं भिदुरं पविः' इत्यमरः । 'नेत्रं मथिगुणे वस्त्रे' इति । जिष्णु, 'ग्लाजिस्थश्च ग्स्नुः' इति ताच्छील्ये ग्स्नुः । तद्योगे भूमीभृत इति, 'न लोका—' इति षष्ठीनिषेधाद्द्वितीया । बहुनेत्रशब्दात्क्रतुवत्समूहसंबन्धेऽप्यण् । पक्षे प्राण्यङ्गत्वादेकवद्भावः ॥

लेखा नितम्बिनि बलादिसमृद्धराज्यप्राज्योपभोगपिशुना दधते सरागम् ।
एतस्य पाणिचरणं तदनेन पत्या सार्धं शचीव हरिणा मुदमुद्वहस्व ॥ ७ ॥

लेखा इति ॥ हे नितम्बिनि अतिपृथुनिबिडनितम्बे भैमि, बलदैत्यमनुविद्धानां समृद्धं संपूर्णं राज्यमायत्तस्य प्राज्यो बहुरुपभोगस्तस्य पिशुनास्तदुद्बहमाना लेखा देवा एतस्येन्द्रस्य पाणी च चरणौ च पाणिचरणं सरागं सानुरागं यथा तथा दधते धारयन्ति । हस्तदानमाणिम् नमस्कारार्थं च चरणावित्यर्थः । तत्तस्मात् अनेन हरिणा इन्द्रेण पत्या सार्धं शचीव मुदमुद्वहस्व धारयस्व ॥

नलपक्षे—चरणमरणं एतस्य पाणिचरणं कर्तृ ऐन्द्रस्यान्यमासारेमिः पक्षिभेन वा बलेन समृद्धस्य राज्यस्य प्राज्य उपभोगस्तस्य पिशुनाः सूचकाः सामुद्रिकोक्तलक्षणभूताः चक्रध्वजादि-

लेखाः कर्मभूताः दधते धारयति । 'दध धारणे' एकवचनान्तमस्मिन्पक्षे रूपम् । तत्सा नेन पत्या नलेन सह हर्षं धारयस्व । केन केव—हरिणा इन्द्रेण शची इव । 'लेखा अदितिन्दनाः', 'पिशुनौ खलसूचकौ' इत्यमरः । नितम्बशब्दादतिशयार्थादिनिः । पाणिनखम्, प्राण्यङ्गत्वादेकवद्भावे षण्ढत्वम् ॥

आकर्ण्य तुल्यमखिलां सुदती लगन्तीमाखण्डलेऽपि च नलेऽपि च वाचमेताम् ।
रूपं समानमुभयत्र विगाहमाना श्रोत्रान्न निर्णयमवापदसौ न नेत्रात् ॥ ८॥

आकर्ण्येति ॥ असौ सुदती भैमी एतां पूर्वोक्तामखिलां वाचमाखण्डलेऽपि च नलेऽपि च तुल्यं लगन्तीं समानसंबन्धामाकर्ण्य उभयत्र नले इन्द्रे च समानं रूपमैक्यरूपं न विगाहमाना जानती विशेषावलोकनादपि विशेषमनुपलभमाना यथाक्रमं श्रोत्राच्छ्रवणेन्द्रियात् नेत्राच्चक्षुरिन्द्रियाच्च निर्णयं नावापन्न प्राप । अनयेन्द्रः स्तुतः किं वा नलः, तयोः सरूपत्वादयमिन्द्रो नलो वेति नाज्ञासीदित्यर्थः । अपि चेति निपातसमुदायौ परस्परसमुदायवाचकौ । अवापत्, लृदित्त्वादङ् ॥

शक्रः किमेष निषधाधिपतिः स वेति दोलायमानमनसं परिभाव्य भैमीम् ।
निर्दिश्य तत्र पवनस्य सखायमस्यां भूयोऽसृजद्भगवती वचसः स्रजं सा ॥ ९॥

शक्र इति ॥ सा भगवती सरस्वती भूयः पुनरपि वचसः स्रजं वाङ्मालामसृजत् । किं कृत्वा—तत्र तेषु मध्येऽस्यां भैमीसमीपे पवनस्य सखायमग्निं निर्दिश्योद्दिश्य । पुनः किं कृत्वा—भैमीमिति दोलायमानं मनो यस्यास्तां परिभाव्य संचिन्त्य । इति किम्—एष शक्रः, स दूरदृष्टः निषधाधिपतिः नलो वेति । दोला इवाचरति, 'कर्तुः क्यङ् सलोपश्च' इति क्यङि शानचि दोलायमानमिति । अस्यां सामीपिक आधारः ॥

एष प्रतापनिधिरुद्गतिमान्सदाऽयं किं नाम नार्जितमनेन धनंजयेन ।
हेम प्रभूतमधिगच्छ शुचेरमुष्मान्नास्त्येव कस्यचन भास्वररूपसंपत् ॥ १०॥

एष इति ॥ हे भैमि, एष प्रतापस्य निधिः प्रकृष्टोष्णस्पर्शस्थानम् । तथा—अयं सदा उद्गतिमानूर्ध्वगमनयुक्तः । ऊर्ध्वज्वलनोऽयमित्यर्थः । धनंजयेन वह्निनानेन किं नाम वस्तु नार्जितं न प्राप्तम् । 'अग्निर्वैश्वानरो वह्निः—' इत्यादिकं नाम निर्वचनयोगात् प्राप्तमित्यर्थः । नाम्नां निर्वचनमस्त्येव । नाम संभावनायाम् । आग्निनाऽनेन किं नाम वस्तु न प्राप्तम् । सर्वेषां परमाणूनां सर्वत्राविरलत्वेन विद्यमानत्वादिति वा । अनेन धनंजयशब्देन कृत्वा नाम किं न अर्जितमिति वा । धनंजयत्वादेव शुचेरग्नितादमुष्मादग्नेः प्रभूतं हेम सुवर्णमधिगच्छ प्राप्नुहि, 'धनमिच्छेद्धुताशनात्' इत्युक्तेः । 'अग्नेः प्रजातं परि यद्धिरण्यम्' इति श्रुतेरग्नेः स्वासुवर्णमुत्पन्नम् । अस्येवाग्नेरिव कस्यचन कस्यापि भास्वरा देदीप्यमाना रूपसंपत् । तेजोमात्रविवक्षया । तेजोव्यतिरिक्तस्य कस्यचन शुक्लं भास्वरं रूपं न दृष्टमित्यर्थः ॥

नलपक्षे ॥ एष नलः प्रतापतेजःस्थानम् । तथा—सदा उदयवान् । तथा अनेन जेत्रा कृत्वा किं नाम धनं नार्जितम् । वैरिणो विजित्य धनमर्जितम् । यद्वा अयं कुमारो जेतृत्वादिति वा । शुचेः स्वधनीपार्जितद्रव्यादमुष्मात्प्रचुरं सुवर्णं प्राप्नुहि । शुचेः ... दिति वा । अस्य नलस्येव भास्वरा कान्तिसमृद्धिः कस्यापि अन्यस्य नास्ति । ... ॥

मसौ गण्यत इत्यर्थः। पुण्यश्लोकत्वादेष मुखे यस्मात्तादृशी इति वा। अस्य समतः मध्य-वर्तिनोऽपि इन्द्रादप्यधिकं माध्यस्थ्यं पक्षपातरहितत्वम्। शत्रुमित्रयोस्तुल्यो दण्ड इत्यर्थः। तसेः सार्वविभक्तिकत्वात्। लोकपालांशत्वादिन्द्रयमयोरेतन्मध्यवर्तित्वमिति केचित्। तेनानेन नमेनं प्राप्नुहि। येनानेन सदा सर्वदा हस्तशोभा अतिशयेनारुणा रक्ता धार्यते। तिमिं शोभनं पतिमेनं मह पूजय। तथा-एनमुपेहि एतत्समीपं गच्छेति वा। महस्विनमुत्सवकर्तारं वा। विश्वप्रकाशे सकारान्तस्य महःशब्दस्य पाठात्। 'मुखं मुख्ये च वक्त्रे स्यात्' इत्यजयपालः। पिता मुखं यस्या इति समासः। मुखेनैव मुखस्य सादृश्यात्पितृमुखमिव मुखं यस्या इत्यत्र पर्यवस्यति ॥

नैवाल्पमेधसि पटो रुचिमत्त्वमस्य मध्येसमिन्निवसतो रिपवस्तृणानि।
उत्थानवानिह पराभवितुं तरस्वी शक्यः पुनर्भवति केन विरोधिनायम्॥१२॥

नैवेति ॥ एधसि काष्ठे पटोर्जाज्वल्यमानस्याग्नेः रुचिमत्त्वं दीप्तियुक्तत्वमलं नैव। किंतु वह्नित्यर्थः। जाज्वल्यमानस्यास्य इन्धने दीप्तिमत्त्वमलं नैव। तत्संबन्धादधिकं दीप्तिमत्त्वं भवतीत्यर्थ इति वा। तथा-मध्येसमित् समिधां काष्ठानां मध्ये निवसतो [illegible] तृणानि शत्रवः। रिपुनाशो यथा वेगेन क्रियते, तथा समृद्धेनानेन क्षणमात्रेण तृणानि दह्यन्त इत्यर्थः। प्रादेशमात्राणां पलाशशम्यादिकाष्ठानां मध्ये इति वा। इह लोके [illegible] न्मध्ये वोत्थानवानूर्ध्वज्वलनवान् तरस्वी वेगवानयं विरोधिना केनोदकेन पुनः पराभवितुं शक्यो भवति। तेनैव शान्तिर्नान्येनेत्यर्थः। जय्यो भवति। अपि तु वेगेनोत्थितस्य [illegible] वारिणापि शान्तिः कर्तुमशक्येत्यर्थ इति वा ॥

नलपक्षे-पटोः ग्रहणधारणादिसमर्थस्यास्य अल्पमेधसि मन्दप्रज्ञे रुचिमत्त्वं प्रीतियुक्तत्वं नैव। अयोग्यत्वात्तस्येत्यर्थः। तथा-समिन्मध्ये सङ्ग्राममध्ये निवसतोऽस्य वैरिणस्तृणानि। अकिंचित्करा इत्यर्थः। इह रणे भूलोके वा तरस्वी उत्थानवान्वेगवान्बलवान्वा [illegible] पुना रिपुणा जेतुं शक्यः। अपि तु न केनापि। कस्याप्यजय्योऽयमित्यर्थः। [illegible] दयः। एतत्सदृशोऽप्युदयी बलवांश्च नास्तीत्यर्थः। भवतीति संबोधनं वा। [illegible] च', 'इध्ममेधः समित्' इत्यमरः। अल्पमेधसि 'नित्यमसिच्' इत्यत्र नित्यग्रहणा[illegible] दपि भवतीति वृत्तिकारोक्तेः प्रयोगानुसारेणासिच्। मध्येसमित्, 'पारेमध्ये षष्ठ्या वा' इति [illegible] व्ययीभावे निपातनादेत्वम्। 'अयः' इति वैकल्पिकत्वादनभावः। पराभवितुं, '[illegible]' इत्यक्रियार्थत्वेऽपि शक्योगे तुमुन् ॥

साधारणीं गिरमुदर्बुधनैषधाभ्यामेतां निपीय न विशेषमवापदेषा।
ऊचे नलोऽयमिति तं प्रति चित्तमेकं मूते स चान्यदनलोऽयमिति [illegible]॥

साधारणीमिति ॥ उदर्बुधनैषधाभ्यामग्निनलाभ्यां साधारणीं समानां [illegible] [illegible] इदमेवानयोः संबन्धि [illegible] विशेषं तारतम्यं नावापदेषा [illegible] [illegible] एकं चित्तं मनः अयं नल इत्यूचे। अन्यदपरं चित्तं अयमनल इति [illegible] [illegible] इति [illegible]। [illegible] [illegible]। पक्षे-[illegible]

क नल इति प्रत्युक्ते। अकारप्रश्लेषेणानलोऽयमेवेति ब्रवीति स नलः। तथा—अयमन्या-न्वैरिणो याति अवखण्डयतीत्यन्यदः स चासौ नलश्च अन्यदनल इति ब्रूते स। अत्र व्याख्याने अपनभङ्गोऽपि न भवति। एकस्य द्वैरूप्याद्विरोधाभावश्च। 'शोचिष्केश उषर्बुधः' इत्यमरः। उषसि बुध्यते इति उषर्बुधः। 'इगुपध-' इति कः। 'अहरादीनाम्-' इति रेफः। 'तुल्यार्थैः-' इति तृतीया। 'अन्यद-' इति पक्षे कः। समानं धारणमस्य साधारणम्। अनेकं प्रत्यविशिष्टत्वम्। पृषोदरादिः। ततः स्त्रियां 'पादार्घाभ्यां च' इत्यत्र 'आग्नीध्रसाधारणादञ्' इति वक्तव्यादञि ङीप्। तत्प्रकरणाच्च साधारणभूमिरित्याद्यपि घटते। इदमीयम्, त्यदादित्वात् 'वृद्धाच्छः'॥

एतादृशीमथ विलोक्य सरस्वती तां संदेहचित्रभयचित्रितचित्तवृत्तिम्।
देवस्य सूनुमरविन्दविकासिरश्मेरुद्दिश्य दिक्पतिमुदीरयितुं प्रचक्रे ॥ १५ ॥

एतादृशीमिति ॥ अथ सरस्वती अरविन्दविकासिनः कमलविकासकरा रश्मयः किरणा यस्य देवस्य रवेर्दिक्पतिं दक्षिणदिशः पतिं सूनुं अन्येषां पुत्राणां दिक्पतित्वाभावाद्यममुद्दिश्य उदीरयितुं वक्तुं प्रचक्रे आरेभे। किं कृत्वा—एतादृशीमुक्तसंशयास्पदीभूताम्। तथा—नल-निश्चयाभावात्संदेहः, तुल्यरूपदर्शनादेव्युक्तिवैचित्र्याद्वा चित्रम्, नलनिश्चयाभावादप्राप्ति-निमित्तत्रासः तैः संशयाश्चर्यत्रासैः चित्रिता नानाविधा कृता चित्तवृत्तिर्यस्याः सा एवंविधां तां भैमीं विलोक्य। 'चित्तभित्तिम्' इति पाठे चित्तमेव भित्तिर्यस्याः। भित्तौ हि चित्रं कुरुते-त्यर्थः। एषेव दृश्यत इति, 'त्यदादिषु दृशः-' इति कञि 'आ सर्वनाम्नः' इत्यात्वे 'टिड्ढा-' इति ङीपि एतादृशी॥

दण्डं बिभर्त्ययमहो जगतस्ततः स्यात्कम्पाकुलस्य सकलस्य न पङ्कपातः।
स्वर्वैद्ययोरपि मदव्ययदायिनीभिरेतस्य रुग्भिरमरः किमु कश्चिदस्ति ॥ १६ ॥

दण्डमिति ॥ अहो संबोधने, अयं यमो दण्डं स्वायुधं बिभर्ति। ततस्तस्माद्धेतोः पुरु-षादिदर्शनेन कम्पाकुलस्य पापभीरोः सकलस्य जगतो भुवनस्य पङ्कपातः पङ्के पातो बुडनं न स्याद्भवेत्। पङ्के महारौरवादौ नरके वा। एतद्भयात्पापं कोऽपि न करोतीत्यर्थः। अहो आश्च-र्यम्। अन्यो यष्टिं धारयति अन्यस्य च कम्पमानस्य कर्दमपातो न भवतीत्यसंगतेः। तथा —चिकित्सासमर्थयोः स्वर्वैद्ययोर्दस्रयोरपि मदव्ययदायिनीभिः गर्वक्षयं कुर्वाणाभिः एतस्य रुग्भिः प्राणिकर्मविपाकदर्शनेनानेन प्रेरिताभिः पीडाभिः न म्रियत इत्यमरः कश्चित्किमस्ति। अपितु न कोऽप्यस्ति। कर्मजरोगाणां वान्यानन्यचिकित्स्यत्वादित्यर्थः। स्वर्वैद्ययोरिति नाम-रोगापनयनसामर्थ्यसंभावनाख्यापनार्थम् ॥

नलपक्षे—अयं नलो दण्डं शासनं यतो बिभर्ति ततस्तत्कम्पाकुलस्य सकलस्यापि लोकस्य एनःपातो न भवेत्तद्दण्डभयात्। अयं दण्डं चतुरङ्गसैन्यं बिभर्ति ततः शत्रुभयात्कम्पा-कुलस्य लोकस्य दुःखपातो न भवेत्। सैन्येनैव वैरिणां निरस्तत्वाल्लोकस्य दुःखभाव इति वा। सौन्दर्येण प्रसिद्धयोर्दस्रयोरपि गर्वक्षयकारिणीभिरेतस्य रुग्भिः कमकान्तिभिरदृष्टितो देवोऽपि कश्चिदस्ति किमु। अपितु नास्ति। देवेषु मध्ये दस्रावेव सुन्दरतमौ ताभ्यामेव जितौ यतः। ये विवस्वतोऽपत्ये रूपवन्तः ते एतद्रूपदर्शनादेव, न तु अन्यथेत्यर्थः। 'दण्डोऽस्त्री शासदण्डयोः', 'अस्त्री पङ्कं पुमान्पाप्मा', 'रुग्रुजा', 'रुक् भासि' इति अमरः। रुचिभीभिरिति दन्त्यान्ते भिन्नैः ॥

जनिताः पीडा इति यावत् । तानर्दयद्भिरिषु प्रयोक्तुरस्य कृष्णत्वमर्जुनत्वम् । बाणयुद्धप्रवीणार्जुनतुल्योऽयमित्यर्थः इति वा । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः', 'को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च', 'शक्तिर्बले प्रभावादौ शक्तिप्रहरणान्तरे' इत्यादि विश्वः ॥

एकः प्रभावमयमेति परेतराजौ तज्जीवितेशधियमत्र निधत्स्व मुग्धे ।
भूतेषु यस्य खलु भूरियमस्य वश्यभावं समाश्रयति दस्रसहोदरस्य ॥ १९ ॥

एक इति ॥ अयं एकः परेताः प्रेतास्तेषां राजौ पङ्क्तौ विषये प्रभावं सामर्थ्यं एति ततस्त्वात् अत्रास्मिञ्जीवितेशधियमन्तकबुद्धिं कुरु । हे मुग्धे, उभयोर्भेदमजानाने संज्ञागर्भजातत्वाद्दस्रसहोदरस्याश्विभ्रातुः यस्य यमस्य भूतेषु भूरि प्रचुरं भूतं वश्यभावमधीनत्वं समाश्रयति प्राप्नोति । प्राणिषु मध्ये प्रचुरं भूतं यस्य यमस्य वशि वशवर्ति सत् अभावं विनाशमेवाश्रयतीति वा । मुमुक्षवः कतिपये, तदपेक्षया भूतानां प्राचुर्यम् । खलु निश्चये । सर्वप्राणिनाश एतदधीन इति निश्चयेनायमन्तक इति किं न जानासीत्यर्थः ॥

नलपक्षे—पराश्च इतरे आत्मीयाश्च तेषामाजिः । पराञ्श्रेष्ठांस्तेजस्विनोऽपि इतरयन्ति क्षोदीयसः कुर्वन्ति ये तेषामाजिरिति वा । परा उत्कृष्टा या इतरेषां वैरिणामाजिरिति वा । तस्यां अयं नल एक एव प्रभावमेति । तथा—भूतेषु पृथिव्यप्तेजोवाय्वाकाशेषु मध्ये इयमखिलमनियमेन सकला भूः सौन्दर्येण दस्रसहोदरस्याश्वितुल्यस्य यस्यास्य वश्यत्वमाश्रयति । ततस्त्वमस्मिन्मुग्धे सुन्दरि, अस्मिन्प्राणेशबुद्धिं निधेहि । तथा—समा सश्रीका त्वं यस्य एतद्वरणे प्रयत्नं कुरु । एवंविधः शूरः प्रभुशक्तियुक्तः सुन्दरश्च कोऽपि नास्तीत्यनेनैव वृणीष्वेति भावः । इतरशब्दात्पक्षे 'तत्करोति—' इति णिचि पचाद्यचि णिलोपः ॥

गुम्फो गिरां शमननैषधयोः समानः शङ्कामनेकनलदर्शनजातशङ्के ।
चित्ते विदर्भवसुधाधिपतेः सुताया यन्निर्ममे खलु तदेष पिपेष पिष्टम् ॥२०॥

गुम्फ इति ॥ शमननैषधयोर्यमनलयोर्विषये समानस्तुल्यः पूर्वोक्तो गिरां गुम्फो देव्या वाणीसंदर्भः विदर्भवसुधाधिपतेः सुताया भैम्याश्चित्ते यच्छङ्कां संशयं निर्ममे तत्खलु निश्चितं एष पिष्टं पिपेष । चूर्णमेव चूर्णितवानिति दृष्टान्त इत्यर्थः । चूर्णचूर्णनं यथा वृथा तथेदमपीत्यर्थः । किंभूते चित्ते—अनेकेषां नलानां दर्शनेन जातशङ्के उद्भूतसंशये । 'गुम्फः स्याद्गुम्फने' इति विश्वः ॥

तत्रापि तत्रभवती भृशसंशयालोरालोक्य सा विधिनिषेधनिवृत्तिमस्याः ।
पाथःपतिं प्रति धृताभिमुखाङ्गुलीकपाणिः क्रमोचितमुपाक्रमताभिधातुम् २१

तत्रेति ॥ तत्रभवती पूज्या सा भगवती सरस्वती क्रमोचितं क्रमप्राप्तं, परिपाटीयोग्यं यथा तथा वा, अभिधातुं वक्तुमुपाक्रमत । किं कृत्वा—तत्र यत्नेऽपि भृशमत्यर्थं संशयालोः संदिहानाया अस्या भैम्या विधिनिषेधाभ्यां सकाशान्निवृत्तिं प्रवृत्तिनिवृत्त्योरभावमालोक्य । किंभूता—पाथसां पयसां पतिं प्रभुं वरुणं प्रति धृतोऽवस्थापितोऽभिमुखाङ्गुलीकः संमुखतर्जनीकः पाणिर्यया । तत्रभवच्छब्दः पूजार्थः । अङ्गुलीक इति, 'नद्यृतश्च' इति कप् । उपाक्रमत, 'प्रोपाभ्याम्—' इति तङ् । अभिधातुं, क्रमयोगे 'शकधृष—' इति तुमुन् ॥

---

२ 'अत्र तावच्छङ्कोत्पादे निष्पेषणवाक्यार्थयोरैक्यारोपेण सादृश्याक्षेपादसंभवद्वस्तुसंबन्धो वाक्यार्थवृत्तिनिदर्शनालंकारः' इति जीवातुः ।

या सर्वतोमुखतया व्यवतिष्ठमाना यादोरणैर्जयति नैकविदारका या।
एतस्य भूरितरवारिनिधिश्चमूः सा यस्याः प्रतीतिविषयः परतो न रोधः॥२२॥

येति ॥ एतस्य वरुणस्य भूरितरा वारिनिधयः समुद्रा यस्यां सा चमूर्जयति सर्वोत्कर्षेण वर्तते । सा का—यस्याः परतो रोधः परं तीरं प्रतीतिविषयो दृग्गोचरो न । सेनायां समुद्राणामपि मिलितत्वात्परं पारं न दृश्यत इत्यर्थः । सा का—या सर्वतोमुखस्य जलस्य भावेन व्यवतिष्ठमाना व्यवस्थिता । जलमयीत्यर्थः । या यादोरणैर्जलजन्तुशब्दैस्तत्सङ्ग्रामैर्वा उपलक्षिता । तथा—या नैकविदारका अनेककूपका । नैकान्विदारयति नैकविदारः कस्य उदकस्य आय आगमनं यस्यां सा । स्ववेगेन सर्वनाशकरमुदकं यस्यामस्तीत्यर्थ इति वा । या नैकविदारं कं यस्यामेवंभूता वा । यस्याः परतो वैरिणोऽन्यस्माद्वा रोध आवरणं न ज्ञानगोचरः। निम्नाभिमुखस्य पयसः कस्यापि निवारयितुमशक्यत्वादिति वा । यस्याः परतः परप्रदेशात्प्रति संमुखमितिर्गमनं तस्य विषयो गोचरो नरो मनुष्य अधोऽधस्तादेव । प्रवाहवेगेनाधो गच्छतीति भाव इति वा ॥

नलपक्षे—एतस्य भूरीणां तरवारीणामेकधारयवनखड्गानां निधिः स्थानं सा चमूर्विजयते । या सर्वस्मादपि लोकात्सर्वसेनाभ्यो वा मुखतया श्रेष्ठतया व्यवतिष्ठते । मुखशब्दो लक्षणया श्रेष्ठवाचकः । सर्वतः सर्वदिक्षु मुखं यस्यास्तद्भावेन व्यवतिष्ठत इति वा । अनेकानेकदिग्व्यापित्वात्सेनायाः प्राचुर्यं सूच्यते । यादोरणैर्बाहुयुद्धैर्भुजास्फालनशब्दैर्वोपलक्षिता दोरणैर्जयतीति वा । या अदोरणैरमुष्य सङ्ग्रामैः सिंहनादैर्वा जयति । सेनाजयेनास्य व्यपदेशो न । किंतु स्वयमेवासौ युद्धं कुरुते । तेनोभयथा नलवर्णने तात्पर्यम् । तथा—नैके विदारका योद्धारो यस्यां सा, दोरणैः कृत्वा नैकविदारकः कायो यस्याः सेति वा । यस्याः परस्माच्छत्रोः सकाशाद्रोध आवरणं न ज्ञानगोचरः । केनापि रोद्धुं न शक्यत इत्यर्थः, परस्मात्प्रतीतिर्विषयः संमुखमागच्छन्नरो मनुष्यः अधो हीन एवेति वा । 'पुष्करं सर्वतोमुखम्', 'कूपकास्तु विदारकाः', 'कायो देहः', 'कूलं रोधश्च' इत्यमरः । व्यवतिष्ठमानेति, 'समवप्रविभ्यः स्थः' इति तङ् । अत्र ग्रन्थभूयस्त्वभयाद्व्याकरणं न लिख्यते ॥

नासीरसीमनि घनध्वनिरस्य भूयान्कुम्भीरवान्समकरः सहृदानवारिः।
उत्पद्मकाननसखः सुखमातनोति रत्नैरलंकरणभावमितैर्नदीनः॥२३॥

नासीरेति ॥ नदीनामिनः स्वामी समुद्रो नासीरसीमनि जलमयसेनामुखविभागे स्थितः सन् करणभावं साधकतमत्वमितैर्गतै रत्नैर्मुक्तादिभिः अलमतिशयेनास्य वरुणस्य सुखमानन्दमुत्पादयति । सुखजनने रत्नानि करणभूतानि । स्वामिनेऽस्मै रत्नानि दत्त्वा प्रीतिमुत्पादयतीत्यर्थः । करणे देहे भावं सत्त्वमितैः प्राप्तैः । स्वदेहोत्पन्नैरित्यर्थ इति वा । अलंकरणभूतत्वात् दणदेहस्थितैरिति वा । एवंविधै रत्नैरुपलक्षितो वा । अलंकरणभावमलंकरणत्वं गतैरत्नैः सुखमातनोतीति वा । किंभूतो नदीनः—घनध्वनिर्निबिडशब्दः । तथा—भूयान्प्रचुरः दीर्घपरिमाणत्वात्, बहुसंख्यत्वाद्वा । तथा—कुम्भीरा नक्रास्तद्वान् । (तथा-)मकरमत्स्यविशेषस्तद्युक्तः । तथा—सहृदानवारिः पुण्डरीकाद्ययुक्तः (तथा-) उत्पद्म... नार्थः । उद्गतानि विकसितानि पद्मानि येषु तानि काननानि तेषां सखा । तद्युक्त इत्यर्थः ।

उत्कटा पद्मा लक्ष्मीर्येषामेवंविधैः काननैर्युक्त इति वा । उत्कृष्ट पद्मा लक्ष्मीः स्वकन्या यस्मिन्स चासौ वनसखश्चेति वा । श्रीविष्णोस्तत्र विद्यमानत्वाल्लक्ष्मीयुक्तत्वम् । नालीरतीन-पदेन तीरं लक्ष्यते, तत्र निविडवनिरिति वा । जलस्य तीरे प्रतिघातात् ॥

नलपक्षे—भूयान्बहुतरः कुम्भी गजो नालीरमुखे सेनामुखविभागे मुखमनायासेन स्वा-च्छन्द्यान्विस्तारयति । किंभूतः कुम्भी—घनवल्गुनिर्घस्य । तथा—समः आनुपूर्व्या वृत्तः सलक्ष्मीको वा करः शुण्डादण्डो यस्य । तथा—दानवारिणा मदजलेन सहितः । तथा—उद्भूतानि पद्मकानि कुम्भस्थले पद्मबिन्दुजालकानि यस्मिन्नेवंविधं यदाननं मुखं तद्युक्तः । तथा—अलंकारत्वं प्राप्तैः रत्नैः दीनो न । किंतु संभृतः, 'सेनामुखं तु नालीरम्', 'नक्रस्तु कुम्भीरः', 'पद्मकं बिन्दुजालकम्' इत्यमरः ॥

सस्यन्दनैः प्रवहणैः प्रतिकूलपातं का वाहिनी न तनुते पुनरस्य नाम ।
तस्या विलासवति कर्कशताश्रिता या ब्रूमः कथं बहुतयालिकता वयं ताः २४

सेति ॥ हे विलासवति भैमि, नाम शिरश्चालने । अस्य वरुणस्य का नाम वाहिनी नदी सस्यन्दनैः सवेगैर्निर्झरोदकसहितैर्वा प्रवहणैः प्रवाहैः कृत्वा कूलं तीरं प्रत्यनुरातं गमनं न तनुते । अपितु सर्वापि तनोति । वयं तस्यास्ताः सिकता वालुका बहुतया प्रचुरत्वेन कथं केन प्रकारेण ब्रूमः कथयामः । अतिबहुत्वेनेयत्तया वक्तुं न शक्यत इत्यर्थः । ताः काः—याः कर्कशतां काठिन्यं श्रिताः । कर्को जलजन्तुविशेषः तच्छतैराश्रिता इति वा ॥

नलपक्षे—अस्य नलस्य का नाम वाहिनी सेना सस्यन्दनैः सरथैः प्रकृष्टैर्वाहनैरश्वादिभिः कृत्वा प्रतिकूला वैरिणस्तान्प्रति पातं गमनं न करोति । अपितु चतुर्विधापि सेना करोत्येव । प्रतिकूलानां वैरिणां पातं हननमिति वा । का सेना अस्य नाम ख्यातिं प्रतिकूलपातरूपां संपादि-यित्वा शत्रुनाशं कृत्वा न तनुते । सेनास्य ख्यातिं करोतीत्यर्थ इति वा । सन्नैः [illegible] कृत्वा वैरिणां प्रतिगमनं करोतीति वा । अनेन सेनाया निर्भयत्वं रणेऽपि [illegible]-णात् । कर्का: श्वेताश्वास्तेषां शतैराश्रितायास्तस्या बहुतया बाहुल्येन ताः भूयस्त्वेन प्रसिद्धा वालुका वयं किं ब्रूमः । ताभ्योऽपि सेना प्रचुरतरेत्यर्थः । तस्याः सकाशात्ता वालुका बहुतया किं ब्रूमः । वालुकाः कथमपि संख्यातुं शक्यन्ते, सा तु न कथंचिदित्यर्थ इति वा । अलिः प्रहरणमेषां ते आलिकास्तेषां भाव आलिकता । याः श्वेताश्वशताधिष्ठिताः आलिकताः अतिप्रहरणान्पुरुषानिति यावत् । तान्बहुतया किं वर्णयामः । अतिबहुत्वेन वक्तुं न शक्यन्त इत्यर्थः । बहून् तनन्ते गच्छन्ति ता रक्षन्ति वा ये ते बहुतयाः ते च ते आलिकाश्च तेषां नामानीति वा । 'कर्कोऽश्वः श्वेतवर्णः', 'सांयात्रिकः पोतवणिक्' इत्यमरः । 'पोतः वहित्रं प्रवहणम्' इति हलायुधः । प्रवहणैः, 'कृत्यल्युटो बहुलम्' इति ल्युट् । प्रतिकूलपातम्, पक्षे कर्मणि-घञ् 'मिश्रिते-'त्यादिना समासः । 'तुदिकारिणे-' इति करणे ल्युट् । अलिः प्रहरणमेषाम्, 'प्रहरणम्' इति ठक् । 'अस्त्यर्थे बहुलं...', 'तेन दीव्यति-' इति वा ठक् ॥

शोणं पद्मभविनं गुणनस्य पदं श्रियास्य सेवन्तैरत सरस्वती वा ।
एवं भवस्य स्तुमो भुवनाभिरामं किं वा भवन्ति [illegible] न २५

शोणमिति ॥ हे सुभगे सौभाग्यवति भैमि, त्वं एनं भुवनस्य जलस्याधिनाथमधि[illegible]
वरुणं भजस्व वृणीष्व । जलपतित्वमेवाह । त्वं गुणमप्रधानं सेवकं शोणं नाम नदम् अ[illegible]
पदप्रणयिनं चरणानुरागिणं पश्य । किंचेत्यधिकोक्तौ । शोणोऽस्य चरणप्रणयी इति किं [illegible]
व्यम् । सा प्रसिद्धा सरस्वती नदी अस्य सेवनपरैव चरणसंवाहनादिपरैव । पूर्वोक्त[illegible]
वाशब्दः । के कमलस्य जलस्य आशया आधाराः समुद्रादिपल्वलान्ताः पद्माकरा वा [illegible]
न भजन्ति सेवन्ते । अपि तु सर्वेऽपि क्षीरोदादयः । क्षीरोदादयः सर्वेऽपि यस्यानुना[illegible]
तस्य शोणाद्यनुचरत्वे का कथा । तस्मात्सलिलपतिरयमित्यर्थः । कमलाशया जलाभि[illegible]
के वा लोका इमं न सेवन्ते स्तुवन्तीत्यर्थो वा । शोणादीनां तत्तदभिमानिन्यो देवता [illegible]
अतस्तेषां सेवकत्वं युज्यते ॥

नलपक्षे—त्वं जगत्पतिमेनं नलं पतित्वेन स्वीकुरु । स्वीकारयोग्यत्वमेव [illegible]
शोणं रक्तं गुणमस्य पदप्रणयिनं पश्य । किंच अन्यच्च—सा सरस्वती वाग्देवता [illegible]
त्राध्ययनाध्यापनरूपा अस्य राज्ञो नलस्य सेवनपरैव चित्तमध्यस्थितैव । तमिमं [illegible]
संपद् आशयाभिलाषेण के वा लोका न सेवन्ते । अपितु—धनप्राप्त्यभिलाषेण [illegible]
सेवन्त इत्यर्थः । वा अप्यर्थे । कमलाशया लक्ष्मीनिधयो धनिका अपि [illegible]
भजन्ति, अपि तु भजन्त्येवेति वा । अत्र प्रथमद्वितीयतृतीयविशेषणैः क्रमेण सौन्दर्य[illegible]
कौशलौदार्याणि द्योत्यन्ते । 'शोणो हिरण्यवाहः स्यात्', 'शोणः कोकनदच्छविः', 'जीवनं भुवनं
वनम्', 'विष्टपं भुवनं जगत्', 'सलिलं कमलं जलम्', 'कमला श्रीः' इत्यमरः । आशये,
'अधिकरणे शेते' इत्यच् ॥

**यद्भालतातिमनेकनलावलम्बां वाणी नवर्धयतु तावदमेदिकेयम् ।
भीमोद्भवां प्रति नले च जलेश्वरे च तुल्यं तथापि यदवर्धयदस्य [illegible]**

घ्नन्ति प्रत्यर्थिदा अनाः प्राणा येषां ते अतिशूराः ते वशा अधीना यस्य तस्य [illegible]
तया कृत्वा कृता या चेष्टा तया शत्रुवशीकरणव्यापारेणेन्द्रबुद्धिं कस्य न करोति। [illegible]
सर्वस्यापि करोति। इन्द्रो यथा शत्रून्वशीकरोति तथायमपीति वा॥

इन्द्रपक्षे—अयं महेन्द्रः त्वया किं न विज्ञायते। अपितु—इन्द्रत्वेन निश्चेयः। [illegible]
—अतिशयित आजिः सङ्ग्रामो यस्य। तथा—लब्धो विजयेनार्जुनेन कृत्वा प्रसरो [illegible]
विस्तारो येन। ततः कर्मधारयः। 'प्रसवः' इति पाठे नलपक्षे—जयलाभः। इन्द्रपक्षे—
लब्धो विजयोऽर्जुनो, विजयत इति विजयो जयन्तो वा, प्रसवः पुत्रो येन। तथा—रुचि-
पदं तेजःस्थानम्। तथा—महो उत्सववान्। तथा—अयं प्रत्यर्थिनां दानवानां शत्रुवहित
प्रतिकूला चेष्टा, अहितस्य शत्रोर्वा चेष्टा शत्रुत्वकृतः तन्नाशकरो व्यापारस्तेन इन्द्रबुद्धिं कस्य न
करोति। अथवा—अयं महेन्द्रस्त्वया किमित्यत्याजि केन हेतुना त्यक्तः। अयं न विज्ञायते
विज्ञ इवाचरति विज्ञायते एवंभूतो न भवति। अपितु विद्वानेवेत्यर्थः। तथा—रुचिपदं
कान्तिस्थानं न तथा—महो नेति नञावृत्त्या काक्वा व्याख्येयम्। एवंगुणविशिष्टस्य परित्यागे
किंचिदपि कारणं न पश्याम इति भावः। महेन्द्रस्त्वया विज्ञाय किमित्यत्याजि उचितमेव
कृतमित्यर्थः। किम् प्रश्ने संभावनायां वा। त्यागे कारणमाह—लब्धो विना पक्षिणा गरुडे-
नामृताहरणसमये जयस्य प्रसरो विस्तारो यस्य। गरुडेन पराजित इत्यर्थः। तथा—अरुचि-
पदमननुरागस्थानम्। तथा—न महो उत्सवरहितः सदा दैत्यभयात्। अरुचिस्थानं महेन्द्रः
त्वया किं न विज्ञायते अपि तु ज्ञात एव। यतः—अत्याजि त्यक्त इति वा। अरुचिपदं
नमहीत्यत्र नञ आवृत्तिः। अतिशयितरणे लब्धो विना जयप्रसरो यस्येति वा। 'विजयस्तु
जये पार्थे' इत्यमरः। विज्ञायते, 'उपमानादाचारे', 'कर्तुः क्यङ्' ॥

येनामुना बहुविगाढसुरेश्वराध्वराज्याभिषेकविकसन्महसा बभूवे।
आवर्जनं तमनु ते ननु साधु नामग्राहं मया नलमुदीरितमेवमत्र ॥ २१ ॥

येनेति ॥ येनामुना नलेन बहुतिशयेन विगाढः सेवितः सुरेश्वरस्याध्वा मार्गः त्रिलोकी-
प्रतिपालनलक्षणो येन। तथा—राज्ये योऽभिषेको मङ्गलस्नानं तेन कृत्वा विकसन्महो यस्य।
एवंविधेन बभूवे जातम्। पूर्वेण कर्मधारयः। बहुवारं सेवितो देवेन्द्रेण मार्गो लोकपालन-
प्रकारो यस्येति वा। पश्चात्कर्मधारयः। इन्द्रेण लोकपरिपालनमस्माच्छिक्षितमित्यर्थः। ननु
भैमि, अत्र पञ्चसु मध्ये स्वयंवरे वा नामग्राहं नाम गृहीत्वा एवममुना पूर्वोक्तेन प्रकारेण मयो-
दीरितमुक्तं तं नलमनुलक्षीकृत्य ते तव आवर्जनं पतित्वेनाङ्गीकरणं साधु शुभम्। सत्यनलत्वं
सर्वथा वृणीष्वेति भावः।

वह्निपक्षे ॥ येनानेन वह्निनाऽनेकवारमनुभूतो यः सुरेश्वराध्वरेषु देवेन्द्रयज्ञेष्वाज्याभिषेकै
घृताप्लवत्वेन कृत्वा विकस्वरतेजसा जातम्। बहु वारंवारं विगाढ आवर्तितः 'इन्द्र आगच्छ'
इत्यादिना आहूतः सुरेश्वरो यत्र तादृशेषु यागेष्वाज्याभिषेकत्वेन कृत्वा विकस्वरतेजसा जात-
मिति वा। ननु भैमि, अत्र पञ्चसु मध्ये नाम गृहीत्वा एवं पूर्वोक्तप्रकारेण मयोक्तं तं अनलं
प्रति ते वर्जनं साधु। अपि तु न साधु। आ इति खेदे। आवर्जनं पतित्वेनाङ्गीकरणं साध्विति
वा। नु भैमि, तमनु ते वर्जनं न साध्विति वा। पूर्वार्धेन सर्वदा परान्नभोजनेनैव परिपुष्टो

यमिति त्यागः सूचितः । तथा—ननु भैमि, मया नाम गृहीत्वा कथितमनलं नलान्यं, अथ च—वह्निमनु ते वर्जनं साधु भद्रम् । आ हर्षे । नु भैमि, तमनु ते आवर्जनं सामस्त्येन वर्जनं न साधु, अपितु साध्वेवेति वा । आ आवर्जनं सामस्त्येनाङ्गीकरणं तत्र न साधु, किंतु वर्जनमेव साध्विति वा । नामग्राहम्, 'द्वितीयायाम्' इत्यनुवृत्तौ 'नाम्न्यादिशिग्रहोः' इति णमुल् ॥

यच्चण्डिमारणविधिव्यसनं च तत्त्वं बुद्ध्वाशयाश्रितममुष्य च दक्षिणत्वम् ।
सैषा नले सहजरागभरादमुष्मिन्नात्मानमर्पयितुमर्हसि धर्मराजे ॥ २० ॥

यदिति ॥ चोऽवधारणे । यस्य चण्डिमा क्रूरत्वं रणविधौ सङ्ग्रामविधाने । व्यसनमेव वैरिणां विगतानुकरणमेवेत्यर्थः । सर्वानपि वैरिणो मारयत्येवेति भावः । रणविधौ व्यसनमिव व्यसनम् । यच्चण्डिमा क्रौर्यम्, यच्च रणकर्मणि व्यसनमिति वा । सा एषा त्वं अनुष्यादायमभिप्रायमाश्रितं मनसि स्थितं दक्षिणत्वं सरलत्वं च तत् सर्वं बुद्ध्वा ज्ञात्वा, (आशयं) पाणि आश्रितं दानशूरत्वं वा ज्ञात्वा, धर्मसहिते राजनि धर्मेण राजमाने वा अनुष्मिन्नले सहजरागभरादकृत्रिमानुरागबाहुल्यादात्मानमर्पयितुं योजयितुमर्हसि न । अपि तु योग्या भवस्येवेति वा । सर्वथाऽयं वरणीय एव त्वयेति भावः । एतेन शूरत्वदातृत्वधार्मिकत्वान्युक्तानि ॥

यमपक्षे ॥ हे चण्डि कोपने, यत् च अमुष्य यमस्य मारणविधिव्यसनं प्राणिप्राणहरणशीलत्वं आशया दिशा च दक्षिणत्वमाश्रितं तत्तत्त्वं निरुपाधिरूपं ज्ञात्वा सैषा त्वं अनले नलान्यस्मिन् नलसदृशे चास्मिन्धर्मराजे यमे अकृत्रिमप्रेमरसबाहुल्यात्संयोजयितुमर्हसि । सर्वप्राणा एतदधीनाः, दक्षिणदिक्पतिश्चायं तस्मादादरणीय इति भावः । चण्डि नलान्यनामधेयश्रवणमात्रात्कोपने । सर्वदा सर्वप्राणिप्राणहरणमेव व्यसनं दोषं अनुष्य दिशा दक्षिणत्वं छलेन सरलत्वमुदारत्वं चाश्रितं न स्वभावेनेत्यर्थः । तत् सर्वं तात्त्विकं बुद्ध्वा सैषा त्वं नलादन्यस्मिन् अस्मिन्नात्मानं योजयितुं योग्या न भवसि । अनुष्य यत् मारणविधिव्यसनं तत् तत्त्वं सत्यं, दक्षिणत्वं तु दिगाश्रितं दक्षिणदिक्पतित्वात् । दक्षिण इति देवतात्वेनास्य समाख्या, तदेतद्बुद्ध्वा सैषा त्वं आत्मानमर्पयितुं न अर्हसीति वा योजना । एवंविधो न वरणीय इति भावः । अन्यच्च कारणम्—असहजरागभरात् असहजानुरागबाहुल्यादस्य । यत्रानुरागो नास्ति स न वरणीय इति भावः ॥

किं ते तथा मतिरमुष्य यथाशयः स्यात्त्वत्पाणिपीडनविनिर्मितयेऽनपायः ।
कान्मानवानवति नो भुवनं चरिष्णूंस्तावमुत्र नरता भवतीति युक्तम् ॥ २१ ॥

किमिति ॥ अमुष्य नलस्य आशयोऽभिप्रायः तव पाणिपीडनस्य पाणिग्रहणस्य विनिर्मितये निष्पत्तये अनपायः अपगता आशा यस्मात्स तथा एवंविधो न भवत्वित्यर्थः यथा स्यात्तथा किं ते मतिर्बुद्धिः । [illegible] । [illegible] भवेत्तथा त्वं [illegible] इत्यर्थः । अतो नले भुवनं [illegible] [illegible] रक्षति, अपितु सर्वानप्येव रक्षति । [illegible] वा । [illegible] न युक्तम् । [illegible] नैवेत्यर्थः । [illegible] [illegible] युक्तं न [illegible] इति वा । [illegible], [illegible] भवतीति युक्तं, अपि तु [illegible] ।

असौ ना पुरुषश्रेष्ठः, अतोऽमुत्र भवती रक्तानुरक्तेति किं न युक्तं, अपि तु युक्तमेवेति वा भवतीति संबुद्धिर्वा ॥

वरुणपक्षे—अमुष्य वरुणस्य शयः पाणिर्येन प्रकारेण त्वत्पाणिग्रहणनिष्पत्तयेऽपाशो न विद्यते पाशो यस्मिन्नेवंविधः पाशरहितो यथा भवेत्तथा ते बुद्धिः किम्। किं प्रश्ने। पाशं त्यक्त्वा त्वत्पाणिग्रहणं करिष्यतीत्यर्थः। त्वत्पाणिग्रहणनिष्पत्तयेऽस्य शयः करः स्यात् पाशो न। त्वत्पाणिग्रहणं शयेन करिष्यति पाशं त्यक्ष्यतीति भयं मा यासीरित्यर्थ इति वा। असौ भुवनसुरां तत्संचरणशीलान्मनुष्यान्कान्नोऽवति। अपितु जलप्रविष्टान् ब्रुडनादिप्रमादाद्वरुण एव रक्षति। उदकसंचरणशीलान्मनुष्यान्कान्नो अवति। अपितु रक्षतीति वा। नोऽस्माकं भुवनं पृथ्वीलोकः तत्र संचरणशीलान्मनुष्यान् कादुदकाद्धेतुभूताद्रक्षति। सर्वेषां ह्युदकं जीवनमिति वा। अमुत्र भवती न रता नानुरक्तेति न युक्तम्। अमुत्र नरता मनुष्यत्वं न भवतीति युक्तम्। देवोऽयमित्यर्थ इति वा। अमुत्र नरता नलत्वं न भवतीति युक्तमिति वा। असौ ना न पुरुषो न भवति, अतोऽमुत्र भवती रतेति युक्तं, अपि तु नेति वा। अमुत्र भवती न रता नानुरक्तेति न युक्तं, अपि तु युक्तमेवेति वा ॥

श्लोकादिह प्रथमतो हरिणा द्वितीयाद्धूमध्वजेन शमनेन समं तृतीयात्।
तुर्याच्च तस्य वरुणेन समानभावं सा जानती पुनरवादि तया विमुग्धा ॥३१॥

श्लोकादिति ॥ इह चतुर्षु 'अत्याजि-' इत्यादिश्लोकेषु मध्ये 'अत्याजि-' (१३।२८) इति प्रथमतः श्लोकाद्धरिणा इन्द्रेण समं सह, 'येनामुना—' (१३।२९) इति द्वितीयाच्छ्लोकाद्धूमध्वजेनाग्निना सह, 'यच्चण्डिमा—' (१३।३०) इति तृतीयाच्छ्लोकाच्छमनेन यमेन सह, 'किं ते—' (१३।३१) इति तुरीयाच्छ्लोकाद्वरुणेन सह, तस्य नलस्य समानभावं तुल्यत्वं जानती अत एव विमुग्धा विशेषेण भ्रान्ता भैमी तया देव्या वक्ष्यमाणं पुनरवादि ॥

त्वं याऽर्थिनी किल नले न शुभाय तस्याः क स्यान्निजार्पणममुष्य चतुष्टये ते।
इन्द्रानलार्यमतनूजपयःपतीनां प्राप्यैकरूप्यमिह संसदि दीप्यमाने ॥३२॥

त्वमिति ॥ या त्वं किल नले विषयेऽर्थिनी साभिलाषा तस्यास्ते तव अमुत्र नले निजार्पणं स्वसमर्पणं शुभाय कल्याणाय तुष्टये च संतोषाय च क न स्यात्कुतो न भवेत्, अपि तु स्यादेव। किंविधेऽमुत्र—इन्द्रश्चानलश्चार्यमतनूजो यमश्च पयःपतिर्वरुणश्चैतेषामैकरूप्यं दिक्पालांशत्वात्सरूपत्वं प्राप्य इहास्यां संसदि सभायां दीप्यमाने। तत्समर्पणीय इत्यर्थः। अथवा—या त्वं नले न साभिलाषा, तस्यास्तवामुत्र नले निजार्पणं शुभं कुतः स्यात्, अपि तु न कुतोऽपि। किमित्यत आह—इन्द्राग्नियमवरुणानां चतुष्टये ऐकरूप्यं नलसारूप्यं प्राप्य इह सभायां ज्वलति सति। एतान्प्रसन्नानकृत्वा यन्नलवरणं तच्छुभाय न भवेदेव, शापं दास्यन्तीत्यर्थ इति वा। या त्वं नले विषयेऽर्थिनी एवं वर्ण्यमानेऽप्येनं नलं न वृणोषि। यतः—तस्यास्ते नलसारूप्यं प्राप्य इह सभायां प्रकाशमाने इन्द्रादिचतुष्टये मध्ये क कस्मिन् इन्द्रेऽग्नौ यमे वरुणे वा निजार्पणं शुभाय स्यात्कथय। मया मुहुः प्रोच्यमानाऽपि यन्नलं न वृणुषे तदेषु सुन्दरतमेषु चतुर्षु मध्ये कं वृणुषे इति कथय इति वा। अनेनानेन्द्रादयो वर्तन्ते न चेति संदेहो निरस्तः। परं तु के ते इत्य नलः [illegible]

विशेषो नोक्तः । अत्रेन्द्रादीनां चतुर्णां त्यागोऽपि प्रतीयते । या त्वं नलैकार्थिनी, तस्याः ते नलस्वरूपतां प्राप्य इह सभायां दीप्यमान इन्द्रादिचतुष्टये निजार्पणं शुभाय क स्यात् । अपितु न कुतोऽपि । या ह्यन्यत्रानुरक्ता, तस्या अन्यत्र निजार्पणे शुभं कथं भवेत् । अन्यच्च नलरूपधारणादेते प्रकाशन्ते न त्वेषां सहजं सौन्दर्यमस्ति । अतोऽप्येते न वरणीया इति भावः ॥

देवः पतिर्विदुषि नैषधराजगत्या निर्णीयते न किमु न व्रियते भवत्या ।
नायं नलः खलु तवातिमहानलाभो यद्येनमुज्झसि वरः कतरः परस्ते ॥३४॥

देव इति ॥ हे विदुषि श्लेषोक्तिचातुरीपरिज्ञानचतुरे भैमि, एष पुरोवर्ती देवः स्वर्गे क्रीडाकारी अतएव धराजगत्या भूलोकस्य पतिः पालयिता न किंतु अर्थात्स्वर्लोकस्य पतिरिन्द्रस्त्वया किमु किमिति न निर्णीयते इन्द्रत्वेन किमिति न निश्चीयते । अपितु निश्चेय इत्यर्थः । किमिति वा न व्रियते । अपि तु वरणीयश्चेत्यर्थः । मया न निश्चित इति कुतोऽवसितं भवत्येति शङ्कायां सत्यामाह—यतो न व्रियते इति हेतूपन्यासः सरस्वत्या कृतः, अयमिन्द्र इति चेत्तव निश्चयः स्यात्तर्हि मनुष्यापेक्षयाधिकत्वादयं वृत एव स्यात्तत्तु न कृतम् । अत इन्द्रत्वेन त्वयाऽयं न निश्चित इत्यर्थ इति वा । धराणां पर्वतानामजनं आजः क्षेपणं तत्र गतिरुपायभूतो वज्रस्तेन कृत्वायं ना पुरुषः सामर्थ्याद्वज्रायुधो देव इन्द्रः पतिर्भर्ता भर्तृत्वेन किं न निर्धार्यते, निश्चितश्चेत्किं न व्रियत इति वा । धराजगत्या वज्रस्य पतिः एष देवः त्वया न निर्धार्यत इति न, अपितु निश्चित एव ज्ञात एव किमु न व्रियत इति वा । उशब्दः संबोधने । धराः पर्वतानजति क्षिपतीति धराज इन्द्रः स एव गतिः शरणं यस्याः प्राच्या दिशः पतिर्देव इन्द्रो न निर्णीयते इति न, परं किं न व्रियत इति वा । इन्द्रश्चेन्नल इव कथं दृश्यत इत्यत आह—अयं खलु निश्चयेन नलो भवति, तव नलवदाभातीति नलाभः । अत्र हेतुमाह—यतः अतिशयितं महत्तेजो यस्य । मनुष्यापेक्षया बहुतेजा इत्यर्थः । अत एव वरणीयः । अथवा—अयं नलस्तृणविशेषः तत्तुल्योऽसारभूतो न भवति । किं त्वतिबलः, अतोऽपि वरणीय इत्यर्थः । अस्य वरणे निश्चितं अतिशयिता ये महा नन्दनवनक्रीडादय उत्सवाः, अननं आनः प्राणनं च, तेषां लाभः प्राप्तिस्तव भविष्यतीति शेषः । इन्द्रवरणे नन्दनवनक्रीडा सुधापानेनामरत्वं च त्वया प्राप्स्यते इत्यर्थः । अतिमहतश्चिरकालस्य प्राणनस्य लाभो भविष्यतीति वा । एवंगुणविशिष्टमेनं, अस्य विष्णोर्वा इनं ज्येष्ठभ्रातृत्वेन स्वामिनमिन्द्रं चेदुज्झसि तर्हि परोऽन्यः को वरः, अपि तु न कोऽपि । मद्वचनविश्वासादेनमेव वृणीष्वेति भावः । अथ च—यद्येनं त्यजसि, तर्हि तव कतरोऽभीष्टो भवेत् न कोऽपि । किंतु परः शत्रुरेव भवेदित्यर्थः । अथ च—यद्येनं त्यजसि, तर्हि तव परोऽन्यः एतदनन्तरः केन वायुना तरति प्लवते, केन जलेन तीर्यते शान्तिं प्राप्यते वा यः स कतरोऽग्निः वरो भवेदित्यर्थः ॥ * ॥ अत्रेन्द्रत्यागोऽपि सूचितः । तथाहि—एष भूलोकस्य रक्षको देवो राजा नलो नेति निर्णीय निश्चित्य तेन नलत्वाभावलक्षणेनैव कारणेन न व्रियते किमिति प्रश्नः । पुनरेनैतदुक्तमिति शेषः । धराज इन्द्र एव गतिर्जीवनोपायो यस्याः प्राच्याः पतिः देवो न निर्णीयत इति न, अपि तु निश्चित एव । न व्रियते किमिति वा । एतत्पदद्वयेनैतस्यापि निरासार्थं देवी पुनस्तत्त्वमाह—अयं त्वत्संबन्धी त्वच्चित्ताकर्षकोऽतिमहान् नितरां तेजस्वी नलो

स्थित्वाद्वहितुल्य इत्यर्थः । यदि चैनं त्यजसि, तर्हि तव वरः श्रेष्ठः परः शत्रुः कतरः । अपि एतस्मिन्परित्यक्तेऽयमनेन महाञ्छत्रुरित्यर्थ इति वा । अथ च—के जले तरति, कानि जलानि तरन्तीत्यस्मिन्निति वा कतरो वरुणो वरो भविता ॥ * ॥ अत्रापि त्यागः सूचितः । तथा—एष धराजगत्या दक्षिणदिशः पतिर्देवो यमो न । अपि तु यम एव इति निश्चितं तेन कारणेन न त्रियते किम् । धर्मराजमुख्या देवो न निर्णीयते इति न । किंतु निर्णीयत एव । अतएव पतिर्न त्रियते किमिति वा । अयं दैत्यैः आक्रान्ततेजा नलः पितृदेवो यमो न । अपि तु यम एव । परं तव नलत्वदानादि नलाकारधारणादित्यर्थ इति वा । यदि चैनं त्यजसि तर्हि श्रेष्ठः मुखसमुद्रो नलो वरो भविता ॥

वरुणपक्षे—एष धराजगत्या भूलोकस्य पतिर्न । किंत्वपांपातालस्य अतएव देवः कान्तिमाननरश्च वरुणः किं न निर्धार्यते किं वा न त्रियते । अयं नलो न किंतु अतिमहती नलवत्कान्तिर्यस्य सोऽतिमहाः तव नलाभो भातीति शेषः । यदि चैनमुज्झसि, तर्ह्येतदन्यः श्रेष्ठश्च तव को वरो भर्ता, अपितु एतत्सदृशोऽन्यो नास्तीत्यर्थः । धरायां जायन्ते धराजानि स्थावरजङ्गमानि भूतानि तेषां गतिर्जीवनोपायो जलं तस्य पतिः न । अपितु अपांपति-र्वरुणो देवः किं न निर्णीयते किं वा न त्रियते । अपितु निर्णेयो वरणीयश्चेत्यर्थः । अति-महस्य अतिपूज्यस्यानलस्याभिराभा कान्त्याभावो यस्मादुतोवरुणो हि जलरूपत्वादग्निविरो-धीत्यर्थ इति वा । यदेवं त्यजसि, तदा तव वरः श्रेष्ठः कः परः शत्रुः । अपितु अयमेव शत्रुरित्यर्थ इति वा । धरतीति धरो धर्ता जगतः पोषकः स चासावजश्च तस्य धराजस्य श्रीविष्णोर्गतिः प्रथमसदननाधारो जलं तस्य पतिर्न । अपितु तत्पतिर्वरुणः किं न निर्णीयते । उदकम् 'आपो नाराः' इत्यादिना श्रीविष्णोराश्रयः । अथ च—यदि त्वमेनम् अः श्रीविष्णुः इनः स्वामी यस्य तं श्रीविष्णुभक्तं त्यजसि, तर्हि तव लाभो न, किंतु हानिरेव । तस्मात्तव कतरो वरुण एव परः श्रेष्ठो वर इति वा ॥ * ॥ अत्रापि त्यागः सूचितः । तथाहि एष धरा-जगत्याः पूर्वोक्तप्रकारेण उदकस्य प्रतीच्या दिशो वा पतिर्वरुणो देवो न । अपितु स एवेति निर्णीयते किंतु । अपितु निश्चित एव । यतो न त्रियते । नायं नल इत्यादि तुल्यम् । यद्येनं त्यजसि तर्हि तथापि (ति) महतामनलानां प्राणानां त्यागः सूचित इत्यर्थः । यस्मात्ते मुखसमुद्ररूपः श्रेष्ठो नलो वरो भविता । नलप्राप्त्यैव तव प्राणनं, नान्यथेति भावः इत्यादि-व्याख्या सुधिया योजनीया । ग्रन्थविस्तरभयान्न लिखिता ॥

नलपक्षे—अयं नैषधराजस्य निषधदेशाधिपतेर्नलः, निषधदेशोद्भवानां लोकानां यो राजा तस्य वा, नला शब्देन तुल्या पतिः स्वामी देवः श्रीजगदीश्वरः, राजा वा, वा मनुष्यो नलः किं न निर्धार्यते किं वा न त्रियते । अपितु निषधाधिपो नलो एकतमं वरणीयः एतादृशोऽपि निषेध्यो वरणीयश्चेत्यर्थः । अत्र नलाद् धरातिमहत्त्वस्यो निश्चयः । 'नाविष्णुः पृथिवीपतिः' इति नलस्य विष्णुत्वमित्यर्थः । यदि चैनं त्यजसि, तर्हि को वरोऽस्मात्परोऽधिकः । अपितु कस्मादपि नलोऽधिक इत्यर्थः । नलस्यैव श्रेष्ठत्वमित्यर्थः । एष धराजगत्या भूलोकस्य पतिः स्वामी न मनुष्यो नलो देवो राजा न, अपि तु नल एवेति किं न निर्णीयते किं वा न त्रियते । अपि तु निर्णेयो वरणी-

यश्च । यस्मान्नलवरणे तवातिमहतो जीवनस्य लाभः । नलप्राप्तावेव तव जीवनं भविष्यती-त्यर्थः । यदि च अयं शुभावहदैवरूपमेनं त्यजसि तर्हि तव कः श्रेष्ठो वरः । अपि तु नास्तीत्यर्थ इति वा । नैषधराज एव गतिर्यस्यास्तया भवत्या मनुष्योऽयं नलो राजा कि न निश्चीयते किं वा न व्रियते । अपितूभयमपि कर्तव्यम् । यद्येनमुज्झसि तर्हि तव निश्चितमिति महानलाभो महदभाग्यम् । यस्मादेतादृशोऽन्यः कतरो वरः, अपितु नास्ती-त्यर्थ इति वा । एष देवो न इन्द्रादिरमरो न, किंतु भूलोकस्य पतिर्मनुष्यो नल इति किं न निश्चीयते, किं वा न व्रियते । यदि चायं देवरूपमेनं त्यजसि तर्हि तव लाभो न, किंतु हानिरेव । धरायां जायन्ते धराजा मनुष्यास्तेषां गत्या प्रकारेण सनिमेषनेत्रत्वादिलिङ्गेन देवो नेति किमु न निर्णीयते । तथा—पतिरिति किमिति न व्रियते निश्चितं ना मनुष्यो ऽयम् । यदि चैनं त्यजसि तर्हि तव परोऽन्यो वरः श्रेष्ठः कतरो लाभः । अपितु एतद्व-रणात्परः श्रेष्ठो लाभो नास्तीत्यर्थः । एष धरायां भूलोकेऽतिसौन्दर्यादजः काम इति युक्त प्राणेशो मनुष्यो नलो नतु देवः कश्चिदिति किं न निर्णीयते किं वा न व्रियते । निकटस्थान-मेषां चतुर्णामेतदाकारधारणात्कृत्रिमं सौन्दर्यम्, अस्यतु सहजमिति दर्शनमात्रेण तारतम्यं ज्ञात्वा एष नलो निश्चेयो वरणीयश्चेत्यर्थः । खलु यस्मात्तदाकारधारणेनाविलानामति(न)-लक्ष्मीकाणामिन्द्रादीनां हाने परित्यागे लाभः । तव कपटसौन्दर्यास्ते न वरणीया इत्यर्थः । इत्यादिव्याख्या यथाबुद्धि ज्ञातव्या । 'नलः पोटगले राज्ञि पितृदेवे कपीश्वरे' इत्यादि विश्वः ।

इन्द्राग्निदक्षिणदिगीश्वरपाशिभिस्तां वाचं नले तरलिताथ समां प्रमाय ।
सा सिन्धुवेणिरिव वाडववीतिहोत्रं लावण्यभूः कमपि भीमसुताप तापम् ॥

इन्द्रेति ॥ अथ लावण्यभूः परमसौन्दर्योत्पत्तिस्थानं सा भीमसुता नले विषये पूर्वोक्तां 'देवः पतिः—'[१३।१४] इत्यादिवाचमिन्द्राग्निदक्षिणदिगीश्वरपाशिभिः समां तुल्यां श्लेषेण तेषामपि वर्णयित्रीं प्रमाय निश्चित्य तरलिता संदेहवशान्नलनिश्चयाना-कुलायमानमनाः सती कमप्यनिर्वाच्यमतिदुःसहं तापमाप । का कमिव—सिन्धुवेणिः सा-गरसंगमो वाडववीतिहोत्रमिव वडवानलमिव यथा प्राप्नोति । नलनिश्चयाभावाद्भृशमतुलं दुःसहं संतापं प्रापेति भावः । नले तरलिता सोत्कण्ठेति वा ॥

सातुं प्रयच्छति न पक्षचतुष्टये तां तल्लाभशंसिनि न पञ्चमकोटिमात्रे ।
श्रद्धां दधे निषधराड्विमतौ मतानामद्वैततत्त्व इव सत्यतरेऽपि लोकः ॥ १६ ॥

सातुमिति ॥ सा भैमी निषधराजो नलस्य संबन्धिन्यां विविधायां मतौ बुद्धि-सत्याम् । नलविषये संदेहे सतीति यावत् । पञ्चमी चासौ कोटिश्च पञ्चमकोटिस्तन्मात्रे पञ्चमको-टिमात्रे पञ्चमभागरूपे । पञ्चमस्थानस्थित इति यावत् । एवंभूते पञ्चानां मध्ये सत्यतरे अति-तरां सत्येऽपि नले विषये श्रद्धामास्तिक्यं न दधे । सत्यनलेऽपि नलोऽयमेवेति निश्चयं बुद्धि-नोंदभूदित्यर्थः । क सति—तल्लाभशंसिनि भैमीप्राप्त्यनिलाषिणि पक्षचतुष्टये पक्षतां वर्तिनां सदृशानां सदृशानामिन्द्रादीनां चतुष्टये तां श्रद्धां सत्यनलविषयं निश्चयं तु सातुं प्रयच्छति सति । भैमीप्राप्त्यभिलाषेणातिसुन्दररूपधारणात्कृत्रिमनलाकारैरपि नलवत्प्रति-रूपातिशयदर्शनान्नलनिश्चयं प्रतिषेधति सति । कः कस्मिन्निव—मतानां [illegible]

नानां मध्ये 'एकमेवाद्वितीयं ब्रह्म, नेह नानास्ति किंचन' इत्यादिश्रुतिभिः सत्यतरे परमार्थतो विद्यमानेऽप्यद्वैतरूपे तत्त्वे स्वरूपे ब्रह्मैक्यबोधे वा विषये लोकोऽविद्यावान्युक्तायुक्तविचारशून्यो जनो यथा श्रद्धां न धत्ते । क्व सति—पक्षचतुष्टये अनेकात्मवादिसांख्यादिदर्शनचतुष्के तामद्वैतश्रद्धां प्राप्तुं न ददति सति । नानात्वसाधकयुक्तिसहस्रैरैकात्म्यनिषेधके सतीति यावत् । तस्य तत्पदवाच्यस्य लाभः तच्छब्दिनीलस्याद्वैततत्त्वस्य विशेषणम् ॥ * ॥ सांख्या हि प्रतिशरीरं पुरुषबहुत्वमङ्गीकुर्वन्ति नैयायिकाश्च 'नानात्मानो व्यवस्थिताः' इति वचनादात्मनां नानात्वमङ्गीकुर्वन्ति । आर्हताश्च देहप्रमाणात्मस्वीकारमङ्गीकुर्वन्ति । बौद्धाश्च सिद्धान्तसिद्धानेकयुक्तिभिरनेकात्मनामेव चित्तसंततिबाहुल्यमङ्गीकुर्वन्ति ॥ * ॥ सत्, असत्, सदसत्, सदसद्विलक्षणमिति पक्षचतुष्टयम् ॥ * ॥ सद्वादिनः सांख्याः । असद्वादिनो बौद्धाः । सदसद्वादिनो नैयायिकाः । प्रपञ्चमिथ्यात्ववादिनो वेदान्तिनः । न सत् बाधानुपपत्तेः । नहि सद्रजतं गगनादिकं वा बाध्यते । नचासत् प्रतिभासानुपपत्तेः । नह्यत्यन्तासच्छशशृङ्गं कदाचिदप्यवभासते । नच सदसदात्मकमुभयरूपं परस्परविरोधात् । नह्येकस्य सत्त्वाऽसत्त्वे भवितुमर्हति । उभयरूपमपि न भवतीत्यपि वक्तुमयुक्तमित्याद्यपि ज्ञातव्यम् ॥ * ॥ सांख्या हि प्रतिशरीरं भिन्नाञ्शुद्धज्ञानस्वभावान्बहूनात्मन इच्छन्ति नैयायिका अपि प्रतिशरीरं भिन्नान्सर्वव्यापकाञ्ज्ञानादिनवविशेषगुणवत आत्मन इच्छन्ति । आर्हतास्तु प्रतिशरीरं भिन्नान्देहपरिमाणान्संकोचविकासशीलान्बहूनात्मनोऽङ्गीकुर्वन्ति । बौद्धाश्च प्रतिदेहं भिन्नान्क्षणिकज्ञानसंततिरूपान्बहूनेवात्मन इच्छन्ति ॥ * ॥ भैमीप्राप्त्यभिलाषिणि सत्यतरे नले नलसंबन्धिन्यां विनतौ सत्यामपि सा श्रद्धां न दधे । अपितु दधावेव । अनेकनलदर्शने सत्ये पञ्चनकोटिस्थिते सत्ये नले । 'अविज्ञातेऽपि बन्धौ हि बलात्प्रह्लादते मनः' इति न्यायेनायमेव प्रायेण सत्यनलो भविष्यतीति तस्या ममत्वे बुद्धिरुदभूदित्यर्थः । मतानां विनतावपि सत्यतरेऽद्वैततत्त्वे लोक इव । लोकः परीक्षको जनो यथा श्रद्धां धत्ते तथेति संबन्धः । 'प्राप्तुम्' इति पाठे निषधराद् नल इन्द्रादिचतुष्टये भैमीप्रतारणार्थं स्वीयस्वरूपधारणात्तां स्वं प्राप्तुं न यच्छति सति तल्लाभशंसिनि भैमीप्राप्त्यभिलाषिणि पञ्चनकोटिस्थे अर्थादात्मनि श्रद्धां निश्चयं न दधे । अर्थाद्भैमी प्राप्तुम् । एतल्लिङ्गचतुष्टये प्रतिबन्धके सति इयं मया कथंकारं प्राप्यते । अपि तु नेति तस्य बुद्धिरुदभूदित्यर्थः । मतानां विनतौ सत्यां सदसदादिपक्षचतुष्टये तां सम्यक्प्रतीतिं निषेधति सति अनेदसिद्धिशंसिनि पञ्चनकोटिमात्रे चतुष्कोटिविनिर्मुक्ते सत्यतरेऽप्यद्वैततत्त्वे यथा लोकः श्रद्धां न धत्त इति व्याख्येयम् । लोकः कौतुकदर्शी समास्थो जन इदमेनं वरिष्यतीति निश्चयमयं पञ्चमः सत्यनल इति वा निश्चयं न दधे । पञ्चनकोटिमात्रे, 'पुंवत्कर्मधारय-' इति पुंवत् ॥

उक्तिविशेषेण पुनरपि संदेहजनितं संतापं वर्णयति—

कारिष्यते परिभवः कलिना नलस्य तां द्वापरस्तु सुतनूमनुनोत्पुरस्तात् ।
भैमीनलोपयमनं पिशुनौ सहेते न द्वापरः किल कलिश्च युगे जगत्याम् २७

कारिष्यत इति ॥ कलिना चतुर्थयुगेन नलस्य परिभवः कारिष्यते करिष्यते । द्वापरस्तु अयं वा नलः, अयं वा नल इति संदेहः पुनः । अथ च द्वन्द्वच्छलेन तृतीयं युगं पुनः तां

कमीक्षते, तारतम्यं न जानातीति शङ्काशतं च करोति, पुनस्त्यजति, ददाति च पुनरपि च, इत्येवमव्यवस्थितचित्तो भवति तथेयमप्यव्यवस्थितचित्ताभूदिति भावः । वेद पाठे भूते 'लट् स्मे' इति लट् ॥

तमेव विचारमाह—

अस्ति द्विचन्द्रमतिरस्ति जनस्य तत्र भ्रान्तौ दृगन्तचिपिटीकरणादिरादिः ।
स्वच्छोपसर्पणमपि प्रतिमाभिमाने भेदभ्रमे पुनरमीषु न मे निमित्तम् ॥४१॥

अस्तीति ॥ जनस्य द्विचन्द्रमतिः द्वौ चन्द्राविति बुद्धिः प्रसिद्धास्ति । परं तत्र भ्रान्तौ प्रमाणप्रमितैकत्वे एकस्मिन्नेव चन्द्रे विषये योऽनेकत्वप्रत्ययस्तस्मिन्विषये दृगन्तयोर्नेत्रप्रान्तयोर्यच्चिपिटीकरणं अचिपिटयोश्चिपिटयोः करणमङ्गुल्यग्रेण निपीडनं तदादिर्यस्य काचकामलादिदोषस्य स दृगन्तचिपिटीकरणादिदोष आदिः प्रथमो हेतुरस्ति । चन्द्रद्वयभ्रान्तौ चिपिटादिर्हेतुर्युक्तः । तथा—प्रतिमाया आदर्शादौ दृश्यमानस्य मुखादिप्रतिबिम्बस्याभिमानेऽपि प्रतिबिम्बस्फुरणरूपे भ्रान्तिज्ञानेऽपि स्वच्छस्यादर्शादेरुप समीपे यत्सर्पणं प्रापणं दर्पणसंनिधानं तन्निमित्तमस्तीति शेषः । दर्पणादिस्वच्छवस्तुसंनिधानादलीकमपि प्रतिबिम्बं भासत इत्यर्थः । मे मम पुनरमीषु दृश्यमानेषु भेदभ्रमे एकस्मिन्नले विषये यः पञ्चत्वसंख्याविशिष्टो बोधस्तस्मिन्विषये निमित्तं कारणं नास्ति । द्विचन्द्रभ्रान्तौ कारणमस्तीति भ्रान्तिर्युक्ता, एको नलः पञ्चधावभासत इति मदीया भ्रान्तिः कारणाभावान्न युक्ता । तस्मादन्य एवैते केचन भविष्यन्तीति स्वयमेव संशयं चकार परिजहार चेति भावः । 'अभिमानोऽर्थादिदर्पे ज्ञाने प्रणयहिंसयोः' इति निघण्टुः ॥

पक्षान्तरमाह—

किं वा तनोति मयि नैषध एव कायव्यूहं विधाय परिहासमसौ विलासी ।
विज्ञानवैभवभृतः किमु तस्य विद्या सा विद्यते न तुरगाशयवेदितेव ॥४२॥

किं वेति ॥ वा पक्षान्तरे । असौ प्रत्यक्षदृश्यो नैषध एव कायव्यूहं शरीरसमूहं विधाय निर्माय मयि परिहासं प्रतारणक्रीडां तनोति किम् । यतो—विलासी । एकोऽप्यसौ नल एव मयि क्रीडावशात्कायव्यूहं तनोति, नत्वन्ये केचन सन्तीत्यर्थः । 'किं नो तनोति' इति पाठे काकुः । कायव्यूहरचनेऽस्य शक्तिः कथमित्यत आह—विशिष्टस्य ज्ञानस्य, विशिष्टं ज्ञानं यैस्ते विद्या ये कलाग्रन्थास्तेषां वा वैभवं बाहुल्यं तद्बिभ्रतस्तस्य नलस्य तुरगाशयवेदितेवाश्वहृदयज्ञतेव सा कायव्यूहविधानरूपा विद्या किमु न विद्यते । अपि तु सापि विद्यत एवेति संदेहध्वना । 'विज्ञानवैभवभुवः' इति पाठे भुवः स्थानभूतस्येत्यर्थः । परिहासः, 'उपसर्गस्य घञि—' इति सूत्रे बहुलग्रहणाद्दीर्घाभावः ॥

एको नलः किमयमन्यतमः किमैलः कामोऽपरः किमु किमु द्वयमाश्विनेयौ ।
किं रूपधेयभरसीमतया समेषु तेष्वेव नेह नलमोहमहं वहे वा ॥ ४३ ॥

एक इति ॥ वा पक्षान्तरे । इह एषु पञ्चसु मध्ये अयमेको नलः किम्, अन्यतमो द्वितीय ऐलः पुरूरवाः किम्, अपरस्तृतीयः कामः किम्, शिष्टं द्वयमाश्विनेयावश्विनीकुमारौ

किंतु, एतनुकेषु तेषु पञ्चस्वेवाहं नलमोहं किं न वहे । अपितु तेष्वेव नलबुद्धिं धारयामि, न तु कायव्यूहरचनादेक एव नलः पञ्चधा जात इत्यर्थः । यतः—रूपमेयभरस्य सौन्दर्यबाहुल्यस्य तीनतया परमकाष्ठात्वेन तनेषु सदृशेषु । सादृश्याद्धि मोहो युक्तः । अन्यतमः, 'स्वार्थे तमप्' । तीनशब्दो नान्तः स्त्रीलिङ्गः ॥

पूर्वं मया विरहनिःसहयापि दृष्टः सोऽयं प्रियस्तत इतो निषधाधिराजः ।
भूयः किमागतवती मम सा दशेयं पश्यामि यद्विलसितेन नलानलीकान् ४५

पूर्वमिति ॥ विरहनिःसहया वियोगविह्वलया मया सोऽयं निषधाधिराजः प्रियः प्राणेश इतस्ततः सर्वासु दिक्षु पूर्वमपि स्वयंवरसमयात्प्रागपि दृष्टः । य इदानीं दृश्यते स मोहवशात्सर्वत्र पूर्वमपि दृष्ट इत्यर्थः । प्रकृते किमित्यत आह—मम इयं भूयः पुनरपि सैव विरहोन्मादान्ततात्त्वा दशा आगतवती किम् । यद्विलसितेन यस्याः सामर्थ्येनालीकानसत्यामलान्पश्यामि । अपिः पूर्वमित्यनेन, भूय इत्यनेन वा योजनीयः ॥

मुग्धा दधासि कथमित्थमथापशङ्कां संक्रन्दनादिकपटः स्फुटमीदृशोऽयम् ।
देव्यानयैव रचिता हि तथा तथैषां गाथा यथा दिगधिपानपि ताः स्पृशन्ति ४६

मुग्धेति ॥ अथ पक्षान्तरे । अथवा मुग्धा मोहवशा सत्यहमित्थं 'अस्ति द्विचन्द्र–' (१३।४२) इत्याद्यनेकरूपानपशङ्कां दुःशङ्कां कथं दधासि । अपि त्वेतदयुक्तमित्यर्थः । यतः —स्फुटं निश्चितमयमीदृशो नलबाहुल्यज्ञानरूपः संक्रन्दनादीनामिन्द्रादीनां चतुर्णां कपटः । तेषां मायैवेषेत्यर्थः । हि यस्मादनया देव्यैव सरस्वत्यैव एषां पुरोवस्थितानां संबन्धिन्यो गाथाः 'नूनः–' इत्यादिवर्णनश्लोकास्तथा तेन तेन प्रकारेण रचिताः । यथा येन येन प्रकारेण ता गाथा दिगधिपानिन्द्रादीनपि स्पृशन्ति श्लिष्टशक्त्या अभिधावृत्त्या वदन्ति, न केवलं नलमित्यपेरर्थः । तस्मादिन्द्रादिभिरेव मत्प्रतारणार्थं मायया नलरूपं धृतमित्येव बुद्धिर्युक्ता, न तु पूर्वसंशयरूपेत्यर्थः । तथाशब्दस्य द्विरुपादानाद्यथाशब्दोऽपि द्विर्ज्ञातव्यः । 'कपटोऽस्त्री–' इत्यमरः ॥

एतन्मदीयमतिवञ्चकपञ्चकस्थे नाथे कथं नु मनुजस्य चकास्तु चिह्नम् ।
लक्ष्माणि तानि किममी न वहन्ति हन्त बर्हिर्मुखा धुतरजस्तनुतामुखानि ४७

एतदिति ॥ एतस्मिन्मदीयाया बुद्धेर्वञ्चके भ्रामके पञ्चके इन्द्रादिसमूहे तन्मध्ये स्थिते नाथे मम प्राणेशे मनुजस्य मनुष्यस्य चिह्नं स्वेदनिमेषरजःसर्वाङ्गानकुसुमत्वादिलिङ्गं कथं नु कपमिव चकास्तु प्रकाशताम् । अपित्विन्द्रादिमायया नलस्यस्यापि चिह्नस्याच्छादितत्वात्तन्न प्रकाशत इति युक्तमित्यर्थः । नलस्य स्वयंवरत्वेऽपि 'दमिपो यच्छन्ति' इति न्यायाच्चतुर्णामेव वचकत्वेऽपि तत्सिद्धिः । परिहासवशाद्वा नलस्यापि वञ्चकत्वं युक्तम् । एतद्वानुदृश्यमानं स्वेदादिचिह्नमिति निजपदं वा । हन्त खेदे । अमी बर्हिर्मुखा देवाः धुतं त्यक्तं रजो रेणुस्पर्शो यथा एवंभूता तनुर्येषां तेषां भावो धुतरजस्तनुता रेणुस्पर्शरहितशरीरता मुखं आदिर्येषां तानि स्वेदराहित्यान्यनमनुष्यत्वनिर्निमेषत्वादीनि देवत्वव्यञ्जकानि तानि प्रसिद्धानि चिह्नानि किमिति न वहन्ति धारयन्ति । नहि तथा लक्ष्यते । दुष्यते यदंतु मोह्यन्ते । कहत्ति-

त्यर्थः । बहिर्मुखपदं कृपाराहित्यसूचकम् । नलचिह्नानामस्फुटत्वेऽपि यदि देवचिह्नानि स्फु-
न्यभविष्यंस्तर्हि पारिशेष्यान्नलनिश्चयोऽप्यभविष्यत्, तान्यपि त्वस्फुटानीत्युभयथापि
नलो निश्चेतुं न शक्यत इति भावः ॥

याचे नलं किममरानथवा तदर्थं नित्यार्चनादपि ममाफलिनैरलं तैः ।
कंदर्पशोषणशिलीमुखपातपीतकारुण्यनीरनिधिगह्वरघोरचित्तैः ॥ ४८ ॥

याच इति ॥ अहं मह्यं यूयं नलं प्रयच्छतेत्यमरान्नलं याचे किम् । अथ वा पूर्वस्मि-
तोषे । तदर्थं नलप्राप्त्यर्थं तेषां नित्यार्चनादपि ममाफलिनैः प्रार्थितददद्भिस्तैर्देवैरलं पूर्यताम् ।
एतावन्ति दिनानि नित्यपूजनादपि ये नलं न प्रायच्छंस्तेऽधुना प्रार्थनमात्रेण कथं दास्यन्ति
वृथैव तत्प्रार्थनमित्यर्थः । किंविधैस्तैः—कंदर्पस्य शोषणाख्यः शिलीमुखो बाणस्तेन पातनेन
नात्पीतः शोषितः कारुण्यनीरनिधिः कृपासमुद्रो येषां तानि अत एव गह्वराणि गम्भीरबिल-
पाणि घोराणि कठिनानि चित्तानि येषामेवंभूतैः । यस्मात्कृतेऽपि पूजने कामायत्ततया निष्कृ-
पत्वादफलिनैरित्यर्थः । याचिर्द्विकर्मा । 'नदत्तफलैः' इति वा पाठः । फलशब्दादस्त्यर्थे, 'फल-
बर्हाभ्यामिनन्' । ततो नञ्समासः ॥

देवानुपालभते—

ईशा दिशां नलभुवं प्रतिपद्य लेखा वर्णश्रियं गुणवतामपि वः कथं वा ।
मूर्खान्धकूपपतनादिव पुस्तकानामस्तं गतं बत परोपकृतिव्रतत्वम् ॥ ४९ ॥

ईशा इति ॥ हे दिशामीशाः दिक्पाला लेखा देवाः, नलो भूः स्थानं यस्यास्तां नल-
भवां वा वर्णश्रियं रूपशोभां प्रतिपद्य प्राप्य गुणवतां सौन्दर्यादिगुणयुक्तानामपि वो युष्माकं
परेषामुपकृतिरुपकार एव व्रतं तद्विद्यते येषां ते व्रतिनस्तेषां भावस्तत्त्वं कथं वा कुतो वा
हेतोरस्तं गतं नष्टम् । स्वयमुपकारकलाभावेऽपि स्वाभिलषितायामपि मयि भवदर्थं दूतका-
रिणो नलस्याप्याकारे धृते सौन्दर्यादिगुणागमनात्परोपकारित्वमप्यागतं तन्मद्विषये कथं विन-
ष्टमित्यर्थः । नलाकारधारणादेतावती मत्प्रतारणा किमिति क्रियत इति भावः । केषामिव—
मूर्खा अश्रुतशास्त्राः पुरुषा एवाज्ञानवशादन्धाः त एव कूपा अतिगमीरा मूर्खरूपाः कूपास्तेषु
पतनात्तदधीनत्वात्तृणविशेषलेखनीभूतनलप्रभवां रेखावर्णश्रियं लिप्यक्षरशोभां प्राप्य सुन्दर-
दिगुणयुक्तानां दोरकयुक्तानां च पुस्तकानां यथा वाचकपाठकाद्युपकारित्वमस्तं गच्छति ।
मूर्खस्य मूर्खत्वादेवोपकाराभावादन्येषां चासमर्पणादित्यर्थः । कूपपतितानामपि पुस्तकानामनुप-
कारित्वमेव । 'प्रतिपद्य स्थितानाम्' इति समानकर्तृकत्वम् ॥

यस्येश्वरेण यदलेखि ललाटपट्टे तत्स्यादयोग्यमपि योग्यमपास्य तस्य ।
का वासनास्तु बिभृयामिह यां हृदाहं नार्कातपैर्जलजमेति हिमैस्तु दाहम् ॥ ५० ॥

यस्येति ॥ ईश्वरेण यस्य प्राणिनो ललाटपट्टे यदयोग्यमनुचितमप्यलेखि लिखितं तदयो-
ग्यमपि तस्य योग्यमुचितमर्थमपास्य प्रतिक्षिप्य स्याद्भवेत् । योग्यमर्थं परित्यज्य तत्स्थाने
स्वयमेवायोग्यमपि भवेदिति यावत् । अतो योग्यतया कार्यकारणभावे सति इह नलत्वस्य
संदेहेन निश्चयार्थं यां वासनां युक्तिमहं हृदा बिभृयां धारयेयं सा का वासना युक्तिरस्तु

भवतु । अपि तु एवंविधा बुद्धिर्नास्ति । चित्तेनान्यथाकर्तुं विचारितेऽपि ललाटपट्टलिखितादन्यथा न भवतीत्यर्थः । योग्यमप्ययोग्यमेव भवतीत्यत्र दृष्टान्तमाह—यतः जलजमम्भोजं अक्रान्तपैरुष्णैरपि सूर्यकिरणैर्दाहं न एति, हिमैस्तु पुनर्दाहं गच्छति । 'उष्णस्पर्शो दाहकः, शीतस्पर्शस्तु दाहशमक इति लोके दृष्टं, तदिदं विपरीतं जातं विरुद्धकार्योत्पत्तेर्विषमम् । नलस्य मम वा ललाटे यदीश्वरेणायोग्यमेव लिखितं, तर्हि परस्परयोग्यं परस्परं विहाय तस्य मम चायोग्यमेव भविष्यतीति कं प्रकारं चित्ते धारयिष्यामि । अपि तु न कमपीति देवानां न कोऽप्यपराध इति भावः ॥

तर्हि कल्पद्रुमो याच्यतामित्यत आह—

इत्थं यथेह मदभाग्यमनेन मन्ये कल्पद्रुमोऽपि स मया खलु याच्यमानः ।
संकोचसंज्वरदलाङ्गुलिपल्लवाग्रपाणीभवन्भवति मां प्रति बद्धमुष्टिः ॥५१॥

इत्थमिति ॥ इह नलैकत्वेऽपि समये वा इत्थमनेन नलानेकत्वभवनप्रकारेण यथा मादृक् ममाभाग्यं नलानिश्चयाद्यथा दैवाभावो दृश्यते अनेन हेतुना प्रकारेण वा सोऽतीववदान्यः कल्पद्रुमोऽपि खलु निश्चितं मया नलं याच्यमानः सन् मां प्रति बद्धमुष्टिरतिकार्पण्यसंकुचत्करो भवतीत्यहं मन्ये । किंभूतः—संकोच एव संज्वरः संतापो येषामेवंविधानि दलानि किसलयान्येवाङ्गुल्यो येषामेवंभूताः पल्लवा एवाग्रपाणयो हस्ताग्राणि यस्य एवंभूतोऽनेवंभूत एवंभूतो भवन् । अन्यस्यापि बद्धमुष्टेरङ्गुल्यः संकुचिता भवन्ति । कल्पवृक्षः कल्पितदानशीलोऽपि मदभाग्यवशान्मां प्रत्यदातेव भवेदिति भावः । अदातृत्वनिश्चयात् 'भवति' इति वर्तमानवत्प्रत्ययः ॥

देव्याः करे वरणमाल्यमथार्पये वा यो वैरसेनिरिह तत्र निवेशयेति ।
सैषा मया मखभुजां द्विषती कृता स्यात्स्वस्मै तृणाय तु विहन्मि न बन्धुरत्नम्

देव्या इति ॥ अथवा इह स्वयंवरे एतेषु पञ्चसु मध्ये वा यो वैरसेनिः सत्यनलः तं त्वं तावज्जानासि अतस्तत्र एतां मालां निवेशय निक्षिपेत्युक्त्वा देव्याः सरस्वत्याः करे वरणमाल्यं वरणमधूकमालामर्पये ददामीति संभावना । स्वयमेवैतद्दूषयति—एवं क्रियमाणे सा एषा देवी मया मखभुजां देवानामिन्द्रादीनां द्विषती वैरिणी कृता स्यात् । तन्माप्यनिष्टमादित्यर्थः । भवतु नाम सा तद्वैरिणी स्वकार्यसिद्धिस्तु स्यादित्यत आह—तु पुनः तृणतुल्यायातिनिःसाराय स्वस्मै स्वरूपाय अकिंचित्करस्वकार्यसिद्धये बन्धुरत्नं सुहृन्मध्येऽतिश्रेष्ठां देवीं न विहन्मि । मम यत्किंचिद्भवतु, परं तु देवद्वेषरूपं निजनिघातं न करोमीत्यर्थः । अन्योऽपि सुहृत्तृणार्थं रत्नं न विनाशयति । द्विषती, 'द्विषोऽमित्रे' इति शतरि उगित्त्वान्ङीप् । मखभुजां, 'द्विषः शतुर्वा' इति षष्ठी ॥

यः स्यादमीषु परमार्थनलः स मालामङ्गीकरोतु वरणाय ममेति चैनाम् ।
तं प्रापयामि यदि तत्तु विसृज्य लज्जां कुर्वे कथं जगति शृण्वति ही विडम्बः ॥५२

य इति ॥ अमीषु पञ्चसु मध्ये यः परमार्थनलः सत्यनलः स्यात् स मम वरणाय मालामङ्गीकरोत्वित्येवं प्रकारेण, इत्युक्त्वा चेति वा । यदि एतां च मालां तत्र तेषु मध्ये

तं सत्यनलं प्रापयामि, तत्पुनर्लज्जां विसृज्य कथं कुर्वे। अपित्वेवं कर्तुमयुक्तम्। यतः—जगति सर्वस्मिन्सभाजने शृण्वति सति ही कष्टं विडम्बः। लज्जात्यागादतिपरिहासो भविष्यतीति शेषः। सर्वेषां समक्षमेवं लज्जात्यागात्सर्वेऽप्युपहसिष्यन्तीत्यर्थः। ही इति खेदे। हि इत्यादर्थे, इः खेदे इति वा। इतिचेति समुदायः प्रकारे। यदि चेति वा॥

इतरनलतुलाभागेष शेषः सुधाभिः स्नपयति मम चेतो नैषधः कस्य हेतोः।
प्रथमचरमयोर्वा शब्दयोर्वर्णसख्ये विलसति चरमेऽनुप्रासभासां विलासः॥

इतरेति॥ इतरैश्चतुर्भिर्नलैस्तुलां साम्यं भजत इति भाग्, एष शेषः पञ्चसु मध्ये अन्त्यः पञ्चमो नैषधः मम चेतः कस्य हेतोः केन कारणेन सुधाभिरमृतैः स्नपयति आप्लुतमिव करोति। रूपसाम्ये सत्यप्येष एव मम मनसे यतो रोचते, तस्मादयमेव सत्यनलो भविष्यतीत्याशयः। सत्यनलज्ञापकं निरुपाधिकपरमप्रेमसंवादं दृष्टान्तेन प्रथयति—प्रथमेति। वाथवा युक्तमेतत्। प्रथमचरमयोरादिमान्त्ययोः शब्दयोर्वर्णैरक्षरैः सख्ये मैत्र्यां सत्यामपि चरमे पाश्चात्त्ये शब्देऽनुप्रासभासां छेकानुप्रासवृत्त्यनुप्रासलाटानुप्रासाख्यशब्दालंकारकान्तीनां विलास उल्लासश्चमत्कारो विलसति विशेषेण शोभते। वर्णसाम्ये सत्यपि प्रथमस्यानायाससमलात्, द्वितीयस्य तु सदृशस्य पश्चाद्भूरिप्रयत्नसाध्यत्वाच्चरमे यद्यनुप्रासत्वं स्फुरति, तथापि द्वितीयसाहित्ये प्रथमेऽपि यथाऽनुप्रासत्वमस्ति तथा सुन्दरान्तरविच्छेदेन पश्चादवलोक्यमानतयैव पञ्चमश्चेतसे रोचते, नत्वत्र सत्यत्वं प्रयोजकम्। अतः सर्वेऽपि तुल्या एवेति भावः। अत्रायमेव श्लोको दृष्टान्तः। अत्रत्ययोरेव प्रथमचरमशब्दयोर्वर्णसाम्ये सत्यपि चरमे चरमशब्द एवानुप्रासातिशयः न प्रथमशब्दे प्रथम इत्युक्ते नानुप्रासः। प्रथमचरमयोरित्युक्ते तु चरम एवानुप्रासातिशयो दृश्यते न तथा प्रथम इत्यर्थ इति वा। यद्वा—आद्यपादचतुर्थपादयोर्वर्णसाम्ये सत्यपि चरमे चतुर्थपादेऽनुप्रासभासां विलासो विलसति। उभयोरनुप्रासत्वे सत्यपि चतुर्थेऽनुप्रासभासां विलास इत्युक्तेस्तत्रैवानुप्रासत्वम्, न तु प्रथमे। 'स्नपयति' इति मित्पक्षे ह्रस्वः। कस्य हेतोः, 'षष्ठी हेतुप्रयोगे' इति षष्ठी॥

इति मनसि विकल्पानुद्यतः संत्यजन्ती क्वचिदपि दमयन्ती निर्णयं नाससाद।
मुखमथ परितापास्कन्दितानन्दमस्या मिहिरविरचितावस्कन्दमिन्दुं निनिन्द॥

इतीति॥ इत्युक्तप्रकारेण मनसि उद्यत उत्पद्यमानान्विकल्पाननेकशङ्कावलम्बनबोधरूपोद्भावनेन संत्यजन्ती दमयन्ती क्वचिदपि निर्णयं निश्चयं नाससाद। पञ्चसु मध्ये कस्मिन्नपि पुंसि नलनिश्चयं न प्रापेति वा। अथ पश्चान्नलनिश्चयाभावात्परितापेनास्कन्दितोऽभिभूत आनन्दो यस्य। परितापेन कृत्वा आस्कन्दितोऽप्राप्त आनन्दो येनैवंभूतं वास्या मुखं कर्तृ। मिहिरेण सूर्येण रचितोऽवस्कन्दः पराभवो यस्यैवंविधमिन्दुं निनिन्द। निष्प्रभचन्द्रसदृशमभूदित्यर्थः। आस्कन्दनमास्कन्दः पराभवः। परितापेन य आस्कन्दः स संजातो यस्य एवंविध आनन्दो यस्येति तारकादित्वाद्रूपसिद्धिः॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।

---

१ 'तुलायानेष' इति सुखावबोधासंमतः पाठः।

स्वादूत्पादभृति त्रयोदशतयादेश्यस्तदीये महा-
काव्येऽयं व्यरमन्नलस्य चरिते सर्गो रसाम्भोनिधिः ॥

श्रीहर्षमिति ॥ अर्धं पूर्ववत् । स्वादूत्पादभृति सहृदयहृदयाह्लाददायित्वात्स्वादुरसोत्पत्तिधारकेऽत्यन्तमधुरनवार्थसहिते त्रयोदशतया आदेश्योऽभिधेयः सर्गो व्यरमत् । समाप्त इत्यर्थः । व्यरमत्, 'व्याङ्परिभ्यो रमः' इति परस्मैपदम् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते
नैषधीयप्रकाशे त्रयोदशः सर्गः ॥

चतुर्दशः सर्गः ।

अथाधिगन्तुं निषधेश्वरं सा प्रसादनामाद्रियतामराणाम् ।
यतः सुराणां सुरभिर्नृणां तु सा वेधसासृज्यत कामधेनुः ॥ १ ॥

अथेति ॥ अथ विकल्पदूषणानन्तरं सा भैमी निषधेश्वरं नलमधिगन्तुं निश्चेतुं प्राप्तुं च षोडशोपचारैरमराणां प्रसादनां परितोषणमाद्रियत आदरेण चकार । यतो वेधसा सुराणां कामधेनुरभिलाषप्रसूः सुरभिर्गौरसृज्यत सृष्टा, नृणां तु पुनः कामप्रसूः सा देवप्रसादना सृष्टा । तस्मान्नलनिश्चयार्थं प्राप्त्यर्थं च देवपरितोषणं चकारेति युक्तमित्यर्थः ॥

अथाधिगन्तुं निषधेशमेषां प्रसादनं दानवशात्रवाणाम् ।
अचेष्टतासौ महतीष्टसिद्धिराराधनादेव हि देवतानाम् ॥ १ ॥

अथेति । क्षेपकः ॥ अचेष्टत अकृत । शत्रव एव शात्रवाः । प्रज्ञादित्वात्स्वार्थेऽण् ॥

पूर्वोक्तार्थसमर्थनार्थमर्थान्तरन्यासमाह—

प्रदक्षिणप्रक्रमणालवालविलेपधूपाचरणाम्बुसेकैः ।
इष्टं च मृष्टं च फलं सुवाना देवा हि कल्पद्रुमकाननं नः ॥ २ ॥

प्रदक्षिणेति ॥ हि यस्मात् देवा नोऽस्माकं मनुष्याणां कल्पद्रुमकाननं बहवः कल्पवृक्षा एवेति कवेरुक्तिः । किंभूता देवाः—प्रदक्षिणं प्रक्रमणं वलयाकारं परिभ्रमणं तदेवालवालं वृक्षमूले जलधारणार्थं वलयाकारः सेतुः स च विलेपश्चन्दनादिलेपश्च धूपो दशाङ्गादिस्तेषामाचरणानि करणानि तान्येवाम्बुसेकाः (तैः) प्रदक्षिणायाचरणं चोदकसमनानि च तैर्वा । कृत्वा इष्टमभिलषितं मृष्टं च स्वभावसुन्दरं सुस्वादु च फलं मनोरथरूपमान्नादिकं च सुवाना उत्पादयन्तः । वृक्षा अप्यालवालवृक्षायुर्वेदोक्ततरुदोषनाशक(नि)विटङ्गादिलेपदोहदधूपाम्बुसेकैरिष्टं मृष्टं च फलं सुवते । 'आवरण–' इति पाठे अङ्गप्रस्तरदेवतापूजा कण्टकावृतिश्चेति व्याख्येयम् ॥

---

१ 'अत्रामरप्रसादनायाः कामधेनुत्वेन रूपणाद्रूपकालंकारः' इति जीवातुः । २ 'पूर्वोक्तस्यार्थो भङ्ग्यन्तरेण निबद्धः । अत एव पाठान्तरम् । केषुचिदादर्शेषु त्वयं श्लोको नास्त्येव' इति सुखावबोधा । अत एव जीवातौ न व्याख्यायि । ३ 'अत्र प्रदक्षिणप्रक्रमणादीनामालवालप्रभृतिरूपणात्, देवेषु कल्पद्रुमरूपणाच्च समस्तवस्तुवर्तिरूपकम्' इति जीवातुः ।

पूजाप्रारम्भार्थं प्रथमं नमस्कारमाह—

श्रद्धामयीभूय सुपर्वणस्तान्ननाम नामग्रहणाग्रकं सा।
सुरेषु हि श्रद्दधतां नमस्या सर्वार्थसिद्ध्यङ्गमिथः समस्या॥ ३॥

श्रद्धेति॥ सा श्रद्धामयीभूय आस्तिक्यप्रचुरा भूत्वा तान्नलवेषधारिणः सुपर्वणो देवान् नामग्रहणाग्रकमिन्द्राय नम इत्यादिनामग्रहणपूर्वकं ननाम ववन्दे। हि यस्मात्सुरेषु श्रद्दधतां श्रद्धावतां नमस्या नमस्कार एव सर्वार्थसिद्धेः यान्यङ्गानि साधकानि तेषां मिथः समस्या परस्परपूरणहेतुः श्रद्धापूर्वं देवनमस्कार एव कारणसामग्रीसंपादकः, तस्मादेवं नमस्कृतवतीत्यर्थः। समस्यापि पदानां परिपूरणं करोति। श्रद्धामयी, प्रकृतवचने मयट्। अग्रकम्, 'शेषाद्विभाषा' इति कः(प्)। नमःकरणं नमस्या, 'नमोवरिवः—' इति क्यच्॥

देवपूजाङ्गध्यानं प्रथममाह—

यत्तान्निजे सा हृदि भावनाया बलेन साक्षादकृताखिलस्थान्।
अभूदभीष्टप्रतिभूः स तस्या वरं हि दृष्टा ददते परं ते॥ ४॥

यदिति॥ सा अखिलस्थान्सर्वगतान्तानिन्द्रादीन्भावनाया ध्यानस्य बलेन सामर्थ्येन निजे हृदि यत्साक्षादकृत प्रत्यक्षीचकार। सर्वगतानपि ध्यानबलेनैकत्रानीय ददर्शेत्यर्थः। स साक्षात्कार एव तस्या भैम्या अभीष्टस्य नलप्राप्तिलक्षणस्य प्रतिभूर्दाननिश्चयकर्ता अभूत्। हि यस्माद्दृष्टास्ते देवाः परं श्रेष्ठं वरमभीष्टं परिणेतारं च ददते प्रयच्छन्ति। नहि देवदर्शनं निष्फलं भवतीत्यर्थः॥

इदानीं देवपूजामाह—

सभाजनं तत्र ससर्ज तेषां सभाजने पश्यति विस्मिते सा।
आमुद्यते यत्सुमनोभिरेवं फलस्य सिद्धौ सुमनोभिरेव॥ ५॥

सभाजनमिति॥ सा तत्र स्वयंवरस्थाने अकस्मादेव देवपूजारम्भादत्यादरेण न पूजनाद्विस्मिते साश्चर्ये सभाजने सभालोके पश्यति सति, तमनादृत्य वा। तेषां देवानां सभाजनं प्रीत्याराधनं ससर्ज चक्रे। यद्यस्मात्फलस्याभीष्टस्य सिद्धौ दाने सुमनोभिः शोभनचित्तैरेवं तैरेव सद्भिः सुमनोभिर्देवैरेवमत्यादरपूजनेन कृत्वा आमुद्यते हृष्टैर्भूयते। तस्मादेवमपूजयदित्यर्थः। एवमेव एवं सत्येवेत्येवकारयोजना वा। पुष्पैरपि फलसिद्ध्यर्थमामुद्यते विकस्वरीभूयते। सभाजने, 'यस्य च भावेन' इति, 'षष्ठी चानादरे' इति वा सप्तमी॥

वैशद्यहृद्यैर्म्रदिमाभिरामैरामोदिभिस्तानथ जातिजातैः।
आनर्च गीत्यन्वितषट्पदैः सा स्तवप्रसूनस्तवकैर्नवीनैः॥ ६॥

वैशद्येति॥ अथ सा नवीनैर्नवैः स्तवैः स्तुतिश्लोकरूपैः प्रसूनस्तवकैः पुष्पगुच्छैः स्तुतिश्लोकैः पुष्पगुच्छैश्च वा तानिन्द्रादीनानर्च। किंविधैः-वैशद्येन स्पष्टतया प्रसादगुणेन हृद्यैः

---

१ 'निध्यङ्ग—' इति जीवातुः। २ 'सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः' इति जीवातुः। ३ 'अत्रोभयेषामपि सुमनसामुभयोरप्यामोदयोश्च फलयोरभेदाध्यवसायेनायमर्थान्तरन्यासः' इति जीवातुः।

सहृदयप्रियैः । अथ च—शुभ्रत्वेन मनोज्ञैः । तथा—म्रदिम्ना निष्ठुरटवर्गादिवर्णरहितश्रुतिमधुरवर्णरचनजनितेन माधुर्येण । अथ च—सौकुमार्येण अभिरामैः । अत एव—आमोदिभिर्हर्षजनकैः । अथ च—सौगन्ध्यसहितैः । तथा—जातैः षड्विंशत्यक्षरजनितचरणान्तायाः, अनुष्टुबादिजातेर्वा जातैः निष्पन्नैः । अथ च—मालतीसंभवैः । तथा—विशेषरूपया गीत्या अन्विता युक्ताः षट्पदाः षट्चरणाः श्लोका यत्र । अथ च—गुञ्जन्मधुकरैः । वैशद्यं शब्दार्थालंकारापशब्दभावदोषराहित्यं तेन मनोज्ञैर्वा । 'जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः' 'गीतिश्छन्दसि गाने च' इति विश्वः । हृद्येति, 'हृदयस्य प्रियः' इति यत् । 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृत् । अभिरम्यते यैस्तैरभिरामैः, 'अकर्तरि च कारके–' इति चकारादसंज्ञायामपि करणे घञ् । जात्यादिलक्षणं छन्दोग्रन्थेभ्यो ज्ञातव्यम् । 'न वा कैः' इति पाठे कैः वा स्तवस्तवकैः न आनर्च, अपि तु नानाप्रकारैः स्तवप्रसूनस्तवकैरपुपूजदित्यर्थः ॥

पूजानन्तरं पुनरपि ध्यानमाह—

हृत्पद्मसद्मन्यधिवास्य बुद्ध्या दध्यावथैतानियमेकताना ।
सुपर्वणां हि स्फुटभावना या सा पूर्वरूपं फलभावनायाः ॥ ७ ॥

हृदिति ॥ अथ पूजानन्तरमियमेकतानाऽनन्यवृत्तिस्तत्परा सती हृदेव पद्मं तद्रूपे सद्मनि गृहे एतानिन्द्रादीन्बुद्ध्याधिवास्याधिष्ठाप्य दध्यौ । सर्वगतानामपि देवानां हृदये बुद्ध्या समारोपितं रूपं ध्यानेन साक्षादकृतेति यावत् । हि यस्मात्सुपर्वणां देवानां या स्फुटा भावना ध्यानबलेन प्रत्यक्षता सा फलभावनायाः कार्यसिद्धेः पूर्वरूपं प्रथमं स्वरूपम् । कारणस्य कार्यापेक्षया नियतप्राग्भावित्वाद्देवानां प्रत्यक्षतायाः कार्यमात्रं प्रति कारणत्वात्कारणसामग्रीरूपां देवप्रत्यक्षतां ध्यानेनाकृतेत्यर्थः । पूजायाः पूर्वमनन्तरं च ध्यानस्येष्टत्वात् 'यत्तान्' (१४।४) इत्यस्यास्य (१४।७) च श्लोकस्य न पौनरुक्त्यम् । 'उपान्वध्याङ्वसः' इत्यत्राप्यन्तस्य वसेर्ग्रहणात् 'स्वहस्तदत्ते मुनिमासने–' इतिवण्ण्यन्तस्य वसेः प्रकृत्यन्तरत्वात् हृत्पद्मसद्मनीत्याधारस्य न कर्मत्वम् ॥

भक्त्या तयैव प्रससाद तस्यास्तुष्टं स्वयं देवचतुष्टयं ततः ।
स्वेनानलस्य स्फुटतां यियासोः फूत्कृत्यपेक्षा कियती खलु स्यात् ॥ ८ ॥

भक्त्येति ॥ तस्याः पातिव्रत्यादिगुणैरादावेव भक्तिनिरपेक्षं स्वयमात्मनैव तुष्टं तदिन्द्रादिदेवचतुष्टयं तस्यास्तयैवाल्पीयस्यापि भक्त्या पुनः प्रससाद प्रसन्नमभूत् । अल्पीयस्या भक्त्या प्रसन्नतायां दृष्टान्तमाह—खलु यस्मात्स्वेनात्मनैव स्फुटतां प्राकट्यं यियासोर्यातुमिच्छतो लब्धबहुसंधुक्षणतया आसन्नप्रज्वलनस्यानलस्य वह्नेः कियती संधुक्षणार्थं फूत्कृतेर्मुखपवनस्या-

---

१ 'अत्र स्तवानां प्रसूनस्तवकानां चोभयेषामप्यर्चनसाधनत्वेन प्रकृतानां धर्मैक्येऽस्ते (तौल्ये) नौपम्यस्य गम्यमानत्वात्केवलप्रकृतविषया तुल्ययोगिता' इति जीवातुः । २ 'सुखावबोधायां तु 'यत्तान्–' (१४।४) इति श्लोकोत्तरमेतमनेन व्याख्याय 'पूर्वोत्तरार्धे व्यत्यासोऽत्र निबद्धः । अत एव पाठान्तरम्' इत्युपलक्षितम् । अत एव जीवातौ न व्याख्यायि । ३ 'ये तु स्थूलदृशः 'तत्र सामान्यमन्वयम्' इति मत्वा 'हृत्पद्मसद्म' इति कर्मपदं प्रकृत्य 'न्यधिवास्य' इति योजयन्ति । 'तदज्ञानविलसितमित्युपेक्ष्यम्' इति सुखावबोधा ।

पेक्षा स्याद्भवेत्। अपिलल्पैव। तादृशोऽग्निर्द्वित्रैरेव फूत्कारैः संधुक्षितो दीप्यतेतरामित्यर्थः। तस्मात्स्वतः प्रसन्नस्याल्पयापि भक्त्या पुनः प्रसन्नत्वं युक्तमित्यर्थः। 'तस्याश्चरित्रादथ ते त्वात्प्रागेव दृष्ट्वा झटिति प्रसेदुः' इत्यपि पाठः स्पष्टार्थः॥

प्रसादफलमाह—

प्रसादमासाद्य सुरैः कृतं सा सस्मार सारस्वतसूक्तिसृष्टेः।
देवा हि नान्यद्वितरन्ति किंतु प्रसद्य ते साधुधियं ददन्ते॥९॥

प्रसादमिति॥ सा भैमी सुरैः कृतं प्रसादमासाद्य सरस्वत्या इमाः सारस्वत्यस्ताश्च सूक्तयश्च शोभनोक्तयः श्लेषवाक्यानि तासां सृष्टेर्निर्माणस्य। रचनामित्यर्थः। सस्मार। स्मृत्वा संदेहं परित्यज्य गाथाक्रमेणेन्द्रादींश्चतुरोऽपि ज्ञात्वा अयं पञ्चमो नल इत्यजानादित्यर्थः। देवीवचनस्मरणरूपः को नाम प्रसाद इत्यत आह—हि यस्माद्देवा अन्यत्किंचिन्न वितरन्ति न ददति किंतु देवाः प्रसद्य प्रसन्ना भूत्वा साध्वीं कार्यसाधिकां धियं बुद्धिमेव ददन्ते। तदुक्तं भारते—'न देवा दण्डमादाय रक्षन्ति पशुपालवत्। यं तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम्॥' इति। तस्मादयमेव प्रसादो युक्त इत्यर्थः। सृष्टेः, 'अधीगर्थ–' इति कर्मणि षष्ठी। ददन्ते, 'दद दाने' इत्यस्य रूपम्॥

स्मरणमेव विशदयति—

शेषं नलं प्रत्यमरेण गाथा या या समर्था खलु येन येन।
तां तां तदन्येन सहालगन्तीं तदा विशेषं प्रतिसंदधे सा॥१०॥

शेषमिति॥ शेषं पञ्चमं सत्यनलं प्रति लक्ष्यीकृत्य 'ब्रूमः किम्–' (१३ स. ३ श्लो.) इत्यादिः 'आकर्ण्य–' (१३।८) इति यावत्, 'एष' (१३।१०) इत्यादिः 'साधारणीम्–' (१३।१४) इति यावत्, 'दण्डम्–' (१३।१६), इत्यादिः 'गुम्फः–' (१३।२०) इति यावत्, 'या सर्वतः–' (१३।२२) इत्यादिः 'शङ्का–' (१३।२६) इति यावत्, या या गाथा प्रसादात्पूर्वं येन येनेन्द्रादिदेवेन सह समार्था तुल्यार्था ['सरस्वत्योक्ता' इति शेषः] सा भैमी तां तां 'ब्रूमः–' (१३।३) इत्यादिगाथां तदा प्रसादानन्तरं तदन्येन तस्मात्तस्मादिन्द्रादिदेवादन्यत्वादर्थादन्येन श्लेषशक्त्या प्रतिभासमानेन नलरूपेणार्थेन सह खलु निश्चितमलगन्तीमसंबद्धार्थां विशेषं प्रति स्वस्वाकारधारणाद्भिन्नमिन्द्रादिदेवं प्रति संदधे योजयामास। इयमेतस्य गाथा इयमेतस्य गाथेति संबन्धं चकारेत्यर्थः। 'ब्रूम–' (स. १३ श्लो. ३) इत्यादौ 'बलं विलोक्य–' (१३।२७) इति यावन्नलस्य सर्वत्रानुस्यूतत्वादिन्द्रादीनां तु चतसृषु चतसृषु स्वस्वगाथास्वनुस्यूतत्वात्तां तामिन्द्रादिगाथां तदन्येन वरुणादिना सह अलगन्तीं विशेषमज्ञासीत्। या इन्द्रेण नलेन च समानार्था तामिन्द्रविषयामेव सस्मार। एवमितरदेवत्रितयेऽपि प्रत्येकं गाथानेकविषयामेव सस्मार। एवं चतसृष्वपि गाथासु नलस्यानुवृत्तेरिन्द्रादीनां च व्यावृत्तेरन्वयव्यतिरेकाभ्यामेते देवाः, अयमेव नलः, इत्यज्ञासीदित्याशय इति वा प्रतिश्लोकं गाथार्थः॥

२ 'अत्र वाक्यद्वये भक्तिफलयोः कार्यानपेक्षितलक्षणसमानधर्मस्यैव कारको वस्तुभ्यां प्रत्य प्रतिबिम्बतयोक्तेर्दृष्टान्तालंकारः' इति जीवातुः।

चतुर्भिश्चतुर्भिः श्लोकैरेकैकस्य प्रतिपादनादेकगाथात्वसमारोपात्प्रत्येकपर्यवसानाद्वैकवचनम् । यद्वा—यजनं नलं प्रति या या 'अस्याग्नि' (१३।२८) 'येनामुना' (१३।२९) 'यचण्डिना' (१३।३०) 'किं ते तथा–' (१३।३१) इत्यादिका गाथा येन येन इन्द्रादिना सह संबद्धार्था तदन्येन वह्न्यादिना सहासक्तार्थां तां गाथामेव विशेषं नेदं जानाति स्म । एकैकस्या गाथाया एकैकदेवपर्यवसानाच्चतसृणामपि गाथानां नले पर्यवसानात्परिशेषप्रमाणात् अयं यजन एव नल इति विशेषनज्ञासीदित्यर्थः । अस्मिन्पक्षे—अमुनेवार्थमुक्तिविशेषेण प्रकटयितुमाह—एकैकेत्युत्तरश्लोकस्यावतारिका कर्तव्या ॥

एकैकवृत्तेः प्रतिलोकपालं पतिव्रतात्वं जगृहुर्दिशां याः ।
वेद स गाथा मिलितास्तदासावाशा इवैकस्य नलस्य वश्याः ॥ ११ ॥

एकैकेति ॥ या गाथा एकैकवृत्तेरेकैकस्मिन्नेकस्मिन्निन्द्रे, अग्नौ, यमे, वरुणे च वर्तनात्त्वात्प्रतिलोकपालमेकैकदिक्पालं प्रति दिशामिन्द्रादीनां पतिव्रतात्वं जगृहुरङ्गीचक्रुः । प्रत्यक्षेनामिन्द्रादिप्रतिनियतदेववृत्तितया यस्यातिमत्त्वं तस्यातिमत्त्वं, तेनैवाकारेण या 'अस्याग्नि–' (१३ सर्गे २८ श्लोक) इत्यादिगाथा अर्थाश्चक्रुरित्यर्थः । ता गाथा मिलिताश्चतस्रोऽपि तदा प्रसादानन्तरमसावेकस्य केवलस्य नलस्य वश्या नलैकप्रवणा नलैकाभिधायिनीरेव वेद स्म अज्ञासीत् । का इव–आशा इव । मिलिता दिशो यथा नलस्य वश्याः ऐन्द्र्यादीनां दिशामिन्द्राद्येकैकप्रवणत्वेऽपि सर्वासां दिशां चक्रवर्तिनलैकवश्यत्वं यथा, तथा गाथानामपीत्यर्थः । आशा अर्थिनां मनोरथाः यदाप्यतदा नलस्य यथा वश्या इति वा । 'दासाः' इति वा पाठः । भ्रान्तिदशायामुभयार्थत्वम् । प्रसादानन्तरं तु नलैकार्थत्वं वेद स्मेति भावः । दिशां पातिव्रत्यं गाथाभिर्गृहीतमित्यर्थः ॥

या पाशिनैवाशनिपाणिनैव गाथा यमेनैव समाग्निनैव ।
तामेव मेने मिलितां नलस्य सैषा विशेषाय तदा नलस्य ॥ १२ ॥

येति ॥ 'किं ते–' (१३।३१) इत्यादिर्या गाथा पाशिनैव वरुणेनैव समा तुल्यार्था नलस्येन्द्रादिना, या च 'अस्याग्नि–' (१३।२८) इत्यादिर्गाथा अशनिपाणिना इन्द्रेणैव समा नलान्येन देवेन, या च 'यचण्डिना–'(१३।२९) इत्यादिर्गाथा यमेनैव समा नलान्येन, या च 'येनामुना–' (१३।३०) इत्यादिरग्निनैव तुल्या नलान्येन, नलस्य संबन्धिनीं मिलितां समुदितां चतुष्टयरूपां तां गाथामेव तदा देवप्रसादानन्तरं सैषा मैमी नलस्य विशेषायेन्द्रादिभ्यो भेदज्ञानाय मेने । इन्द्रादीनामेकैकस्यैव गाथायां पर्यवसानात्, नलस्य तु सर्वगाथागतत्वात्, 'अस्याग्नि–' इत्यादिगाथाचतुष्टयाभिधायी यः, स एव नल इति तामेव गाथां मिलितां नलस्य भेदज्ञापिकामङ्गीचकारेति भावः । या नलस्य गाथेति वा संबन्धः । या पाशिनैवेन्द्रेणैव, यमेनाग्निनैव समा तथा नलस्य संबन्धिनीं मिलितां तामेवानलस्य नलव्यतिरिक्तस्य इन्द्रादेर्भेदाय मेने । मिलितया समा तुल्या नले मिलिते सति समानविषयत्वात्तदितरे देवा अपि तथैव मिलिता इति भाव इति वा । मिलितां तामेव गाथां नलस्य विशेषाय तदा नलेऽन्यस्मिन्निन्द्रादिभेदाय मेने इति वा व्याख्येयम् । या पाशिनैवे

स्यादेरेवकारान्परस्परसमुच्चयार्थानप्यनौकत्ता या नलसंचन्धिनी गाथा पाशिनापि, इन्द्रेणापि शमेनापि, अग्निनापि तुल्यार्थाभूत् तां 'देवः पतिः—' (१३।३४) इत्यादि मिलित्वा पञ्चार्थां गाथां देवप्रसादादनन्तरं नलस्यैव विशेषाय मेने। देवैः प्रसन्नैः स्वीयस्वीयरूपे धृतेषु पूर्वं पञ्चार्थत्वेन प्रतिभातामपीदानीमेकस्य नलस्यैव प्रतिपादिकामज्ञासीदिति भावः इति। 'देवः पतिः—' (१३।३४) इतीयमेव गाथा विषय इति ज्ञेयम्। अवधारणार्थस्यैक(व)कारेष्वियमेव गाथा विषय इति व्याख्येयम्। अयं श्लोकः 'शेषं नलम्' 'एकैकवृत्तेः' (१४।११) इति द्वाभ्यां श्लोकाभ्यां समानार्थः। अनलस्येति प्रत्येकपर्यवसायित्वाद्वचनम्॥

निश्चित्य शेषं तमसौ नरेशं प्रमोदमेदस्वितरान्तराभूत्।
देव्या गिरां भावितभङ्गिराख्यच्चित्तेन चिन्तार्णवयादसेयम्॥ १३॥

निश्चित्येति॥ असौ भैमी शेषमवशिष्टं तं पञ्चमं पूर्वोक्तप्रकारेण नरेशं नलं निश्चित्य प्रमोदेन प्रकृष्टहर्षेण मेदस्वितरमत्यन्तपरिपुष्टं सोल्लासमान्तरं मानसं यस्या एवंभूताभूत्। नले निश्चिते सति नितरां हृष्टाभूदित्यर्थः। रलयोः सावर्ण्यान्नलश्चासावीशश्च तमिति वा। अनन्तरं च देव्याः सरस्वत्याः गिरां वचनानां भाविता पर्यालोचिता भङ्गिः प्रकारो यया [illegible] शया गिरां देव्याः सरस्वत्या वा विज्ञातवचोरचनाविशेषा सती नलनिश्चयात्पूर्वं [illegible] दसा चिन्तासमुद्रजलजन्तुरूपेण नलनिश्चये सत्यपि तत्प्राप्त्युपायचिन्तासमुद्रजलचरेण [illegible] चित्तेन मनसा इदं वक्ष्यमाणप्रकारमाख्यदूचे। मनस्येवैवमचिन्तयदिति भावः। 'चित्रार्णव-' इति पाठे विचित्रदेवीवचनानुसरणजनिताश्चर्यसमुद्रजलचरेणातिसाश्चर्येणेत्यर्थः॥

किमाख्यदित्याह—

सा भङ्गिरस्याः खलु वाचि कापि यद्भारती मूर्तिमतीयमेव।
श्लिष्टं निगद्यादृत वासवादीन्विशिष्य मे नैषधमप्यवादीत्॥ १४॥

सेति॥ खलु निश्चितं सा प्रसिद्धा मूर्तिमती भारती सरस्वती देवी इयमेव 'इयं मूर्तिमती सा भारत्येव' इति भारतीत्वं विधेयम्। यद्यस्मादस्या वाचि कापि लोकोत्तरा भङ्गिरचनास्ति तस्मादित्यर्थः। यस्मादियमेव मूर्तिमती भारती तस्मादस्या वचने निश्चितं ता[illegible] भङ्गिरस्तीति वा। तामेव भङ्गीमाह—यत् श्लिष्टमुभयसंबद्धं वचो निगद्यास्पष्टमुक्त्वा [illegible] वादीनादृत गौरवेणावर्णयत्। विशिष्य विशेषं कृत्वा तेभ्यो विशिष्य वा। यत् 'अत्याजि' (१३।२८) इत्यादिश्लोकचतुष्टयेन मे मम मह्यं वा नैषधमप्यवादीत्। सर्वलोकपालानां नलस्यैव वर्णनं युक्तमिति भावः॥

जग्रन्थ सेयं मदनुग्रहेण वचःस्रजः स्पष्टयितुं चतस्रः।
द्वे ते नलं लक्षयितुं क्षमेते ममैव मोहोऽयमहो महीयान्॥ १५॥

जग्रन्थेति॥ सेयं वाणी मयि मम वाऽनुग्रहेण कृपया स्पष्टयितुं नलं स्पष्टं [illegible] याः चतस्रः 'अत्याजि—' (१३।१८) इत्यादीर्वचःस्रजः वचनमाला जग्रन्थ ससर्ज,

१ 'केपुच्चिदादर्शेषु 'शेषं नलम्, एकैकवृत्तेः' (१४।११) इति गाथाद्वयेन गतार्थत्वादियं गाथा ना[illegible] इति सुखावबोधा। अत एव जीवातौ न व्याख्याता।

ध्ये ते द्वे वचःस्रजौ 'नामग्राहं मया त्वमुदीरितम्' (१३।२९) 'न मे सहजरागभरात्' १३।३०) इत्येवंरूपे, 'महीनमहेन्द्रः' (१३।२८) 'त्वमुदीरितम्' (१३।२९) इत्येवंरूपे । नलं लक्षयितुं ज्ञापयितुं क्षमेते समर्थे भवतः । अहो आश्चर्ये—मम एवायमेतावन्तं कालं हीयान्मोहः अबोधः । नले स्पष्टं कथितेऽप्येतावन्तं कालं मम निश्चयो नाभूदित्याश्चर्य-मेत्यर्थः । पूर्वोक्ता एव चतस्रो वचःस्रजः स्पष्टयितुं तदर्थं सष्टीकर्तुं ये द्वे ते वचःस्रजौ 'त्वं ार्थिनी' (१३।३३) 'देवः पतिः' (१३।३४) इत्येवंरूपे सेयं देवी जग्रन्थ, ते द्वे वचः-स्रजौ नलं लक्षयितुं क्षमे समर्थे । 'त्वं यार्थिनी' (१३।३३) इत्यनेन प्रथमव्याख्याने स्फुटं लस्यैव प्रतिपादनाद्व्याख्यानान्तरे च देवान्परितोष्य संलज्य वा नल एव स्वीकरणीय इति ावदर्थं नलस्यैव प्रतिपादनात् 'देवः पतिः—' (१३।३४) इत्यनेनापि लोकपालांशत्वान्नल-यैव पक्षपक्षसंभवादिन्द्रादेश्चासंभवान्नलादन्यत्तव कतरो वरः, अपितु 'अन्यो नास्ति' त्यपि नलस्यैव प्रतिपादनादित्यर्थ इति वा । अत्र पूर्वस्तच्छब्दो विशेष्यवचःस्रक्परामर्शार्थः । उत्तरस्तु तत्परामर्शकोऽपि विधेयसंस्पर्शी । यत्तदोश्च नित्यसंबन्धाद्यच्छब्दः संबध्यते । 'श्रन्थि-ग्रन्थिदम्भिस्वञ्जां चेति वक्तव्यम्' इति विल्लम्पितो लिटः कित्त्वविधानात् 'जग्रन्थ' इति रूपम् । 'संयोगान्तस्य लिटो वा कित्त्वमिति केचित्' इति अपितो लिटः कित्त्वविधानाद्वा लोपाभावः समर्थनीयः । युक्त्यन्तरेण वा समाधातव्यम् ॥

श्लिष्यन्ति वाचो यदमूरमुष्याः कवित्वशक्तेः खलु ते विलासाः ।
भूपाललीलाः किल लोकपालाः समाविशन्ति व्यतिभेदिनोऽपि ॥१६॥

श्लिष्यन्तीति ॥ अमुष्या देव्याः अमूः पूर्वोक्ता वाचः यदनेकार्थतया श्लिष्यन्ति श्लेषं भजन्ते खलु निश्चितं कवित्वशक्तेः काव्यनिर्माणसहप्रतिभायाः विलासा विजृम्भणानि । कवि-त्वशक्तिं विना श्लेषवचोरचना निर्मातुमशक्येत्यर्थः । किल यस्माद्व्यतिभेदिनोऽपि परस्परापेक्षया नलापेक्षया वा विशेषेण सहस्रनेत्रत्वादिनाऽतितरां भिन्ना अप्यमी लोकपाला भूपालस्य नलस्य लीला विलासान्समाविशन्त्यनुभवन्ति नलाकारं बिभ्रति । अथ च नलवर्णकेषु श्लोकेषु मूर्तीभूय प्रविष्टा एव दृश्यन्त इत्यर्थः । अतः श्लेषवशान्मम भ्रमोऽभूदिति भावः । 'श्लेषव-शात्सलीलाः सन्तो लोकपाला गाथाः समाविशन्तीति वा । अन्योन्यं भिन्ना अपि लोकपाला नललीलाः सन्तोंऽशेन नृपत्वं प्राप्ताः सन्तः किल एकीभवन्ति । अतो नलस्यैव लोकपालां-शतया तत्र प्रयुक्तानि देवीवचांसि श्लेषं वदन्तीति कवित्वशक्तिविलासा एव ॥

त्यागं महेन्द्रादिचतुष्टयस्य किमभ्यनन्दत्क्रमसूचितस्य ।
किं प्रेरयामास नले च तन्मां सा सूक्तिरस्या मम कः प्रमोदः ॥ १७॥

त्यागमिति ॥ इयं देवी 'अलाजि' (१३।२८) 'येन' (१३।२९) इत्यादिना श्लोकचतु-ष्टयेन 'त्वं यार्थिनी' (१३।३३) 'देवः पतिः—' (१३।३४) इत्यादिश्लोकद्वयेनापि क्रमेण सूचितस्य प्रख्यापितस्येन्द्रादिदेवचतुष्टयस्य पूर्वव्याख्यानप्रकारेण परित्यागं किं कथमनन्दत-स्तुत । दुक्तेतदिति स्तौति स्तेत्यर्थः । नले मां पूर्वव्याख्यानप्रकारेण प्रेरयामास च किं, कथं प्रेरयामास । एकेनैव वाक्येन द्वयमपि कथं चकार, आश्चर्यमेतदित्यर्थः । किंशब्दावत्रा-श्चर्ये । नले च । नल एवेति चकारोऽवधारणार्थो वा । तदत्याश्चर्यकारणादस्या देव्याः का सूक्तिः

शोभनवचननिर्माणचातुरी । अपि तु लोकोत्तरा । मम प्रकृष्टो मोहश्च कः, अपि तु लो- लोकोत्तरः । अस्या इयमुक्तिः क्व, मम मोहश्च क्वेत्यर्थः । एवं देव्या इन्द्रादिचतुष्टयस्य परित्यागेऽभ्यनुज्ञाते नलस्य च वरणेऽभ्यनुज्ञाते ममैवं मोहो न युक्त इत्यर्थः । पूर्वं मोहो भूदिदानीं तु निवृत्त इत्याशयः । इन्द्रादित्यागं किमर्थमभ्यनन्दत्, नले च मां किमर्थं प्रे- र्यामास, उभयमपि तावच्चकार तदेतन्मदनुग्रहार्थमेवेति भाव इति वा । त्यागम्, 'चजोः' इति कुत्वम् ॥

एवं विचारानन्तरं किमभूत्तत्राह—

परस्य दारान्खलु मन्यमानैरस्पृश्यमानाममरैर्धरित्रीम् ।
भक्त्यैव भर्तुश्चरणौ दधानां नलस्य तत्कालमपश्यदेषा ॥ १८ ॥

परस्येति ॥ एषा भैमी तत्कालं देवप्रसादसमये एवंभूतां धरित्रीं पृथ्वीमपश्यत् । किंभूताम्—परस्य नलस्य दारान्पत्नीं मन्यमानैरिव परनारीबुद्ध्यैव अमरैरिन्द्रादिभिरस्पृश्य- मानाम् । खलुरिवार्थे । तथा—भूपतित्वाद्भर्तुर्नलस्य भक्त्यैव सेवाबुद्ध्यैव चरणौ दधानां धार- यन्तीम् । अन्यापि भक्त्या भर्तुश्चरणौ धारयति देवत्वात्सहजो भूम्यस्पर्शो मनुष्यत्वात्सहजो भूमिस्पर्शोऽन्यथोत्प्रेक्षितः । देवमनुष्यचिह्ने दर्शिते । 'दारानिव' इति वा पाठः ॥

सुरेषु नापश्यदवैक्षताक्ष्णोर्निमेषमुर्वीभृति संमुखी सा ।
इह त्वमागत्य नले मिलेति संज्ञानदानादिव भाषमाणम् ॥ १९ ॥

सुरेष्विति ॥ सा भैमी संमुखी सती बुद्धिपूर्वं विलोकयन्ती सती सुरेषु अक्ष्णोर्निमेषं नेत्रपक्ष्मसंकोचं नापश्यत्, उर्वीभृति नले त्ववैक्षत । देवानामनिमेषत्वान्मनुष्याणां च सनिमे- षत्वादित्यर्थः । तत्रोत्प्रेक्षते—किंभूतं निमेषम्—संज्ञानदानादाकारणसूचकाक्षिपक्ष्मचेष्टाकर- णादिति भाषमाणमिव । इति किम्—हे भैमि, त्वं आगत्य इह मया चिह्निते नले मिलि संयुक्ता भवेति ॥

नाबुद्ध बाला विबुधेषु तेषु क्षोदं क्षितेरैक्षत नैषधे तु ।
पत्ये सृजन्त्याः परिरम्भमुर्व्याः संभूतसंभेदमसंशयं सा ॥ २० ॥

नेति ॥ सा तेषु विबुधेषु देवेषु क्षितेः क्षोदं भूरेणुं लग्नं नाबुद्ध न ददर्श, नैषधे त्वैक्षत ददर्श । देवानां रजःसंबन्धाभावान्नराणां तत्संबन्धादित्यर्थः । तत्रासंशयमुत्प्रेक्षते—(किं- भूतम्–) पत्ये नलाय परिरम्भमालिङ्गनं सृजन्त्या ददत्या उर्व्याः सकाशात्संभूतसंभेदमि- संजातसंबन्धमिव । आलिङ्गनवशाद्भूरेणुर्नले लग्न इवेत्यर्थः । पत्ये, 'क्रियया यमभिप्रैति' इति संप्रदानत्वम् ॥

स्वेदः स्वदेहस्य वियोगतापं निर्वापयिष्यन्निव संसिसृक्षोः ।
हीराङ्कुरश्चारुणि हेमनीव नले तयालोकि न दैवतेषु ॥ २१ ॥

स्वेद इति ॥ तया नले स्वेद आलोकि, न दैवतेषु देवेषु । किं करिष्यन्निव—संसिसृक्षोः भैम्यालिङ्गनं कर्तुमिच्छोः स्वदेहस्य नलशरीरस्य वियोगतापं भैमीवियोगजनितं ज्वरं निर्वाप- यिष्यन् (इव) शमयिष्यन् (इव) भैम्यालिङ्गनोत्सुकनलदेहस्य तापनाशकत्वादित्यर्थः ।

धंविकुचिरनीमिः पूर्वोक्तैर्भूसरादिभिश्चिह्नैः ... एतावं नल इत्यनुध्यवसायरूपः पूर्वं मम 'नलोऽयम्' इति प्रत्ययो गुप्त एव जातः इति ... नार न मा भैमी देवानरत्नाप ... लक्षणानां निमेषलभूसरादिचिह्नानां ... टैनासादितं प्राप्तं देवप्रसादमन्वबोधि । ... भूसरादिचिह्नानि न दृश्यन्ते, तु दृश्यन्ते, तस्मान्मम पूजया देवाः प्रसन्ना इत्यव्यजानादित्यर्थः ॥

नले निधातुं वरणस्रजं तां स्मरः स रामां त्वरयत्यथैनाम् ।
अपत्रपा तां निषिषेध तेन द्वयानुरोधं तुलितं दधौ सा ॥ २५ ॥

नल इति ॥ अथ स्मरतां वरणस्रजं वरणमधूकमालां नले निधातुं निक्षेप्तुं एनां ... भैमीं त्वरयति स्म शीघ्रं प्रेरयामास । अपत्रपा अन्यतो लज्जा च तां भैमीं निषिषेध ... यामास । सर्वेऽस्मिञ्जने पश्यति सति कथमद्यैनं वृण इति लज्जावशात्तस्या बुद्धिरुद्भूत... तेन कारणेन सा भैमी द्वयानुरोधं स्मरलज्जयोराज्ञां प्रवृत्तिनिवृत्तिसंदेहं तुलितं ... नमेव दधौ । भावसंधिवशादुत्कण्ठापत्रपाभ्यां नालानिक्षेपानिक्षेपदोलायितानुद्भूतं ... अन्योऽपि तुल्याभ्यां द्वाभ्यां विरुद्धकार्यद्वयार्थं प्रेषितो द्वयोरनुरोधादौदासीन्यमेवावलम्बते ... तामिति पुनरुपादानं वाक्यान्तरत्वात्समर्थनीयम् । निषिषेध, 'स्थादिष्वभ्यासेन—' इति ...

स्रजा समालिङ्गयितुं प्रियं सा रसादधत्तैव बहुप्रयत्नम् ।
स्तम्भत्रपाभ्यामभवत्तदीये स्पन्दस्तु मन्दोऽपि न पाणिपद्मे ॥ २६ ॥

स्रजेति ॥ सा भैमी रसात्प्रीत्या स्रजा मधूकमालया प्रियं नलं समालिङ्गयितुं बहु... भूयांसमुद्योगमधत्तैव चकारैव । तु पुनस्तदीये पाणिपद्मे स्तम्भत्रपाभ्यां हेतुभ्यां मन्दो... ल्पोऽपि सन्दश्चलनं नाभवत् ॥

तस्या हृदि व्रीडमनोभवाभ्यां दोलाविलासं समवाप्यमाने ।
स्थितं धृतैणाङ्ककुलातपत्रे शृङ्गारमालिङ्गदधीश्वरश्रीः ॥ २७ ॥

तस्या इति ॥ अधीश्वरी समर्था भूयसी अधीश्वरस्य कस्यचिद्राज्ञो वा श्रीर्लक्ष्मीः ... भैम्या हृदि स्थितं वर्तमानं शृङ्गारं शृङ्गाररसमालिङ्गत् । किंभूते हृदि—व्रीडमनो... दोलाविलासमान्दोलजनितां क्रीडां समवाप्यमाने प्राप्यमाणे । कोटिद्वयसंबन्धात्प्रवृ... त्तिसंदेहं प्राप्त इत्यर्थः । तथा एणाङ्कश्चन्द्रस्तस्य कुलं कुलोत्पन्नो नल इत्यर्थः । स एव ... धृतमेणाङ्ककुलातपत्रं येन तस्मिन् । शृङ्गाररस एव सम्राट् भैमीहृदयमेव सिंहासनं ... छत्रं लज्जाकामौ दोलाया उभयपार्श्वत आन्दोलनार्थं स्थितौ चामरधारिणौ वा । तस्या ... धिसंवलितः शृङ्गारो राजवदुज्जृम्भत इति भावः । दोलान्दोलने च भोगश्रियः ... ङ्गन्ति । अधीश्वरस्य नलस्य श्रीरिति वा । अत्र पक्षे ह्रीकामाभ्यां दोलायमानां भैमीं ... म्लानो नलः पूर्वं विप्रलम्भशृङ्गारं प्राप्तः ततः सापि तं तादृशं दृष्ट्वा तदीयशोभाङ्गीकार... मपि तादृशी बभूवेति भावः । आन्दोलिकाछत्रचामरैरयं प्रभुरिति विज्ञायत इत्यर्थः । '... इति पाठे हृदीति विषयसप्तमी ॥

---

१ 'एतेनास्या मध्यमानायिकात्वमुक्तम् । 'तुल्यलज्जास्मरा मध्या' इति लक्षणात्' इति जी...
२ 'श्रितम्' इति जीवातुसुखावबोधास्थः पाठः ।

करः स्रजा सज्जतरस्तदीयः प्रियोन्मुखः सन्विरराम भूयः ।
प्रियाननस्यार्धपथं ययौ च प्रत्याययौ चातिचलः कटाक्षः ॥ २८ ॥

कर इति ॥ स्रजा सज्जतरो नितरां सज्जः कण्ठे निक्षेप्तुमुच्चैःकृतमालः तदीयः करः प्रियोन्मुखो नलसंमुखं गन्तुं सोद्योगः सन्भूयः पुनः लज्जावशाद्विरराम निवृत्तः । तदीयोऽतिचलः कटाक्षश्च प्रियाननस्यार्धपथं ययौ च प्रत्याययौ च । दिदृक्षावशादर्धमार्गं गतोऽपि लज्जावशान्मध्येमार्गं नलकटाक्षसंबन्धाच्च पुनः प्रत्यावृत्त इति भावः । अन्योऽप्यतिचलो गतागते करोति ॥

तस्याः प्रियं चित्तमुपेतमेव प्रभूवभूवाक्षि न तु प्रयातुम् ।
सत्यः कृतः स्पष्टमभूत्तदानीं तयाक्षिण लज्जेति जनप्रवादः ॥ २९ ॥

तस्या इति ॥ तस्याश्चित्तं प्रियमुपेतमेव प्राप्तमेव । अक्षि तु पुनः नलं प्रयातुं प्राप्तुं न प्रभूवभूव समर्थं नाभूत् । सदृष्टमुत्प्रेक्षते—अक्ष्णि नेत्रे लज्जेति जनप्रवादो लोकाभाणकः तया तदानीं नलवरणसमये सत्यः कृतोऽभूत् । अन्यथा लज्जायाश्चित्तधर्मत्वे चित्तस्य नलप्राप्तियुक्ता, नेत्रस्य च नलप्राप्तिर्युक्तेत्यर्थः । व्रीडया चित्तं नल एव वर्तते परं लज्जावशात्कटाक्षेण विलोकयितुं नाशकदिति भावः । प्रभूवभूव, च्वौ दीर्घः ॥

कथं कथंचिन्निषधेश्वरस्य कृत्वास्यपद्मं दरवीक्षितश्रि ।
वाग्देवताया वदनेन्दुबिम्बं त्रपावती साकृत सासिदृष्टम् ॥ ३० ॥

कथमिति ॥ त्रपावती सा भैमी निषधेश्वरस्यास्यपद्मं मुखकमलं कथंचिन्महता कष्टेन लज्जाविगमसाहसेन दरवीक्षितश्रि ईषद्विलोकितशोभं कृत्वा वाग्देवताया वदनेन्दुबिम्बं लज्जया सासिदृष्टमर्धदृष्टमकृत । किंचिद्दृष्ट्वा पुनर्व्यावृत्तत्वाददृष्टसकलशोभं चकारेत्यर्थः । 'त्रपावती' त्युभयत्र हेतुः । एतां मालां नलकण्ठे स्थापयेत्याशयेन देवीमुखमर्धवीक्षितं चकारेति भावः ॥

अजानतीवेदमवोचदेनामाकूतमस्यास्तदवेत्य देवी ।
भावस्त्रपोर्मिप्रतिसीरया ते न दीयते लक्षयितुं ममापि ॥ ३१ ॥

अजानतीति ॥ देवी अस्या भैम्याः तत्पूर्वश्लोकसूचितमाकूतमाशयमवेत्य ज्ञात्वा अप्यजानतीव एनां भैमीं प्रति इदमवोचत् । इदं किम्—हे भैमि, त्रपोर्मिप्रतिसीरया लज्जाकल्लोलरूपया जवनिकया ते तव भाव आशयो ममापि (लक्षयितुं) सरस्वत्या अथ च विश्वस्य वशीभूताया अपि (लक्षयितुं) ज्ञातुं न दीयते । लज्जावशादतिगूढं यत्सूचयसि तन्मयापि न ज्ञायते । ततः किंचिल्लज्जां त्यक्त्वा स्पष्टं कथयेति परिहासबुद्ध्या तामेव स्वाशयं वादयितुमवोचदित्यर्थः । अन्यदपि जवनिकाच्छादितं न ज्ञायते । 'वितीर्यते लक्षयितुं न नेऽपि' इति पाठे ने मह्यम् । 'प्रतिसीरा जवनिका' इत्यमरः ॥

देव्याः श्रुतौ नेति नलार्धनाम्नि गृहीत एव त्रपया निपीता ।
अथाङ्गुलीरङ्गुलिभिर्मृशन्ती दूरं शिरः सा नमयांचकार ॥ ३२ ॥

---

१ 'तदाननस्य' इति जीवातुसंमतः पाठः । २ 'मुदेवम्' इति जीवातुसंमतः पाठः । ३ 'न जानतीवेद' इति जीवातुसंमतः पाठः । ४ 'वितीर्यते लक्षयितुं न नेऽपि' इति जीवातुसुखावबोधमुख्यपाठः ।

देव्या इति ॥ देव्याः श्रुतौ कर्णे 'न' इति नलस्यार्धे नाम्नि गृहीत एव भैम्या ... एव त्रपया निपीता व्याप्ता सा भैमी 'ल' इति द्वितीयमक्षरमुच्चारयितुमशक्ता सती अपलत्व... स्वस्या अङ्गुलीर्देव्या वाङ्गुलीः स्वीयाङ्गुलीभिरेव भृशन्ती स्पृशन्ती निबिडं पीडयन्ती ... दूरमत्यर्थं नमयांचकार । अभिलापप्रतिबन्धे दुःखितस्याङ्गुलिमेलनं स्वभावोक्तिः ॥

करे विधृत्येश्वरया गिरां सा पान्था पथीन्द्रस्य कृता विहस्य।
वामेति नामैव बभाज सार्थं पुरन्ध्रिसाधारणसंविभागम् ॥ ३३ ॥

कर इति ॥ गिरामीश्वरया वाग्देव्या विहस्याज्ञाननाटनाद्धास्यं कृत्वा तां करे ... इन्द्रस्य पथि पान्था पथिका कृता इन्द्रं प्रति वरणार्थं नीता सा भैमी पुरन्ध्रीणामन्या... साधारणः समानः संविभागोंऽशो यस्य । पुरंध्रिषु वा । एवंभूतं सर्वस्त्रीवाचकं 'वामा' ... नाम वक्रार्थत्वात्सार्थं बभाज भेजे । इन्द्रं प्रति देव्या नीयमाना वक्राभूदिति भावः । ... चेति वा । पान्थेति पूर्ववत् । 'पाथा' इति पाठे 'पथे गत्याम्' इति धातोर्ज्वलादित्वा... गन्त्री कृतेत्यर्थः । पुरन्ध्रीति पूर्ववत् ॥

तमेवार्थमुक्तिविशेषेण पुनराह—

विहस्य हस्तेऽथ विकृष्य देवी नेतुं प्रयाताऽभि महेन्द्रमेताम्।
भ्रमादियं दत्तमिवाहिदेहे ततश्चमत्कृत्य करं चकर्ष ॥ ३४ ॥

विहस्येति ॥ वाम्यानन्तरं देवी विहस्य किंचिद्धसित्वा एतां भैमीं स्वहस्ते ... महेन्द्रमभि लक्षीकृत्य नेतुं प्रयाता प्रस्थिता इन्द्रं प्रापयितुं निर्गता । तत इन्द्राभिमुखग... गानन्तरमियं भैमी चमत्कृत्य किमिन्द्रवरणे मां प्रवर्तयतीति बुद्ध्या भीत्वा करं स्वहस्तं ... आचकर्ष । किंभूतमिव करम्—भ्रमाद्रज्जुभ्रान्तेरहिदेहे सर्पशरीरे दत्तमिव स्थापितमि... त्प्रेक्षा । सर्पदेहे भ्रमाद्दत्तं हस्तं यथा कश्चित्कर्षति तथेत्युपमा वा । ततो देवीकराकृष्टे ...

भैमीं निरीक्ष्याभिमुखीं मघोनः स्वाराज्यलक्ष्मीरभृताभ्यसूयाम्।
दृष्ट्वा ततस्तत्परिहारिणीं तां व्रीडं बिडौजःप्रवणाभ्यपादि ॥ ३५ ॥

भैमीमिति ॥ स्वाराज्यलक्ष्मीर्बिडौजःप्रवणा इन्द्रेऽत्यन्तमनुरक्ता स्वर्गाधिपत्यल... मघोन इन्द्रस्याभिमुखीं निरीक्ष्य सपत्नीबुद्ध्या भैम्यामभ्यसूयामसहनत्वमभृत दधार । ... न्तरं तां तत्परिहारिणीमिन्द्रत्यागिनीं दृष्ट्वा इन्द्रेऽनुरक्ता सती व्रीडं लज्जामभ्यपादि प्रा... मिन्द्रं नाभिलषति वृथैव मयेर्ष्या कृतेति लज्जेत्यर्थः । इयं भैमी स्त्रीरत्नभूता सती ... यैनं परिहरति तस्याहं प्रिया जातेति लज्जितेत्यर्थः । अभ्यपादि, कर्तरि चिण् ॥

त्वत्तः श्रुतं नेति नले मयातः परं वदस्वेत्युदिताथ देव्या।
ईमन्मथद्वैरथरङ्गभूमी भैमी दशा भाषितनैषधाभूत् ॥ ३६ ॥

त्वत्त इति ॥ अथ देव्या इत्युदिता परिहासवशादुक्ता भैमी दशा ... इति किम्—हे भैमि, मया त्वत्तो नलविषये 'न' इति श्रुतं निषेधार्थो नकारः श्रुतः । ...

१ 'नालित' इति पाठे ... 'सापलित' ...
२ 'ज्वलिति...' (३।१।१४०) ... मल्लिनाथ...
... परावृत्तः । ३ पूर्वोक्तमेलनादेवार्द्धश्लोको जीवातौ न व्याख्यातः ।

कारणात्परं नलादन्यदभीष्टं वदस्व कथय । अथ च—नलविषये 'नलः' इति पदे 'न' इति नकारार्धं श्रुतम् । अतो नकारात्परमनन्तरमक्षरं कथयेति । किंभूता—हीनन्मथयोर्लज्जाकामयोर्द्वैरथस्य द्वाभ्यां रथाभ्यां प्रवृत्तस्य युद्धस्य रङ्गभूमी नृत्तस्थानं सम्बलद्वीकामवशीकृता । अलिकले नालां मदा—क्षेपयेति इच्छैव नलं निर्दिष्टवती न त्वन्यं, न च साक्षाद्वकारमुच्चारयति त्यर्थः । उदिता, अथ पश्चादेति वा । वदस्व, 'भासन-' इति भासने उत्साहे वा तङ् । द्वैरथं द्विरथसंबन्धीति संबन्धेऽण् ॥

हसत्सु भैमीं दिविषत्सु पाणौ पाणिं प्रणीयाप्सरसां रसात्सा ।
आलिङ्ग्य नीत्वाकृत पान्थदुर्गां भूपालदिक्पालकुलाध्वमध्यम् ॥ ३७ ॥

हसत्स्विति ॥ सा देवी भैमीमालिङ्ग्याङ्कपालिकया धृत्वा भूपालस्य नलस्य दिक्पालकुलस्य च इन्द्रादिचतुष्टयस्य पुरःवरोऽध्वा मार्गस्तन्मध्यं नीत्वा प्रापय्य पान्थदुर्गां पथिकैरिन्द्रादिपूजितविलम्बकल्पितमार्गदेवतामकृत चकार । इन्द्रादिपञ्चकमध्ये नीत्वा मुमोचेत्यर्थः । लज्जाभरनिश्चलत्वादविसौन्दर्याच्च देवतात्वम् । केषु सत्सु—रसादुभयाशयपरिज्ञानाद्भैन्याश्च देव्याशयापरिज्ञानाद्भीतेर्वाऽप्सरसामुर्वश्यादीनां पाणौ पाणिं प्रणीय निर्माय तालिकादानपूर्वं दिविषत्स्विन्द्रादिषु हसत्सु सत्सु । उत्सवादौ नयके दुर्गामारोप्य राजवीथिषु भ्राम्यते, तथैनामपि चत्वर्दुर्गां चकारेत्यर्थ इति वा । दिविषत्सु, 'सत्सूद्विष-' इति क्विप्, 'हृद्द्युभ्यां च' इति सप्तम्या अलुक्, 'हलदन्तात्-' इति वा, सुषामादित्वात्षत्वम् । पान्थानां दुर्गा, पान्था चासौ दुर्गा चेति वा ॥

आदेशितामप्यवलोक्य मन्दं मन्दं नलस्यैव दिशा चलन्तीम् ।
भूयः सुरानर्धपथादथासौ तानेव तां नेतुमना नुनोद ॥ ३८ ॥

आदेशितामिति ॥ अथासौ देवी भूयः पुनरर्धपथात्तत्स्थानान्नलं विहाय तानेव सुरानिन्द्रादीन्नेतुमनाः प्रापयितुकामा सती तां भैमीं नुनोद । इतश्चलेति प्रेरयति स्मेत्यर्थः । किं कृत्वा—इन्द्रादिसंमुखमागच्छेत्यादेशितामादिष्टामपि तथा मन्दं मन्दं नलस्यैव दिशा नलसंमुखमेव चलन्तीं गच्छन्तीं विलोक्य । आदेशः संजातोऽस्याः । 'अदेशिताम्' इति पाठे नलं प्रति गच्छेत्यप्रेरितामपीत्यर्थः ॥

मुखाब्जमावर्तनलोलनालं कृत्वालिहुंहुंरवलक्ष्यलक्ष्यम् ।
भीमोद्भवा तां नुनुदेऽङ्कपालीं देव्या नवोढेव दृढां विवोढुः ॥ ३९ ॥

मुखेति ॥ भीमोद्भवा देव्यास्तामङ्कपालीं नुनुदेऽनुदत् । केव—विवोढुः परिणेतुर्दृढां प्रथमसुरतारम्भनिर्भरालिङ्गनाली नवोढा नववधूरिव । अङ्कपालीमोचनमात्रेण नान्यं विवक्षितं ननु लिङ्गम् । किं कृत्वा—परिहासवशात्नलसंमुखगमननिषेधिकानामलीनां सखीनां निवारणव्यग्रत्वे 'हुंहुं' इति रवः शब्दस्तद्रूपैर्लक्ष्यैश्चिह्नैर्लक्ष्यं ज्ञेयं, तेषां वा लक्ष्यं विषयभूतम् । यद्वा—अर्थान्तरवारणनिषेधिकासालिषु कोपवशाद्भैन्या एव हुंहुंरवास्तद्रूपैश्चिह्नैर्लक्ष्यम् । अथ च—अलीनां भ्रमराणामिव ये हुंहुंरवाः । यद्वा—पद्मिनीलक्षणानां हुंहुंरवैर्लक्ष्यम् । आवर्तने परावर्तने लोलं चपलं कण्ठदण्ड एव नालं यस्य एवंभूतं मुखाब्जं कृत्वा । नवोढापि आलिङ्ग-

१ 'लक्ष्य' इति पाठः सुखावबोधायाम् । २ 'नुनुदे' इति सुखावबोधा ।

नादि कुर्वित्युपदिशतीनां तासु वा हूंहूंरवचिह्नलक्ष्यं मुखाब्जमावर्तयति। अन्यमपि लोलवत्
भ्रमरहूंहूंरवलक्ष्यं च भवति। 'रवलक्ष' इति पाठे लक्षसंख्येत्यर्थः॥

देवी कथंचित्खलु तामदेवद्रीचीं भवन्तीं सितसिक्तसृक्का।
आह स्म मां प्रत्यपि ते पुनः का शङ्का शशाङ्कादधिकास्यबिम्बे॥४०॥

देवीति॥ देवी तां भैमीमित्याह स्म। किंभूताम्—कथंचिन्महताङ्कपालीमोचनादिप्रका-
रेण कष्टेन खलु निश्चितम्। अदेवद्रीचीं भवन्तीं न देवानञ्चति देवान्प्रति गच्छति एवंविधां
भवन्तीं ताम्। किंभूता—सितेन ईषद्धासेन सिक्तसृक्का सिक्तौष्ठप्रान्ता स्वाभिप्रायापरिज्ञान-
त्किंचित्कृतहासा इति किम्—हे शशाङ्कादधिकं सुन्दरमाह्लादकमास्यबिम्बं यस्याः एवंभूते
भैमि, सखीप्रायां मामपि प्रति इयं प्रतार्य इन्द्रादिवरणार्थं मां नयतीति ते तव पुनः का
शङ्का। अपि त्वेवं शङ्का न कार्या मा भैषीरिति। देवानञ्चति देवद्रीची, 'विष्वग्देवयोः–' इति
टेरद्र्यादेशे उगित्त्वान्ङीपि 'अचः' इत्यकारलोपे 'चौ' इति पूर्वस्याणो दीर्घः। पश्चान्नञ्स-
मासः। 'अदेवद्रीचीभवन्तीम्' इति पाठः सभ्यः। अदेवद्रीचीं देवद्रीचीं भवन्तीं च्विप्र-
त्ययः। ततो नञ्समासः। शशाङ्कात्, 'यस्मादधिकम्' इति ज्ञापकात्पञ्चमी॥

चेन्न प्रतारयसि तर्हि पुनःपुनरिन्द्रादिसंमुखं मां किमिति नयसीत्याशङ्कायामाह—

एषामकृत्वा चरणप्रणाममेषामनुज्ञामनवाप्य सम्यक्।
सुपर्ववैरे तव वैरसेनिं वरीतुमीहा कथमौचितीयम्॥४१॥

एषामिति॥ एषामिन्द्रादीनां चरणयोः प्रणाममकृत्वा, तथा—एषां सम्यक् यथा
भवति तथानुज्ञां नलवरणानुमतिमप्राप्य निजचिह्नप्रकटमात्रानुमितप्रसादेन लब्धप्रायामपि
साक्षाच्छिरःकम्पादिसूचितामनुज्ञामलब्ध्वा सुपर्ववैरे स्वावज्ञानादिन्द्रादिभिः सह विरोधे सति
येयं तव वैरसेनिं नलं वरीतुमीहा चेष्टाभिलाषो वा सा कथमिवौचिती। अपि तु न कथं-
चित्। स्वावज्ञानाद्विरुद्धाः सन्तः शापं दास्यन्तीति तान्प्रति नीयसे न तु वरणार्थमिति
भावः। इयमौचिती वा। 'कतमौचिती' इत्यपि पाठः॥

इतीरिते विश्वसितां पुनस्तामादाय पाणौ दिविषत्सु देवी।
कृत्वा प्रणम्रां वदति स्म सा तान् भक्त्येयमर्हत्यधुनानुकम्पाम्॥४२॥

इतीति॥ सा देवी इति पूर्वोक्तमीरिते सति विश्वसितां तां भैमीं पाणौ पुनरादाय गृहीत्वा
दिविषत्सु देवेषु विषये नमस्कारवशात्प्रकर्षेण नम्रां कृत्वा तान्देवानिति वदति स्म। इति
किम्—भवद्भक्त्येयं भैम्यधुना नलवरणानुमतिरूपामनुकम्पां कृपामर्हतीति॥

एतद्वरणार्थमागतानामस्माकं नलवरणानुमतिर्दीयतामिति कथमुच्यत इत्याशङ्क्य परिहरते—

युष्मान्वृणीते न बहून्सतीयं शेषावमानाच्च भवत्सु नैकम्।
तद्वः समेतान्नृपमेनमंशान्वरीतुमन्विष्यति लोकपालाः॥४३॥

युष्मानिति॥ हे लोकपालाः, इयं भैमी यस्मात्सती पतिव्रतैकभर्तृकेव तस्माद्बहून्युष्मान्
वृणीत पतित्वेन नाङ्गीकरोति। भवत्सु मध्ये शेषावमानाच्च एकं न वृणीते। तत्तस्मात्...

१ '[illegible]' इत्यपि पाठः। २ 'समेतं नृपमंशमेनम्' इति जीवातुसंमतः पाठः।

चरणपक्षयोर्दोषदर्शनाद्धेतोरेकत्र नलस्वरूपे समेतान्मिलितानंशानंशभूतान्वो युष्मानेव एनं नृपं 'अष्टानां लोकपालानां वपुर्धारयते नृपः' इति वचनाद्युष्मद्रूपमेवैनं नलं नृपं वरीतुमन्विष्यति विचारयति । नले वृते पूर्वोक्तोभयदोषाभावान्नलमेव वरीतुं वाञ्छतीत्यर्थः । वो युष्माकं समेतानंशानेनं नृपमिति वा ॥

परदारत्वादपीयं भवद्भिर्नाभिलषणीयेत्याह—

भैम्या स्रजःसञ्जनया पथि प्राक्स्वयंवरं संजनयांबभूव ।
संभोगमालिङ्गनयास्य वेधाः शेषं तु कं हन्तुमियद्यतध्वे ॥ ४४ ॥

भैम्या इति ॥ हे लोकपालाः, वेधाः मातृसेवानन्तरं स्वमन्दिरागमनवेलायां पथि स्रजो मालायाः सञ्जनया सङ्गेन षष्ठे सर्गे 'प्रसूप्रसादाधिगता–' (४९) इत्यादिकथितप्रकारेण भ्रान्तिदृष्टनलेषु मध्येऽस्य दूत्यगतस्य सत्यनलस्य कण्ठे निक्षेपणया कृत्वा भैम्याः स्वयंवरं प्राक्पूर्वमेव संजनयांबभूवाकृत । तथा तत्रैव सर्गे 'तन्वं निधत्तौ–' (५३) इत्याद्युक्तप्रकारेणास्य नलस्यालिङ्गनयालिङ्गनेन भैम्याः संभोगं बाह्यरतिमपि व्यधत्त । अस्य संभोगमिति वा । अस्य स्वयंवरस्य संभोगं फलमालिङ्गनेन चकार । तस्मात्कं तु पुनः शेषं संभोगं हन्तुं विनाशयितुमियच्छलाकारधारणादिप्रकारेण यतध्वे प्रयत्नं कुरुथ । अपि तु न कोऽप्यवशिष्टोंऽशः । तस्माद्वृथा प्रयासो न कार्यः । किं त्वाशैव दातव्येत्यर्थः । बाह्यरतस्यैवाभ्यर्हितत्वात्तत्राप्यालिङ्गनस्याभ्यर्हिततरत्वात्तस्य च संवृत्तत्वात्कं पुनः शेषं संभोगं हन्तुमियद्यतध्व इति वा । 'किम्' इति पाठे 'शेषा तु लोकस्थितिः' इति कामशास्त्रोक्तन्यायेन शेषं लोकस्थितिरूपं संभोगं पुनर्हन्तुमियत्कि यतध्व इति व्याख्येयम् । 'सञ्जनालिङ्गना–' इत्यत्र ण्यन्तत्वाद्युच् ॥

इदानीं युक्त्यन्तरेण देवान्सान्त्वयति—

वर्णाश्रमाचारपथात्प्रजाभिः स्वाभिः सहैवास्खलते नलाय ।
प्रसेदुषो वेदृशवृत्तभङ्ग्या दित्सैव कीर्तेर्भुवमानयद्वः ॥ ४५ ॥

वर्णेति ॥ वा पूर्वापरितोषे । पूर्वं न संभावितमेवोक्तं मया । किंतु नलाय कीर्तेर्दित्सैव वो युष्मान्भुवमानयत् । भैमीस्वयंवरदर्शनव्याजेन नलाय कीर्तिं दातुमेवात्रागमनं युष्माकं न तु भैमीवरणार्थमित्यर्थः । यतः—किंभूताय—स्वाभिः प्रजाभिः सह वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां स्मृत्युक्तादाचारपथात्सन्मार्गादस्खलतेऽच्युताय । किंभूतान् वः— ईदृग्वृत्तभङ्ग्या प्रसेदुषः स्वाचाराचरणादेव निष्कपटत्वकरणाद्वा प्रसन्नान् । भैम्या इन्द्रादीनिन्द्राय सौन्दर्यादिना गुणेन नल एव वृत इति कीर्तिः ॥

इति श्रुतेऽस्या वचसैव हास्यात्कृत्वा सलास्याधरनास्यबिम्बम् ।
भ्रूविभ्रमाकूतकृताभ्यनुज्ञेष्वेतेषु तां साथ नलाय निन्ये ॥ ४६ ॥

इतीति ॥ इति पूर्वोक्ते देवीवचने श्रुते सत्यस्या देव्या वचसैव [illegible]पल्लविम्बं मुखचन्द्रं सलास्याधरं [illegible] कृत्वा एतेषु देवेषु भ्रूविभ्रमरूपेणाकूतेना[illegible]-

---

१ 'दित्सैव' इति पाठे [illegible]—इति सुखावबोधा । २ 'वचसैव' इति पाठो [illegible] ।

नादि कुर्वित्युपदिशतीनां तासु वा हूंहूंरवचिह्नलक्ष्यं मुखाब्जमावर्तयति । अन्यमपि ...
भ्रमरहूंहूंरवलक्ष्यं च भवति । 'रवलक्ष' इति पाठे लक्षसंख्येत्यर्थः ॥

देवी कथंचित्खलु तामदेवद्रीचीं भवन्तीं स्मितसिक्तसृक्का ।
आह स्म मां प्रत्यपि ते पुनः का शङ्का शशाङ्कादधिकास्यबिम्बे ॥४०॥

देवीति ॥ देवी तां भैमीमित्याह स्म । किंभूताम्—कथंचिन्महताऽनुपालीमोचनादिप्रका-
रेण कष्टेन खलु निश्चितम् । अदेवद्रीचीं भवन्तीं न देवानञ्चति देवान्प्रति गच्छति एवंवि-
भवन्तीं ताम् । किंभूता—स्मितेन ईषद्धासेन सिक्तसृक्का सिक्तौष्ठप्रान्ता स्वामिप्रायापरिज्ञा-
त्किंचित्कृतहासा इति किम्—हे शशाङ्कादधिकं सुन्दरमाह्लादकमास्यबिम्बं यस्या एवंभूते
भैमि, सखीप्रायां मामपि प्रति इयं प्रतार्य इन्द्रादिवरणार्थं मां नयतीति ते तव पुनः का
शङ्का । अपि त्वेवं शङ्का न कार्या मा भैषीरिति । देवानञ्चति देवद्रीची, 'विष्वग्देवयोः—' इति
टेरद्र्यादेशे उगित्त्वान्ङीपि 'अचः' इत्यकारलोपे 'चौ' इति पूर्वस्याणो दीर्घः । पश्चात्स-
मासः । 'अदेवद्रीचीभवन्तीम्' इति पाठः सभ्यः । अदेवद्रीचीं देवद्रीचीं भवन्तीं च्वि-
त्ययः । ततो नञ्समासः । शशाङ्कात्, 'यस्मादधिकम्' इति ज्ञापकात्पञ्चमी ॥

चेन्न प्रतारयसि तर्हि पुनःपुनरिन्द्रादिसंमुखं मां किमिति नयसीत्याशङ्कायामाह—

एषामकृत्वा चरणप्रणाममेषामनुज्ञामनवाप्य सम्यक् ।
सुपर्ववैरे तव वैरसेनिं वरीतुमीहा कथमौचितीयम् ॥ ४१ ॥

एषामिति ॥ एषामिन्द्रादीनां चरणयोः प्रणाममकृत्वा, तथा—एषां सम्यक् या
भवति तथानुज्ञां नलवरणानुमतिमप्राप्य निजचिह्नप्रकटमात्रानुमितप्रसादेन लब्धप्रायामपि
साक्षाच्छिरःकम्पादिसूचितामनुज्ञामलब्ध्वा सुपर्ववैरे स्वावज्ञानादिन्द्रादिभिः सह विरोधे सति
येयं तव वैरसेनिं नलं वरीतुमीहा चेष्टाभिलाषो वा सा कथमिवौचिती । अपि तु न कथं-
चित् । स्वावज्ञानाद्विरुद्धाः सन्तः शापं दास्यन्तीति तान्प्रति नीयसे न तु वरणार्थमिति
भावः । इयमौचिती वा । 'कतमौचिती' इत्यपि पाठः ॥

इतीरिते विश्वसितां पुनस्तामादाय पाणौ दिविषत्सु देवी ।
कृत्वा प्रणम्रां वदति स्म सा तान् भक्तेयमर्हत्यधुनानुकम्पाम् ॥ ४२ ॥

इतीति ॥ सा देवी इति पूर्वोक्तमीरिते सति विश्वसितां तां भैमीं पाणौ पुनरादाय
दिविषत्सु देवेषु विषये नमस्कारवशात्प्रकर्षेण नम्रां कृत्वा तान्देवानिति वदति स्म । इति
किम्—भवद्भक्तेयं भैम्यधुना नलवरणानुमतिरूपामनुकम्पां कृपामर्हतीति ॥

एतद्वरणार्थमागतानामस्माकं नलवरणानुमतिर्दीयतामिति कथमुच्यत इत्याशङ्क्याह—

युष्मान्वृणीते न वहून्सतीयं शेषावमानाच्च भवत्सु नैकम् ।
तद्वः [2]समेतान्नृपमेनमंशान्वरीतुमन्विष्यति लोकपालाः ॥ ४३ ॥

युष्मानिति ॥ हे लोकपालाः, इयं भैमी यस्मात्सती पतिव्रतैकभर्तृकैव तस्माद्बहून्युष्मान्
वृणीते पतित्वेन नाङ्गीकरोति । भवत्सु मध्ये शेषावमानाच्च एकं न वृणीते । तस्मात्...

१ 'मनिशम्य' इत्यपि पाठः । २ 'समेतं नृपमंशमेनम्' इति जीवातुसंमतः पाठः ।

रणपक्षयोर्दोषदर्शनाद्धेतोरेकत्र नलस्वरूपे समेतान्मिलितानंशानंशभूतान्वो युष्मानेव एनं नृपं 'अष्टानां लोकपालानां वपुर्धारयते नृपः' इति वचनाद्युष्मद्रूपत्वेनैवं नलं नृपं वरीतुमन्विष्यति विचारयति । नले वृते पूर्वोक्तोभयदोषाभावान्नलमेव वरीतुं वाञ्छतीत्यर्थः । वो युष्माकं समेतानंशानेनं नृपमेति वा ॥

परदारत्वादपीयं भवद्भिर्नाभिलषणीयेत्याह—

भैम्या स्रजः सञ्जनया पथि प्राक्स्वयंवरं संजनयांबभूव ।
संभोगमालिङ्गनयास्य वेधाः शेषं तु कं हन्तुमियद्यतध्वे ॥ ४४ ॥

भैम्या इति ॥ हे लोकपालाः, वेधाः मातृसेवानन्तरं स्वमन्दिरागमनवेलायां पथि स्रजो मालायाः सञ्जनया सङ्गेन षष्ठे सर्गे 'प्रसूप्रसादाधिगता–' (४९) इत्यादिकथितप्रकारेण भ्रान्तिदृष्टनलेषु मध्येऽस्य दूरगतस्य सत्यनलस्य कण्ठे निक्षेपणरूपया कृत्वा भैम्याः स्वयंवरं प्राक्पूर्वमेव संजनयांबभूवाकृत । तथा तत्रैव सर्गे 'तन्वं लिखन्त्यौ–' (५२) इत्याद्युक्तप्रकारेणास्य नलस्यालिङ्गनयालिङ्गनेन भैम्याः संभोगं बाह्यरतिमपि व्यधत्त । अस्य संभोगमेति वा । अस्य स्वयंवरस्य संभोगं फलमालिङ्गनेन चकार । तस्मात्कं तु पुनः शेषं संभोगं हन्तुं विनाशयितुमियद्बलात्कारधारणादिप्रकारेण यतध्वे प्रयत्नं कुरुथ । अपि तु न कोऽप्यवशिष्टोंऽशः । तस्माद्वृथा प्रयासो न कार्यः । किं त्वाशैव दातव्येत्यर्थः । बाह्यरतस्यैवाभ्यर्हितत्वात्तत्राप्यालिङ्गनस्याभ्यर्हिततरत्वात्तस्य च संवृत्तत्वात्कं पुनः शेषं संभोगं हन्तुमियद्यतध्व इति वा । 'किम्' इति पाठे 'शेषा तु लोकस्थितिः' इति कामशास्त्रोक्तन्यायेन शेषं लोकस्थितिरूपं संभोगं पुनर्हन्तुमियत्किं यतध्व इति व्याख्येयम् । 'सञ्जनालिङ्गना–' इत्यत्र ण्यन्तत्वाद्युच् ॥

इदानीं युक्त्यन्तरेण देवान्सान्त्वयति—

वर्णाश्रमाचारपथात्प्रजाभिः स्वाभिः सहैवास्खलते नलाय ।
प्रसेदुषो वेदशवृत्तभङ्ग्या दित्सैव कीर्तेर्भुवमानयद्वः ॥ ४५ ॥

वर्णेति ॥ वा पूर्वापरितोषे । पूर्वमन्यथाविततमेवोक्तं मया । किंतु नलाय कीर्तेर्दित्सैव वो युष्मान्भुवमानयत् । भैमीस्वयंवरदर्शनव्याजेन नलाय कीर्तिं दातुमेवात्रागमनं युष्माकं न तु भैमीवरणार्थमित्यर्थः । यतः—किंभूताय—स्वाभिः प्रजाभिः सह वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां स्मृत्युक्तादाचारपथात्स्वकर्मादस्खलतेऽच्युताय । किंभूतान् वः—ईदृशवृत्तभङ्ग्या प्रसेदुषः स्वाचाराचरणादेव निष्कपटदूतकरणाद्वा प्रसन्नान् । भैम्या इन्द्रादीन्विहाय सौन्दर्यादिना गुणेन नल एव वृत इति कीर्तिः ॥

इति श्रुतेऽस्या वचसैव हास्यात्कृत्वा सलास्याधरमास्यबिम्बम् ।
भ्रूविभ्रमाकूतकृताभ्यनुज्ञेष्वेतेषु तां साथ नलाय निन्ये ॥ ४६ ॥

इतीति ॥ इति पूर्वोक्ते देवीवचने श्रुते सत्यस्या देव्या वचसैव जाताद्धास्यात्सलास्याधरोष्ठमास्यबिम्बं मुखचन्द्रं सलास्याधरं चञ्चलोष्ठं कृत्वा एतेषु देवेषु भ्रूविभ्रमरूपेणाकूतेनाभिप्राय-

---

१ 'दित्सेव' इति पाठे कर्मेच्छा—इति सुखावबोधा । २ 'वचने च' इति पाठो जीवातुसंमतः ।

नादि कुर्वित्युपदिशतीनां तासु वा हूंहूंरवचिह्नलक्ष्यं मुखाब्जमावर्तयति । अब्जमपि लोलं भ्रमरहूंहूंरवलक्ष्यं च भवति । 'रवलक्ष' इति पाठे लक्षसंख्येत्यर्थः ॥

देवी कथंचित्खलु तामदेवद्रीचीं भवन्तीं स्मितसिक्तसृक्का ।
आह स्म मां प्रत्यपि ते पुनः का शङ्का शशाङ्कादधिकास्यबिम्बे ॥४०॥

देवीति ॥ देवी तां भैमीमित्याह स्म । किंभूताम्—कथंचिन्महताङ्गपालीमोचनादिव्यापारेण कष्टेन खलु निश्चितम् । अदेवद्रीचीं भवन्तीं न देवानञ्चति देवान्प्रति गच्छति एवंविधां भवन्तीं ताम् । किंभूता—स्मितेन ईषद्धासेन सिक्तसृक्का सिक्तौष्ठप्रान्ता स्वाभिप्रायापरिज्ञानात्किंचित्कृतहासा इति किम्—हे शशाङ्कादधिकं सुन्दरमाह्लादकमास्यबिम्बं यस्याः एवंविधे भैमि, सखीप्रायां मामपि प्रति इयं प्रतार्य इन्द्रादिवरणार्थं मां नयतीति ते तव पुनः का शङ्का । अपि त्वेवं शङ्का न कार्या मा भैषीरिति । देवानञ्चति देवद्रीची, 'विष्वग्देवयोः—' इति टेरद्र्यादेशे उगित्त्वान्ङीपि 'अचः' इत्यकारलोपे 'चौ' इति पूर्वस्याणो दीर्घः । नञ्समासः । 'अदेवद्रीचीभवन्तीम्' इति पाठः सभ्यः । अदेवद्रीचीं देवद्रीचीं भवन्तीं च्विप्रत्ययः । ततो नञ्समासः । शशाङ्कात्, 'यस्मादधिकम्' इति ज्ञापकात्पञ्चमी ॥

चेन्न प्रतारयसि तर्हि पुनःपुनरिन्द्रादिसंमुखं मां किमिति नयसीत्याशङ्कायामाह—

एषामकृत्वा चरणप्रणाममेषामनुज्ञामनवाप्य सम्यक् ।
सुपर्ववैरे तव वैरसेनिं वरीतुमीहा कथमौचितीयम् ॥ ४१ ॥

एषामिति ॥ एषामिन्द्रादीनां चरणयोः प्रणाममकृत्वा, तथा—एषां सम्यग् यथा भवति तथानुज्ञां नलवरणानुमतिमप्राप्य निजचिह्नप्रकटमात्रानुमितप्रसादेन लब्धामकृत्वा साक्षाच्छिरःकम्पादिसूचितामनुज्ञामलब्ध्वा सुपर्ववैरे स्वावज्ञानादिन्द्रादिभिः सह विरोधे सति येयं तव वैरसेनिं नलं वरीतुमीहा चेष्टाभिलाषो वा सा कथमिवौचिती । अपि तु न कदाचित् । स्वावज्ञानाद्विरुद्धाः सन्तः शापं दास्यन्तीति तान्प्रति नीयसे न तु वञ्चनार्थमिति भावः । इयमौचिती वा । 'कतमौचिती' इत्यपि पाठः ॥

इतीरिते विश्वसितां पुनस्तामादाय पाणौ दिविषत्सु देवी ।
कृत्वा प्रणम्रां वदति स्म सा तान् भक्तेयमर्हत्यधुनानुकम्पाम् ॥ ४२ ॥

इतीति ॥ सा देवी इति पूर्वोक्तमीरिते सति विश्वसितां तां भैमीं पाणौ पुनरादाय दिविषत्सु देवेषु विषये नमस्कारवशात्प्रकर्षेण नम्रां कृत्वा तान्देवानिति वदति स्म । इति किम्—भवद्भक्तेयं भैम्यधुना नलवरणानुमतिरूपामनुकम्पां कृपामर्हतीति ॥

एतद्वरणार्थमागतानामस्माकं नलवरणानुमतिर्दीयतामिति कथमुच्यत इत्याशङ्क्याह—

युष्मान्वृणीते न वहन्सतीयं शेपायमानाश्च भवत्सु नैकम् ।
तद्वः समेतान्नृपमेनमंदान्वरीतुमन्विष्यति लोकपालाः ॥ ४३ ॥

युष्मानिति ॥ हे लोकपालाः, इयं भैमी यस्मात्सती पतिव्रतैकभर्तृका तस्माद्बहून्युष्मान् वृणीते पतित्वेन नाङ्गीकरोति । भवत्सु मध्ये शेपायमानाश्च एकं न वृणीते । तस्मात्...

१ 'मतिमन्य' इत्यपि पाठः । २ 'समेतं नृपमंशमेनम्' इति जीवातुसंमतः पाठः ।

वरणपक्षयोर्दोषदर्शनाद्धेतोरेकत्र नलस्वरूपे समेतान्मिलितानंशानंशभूतान्वो युष्मानेव एनं नृपं 'अष्टानां लोकपालानां वपुर्धारयते नृपः' इति वचनाद्युष्मद्रूपनेवैनं नलं नृपं वरीतुमन्विष्यति विचारयति । नले वृते पूर्वोक्तोभयदोषाभावान्नलमेव वरीतुं वाञ्छतीत्यर्थः । वो युष्माकं समेतानंशानेनं नृपमिति वा ॥

परदारत्वादपीयं भवद्भिर्नाभिलषणीयेत्याह—

भैम्याः स्रजःसञ्जनया पथि प्राक्स्वयंवरं संजनयांबभूव ।
संभोगमालिङ्गनयास्य वेधाः शेषं तु कं हन्तुमियद्यतध्वे ॥ ४४ ॥

भैम्या इति ॥ हे लोकपालाः, वेधाः मातृसेवानन्तरं स्वमन्दिरागमनवेलायां पथि स्रजो मालायाः सञ्जनया सङ्गेन षष्ठे सर्गे 'प्रसूप्रसादाधिगता–' (४९) इत्यादिकथितप्रकारेण भ्रान्तिदृष्टनलेषु मध्येऽस्य दूतगतस्य सत्यनलस्य कण्ठे निक्षेपणया कृत्वा भैम्याः स्वयंवरं प्राक्पूर्वमेव संजनयांबभूवाकृत । तथा तत्रैव सर्गे 'तथ्यं निधत्तौ–' (५२) इत्याद्युक्तप्रकारेणास्य नलस्यालिङ्गनयालिङ्गनेन भैम्याः संभोगं बाह्यरतिमपि व्यधत्त । अस्य संभोगमिति वा । अस्य स्वयंवरस्य संभोगं फलमालिङ्गनेन चकार । तस्मात्कं तु पुनः शेषं संभोगं हन्तुं विनाशयितुमियद्बलात्कारधारणादिप्रकारेण यतध्वे प्रयत्नं कुरुथ । अपि तु न कोऽप्यवशिष्टोऽशः । तस्माद्वृथा प्रयासो न कार्यः । किं त्वाशैव दातव्येत्यर्थः । बाह्यरतस्यैवाभ्यर्हितत्वात्तत्राप्यालिङ्गनस्याभ्यर्हिततरत्वात्तस्य च संवृत्तत्वात्कं पुनः शेषं संभोगं हन्तुमियद्यतध्व इति वा । 'किम्' इति पाठे 'शेषा तु लोकस्थितिः' इति कामशास्त्रोक्तन्यायेन शेषं लोकस्थितिरूपं संभोगं पुनर्हन्तुमियत्कि यतध्व इति व्याख्येयम् । 'सञ्जनालिङ्गना–' इत्यत्र ण्यन्तत्वाद्युच् ॥

इदानीं युक्त्यन्तरेण देवान्सान्त्वयति—

वर्णाश्रमाचारपथात्प्रजाभिः स्वाभिः सहैवास्खलते नलाय ।
प्रसेदुषो वेदशवृत्तभङ्ग्या दित्सैव कीर्तेर्भुवमानयद्वः ॥ ४५ ॥

वर्णेति ॥ वा पूर्वापरितोषे । पूर्वमसंभावितमेवोक्तं मया । किंतु नलाय कीर्तेर्दित्सैव[1] वो युष्मान्भुवमानयत् । भैमीस्वयंवरदर्शनव्याजेन नलाय कीर्तिं दातुमेवात्रागमनं युष्माकं नतु भैमीवरणार्थमित्यर्थः । यतः—किंभूताय—स्वाभिः प्रजाभिः सह वर्णानां ब्राह्मणादीनामाश्रमाणां ब्रह्मचर्यादीनां स्मृत्युक्तादाचारपथात्सकाशादस्खलतेऽच्युताय । किंभूतान् वः—ईदृग्वृत्तभङ्ग्या प्रसेदुषः स्वाचाराचरणादेव निष्कपटदूतकरणाद्वा प्रसन्नान् । भैम्या इन्द्रादीन्विहाय सौन्दर्यादिना गुणेन नल एव वृत इति कीर्तिः ॥

इति श्रुतेऽस्या वचसैव हास्यात्कृत्वा सलास्याधरमास्यबिम्बम् ।
भ्रूविभ्रमाकूतकृताभ्यनुज्ञेष्वेतेषु तां साथ नलाय निन्ये ॥ ४६ ॥

इतीति ॥ इति पूर्वोक्ते देवीवचने श्रुते वचसा[2] देव्या वचसैव जाताद्धास्यात्स्मितादेतोरास्यबिम्बं मुखचन्द्रं सलास्याधरं चञ्चलोष्ठं कृत्वा एतेषु देवेषु भ्रूविभ्रमरूपेणाकूतेनाशयप्रद-

---

१ 'दित्सेव' इति पाठे उत्प्रेक्षा—इति सुखावबोधा । २ 'वचसे च' इति पाठो जीवातुसंमतः ।

पंकेनेङ्गितेन कृताऽभ्यनुज्ञा नलवरणानुमतिर्यैस्तेषु सत्सु । अथानन्तरं सा देवी तां नल नलं प्रापयितुं नलार्थं वा निन्ये । पुनर्नलसंमुखीं चकारेत्यर्थः ॥

मन्दाक्षनिस्पन्दतनोर्मनोभूदुष्प्रेरमप्यानयति स तस्याः ।
मधूकमालामधुरं करं सा कण्ठोपकण्ठं वसुधासुधांशोः ॥ ४७ ॥

मन्दाक्षेति ॥ सा देवी मधूकमालया मधुरं सुन्दरं तस्याः करं वसुधासुधांशोः भूचन्द्रस्य नलस्य कण्ठोपकण्ठं कण्ठसमीपमानयति स्म प्रापयति स्म । किंभूतायाः—मन्दाक्षेण लज्जया निस्पन्दा निश्चला तनुर्यस्याः । सस्तम्भाया इत्यर्थः । किंभूतं करम्—मनोभुवा नलविषयकामेन दुष्प्रेरमपि कामेनापि प्रेरयितुमशक्यम् । 'निष्पन्द—' इति पाठे पूर्ववत्त्वम् । 'दुःप्रेरमपि प्रेरयति स्म' इति विरोधाभासः ॥

अथाभिलिख्येव समर्प्यमाणां राजिं निजस्वीकरणाक्षराणाम् ।
दूर्वाङ्कुराढ्यां नलकण्ठनाले वधूर्मधूकस्रजमुत्ससर्ज ॥ ४८ ॥

अथेति ॥ अथ करस्य नलकण्ठसमीपनयनानन्तरं वधूर्भैमी दूर्वाङ्कुराढ्यां मधूकस्रजं नलकण्ठनाल उत्ससर्ज निक्षिप्तवती । उत्प्रेक्षते—अभिलिख्य समर्प्यमाणां दीयमानां निजेनात्मना स्वीकरणं तत्संबन्धिनामक्षराणाम् 'मया त्वं निश्चितं वृतोऽसि' इत्येवंरूपाणां वर्णानां राजिमिव । निश्चयज्ञापनार्थं हि पत्रं दीयते तदिवेत्यर्थः । मालासज्जनानन्तरं वाङ्गीकारे निश्चयो जातः । दूर्वाङ्कुराणां श्यामत्वादक्षरसाम्यम् । मधूकानि लिखिताक्षरसंधिस्थानीयानि । कण्ठस्य नालत्वान्मुखस्य कमलत्वम् ॥

तां दूर्वया श्यामलयातिवेलं शृङ्गारभासंनिभया सुशोभाम् ।
मालां प्रसूनायुधपाशभासं कण्ठेन भूभृद्बिभरांबभूव ॥ ४९ ॥

तामिति ॥ भूभृन्नलः तां मालां कण्ठेन बिभरांबभूव दधौ । किंभूताम्—श्यामलया अतएव शृङ्गाररसस्य भया कान्त्या संनिभया तुल्यया दूर्वयातिवेलमतितरां सुशोभां शोभनदीप्तिम् । तथा—प्रसूनायुधस्य कामस्य पाशभासं पाशसदृशीम् । मालानिक्षेपानन्तरं कामपरवशत्वान्मालायाः कामपाशत्वम् । 'श्यामो भवति शृङ्गारः' इति भरतवचनाच्छृङ्गारस्य श्यामत्वम् । भूभृत्पर्वतोऽपि । बिभरांबभूव, 'भीह्री—' इत्यामि 'कृञ्चा—' इति भुवोऽनुप्रयोगः ॥

दूर्वाग्रजाग्रत्पुलकावलिं तां नलाङ्गसङ्गाद्धृशमुल्लसन्तीम् ।
मानेन मन्ये नमिताननाः सा सासूयमालोकत पुष्पमालाम् ॥ ५० ॥

दूर्वेति ॥ मानेन ईर्ष्याजनितकोपेन नमितानना सा भैमी सासूयं गुणवत्त्वामपि दुष्टां दोषारोपसहितं यथा तथा । सेर्ष्यमितियावत् । पुष्पमालामालोकतेत्यहं मन्ये शङ्के । किंभूताम्—दूर्वाग्राण्येव दूर्वाङ्कुरा इव वा जाग्रती स्फुरन्ती पुलकावलिर्यस्यास्ताम् । तथा—नलाङ्गसङ्गाद्धृशमुल्लसन्तीं शोभमानां सहर्षां च । लज्जानम्रमुखी सत्येव मालासहितं नलं वधू—

१ 'पुलकाङ्कितान्' इत्यपि पाठः ।

पर्वतस्य तु वातैः कम्पोऽतितरामाश्चर्यकारीत्यर्थः । उभावपि तुल्यानुरागौ सात्त्विककम्पयुक्तौ जाताविति भावः । चित्रीयितम्, 'नमोवरिवश्चित्रङः क्यच्' इति क्यजन्तात् क्तः 'क्यचि च' इतीत्वमकारस्य ॥

दृशोरपि न्यस्तमिवास्त राज्ञां रागाद्दृगम्बुप्रतिबिम्बिमाल्यम् ।
नृपस्य तत्पीतवतोरिवाक्ष्णोः प्रालम्ब्यमालम्बन्नयुक्तमन्तः ॥ ५८ ॥

दृशोरिति ॥ दृशोरम्बुनि क्रोधजनितेऽश्रुणि प्रतिबिम्बोऽस्यास्तीति एवंशीलं माल्यं सा मधूकमाला रागान्नलविषयात्क्रोधात् । अथच तज्जनितान्नेत्रलौहित्यात् हेतोः सभासदां राज्ञां दृशोरपि न्यस्तमिव येन केनचिन्निक्षिप्तमिवास्त अतिष्ठत । नेत्रलौहित्यदर्शनादेवं ज्ञातमासीदिति यावत् । यथा कश्चित्क्रुद्धः सन्कस्यचिन्नेत्रस्य बलादङ्गुल्यादिशल्यं निक्षिपति, तदीयनेत्रस्य च लौहित्यं भवति, अश्रु च निर्गच्छति । तथा क्रोधाद्दर्शनमात्रेण तन्माल्यमेव तेषां द्वयोरपि नेत्रयोर्निक्षिप्तं शल्यमिवाभवत् । अत एव तयोर्लौहित्यमश्रु च जातमित्यर्थः । अर्थादयुक्तमेतत् । न केवलमन्तःकरणे शल्यं निक्षिप्तं, किंतु दृशोरपीत्यपिशब्दार्थः । अथ च—रागान्नलप्रीत्या भैम्या माल्यं यथा नलकण्ठे न्यस्तं तथा रागात्क्रोधान्नलसर्धिनां संमुखं पश्यतां राज्ञां नेत्रयोरपि शल्यमिव क्षिप्तमभूत् । यतो दृगम्बुप्रतिबिम्बितमसहमानाः सर्वेऽपि राजानो माल्यदर्शनमात्रेण क्रोधेर्ष्यावशाः संकुचितनेत्राः पराङ्मुखाः सन्तस्तां न पश्यन्ति स्मेति भावः । नृपस्य नलस्याक्ष्णोरन्तर्मध्यः कर्तृभूतः प्रालम्ब्यं प्रलम्बत्वं हर्षविस्फारितत्वमालम्बताङ्गीचकार । एतद्युक्तम् । हर्षवशाद्धि नेत्रयोर्विस्फारित्वं भवति । 'प्रालम्बम्' इति पाठे प्रालम्बनं प्रालम्बः स एवार्थः । उत्प्रेक्षते—किंभूतयोरक्ष्णोः—तत्पीतवतोरिव माल्यं सादरं विलोकमानयोरिव । हर्षजनितं विस्फारत्वं विलोकनजत्वेनोत्प्रेक्षितम् । यद्वा —नलनेत्रमध्यस्तन्माल्यमेव प्रालम्बमृजुलम्बिनं हारविशेषमङ्गीचकार । सादरविलोकनान्नेत्रयोरन्तःप्रतिबिम्बिताया मालाया ऋजुलम्बित्वं नेत्रयोर्विस्फारत्वमन्तरेण न घटत इति तदेवाक्षिपति—नलस्तु तां मालां विलोकयन्हर्षवशाद्विस्फारितनेत्रो जात इति भावः । तन्माल्यं रागाद्दृशोर्न्यस्तमिवास्त नेत्रमध्ये निक्षिप्तं यच्छल्यादि तदिवाभूत् । युक्तमेतत् । क्रोधाद्धि दृष्टमात्रं वस्तु शल्यमिव भवति, नेत्रयोश्च लौहित्यमश्रु च भवतीति युक्तमित्यर्थः । तन्माल्यं पीतवतोरिव नलनेत्रयोरन्तः रागात्प्रीतेर्हेतुत्वं प्राप । एतदपि युक्तम् । प्रीतेर्हि हर्षो भवतीत्यपि युक्तमेवेत्यर्थ इति वा । 'प्रालम्ब्यम्' गुणवचनादित्वात्ष्यञ् । 'प्रालम्बम्' इति पाठे 'प्रालम्बो हारभेदे स्यात्' इति विश्वः । 'राज्ञा' इति पाठे आनन्दाश्रूणि प्रतिबिम्बितं माल्यं राज्ञा नलेनानुरागाद्दृशोरपि न्यस्तमिवास्त । न केवलं हृदि, किंतु नेत्रयोरपि धृतमित्यर्थः । अत एव तन्माल्यं पिबतोर्नलनेत्रयोर्मध्यः प्रलम्बत्वमालम्बतेति युक्तम् । दीर्घाया मालाया अन्तर्धारणार्थं नेत्रमध्योऽपि दीर्घो जात इति भावः ॥

स्तम्भस्तथालम्भितमां नलेन भैमीकरस्पर्शमुदः प्रसादः ।
कंदर्पलक्ष्यीकरणार्पितस्य स्तम्भस्य दम्भं स चिरं यथापत् ॥ ५९ ॥

स्तम्भ इति ॥ मालानिक्षेपसमयजातो भैमीकरस्य स्पर्शस्तेन जाता मुद्धर्षस्तस्य प्रसादरूपः स्तम्भः सात्त्विकभावो नलेन तथाऽलम्भिततमामतितरां प्राप्तः । तथा स नलः कंदर्पस्य

१ 'प्रभाव' इति पाठो जीवातौ ।

लक्षीकरणार्थं शरव्यार्थमर्पितस्यारोपितस्य स्तम्भस्य दम्भं व्याजं वेध्यकाष्ठसादृश्यं चिरका कामवेध्यस्तम्भवद्भैमीकरस्पर्शजातसात्त्विकस्तम्भवशान्नितरां निर्व्यापारो जात इति भा नितरां कामपीडा सूचिता ॥

इदानीमिन्द्रादिभिः स्वरूपं धृतमित्याह—

उत्सृज्य साम्राज्यमिवाथ भिक्षां तारुण्यमुल्लङ्घ्य जरामिवारात्।
तं चारुमाकारमुपेक्ष्य यान्तं निजां तनूमाददिरे दिगीशाः ॥ ६० ॥

उत्सृज्येति ॥ अथ नलवरणानन्तरमिन्द्रादयो दिगीशा दिक्पालाः यान्तं गच्छन्तं सुन्दरं तमलीकनलाकारमुपेक्ष्योन्मुच्य निजां सहस्रनेत्रत्वादिलक्षणां स्वीयां तनूमारान्नल एवाददिरेऽङ्गीचक्रुः । कः कामिव—कश्चिद्राजा साम्राज्यमुत्सृज्य क्षीणपुण्यतया चक्रवर्ति त्यक्त्वा भिक्षामिव । तथा—कालवशाद्गच्छत्तारुण्यमुल्लङ्घ्यातिक्रम्य कश्चिज्जरामिव । तथान्नै नेन्द्राद्याकाराणां नलाकारादतिहीनत्वं सूचितम् । साम्राज्यादिपरित्यागेन भिक्षाद्यङ्गीकारे दुःखं भवति तावन्नलाकारपरित्यागेन स्वाकाराङ्गीकारे तेषां जातमिति भावः । तत्र निन्दनं हेतुः । अन्योऽपि विद्वानसमीचीनमपि स्वीयमङ्गीकरोति, नतु समीचीनमपि परकीय 'यातुम्' इति पाठे स्वर्गमिति शेषः । आददिरे, 'आङो दोऽनास्य—' इति तङ् ॥

यथाक्रमं तेषामाकारस्वीकारमाह—

मायानलत्वं त्यजतो निलीनैः पूर्वैरहंपूर्विकया मघोनः ।
भीमोद्भवासात्त्विकभावशोभा दिदृक्षयेवाविरभावि नेत्रैः ॥ ६१ ॥

मायेति ॥ मायानलत्वमलीकनलत्वं त्यजतो मघोनो निलीनैः पूर्वं निजशक्त्या गोपितैः पूर्वैर्नेत्रैर्नलाङ्गसङ्गजनिता भीमोद्भवायाः सात्त्विकभावशोभा रोमाञ्चादिलक्ष्मीस्तस्या दिदृक्ष येव दर्शनेच्छयेव अहं पूर्वमहं पूर्वमिति यथा भवति तथा । यद्वा—अहं पूर्वमहं पूर्व मिति यस्यां क्रियायां सर्वे ब्रुवते साहंपूर्विका स्पर्धौत्सुक्याभ्यामाविरभावि वेगेन प्रक टीभूतम् । इन्द्रेण स्वनेत्रसहस्रं प्रकटितमिति भावः । अन्योऽपि दर्शनोत्सुकोऽहंपूर्विकया प्रकटो भवति । 'अहं पूर्वमहं पूर्वमित्यहंपूर्विका स्त्रियाम्' इत्यमरः । अहंपूर्विकया, स्वार्थे कः । मत्वर्थीयष्ठन्वा ॥

गोत्रानुकूलत्वभवे विवाहे तत्प्रातिकूल्यादिव गोत्रशत्रुः ।
पुरश्चकार प्रवरं वरं यमायन्सखायं ददृशे तया सः ॥ ६२ ॥

गोत्रेति ॥ तया स इन्द्रसखः प्रवरो ददृशे दृष्टः । स कः—गोत्रशत्रुरिन्द्रो यं वरं श्रेष्ठं प्र रमेतन्नामानं सखायं पुरश्चकार पूजितवान् । अथ च अग्रेसरमकरोत् । किं कुर्वन्—नलभैम्योः पक्ष्योर्वंशादिपुरुषयोरनुकूलत्वेनासमानत्वेन विवाह्यत्वेन वा भवे जायमाने । अथच—गोत्र योर्जन्मकालीननाम्नोरानुकूल्येन तृतीयैकादशचतुर्थदशमादिज्योतिःशास्त्रोक्तसद्राशिकूटत्वेन जायमाने विवाहे विषये । विवाहार्थमिति यावत् । आयन्स्वर्गात्स्वयंवरार्थमायन्भुवमागच्छन् विभागेन [illegible]लभदृष्टोऽभूदिदानीं प्रकटो जात इत्यर्थः । सखायमिन्द्रमायन्प्राप्नुवन्स प्रवरदृष्टा

[illegible] गत्यात इति पाठः ।

दृष्ट इति वा । प्रवरशब्दच्छलेन प्रवरपुरस्कार उत्प्रेक्षते—तस्य गोत्रानुकूल्यविशिष्टस्य विवाहस्य प्रातिकूल्याद्विरुद्धत्वादिव । यतोऽयं गोत्रशत्रुरिति च्छलम् । नलभैमीगोत्रयोरनुकूलत्वेन जायमाने विवाहे स्वयमिन्द्रस्तत्प्रातिकूल्यं कृतवान् । ततश्च विशिष्टस्यापि प्रातिकूल्ये गोत्रयोरपि प्रातिकूल्यं जातम् । देवत्वाद्गोत्ररहितत्वाच्च स्वगोत्रभैमीगोत्रयोरप्यनुकूलत्वाभावात्प्रातिकूल्यम् । ततश्च गोत्रयोः प्रातिकूल्येऽपि श्रेष्ठप्रवराङ्गीकरणेनापि यथाकथंचिद्विवाहो घटिष्यत इति बुद्ध्या प्रवरनामेयं पुरश्चकारेत्यर्थः । यद्वा—गोत्रानुकूल्यभवे विवाहे तस्य प्रातिकूल्याद्धेतोः प्रवरं पुरश्चकार । समानप्रवरत्वेनापि विवाहनिषेधादित्यर्थः । नाम्नोराद्याक्षरयो राशिकूटसूचकयोर्गणनायां षडष्टकायस्य राशिकूटादिव गोत्रशत्रुरित्यादि ज्योतिःशास्त्रादूह्यम् । प्रवरमिन्द्रमित्रम् ॥

स्वकामसंमोहमहान्धकारनिर्वापमिच्छन्निव दीपिकाभिः ।
उद्गत्वरीभिः स्फुरितं वितेने निजं वपुर्वायुसखः शिखाभिः ॥ ६३ ॥

स्वकामेति ॥ वायुसखोऽग्निः निजवपुरुद्गत्वरीभिरुद्दिलरीभिः शिखाभिर्ज्वालाभिः स्फुरितं वितेने व्याप्तं चकार । भैम्यभिलाषं परित्यज्य पुनरपि ज्वालाव्याप्तं शरीरमङ्गीचकारेत्यर्थः । किं कुर्वन्निव—दीपिकानिर्वत्प्रज्वलितशिखाभिः स्वस्य कामेन संमोहोऽविवेकस्तद्रूपो महान्धकारस्तस्य निर्वापं शान्तिमिच्छन्निव । उद्गत्वरीभिः, 'गत्वरश्च' इति क्वरबन्तात् 'टिड्ढा–' इति ङीप् ॥

पत्यौ वृते भीमजया न वह्नावह्नाय निह्नुवे यः ।
जनादपत्रप्य स हा सहायस्तस्य प्रकाशोऽभवदप्रकाशः ॥ ६४ ॥

पत्याविति ॥ यः प्रकाशः पूर्वं वह्निरलीकनलत्वाङ्गीकारसमये स्वमात्मानमह्नाय शीघ्रं निह्नुवे गोपितवान्स तस्य वह्नेः सहायः सखा प्रकाशो दीप्तिः सदोऽस्य दिवसेन हेतुनाऽप्रकाशोऽप्रकटोऽभवत् । प्रकटीभूतोऽपि सूर्यप्रभाच्छादितत्वादप्रकटो जात इत्यर्थः । हा कष्टम् । पत्यौ स्वस्वामिनि वह्नौ भीमजया न वृते सति जनलोकादपत्रप्य लज्जयैव प्रकटो नाभूदिति तुल्योत्प्रेक्षा । अन्योऽपि स्वस्वामिनोपकर्षे लज्जया निलीयते । ज्वालासत्त्वेऽपि स्वपि रात्रिवत्प्रकाशाभावाद्वह्निर्निर्धूम एवाभूदिति भावः ॥

सदण्डमालक्तकनेत्रचण्डं तमःकिरं कायमधत्त कालः ।
तत्कालमन्तःकरणं नृपाणामध्यासितुं कोप इवोपनम्रः ॥ ६५ ॥

सदण्डमिति ॥ कालो यमः सदण्डं लोहदण्डेन सह वर्तमानमलक्तकेन रक्तं चक्रमलक्तकं तद्वदारक्ते नेत्रे ताभ्यां चण्डमतिभयंकरम्, तथा—तमःकिरमन्धकारमुद्गिरन्तं कज्जलात् । यद्वा नीलवर्णत्वातिशयेन तमसो निक्षेपकम् । एवंविधं कायं देहमधत्त । प्रकटितवानित्यर्थः । उत्प्रेक्षते—तत्कालं तस्मिन्क्षणे [illegible] नृपाणामन्तःकरणमध्यासितुमधिष्ठातुमुपनम्र आभिमुख्यः कालः श्यामः कोप इव । नृपैः कोप एव दृष्टो यमो न दृष्ट इति भावः । कुपितोऽप्येवंविधो भवति । आलक्तके, 'तेन रक्तं रागात्' इत्यण् । तमःकिरम्, 'इगुपध–' इति कः । अन्तःकरणम्, 'अधिशीङ्–' इति कर्मत्वम् ॥

---

१ 'महान्धकार निर्वापमिच्छन्निव' इत्यपि पाठः ।

दृग्गोचरोऽभूदथ चित्रगुप्तः कायस्थ उच्चैर्गुण एतदीयः।
ऊर्ध्वं तु पत्रस्य मषीद एको मषेर्ददच्चोपरि पत्रमन्यः॥ ६६॥

दृगिति ॥ एतदीयो यमसंबन्धी उच्चैर्नितरामुन्नतो वा गुणः सेवकः उच्चैर्गुणा ... वा। कायस्थो राजसेवको गणकजातिविशेषश्चित्रगुप्तनामा लेखको दृग्गोचरः प्रकटोऽभूत्। अथच—काये देहे तिष्ठतीति कायस्थ एतदीयो नितरां प्रसिद्धः चित्रेणाश्चर्यभूतेन ... रेण गुप्तः छादित एवंभूतो गुणः श्यामवर्णः प्रकटोऽभूत्। एवं शब्दश्लेषसामान्येन ... योर्द्वयोर्विशेषमाह-तत्र एको गणकस्तालपत्रस्योर्ध्वं चोपरि मषीं द्रव्यान्तरेण द्रवीभूतं ... ददाति एवंभूतः। प्राणिनां शुभाशुभकर्मगणनार्थं मष्या विलिखन्नित्यर्थः। अन्यः ... मषेरुपरि पत्रं ददत् मषेः सकाशादहं काल इति पत्रालम्बनं कुर्वन्प्रकटोऽभूत्... अतिश्याम इत्यर्थः। चौ परस्परसमुच्चये त्वर्थे वा॥

तस्यां मनोबन्धविमोचनस्य कृतस्य तत्कालमिव प्रचेताः।
पाशं दधानः करबद्धवासं विभुर्यभावाप्यमवाप्य देहम्॥ ६७॥

तस्यामिति ॥ तस्मिन्काले नलवरणानन्तरं विभुः स्वामी प्रचेता वरुण आप्यं ... तैजसाद्यवयवोपष्टब्धप्रचुरतरजलावयवनिर्मितमुपभोगयोग्यमम्मयं देहमवाप्य ... भूतः—तस्यां भैमीविषये कृतस्य मनोबन्धविमोचनस्यान्तःकरणबन्धोन्मोचनस्य [पूर्वं ... विषये ले(पा)शेन बद्ध्वा निश्चलीकृत्य यत्क्षिप्तं मनः, तत्तया नले वृते सति ... त्पुनस्तत्क्षणमेवोन्मोचितम्] (तत्) तदीयमोचनस्यैव (तत्) संबन्धिनमिव करे ... कृतवसतिं पाशं स्वायुधं दधानः। अन्यस्यापि तत्कालमेव कृतवत्सादिबन्धनविमोचनस्य ... पाशो बन्धनरज्जुर्भवति। आप्यं पूर्ववत्॥

सद्द्वितीयः स्त्रियमभ्युपेयादेवं स दुर्बुध्य नयोपदेशम्।
अन्यां सभार्यः कथमृच्छतीति जलाधिपोऽभूदसहाय एव॥ ६८॥

सदेति ॥ स जलाधिपो वरुणः। अथ च—जडस्वामी मूर्खतमः। इति ... एवाभूत्। इति किम्—सद्द्वितीयः ससहायः स्त्रियमभ्युपेयात्, किं पुनरन्या... नयोपदेशं नीतिमार्गं दुर्बुध्य दुष्टमिदमिति विचार्य। 'मात्रा स्वस्रा दुहित्रा वा न ... भवेत्। बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति॥' तथा-'कामिनी कामयेदेव ... सुतम्। सद्वितीयोऽभ्युपेयात्तामतः परिणतामपि॥' इत्यादिवाक्यरूपं श्रीपुरुषयोः ... नसंभवादेकेन स्त्रियं प्रति न गन्तव्यम्, किंतु ससहायेनैवेति प्रतिपादनपरं ... च्चा सहधर्मिण्या वर्तमानः स्त्रियमुपेयादित्युपदेशपरं बुद्ध्वा। सभार्योऽन्यां ... प्राप्नोति, अपितु न कथंचित्। नह्यन्यस्यामनुरक्तमन्यानुसरति, न चान्यस्यानुरक्त... दीति नयस्य पूर्वमर्थं त्यक्त्वा द्वितीयमङ्गीकृत्यासहाय एवागत इत्यर्थः। अन्योऽपि ... नयोपदेशं विपरीतमेव बुध्यते। 'द्वितीया सहधर्मिणी' इत्यमरः। सद्द्वितीयः ... त्सत्वाभावः॥

---

१ 'अत्र 'नलेऽवृते सति' ... इति ... ' ...

इदानीं देव्यापि स्वाकारो धृत इत्याह—

देव्यापि दिव्याऽनु तनुः प्रकाशीकृता मुदश्चक्रभृतः सृजन्ती ।
अनिह्नुतैस्तामवधार्य चिह्नैस्तद्वाचि बाला शिथिलादृताभूत् ॥ ६९ ॥

देव्येति ॥ अन्विन्द्रादीनां स्वाकारधारणानन्तरं देव्या अपि सरस्वत्या अपि चक्रभृतः श्रीविष्णोः मुदो हर्षान्सृजन्ती भेदविरहा दिव्या तनुः सुन्दरा मूर्तिः प्रकटीकृता । देव्यापि स्वाकारो धृत इत्यर्थः । अनन्तरं च बाला भैमी अनिह्नुतैः प्रकटितैर्वीणाहंसादिभिश्चिह्नैस्तां सरस्वतीमवधार्य ज्ञात्वा तद्वाचि श्लेषवक्रोक्त्यादिरूपायां तस्या वाण्यां विषये शिथिलादृता परित्यक्तादराभूत् । पूर्वं तु मानुषीयमनोहरं कथं वदतीति साश्चर्याऽभूत् । संप्रति सरस्वतीं दृष्ट्वा अस्या एवमुक्तौ किमाश्चर्यमपि तु न किंचिदिति त्यक्ताश्चर्या जातेत्यर्थः ॥

विलोकके नायकमेलकेऽस्मिन्रूपान्यताकौतुकदर्शिभिस्तैः ।
बाधा बतेन्द्रादिभिरिन्द्रजालविद्याविदां वृत्तिवधाद्व्यधायि ॥ ७० ॥

विलोकक इति ॥ अस्मिन्नानादेशेभ्यः समागते नायकमेलके राजसङ्घे विलोकके विलोकयति सति रूपान्यतया नलाकारं परित्यज्य सहस्रनेत्राद्याकारधारणेन कौतुकं दर्शयितुं शीलमेषामेवंभूतैर्देवैस्तैरिन्द्रादिभिर्निर्मले जलदर्शनादिरूपामिन्द्रजालविद्यां ये विदन्ति जानन्ति तेषां वृत्तिवधाज्जीवनोपायस्य स्वयमङ्गीकरणेन नाशाद्बाधा व्यधायि पीडा विहिता । बताश्चर्यं कष्टं वा । स्वयंवरमध्य इन्द्रजालं प्रकटयतामैन्द्रजालिकानां विलोककेऽस्मिन् राजसङ्घे तैर्वृत्तिवधात्तेषां बाधा व्यधायि । ऐन्द्रजालिकान्परित्यज्येन्द्रादीनामेव विलोकनादित्यर्थ इति तत्त्वार्थो वा । रूपान्तरं धारयमाणानिन्द्रादीन्दृष्ट्वा सर्वेऽपि साश्चर्या जाता इति भावः । तैः, सा च ते च 'पुमान्स्त्रिया' इत्येकशेषः ॥

विलोक्य तावाप्तदुरापकामौ परस्परप्रेमरसाभिरामौ ।
अथ प्रभुः प्रीतमना बभाषे जाम्बूनदोर्वीधरसार्वभौमः ॥ ७१ ॥

विलोक्येति ॥ अथ जाम्बूनदस्य सुवर्णस्योर्वीधरः पर्वतो मेरुस्तस्य सार्वभौमश्चक्रवर्ती अत एव प्रभुः समर्थ इन्द्रः प्रीतमनाः सन् तौ भैमीनलावेतादृशौ विलोक्य बभाषे ॥ किंभूतौ—आप्तोऽन्योन्यप्राप्तिरूपो दुरापोऽन्येन प्राप्तुमशक्यः कामोऽभिलाषो याभ्याम् । अत एव—परस्परप्रेमरसेनाभिरामौ स्तम्भस्वेदादिसात्त्विकभावयुक्तौ । 'प्रभुः, जाम्बूनदोर्वीधर—' इत्यादिना वरदानसामर्थ्यं सूचितम् । 'प्रीतमनाः' इत्यनेन च स्वेच्छयैव वरं दातुमारब्धवानतु याचितः सन्निति प्रतारणाभावं सूचयति । सार्वभौमः, 'तस्येश्वरः' इत्यण् । अनुशतिकादित्वादुभयपदवृद्धिः ॥

किमाह स, इत्यत आह—

वैदर्भि दत्तस्तव तावदेष वरो दुरापः पृथिवीश एव ।
दूत्यं तु यत्त्वं कृतवानमायं नल प्रसादस्त्वयि तन्ममायम् ॥ ७२ ॥

वैदर्भीति ॥ हे वैदर्भि, मया तावत्प्रथममेव पृथिवीश एव नल एव त्वत्संबन्धी वरः । अथ च देवप्रसादः । अर्थात्तुभ्यं दत्तः । किंभूतः—भूयोभिरपि तपोभिर्दुरापः । दत्तस्तावद्दत्त

एवेति वा। इति भैमीमुक्त्वा नलमाह—हे नल, त्वं तु भैमीविषयेऽस्मत्संबन्धि सादमार्यं व्याजरहितं मनःशुद्ध्या कृतवान्, ततस्तात्त्वयि विषये ममायं वक्ष्यमाणः प्रसादः वरदानमित्यर्थः॥

प्रत्यक्षलक्ष्याममवलम्ब्य मूर्तिं हुतानि यज्ञेषु तवोपभोक्ष्ये।
संशेरतेऽस्माभिरवीक्ष्य भुक्तं मखं हि मन्त्राधिकदेवभावे॥ ७३॥

प्रत्यक्षेति॥ हे नल, अहं प्रत्यक्षेण लक्ष्यां नेत्रदृश्यां मूर्तिं तनुमवलम्ब्य हुत यज्ञेषु हवींषि पुरोडाशादीन्युपभोक्ष्ये। ईदृशेन वरेण मम को लाभ इत्यत आह—हि द्विद्वांसो यजमानादयश्च मखं यज्ञमस्माभिः साक्षाद्भुक्तमवीक्ष्य मन्त्रादधिकोऽतिरिक्तो देवता सद्भावे विषये संशेरते। मीमांसकाः मन्त्रातिरिक्ता कर्मसमवायिनी देवता नास्त्येवेति वे न्तिभिः सह विप्रतिपद्यन्ते। तस्मात्तद्विप्रतिपत्तिनिरासद्वारा तुभ्यं कीर्तिं दातुं त्वदीयः हुतं प्रत्यक्षेणैव शरीरेण भोक्ष्य इति भावः। अग्नौ प्रक्षिप्तस्य हविषो भस्मसाद्भावमात्र दर्शनान्मन्त्रप्रकाश्येन्द्रादीनां चादर्शनात्किमयं यज्ञः सत्योऽसत्यो वेति संदेहे प्रत्यक्षशरीर मखभोजने त्वयं संदेहो गमिष्यति। कस्मिन् सति—मन्त्रादधिके देवेषु भावे विश्वासे सति। 'मन्त्रमयी देवता' इत्येतत्पक्षापेक्षया प्रत्यक्षायां देवतायामधिकस्य मनोविश्वासस्य युक्तत्वादि त्यर्थः। संशयनिवृत्तिरेव महांस्तव लाभो भविष्यतीति भावः। उपभोक्ष्ये, 'भुजोऽनवने' इति तङ्। अस्माभिरिति बहुवचनं देवतान्तराभिप्रायम्॥

भवानपि त्वद्दयितापि शेषे सायुज्यमासादयतं शिवाभ्याम्।
प्रेत्यास्मि कीदृग्भवितेति चिन्ता संतापमन्तस्तनुते हि जन्तोः॥ ७४॥

भवानिति॥ हे नल, भवानपि त्वद्दयिता भैम्यपि युवां शेषे भूलोकभोगविलसित कर्मणः शेषेऽस्तमये सति शिवाभ्यामीश्वरपार्वतीभ्यां सायुज्यं सह ऐक्यमासादयतं प्राप्नुतम्। भवाञ्शिवेन, भैमी च शिवया सहैक्यं गच्छत्वित्यर्थः। स्वकर्मप्राप्तमिदं स्वयमेव भविष्यति किं वरदानेनेत्यत आह—हि यस्मात्प्रेत्य मरणं प्राप्याहं कीदृक्प्रेतो देवो मनुष्यो वा, सर्पस्तो नारकी वा भविष्यामीत्यादिश्चिन्ता जन्तोः प्राणिनोऽन्तःकरणे संतापं महान्तमार्तिं जनयति। वरदाने चिन्तानिवृत्तेर्मनस्तापनाशः फलमित्यर्थः। शिवाभ्याम्, 'पुमान्स्त्रिया' इत्येकशेषः। 'अस्मि' इत्यहमर्थेऽव्ययं वा॥

तवोपवाराणसि नामचिह्नं वासाय पारेसि पुरं पुरास्ति।
निर्वातुमिच्छोरपि तत्र भैमीसंभोगसंकोचभियाधिकाशि॥ ७५॥

तवेति॥ हे नल, निर्वातुमिच्छोरपि मुमुक्षोरपि तव वासाय वसत्यर्थमुपवाराणसि काशीसमीपे पारेसि असिनद्याः परतीरे नामचिह्नं त्वन्नामाङ्कितं तत्प्रसिद्धं पुरम्। नलपुरमिति यावत्। पुरास्ति भविष्यति। इदानीमन्यत्र निवासेऽप्यतः परं तत्पुरं राजधानी भविष्यति। मुमुक्षोरपि ते पुरं काशीमधिकृत्य न कृतमित्यर्थः। किमिति न कृतमित्यत आह—भैम्या सह संभोगः सुरतादिसुखं तस्य संकोचोऽल्पत्वं तस्माद्भिया भयेन अधिकाशि पञ्चक्रोशपरिमितायां

१ कीदृग्भविता अस्मि इति वा। 'धातुसंबन्धे प्रत्ययाः' इति भविता इति भविष्यत्कालप्रत्ययः 'अस्मि' इति वर्तमानकालप्रत्ययेनाभिसंबध्यमानः साधुर्भवति'—इति सुखावबोधा।

ऽस्यां मुक्तिपुर्यां ब्रह्मचर्यादिनियमे भोगसंकोचभिया तत्पुरं न कृतम्, किंतु तत्समीप इति भावः । उपवाराणसि, सामीप्येऽव्ययीभावः । पारेत्ति, 'पारेमध्ये षष्ठ्या वा' इत्येदन्तत्वं च त एव निपातनात् । पुरास्ति, 'यावत्पुरा-' इति लट् । अधिकाशि, सप्तम्यर्थेऽव्ययीभावः ॥

धूमावलिश्मश्रु ततः सुपर्वा मुखं मखास्वादविदां तमूचे ।
कामं मदीक्षामयकामधेनोः पयायतामभ्युदयस्त्वदीयः ॥ ७६ ॥

धूमेति ॥ ततो धूमावलिरेव श्मश्रु यस्यैवंविधं मखास्वादविदां यज्ञरसाभिज्ञानां देवानां मुखं सुपर्वा देवोऽग्निरिति तं नलमूचे । इति किम्—हे नल, त्वदीयोऽभ्युदयस्त्वत्समृद्धिः कामं नितरां मदीक्षामयी विलोकनमयी विलोकनरूपा कामधेनुस्तस्याः पयायतां दुग्धमिवाचरतु तद्वद्परिमितो भवत्विति । मद्विलोकनमात्रेण तव समृद्धिरनन्तास्त्विति तस्मै वरं दत्तवानित्यर्थः । अन्यत्रापि मुखस्य भाषणं श्मश्रु च युक्तम् । कामधेनोः पयो युक्तम् । धूमावलिरूपेण श्मश्रुणा ततो व्याप्त इति वा । पयायताम् । आचारे, 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्सलोपौ ॥

वरान्तरमाह—

या दाहपाकौपयिकी तनुर्मे भूयात्त्वदिच्छावशवर्तिनी सा ।
तया पराभूततनोरनङ्गात्तस्याः प्रभुः सन्नधिकस्त्वमेधि ॥ ७७ ॥

येति ॥ हे नल, स्फोटादिजनितो दाहः, तण्डुलादेः पाकः, तयोरौपयिकी कारणभूता मे या तनुर्मूर्तिः सा तवेच्छाया वशे वर्तत इत्येवंशीला भूयात् । निरग्निकेऽपि देशे यत्र त्वमभिलषिष्यसि तत्र दाहपाकयोग्या मम मूर्तिः प्रकटा भवत्वित्यर्थः । अतएव वशवर्तित्वात्तस्या मदीयमूर्तेः प्रभुः स्वामी संस्त्वं शिवनेत्रज्वालारूपया तया मदीयमूर्त्या पराभूततनोर्दग्धशरीरादनङ्गादधिक एधि भव । पूर्वमेव सुन्दरत्वेन कामादधिकः, इदानीं तु मत्तन्वात्मत्त्वद्वशवर्तित्वात्त्वद्दासीभूतया मन्मूर्त्या पराभूते प्रकारान्तरेणाप्यधिकतरो भवेति भावः ॥

वरान्तरमाह—

अस्तु त्वया साधितमन्नमीनरसादि पीयूषरसातिशायि ।
यद्भूप विश्वस्तव सूपकारक्रियासु कौतूहलशालि शीलम् ॥ ७८ ॥

अस्त्विति ॥ हे नल, त्वया साधितं सदन्नं तण्डुलादि, मीना मत्स्याः, रसाः मधुरकटुकादयो दुग्धादयो वा त आदयो मुख्या यस्य एवंभूतमन्यदपि पक्वोन्नं मदर्थं पीयूषरसस्वादातिशायि तत्स्वादमतिक्रामति तच्छीलमेवंभूतमस्तु भवतात् । यद्यस्माद्धे भूप, तव सूपकारक्रियासु पाककर्मव्यापारविस्तारमञ्जसा कौतुकेन शालते तच्छीलमेवंविधं शीलं स्वभावं विश्वो जनः । तस्मात्तुभ्यमीदृशो वरो दत्त इत्यर्थः । 'मितम्' इत्यपि पाठः । मिश्रः, 'अन्नादो द्रव्योश्च' इति बहुवचनम् ॥

वैवस्वतोऽपि स्वत एव देयस्तुष्टस्तमाचष्ट धर्मादिराज्यम् ।
वरप्रदानाय तवावदानैर्धिरं मदीया स्वतोतुरस्त्वम् ॥ ७९ ॥

---

१ 'कालेशरात्' इति पाठः ।

वैवस्वतोऽपीति ॥ वैवस्वतः सूर्यपुत्रो यमोऽपि देवः स्वत एव स्वयमेव ... धराधिराजं नलमित्याचष्टावोचत् । इति किम्—हे नल, ... शोरङ्गभावैर्वा निमित्तैरियं मदीया रसना जिह्वा वरप्रदानाय तुभ्यं वरं दातुं ... कदा वरं दास्यामीति सोत्कण्ठा विद्यत इति । अहं वरं ददामीत्यर्थः ॥

सर्वाणि शस्त्राणि तवाङ्गचक्रैराविर्भवन्तु त्वयि शत्रुजैत्रे ।
अवाप्यमस्मादधिकं न किंचिज्जागर्ति वीरव्रतदीक्षितानाम् ॥ ८० ॥

सर्वाणीति ॥ हे नल, सर्वाणि मन्त्रप्रयोज्यब्रह्मास्त्रादिसहितान्यभ्याससाध्यानि ... स्त्रादीनि शस्त्राण्यङ्गानां मोक्षोपसंहारादीनां मन्त्रदेवतादीनां चक्रैः समूहैः सत्याविर्भवन्तु ... टीभवन्तु । मन्त्रशस्त्रादीनि त्वमेव जानीहीति भावः । यतः—शत्रुजैत्रे शत्रूणां जेतरि । किमित्येवं वरदानमित्याशङ्क्याह—संग्रामादपलायनलक्षणे वीराणां व्रते दीक्षितानां ... नियमानां शूराणामस्मात्सर्वशस्त्रज्ञानादधिकमुत्कृष्टं किंचिदवाप्यं प्राप्यं न जागर्ति न ... नास्ति । किंत्वेतदेव तेषां परमं प्राप्यम् । तस्मादयं वरो युक्त एवेत्यर्थः । दीक्षितानाम्, 'कृत्यानां कर्तरि वा' इति षष्ठी ॥

कृच्छ्रं गतस्यापि दशाविपाकं धर्मान्न चेतः स्खलतु त्वदीयम् ।
अमुञ्चतः पुण्यमनन्यभक्तेः स्वहस्तवास्तव्य इव त्रिवर्गः ॥ ८१ ॥

कृच्छ्रमिति ॥ हे नल, कृच्छ्रमतिकष्टं दशाविपाकमवस्थापरिवर्तं गतस्यापि ... पदि पतितस्यापि तव चेतो धर्मान्न स्खलतु । किंभूतं चेतः—त्वदीयं त्वदायत्तम् । ... सर्वैरप्यधर्म एव क्रियते, तव तु चित्तमापद्यपि धर्मपरमेव भूयादिति वरो मया ... इत्यर्थः । एतस्य वरस्य दाने हेतुमाह—यस्मात्पुण्यममुञ्चतोऽनन्यभक्तेः पापानाचरणे ... लधर्मैकसेविनः पुरुषस्य धर्मार्थकामलक्षणस्त्रिवर्गः स्वहस्ते वसति एवंभूत इव ... अलक्ते धर्मे तदायत्तावर्थकामावपि प्राप्येते । कृच्छ्रमित्यादिना भविष्यत्कालिप्रमादः ... 'स्खलतात्तवेदम्' इति पाठः । अन्यस्य भक्तिर्भजनं तदभावोऽनन्यभक्तिर्धर्मोतिरेकत्वम् ... भावाद्धेतोरिति वा वसतीति वास्तव्यः, 'वसेस्तव्यत्कर्तरि णिच्च' इति तव्यत् । वर्गः ... 'त्रिवर्गो धर्मकामार्थैः' इत्यमरः ॥

स्मिताञ्चितां वाचमवोचदेनं प्रसन्नचेता नृपतिं प्रचेताः ।
प्रदाय भैमीमधुना वरौ तु ददामि तद्यौतककौतुकेन ॥ ८२ ॥

स्मितेति ॥ प्रसन्नचेताः संतुष्टः प्रचेता वरुण एनं नृपतिं प्रति स्मिताञ्चितां ... युतां वाचमवोचत्—हे नल, अहं भैमीं प्रदायाधुना तस्या भैम्या यौतकं युतकयोर्वधूवरयोः संबन्धि पारिबर्हं वस्त्राभरणादि तस्य कौतुकेन तु पुनः द्वौ वरौ ददामि । 'कन्यां प्रदाय यत्किंचिद्वराया‍त्र प्रदीयते । वेदिकायां स्थितायैव तद्यौतकमिति स्मृतम् ॥' इति । युतं युगं युतमेव युतकं युतकसंबन्धि देयं यौतकम् । दायजा इति कान्यकुब्जभाषायाम् ॥

---

१ 'सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः—' इति जीवातुः । २ 'अत्र त्रिवर्गसिद्धिरूपकार्येण धर्मालाभरूपकारणसमर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासः' इति जीवातुः ।

यत्राभिलाषस्तव तत्र देशे नन्वस्तु धन्वन्यपि तूर्णमर्णः ।
आपो वहन्तीह हि लोकयात्रां यथा न भूतानि तथाऽपराणि ॥ ८३ ॥

यत्रेति ॥ ननु हे नल, यत्र धन्वनि निर्जले मरावपि देशे तव जलाभिलाषः, तत्र देशे त्वदिच्छामात्रेण तूर्णं शीघ्रमर्णो जलमस्तु भवतु । जलस्यैव वरदाने हेतुमाह—हि यस्मादिह लोके पञ्चसु भूतेषु वा मध्ये आपो जलानि यथा लोकयात्रां लोकजीवनहेतुत्वं वहन्ति प्राप्नुवन्ति, तथाऽपराणि भूतेजोवाय्वाकाशलक्षणानि भूतानि लोकजीवनहेतवो न भवन्ति । 'पानीयं प्राणिनां प्राणा विश्वमेतच्च तन्मयम्' इति । उदकस्येच्छानुसारित्वं परमः पुरुषार्थ इत्यर्थः । 'यात्रा तु जीवनोपाये' इति विश्वः ॥

प्रसारितापः शुचिभानुनाऽस्तु मरुः समुद्रत्वमपि प्रपद्य ।
भवन्मनस्कारलवोद्गमेन क्रमेलकानां निलयः पुरेव ॥ ८४ ॥

प्रसारीति ॥ हे नल, मरुर्निर्जलो देशो भवतो मनस्कारोऽभिलाषस्तस्य लवो लेशस्तस्योद्गमेनोदयेन बहूदकत्वसमुद्रत्वं प्रपद्य प्राप्यापि पुरेव निर्जलत्वदशायां यथासीत् तथैवास्तु । किंभूतः—(पूर्वम्) शुचिभानुना ग्रीष्मसंबन्धिना सूर्येण प्रसारी विस्तृतस्तापः संतापो यस्य । (इदानीमपि) समुद्रत्वाच्छुभ्रकिरणेन चन्द्रेण प्रसारिता विस्तारिता आपो यस्य । शुचेर्वडवाग्नेः किरणेन ज्वालया विस्तारितः (री तापः) संतापो यस्येति वा । चन्द्रोदये समुद्रवृद्धिः, समुद्रे वडवाग्निर्युक्तः । तथा—(पूर्वम्) क्रमेलकानामुष्ट्राणां निलयः स्थानभूतः । बाहुल्येन तेषां तदुद्भवत्वात् । (इदानीम्) भवन्मनस्कारोऽभिलाषस्तस्य लवो लेशस्तदुद्गमे सति नक्राणां यादोविशेषाणां ये मेलकाः समूहास्तेषां निलयः । क्रमेलकानां निलयो मरुर्भवन्मनस्कारलवोद्गमे सति समुद्रत्वं प्रपद्यापि पुरेव शुचिभानुना प्रसारितापो मास्तु, अपितु भवत्वेवेति वा । प्रसारिता आपो यस्येति, 'ऋक्पूर्–' इत्यप्रत्ययः । मनस एकाग्रकरणं मनस्कारः । चित्तस्यैकाग्र्येण चिन्तनमिच्छाविशेषः । 'चित्ताभोगो मनस्कारः' इत्यमरः । 'अतः कृकमि–' इति सत्वम् ॥

वरान्तरमाह—

अम्लानिरामोदभरश्च दिव्यः पुष्पेषु भूयाद्भवदङ्गसङ्गात् ।
दधं प्रसूनोपनया नयान्यद्धर्मशर्मोभयकर्तृकं यत् ॥ ८५ ॥

अम्लानिरिति ॥ हे नल, भवदङ्गसङ्गाद्धेतोः पुष्पेष्वम्लानिरसंकुचद्वर्णामलत्वम्, आमोदभरश्च दिव्यः सर्वोत्तमः परिमलातिशयश्च भूयात् । [illegible] पुष्पमालयैव । [illegible] । धर्मस्य पुण्यस्य शर्मणः सुखस्य चोभयस्य [illegible] कार्यं [illegible] यत्तु मया न [illegible] । किंतु पुष्पेणैव । [illegible] धत्ते, शिरसि धारणेन परिमलेन वा सुखं च करोति । [illegible] ॥

पाशिदेवतापि सितपूर्वमुर्वीमुपदर्शयाञ्चकार [illegible] ।
[illegible] नाकि न किञ्चिद्दर्शयोदितं ते ॥ ८६ ॥

पाशीति ॥ [illegible] । [illegible] । [illegible] (इति किम्—) 'हे नल, [illegible]

तथा—भगवती भुवनेश्वरी अभिधेया यस्य तादृशमिति वा । 'शिवान्तो वह्निवंद्युचो ... द्वितयमन्तरा । तुरीयस्वरशीतांशुरेखातारासमन्वितः ॥ एष चिन्तामणिर्नाम मन्त्रः ... र्थसाधकः । जगन्मातुः सरस्वत्या रहस्यं परमं मतम् ॥' इत्यागमात्प्रणवद्वयसंपुटितमुक्त... रूपं चिन्तामण्याख्यं मे सरस्वत्याः स्वरूपं मन्त्रं स्मर जप । स च मन्त्रस्ते सिध्यतु । ... दिचिन्तामणिमन्त्रसंभवान्म इति विशेषणम् । हश्च रश्च मश्च ईश्च तादृशं हकाररेफम... कारसमाहाररूपम्, यद्यपीकारः पश्चान्निर्दिष्टस्तथापि मकारात्पूर्वमेव ज्ञातव्यः । तस्य ... न्निर्देशो मन्त्रगोपनार्थः । तथा—सेन्दुं सचन्द्रं निराकारं निर्गताकारचतुष्टयस्वरूपं ता... मन्त्रं स्मर । इतरत्पूर्ववदिति वा । अत्र पक्षे आकाररहितो मन्त्रः सकलं कश्च ठश्च ताभ्यां सहितम् । अत्रापि निराकारं सेन्दुमिति संबध्यते । उभयाकारघटनादित्यादि पूर्ववत् तथा च 'क्लीम्' इति कामराजबीजं सिध्यति । अस्मिञ्श्लोके टीकान्तरकृतो बहूनां जैन... वादिमन्त्राणामुद्धारो विज्ञेयः । अत्र ग्रन्थविस्तरभिया कष्टकल्पनया न नोक्तः ॥

मन्त्रफलमाह—

सर्वाङ्गीणरसामृतस्तिमितया वाचा स वाचस्पतिः
स स्वर्गीयमृगीदृशामपि वशीकाराय मारायते ।
यस्मै यः स्पृहयत्यनेन स तदेवाप्नोति किं भूयसा
येनायं हृदये स्थितः सुकृतिना मन्मन्त्रचिन्तामणिः ॥ ८९ ॥

सर्वेति ॥ अयं पूर्वश्लोकोपदिष्टो मन्मन्त्रश्चासौ चिन्तामणिश्च । चिन्तामणिसंज्ञो मन्त्र इत्यर्थः । सर्वकामदत्वान्मन्मन्त्र एव चिन्तामणिः । चिन्तामणितुल्यो मन्त्र इत्यर्थः । ... पुरश्चरणादिना क्षीणपापेन सुकृतिना येन साधकेन जपादिना हृदये चित्ते कृतः, स ताव... सर्वाङ्गानि व्याप्नुवन्ति सर्वाङ्गीणानि तैः शृङ्गारादिरसैरेवातिस्वादुस्वादमृतैः स्तिमितया आर्द्र... काव्यादिरूपया वाचा वाचस्पतिर्वागीशो भवति । तथा—स साधकः स्वर्गीयमृगीदृशां दि... व्यानां मृगाक्षीणां रम्भादीनामपि वशीकाराय मारायते कंदर्पायते । तं दृष्ट्वा उर्वश्यादयो देवाङ्गनाः कामपरवशा भवन्तीत्यर्थः । किं च—यः पुरुषः कृतपुरश्चरणोऽपि यस्मै फला... स्पृहयति फलमभिलष्यति, सोऽनेन सकृत्पठितमात्रेण मन्त्रेण हेतुना तत्प्राप्नोति । किं भूयसा कथनेन मन्त्रविशेषेण वा । नात्र संदेहः । तस्मात्त्वयाऽयमेव मन्त्रो हृदये धार्य इति भावः । 'सर्वाङ्गीण' इत्यत्र 'तत्सर्वादेः—' इति खः । वाचस्पतिः, 'षष्ठ्याः पतिपुत्र—' इत्या... दिना सत्वम् । 'स्वर्गीय' इति नामधेयत्वात् 'वृद्धाच्छः' । मारायते, 'कर्तुः क्यङ्' इति क्यङ् । यस्मै, 'स्पृहेरीप्सितः' इति संप्रदानत्वम् । भूयसा, 'बहोर्लोपो भू च बहोः' ॥

पुष्पैरभ्यर्च्य गन्धादिभिरपि सुभगैश्चारुहंसेन मां चे-
न्निर्यान्तीं मन्त्रमूर्तिं जपति मयि मतिं न्यस्य मय्येव भक्तः ।
तत्प्राप्ते वत्सरान्ते शिरसि करमसौ यस्य कस्यापि धत्ते
सोऽपि श्लोकानकाण्डे रचयति रुचिरान्कौतुकं दृश्यमस्याः ॥ ९० ॥

पुष्पैरिति ॥ यः साधकश्चारुणा हंसेन निर्यान्तीं गच्छन्तीमुह्यमानाम् । हंसवाहनामि... त्यर्थः । मन्त्रमूर्तिं यन्त्रमध्यस्थितमन्त्रवर्णरूपेण परिणमदाकारां मन्त्रस्थान्तरशरीरां वा मां

देवीं सुभगैरतिमनोहरैः सुकुमारैः सुगन्धिभिश्च पुष्पैः गन्धधूपादिभिः षोडशोपचारैरप्यभ्य-र्च्य, तथा—मयि मतिं न्यस्य विषयान्तरादाकृष्य ध्यानबलेन स्थिरीकृत्य देवतान्तरपरिहारेण मय्येव भक्तः सर्वात्मकतया मामेव सेवमानः सन् चेयदि जपति, तत्तर्ह्यसौ जापको वत्सरान्ते वत्सरावसाने प्राप्ते जाते सति यस्य कस्यापि स्त्रीबालमूकादेरपि शिरसि करं धत्ते स्थापयति सोऽपि स्त्रीबालादिरप्यकाण्डेऽनपेक्षादकस्माद्वा रुचिरान्रसभावगुणालंकारयुतानदोषाञ्श्लोकान्र-चयति । यस्तु सिद्धमन्त्रः, स विविधाञ्श्लोकान्रचयतीति किं वाच्यमित्यपेरर्थः । एतदस्याः कौतुकं दृश्यम् । अनुभवेनास्य मन्त्रस्य चमत्कारो द्रष्टव्य इत्यर्थः । एवं संपूज्य हंसवाहनादिध्या-नपूर्वमेकाग्रेण मनसा चेज्जपति, तर्हि वत्सरमात्रेण सिद्धमन्त्रः सन्नेवंविधं सामर्थ्यं लभत इति भावः ॥

गुणानामास्थानीं नृपतिलकनारीति विदितां
रसस्फीतामन्तस्तव च तव वृत्ते च कवितुः ।
भवित्री वैदर्भीमधिकमधिकण्ठं रचयितुं
परीरम्भक्रीडाचरणशरणामन्वहमहम् ॥ ९१ ॥

गुणानामिति ॥ हे नृपतिलक राजश्रेष्ठ नल, अहं वैदर्भी भैमीम् । अथ च—वैदर्भी-संज्ञां रीतिमल्पपदसमासमसमासां वा रचनाविशेषं क्रमेण तव च नलस्य तव च वृत्ते त्वत्संब-न्धिनि चरित्रे विषये कवितुः काव्यकरणोद्युक्तस्य श्रीहर्षादेश्चाधिकण्ठं कण्ठेऽन्वहं सदा परी-रम्भस्यालिङ्गनस्य चुम्बनादिविलासस्य यदाचरणं करणं तदेव शरणं जीवनोपायो यस्या एवं-भूताम् । परीरम्भक्रीडया वा हेतुभूतया त्वच्चरणशरणमालिङ्गनप्रार्थनार्थं त्वच्चरणयोः पत-न्तीम् । अथच—परीरम्भस्य श्लेषालंकारस्य क्रीडया वक्रोक्तिविलासस्य वा सामस्त्येन यच्चरणं ज्ञानं तदेव शरणं यस्यास्तामेवंविधाम् । अधिकं यथा तथा नितरां रचयितुं कर्तुं भवित्री भवि-ष्यामि । किंभूताम्—गुणानां सौन्दर्यपातिव्रत्यादीनाम् । अथच—श्लेषप्रसादादीनाम् । आस्थानीं सभास्थानवत्स्थितिभूताम् । तथा—नारी इति स्त्री इति विदितां नारी चेत्, तर्हि भैम्येव नान्येति प्रसिद्धाम् । अथच—रीतिषु पाञ्चाल्यादिषु विदिता, तथा न इत्यरीति-विदिता तथाविधापि न इति नारीतिविदिता तादृशीम् । पाञ्चाल्यादिषु रीतिषु मध्ये-ऽतिप्रसिद्धामिति यावत् । तथा—तवान्तः हृदये रसेन सौंदर्यातिशयेन नलविषयानुरागेण सस्निग्धानुरागेण वा स्फीतामतिपुष्टाम् । अथच—अन्तः श्लोकमध्ये रसैः शृङ्गारा-दिभिः परिपुष्टाम् । एवंभूतां भैमीं त्वत्कण्ठालिङ्गनपरां त्वच्चरणशरणां त्वदेकवश्यां प्रत्य-हमहं करिष्यामि । त्वच्चरितवर्णयितुश्च कण्ठे एवंभूतां वैदर्भीं रीतिमधिकं च रचयि-ष्यामि । वैदर्भीमिव रमणीयां रीतिमवलम्ब्य त्वच्चरितवर्णकः यथा भवति तथाहं करि-ष्यामीति भावः । एतदपि वरदानम् । 'मद्' इति संबुद्ध्यन्तं पृथक्कृत्य राजश्रेष्ठ नः पुरुष इति संबोध्य पातिव्रत्यादिरीत्या विदितां पाञ्चाल्यादिरीतिषु च विदितामिति वा । 'श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः ॥ इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः ।' इत्यालंकारिकाः । 'आस्थानी क्लीबमास्थानम्' इत्यमरः । 'करणाधिकरणयोश्च' अधिकरणे ल्युट् । टित्वान्ङीप् । 'ना ऽक्ति-' इत्यत्र पक्षे

'ढ्रलोपे–' इति दीर्घः । कवितुः, 'कव्र वर्णने', 'कव्रृङ् स्तुतौ' इत्यस्य वा । अधिकण्ठं सप्तम्यर्थेऽव्ययीभावः ॥

वरान्तरमाह—

भवद्वृत्तस्तोतुर्मदुपहितकण्ठस्य कवितु-
र्मुखात्पुण्यैः श्लोकैस्त्वयि घनमुदेयं जनमुदे ।
ततः पुण्यश्लोकः क्षितिभुवनलोकस्य भविता
भवानाख्यातः सन्कलिकलुषहारी हरिरिव ॥ ९२ ॥

भवदिति ॥ मदुपहितकण्ठस्य मयाधिष्ठितस्य कण्ठस्य भवतो वृत्तस्य चरित्रस्य स्तोतुः कवितुः कवेः मुखात्सकाशात्त्वयि विषये पुण्यैश्चारुभिरमलैश्च श्लोकैः पद्यैर्यशोभिश्च घनं निबिडं यथा तथा जनानां मुदे हर्षाय उदेयमुदेतव्यम् । ततोऽनन्तरं तस्माद्वा हेतोर्भवान् क्षितिभुवनलोकस्य भूविष्टपजनस्य कलियुगसंबन्धिकलुषहारी पातकहरणशीलः सन् हरिः श्रीविष्णुरिव पुण्यश्लोकः पुण्यश्लोक इति ख्यातो भविता भविष्यति । यद्वा—पुण्यश्लोकः सन् क्षितिभुवनलोकस्य कलिकलुषहारी हरिरिव भविता । पुण्यौ चारू निर्मलौ श्लोकौ पद्ययशसी यस्येति विग्रहः । 'पुण्यश्लोको नलो राजा' इति पुण्यश्लोकत्वम् । 'कर्कोटकस्य नागस्य–' इत्यादिना कलिनाशकत्वमुक्तम् । 'पद्ये यशसि च श्लोकः' इत्यमरः । उदेयम्, 'अचो यत्' इति यत् ॥

देवी च ते च जगदुर्जगदुत्तमाङ्ग-
रत्नाय ते कथय कं वितराम कामम् ।
किंचित्त्वया नहि पतिव्रतया दुरापं
भस्मास्तु यस्तव बत व्रतलोपमिच्छुः ॥ ९३ ॥

देवीति ॥ देवी च ते चन्द्रादयो भैमीं जगदुरिति ऊचुः । इति किम्—हे भैमि, वयं जगतस्त्रैलोक्यस्योत्तमाङ्गं शिरस्तस्य रत्नाय भूषणमणिभूतायै अतिसुन्दर्यै ते तुभ्यं कं कामं वितराम दद्याम । अपितु किमप्यस्मद्दानयोग्यं नास्तीत्यर्थः । हि यस्माद्यद्यपि पतिव्रतया त्वया किंचिदपि वस्तु दुरापं न, किंतु पातिव्रत्यात्सर्वमपि त्वया सुप्रापमेव, तथापि तव पातिव्रत्यलोपं पातिव्रत्यभङ्गमिच्छुरभिलष्यति त्वया सह रन्तुमिच्छेत्स भस्मैवास्तु । बत कष्टम् । अनुचितकर्मा स इत्यर्थः । कामम्, 'अकर्तरि च कारके' इति कर्मणि घञ् । त्वया, खलर्थयोगे षष्ठीनिषेधात्तृतीया । व्रतलोपम्, 'न लोका–' इति षष्ठीनिषेधाद्द्वितीया ।

वरान्तरमाह—

कूटकायमपहाय नो वपुर्बिभ्रतस्त्वमसि वीक्ष्य विस्मिता ।
आनुमाकृतिमतो मनीषितां विद्यया हृदि तवाप्युदीयताम् ॥ ९४ ॥

कूटेति ॥ हे भैमि, त्वं नोऽस्मान्वीक्ष्य यतो विस्मितासि, अतो मनीषिता [illegible] स्वेच्छाशरीरं प्राप्तं तवापि हृदि मनसि विद्यया नानादेहलोकार[illegible] उदेतु [illegible] । [illegible] हृदि यथोदितं तथा [illegible] । [illegible] केचित् । किंभूतान्—कूटकायं स्वेच्छामात्रेण [illegible]

पुनर्दिव्यं निजं वपुर्बिभ्रतो धारयतः । अन्योऽपि प्रभुर्यद्वस्तुदर्शनात्सेवकादिः साश्चर्यो भवति तद्वस्तु तस्मै प्रयच्छति । उदीदतामिति भावे क्तः ॥

इत्थं वितीर्य वरमम्बरमाश्रयत्सु तेषु क्षणादुदलसद्विपुलः प्रणादः ।
उत्तिष्ठतां परिजनालपनैर्नृपाणां स्वर्वासिवृन्दहतदुन्दुभिनादसान्द्रः ॥९५॥

इत्थमिति ॥ इत्थं पूर्वोक्तप्रकारेण नलाय भैम्यै च वरं वितीर्य दत्त्वा देवीसहितेषु तेष्विन्द्रादिष्वम्बरं स्वर्गं प्रति गन्तुमुद्यतेषु प्रारब्धगगनगमनोद्योगेषु सत्सु क्षणात्क्षणमात्रेणोत्तिष्ठतां स्वं स्वं शिबिरं प्रति गन्तुमुत्थितानां नृपाणां परिजनालपनैः सेवकसंभाषणैर्जयजीवादिशब्दैः । राज्ञामेव वाऽश्वयानयनार्थं परिजनान्प्रतिभाषणैः कृत्वा विपुलो दशदिग्व्यापी प्रणाद उदलसत् । उदित इत्यर्थः । कीदृशः—भैमीनलविवाहोत्सवदर्शनात्, आगच्छन्नायकनायक(कावलोकन)हर्षाद्वा, स्वर्वासिवृन्दैर्देवसङ्घैर्हतानां दुन्दुभीनां नादैः सान्द्रो निबिडीभूतः । देवेषु निर्गतेषु राजानोऽप्युत्थिताः, तेषां तत्सेवकानां च महान्कलकलश्च संजातः, देवैश्च दिव्यवाद्यान्याहतानीत्यर्थः । वरम्, जात्यभिप्रायेणैकवचनम् । सा च ते च तेषु, 'पुमान्स्त्रिया' इत्येकशेषः । उत्तिष्ठतामूर्ध्वकर्मत्वात्तङ् न ॥

न दोषं विद्वेषादपि निरवकाशं गुणमये
वरेण प्राप्तास्त्रे न समरसमारम्भसदृशम् ।
जगुः पुण्यश्लोके प्रतिनृपतयः किंतु विदधुः
स्वनिश्वासैर्भैमीहृदयमुदयन्निर्भरदयम् ॥ ९६ ॥

नेति ॥ प्रतिकूला नृपतयः पुण्यश्लोके विद्वेषाद्भैमीप्राप्तिजनितविशिष्टमत्सरादपि हेतोरसुन्दरदुःशीलत्वादिकं दोषं न जगुर्न जगदुः । यतो—नले निरवकाशमसन्तम् । यतः—गुणमये सौन्दर्यशीलादिगुणबहुले पुण्यश्लोके च । वैरिणापि सन्नेव दोषः प्रकाश्यते न त्वसन् । सुहृदा तु सन्नपि दोषो गोप्यते । तथा च—विद्वेषे सत्यपि गुणमयत्वाद्दोषलेशासंभावनाया अप्यभावाद्दोषं नोचुरित्यर्थः । तथा—बलाद्भैमीहरणार्थं समरसमारम्भः, तस्य सदृशं तद्योग्यमधिक्षेपपरुषभाषणादिकमपि नोचुः । यतः—यमवरेण प्राप्तास्त्रे लब्धदिव्याग्नेयाद्यस्त्रे स्वतःशूरे वरेण च नितरां दुर्धर्षे । तस्मादसामर्थ्यात्किंचिन्नोचुरित्यर्थः । किंतु—गत्यन्तररहिताः सन्तो निजाशामर्थ्यकृपात्पदत्वसूचकैः स्वनिश्वासैः कवोष्णैर्निजदुःखनात्तिकानिश्वसितैः कृत्वा भैमीहृदयं उदयन्ती निर्भरा बहुला दया यस्मिन्नेवंभूतमतिसकृपं विदधुश्चक्रुः । अतिदीनत्वात्तान्दृष्ट्वा भैमी नितरां सकृपाऽभूदिति भावः । भैम्या हृदयभूतं प्राणभूतं नलं स्वनिश्वासैः सकृपं चक्रुरिति वा ॥

भूभृद्भिर्लम्भिताऽसौ करुणरसनदीमूर्तिमद्देवतात्वं
तातेनाभ्यर्च्ययोग्याःसपदिनिजसखीदीर्पयामासतेभ्यः ।
वैदर्भ्यात्तेऽप्यलाभात्कृतगगनमनःप्राणवाञ्छा विजघ्नुः
सभ्यः संशिक्ष्य विद्याः सततधृतवयस्यानुकारासिरानिः ॥९७॥

भूभृद्भिरिति ॥ भूभृद्भिः राजभिः शोकत्वानिमित्तस्य करुणरसस्य रसस्य । नद्य च—जलस्य । नदी तस्या मूर्तिमत्या देवताया भावं लम्भिता प्रापिता नदीदेवतास्थाने स्थापित

त्रनिश्वासैः करुणरसार्द्रीकृतचित्ता सती असौ भैमी सपदि समाचाप्राप्तेः एते वितरां तस्मादतिसुन्दरीर्मत्सखीरेतेभ्यो देहीत्यञ्जलियोजनेन । अर्थात्तातमेव । अभ्यर्थ्य निजसखीः स्वसहचरीर्योग्या रूपकुलशीलादिना तेषां भार्यात्वे समुचितास्तेन [illegible] राजभ्यो दापयामास । तेभ्यः सखीदाने भीमं प्रावर्तयदित्यर्थः । ते राजानोऽपि अलाभात्कृतं गमने देहत्यागविषये मनो यैस्तेषां प्राणानां वाञ्छामाभिः भैमीसखीलाभात्प्रारब्धगमनान्प्राणान्पुनः न्यवर्तयन्नित्यर्थः । यतः— सकाशादिन्द्रादिदेवेभ्यो वरप्राप्तां यादृच्छिकशरीरनिर्माणादिरूपां विद्यां संविश्य [illegible] सततं प्रत्यहं धृतो वयस्याया भैम्या अनुकारो याभिः । तुल्यशरीरकलाकौशला[illegible] ततश्च भैमीप्राप्तिबुध्यैव स्वप्राणान्रक्षितवन्त इति भावः । वृन्मिर्द्विकर्मा । सख्याः, '[illegible] तोपयोगे' इत्यपादानत्वम् ॥

अहह सह मघोना श्रीप्रतिष्ठासमाने
निलयमभि नलेऽथ स्वं प्रतिष्ठासमाने ।
अपतदमरभर्तुर्मूर्तिबद्धेव कीर्ति-
र्गलदलिमधुवाष्पा पुष्पवृष्टिर्नभस्तः ॥ ९८ ॥

अहहेति ॥ अथ राजभ्यः सखीदानानन्तरं मघोना इन्द्रेण सह श्रीः [illegible] माहात्म्यं ताभ्यां समाने स्वं निजं निलयं स्थानमभिलक्षीकृत्य प्रतिष्ठासमाने [illegible] नभस्तो गगनात्पारिजातादिदेववृक्षाणां पुष्पवृष्टिरपतत् । अहहेति हर्षे । भैम्या [illegible] हृष्टैर्देवैर्नलस्योपरि पुष्पवृष्टिः कृतेत्यर्थः । उत्प्रेक्षते—बद्धा धृता मूर्तिर्यया सा [illegible] यद्वा—मूर्त्या बद्धा युता साकारा । गलन्तः पतन्तोऽलयो भ्रमरा यत्र एवंविधं मधु [illegible] (यस्याः) अधःपतनजनितदुःखमुक्तसनिश्वासजलाश्रुबिन्दवो यस्या एवंभूता । अमरे[illegible] न्द्रस्य कीर्तिरिव । पुष्पाणां शुभ्रत्वात्कीर्तित्वम् । भैम्या चावृतत्वादिन्द्रस्य [illegible] युक्तम् । स्वर्गादधःपाते दुःखादश्रु च युक्तम् । स्त्रीणां चाश्रु सकज्जलं भवति । [illegible] वाष्पस्थाने, तदनुगता भ्रमराः कज्जलस्थाने । समानशब्दस्य, समासान्तर्गतत्वात्[illegible] र्थयोगाभावात् 'मघोना' इति तृतीयार्थमनुप्रासार्थं च साक्षात्सहशब्दप्रयोगः । प्रतिष्ठा[illegible] इति, 'समवप्र–' इति तङो विधानात् 'पूर्ववत्सनः' इति तङ् ॥

स्वस्यामरैर्नृपतिमंशममुं त्यजद्भि-
रंशच्छिदाकदनमेव तदाध्यगामि ।
उत्का स पश्यति निवृत्य निवृत्य यान्तीं
वाग्देवतापि निजविभ्रमधाम भैमीम् ॥ ९९ ॥

स्वस्येति ॥ तदा स्वर्गगमनसमये अमुं नृपतिं नलं त्यजद्भिरमरैरंशस्य स्वावयवस्य छि[illegible] कर्तनं तया यत्कदनं दुःखं तदेवाध्यगामि प्रापि । यतः—स्वस्य इन्द्रादेरंशम् । [illegible] त्वाद्राज्ञः । स्वहस्तादिकर्तने यादृग्दुःखं भवति, तादृशमेव तेषां नलपरित्यागे [illegible] भावः । यान्ती स्वर्गं प्रति गच्छन्ती वाग्देवतापि भैमीं निवृत्य निवृत्य पुनः पुनः [illegible] वलितग्रीवं यथा तथा पश्यति स्म । किंभूताम्—निजविभ्रमाणां लीलावचनचातुर्यादि[illegible]

सानां धाम स्थानभूताम् । किंभूता—उत्का कियत्सहवासमात्रानुभूतगुणगणप्रेमभरतया सोत्कण्ठा । परिलक्षुमशकेलर्थः । अन्योऽप्यन्यत्र गच्छन्निजं विलासगृहमुत्कः सन्निवृत्य पश्यति । पुरुषाणां पुरुषेषु, स्त्रीणां च स्त्रीषु सौहार्दमिति नलपरित्यागे तेषाम्, भैमीपरित्यागे च देव्याः सोत्कण्ठता युक्ता । निजं सारस्वतं विलासगृहं यान्ती इति वा । छिदा इति, 'षिद्भिदादिभ्योऽङ्' ॥

> सानन्दं तनुजाविवाहनमहे भीमः स भूमीपति-
> वैदर्भीनिषधेश्वरौ नृपजनानिष्टोक्तिनिर्मृष्टये ।
> स्वानि स्वानि धराधिपाश्च शिबिराण्युद्दिश्य यान्तः क्रमा-
> देको द्वौ बहवश्चकार सृजतः स्मातेनिरे मङ्गलम् ॥ १०० ॥

सानन्दमिति ॥ स भीम एको भूमीपती राजा तनुजाया भैम्या विवाहनं पाणिग्रहणं तल्लक्षणे महे महोत्सवे विषये माङ्गलिकतूर्यवादनादिकं मङ्गलं सानन्दं सहर्षं यथातथा चकार । वैदर्भीनिषधेश्वरौ च, द्वौ क्षणमात्रं तत्र स्थितविवाहसूचका नृपजना राजसंघाः । नृपाणां वा ये जनाः सेवकास्तेषामनिष्टोक्तयः कर्णकठोराणि यानि नृपादोषारोपणवचनानि तासां नितरां मृष्टये परिमार्जनायाशुभवचनानाकर्णनाय नृत्तगीतवाद्यबहुलं प्रेक्षणीयकादिदर्शनश्रवणादिरूपं मङ्गलं सृजतः स्म चक्राते । 'अमङ्गलं नाकर्णनीयम्' इति वैदर्भीनिषधेश्वरौ गीतवाद्याद्याकर्णनव्याजेनामङ्गलपरिहारं चक्रतुः । बहवः सर्वे धराधिपाश्च राजानोऽपि स्वानि स्वानि शिबिराणि सेनानिवेशानुद्दिश्य लक्षीकृत्य यान्तो गच्छन्तः सन्तः प्राप्तभैमीसहशदयिताः पटहनिस्वनादिरूपं मङ्गलमातेनिरे चक्रुः । वाद्यानि वादयामासुरित्यर्थः । एतच्च सर्वं क्रमात् । पूर्वं भीमश्चकार, अनन्तरं भैमीनलौ चक्राते, ततो राजानश्चक्रुरिति क्रमः । किंच—एकः, द्वौ, बहवः, इति क्रमः । तथा—चकार, सृजतः स्म, आतेनिरे इति च क्रमः । सानन्दमिति सर्वत्र वा संबन्धनीयम् । श्रेष्ठजामातृलाभाद्भीमस्य हर्षः परस्परं लाभाद्भैमीनलयोः सुन्दरभैमीसखीलाभाद्राज्ञामिति ज्ञेयम् । विवाहनं, ण्यन्तान्नपुंसके भावे 'ल्युट् च' इति ल्युट् ॥

> श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
> श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
> यातस्तस्य चतुर्दशः शरदिजज्योत्स्नाच्छसूक्तेर्महा-
> काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ १४ ॥

श्रीहर्षमिति ॥ शरदिजा शरत्कालीना ज्योत्स्ना चन्द्रिका तद्वदच्छा निर्मला निर्दोषा प्रसन्ना आह्लादजनिका च शोभना उक्तिर्यस्य तस्य श्रीहर्षस्य कवेः कृतौ महाकाव्ये चतुर्दशानां पूरणः सर्गः समाप्तः । चतुर्दशानां पूरणः इत्यर्थे 'तस्य पूरणे डट्' इति डट् । शरदिजा इति, 'सप्तम्यां जनेर्डः' इति डप्रत्यये 'प्रावृट्शरत्कालदिवां जे' इति सप्तम्या अलुक् ॥

इति श्रीवेदरकरोपनामकश्रीनरसिंहपण्डितात्मजनारायणकृते
नैषधीयप्रकाशे चतुर्दशः सर्गः ॥

संशयो यस्मात्तां देवीं भैमीमातरं शशंस इत्यवोचत् । इति किम्—हे उत्सुके, जामातरि नले उत्कण्ठिते, त्वं नलं जामातरं भैमीपतिं प्रतीच्छ जानीहि ॥

नामग्रहणमात्रेण सूचितस्य नलस्य गुणगणं वर्णयति—

तनुत्विषा यस्य तृणं स मन्मथः कुलश्रिया यः पविताऽसदन्वयम्।
जगत्त्रयीनायकमेलके वरं सुता परं वेद विवेकुमीदृशम् ॥ ६ ॥

तन्विति ॥ यस्य तनुत्विषा कायकान्त्या हेतुना स सौन्दर्येण प्रसिद्धो मन्मथः तृणमिवाकिंचित्करः । तथा—यः कुलश्रिया वंशपरिशुद्ध्या कृत्वा कौलीन्यात्प्रसिद्धतरामाकमप्यन्वयं पविता पावनं कर्ता । अस्मत्तोऽपि महाकुलीन इत्यर्थः । जगत्त्रय्या नायकमेलके वरसमूहमध्ये ईदृशमीदृग्गुणं नायकरत्नं वरं परिणेतारं विवेक्तुं निर्णेतुं परं केवलं सुता वेद जानाति, नान्योऽस्मदादिः । न विद्यते परः श्रेष्ठो यस्मादिति वरविशेषणं वा । पविता लुट् ॥

सृजन्तु पाणिग्रहमङ्गलोचिता मृगीदृशः स्त्रीसमयस्पृशः क्रियाः।
श्रुतिस्मृतीनां तु वयं विदध्महे विधीनिति स्माह च निर्ययौ च सः ॥ ७ ॥

सृजन्त्विति ॥ स भीम इत्याह स्म च, निर्ययौ चान्तःपुरान्निरगाच्च । चकारौ शीघ्रतरां द्योतयति । इति किम्—हे मृगीदृशो हरिणेक्षणाः सुवासिन्यः, भवत्यः पाणिग्रहो विवाहस्तद्रूपे मङ्गल उचिताः । तथा—स्त्रीणां समय आचारः तं स्पृशन्ति ता योषिदाचारप्राप्ता दुर्गादिकुलदेवतापूजातैलयवारम्भादिक्रियाः सृजन्तु कुर्वन्तु । वयं तु पुनः श्रुतिस्मृतीनां विधीन् शूर्पेण जुहोतीत्यादीन्, मधुपर्कादिकांश्च, वैदिकान्, स्मार्तांश्च विधीन्विदध्महे कुर्मह इति । एवमादिश्य तदानीमेव निर्गत इत्यर्थः । पाणिग्रहमङ्गलोचितयोषित्प्रायवृद्धाः, सुवासिनीविशेषणं वा । समयस्पृशः, 'स्पृशोऽनुदके–' इति क्विन् । वयं, 'अस्मदो द्वयोश्च' इति बहुवचनम् ॥

निरीय भूपेन निरीक्षितानना शशंस मौहूर्तिकसंसदंशकम्।
गुणैररीणैरुदयास्तनिस्तुषं तदा स दातुं तनयां प्रचक्रमे ॥ ८ ॥

निरीयेति ॥ भूपेन भीमेन निरीय अन्तःपुरान्निर्गत्य निरीक्षितानना मौहूर्तिकसंसत् ज्यौतिषिकाणां संसत्सभा अंशकं वैवाहिकं लग्नं शशंस । स च भीमस्तदा तस्मिन्नंशके तनयां नलाय दातुं प्रचक्रमे मुहूर्तविलम्बानुरोधेन प्राक्कालिकाञ्श्रौतान्स्मार्तान् विधीन् कृतवानि-त्यर्थः । किंभूतमंशकम्—अरीणैः संपूर्णैः जामित्रगुणैरुपलक्षितम् । तथा—उदयास्तादिनवप्रयुक्तदोषैर्निस्तुषं रहितम् । ग्रहाणां गुणदोषादिकं ज्योतिःशास्त्रादवगन्तव्यम् । निरीय, 'ईङ् गतौ' । मौहूर्तिकाः, 'मुहूर्तं वेद' इत्यर्थे 'क्रत्वादि–' इत्युक्... अंशनेव अंशकम् स्वार्थे कन् । अरीणैः, ल्वादित्वात् 'ओदितश्च' इति निष्ठानत्वम् । निस्तुषम्, निर्गतं तुषात् । तुषो दोषलेशः ॥

अथावदद्दूतमुखः स नैषधं कुलं च बाला च ममानुकम्प्यताम्।
स पल्लवत्वस्य मनोरथाङ्कुरश्चिरेण नस्त्वच्चरणोदकैरिति ॥ ९ ॥

---

१ 'तनुश्रिया' इति जीवातुसंमतः पाठः।

अथेति ॥ अथ लग्नांशके संनिहिते दूत एव मुखं यस्य स भीमः नैषधमित्यवदत्। इति किम्—भवता मम कुलं च बाला च कृपया अनुकम्प्यतामङ्गीक्रियताम्। बालायामनुगृहीतायां सर्वोऽपि मम वंशोऽनुगृहीतः स्यादित्यर्थः। तथा—चिरेण चिरंतनो नोऽस्माकं सर्वेषां स प्रसिद्धः त्वत्संबन्धविषयो मनोरथरूपोऽङ्कुरोऽद्यास्मिन्दिने त्वच्चरणोदकैस्त्वदीयचरणक्षालनोदकैः पल्लवतु पल्लव इवाचरतु। पल्लवितो भवत्वित्यर्थः। पल्लवसहितो भवत्वेकं वा पदम्। कंचन संदेशहरं प्रेष्य तं सविनयमाकारयति स्मेति भावः। अन्यत्रापि चिरसंचितोऽङ्कुरो जलैः पल्लवितो भवति। स पल्लवतु आचारे क्विप्॥

तथोत्थितं भीमवचःप्रतिध्वनिं निपीय दूतस्य स वक्त्रगह्वरात्।
व्रजामि वन्दे चरणौ गुरोरिति ब्रुवन्प्रदाय प्रजिघाय तं बहु ॥ १० ॥

तथेति ॥ स नलो दूतस्य वक्त्रादेव गह्वरात्कंदरात्तथा पूर्वोक्तप्रकारेण यथा भीमेनोक्तं तथैवोदितं भीमवचसः प्रतिध्वनिं प्रतिशब्दं निपीय सादरमाकर्ण्येति ब्रुवंस्तस्मै दूताय बहु प्रचुरं वस्त्रालंकारादि प्रदाय तं प्रजिघाय प्राहिणोत्। इति किम्—हे दूत, अहं व्रजामि इदानीमेव गच्छामि गत्वा च गुरोः श्वशुरस्य चरणौ वन्दे नमस्करोमीति। प्रतिशब्दत्वरूपेण राजादेशानुवादस्य न्यूनाधिकशङ्का परिहृता। व्रजामि वन्दे च, 'वर्तमानसामीप्ये—' इति भविष्यति लट्॥

निपीतदूतालपितस्ततो नलं विदर्भभर्तागमयांबभूव सः।
निशावसाने श्रुतताम्रचूडवाग्यथा रथाङ्गस्तपनं धृतादरः ॥ ११ ॥

निपीतेति ॥ ततो दूतप्रस्थापनानन्तरं निपीतं सादरं श्रुतं दूतालपितं दूतवचनं येन स विदर्भभर्ता भीमो धृतादरः सादरः सन् नलमागमयांबभूव प्रतीक्षितवान्। पुनरपि दूतैरानाययति स्मेति वा। यथा निशावसाने ब्राह्मे मुहूर्ते श्रुता प्राभातिकी ताम्रचूडस्य कुक्कुटस्य वाक् येन स रथाङ्गश्चक्रवाको धृतादरः सन् तपनं सूर्यं प्रतीक्षते कदा वा उदेष्यतीति। 'कृकवाकुस्ताम्रचूडः' इत्यमरः॥

क्वचित्तदालेपनदानपण्डिता कमप्यहंकारमगात्पुरस्कृता।
अलम्भि तुङ्गासनसंनिवेशनादपूपनिर्माणविदग्धयादरः ॥ १२ ॥

क्वचिदिति ॥ तदा नलागमनसमये क्वचित्स्थाने लेपनदाने सुधालेपविधावतिदक्षतया पण्डिता कुशला काचिद्रमणी पुरस्कृता तन्निर्माणार्थमेव संभाविता सती सत्यनिर्वचनीयं कमप्यहंकारमभिमानमगात्प्राप। अनिर्वचनीयं गौरवं प्राप्ता सुधालेपादि चकारेत्यर्थः। चतुष्कनिर्माणार्थं हरिद्राचूर्णमिश्रितं तण्डुलपिष्टं तस्य दाने आलेपकरणे कुशला। अग्निहोत्रे स्थण्डिले वा प्रदेशे तस्य मेध्या आलेपनदाने अभ्युक्षणे कुशलेति वा। तयोर्भैमीनलयोर्वा। तथा—क्वचित्प्रदेशेऽपूपनिर्माणे मण्डकरचनायां विदग्धया चतुरया कयाचित्पाकज्ञया उच्चतरासने संनिवेशनादुपवेशनादादरो गौरवमलम्भि प्राप्तम्। उच्चासनसंनिवेशनादादरो बहिस्तापनमपि प्राप्त इति वा। अलम्भि लभेर्णमुम्। कामिन्यस्तादृशं कार्यं सर्वत्र चक्रुरिति भावः॥

तदेति ॥ तदा नलागमनसमये तस्मिन्पुरे घनं कांस्यतालादिवाद्यं घनं निबिडं यथा तथा निसस्वान शब्दं चकार । तथा—ततं वीणादिवाद्यं ततं विस्तृतं यथा तथा नितरां ननाद शब्दं चकार । तथा—सुषिराणि सच्छिद्राणि वंशादिवाद्यानि उच्चैर्नितरां राणितां शब्द(क)त्वं अवापुः । तथा—आनद्धं मुरजादि वाद्यमियत्तया इदं परिमाणत्वेनानवधारे-च्छेद्यं यथा तथाऽध्वनीत् । घनं दृढावयवं बहुसंख्यं वेति घनविशेषणं वा । तथा—ततं स्व-रूपेण विस्तृतं बहुसंख्याकं वेति ततविशेषणं वा । तथा—इयत्तया असमानं बहुसंख्यमित्यानद्ध-विशेषणं वा । चतुर्विधमपि वाद्यं तत्र वादितमित्यर्थः । 'ततं वीणादिकं वाद्यमानद्धं मुरजा-दिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम्' इत्यमरः । राणिताम्—अवश्यं रणन्तीति 'आवश्यकाधमर्ण्ययोर्णिनिः' इति णिनौ राणीनि तेषां भावस्तत्ता ताम् । अध्वनीद्, 'अतो हलादेः—' इति वृद्धिविकल्पः ॥

विपञ्चिराच्छादि न वेणुभिर्न ते प्रणीतगीतैर्न च तेऽपि झर्झरैः ।
न ते हुडुक्केन न सोऽपि ढक्कया न मर्दलैः सापि न तेऽपि ढक्कया १७

विपञ्चिरिति ॥ वेणुभिर्वंशध्वनिभिर्विपञ्चिर्वीणाध्वनिर्न आच्छादि । ते च वेणुध्वनयः प्रणीतं प्रारब्धं गीतं यैस्तुम्बुरुप्रभृतिभिर्गायकैर्मूर्च्छनापूर्वमुच्चैर्गायद्भिर्गीतैर्गायकगीतैर्न आच्छादिषतेति सर्वत्र विपरिणामेन व्याख्येयम् । झर्झरैर्झर्झराख्यैः कांस्यमयैर्वाद्यविशेषैर्ध्वनिभिः कृत्वा तेऽपि गायकध्वनयोऽपि नच नैवाच्छादिषत । हुडुक्केन लघीयसा कांस्यमयवाद्यविशेषेण ते झर्झरध्व-नयो नाच्छादिताः । ढक्कया वादित्रविशेषेण सोऽपि हुडुक्कध्वनिर्नाच्छादि । मर्दलैर्मृदङ्गध्व-निभिः सा ढक्कापि नाच्छादि । ढक्कया तेऽपि मर्दला अपि नाच्छादिताः । अनपेक्षितगौर-वलाघवं वादनार्थं तत्र निर्मितं । समश्रुतितालमाना अपि विरुद्धाविध्वनयो वाद्यैस्तैः परस्प-रमेकं भेदेनोपलब्धा इति भावः । विपञ्चयते स्वरोऽस्यां विपञ्चिः, औणादिक इन्प्रत्ययः ॥

विचित्रवादित्रनिनादमूर्च्छितः सुदूरचारी जनतामुखारवः ।
ममौ न कर्णेषु दिगन्तदन्तिनां पयोधिपूरप्रतिनादमेदुरः ॥ १८ ॥

विचित्रेति ॥ विचित्राणि नानाविधानि वादित्राणि तेषां निनादैर्मूर्च्छितो वर्धितः । तथा—सुदूरं दूरचारी दूरसंचरणशीलो जनता जनसमूहस्तस्य मुखारवो मुखशब्दः पयोधि-पूरे समुद्रप्रवाहे प्रतिनादेन प्रतिशब्देन । पयोधिपूरस्य तटे प्रतिशब्दत्वेन वा । मेदुरः परि-पुष्टः सन् दिगन्तदन्तिनां दिगन्तवर्तिदिग्गजहस्तिनां कर्णेषु न ममौ । तत्कर्णानपि परि-पूर्य बहिर्गत इत्यर्थः । नानावादित्रनिनादैर्वृद्धिं गतो जनरवो दिगन्तपर्यन्तं प्रसृत इति भावः । 'स दूर—' इति पाठे सः । अतिमहानित्यर्थः ॥

उदस्य कुम्भीरथ शातकुम्भजाश्चतुष्कचारुत्विषि वेदिकोदरे ।
यथाकुलाचारमथावनीन्द्रजां पुरन्ध्रिवर्गः स्नपयांबभूव ताम् ॥ १९ ॥

उदस्येति ॥ अथ [illegible] पुरन्ध्रिवर्गः [illegible] चतुष्कचारुत्विषि वेदिकोदरे [illegible]

अपाङ्गमिति ॥ अञ्जनेन जनिता या रेखा सा तदीयमपाङ्गमालिङ्ग्य स्पृष्ट्वा उच्चैस्तरा-
मपीति शुशुभे । द्वितीयया तारुण्यवयःश्रिया कर्त्र्या विलोचने भैमीनेत्रे वर्धयितुं शैशवापेक्षया
विशाले कर्तुं तद्रेखारोपणं सूत्रमिव अपाति । प्रायो हि सुन्दर्यो विलोचने नेत्रप्रान्तान्तर
कर्णोपान्तस्पर्शिन्याञ्जनरेखया भूषयन्ति । शिल्पिनश्च किमपि लेखितुं वर्धयितुं वा छेद-
नस्य वर्धमानस्य वा कारणद्धिमपरिहाराय मषीसहितपांशुपरिष्वक्तस्य सूत्राभिघातेन रेखां तं
कुर्वन्ति । यद्यपि नेत्रयोर्वृद्धिर्नास्ति तथापि शैशवापेक्षया तारुण्येन कटाक्षविक्षेपादिविलासै-
र्दैर्घ्यप्रतीतेर्दैर्घ्यकरणार्थं सूत्रपातो युक्तः । नेत्रे कज्जलाञ्चिते इति भावः ॥

अनङ्गलीलाभिरपाङ्गधाविनः कनीनिकानीलमणेः पुनः पुनः।
तमिस्रवंशप्रभवेन रश्मिना स्वपद्धतिः सा किमरञ्जि नाञ्जनैः ॥ ३५ ॥

अनङ्गेति ॥ अनङ्गलीलाभिः कटाक्षविक्षेपरूपैः कामविलासैः कृत्वा पुनः पुनरपाङ्गधाविनो
नेत्रोपान्तस्पर्शिनः कनीनिकानीलमणेर्नेत्रतारकारूपस्येन्द्रनीलरत्नस्य तमिस्रवंशप्रभवेनान्धका-
रान्वयजेन (?) अतिकृष्णेन रश्मिना सकज्जलरेखारूपा सा स्वपद्धतिर्निजगमनसरणिः किं
रञ्जि अञ्जनैर्न । सदा तन्मार्गगमनेन स्वसंबन्धात्तारकानीलमणिकिरणैरेव नेत्रप्रान्तो नीली-
कृतो, न कज्जलैरित्युत्प्रेक्षा । कामोल्लसितनिरतिशयकटाक्षश्रीतुल्याञ्जनशोभालंकारवा जग-
मेति भावः ॥

असेविषातां सुषमां विदर्भजादृशाववाप्याञ्जनरेखयाऽन्वयम्।
भुजद्वयज्याकिणपद्धतिस्पृशोः स्मरेण बाणीकृतयोः पयोजयोः ॥ ३६ ॥

असेविषातामिति ॥ विदर्भजादृशावञ्जनरेखयाऽन्वयं संबन्धमवाप्य स्मरेण बाणीकृत-
योर्बाणत्वं प्रापितयोर्नीलोत्पलयोः सुषमां परमां शोभामसेविषातामलभेताम् । किंभूतयोः—
सव्यापसव्यबाणाकर्षणाद्भुजद्वयेऽधिकरणे ज्याकिणपद्धतिर्ज्याभिघातवैवर्ण्यरूपकिणमार्गं तां
स्पृशत इति स्पृशौ तयोः । नलमुद्दिश्याकर्णबाणाकर्षणात्कर्णान्तविश्रान्तयोर्नेत्रनीलोत्पलबाण-
योर्भुजकिणसंबन्धसंभावना युक्ता । अञ्जनरेखे किणतुल्ये, नेत्रे च स्मरवृद्धिकरत्वान्नीलो-
त्पलबाणतुल्ये इति भावः ॥

तदक्षितत्कालतुलागसा नखं निखाय कृष्णस्य मृगस्य चक्षुषी।
विधिर्यदुद्धर्तुमियेष तत्तयोरदूरवर्तिक्षतता स्म शंसति ॥ ३७ ॥

तदक्षीति ॥ विधिर्ब्रह्मा तदक्ष्णोर्मृगनेत्राधिकयोर्भैमीनेत्रयोस्तत्काले तस्मिन्पाणिग्रहोचि-
ताञ्जनप्रसाधनसमये तुला साम्यकरणं तद्रूपेणाऽगसाऽपराधेन हेतुना नखं निखाय कृष्ण-
मृगस्य कृष्णसारहरिणस्य चक्षुषी उद्धर्तुमुन्मूलयितुं यदियेष, तयोः कृष्णसारनेत्रयोरदूरवर्ति
समीपवर्ति यत्क्षतं तस्य भावस्तत्ता सा तन्नखनिखननकर्म शंसति स्म। 'क्षतमाख्यत स्फुटम्'
इति पाठे स्फुटं प्रकटम्, उत्प्रेक्षायां वा । अदूरवर्ति क्षतं ययोस्ते अदूरवर्तिक्षते तयोर्भाव
इति वा । मृगनेत्रसमीपे नखनिखननाकारं क्षतं भवति ॥

श्लोकद्वयेनावतंसनीलोत्पले वर्णयति—

विलोचनाभ्यामतिमात्रपीडिते वतंसनीलाम्बुरुहद्वयीं खलु।
तयोः प्रतिद्वन्द्विधियाधिरोपयांबभूवतुर्भीमसुताश्रुती ततः ॥ ३८ ॥

विलोचनाभ्यामिति ॥ खलु यतो भीमसुतायाः श्रुती कर्णौ विलोचनाभ्यामाकर्णपूर्णत्वादतिमात्रमतितरां पीडिते पराक्रान्ते, ततस्तस्मादात्मपराभवकारिणोस्तयोर्नेत्रयोः प्रतिद्वन्द्विनी तुल्यबले इमे नीलोत्पले इति धिया बुद्ध्येव स्वशिरसि वतंसरूपनीलाम्बुरुहद्वयीमधिरोपयांबभूवतुः आरोपितवन्तौ । दध्रतुरित्यर्थः । लुप्तोत्प्रेक्षा खलु वोत्प्रेक्षायाम् । अन्योऽप्यधिकेन पराभूतस्तत्समानं तद्विरोधिनं संनिधापयति । नीलोत्पलकरणीयं नेत्राभ्यामेव कृतम्, ननु नीलोत्पलाभ्यामधिकं किंचित्कृतम् । नीलोत्पले कर्णभूपणीकृते इति च भावः ॥

धृतं वतंसोत्पलयुग्ममेतया व्यराजदस्यां पतिते दृशाविव ।
मनोभुवान्ध्यं गमितस्य पश्यतः स्थिते लगित्वा रसिकस्य कस्यचित् ३९

धृतमिति ॥ एतया कर्णयोरुपरि धृतं वतंसोत्पलयुग्मं भैमीमेतत्कर्णौ वा पश्यतः कस्यचिद्रसिकस्य विलासिनो दृशाविव व्यराजत् । किंभूतस्य—मनोभुवा कामेनाविवेकित्वेनेवाऽन्ध्यमुद्धतनेत्रत्वं गमितस्य प्रापितस्य । किंभूते दृशौ—अस्यां भैम्यां पतिते निपण्णे । ततो रतिकत्वादेवापरावृत्य लगित्वा संबध्य स्थिते स्थिरतरे इत्युत्प्रेक्षा । कश्चिद्विलासी भैम्याः कर्णौ प्रथममेव दृष्टवान् । ततस्तस्य नेत्रे कर्णयोरेव लग्ने स्थिते, नोत्पलद्वयमित्यर्थः । नेत्रगमनादेवास्यान्ध्यम् । अन्यदपि पतितं वस्तु कुत्रापि लगित्वा तिष्ठति ॥

रत्नावतंसं वर्णयति—

विदर्भपुत्रीश्रवणावतंसिकामणीमहःकिंशुककार्मुकोदरे ।
उदीतनेत्रोत्पलबाणसंभृतिर्नलं परं लक्ष्यमवैक्षत स्मरः ॥ ४० ॥

विदर्भेति ॥ स्मरः नलं परं केवलं श्रेष्ठं वा लक्ष्यमवैक्षत । आगच्छन्तं प्रतीक्षितवानित्यर्थः । किंभूतः—विदर्भपुत्रीश्रवणयोरुपर्यवतंसिकाया मण्यो भूपणभूता माणिक्यादिरत्नखचितसुवर्णकम्बिकास्तत्संबन्धीनि माणिक्यादिरत्नानि तासां महस्तेजस्तदेव किंशुककार्मुकं पलाशकुसुमधनुस्तस्योदरे विषय उदीता समुत्पन्ना नेत्रयोरवतंसोत्पलयोश्च तद्रूपाणां चतुर्णां बाणानां संभृतिः सामग्री । नेत्ररूपाभ्यां वा नीलोत्पलाभ्यां बाणसामग्री यस्य एवंविधः । चापे समारोपितबाण इत्यर्थः । स्वलंकृतकर्णकज्जलाञ्चितनेत्रसौन्दर्यविलोकनमात्रेण नलः कामपरो भविष्यतीति भावः । अवतंसिकापदेन श्रवणलभ्यावप्यतिसंनिधिसूचनार्थं श्रवणपदप्रयोगः । दुर्लक्ष्यत्व स्मरणात्स्मरः ॥

श्लोकद्वयेन कुण्डलप्रसाधनमाह—

अनाचरत्तथ्यमृषाविचारणां तदाननं कर्णलतायुगेन किम् ।
बबन्ध जित्वा मणिकुण्डले विधू द्विचन्द्रबुद्ध्या कथितावसूयकौ ॥४१॥

अनाचरदिति ॥ सादृश्यात्स्फुरितया द्विचन्द्रबुद्ध्या द्वौ चन्द्राविति भ्रान्तिज्ञानेन एतौ द्वौ चन्द्रौ तयोरैक्यं न सहेते इति भैम्यास्तदाननस्य वा पुरस्तादसूयकौ स्पर्धाकारिणौ कथितौ प्रतिपादितौ । मणिकुण्डले रत्नखचिते सुवर्णताटङ्के एव विधू द्वौ चन्द्रौ जित्वा तदाननं कर्तृ कर्णलतायुगेन कृत्वा बबन्ध किम् । ननु द्विचन्द्रबुद्धिरेव सत्येनाकलनात्कथितास तद्बुद्धौ कथं तस्य प्रवृत्तिरित्याशङ्क्याह—किंभूतम्—तथ्यमृषाविचारणामकथितं सत्यम्, असत्यं

१ 'महस्समस्तकिंशुके' इति 'महस्सु [illegible]' इति वा पाठः सुखावबोधाय [illegible]।

अपाङ्गमिति ॥ अञ्जनेन जनिता या रेखा सा तदीयमपाङ्गमालिङ्ग्य स्पृष्ट्वा उच्चैःकर्ण-मगीपि शुशुभे । द्वितीयया तारुण्यवयःश्रिया कर्त्र्या विलोचने भैमीनेत्रे वर्धयितुं शैशवापेक्षया विशाले कर्तुं तद्रेखारोपणं सूत्रमिव अपाति । प्राच्यो हि सुन्दर्यो विलोचने नेत्रप्रान्तनिकट-कर्णोपान्तस्पर्शिन्याञ्जनरेखया भूषयन्ति । शिल्पिनश्च किमपि लेखितुं वर्धयितुं वा लिख-नस्य वर्धमानस्य वाक्रत्वक्रिमपरिहाराय मषीघटितगुणविधस्य सूत्राभिघातेन रेखान्तं कुर्वन्ति । यद्यपि नेत्रयोर्वृद्धिर्नास्ति तथापि शैशवापेक्षया तारुण्येन कटाक्षविक्षेपादिविलास-दार्ढ्यप्रतीतेर्दैर्घ्यकरणार्थं सूत्रपातो युक्तः । नेत्रे कज्जलाञ्चिते इति भावः ॥

अनङ्गलीलाभिरपाङ्गधाविनः कनीनिकानीलमणेः पुनः पुनः ।
तमिस्रवंशप्रभवेन रश्मिना स्वपद्धतिः सा किमरञ्जि नाञ्जनैः ॥ ३५ ॥

अनङ्गेति ॥ अनङ्गलीलाभिः कटाक्षविक्षेपरूपैः कामविलासैः कृत्वा पुनः पुनरपाङ्गधाविनो नेत्रोपान्तस्पर्शिनः कनीनिकानीलमणेर्नेत्रतारकारूपस्येन्द्रनीलरत्नस्य तमिस्रवंशप्रभवेनान्धका-मान्वयजेन (?) अतिकृष्णेन रश्मिना सकज्जलरेखारूपा सा स्वपद्धतिर्निजगमनसरणिः किं-रञ्जि अञ्जनैर्न । सदा तन्मार्गगमनेन स्वसंबन्धात्तारकानीलमणिकिरणैरेव नेत्रप्रान्तो नीली-कृतो, न कज्जलैरित्युत्प्रेक्षा । कामोल्लसितनिरतिशयकटाक्षश्रीतुल्याञ्जनशोभालंकृतं जगा-मेति भावः ॥

असेविषातां सुषमां विदर्भजादृशाववाप्याञ्जनरेखयाऽन्वयम् ।
भुजद्वयज्याकिणपद्धतिस्पृशोः स्मरेण बाणीकृतयोः पयोजयोः ॥ ३६ ॥

असेविषातामिति ॥ विदर्भजादृशावञ्जनरेखयाऽन्वयं संबन्धमवाप्य स्मरेण बाणीकृत-योर्बाणत्वं प्रापितयोर्नीलोत्पलयोः सुषमां परमां शोभामसेविषातामलभेताम् । किंभूतयोः— सव्यापसव्यबाणाकर्षणाद्भुजद्वयेऽधिकरणे ज्याकिणपद्धतिर्ज्याभिघातवैवर्ण्यरूपकिणमार्गं तां स्पृशत इति स्पृशौ तयोः । नलमुद्दिश्याकर्णबाणाकर्षणात्कर्णान्तविश्रान्तयोर्नेत्रनीलोत्पलबाण-योर्भुजकिणसंबन्धसंभावना युक्ता । अञ्जनरेखे किणतुल्ये, नेत्रे च स्मरवृद्धिकरत्वान्नीलो-त्पलबाणतुल्ये इति भावः ॥

तदक्षितत्कालतुलागसा नखं निखाय कृष्णस्य मृगस्य चक्षुषी ।
विधिर्यदुद्धर्तुमियेष तत्तयोरदूरवर्तिक्षतता स शंसति ॥ ३७ ॥

तदक्षीति ॥ विधिर्ब्रह्मा तदक्ष्णोर्मृगनेत्राधिकयोर्भैमीनेत्रयोस्तत्काले तस्मिन्पाणिग्रहोचि-ताञ्जनप्रसाधनसमये तुला साम्यकरणं तद्रूपेणाऽगसाऽपराधेन हेतुना नखं निखाय कृष्णस्य मृगस्य कृष्णसारहरिणस्य चक्षुषी उद्धर्तुमुन्मूलयितुं यदियेष, तयोः कृष्णसारनेत्रयोरदूरवर्ति-समीपवर्ति यत्क्षतं तस्य भावस्तत्ता सा तन्नखनिखननकर्म शंसति स्म । 'क्षतमाख्यत स्फुटम्' इति पाठे स्फुटं प्रकटम्, उत्प्रेक्षायां वा । अदूरवर्ति क्षतं ययोस्ते अदूरवर्तिक्षते तयोर्भावः इति वा । मृगनेत्रसमीपे नखनिखननाकारं क्षतं भवति ॥

श्लोकद्वयेनावतंसनीलोत्पले वर्णयति—

विलोचनाभ्यामतिमात्रपीडिते वतंसनीलाम्बुरुहद्वयी खलु ।
तयोः प्रतिद्वन्द्विधियाधिरोपयांबभूवतुर्भीमसुताश्रुती ततः ॥ ३८ ॥

वेति विमर्शनम् अनाचरदकुर्वाणम् । शोभासंपन्नदेन मत्तत्वादित्यर्थः । किं किलेति व
अपिलगुचितमेतत्कृतम् । यतः सत्यासत्यविचारणाभावादिति भाव इति वा । अन्योऽपि
सत्यासत्यविचारमकुर्वन्कस्यचिदसूयकस्य वचनादनपराधिनमपि कंचित्ताडनादिना क
चन्द्राकारे मणिताटङ्के तया धृते इति भावः ॥

अवादि भैमी परिधाप्य कुण्डले वयस्यया भ्यामभितः समन्वयः।
त्वदाननेन्दोः प्रियकामजन्मनि श्रयत्ययं दौरुधरीं धुरं ध्रुवम् ॥

अवादीति ॥ कयाचिद्वयस्यया सख्या कुण्डले परिधाप्य कर्णयोर्निक्षिप्य भैमी
इत्युक्ता । इति किम्—भैमी त्वदाननेन्दोराभ्यां कुण्डलाभ्यामभित उभयपार्श्वयोरयं
समीचीनः संबन्धः प्रियस्य नलस्य कामो रत्यभिलापस्तस्य जन्मन्युत्पत्तौ विषये दौरुधरीं
परराशिस्थगुरुशुक्रयोर्मध्यराशिस्थचन्द्रस्य दुरुधराख्यस्य महायोगस्य संबन्धिनीं धुरं
निश्चितमाश्रयतीति । ध्रुवमुत्प्रेक्षायां वा । दुरुधराख्ये महायोगे जातः पुत्रादिवं
प्राप्नोति, तथा कुण्डलालंकृतमुखचन्द्रदर्शनमात्रेण नलस्य रमणाभिलापो वृद्धिं प्राप्स्य
भावः । 'गुरुभार्गवयोर्योगश्चन्द्रेणैव यदा भवेत् । तदा दुरुधरायोगः–' इति ज्योतिः
दवगन्तव्यम् ॥

अधरप्रसाधनमाह—

निवेशितं यावकरागदीप्तये लगत्तदीयाधरसीम्नि सिक्थकम् ।
रराज तत्रैव निवस्तुमुत्सुकं मधूनि निर्धूय सुधासधर्मणि ॥ ४२ ॥

निवेशितमिति ॥ तदीयोऽधरोष्ठस्तस्य सीमनि ऊर्ध्वदेशे यावकस्यालक्तकस्य
लोहितिमा तस्य दीप्तये प्रकाशनाय निवेशितं न्यस्तं यच्चानेन लगत्संलग्नं सिक्थकं मधू
रस्य जनकानि मधूनि हीनरसतया परित्यज्य माधुर्यातिशयात्सुधाया अमृतस्य तत्र
तुल्यायां तत्रैवाधरसीम्नि निवस्तुं नित्यं स्थातुमुत्सुकमुत्कण्ठितमिव रराज । सुधया सिक्थ
कदाचिदप्यसंबन्धात्तदधरलतां परित्यक्तुमशक्तमिव तत्रैव स्थितमित्यर्थः । प्रसाधिका अल
कस्य स्थित्यर्थमधरे सिक्थकं निवेशयन्ति । अधरस्य मधुनोऽधिकत्वं सूचितम् । अन्य
हीनमाश्रयं परित्यज्योत्तममाश्रयति । लुप्तोत्प्रेक्षा । सधर्मा, 'धर्मादनिच् केवलात्' इत्य
'समानस्य छन्दसि–' इत्यत्र योगविभागात्समानस्य सादेशः । सुधावत्समानो धर्मो यस्याः
सधर्मा तस्याम्, 'मनः' इति न ङीप् ॥

कण्ठप्रसाधनमाह—

स्वरेण वीणेत्यविशेषणं पुरा स्फुरत्तदीया खलु कण्ठकन्दली ।
अवाप्य तन्त्रीरथ सप्त मुक्तिकासरानराजत्परिवादिनी स्फुटम् ॥ ४३ ॥

स्वरेणेति ॥ तदीया कण्ठ एव कन्दली अतिसौकुमार्यादिगुणत्वाद्दृढोद्गतप्रथमाङ्कुरदण्डो-
तिमधुरेण स्वरेण पुरा पूर्वमविशेषणं विशेषणरहितं यथातथा सामान्येन वीणेत्येव खलु निश्चि-
तमस्फुरदभासत, नतु रुद्रवीणादिबहुवीणाभेदेषु विशिष्टया इयमिदं संज्ञेत्यर्थः । अथालंकार-
समये सप्त मुक्तिकासरान्सूत्रप्रोतमौक्तिकहारानेव तर्जनीमध्यमध्यमाभिघातोत्पद्यमानध्वनि-
ञ्जितपञ्चमादिरागाः पट्टसूत्रादिरचितसप्ततन्त्रीरवाप्य 'विपञ्ची सा तु तन्त्रीभिः सप्तभिः परिवा-

दिनी' इत्यमरवचनात्स्फुटं प्रकटं परिवादिनी इति विशिष्टसंज्ञा सती अराजदशोभत । स्फुटमुत्प्रेक्षायां वा । वीणाभ्योऽपि मधुरस्वरा कण्ठकन्दली सप्तस्वरमुक्ताहारालंकृता चेति भावः ॥

भुजप्रसाधनमाह—

उपास्यमानाविव शिक्षितुं ततो मृदुत्वमप्रौढमृणालनालया ।
विरेजतुर्माङ्गलिकेन संगतौ भुजौ सुदत्या वलयेन कम्बुनः ॥ ४५ ॥

उपेति ॥ मङ्गलं प्रयोजनमस्य माङ्गलार्थं रचितेन कम्बुनः शङ्खस्य वलयेन कङ्कणेन संगतौ युक्तौ सुदत्या भैम्या भुजौ रराजतुः शुशुभाते । उत्प्रेक्षते—अप्रौढा बाला मृणालनाला यया बिसदण्डेन ततो भुजाभ्यां सकाशान्मृदुत्वं शिक्षितुमुपास्यमानाविव सेव्यमानाविव । मृणालादपि कोमलतरौ भुजावित्यर्थः । गौडदेशे विवाहकाले शङ्खवलयधारणमाचारः । बालेन चाभ्यासः सुकर इत्यप्रौढपदम् । 'नाल नालमथास्त्रियाम्' इत्यपि क्वचित्पाठान्महाकविप्रयोगाच्च नालशब्दोऽप्यावन्तः । ततः, 'आख्यातोपयोगे' इत्यपादानत्वम् । माङ्गलिकेन, 'प्रयोजनम्' इति ठक् । रराजतुः, 'फणां च सप्तानाम्' इत्येत्वाभ्यासलोपौ वैकल्पिकत्वान्न भवतः । क्वचित्तु 'विरेजतुः' इत्यपि पाठोऽस्ति ॥

श्लोकद्वयेन पदप्रसाधनमाह—

पदद्वयेऽस्या नवयावरञ्जना जनैस्तदार्नीमुदनीयतार्पिता ।
चिराय पद्मौ परिरभ्य जाग्रती निशीव विश्लिष्य नवा रविद्युतिः ॥४६॥

पदेति ॥ तदानीं तस्मिन् प्रसाधनसमये अस्याः पदद्वयेऽर्पिता रचिता नवा आर्द्रा यावरञ्जना अलक्तकरञ्जना जनैर्नवोदयसमये जाताऽतिरक्ता रविद्युतिरिवोदनीयतातर्क्यत । किंभूता रविद्युतिः–निशि रात्रौ सूर्यस्यास्तमयवशात्पद्माभ्यां सह विश्लिष्य दिने पुनः पद्मौ चिराय परिरभ्य जाग्रती तिष्ठन्ती रविद्युतिर्यथा पद्मेषु श्रियमधिकां करोति तथा यावकरञ्जना तत्पदयोरिति भैमीचरणौ पद्मतुल्याविति भावः । चिराय विश्लिष्येति वा चिरवियुक्तावन्योन्यं प्राप्य गाढमालिङ्ग्य तिष्ठत इत्युक्तिः ॥

कृतापराधः सुतनोरनन्तरं विचिन्त्य कान्तेन समं समागमम् ।
स्फुटं सिषेवे कुसुमेषुपावकः स रागचिह्नश्चरणौ न यावकः ॥ ४७ ॥

कृतेति ॥ पूर्वं विरहावस्थायां बहुसंतापकारित्वात्सुतनोर्भैम्याः कृतोऽपराधो येन स कुसुमेषुः काम एव पावकोऽग्निरनन्तरमधुना कान्तेन नलेन समं सह भैम्या समागमं विचिन्त्य स्फुटं निश्चितं चरणौ सिषेवे । अपराधमार्जनायेत्यर्थः । कामस्याग्नित्वे हेतुमाह–यतः सोऽग्नी रागचिह्नो रागो लोहितिमैव चिह्नं यस्य । रक्तिम्ना वह्निरयमिति ज्ञायते । अथवाऽनुराग एव चिह्नं यस्य । अनुराग एव हि काममनुमापयति । तस्मात्कामाग्निरेवायं, नत्वयं यावकोऽलक्तकः । स यावको नेति वा । अन्योऽपि प्रोषितभर्तृकायाः कस्याश्चित्कृतापराधः संतापितदागमनं विचिन्त्यापराधमार्जनाय तत्पादयोः पतति । सालक्तकतत्पददर्शनादेव नलस्य कामोद्रेको भवितेति भावः ॥

सहजशोभामाहात्म्यं वर्णयति—

स्वयं तदङ्गेषु गतेषु चारुतां परस्परेणैव विभूषितेषु च ।
किमूचिरेऽलंकरणानि तानि तद्वृथैव तेषां करणं बभूव यत् ॥ ४८ ॥

स्वयमिति ॥ स्वं भूषणं नैव परसापेक्षं न तस्या भैम्या अङ्गेषु भूषणानि
प्रत्येकं सौभाग्यसौभाग्य [illegible] गतेषु प्राप्तेषु खलु परस्परं
नैव न विशेषेण भूषितेषु प्रत्येकं सौन्दर्ये सत्यप्यन्योन्यसाहचर्येणालंकारानुगुणो गुणो
गुणो करालितो [illegible] तस्य न [illegible] सर्वातिशायिसौन्दर्यसुन्दरतरेषु
तानि मनःशिलातिलकादीन्यलंकरणानि किमूहिरे, अपि तु—स्वकरणप्रयोजनं न
दधुः । यद्यस्याङ्गेष्वलंकरणानां स्वरूपोत्कर्षकारं करणं निर्माणं वृथैव बभूव । दुःखकारं
विदधुः, किमप्यधिकं न चक्रुरित्यर्थः । आश्रितस्यादनिराकार्यत्वेन स्थितान्येवेति
यशोभां करणं वृथैवाभूत् । अत एव करणमलमित्यन्वयेन नाम सान्वयं जातमिति
अलं वृथा करणं येषामिति बहुव्रीहिणापि सान्वयं जातमित्यर्थः । पूर्वमलंकारस्य भूषणं
ताम्, पश्चादप्रयोजकत्वाभिप्रायार्थमिति चेत्यर्थः । 'किमूहिरे' इति पाठे किमर्थं
जाने इति शेष इति वा ॥

भूषणकान्त्युत्कर्षं वर्णयति—

> **क्रमाधिकामुत्तरमुत्तरं श्रियं पुपोष यां भूषणचुम्बनैरियम् ।**
> **पुरः पुरस्तस्थुषि रामणीयके तया बबाधेऽवधिबुद्धिधोरणिः ॥ ४९ ॥**

क्रमेति ॥ इयं दमयन्ती भूषणचुम्बनैर्भूषणसंबन्धैः कृत्वा उत्तरमुत्तरं यथा स्यात्तथा अग्रे-
ऽग्रे क्रमेण पूर्वभूषणापेक्षया उत्तरोत्तरभूषणेनाधिकामतिशयितां यां श्रियं पुपोष तया
शोभया रामणीयके सौन्दर्ये पुरःपुरस्तस्थुषि स्थिरतरे सति अवधिबुद्धेरियत्ताबुद्धेर्धोरणिः प-
म्परा बबाधे बाधिता । इतोऽन्यद्रामणीयकं नास्तीति यदि बुद्धिर्भवेत्, तदावधिर्भवेत् । पू-
र्वरामणीयकेयत्ताबाधेन रामणीयकान्तरे पुरः पुरः स्फुरत्यवधिर्बाधित इत्यर्थः । तस्या भूषणैः
शोभा निरवधिरभूदिति भावः । धोरणिरिति देश्यशब्दः ॥

> **मणीसनाभौ मुकुरस्य मण्डले बभौ निजास्यप्रतिबिम्बदर्शिनी ।**
> **विधोरदूरं स्वमुखं विधाय सा निरूपयन्तीव विशेषमेतयोः ॥ ५० ॥**

मणीति ॥ मणीसनाभौ मौक्तिकादिरत्नतुल्येऽतिस्वच्छे मुकुरस्य मण्डले दर्पणतले पुनर्नि-
जास्यस्य स्वमुखस्य दर्पणसंक्रान्तप्रतिबिम्बं पश्यतीत्येवंशीला दर्शिनी सा भैमी स्वमुखं बिम्ब-
दर्पणरूपस्य, प्रतिबिम्बरूपस्य वा, चन्द्रस्यादूरं निकटवर्ति विधाय कृत्वा एतयोर्मुखचन्द्रयोर्वि-
शेषं तारतम्यं निरूपयन्तीव विचारयन्तीव बभौ । संनिधौ हि विशेषः स्फुरति । बिम्बापे-
क्षया प्रतिबिम्बस्य न्यूनत्वात्तस्यैव चन्द्रत्वमिति विशेषो निरूपित इति भावः । भूषणानन्तर-
मादर्शविलोकनमिति जातिः । प्रतिबिम्बदर्शिनी, 'बहुलमाभीक्ष्ण्ये' इति णिनिः ॥

> **जितस्तदास्येन कलानिधिर्दधे द्विचन्द्रधीसाक्षिकमायकायताम् ।**
> **तथापि जिग्ये युगपत्सखीयुगप्रदर्शितादर्शवहूभविष्णुना ॥ ५१ ॥**

जित इति ॥ तस्या आस्येन जितः कलानिधिश्चन्द्रो नेत्रचिपिटीकरणादिनिमित्ताद्वा
स्थितादर्शनिमित्ताद्वा द्वौ चन्द्राविति धीर्यस्य पुरुषस्य स एव साक्षी साक्षाद्द्रष्टा यस्याः सा मा-
यस्यैवंभूतः कायो यस्य चन्द्रस्य तस्य भावस्तत्ता तां दधे बभार । एकत्वादहं भैमीमुखेन जि-
इति मायामयानेककायत्वं चन्द्रेण धृतमित्यर्थः । अत्र पूर्वोक्तप्रकारद्वयेन साक्षिणौ द्वौ चन्द्रौ

निति बुद्धिरेव प्रमाणम् । कलानिधिपदेनानेककलावत्त्वान्नायिकाव्यूहनिर्माणकलामपि वेत्तीति सूचितम् । द्वाभ्यामनेकजयस्य दुष्करत्वात्करस्थितादर्शच्छलेनानेककायत्वं यद्यप्यङ्गीकृतम्, तथापि युगपत्सकलकालं सर्वोद्योगेन प्रकर्षेण दर्शिताभ्यामादर्शाभ्यां कृत्वा तयोर्वा अबहुना एकेनापि बहुभविष्णुना बहुभवनशीलेन सता तन्मुखेन चन्द्रो जिग्ये जित एव । हस्तस्थदर्पणसहितसखीदर्पणद्वयप्रतिफलितमुखप्रतिबिम्बैः सह बिम्बभूतस्य मुखस्यानेकत्वान्मुखतुल्यदर्पणद्वयेन सह बिम्बभूतस्य मुखस्य स्वसदृशैरादर्शैः स्वप्रतिबिम्बैश्च सह वाऽनेकत्वात्स्वपर्धयोर्विजयस्य सुकरत्वादित्यर्थः । पूर्वं शोभया जितोऽपि संख्याधिक्येन मुखं जेतुमारब्धवान्, तथापि मुखस्याधिकतरसंख्यत्वान्न शशाङ्केति भावः । 'बहुभविष्णुना' इति च्विः ॥

किमालियुग्मार्पितदर्पणद्वये तदास्यमेकं बहु चान्यदम्बुजम् ।
हिमेषु निर्वाप्य निशास्समाधिभिस्तदीयसालोक्यमितं व्यलोक्यत ५२

किमिति ॥ आलियुग्मेनार्पिते दर्शिते दर्पणद्वये बहुषु बिम्बप्रतिबिम्बेषु मध्ये एकमेकसंख्यायोग्यम्, अथ च मुख्यम् । तदास्यं भैमीमुखम्, अन्यच्च हिमेषु शिशिरर्तुषु । अथ च कान्येषु केदारादिहिमेषु निर्वाप्य निर्वाणं(पं) विनाशम् । अथ च मोक्षम् । कृत्वा प्राप्येति यावत् । निशास्समाधिभी रात्रिसंबन्धिभिः संकोचैः । अथच परमात्मदर्शनोपायैः । कृत्वा तदीयं भैमीमुखसंबन्धि सालोक्यं सादृश्यम् । अथ च सालोक्यलक्षणां मुक्तिम् । इतं प्राप्तं बहु अनेकमम्बुजं किं लोकैर्व्यलोक्यत । किमुत्प्रेक्षायाम् । भैमीमुखप्रतिबिम्बाभिहीनत्वात्पद्मैः केदारादिहिमचूर्णनादितपस्यता तन्मुखप्रतिबिम्बस्य समीपे स्थितानि किमित्यर्थः । पद्मेभ्यो मुखमधिकमिति भावः । अम्बुजमिति जातिकवचनम् । निर्वपणं निर्वापस्तत्करोतीति ण्यन्तात्ल्यपि निर्वाप्येति । हिमेष्वत्यानं विनाश्येत्यर्थः । सालोक्यं, 'समानस्य—' इति योगविभागात्सः ॥

पलाशदामेतिमिलच्छिलीमुखैर्वृता विभूषामणिरश्मिकार्मुकैः ।
अलक्षि लक्षैर्धनुषामसौ तदा रतीशसर्वस्वतयाऽभिरक्षिता ॥ ५३ ॥

पलाशेति ॥ असौ भैमी पलाशानां किंशुकानां दाम माला इयमिति भ्रान्त्या मिलद्भिरागच्छद्भिः शिलीमुखैर्भ्रमरैः पक्षे बाणैर्वृता । अथ च किंशुकानां धनुराकारत्वान्मिलद्भिः । विभूषामणीनां विविधालंकारसंबन्धिमाणिक्यादिरत्नानां रश्मिरूपैः कार्मुकैरिन्द्रधनुर्भिर्वृता वेष्टिता सती तदा भूषणानन्तरकाले रतीशस्य कामस्य सर्वस्वतया परमधनत्वेन हेतुना धनुषां लक्षैर्लक्षसंख्यैर्धनुर्भिरभि समन्तात्त्वेन रक्षितेव लोकैरलक्षि तर्किता । कुन्ताः प्रविशन्तीतिवत् धनुषां धनुर्धराणामित्यर्थः । कान्तिसाम्यान्मित्रतया मदनदेवस्य भैमी धनं रक्षितेत्यर्थः ॥

विशेषतीर्थैरिव जह्नुनन्दिनी गुणैरिवाजानिकरागभूषिता ।
जगाम भाग्यैरिव नीतिरुज्ज्वलैर्विभूषणैस्तत्सुषमा महार्घताम् ॥ ५४ ॥

विशेषेति ॥ तस्या भैम्याः सुषमा सामान्येभ्यः परमा शोभा विभूषणैर्विशिष्टैर्भूषणैः कृत्वा महार्घतामतिश्रेष्ठतां जगाम । का केव—जह्नुनन्दिनी स्वत एव श्रेष्ठाऽपि गङ्गा विशेषतीर्थैः प्रयागादिभिरिव । यथा—आजानिकरागभूषिता (जननं जनः न जनोऽजनः अजनेन निर्वृत्तः स्वभावेन संभूतः आजानिकः 'तेन निर्वृत्तम्' इति ठक् । जनेर्घञन्त वा आजनिः, आजनौ भवः, अध्यात्मादित्वाट्ठञ् । इत्यन्ये । अनुशतिकादित्वादुभयपदवृद्धिः ।) आजानिकः सहजो

---

१ 'वन्दरा, वन्धुरेतिचतुरत्वसे स्वरः' इति जीवातुः ।

रागः, तस्य भूमिः स्थानं पुत्रादिः, तस्य भावस्तत्ता सहजा स्नेहपात्रता गुणैः शील... भिरिव। तथा—नीतिः उज्ज्वलैर्नीतिसाधितफलप्रतिबन्धनाशनात्प्रकाशैर्भाग्यैः पूर्वकृत... भिरिव भागीरथी सर्वत्र श्रेष्ठैव, परं प्रयागादौ माहात्म्यातिशयः। यत्रानुरागस्तत्र श्रेष्ठम्, परं शीलादिनाऽनुरागस्य निरतिशयत्वम्। तथा—नीतिमार्गानुसरणं श्रेष्ठमेव, परं ... भाग्यैरनुगृहीतं श्रेष्ठतरं भवतीत्यर्थः। मण्डनैस्तस्या निरतिशया शोभाऽभूदिति भावः। उज्ज्व... लैरित्युपमानोपमेयैः संबन्धनीयम्। अशुभकर्मणोऽपि भाग्यत्वाभिधायकत्वात्... भाग्यविशेषणमेव वा। उपमानत्रयेण क्रमेण पावित्र्यं, गुणवत्त्वं, भाग्यवत्त्वं च सूचितम्। विशिष्यन्ते विशेषाः पचाद्यच् (?) ॥

नलात्स्ववैश्वस्त्यमनाप्तुमानता नृपस्त्रियो भीममहोत्सवागताः।
तदङ्घ्रिलाक्षामदधन्त मङ्गलं शिरःसु सिन्दूरमिव प्रियायुषे ॥ ५५ ॥

नलादिति ॥ नलात्सकाशात्स्वस्यात्मनो वैश्वस्त्यं वैधव्यमनाप्तुमप्राप्तुमानता भैमीचरण- णामप्रवणा भीमस्य कन्यास्वयंवररूपे महोत्सवे आकारिताः सत्य आगता नृपस्त्रियोऽन्यराज- महिष्यः प्रियायुषे स्वप्राणेशचिरंजीवनाय मङ्गलरूपं सिन्दूरमिव स्वशिरःसु तस्या भैम्या अङ्घ्र्योश्चरणयोर्लाक्षामलक्तकमादधन्त अधारयन्। पत्युरायुर्वृद्धये अन्याः स्त्रियस्ता एव ... यथा शिरःसु सिन्दूरं धारयन्ति, तथा प्रणामप्रसन्नया भैम्या एतदीयाः प्राणेशा रक्षणीया इति प्रार्थितो नलः स्वप्राणेशान्नक्षिष्यतीति बुद्ध्या स्वभर्तृचिरजीवनाय भैमीचरणयोः प्रणामं कृतवत्य इति भावः। प्रणामादेव वार्द्रा लाक्षा लग्ना। 'विश्वस्ताविधवे समे' इत्यमरः। प्रज्ञा- णादित्वाद्वैश्वस्त्यम्। अदधन्त, 'दध धारणे' लङि। 'हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा। कूर्पासकं च ताम्बूलं माङ्गल्याभरणं शुभम्। केशसंस्कारकबरीकरकर्णविभूषणम्। भर्तुरा- युष्यमिच्छन्ती दूरयेन्न पतिव्रता' इति स्कान्दवचनम् ॥

अमोघभावेन सनाभितां गताः प्रसन्नगीर्वाणवराक्षरस्रजाम्।
ततः प्रणम्राधिजगाम सा ह्रिया गुरुर्गुरुब्रह्मपतिव्रताशिषः ॥ ५६ ॥

अमोघेति ॥ ततो मण्डनानन्तरं प्रणम्रा कृतगुर्वादिचरणप्रणामा सती ह्रिया गुरुः अधिकलज्जेत्यर्थः। सा भैमी गुर्वोः पूज्यतमयोः पित्रोः ब्रह्मणां ब्राह्मणानां, वाङ्मनःकर्म- भिः पतिमव्यभिचरन्तीनां पतिव्रतानां वृद्धशोभनसुवासिनीनां च अविधवा सुभगा अ(न)... पुत्रा भवेति आशिषोऽधिजगामालभत। किंभूता आशिषः—अमोघभावेन सफलत्वेन प्रसन्नानां गीर्वाणानां देवानां पूर्वोक्ता वरास्तत्संबन्धिन्योऽक्षरस्रजो वर्णमालास्तासां सनाभितां बन्धुत्वं गताः प्राप्ताः सत्यत्वेन तत्तुल्याः ॥

तथैव तत्कालमथानुजीविभिः प्रसाधनासञ्जनशिल्पपारगैः।
निजस्य पाणिग्रहणक्षणोचिता कृता नलस्यापि विभोर्विभूषणा ॥ ५७ ॥

तथैवेति ॥ तथैव भैम्या चेदिकोदरे यथा मङ्गलस्नानादि कृतम्, तेनैव प्रकारेण ... तत्कालं तस्मिन्नेव काले अथ मङ्गलस्नानानन्तरं प्रसाधनासञ्जनं भूषणकरणं तत्संबन्धि शिल्पं विज्ञानकौशलं तस्य पारगैः (अ)शेषविशेषज्ञैः शृङ्गारिभिरनुजीविभिः सेवकैर्निजस्य ... विभोः स्वस्वामिनो नलस्यापि पाणिग्रहणक्षणोचिता विवाहकाल्ययोग्या विवाहकोत्सव...

ततो हेतोर्मञ्जुमञ्जरीं कल्पवृक्षत्वोचितां रम्यां रत्नाङ्कुरपरम्परां विमुञ्चन्नुद्गिरन्निव रराज। वृक्षो हि बालपल्लवपुष्पफलयुक्तां मञ्जरीमुद्गिरति। कल्पवृक्षस्य च मञ्जरी रत्नफलत्वाद्रत्नमयी। मञ्जरीस्थाने मुकुटः, तत्किरणा वा। मञ्जर्याकारा मुकुटमणिकिरणा ऊर्ध्वं निर्गच्छन्तीत्यर्थः। अर्घमर्हतीत्यर्थे दण्डादित्वाद्यत्। 'मञ्जरीः' इति च पाठः॥

भालप्रसाधनमाह—

नलस्य भाले मणिवीरपट्टिकानिभेन लग्नः परिधिर्विधोर्बभौ।
तदा शशाङ्काधिकरूपतां गते तदानने मातुमशक्नुवन्निव॥ ६१॥

नलस्येति॥ रत्नखचिताया वीरसंबन्धिन्या वीरपुरुषधार्याया वीरपट्टिकानाम्ना ख्याताया: सुवर्णपट्टिकायाः श्रवणयुगपश्चाद्भागमात्रव्यापिन्या निभेन व्याजेन नलस्य भाले ललाटे लग्नः सन् विधोश्चन्द्रस्य परिधिः परिवेषो बभौ। मुखचन्द्रेऽपि चेत्परिवेषः, संपूर्णमण्डलः किमिति न दृश्यत इत्यत आह—किं कुर्वन्निव। तदा प्रियासंगमकाले भूषणकाले च हर्षवशाद्भूषणवशाच्च शशाङ्काधिकरूपतां चन्द्रापेक्षयाधिकसौन्दर्यम्। अथच—अधिकपरिमाणत्वं गते प्राप्ते तदानने मातुं तुल्यप्रमाणतां च प्राप्तुमशक्नुवन्निव। अल्पपरिमाणस्य यदलंकरणं तदधिकपरिमाणस्यैकदेश एव तिष्ठति नतु सर्वं मण्डयितुं शक्नोति। तस्मान्मुखैकदेशो भाल एव परिधिः स्थित इति युक्तमिति भावः। मणिकिरणानां मण्डलाकारत्वेन पट्टिकायाः परिवेषाकारत्वं युक्तम्। 'अशक्तिमुद्वहन्' इति च पाठः॥

श्लोकत्रयेण तिलकं वर्णयति—

बभूव भैम्याः खलु मानसौकसं जिघांसतो धैर्यभरं मनोभुवः।
उपभ्रु तद्वर्तुलचित्ररूपिणी धनुःसमीपे गुलिकेव संभृता॥ ६२॥

बभूवेति॥ मनोभुवो धनुःसमीपे संभृता सज्जीकृता उपभ्रु भ्रुवोः समीपे तस्य नलस्य वर्तुलं चित्रं तिलकस्तद्रूपिणी गुलिकेव मृन्मयो गोलक इव बभूव। किंभूतस्य—भैम्या मानसौकसं मनसि धैर्यभरं धैर्यबाहुल्यं अथच धैर्यभरमेव मानससरोनिवासिनं हंसम्। पक्षित्वान्न विद्यते धैर्यभरो यस्यैवंविधं वा। हंसं जिघांसतो हन्तुमिच्छतः। भ्रुवोः कामधनुष्ट्वम्, तिलकस्य च गुलिकात्वम्। भ्रूसमीपस्थितवर्तुलतिलकदर्शनमात्रेण भैमी कामवशा भविष्यतीति भावः। अन्योऽपि हंसं हन्तुमिच्छन्क्षत्रियो धनुषि गुलिकां संधत्ते। 'राज्ञ्यथ तिलको वृत्तौ नृपवैश्ययोः' इति वचनात्। मानसौकस्त्वोत्प्रेक्षायां खलु। 'चित्रं स्यादद्भुतालेख्यतिलकेषु' इति विश्वः। चित्रं च तद्रूपं चेति कर्मधारयादिनिर्वा। 'चित्ररूपता' इति पाठः। तिलकस्वरूपेत्यर्थः॥

अचुम्बि या चन्दनविन्दुमण्डली नलीयचक्रेण सरोजतर्जिना।
श्रियं श्रिता काचन तारकासखी कृता शशाङ्कस्य तयाङ्कवर्तिनी॥ ६३॥

अचुम्बीति॥ वृत्तत्वादिना गुणेन सरोजतर्जिना कमलजैत्रेण तदधिकेन। अथ च कमलतर्जनवशादेव चन्द्ररूपेण नलीयेन वक्त्रेण या चन्दनविन्दुमण्डली मण्डलाकारश्चन्दनतिलकोऽचुम्बि धृता। तया चन्दनविन्दुमण्डल्या चन्दनस्यैव सखीं श्रियं श्रिता सलक्ष्मीका काचन रोहिण्यादिमध्ये तारका शशाङ्कस्याङ्कवर्तिनी मध्यवर्तिनी कृता। तया चन्द्रमध्यवर्तिनी काचन

यत इति ॥ स तद्भुजो नलभुजो मुद्रानिरङ्गुलीयकैः सहितः समुद्रस्तस्य भावम् । अथ च दण्ड्यदण्डनादिराजधर्मपरिपालनान्मुद्रा नियमस्तत्साहित्यम् । बभार भेजे । ऊर्मिका दधारेति भावः । स कः—यतो यस्माद्भुजाद्धेतोः श्रीः शोभा राज्यलक्ष्मीर्वा । अजन्युत्पन्ना । तथा—आजिषु यस्य भुजस्य वारणेन यत्कर्तृकेण शत्रुविमर्दनेन कृत्वा बलं शत्रुसैन्यं द्विषन्पराभावुकः सन् स नलो बलवानुत्साहयुक्तः शक्तियुक्तो वा बभूव । यत्कृतनिवारणेन बलवान्सन् शत्रुसैन्यं पराभावुकोऽभूदिति वा । वाशब्दश्चार्थे । ततश्च—आजिषु बलं द्विषन्स नलो यस्य च यत्कर्तृकेण रणेन सङ्ग्रामेण बलवानभूदिति वा । शत्रुसैन्यं द्विषन्स प्रसिद्धोऽतिबलोऽपि शत्रुः सङ्ग्रामेषु यस्य कर्मभूतस्य वारणे निराकरणे; बलवान्न बभूवेति वा । आजिषु बलं द्विषन्स प्रसिद्धः शत्रुर्यस्य सङ्ग्रामे विषये बलवान्नाभूदिति वा । वारणानामिनः स्वामी वारणेनस्तातौ स चातिप्रसिद्ध ऐरावतः स वारणेनसो यस्य नलभुजस्य बलं द्विषन्यद्वलेन सह स्पर्धमानः सङ्ग्रामेषु बलवानभूत् । हीनबलोऽप्युत्तमैतद्भुजबलस्पर्धया बलवत्वप्रतिष्ठां लेभे । 'वरं विरोधोऽपि समं महात्मभिः' इति न्यायादिति भावः । सङ्ग्रामेषु बलं दैत्यं पराभावुकः स इन्द्रोऽपि यस्याजिषु येन भुजेन सह सङ्ग्रामे बलवान्नाभूत् । इन्द्रादप्ययं बलीतिभाव इति वा । बवयोरभेदाद्वलनं बलः पलायनं तद्वान् । सङ्ग्रामे यत्कृतेन निवारणेन स बलारातिरपि बलवान्पलायनपरोऽभूत्, न तु स्थातुं शक्त इति वा । यः करस्तानतिप्रसिद्धान्घनान्वहून्कमलां लक्ष्मीमर्थयन्त एवंशीलान्याचकानपूपुरत्पूर्णांचकार । अतिवदान्य इत्यर्थः । वहून्सुन्दरवधूकाङ्क्षिणो दारान्यः पपार । वहवो ब्राह्मणा येन विवाहिता इत्यर्थ इति वा । अथ च—सागरत्वं भेजे । यस्मात्सागराल्लक्ष्मीर्जाता । यदुत्पन्नेन वारणेनैरावताख्येन स बलारातिराजिषु बलवानभूत् । यश्च वृष्ट्यर्थं जलाभिलाषिणो मेघान्पूरयति । रामनामाद्यङ्किता मुद्रीका । 'यदुद्गता', 'पपार यस्तान्' इति वा पाठः । 'सलिलं कमलं जलम्' इत्यमरः । 'कमला श्रीवराश्रियोः' इति विश्वः । बलनं बलः । घनर्थे कविधानात्कः । अपूपुरदिति पूरयतेर्लुङि 'णौ चङि—' इति ह्रस्वे 'दीर्घो लघोः' इत्यभ्यासस्य दीर्घः । पपार, पृधातोः पूरणार्थाल्लिट् । इत्त्वं (उत्वं) बाधित्वा परत्वाद्वृद्धिः ॥

> कृतार्थयन्नर्थिजनाननारतं बभूव तस्यामरभूरुहः करः ।
> तदीयमूले निहितं द्वितीयवद्ध्रुवं दधे कङ्कणमालवालताम् ॥ ६८ ॥

कृतेति ॥ तस्य करोऽमरभूरुहः कल्पवृक्षो यतो बभूव । किं कुर्वन्—अर्थिजनान्याचकलोकान्बहुधनदानादनारतं सदा कृतार्थयन्प्राप्तप्रयोजनान्कुर्वन् । तस्मान्मणिबन्धरूपे तदीयकरमूले निहितं स्थापितं द्वितीयवद्द्वितीयेन वैवाहिकेन सूत्रसमयेन माङ्गलिकेन कङ्कणेन युक्तं सौवर्णं कङ्कणमालवालतां दधे । तदीयकरकल्पतरोः कङ्कणमालवालस्थाने जातमित्यर्थः । वृक्षमूले आलवालद्वयं भवति । मिलितमुद्रिकाद्वयवद्वयोर्मिलितयोर्घटनाद्द्वितीयवदिति वा । ध्रुवमुत्प्रेक्षायाम् । 'विनिवेशितं तदा' इति पाठः साधुः ॥

> रराज दोर्मण्डलमण्डलीजुषोः स वज्रमाणिक्यसितारुणत्विषोः ।
> मिषेण वर्षन्दशदिङ्मुखोन्मुखौ यशःप्रतापाववनीजयार्जितौ ॥ ६९ ॥

रराजेति ॥ स नलो रराज । किं कुर्वन्निव—दोर्मण्डनं बाहुभूषणं तस्य मण्डली श्रेणी तां जुषेते इति जुषौ तयोरङ्गदादिवर्तुलबाहुभूषणाश्रययोर्वज्रमाणिक्यानां क्रमेण सितारुणत्विषोः

यात्रायां मुदितो हृष्टः। जन्या वरपक्षीयास्तैः सह यात्रया वा हृष्टः। अथच—युद्धसंबन्धिन्य विजययात्रायां हृष्टः। तथा—मुकुटेन मण्डितः। वरयात्रार्थं निर्गत इत्यर्थः। वार्ष्णेयः वृष्णेरपत्यम्, 'इतश्चानिञः' इति ढक्। नियन्तृकम्, 'नद्यृतश्च' इति कप्॥

इदानीं वरसंदर्शनार्थं पुरनारीसंभ्रममाह—

विदर्भनाम्नस्त्रिदिवस्य वीक्षितुं रसोदयादप्सरसस्तमुज्ज्वलम्।
गृहाद्गृहादेत्य धृतप्रसाधना व्यराजयन्राजपथानथाधिकम्॥ ७३॥

विदर्भेति॥ अथ रथारोहणानन्तरं विदर्भेति नाम्नस्त्रिदिवस्य कुण्डिनरूपस्य स्वर्गस्याप्सरसः सुन्दरनार्य एव स्वर्वेश्या उज्ज्वलं प्रकाशमानं मूर्तं शृङ्गाररूपं वा तं नलं रसोदयाद्दर्शना-(द)नुरागाभिवृद्धिहेतोर्वीक्षितुं विशेषेण द्रष्टुं धृतप्रसाधना धृतालंकाराः सत्यो गृहाद्गृहादेत्यागत्य निसर्गरम्यान्राजपथानधिकं नितरां व्यराजयन्। तद्योगात्तेऽप्यधिकं शुशुभिर इत्यर्थः। तासामतिसौन्दर्यमुक्तम्। सर्वा अपि तद्दर्शनार्थमागता इति भावः॥

अजानती कापि विलोकनोत्सुका समीरधूतार्धमपि स्तनांशुकम्।
कुचेन तस्मै चलतेऽकरोत्पुरः पुराङ्गना मङ्गलकुम्भसंभृतिम्॥ ७४॥

अजानतीति॥ नलस्य विलोकनोत्सुका अत एव समीरणेन धूतार्धं कम्पितार्धमपि स्तनांशुकं चोलकाख्यं कुचावरणवस्त्रमजानत्यनाकृणवती कापि पुराङ्गना चलते वरयात्रोन्मुखाय तस्मै नलाय पुरोऽग्रभागे कुचेन कृत्वा मङ्गलकुम्भस्य शुभसूचकशकुनरूपपूर्णकुम्भस्य संभृतिं संभारमुपदामकरोत्। समीरधूत इत्यनेनाचेतनस्याप्यनुरागोत्पादना, कुचस्यातिसौन्दर्यमिति च व्यज्यते। वरस्य च पुरः पूर्णकलशदर्शनं शुभाय भवति। तस्मै, 'क्रियया यमभिप्रैति स संप्रदानम्' इति संप्रदानत्वम्॥

सखीं नलं दर्शयमानयाञ्चतो जवादुदस्तस्य करस्य कङ्कणे।
विपज्य हारैस्त्रुटितैरतर्कितैः कृतं कयापि क्षणलाजमोक्षणम्॥ ७५॥

सखीमिति॥ सोऽयं नलः समागच्छतीत्येवं करेण सखीं नलं दर्शयमानया दर्शयन्त्या कयापि प्रदर्शनार्थमेवाञ्चत उत्सङ्गात्सकाशाज्जवाद्वेगादुदस्तस्योत्क्षिप्तस्य करस्य सुवर्णहीरकधारातीक्ष्णाग्रभागे कङ्कणाख्ये भूषणे विपज्य वेगाभिघातवशाल्लगित्वा त्रुटितैश्छिन्नैर्हारैर्नलविलोकनरसादतर्कितैरज्ञातविच्छेदाधःपतनैर्हारैस्तदीयमुक्ताफलैः कृत्वा क्षणं क्षणमात्रम्। क्षण उत्सवस्तत्संबन्धि वा। लाजमोक्षणं कृतम्। अन्यरमणीनिरन्तरक्रियमाणलाजमोक्षणमध्ये मौक्तिकमोक्षणमपि क्षणं तद्भ्रमकार्यभूदित्यर्थः। दर्शयमानया, 'णिचश्च' इति कर्त्रभिप्राये क्रियाफले शानच् 'हृक्रोरन्यतरस्याम्' इत्यत्र 'अभिवादिदृशोरात्मनेपदे–' इति वक्तव्याद्विकर्मकत्वात्सखीमिति कर्मत्वम्। 'सखीः' इति च पाठः॥

लसन्नखादर्शमुखाम्बुजस्मितप्रसूनवाणीमधुपाणिपल्लवम्।
यियासतस्तस्य नृपस्य जज्ञिरे प्रशस्तवस्तूनि तदेव यौवतम्॥ ७६॥

लसदिति॥ तद्युवतीनां समूहो यौवतमेव यियासतो वरयात्रोन्मुखस्य तस्य नृपस्य प्रशस्तवस्तूनि शुभसूचकमङ्गलद्रव्याणि जज्ञिरे। किंभूतम्—नखा एवादर्शाः, मुखान्येवाम्बुजानि, स्मितान्येव प्रसूनानि पुष्पाणि, वाण्य एव मधूनि, पाणय एव पल्लवानि, इतरेतरयोगः समाहारो वा। लसन्तः स्फुरत्कान्तयो नखादर्शादयो यस्य तत्। एवंविधपुरनारीदर्शनाद्भविनो-

विभूषणस्रंसनशंसनार्पितैः करप्रहारैरपि धूननैरपि।
अमान्तमन्तः प्रसभं पुराऽपरा सखीषु संमापयतीव संमदम्॥ ८०॥

विभूषणेति ॥ अपरान्तरन्तःकरणे शरीरमध्येऽमान्तं संमदं शरीरमानादधिकमानं बहिरवस्थितं नलदर्शनजं प्रमोदं विभूषणानां स्रंसनस्य शंसने तव मण्डनं गलितम्, तव मण्डनं गलितमिति प्रत्येकं कथने विषयेऽर्पितैर्दत्तैः करप्रहारैरपि धूननैरपि तच्छरीरकम्पनैश्च कृत्वा प्रसभं बलात्कारेण स्वसखीषु पुरा संमापयतीव प्राविशदिव। विचित्तत्वेन शब्दनश्रवणात्करेण ताड्यते, पतितविस्मृतभूषणादिसंवेदनाय कम्प्यते चेति, तथा—अन्यदपि कुसूलादावमाद्व्रीधूमादि बहिरेव संस्थितं सद्बलात्कारेण करताडनैः करकृतैर्धूननैश्चान्तर्माप्यत इति च लौकिकी रीतिः। नलदर्शनानुरागादतिविमनस्कास्त्वा जाता इति भावः। पुरा संमापयतीति, 'पुरि लुङ् चास्मे' इति लट्॥

विभूषणभ्रंशः शब्देन किमिति न ज्ञापित इत्यत आह—

वतंसनीलाम्बुरुहेण किं दृशा विलोकमाने विमनीबभूवतुः।
अपि श्रुती दर्शनसक्तचेतसां न तेन ते शुश्रुवतुर्मृगीदृशाम्॥ ८१॥

वतंसेति ॥ नलदर्शने सक्तं चेतो यासां मृगीदृशां श्रुती कर्णावपि वतंसनीलाम्बुरुहेण कर्णभूषणनीलोत्पलेनैव दृशा नेत्रेण नलं विलोकमाने सत्यौ यस्माद्विमनीबभूवतुर्व्याकुले जाते तेन ते श्रुती किं भूषणस्खलनं शुश्रुवतुः। चक्षुषी किल श्रवणानर्हत्वाच्छ्रुतताम्, कर्णौ तु श्रोतुं योग्यावेवेत्यपेरर्थः। ताः सुदृश्यो यथा नलविलोकने विमनस्का जातास्तथा कर्णावपि विमनस्कौ जाताविति वापेरर्थः। विमनीबभूवतुः, 'अरुर्मनश्चक्षुः–' इति च्विः सलोपश्च॥

काश्चिन्निर्माय चक्षुःप्रसृतिचुलुकितं तास्वशङ्कन्त कान्ता
मौग्ध्यादाचूडमोघैर्निचुलितमिव तं भूषणानां मणीनाम्।
साहस्रीभिर्निमेषाकृतमतिभिरयं दृग्भिरालिङ्गितः किं
ज्योतिष्टोमादियज्ञश्रुतिफलजगतीसार्वभौमभ्रमेण॥ ८२॥

काश्चिदिति ॥ पश्यन्तीषु तासु मध्ये कान्ताः सुन्दर्यः काश्चित्पुरनार्यो भूषणानां ये मणयस्तेषां भूषणभूतानां वा मणीनां रत्नानामोघैः समूहैराचूडं शिखामभिव्याप्य निचुलितमाच्छादितमिव तत्र त्रुडितमिव तं नलं चक्षूरूपाभ्यां प्रसृतिभ्यामर्धसंकुचितकरकुब्जाभ्यां चुलुकितं पीतं निर्माय कृत्वा प्रसृतिप्रमाणाभ्यामतिविशालाभ्यां चक्षुर्भ्यां सादरदृष्टं कृत्वा इति मौग्ध्यादनैपुण्यादशङ्कन्त तर्कयामासुः। इति मौग्ध्यं किम्—निमेषे पक्ष्मसंकोचेऽकृतमतिभिरनिमिषाभिः साहस्रीभिः सहस्रसंख्याभिर्दृग्भिर्दृष्टिभिर्ज्योतिष्टोमराजसूयादियज्ञानां वेदाच्छ्रुतं यत्फलं साध्यं तद्रूपा या जगती भुवनं स्वर्गस्तस्याः सार्वभौमश्चक्रवर्तीन्द्रस्तस्य भ्रमेणायं नल आलिङ्गितः स्पृष्टः किम्। अचेतनैरपि रत्ननेत्रसहस्रैर्वैभववशादिन्द्रोऽयमिति भ्रान्त्येन्द्रस्य सहस्रनेत्रत्वादनेनास्माभिः संबन्धुं युक्तमिति बुद्ध्वा समालिङ्गितः किमित्युत्प्रेक्षा। एतदेव मौग्ध्यम्। सौन्दर्यं रत्नबाहुल्यं चोक्तम्। सहस्रशब्दः पक्षेऽपरिमितसंख्यावाची। सहस्रं परिमाणमासां ताः साहस्र्यः, 'तदस्य परिमाणम्' इत्यर्थे 'शतमानविंशतिकसहस्रवसनादण्' इत्यण्॥

भवन्सुद्युम्नः स्त्री नरपतिरभूद्यस्य जननी
तमुर्वश्याः प्राणानपि विजयमानस्तनुरुचा ।
हरारब्धक्रोधेन्धनमदनसिंहासनमसा-
वलंकर्माणश्रीरुदभवदलंकर्तुमधुना ॥ ८३ ॥

भवन्निति ॥ सूर्यसुता मनोः पुत्रः सुद्युम्नाख्यो नरपती राजा पार्वतीवनप्रवेशनिमित्तेन शिवशापेन हेतुना इलाख्यः स्त्री भवन्स्त्रीत्वं प्राप्तः सन् बुधाद्गर्भधारणेन यस्य जनन्यभूत् । तं पुरूरवसमपि उर्वश्याः प्राणान्रूपातिशयात्त्वुर्वश्याः प्राणभूतं प्राणवत्प्रियमतिसुन्दरं तं पुरूरवसमपि तनुरुचा कायकान्त्या विजयमानः पराभवुकोऽसौ नलोऽधुनेदानीं हरेणारब्धः कृतः क्रोध-स्तस्येन्धनं दाह्यो मदनस्तस्य सिंहासनं दग्धत्वात्कामेन शून्यमलंकर्तुं योग्यतया भूषयितुमलं-कर्माणा कर्मक्षमातिसमर्था स्वाभाविकी भूषणजनिता च श्रीः शोभा यस्यासौ एवंभूत उदभवज्जात इति 'पौरस्त्रिय आहेंदुः' (९२) इत्यन्तिमश्लोकेन संबन्धः । जीर्णः कामो दग्धः । पुरूरवास्तेनैव जितः । तस्माच्छून्यं कामसिंहासनं भूषयितुमयं काम एवोत्पन्नः । अतिसुन्दरोऽयमिति भावः । कृतयुगादौ त्विलो नाम राजा मृगयासक्तो हरनिवारितमुमावनमे-काकी प्रविष्टः स्त्री बभूव । तामेकाकिनीं सुन्दरीं दृष्ट्वा चन्द्रपुत्रो बुधः कामातुरः सन्स्वाश्रमं नीत्वा तस्यां पुरूरवोनामानं पुत्रमजीजनदिति भविष्योत्तरादिपुराणकथा । विजयमानः, 'विपराभ्यां जेः' इत्यात्मनेपदे शानच् । 'कर्मक्षमोऽलंकर्माणः' इत्यमरः ॥

अर्थी सर्वसुपर्वणां पतिरसावेतस्य यूनः कृते
पर्यत्याजि विदर्भराजसुतया युक्तं विशेषज्ञया ।
अस्मिन्नाम तया वृते सुमनसः सन्तोऽपि यन्निर्जरा
जाता दुर्मनसो न सोढुमुचिता तेषां तु साऽनौचिती ॥ ८४ ॥

अर्थीति ॥ विशेषज्ञया गुणानामधिकतरत्वं विदुष्या विदर्भराजसुतया अर्थी मां वृणीष्वे-[illegible] प्रार्थयमानः सानुरागोऽप्यसौ सर्वसुपर्वणां सर्वदेवानां पतिरिन्द्रोऽप्येतस्य प्रत्यक्षदृश्यमानस्यातिसौन्द[illegible] [illegible]स्य यूनः पूर्णतारुण्यस्य नलस्य कृते निमित्तं पर्यत्याजि सानुरागत्वेन प्रभुत्वेऽपि सौन्दर्यादि[illegible] गुणानां न्यूनत्वादत्याजि [illegible] युक्तमुचितमेव कृतमित्यर्थः । नाम प्राकाश्ये । तु पुनः निर्ज[illegible] इन्द्रादयश्चत्वारोऽपि देवाः स्थिरा नाम प्रसिद्धाः सुमनसः शोभनान्तःकरणा अपि । सुमन[illegible] प्रसिद्धाः सन्तोऽपि वा । सुमनस इति संज्ञया ख्याताः सन्तोऽपि । तया भैम्यास्मिन्नले [illegible] सति यद्दुर्मनसः खिन्नमनसो जाताः सा तेषामनौचित्यमनुचितकारिता सोढुं क्षन्तुं नोचि[illegible] न युक्ता । नहि साधुभिः कार्पण्यादपि स्वधर्मः परित्यज्यते, एतैस्तु परित्यक्तः, तद्[illegible] सहामह इत्यर्थः । [illegible] ॥

अस्योत्कण्ठितकण्ठलोठिवरणस्रक्साक्षिनिर्दिग्नितैः
स्वं वक्षः स्वयमस्फुटन्न किमदः शस्त्रादपि स्फोटितम् ।
व्यावृत्योपनतेन हा शतमखेनाद्य प्रसाद्या कथं
भैम्यां व्यर्थमनोरथेन च शची साचीकृतास्याम्बुजा ॥ ८५ ॥

अस्येति ॥ अस्य नलस्य निरन्तं [illegible]
[illegible]

वात्स्वयमस्फुटदविदीर्यमाणमपि स्वं वक्षोऽमुष्य नलस्य शस्त्रादपि हेतोः किमिति न स्फोटितं विदारितम् । नलेन सार्धं भैम्यर्थं युद्धमपि कृत्वा किमिति न मृतम् । शूराणां रणे मरणमपि यशसे भवति न लज्जापरित्याग इति भावः । छुरिकादिप्रक्षेपेण स्वयमेव वा किमिति न स्फोटितमिति वा । अग्न्यादयस्तावत्तिष्ठन्तु । हा सोपहासं कष्टम् । अद्य भैम्यां विषये व्यर्थमनोरथेन सता परावृत्य शतमखेन उपनतेन शचीसमीपे प्रणामनशासनत्रेण व्यावृत्त्य शतयज्ञकरणलब्धस्वर्गाधिपत्वेन देवेन्द्रेणापि शची चेन्द्राण्यपि कथं प्रसाद्याऽनुनेतुं शक्या । यतः—कोपवशादज्ञानवशाद्वा साचीकृतं वक्रीकृतमास्यमेवाम्बुजं यया—संमुखानवलोकनात्प्रसादनार्थमनेन कृतमपि प्रणामाञ्जल्यादिकं न द्रक्ष्यति, ततः कथं प्रसाद्या । भैमी न लब्धा, शची च रुष्टा, अयशोऽपि जातमितीन्द्रस्य महत्कष्टं जातमिति भावः । दिक्षु भटैः शूरैर्नृपैः स्वं वक्षः किमिति न स्फोटितम् । नृपा मनुष्यास्तिष्ठन्तु, देवेन्द्रस्यापीदृशी दशा जातेति वा । 'उपगतेन' इति पाठे शचीसमीपे गतेन ॥

मा जानीत विदर्भजामविदुषीं कीर्तिं मुदः श्रेयसीं
सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीम् ।
कः शच्या रचयांचकार चरिते काव्यं स नः कथ्यता-
मेतस्यास्तु करिष्यते रसधुनीपात्रे चरित्रे न कैः ॥ ८६ ॥

मा जानीतेति ॥ भो सख्यः, यूयं विदर्भजां मुदो हर्षात्सकाशात्कीर्तिं श्रेयसीं श्रेष्ठतरामविदुषीमजानतीं मा जानीत । किंतु हर्षापेक्षया कीर्तिः प्रशस्यतरेति भैमी वेत्त्येवेति जानीत । यद्यस्मात्सेयं भैमी मघवता प्रयोज्येन स्वमात्मानं द्वितीयां शचीं भद्रं साधु नाचीकरत् न कारयामास । इन्द्रे वृते तत्पत्नीत्वाच्छचीशब्दवाच्यत्वं भवेन्न त्वसौ वृतत्वाद्द्वितीया शची नाभवदिति युक्तमेवानया कृतमित्यर्थः । इन्द्रे वृते कीर्तिर्भविष्यतीत्याशङ्क्य नेत्याह—शच्याश्चरिते कः कविः सर्गबन्धादिरूपेण वर्णनात्मकं काव्यं प्रबन्धं रचयांचकार स शचीवर्णनकारी नोऽस्माकमग्रे, अस्मभ्यं वा कथ्यतां यद्यस्ति, अपितु—अनिरूपणान्नास्त्येव । एतस्यास्तु भैम्याः पुना रसानां शृङ्गारादीनामेव रसानां जलानां धुनी नदी तस्याः पात्रे स्थानभूते । अथच—रसनदीप्रवाहरूपे गुणशीलादिचरित्रे विषये कैः पराशरव्यासशुकादिभिः काव्यं न करिष्यते, अपितु तैरपि भारतादौ तद्वर्णनकाव्यं करिष्यते, किं पुनः श्रीहर्षादिकविभिरित्यर्थः । इन्द्रवरणेन यद्यपि स्वर्गसुखप्राप्तिस्तथापि तत्पत्नीत्वाच्छचीत्वेऽपि तस्याः कुत्रचित् केनाप्यवर्णितत्वात्, इन्द्रापेक्षयाधिककीर्तेर्नलस्य वरणे पुण्यश्लोकत्वात्तैर्वर्णि[illegible] वर्णनीयत्वान्महती कीर्तिर्भविष्यति । सा च स्वर्गसुखा-च्छ्रेयसी इति विचार्य इन्द्रपरित्यागद्वारा स्वर्गसुखमपि परित्यज्य भैम्या नलो वृत इति युक्तकारित्वादेतादृशी कापि विदुषी नास्तीति भावः । 'दिवः' इति पाठे स्वर्गसुखादित्यर्थः । करिष्यते, ऋदन्तत्वादिट् ॥

वैदर्भीबहुजन्मनिर्मिततपःशिल्पेन देहश्रिया
नेत्राभ्यां स्वदते युवायमवनीवासः प्रसूनायुधः ।
गीर्वाणालयसार्वभौमसुकृतप्राग्भारदुष्प्रापया
योगं भीमजयानुभूय भजतामद्वैतमद्य त्विषाम् ॥ ८७ ॥

वात्सयमस्फुटदविदीर्यमाणमपि स्वं वक्षोऽमुष्य नलस्य शस्त्रादपि हेतोः किमिति न स्फोटितं विदारितम्। नलेन सार्धं भैम्यर्थं युद्धमपि कृत्वा किमिति न मृतम्। शूराणां रणे मरणमपि यशसे भवति न लज्जापरित्याग इति भावः। छुरिकादिप्रक्षेपेण स्वयमेव वा किमिति न स्फोटितमिति वा। अग्न्यादयस्तावत्तिष्ठन्तु। हा सोपहासं कष्टम्। अद्य भैम्यां विषये व्यर्थमनोरथेन सता परावृत्य शतमखेन उपनतेन शचीसमीपे प्रणामनयनत्रेण व्यावृत्य शतयज्ञकरणलब्धस्वर्गाधिपत्वेन देवेन्द्रेणापि शची चेन्द्राण्यपि कथं प्रसाद्याऽनुनेतुं शक्या। यतः—कोपवशादज्ञानवशाद्वा साचीकृतं वक्रीकृतमास्यमेवाम्बुजं यया—संमुखानवलोकनात्प्रसादनार्थमनेन कृतमपि प्रणामाञ्जल्यादिकं न द्रक्ष्यति, ततः कथं प्रसाद्या। भैमी न लब्धा, शची च रुष्टा, अयशोऽपि जातमितीन्द्रस्य महत्कष्टं जातमिति भावः। दिक्षु भटैः शूरैरपि: स्वं वक्षः किमिति न स्फोटितम्। नृपा मनुष्यास्तिष्ठन्तु, देवेन्द्रस्यापीदृशी दशा जातेति वा। 'उपगतेन' इति पाठे शचीसमीपे गतेन॥

मा जानीत विदर्भजामविदुषीं कीर्तिं मुदः श्रेयसीं
सेयं भद्रमचीकरन्मघवता न स्वं द्वितीयां शचीम्।
कः शच्या रचयांचकार चरिते काव्यं स नः कथ्यता-
मेतस्यास्तु करिष्यते रसधुनीपात्रे चरित्रे न कैः॥ ८६॥

मा जानीतेति॥ भो सख्यः, यूयं विदर्भजां मुदो हर्षात्सकाशात्कीर्तिं श्रेयसीं श्रेष्ठतरामविदुषीमजानतीं मा जानीत। किंतु हर्षापेक्षया कीर्तिः प्रशस्ततरेति भैमी वेत्त्येवेति जानीत। यद्यस्मात्सेयं भैमी मघवता प्रयोज्येन स्वमात्मानं द्वितीयां शचीं भद्रं साधु नाचीकरत् न कारयामास। इन्द्रे वृते तत्पत्नीत्वाच्छचीशब्दवाच्यत्वं भवेन्न त्वसौ वृतत्वाद्द्वितीया शची नाभवदिति युक्तमेवानया कृतमित्यर्थः। इन्द्रे वृते कीर्तिर्भविष्यतीत्याशङ्क्य नेत्याह—शच्याश्चरिते कः कविः सर्गबन्धादिरूपेण वर्णनात्मकं काव्यं प्रबन्धं रचयांचकार स शचीवर्णनकारी नोऽस्माकमग्रे, अस्मभ्यं वा कथ्यतां यद्यस्ति, अपितु—अनिरूपणान्नास्त्येव। एतस्यास्तु भैम्याः पुना रसानां शृङ्गारादीनामेव रसानां जलानां धुनी नदी तस्याः पात्रे स्थानभूते। अथच—रसनदीप्रवाहरूपे गुणशीलादिचरित्रे विषये कैः पराशरव्यासशुकादिभिः काव्यं न करिष्यते, अपितु तैरपि भारतादौ तद्वर्णनकाव्यं करिष्यते, किं पुनः श्रीहर्षादिकविभिरित्यर्थः। इन्द्रवरणेन यद्यपि स्वर्गसुखप्राप्तिस्तथापि तत्पत्नीत्वाच्छचीत्वेऽपि तस्याः कुत्रचित् केनाप्यवर्णितत्वात्, इन्द्रापेक्षयाधिककीर्तेर्नलस्य वरणे पुण्यश्लोकत्वात्तद्वर्णनेऽपि वर्णनीयत्वात्तत्प्रसङ्गात्स्वस्यापि वर्णनीयत्वान्महती कीर्तिर्भविष्यति। सा च स्वर्गमुदः सकाशाच्छ्रेयसी इति विचार्य इन्द्रपरित्यागद्वारा स्वर्गसुखमपि परित्यज्य भैम्या नलो वृत इति युक्तकारित्वादेतादृशी कापि विदुषी नास्तीति भावः। 'दिवः' इति पाठे स्वर्गसुखादित्यर्थः। करिष्यते, ऋदन्तत्वादिट्॥

वैदर्भीबहुजन्मनिर्मिततपःशिल्पेन देहश्रिया
नेत्राभ्यां स्वदते युवायमवनीवासः प्रसूनायुधः।
गीर्वाणालयसार्वभौमसुकृतप्राग्भारदुष्प्रापया
योगं भीमजयानुभूय भजतामद्वैतमद्य त्विषाम्॥ ८७॥

किंचास्माकनरेन्द्रभूसुभगतासंभूतये लग्नकं
देवेन्द्रावरणप्रसादितशचीविश्राणिताशीर्वचः ॥ ९० ॥

वैदर्भीति ॥ हे सख्यः, तत्र नलसंबन्धीनि वृत्तान्यधीतानि यानि वृत्तानि पद्यानि तेषां क्रमैर्नलविषये कविभिः कृतैरस्मदादिभिश्च पठितैः काव्यैः । तस्या भैम्या वृत्तैरतीतैः सकलद्वीपाधिराजेन्द्रदेवेन्द्रादिदिक्पालपरित्यागरूपस्य चरित्रस्य क्रमैः परिपाटीभिर्वा । कृत्वा वैदर्भ्या भैम्या विपुलस्य नलविषयानुरागस्य कलनाज्ज्ञानादखिलक्षोणीचक्रे शतक्रताविन्द्रेऽलिकले तीसंबन्धिसकलवरप्रेमास्पदत्वादिलक्षणं सौभाग्यं निजगदे स्पष्टं कथितम् । निश्चितमस्माभिरिति यावत् । अतिसुन्दरीयमिन्द्रादीन्परित्यज्य यस्मादेनमवृत, तस्मादयमेव सुभगतमो नान्य इति सर्वैर्निश्चितमित्यर्थः । भैमीकृतान्नलविषयविपुलानुरागस्याङ्गीकरणादेतोस्तस्या एव वृत्तस्य भूतस्य चक्षुःप्रीत्यादिकामदशास्फुटविरहव्यथानुरूपस्य वृत्तस्य चरित्रस्य क्रमैः । तेऽतिप्रसिद्धा ये वृत्तक्रमास्तैर्वा निगदितम् । भैम्या अप्येतद्विषयमहानुरागजनितपूर्वोक्तविरहव्यथाभिरेव अयं सकलसौभाग्यनिधानमिति सर्वेषां पुरस्तात्कथितमिति भाव इति सुख्योऽर्थः । वैदर्भ्या विपुलानुरागेण नलस्य वन्य(वर्ण)नादिति वा । किं चान्यत्र—अस्माकमयमास्माकः स चासौ नरेन्द्रश्च भीमस्तस्माद्भवतीति भूः भैमी तस्याः सुभगता सौभाग्यं तस्याः संभूतय उत्पत्तये महासमृद्ध्यर्थं वा । इन्द्रस्यावरणेन त्यागेन सापत्न्याभावेन प्रसादितया संतोषितया शच्या विश्राणितं दत्तं 'सुभगा पुत्रवत्यविधवा भव' इत्यादिकमाशीर्वचो लग्नकं प्रतिभूर्भूत् । शची दत्ताशीःसहस्रवत्सराण्यपि सुभगेति निश्चितमित्यर्थः । 'आशीःश्रुतिः' इति पाठे आशिषां श्रवणम् । अथवा—आशिष एव सत्यत्वाच्छ्रुतिर्वेद इत्यर्थः । अयं तु पाठः साधीयान् । अनयोरन्योन्यमनुरागोचितं सौभाग्यमपि भविष्यतीत्यनुमानम् । वृत्तम्, 'वेरध्ययने वृत्तम्' इति साधुः । 'आस्माक' इति संबन्धेऽणि 'तस्मिन्नणि च—' इत्यास्माकादेशः । लग्नकशब्दो नपुंसकेऽपि । तस्या भैम्या वृत्तानां जातानां वृत्तानां हंसप्रेषणादिचरितानां क्रमाः परिपाट्यस्तैर्निजगद इति वा ॥

आसुत्रामममपास्य नाम्मखभुजां भैम्यैव राजव्रजे
तादर्थ्यागमनानुरोधपरया युक्तार्जि लज्जामृजा ।
आत्मानं त्रिदशप्रसादफलतां पत्ये विधायानया
ह्रीरोपापयशःकथानवसरः सृष्टः सुराणामपि ॥ ९१ ॥

आसुत्राममिति ॥ भैम्या एव आसुत्राममिन्द्रमभिव्याप्य मखभुजां देवानामपास्य नाम्ना त्यागादेतो राजव्रजे विषये लज्जाया मृजा परिमार्जनं युक्ता आर्जि कृता । यत्कृतं तद्युक्तमित्यर्थः । यतः—तस्मै इदं तदर्थं तस्य भावस्तादर्थ्यं तेन भैमीनिमित्तेन राज्ञामागमनं तन्निमित्तोऽनुरोधो दाक्षिण्यं तत्र परया । यो हि यदर्थमागच्छति स तस्य दाक्षिण्यं कुर्वन्नैर्वा नात्युत्सुकितमेवेत्यर्थः । मदर्थमागतानामेषां मत्प्राप्तिर्नाभूत्, लज्जा च जातेत्यनुकम्पनेनैतदिति राजसु सकलत्वेनेन्द्रादीनपि भैमी नाह्वयत् । ततश्च यदेन्द्रादयोऽपि लघ्वा यत्र मानुषाननलाकं वा कर्वेति तेषां लज्जामार्जनं भैम्यैव युक्तं कृतमिति भावः । स नलोऽर्थः प्रयोजनं यस्य तस्य भावस्ता-

१ 'आशीस्ततैः' इति पाठः सुखावबोधायाः ।

अन्यापेक्षया प्रथमं मतं पर्यङ्कमत्ररथातो मञ्चस्थो मार्गे गच्छन् श्रीपुरुषोत्तमः परिचितो बहु-वारं दृष्टः कुतुकाभिरेव स्त्रीभिः पथि वरयात्रायां यानस्थस्य आगच्छन्नेष नलो दृश्यते। एतादृक्पुण्यं याभिरस्मादृशीभिरर्जितं ताभिरेनायं द्रष्टुं शक्यो नलान्याभिरित्यर्थः। अथच—याभिः पुरुषोत्तमो दृष्टस्ताभिरेव तत्तुल्योऽयमपीति ज्ञातुं शक्यते, नलान्याभिरित्यर्थः। ताभिरेव साभिलाषं कटाक्षैर्दृश्यते, याभिरेवं सुकृतं कृतम्। अन्याभिस्तु कौतुकेनापि वीक्षितुं न शक्यः, किं पुनः सानुरागं कटाक्षैरिति। 'ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा। पूर्णिमा ज्येष्ठमासस्य महाज्यैष्ठीति कीर्तिता' इति। पुरुषोत्तमतुल्योऽयमिति मन्महे। जानीमह इति भावः। वाक्यार्थः कर्म। उत्कलदेशे ज्येष्ठपूर्णिमायामिन्द्रनीलगिरिनिवासिनः श्रीपुरुषोत्तमस्य महोत्सवः क्रियते। तत्र श्रीकृष्णबलभद्रप्रमुखप्रतिमाधिष्ठिता विरचितसप्तभूमिका मञ्चाः पृथक् निर्गच्छन्ति। तस्य दर्शनं भूयसे श्रेयसे भवतीति पौराणिकाः। यदाहुः—'दोलारूढं तु गोविन्दं मञ्चस्थं मधुसूदनम्। रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते॥' इति। तथा—यया स्त्रिया अघातिघातिनि पातकविनाशिनि यमुनागङ्गौघयोर्योगे संगमे प्रयागाख्ये माघं सत्रे मकरस्थे रवौ माघे मास्यविच्छेदेन स्नानं कृतं, सास्य नलस्य पतयालुभिरतिचञ्चलैः शितिसितैः कृष्ण-धवलैर्दृक्चामरैर्नेत्रैरेव चामरैर्नेत्रव्यापाररूपैश्चामरैः स्त्रीराट् स्त्रीराजैव स्याद्भवेदिति मन्महे। राजा हि कृष्णधवलैश्चामरैर्वीज्यते। प्रयागे माघस्नानजन्यसुकृतात्स्त्री राजत्वं प्राप्नोति तत्र स्नानेन—'सितासिते तु यैः स्नातं माघमासे युधिष्ठिर। न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि॥' इति वचनात्। स्त्रीषु श्रेष्ठा सैव भवेदित्यर्थः। अयं च कटाक्षैर्यां पश्यति सा तु सर्वाभ्योऽप्य-धिका। सा च भैम्येव नान्या। भैम्या च प्रयागे सकलमाघस्नानफलं लब्धम्। भैमीसदृशी कापि कुत्रापि नास्तीति भावः। ज्यैष्ठीति, ज्येष्ठानक्षत्रयुक्ता पौर्णमासीति 'नक्षत्रेण युक्तः कालः' इत्यणि वृद्धिः। तद्युक्तमासाभिधायित्वेऽपि 'सास्मिन्पौर्णमासी—' इत्यादिना ज्यैष्ठ इत्येव भवति। 'ज्येष्ठी' इति पाठे वृद्ध्यभावश्चिन्त्यः। संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावः कथंचित्समर्थनीयः। 'स्त्रीराट्' इति संबन्धषष्ठ्या निर्धारणसप्तम्या वा समासः। पृथग्वा पदम्—राजैव सा स्त्रीत्यर्थः। 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति 'देशश्चाकर्मकाणां कर्मसंज्ञो भवतीति वक्तव्यम्' इति वचनान्माघस्य कालवाचित्वात्कर्मत्वे धातोः कर्मणि विहितेन तङा तस्याभिहितत्वान्माघः सन्ने इति प्राप्ते माघमिति द्वितीया चिन्त्या। अत्रार्थे हरदत्तमिश्रैः—'गतिबुद्धि—' इत्यादिसूत्रे 'अकर्मकाणामिति कालभावाध्वदेशव्यतिरि-क्तकर्मरहितानाम्' इत्यर्थो ग्राह्यः—इति सिद्धान्तितम्। एवं 'लः कर्मणि च—' इत्यादावपि यत्राकर्मकग्रहणं तत्र सर्वत्र द्रष्टव्यम्। तेनात्र माघस्य कर्मत्वे 'सन्न' इति लिट् सिद्धो भवति। यद्वा—मा अघं यस्यां क्रियायां यथातथा स्नाताया मम सर्वपापक्षयपूर्वकसर्वमनोरथसिद्धि-र्भवत्विति संकल्प्येत्यर्थः। 'कलुषं वृजिनैनोघम्' इत्यमरः। यमुनागङ्गेति पूर्वनिपातानियमः पूर्ववत्परिहरणीयः॥

वैदर्भीविपुलानुरागकलनात्सौभाग्यमत्राखिल-
क्षोणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमैः।

---

१ 'अखिलम्' इति पाठे सौभाग्यविशेषणत्वेन योज्यमिति सुखाववोधा।

अन्यापेक्षया प्रथमं मतं पर्यङ्कमञ्चप्राप्तो मञ्चस्थो मार्गे गच्छन् श्रीपुरुषोत्तमः परिचितो बहुवारं दृष्टः कृतस्ताभिरेव स्त्रीभिः पथि वरयात्रायां यानरथस्थ आगच्छन्नेष नलो दृश्यते। एतादृक्पुण्यं याभिरस्मादृशीभिरर्जितं ताभिरेवायं द्रष्टुं शक्यो नत्वन्याभिरित्यर्थः। अथच—याभिः पुरुषोत्तमो दृष्टस्ताभिरेव तत्तुल्योऽयमपीति ज्ञातुं शक्यते, नत्वन्याभिरित्यर्थः। ताभिरेव साभिलाषं कटाक्षैर्दृश्यते, याभिरेवं सुकृतं कृतम्। अन्याभिस्तु कौतुकेनापि वीक्षितुं न शक्यः, किं पुनः सानुरागं कटाक्षैरिति। 'ऐन्द्रे गुरुः शशी चैव प्राजापत्ये रविस्तथा। पूर्णिमा ज्येष्ठमासस्य महाज्यैष्ठीति कीर्तिता' इति। पुरुषोत्तमतुल्योऽयमिति मन्महे। जानीम इति भावः। वाक्यार्थः कर्म। उत्कलदेशे ज्येष्ठपूर्णिमायामिन्द्रनीलगिरिनिवासिनः श्रीपुरुषोत्तमस्य महोत्सवः क्रियते। तत्र श्रीकृष्णबलभद्रप्रमुखप्रतिमाधिष्ठिता विरचितसप्तभूमिका मञ्चाः पृथक् निर्गच्छन्ति। तस्य दर्शनं भूयसे श्रेयसे भवतीति पौराणिकाः। यदाहुः—'दोलारूढं तु गोविन्दं मञ्चस्थं मधुसूदनम्। रथस्थं वामनं दृष्ट्वा पुनर्जन्म न विद्यते॥' इति। तथा—यया त्रिया अघातिघातिनि पातकविनाशिनि यमुनागङ्गौघयोर्योगे संगमे प्रयागाख्ये माघं सस्ने मकरस्थे रवौ माघे मास्यविच्छेदेन स्नानं कृतं, सास्य नलस्य पतयालुभिरतिचपलैः शितिसितैः कृष्णधवलैर्दृक्चामरैर्नेत्रैरेव चामरैर्नेत्रव्यापाररूपैश्चामरैः स्त्रीराट् स्त्रीराजैव स्याद्भवेदिति मन्महे। राजा हि कृष्णधवलैश्चामरैर्वीज्यते। प्रयागे माघस्नानजन्यसुकृतात्स्त्री राजत्वं प्राप्नोति तत्र स्नानेन–'सितासिते तु यैः स्नातं माघमासे युधिष्ठिर। न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि॥' इति वचनात्। स्त्रीषु श्रेष्ठा सैव भवेदित्यर्थः। अयं च कटाक्षैर्यां पश्यति सा तु सर्वाभ्योऽप्यधिका। साच भैम्येव नान्या। भैम्या च प्रयागे सकलमाघस्नानफलं लब्धम्। 'भैमीसदृशी कापि कुत्रापि नास्तीति भावः। ज्यैष्ठीति, ज्येष्ठानक्षत्रयुक्ता पौर्णमासीति 'नक्षत्रेण युक्तः कालः' इत्यणि वृद्धिः। तद्युक्तमासाभिधायित्वेऽपि 'सास्मिन्पौर्णमासी–' इत्यादिना ज्यैष्ठ इत्येव भवति। 'ज्येष्ठी' इति पाठे वृद्ध्यभावश्चिन्त्यः। संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावः कथंचित्समर्थनीयः। 'स्त्रीराट्' इति संबन्धषष्ठ्या निर्धारणसप्तम्या वा समासः। पृथग्वा पदम्—राजैव सा स्त्रीत्यर्थः। 'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इति 'देशश्चाकर्मकाणां कर्मसंज्ञो भवतीति वक्तव्यम्' इति वचनान्माघस्य कालवाचित्वात्कर्मत्वे धातोः कर्मणि विहितेन तङा तस्याभिहितत्वान्माघः सस्ने इति प्राप्ते माघमिति द्वितीया चिन्त्या। अत्रार्थे हरदत्तमिश्रैः—'गतिबुद्धि–' इत्यादिसूत्रे 'अकर्मकाणामिति कालभावाध्वदेशव्यतिरिक्तकर्मरहितानाम्' इत्यर्थो ग्राह्यः–इति सिद्धान्तितम्। एवं 'लः कर्मणि च–' इत्यादावपि यत्राकर्मकग्रहणं तत्र सर्वत्र द्रष्टव्यम्। तेनात्र माघस्य कर्मत्वे 'सस्ने' इति लिट् सिद्धो भवति। यद्वा—मा अघं यस्यां क्रियायां यथातथा स्नाताया मम सर्वपापक्षयपूर्वकसर्वमनोरथसिद्धिर्भवत्विति संकल्प्येत्यर्थः। 'कलुषं वृजिनैनोघम्' इत्यमरः। यमुनागङ्गेति पूर्वनिपातानियमः पूर्ववत्परिहरणीयः॥

वैदर्भीविपुलानुरागकलनात्सौभाग्यमत्राखिल-
क्षोणीचक्रशतक्रतौ निजगदे तद्वृत्तवृत्तक्रमैः।

---

१ 'अखिलम्' इति पाठे सौभाग्यविशेषणत्वेन योज्यमिति सुखावबोधा।

किंचास्माकनरेन्द्रभूसुभगतासंभूतये लग्नकं
देवेन्द्रावरणप्रसादितशचीविश्राणिताशीर्वचः ॥ ९० ॥

वैदर्भीति ॥ हे सख्यः, तस्य नलसंबन्धीनि वृत्तान्यधीतानि यानि वृत्तानि पद्यानि तेषां क्रमैर्नलविषये कविभिः कृतैरस्मदादिभिश्च पठितैः काव्यैः। तस्या भैम्या वृत्तैरतीतैः सकलद्वीपाधिराजेन्द्रदेवेन्द्रादिदिक्पालपरित्यागरूपस्य चरित्रस्य क्रमैः परिपाटीभिर्वा। कृत्वा वैदर्भ्या भैम्या विपुलस्य नलविषयानुरागस्य कलनाज्ज्ञानादखिलक्षोणीचक्रे शतक्रताविन्द्रेऽस्मिन्नले त्रीसंबन्धिसकलवरप्रेमास्पदत्वादिलक्षणं सौभाग्यं निजगदे स्पष्टं कथितम्। निश्चितमस्माभिरिति यावत्। अतिसुन्दरीयमिन्द्रादीन्परित्यज्य यस्मादेनमवृत, तस्मादयमेव सुभगतमो नान्य इति सर्वैर्निश्चितमित्यर्थः। भैमीकृतान्नलविषयविपुलानुरागस्याङ्गीकरणाद्धेतोस्तस्या एव वृत्तस्य भूतस्य चक्षुःप्रीत्यादिकानदशास्फुटविरहव्यथानुरूपस्य वृत्तस्य चरित्रस्य क्रमैः। तेऽतिप्रसिद्धा ये वृत्तक्रमास्तैर्वा निगदितम्। भैम्या अप्येतद्विषयमहानुरागजनितपूर्वोक्तविरहव्यथाभिरेव अयं सकलसौभाग्यनिधानमिति सर्वेषां पुरस्तात्कथितमिति भाव इति मुख्योऽर्थः। वैदर्भ्या विपुलानुरागेण नलस्य बन्ध(वर्ण)नादिति वा। किं चान्यत्र—अस्माकमयमास्माकः स चासौ नरेन्द्रश्च भीमस्तस्माद्भवतीति भूः भैमी तस्याः सुभगता सौभाग्यं तस्याः संभूतय उत्पत्तये महासमृद्ध्यर्थं वा। इन्द्रस्यावरणेन त्यागेन सापत्न्याभावेन प्रसादितया संतोषितया शच्या विश्राणितं दत्तं 'सुभगा पुत्रवत्यविधवा भव' इत्यादिकमाशीर्वचो लग्नकं प्रतिभूरभूत्। शची दत्ताशीःसहस्रबलाद्भैम्यपि सुभगेति निश्चितमित्यर्थः। 'आशीःश्रुतिः' इति पाठे आशिषां श्रवणम्। अथवा—आशिष एव सत्यत्वाच्छ्रुतिर्वेद इत्यर्थः। अयं तु पाठः साधीयान्। अनयोरन्योन्यमनुरागोचितं सौभाग्यमपि भविष्यतीत्यनुमानम्। वृत्तम्, 'णेरध्ययने वृत्तम्' इति साधुः। 'आस्माक' इति संबन्धेऽणि 'तस्मिन्नणि च—' इत्यस्माकादेशः। लग्नकशब्दो नपुंसकेऽपि। तस्या भैम्या वृत्तानां जातानां वृत्तानां हंसप्रेषणादिचरितानां क्रमाः परिपाट्यस्तैर्निजगद इति वा ॥

आसुत्राममपास्तनान्मखभुजां भैम्यैव राजव्रजे
तादर्थ्यागमनानुरोधपरया युक्तार्जि लज्जामृजा।
आत्मानं त्रिदशप्रसादफलतां पत्ये विधायानया
हीरोपापयशःकथानवसरः सृष्टः सुराणामपि ॥ ९१ ॥

आसुत्राममिति ॥ भैम्या एव आसुत्रामामिन्द्रमभिव्याप्य मखभुजां देवानामपास्तनात्त्यागाद्धेतो राजव्रजे विषये लज्जाया मृजा परिमार्जनं युक्ता आर्जि कृता। यत्कृतं तद्युक्तमित्यर्थः। यतः—तस्मै इदं तदर्थं तस्य भावस्तादर्थ्यं तेन भैमीनिमित्तेन राज्ञामागमनं तन्निमित्तोऽनुरोधो दाक्षिण्यं तत्र परया। यो हि यदर्थेनागच्छति स तस्य दाक्षिण्यं कुर्वंश्चर्चां नार्हतीत्युचितमेवेत्यर्थः। मदर्थमागतानामेषां [illegible]त्, लज्जा च जातेत्ययुक्तमेतदिति राजसु सकलदेवेन्द्रादीनपि भैमी नावृणोत्, [illegible]दयोऽपि लक्षांतत्र मानुषाणामलाके का कथेति तेषां लज्जामार्जनं भैम्यैव [illegible]वः। स नलोऽर्थः प्रयोजनं यस्य तस्य भावस्तः

१ 'आशीस्ततिः' इति

किरीटरत्नैः स्वैरेवान्धकारनिराकरणात्पुनरुक्ता व्यर्था कृता दीपा यस्यां तया। तथा—चमूरजोभिर्निशा बहुकृता तमिस्रसंपादिकाभिरन्धो यया। महान्धकारेऽपि रत्नदीपप्रकाशैर्भूषितप्रकाशात्तद्दीपोऽर्थः। महान्धकार एव हि दीपाः शोभन्त इत्यर्थः। राज्ञां तेनानुसारातिशयेन नलस्य चक्रवर्तित्वं सूचितम्। अर्थीति, भावे क्तः ॥

विदर्भराजः क्षितिपाननुक्षणं शुभक्षणासन्नतरत्वसत्वरः।
दिदेश दूतान्पथि यान्यथोत्तरं चमूममुष्योपचिकाय तच्चयः ॥ ५ ॥

विदर्भेति ॥ विदर्भराजो यान्क्षितिपानेव दूताननुक्षणं वारंवारं नलाकारणार्थं दिदेश प्राहिणोत्, तेषां च यः पूर्वमेकः प्रेषितः तदनन्तरमन्यः तदनन्तरं चान्यः, एवमुत्तरोत्तरमनतिक्रम्य पथ्यमुष्य नलस्य चमूमुपचिकाय भूयसीमकृत। किंभूतः—शुभस्य क्षणस्य लग्नसमयस्यासन्नतरत्वेन नैकट्येन सत्वरो वेगवान्। भूयांसो नृपा दूताः प्रेषिता इत्यनेनादरातिशयः सूचितः ॥

हरिद्विपद्वीपिभिरांशुकैर्नभोनभस्वदाध्मापनपीनितैरभूत्।
तरस्वदश्वध्वजिनीध्वजैर्वनं विचित्रचीनाम्बरवल्लिवेल्लितम् ॥ ६ ॥

हरीति ॥ तरस्वतां वेगवतामश्वानां ध्वजिनी सेना। तरस्वन्तोऽश्वा यस्यां सा वा। तस्या ध्वजभूतैरांशुकैर्वस्त्रनिर्मितैः। तथा—नभस्वता वायुना कृतं यदाध्मापनं परिपूरणं तेन पीनितैः पुष्टीकृतैः सजीवसिंहादितुल्यैर्हरिभिः सिंहैः, द्विपैर्हस्तिभिः, द्वीपिभिर्व्याघ्रैः कृत्वा तत्सेनायामुपरितनं नभ आकाशं वनं विपिनतुल्यमभूदजनि। किंभूतं वनम्—विचित्राणि नानावर्णानि चीनदेशोत्पन्नानि सूक्ष्माणि ध्वजसंबन्धीनि चाम्बराणि वस्त्राणि तान्येव वल्ल्यो लतास्ताभिर्वेल्लितं वेष्टितम्। वनेऽपि सिंहादयो वृक्षा लताश्च सन्ति। ध्वजपदेन वृक्षा अपि लक्ष्यन्ते। तरस्वन्तोऽश्वा यस्य नलस्य। तरस्वदश्वा वा या ध्वजिनी। प्रकृतत्वात्तस्यैव सा ध्वजिनी नभसि नभस्वदाध्मापनपीनितैरांशुकैर्ध्वजैः पताकाभिः कृत्वा वनमभूत्। किंभूता ध्वजिनी—हरिभिरश्वैः, द्विपैर्हस्तिभिः, द्वीपिभिर्द्वीपान्तरवासिभिः सेनाचरीभूतै राजभिरुपलक्षिता। वनमपि सिंहादिभिरुपलक्षितम्। विचित्रेति पूर्ववदिति वा। वनपक्षे—चीनो मृगविशेषः। ऊर्ध्वविस्तृतत्वादम्बरगामिन्यो वल्ल्यः ॥

भ्रुवाह्वयन्तीं निजतोरणस्रजा गजालिकर्णानिलखेलया ततः।
ददर्श दूतीमिव भीमजन्मनः स तत्प्रतीहारमहीं महीपतिः ॥ ७ ॥

भ्रुवेति ॥ ततः प्रस्थानानन्तरं स महीपतिर्नलस्तस्य भीमस्य प्रतीहारमयीं द्वारभूमिं भीमजन्मनो भैम्या दूतीमिव ददर्श। किंभूताम्—द्वारे निबद्धा गजास्तेषामालिः पङ्क्तिस्तस्याः कर्णानिलेन कृत्वा खेलति चलतीति खेला तया निजया स्वीयया पुष्पाम्रदलरचितया तोरणस्रजा तल्लक्षणया भ्रुवानुरागातिशयोत्सुकतया आह्वयन्तीं शीघ्रमागच्छेति भ्रूसंज्ञयाकारयन्तीम्। दूत्यपि वलन्त्या भ्रुवाह्वयति। राजगृहद्वारदर्शनेनातिसत्वरोऽभूदिति भावः। 'स्त्री द्वार्द्वारं प्रतीहारः'। (खेलया—) पचाद्यच्। प्रतीहारः, 'उपसर्गस्य घञि—' इति दीर्घः ॥

---

१ 'लग्नातिक्रमभीरो राज्ञस्त्वरातिशयोक्तिः'—इति जीवातुः। २ 'वल्लिवेष्टितम्' इति क्वाचित्कः पाठः इति सुखाववोधा।

यमेनेति ॥ स भीतस्तामसिपुत्रिकां छुरिकामप्यस्यै ददे । न केवलं स्वज्ञातिस्पेरर्थः । न केवलं पुत्रीमपि तु छुरिकामपि । तां कामू—इत्यर्थिना भैम्यामनुरागिणा यमेन तं भीनं भैमीं नयं देहीत्यात्मजां याचितुं दूतप्रेषणावसरे निजा स्वीया प्रहिता प्रेषिता जिह्वेव । नियतं प्राणहारित्वाद्यमजिह्वातुल्यातितीक्ष्णा । शौर्येण तुष्टो यमो यां भीमाय दत्तवान् । किंभूताम्—परिवारशालिनीं चर्मकोशेन शोभमानाम् । अथच—सखीलक्षणपरिजनशोभिनीम् । करग्रहार्हां हस्तग्रहणयोग्यां साधुमुष्टिदेशाम् । पूर्वं यद्यपि भैमी दत्ता, तथापि परिवारसाहित्येनेदानीं दत्तेत्यर्थः । छुरिकां सखीश्च यौतकत्वेन ददाविति भावः । 'छुरिका चासिपुत्रिका' इत्यमरः । याचितुर्दिकर्मा ॥

यदङ्गभूमी बभतुः स्वयोपितामुरोजपत्त्रावलिनेत्रकज्जले ।
रणस्थलस्थण्डिलशायितात्रतैर्गृहीतदीक्षैरिव दक्षिणीकृते ॥ २२ ॥

यदिति ॥ यस्याः शल्या अङ्गभूमी पट्टिकाया ऊर्ध्वाधोदेशौ स्वयोपितां स्वस्त्रीणामनुरोजपत्त्रावलिः कस्तूरिकालिखितस्तनपत्त्रवल्ली नेत्रकज्जलं च एते इव बभतुः शुशुभाते । किंभूते—रणस्थले या स्थण्डिलशायिता । व्रतवशाद्यो वेदिकायां शेते स स्थण्डिलशायी तद्भाव एव व्रतं तत्र विषये गृहीता दीक्षा यैः स्वीकृतानियमविशेषेण भूपतिभिः शत्रुभिर्दक्षिणीकृते व्रताङ्गदक्षिणात्वेन शल्यै दत्ते । दीक्षोपदेशिने हि स्त्रीणामलंकारादि दक्षिणात्वेन दीयते । छुरिकयैव स्वकृतमारणद्वारा शत्रूणां रणस्थलस्थण्डिलशायितादिव्रतमनुष्ठितम्, तस्मात्तस्यै वै दक्षिणात्वेन दत्ते पत्त्रवल्लीकज्जले इव । लोहमुद्गरदण्डावयवौ स्तनपत्त्रवल्लीनेत्रकज्जलत्वेनोत्प्रेक्षितौ । इयं छुरिका निश्चितपरविदारणा । वैरिनार्यश्च वैधव्यात्पत्त्रकज्जलत्यागवत्य इत्यर्थः । स्थण्डिल एव व्रतवशाच्छेत इति । 'सुप्यजातौ णिनिस्ताच्छील्ये' इत्यनुवृत्तौ 'व्रते' इति णिनिः ॥

पुरैव तस्मिन्समदेशि तत्सुताभिकेन यः सौहृदनामिनाम्निना ।
नलाय विश्राणयति स्म तं रथं नृपः सुलङ्घ्याद्रिसमुद्रकापथम् ॥ २३ ॥

पुरेति ॥ तस्य भीमस्य सुताप्रदानविकेनानुरागिणा । तथा—'भैमीं दास्यामीति सुरक्षार्थं न प्रेषितः किंतु शत्रुपराक्रान्तभूमिपरिहारकरणद्वारा त्वमस्माकं सुहृदिति प्रेषितः' इति सौहार्दं स्नेहं नामयति एवंशीलेनाम्निना पुरैव दूतप्रेरणावसर एव यो रथस्तस्मिन्भीमे समदेशि प्रेषितो दत्तः । नृपो नलाय तं रथं विश्राणयति स्म । किंभूतम्—सुलङ्घ्या अनायासेनातिक्रमणीया अद्रयोऽत्युच्चपर्वताः, समुद्राः, कापथा विषमा निम्नगर्ताद्या मार्गाश्च यस्य । सर्वत्र संचरणसमर्थम् । 'व्यध्वा कापथः समौ' इत्यमरः । कापथ इति, 'का पथ्यक्षयोः' इति कादेशः । 'ऋक्—' आदिना समासान्तः ॥

तमेव वर्णयति—

प्रसूतवत्त्या नलकूबरान्वयप्रकाशितास्यापि महारथस्य यत् ।
कुबेरदृष्टान्तबलेन पुष्पकप्रकृष्टतैतस्य ततोऽनुमीयते ॥ २४ ॥

---

१ 'सौहृदनामिनाम्निना' इति पाठे सौहृदनामकेन—सुहृदयस्य भावः । सुहृदादित्वादण्, ततो 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः । अथवा हृदुभयपदवृद्धिप्रयोजनाभावेन 'हृद्भगसिन्ध्वन्ते' इत्युभयपदवृद्धिर्न । अत्र च 'सौहृदमैत्र्यं सौहृदमिति प्रकृतार्थ' इति पाठान्तरः । २ 'सुलङ्घ्य—' इति पाठोऽपि सुखावबोधार्थम् ।

असिमिति ॥ भीमः क्षतो हतः कासराख्यो महिषाख्योऽसुरो येन तं भासुरं देदीप्यमा[illegible] भवान्या दुर्गाया असिं खड्गं वराय ददाति स्म । तस्याः खड्गस्तेन कथं प्राप्त इत्यत आह— हि यस्मात्स्फुटं वा शंभुना सह संभोगस्तत्र निमग्नया सुरतरसासक्तयानया दुर्गया आत्मवै[illegible] रिदलनानन्तरं स्वस्य प्रयोजनाभावात्सुरतासक्तत्वे खड्गधारणस्य रसभङ्गजनकत्वाच्च धवनाम धारिणे 'भीम' इति शिवनामधारकाय शंभुसेवकाय तस्मै भीमाय ददे। शंभौ सन्यग[illegible] च्छेदेन निरन्तरं भोगाय निमग्नया दक्षिणार्धेन प्रविष्टया वा । तत्त्वतस्तु तया प्रसाद दत्तः 'लुलायो महिषो वाहद्विपत्कासरसैरिभाः' इत्यमरः । भासुर, 'भञ्जभास–' इति घुरच् ॥

अधारि यः प्राङ्महिपासुरद्विपा कृपाणमस्मै तमदत्त कूकुदः ।
अहायि तस्या हि धवार्धमज्जिना स दक्षिणार्धेन पराङ्गदारणः ॥१९॥

अधारीति ॥ महिपासुरद्विषा दुर्गया प्राग्यः खड्गोऽधारि । कूकुदः कन्यादाता भीमस्तं कृपाणं खड्गं सत्कारपूर्वं सालंकारमस्मा अदत्त । कथं तेन लब्ध इत्याशङ्क्याह—हि यस्माद[illegible] र्धनारीश्वरत्वाद्धवस्य भर्तुः शिवस्यार्धमज्जिनार्धप्रविष्टेन तस्याः पार्वत्या दक्षिणार्धेन शरीरद[illegible] क्षिणभागेन पराङ्गदारणो वैर्यङ्गदारणः स खड्गोऽहायि त्यक्तः । सखड्गेन धववामार्धं विदात[illegible] मदीयदक्षिणार्धेन तद्विदारिष्यत इति भिया त्यक्तः । 'अदायि' इति पाठेऽनर्थो न । तस्या दक्षिणार्धेन तस्मै यस्माददायीत्यर्थः । अयं पाठः साधीयान् । 'सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः' इत्यमरः ॥

उवाह यः सान्द्रतराङ्ककाननः स्वशौर्यसूर्योदयपर्वतव्रतम् ।
सनिर्झरः शाणनधौतधारया समूढसंध्यः क्षतशत्रुजासृजा ॥ २० ॥

उवाहेति ॥ यः खड्गः स्वस्य भीमस्य खड्गस्यैव वा शौर्यं प्रतापरूपो यः सूर्यस्तस्योदय[illegible] स्तत्संबन्धी पर्वत उदयाचलस्तस्य व्रतं नियमं सदा सूर्योदयकारित्वलक्षणमुवाहाधृत । किंभूतः—सान्द्रतराण्यल्पानि सूक्ष्माण्यङ्गान्यङ्गकानि मुद्गपत्रीवल्लीरूपाणि तेषामननं जीवनं यत्र । तदाधार इति यावत् । सान्द्रतराणां पूर्वोक्तानामेवाङ्गानां काननं समूहो यत्र । उदया[illegible] चलपक्षे—सान्द्रतराण्यङ्गेपूर्ध्वाधोभागेषु काननानि वनानि यस्य तथा—शाणनेन लोहकार[illegible] चक्रघर्षणेन धौतयोज्ज्वलीकरणेन दत्तपाणिकया धारया कृत्वा सनिर्झरः सप्रवाहः । धार[illegible] निर्झरीभूतेत्यर्थः । उदयाचलोऽपि सनिर्झरो भवति । तथा—क्षतेभ्यः खण्डितेभ्यः शत्रुभ्यो जातेनासृजा रक्तेन कृत्वा सम्यक् ऊढा प्राप्ता संध्या येन । प्रातःसंध्यास्थाने रक्त[illegible] मेव येन धृतमित्यर्थः । सम्यग्धृता संध्या त्सरुफलकसंधिर्येन । अतिदृढसंधिरित्यर्थं इति वा । यद्वा—क्षतशत्रुजासृजा समूढः प्राप्तः संधिर्यस्य । त्सरुफलकसंधिपर्यन्तं शत्रुशरीरे निमग्न इत्यर्थः । उदयाचलोऽप्यूढप्रातःसंध्यः । उदयाचलतुल्योऽभूदित्यर्थः । तमदत्त इति पूर्वेण संबन्धः । 'अङ्गक–' इति पक्षे 'अल्पे' इति कन् ॥

यमेन जिह्वा प्रहितेव या निजा तमात्मजां याचितुमर्थिना भृशम् ।
स तां ददेऽस्मै परिवारशोभिनीं करग्रहार्हामसिपुत्रिकामपि ॥ २१ ॥

१ 'परार्ध' इति क्वाचित्के पाठे 'परार्धसंख्यानाम्' इति, 'परस्य धवस्य यदर्धं शरीरस्यानङ्गम्' इति वा—इति सुखावबोधा । २ 'शाणनिधौतधारया' इति पाठः । 'शाणन इति पाठश्चिन्त्यः' इति सुखावबोधा । ३ 'रूपकालंकारः' इति जीवातुः ।

यमेनेति ॥ स नीतस्तामसिपुत्रिकां छुरिकामप्यलं ददे । न केवलं सन्नलिस्यपेरर्थः । न केवलं पुत्रीमपि तु छुरिकामपि । तां काम्—सुशमर्थिना भैम्यामनुरागिणा यमेन तं नीनं भैमीं मत्यं देहीत्यात्मजां याचितुं दूतीप्रेषणावसरे निजा सीया प्रहिता प्रेषिता जिह्वेव । नियतं प्राणहारित्वाद्यमजिह्वातुल्यातितीक्ष्णा । शरीरेण तुष्टो यमो तां नीनाय दत्तवान् । किंभूताम्—परिवारशालिनीं चर्मकोशेन शोभमानाम् । अथच—सखीलक्षणपरिजनशोभिनीम् । करग्रहार्हां हस्तग्रहणयोग्यां साधुमुष्टिदेशाम् । पूर्वं यद्यपि भैमी दत्ता, तथापि परिवारसाहित्येनेदानीं दत्तेत्यर्थः । छुरिकां सखीश्च यौतकत्वेन ददाविति भावः । 'छुरिका चासिपुत्रिका' इत्यमरः । याचिर्द्विकर्मा ॥

यदङ्गभूमी बभतुः स्वयोपितामुरोजपत्त्रावलिनेत्रकज्जले ।
रणस्थलस्थण्डिलशायितात्रतैर्गृहीतदीक्षैरिव दक्षिणीकृते ॥ २२ ॥

यदिति ॥ यस्याः शल्या अङ्गभूमी पट्टिकाया ऊर्ध्वाधोदेशौ स्वयोषितां स्वस्त्रीणामनुरोजपत्त्रावलिः कस्तूरिकालिखितस्तनपत्त्रवल्ली नेत्रकज्जलं च एते इव बभतुः शुशुभाते । किंभूते—रणस्थले या स्थण्डिलशायिता । व्रतवशाद्यो वेदिकायां शेते स स्थण्डिलशायी तद्भाव एव व्रतं तत्र विषये गृहीता दीक्षा यैः स्वीकृतनियमविशेषेण भूपतिभिः शत्रुभिर्दक्षिणीकृते व्रताङ्गदक्षिणात्वेन शल्यै दत्ते । दीक्षोपदेशिने हि स्त्रीणामलंकारादि दक्षिणात्वेन दीयते । छुरिकयैव स्वकृतमारणद्वारा शत्रूणां रणस्थलस्थण्डिलशायितादिव्रतमुपदिष्टम्, तस्मात्तस्यै ते दक्षिणात्वेन दत्ते पत्त्रवल्लीकज्जले इव । लोहमुद्गरस्थानवर्णौ स्तनपत्त्रवल्लीनेत्रकज्जलत्वेनोत्प्रेक्षितौ । इयं छुरिका निश्चितपरविदारणा । वैरिनार्यश्च वैधव्यात्त्यक्तकज्जलपत्त्रावल्य इत्यर्थः । स्थण्डिल एव व्रतवशाच्छेत इति । 'सुप्यजातौ णिनिस्ताच्छील्ये' इत्यनुवृत्तौ 'व्रते' इति णिनिः ॥

पुरैव तस्मिन्समदेशि तत्सुताभिकेन यः सौहृदनाटिनाग्निना ।
नलाय विश्राणयति स्म तं रथं नृपः सुलङ्घ्याद्रिसमुद्रकापथम् ॥ २३ ॥

पुरेति ॥ तस्य नीनस्य सुतायामभिकेनानुरागिणा । तथा—'भैमी दातव्येति बुद्ध्यायं न प्रेषितः किंतु शत्रुभराक्रान्तभूभारनिराकरणद्वारा त्वमस्माकं सुहृदिति प्रेषितः' इति सौहार्दं स्नेहं नाटयति एवंशीलेनाग्निना पुरैव दूतीप्ररणावसर एव यो रथस्तस्मिन्नीने समदेशि प्रेषितो दत्तः । नृपो नलाय तं रथं विश्राणयति स्म । किंभूतम्—सुलङ्घ्या अनायासेनातिक्रमणीया अद्रयोऽत्युच्चपर्वताः, समुद्राः, कापथा विषमा निम्नगर्तरूपा मार्गाश्च यस्य । सर्वत्र संचरणसमर्थम् । 'कदध्वा कापथः समौ' इत्यमरः । कापथ इति, 'का पथ्यक्षयोः' इति कादेशः । 'ऋक्-' आदिना समासान्तः ॥

तमेव वर्णयति—

प्रसूतवत्सा नलकूबरान्वयप्रकाशितास्यापि महारथस्य यत् ।
कुबेरदृष्टान्तबलेन पुष्पकप्रकृष्टतैतस्य ततोऽनुमीयते ॥ २४ ॥

---

१ 'शस्त्रीपुत्रिकयोः प्रकृतत्वात्केवलप्रकृतश्लेषः—' इति जीवातुः । २ 'अस्त्येवं साधनप्रक्रिया—सुहृदयस्य भावः । युवादित्वादण्, ततो 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः । तथाच हृदुत्तरपदात्मलयाविधानेन 'हृद्भगसिन्ध्वन्ते' इत्युभयपदवृद्धिः । अत एव 'सौहृददौर्हृदशब्दावपि हृद्भावात्' इति वामनः । ३ 'सुलंघ्या—' इति पाठोऽपि सुखावबोधाय ॥

यमेनेति ॥ स भीमस्तामसिपुत्रिकां छुरिकामप्यस्मै ददे । न केवलं खड्गमित्यपेरर्थः । न केवलं पुत्रीमपि तु छुरिकामपि । तां काम्—नृशंसनार्थिना भैम्यामनुरागिणा यमेन तं भीमं भैमीं नव्यां देहोत्पन्नजां याचितुं दूतीप्रेषणावसरे निजा स्वीया प्रहिता प्रेषिता जिह्वेव । नियतं प्राणहारित्वाद्यमजिह्वातुल्यातितीक्ष्णा । शौर्येण तुष्टो यमो यां भीमाय दत्तवान् । किंभूताम्—परिवारशालिनीं चर्मकोशेन शोभमानाम् । अथच—सखीलक्षणपरिजनशोभिनीम् । करग्रहार्हां हस्तग्रहणयोग्यां साधुमुष्टिदेशाम् । पूर्वं यद्यपि भैमी दत्ता, तथापि परिवारसाहित्येनेदानीं दत्तेत्यर्थः । छुरिकां सखीश्च यौतकत्वेन ददाविति भावः । 'छुरिका चासिपुत्रिका' इत्यमरः । याचिर्द्विकर्मा ॥

यदङ्गभूमी बभतुः स्वयोषितामुरोजपत्रावलिनेत्रकज्जले ।
रणस्थलस्थण्डिलशायिताव्रतैर्गृहीतदीक्षैरिव दक्षिणीकृते ॥ २२ ॥

यदिति ॥ यस्याः शस्त्र्या अङ्गभूमी पट्टिकाया ऊर्ध्वाधोदेशौ स्वयोषितां स्वस्त्रीणामनुरोजपत्रावलिः कस्तूरिकालिखितस्तनपत्रवल्ली नेत्रकज्जलं च एते इव बभतुः शुशुभाते । किंभूते—रणस्थले या स्थण्डिलशायिता । व्रतवशाद्यो वेदिकायां शेते स स्थण्डिलशायी तद्भाव एव व्रतं तत्र विषये गृहीता दीक्षा यैः स्वीकृतनियमविशेषेण भूपतितैः शत्रुभिर्दक्षिणीकृते व्रताङ्गदक्षिणात्वेन शस्त्र्यै दत्ते । दीक्षोपदेशदिने हि स्त्रीणामलंकारादि दक्षिणात्वेन दीयते । छुरिकयैव स्वकृतमारणद्वारा शत्रूणां रणस्थलस्थण्डिलशायितादिव्रतमुपदिष्टम्, तस्मात्तस्यै तैर्दक्षिणात्वेन दत्ते पत्रवल्लीकज्जले इव । लोहमुद्गरश्यामवर्णौ स्तनपत्रवल्लीनेत्रकज्जलत्वेनोत्प्रेक्षितौ । इयं छुरिका निश्चितपरविदारणा । वैरिनार्यश्च वैधव्यात्त्यक्तकज्जलपत्रावल्य इत्यर्थः । स्थण्डिल एव व्रतवशाच्छेत इति । 'सुप्यजातौ णिनिस्ताच्छील्ये' इत्यनुवृत्तौ 'व्रते' इति णिनिः ॥

पुरैव तस्मिन्समदेशि तत्सुताभिकेन यः सौहृदनाटिनाश्मिना ।
नलाय विश्राणयति स्म तं रथं नृपः सुलङ्घ्याद्रिसमुद्रकापथम् ॥ २३ ॥

पुरेति ॥ तस्य भीमस्य सुताकामाभिकेनानुरागिणा । तथा—'भैमी दत्तवेति दुःखार्थं न प्रेषितः किंतु शत्रुभिराक्रान्तभूभारनिराकरणद्वारा त्वमस्माकं सुहृदसीति प्रेषितः' इति सौहार्दं स्नेहं नाटयति एवंशीलेनाश्मिना पुरैव दूतीप्रेषणावसर एव यो रथस्तस्मिन्दिने समदेशि प्रेषितो दत्तः । नृपो नलाय तं रथं विश्राणयति स्म । किंभूतम्—सुलङ्घ्या अनायासेनातिक्रमणीया अद्रयोऽत्युच्चपर्वताः, समुद्राः, कापथा विषमा निम्नगर्तरूपा मार्गाश्च यस्य । तेनैव संचरणसमर्थम् । 'व्यध्वा कापथः समौ' इत्यमरः । कापथ इति, 'का पथ्यक्षयोः' इति कादेशः । 'ऋक्—' आदिना समासान्तः ॥

तमेव वर्णयति—

प्रसूतवत्ता नलकूबरान्वयप्रकाशितास्यापि नदारथस्य यत् ।
कुबेरदृष्टान्तबलेन पुष्पकप्रकृष्टतैतस्य ततोऽनुमीयते ॥ २४ ॥

---

१ 'दर्शितुमिच्छोः [illegible]' इति जीवातुः । २ 'कलोर्म [illegible]— [illegible] । [illegible], [illegible] '[illegible]' इति [illegible] । [illegible] '[illegible]' [illegible] '[illegible]' इति पाठः । ३ '[illegible]—' इति पाठेऽपि सुखावबोधात् ।

प्रसूतेति ॥ अस्यापि भीमेन नलाय दत्तस्यापि महतो जवादिगुणयुक्तस्य रथस्य प्रकृष्टा सूतवत्ता सूतो विद्यते यस्य स सूतवान् तद्भावः सूतवत्ता सारथिमत्ता प्रकृष्टश्चासौ सूतश्च तद्वत्ता वा। यदस्मान्नलस्य कूबरेण युगंधरेण सह योऽन्वयः संबन्धः। नलेन सह वा यः कूबरस्यान्वयः। तेन प्रकाशिता प्रकटीकृता शोभिता च। ततस्तस्माद्धेतोरेतस्य महारथस्य पुष्पकवत्कामगामिधनदविमानवत्प्रकृष्टतोत्कृष्टगुणयुक्तता। पुष्पकात्सकाशाद्वा जवादिगुणैरधिकता। कुबेरस्य दृष्टान्त उदाहरणं तस्य बलेन सामर्थ्येनानुनीयतेऽनुमानजन्यज्ञानस्य विषयीक्रियते। न केवलं कुबेरस्य महारथस्य, किंत्वस्यापीति समुच्चयेन व्याप्तिदर्शनपुरःसरमुपनयनिगमने सूचयत्यपिशब्दः। कुबेरस्यापि महारथस्यायुतसंख्ययोधस(ह)युध्वनः (त्वं) पुष्पकविमानेन कृत्वा प्रकृष्टता प्रकृष्टवस्तुमत्ता प्रकृष्टेन कृष्टता, तेनोह्यमानता वा भवति एवं कुबेरदृष्टान्तबलेनाग्र एतस्य पुष्पकप्रकृष्टता भविष्यतीत्यनुनीयते। यतोऽस्यापि कुबेरस्य नलकूबराख्येनान्वयेन संतानेन पुत्रेण प्रकाशिता प्रकटिता शोभिता प्रसूतवत्ता जनयितृता इति साधर्म्यदृष्टान्तः श्लेषबलेन। अनुमानं त्वेवम्—विमतो महारथः पुष्पकप्रकृष्टो भवितुमर्हति नलकूबरान्वयप्रकाशितप्रसूतवत्त्वात्। यो यो नलकूबरान्वयप्रकाशितप्रसूतवत्तावान्स स पुष्पकप्रकृष्टः यथा कुबेर इत्यनुमानवशादेतत्सर्वमुच्यत इति यथाकथंचिच्छ्लोको व्याख्येयः। प्रकृष्टः सूतः पुत्र इति वा। पुष्पकस्य नलः सारथिर्नास्ति इति तेन तुल्यता नास्ति। किंतु तत्पतिना कुबेरेणेति। अस्य तु नलः सारथिरित्ययं रथो रमणीय इति भावः। 'कूबरस्तु युगंधरः' इत्यमरः[1] ॥

महेन्द्रमुच्चैःश्रवसा प्रतार्य यन्निजेन पत्याऽकृत सिन्धुरन्वितम्।
स तद्ददेऽस्मै हयरत्नमर्पितं पुराऽनुबन्धुं वरुणेन बन्धुताम् ॥ २५ ॥

महेन्द्रमिति ॥ सिन्धुः समुद्रः नाम्ना उच्चैःश्रवसा। अथ च—उन्नतकर्णेन सलक्षणेन। अथच—दीर्घकर्णेन दुर्लक्षणेन। अश्वेन महेन्द्रं प्रतार्य यद्धयरत्नं निजेन पत्या स्वस्वामिना वरुणेनान्वितं युक्तमकृत। वरुणायादत्तेत्यर्थः। स भीमस्तदश्वरत्नमस्मै नलाय ददे। अनेन कथं लब्धमित्यत आह—किंभूतम्—वरुणेन बन्धुतामलीकमैत्रीमनुबन्धुं वर्धयितुं पुरा दूतीप्रेषणावसरेऽर्पितं भीमाय दत्तम्। उच्चैःश्रवसोऽप्यधिकमश्वं तस्मै ददाविति भावः ॥

जवादवारीकृतदूरदृक्पथस्तथाक्षियुग्माय ददे मुदं न यः।
ददद्दिदृक्षादरदासतां यथा तथैव[2] तत्पांसुलकण्ठनालताम् ॥ २६ ॥

जवादिति ॥ योऽश्वो लोकानामक्षियुग्माय नेत्रद्वयाय दिदृक्षायाः स्वीयरूपदर्शनेच्छाया आदरस्तस्य दासतां वशत्वं ददद्ददानः पारवश्यं कुर्वञ्जवाद्धेतोरवारीकृतोऽर्वाक्कीरीकृतो दूरो बहुयोजनो दृक्पथो नेत्रपथो येन। दूरं गतत्वान्नेत्रयोरविषय इति यावत्। एवंविधः सन् यथा नेत्रयुगाय मुदं प्रीतिं न ददे। दर्शनाभावात्प्रीतिं नोत्पादितवानित्यर्थः। तथा पुनरागमनसमयेऽपि तथैव दिदृक्षादरदासतया तस्य नेत्रयुगस्य पांसुलं रेणुयुक्तं कण्ठनालं तस्य भावस्तत्तां लक्षणया उत्कण्ठितत्वं ददत् मुदं न ददे। तमश्वं दद इति पूर्वेण संबन्धः। यथातथाशब्दौ व्यत्यस्तौ योज्यौ। रूपादिविलोकनकौतुकिभिः यावदश्वो द्रष्टुमारब्धः, तावद्वेगवशाद्दूरं

१ 'अत्रानुमानालंकारः। ......हेतुत्वेन तर्कानुमानेन वैलक्षण्यं रूपकं च। प्रसूतवत्त्वादिप्रकाशितैः तत्प्रकाशितेति श्लिष्टरूपकं द्रष्टव्यम्—' इति जीवातुः। २ 'तूर्पैव' इति प्राचीनलिखितपुस्तकपाठः।

इत्यर्थः । भूतागतसंदेहे रक्तमयूखमण्डलं हेतुः । माणिक्यमयत्वादतिरक्त इत्यर्थः । इदानीं ताम्बूलस्यानवसराद्रागाविन्यापि भूतवदुपचारः । यद्वा—तस्यैवातिरक्तत्वाज्जनस्योद्गारत्वागभ्रमः । अमी पूगकणाः किं वा किरणसमूह इति संदेहश्चिरान्निर्णीत इति वा ॥

मयेन भीमं भगवन्तमर्चता नृपेऽपि पूजा प्रभुनाम्नि या कृता ।
अदत्त भीमोऽपि स नैषधाय तां हरिन्मणेर्भोजनभाजनं महत् ॥ २९ ॥

मयेनेति ॥ भगवन्तं षड्गुणैश्वर्यसंपन्नं भीमं शिवमर्घ्यादिभिरुपचारैरर्चता पूजयता शैवेन मयनाम्नाऽसुरेण प्रभुनाम्नि शिवनामधारके नृपेऽपि भीमेऽपि पूजा कृताऽकारि, स भीमोऽपि तां पूजां पूजारूपं हरिन्मणेर्गरुडमणिसंबन्धि विषापहारसमर्थमतिविस्तृतं भोजनार्थं भाजनं नैषधायादत्त । मयेन तस्मै दत्तम्, सोऽपि नलायादत्तेत्यपिशब्दः समुच्चयार्थः । अर्चतिर्भ्वादिकः ॥

छदे सदैव च्छविमस्य बिभ्रतां न केकिनां सर्पविषं विसर्पति ।
न नीलकण्ठत्वमधास्यदत्र चेत् स कालकूटं भगवानभोक्ष्यत ॥ ३० ॥

छदे इति ॥ अस्य भोजनपात्रस्य छविं नीलां द्युतिं सदैव छदे पिच्छे बिभ्रतां केकिनां मयूराणां सर्पविषं न प्रसर्पति । तच्छरीरं नाक्रामतीत्यर्थः । स भगवाञ्छिवोऽत्र पात्र एतदाधारत्वेन कालकूटं चेदभोक्ष्यत तर्हि नीलकण्ठत्वं नाधास्यत् । अत्र पात्रे विषभक्षणे कृते सति तज्जीर्णतया नीलकण्ठत्वं न स्यादित्यर्थः । क्रियातिपत्तौ लृङ् । 'भुजोऽनवने' इति तङ् ॥

विराध्य दुर्वाससमस्खलद्दिवः स्रजं त्यजन्नस्य किमिन्द्रसिन्धुरः ।
अदत्त तस्मै स मदच्छलात्सदा यमभ्रमातङ्गतयैव वर्षुकम् ॥ ३१ ॥

विराध्येति ॥ स भीमस्तस्मै नलाय मदच्छलाद्दानजलव्याजात्सदा वर्षुकं वर्षणशीलं यं हस्तिनमदत्त स दुर्वाससं विराध्य रोषयित्वा तच्छापादिन्द्रसिन्धुर ऐरावतो दिवः सकाशादस्खलत्पतितः किम् । भुवमागत ऐरावणः किमित्यर्थः । विराधे हेतुः—अस्य दुर्वाससः स्रजं मालां त्यजन्भुवि क्षिपन् । अत्र पौराणिकी कथा—कदाचिदैरावतमारुह्य गच्छत इन्द्राय दुर्वाससा प्रसादेन मन्दारपुष्पमाला दत्ता, सा चेन्द्रेण करीन्द्रकुम्भे स्थापिता, स तां शुण्डादण्डेनाधश्चिक्षेप, ततः कुपितेन मुनिना त्वमपि मालावदधः पतेति शप्तः । तन्मूलेयमुत्प्रेक्षा वर्षुकत्वेन पुनरुत्प्रेक्षते—अभ्रमातङ्गतया ऐरावतत्वेनेव । ऐरावतो हि सदा मदजलं वर्षति अयमपि तावत्स्वर्गाद्भ्रष्टः स एव इति सदा दानजलं मुञ्चतीत्यर्थः । अभ्रवन्मातङ्गस्तत्तया वा । श्यामलात्सजलघनतुल्य इत्यर्थः । अस्य भीमस्य संबन्धित्वेन अस्खलत् किमिति वा । वर्षुकम्, 'लषपत—' इत्युकञ् ॥

मदान्मदग्रे भवताथवा भिया परं दिगन्तादपि यात जीवत ।
इति स यो दिक्करिणः स्वकर्णयोर्विनैव वर्णस्रजमागतैर्गतैः ॥ ३२ ॥

मदादिति ॥ यो गजः स्वकर्णयोरागतैर्गतैरागमनैर्गमनैश्च कृत्वा वर्णस्रजं वर्णमालां विनैव दिक्करिणो दिग्गजान्प्रति इत्याह स्मेव । इति किम्—भो दिग्गजाः, भवतां बलाभिमानश्चेदस्ति तर्हि मदाद्युद्धं कर्तुं यूयं मदग्रे भवत मम पुरस्तात्तिष्ठत । अथवा चेन्मदो नास्ति, तर्हि भिया दिगन्तस्तथा यूयं दिगन्तादपि परं दूरं यात गच्छत, पलायिताश्च सन्तस्तत्रैव सुखेन जीवत स्वप्राणान्रक्षतेति । इयं लुप्तोत्प्रेक्षा ॥

---

१ 'निश्चयान्तः संदेहालंकारः' इति जीवातुः ।

स्थिरा त्वमश्मेव भवेति मन्त्रवागनेशदाशास्य किमाशु तां ह्रिया।
शिला चलेत्प्रेरणया नृणामपि स्थितेस्तु नाचालि बिडौजसापि सा ३६

स्थिरेति ॥ हे भैमि, 'इममश्मानमारोह' इत्यनुनार्थं 'त्वमश्मेव स्थिरा भव' इति नलेनोच्चारिता मन्त्ररूपा वाक्तां भैमीमाशास्य शिलावन्निश्चला भवेति तस्यै आशिषं दत्वा आश्वनेशमनाश। वर्णा उच्चारिताः प्रध्वस्ता भवन्ति। तत्रोत्प्रेक्षते—ह्रिया किम्। किमिति तस्या लज्जेत्यत आह—शिला अल्पतेजसां नृणामपि प्रेरणया करचरणव्यापारमात्रेण चलेत्स्वस्थानादन्यत्र गच्छेत्। सा तु भैमी पुनरतिप्रभाविणा बिडौजसेन्द्रेणापि स्थितेर्मनोव्यापारमात्रस्वीकृतनलपतित्वरूपाया मर्यादायाः सकाशान्नाचालि पतिव्रतासीमां न त्याजितेति। स्थिरतरत्वेनाधिकया भैम्या अहं हीनेति स्वदोषं विचिन्त्य लज्जयेव नष्टेत्यर्थः। वैधमश्मारोहणं तेन कारितमिति भावः। 'नश अदर्शने' अस्माल्लुङि पुषादित्वादङि 'नशिमन्योरलिट्येत्वम्' (वार्ति०) इत्येत्वे रूपम् ॥

प्रियांशुकग्रन्थिनिबद्धवाससं तदा पुरोधा विदधे विदर्भजाम्।
जगाद विच्छिद्य पटं प्रयास्यतो नलादविश्वासमिवैष विश्ववित् ३७

प्रियेति ॥ तदा वह्निसंनिधिकाले पुरोधा गौतमो विदर्भजां भैमीं प्रियस्य नलस्यांशुकेन सह ग्रन्थिना निबद्धं वासो यस्यास्तामेवंविधां विदधे चकार। उत्प्रेक्षते—पटं विच्छिद्य कर्तित्वाऽरण्ये भैमीं विहाय प्रयास्यतो गमिष्यतो नलात्सकाशादेष पुरोधा अविश्वासं विश्वासाभावं जगादेव। वस्त्रं छित्त्वा त्वां हित्वायं गमिष्यतीत्यतस्य विश्वासो न कार्य इत्यस्य वस्त्रेण सह स्ववस्त्रस्य ग्रन्थिं दत्त्वैवानेन सह विचरणीयमित्युवाचेवेत्यर्थः। कथमेतज्ज्ञातमत आह—यतो विश्वं सर्वं वेत्तीति। कालत्रयज्ञ इत्यर्थः। तस्माद्भविष्यदपि तेन ज्ञातमित्यर्थः। कलिना पराभूतो नलो द्यूतहारितसर्वस्वः स्वीयैस्त्यक्तो द्वापरेण कलिना पक्षिरूपेण तद्धारणार्थं क्षिप्तस्य वस्त्रस्यापहाराद्वस्त्रान्तराभावाद्भैमीवस्त्रार्धधारी सन्निद्राणायास्तस्या वस्त्रार्धं विच्छिद्य तां महारण्ये तत्याजेति महाभारते कथा। वैधमुभयवस्त्रग्रन्थिबन्धनं तेन कृतमिति भावः। 'विदधत' इति पाठे कुर्वन्सन्निति योजना ॥

ध्रुवावलोकाय तदुन्मुखभ्रुवा निर्दिश्य पत्याभिदधे विदर्भजा।
किमस्य न स्यादणिमाक्षिसाक्षिकस्तथापि तथ्यो महिमागमोदितः॥३८॥

ध्रुवेति ॥ तस्य ध्रुवस्य दर्शनार्थमुन्मुखी भ्रूर्यस्य तेन पत्या नलेन विदर्भजा निर्दिश्याज्ञाप्य ध्रुवस्यावलोकनार्थमभिदधे उक्ता। तदुन्मुखया भ्रुवा कृत्वा संज्ञाप्येति वा। ननु स्थूलस्य ध्रुवस्य स्वयंदर्शनयोग्यत्वात्सा स्वयमेव तं पश्येत्, तेन किमिति दर्शनं कारितमित्याह—अस्य ध्रुवस्याणिमा सूक्ष्मप्रमाणत्वमक्षिसाक्षिको नेत्रगोचरः किं न स्यात्, अपि तु स्यादेव यद्यपि, तथापि स्वयंदर्शनयोग्यत्वेप्यागमोदितो महिमा वेदोक्तं गौरवं सत्यः। अस्त्विति शेषः। श्रुत्युक्तं हि प्रमाणमित्यर्थः। श्रुतिर्हि ततो वधूं 'ध्रुवमुदीक्षस्व' इति ध्रुवे दर्शिते 'ध्रुवं पश्यामि प्रजां विन्देय' इति सा ब्रूयात्। तस्मात्स्वयं द्रष्टुं शक्यत्वेऽपि नल एवादर्शयदिति युक्तमित्यर्थः। वैधं ध्रुवदर्शनं कारितमिति भावः। एतत्सर्वं कविवचः। अथ च—यद्यप्यणुत्वं स्वयं प्रत्यक्षदृश्यं तथापि ज्योतिःशास्त्रोक्तं ध्रुवमण्डलस्य महापरिमाणत्वं सत्यमेव ॥

१ अत्र 'पूर्ववाक्यार्थस्योत्तरवाक्यार्थहेतुकत्वात्काव्यलिङ्गमलंकारः' इति जीवातुः।

धवेन सादर्शि वधूररुन्धतीं सतीमिमां पश्य गतामिवाणुताम् ।
कृतस्य पूर्वं हृदि भूपतेः कृते तृणीकृतस्वर्गपतेर्जनादिति ॥ ३९ ॥

धवेनेति ॥ सा वधूर्धवेन नलेनाणुतामतिसूक्ष्मत्वं गतामिमां सतीं पतिव्रतामरुन्धतीं त्वं पश्येत्युक्त्वादर्शि दर्शिता तत्राणुत्वे उत्प्रेक्षते—वरणात्पूर्वमेव हृदि कृतस्य मनोरथमात्रेण हृदये कृतस्य भूपतेः कृते तृणीकृतस्वर्गपतेस्तृणवल्लघवेन त्यक्त इन्द्रो येन एवंभूताज्जनादिव । लज्जयेति शेषः । अहं हि परिणीता सतीन्द्रं तृणप्रायमकरवम्, भैमी तु हृदि धारणमात्रादेवेति ततोऽपीयमेवाधिका सतीति भैम्याः सकाशाल्लज्जयेव कृशामित्यर्थः । स्वतःकृशत्वमेवमुत्प्रेक्षितम् । भूपतेः, जनादिति शब्दद्वयं सामान्यवाच्यपि नलभैमीलक्षणे विशेषे पर्यवस्यति । वैवमरुन्धतीविलोकनं कारितमिति भावः । अदर्शि, ण्यन्ताच्चिण् । 'अभिवादिदृशोः–' इति अणौ कर्तुर्णौ कर्मत्वम् । तस्य चाभिहितत्वाद्द्वितीयाभावः ॥

प्रसूनता तत्करपल्लवस्थितैरुडुच्छविर्व्योमविहारिभिः पथि ।
मुखेऽमराणामनले रदावलेरभाजि लाजैरनयोज्झितैर्द्युतिः ॥ ४० ॥

प्रसूनतेति ॥ तस्या भैम्याः करयोरेव पल्लवयोः स्थितैर्वर्तमानैर्लाजैः प्रसूनता पुष्पत्वमभाजि प्राप्ता । पल्लवेषु च पुष्पाणि युक्तानि । तथा—अनया भैम्योज्झितैः करान्मुक्तैर्व्योम्नि विहरणशीलैः सद्भिः पथि करान्यन्तरालरूपे मार्गे उडुच्छविर्नक्षत्रशोभा भेजे । व्योम्नि नक्षत्राणि युक्तानि । तथा—अनलस्यामराणां मुखेऽनलेऽनयावमया हुतै रदावलेर्दन्तपङ्क्तेर्द्युतिः शोभा भेजे । मुखे च दन्तपङ्क्तिर्युक्ता । वैधो लाजहोमस्तया कृत इति भावः ॥

तया प्रतीष्टाहुतिधूमपद्धतिर्गता कपोले मृगनाभिशोभिताम् ।
ययौ दृशोरञ्जनतां श्रुतौ श्रिता तमाललीलामलिकेऽलकायिता ॥४१॥

तयेति ॥ तया भैम्या प्रतीष्टा करकुड्मलाभ्यां स्वीकृता आहुतिधूमपद्धतिर्हूयमानलाजादिद्रव्यसंबन्धिनी धूमपरम्परा कपोले मृगनाभिशोभितां कस्तूरीशोभां गता प्राप्ता । तत ऊर्ध्वं गच्छन्ती दृशोश्चक्षुषोरञ्जनतां ययौ प्राप । ततोऽप्यूर्ध्वं गच्छन्ती श्रुतौ कर्णयोस्तमाललीलां वतंसभूततमालदलसादृश्यं श्रिता । ततोऽप्यूर्ध्वतरं गच्छन्ती अलिके ललाटेऽलकायिता चूर्णकुन्तलवदाचरिता । तत्तुल्या जातेत्यर्थः । कपोले कस्तूरी, दृशोरञ्जनम्, श्रुतौ तमालम्, ललाटे चालका इति युक्तम् । वैधं धूमग्रहणं कृतमिति भावः । मृगनाभिशोभिनीति, 'कर्तर्युपमाने' इति णिनौ मृगनाभिशोभिनी तस्या भावस्तत्ता, 'त्वतलोः–' इति पुंवत् ॥

अपह्नुतः स्वेदभरः करे तयोस्त्रपाजुषोर्दानजलैर्मिलन्मुहुः ।
दृशोरपि प्रस्तुतमश्रु सात्त्विकं घनैः समाधीयत धूमलङ्घनैः ॥ ४२ ॥

अपह्नुत इति ॥ त्रपाजुषोर्लज्जावतोस्तयोः करे वर्तमानः स्वेदभरः सात्त्विकघर्मजलबिन्दुर्दानजलैर्भोजनेन्द्रो दक्षिणादानार्थमुत्सृष्टैः संकल्पजलैर्मुहुर्वारंवारं मिलन्मिश्रीभवन् प्रस्नुवन् अपह्नुतोऽपलपितः । दानजलयोगात्सात्त्विकः स्वेदोऽयमिति लोकेन न ज्ञात इत्यर्थः ।

१ 'इवः' इति सुखावबोधासम्मतः । २ 'कर्मैकस्य लाजद्रव्यस्य करेण करसंहतमानेकधाराकृतिकृष्णालपालनेरस्यावर, चतुर्थेन (?) लाजानां मध्यदन्तपंक्तिशोभाद्वयमभिदर्शनमनेदं, रसनेरङ्गिभावेन संकरः' इति जीवातुः । ३ 'कपोलादेकस्यैव धूमस्य कन्यादेश्चाधारसंबन्धात्ततस्तदुपर्यादिनानुपरेषां यथायोग्यमामभिदर्शनाभ्यां धूर्वत्संकरः' इति जीवातुः ।

स्थिरा त्वमश्मेव भवेति मन्त्रवागनेशदाशास्य किमाशु तां ह्रिया।
शिला चलेत्प्रेरणया नृणामपि स्थितेस्तु नाचालि विडौजसापि सा ३६

स्थिरेति ॥ हे भैमि, 'इममश्मानमारोह' इत्युचार्य 'त्वमश्मेव स्थिरा भव' इति नलेनो- च्चारिता मन्त्ररूपा वाक्तां भैमीमाशास्य शिलावन्निश्चला भवेति तस्यै आशिषं दत्त्वा आशुनेशत्- ननाश। वर्णा उच्चारिताः प्रध्वस्ता भवन्ति। तत्रोत्प्रेक्षते—ह्रिया किम्। किमिति तस्या लज्जे- त्यत आह—शिला अल्पतेजसां नृणामपि प्रेरणया करचरणव्यापारमात्रेण चलेत्स्वस्थानादन्यत्र गच्छेत्। सा तु भैमी पुनरतिप्रभाविणा विडौजसेन्द्रेणापि स्थितेर्मनोव्यापारमात्रस्वीकृतनलप- तित्वरूपाया मर्यादायाः सकाशान्नाचालि पतिव्रतासीमां न त्याजितेति। स्थिरतरत्वेनाधिकाया भैम्या अहं हीनेति स्वदोषं विचिन्त्य लज्जयैव नष्टेत्यर्थः। वैधमश्मारोहणं तेन कारितमिति भावः। 'नश अदर्शने' अस्माल्लुङि पुषादित्वादङि 'नशिमन्योरलिट्येत्वम्' (वार्ति०) इत्येत्वे रूपम् ॥

प्रियांशुकग्रन्थिनिबद्धवाससं तदा पुरोधा विदधे विदर्भजाम्।
जगाद विच्छिद्य पटं प्रयास्यतो नलादविश्वासमिवैष विश्ववित् ३७

प्रियेति ॥ तदा वह्निसंनिधिकाले पुरोधा गौतमो विदर्भजां भैमीं प्रियस्य नलस्यांशुकेन सह ग्रन्थिना निबद्धं वासो यस्यास्तामेवंविधां विदधे चकार। उत्प्रेक्षते—पटं विच्छिद्य कलि- त्वाऽरण्ये भैमीं विहाय प्रयास्यतो गमिष्यतो नलात्सकाशादेष पुरोधा अविश्वासं विश्वासाभावं जगादेव। वस्त्रं छित्त्वा त्वां हित्वायं गमिष्यतीत्यतस्य विश्वासो न कार्य इत्यस्य वस्त्रेण सह स्ववस्त्रस्य ग्रन्थिं दत्त्वैवानेन सह विचरणीयमित्युवाचेवेत्यर्थः। कथमेतज्ज्ञातमत आह—यतो विश्वं सर्वं वेत्तीति। कालत्रयज्ञ इत्यर्थः। तस्माद्भविष्यदपि तेन ज्ञातमित्यर्थः। कलिना परा- भूतो नलो द्यूतहारितसर्वस्वः स्वीयैस्त्यक्तो द्वापरेण कलिना पक्षिरूपेण तद्धारणार्थं क्षिप्तस्य वस्त्रस्यापहाराद्वस्त्रान्तराभावाद्भैमीवस्त्रार्धधारी सनिद्राणायास्तस्या वस्त्रार्धं विच्छिद्य तां महारण्ये तत्याजेति महाभारते कथा। वैधमुभयवस्त्रग्रन्थिबन्धनं तेन कृतमिति भावः। 'विदधत' इति पाठे कुर्वन्सन्निति योजना ॥

ध्रुवावलोकाय तदुन्मुखस्रुवा निर्दिश्य पत्याभिदधे विदर्भजा।
किमस्य न स्यादणिमाक्षिसाक्षिकस्तथापि तथ्यो महिमागमोदितः ॥३८॥

ध्रुवेति ॥ तस्य ध्रुवस्य दर्शनार्थमुन्मुखी भ्रूर्यस्य तेन पत्या नलेन विदर्भजा निर्दिश्याज्ञाप्य ध्रुवस्यावलोकनार्थमभिदधे उक्ता। तदुन्मुख्या भ्रुवा कृत्वा संज्ञाप्येति वा। ननु स्थूलस्य ध्रुवस्य सर्वदर्शनयोग्यत्वात्सा स्वयमेव तं पश्येत्, तेन किमिति दर्शनं कारितमित्यत आह—अस्य ध्रुवस्याणिमा सूक्ष्मत्वमाणत्वमक्षिसाक्षिको नेत्रगोचरः किं न स्यात्, अपि तु स्यादेव यद्यपि, तथापि सर्वदर्शनयोग्यत्वेऽप्यागमोदितो महिमा वेदोक्तं गौरवं सत्यः। अस्त्विति शेषः। श्रुत्युक्तं प्र- माणमित्यर्थः। श्रुतिर्हि ततो वधूं 'ध्रुवमुदीक्षस्व' इति ध्रुवे दर्शिते 'ध्रुवं पश्यामि प्रजां वि- न्देय' इति वा ब्रूयात्। तस्मात्स्वयं द्रष्टुं शक्यत्वेऽपि नल एवादर्शयदिति युक्तमित्यर्थः। वैधं ध्रुवदर्शनं कारितमिति भावः। एतत्सर्वं कविवचः। अथ च—यद्यप्यणुत्वं सर्वं प्रत्यक्षं तथापि ज्योतिःशास्त्रोक्तं ध्रुवमण्डलस्य महापरिमाणत्वं सत्यमेव ॥

१ अत्र '[illegible]' इति जीवातुः।

धवेन सादर्शि वधूररुन्धतीं सतीमिमां पश्य गतामिवाणुताम् ।
कृतस्य पूर्वं हृदि भूपतेः कृते तृणीकृतस्वर्गपतेर्जनादिति ॥ ३९ ॥

धवेनेति ॥ सा वधूर्धवेन नलेनाणुतामतिसूक्ष्मत्वं गतामिमां सतीं पतिव्रतामरुन्धतीं त्वं पश्येत्युक्त्वादर्शि दर्शिता तत्राणुत्वे उत्प्रेक्षते—वरणात्पूर्वमेव हृदि कृतस्य मनोरथमात्रेण हृदये कृतस्य भूपतेः कृते तृणीकृतस्वर्गपतेस्तृणवल्लाघवेन त्यक्त इन्द्रो येन एवंभूताज्जनादिव । लज्ज-येति शेषः । अहं हि परिणीता सतीन्द्रं तृणप्रायमकरवम्, भैमी तु हृदि धारणमात्रादेवेति मत्तोमीयमेवाधिका सतीति भैम्याः सकाशाल्लज्जयेव कृशामित्यर्थः । स्वतःकृशत्वमेवमुत्प्रेक्षितम् । भूपतेः, जनादिति शब्दद्वयं सामान्यवाच्यपि नलभैमीलक्षणे विशेषे पर्यवस्यति । वैधमरुन्धती-विलोकनं कारितमिति भावः । अदर्शि, ण्यन्ताच्चिण् । 'अभिवादिदृशोः—' इति ण्यौ कर्तुर्णौ कर्मत्वम् । तस्य चाभिहितत्वाद्द्वितीयाभावः ॥

प्रसूनता तत्करपल्लवस्थितैरुडुच्छविर्व्योमविहारिभिः पथि ।
मुखेऽमराणामनले रदावलेरभाजि लाजैरनयोज्झितैर्युतिः ॥ ४० ॥

प्रसूनतेति ॥ तस्या भैम्याः करयोरेव पल्लवयोः स्थितैर्वर्तमानैर्लाजैः प्रसूनता पुष्पत्वम-भाजि प्राप्ता । पल्लवेषु च पुष्पाणि युक्तानि । तथा—अनया भैम्योज्झितैः करान्मुक्तैर्व्योमि विहरणशीलैः सद्भिः पथि कराग्न्यन्तरालरूपे मार्गे उडुच्छविर्नक्षत्रशोभा भेजे । व्योम्नि नक्ष-त्राणि युक्तानि । तथा—अमराणां मुखेऽनलेऽग्नावनया हुतै रदावलेर्दन्तपङ्क्तेर्द्युतिः शोभा भेजे । मुखे च दन्तपङ्क्तिर्युक्ता । वैधो लाजहोमस्तया कृत इति भावः ॥

तया प्रतीष्टाहुतिधूमपद्धतिर्गता कपोले मृगनाभिशोभिताम् ।
ययौ दृशोरञ्जनतां श्रुतौ श्रिता तमालकीलामलिकेऽलकायिता ॥ ४१ ॥

तयेति ॥ तया भैम्या प्रतीष्टा करकुड्मलाभ्यां स्वीकृता आहुतिधूमपद्धतिर्दुग्धानललाजा-दिद्रव्यसंबन्धिनी धूमपरम्परा कपोले मृगनाभिशोभितां कस्तूरीशोभां गता प्राप्ता । तत ऊर्ध्वं गच्छन्ती दृशोश्चक्षुषोरञ्जनतां ययौ प्राप । ततोऽप्यूर्ध्वं गच्छन्ती श्रुतौ कर्णयोस्तमाल-लीलां वतंसभूततमालदलसादृश्यं श्रिता । ततोऽप्यूर्ध्वतरं गच्छन्ती अलिके ललाटेऽलका-यिता चूर्णकुन्तलवदाचरिता । तत्तुल्या जातेत्यर्थः । कपोले कस्तूरी, दृशोरञ्जनम्, श्रुतौ तमालम्, ललाटे चालका इति युक्तम् । वैधं धूमग्रहणं कृतमिति भावः । मृगनाभिशोभि-तामिति, 'कर्तर्युपमाने' इति णिनौ मृगनाभिशोभिनी तस्या भावस्तत्ता, 'त्वतलोः—' इति पुंवद् ॥

अपह्नुतः स्वेदभरः करे तयोस्त्वपाङ्गुयोर्दानजलैर्मिलन्मुहुः ।
दृशोरपि प्रस्तुतमश्रु सात्त्विकं घनैः समाधीयत धूमलङ्घनैः ॥ ४२ ॥

अपह्नुत इति ॥ [illegible] करे वर्तमानः स्वेदभरः [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] सोऽपि [illegible] इत्यर्थः ।

१ 'इतः' इति सुखावबोधापाठः । २ [illegible] [illegible] [illegible] इति जीवातुः । ३ [illegible] [illegible] इति जीवातुः ।

करे मुहुर्मिलन्पुनःपुनरुद्भवन्दानजलैरपह्नुत इति वा। तत्रापि कामविकारवशात्स्वेदं लोको ज्ञास्यतीति भिया वा। दृशोरपि प्रसुतं गलितं सात्त्विकं कामविकारजमस्तु घनैः सान्द्रैर्धूमलङ्घनैर्धूमाक्रमणैः कृत्वा समाधीयत परिहृतं ताभ्यामित्यर्थात्। तैरेव कर्तृभिरपलपितं वा। परस्परसंस्पर्शात्तयोः स्वेदादयः सात्त्विका भावाः प्रवृत्ता इति भावः ॥

वहूनि भीमस्य वसूनि दक्षिणां प्रयच्छतः सत्त्वमवेक्ष्य तत्क्षणम्।
जनेपु रोमाञ्चसितेपु मिश्रतां ययुस्तयोः कण्टककुड्मलश्रियः ॥४३॥

वहूनीति ॥ वहूनि वसूनि दक्षिणां प्रयच्छतो दक्षिणात्वेन ददतो भीमस्य सत्त्वं दानशौण्डत्वमवेक्ष्य तत्क्षणं तस्मिन्नेव क्षणे आश्चर्यातिशयाद्रोमाञ्चमितेपु प्राप्तेषु जनेपु मध्ये तयोर्भैमीनलयोः कण्टककुड्मलश्रियः कण्टककलिकाशोभा मिश्रतामैक्यं ययुः प्रापुः। सात्त्विकोऽपि रोमाञ्चोऽन्यजनवदाश्चर्यादयं जात इत्यपलपित इति भावः ॥

वभूव न स्तम्भविजित्वरी तयोः श्रुतिक्रियारम्भपरम्परात्वरा।
न कम्पसंपत्तिमलुम्पदग्रतः स्थितोऽपि वह्निः समिधा समेधितः ४४

वभूवेति ॥ श्रुतिक्रियाया वेदविहितलाजहोमाग्निपरिभ्रमणादिकाया आरम्भस्य परम्परा एकस्मादनन्तरमन्यस्यारम्भः, तस्मादनन्तरमन्यस्य, एवमव्यवहितो य उत्तरोत्तरभावस्तद्विषया त्वरा वेगिता तयोः सात्त्विकभावजनितस्याङ्गाचलनात्मकस्य स्तम्भस्य विजित्वरी जयनशीला न वभूव। तं नापललापेत्यर्थः। अवश्यापेक्षितायामपि कर्मवेगितायां सात्त्विकस्तम्भवशात्तौ किमपि कर्म शीघ्रं कर्तुं समर्थौ नाभूतामिति भावः। तथा—समिधा काष्ठैः समेधितः संवर्धितद्युतिरप्यग्रतः स्थितोऽपि तयोः कम्पसंपत्तिं सात्त्विकं कम्पवाहुल्यं नालुम्पन्न शमयति स्म। शीतजं हि कम्पं विशिष्टोऽग्निः शमयति, न तु सात्त्विकम्। तस्य तन्नासमर्थत्वादित्यर्थः। तयोरन्यसात्त्विकापलापेऽति स्तम्भकम्पौ लोकैर्ज्ञातावेवेति भावः। 'अवर्ततास्तम्भ—' इति पाठे नस्तम्भविजित्वरीति नञ्समासः। अलुम्पत्, 'शे मुचादीनाम्' इति नुम् ॥

दमस्वसुः पाणिममुष्य गृह्णतः पुरोधसा संविदधेतरां विधेः।
महर्षिणेवाङ्गिरसेन साङ्गता पुलोमजामुद्वहतः शतक्रतोः ॥ ४५ ॥

दमेति ॥ दमस्वसुः पाणिं गृह्णतोऽमुष्य नलस्य संवन्धिनो वैवाहिकस्य श्रौतस्य विधेः साङ्गता अङ्गसाहित्यं पुरोधसा संविदधेतरां नितरां साकल्येन चक्रे। प्रधानमात्रं नलेन कृतम्, अङ्गानि तु पुरोधसा कृतानीति भावः। कस्य केनेव—पुलोमजामुद्वहतः परिणयतः शतक्रतोः संवन्धिनो विधेः साङ्गता आङ्गिरसेन महर्षिणा वृहस्पतिनेव ॥

सकौतुकागारमगात्पुरंध्रिभिः सहस्ररन्ध्रीकृतमीक्षितुं ततः।
अधात्सहस्राक्षतनुत्रमित्रतामधिष्ठितं यत्खलु जिष्णुनामुना ॥ ४६ ॥

---

१ 'अत्र स्वेदास्रुणोः सहजयोरागन्तुकदानोदकधूमाभिभवाभ्यां तिरोधानान्मीलनभेदः' इति जीवातुः। २ 'अत्र कर्मत्वरासमिद्धवह्निरूपकारणसद्भावेपि स्तम्भकम्पनिवृत्तिरूपकार्यानुत्पत्तेर्विशेषोक्तिरलंकारः' इति जीवातुः। ३ 'विधिः' इति पाठे 'विधिः संविदधेतरान्' इत्यन्वयः, इति सुखाववोधा। ४ 'संगताम्' इति पाठे कीदृशीं शचीम्—'संगतां सं सम्यक् गतं ज्ञानं यस्यास्तामुचितज्ञाम्' इति सुखाववोधा।

स इति ॥ ततो वैवाहिकविधेरनन्तरं स नलः पुरन्ध्रीभिरन्तःपुरातनाभिरीक्षितुं वधूव-रचेष्टादिदर्शनार्थं सहस्ररन्ध्रीकृतं तृणकाष्ठादिरचितबहुच्छिद्रगवाक्षं वधूवरसंवेशार्थं रचित-शृङ्गारवेदिकं कौतुकागारं कुतूहलावहं दूर्वाङ्कुरादिनवमङ्गलद्रव्यसहितं गृहमगाद्ययौ । यद्गृहं जिष्णुना जयशीलेनामुना नलेनाधिष्ठितं तद्विलोकितुं नेत्रसहस्रावकाशरन्ध्रधारेण सहस्राक्षस्य तनुत्रेण कवचेन सह नित्यतां साम्यमधाद्बभार । तदपि जिष्णुनेन्द्रेणाधिष्ठितमिति । सदुत्प्रेक्षायां निश्चये वा ॥

तथाशनाया निरशेपि नो ह्रिया न सम्यगालोकि परस्परक्रिया ।
विमुक्तसंभोगमशायि सस्पृहं वरेण वध्वा च यथाविधि त्र्यहम् ॥४७॥

तथेति ॥ वरेण वध्वा चाशनाया बुभुक्षा ह्रिया कृत्वा तथा पूर्ववन्नो निरशेपि न निःशेषिता । आतृप्ति न भुक्तमित्यर्थः । तथा—परस्परक्रियान्योन्यं चेष्टादिव्यापारोऽपि ह्रियैव सम्यक्संमुखदर्शनेन नालोकि न विलोकितः । किंतु दृगन्तमात्रेणेत्यर्थः । तथा—त्र्यहं दिनत्रयं यथाविधि विमुक्तसंभोगं त्यक्तसुरतं यथा तथा परं सस्पृहं सुरतेच्छासहितं यथा तथाशायि शयितम् । त्र्यहमिति सर्वत्र योज्यम् । विध्यतिक्रमभयाद्दिनत्रयं ताभ्यां सह भुक्तम्, अन्योन्यं विलोकितम्, सह निद्रितं च । परं लज्जया न यावत्तृप्ति भुक्तम्, नारोपाङ्गं दृष्टम्, न च चुम्बनालिङ्गनादिपूर्वं शयितमित्यर्थः । 'एकत्र शयनं त्रिरात्रं ब्रह्मचर्यं च' इति विधिः । अशनाया, 'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' इति साधुः । त्र्यहं, समाहारे द्विगौ 'राजाहः—' इत्यादिना टच् । 'न संख्यादेः समाहारे' इत्यह्नादेशाभावः । 'रात्राह्नाहाः पुंसि' इति पुंस्त्वम् । अत्यन्तसंयोगे द्वितीया । त्र्यहं विमुक्तसंभोगमिति योजना ॥

कटाक्षणाजन्यजनैर्निजप्रजाः क्वचित्परीहासमचीकरत्तराम् ।
धराप्सरोभिर्वरयात्रयागतानभोजयद्भोजकुलाङ्कुरः क्वचित् ॥ ४८ ॥

कटाक्षेति ॥ भोजकुलस्य भीमपूर्वजभोजाख्यक्षत्रियवंशस्याङ्कुर इवाङ्कुरो बालो दमः कश्चिद्भीमदमयन्त्योदरे कस्मिंश्चिद्देशे अन्यजनैर्वरयात्रिकैर्नलपक्षीयैः सह निजाः प्रजाः परिहासपात्रभूतपौरवारस्त्रीमुख्यास्ताभिः प्रयोज्याभिरित्यर्थः । कटाक्षपातेनकटाक्षभङ्ग्या परिहासं क्षेपनर्मोक्त्यादिनाभिप्रायान्तरोपदर्शनरूपमुपहासमचीकरत्तरामतितरां कारयामास । तथा—कश्चिच्च वरयात्रया निमित्तेनागतान्वरपक्षीयानन्यान्राजलोकान्धराप्सरोभिर्दिव्याभिरुर्वशीर-म्भाप्रभृतिभिः पुरसुन्दरीभिर्भोजनाभिरभोजयद्भोजनमकारयत् । परिवेषणार्थं कांश्चित्सह-भोजनार्थं कांश्चिदादिशदित्यर्थः । विवाहे कन्यापक्षीयैर्वरपक्षपरिहासकरणस्य भोजनादेश्च पुरस्सरभोजनो मुख्यः । कटाक्षणशब्दात् 'तत्करोति—' इति ण्यन्तात्त्युट् । निजप्रजाः, 'हृक्रोः—' इति कर्मत्वम् । आगतान्, भुजेः प्रत्यवसानार्थत्वात् 'गतिबुद्धि—' इति कर्मत्वम् । अभोजयत्, 'निगरणच-लनार्थेभ्यश्च' इति परस्मैपदम् ॥

तमेव प्रकारमाह—

स कंचिदूचे रचयन्नु तैलनोदरस्य नाकस्पर्धैर्वोढितम् ।
पिपासतः काञ्चन सर्पिरञ्जलिं तवार्पितानापि कान्तनन्दनम् ॥ ४९ ॥

स इति ॥ स दमः कंचित् नलपक्षीयमेवमूचे । स्वजनमुखेनेति शेषः । अत्र हे वारयात्रिक, अत्र पात्रे । आसु परिवेपिकासु मध्ये वा । काश्चन स्त्रियस्तव रुचेरभिलापस्य यथोचितमुचितानतिक्रमेण तेमनाख्यस्य व्यञ्जनस्योपहारमानयनं रचयन्तु कुर्वन्तु यावदभिलाषं तेमनमानयन्तु किमिति प्रश्नकालः(कुः), एता एवं कुर्वन्तु, त्वं भुङ्क्ष्वेति भोजनोपदेशो वा । एवमुत्तरत्रापि । तथा—पिपासतस्तृपालोस्तव पानार्थं सर्वतोमुखं जलमप्यर्पयन्तां ददतु । तथा—ओदनमपि कामं यथेच्छमर्पयन्ताम् ॥

परिहासस्तु ॥ अत्र आसु मध्ये । विविक्ते स्थाने वा । अङ्गरुचेः स्तनजघनाद्यङ्गानां रुचेर्दर्शनाद्यभिलापस्योचितं यथा भवति तथा तव मानसोऽपहारमपहरणं रचयन्तु । स्तनादिदर्शनादिनान्तःकरणहरणं कुर्वन्त्वित्यर्थः । कायकान्तेर्हेतोः सौन्दर्यातिशयान्मनोहरणं कुर्वन्त्विति वा । तथा—पिपासतश्चुम्बनेच्छोस्तव सर्वतो नेत्रादिचुम्बनस्थाने दर्शनमात्रेण कामस्य हर्षकरं मुखमर्पयन्ताम् । बहूनां चुम्बनस्थानानामेकत्र मुखे वर्तमानत्वान्मुखमेव तव ददत्वित्यर्थः । अथ च—कामस्य हर्षकरं वराङ्गमपि चुम्बनार्थमर्पयन्ताम् । अथ च—मुखं पिपासतस्तव सर्वदा वराङ्गमेव ददतु । 'स्यात्तेमनं तु निष्ठानम्' इत्यमरः । पूर्वव्याख्याने तवेत्युभयत्र योज्यम् । मुखं सर्वत इति, 'उभसर्वतसोः–' इति द्वितीया । तव, ते इति च संबन्धसामान्ये षष्ठी ॥

मुखेन तेत्रोपविशत्वसाविति प्रयाच्य सृष्टानुमतिं खलाहसत् ।
वराङ्गभागः स्वमुखं मतोऽधुना स हि स्फुटं येन किलोपविश्यते ५०

मुखेनेति ॥ काचित्खला वक्रोक्त्यादिभाषिणी हे वारयात्रिक, असौ मत्सखी पुरुषो वात्र स्थाने ते तव मुखेनोपलक्षितत्वात् । संमुखमिति यावत् । त्वदुपायेन वा । त्वदाज्ञयेति यावत् । त्वया सह भोजनार्थं तव पुरस्ताद्वा । भोजनार्थमुपविशत्विति प्रयाच्य संप्रार्थ्य मुखेनोपविशत्विति सृष्टा दत्तानुमतिरनुज्ञा येन तं वारयात्रिकं पश्चादहसत् । हासे कारणमाह—हि यस्माद्येन साधनेन किलोपविश्यते स हि वराङ्गभागो गुह्यदेशः । अमुना जनेन स्वस्यात्मनो मुखं स्फुटं निश्चितं मतः । मुखेन करणेनोपविशत्वित्येवमर्थपरं तद्वचनमज्ञात्वा तेनानुज्ञायां दत्तायां कटिदेशाधःप्रदेशेन किलोपविश्यते इत्येवं वदतानेन स्वमुखं वराङ्गत्वेन मतं यस्मात्, तस्माद्धास्यं युक्तमित्यर्थः । सर्वजनबोधपुरःसरं जहासेति वा । अथच—ते मुखेनोपविशतु, अपितु पुरीषोत्सर्गार्थमुपविशत्विति प्रयाच्य तदीयं जुगुप्सितमर्थमगृहीत्वा सृष्टानुमतिं तमहसत् । 'मुखं निःसरणे वक्त्र प्रारम्भोपाययोरपि' इति विश्वः ॥

युवामिमे मे स्वितमे इतीरिणौ गले तथोक्ता निजगुच्छमेकिका ।
न भास्यदस्तुच्छगलो वदन्निति न्यधत्त जन्यस्य ततः पराक्रुपत् ॥५१॥

युवामिति ॥ इमे पुरोवर्तिन्यौ युवां मे मम (तेन) स्वितमे उत्तमे स्त्रियौ भवादृशे स्त्रीरत्ने न दृष्टे इतीरिणो वदतः स्तुवतः । अथच—मत्संबन्धिन्यौ प्रियतमे भवेतामिति वा परिहासाद्वदतः । कदाचिज्जनस्य वरपक्षीयस्य गले तथा यथा त्वयोच्यते तथेत्युक्त्वा तयोर्द्वयोर्मध्ये एकिका एकैव निजगुच्छं रज्जुस्थाने हारविशेषमेवेत्युक्त्वा न्यधत्त । इतीति किम्—

१ 'अत्रोभयोरप्यर्थयोर्विवक्षितत्वेन प्रकृतत्वात्केवलप्रकृतश्लेषः' इति जीवातुः ।

हे जन्य, त्वं अदः पूर्वोक्तं इमे मे इति शब्दं वदन्कुर्वन्, तु पुनश्छागश्छागो न भाति। अपितु एवं शब्दं कुर्वञ्छाग एव स्फुरति। अथच—तुच्छः स्तनशून्यो गलः कण्ठो यस्य एवंभूतो न भाति। अजस्य गले स्तनौ तिष्ठतः, त्वं तु तादृक्शब्दोऽपि स्तनशून्य इति कारणान्न शोभसे। अथच रज्जुरहितकण्ठो न भासीति रज्जुस्थाने हारं धत्ते स्मेत्युभयतो लम्बमानो हार एव गलस्तनस्थाने भवतीत्यर्थः। ततोऽनन्तरं परा द्वितीया रज्जुवद्धारमेव धृत्वाजमिव तमाकृष्टकण्ठे बद्धा दूरं निनाय। अजो हि मिमेमेशब्दो रज्ज्वा कण्ठे बद्धा कृष्यते इति परिहासः। अथच—रिक्तकण्ठो ग्रासरहितो न भासीति निजगुच्छं स्वहस्तस्थितं पल्लवस्तबकं गले मुखान्तः न्यधत्त नितरां बलाच्चिक्षेप, द्वितीया च दत्तपल्लवग्रासं छागमिव चकर्षेति परिहासः। अथच—एवमस्मत्स्तुतिं कुर्वन् तुच्छगलो हाररहितकण्ठो न भासीति वदन्ति। गले हारं परितोषवशाच्चिक्षेपेति वा। यद्वा अस्मत्प्रेम्णा भवत्यो मे प्रियतमे इति वदन् त्वं शून्यकण्ठो न भाति। मयापि त्वं वरणीय इति मालास्थाने हारमेव चिक्षेप। परा च य(त)मेव धृत्वा परिहासमिषेण संभोगार्थमेव चकर्षेति भावः। मिमेमे इति परिहासपक्षे युवामिति बिन्दुरनुस्वार एवं वदन्युवा तरुणश्छगल इति वा योज्यम्। अकृषत् लङ्॥

> नलाय वालव्यजनं विधुन्वती दमस्य दास्या निभृतं पदेऽर्पितात्।
> अदासि लोकैः सरटात्पटोज्झिनी भयेन जङ्घायतिलङ्घिरंहसः॥ ५२॥

नलायेति॥ नलाय नलार्थं वालव्यजनं मयूरपिच्छतालवृन्तं चामरं वा विधुन्वती चालयन्ती नलसेवापरा काचित्सुन्दरी दमस्य दास्या निभृतं गुप्तं यथा तथा पश्चादागत्य पदे चरणसमीपेऽर्पितान्मुक्तात्सरटात्कृकलासाद्भयेन पटमुज्झितुं त्यक्तुं शीलमस्याः स्वपटवस्त्रा विवस्त्रीभूता सती लोकैरदासि हसिता। जनहासे हेतुरभूदित्यर्थः। किंभूतात्सरटात्। जङ्घाया आयतिर्दैर्घ्यं तदुल्लङ्घनशीलं रंहो वेगो यस्य तस्मात्। अत एव भयहेतोः सरटस्योर्ध्वारोहणं ज्ञातव्यम्॥

> पुरःस्थलाकूलमदात्खला कृसीमुपाविशत्तत्र समुत्थितस्य भाजनः।
> पुनस्तमुत्थाप्य निजासने पदाऽहसच्च पश्चात्कृतपुच्छमन्दिरा॥ ५३॥

स्वयं कथाभिर्वरपक्षसुभ्रुवः स्थिरीकृतायाः पदयुग्ममन्तरा।
परेण पश्चान्निभृतं न्यधापयद्ददर्श चादर्शतलं हसन्खलु ॥ ५४ ॥

स्वयमिति ॥ कश्चित्खलः परिहासचतुरः स्वयं स्वेनैव कथाभिर्हंसदूत्यादिवार्ताभिः स्थिरीकृतायाः कथाश्रवणप्रवणीकृताया वरपक्षसुभ्रुवो नलपक्षीयायाः सुन्दर्याः । वरस्य पक्षे पार्श्वे स्थिताया वा । पदयुग्ममन्तरा चरणद्वयमध्ये परेण स्वसखेन प्रयोज्येन निभृतं गुप्तं यथा तथा पश्चाद्भागेनादर्शतलं दर्पणं न्यधापयदस्थापयत् । हसन्सन् प्रतिबिम्बितोरुजघनकामसदनं तं दर्पणं ददर्श च । भगादिदर्शनादेव हासः पश्चादनन्तरं ददर्शेति वा । पदयुग्मम्, 'अन्तरान्तरेण' इति द्वितीया ॥

अथोपचारोद्धुरचारुलोचनाविलासनिर्वासितधैर्यसंपदः ।
स्मरस्य शिल्पं वरवर्गविक्रिया विलोककं लोकमहासयन्मुहुः ॥ ५५ ॥

अथेति ॥ अथ कामरहितकेवलपरिहासानन्तरं वरवर्गाणां नलपक्षीयराजसङ्घानां विक्रिया मनोविकारो याभ्यस्ताः । यासां दर्शनेन नलपक्षीयाणां कामविकारो भवति ता वराङ्गना विलोककं द्रष्टारं लोकं मुहुरहासयन् । तद्रूपादिदर्शनसमुत्पन्नकामविकारं वरलोकं दृष्ट्वा लोकोऽहसदिति भावः । कीदृश्यः—उपचारे कटाक्षक्षेपादिना स्वानुरागज्ञापके प्रीतिविलोकने विषये उद्धुराण्युत्सुकानि चारूण्यतिविशालानि चतुराणि लोचनानि यासां ताः । तथा—विलासैः कटाक्षविक्षेपादिभिः कृत्वा निर्वासितास्त्याजिता धीराणां विलासिनां धैर्यसंपदो याभिस्ताः । तथा—स्मरस्य शिल्पं कृतिरतिसुन्दर्यः । उपचारे परिवेषणादावुद्धुराश्च ताश्चारुनेत्राश्चेति वा । उपचारोद्धुरचारुलोचनानां विलासैस्त्याजिता धैर्यसंपद्येन तस्य स्मरस्य शिल्पं विलसितं कर्तृ वरवर्गविकारदर्शिनं लोकं मुहुरहासयदिति वा । स्वाशयज्ञापनोत्सुकानि चारूणि नेत्राणि यासु तथा—विलासैः पूर्वोक्तैरेव त्याजिता धैर्यसंपद्याभिः, यासु वा । तथा—कामजनिता वरवर्गस्य विक्रिया विकाराः कर्त्र्यो विलोककं लोकं मुहुरहासयन्निति वा । इदानीं कामचेष्टापुरःसरं परिहासः प्रवृत्त इति भावः ॥

तदेवाह—

तिरोवलद्वक्रसरोजनालया स्मिते स्मितं यत्खलु यूनि बालया ।
तया तदीये हृदये निखाय तद्व्यधीयतासंमुखलक्ष्यवेधिता ॥ ५६ ॥

तिर इति ॥ कस्मिंश्चिद्यूनि तरुणे स्मिते सानुरागं हसिते सति कयाचिद्बालया तिरो वक्रं यथा तथा वलद्वक्रसरोजनालया वलितः वलन् मुखकमलस्य दण्डो ग्रीवा यस्याः एवंभूतया सत्या यत्स्मितमीषदहासि । तया बालया तदीये हृदये हसितुर्वक्षसि तत्स्मितमेव निखाय खनित्वा आरोप्यासंमुखस्य लक्ष्यस्य वेध्यस्य वेधिता वेधकता व्यधीयत कृता । खलूत्प्रेक्षे । पराङ्मुखलक्ष्यवेधकत्वं धनुर्विद्यायां निपुणस्यैव भवति । यः पराङ्मुखः सँल्लक्ष्यं विध्यति । पराङ्मुख्यापि तस्मिन्नात्मानुरागो निवेशित इत्यर्थः । स्मितं लज्जा चानुरागसूचिका । मया स्वानुरागद्योतनार्थं हास्ये कृतेऽनया हास्यपूर्वं लज्जितं चेत्तर्हीयं मय्यनुरक्तेति निश्चितवन्तं तत्स्मितमेव

कामवाणीभूय न्यपीडयदिति भावः । वाल्त्वादपि वलितग्रीवलम् । प्रौढा तु संमुखमेव हस-ति । स्मिते, स्मितमिति कर्तरि भावे च क्तः । वेधिता, विधेस्तौदादिकात्ताच्छील्ये णिनिः ॥

कृतं यदन्यत्करणोचितत्यजा दिदृक्षु चक्षुर्यदवारि बालया ।
हृदस्तदीयस्य तदेव कामुके जगाद वार्तामखिलां खलं खलु ॥ ५७ ॥

कृतमिति ॥ करणस्य कर्तव्यस्योचितं परिवेषणादि त्यजति तया बालया यदन्यदप्रस्तुतं व्यापारान्तरं कृतम् । तथा—पुनःपुनः दिदृक्षु दर्शनेच्छु किंचिदृगन्तमात्रेण द्रष्टुं प्रवृत्तमपि चक्षुर्यदवारि अर्धात्परावर्तितम् । तदेवान्यकरणचक्षुर्वारणरूपं द्वयमेव कामुके विषये तदीयस्य हृदो बालासंबन्धिनो मनसोऽखिलां वार्तामाशयं जगाद । यतः । खलं सूचकम् । खल्तृप्रेक्षे निश्चितं वा । दुर्जनो ह्यन्यदीयमनोगतमन्यस्मै निवेदयति । लज्जानुभाववशादियं मय्यनुरक्तेति सोऽज्ञासीदिति भावः । 'खले' इति पाठे स्वाशयद्योतनपरेङ्गितज्ञानचतुरे इति कामुकविशेषणम् ॥

जलं ददत्याः कलितानतेर्मुखं व्यवस्यता साहसिकेन चुम्बितुम् ।
पदे पतद्धारिणि मन्दपाणिना प्रतीक्षितोऽन्येक्षणवञ्चनक्षणः ॥ ५८ ॥

जलमिति ॥ कंचितिपपासुं जलं पाययमानायाः पादप्रक्षालनार्थं वा कस्मैचिज्जलं ददत्याः । अत एव कलितानतेर्नम्रीभूतायाः कस्याश्चित्सुन्दर्याः समीपवर्ति मुखं जनमध्ये चुम्बितुं व्यव-स्यता कृतोद्यमेन । अत एव साहसिकेनाविचार्यकारिणा केनचित्कामुकेन पतद्धारिणि पदे मन्द-पाणिना विलम्बार्थं विरलाङ्गुलि(य)त्वगलज्जलपाणिना सता । पादप्रक्षालनालसपाणिना वा सता । अन्यस्यां चुम्बनसामग्र्यां सत्यामेकपङ्क्तिनिविष्टानामन्येषां तत्र विचरतां वा । ईक्षणस्य दर्शनस्य ईक्षणानां नेत्राणां वा वञ्चनार्थं प्रतारणार्थमनीक्षणार्थं क्षणोऽवसरः प्रतीक्षितो विल-म्बेन गवेषितः । पानपक्षे—पदे चरणे विरलाङ्गुलिभ्यः पतद्वारि यस्मिन्नेवंभूते । पादप्रक्षाल-न पक्षे—पतद्धारिणि पदे मन्दपाणिनेति योज्यम् । अन्यानिरीक्षणावसरं प्रतीक्ष्य तन्मुखं चुचुम्बेति भावः ॥

युवानमालोक्य विदग्धशीलया स्वपाणिपाथोरुहनालनिर्मितः ।
श्लथोऽपि सख्यां परिधिः कलानिधौ दधावहो तं प्रति गाढबन्धताम् ५९

युवानमिति ॥ विदग्धशीलया चतुरया कयाचित्सुन्दर्या युवानं कंचित्तरुणमालोक्य क-लानां सकलविद्याचातुर्याणां निधौ स्थानभूतायां स्वासन्नस्थायां प्रियवयस्यायाम्, अथ च—सखी-रूपे चन्द्रे स्वपाणिभ्यामेव पाथोरुहनालाभ्यां कमलनालाभ्यां निर्मितो रचितः कण्ठाश्लेषरूपः परिधिः श्लथोऽपि शिथिलबन्धोऽपि तं नेत्रलक्ष्यं युवानं प्रति लक्ष्यीकृत्य गाढबन्धतां दृढब-न्धनत्वं दधौ चकार । अहो आश्चर्ये । कलानिधौ च परिवेषो युक्तः । श्लथस्य गाढत्वविरोधा-त्तद्रूपां चन्द्रे वा कृतस्यालिङ्गनस्य परिवेष बन्धनस्वरूपत्वादाश्चर्यम् । मदालिङ्गनेच्छुरयं स्वा-शयसूचनाय सखीमालिङ्गितवती मामेवालिलिङ्गेति तदाशयज्ञस्तरुणोऽभूदिति भावः ॥

नतभ्रुवः स्वच्छनखानुबिम्बनच्छलेन कोऽपि स्फुटकम्पकण्टकः ।
पयो ददत्याश्चरणे भृशं क्षतः स्मरस्य बाणैः शरणं न्यविक्षत ॥ ६० ॥

नतेति ॥ स्मरस्य बाणैर्भृशं क्षतो नितरां पीडितः । अत एव स्फुटः प्रकटः कम्पः कण्टकः कम्पः कण्टकश्च रोमाञ्चश्च यस्य स कोऽपि कामी स्वच्छनखेषु तदीयनिर्मलनखेष्वनुबिम्बनच्छ-

लेन प्रतिबिम्बव्याजेन पयो दुग्धं जलं वा ददत्याः परिवेषयन्त्याः पाययमानायाः कस्याश्चि-
न्नतभ्रुवश्च रणे एव शरणे रक्षितृणी न्यविक्षत प्राविशत्। कामपीडाशान्त्यर्थं चिरं चरणाव-
लोकनव्याजेन प्रार्थनप्रणतिसंज्ञामकार्षीदिति भावः। भीतः सकम्पो बाणैः सशल्यः सन्
कंचिच्छरणं विशति, क्षत इवेति लुप्तोत्प्रेक्षा वा। 'चरणोऽस्त्रियाम्', इत्यमरोक्तेश्चरणे द्विती-
याद्विवचनान्तम्। 'चरणौ' इति च पाठः। 'शरणम्' इति पाठे चरणरूपद्वयं रक्षितारमिति
व्याख्येयम्। न्यविक्षत, 'नेर्विशः' इति तङ्॥

मुखं यदस्मायि विभुज्य सुभ्रुवा ह्रियं यदालम्ब्य नतास्यमासितम्।
अवादि वा यन्मृदु गद्गदं युवा तदेव जग्राह तदाप्तिलग्नकम्॥ ६१॥

मुखमिति॥ तयैवान्यया वा सुभ्रुवा विभुज्य मुखं वक्रीकृत्य यदस्मायीषद्धासि।
तथा—ह्रियमालम्ब्य लज्जामाश्रित्य नतास्यं नम्रमुखं यथातथा यदासितं स्थितम्। मृदु
मञ्जुलं गद्गदमस्पष्टवर्णं यथा तथा यदवादि। युवा तदेव त्रयं तस्या आप्तिस्तस्या लग्नकम्।
प्राप्तिनिश्चायकमित्यर्थः। जग्राह। ज्ञातवानित्यर्थः। स्मिताद्यनुभाववशादियं मया लब्धैवेति
निश्चिकायेति भावः। वा समुच्चये॥

विलोक्य यूना व्यजनं विधुन्वतीमवाप्तसत्त्वेन भृशं प्रसिष्विदे।
उदस्तकण्ठेन मृषोष्मनाटिना विजित्य लज्जां ददृशे तदाननम्॥ ६२॥

विलोक्येति॥ यूना व्यजनं विधुन्वतीं चालयन्तीं सुन्दरीमकस्माद्विलोक्य तद्दर्शनादे-
वाप्तसत्त्वेन प्राप्तसात्त्विकभावेन सता भृशं प्रसिष्विदे। सात्त्विकः स्वेदः प्राप्त इत्यर्थः। आन-
न्दोद्रिक्तो मनोविकारः सत्त्वम्। तमेव प्रस्वेदं निह्नोतुं मृषा अलीकमूष्माणं प्रस्वेदनिमित्तं
संतापं नाटयति एवंशीलेनाभिनयता स्वेदापाकरणव्याजेनोदस्तकण्ठेनोर्ध्वीकृतमुखेन सता
लज्जां विजित्य परित्यज्य तदाननं तस्या मुखं ददृशे। स्वकामपीडाज्ञापनार्थं तथापश्यदिति
भावः। प्रसिष्विदे, षोपदेशत्वात्षत्वम्। 'प्रसिस्विदे' इति पाठश्चिन्त्यः॥

स तत्कुचस्पृक्कचेष्टिदोर्लताचलद्दलाभव्यजनानिलाकुलः।
अवाप नानानलजालशृङ्खलानिबद्धनीडोद्भवविभ्रमं युवा॥ ६३॥

स इति॥ स पूर्वोक्तो युवा व्यजनं चालयन्त्यास्तस्याः पूर्वोक्तायाः स्त्रियाः कुचयोः स्पृट-
ग्राख्यमालिङ्गनं चेष्टते करोति एवंशीला दोर्लता बाहुवल्ली तस्याः संबन्धि चलद्दलाभं चपलप-
र्णतुल्यं व्यजनं तालवृन्तं तस्यानिलेन कम्पनसंजातवायुना आकुलो विवशीकृतः स्तनस्पर्शिभु-
जचालितव्यजनविलोकनमात्रसंजातानुरागतरलः सन् नानानलानामनेकशरकाण्डानां जालस्य
संघस्य (नैलनालानां नलदण्डानां वा) या शृङ्खला निर्बन्धनहेतुत्वात्तेषां परस्परग्रथननि-
र्मितः पञ्जरस्तया नितरां बद्धः संकुचितप्रचारीकृतो यो नीडोद्भवः पक्षी तस्येव विभ्रमः
पञ्जरमध्य एव यद्विचित्रं भ्रमणम्। अथ च—तस्य विलाससाम्यमवाप। जनसंमर्देऽप्यदुष्प्र-

---

१ 'चरणे इति द्वितीयाद्विवचनान्तम्, सप्तम्यन्तमित्यपि' इति सुखावबोधा। २ 'सात्त्विकोऽयं [illegible] व्यञ्जकप्रयोगादन्या' इति जीवातुः। ३ 'अथागन्तुकेन घर्मस्वेदेन सहजसात्त्विकस्वेदगूहनमिति [illegible] नालंकारः' इति जीवातुः। ४ 'चेष्ट' इति पाठो जीवातुसुखावबोधासंमतः। ५ 'नानानल-नाल—' इति पाठे 'नलनालानां नलकाण्डदण्डानाम्' इति व्याख्येयम्—'इति सुखावबोधा। जीवातावपि 'नलनाल—' इत्येव पाठो लभ्यते।

गातिशयाच्छ्वसनचालनदम्बुजान्तर्वर्तितत्कुचयोः परस्परमपि संस्पर्शे सांसर्गिकप्रीत्या साक्षा-
दिव तत्कुचस्पृष्टकालिङ्गनमनुभवञ्जनशङ्कया यथेष्टं चेष्टितुमशक्तः कामातुरः पञ्जरबद्धपक्षिनि-
र्विन्यस्तिवानुबभूवेति भावः । लतापाश्वपल्लवदल्लत्वं युक्तम् । व्यजनचालनव्याजाच्चलतो भुज-
स्यापि स्तनसंस्पर्शे स्पष्टकालिङ्गनत्वं युक्तम् । 'नलजाल—' इति पाठः । 'गलनाल—' इति
पाठे नानाविधाः कण्ठनालसंबन्धिन्यः कण्ठबन्धनकारिण्यः शृङ्खला इत्यर्थः ॥

अवच्छटा कापि कटाक्षणस्य सा तथैव भङ्गी वचनस्य काचन ।
यथा युवभ्यामनुनाथने मिथः कृशोऽपि दूतस्य न शेषितः श्रमः ॥६४॥

अवेति ॥ सा कापि वर्णयितुमशक्या भावोल्लसनचतुरा कटाक्षणस्य नेत्रप्रान्तवक्रवीक्ष-
णस्यावच्छटा भङ्गिपरम्परा वा । तथैव तदुचितैव सा काचन कापि वक्रोक्त्यादिरूपा वच-
नस्य भङ्गी रचनाप्यभूदिति शेषः । सा का—यया कटाक्षावच्छटया वचनभङ्ग्या च कर्त्र्या
युवभ्यां मिथः परस्परमनुनाथनेऽन्योन्यप्रार्थने विषये कृशोऽप्यल्पोऽपि दूतस्य श्रमः प्रयासो
न शेषितोऽवशिष्टीकृतः । यया कृत्वा युवभ्यां न शेषित इति वा । आत्मनैव चेष्टाविशेष-
रचनाद्वारा त्वं किमेष्यति, अहं वैष्यामीत्यादिप्रश्ननिश्चयादृतस्यानवसर इति भावः । यूनो-
र्वैदग्ध्यं सूचितम् । 'युवतिश्च युवा च' इत्यत्र 'पुमान् स्त्रिया' इत्येकशेषः । कर्तरि तृतीया
चतुर्थी वा । शेषितः, 'तत्करोति—' इति ण्यन्तान्निष्ठा ॥

पपौ न कोऽपि क्षमनास्यमेलितं जलस्य गण्डूषमुदीतसंमदः ।
चुचुम्ब तत्र प्रतिबिम्बितं मुखं पुरः स्फुरन्त्याः स्मरकार्मुकभ्रुवः ॥ ६५ ॥

पपाविति ॥ कश्चित्कोऽपि युवा आस्येन मुखेन मेलितं योजितं करपुटे पानार्थं धृतं जल-
स्य गण्डूषं पेयं जलं क्षणमात्रं न पपौ । यतः—उदीतसंमद उत्पन्नानुरागः । तथापि किमिति
न पपावित्यत आह—तत्राधरसंपृक्ते करपुटे धृते प्रतिबिम्बितं पुरः स्फुरन्त्या विलसन्त्याः
स्मरकार्मुकवद्भ्रुवौ यस्यास्तस्या मुखं चुचुम्ब उदीतसंमदः सन्वा चुम्बितवान् । जले पीते
प्रतिबिम्बासंभवात्पानार्थं गृहीते जले तस्या मुखप्रतिबिम्बे प्रतिबिम्बितनिजमुखचुम्बनदर्शन-
कौतूहलवशात्तस्या यावदवस्थानं तावन्न पपौ । गतायां तु प्रतिबिम्बाभावात्पपाविति भावः ।
पाठस्यान्वे(न्ये)क्षणवशं यावन्न पपौ, तैरीक्षिते तु जलं पपौ । पुरः स्फुरन्त्या जलं
ददत्या एव मुखमिति वा ॥

हरिन्मणेर्भोजनभाजनेऽर्पिते गताः प्रकोपं किल वारयात्रिकाः ।
भृतं न शाकैः प्रवितीर्णमस्ति वस्त्विपदमेवं हरितेति बोधिताः ॥ ६६ ॥

हरिदिति ॥ हरिन्मणेर्नीलमणेर्भोजनार्थं भाजने पात्रेऽर्पिते पुरःस्थापिते सति पत्रावली-
भ्रान्त्या शाकपूर्णत्वभ्रान्त्या वा किल स्फुटं प्रकोपं नितरां रोषं प्राप्ता वारयात्रिका वरयात्रा
यान्तो [illegible] बोधिताः । इति किम्—इदं वो युष्मभ्यं प्रवितीर्णं पात्रं
शाकैः [illegible] न भृतं [illegible] पूर्णं वा । किंत्विद-
[illegible] हरिता [illegible] हरिताः । तद-
स्तुष्य इत्यर्थः । [illegible] ॥

१ '[illegible]' इति जीवातुः ।

ध्रुवं विनीतः स्मितपूर्ववाग्युवा किमप्यपृच्छन्न विलोकयन्मुखम् ।
स्थितां पुरः स्फाटिककुट्टिमे वधूं तदङ्घ्रियुग्मावनिमध्यबद्धदृक् ॥ ६७ ॥

ध्रुवमिति ॥ विनीतो ध्रुवमाचारवानिव स्मितपूर्ववाङ्मुखं न विलोकयन्नपश्यन् युवा तस्या अङ्घ्रियुग्मस्यावनिमध्ये भूमिभागे बद्धदृग्योजितनेत्रः सन् पुरः स्फटिकनिबद्धभूमौ स्थितां वधूं किमप्यपृच्छत् । अग्रे स्फटिककुट्टिमप्रतिबिम्बिततदङ्गदर्शनसंजातस्मितः पुनरपि भगदर्शनार्थमेव गोष्ठीमिषेण तां स्थिरीचकारेति भावः । अधोदर्शनार्थमेव मुखं न विलोकितम् । अयं श्लोकः क्वचित्[1] ॥

अमी लसद्बाष्पमखण्डिताखिलं वियुक्तमन्योन्यममुक्तमार्दवम् ।
रसोत्तरं गौरमपीवरं रसादभुञ्जतामोदनमोदनं जनाः ॥ ६८ ॥

अमी इति ॥ अमी जना रसात्स्वादविशेषानुरागादोदनमभुञ्जत । किंभूतम्—लसद्बाष्पं विद्यमानोष्माणमीषदुष्णम् । तथा—अखण्डितश्चासावखिलः संपूर्णश्च तम् । पाकेऽप्यविच्छिन्नतण्डुलमिति यावत् । अभग्नमखिलं स्वरूपं यस्येति वा । तथा—पाकसमये नवनीतक्षेपाद्वियुक्तमसंलग्नसिक्थम् । तथा—अमुक्तमत्यक्तं मार्दवं येन सुजातिशालिबीजत्वादतिकोमलम् । तथा—रसोत्तरं स्वादुबहुलम् । तथा—गौरं चन्द्रधवलम् । तथा—अपीवरं जीरकादिसुजातिशालिबीजत्वात्सूक्ष्ममदीर्घतण्डुलम् । अत एव—आमोदनं हर्षहेतुम् । परिमलबाहुल्याद्वा आमोदनम् । अणुत्वे चागलद्बाष्पत्वम्, मार्दवत्यागेऽन्योन्यं वियुक्तत्वम्, अन्तःकरणमार्दवे परस्परविरोध इति च विरोधाभासः ॥

वयोवशस्तोकविकस्वरस्तनीं तिरस्तिरश्चुम्बति सुन्दरे दृशा ।
स्वयं किल स्रस्तमुरःस्थमम्बरं गुरुस्तनी ह्रीणतरा परादृदे ॥ ६९ ॥

वय इति ॥ सुन्दरे जन्यजने दृशा वयोवशेन निर्गच्छदागच्छच्छैशवतारुण्यपारतन्त्र्येण स्तोकमीषद्विकस्वरावुल्लसितमण्डलौ स्तनौ यस्यास्तां वयःसंधौ वर्तमानां मुक्तां(ग्धां) तिरस्तिरो वक्रं यथा तथा (दृशा) चुम्बति पश्यति सति सानुरागकटाक्षमात्रेणापि चुम्बनजन्यं सुखमनुभवति । गुरुस्तनी तारुण्यभरपीवरदृढतरकुचा अपरान्या स्त्री तदनुरागाद्ध्रीणतरातिसलज्जा सती यथास्थानस्थितमपि स्वयमात्मनैव स्रस्तं स्थानच्युतं जातमिवोरःस्थमम्बरं हृदयावरणवस्त्रं बलाद्विगलितं कृत्वा पुनस्तदाच्छादनायाददेऽङ्गीचकार । मुग्धां प्रत्यनक्षरं हृदयावरणसंज्ञानं चकार । विदग्धस्त्रीरीतिरीदृशी । अथ च—त्वमिमामल्पस्तनीं मुग्धां त्वत्संभोगासहनां किं पश्यसि । किंतु पीनघनस्तनीं त्वत्संभोगक्षमां मां पश्येति स्वाशयज्ञापनायादृष्टमपि पीनघनस्तनयुगमदर्शयदिति भावः । ह्रीणतरा, 'तसिलादिषु–' इति पुंवद्भावः ॥

यदादिहेतुः सुरभिः समुद्भवे भवेद्यदान्यं सुरभिर्ध्रुवं ततः ।
वधूभिरेभ्यः प्रवितीर्य पायसं तदोघकुल्यातटसैकतं कृतम् ॥ ७० ॥

यदिति ॥ सुरभिः कामधेनुर्गौर्वा । अथ च—सौरभ्ययुक्तः पदार्थः । समुद्भव उत्पत्तिविषये यस्यादिहेतुर्दुग्धादिद्वारा परम्परया मूलकारणं ततो ध्रुवं तस्मादिव सौरभ्यवर्नेयुक्त-

१ 'अत्र यूनः कोमलमात्मने पादावलोकनेन मुखावलोकनादितिरस्करणमनेयोगादिनीतलोकेन' इति जीवातुः ।

येस्तः। मुखसीत भोजनसाधनलो शिद्धेऽपि सीत्कारादिविशिष्टलयोतनार्थं मुखेनेत्युक्तम्
राजिकाराद्रमोजिनामियं जातिः॥

वियोगिदाहाय कदूभवत्त्विषस्तुषारभानोरिव खण्डमाहृतम्।
सितं मृदु प्रागथ दाहदायि तत्खलः सुहृत्पूर्वमिवाहितस्ततः॥ ७४॥

वियोगीति॥ वियोगिनां स्त्रीपुंसानां पीडार्थं कदूभवन्त्यस्त्विषो दीप्तयो यस्यास्तथाभूते-
स्तुषारभानोश्चन्द्रस्याहृतं खण्डमिव सितं श्वेतम्। तथा प्राक्प्रथमं मृदु प्रथमस्पर्शसमये कोम-
लमथ पश्चान्मुखप्रक्षेपानन्तरं तालुजिह्वादेस्तैक्ष्ण्यातिशयाद्दाहदायि दाहकारि आनीतम्।
तद्राजिकाराद्रमभोजीति पूर्वेणान्वयः। तुषारभानोः सकाशादाहृतमिति वा। क इव—खल
इव। किंभूतः—पूर्वं सुहृत्प्रायात (आसो) रमणीयः, ततोऽनन्तरमहितो वैरी। 'रायी' इति
कान्यकुब्ज(ब्ज)भाषायाम्॥

नवौ युवानौ निजभावगोपिनावभूमिषु प्राग्विहितभ्रमिक्रमः।
दृशोर्विधत्तः स यदृच्छया किल त्रिभागमन्योन्यमुखे पुनः पुनः॥७५॥

नवाविति॥ वयःसंधौ वर्तमानौ नवावप्रगल्भावत एव निजभावगोपिनौ स्वानुरागाप-
ह्नवपरौ कौचिद्युवानावभूमिषु लोकव्यवहारायोग्येषु स्वायोग्येषु ;वानुद्देश्येषु वा वस्तुषु प्राक्पूर्वं
विहितः कृतो भ्रमेर्निरर्थकभ्रमणस्य क्रमः परम्परा यत्र येन वा एवंभूतं दृशोर्नेत्रयोस्त्रिभागं
तृतीयांशरूपं कटाक्षमन्योन्यमुखे पुनःपुनर्विधत्तः स चक्रतुः। यदृच्छया किल। अन्यवि-
लोकनवत्स्वेच्छामात्रेण क्रमप्राप्तमन्योन्यमुखविलोकनं कुरुतः, नत्वनुरागेणेति लोकप्रतीति-
र्यथा स्यादेवं वस्त्वन्तरविलोकनव्याजेनान्योन्यमुखं पुनःपुनः कटाक्षैर्वीक्षांचक्राते इति भावः।
त्रिभागमिति पूर्ववत्समर्थनीयम्॥

व्यधुस्तमां ते मृगमांससाधितं रसादशित्वा मृदु तेमनं मनः।
निशाधवोत्सङ्गकुरङ्गजैरदः पलैः सपीयूषजलैः किमश्रपि॥ ७६॥

व्यधुरिति॥ ते जन्यजना मृगमांसैः साधितं राद्धं संस्कृतं मृदु तेमनाख्यं व्यञ्जनवि-
शेषं रसात्प्रीत्या भुक्त्वेति मनो व्यधुस्तमां नितरां चक्रुः। इति किम्—अदस्तेमनं निशा-
धवश्चन्द्रस्तस्योत्सङ्गे वर्तमानः कुरङ्गो हरिणस्तस्माज्जातैः पीयूषजलैरमृतरूपैर्जलैः सह वर्तमानैः
पलैर्मांसैरश्रपि किमपाचि किम्। रसातिशयान्मनसैवं तर्कितवन्त इत्यर्थः। तेमनस्यातितरां
स्वादुत्वमुक्तम्। अश्रपि, 'श्रा पाके' इत्यस्मात्कर्मणि चिणि घटादित्वान्मित्त्वाद्ध्रस्वः॥

परस्पराकूतजदूतकृत्ययोरनङ्गमाराद्धुमपि क्षणं प्रति।
निमेषणेनैव कियच्चिरायुषा जनेषु यूनोरुदपादि निर्णयः॥ ७७॥

परस्परेति॥ परस्परस्याकूताच्चेष्टाविशेषादेव जातं दूतकृत्यं संभोगसंमतिर्ययोः कयोश्चि-
द्यूनोः स्त्रीपुंसयोरनङ्गमाराद्धुं सुरतं कर्तुं यः क्षणः समयस्तं प्रत्युद्दिश्य सदा क्रियमाणनिमे-
षापेक्षया कियच्चिरायुषा किंचिदधिककालमायुर्वर्तमानता यस्यैवंभूतेन कियच्चिरकालस्था-
यिना निमेषणेनैवाक्षिपक्ष्मसंकोचेनैव कर्तृणा करणेन वा जनेषु मध्ये बहुषु जनेषु वर्तमा-
नेषु सत्स्वपि निर्णयो निश्चय उदपादि कृतः जातो वा। कदा संभोग इतीङ्गितेन पृष्टे सति
नेत्रे निमील्य कंचित्कालं स्थित्वा जने निद्राणे सत्यागन्तव्यमिति रात्रिसंकेतसमय इति
निरणायीति भावः। उदपादि, 'चिण् ते पदः' इति कर्तरि कर्मणि वा चिण्॥

अहर्निशा वेति रताय पृच्छतिं क्रमोष्णशीतांशुकरार्पणाद्विटे ।
ह्रिया विदग्धा किल तन्निषेधिनी न्यधत्त संध्यामधुरेऽधरेऽङ्गुलिम् ॥७८॥

अहरिति ॥ विटे कामुके रताय आवयोः संभोगं कर्तुमहः, निशा वेति उष्णकरघर्मोपलक्षितं दिनं वा, शीतांशुकरशैत्योपलक्षिता रात्रिर्वा समय इति क्रमेण उष्णशीतयोरवयवोपरि करार्पणादेव चेष्टितात्कामपि पृच्छति सति विदग्धा चतुरा तत्प्रश्नाशयं ज्ञात्वा ह्रिया उपलक्षिता अनक्षरमिङ्गितेनैव तन्निषेधिनी तयोर्दिननिशयोर्निषेधं कुर्वाणा संध्यावन्मधुरे रमणीयेऽधरे स्वीयोष्ठे अङ्गुलिं न्यधत्तास्थापयत् । अनभिमतमर्थं निषेधन्त्यः स्त्रियो नातः किमित्येवं जातमिलायनिधायाधरेऽङ्गुलिं स्थापयन्तीति जातिः । किल प्रसिद्धम् । लोके चैवमेव प्रतीतिर्जाता, सा तु तन्निषेधव्याजेन दिने रात्रौ चानवसरः, संध्यैव रतसमय इत्यकथयदिति भावः । यद्वा—दिने सूर्यालोकात्, रात्रौ चन्द्रालोकात्, तद्वदनमनुचितम्, किंतु सदान्धकारमलिना संध्यैव रन्तुं योग्येति भावः ॥

क्रमेण कूरं स्पृशतोष्मणः पदं सितां च शीतां चतुरेण वीक्षिता ।
दधौ विदग्धारुणितेऽधरेऽङ्गुलीमनौचितीचिन्तनविस्मिता किल ॥ ७९ ॥

क्रमेणेति ॥ अयं श्लोकः क्षेपकः । कूरं भक्तम् । सितां शर्करान् । किमिदमनेनानुष्ठितं कियत् इत्यनौचितीचिन्तनेन विस्मिता किल विस्मितेव । अरुणिते । शाबकेनेत्यर्थः । भावः स एव ॥

कियत्त्यजन्नोदनमानयन्कियत्करस्य पप्रच्छ गतागतेन याम् ।
अहं किमेष्यामि किमेष्यसीति सा व्यधत्त नम्रं किल लज्जयाननम् ॥८०॥

कियदिति ॥ कृतसुरतकल्पनिर्णयः स एव पुमान् कियदल्पमोदनं पुरःस्थां तां वीक्ष्य त्यजन् पात्रे स्थापयन्, कियदोदनं स्वं प्रति पुनरानयन्सन्, करस्य भक्तपुरस्सरमवस्थापनेनानेन स्वं प्रति भक्तानयनवशादागमनेन च, क्रमेण त्वां प्रत्यहं किमेष्यामि, त्वं वा मां प्रति किमेष्यसीति यां पप्रच्छ । सा आननं नम्रं व्यधत्त लज्जया किल । किलेत्यलीके । [illegible] अनया लज्जया मुखं नम्रीकृतमिति । तस्यतस्तु मुखनम्रीकरणेनाहमेवागमिष्यामीति स्वं सूचितवतीति भावः । तं वीक्ष्य मुखं नम्रीकृत्य स्वचरणौ पश्यन्ती स्वेनैवागन्तव्यं [illegible] वा भावः । भोजनसमये भोक्ता कियन्तमोदनमग्रे निधाय स्थापयति, कियन्तं [illegible] सह भोक्तुं गृह्णातीति जातिः । कियन्तं त्यजन्नित्युक्तपुनर्ग्रहणः, कियन्तं च पुनः पात्रं प्रत्यानयतीति वा ॥

यथाशिषे जग्मुरनाशिषश्चनं निराशिषे चाशिषमोहमूहिरे ।
तथा विदग्धैः परिहासनिर्मितं विचिन्त्य तैः परिहास्य भोजिताः ॥ ८१ ॥

यथेति ॥ [illegible] यथा येन प्रकारेण [illegible] [illegible] जग्मुः, यथा येन प्रकारेण [illegible] [illegible] [illegible] मोहं मोहमूहिरे [illegible], तथा तेन प्रकारेण [illegible] [illegible] [illegible] [illegible]

[illegible]

कर्तृभिरेते वारयात्रिकाः परिकर्मभिः सावनद्रव्यैर्निर्मितं विचित्रमन्नं परिहस्य विहस्य पूर्वोक्तभ्रमनिमित्तपरिहासं भोजिताः ॥

नखेन कृत्वाधरसंनिभां निभाद्युवा मृदुव्यञ्जनमांसफालिकाम् ।
ददंश दन्तैः प्रशशंस तद्रसं विहस्य पश्यन्परिवेपिकाधरम् ॥ ८२ ॥

नखेनेति ॥ कश्चिद्युवा मृद्वीं व्यञ्जनमांसस्य फालिकां खण्डं नखेन कृत्वा निभाद्व्याजादधरसंनिभामोष्ठाकारां द्विधा कृत्वा, पूर्वमधरसदृशीमपि (नखेन द्विधा कृत्वा) मध्ये नखेन रेखाकरणान्नितरां मध्यस्थितरेखाधरसदृशीं वा कृत्वा, दन्तैर्ददंश । परिवेपिकाधरं मांसव्यञ्जनपायिन्या अधरं पश्यन्विहस्य एतादृशी स्वादुतरा मांसफालिका कदापि नोपभुक्तेत्यादिप्रकारैस्तस्याः फालिकाया रसं स्वादुतरं प्रशशंसास्तावीच्च । स्वादुतरं त्वदीयाधरमेव दशामीति हसंस्तस्मिन्मांसखण्डे तदधरतामारोपयन्स्वाशयं तामज्ञापयदिति भावः ॥

अनेकसंयोजनया तथाकृतेर्निकृत्य निष्पिष्य च तादृगर्जनात् ।
अमी कृताकालिकवस्तुविस्मयं जना बहु व्यञ्जनमभ्यवाहरन् ॥ ८३ ॥

अनेकेति ॥ अमी जना वारयात्रिका बहु मूलकन्दपुष्पपत्रफलादिरूपं शाकादि व्यञ्जनमभ्यवाहरन्बुभुजिरे । किंभूतम्—अनेकेषां नानाविधमरीच्यादिद्रव्याणां संयोजनया संबन्धेन तथाकृतेर्वस्त्वस्यैव (स्येव) गन्धरसादिकरणात्तादृग्रसादिनिर्माणात्तद्यथातथा निकृत्य नितरां कर्तित्वा निष्पिष्य चूर्णीकृत्य च आकारसाम्यादिना तादृगर्जनात्तद्वस्त्वन्तरसादृश्यसंपादनाद्रूपान्तरगन्धान्तरादिकरणाद्धेतोः कृत अकालिके असमयप्रभवे वस्तुनि विस्मय आश्चर्यं येन । क्रियाविशेषणं वा । तथा आकृतेराकारादिति वा । फलानि कर्तित्वा राजिकादध्यादिसंयोगाद्रसान्तरापत्तिः, तथा रूपान्तरापत्तिश्च । गोधूमादिपिष्टशर्करासंयोगाद्रसान्तरोत्पत्तिरित्यादिवैदग्ध्याद्भोक्तृणां विस्मयः । अधिवासनाविशेषाच्चाकालिकत्वभ्रमो युक्तः ॥

पिपासुरसीति विबोधिता मुखं निरीक्ष्य बाला सुहितेन वारिणः ।
पुनः करे कर्तुमना गलन्तिकां हसात्सखीनां सहसा न्यवर्तत ॥ ८४ ॥

पिपासुरिति ॥ वारिणाम्बुना सुहितेन तृप्तेन विटेन मुखं निरीक्ष्य अहं पिपासुः पातुमिच्छुरसीति बोधिता विज्ञापिता बालावुद्धवकोक्त्याद्यभिप्रायविशेषाप्रौढा पुनरपि करे गलन्तिकां सुवर्णभाजनं कर्तुमनाः धर्तुमनाः सती तदाशयज्ञानामतिचतुराणां सखीनां हसाद्धास्याद्धेतोः सहसा झटिति सुप्तप्रबुद्धवज्जलपायनारम्भसंभ्रमान्न्यवर्तत परावृत्ता । सहसा सस्मिता सतीति वा । कर्मान्तरपरित्यागेन सामान्येन पिपासुरसीति वदन् अयमेतदीयाधरं पिपासुरस्मीत्येतदाशयमियं नाजानादिति कृताद्धास्यादियमपि तदाशयं ज्ञात्वा गलन्तिकां पुनरस्थापयदिति भावः । 'पूरणगुण—' इत्यादिना सुहितार्थयोगे षष्ठीसमासनिषेधादेव वारिण इति षष्ठी ॥

युवा समादित्सुरमत्रगं घृतं विलोक्य तत्रैणदृशोऽनुबिम्बनम् ।
चकार तन्नाविनिवेशिनं करं बभूव तच्च स्फुटकण्टकोत्करम् ॥ ८५ ॥

---

१ 'परिहास्य' इति पाठे 'हास्यं कारयित्वा इत्यर्थः' इति सुखावबोधा । २-३—इदं च सुखावबोधासंमतं 'संनिभां युवा द्विधा मृदु—' इति मूलपाठं दृष्ट्वा कैश्चित्प्रादेः प्रक्षिप्तमिति प्रतिभाति ।

युवेति ॥ अनन्तरं पात्रस्थं घृतं समादित्सुर्ग्रहीतुकामः कश्चिद्युवा तत्र घृते एणदृशः पुरःस्थाया मृगाक्ष्याः परिवेषिकाया अनुबिम्बनं प्रतिबिम्बं विलोक्य करं स्वहस्तं तस्य बिम्बस्य नीविषु भङ्गीनिबद्धनाभिचुम्बितविवलिविच्छित्तिषु निवेशनशीलं चकार। तत्रास्थापयदित्यर्थः। तच्च तस्याः प्रतिबिम्बं स्फुटाः कण्टकोत्करा यस्मिन्। सरोमाञ्चमभूदित्यर्थः। स्वप्रतिबिम्बनीवीग्रन्थिविमोचनार्थं नाभिनीविस्वविधे सरागकारिणस्तत्करस्य चेष्टां दृष्ट्वा तस्य स्वसंभोगवासनां ज्ञात्वा तदानीं तस्मिन्ननुरागाद्रोमाञ्चिताभूत्, तादृश्याश्च प्रतिबिम्बितत्वात्प्रतिबिम्बमपि रोमाञ्चितमभूदिति भावः। द्वयोरप्यनुरागस्तुल्यो जात इति भावः ॥

प्रलेहजस्नेहधृतानुबिम्बनां चुचुम्ब कोऽपि श्रितभोजनच्छलः।
मुहुः परिस्पृश्य कराङ्गुलीमुखैस्ततो नु रक्तैः स्वमवापितैर्मुखम् ॥ ८६ ॥

प्रलेहेति ॥ कोऽपि विटो लिह्यत इति लेहः, प्रकृष्टो लेहः प्रलेहः सूरणादिद्रव्ययुक्त आर्द्रकादिसंस्कृततक्रादिनिर्मितो द्रवद्रव्यविशेषस्तस्माज्जाते लेहे तैलादौ धृतमनुबिम्बनं यया। धृतं स्थितमनुबिम्बनं यस्या वा। एवंविधां पुरस्थां सुन्दरीं श्रितं भोजनच्छलं येन एवंविधः सन् प्रतिबिम्बितां तामेव कराङ्गुलीनां मुखैरग्रैर्मुहुः परिस्पृश्य स्पृष्ट्वा चुचुम्ब। कीदृशैः—स्वमुखं समवापितैः प्रापितैः। तथा—रक्तैः अरुणैः स्वभावात्, उष्णत्वात् सर्वाद्वा। ततो नु तस्मादनुरागात्किम्, अङ्गुल्यग्रे रक्तत्वादनुरागाच्चुम्बिता किमित्युत्प्रेक्षा। 'रिक्तैः' इति पाठे मुहुः परिस्पृश्य ततो नु तदनन्तरमेव रिक्तैः प्रलेहशून्यैः स्वमुखं प्रापितैः कराङ्गुलीमुखैश्चुचुम्बेत्यर्थः। प्रलेहे वटकादिनिक्षेपात्तैलादिबिन्दवस्तरन्ति तत्र जातं प्रतिबिम्बमङ्गुल्या स्पृशति प्रलेहचलनात्प्रतिबिम्बभङ्गभयादङ्गुल्यग्रैर्लेहनच्छलात्परम्परया चुम्बितवानिति भावः। तां प्रति स्वानुरागमदर्शयदिति च भावः ॥

अराधि यन्मीनमृगाजपत्रिजैः पलैर्मृदु स्वादु सुगन्धि तेमनम्।
अशाकि लोकैः कुत एव जेमितुं न तत्तु संख्यातुमपि स्म शक्यते ॥८७॥

अराधीति ॥ मीनेभ्यो मत्स्येभ्यः, चित्रकादिमृगेभ्यः, अजेभ्यश्छागेभ्यः, पत्रिभ्यस्तित्तिरिलावकादिभक्ष्यपक्षिभ्यश्च जातैः पलैर्मांसैर्मृदु स्वादु सुगन्धि पाकेन परिमलविशेषयुक्तं च यत्तेमनाख्यं व्यञ्जनं सूपकारैरराधि साधितम्। तद्बाहुल्याल्लोकैः संख्यातुमपि न शक्यते स्म। जेमितुं तु पुनः कुत एवाशाकि। अपि तु भोक्तुं शक्यं नाभूदेव। जेमितुम्, 'जिमु अदने' ॥

कृतार्थनश्चाटुभिरिङ्गितैः पुरा परास्ति यः किंचनकुञ्चितभ्रुवा।
क्षिपन्मुखे भोजनलीलयाङ्गुलीः पुनः प्रसन्नाननयान्वकम्पि सः ॥ ८८ ॥

कृतेति ॥ किंचन किंचित्कुञ्चिते वक्रीकृते भ्रुवौ यया तथाविधया चाटुभिरिङ्गितैः कटाक्षनिरीक्षणादिचेष्टितैश्चाटुभिः प्रियवचनैश्च कृता अर्थना संभोगप्रार्थना येन तथाविधो यो विटः पुरा पूर्वं परास्ति निरस्तः, प्रसन्नानना सर्वदृष्टिष्वप्यधिकप्रसादयुक्ता तया भोजनलीलया प्रत्युत्तरं मुखेऽङ्गुलीः क्षिपन्मुखसंस्पर्शेन तां प्रति दीनत्वं सूचयन्स पुनरन्वकम्पि अनुगृहीतः। दैन्यं दृष्ट्वा संभोगत्वमङ्गीकृतवती इति भावः ॥

अकारि नीहारनिभं प्रभञ्जनादपि यच्चानुगतासारदारुभिः।
निपीय भृङ्गारकसङ्गि तत्र तैरवाप्य वारि प्रतिवारनीदृशम् ॥ ८९ ॥

कर्तृभिरेते वारयात्रिकाः परिकर्मभिः साधनद्रव्यैर्निर्मितं विनिगमनं परिहास निर्हेस पूर्णं फलमनिमित्तपरिहासं भोजिताः ॥

नखेन कृत्वाधरसन्निभां निभायुवा मृदुव्यञ्जनमांसफालिकाम् ।
ददंश दन्तैः प्रशशंस तद्रसं विदग्ध पश्यन्परिवेषिकाधरम् ॥ ८२ ॥

नखेनेति ॥ कश्चिद्युवा मृद्वीं व्यञ्जनमांसस्य फालिकां खण्डं नखेन कृत्वा निभाव्याजादधरसंनिभामोष्ठाकारां द्विधा कृत्वा, पूर्वमधरसदृशीमपि (नखेन द्विधा कृत्वा) मध्ये नखेन रेखाकरणान्नितरां मध्यस्थितरेखाधरसदृशीं वा कृत्वा, दन्तैर्ददंश । परिवेषिकाधरं मांसव्यञ्जनपायिन्या अधरं पश्यन्विदग्ध एतादृशी स्वादुतरा मांसफालिका कदापि नोपभुक्तेत्यादिप्रकारैस्तस्याः फालिकाया रसं स्वादुतरं प्रशशंसास्तावीच । स्वादुतरं त्वदीयाधरमेव दशामीति दशंस्तस्मिन्मांसखण्डे तदधरतामारोपयन्स्वाशयं तामज्ञापयदिति भावः ॥

अनेकसंयोजनया तथाकृतेर्निकृत्य निष्पिष्य च तादृगर्जनात् ।
अमी कृताकालिकवस्तुविस्मयं जना बहु व्यञ्जनमभ्यवाहरन् ॥ ८३ ॥

अनेकेति ॥ अमी जना वारयात्रिका बहु मूलकन्दपुष्पपत्रफलादिरूपं शाकादि व्यञ्जनमभ्यवाहरन्बुभुजिरे । किंभूतम्—अनेकेषां नानाविधमरीच्यादिद्रव्याणां संयोजनया संबन्धेन तथाकृतेर्वस्तुस्यैव(स्येव) गन्धरसादिकरणात्तादृग्रसादिनिर्माणात्तथातथा निकृत्य नितरां कर्तित्वा निष्पिष्य चूर्णीकृत्य च आकारसाम्यादिना तादृगर्जनात्तद्वस्त्वन्तरसादृश्यसंपादनाद्रूपान्तरगन्धान्तरादिकरणाद्धेतोः कृत अकालिके असमयप्रभवे वस्तुनि विस्मय आश्चर्यं येन । क्रियाविशेषणं वा । तथा आकृतेराकारादिति वा । फलानि कर्तित्वा राजिकादध्यादिसंयोगाद्रसान्तरापत्तिः, तथा रूपान्तरापत्तिश्च । गोधूमादिपिष्टशर्करासंयोगाद्रसान्तरोत्पत्तिरित्यादिवैदग्ध्याद्भोक्तॄणां विस्मयः । अधिवासनाविशेषाच्चाकालिकत्वभ्रमो युक्तः ॥

पिपासुरस्मीति विबोधिता मुखं निरीक्ष्य बाला सुहितेन वारिणः ।
पुनः करे कर्तुमना गलन्तिकां हसात्सखीनां सहसा न्यवर्तत ॥ ८४ ॥

पिपासुरिति ॥ वारिणाम्बुना सुहितेन तृप्तेन विटेन मुखं निरीक्ष्य अहं पिपासुः पातुमिच्छुरस्मीति बोधिता विज्ञापिता बालामुग्धवक्रोक्त्याद्यभिप्रायविशेषाप्रौढा पुनरपि करे गलन्तिकां सुवर्णभाजनं कर्तुमनाः धर्तुमनाः सती तदाशयज्ञानामतिचतुराणां सखीनां हसाद्धास्याद्धेतोः सहसा झटिति सुप्तप्रबुद्धवज्जलपायनारम्भसंभ्रमान्न्यवर्तत परावृत्ता । सहसा सस्मिता सतीति वा । कर्मान्तरपरित्यागेन सामान्येन पिपासुरस्मीति वदन् अयमेतदीयाधरं पिपासुरस्मीत्येतदाशयमियं नाजानादिति कृताद्धास्यादियमपि तदाशयं ज्ञात्वा गलन्तिकां पुनरस्थापयदिति भावः । 'पूरणगुण—' इत्यादिना सुहितार्थयोगे षष्ठीसमासनिषेधादेवं वारिण इति षष्ठी ॥

युवा समादित्सुरमत्रगं घृतं विलोक्य तत्रैणदृशोऽनुबिम्बनम् ।
चकार तन्नीविनिवेशिनं करं बभूव तच्च स्फुटकण्टकोत्करम् ॥ ८५ ॥

---

१ 'परिहास' इति पाठे 'हास्यं कारयित्वा इत्यर्थः' इति सुखावबोधा । २-३—इदं च सुखावबोधासंमतं 'संनिभां युवा द्विधा मृदु—' इति मूलपाठं दृष्ट्वा कैश्चित्पाश्चैः प्रक्षिप्तमिति प्रतिभाति ।

युवेति ॥ अनन्तरं पात्रस्थं घृतं समादित्सुर्ग्रहीतुकामः कश्चिद्युवा तत्र घृते एणदृशः पुरःस्थाया मृगाक्ष्याः परिवेषिकाया अनुबिम्बनं प्रतिबिम्बं विलोक्य करं स्वहस्तं तस्य बिम्बस्य नीविषु भङ्गीनिबद्धनाभिचुम्बितवित्तविच्छित्तिषु निवेशनशीलं चकार । तत्रास्थापयदित्यर्थः । तच्च तस्याः प्रतिबिम्बं स्फुटाः कण्टकोत्करा यस्मिन् । सरोमाञ्चमभूदित्यर्थः । स्वप्रतिबिम्बनीवीग्रन्थिविमोचनार्थं नाभिनीविस्पर्शविधे स्पर्शकारिणस्तत्करस्य चेष्टां दृष्ट्वा तस्य स्वसंभोगवासनां ज्ञात्वा तदानीमेतस्मिन्ननुरागाद्रोमाञ्चिताभूत्, तादृश्याश्च प्रतिबिम्बितत्वात्प्रतिबिम्बमपि रोमाञ्चितमभूदिति भावः । द्वयोरप्यनुरागस्तुल्यो जात इति भावः ॥

प्रलेहजस्नेहधृतानुबिम्बनां चुचुम्ब कोऽपि श्रितभोजनच्छलः ।
मुहुः परिस्पृश्य कराङ्गुलीमुखैस्ततो नु रक्तैः स्वमवापितैर्मुखम् ॥ ८६ ॥

प्रलेहेति ॥ कोऽपि विटो लिह्यत इति लेहः, प्रकृष्टो लेहः प्रलेहः सूरणादिद्रव्ययुक्त आर्द्रकादिसंस्कृततक्रादिनिर्मितो द्रवद्रव्यविशेषस्तस्माज्जाते स्नेहे तैलादौ धृतमनुबिम्बनं यया । धृतं स्थितमनुबिम्बनं यस्या वा । एवंविधां पुरस्थां सुन्दरीं श्रितं भोजनच्छलं येन एवंविधः सन् प्रतिबिम्बितां तामेव कराङ्गुलीनां मुखैरग्रैर्मुहुः परिस्पृश्य स्पृष्ट्वा चुचुम्ब । कीदृशैः—स्वमुखं समवापितैः प्रापितैः । तथा—रक्तैः अरुणैः स्वभावात्, उष्णत्वे तस्य स्पर्शाद्वा । ततो नु तस्मादनुरागात्किम्, अङ्गुल्यग्रे रक्तत्वादनुरागाच्चुम्बिता किमित्युत्प्रेक्षा । 'रिक्तैः' इति पाठे मुहुः परिस्पृश्य ततो नु तदनन्तरमेव रिक्तैः प्रलेहशून्यैः स्वमुखं प्रापितैः कराङ्गुलीमुखैश्चुचुम्बेत्यर्थः । प्रलेहे वटकादिनिक्षेपात्तैलादिबिन्दवस्तरन्ति तत्र जातं प्रतिबिम्बमङ्गुल्या स्पृशति प्रलेहचलनात्प्रतिबिम्बभङ्गभयादङ्गुल्यग्रैर्लेहनच्छलात्परम्परया चुम्बितवानिति भावः । तां प्रति स्वानुरागमदर्शयदिति च भावः ॥

अराधि यन्मीनमृगाजपत्त्रिजैः पलैर्मृदु स्वादु सुगन्धि तेमनम् ।
अशाकि लोकैः कुत एव जेमितुं न तत्तु संख्यातुमपि स्म शक्यते ॥ ८७ ॥

अराधीति ॥ मीनेभ्यो मत्स्येभ्यः, चित्रकादिमृगेभ्यः, अजेभ्यश्छागेभ्यः, पत्त्रिभ्यस्तित्तिरिलावकादिभ्यः पक्षिभ्यश्च जातैः पलैर्मांसैर्मृदु स्वादु सुगन्धि च यत्तेमनाख्यं व्यञ्जनं सूपकारैरराधि साधितम् । तद्बहुत्वाल्लोकैः संख्यातुमपि न शक्यते स्म । जेमितुं तु पुनः कुत एवाशाकि । अपि तु भोक्तुं सर्वं नाभूदेव । जेमितुम्, 'जिमु अदने' ॥

कृतार्धनिध्यातनिरिङ्गितैः पुरा परास्ति यः किंचनकुञ्चितभ्रुवा ।
क्षिपन्मुखे भोजनलीलयाङ्गुलीः पुनः प्रसन्नाननमान्वकम्पि सः ॥ ८८ ॥

कृतेति ॥ [illegible] ॥

अकारि नीहारनिभं [illegible] ।
निपीय [illegible] तत्र [illegible] ॥ ८९ ॥

अकारीति ॥ भृङ्गारि प्रभञ्जनायमानाक्लिष्टानुसंयोगादेशोऽनीहारनिभं [illegible] गन्धागुरुसारस्य कृष्णागुरोर्बहलिमस्फूर्ति धूपितम्, भृङ्गारके सुवर्णपात्रे सतः स्थितोऽस्य स्तोति, तत्रापि तत्र भोजनावसरे । भीमगृहे वा । नीचीय नितरां पीता ऊर्जैः पुनःपुनरीदृशं वक्ष्यमाणप्रकारेणावर्ण्यंस्तावि । अतितरं निपीतमिति वा । 'अगुरु' इत्येव पाठः । 'भृङ्गारः कनकालुका' इत्यमरः । अशकोनम् ॥

जलवर्णनमाह—

त्वया विधातर्यदकारि चामृतं कृतं च यज्जीवनमस्तु साधु तत् ।
वृथेदमारम्भि तु सर्वतोमुखं त्वयोचितः कर्तुमिदं पिबस्तव ॥ ९० ॥

त्वयेति ॥ हे विधातः, त्वया चाम्बुरूपं यदमृतसंज्ञं, यच्च जीवनसंज्ञमकारि कृतं तदुभयमपि साध्वुचितमेव कृतम् । अमृततुल्यरसत्वात्, प्राणधारणहेतुत्वाज्जीवनत्वात्तुल्यकर्मत्वात्तस्य संज्ञाद्वयमित्यर्थः । तु पुनरिदं सर्वतोमुखसंज्ञं वृथा आरम्भि कृतम् । अन्वर्थत्वाभावान्निरर्थकमेतत्कृतम् । यस्मादिदं जलं पिबतीति पिबोऽस्मदादिः पुरुषस्तथा सर्वतः सर्वदिक्षु मुखानि यस्य एवंविधस्यैव कर्तुमुचितः । अस्मदादयोऽपि बहूनि मुखानि सर्वेष्वप्यवयवेषु त्वं चेदकरिष्यः, तदस्मदादिरिदमातृप्ति पातुमशक्ष्यत् नत्वेकेन मुखेनेति । नितरां शैत्यमाधुर्यादिगुणयुक्तमेतदिति भावः । चौ तुल्ययोगत्वद्योतकौ । 'पयः कीलालममृतं जीवनम्', 'पुष्करं सर्वतोमुखम्' इत्यमरः । इदंपिबः, 'पाघ्राध्मा–' इत्यादिना शः ॥

सरोजकोशाभिनयेन पाणिना स्थितेऽपि कूरे मुहुरेव याचते ।
सखि त्वमस्मै वितर त्वमित्युभे मिथो न वादाददतुः किलौदनम् ॥९१॥

सरोजेति ॥ उभे सख्यौ इति मिथो वादाद्विमत्यात्किलौदनं न ददतुः । किलेति व्याजे । इति किम्—हे सखि, त्वं पात्रमध्ये कूरे ओदने स्थितेऽपि मुहुरेव वारंवारम् सरोजकोशवदभिनय आकारो यस्य स्तनवराङ्गप्रार्थनासूचकेन पाणिना कूरं याचतेऽस्मै कामुकाय कूरं वितर देहि । द्वितीया वदति—त्वं वितर इति विवदमाने । तत्प्रार्थितस्तनवराङ्गदानेऽन्योन्यं प्रवर्तयन्त्योर्मध्येऽन्योन्यलज्जावशादेकतरा रिरंसुरपि नाङ्गीचकारेति भावः । 'अनुवादात्' इति पाठे उक्तरूपानुवादादुभे अपि स्वल्पमोदनं किल ददतुरित्यर्थः । ओदनदानव्याजेन तत्प्रार्थितदानमङ्गीचक्रुरिति भावः ॥

इयं कियच्चारुकुचेति पश्यते पयःप्रदाया हृदयं समावृतम् ।
ध्रुवं मनोज्ञा व्यतरद्यदुत्तरं मिषेण भृङ्गारधृते करद्वयी ॥ ९२ ॥

इयमिति ॥ पयःप्रदायाः समावृतं वस्त्राच्छन्नमपि हृदयमिति विचार्य पश्यते पृच्छते कामुकाय ध्रुवं निश्चितं मनोज्ञा । अथ च—पराशयज्ञैव । तस्याः करद्वयी भृङ्गारस्य धृतेर्धारणस्य मिषेण यद् यस्मादुत्तरं तदीयप्रश्नस्य प्रतिवचनं व्यतरद्ददौ । इति किम्—इयं स्त्री कियन्तौ किंप्रमाणौ चारू सुन्दरौ च कुचौ यस्याः सेति । स्वर्णकलशीपरिमाणौ स्वर्णवर्णौ चैतस्याः कुचाविति तं प्रत्यसूचयदित्यर्थः । उभावपि मिथोऽनुरागादन्योन्यविलोकनपरावेव तस्थतुरिति भावः । अन्योऽप्यभिप्रायज्ञः केनचिन्मिषेण प्रश्नस्योत्तरं ददाति ॥

---

१ 'अत्रैवकारस्य प्रयोजनं नावगतम् । अकारमध्यस्यापि नाम्नः श्रूयमाणत्वात् । अत एव—'अगरुसार–' इत्यपि पाठः साधीयान्, 'अगुर्वगरुराजार्हम्' इत्युक्तेः—' इति सुखावबोधा ।

अमीभिराकण्ठमभोजि तद्गृहे तुषारधारामृदितेव शर्करा।
हयद्विपद्वष्कयणीपयःस्रुतं सुधाह्रदात्पङ्कमिवोद्धृतं दधि ॥ ९३ ॥

अमीभिरिति ॥ अमीभिर्जन्यजनैस्तद्गृहे भीमगृहे आकण्ठमतिबहु यथा तथा शर्करा भोजि भुक्ता। तुषारधारया हिमोदकेन मृदितेव मिश्रितेव। तथा—हयं द्विषता अश्ववैरिण्या महिष्या वष्कयण्या चिरप्रसूतायाः पयो दुग्धं तस्मात्स्रुतं जातं दुग्धपरिणामभूतं दध्यप्यभोजि। सुधाह्रदादमृतस्यागाधजलाशयादुद्धृतं पङ्कमिवेत्युत्प्रेक्षा। शर्करातिशीता शुभ्रा च, दध्यप्यमृतवत्स्वादु शुभ्रं घनं चेति भावः। तद्गृहेऽमीभिर्विशिष्टं दध्यभोजि। तुषारधारया मृदिताऽल्पकणत्वं प्रापिता शर्करेव, सुधाह्रदादुद्धृतं पङ्कमिव इति दधिविषयमेवोत्प्रेक्षाद्वयं वा। दध्नः शैत्यं शौक्ल्यं स्वादुत्वं घनत्वं च सूचितमेतेन। 'पयः शृतम्' इति पाठे शर्कराऽभोजि। शृतं पक्वं तप्तं महिषीपयश्चाभोजि। दधि चाभोजीति संबन्धः। 'चिरसूता वष्कयणी' इत्यमरः। महिष्या दधि स्वादुतरं भवति। 'द्विषः शतुर्वा' इति वचनात् 'हयं द्विषति' इति द्वितीयया 'द्वितीया श्रिता—' इति योगविभागात्समासः। द्विषद्वष्कयणीति 'पुंवत्कर्मधारय—' इति पुंवद्भावः। 'शृतम्' इति 'शृतं पाके' इति साधु ॥

तदन्तरन्तः सुषिरस्य बिन्दुभिः करम्बितं कल्पयता जगत्कृता।
इतस्ततः स्पष्टमचोरि मायिना निरीक्ष्य तृष्णाचलजिह्वताभृता ॥ ९४ ॥

तदन्तरिति ॥ तद्दधि निरीक्ष्य स्वातिशयात्तृष्णया आस्वादनया चला चपलाधरप्रान्तलेहिनी चञ्चला जिह्वा यस्य तस्य भावस्तत्ता तां बिभ्रता। तथा—अन्तरन्तर्मध्ये मध्ये सुषिरस्य छिद्रस्य बिन्दुभिः करम्बितं मिश्रितं व्याप्तं तद्दधि कल्पयता कुर्वता जगत्कृता इतस्ततः सर्वप्रदेशेभ्यः तद्दधि स्पष्टमचोरि प्रकटमपहृतम्। स्पष्टं संभावनायाम्। अपहृतमेवेत्यर्थः। अपहरन्कथं न दृष्ट इत्यत आह—यतो मायिना। अदृश्यतयापहृतमित्यर्थः। पक्वेनक्षीरस्य दध्याकारेण परिणामे दधनि छिद्राणि दृश्यन्ते। ब्रह्मणादृश्यतया दधनि सर्वभागः सारो भोक्तुमिच्छया गृहीतः। अन्यथा छिद्राणि कथं दृश्यन्ते। अन्येन ग्रहीतुं न शक्यते। तत्रोत्प्रेक्षा—येन निर्मितं तस्य ब्रह्मणोऽपि जिह्वाचापल्यनिर्माणात्स्वादुतमं दधीति ध्वन्यते ॥

ददासि मे तन्न रुचेर्यदास्पदं न यत्र रागः स्थितयापि किं तया।
इतीरिणे बिम्बफलं फलेच्छलाददायि बिम्बाधरयारुचच्च तत् ॥ ९५ ॥

ददातीति ॥ बिम्बफलतुल्योऽधरो यस्यास्तया सुन्दर्या परिवेषिकया बिम्बाकारं बिम्बफलं परिवेषितं मांसखण्डमेव बिम्बाकारं कृत्वा इतीरिणेऽधरचुम्बनकामनया भावनामात्र विज्ञानादपि दत्तम्। तद्बिम्बाकारं फलं तस्मै अरुचच्च। स्वादितमित्यर्थः। मदभिमतं ज्ञात्वा सीत्कारपुरःसरं फलरूपबिम्बव्याजाद्बिम्बाधरदानमेवानया प्रतिज्ञातमिति संतुष्टोऽमृदिति भावः। इति किम्—हे बिम्बोष्ठि, यद्रुचेः प्रीतेरास्पदं मम वस्तुनि मम प्रीतिः, तन्मे मह्यं न ददासि। यद्वा—यद्रुचेः प्रीतेरास्पदं न भवति, तन्मह्यं ददासि। तथा—मम यस्यां रागः प्रीतिर्नास्ति तया स्थितयापि वर्तमानयापि किम्। अपि तु—न किंचित्प्रयोजनम्। मधुरं नमयेत्या शर्करयापि प्रयोजनं नास्ति, अभिलाषाभावात्। अन्येन नास्तीति किं वाच्यमित्यपि सूच्यते।

१ 'आह' इति जीवातुसंमतः पाठः। २ 'जिह्वया इदं कृता' इति जीवातुसंमतः पाठः।

अथ च—यत्र लौहित्यं नास्ति तया श्वेतया प्रकरणाच्छर्करयापि किम्। तस्माद्यत्र मेऽनुरागो रक्तिमकान्तिश्च, तन्मह्यं देहीति। 'कृतं तया' इति पाठे तया पूर्यताम्। 'फलच्छलात्' इति, पाठे फलदानप्रसङ्गव्याजात्। बिम्बाकारोऽधरो यस्या इति 'सप्तम्युपमान-' इत्यादिनोत्तरपदलोपी समासः। अरुचत्, पुषादित्वादङ्। 'द्युद्भ्यो लुङि' इति परस्मैपदम्॥

समं ययोरिङ्गितवान्वयस्ययोस्तयोर्विहायोपहृतप्रतीङ्गिताम्।
अकारि नाकूतमवारि सा यया विदग्धयाऽरञ्जि तयैव भाववित्॥ ९६॥

सममिति॥ यो ययोर्वयस्ययोः सख्योर्विषये स्वाभिप्रायज्ञापनार्थं समं युगपदिङ्गितवान्भ्रूक्षेपादि चेष्टितवानभूत्, स तयोर्मध्य उपहृतं कृतं प्रतीङ्गितं तदभिलाषस्वीकारसूचकप्रतिचेष्टितं यया तामेकां विहाय स्थितः सन् तयैवारञ्जि द्वितीययैव प्रत्यनुरञ्जितः। तया कया—यया चतुरया विदग्धया आकूतं प्रतीङ्गितं नाकारि। प्रतीङ्गितं कुर्वाणा सैव सखी जनसमक्षमिङ्गितकरणमयुक्तमित्यवारि निषिद्धा। यतो भावविद्वैदग्ध्यस्य वेत्ता। द्वितीया तदिङ्गितदर्शनात्तस्मिन्ननुरागाल्लज्जित्वा प्रतीङ्गितं नाकरोत्। जनसमक्षमेतदनुचितमिति व्याजेन मत्प्रियं प्रतीयमिङ्गितं किमिति करोतीति सापत्न्येर्ष्यया च तां वारितवती इति तस्या वैदग्ध्यम्। स च तदीयगुप्तभावज्ञानाद्भाववित्। सहचरीसमक्षमिङ्गितं कुर्वाणेयमचतुरा, द्वितीया इङ्गितं नाकरोत्, तां च न्यवारयदितीयमेव चतुरा मय्यनुरक्ता चेति चतुरो द्वितीयस्यामेवानुरक्तोऽभूदिति भावः। विहाय स्थितः सन् इति योजना। अन्यथा ह्यानस्य पुरुषः कर्ता, रञ्जनस्य स्त्री, इति भिन्नकर्तृकत्वात्क्त्वा न स्यादिति। अरञ्जि, ण्यन्ताच्चिण्॥

सखीं प्रति स्माह युवेङ्गितेक्षिणी क्रमेण तेऽयं क्षमते न दित्सुताम्।
विलोम तद्व्यञ्जनमर्प्यते त्वया वरं किमस्मै न नितान्तमर्थिने॥ ९७॥

सखीमिति॥ यून इङ्गितं चेष्टामीक्षते एवंशीला काचित्स्वसखीं प्रत्याह स्म इत्यवोचत्। हे सखि, यस्मादयं क्रमेण परिपाट्या ते दित्सुतां त्वत्कर्तृकां व्यञ्जनस्य दातुमिच्छुतां न क्षमते। तस्मात्त्वया नितान्तमतिचञ्चलतयाऽर्थिने याचमानायास्मै यूने वरं श्रेष्ठमभीष्टं [illegible] अनं विलोम विपरीतं क्रमरहितं यथा तथा किं नार्प्यते दीयते। अपितु [illegible] [illegible] युगपत्क्षिप्यतामिति छलोक्तिः। अयमालिङ्गनचुम्बनादिबाह्यरतपरिपाट्या तव वराङ्गदानेच्छुतां न सहते। तस्मादतितरलतयार्थिने संभोगविलम्बमसहमानायास्मै वरं केवलं। श्रेष्ठं वा। न विद्यते वरं श्रेष्ठं यस्मात्तदवरमतिश्रेष्ठं वा। अवरमधोदेशे वर्तमानं वा। रोमरहितं तद्गलक्षणं व्यञ्जनमवयवः किमिति त्वया नार्प्यते। अपि त्वर्पयेत्युपहासः। अतिसंभोगान्नितरां तान्तं ग्लानमिति व्यञ्जनविशेषणं वा। 'व्यञ्जनं लाञ्छनश्मश्रुनिष्ठानावयवेष्वपि' इत्यमरः। नितरां तान्तमिति पक्षे 'अनुनासिकस्य क्वि-' इति दीर्घः॥

समानिलिम्पेव भुजिक्रियाविधेर्दलोदरं वर्तुलयालयीकृतम्।
अलंकृतं क्षीरवटैस्तदश्नतां रराज पाकार्पितगैरिकश्रिया॥ ९८॥

समानेति॥ क्षीरवटैः दुग्धमध्यक्षिप्तैर्माषसाधितैर्वटकाख्यैः पक्वान्नविशेषैः समंन्त्वादलंकृतं तत्पूर्वोक्तं वटकव्यतिरिक्तं व्यञ्जनं वर्तुलया वृत्ताकारया पात्रेण तस्य [illegible]

1 'अनर्धान्तरज्ञानि [illegible]' इति जीवातुः।

संयोगेनार्पितया निर्मितया गैरिकश्रिया शैलरक्तधातोरिव श्रिया वटकानामेव शोभया रराज । विशिष्टवटकसंबन्धाद्व्यञ्जनान्तरं रेजे इत्यर्थः । विशिष्टया श्रियोपलक्षितैः क्षीरवटै-रलंकृतं सदेजे इति वा । क्षीरवटैः कर्तृभिः श्रिया कृत्वा अलंकृतं सदेजे इति वा । किमिव —अश्नतां भुञ्जानानां तेषां भुजिक्रियाविधेर्भोजनविधेः समाप्तेः वटकदर्शनमात्रेणान्यत्र रुच्य-भावाद्व्यञ्जनान्तरविरतेः संबन्धिन्या लिप्या समाप्तिसूचिकया छकाररूपपुष्पिकारूपया आल-यीकृतं आसद्मीकृतं दलोदरं श्रीतालादिपत्रमध्यमिव इत्युपमोत्प्रेक्षा वा । वृत्तया समाप्ति-लिप्या श्रितं पाकेन बालकेनार्पितया गैरिकश्रियाऽलंकृतं दलोदरमिति वा योज्यम् । 'पोतः पाकोऽर्भकः' इत्यमरः । ग्रन्थलेखनसमाप्तिपत्रे समाप्तिसूचकं छकारादिवर्तुलमक्षरं क्रियते, गैरिकचिह्नितं च क्रियते । एवं भोजनसमाप्तिसूचकं क्षीरवटकादि ॥

चुचुम्ब नोर्वीवलयोर्वशीं परं पुरोऽधिपारि प्रतिबिम्बितां विटः ।
पुनःपुनः पानकपानकैतवाच्चकार तच्चुम्बनचुंकृतान्यपि ॥ ९९ ॥

चुचुम्बेति ॥ कश्चिद्विटः पुरोऽग्रेऽधिपारि पानकरसपूर्णे सुवर्णादिपानपात्रे प्रतिबिम्बि-तामुर्वीवलये उर्वशीमिवातिसुन्दरीं कांचित्परं केवलं चुचुम्बेति न किंतु पुनःपुनः पानकस्य द्राक्षादिसाधितमधुररसप्रधानपेयद्रव्यरूपस्य पानं तस्य कैतवात्प्रतिबिम्बितायास्तस्याश्चुम्ब-नस्य संबन्धीनि चुंकृतानि चुम् इति पानकानुकरणशब्दस्तस्य करणान्युच्चारणानि तान्यपि चकार । चुम्बनादिना तस्यां स्वानुरागं प्रकटीचकारेति भावः । 'झर्झरी बर्बरी पारी पानपा-त्रम्' इति क्षीरस्वामी । सप्तम्यर्थेऽव्ययीभावः । चुंकृतानि, 'नपुंसके भावे क्तः' ॥

घनैरमीषां परिवेषकैर्जनैरवापि वर्षोपलगोलकावली ।
चलद्भुजाभूषणरत्नरोचिषा धृतेन्द्रचापैः श्रितचान्द्रसौरभा ॥ १०० ॥

घनैरिति ॥ घनैर्बहुभिः परिवेषकैरनेकव्यञ्जनदायिभिर्जनैः । तैरेव घनैर्मेघैरमीषां भुञ्जानानां राज्ञां कृते वर्षोपलाः करकास्तत्तुल्यानामेलाकर्पूरशर्करालवङ्गतण्डुलपिष्टरचितानां गोलकानामतिवृत्तानां लड्डुकविशेषाणाम् । अथ च—करकारूपाणां गोलकानाम् । आवली पङ्क्तिरवापि वितीर्णा वृष्टा च । कीदृशैः—परिवेषणकर्मवशाच्चलन्तो ये भुजास्तासां भूषणेषु रत्नानि तेषां रोचिषा कान्त्या धृतमिन्द्रचापं यैः । नानाप्रकारकान्तिभिरित्यर्थः । अथ च— तदेवेन्द्रचापो येषु । कीदृशी—श्रितं चान्द्रं कर्पूरसंबन्धि सौरभं सौगन्ध्यं यया । अथच— चन्द्र एव चान्द्रः, सूर एव सौरः, तयोर्भा चान्द्रसौरभा, श्रिता चान्द्रसौरभा यया सा । शीतलत्वोष्णत्वाभ्यां चन्द्रसूर्यसदृशीत्यर्थः । रात्रिदिनयोर्भोजनसमत्वाद्वा क्रमेण तत्कान्तिस-दृशी । चन्द्रसंबन्धिनश्चान्द्राश्चन्द्रकान्ताः, एवं सौराः सूर्यकान्ताः, तेषां भा श्रिता यया वा । चन्द्रसंबन्धि मनोज्ञत्वं सादृश्यं श्रितं ययेति वा । विश्वप्रकाशे सुरभिशब्दो मनोज्ञवाची ॥

कियद्बहु व्यञ्जनमेतदर्प्यते ममेति तृप्तैर्वदतां पुनःपुनः ।
अमूनि संख्यातुमसावढौकि तैश्छलेन तेषां कठिनीव भूपतीः ॥ १०१ ॥

कियदिति ॥ एतद्व्यञ्जनं मम कियत्किंपरिमाणं वर्ण्यते । अपितु दृता बहु-लिति नार्पणीयमिति तृप्तेर्हेतोः पुनःपुनः वदतां तेषां मध्यानां 'कियत्संख्यं बहु एतद्व्यञ्जन-मर्प्यते' इति 'एतद्बहुत्वसंख्येयत्ता मयाऽपि पृच्छ्यते किम्' इति छलेनामूनि व्यञ्जनानि

संयोगेनार्पितया निर्मितया गैरिकश्रिया शैलरक्तधातोरिव श्रिया वटकाननेव शोभया रराज । विशिष्टवटकसंबन्धाद्व्यञ्जनान्तरं रेजे इत्यर्थः । विशिष्टया श्रियोपलक्षितैः क्षीरवटै- रलंकृतं सद्रेजे इति वा । क्षीरवटैः कर्तृभिः श्रिया कृत्वा अलंकृतं सद्रेजे इति वा । किमिव —अश्नतां भुञ्जानानां तेषां भुजिक्रियाविधेर्भोजनविधेः समाप्तेः वटकदर्शनमात्रेणान्यत्र रुच्य- भावाद्व्यञ्जनान्तरविरतेः संबन्धिन्या लिप्या समाप्तिसूचिकया छकाररूपपुष्पिकारूपया आल- यीकृतं आसद्मीकृतं दलोदरं श्रीतालादिपत्रमध्यमिव इत्युपमोत्प्रेक्षा वा । वृत्तया समाप्ति- लिप्या श्रितं पाकेन बालकेनार्पितया गैरिकश्रियाऽलंकृतं दलोदरमिति वा योज्यम् । 'पोतः पाकोऽर्भकः' इत्यमरः । ग्रन्थलेखनसमाप्तिपत्रे समाप्तिसूचकं छकारादिवर्तुलमक्षरं क्रियते, गैरिकचिह्नितं च क्रियते । एवं भोजनसमाप्तिसूचकं क्षीरवटकादि ॥

चुचुम्ब नोर्वीवलयोर्वशीं परं पुरोऽधिपारि प्रतिबिम्बितां विटः ।
पुनःपुनः पानकपानकैतवाच्चकार तच्चुम्बनचुंकृतान्यपि ॥ ९९ ॥

चुचुम्बेति ॥ कश्चिद्विटः पुरोऽग्रेऽधिपारि पानकरसपूर्णे सुवर्णादिपानपात्रे प्रतिबिम्बि- तामुर्वीवलये उर्वशीमिवातिसुन्दरीं कांचित्परं केवलं चुचुम्बेति न किंतु पुनःपुनः पानकस्य द्राक्षादिसाधितमधुररसप्रधानपेयद्रव्यरूपस्य यत्पानं तस्य कैतवात्प्रतिबिम्बितायास्तस्याश्चुम्ब- नस्य संबन्धीनि चुंकृतानि चुम् इति पानकानुकरणशब्दस्तस्य करणान्युच्चारणानि तान्यपि चकार । चुम्बनादिना तस्यां स्वानुरागं प्रकटीचकारेति भावः । 'झल्लरी वर्वरी पारी पानपा- त्रम्' इति क्षीरस्वामी । सप्तम्यर्थेऽव्ययीभावः । चुंकृतानि, 'नपुंसके भावे क्तः' ॥

घनैरमीषां परिवेषकैर्जनैरवर्षि वर्षोपलगोलकावली ।
चलद्भुजाभूषणरत्नरोचिषा धृतेन्द्रचापैः श्रितचान्द्रसौरभा ॥ १०० ॥

घनैरिति ॥ घनैर्बहुभिः परिवेषकैरनेकव्यञ्जनदायिभिर्जनैः । तैरेव घनैर्मेघैरमीषां भुञ्जानानां राज्ञां कृते वर्षोपलाः करकास्तत्तुल्यानामेलाकर्पूरशर्करालवङ्गतण्डुलपिष्टरचितानां गोलकानामतिवृत्तानां लड्डुकविशेषाणाम् । अथ च—करकारूपाणां गोलकानाम् । आवली पङ्क्तिरवर्षि वितीर्णा वृष्टा च । कीदृशैः—परिवेषणकर्मवशाच्चलन्तो या भुजास्तासां भूषणेषु रत्नानि तेषां रोचिषा कान्त्या धृतमिन्द्रचापं यैः । नानाप्रकारकान्तिभिरित्यर्थः । अथ च— तदेवेन्द्रचापो येषु । कीदृशी—श्रितं चान्द्रं कर्पूरसंबन्धि सौरभं सौगन्ध्यं यया । अथच— चन्द्र एव चान्द्रः, सूर एव सौरः, तयोर्भा चान्द्रसौरभा, श्रिता चान्द्रसौरभा यया सा । शीतत्वदीप्तत्वाभ्यां चन्द्रसूर्यसदृशीत्यर्थः । रात्रिंदिनयोर्जेमनानन्त्याद्वा क्रमेण तत्कान्तिव- दृशी । चन्द्रसंबन्धिनश्चान्द्राश्चन्द्रकान्ताः, एवं सौराः सूर्यकान्ताः, तेषां भा श्रिता यया वा । चन्द्रसंबन्धि मनोज्ञत्वं सादृश्यं श्रितं ययेति वा । विश्वप्रकाशे सुरभिशब्दो मनोज्ञवाची ॥

कियद्बहु व्यञ्जनमेतदर्प्यते ममेति तृप्तैर्वदतां पुनःपुनः ।
अमूनि संख्यातुमिवावढौकि तैश्छलेन तेषां कठिनीव भूयसी ॥ १०१ ॥

कियदिति ॥ एतत्तेमनादिव्यञ्जनं मम कियत्कियत्परिमाणं बह्वर्प्यते । अपितु तृप्ता वय- मिति नार्पणीयमिति तृप्तैर्हेतोः पुनःपुनः वदतां तेषां नृपाणां 'कियत्संख्यं बहु एतद्व्यञ्जनम- र्प्यते' इति 'एतद्बहुत्वसंख्येयत्ता भवद्भिः पृच्छ्यते किम्' इति छलेनामूनि व्यञ्जनानि

संख्यातुं गणयितुमसौ गोलकावली भूयसी बहुतरा कठिनी खटिका इव तैः परिवेषकैस्तो अर्पिता। भवद्भिर्व्यंजनसंख्या पृष्टा, तदनया कठिन्या एतानि गणयेति कठिनीवार्पितेत्य थेङ्गिता। इति तदेतानमूनि संख्यातुमिव व्याजेनासौ बहुतरा कठिन्यर्पितेति वा योज्यम्। कठिन्या च संख्यायते। एतद्व्यंजनम् अमूनीति, ममेति, अनीयामिति चैकवचनबहुवचनानि जातिव्यक्तिविवक्षयेति ज्ञातव्यानि॥

विदग्धबालेङ्गितगुप्तिचातुरीप्रवह्लिकोत्पाटनपाटवे हृदः।
निजस्य टीकां प्रबबन्ध कामुकः स्पृशद्भिराकूतशतैस्तदौचितीम्॥ १०२॥

विदग्धेति॥ कश्चित्कामुकः विदग्धाया चतुराया बालाया मुग्धाया इङ्गितगुप्तौ चेष्टितगोपनविषये चातुरी यत्कौशलं सैव दुर्ज्ञेयत्वात्प्रवह्लिका गुप्ताभिप्रायः प्रबन्धविशेषस्तस्या उत्पाटने भेदने ज्ञानविषये यत्पाटवं सामर्थ्यं प्रावीण्यं तत्र विषये तदौचितीं विदग्धबालेङ्गितानामानुगुण्यं स्पृशद्भिः गतैस्तदनुरूपैराकूतशतैर्बहुभिरिङ्गितैः कृत्वा निजस्य हृदः स्वीयाभिप्रायस्य टीकां विवरणं प्रबबन्ध प्रकर्षेण कृतवान्। गुप्तान्यपि मदिङ्गितानि ज्ञातवान्, अतिचतुरोऽयं मय्यनुरक्तश्चेति तदनुगुणैः स्वीयचेष्टितैस्तां स्वाशयं बोधितवानिति भावः। बालाया अपि विदग्धसखीशिक्षया वैदग्ध्यादिङ्गितकरणम्, सहजमौग्ध्यात्सलज्जया तद्गोपनं च युक्तम्। विदग्धः कश्चन युवा, बाला च काचन, तयोरिङ्गितगुप्तिर्वा। यद्वा—विदग्धस्येङ्गितं बालायाश्च गुप्तिः अर्थादिङ्गितस्यैव। तयोर्विषये या चातुरी तत्र, प्रवह्लिकोत्पाटनपाटवे विषये, तयोरौचितीं स्पृशद्भिः। अत्र द्वयोरपि भवतोराशयो मया ज्ञात इतीङ्गितैर्ज्ञापनद्वारातिचतुरोऽहमेव त्वया भजनीय इति बालां प्रति स्वाशयं ज्ञापितवानिति भावः। अन्योऽपि विदग्धोऽतिगहनायाः प्रवह्लिकाया भेदने विषयेऽनेकैराशयैर्व्याख्यां करोति॥

घृतप्लुते भोजनभाजने पुरः स्फुरत्पुरंध्रिप्रतिबिम्बिताकृतेः।
युवा निधायोरसि लड्डुकद्वयं नखैर्लिलेखाथ ममर्द निर्दयम्॥ १०३॥

घृतेति॥ कश्चिद्युवा घृतप्लुत आज्यपूर्णे प्रसृतघृते वा भोजनभाजने पुरः स्फुरन्त्या विलसन्त्याः पुरंध्र्याः प्रतिबिम्बिता या आकृतिस्तस्या उरसि लड्डुकद्वयं मोदकयुगं निधाय नखैर्लिलेख। अथ पश्चान्निर्दयं ममर्द। यदावयोः संयोगो भावी, तदैवं तव कुचावुपचरिष्यामीति, त्वत्कुचनखक्षतविमर्देच्छुरस्मीति वा, स्वाशयं बोधितवानिति भावः। घृतेन प्लुतम्। घृतं प्लुतं यस्मिन्निति वा। 'वाहिताग्न्यादिषु' इति परनिपातः॥

विलोकिते रागितरेण सस्मितं ह्रियाथ वैमुख्यमिते सखीजने।
तदालिरानीय कुतोऽपि शार्करीं करे ददौ तस्य विहस्य पुत्रिकाम् १०४

विलोकित इति॥ रागितरेण केनचित्कामुकेन सखीरूपे जने सस्मितं विलोकिते सति अथ विलोकनानन्तरं ह्रिया वैमुख्यं पराङ्मुखत्वमिते गते सति तस्य सखीजनस्यालिः सखी कुतोऽपि कस्मादपि स्थानाच्छार्करीं शर्करावन्धनिर्मितां पुत्रिकामानीय विहस्य वैमुख्यात्संदिहानस्य तस्य करे ददौ। अधरादिचुम्बनायाङ्गेषु शर्करातुल्यरसामेनामप्यहमेव दास्यामि। स्वहस्तस्थितामेनां जानीहीति संज्ञां चकारेति भावः। सखीसमूहे वैमुख्यमिते सति तासां सखीनां काचित्सखी तदन्तर्वर्तिनी, अन्या वा, शार्करीं पुत्रिकां ददौ। शर्करा पुत्रिकापरि-

वेषणलेपेन अहं त्वां भजानीति त्वदानसंज्ञानमकरोदिति भावः । इति वा । शार्करीमिति विकारप्रत्ययः । पुत्रिका, 'पुत्रात्कृत्रिमे' इति कन् ॥

निरीक्ष्य रम्याः परिवेषिका ध्रुवं न भुक्तमेवैभिरवाप्ततृप्तिभिः ।
अशक्नुवद्भिर्बहुभुक्तवत्तया यदुज्झिता व्यञ्जनपुञ्जराशयः ॥ १०५ ॥

निरीक्ष्येति ॥ बहुभुक्तवत्तयात्याहारेणाशक्नुवद्भिर्भोक्तुमसमर्थैरेभिर्वरयात्रिकैर्यद्यस्माद्व्य-ञ्जनपुञ्जानां राशयः परम्परा उज्झितास्त्यक्ताः, तस्माद्रम्याः परिवेषिका निरीक्ष्यावाप्ततृप्तिभि-र्गतबुभुक्षैरेतैर्भुक्तमेव नेति ध्रुवमहं मन्ये । यावत्क्षिप्तं तावतस्त्वयैव दर्शनादिचमुत्प्रेक्षा । एता निरीक्ष्यावाप्ततृप्तिभिरेतैर्ध्रुवं निश्चितं नैव भुक्तमिति वा । यथा लोको मन्यत इति शेषः । यथा व्यञ्जनपुञ्जपरम्परास्त्यक्ताः, यथैभिर्न भुक्तमिति लोको मन्यत इत्यर्थ इति वा ॥

पृथक्प्रकारेङ्गितशंसिताशयो युवा ययोदासि तयापि तापितः ।
ततो निराशः परिभावयन्परामये तयातोषि सरोषयैव सः ॥ १०६ ॥

पृथगिति ॥ पृथक्प्रकारैर्नानाविधैरिङ्गितैश्चेष्टितैः कृत्वा शंसितः कथित आशयोऽभि-प्रायो येन स युवा यया स्त्रिया उदास्युदासीनः प्रतीक्षितेन न संभावितः, तया तापितो व्यथितः । उदासीनो हि दुःखं न जनयति । अनयापि तु तादृश्यापि दुःखं जनितमिति विरोधार्थोऽपिशब्दः । ततोऽनन्तरं तस्यां निराशः, तस्याः सकाशान्निराशो निर्गताभिलाषः सन् परां तदन्यां परिभावयन्निङ्गितेनानुकूलयन्सानुरागं पश्यन्स युवा सरोषया तयैव पूर्वमु-दासीनयैवातोषि परितोषितः, न तु द्वितीययेत्यर्थः । अये आश्चर्ये । सरोषो हि दुःखं जन-यति न सुखम् । तयापि तादृश्यापि सुखं जनितमिति विरोधादाश्चर्यम् । [illegible] करणमयुक्तमिति तयेङ्गितं पूर्वं न कृतम् । स तु तदाशयमजानानोऽननुरक्तेयमिति [illegible] नाकरोदिति दुःखान्यामपश्यत् । ततश्च सा सपत्नीबुद्ध्या सेर्ष्या जातेति मन्युरस्यैनम् । पूर्वं तु गाम्भीर्यादिङ्गितं नाकरोत् । सानुरागैव च सरोषा भवतीति रोषेणानुरागमनुमाय संतुष्ट इति भावः । 'उपेतया' इति पाठे रोषात्तदपसारणार्थं समीपमागतयेत्यर्थः ॥

पयःस्मिता मण्डकमण्डनाम्बरा घटाननेन्दुः पृथुलड्डुकस्तनी ।
पदं रसैर्भोज्यभुजां भुजिक्रिया प्रिया बभूवोज्ज्वलपूरहारिणी ॥ १०७ ॥

पय इति ॥ भुजिक्रिया भोजनक्रिया भोज्यभुजां भक्ष्यं भुञ्जानानां तेषां प्रिया तृप्ति-जननी । अथ च स्त्री बभूव । किंभूता—पयो दुग्धमेव स्मितं हासो यस्याः । तथा—[illegible]

[illegible]

चिरं युवाकृतशतैः कृतार्थनश्चिरं सरोपेङ्गितया च निर्धुतः।
सृजन्करक्षालनलीलयाञ्जलीनसेचि किंचिद्विधुताम्बुधारया ॥ १०८ ॥

चिरमिति ॥ कयाचिच्चेट्या कश्चिद्युवा किंचिद्विधुतया चकचालितयाम्बुधारया कृत्वाऽसेचि सिक्तः। किंभूतः—आकूतशतैरिङ्गितसहस्रैश्चिरं कृतार्थनः कृतप्रार्थनः सन् चिरं सरोषं कोपव्याजि इङ्गितं यस्यास्तयैव वारंवारं निर्धुतो निराकृतः सन्नपि। तथा—करक्षालनस्य लीलया व्याजेन प्रसादप्रार्थनासूचकानञ्जलीन्करयुगसंपुटान्सृजन्रचयन्। अञ्जलीनिति वचनेन वारंवारमञ्जलेः करणं सूचितम्। वारिधाराकम्पनेन त्वत्प्रार्थना मयाङ्गीकृता, करयुगयोजनादिरमेति सूचितम्। इयं स्वीकारचेष्टा। करक्षालनं भुजिक्रियासमाप्तिं द्योतयति ॥

न षड्विधः पिङ्क्तिजनस्य भोजने तथा यथा यौवतविभ्रमोद्भवः।
अपारशृङ्गारमयः समुन्मिषन्भृशं रसस्तोषमधत्त सप्तमः ॥ १०९ ॥

नेति ॥ षड्विधो मधुराम्ललवणतिक्तकटुकषायास्वादरूपः षट्प्रकारो रसः पिङ्क्तिजनस्य रसिककामुकसङ्घस्य भोजने विषये तथा तोषं नाधत्तोदपादयत्। यथा—यौवतं स्त्रीसङ्घस्तस्य विभ्रमो विलासस्तस्मादुद्भवो यस्य स भृशं समुन्मिषन्वर्धमानोऽपारशृङ्गारमयो निर्मर्यादानेकविधविभावानुभावव्यभिचारिसंयोगजन्यशृङ्गाररूपः सप्तमो रसः तोषमधत्त। सप्तमत्वं मधुराद्यपेक्षया ज्ञेयं, न तु नाट्यरसापेक्षया। षड्भ्यो रसेभ्योऽन्यस्याभावाद्भोजने सप्तमरसस्य सद्भावादाश्चर्यम् ॥

मुखे निधाय क्रमुकं नलानुगैरथोज्झि पर्णालिरवेक्ष्य वृश्चिकम्।
दमार्पितान्तर्मुखवासनिर्मितं भयाविलैः स्वभ्रमहासिताखिलैः ॥ ११० ॥

मुखे इति ॥ अथ हस्तक्षालनानन्तरं नलानुगैस्तैः राजभिः क्रमुकं पूगफलं मुखे निधाय वृश्चिकमवेक्ष्य दमेनार्पिता दत्ता पर्णालिर्नागवल्लीदलपङ्क्तिरौज्झि त्यक्ता। किंभूतं वृश्चिकम्—अन्तर्मुखवासेन कर्पूरकस्तूरीखदिरसारादिरूपेण मुखसौगन्ध्यकारिणा निर्मितम्। किंभूतैः—भयेन दशनभिया आ[illegible]र्व्याप्तैः। अतएव स्वभ्रमेणाऽवृश्चिके वृश्चिकबुद्ध्या हासिता हासं प्रापिता अखिला द्रष्टारो यैः। दमेनार्पितः पर्णमध्ये वर्तमानो योऽन्तर्मुखवासस्तेन निर्मितमिति वा ॥

अमीषु तथ्यानृतरत्नजातयोर्वराटराट्चारुनितान्तचारुणोः।
स्वयं गृहाणैकमिहेत्युदीर्य तद्द्वयं ददौ शेषजिघृक्षवे हसन् ॥ १११ ॥

अमीष्विति ॥ वराटराट् राजा दमो वा क्रमेण चारु सुन्दरं नितान्तचार्वतिसुन्दरं च तयोरिहैतयोस्तथ्यानृतयोः सत्यासत्ययो रत्नजातयोर्मध्ये एकं तव प्रियं रत्नजातं त्वं स्वयमेव गृहाणेति अमीषु वारयात्रिकुलेषु विषये उदीर्य कृत्रिमत्वादतिरमणीयकान्तिविशेषमलीकरत्नजातं जिघृक्षवे ग्रहीतुमिच्छवे रागितरणीकाय हसंस्तदज्ञानहेतोः किंचिद्धास्यं कुर्वंस्तयोः सत्यासत्ययो रत्नजातयोर्द्वयं युगं [illegible] वैमुख्यं द्वयं ददौ। अमीषु मध्ये शेषजिघृक्षवे इति वा। इह द्वयोर्मध्ये शेषजिघृक्षवे इति वा [illegible] जिघृक्षवे, 'द्वितीया' इति योगविभागात्समासः ॥

इति द्विकृत्वः शुचिमृष्ट[illegible]जिनां दिनानि तेषां कतिचिन्मुदा ययुः।
द्विरष्टसंवत्सरवारसुन्दरी[illegible]परीष्टिभिस्तुष्टिमुपेयुषां निशि ॥ ११२ ॥

---

१ 'विदर्भराट्' इति जीवातुसुखावबोधासंमतः पाठः।

इतीति ॥ इति पूर्वोक्तप्रकारेण द्विकृत्वो द्विवारं दिवा रात्रौ च शुचि अदोषं मृष्टं स्वादु च भोजिनां भुञ्जानानां तेषां वारयात्रिकाणां कतिचित्पञ्चषाणि दिनानि मुदा ययुः । पञ्चषाणि दिनानि सहर्षास्तत्रोषुरित्यर्थः । किंभूतानाम्—लिपि द्विः द्वौ वारावष्टौ द्विरष्टौ षोडश संवत्सरा यासां ताः वारस्य सद्व्यस्य सुन्दर्यो वेश्यादास्यादयस्तासां परीष्टिमिर्भुञ्जनादिसेवाभितुष्टिं संतोषमुपेयुषां प्राप्तवताम् । 'द्विरष्ट' इति वस्तुचः कृत्वसुचो वाचकत्वात् 'द्विः' इति प्राप्ते 'द्विकृत्वः' इत्यत्र 'अपवादविषये क्वचिदुत्सर्गस्यापि समावेशः' इति परिभाषया यथाकथंचित्परिहर्तव्यम् ॥

उवास वैदर्भगृहेषु पञ्चषा निशाः कृशाङ्गीं परिणीय तां नलः ।
अथ प्रतस्थे निषधान्सहानया रथेन वार्ष्णेयगृहीतरश्मिना ॥ ११३ ॥

उवासेति ॥ नलः कृशाङ्गीं तां परिणीय वैदर्भगृहेषु पञ्च षड् वा प्रमाणमासां ता निशा उवास । पञ्चषाणि दिनानि तत्र स्थितवानित्यर्थः । अथ सप्तमे दिनेऽनया भैम्या सह रथेन निषधान्प्रतस्थे । किंभूतेन—वार्ष्णेयनाम्ना सारथिना गृहीता रश्मयो यस्य । पञ्चषाः, 'संख्ययाऽव्यया—' इति समासे 'बहुव्रीहौ संख्येये—' इति डच्, टिलोपः । निशाः, अत्यन्तसंयोगे द्वितीया ॥

परस्य न स्प्रष्टुमिमामधिक्रिया प्रिया शिशुः प्रांशुरसाविति ब्रुवन् ।
रथे स भैमीं स्वयमध्यरूरुहन्न तत्किलाश्लिक्षदिमां जनेक्षितः ॥ ११४ ॥

परस्येति ॥ इति ब्रुवन्स नलो भैमीं स्वयमात्मनैव रथेऽध्यरूरुहदध्यारोपयामास । इति किम्—इमां पतिव्रतां भैमीं स्प्रष्टुं स्पर्शनेन्द्रियविषयीकर्तुं परस्य मदन्यस्य नाधिक्रियाधिकारः, प्रिया भैमी शिशुरल्पप्रमाणा, असौ रथश्च प्रांशुः उच्चतर इति स्वयमारोढुमसमर्थेति । तत्तस्माद्धेतोर्जनेक्षितो लोकैर्विलोकितः सन्निमां भैमीं नालिलिङ्ग । किलेति व्याजे । तत्त्वतस्तु जनचक्षुषामालिलिङ्गैव । किंत्वेवं ब्रुवन्धाष्टर्यं परिजहारेति भावः । जनेक्षितेति [illegible]लादर्थे इत्यधिकरणे सप्तमी । अध्यरूरुहत्, 'णौ चङि—' इत्युपधाह्रस्वत्वे 'दीर्घो लघोः' इत्यस्याप्रवृत्तिर्यत्नम् । अश्लिक्षत्, 'श्लिष आलिङ्गने' इति क्सः । 'अश्लिष्यत्' इति पाठे श्यन् ।

इति स्मरः शीघ्रमतिश्चकार तं वधूं च रोमाञ्चभरेण कर्कशौ ।
स्खलिष्यति स्निग्धतनुः प्रियादियं म्रदीयसी पीडनभीरुदोर्युगात् ॥ ११५ ॥

इतीति ॥ इति हेतोः शीघ्रमतिस्त्वरितबुद्धिः शीघ्रमुचितोपायस्फुरण[illegible] विषयः स्मरस्तं नलं वधूं भैमीं चोभौ रोमाञ्चानां भरेण बाहुल्येन कर्कशौ [illegible] अन्योन्यसंस्पर्शादुत्पन्नसात्त्विकरोमाञ्चौ तौ जाताविति भावः । इति किम्—[illegible] तनुर्नितरां कोमला स्नेहाङ्गी चेयं भैमी । अतः प्रियात्स्थल[illegible] ष्यति । यतः पीडने निविडधारणे भीरु दोर्युगं बाहुयुगं यस्य [illegible] इति । 'इतीव तं शीघ्रमतिः स्मरोऽकरोद्वधूम्' इति पाठः ॥

तथा किमाजन्मनिजाङ्कवर्धितां प्रहित्य पुत्रीं पितरौ [illegible] ।
विसृज्य तौ तं दुहितुः पतिं यथा विनीतवा[illegible] ॥ ११६ ॥

१ सुखावबोधायां मूलोदाहरणं त्वात्मनेपदकलाः ।

तथेति ॥ तौ पितरौ तं दुहितुः पतिं जामातरं नलं विसृज्य संप्रेष्य यथा विषेदतुः विषण्णौ बभूवतुः, तथा आजन्म जन्मप्रभृति निजाङ्कयोः स्वीयोत्सङ्गयोर्वर्धितां वृद्धिं प्रापितां प्रहित्य प्रस्थाप्य विषेदतुः किम् । अपितु नेति वैधर्म्योपमा । यतः—किंभूतम्—विनीततया स्वविनयत्वेन लक्षगुणीभवन्तः शौर्यादयो गुणा यस्य तम् । सुतावियोगादपि सगुणजामातृवियोगो नितरां तयोर्दुःसहो जात इत्यर्थः । प्रहित्य, 'हि गतौ' क्त्वो ल्यपि तुक् । विषेदतुः, सदेरेत्वाभ्यासलोपौ । 'सदिरप्रतेः' इति षत्वम् ॥

निजादनुव्रज्य स मण्डलावधेर्नलं निवृत्तौ चटुलापतां गतः ।
तडागकल्लोल इवानिलं तटाद्धृतानतिर्व्यावृते वराटराट् ॥ ११७ ॥

निजादिति ॥ स वराटराट् भीमो नलमनुव्रज्यानुगम्य निजान्मण्डलावधेः सकाशान्निवृत्तौ परावृत्तिसमये चटु प्रियवचनं लपति भाषत इति चटुलापस्तद्भावं गतः प्राप्तः प्रियं भाषमाणो धृताङ्गीकृता नलकृता आनतिर्नमस्कारो येन स एवंभूतः सन् व्यावृते निजगृहान्प्रति परावृत्तः । क इव—तडागकल्लोल इव । यथानिलं वायुमनुव्रज्य तटान्निवृत्तः चटुला आपो यस्य तद्भावं गतः सन् तीरात्सकाशात्तडागतरङ्गो व्यावर्तत इत्युपमा । चटुलाप इत्यत्र 'कर्मण्यण्' पक्षे 'ऋक्–' आदिना समासान्तः । स तु तत्पुरुष एवेति कश्चित्तदुपेक्ष्यम् ॥

पितात्मनः पुण्यमनापदः क्षमा धनं मनस्तुष्टिरथाखिलं नलः ।
अतः परं पुत्रि न कोऽपि तेऽहमित्युदस्रुरेष व्यसृजन्निजौरसीम् ॥११८॥

पितेति ॥ इत्युक्त्वा उद्गतान्यस्रूणि यस्य स एष भीमो निजामौरसीं स्वीयक्षेत्रबीजाभ्यामुत्पादितां भैमीं व्यसृजत्प्राहिणोत् । इति किम्—हे पुत्रि, आत्मनस्तव पुण्यं धर्म एव पिता हितकारित्वात्, अहितनिवारकत्वाच्च । तथा—तव क्षमाः सहनशक्तयोऽनापदो न विद्यन्त आपदो याभ्यस्ताः । आपन्नाशिका इत्यर्थः । तव मनसस्तुष्टिः संतोषोऽलुब्धत्वमेव धनम् । अथानन्तरमखिलमपि तवेष्टं नल एव । किं बहुना—एतदतिरिक्तसकलाभीष्टदत्वात्सर्वं नल एवेत्यर्थः । अतः परमद्यतनदिनप्रभृत्यहं भीमस्ते कोऽपि संबन्धी बान्धवो न भवामीति ॥

प्रियः प्रियैकाचरणाच्चिरेण तां पितुः स्मरन्तीमचिकित्सदाधिषु ।
तथास्त तन्मातृवियोगवाडवः स तु प्रियप्रेममहाम्बुधावपि ॥ ११९ ॥

प्रिय इति ॥ प्रीणाति हर्षं जनयतीति प्रियो नलः पितुः स्मरन्तीं तां भैमीं प्रियस्य मनीषितस्य एकस्य वस्तुन आचरणात्करणान्मनीषितस्य यदेकं मुख्यं केवलं वा करणं तस्मादाधिषु पितृवियोगजमानसपीडासु सत्सु चिरेण बहुना कालेनाचिकित्सदुपचचार । कस्यचिदिष्टस्य मेलनात्पितृवियोगजन्यदुःखं चिरेणात्याजयदित्यर्थः । चिरकालं पितुः स्मरन्तीमिति वा । स सर्वजनप्रसिद्धस्तस्या मातृवियोग एवासह्यतरत्वाद्वाडवो वडवानलः । तु पुनः प्रियस्य नलस्य प्रेमा निरुपाधिकः स्नेहस्तद्रूपे महाम्बुधौ सत्यपि तथाऽप्रच्युतप्राच्यरूप एवास्त स्थितवान् । तस्मिन्नतिप्रियं कुर्वत्यपि स स्तोकमपि न शान्त इत्यर्थः । पितृवियोगदुःखान्मातृवियोगस्य गौरवं सूचितम् । विशेषतश्च कन्यानाम् । अपिरौचित्ये । जलानलयोर्विरोधेऽपि वाड-

१ 'विराटराट्' इति पाठः सुखावबोधासंमतः ।

वत्साम्बुधावेव स्थितिर्युक्तेत्यर्थः । शचान (तृतीयचरणे), 'न तु प्रिय–' इत्यपि च पाठौ सष्टार्थौ । पितुः 'अधीगर्थ–' इति षष्ठी अचिकित्सत् । 'कित निवासे रोगापनयने च' इत्यस्मात् 'गुप्तिज्किद्भ्यः–' इति रुक्प्रतीकारे स्वार्थे सन् कितेश्चोदात्तेत्त्वपाठात् सन्नन्तादपि परस्मैपदमेव, न त्वात्मनेपदमिति सिद्धान्तः ॥

असौ महीभृद्बहुधातुमण्डितस्तया निजोपत्यकयेव कामपि ।
भुवा कुरङ्गेक्षणदन्तिचारयोर्बभार शोभां कृतपादसेवया ॥ १२० ॥

असाविति ॥ असौ भूभृन्नलस्तु पुनर्बहुधानेकप्रकारं मण्डितो नानारत्नादिभिरलंकृतस्तया भैम्या कामप्यतिशयितां शोभां बभार । किंभूतया—कुरङ्गवद्धरिणवदीक्षणं विलोकनम्, दन्तिवद्धस्तिवच्चारो गतिः तयोर्भुवा स्थानभूतया हरिणाक्ष्या गजगत्या च । तथा—कृता भर्तुः पादसेवा यया । कया क इव—निजोपत्यकया पर्वतासन्नभूम्या महीभृत्पर्वत इव । बहुभिर्गैरिकादिधातुभिर्मण्डितः । किंभूतयोपत्यकया—हरिणानामीक्षणस्य, हस्तिनां भक्षणस्य गमनस्य वा स्थानभूतया । तथा—कृता प्रत्यन्तपर्वतानां सेवा आश्रयणं यया । कृता प्रत्यन्तपर्वतैः सेवा यस्या इति वा ॥

तदेकतानस्य नृपस्य रक्षितुं चिरोढया भावमिवात्मनि श्रिया ।
विहाय सापत्न्यमरञ्जि भीमजा समग्रतद्वाञ्छितपूर्तिवृत्तिभिः ॥ १२१ ॥

तदिति ॥ चिरोढया चिरकालं ध्रियमाणया । अथ च—चिरपरिणीतया श्रिया राज्यलक्ष्म्या तदेकतानस्य तदेकनिष्ठस्य भैमीतत्परस्य नृपस्यात्मनि स्वविषये भावमनुरागं रक्षितुं स्थिरीकर्तुमिव सापत्न्यमेकभर्तृकस्त्रीद्वयान्योन्येर्ष्यां विहाय समग्राणां तस्या भैम्या वाञ्छितानां पदार्थानां पूर्तिः पूरणं तस्यां वृत्तिनिर्वर्तनैर्व्यापारैः कृत्वा भीमजारञ्जि प्रीणिता । संपद्वैभवेन दुर्लभान्यपि तद्वाञ्छितानि नलेन पूरितानि, ततश्च सा परितुष्टेति भावः । अन्यापि चिरपरिणीता विदुषी नवोढायामनुरक्तस्यात्मनि आत्मन्यनुरागरक्षणार्थं सापत्न्यं त्यक्त्वात्मनो ज्यैष्ठ्यं रक्षयन्ती सती नवोढाया हितकरणेन प्रीतिं जनयति ॥

मसारमालावलितोरणां पुरं निजाद्वियोगादिव लम्बितालकाम् ।
ददर्श पश्यामिव नैषधः प्रियामथाश्रितोद्ग्रीविकमुन्नतैर्गृहैः ॥ १२२ ॥

मसारेति ॥ अथ बहुमार्गलङ्घनानन्तरं नैषधः पुरं प्रियामिव ददर्श । किंभूतां पुरम्—मसारमालावलिरिन्द्रनीलमालापरम्परा एवाम्रदलादिरचितमालारूपाणि तोरणानि यस्याम् । इन्द्रनीलमालावलियुक्तानि तोरणानि बहिर्द्वाराणि यस्यास्ताम् । तथा—अत एव—निजाद्वियोगाल्लम्बितालकामिव प्रसारितचूर्णकुन्तलामिव । तथा—उन्नतैरत्युच्चैर्गृहैः कृत्वा आश्रितोद्ग्रीकृता उद्ग्रीविकामूर्ध्वीकृतकण्ठतया विलोकनं यथा स्यादेवं पश्यामिव विलोकिकामिव । उच्चत्वाद्दूरत एव दृष्टवानित्यर्थः । 'पश्यान्' इति पाठे नागराणां पश्यामिव । अन्यापि नायिका

---

१ 'तथाच 'अन्योन्याभावसंसर्गाभावभेदम्ब्यवसितौ । तत्रा तादात्म्यसंसर्गे साध्यं चिकित्सितुः' इति श्रीहर्षस्य खण्डनखण्डखाद्यान्तरे खण्डनप्रकारो 'चिकित्सतान्' इति बुधः पाठः । कितिधातोः केवलस्याप्रयोगात् 'अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवति' इति न्यायादनुदात्तेत्त्वादात्मनेपदप्राप्तिः—इति दर्पणनामलिखितके वचिन्त्यमेव'—इति सुखावबोधा । २ 'दिशान्' इति पाठः कुत्रापि नोपलभ्यः । तथापि 'पश्यामिति पाठे' इति 'दिशामिव' इति च वेद्यपुस्तकस्थाः ।

अमीति ॥ निखिलानां नगरसंबन्धिनां सौधानां सुधाधवलितगृहाणामट्टावल्य उपरितन-गृहविशेषपङ्क्तयस्तासामप्युपरि चन्द्रशालास्तृतीयशिरोगृहाः । अट्टावलीनां गवाक्षविवराणि वा । ता अभिनवा नवोढा दमयन्ती तस्याः कान्तिजालस्यादृष्टपूर्वस्यावलोके अवलोकनायोत्सुकानां पुर-पुरन्ध्रीणां वक्त्रचन्द्रस्यान्वयेन संबन्धेन कृत्वा क्षणमिव क्षणमात्रं यावत्तन्मुखसंबन्धस्तावत्तदन्तं निजसंज्ञां स्वीयं नाम मुखचन्द्रसंबन्धतया यान्वया चन्द्रयुक्ताः शालाः गृहाणि चन्द्रशालाः, चन्द्राणां वा संबन्धिन्यः शालाः इति योगसहितामन्वभूवन् । सान्वयानिवेति योत्प्रेक्षा । सर्वा अपि पुरनार्यो गवाक्षविवरैर्भैमीमपश्यन् । तानि च तन्मुखचन्द्रसंबन्धेन यौगिकत्वेन कवि-नोत्प्रेक्षितानि ॥

निषधनृपमुखेन्दुश्रीसुधां सौधवातायनविवरगरश्मिश्रेणिनालोपनीताम् ।
पपुरलमपिपासापांसुलत्वोत्पराग्यखिलपुरपुरन्ध्रीनेत्रनीलोत्पलानि १२८

निषधेति ॥ अखिलानां सकलानां पुरपुरन्ध्रीणां नगरस्त्रीणां नेत्राण्येव नीलोत्पलानि निषधनृपस्य मुखेन्दुश्रीस्तल्लक्षणां सुधाममृतं पपुः सादरमालोकन्त । किंभूतां सुधाम्—सौध-वातायनानां विवरेभ्यश्छिद्रेभ्यो गच्छन्त्यो बहिर्निर्गच्छन्त्यो रश्मिश्रेणयो नयनकिरणपङ्क्तय-स्तद्रूपा ये नाला विवृतत्वादल्पजलपानसाधनभूतनालाः कमलनालदण्डास्तैरुपनीतां नेत्रसमीपं प्रापिताम् । किंभूतानि नीलोत्पलानि—अलमत्यर्थं पातिभूयस्या पिपासया पानेच्छया पांसु-लत्वं शुष्कत्वं सोत्कण्ठतरत्वं च येनैयोत्कृष्टा उत्तन्तो वा परागाः कौसुमरजांसि येषु तानि । गवाक्षविवरैः कृत्वा नलमुखशोभां सर्वा अपि सादरं ददृशुरित्यर्थः । कुमारीणां सर्वोऽमस्ता, पौरस्त्रीणां च गवाक्षान्तर्गतत्वा, कौतुकमानेन स्थैरार्जवेन कनीनिकानोलरश्मीनां नालरूपता-नुमिततरत्वमुक्तम् । अन्योऽपि पिपासातिशयेन शुष्ककण्ठो दूरस्थं कूपादुदकं सच्छिद्रकमलनाला-दिना पिबति । नलैककारमेव बहु पिबत्यन्तर्देवदमयन्तीमिषा ॥

अवनिपतिपथाट्टस्त्रैणपाणिप्रवालस्खलितसुरभिलाजव्याजभाजः प्रतीच्छन् ।
उपरि कुसुमवृष्टीरेष वैमानिकानामभिनवकृतभैमीसौधभूमिं विवेश ॥१२९॥

अवनीति ॥ एष नलोऽभिनवकृतस्य नूतननिर्मितस्य भैमीसंबन्धिनः सौधस्य [illegible] भूमिमुपरितनीं वा भूमिं विवेश । किं कुर्वन्—[illegible] उपरि स्थितानां वैमानिकानां देवानां कुसुमवृष्टीरुपरि शिरस्यादरेण प्रतीच्छन्स्वीकुर्वन् । किंभूता वृष्टीः—अवनिपतिपथे राजमार्गेऽट्टेषु [illegible] पाणिप्रवालेभ्यः स्खलिताः सुरभयः [illegible] लाजास्तेषां व्याजं मिषं भजन्ति । [illegible] । ता अपि दत्वेभ्यो [illegible] । [illegible] ॥

इति परिणयनित्यं [illegible] याने [illegible] ।
दिवि दिविषदधीशाः कौतुकेनावलोक्य [illegible] ॥

इतीति ॥ [illegible]

---

१ [illegible] । २ [illegible], [illegible] इति च [illegible] ।

दधुरिव गन्तुमचिन्तामपि । तत्तदाखण्डिदाय नाकात् नाकलोकेतोपनाद्यः सूचनादि । किंभूताः—अनयोर्भैमीनलयोरिति पूर्वोक्तप्रकारं पाणिग्रहणं विवाहमीक्षानुकारीत्वा च एक- स्मिन्नाने रथे याने स्थिता गमनम्, तथा—दमयन्तीमीक्षसमयं सलज्जं सकटाक्षम् विलोकनं, तच्च एतत्सर्वं विमानाद्ये स्थिता कौतुकेनावलोकनमानन्देन परमहर्षेण सम्पूर्णाः । 'प्रविष्टपुरम्–' इति पाठे तयोर्गृहप्रवेशानन्तरमित्यर्थः । स्वयंवरानन्तरमेव देवा निर्गता इति चतुर्दशे सर्गे यद्यप्युक्तं तथापि भूमेर्निर्गत्य नलपुरप्रवेशपर्यन्तं नलभैमीकौतु- विलोकनार्थं गगने स्थिता इति विशेषेण सूचितम् । इदानीं पुनः स्वर्गं प्रति निर्गता इत्ये- केन कोऽपि विरोधः । किंचानन्तरसर्गसंगत्यै कलिमिलद्रपारम्भसाम्यसूचकतां परित्यज्य नलः पुरं प्रविष्टः, देवाश्च स्वर्गं जग्मुः । गच्छतां च तेषां मध्येमार्गं कलेरागमनसूचकदानादिक- कथानुप्रसक्त्यवतरणाय युक्तमुक्तम् ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
काश्मीरैर्महिते चतुर्दशतयीं विद्यां विदद्भिर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गोऽगमत्षोडशः ॥ १३१ ॥

श्रीहर्षमिति ॥ पूर्वार्धः पूर्ववत् । किंभूते काव्ये—चतुर्दशतयीं विद्यां विदद्भिर्जानद्भिः सरस्वतीजाग्रदधिष्ठानकाश्मीरदेशोद्भवैरपि विद्वद्भिः परीक्षापूर्वं महिते पूजिते दोषलेशे- नापि रहिते सर्वगुणपूर्णे । तथा—तद्भुवि तस्माच्छ्रीहर्षाद्भवतीति तद्भु । तस्माद्भूरुत्पत्ति- र्यस्यैवंविधे वा । 'नैषधेश–' इति पाठे नैषधश्चासावीशश्चेति व्याख्येयम् । काश्मीरैरिति पूजार्थक्तयोगे 'क्तस्य च वर्तमाने' इति षष्ठीविधानात्तृतीया चिन्त्या । 'पूजितो यः सुरैरपि' इत्यादिशिष्टप्रयोगदर्शनाद् 'वर्तमानेऽर्थे विहितस्य क्तस्य योगे षष्ठी भवति, चकारात्प्रयोजना- नुरोधेनान्यापि' इति सूत्रार्थं निर्वर्ण्य, 'चतुर्थ्यर्थे बहुलं छन्दसि' इत्यतो बहुलग्रहणं वानु- वर्त्य, काश्मीरैः करणभूतैः, महः पूजा संजातास्येति महित इति तारकादेराकृतिगणत्वात् क्तान्तत्वाभावं वा संपाद्य, क्तान्तत्वेऽपि 'कलहंसरागमहित' इत्यादि भट्टिप्रयोगे तथा- सद्दर्शनात् 'मतिबुद्धिपूजार्थेभ्यश्च' इति चकाराद्भूतेऽपि शिष्टप्रयोगानुसारेण क्तप्रत्ययमङ्गी- कृत्य, 'क्तस्य च वर्तमाने' इति षष्ठीप्राप्त्यभावात्कर्तरि तृतीयैवेति वा यथाकथंचित्समर्थनी- यम् । चतुर्दशतयीमिति, 'संख्याया अवयवे–' इति तयपि 'टिड्ढाणञ्–' इति ङीप् । विद्यां विदद्भिः, 'न लोका–' इति षष्ठीनिषेधः । तद्भुवि, भाषितपुंस्कत्वात्पुंवद्भावः । षोडशः पूर्ववत् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते नैषधीयप्रकाशे
षोडशः सर्गः ॥

सप्तदशः सर्गः ।

अथारभ्य वृथाप्रायं धरित्रीधावनश्रमम् ।
सुराः सरस्वदुल्लोललीला जग्मुर्यथागतम् ॥ १ ॥

अथेति ॥ अथ स्वर्गगमनचिन्तनानन्तरं धरित्रीं प्रति धावनेन जनितं श्रमं वृथैव वृथाप्रायं व्यर्थमेवारभ्य विद्यमानागामित्वेनानुपलक्षितहर्षविषादतया । अथ च—तटभूमिं प्रति निष्प्रयोजनमावगमनेन ततः पुनर्यथागतं व्यावर्तनेन च । सरस्वतः समुद्रस्योल्लोलास्तरङ्गास्तद्वल्लीला येषां तत्तुल्याः सुरा आगतमनतिक्रम्य यथागतं स्वर्गं जग्मुः । भैमीमप्राप्यैव जग्मुरित्यर्थः । भैम्यलाभाच्छ्रमस्य वैयर्थ्यम् । नलभैमीवरदानद्वारात्मगौरवरक्षणात्प्रायशब्दः प्रायोजि, न तु वृथैवेत्युक्तम् । वृथा वृथात्वं प्रायते प्राप्नोति वा वृथाप्रायम् । यथागतम्, अव्ययीभावः । यथा आगतं तथा जग्मुरिति वा ॥

तदेवाह—

भैमीं पत्ये भुवस्तस्मै चिरं चित्ते धृतामपि ।
विद्यामिव विनीताय न विषेदुः प्रदाय ते ॥ २ ॥

भैमीमिति ॥ ते देवाश्चिरं चित्ते धृतामपि भैमीं तस्मै भुवः पत्ये नलाय प्रदाय दत्त्वा न विषेदुः । पश्चात्तापं न प्राप्ता इत्यर्थः । कस्मै कामिव—विनीताय शिष्याय चिरं चित्ते धृतामभ्यस्तां विद्यामिव । दत्तापि विद्या चित्ताद्यथा नोपरमति, तथा नलाय दत्तापि सा बहु-मततया तेषां चित्तान्नोपरतेति ॥

कान्तिमन्ति विमानानि भेजिरे भासुराः सुराः ।
स्फटिकाद्रेस्तटानीव प्रतिबिम्बा विवस्वतः ॥ ३ ॥

कान्तीति ॥ भासुरास्तेजोरूपाः सुराः कान्तिमन्ति रत्नैर्दीप्तानि विमानानि यदृच्छया गामिनो रथानभेजिर आरुरुहुः । के कानीव—विवस्वतः सूर्यस्य भासुराः प्रतिबिम्बाः स्फटिकाद्रेः कैलासस्य तटानीव । प्रतितटं प्रतिफलितत्वात्प्रतिबिम्बानां बहुत्वम् । भासुराः, 'भञ्जभास—' इति घुरच् ॥

जवाज्जातेन वातेन बलाकृष्टबलाहकैः ।
स्खलनात्स्वस्य शीघ्रत्वं रथैरेषामिवाकथि ॥ ४ ॥

जवादिति ॥ जवाद्रथवेगाज्जातेन वातेन कृत्वा बलादाकृष्टाः [illegible] मेघा यैस्तैरेषां देवानां रथैः स्खलनाद्भूमेः [illegible] [illegible] शीघ्रत्वम[illegible] कथितमिव । आकृष्टबलाहकस्य [illegible] रथानां शीघ्रत्वमित्यर्थः । शीघ्रशब्दोऽत्र धर्मिवचनः । वेगजेन वातेन स्खलनेनेति वा । [illegible] [illegible] । [illegible], 'पवनो निनदे' इति [illegible] ॥

---

१ 'निस्तुल्यत्वम्' इति जीवातुरत्र निर्मूलः । [illegible] ।

क्रमाद्दवीयसां तेषां तदानीं समदृश्यत ।
स्पष्टमष्टगुणैश्वर्यात्पर्यवस्यन्निवाणिमा ॥ ५ ॥

क्रमादिति ॥ क्रमाद्गमनाद्दवीयसां दूरतराणां तेषां तदानीमणिमाणुत्वं स्पष्टं प्रकटं समदृश्यत । किंभूत इव—अष्टानां गुणानामणिमादीनामैश्वर्यादाधिपत्यात्पर्यवस्यन्निव पृथग्भूत इव । सर्वेभ्यो महिमादिभ्यो गुणेभ्यः पृथग्भूतत्वादिव स्पष्टं दृष्ट इत्यर्थः । स्थूलमपि वस्तु दूरत्वात्सूक्ष्मं दृश्यते, येषामष्टौ गुणा विद्यन्ते तन्मध्येऽणिमैव तस्मिन्समये स्पष्टो दृष्टः, नत्वन्य इत्यर्थः । तस्मिन्काले पर्यवस्यन्स्फुटीभवन्निति वा । स्पष्टमुत्प्रेक्षते । तेषां रथानामिति वा देवानामष्टगुणैश्वर्यात्तत्संबन्धाद्रथेष्वप्यणिमा समागत इति व्याख्येयम् । दवीयसामतितरां दूराणाम्, ईयसुनि 'स्थूलदूर—' इति परयणादिलोपे पूर्वस्य गुणः । अणिमा सूक्ष्मादिः ॥

ततान विद्युता तेषां रथे पीतपताकताम् ।
लब्धकेतुशिखोल्लेखा लेखा जलमुचः क्वचित् ॥ ६ ॥

ततानेति ॥ क्वचित्कस्मिंश्चिदाकाशप्रदेशे लब्धः केतुशिखया ध्वजाग्रेणोल्लेखो योगो यया । तत्संबन्धात्कृतविद्युत्प्राकट्येति यावत् । एवंविधा जलमुचो मेघस्य लेखा पङ्क्तिस्तेषां देवानां रथे विद्युता कृत्वा पीता पताका यस्य तद्भावं ततान । ध्वजाग्रसंबन्धात्प्रकटिता विद्युद्ध्वजाग्रे पीता पताकेवाभूदित्यर्थः ॥

पुनःपुनर्मिलन्तीषु पथि पाथोदपङ्क्तिषु ।
नाकनाथरथालम्बि बभूवाभरणं धनुः ॥ ७ ॥

पुनरिति ॥ इतस्ततो गमनवशात्पथि पुनः पुनः मिलन्तीषु संबध्यमानासु पाथोदा मेघास्तेषां पङ्क्तिषु वर्तमानं धनुरिन्द्रधनुर्मार्गसंबन्धवशान्नाकनाथरथमालम्बते एवंशीलं संबद्धं सदिन्द्ररथस्यैवाभरणं भूषणं बभूव । इन्द्ररथे वर्तमानं धनुरागच्छन्तीषु मेघपङ्क्तिषु क्षणं भूषणमभूदिति वा । मेघा हि सेन्द्रचापाः शोभन्ते ॥

जले जलदजालानां वज्रिवज्रानुबिम्बनैः ।
जाने तत्कालजैस्तेषां जाताशनिसनाथता ॥ ८ ॥

जल इति ॥ जलदजालानां जले तस्मिन्काले इन्द्रादिगमनसमये जातैर्वज्रिणो वज्रस्यानुबिम्बनैः प्रतिबिम्बैः कृत्वा तेषां मेघजालानामशनिना वज्रेण सनाथता सस्वामिकता जातेति जाने । तदाप्रभृति प्रायेण मेघानां सवज्रत्वमित्युत्प्रेक्षा ॥

स्फुटं सावर्णिवंश्यानां कुलच्छत्रं महीभुजाम् ।
चक्रे दण्डभृतश्चुम्बन्दण्डश्चण्डरुचिं क्वचित् ॥ ९ ॥

स्फुटमिति ॥ दण्डभृतो यमस्य दण्डः क्वचिदाकाशदेशे चण्डरुचिं सूर्यं चुम्बन्स्पृशन्सन् तं सूर्यमेव सावर्णेर्मनोर्वंशे जातानां महीभुजां कुलच्छत्रं कुलश्रेष्ठम् । अथ च—कुलक्रमायातं राजचिह्नं स्फुटमिव चक्रे । स्वयं वृत्तत्वात्, अधो दण्डसंबन्धात् छत्रमिवेत्युत्प्रेक्षा । ते

१ 'तादृशासंबन्धे संबन्धोक्तेरतिशयोक्तिरलंकारः'—इति जीवातुः । २ 'चण्डरुचम्' इति सुखावबोधासंमतः पाठः ।

सूर्यमण्डलं प्राप्ता इति भावः । उदये अस्तमये च समानो वर्णोऽस्य स सवर्णः सूर्यस्तस्यापत्यं सावर्णिः, 'अत इञ्' । वंश्यः, दिगादिः ॥

नलभीमभुवोः प्रेम्णि विस्मिताया दधौ दिवः ।
पाशिपाशः शिरःकम्पस्रस्तभूषश्रवःश्रियम् ॥ १० ॥

नलेति ॥ पाशिपाशो वरुणपाशो नलभीमभुवोरनन्यतुल्ये प्रेम्णि विषये विस्मिताया दिवो विस्मयवशादेव शिरःकम्पेन स्रस्ता भूषा भूषणं यस्मादेवंविधस्य श्रवसः कर्णस्य श्रियं लक्ष्मीं दधौ । तत्सादृश्यात्कुण्डलरहितः कर्ण इव शुशुभ इत्यर्थः । अनेन दिवो नायिकात्वं व्यज्यते ॥

पवनस्कन्धमारुह्य नृत्यत्तरकरः शिखी ।
अनेन प्रापि भैमीति भ्रमं चक्रे नभःसदाम् ॥ ११ ॥

पवनेति ॥ पवनस्य चन्द्रसूर्याद्याधारेष्वावहादिषु सप्तसु स्कन्धेषु मध्ये ताराचक्राधारभूतं स्कन्धमारुह्य नृत्यन्तः उद्गच्छन्तः कराः किरणा ज्वालारूपा यस्य स शिखी वह्निरनेनाग्निना भैमी प्रापीति नभःसदां देवानां भ्रमं चक्रे । भैमीप्राप्तिहर्षादयं नृत्यति किमिति सर्वेषां देवानां भ्रान्तिर्जातेत्यर्थः । अन्योऽपि नववधूलाभे कस्यचिन्मित्रस्य स्कन्धमारुह्य नृत्यन्करो भवति ॥

तत्कर्णौ भारती दूनौ विरहाद्भैमिजागिराम् ।
अध्वनि ध्वनिभिर्वर्णैरनुकल्पैर्व्यनोदयत् ॥ १२ ॥

तत्कर्णाविति ॥ भारती वाणी भीमजागिरां भैमीवाणीनां विरहाद्दूनौ संतप्तौ तेषां देवानां कर्णावध्वनि मार्गेऽनुकल्पैर्भैमीवाण्याः सकाशान्न्यूनैर्ध्वनिभिर्वर्णैर्व्यनोदयत् [illegible] चकार । मुख्याभावेऽनुकल्पोऽपि कार्यार्थमाश्रीयते । 'स्तनादीनां द्वित्वविशिष्टा जातिः प्रायेण' इति वचनात्कर्णाविति प्रतिनियतापेक्षं द्विवचनम् ॥

अथायान्तमवैक्षन्त ते जनौघमलित्विषम् ।
तेषां प्रत्युद्गमप्रीत्या मिलद्व्योमेव मूर्तिमत् ॥ १३ ॥

अथेति ॥ अथ वाणीविनोदानन्तरं ते देवास्तत्र [illegible] आयान्तं संमुखमागच्छन्तं जनौघमवैक्षन्त [illegible] । उत्प्रेक्षते—तेषां देवानां प्रत्युद्गमस्य प्रीत्या वाञ्छया मिलत्संगच्छमानं मूर्तिमत्सशरीरं व्योमाकाशमिव । यतः—[illegible] [illegible] युक्तम् । 'जनौघं मलीमसम्' इत्यपि पाठः ॥

अद्राक्षुराजिहानं ते स्मरमग्रेसरं सुराः ।
अक्षाभिनयशिक्षार्थं कलिनेव पुरस्कृतम् ॥ १४ ॥

अद्राक्षुरिति ॥ ते सुरा अग्रेसरं पुरःसरम् [illegible] आजिहानमागच्छन्तं स्मरमद्राक्षुः । उत्प्रेक्षते—[illegible], अथ च—[illegible], [illegible] [illegible] पुरस्कृतमिव, अथ च—[illegible] । [illegible] [illegible] [illegible] [illegible]

१ [illegible]

अगम्यार्थं तृणप्राणाः पृष्ठस्थीकृतभीह्रियः।
शम्भलीभुक्तसर्वस्वा जना यत्पारिपार्श्विकाः ॥ १५ ॥

अगम्येति ॥ एवंभूता जना यस्य कामस्य परितः पार्श्वयोश्चरन्तीति पारिपार्श्विकाः। वयस्या इत्यर्थः। सेवका वा। किंभूताः—गन्तुमशक्यानामनर्हाणां राज्यादीनां मात्रादीनां च संभोगार्थं तृणमिवानायासत्याज्याः प्राणा येषां ते। अत एव—पृष्ठस्थीकृते पश्चात्कृते परित्यक्ते भीह्रियौ यैस्ते। वधभयं पापभयं लोकलज्जा च, तत्सर्वं यैस्त्यक्तं ते तादृशाः। निर्भया निर्लज्जाश्चेत्यर्थः। तथा—अप्राप्यामेवस्त्रीमेदनकृतप्रतिज्ञाभिः शम्भलीभिः कुट्टनीभिर्भुक्तं सर्वस्वं येषां ते। सन्तीति शेषः। पारिपार्श्विकः पूर्ववत् ॥

बिभर्ति लोकजिद्भावं बुद्धस्य स्पर्धयेव यः।
यस्येशतुलयेवात्र कर्तृत्वमशरीरिणः ॥ १६ ॥

बिभर्तीति ॥ यः स्मरो लोकाञ्जयतीति लोकजित्तस्य भावं सर्वजनविजयितां बिभर्ति। उत्प्रेक्षते—बुद्धस्य स्पर्धयेव। जिनो हि मारजिदिति स्वशत्रुस्पर्धयेव 'मारजिल्लोकजिज्जिनः' इत्यभिधानाल्लोकजित्पदवाच्यत्वं बिभर्तीत्यर्थः। तथा—यस्याशरीरिणः शरीररहितस्य दग्धदेहत्वादनङ्गस्यात्र लोकेकामिनां मनोविकारं प्रति मैथुनद्वारा सर्वजनान्प्रति वा कर्तृत्वं स्रष्टृत्वम्। अत्राप्युत्प्रेक्षते—विश्वकर्तुरीशस्य तुलयेव स्पर्धयेव। ईश्वरो हि स्मरहरत्वात्स्मरस्य शत्रुः, तस्मात्तत्स्पर्धयेव तस्याशरीरकर्तृत्वं स्वयमविनयेनाङ्गीकृतमित्यर्थः। यथा—अशरीरिण एवेश्वरस्य कर्तृत्वमिति न्यायविदः, तथा—अयमप्यनङ्ग एव सन्कार्यकारीत्यर्थः। जिनमहेशाभ्यां जितोऽपि लोकजित्त्वेनाशरीरकर्तृत्वेन च यः पुनस्ताभ्यां समः। एवंविधोऽतिबलवानिति भावः ॥

ईश्वरस्य जगत्कृत्स्नं सृष्टिमाकुलयन्निमाम्।
अस्ति योऽस्त्रीकृतस्त्रीकस्तस्य वैरं स्मरन्निव ॥ १७ ॥

ईश्वरस्येति ॥ अस्त्रीकृताः शस्त्रीकृताः स्त्रियो येन एवंविधो यः काम ईश्वरस्य इमां सृष्टिमीश्वरेण निर्मितं कृत्स्नं जगदाकुलयन्नन्यवृत्ति चेतः स्ववशं कुर्वन्। अथ च—पीडयन्। अस्ति। उत्प्रेक्षते—तस्येश्वरस्य देहदाहजनितं वैरं स्मरंश्चिन्तयन्निव। देहदाहो ममानेन कृतः तस्मादेतेन रचितमेतदीयं जगत्पीडयिष्यामीति बुद्ध्येश्वरस्य किंचिदपकर्तुमसमर्थः, तदा जगत्स्त्रीरूपेण शस्त्रेण पीडयंस्तेन सह स्पर्धते इत्यर्थः। प्रत्यनीकाग्रे आयुधनिष्कृता स्त्री येनेति स्त्रिया अस्त्रीशस्त्रीत्वकरणे विरोधाभासश्च। अथवा—या ईश्वरेण स्त्री कृता सानेनास्त्री कृतेत्यपि प्रतिकूलाचरणेनेश्वरेण सह स्पर्धते। अथवा—ईश्वरेणापि त्रिपुरवधे मोहिनी स्त्री शस्त्रीकृतानेनापि स्त्री शस्त्री कृतेत्येकविषयतया स्पर्धा। शक्तिरूपो हि श्रीविष्णुस्त्रिपुरवधे भगवता शरतां नीत इत्यागमः। 'अनुस्मरन्' इति पाठे लुप्तोत्प्रेक्षा। सृष्टिशब्दो नियतस्त्रीलिङ्गः। तत्सम्बन्धाद् इमामिति निर्देशः। अस्त्रीकृतेत्यत्रानन्त्रमत्रं कृताऽस्त्रीकृतेति 'च्वौ' इतीकारः। पक्षे—न स्त्री अस्त्री, अस्त्रीकृता स्त्री येनेति समासः। 'नद्यृतश्च' इति कप्। कुलकम् ॥

---

१ 'अगम्यार्थंतृणप्राणाः' इति वा पाठः सुखावबोधात्सम्मतः। २ इत्यर्थान्प्रत्यनीकम्। अस्त्रुधीकृता स्त्री येनेति स्त्रिया 'अस्त्रीत्व' इति पाठः प्रतिभाति ॥

चक्रे शक्रादिनेत्राणां स्मरः पीतनलश्रियाम् ।
अपि दैवतवैद्याभ्यामचिकित्स्यमरोचकम् ॥ १८ ॥

चक्र इति ॥ स्मरः कामः पीतनलश्रियां सादरदृष्टनलशोभानां शक्रादिनेत्राणामिन्द्राग्न्यादिनेत्राणां दैवतवैद्याभ्यां नासत्याभ्यामपि न चिकित्स्यं प्रतिकर्तुमशक्यमरोचकं रुच्यभावं चक्रे। अधिकरूपस्य नलस्य दृष्टत्वात्, तद्धीनरूपे स्मरे दृष्टे तन्नेत्राणां प्रीतिर्न जाता। न केवलं स्मरं दृष्ट्वा न प्रीतास्ते, किंतु दस्रावपि। तयोरपि नलाद्धीनत्वादित्यर्थः। स्मरदस्रेभ्योऽपि नलोऽधिक इति ध्वन्यते। स्मरगमनादस्य पुरश्चलिता इति भावः। अथवा—अरोचकं सर्वेषामादिरुच्यभावो रोगविशेषः। स कर्मजत्वाद्देववैद्याभ्यामपि चिकित्सितुमशक्यः किं पुनर्न्यैर्वैद्यैरिति समासोक्तिः। भङ्गयन्तरेण नलरूपातिशयप्रकाशे तात्पर्यमुक्तम्। उपमानतिरस्काराात्प्रतीपं च। पीतनलश्रियामिति, 'तृतीयादिषु—' इति पुंवद्भावात्पुंस्त्वकहस्वत्वाभावात्नुडभावः। अचिकित्स्यमिति शक्यार्थे 'अचो यत्' इति यत्। 'दुश्चिकित्स्यम्' इति पाठे कर्मणि खल्। दुर्नयर्थः। खलर्थयोगात् 'न लोका—' इति षष्ठीनिषेधात् 'वैद्याभ्याम्' इति तृतीया। अरोचकमिति 'रोगाख्यायां—' इति बाहुलकादविधानेऽपि ण्वुल् ॥

यत्तत्क्षिपन्तमुत्कम्पमुत्थायुकमथारुणम् ।
बुबुधुर्विबुधाः क्रोधमाक्रोशाक्रोशघोषणम् ॥ १९ ॥

यत्तदिति ॥ अथ स्मरदर्शनानन्तरं यत्तत्किंचिल्लोष्टकाष्ठपाषाणादि परप्रहारार्थं क्षिपन्तम्, नितरां सर्वाङ्गकम्पिनम्, जनैर्वार्यमाणमप्यावेशातिशयात्केशाकेशि योद्धुं पौनःपुन्येनोत्तिष्ठन्तम्, लोहितीभूतसर्वाङ्गम्, क्रोशं मर्यादीकृत्याभिव्याप्य वा परनिन्दावादस्य उद्घुष्टं यस्य। अतिदूरश्रूयमाणपरुषभाषिणमिति यावत्। एवंभूतं सशरीरं क्रोधं तत्र गच्छन्तं ते देवा बुबुधिरे। एतैश्चिह्नैः क्रोधोऽयमिति ज्ञातवन्त इत्यर्थः। क्रोधाक्रान्तस्य जातिरियम्। 'आक्रोशाक्रोशभूषणम्' इति पाठे आक्रोशं आक्रोशः स भूषणं यस्येत्यर्थः। उत्थायुकमिति पूर्ववत् ॥

यमुपासन्त दन्तौष्ठक्षतासृक्शिम्बचक्षुषः ।
भ्रुकुटीफणिनिर्नादनिभनिश्वासफूत्कृतः ॥ २० ॥

यमिति ॥ दन्तैरोष्ठयोर्यत्क्षतं तत्र यदसृक् तस्य शिम्बिभूते तत्सादृश्ये [illegible] लक्षणया तत्तुल्ये नेत्रे येषां ते। तथा—भ्रुकुटी भ्रूभङ्गः सैव फणी सर्पः तस्य नादः फूत्कारस्तत्तुल्याः संरम्भान्निर्गच्छन्तो निश्वासवाताः फूत्कृता येषां ते एवंभूता जना यं सेवन्ते तं बुबुधिरे इति पूर्वेण संबन्धः। क्रोधवशाद्दन्तैरोष्ठौ दश्येते। नेत्रे रक्ते जायेते। तेन [illegible] निर्गच्छन्ति। यस्य सेवका एवंविधा इत्यर्थः। [illegible] ॥

दुर्गं कामाशुगेनापि दुर्भेद्यमवलम्ब्य यः ।
दुर्वासोहृदयं लोकान्सेन्द्रानपि दिधक्षति ॥ २१ ॥

दुर्गमिति ॥ यः क्रोधो [illegible] दुर्गम्। [illegible]

यः सर्वेति ॥ यो लोभः सर्वेन्द्रियाणि षडिन्द्रियाणि सन्मानि यस्य एवंविधः घ्राणं गन्धलुब्धम्, चक्षू रूपलुब्धमित्यादिप्रकारेणेत्यर्थः। अपि बहु यथा भवति तथा। जिह्वामवलम्बते। किं कर्तुम्—तस्यां जिह्वायां याञ्चावटवे याञ्चावटुर्ब्रह्मचारी शिष्यस्तस्मै पाटवे पटुत्वविषये याञ्चाचाटूक्तिकौशले आचार्यकं गुरुत्वमर्जितुम्। लुब्धस्यैषा रीतिः। अयमत्र तात्पर्यार्थः—यो लोभो दुर्वाचे विप्रियवाक्यवचनाय यत्सामर्थ्यं नैपुण्यं तद्विषये गुरुतां विधातुमिवास्याः सकाशात्प्रियवचनसंभाषणाभ्यासं कर्तुमिव शिष्यभूतः तामतितरां सेवत इत्यर्थः। लोभवशात्सर्वोऽपि याञ्चाप्रियवाक्यानि ब्रूत इति भावः। 'याञ्चाव(च)टवे पटवे' इति पाठे पटुने दृढाय याञ्चाव(च)टव इत्यर्थः। याञ्चा चाटुपाटवे विषये स्वस्यागुरुतां विधातुमिवोत्प्रेक्षा। 'योपधात्–' इति वुञि 'आचार्यकम्' इति साधु। 'व(च)टवे पटवे' इति भाषितपुंस्कम्। पञ्चभिः कुलकम् ॥

पथ्यां तथ्यामगृह्णन्तमन्धं बन्धुप्रबोधनाम्।
शून्यमाश्लिष्य नोज्झन्तं मोहमैक्षन्त हन्त ते ॥ २९ ॥

पथ्यामिति ॥ हितां सत्यां बन्धुना मातापित्रादिना कृतां प्रबोधनां सत्कर्म कुरु, असन्माकार्षीरित्यादिरूपां प्रवर्तनामङ्गीकुर्वाणम्। यतः—अन्धमज्ञानबहुलम्। तथा—(शून्यम्) अलीकमप्रामाणिकमपि········रजतत्वेन, अनात्मभूतानि जडान्यपि देहेन्द्रियादीन्यविद्याविलासवशादात्मत्वेन, आश्लिष्य प्रतिपद्य सहस्रशो बोध्यमानमपि न त्यजन्तं एवंभूतं मोहं ते देवास्तत्र जनौघे ददृशुः। हितस्य प्रियस्य चानङ्गीकरणात्, आश्लिष्टशून्यापरित्यागाच्च। 'हन्त' इत्याश्चर्ये खेदे वा। मूढस्येयं जातिः ॥

श्वःश्वः प्राणप्रयाणेऽपि न स्मरन्ति स्मरद्विषः।
मग्नाः कुटुम्बजम्बाले बालिशा यदुपासिनः ॥ ३० ॥

श्वःश्व इति ॥ यस्य मोहस्य सेवका बालिशा मूर्खाः। अथवा स्वयंप्र(स्वप्र)ज्ञत्वाभिमानात्, परोपदेशानङ्गीकाराच्च शिशुभूताः। एवंभूता जनाः पुत्रकलत्रादिरूपकुटुम्बरूपे कर्दमे त्रुडिता अपि मृतोऽहम्, अयं पुत्रः किं करिष्यति, इदं कलत्रं वा किं करिष्यति, अस्य क्षेत्रादेः किं भविष्यतीत्यादिप्रकारेण पुत्रादियोगक्षेमविचारणामात्रपराः शिश्नोदरपरायणाः सन्तः परेद्यवि। अतिसंनिहित इति यावत्। 'जातस्य हि ध्रुवो मृत्युः' इत्यादिवचनप्रामाण्यादनातुरत्वेऽपि संनिहिते प्राणगमने ज्ञाते, संनिपातादिनातुरत्वेऽपि वा श्वः प्राणप्रयाणे निश्चिते सत्यपि संसारसमुद्रतारकं स्मरहरं न ध्यायन्ति। किंतूक्तप्रकारेण मरणसमयेऽपि कुटुम्बचिन्तामेव कुर्वन्तीत्यर्थः। इदमपि मूढलक्षणम्। जम्बाले निमग्नोऽन्योऽपि किमपि न स्मरति। 'श्वःश्वः' इति वीप्सायां द्विः। 'श्वः स्वप्राण–' इति स्वस्य प्राणानामित्यर्थः। स्मरद्विष इति, 'अधीगर्थ–' इति कर्मणि षष्ठी। 'द्विषम्' इति पाठे कर्मत्वविवक्षया द्वितीया ॥

पुंसामलब्धनिर्वाणज्ञानदीपमयात्मनाम्।
अन्तर्म्लापयति व्यक्तं यः कज्जलवदुज्ज्वलम् ॥ ३१ ॥

---

१ 'अत्रोपमोत्प्रेक्षाभ्यां स्वजातीयकाभ्यां वाक्यार्थयोः शब्दहेतुत्वाच्छब्दार्थहेतुककाव्यलिङ्गमलंकारः संकीर्यते इत्यलंकारत्रयस्य परस्परसंबन्धेनाङ्गाङ्गिभावः' इति जीवातुः। २ 'शश्वत्' इति पाठोऽपि।

पुंसामिति ॥ यो मोहो न लब्धं निर्वाणं विनाशो येन स ज्ञानरूपो दीपस्तन्मयस्तत्प्रचुर आत्मा मनो येषां वसिष्ठादीनां ज्ञानिनां पुंसामुज्ज्वलमप्यन्तो निर्मलमप्यन्तःकरणं व्यक्तं प्रकटं म्लापयति मलसहितं करोति । मोहमोहिताः कामाधीनाः सन्तो ज्ञानिनोऽपि विश्वामित्रादयः स्वमनो मेनकादिदेवाङ्गनाश्रयणं चक्रुः पूर्वमुज्ज्वलस्यापि मनसो मोहेन मालिन्यं कृतम्, 'ज्ञानिनामपि चेतांसि–' इत्यादि मार्कण्डेयवचः प्रमाणम् । न लब्धः साक्षात्कृतो निर्वाणेनयोगी मोक्षोपयोगी ज्ञानदीपकल्पः स्वप्रकाशज्ञानरूप आत्मा यैस्तेषामद्वैतज्ञानरहितानामिति वा । किमिव—कज्जलवत् यथा मध्ये स्थापितस्य दीपस्य कज्जलं सुधाधवलितानां घटादीनां मध्यं मलिनयति ॥

ब्रह्मचारिवनस्थायियतयो गृहिणं यथा ।
त्रयो यमुपजीवन्ति क्रोधलोभमनोभवाः ॥ ३२ ॥

ब्रह्मेति ॥ ब्रह्मचारी, वनस्थायी वानप्रस्थः, यतिः संन्यासी, एते त्रयोऽपि आश्रमिणो गृहिणं गृहस्थं यथाशनाच्छादनार्थमुपजीवन्ति सेवन्ते । 'यस्मात्त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् । गृहस्थैरेव धार्यन्ते तस्माज्ज्येष्ठो गृहाश्रमी ॥' इति स्मार्तवचनात् । तं स्वीकृत्य वा प्राणधारणं कुर्वन्ति, तथा—क्रोधलोभमनोभवा यं मोहं सेवन्ते, यं स्वीकृत्य या स्वरूपं लभन्ते । मूढ एव क्रुद्धो लुब्धः कामी च भवति ॥

जाग्रतामपि निद्रा यः पश्यतामपि योऽन्धता ।
श्रुते सत्यपि जाड्यं यः प्रकाशेऽपि च यस्तमः ॥ ३३ ॥

जाग्रतामिति ॥ यो मोहो जाग्रतां सावधानानामपि निद्राविवेकरूपं निर्वेदनम् । तथा—यः पश्यतां चक्षुष्मतामप्यन्धता चक्षुराच्छादनरूपमदर्शनमात्मस्वरूपतत्त्वादर्शनम् । संसारस्यानित्यदुःखरूपतां जानतामपि तदपरित्यागहेतुत्वादज्ञानस्य इत्यर्थः । तथा—यः श्रुते शास्त्राभ्यासे सत्यपि मूढत्वेन हिताहितरूपं जाड्यम् । विधिनिषेधयोरविवेकित्व इत्यर्थः । तथा—यश्च प्रकाशे सौरादिचाक्षुषालोके सत्यपि तमोऽन्धकारवदाच्छादकत्वात्तमोऽन्धकारः । प्रकटेऽप्यर्थे मतिप्रतिबन्धक इत्यर्थः ॥

कुरुसैन्यं हरेणेव प्रागलज्जत नार्जुनः ।
हतं येन जयन्नाज्ञानस्तमोगुणजुषा जगत् ॥ ३४ ॥

कुर्विति ॥ तमोगुणजुषाऽज्ञानरूपतमोगुणसेविना येन मोहेन हतं जगज्जयन्नाज्ञासीत् । क इव—तमोगुणजुषा आश्रिततमोगुणेन हरेण रुद्ररूपेणेव [illegible] प्राक् हतं कुरुसैन्यं पश्चादर्जुन इव [illegible] । [illegible]

[illegible] ।
अन्ये न [illegible] ॥ ३५ ॥

[illegible]

हेतुना यस्माज्जगदस्थिरं जगदे। तस्मात्केनापि लोकोत्तरप्रज्ञेन तेनैव चार्वाकेण वेदमर्मभेदाय बौद्धेन जातम्। तद्वचनताङ्गीकरणात्तद्रूपेणैव जातमित्यर्थः। 'जगाद' इति पाठे यद्बोधिसत्त्वं जगदस्थिरं जगादेति व्याख्येयम्। क्षणिकत्वे सिद्धे येन पापं कृतं स नष्ट एवेति किमिति पापाद्भयमित्यादि प्रकरणाज्ज्ञेयम्॥

अग्निहोत्रं त्रयीतन्त्रं त्रिदण्डं भस्मपुण्ड्रकम्।
प्रज्ञापौरुषनिःस्वानां जीवो जल्पति जीविका॥ ३९॥

अग्नीति॥ नित्यं काम्यं च सायंप्रातर्होमरूपमग्निहोत्राख्यं कर्म, त्रयी च तन्त्रं मीमांसा, वेदत्रयसंबन्धि वा यत्तन्त्रं वेदविहितोऽन्योऽपि कर्मकलापः, तथा—त्रयो दण्डा यत्र तत्साग्रु-प्तव्रतम्, तथा—भस्मनः पुण्ड्रकः तिलको यत्रैवंविधं शैवादिव्रतं एतत्सर्वं प्रज्ञाया बुद्धेः पौरुषेण सामर्थ्येन वीरतया प्रज्ञया निःस्वानां हीनानां प्रज्ञया पौरुषेण च वा हीनानां, वञ्चनेन चौर्येण च बलाद्वा ग्रहीतुमसमर्थानां पुरुषाणां जीविका जीवनोपायः। तद्वेषधारणाधर्मेण द्रव्य-मर्जयितुमेव। न तु तात्त्विको धर्मः परलोकसाधनम्। एवं वेदप्रामाण्यवादिनां भवति। जीवो बृहस्पतिर्जल्पति वदति। वाक्यार्थः कर्म। तदुक्तं तेनैव—'अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मपुण्ड्रकम्। बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः॥' इति, तस्मादग्निहोत्राद्यप्रमाण-मेवेति भावः। 'जीविका' इति धात्वर्थनिर्देशे ण्वुल्॥

इदानीं ब्राह्मण्यादिजातिधर्मानसहमानो जातिं दूषयति—

शुद्धिर्वंशद्वयीशुद्धौ पित्रोः पित्रोर्यदेकशः।
तदानन्तकुलादोषाददोषा जातिरस्ति का॥ ४०॥

शुद्धिरिति॥ विशुद्धमातापितृजन्यत्वं ब्राह्मण्यादेर्लक्षणम्। सा शुद्धिर्दुर्निरूपा। यतः स्वाभिमतमातापित्रोर्यौ पितरौ मातामहपितामहौ, मातामहीपितामह्यौ च, तयोरेकशः प्रत्येकं वंशद्वयीशुद्धौ सत्याम्, एवं तयोरपि पितृपितामहीमातृपितामह्यादिमातामहमातुः, पितामहादिमातामहीमातुः, पितामह्यादिशुद्धौ सत्याम्। एवं क्रमेण यावत्प्रत्येकं शुद्धौ सत्यां शुद्धिः परीक्षणीया। तत्तस्मादनन्तकुला एवमपरिमितवंशभेदा अत एव दोषाद्दुर्विज्ञेयशुद्धि-संतानत्वात्पुंस्त्वपारम्पर्यवत्या शुद्धेः संदेहात्, इन्द्रचन्द्रादीनां च पुराणप्रामाण्येन व्यभिचारद-र्शनादशुद्धेर्निश्चयाच्च, जातिसंकरलक्षणाद्दोषात्का जातिर्निर्दोषास्ति। अपि तु न कापि। यदाहुः—'अप्येकपङ्क्त्यां नाश्नीयात्संयतैः स्वजनैरपि। को हि जानाति किं कस्य प्रच्छन्नं पातकं भवेत्॥' इति। तथा—'अनादाविह संसारे दुर्वारे मकरध्वजे। कुले च कामिनीमूले का जातिपरिकल्पना॥' इति। तस्मात्त्वं भिन्नयोनित्वात्सर्वा अपि जातयो दुष्टा एवेति जातिधर्मा-न्विहाय स्वेच्छाचारं कुर्वेति भावः। यद्वा—तस्मादनन्तानन्तानां कुलानामदोषाद्दोषा-भावाद्व्यभिचारादिदोषरहिता जातिः स्यात्, सा कास्ति, अपि तु न कापि। पूर्वोक्तपित्रा-दिव्यभिचारादिदोषात्सर्वापि जातिर्दुष्टेति व्याख्या। 'यदा तदा' इति पाठः सम्यक्। तयोः पित्रोरनन्तकुलानां दोषाभावेन तदाऽदोषा जातिरस्ति। अपि तु महति कुले व्यभिचार-संभवात्सर्वापि जातिर्दुष्टैवेत्यर्थ इति व्याख्या। यच्छब्दतच्छब्दयोरध्याहारः। एकशः, 'संख्यैकवचनात्' इति शस्॥

अन्यदप्याह—

कामिनीवर्गसंसर्गैर्न कः संक्रान्तपातकः।
नाश्नाति स्नाति हा मोहात्कामक्षामव्रतं जगत्[1] ॥ ४१ ॥

कामिनीति ॥ यस्मात् 'आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा। षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥' इति वचनात्स्त्रीणां पुरुषापेक्षयाष्टगुणकामानां कामिनीनां नानाजातीयानां वर्गः सङ्घस्तस्य संसर्गैर्योगैः संबन्धैः कृत्वा कः पुरुषः संक्रान्तं प्रविष्टं पातकं यत्र एवंविधो न। अपितु—'संवत्सरात्तु पतति पतितेन सहाचरन्' इति शास्त्रात्कृतपातकस्त्रीसंसर्गात्सर्वोऽपि प्राणी संक्रान्तपातक एव। तस्मात्काम्यते कामः फलम् तेन क्षामं रहितमेकादश्युपवासादिव्रतं नियमो यस्य, मदनेन कृत्वा क्षीणं निष्फलं व्रतं यस्य वा। तज्जगत्सर्वोऽपि लोकः मोहाद्विचाराभावात्। वृथा इति यावत्। न अश्नाति न भुङ्क्ते एकादश्यादौ, वृथैव च स्नाति तीर्थादौ, हा कष्टम्। स्वयं शुचित्वेऽपि स्त्रीव्यभिचारादिदोषसंसर्गात्, स्त्रीणां शुचित्वेऽपि दुष्टसंसर्गात्, सर्वेषां पातकित्वादुपवासादि वृथैव करोति, केवलं प्रयास एव तस्य भवतीत्यर्थः। तस्मात्स्वेच्छाचार एव कार्य इति भावः। चार्वाकमते विधिनिषेधाभावान्न दोष इत्यर्थः। तेषां सदोषत्वाज्जातिरपि सदोषैवेत्युक्तं भवति। अभिलाषेण कृत्वा नष्टं व्रतं यस्य। एकादश्यां भोजनाभिलाषे सत्यपि न भुङ्क्ते अभिलाषे सत्येवा(लभ्य)भावास्यादौ स्त्रीनिवृत्तिः, स्नाति च तीर्थादौ, वृथैव कामोपहतत्वादित्यर्थः। बहिः शोधयन्तु, अन्तरशुद्धम्। क्षामेति, 'क्षायो मः' ॥

ईर्ष्यया रक्षतो नारीर्धिक्कुलस्थितिदाम्भिकान्।
स्मरान्धत्वाविशेषेऽपि तथा नरमरक्षतः ॥ ४२ ॥

ईर्ष्ययेति ॥ ईर्ष्ययाऽसहनत्वमात्रेण नारी रक्षतस्तासां परपुरुषदर्शनमपि कर्तुमप्रयच्छतः कुलस्थितिः ब्राह्मण्यादिजातेरसांकर्येणावस्थानं तद्रूपेण दम्भेन चरन्ति ये तान्पुरुषान्स्त्रीरक्षण एव कुलस्थितिं मन्यमानान्धिक् ते निन्द्याः। निन्द्यत्वे दाम्भिकत्वमेव हेतुः। किंभूतान्—स्त्रियः पुरुषाश्च विवेकशून्या यतः, अतः—स्मरान्धत्वस्याविशेषे साधारण्ये सत्यपि तथा नारीवन्निर्बन्धेन नरमरक्षतः परदारसङ्गादनिवारयतः। नहि जातिसंकरो नारीणामेव व्यभिचारेण यतः ता एव रक्षणीयाः किं तु पुरुषाणामपि व्यभिचारेण। यदि रक्षणीयम्, तर्हि द्वयमपि। न चैवं क्रियते। तस्मादन्यतरस्यैव रक्षणे जातिसंकरस्य तादवस्थ्यात्कुलस्थित्यभावान्नारीमात्ररक्षणं तेषां दम्भ एवेत्यर्थः। तस्मादीर्ष्यां त्यक्त्वा नरस्य वेश्यान्तरादाविव, स्त्रीणामपि नरान्तरे प्रवृत्तिप्रतिषेधं मा कुर्वमिति भावः। ईर्ष्यया इत्यनेन ईर्ष्यैवात्र हेतुर्न तु धर्म इति सूचितम्। अथ च स्मरान्धत्वाविशेषेऽपि नारी रक्षतोऽनेकपतिभ्यः, किंत्वेकमेकस्याः कुर्वतः नरं तु स्त्रीवदरक्षतः। स्त्रिया यथा एक एव पतिः तथा नरस्यैकैव स्त्रीति न, किं तु बह्वीः कुर्वन्ति। तस्मान्निन्द्यास्ते। अत्रापीर्ष्यैव हेतुः ॥

परदारनिवृत्तिर्या सोऽयं स्वयमनादृतः।
अहल्याकेलिलोलेन दम्भो दम्भोलिपाणिना ॥ ४३ ॥

---

[1] 'कामक्षाममिदं जगत्' इति पाठो जीवातुसंमतः।

परेति ॥ परदारेभ्यो या निवृत्तिः, 'ताः सादरं न द्रष्टव्याः, किं पुनः स्प्रष्टव्याः' इत्ये-तदर्थप्रतिपादकं शास्त्रम्, सोऽयं परवञ्चनरूपो दम्भः अहल्यया गौतमस्त्रिया सह केलिः कामक्रीडा तत्र लोलेन तत्परेण दम्भोलिपाणिनेन्द्रेण स्वयमात्मनैवानादृत उपेक्षितः । पर-दारगमनप्रायश्चित्तविभागोऽप्येतेन दूषितः । अन्यं प्रति तन्न कार्यमित्युपदिशन्ति, स्वयं तु तदेव कुर्वन्तीत्युपहासोऽपि सूचितः । अहल्यासंभोगलम्पट इन्द्र एवादाम्भिकः । अन्ये पर-दारपराङ्मुखाः सर्वेऽपि दाम्भिका एवेति भावः । वज्रहस्तत्वात्परदारमर्दनं कृतवान् । तस्मा-दयं शास्त्रीयनिषेधो न भवति । किं त्वशक्तत्वाद्दम्भ एवेत्यपि ॥

अन्यचाह—

> गुरुतल्पगतौ पापकल्पनां त्यजत द्विजाः ।
> येषां वः पत्युरत्युच्चैर्गुरुदारग्रहे ग्रहः ॥ ४४ ॥

गुर्विति ॥ भो द्विजाः, यूयं गुरुतल्पगतौ पित्रादिभार्यासंभोगे विषये पापकल्पनाम् 'ब्रह्महा मद्यपः स्तेनस्तथैव गुरुतल्पगः । एते महापातकिनः—' इत्यादिवचनानुरोधेन महा-पातकसंभावनां त्यजत । यस्माद्येषां वो युष्माकं पत्युः स्वामिनो द्विजराजस्य चन्द्रस्य देवानां गुरोः वेदादिपाठयितुः बृहस्पतेः दाराः तारा तेषां ग्रहे संभोगे अत्युच्चैरतितरां ग्रहोऽभिनिवेशः । श्रूयत इति शेषः । वेदादिपाठनाद्बृहस्पतेर्देवगुरुत्वम् । तस्मात्तद्भार्यागमने देवस्य चन्द्रस्य दोषलेशोऽपि न । तस्येवका यूयमपि गुरुतल्पगमनं कामं कुरुतेति भावः । यथोक्तम्—'राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः । राजानमनुवर्तन्ते यथा राजा तथा प्रजाः ॥' इति । अयमप्युपहासः । गुरुशब्दच्छलेनैवमुक्तम् । 'महः' इति पाठे उत्सवः । अथ च—तेजःसमूहः गुरुतल्पगमनेऽपि प्रत्यहमुदेत्येव, न तु पतित इत्यर्थः । इन्द्रादिनिकटे वाल्मीकिप्रमुखा द्विजास्तिष्ठन्ति तेषां संबोधनम् । बृहस्पतिभार्यायां गर्भमु-त्पाद्य तत्सुतस्वीकारार्थं सोदमानिन्द्रादीन्प्रति चन्द्रेण महारणारम्भसंरम्भेण तेजः प्रकटि-तम् । अनन्तरं ब्रह्मणा गुरुभार्यां त्याजितोऽपि गर्भजं पुत्रं गृहीतवानिति पुराणकथा । 'तल्पं च शयनीये स्यात्तल्पमट्टकलत्रयोः' इति विश्वः ॥

'पुण्यो वै पुण्येन कर्मणा, पापः पापेन' इत्यादिश्रुतिं दूषयति—

> पापात्तापा मुदः पुण्यात्परासोः स्युरिति श्रुतिः ।
> वैपरीत्यं द्रुतं साक्षात्तदास्यात बलाबले ॥ ४५ ॥

पापादिति ॥ परागता असवः प्राणा यस्य । मृतस्येत्यर्थः । तस्य प्राणिनः इह कृता-न्निषिद्धाचरणजात्पापात्तापाः दुःखानि, पुण्यादिह कृताद्विहिताचरणजाद्धर्मान्मुदः सुखानि स्युः भवन्तीति श्रुतिरियं । साक्षात्प्रत्यक्षेण द्रुतं शीघ्रं वैपरीत्यम् । दृश्यत इति शेषः । यज्ञा-[illegible] प्राणिवधादिकं कुर्वतो भवदभिमतश्रुतकारिणः पुरुषस्य तत्कालमेव दुःखं भवति । भवदनभिमतपरदारसंगमादिपापकारिणस्तत्कालमेव सुखं भवतीति वैपरीत्यमनुभूयते । अथ च—एवं श्रुतिः [illegible], न तु तत्र किंचित्प्रमाणम् । किं च मृतस्य किं वा भविष्य-तीति को वेद । जीवता तद्वैपरीत्यमनुभूयते । [illegible] सुखं [illegible] [illegible] आदर्तव्य [illegible] । भवन्त एव [illegible]त्यर्थः । [illegible]

सबलत्वेन दुर्बलत्वेन च व्यवस्था क्रियते। ततश्च यथा—प्रत्यक्षानुमानविरोधे प्रत्यक्षं बलीयः, तथा—श्रुतिप्रत्यक्षविरोधे प्रत्यक्षमेव बलीय इति निश्चित्य पापात्सुखमनुभूयत इति पापं सर्वैः कार्यमिति भावः। प्रबलदुर्बलत्वव्यवस्थापकस्य न्यायस्याप्ययमुपहासः॥

'संदिग्धेऽपि परे लोके त्याज्यमेवाशुभं बुधैः' इत्यादि प्रतिबन्द्या दूषयति—

संदेहेऽप्यन्यदेहाप्तेर्विवर्ज्यं वृजिनं यदि।
त्यजत श्रोत्रियाः सत्रं हिंसादूषणसंशयात्॥ ४६॥

संदेह इति॥ तत्र तत्र व्यभिचरितत्वाच्छ्रुतिप्रामाण्यानिश्चयात्, 'पापं न कार्यं जन्मान्तरे निरयादिदुःखभयात्' इत्येके वदन्ति, अन्ये च—येन कृतं स तु दग्धः अन्यदेहप्राप्तिस्तस्य स्यादित्यत्र का प्रत्याशा, इति वादिविप्रतिपत्तेश्च, अन्यदेहाप्तेः देहान्तरप्राप्तेः संदेहे सत्यपि पाक्षिकोऽपि दोषः परिहर्तव्य इति न्यायेन यदि देहान्तरं स्यात् तर्हि पापफलं दुःखमनुभूयेतेति बुद्ध्या यदि वृजिनं पापं वर्ज्यं सर्वथा न कार्यं तर्हि हे श्रोत्रियाश्छन्दोध्यायिनो वसिष्ठादयः, यूयं सत्रमनेककर्तृकं यागं मैव कुरुत। कुतः—पशुहिंसायाः संबन्धिनो दोषस्य संशयात्संदेहात्। 'न हिंस्यात्सर्वा भूतानि' इति 'अहिंसा परमो धर्मः' इत्यादि श्रुतिस्मृतिवशाद्यागेऽपि हिंसा न कार्येत्येके। विधिबलादशङ्कितपापोत्पत्तिः सा कार्यैवेत्यन्ये इति संदेहे यागीयपशुहिंसा चेत्पापहेतुः स्यात्, तदा नेष्टप्राप्तिः किंत्वनिष्टमेव स्यादिति 'पाक्षिकोऽपि दोषः परिहरणीयः' इत्यनेनैव न्यायेन यागमपि त्यजत। न चेदेवं पापमपि कुरुतेति भावः। 'संश्रयात्' इति पाठे संबन्धादित्यर्थः। 'कलुषं वृजिन—' इत्यमरः॥

'त्याज्यमेवाशुभं बुधैः' इत्यपि सव्यभिचारमाह—

यस्त्रिवेदीविदां वन्द्यः स व्यासोऽपि जजल्प वः।
रामाया जातकामायाः प्रशस्ता हस्तधारणा॥ ४७॥

य इति॥ यः त्रिवेदीविदां वेदत्रयवेदिनां वो युष्माकं वन्द्यो नमस्करणीयः स व्यासोऽपि इति भारतादौ जजल्प उक्तवान्। इति किम्—जातकामायाः कामार्ताया रिरंसो रामाया अज्ञातकुलशीलाया अपि रमण्या हस्तधारणा पाणिग्रहणमङ्गीकरणं च प्रशस्ता युक्तैव। न केवलं वाल्मीकिः, किं तु व्यासोऽपीत्यपिशब्दार्थः। तद्वचनं पूज्यत्वाद्भवद्भिरङ्गीकर्तव्यमित्यपि सूच्यते। 'स्मरार्तां विह्वलां दीनां यो न कामयते स्त्रियम्। ब्रह्महा स तु विज्ञेयो व्यासो वचनमब्रवीत्॥' इत्याद्यर्जुनतीर्थयात्रायां नागाङ्गनासंबन्धावसरे उर्वश्यादिप्रसङ्गे स्वर्गगमनावसरे च भारतादौ, रामायणे च शूर्पणखाद्युक्तौ प्रसिद्धम्। ततश्च पापं वर्ज्यम्, कार्यमित्यप्युच्यते। उभयथापि दोष इति भावः। वेदविदामिति, 'कृत्यानाम्—' इति षष्ठी॥

युक्त्यन्तरेण पूर्वोक्तमाह—

सुकृते वः कथं श्रद्धा सुरते च कथं न सा।
तत्कर्म पुरुषः कुर्याद्येनान्ते सुखमेधते॥ ४८॥

सुकृत इति॥ सुकृते चान्द्रायणादौ वो युष्माकं कथं केन हेतुना श्रद्धा आस्तिकता। अपि त्वनुचितमेतत्। सा च श्रद्धा सुरते कामिनीरतिविषये कथं न किमिति न। अपि तु

भवतीति धूर्तानां परवञ्चनमात्रेण स्वोपजीविनां वार्तया अप्रामाणिकेन वार्तामात्रेणालम् । सा न कार्येत्यर्थः । सर्वमप्येतद्व्यधिकरणत्वादनुपपन्नम् । स्वभोजनादिलाभाय परं प्रतारयन्ति । तस्मादिह एवात्मेति भावः । 'अन्यभुक्तानि' इति पाठे 'अन्येषां भुक्तानि' इति शेषषष्ठीसमासः ॥

देहातिरिक्तात्मप्रतिपादिकां श्रुतिमप्युपहसति—

जनेन जनतास्मीति कायं नायं त्वमित्यसौ ।
त्याज्यते ग्राह्यते चान्यदहो श्रुत्यातिधूर्तया ॥ ५४ ॥

जनेनेति ॥ अतिधूर्तया नितरां परवञ्चनपरया 'तत्त्वमसि' इति 'स वा एष महानज आत्मा' इत्यादिश्रुत्या प्रयोजककर्त्र्या कायम् 'अस्मि' इति अहंप्रत्ययं जानता 'स्थूलोऽहम्, कृशोऽहम्' इत्याद्यहंप्रत्ययविषयो देह एव, न तु तदतिरिक्तः कश्चिदिति देहमेवात्मानं जानता जनेन प्रयोज्येन अयम् 'अस्मि' इति प्रत्ययविषयः (कायः) त्वं न भवसीति असौ देहः त्याज्यते अहंप्रत्ययविषयत्वेनेति शेषः । जनेन स्वयं कायः अहंप्रत्ययविषयत्वेन त्यज्यते, श्रुत्या तु तेन त्याज्यत इत्यर्थः । अन्यच्चानुभवविरुद्धत्वान्निरर्थकतया वक्तुमशक्यमप्रामाणिकमहंप्रत्ययविषयमात्मलक्षणं वस्तु ग्राह्यतेऽङ्गीकार्यते । अहो आश्चर्यम्, कष्टं वा । महदनुचितमेतदित्यर्थः । 'देहे आत्मभावं परित्यज्य तदन्यस्मिन्नात्मनि नित्यतां गृहीत्वा दीक्षातपआदिभिर्देहं कर्शय, तदतिरिक्तात्मवेदनं कुरु' इति श्रुत्या लोक उपदिश्यत इत्यर्थः । विप्रलम्भकवाक्यत्वेन श्रुतिमात्रमप्रमाणम् । वार्तामात्रेणालम् । सा न कार्येत्यर्थः । अन्योऽपि धूर्तोऽन्येन रत्नादि त्याजयति, काचादि ग्राहयति । कर्तृद्वयस्थाननिहितत्वादुभयत्र तृतीया ॥

ननु पुत्रेष्ट्या पुत्रस्य प्रत्यक्षोपलम्भाज्ज्योतिष्टोमादेरपि फलस्यानुमानाच्छ्रुतिप्रामाण्या-त्कथं श्रुतेर्धूर्तत्वमित्याशङ्क्य दूषयति—

एकं संदिग्धयोस्तावद्भावि तत्रेष्टजन्मनि ।
हेतुमाहुः स्वमन्त्रादीनसङ्गानन्यथा विटाः ॥ ५५ ॥

एकमिति ॥ भवनाभवनाभ्यां संदिग्धयोरर्थयोः पुत्रादिलाभालाभयोर्मध्ये एकमिष्टमनिष्टं वा तावन्निश्चितं भावि भविष्यति । तत्र तयोर्मध्ये । तथा सति वा । इष्टस्य पुत्रादेर्जन्मनि लाभे सति विटा धूर्ताः परवञ्चनचतुराः स्वमन्त्रादीन्हेतुं कारणभूतानाहुः । अस्माभिर्दत्तमन्त्रादि त्वदर्थं कृतम्, तेन त्वया पुत्रादि लब्धमिति वदन्तीत्यर्थः । अन्यथा पुत्राद्यलाभे तु तानेव मन्त्रादीनसाङ्गानविकलतया फलासाधकान्मायापुत्रवियोगादिविपरीतफलकारिणमाहुः । सामग्रीसाकल्याभावादपेक्षितफलाजननात्फलं न जातम्, विपरीतं च जातमित्यर्थः । तस्माद्दु-ष्टफलपुत्रेष्ट्यादिदृष्टान्तेनादृष्टफलेष्वपि फलवत्त्वेन निश्चयकारीति श्रुतिरप्रमाणमेवेति भावः ॥

[illegible] दूषयति—

एकस्य विश्वपापेन तापेऽनन्ते निमज्जतः ।
कः श्रौतस्यात्मनो भारो भारः स्याद्दुरितैर्न ते ॥ ५६ ॥

---

१ 'अन्यभुक्तानि [illegible]' इत्येवं मूलपाठः [illegible] । २ '[illegible]' इति पाठे '[illegible] [illegible]' [illegible] इति [illegible]—[illegible] सुखावबोधा ।

एकस्येति ॥ विश्वेषां परदारगमनजनितेन पापेन हेतुनानन्तेऽक्षये तापे निरयादिदुःखे निमज्जतोऽनन्तदुःखमनुभवतः सतः श्रौतस्य 'एकमेवाद्वितीयं ब्रह्म' 'नेह नानास्ति किंचन' इत्यादिश्रुतिसिद्धस्यैकस्याद्वितीयस्यात्मनः हे भीरो पापाद्भयशील, ते तव एकस्य दुरितेन को भारो गौरवं स्यात्, अपि तु पूर्णस्य शकटस्य शूर्पेणेव न कश्चिद्भारो भवेत्। एकात्मवादिनये प्रामाणिकस्यैवात्मनो यदि सकलशरीरोपाधिकृतपापसंबन्धः, तदा तत्फलानन्त्यान्निरयादिदुःखानुभवावसरे तवैकपापेन कृत्वा पापाक्षयराशिभृतस्तस्य न कोऽपि भारः स्यात्। किं च तैर्यत्सुखं कृतम्, तत्त्वयैव कृतमिति पापे कृतेऽपि तत्र दोषो नेति यथेच्छं पापं कुर्वित्यर्थः। अपि चात्मैक्यात्स्वपरव्यवहाराभावे परदारत्वपरस्वत्वाद्यभावात्परदारगमनादौ पापलेशस्याप्यभावात्स्वेच्छाचारमेव कुर्वित्यर्थः। भीरो तात्पर्यपर्यालोचनया विना भयशील, इत्युपहासः। तस्मादैक्यश्रुतिरुपासनपरा ज्ञेया, न तु तात्त्विकीति भावः ॥

देवपूजादिबुद्धिं निराकरोति—

> किं ते वृन्तहृतात्पुष्पात्तन्मात्रे हि फलत्यदः।
> न्यस्य तन्मूर्ध्न्यनन्यस्य न्यास्यमेवाश्मनो यदि ॥ ५७ ॥

किमिति ॥ भो देवपूजक, वृन्तात्प्रसवबन्धनात्सकाशाद्धृतमवचितं चम्पकादिपुष्पं तस्माद्धेतोस्ते तव किं प्रयोजनम्। प्रत्युत दोष एवेत्यर्थः। हि यस्माददः पुष्पं तन्मात्रे वृक्षाग्रवृन्त एव वर्तमानमेव फलति फलरूपेण परिणमते, नतु तेन विना। पुष्पेऽवचिते फलोत्पत्तिप्रतिबन्ध एव भवति नत्वन्यत्फलमित्यर्थः। अथ देवपूजादौ विनियोगात्साफल्यमिति चेत्। तदप्यसत्। अश्मनः शालग्रामशिवलिङ्गादेः पाषाणस्यैव मूर्ध्नि न्यास्यं यदि चेत्तत्र न्यस्तं सत्फलाय भविष्यतीत्याशयः, तर्ह्यनन्यस्य शिलातोऽभिन्नस्य पाषाणसदृशस्य स्वस्य मूर्ध्नि तत्पुष्पं न्यस्य निधेहि। अनन्यस्यैवेति वा। नास्यमेवेति वा। किं च भवन्मते नेदस्य प्रत्यक्षत्वात्परमेश्वरस्य सर्वत्र सत्त्वाच्छालग्रामादेस्त्वच्छिरसश्चैक्याद्देवपूजापि पृथग्वृथेति स्वशिरस्येव पुष्पाणि क्षिपेत्युपहास इति भावः। न्यास्यं, हलन्तत्वाण्ण्यत् ॥

वैराग्यजननार्थमन्यदप्याह—

> तृणानीव घृणावादान्विधूनय वधूरनु।
> तवापि तादृशस्यैव का चिरं जनवञ्चना ॥ ५८ ॥

तृणानीति ॥ हे पुरुष, 'मुखं श्लेष्मागारं, स्तनौ मांसग्रन्थी' इत्यादीनि वधूरनु स्त्रीरुद्दिश्य घृणावादाञ्जुगुप्सावचनानि निःसारत्वेन तृणानीव विधूनय त्यज। यतः—तादृशस्य मांसादिमयस्यैव तवापि गर्हितस्यापि स्त्रियोऽनेन प्रकारेण निन्द्या इति चिरं जनवञ्चना लोकप्रतारणा का। अपि तु न कार्येति भावः। स्त्रियो व्यभिचारिण्यः पापनिरता इति निन्दावाक्यानि तवापि व्यभिचारिणो न युक्ता इति वा ॥

> कुरुध्वं कामदेवाज्ञां ब्रह्माद्यैरप्यलङ्घिताम्।
> वेदोऽपि देवकीयाज्ञा तत्राज्ञाः काधिकार्हणा ॥ ५९ ॥

कुरुध्वमिति ॥ हे अज्ञा मूर्खा ब्राह्मणाः, यूयम् 'अहल्यायै जारः सुरपतिरभूदात्मतनयां प्रजानाथोऽयासीत्' इत्यादिस्मरणाद्ब्रह्मविष्णुमहेशादिभिरप्यलङ्घितां काम एव देवः

१ 'न्यस्य ते मूर्ध्न्यनन्यस्य' इति वा पाठः क्वचित्पुस्तके।

तस्य स्त्रीपारवश्यलक्षणमाज्ञां कुरुध्वम् । यस्माद्वेदोऽपि 'श्रुतिस्मृती ममैवाज्ञे' इति श्रीभगवद्वचनाद्देवकीया आज्ञा । अतः—तत्र वेदरूपायां देवाज्ञायां कामाज्ञातोऽधिका अर्हणा पूजा मान्यता का । अपि तु—देवत्वाविशेषाद्वेदाज्ञेव कामाज्ञापि माननीयैवेत्यर्थः । आज्ञात्वमपि समानम्, तस्मात्कामाज्ञामपि कुरुध्वम्, न त्वेकत्र पक्षपातः कार्य इति भावः । यद्वा—तत्र द्वयोराज्ञयोर्मध्येऽधिकमर्हणं यस्याः सा का आज्ञा । अपि तु पूर्ववदविशेषाद्द्वे अपि समे एवेत्यर्थः । द्वयोर्मध्ये अधिकार्हणा का इति यूयमेव कथयतेति ब्रह्मादिभिरप्यङ्गीकृतत्वाच्छिष्टपरिगृहीतत्वलक्षणप्रामाण्यात्, प्रत्यक्षसुखहेतुत्वाच्च कामदेवाज्ञैवाधिकार्हणा । वेदो हि ब्रह्मादीनामेवाज्ञा, ब्रह्मादयश्च कामदेवाज्ञाकारिणः, ततश्च यदीयाज्ञा भवद्भिरनुष्ठीयते, तैरपि यानुष्ठीयते सा भवतां सुतरामनुष्ठेयेति भाव इति वा । पक्षपाततारतम्याज्ञानाच्च मूर्खत्वम् । 'वेदो हि' इति च पाठः । कामदेवाज्ञामेव कुरुध्वम्, यस्माद्वेदोऽपि देवाज्ञा । तत्र वेदे अधिका पूजा । अपितु—कामदेवाज्ञैवानुष्ठेया ब्रह्मादिभिरप्यनुष्ठितत्वादिति वा । 'का विगर्हणा' इति पाठे तत्र कामाज्ञायां का निन्दा । कोऽनादर इत्यर्थः । देवकीया गहादिषु 'जनपदयोः कुक्च' इत्यत्र 'देवस्येति च वक्तव्यम्' इति वक्तव्याच्छः कुक्च ॥

श्लोकद्वयेन मीमांसकान्परिहसति—

प्रलापमपि वेदस्य भागं मन्यध्व एव चेत् ।
केनाभाग्येन दुःखान्न विधीनपि तथेच्छथ ॥ ६० ॥

प्रलापमिति ॥ महता प्रयत्नेन यस्य प्रामाण्यमुपपादितम्, तस्य वेदस्यैव कंचन भागमंशं 'सोऽरोदीत्, यदरोदीत्' इत्याद्यर्थवादमप्रयोजनार्थकं प्रलापमिवानर्थकवचोरूपं चेन्मन्यध्वे कुरुध्वे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्यादिना पूर्वपक्षसूत्रेण प्रतिपादितत्वादानर्थक्यस्य 'विधिना त्वेकवाक्यत्वात्' इत्यादिना सिद्धान्तसूत्रेण स्तुत्यर्थत्वादिनाऽर्थवादादेरुपयोगेऽभिहितेऽपि सार्थक्याभावादनिराकृतत्वादर्थवादादिवेदभागमनर्थकवचनप्रायं चेन्मन्यध्वे, तर्हि बहुधनव्ययायाससाध्यत्वात्, दुःखजनकान् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादीन् विधिभागानपि केन भाग्याभावेन तथा प्रलापरूपान् इच्छथ न स्वीकुरुथ । अपि तु तानपि प्रलापरूपानेव स्वीकुरुथ इत्यर्थः । सर्वोऽपि वेदो विधिरूपः प्रलापरूपो वा अस्तु । नत्वर्धजरतीयन्यायः समाश्रयितुं युक्त इति भावः । वेदत्वाविशेषेऽप्यभाग्यमेव वैषम्यहेतुरित्यर्थः । दुःखशब्दस्य नपुंसकत्वेऽपि दुःखं करोतीति ण्यन्तात्पचाद्यचि दुःखानिति ज्ञेयम् ॥

प्रकारान्तरेणापि मीमांसकानुपहसति—

श्रुतिं श्रद्धत्थ विक्षिप्ताः प्रक्षिप्तां ब्रूथ च स्वयम् ।
मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम् ॥ ६१ ॥

श्रुतिमिति ॥ हे मीमांसायां वेदविचारे मांसला परिपुष्टा प्रज्ञा बुद्धिर्येषां ते यूयं श्रुतिं वेदं प्रत्यक्षं श्रद्धत्थ आदरेण स्वीकुरुथ अप्रत्यक्षामपि [illegible] मन्यध्वे । किंच—विक्षिप्ता वातादिभिर्विकृता भ्रान्तचित्ताः पूर्वापरविरुद्धभाषित्वादुन्मत्ताः [illegible] तामेव श्रुतिं यूपद्विपदापिनीं

---

१ '[illegible]' इति पाठे '[illegible]' [illegible] इति [illegible]—इति सुखावबोधा ।

एकस्येति ॥ विशेषां परदारगमनजनितेन पापेन हेतुनानन्तेऽक्षये तापे निरयादिदुःखे निमज्जतोऽनन्तदुःखमनुभवतः सतः श्रौतस्य 'एकमेवाद्वितीयं ब्रह्म' 'नेह नानास्ति किंचन' इत्यादिश्रुतिसिद्धस्यैकस्याद्वितीयस्यात्मनः हे भीरो पापाद्भयशील, ते तव एकस्य दुरितेन को भारो गौरवं स्यात्, अपि तु पूर्णस्य शकटस्य शूर्पेणेव न कश्चिद्भारो भवेत्। एकात्मवादि प्रामाणिकस्यैवात्मनो यदि सकलशरीरोपाधिकृतपापसंबन्धः, तदा तत्फलानन्त्यान्निरयादिदुःखानुभवावसरे तवैकपापेन कृत्वा पापाक्षयराशिभूतस्तस्य न कोऽपि भारः स्यात्। किं च तैर्यत्कृतम्, तत्त्वयैव कृतमिति पापे कृतेऽपि तव दोषो नेति यथेच्छं पापं कुर्वित्यर्थः। अपि चात्मैक्यात्स्वपरव्यवहाराभावे परदारत्वपरस्वत्वाद्यभावात्परदारगमनादौ पापलेशस्याप्यभावात्स्वेच्छाचारमेव कुर्वित्यर्थः। भीरो तात्पर्यपर्यालोचनया विना भयशील, इत्युपहासः। तस्मादेतास्ता श्रुतिरुपासनपरा ज्ञेया, न तु तात्त्विकीति भावः ॥

देवपूजादिबुद्धिं निराकरोति—

> किं ते वृन्तहृतात्पुष्पात्तन्मात्रे हि फलत्यदः।
> न्यस्य तन्मूर्ध्न्यनन्यस्य न्यास्यमेवाश्मनो यदि ॥ ५७ ॥

किमिति ॥ भो देवपूजक, वृन्तात्प्रसवबन्धनात्सकाशाद्धृतमवचितं चम्पकादिपुष्पं तस्माद्धेतोस्ते तव किं प्रयोजनम्। प्रत्युत दोष एवेत्यर्थः। हि यस्माददः पुष्पं तन्मात्रे वृक्षे सत्येव वर्तमानमेव फलति फलरूपेण परिणमते, नतु तेन विना। पुष्पेऽवचिते फलोत्पत्तिप्रतिबन्ध एव भवति नत्वन्यत्फलमित्यर्थः। अथ देवपूजादौ विनियोगात्सफलमिति चेत्। तदप्यसत्। अश्मनः शालग्रामशिवलिङ्गादेः पाषाणस्यैव मूर्ध्नि न्यासं यदि चेत्तन्न्यसनं सफलाय भविष्यतीत्याशयः, तर्ह्यनन्यस्य शिलातोऽभिन्नस्य पाषाणमात्रस्य सतो मूर्ध्नि तत्पुष्पं न्यस्य निधेहि। अनन्यस्यैवेति वा। नास्त्यमेवेति वा। किं च भवन्मते भेदस्य अभावादीश्वरस्य सर्वत्र सत्त्वाच्छालग्रामादेस्त्वच्छरमर्थत्वाद्देवपूजापि वृथैवेति तस्यैव पुष्पाणि क्षिपेत्युपहास इति भावः। न्यास्यं, ह्रलन्तत्वाण्ण्यत् ॥

[illegible]मननार्थमन्यदप्याह—

> तृणानीव घृणावादान्विधूनय वधूरनु।
> तथापि नाददासैव का चिरं जनवञ्चना ॥ ५८ ॥

तृणानीति ॥ हे पुरुष, 'तुर्ज कैश्मागारे, सर्वो मांसमक्षी' इत्यादीन् [illegible] विषय [illegible]नि तिरस्कारेण तृणानीव विधूनय त्यज। [illegible] [illegible] इति चिरं जनवञ्चना [illegible] [illegible]। अपि तु न कार्येति भावः। [illegible] पापनिरता इति [illegible] [illegible] न कुरु इति वा ॥

> कुरुध्वं कामदेवाज्ञां ब्रह्मादैरप्यलङ्घिताम्।
> [illegible] [illegible] तथाज्ञाः काचिदादृता ॥ ५९ ॥

कुरुध्वमिति ॥ हे [illegible] [illegible], [illegible] 'अहल्यायै [illegible]' [illegible] [illegible]

१ [illegible]

तस्य लोपारब्धदलक्षणानाज्ञां कुरुध्वम्। यस्माद्वेदोऽपि 'श्रुतिस्मृती ममैवाज्ञे' इति श्रीभगवद्वचनाद्वैष्णवीया आज्ञा। अतः—तत्र वेदरूपायां देवाज्ञायां कामाज्ञातोऽधिका अर्हणा पूजा मान्यता का। अपि तु—देवत्वाविशेषाद्वेदाज्ञेव कामाज्ञापि माननीयैवेत्यर्थः। आज्ञाद्वयमपि समानम्, तस्मात्कामाज्ञामपि कुरुध्वम्, न त्वेकत्र पक्षपातः कार्य इति भावः। यद्वा—तत्र द्वयोराज्ञयोर्मध्येऽधिकमर्हणं यस्याः सा का आज्ञा। अपि तु पूर्वपदविशेषाद्वे अपि समे एवेत्यर्थः। द्वयोर्मध्ये अधिकार्हणा का इति यूयमेव कथयतेति ब्रह्मादिभिरप्यङ्गीकृतत्वाच्छिष्टपरिगृहीतत्वलक्षणप्रामाण्यात्, प्रत्यक्षसुखहेतुत्वाच्च कामदेवाज्ञैवाधिकार्हणा। वेदो हि ब्रह्मादीनामेवाज्ञा, ब्रह्मादयश्च कामदेवाज्ञाकारिणः, ततश्च यदीयाज्ञा भवद्भिरनुष्ठीयते, तैरपि यानुष्ठीयते सा भवतां सुतरामनुष्ठेयेति भाव इति वा। पक्षपाततारतम्यादाज्ञाच नूर्नत्वम्। 'वेदो हि' इति च पाठः। कामदेवाज्ञामेव कुरुध्वम्, यस्माद्वेदोऽपि देवाज्ञा। तत्र वेदे अधिका पूजा। अपितु—कामदेवाज्ञैवानुष्ठेया ब्रह्मादिभिरप्यनुष्ठितत्वादिति वा। 'का विगर्हणा' इति पाठे तत्र कामाज्ञायां का निन्दा। कोऽनादर इत्यर्थः। देवकीया गहादिषु 'जनपदयोः कुक्च' इत्यत्र 'देवस्येति च वक्तव्यम्' इति वचनाच्छः कुक्च॥

श्लोकत्रयेण मीमांसकान्परिहसति—

प्रलापमपि वेदस्य भागं मन्यध्व एव चेत्।
केनाभाग्येन दुःखाय विधीनपि तथेच्छथ॥ ६०॥

प्रलापमिति॥ महता प्रयासेन यस्य प्रामाण्यमुपपादितम्, तस्य वेदस्यैव केवल भागमेकं 'सोऽरोदीत्, यदरोदीत्' इत्याद्यर्थवादमन्त्रनामधेयात्मकं प्रलापमिवानर्थकमपि [illegible] मन्यध्वे कुरुध्वे 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इत्यादिना पूर्वपक्षसूत्रेण प्रतिपादितस्यानर्थक्यस्य 'विधिना त्वेकवाक्यत्वात्' इत्यादिना सिद्धान्तसूत्रेण स्तुत्यर्थत्वेनार्थवादादेरप्रयोगेऽनिष्टेऽपि सार्थक्य[illegible] वेन्मन्यध्वे, तर्हि बहुधनव्ययायासप्रयासत्वात्, दुःखजनकान् 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादीन् विधिभागानपि केन भाग्याविष्टेन तथा प्रलापरूपान् [illegible]। अपि तु तानपि प्रलापरूपानेव स्वीकुरुध्व इत्यर्थः। सर्वोऽपि वेदो [illegible] प्रलापरूपो वा भवतु। [illegible] इति भावः। [illegible]त्यर्थः। दुःखदत्वस्य [illegible]ऽपि दुःखं [illegible]॥

प्रकारान्तरेणापि मीमांसकानुपहसति—

श्रुतिं श्रद्धत्थ विक्षिप्ताः प्रक्षिप्तां ब्रूथ च स्वयम्।
मीमांसामांसलप्रज्ञास्तां [illegible]॥ ६१॥

श्रुतिमिति॥ [illegible]

---

१ [illegible] सुखावबोधा।

त्रिंशं दानिनी दानमन्तीं स्वयमात्मनेवाङ्गीकृतप्रामाण्यामपि शङ्कितो केनचिद्वचकेन निरूप्यां निश्चितो न भूत् । नकारः पूर्वापरविरोधद्योतनार्थः । पूर्वापरानुसंधानविकलत्वाद्वेदविचारच- तुरा साक्षी भवता बुद्धिरित्युपहासार्थं 'मीमांसा—' इत्यादि संबोधनम् । मांसलः—इत्यनेन न स्थूलदृश्य आपातमात्रदर्शिनो यूयम्, न तु कुशाग्रबुद्धय इति सूचितम् । हस्तिनो यज्ञमध्ये यजमानं यज्ञसमापनाप्रदृशीलं समाप्तुरत्कालमपि श्राद्धन्यं विदित्वा कार्यकर्तारोऽयमेव सर्वं 'यूपे यूपे हस्तिनो बद्धा ऋत्विग्भ्यो दद्यात्' इत्येतत्प्रतिपादकानि वेदवाक्यानि यज- मानस्य श्रद्धाजननार्थं पठित्वा यावन्तो । प्रत्यक्षश्रुतिविहितदेशान्तरनिदर्शनव्यामोहितश्च स यजमानः श्रद्दधानतया तथैव प्रतिपद्य तेभ्यः प्रयच्छतीति तेरेषा स्मृतिः प्रवर्तिता स्यादि- त्याशङ्क्य 'नेयं वेदमूला' इति 'लोभपूर्वकमेतद्धकम्' इति वेदवाक्यानामर्थवादत्वमङ्गीक- रोति । ततश्च कानिचिद्वाक्यानि प्रमाणानि, कानिचिदप्रधानानीत्यर्धजरतीयन्यायस्त्वदस्य एवेत्यर्थः । 'यूपहस्तिनो दानमाचरन्ति' इति स्मृतेर्मूलभूता श्रुतिरभिधीयते । कल्पितश्रुति- मूलत्वात्स्मृतिरेव वा श्रुतित्वेनोच्यते । यूपवद् अत्युच्चा द्विपा यूपद्विपाः तान् दापयतीति । वाजपेयादौ हि सप्तदश हस्तिनो रथा दासाश्च दक्षिणाः । इत्युपलक्षणमेतदित्यन्ये ॥

को हि वेदास्त्यमुष्मिन्वा लोक इत्याह या श्रुतिः ।
तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथम् ॥ ६२ ॥

को हीति ॥ 'को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वा' इति 'दिक्ष्वतीकाशान्करोति' इत्यादिर्या श्रुतिः, अमुष्मिँल्लोके परलोके विषये सुखादिकमस्ति वास्त्येव नास्त्येव इति वा हि निश्चितं को वेद । अपि तु न कोऽपि । इत्याह ब्रवीति । तस्याः श्रुतेः प्रामाण्यादमुं लोकं परलोकं लोकः परीक्षकोऽस्मदादिः कथं वा कथमिव प्रत्येतु विश्वासेन निश्चिनोतु । अपितु न कोऽपि । यदीयास्तित्वनास्तित्वयोः श्रुतेरेव संदेहस्तत्प्रामाण्यात्पामरो भवादृश एव परलोकं मन्यते, नतु प्रामाणिकः कश्चिदिति भावः ॥

स्मृतिप्रामाण्यमपि दूषयति—

धर्माधर्मौ मनुर्जल्पन्नशक्यार्जनवर्जनौ ।
व्याजान्मण्डलदण्डार्थी श्रद्धायि मुधा बुधैः ॥ ६३ ॥

धर्मेति ॥ बहुधनव्ययायाससाध्यत्वात्, शीतभयात्तीर्थस्नानाद्यशक्तत्वात्, अग्नौ चरणसंता- पनादिरूपतया तत्तदिन्द्रियवेगस्य परिहर्तुमशक्यत्वात्, सुखानुभवमूलत्वाच, क्रमेणाशक्यमर्जनं करणं, वर्जनं च ययोस्तौ धर्माधर्मौ बुद्धिपूर्वं जल्पन्बहुधा प्रतिपादयन्मन्वन्तराधिपतिरादिराजो मनुर्मुख्यस्मृतिकर्ता ब्रह्मपुत्रः स्वायंभुवः व्याजाद्धर्माधर्मोपदेशकस्मृतिप्रणयनमिषेण विधि- निषेधातिक्रमनिमित्तप्रायश्चित्तद्वारा मण्डलस्य राष्ट्रस्य लोकस्यापराधं निमित्तीकृत्य दण्डार्थी द्रव्यमभिलाषुको यतः,-तस्माद्बुधैः पण्डितंमन्यैर्मुधा वृथैव श्रद्धायि आदृता । अधर्माचरणं सुकरमित्यधर्ममेव सर्वः करोति । ततश्च येन केनाप्युपायेनार्थग्रहणोपाय एव दण्डो मनुनाभि- हितः, नतु धर्म इत्यर्थः । अबुधैरिति वा । मनुवचनमूलत्वात्स्मृतिमात्रस्याप्रामाण्यमुक्तम् ॥

---

१ 'प्रत्येति' इति पाठो जीवातु-सुखावबोधाव्याख्यातः । २ 'श्रद्धधे वा' इति पाठः सुखावबो- धाव्याख्यातः ।

पुराणप्रामाण्यं दूषयति—

व्यासस्यैव गिरा तस्मिञ्छ्रद्धेत्यद्धा स्थ तान्त्रिकाः ।
मत्स्यस्याप्युपदेशान्धः को मत्स्यानपि भाषताम् ॥ ६४ ॥

व्यासस्येति ॥ दासदारिकान्धनिचारजातस्य भ्रातृजायायां पुत्रोत्पादिन इत्यादिदोषस्य व्यासस्यैव कवित्वरूपया गिरा तस्मिन्धर्मे । परलोके वा । व्यास एव वा । श्रद्धा भावना आस्तिक्यबुद्धिरिति इत्येतस्माद्धेतोरद्धा निश्चितं यूयं तान्त्रिका युक्तिज्ञा वाक्यविचारचतुराः स्थ भवथ । विरुद्धलक्षणया—एवं विगीतेन व्यासेन प्रतिपादिते धर्मे परलोके तस्मिन्वा येषामास्तिक्यबुद्धिः, ते यूयं मूर्खतमा इति भावः । अथ च—तान्त्रिकाः कुविन्दतुल्या मूर्खा इत्यर्थः । व्यासस्येत्येकवचनेन, एवकारेण विगीतत्वं सूचितम् । मूलपरिशुद्ध्या भारतादीनां पुराणानां चोपहासः कृतः । मत्स्यपुराणं तु मत्स्यरूपधारिणा श्रीविष्णुना मनवे प्रोक्तमिति तत्प्रामाण्यमुपहसति—मत्स्यस्य उपदेशान्धः युष्मान्मनुप्रभृतीन्को भाषतां युष्माभिः सह संवादं कः करोतु । यतः—मत्स्यानपि को भाषताम् । मत्स्या अपि संवादार्हा न भवन्ति । तदुपजीविनस्तच्छिष्या भवन्तस्तु दूरे इति को भाषताम् । युष्मान्मन्वादीन्मत्स्यान्को वदतु । अपि तु न कोऽपि । यतो मत्स्यस्योपदेशात् । जलस्थलचारिभ्यो यो हीनो मत्स्यः, तस्यापि शिष्यास्तन्निदेशकारिणः । ततश्चोपदेशकापेक्षयोपदेश्यस्य हीनत्वान्मत्स्यशब्देनापि नाभिधेया इति भावः । एवं कूर्मपुराणादीनामुपहासः । अथ च मनुसंबन्धिपर्यायेण सर्वेऽपि मानवशब्दवाच्या यथा, तथा मत्स्यसंबन्धिनो मात्स्यशब्दाभिधेयत्वमेव युक्तम्, न तु मनुष्यशब्दाभिधेयत्वमिति को मत्स्यानपि भाषतामिति युक्तमुक्तमिति व्याख्येयम् । तान्त्रिका इति, 'तन्त्रमधीते वेद वा' इत्यर्थे वसन्तादित्वाट्ठक् । मत्स्यस्येति 'कुलात्मन्–' इति क्वचित् पाठः ॥

पूर्वोक्तमेव व्यासस्याप्रमाणत्वं श्लोकद्वयेनाह—

पण्डितः पाण्डवानां स व्यासश्चाटुपटुः कविः ।
निनिन्द तेषु निन्दत्सु स्तुवत्सु स्तुतवान्न किम् ॥ ६५ ॥

पण्डित इति ॥ पण्डितो बुद्धिमान्, अत एव कविः [illegible], तथा—पाण्डवानां युधिष्ठिरादीनां चाटुनि प्रियवचने पटुः [illegible] स [illegible] व्यासस्तेषु पाण्डवेषु दुर्योधनादीन्निन्दत्सु सत्सु न निनिन्द किम् । तथा—तेषु भीष्मद्रोणादीन्स्तुवत्सु सत्सु न स्तुतवान्किम् । तेषु निन्दत्सु स्वयमपि निनिन्द, तेषु स्तुवत्सु स्तुतवान् [illegible] दुर्योधनादिनिन्दायुक्तत्वात् व्यासस्य [illegible] नेति भावः । [illegible] ॥

न भ्रातुः किल देव्यां स व्यासः कामात्समागमत् ।
[illegible] तत्राप्यरोसि किम् ॥ ६६ ॥

नेति ॥ [illegible]

द्विपं दापिनीं दापयन्तीं स्वयमात्मनैवाङ्गीकृतप्रामाण्यामपि प्रक्षिप्तां केनचिद्वञ्चकेन खिलरूपां निक्षिप्तां च ब्रूथ। चकारः पूर्वापरविरोधद्योतनार्थः। पूर्वापरानुसंधानविकलत्वाद्वेदविचारचतुरा साध्वी भवतां बुद्धिरित्युपहासार्थं 'मीमांसा–' इत्यादि संबोधनम्। मांसला—स्थूलत्वेन च स्थूलदृष्टय आपातग्राहिणो यूयम्, न तु कुशाग्रबुद्धय इति सूचितम्। ऋत्विजो यज्ञान्ते यजमानं यज्ञसमापनाग्रहशीलं समाप्त्युत्तरकालभावि स्वाच्छन्द्यं विदित्वा कार्यवत्तावेलायामेव स्वयं 'यूपे यूपे हस्तिनो बद्धा ऋत्विग्भ्यो दद्यात्' इत्येतत्प्रतिपादकानि वेदवाक्यानि यजमानस्य श्रद्धाजननार्थं पठित्वा याचन्ते। प्रत्यक्षश्रुतिविहितदेयान्तरनिदर्शनव्यामोहितश्च यजमानः श्रद्दधानतया तथैव प्रतिपद्य तेभ्यः प्रयच्छतीति तैरेवैषा स्मृतिः प्रवर्तिता स्यादित्याशङ्क्य 'नेयं वेदमूला' इति 'लोभपूर्वकमेभिरुक्तम्' इति वेदवाक्यानामर्थवादत्वमङ्गीकरोति। ततश्च कानिचिद्वाक्यानि प्रधानानि, कानिचिदप्रधानानीत्यर्धजरतीयन्यायत्वदस्त्वम् एवेत्यर्थः। 'यूपहस्तिनो दानमाचरन्ति' इति स्मृतेर्मूलभूता श्रुतिरभिधीयते। कल्पितश्रुतिमूलत्वात्स्मृतिरेव वा श्रुतित्वेनोच्यते। यूपवद् अत्युच्चा द्विपा यूपद्विपाः तान् दापयतीति। वाजपेयादौ हि सप्तदश हस्तिनो रथा दासश्च दक्षिणाः। इत्युपलक्षणमेतदित्यन्ये॥

को हि वेदास्त्यमुष्मिन्वा लोक इत्याह या श्रुतिः।
तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथम्॥ ६२॥

को हीति॥ 'को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वा' इति 'दिक्ष्वतीकाशान्करोति' इत्यादिर्या श्रुतिः, अमुष्मिँल्लोके परलोके विषये सुखादिकमस्ति वास्त्येव नास्त्येव इति वा हि निश्चितं को वेद। अपि तु न कोऽपि। इत्याह ब्रवीति। तस्याः श्रुतेः प्रामाण्यादमुं लोकं परलोकं लोकः परीक्षकोऽस्मदादिः कथं वा कथमिव प्रत्येतु विश्वासेन निश्चिनोतु। अपि तु न कोऽपि। यदीयास्तित्वनास्तित्वयोः श्रुतेरेव संदेहस्तत्प्रामाण्यात्पामरो भवादृश एव परलोकं मन्यते, नतु प्रामाणिकः कश्चिदिति भावः॥

स्मृतिप्रामाण्यमपि दूषयति—

धर्माधर्मौ मनुर्जल्पन्नशक्यार्जनवर्जनौ।
व्याजान्मण्डलदण्डार्थी श्रद्धायि मुधा बुधैः॥ ६३॥

धर्मेति॥ बहुधनव्ययायाससाध्यत्वात्, शीतभयात्तीर्थस्नानाद्यशक्तत्वात्, अग्नौ चरणसंतापनादिरूपतया तत्तदिन्द्रियवेगस्य परिहर्तुमशक्यत्वात्, सुखानुभवमूलत्वाच्च, क्रमेणाशक्यमर्जनं करणं, वर्जनं च ययोस्तौ धर्माधर्मौ बुद्धिपूर्वं जल्पन्बहुधा प्रतिपादयन्मन्वन्तराधिपतिरादिराजो मनुर्मुख्यस्मृतिकर्ता ब्रह्मपुत्रः स्वायंभुवः व्याजाद्धर्माधर्मोपदेशकस्मृतिप्रणयनमिषेण विधिनिषेधातिक्रमनिमित्तप्रायश्चित्तद्वारा मण्डलस्य राष्ट्रस्य लोकस्यापराधं निमित्तीकृत्य दण्डार्थी द्रव्यमभिलाषुको यतः,–तस्माद्बुधैः पण्डितंमन्यैर्मुधा वृथैव श्रद्धायि आदृता। अधर्माचरणं सुकरमित्यधर्ममेव सर्वः करोति। ततश्च येन केनाप्युपायेनार्थग्रहणोपाय एव दण्डो मनुनाभिहितः, नतु धर्म इत्यर्थः। अबुधैरिति वा। मनुवचनमूलत्वात्स्मृतिमात्रस्याप्रामाण्यमुक्तम्॥

---

१ 'प्रत्येति' इति पाठो जीवातु-सुखावबोधाव्याख्यातः। २ 'श्रद्दधे वा' इति पाठः सुखावबोधाव्याख्यातः।

ङ्गिनं दाक्षिणीं दापयन्तीं सत्यमाप्तेनेवाङ्गीकृतप्रामाण्यामपि प्रतीतां केनचिद्धूर्तेन विरुद्धां निश्चितां न ब्रूम । नकारः पूर्वापरविरोधद्योतनार्थः । पूर्वापरानुसंधानविकलत्वाद्गत्वैव बुद्धा साक्षी भवती बुद्धिरित्युपहासार्थं 'मीमांसा-' इत्यादि संबोधनम् । मांसलत्वे न स्थूलबुद्धय आगमप्रामाण्यग्राहिणो यूयम्, न तु कुशाग्रबुद्धय इति सूचितम् । हस्तिनो यज्ञे यजमानं ऋत्विजामदृष्टिं समाहितुतरकाळभावि आम्नायं विहिता । कर्मसाकल्ये सार्थं 'यूपे यूपे हस्तिनो बद्धा ऋत्विग्भ्यो दद्यात्' इत्येतत्प्रतिपादकानि वेदवाक्यानि यजमानस्य श्रद्धाजननार्थं पठितानि भवन्ति । प्रत्यक्षश्रुतिविहितदेवतानामनिदर्शनव्यामोहितश्च यजमानः श्रद्धानतया तथैव प्रतिपद्य तेभ्यः प्रयच्छतीति वेदे एषा स्तुतिः प्रमाणिता इत्येत-लाशङ्क्य 'नेयं वेदमूला' इति 'लोभपूर्वकमित्युक्तम्' इति वेदवाक्यानामनर्थवादत्वमङ्गीकरोति । ततश्च कानिचिद्वाक्यानि प्रमाणानि, कानिचिदप्रमाणानीत्यर्धजरतीयन्यायप्रसङ्ग एवेत्यर्थः । 'यूपाद्धस्तिनो दानमाचरन्ति' इति स्मृतेर्मूलभूता श्रुतिरभिधीयते । हस्तिदानस्मृतेर्मूलत्वात्स्मृतिरेव वा श्रुतित्वेनोच्यते । यूपवद् अत्युच्चा द्विपा यूपद्विपाः तान् ददन्तीति । वाजपेयादौ हि सप्तदश हस्तिनो रथा दासाश्च दक्षिणाः । इत्युपलक्षणमेतदित्यन्ये ॥

को हि वेदास्त्यमुष्मिन्वा लोक इत्याह या श्रुतिः ।
तत्प्रामाण्यादमुं लोकं लोकः प्रत्येतु वा कथम् ॥ ६२ ॥

को हीति ॥ 'को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वा' इति 'दिक्ष्वग्नेः कल्पयन्त्याप्नोति' इत्यादिर्या श्रुतिः, अमुष्मिँल्लोके परलोके विषये सुखादिकमस्ति वास्त्येव नास्त्येव इति वा हि निश्चितं को वेद । अपि तु न कोऽपि । इत्याह ब्रवीति । तस्याः श्रुतेः प्रामाण्यादमुं लोकं परलोकं लोकः परीक्षकोऽस्मदादिः कथं वा कथमिव प्रत्येतु विश्वासेन निश्चिनोतु । अपि तु न कोऽपि । यदीयास्तित्वनास्तित्वयोः श्रुतेरेव संदेहस्तत्प्रामाण्यात्पामरो भवादृश एव परलोकं मन्यते, नतु प्रामाणिकः कश्चिदिति भावः ॥

स्मृतिप्रामाण्यमपि दूषयति—

धर्माधर्मौ मनुर्जल्पन्नशक्यार्जनवर्जनौ ।
व्याजान्मण्डलदण्डार्थी श्रद्धायि मुधा बुधैः ॥ ६३ ॥

धर्मेति ॥ बहुधनव्ययायाससाध्यत्वात्, शीतभयात्तीर्थस्नानाद्यशक्यत्वात्, अग्नौ चरणतपनादिरूपतया तत्तदिन्द्रियवेगस्य परिहर्तुमशक्यत्वात्, सुखानुभवमूलत्वाच्च, क्रमेण शक्यमर्जनं करणं, वर्जनं च ययोस्तौ धर्माधर्मौ बुद्धिपूर्वं जल्पन्बहुधा प्रतिपादयन्मन्वन्तराधिपतिरादिराजो मनुर्मुख्यस्मृतिकर्ता ब्रह्मपुत्रः स्वायंभुवः व्याजाद्धर्माधर्मोपदेशकस्मृतिप्रणयनमिषेण विधिनिषेधातिक्रमनिमित्तप्रायश्चित्तद्वारा मण्डलस्य राष्ट्रस्य लोकस्यापराधं निमित्तीकृत्य दण्डार्थी द्रव्यमभिलाषुको यतः,–तस्माद्बुधैः पण्डितंमन्यैर्मुधा वृथैव श्रदधायि आदृता । अधर्माचरणं सुकरमित्यधर्ममेव सर्वः करोति । ततश्च येन केनाप्युपायेनार्थग्रहणोपाय एव दण्डो मनुनाभिहितः, नतु धर्म इत्यर्थः । अबुधैरिति वा । मनुवचनमूलत्वात्स्मृतिमात्रस्याप्रामाण्यमुक्तम् ॥

---

१ 'प्रत्येति' इति पाठो जीवातु-सुखावबोधाव्याख्यातः । २ 'अद्धे वा' इति पाठः सुखावबोधाव्याख्यातः ।

पुराणप्रामाण्यं दूषयति—

व्यासस्यैव गिरा तस्मिञ्श्रद्धेत्यद्धा स्थ तान्त्रिकाः ।
मत्स्यस्याप्युपदेश्यान्वः को मत्स्यानपि भाषताम् ॥ ६४ ॥

व्यासस्येति ॥ दाशदारिकाव्यभिचारजातस्य भ्रातृजायायां पुत्रोत्पादिन इत्यादिशीलस्य व्यासस्यैव कवित्वरूपया गिरा तस्मिन्धर्मे । परलोके वा । व्यास एव वा । श्रद्धा भावना आस्तिक्यबुद्धिरिति इत्येतस्माद्धेतोरद्धा निश्चितं यूयं तान्त्रिका युक्तिज्ञा वाक्यविचारचतुराः स्थ भवथ । विरुद्धलक्षणया—एवं विगीतेन व्यासेन प्रतिपादिते धर्मे परलोके तस्मिन्वा येषामास्तिक्यबुद्धिः, ते यूयं मूर्खतमा इति भावः । अथ च—तान्त्रिकाः कुविन्दतुल्या मूर्खा इत्यर्थः । व्यासस्येत्येकवचनेन, एवकारेण विगीतत्वं सूचितम् । मूलापरिशुद्ध्या भारतादीनां पुराणानां चोपहासः कृतः । मत्स्यपुराणं तु मत्स्यरूपधारिणा श्रीविष्णुना मनवे प्रोक्तमिति तत्पृथगुपहसति—मत्स्यस्य उपदेश्यान्वः युष्मान्मनुप्रभृतीन्को भाषतां युष्माभिः सह संवादं कः करोतु । यतः—मत्स्यानपि को भाषताम् । मत्स्या अपि संवादार्हा न भवन्ति । तदुपजीविनस्त्वच्छिष्या भवन्तस्तु दूरे इति को भाषताम् । युष्मान्मन्वादीन्मत्स्यान्को वदतु । अपि तु न कोऽपि । यतो मत्स्यस्योपदेश्यान् । जलस्थलचारिभ्यो यो हीनो मत्स्यः, तस्यापि शिष्यास्तन्निदेशकारिणः । ततश्चोपदेशकापेक्षयोपदेश्यस्य हीनत्वान्मत्स्यशब्देनापि नाभिधेया इति भावः । एवं कूर्मपुराणादीनामुपहासः । अथ च मनुसंबन्धित्वेन सर्वेऽपि मानवशब्दवाच्या यथा, तथा मत्स्यसंबन्धिनो मात्स्यशब्दाभिधेयत्वमेव युक्तम्, ननु मत्स्यशब्दाभिधेयत्वमिति को मत्स्यानपि भाषतामिति युक्तमुक्तमिति व्याख्येयम् । तान्त्रिका इति, 'तदधीते वेद वा' इत्यर्थे वसन्तादेराकृतिगणत्वाट्ठक् । मत्स्यस्येति 'कृत्यानाम्—' इति कर्तरि षष्ठी ॥

पूर्वोक्तमेव व्यासस्याप्रमाणत्वं श्लोकद्वयेनाह—

पण्डितः पाण्डवानां स व्यासश्चाटुपटुः कविः ।
निनिन्द तेषु निन्दत्सु स्तुवत्सु स्तुतवान्न किम् ॥ ६५ ॥

पण्डित इति ॥ पण्डितो बुद्धिमान्, अत एव कविरैतिहासिकस्यार्थस्य वर्णकः, तथा—पाण्डवानां युधिष्ठिरादीनां चाटुनि प्रियवचने पटुः एवंभूतः स मत्कृतिरपि तवनामेन अङ्कितो व्यासस्तेषु पाण्डवेषु दुर्योधनादीन्निन्दत्सु सत्सु न निनिन्द किम् । तथा—तेषु श्रीकृष्णादीन्स्तुवत्सु सत्सु न स्तुतवान्किम् । तेषु निन्दत्सु स्वयमपि निनिन्द, तेषु स्तुवत्सु स्वयमपि तुष्टावेति पूर्वविशेषणयुक्तस्यापि व्यासस्य पराधीनत्वादनाप्तत्वाच्च तदुक्तं भारतादिकमप्रमाणमेवेति भावः । अन्योऽपि पण्डितः प्रभुचित्तानुगुण्येनैव व्यवहरति, तद्वदयमपीत्यर्थः ॥

न भ्रातुः किल देव्यां स व्यासः कामात्मनासजत् ।
दासीरतस्तद्दासीयन्मात्रा तत्राप्यदेशि किम् ॥ ६६ ॥

नेति ॥ स भगवान्व्यासो भ्रातुर्विचित्रवीर्यस्य देव्यां महिष्यां [illegible] कामपरवश[illegible]-दुरात्मा सन् [illegible] न । किंतु [illegible] वा । [illegible] संगतः । [illegible] इति वदन्ति । [illegible] तत्रापीत्यर्थः । तत्र [illegible]

आसीदिति यत्प्रसिद्धम्। तत्र दासीरतेऽपि मात्रा सत्यवत्या अदेशि आदिष्टः किम्। कथयेति प्रश्नकाकुरुपहासार्था, अपि तु तत्र तावन्नादिष्टः, तस्मादुभयत्रापि स्मरपरवशत्वादेव प्रवृत्तः। एवंविधस्यानाप्तत्वात्तद्वचनमप्रमाणमेवेति भावः। समासजत्, 'दंशसञ्ज–' इति नलोपः॥

इदानीं देवद्विजगोभजनं दूषयति—

देवैर्द्विजैः कृता ग्रन्थाः पन्था येषां तदादृतौ।
गां नतैः किं न तैर्व्यक्तं ततोऽप्यात्माधरीकृतः॥ ६७॥

देवैरिति॥ देवैर्ब्रह्मादिभिः, द्विजैर्याज्ञवल्क्यादिभिश्च कृता ग्रन्थाः पुराणानि स्मृतयश्च त एव येषां भवादृशां वैदिकानां तदादृतौ तेषां देवानां द्विजानां चादृतावादरे विषये पन्थाः। देवा ब्राह्मणाश्चावश्यं भजनीया इत्युपदेशपराः प्रमाणमिति यावत्। स्वपूजार्थमेव तैर्ग्रन्था निर्मिताः, तद्वचनप्रामाण्याद्देवादीनाद्रियन्ते एवंभूता मूर्खा ये, तैर्युष्माभिस्तद्ग्रन्थप्रामाण्यादेव गां पशुरूपां सुरभिं नतैः सद्भिस्ततः पशोर्गोरपि सकाशादात्मा स्वरूपं व्यक्तं स्पष्टं नाधरीकृतः किम्। नम्रः अथच–हीनः। न कृतः किम्। अपि तु—कृत एव। नमस्कार्यापेक्षया नमस्कर्तुर्हीनत्वात्पशोरपि सकाशाद्भवन्तो मूर्खतमा इत्यर्थः। व्यक्तं मन्ये इति यावदिति वा। स्वार्थपरपरवचनस्याप्रमाणत्वाद्देवब्राह्मणसुरभिभजनं निर्मूलत्वात्त्याज्यमिति भावः। देवैर्द्विजैः कृता ग्रन्था येषां वः पन्थाः प्रमाणम्, तैर्भवद्भिस्तस्य पथस्तेषां देवादीनां वा, ग्रन्थादीनां वा, आदरणनिमित्तं गां नतैः। ततोऽप्यात्मेति पूर्ववत्॥

इदानीं परलोकमङ्गीकृत्यापि यज्वनां ब्रह्मचर्यादि परिहरति—

साधुकामुकतामुक्ता शान्तस्वान्तैर्मखोन्मुखैः।
सारङ्गलोचनासारां दिवं प्रेत्यापि लिप्सुभिः॥ ६८॥

साध्विति॥ शान्तं विषयभोगपराङ्मुखं स्वान्तं चित्तं येषां तैर्मखोन्मुखैर्गृहीतदीक्षैरपि यज्ञेषु सोत्साहं प्रवृत्तैर्याज्ञिकैः कामुकता संभोगलोभिता यदमुक्ता न त्यक्ता तत्साधु युक्तम्। यद्वा—साध्वी सुखकारिणी सा चासौ कामुकता च सा न मुक्ता। शान्तस्वान्तैर्यज्वभिः कामुकता साधु मुक्ता त्यक्ता। साध्विति काक्वा विरुद्धलक्षणया नैव मुक्ता, किं तु संभोगैकनिष्ठा एव त इति व्याख्येयम्। सर्वत्रापि हेतुगर्भं विशेषणमाह—किंभूतैः—सारङ्गलोचनाभिः सुन्दरीभिः सारां श्रेष्ठाम्। ता एव सारः श्रेष्ठः पदार्थो यस्यां तादृशीं वा दिवं प्रेत्यापि मृत्वापि लिप्सुभिः। रम्भादिकाम्य(मा)यैव बहुधनव्ययायाससाध्यान्यज्ञान्ये कुर्वन्ति तैः कामुकता नैव त्यक्ता। अन्येषां तु यावज्जीवमेवाकामुकत्वम्। यज्वनां तु मरणानन्तरमपीति प्रेत्यापीत्यनेन सूचितम्। तस्माद्दीक्षासमयेऽपि ब्रह्मचर्याङ्गीकरणेनात्मा न वञ्चनीय इति भावः। दिवं, 'न लोका–' इति षष्ठीनिषेधाद्द्वितीया॥

एतदेवोपजीव्याह—

कः शमः क्रियतां प्राज्ञाः प्रियाप्रीतौ परिश्रमः।
भस्मीभूतस्य भूतस्य पुनरागमनं कुतः॥ ६९॥

पश्चाद्गमनशील उरभ्रो मेषस्तस्य विभ्रमं सादृश्यं बिभ्रति धारयन्ति । मज्जनादूर्ध्वं गमनं विरुद्धमिति विपरीतार्थकारित्वान्मेषवन्मूर्खा एवेति । गङ्गास्नानेन स्वर्गो भवतीति भ्रान्तिरेवेति भावः । 'विग्रहस्य' इति पाठे उपरियानाय कृतगङ्गास्नाना जना मार्गं गच्छतो मेषस्य भ्रान्ति सादृश्यं वा धारयन्ति । शीतबाधया नीचग्रीवतया गमनाच्छरीरस्याग्रतः शिरोदेशे पश्चात्कटिदेशे च हस्तयोर्धारणात्कृतगङ्गास्नानानां गङ्गास्नानसमयेऽपि मेषतुल्यत्वम् । तथा जलमध्येऽघमर्षणवशाद्दक्षिणकरेण प्राणानायच्छतः पृष्ठस्थितवामहस्तस्य नीचग्रीवतया पुरः सादृश्यम्, पश्चात्स्थितहस्तस्य च पुच्छसादृश्यमिति मेषतुल्यास्ते जना उच्चैर्जिगमिषोर्नीचैर्भावस्य विरुद्धस्य कारणादुपहास इति व्याख्येयम् । यानाय विग्रहायेति च 'तुमर्थाच्च-' इति चतुर्थी ॥

परलोकसद्भावेऽपि देहान्तरप्राप्तावपि च न किंचिदनिष्टमित्याह—

एनसानेन तिर्यक्स्यादित्यादिः का विभीषिका ।
राजिलोऽपि हि राजेव स्वैः सुखी सुखहेतुभिः ॥ ७२ ॥

एनसेति ॥ अनेन लोकैः क्रियमाणेन ब्रह्महत्याद्येनसा पातकेन तिर्यक्कृमिपक्ष्यादिः स्याद्भवेदित्यादिरेवंप्रकारिका विभीषिका भयोपदर्शनं किम् । अपि त्वनिष्टहेतुत्वाभावान्न किंचिदेतत् । हि यस्माद्राजिलोऽपि तिर्यक्त्वतिहीनः सर्पविशेषो जलव्यालोऽपि स्वैः स्वीयैः सुखहेतुभिर्भेकभक्षणजलाहारसजातीयतरुणीसंभोगादिभिः सुखकारणै राजेव सुखी । स्वजात्यनुगुणाहारविहारसंभोगादीनि विचित्राण्येव सर्वेषां सुखसाधनानि न तु नियतानि कानिचित् । ततश्च पापफलभूते तिर्यग्योनित्वे जातेऽपि सुखसद्भावान्न किंचिदनिष्टमित्यर्थः । 'समौ राजिलडुण्डुभौ' इत्यमरः । विभीषिका, 'धात्वर्थनिर्देशे ण्वुल्' इति ण्वुल् । 'भियो हेतुभये षुक्' इति षुक् । 'प्रत्ययस्थात्-' इतीत्वम् ॥

युद्धे हतानां स्वर्गप्राप्तिरित्यादि भारतादिवचनं दूषयति—

हताश्चेद्दिवि दीव्यन्ति दैत्या दैत्यारिणा रणे ।
तत्रापि तेन युध्यन्तां हता अपि तथैव ते ॥ ७३ ॥

हता इति ॥ सङ्ग्रामे हताः संमुखं पतिता दिवि दीव्यन्ति क्रीडन्ति इति चेद्यदि तर्हि दैत्यारिणा श्रीविष्णुना रणे हता हिरण्यकशिपुप्रभृतयो दैत्यास्तत्रापि स्वर्गेऽपि तेन सह युध्यन्तां युद्धं कुर्वन्तु । यस्माद्धता मारिता अपि ते दैत्या भवदीयमते तथैव रणे संमुखपतनात्स्वर्गे जीवन्त एव । ततश्च 'यं यं वापि स्मरन्भावं-' इत्यादिवचनप्रामाण्यान्मरणसमयेऽपि दैत्यैर्दैत्यारिणा सह विरोधस्य चित्ते धृतत्वात्स्वर्गप्राप्तावप्यसुरभावस्य तथैव वर्तमानत्वात्तत्रापि तेन सह योद्धव्यमेव । तत्रापि युध्यन्त एवेति कुत्रचित्पुराणादौ नाकर्ण्यते । तस्माद्रणे पतितानां मरणादधिकं किंचिदपि नास्तीति 'रणादपलायनात्स्वर्गः' इत्यादिशास्त्रधर्मप्रतिपादकं वाक्यजातमप्रमाणमेवेति भावः । हता अपीत्यत्र 'हतौ, अपि' इति पदेन हतौ हिंसायां कृतायामपि मरणे प्राप्तेऽपि । अन्यत्पूर्ववत् । 'हतावपि' इति वा पाठः ॥

---

१ 'उरभ्राणां मेषाणां विभ्रममिव विभ्रमं चेष्टां बिभ्रति' इति निदर्शनालंकारः । सचोर्ध्वगमनायाधो गच्छत इति विचित्रालंकारोत्थापित इति संकरः । तेन तेषामविमृश्यकारित्वं व्यज्यत इत्यलंकारेण वस्तुध्वनिः' इति जीवातुः ।

'सकृदुच्चरितं येन शिव इत्यक्षरद्वयम्', तथा—'मय्यर्पितमनोबुद्धिर्यः स मामेति पाण्डव' इत्यादिवचनैर्हर्यादिध्यानमात्रं मोक्षकारणमिति प्रतिपादयतः शैवादिशास्त्रस्य मुख्यभावेन सव्यभिचारत्वादप्रामाण्यम् ॥

ईश्वरवादिनो नैयायिकान्दूषयति—

देवश्चेदस्ति सर्वज्ञः करुणाभागवन्ध्यवाक् ।
तत्किं वाग्व्ययमात्रान्नः कृतार्थयति नार्थिनः ॥ ७७ ॥

देव इति ॥ 'भूम्यादिकं सकर्तृकं कार्यत्वाद्घटवत्' इत्यादिना विचित्रस्य कार्यजातस्या- स्मदादिविलक्षणेन कर्त्रा भवितव्यमिति सर्वज्ञस्य परमकारुणिकस्य सत्यवचसः सर्वकर्तुः प्रभोरीश्वरस्य साधितत्वात्सर्वज्ञः कालत्रयवर्तिवस्तुविज्ञानवान्, तथा—करुणाभाक्कृपावान्, तथा—अवन्ध्या सत्या वेदरूपा वाग् यस्य । नैयायिकादिमते ईश्वरप्रणीतत्वादाप्तवचनत्वा- द्वेदानां प्रामाण्यात्स्वतःप्रामाण्यस्य दूषितत्वादित्यर्थः । अथच—सफला यथोक्तार्थसाधिका वाग् यस्य स सत्यवाक् । भवत्सिद्धान्तेन देवश्चेदस्ति, तर्ह्यर्थिनो भुक्तिमुक्त्याद्यभिलाषिणो नोऽ- स्मान् भवन्तः प्राप्तमनोरथा भवन्त्विति वाग्व्ययमात्राद्वाङ्निर्गममात्रेणाव्ययेन किं कस्मात् कृतार्थयति पूर्णमनोरथान्करोति । कथयतेत्यर्थः । सर्वज्ञादिविशेषणत्रयेण युक्तोऽपि चेन्न ददाति, तस्मान्नास्त्येव । यद्यभविष्यत्तर्ह्यकृतार्थयिष्यत्, न च कृतार्थयति तस्मान्नास्तीति भावः । अनेनाप्युपहासः सूचितः ॥

इदानीं कर्ममीमांसकमतावलम्बेनायोग्योपलम्भनमाह—

भविनां भावयन्दुःखं स्वकर्मजमपीश्वरः ।
स्यादकारणवैरी नः कारणादपरे परे ॥ ७८ ॥

भविनामिति ॥ भविनां संसारिणां स्वकर्मजं स्वकृतपापफलभूतं दुःखं भावयन्कुर्व- न्स्वयं भवदपि भवने पुनः स्वयं प्रवर्तयन्नीश्वरो नोऽस्माकमकारणवैरी दायादत्वादिहेतुं विनैव शत्रुः स्यात् । अपरेऽन्ये पुनः कारणाद्दारक्षेत्राद्यपहारबन्धुवधादेर्वैरहेतोः (परे) वैरिणो भवन्ति । भविनां न इति वा संबन्धः । 'ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा ।' कर्मफलदातेश्वर इति मते कर्मानुगुणं फलं भवेत् तर्हीश्वरेण कर्तव्यं न किंचिदस्ति, तादृश- कर्मण एव दुःखोत्पत्तेः । एवंसति स चेदनुभावयति तर्ह्यस्मदादीनां द्वेष्य एव तेन कृतः स्यात् । तस्मात्तस्य दयालुत्वादयो गुणा गताः तस्मात्कर्मण एव प्राधान्यादीश्वरो नास्त्येवेति भावः । 'पञ्चमी' इति योगविभागात् 'कारणाद्वैरी' इति समासं कृत्वा पश्चान्नञ्समासः ॥

अन्यदप्याह—

तर्काप्रतिष्ठया साम्यादन्योन्यस्य व्यतिघ्नताम् ।
नाप्रामाण्यं मतानां स्यात्केषां सत्प्रतिपक्षवत् ॥ ७९ ॥

तर्केति ॥ प्रमाणानुग्राहकयुक्तिस्वरूपस्य तर्कस्याप्रतिष्ठयानन्ततयाऽपर्यवसानेन कृत्वा यत्साम्यं तुल्यत्वं तस्मात्तुल्यत्वाद्धेतोः सुन्दोपसुन्दन्यायेन विनिमयेनान्योन्यस्य परस्परं व्यति-

१ 'कारणवैरी नः' इति पाठे कारणं व्याख्येयम्' इति सुखावबोधा । २ 'अन्योन्यस्येदं' कर्त- रिकृत्य ष्ठेऽर्षे षष्ठी' इति सुखावबोधा ।

मतां दूषयतां केषां मतानां प्रमाणत्वेन समानानामनुमानादीनाम् । अथ च—सत्त्वासत्त्वैकात्म्यनानात्म्यसेश्वरत्वानीश्वरत्वादि प्रतिपादयतां दर्शनानामप्रामाण्यं स्यात् । अपितु—तुल्यबलत्वेन परस्परविरोधादप्रमाणत्वमेव स्यात् । किं च—सन् प्रतिपक्षो विरुद्धसाध्यसाधको हेतुर्यस्य तदनुमानं सत्प्रतिपक्षं तद्वत्तस्येवाप्रामाण्यं स्यादिति संबन्धः । वैशेषिकादयो यथा कृतकत्वाद्घटवदनित्यं शब्दं वदन्ति । मीमांसका निरवयवत्वादात्मवन्नित्यं शब्दं वदन्ति । तत्रोत्तरेण पूर्वप्रदर्शिते दोषविशेषे पूर्वस्य यथाऽप्रामाण्यं तथेत्यर्थः । सत्प्रतिपक्षानुमाने यथाऽप्रामाण्यं द्वयोरपीत्यर्थः । सप्तम्यर्थे वतिः । तर्क्यते निश्चीयतेऽर्थो यैस्ते तर्का अनुमानानि तेषामप्रतिष्ठया समबलद्वितीयसद्भावेनानिश्चितत्वरूपतयेत्यर्थ इति वा व्याख्येयम् । गगनं नित्यममूर्तत्वादात्मवत्; गगनमनित्यमस्मदादिबाह्येन्द्रियग्राह्यगुणाधारभूतत्वाद्घटवदिति सत्प्रतिपक्षानुमानयोरिवेत्यर्थः ॥

अन्यच्चाह—

अक्रोधं शिक्षयन्त्यन्यैः क्रोधना ये तपोधनाः ।
निर्धनास्ते धनायैव धातुवादोपदेशिनः ॥ ८० ॥

अक्रोधमिति ॥ क्रोधना अकारणरोषणा ये तपोधनाः तपःस्विनस्ते दुर्वासःप्रभृतयस्ते 'क्रोधो बहुनर्थकारित्वात्सर्वथा त्याज्यः' इत्यक्रोधं क्रोधाभावमन्यैः प्रयोज्यैः शिक्षयन्ति । अन्ये क्रोधाभावं शिक्षन्ते, तान् क्रोधो न कार्य इति प्रयोजयन्त्युपदिशन्तीति यावत् । स्वयं तु क्रुद्धा यत्किंचिदाचरन्ति अन्यांस्त्वेतदुपदिशन्तीत्युपहासः । तथा—येऽतिनिर्धनास्ते धनायैव स्वस्य धनप्राप्त्यर्थमेव लोहादिधातूनां संबन्धिनं वादं स्वर्णं वयमन्योन्यमिलितानामज्ञानेन धातूनां संयोगात्स्वर्णरूप्यादि यदा कर्तुं शक्यते, तदुपदेशात्त्वमपि कुर्वित्येवंरूपं धातुवादमुपदिशन्ति एवंशीला भवन्ति । परं तु स्वस्मै किंचित्तेन दातव्यमित्येवं परप्रतारणबुद्ध्यैव ननु तत्त्वतः । यतः स्वयं निर्धनाः । इति हेतुः । तादृक्सामर्थ्यसद्भावे तेषामधनत्वं न युज्यते । ततश्च 'यः स्वयमतीर्णः स कथं परांस्तारयति' इत्यनेन धातुवादिनामप्युपहासः । अन्यैः प्रयोज्यकर्तुरनभिहितत्वात्कर्तरि तृतीया । क्रोधनाः, 'क्रुधमण्डार्थेभ्यश्च' इति युच् ॥

इदानीं दानधर्मं दूषयति—

किं वित्तं दत्त तुष्टयमदातरि हरिप्रिया ।
दत्त्वा सर्वं धनं मुग्धो बन्धनं लब्धवान्बलिः ॥ ८१ ॥

किमिति ॥ भो जनाः, यूयं वित्तं सत्पात्रे यज्ञादौ दक्षिणात्वेन याचकेभ्यः किमिति दत्त । अपि तु—कस्मैचिदपि न देयम् । यस्माद् इयं हरिप्रिया विष्णोः प्रेयसी संपद्रूपा लक्ष्मीरदातरि अकृतदानोपभोगे कृपणे तुष्टा प्रीतिं प्राप्नोति । तत्रैव वसतीत्यर्थः । दाने बाधकमाह—यस्मात् मुग्धो मूढो दानव्यसनपरः, दर्पोद्रेकनिवारणक्षमः स्वपितृपूर्वजादौ प्रह्लादादौ प्रसन्नो बलिः सर्वं धनं श्रीवामनाय दत्त्वा बन्धनं लब्धवान् । वामनादेव बद्धः सन्पाताललोकनिवासरूपं बन्धनं प्राप्तवानिति पुराणकथा । दानं कर्तव्यमित्यत्र स्वस्यानिष्टेनैव प्रमाणम् । दानमनुमोदकं जातमित्यत्रापि तदेव प्रमाणम् । तथा च—कर्तुरन्यत्रानुमानादिरूपेऽपि दानविषये हानि विरुद्धफलदर्शनात् अदातरि च लक्ष्म्याः स्थैर्यदर्शनादन्वयव्यतिरेकाभ्यां दानधर्मः सर्वथा

त्याज्य एवेत्युक्तमिति भावः। हरिरिमिगेलानेन श्रीहरिणाऽपि यानकलत्रीकाराल्लक्ष्मीप्रीत्यर्थं दातृत्वमेवाङ्गीकृतमिति च सूचितम् ॥

पात्राभावाद्दानं न कर्तव्यमित्याह—

दोग्धा द्रोग्धा च सर्वोऽयं धनिनश्चेतसा जनः।
विसृज्य लोभसंक्षोभमेकद्वा यद्युदासते ॥ ८२ ॥

दोग्धेति ॥ अयं प्रत्यक्षग्रहणयोग्यः सर्वोऽपि जनो धनिन आढ्यान्नरान्दोग्धा दोहनशीलः। स्वामिभक्तदानादिविध्युपदेशादिना येन केनाप्युपायेन धनिकेभ्यो धनमाकर्षतीत्यर्थः। तथा—द्रोग्धा मनसा तद्विषये द्रोहकरणशीलश्च। कथमेनं हन्याम्, एतस्य धनादि च कथं गृह्णीयामित्यादिप्रकारेण तद्विषये द्रोहमेव चिन्तयतीत्यर्थः। ननु सर्वोऽप्येवमिति कथमुच्यत इत्यत आह—लोभसंक्षोभं द्रव्याद्यभिलाषजनितं मनसो नितरां क्षोभं कार्पण्यपारवश्यलक्षणं विकारमभिलाषातिरेकं वा विसृज्य यद्युदासत उदासीना भवन्ति परस्वापकर्षणादेरुपरता भवन्ति तर्हि एकद्वा एको द्वौ वा, न तु तृतीयः। तादृशस्त्वल्पीयान् तस्माद्युक्तमेवोक्तमित्यर्थः। तत्त्वात्परप्रतारणप्रयोजनक एव दानधर्माद्युपदेश इति भावः। परप्रतारकत्वात्पात्रत्वाभावाद्दानं न कर्तव्यमित्यर्थः। 'विपक्ष' इति पाठे लोभातिरेकं बलान्निरुध्येत्यर्थः। दोग्धा, द्रोग्धा, ताच्छील्ये तृन्। तद्योगे च 'न लोका–' इति षष्ठीनिषेधाद्धनिन इति द्वितीया। एको द्वौ वा एकद्वाः, 'संख्ययाव्यया–' इत्यादिना बहुव्रीहौ 'बहुव्रीहौ संख्येये' इति डच् समासान्तः ॥

इदानीं विधिनिषेधजातं दूषयन्नुपसंहरति—

दैन्यस्यायुष्यमस्तैन्यमभक्ष्यं कुक्षिवञ्चना।
स्वाच्छन्द्यमृच्छतानन्दकन्दलीकन्दमेककम् ॥ ८३ ॥

दैन्यस्येति ॥ अस्तैन्यं चौर्याभावो दैन्यस्य निर्धनत्वस्यायुष्यम्। वर्धकमित्यर्थः। चौर्यं यावन्न क्रियते तावद्दैन्यं नापयाति। तस्मात्तत्कर्तव्यमेवेति भावः। तथा—अभक्ष्यं लशुनगृञ्जनग्राम्यसूकरादि। तद्वर्जनमिति यावत्। तत्कुक्षिवञ्चना स्वोदरविप्रलम्भनमेव स्वादुतमभक्ष्यपरिहारे जठरवञ्चनैव भवति, न तु स धर्मः। तस्मात्किं बहुना—आनन्दस्य सकलसुखस्य कन्दलीकन्दं प्ररोहमूलभूतमेकमसहायं केवलं स्वाच्छन्द्यं स्वेच्छाचारित्वमृच्छत आश्रयत। श्रौतस्मार्तसकलनिषेधान्परित्यज्य सर्वसुखहेतुत्वात्स्वेच्छाचारमेव कुरुतेत्युपदेशानसत्समाकर्णयतेति भावः। आयुष्यं, 'तस्मै हितम्' इति यत्। अस्तैन्यं, स्तेनशब्दात् 'स्तेनाद्यन्नलोपश्च' इत्यत्र 'स्तेनाद्' इति योगविभागात्ष्यञि अर्थाभावेऽव्ययीभावः। एवमभक्ष्यमित्यत्रापि। 'विन्दत' इति वा पाठः। 'विदॢ लाभे' लोट् ॥

इत्थमाकर्ण्य दुर्वर्णं शक्रः सक्रोधतां दधे।
अवोचदुच्चैः कस्कोऽयं धर्ममर्माणि कृन्तति ॥ ८४ ॥

इत्थमिति ॥ शक्र इत्थं पूर्वोक्तं दुर्वर्णं वेदादिदूषकं चार्वाकस्य दुष्टवर्णवाक्यमाकर्ण्य सक्रोधतां दधे। सकोपोऽभूदित्यर्थः। अनन्तरमुच्चैर्नितरां तारस्वरमित्यवोचत्। इति किम्—एतेषु मध्ये अनिश्चितरूपोऽयं कस्कः श्रुत्यादिमूलानि धर्मरहस्यभूतानि मर्माणि वेददूषणात्कृन्तति छिनत्ति। कोऽयं कोऽयमेवं भाषत इति वक्तृविशेषनिश्चयाय कोपाभिव्यञ्जकसंभ्रमोक्तौ कस्कशब्दः कस्कादित्वात्साधुः ॥

ब्राह्मणी इत्यादिप्रकारेण रूढायाः स्त्रियाः गन्ता कामुकस्तां भुञ्जानो नरो दिव्ये जयं न ईशते पश्यतीति यत् । न प्राप्नोतीत्यर्थः । तज्जयानीक्षणमेव कर्त्रशेषस्य वर्णेनंशल ब्राह्मणादिवर्णसङ्घस्य मातापित्रादिपरम्परया विशुद्धिं नितरां निर्दोषत्वं शंसति कथयति। ब्राह्मणीव्यभिचारी नरो ब्राह्मणोऽहं ब्राह्मणीं नागममिति प्रतिज्ञाय यदा दिव्यं करोति तदा स पराजयत एवेति तावत्प्रत्यक्षम्, तथाच गम्याया गन्तुश्च पारदार्यादिदोषदूषितत्वेऽपि तन्मातापित्रादिपरम्परया ब्राह्मण्यादिविशुद्धिस्तत्पराजयेनैव स्पष्टं कथिता । यदि जातेः शुद्धिर्नाभविष्यत्, तर्ह्येवं प्रतिज्ञायां कृतायामपि तयोर्ब्राह्मणत्वाभावाद्भङ्गो नाभविष्यत् । स तु दृश्यत इति भङ्ग एवान्यथानुपपत्त्या जातिशुद्धौ प्रमाणमित्यर्थः । ब्राह्मणादिव्यभिचारिण्यपि पराजयत एवेति तस्या अप्येतदुपलक्षणं ज्ञेयम् । प्रसिद्धाया इत्यनेन जातेरनपलापनीयत्वं सूचितम्। ब्राह्मण्यादिप्रसिद्धाया गन्ता ना पुरुषो यदजयं भङ्गमीक्षते तद्भङ्गेक्षणमिति वा व्याख्या। गन्तेति तृच् । अन्यथा 'न लोका–' इति षष्ठ्यभावः स्यात् । 'प्रसिद्धायाम्' इति पाठे विषयसप्तमी । अन्या व्याख्या क्लिष्टत्वादुपेक्ष्या ॥

इदानीं संवादादपि वेदस्य प्रामाण्यमित्याह—

जलानलपरीक्षादौ संवादो वेदवेदिते ।
गलहस्तितनास्तिक्यां धिग्धियं कुरुतेऽनते ॥ ८८ ॥

जलेति ॥ हे चार्वाक, वेदेन वेदिते बोधिते वेदमूले जलानलयोः, ताभ्यां वा, या परीक्षा शुद्धत्वनिश्चयः स आदिर्यस्य तुलादिव्यादेस्तादृशेऽर्थे संवादो यथोक्तदर्शनरूपः स ते तव धियं बुद्धिं गलहस्तितं बलान्निर्वासितं नास्तिक्यं यस्यास्तां न कुरुते धिक् । वाक्यार्थः कर्म । अनुचितमेतदित्यर्थः । जलदिव्ये हि जलमग्नः पुरुष आकर्णपूर्णपुरुषमुक्तशरप्रत्यानयनमपेक्षमाणो यद्यनानीते शरे उन्मज्जति, तर्ह्यवाशुद्धः । आनीते तु शुद्ध इति वेदोक्तजलदिव्यम् । तच्च तथैव दृश्यत इति संवादः । वह्निदिव्ये तु तप्तलोहादौ दाहादाहाभ्यामशुद्धिशुद्धी इत्यप्युक्तं वेदेन । तत्रापि संवादः । तस्मिन्प्रामाण्यहेतौ संवादे सत्यपि नास्तिक्यं न जहासीत्याश्चर्यम् । मूर्खतरोऽसीति भावः । तव धिग्धियं निन्द्यां बुद्धिं निराकृतनास्तिक्यां न कुरुते इति वा तव धियं धिक् निन्द्यां न कुरुते अपि तु करोत्येव । दूषयतीत्यर्थः । तव धियं न धिक्करोति, अपि तु धिक्करोत्येवेति वा । यतो निराकृतनास्तिक्यामित्युभयत्रापि हेतुगर्भम् । संवादेन नास्तिक्यापनयात्स्वरूपहानेर्धिक्कार एव कृत इत्यर्थः । जलानलपरीक्षादौ ते तवापि यतः संवादः संप्रतिपत्तिरस्ति । तेन कारणेन संजातगलहस्तमालिङ्गितकण्ठं नास्तिक्यं यस्यां तां स्वीकृतनास्तिक्यां बुद्धिं त्वं धिक्कुर्वित्यर्थ इति वा । अत्र गलहस्तशब्दः परिरम्भपरः । यतस्तवापि संवादोऽस्ति । तेन स्वीयां धिग्धियं नास्तिक्यवादाद्दुष्टां बुद्धिं निर्वासितनास्तिक्यां कुर्विति वा । कुत्सिता रुतिः शब्दो यस्य तत्संबोधनं कद्रुद । तथा—अविद्यमाननतेऽविनीत चार्वाक वैदिके जलानलपरीक्षादौ यस्मात्संवादोऽस्ति तस्मादाश्लिष्टनास्तिक्यां नास्तिकमतिं धिक् । सा निन्द्येत्यर्थ इति यत्तदोः संबन्धेन वा व्याख्येयम् । नास्ति मतिरस्येत्यर्थे 'अस्ति नास्ति दिष्टं मतिः' इति ठकि नास्तिकः । मतिः परलोकविषया । तद्भावो नास्तिक्यम् । ब्राह्मणादित्वात्ष्यञ् ॥

पुत्रेति ॥ भो नास्तिकाः, पुत्रप्राप्त्यर्थं विहितः पुत्रफलको यागः पुत्रेष्टिः, 'श्येनेनाभिचरन्यजेत' इति वेदवाक्यविहितः श्येनसाधनकोऽभिचारफलको यागः श्येनः, तथा— 'कारीरीं निर्वपेद्वृष्टिकामः' इति वंशाङ्कुरसाधनको वृष्टिफलको यागः कारीरीत्युच्यते, एते यागा मुखनादिर्येषां ते, तथा दृष्टं प्रत्यक्षानुभूयमानमुत्पन्नपुत्रवैरिमारणजलवर्षणादिरूपं फलं प्रयोजनं येषां ते मखाः वो नास्तिकानां युष्माकं धर्मोऽस्ति नास्ति वेति धर्मसंबन्धी संदेहो वेदवाक्यविहितादृष्टफलकयागादिरूपो धर्मस्तत्संबन्धी वा, अदृष्टफलकयागादिविधायकवेदवाक्यान्येव वा धर्महेतुत्वाद्धर्मस्तत्संबन्धी वा यः प्रामाण्याप्रामाण्यसंदेह एव मन्देहाः संध्याद्वये सूर्यप्रत्यर्थमुत्पद्यमानाः षष्टिसहस्र(स्त्रिकाः) सार्धास्त्रिसः कोट्यो राक्षसास्तेषां जये विनाशे भानवः सूर्यरूपा विनाशकाः किं न भवन्ति । एवं दृष्ट्वापि धर्मं न मन्यते विप्रलित्यर्थः । किं न अपि तु भवन्त्येवेति वा । 'तिस्रः कोट्योऽर्धकोटी च मन्देहा नाम राक्षसाः । उदयन्तं सहस्रांशुमभिरुध्यन्ति ते सदा । यावन्ध्या चाभिमन्त्र्योर्ध्वं जलं त्रिः संध्ययोः क्षिपेत् । तेन शाम्यन्ति ते दैत्या वज्रीभूतेन वारिणा' इत्यादिवचनप्रामाण्याद्गायत्र्याभिमन्त्रितजलप्रक्षेपेण तत्क्षयपुरःसरमेव सूर्योदयात्पूर्वं एव तान्विनाशयतीत्युच्यते । यथा च सूर्यो यथा तान्नाशयति, तथा मखैरपि भवद्विषयः संदेहो विनश्य एवेति प्रामाणिकमेव सर्वं जानीहि ॥

दण्डताण्डवनैः कुर्वन्स्फुलिङ्गालिङ्गितं नभः ।
निर्ममेऽथ गिरामूर्मीर्भिन्नमर्मेव धर्मराट् ॥ ९५ ॥

दण्डेति ॥ अथाभिवचनानन्तरं धर्मराड् यमः स्वायुधस्य दण्डस्य ताण्डवनैरितस्ततश्चालनैर्नभः स्फुलिङ्गालिङ्गितमग्निकणाकीर्णं कुर्वन्नद्यतन् चार्वाकवाक्शरैर्भिन्नमर्म निदारितहृदयस्थान इवासहमानो गिरामूर्मीर्वाक्यपरम्परा निर्ममे । अत्र रूपकम् । धर्मपदेन वाक्यनानाविद्ध्-तत्परत्वं सूचितम् । 'ऊर्मिर्वा स्त्रियाम्' इति कोशोऽपि ॥

तदेवाह—

तिष्ठ भोस्तिष्ठ कण्ठोष्ठं कुण्टयामि हठादयम् ।
अपष्ठु पठतः पाठ्यमधिगोष्ठि शठस्य ते ॥ ९६ ॥

तिष्ठेति ॥ भो नास्तिक, तिष्ठ तिष्ठ क्षणं सहस्व सहस्व । धर्मद्रुह्यदिह निरनैषि, अयमहमधिगोष्ठि गोष्ठ्यामिन्द्रादिसभायामपि प्रतिकूलं पाठ्यं पठनार्हं वचनं पठतो [illegible] शठस्य वञ्चकस्याविद्यस्य नास्तिकस्य ते तव कण्ठोष्ठं कण्ठश्चौष्ठौ च [illegible] हठाद्बलात्कारेणैव कुण्टयामि [illegible] करोमि । [illegible] । [illegible] हेतुः । अथ च— [illegible] कण्ठोष्ठं कुण्टयामि कुण्ठं [illegible] करोमि । [illegible] । [illegible] । [illegible] । [illegible], [illegible] ॥

इदानीं श्लोकत्रयेण परलोकं धर्मं च साधयन् 'को हि वेद–' 'तर्काप्रतिष्ठया–' इत्यादेरुत्तरमाह—

वेदैस्तद्वेषिभिस्तद्वत्स्थिरं मतशतैः कृतम् ।
परं कस्ते परं वाचा लोकं लोकायत त्यजेत् ॥ ९७ ॥

वेदैरिति ॥ चतुर्भिर्ऋग्वेदादिवेदैर्यथा स्थिरीकृतम्, तद्वत्तस्य वेदस्य वेपश्छाया तद्युक्तेस्तदंशोपजीविभिर्वेदानुसारिभिर्मतानां शतैः स्मृतिपुराणादिभिर्वादिप्रतिवादिभेदैर्मीमांसाशास्त्रैश्च तथा स्थिरं कृतं निश्चयेन व्यवस्थापितं परं श्रेष्ठम्, अन्यं च स्वर्गादिलक्षणं लोकं हे लोकायत नास्तिकाधम । परं केवलं ते वाचा निर्युक्तिकेन वचनमात्रेण को विद्वांस्त्यजेत् । अपि तु—न कोऽपि । किं तु सर्वैरपि तद्युक्तिभिः परलोकः स्वीकृत एवेत्यर्थः । तदस्तित्वसंदेहापादिनी 'को हि वेद–' इत्यादिश्रुतिस्त्वन्यपरेति भावः ॥

समज्ञानाल्पभूयिष्ठपान्थवैमत्यमेत्य यम् ।
लोके प्रयासि पन्थानं परलोके न तं कुतः ॥ ९८ ॥

समेति ॥ एकस्मिन्मार्गादावर्थे समज्ञानास्तुल्यमतयोऽल्पेऽल्पसंख्या भूयिष्ठा बहुतरसंख्याश्च पान्थास्तेषां वैमत्यं मार्गान्यत्वविरोधमेत्य प्राप्य ज्ञात्वा वा, इह लोके यं पन्थानं त्वमेव प्रयासि परलोकेऽपि विषये तमेव तादृशमेव मार्गं कुतो हेतोर्न गच्छसीति प्रश्नः । अपि तु तमेव गच्छेत्युपदेशो वा । यथा केनचित् 'वामो दक्षिणो वा काशीमार्गः' इति मध्येमार्गं पथिकेषु केषुचित्पृष्टेषु पञ्चपैर्वाममार्गे कथिते सति, पञ्चाशद्भिर्दक्षिणमार्गे कथिते द्वैधे 'बहूनां वचनं ग्राह्यम्' इत्यादिन्यायात्कुशलेन पञ्चाशदुक्तमार्गेणैव गम्यते । एवं परलोकेऽप्यल्पविमतिं निरस्य बह्वनुगत एव मार्गः किमिति नाश्रीयत इत्यर्थः । परलोकमार्गश्च लक्षणया धर्मः, तं कथं न मन्यसे । अपितु तमेवाङ्गीकुरु । परलोकसत्तानिश्चयमपि गन्तव्यग्रामवत्कुर्विति भावः । 'तर्काप्रतिष्ठया–' इत्यस्याप्येतदुत्तरं ज्ञेयम् ॥

बहुसंमतिमेव दर्शयति—

स्वकन्यामन्यसात्कर्तुं विश्वानुमतिदश्वनः ।
लोके परत्र लोकस्य कस्य न स्याद्दृढं मनः ॥ ९९ ॥

स्वकन्यामिति ॥ स्वकन्यामात्मपुत्रीमन्यसात्कर्तुमन्यस्मै वराय अधीनां देयां कर्तुं विश्वेषां सर्वेषां श्रुतिस्मृतिपुराणादीनां लोकानां चानुमतिं दृष्टवतोऽनुभवतः, तथा कुर्वतश्च कस्य लोकस्य जनस्य परत्र लोके स्वर्गादौ मनो दृढं निःसंदेहं निश्चलं न स्यात् । अपितु सर्वस्यापि स्यादेव । न केवलमन्यस्यैव, किंतु चार्वाकस्य तवापीत्यर्थः । सर्वेऽपि परलोकलवधिया स्वकन्यामन्यस्मै ददति । यदि परलोको नाभविष्यत्, तर्हि स्वपुत्रीमप्यन्यस्मै कश्चिन्नदास्यत् । अयमाचारः सर्वेषां संमतः । स च त्वयाप्यन्यस्मै पुत्रीदानादङ्गीकृत एव । अन्यथा स्वपुत्र्याः स्वेनैव ग्रहणमापद्येत । तस्मादन्येषामनुमतिं गृहीत्वैव यथा कन्याऽन्यस्मै दीयते, तथा बहुसंमतिदर्शनात्परलोकमप्यङ्गीकुर्विति भावः । अन्यसात्, 'देये त्रा च' इति सातिः । दृश्वेति पूर्ववत् ॥

श्लोकद्वयेन 'श्रुतिस्मृत्यर्थबोधेषु–' 'तर्काप्रतिष्ठया–' इत्यादेरुत्तरमाह—

कस्मिन्नपि मते सत्ये हताः सर्वमतत्यजः ।
तद्दृष्ट्या व्यर्थतामात्रमनर्थस्तु न धर्मजः ॥ १०० ॥

कस्मिन्निति ॥ धर्मपरलोकादिप्रतिपादनपराणां बहूनां मतानां मध्ये कस्मिंश्चित्कस्मिन्नपि मते सत्ये सत्यत्वेनाङ्गीकृते सति सर्वमतत्यजः सर्वमतत्यागिनः परस्परविरोधात्सर्वमतास-त्यत्ववादिनो नास्तिका यूयं हता मारिताः । तत्रायमभिसंधिः—मतानामसत्यत्ववादिभिः किंचिन्मतं सत्यमङ्गीक्रियते न वा । चेदङ्गीक्रियते तर्हि कस्यापि कन्यादानादिप्रतिपादकस्या-न्यमतस्य स्वीयमतस्यैव वा सत्यत्वाङ्गीकारात् 'सर्वमप्रमाणम्' इति सर्वासत्यत्ववादिनो व्याघा-तापसिद्धान्ताभ्यां दूषिता एवेति वैदिकसिद्धान्तो निर्दोष इत्यायातं न वेति । पक्षे—नास्तिकमतस्याप्यसत्यत्वादसत्यभूतस्य दूषकत्वाभावान्निर्दोषो वैदिकः पक्षः सिद्ध एवेत्यपि नास्तिका दूषिताः । निर्दोषत्वेऽपि वैदिकपक्षानङ्गीकारे स्वपक्षोऽपि तैर्नाङ्गीकार्य इति ज्ञेयम् । एवंच तस्यैकस्य मतस्य दृष्ट्या सत्यताज्ञानेनोभयवादिसिद्धतया पुत्रेष्ट्यादौ पुत्रजन्मादिफलसिद्धौ सत्यां यत्र क्वचित्फलव्यभिचारः, तत्र कर्मणो वैकल्याद्व्यर्थतामात्रं वैयर्थ्यमात्रं फलसाधनत्व-राहित्यमात्रम् । तु पुनः अधर्मः प्राचीनपुत्रवियोगादिरनर्थो दुःखराशिर्धर्मजो न पुत्रेष्ट्यादि-धर्मजन्यो न भवति । विपरीतं तु धर्मेण न जन्यते, किंतु प्राचीनदुष्कर्मनिमित्तमेव । केवलं तु काकतालीयन्यायेन तस्य पुत्रेष्ट्याद्यनन्तरभावित्वम् । नच तावतैव तत्कार्यत्वमविच्छाते-रित्यर्थ इत्यादि ज्ञातव्यम् । कस्मिन्नपि मातृगमनादिनिषेधे स्वकन्यादानादौ च विषये वैदिके मते सत्ये सति तस्मिन्नंशे सत्यत्वेऽङ्गीकृते सति सर्वमतमसंगतमिति वदन्तो नास्तिका हताः । मातृगमननिषेधादेरंशस्य भवद्भिरपि परिपालनादित्यर्थः । तथाच तद्दृष्ट्या कन्यादान-मातृगमननिषेधरूपाणां सत्यानां विधिनिषेधांशानां दृष्टान्तेनान्यत्रांशे व्यर्थतामात्रं वचनमा-त्रेण व्यर्थमित्युच्यते । ननु धर्मजो वास्तवोऽनर्थः प्रयोजनाभावः । तद्दृष्टान्तेन व्यर्थतामात्रम्, अन्यमात्व्यर्थतैवेत्यलमतिप्रसङ्गेन ॥

उपसंहरति—

क्वापि सर्वैरवैमत्यात्पातित्यादन्यथा क्वचित् ।
स्थातव्यं श्रौत एव स्याद्धर्मे शेषेऽपि तत्कृतेः ॥ १०१ ॥

क्वापीति ॥ सर्वैर्नास्तिकैरपि क्वापि कस्मिंश्चिदहिंसाकन्यादानादौ श्रौते वेदोक्त एव धर्मे स्थातव्यं वर्तितव्यम् । कुतः—अवैमत्यात् । सर्वेषामिति शेषः । श्रौतानां बौद्धाद्यनेका-र्थीनामपि संप्रतिपत्तेः । अहिंसादेस्तैरप्यनिषिद्धत्वादङ्गीकृतत्वादित्यर्थः । [illegible] वा । तथा—क्वचित्[illegible]विहितेऽन्यथाकरणे निषिद्धाचरणे पातित्यदोष[illegible]निषे-धपरमद्यपानगमनादावपि श्रौत एव धर्मे स्थातव्यम् । अन्यथा वैमत्येऽपि श्रौत एव क्वचित्त-त्रिषिद्धे स्थातव्यम् । कुतः—पातित्यात् । यत्र तु श्रौते धर्मे तेषां [illegible]-त्वरेऽपि प्रत्यवायः स्यादित्यङ्गीकार्य एवेत्यर्थ इति वा । एवं शेषेऽपि [illegible]-मतिरिक्ते कर्मणि [illegible] स्थातव्यम् । कुतः—[illegible] वेदस्य कृतेः करणात् । वेदविहितत्वाविशेषादित्यर्थः । यद्वा—[illegible] धर्मे स्याद-

व्यम्। सदाचारानुमितस्मृत्या श्रुतेरनुमानात्स्मार्तधर्मा अपि वेदमूला इति तेऽप्यङ्गीकर्तव्या इत्यर्थः। एतेन 'जनेन जानता-' इति 'एकस्य विश्वपापेन-' 'खं च ब्रह्म च-' इत्यादेः सर्वस्याप्युत्तरं दत्तम्। धातुवादादिकं प्रामाणिकमेव, असिद्धिस्तु साधनवैगुण्यादिति समर्थितमिति ज्ञेयम्। 'तत्कृते' इति पाठे हेतुगर्भविशेषणम्। तस्मान्न मतानामप्रामाण्यम्। श्रुतिस्मृत्योश्चैकमत्यमप्यविरुद्धमिति श्लोकद्वयतात्पर्यार्थः। अहिंसादयः स्मृत्युक्ताः सर्वसाधारणा धर्माः, तेषु क्वापि श्रौते च धर्मे स्थातव्यम्। पातित्यादित्युभयत्रापि हेतुः। सर्वेषामनुमते विहिते चेन्न स्थीयते तर्हि 'विहितस्याननुष्ठानात्' इति स्मृतेः पातित्यम्। सर्वेषां विमते निषिद्धे चेत्स्थीयते तथापि 'निन्दितस्य च सेवनात्' इति स्मृतेः पातित्यमित्यर्थः। तथा च विहितानां केषांचिद्बुद्धिरप्यनुष्ठानात्, निषिद्धानां केषांचिद्बुद्धिरपि वर्जनात्तद्दृष्टान्तेनान्येष्वपि विधिनिषेधांशेषु तत्कृतेः श्रौतत्वाविशेषादेव हेतोः स्थातव्यम्। तेऽपि प्रामाणिकत्वेन स्वीकार्या इत्यादि ज्ञातव्यम्॥

> बभाण वरुणः क्रोधादरुणः करुणोज्झितम्।
> किं न प्रचण्डात्पाखण्डपाश पाशाद्बिभेषि नः॥ १०२॥

बभाणेति॥ क्रोधादरुणो रक्तकायकान्तिर्वरुणः करुणयोज्झितं वचो नितरां परुषं यथा तथा बभाण। हे पाखण्डपाश नास्तिकाधम, त्वं नोऽस्माकं प्रचण्डाद्दुःसहात्पाशान्न बिभेषि किम्। कुत्सायां 'याप्ये पाशप्' इति पाशप्प्रत्ययः॥

> मानवाशक्यनिर्माणा कूर्माद्यङ्कबिला शिला।
> न श्रद्धापयते मुग्धास्तीर्थिकाध्वनि वः कथम्॥ १०३॥

मानवेति॥ मानवैर्मनुष्यैरशक्यं निर्माणं यस्याः, तथा—कूर्मवराहनरसिंहादयोऽङ्काश्चिह्नानि येषामेवंविधं बिलं विवरं यस्याः सा शिला गण्डकाख्यतीर्थविशेषसंभवा शालग्रामशिला भो मुग्धा मूर्खाः, तीर्थिकाध्वनि सेश्वरमार्गे वैदिकाध्वनि वा वो युष्मान्कथं न श्रद्धापयते आस्तिक्यं न प्रापयति। चित्रमेतत्। भवतां मूर्खतरत्वमित्यर्थः। मनुष्यैरशक्यरचनं सावयवत्वेन कार्यं शिलादि स्वनिर्माणशक्तमिच्छामात्रेण कर्तारं मनुष्याद्विलक्षणमीश्वरमाक्षिपति। 'विमतं सकर्तृकं कार्यत्वाद्घटवत्' इत्यनुमानात्पक्षधर्मताबलाद्विलक्षणे कर्तरीश्वरे सिद्धेऽपि कथमनाश्वास इत्याशयः। एतेन 'देवश्चेदस्ति सर्वज्ञः-' इत्यादेरुत्तरं दत्तमिति ज्ञेयम्॥

> शतक्रतूरुजाद्याख्याविख्यातिर्नास्तिकाः कथम्।
> श्रुतिवृत्तान्तसंवादैर्न वश्चमदचीकरत्॥ १०४॥

शतेति॥ भो नास्तिकाः, शतक्रतुश्च श्रीविष्णोरूरुभ्यां जायत इत्यूरुजो वैश्यः स आदिर्यो वा येषां ते ब्राह्मणादिवर्णाश्च तेषामाख्या शतक्रतुः, मुखजो बाहुज ऊरुज इत्यादीनि नामानि तेषां सर्वत्र विशेषेण ख्यातिः कर्त्री श्रुतिवृत्तान्तसंवादैर्वेदोक्तेतिहासैः करणैर्वो युष्मान्कथं न चमदचीकरच्चमत्कारं नाकारयत्। अपि त्वाश्चर्यं भवतां तयोत्पाद्यम्। चमदित्यव्ययमाश्चर्यार्थे। 'शताश्वमेधक्रतुकारीन्द्रो भवति' इतीन्द्रस्यैव शतक्रतुत्वं वेदेनोक्तम्। लोकेनापीन्द्र एव शतक्रतुत्वेन व्यवह्रियते नतु वह्न्यादिरिति। तथा—'ब्राह्मणोऽस्य मुखमासीत्-' इत्यादिश्रुत्या 'ब्राह्मणक्षत्रियादीनां मुखजत्वबाहुजत्वाद्युक्तम्। लोकेनापि ब्रह्मक्षत्रादय

एव मुखजलबाहुजलादिभिर्व्यवह्रियन्ते, ननु विपर्ययेणेति वेदोक्तेन सह लोकस्यानुभूयमानात्संवादादपि वेदे यथोक्तं तथैव लोको व्यवहरत्याश्चर्यमेतदित्याश्चर्यपूर्वं वेदप्रामाण्यं कथं न विश्वसितेति, अपितु विश्वसनीयं तत्रेत्याशयः । करजपदं वृत्तानुरोधात्प्रयोजि । तथा च सर्वेऽपि वर्णाः संगृहीताः । विरुद्धाभिः प्रयोजिका संवादैः प्रयोज्यैर्वो युष्माकं च नदाश्चर्यं कथं न कारयामासेति वा । शतक्रतुश्च कल्ययोनिशौ च तदादिवैहिर्नैनकेत्यादिराख्या येषां यासां च वह्न्यादीनां नैनकादीनां च तेषां प्रतिदिनैर्वेदवृत्तान्तसंवादैर्हेतुभिर्युष्माकं कथमाश्चर्यं नाचीकरत् । लोकवेदप्रसिद्धानिन्द्रादीनुर्वस्याद्यप्सरसश्चैतान्सर्वान्प्रत्यक्षेणात्रैव पश्यतेत्यर्थः । ततश्च वेदः, तन्मूलं परलोकादि च प्रामाणिकमेवेति भाव इति वा । प्रथमव्याख्याने व इति 'हृक्रोः–' इत्यणौ कर्तुर्णौ कर्मत्वम्, चकारादिति च कर्मान्तरम्, संवादैरिति करणे तृतीया । पक्षान्तरे तु तेनैव सूत्रेणाणौ कर्तुः कर्मत्वस्य वैकल्पिकत्वेन कर्मत्वाभावादनभिहिते कर्तरि संवादैरिति तृतीया, व इति षष्ठी ॥

तत्तज्जनकृतावेशान्गयाश्राद्धादियाचिनः ।
भूताननुभवन्तोऽपि कथं श्रद्धत्थ न श्रुतीः ॥ १०५ ॥

तदिति ॥ तेषु तेषु जनेषु कृतावेशान्कृतसंचारान्, तथा—गयाश्राद्धादियाचिनो गयापिण्डदानादिपुण्ये याचतः प्राप्तप्रेतभावान्भूतान्प्राणिनोऽनुभवन्तोऽपि पश्यन्तोऽपि यूयं श्रुतीः कथं न श्रद्धत्थ सत्यत्वेन न मन्यध्व इति । पौनरुक्त्यं न शङ्कनीयम्, भिन्नवक्तृत्वात् । एवमुत्तरत्रापि ज्ञेयम् ॥

नामभ्रमाद्यमं नीतानथ स्वतनुमागतान् ।
संवादवादिनो जीवान्वीक्ष्य मा त्यजत श्रुतीः ॥ १०६ ॥

नामेति ॥ नामभ्रमाद्यमदूतैर्यमं नीतान्प्रापितानथ मुक्तत्वात्प्रत्याहृत्य स्वतनुमागतान्प्राप्तान्संवादं 'चन्द्रः क्षयी–' इत्यादिवेदसंवादं वदन्स्तेनैवंशीलान्प्राणिनो वीक्ष्य श्रुतीर्वेदान्मा त्यजताप्रामाणिकान्मा ब्रूत । एवं वेदप्रामाण्योपसंहारस्तन्मूलत्वादेरपि वेदमूलत्वात्तदुक्तधर्मादीनां प्रामाण्यं व्यवस्थापितम् ॥

संरम्भैर्जम्भजैत्रादेस्त्रस्यन्नानाद्दलाद्दलन् ।
मूर्धबद्धाञ्जलिर्देवानथैवं कश्चिदूचिवान् ॥ १०७ ॥

संरम्भैरिति ॥ अथ देववचनानन्तरं जम्भजैत्रः शक्र आदिर्यस्य इन्द्रानलादीनां संरम्भैर्भ्रूभङ्गाद्याकारविकारैर्भीतेन कलिना पुरःस्थितुं त्रस्यन्नानाविधिप्रयत्नानिन्द्रादिसंरम्भान्दृष्ट्वा भयात्तत्संमुखं गच्छन्नपि चलितुमशक्यद्रुततरमितस्ततश्चलन्नुपरितनकम्पितयाऽनिश्चलान्य भिन्नानि पदानि संमुखगमनेऽनिच्छयैव तत्पुरःसरं शक्रादिनमस्कारार्थं मूर्ध्नि बद्धाञ्जलिः कश्चिदज्ञातनामा पापपुरुषेणाज्ञातनाम्ना वा कलेः सेवकेनैवं वक्ष्यमाणप्रकारेण ऊचे ॥

नापराधी पराधीनो जनोऽयं नाकनायकाः ।
कालस्याहं कलेर्बन्दी तच्चाटुचटुलाननः ॥ १०८ ॥

---

१ 'मूर्ध्नि इति क्वचित्पाठः' इति सुखावबोधा ।

नेति ॥ हे नाकनायका इन्द्रादयः, अयं मल्लक्षणो जनोऽपराधी न । यतः पराधीनः । तदेवाह—कलेः कलिनाम्नः कालस्याहं वन्दी स्तुतिपाठकः । अत एव—तस्य चाटुनि प्रियवचनविषये चटुलं प्रियवादि वावदूकं वाननं यस्यैवंभूतः । अथ च—कालस्य कृतान्तरूपस्य । वन्दिनो हि यमाश्रयन्ति तत्प्रियं वदन्ति, न च दण्डार्हाः तस्मादेतत्प्रियं वेदादिभूषणं मया कृतम् । यदि न करोमि तर्ह्ययं दण्डयिष्यतीति परप्रयुक्तत्वान्नाहं दण्ड्यः श्रीमद्भिरिति ॥

इति तस्मिन्वदत्येव देवाः स्यन्दनमन्दिरम् ।
कलिमाकलयांचक्रुर्द्वापरं चापरं पुरः ॥ १०९ ॥

इतीति ॥ देवास्तस्मिंश्चार्वाके इति पूर्वोक्तप्रकारेण वदति भाषमाणे सत्येव स्यन्दनमन्दिरं रथस्थं कलिम्, अपरं द्वितीयं द्वापरं च पुरोऽग्र आकलयांचक्रुर्ददृशुः ॥

संददर्शोन्नमद्ग्रीवः श्रीवहुत्वकृताद्भुतान् ।
तत्तत्पापपरीतस्तान्नाकीयान्नारकीव सः ॥ ११० ॥

समिति ॥ तैस्तैः प्रसिद्धैर्ब्रह्महत्यादिभिर्मूर्तैः पापैः, तत्कारिभिः पुरुषैर्वा परीतः सामन्ताद्व्याप्तः, तथा—उन्नमन्ती दर्शनार्थमुच्चा ग्रीवा यस्यैवंभूतः स कलिः श्रीवहुत्वेन कायकान्तिवाहुल्येन संपद्वाहुल्येन वा कृताद्भुतान्कृताश्चर्यान्नाकीयान्स्वर्गहितान्स्वर्गभवान्वा तानिन्द्रादीन्संददर्श । क इव—नारकीव । यथा ब्रह्महत्यादिकारी आकण्ठं नरके मग्न ऊर्ध्वग्रीवो नरकस्थः पुरुष इव । पापकारित्वादहमेवंरूपः, पुण्यकृत्त्वाच्चैते दीप्रस्वरूपा इति ज्ञातवांश्च । नरकस्थोऽपि देवकायकान्तिदर्शनाज्जायमानसुखोऽनुष्ठितपापकृतपश्चात्तापः सुरानार्ततया पश्यतीत्युपमा । 'उन्नतग्रीवः' इत्यपि पाठः । नाकीयानिति हितार्थे 'तस्मै हितम्' इति, वृद्धत्वाद्भवार्थे 'वृद्धाच्छः' इति वा छः । नारकी, नारकशब्दात् 'अत इनिः' ॥

गुर्वीरीढावलीढः प्रागभून्नमितमस्तकः ।
स त्रिशङ्कुरिवाक्रान्ततेजसेव बिडौजसः ॥ १११ ॥

गुर्विति ॥ प्राग्दर्शनात्पूर्वं इन्द्रादयः के नाम वराका इत्यादिरूपया गुर्व्या महत्या रीढयावज्ञयावलीढो व्याप्तस्तेषु कृतावज्ञोऽपि दर्शनानन्तरं बिडौजस इन्द्रस्य तेजसा आक्रान्तः पराभूतस्तिरस्कृततेजस्कः सन् अवज्ञां त्यक्त्वा स कलिरनम्रमपि बलात्तेनैव शक्रतेजसैव वा नमितो नम्रीकृतो मस्तको यस्यैवंभूतोऽभूत् । इन्द्रादीननमस्कारेत्यर्थः । क इव—त्रिशङ्कुनामा सूर्यवंश्यो नृप इव । स हि सयाजने प्रार्थितेन पुरोधसा वसिष्ठेन निरस्तो गुरोर्वसिष्ठस्यावज्ञां व्याप्तस्तस्मिन्कृतावज्ञः सन्विनतनाद्विश्वामित्रेण सार्वकामिकं कर्तुं याजितस्तत्प्रभावात्सशरीर एव स्वर्गं गच्छन्निन्द्रेऽपि कृतावज्ञः इन्द्रतेजसा पराभूतः स्वर्गाद्भ्रंशित इन्द्रेण नमितमस्तकोऽभूदिति पुराणेतिहासः । 'रीढावमाननावज्ञा—' इत्यमरः ॥

विमुखान्द्रष्टुमप्येनं जनंगम इव द्विजान् ।
पप मत्तः सहेलं तानुपेत्य समभाषत ॥ ११२ ॥

विमुखानिति ॥ ततः [illegible] कलिः सहेलं [illegible] तान्देवान्समभाषत । किंभूतान्—एनं कलिं द्रष्टुमपि न केवलं भाषितुं स्प्रष्टुं [illegible]

नादेदन्तत्वम् । 'नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसंनिधौ । तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥' इति स्मृतेः ॥

द्रोहिणं द्रुहिणो वेत्तु त्वामाकर्ण्यावकीर्णिनम् ।
त्वज्जनैरपि वा धातुः सेतुर्लङ्घ्यस्त्वया न किम् ॥ ११७ ॥

द्रोहिणमिति ॥ द्रुहिणो ब्रह्मा त्वामवकीर्णिनं क्षतव्रतमाकर्ण्य निजाज्ञाभङ्गाद्द्रोहिणं गुरुद्रोहकारिणं वेत्तु । एवं त्वया कृते ब्रह्मा एवं ज्ञास्यतीति यावत् । वाथवा तेन ज्ञातेऽपि तव किं भयमिति सोपहासमाह—त्वज्जनैस्त्वदुपजीविभिः कामक्रोधादिभिरपि धातुः सेतुर्ब्रह्मकृता धर्ममर्यादा लङ्घ्यः । त्वया (पुनः) किं न लङ्घ्यः । त्वदीयाः सेवका अपि ब्रह्माज्ञां लङ्घयन्ति, त्वं लङ्घयसीति किमाश्चर्यमित्यर्थः । यद्वा—त्वज्जनैरपि सेतुर्न लङ्घ्यः, त्वया न लङ्घ्य इति किं वाच्यम्, तदाज्ञालङ्घनमनौचित्यान्न कार्यमित्यर्थ इति काका । 'धाताब्जयोनिर्द्रुहिणः—' इत्यमरः । द्रुह्यत्यसुरेभ्यः । औणादिकः किन् ॥

स्वयंवरं प्रत्यगमने हेत्वन्तरमपि ब्रुवते—

अतिवृत्तः स वृत्तान्तस्त्रिजगद्युवगर्वनुत् ।
आगच्छतामपादानं स स्वयंवर एव नः ॥ ११८ ॥

अतीति ॥ एकं विना सर्वपरित्यागस्त्रिजगत्सु वर्तमानानां तरुणानां सौन्दर्यादिविषयं गर्वं नुदतीति नुत् नाशकः स वृत्तान्तो भैमीस्वयंवरोऽतिवृत्तोऽतिक्रान्तः । संजात इत्यर्थः । भवद्भिः कथं ज्ञातमित्यत आहुः—स स्वयंवर एवागच्छतां नोऽस्माकमपादानं निश्चलोऽवधिभूतोऽर्थ इत्यर्थः । वयमपि तत्र गतास्तत एवागच्छाम इति सर्वोऽपि वृत्तान्तोऽस्माभिर्ज्ञात इत्यतोऽपि त्वया न तत्र गन्तव्यमिति भावः । विश्लेषे चञ्चलं स्थिरं वा यदुदासीनं तदपादानमिति वैयाकरणाः ॥

कथं यूनां गर्वनोदः, को वा तया वृत इत्याशङ्कायामाहुः—

नागेषु सानुरागेषु पश्यत्सु दिविषत्सु च ।
भूमिपालं नरं भैमी वरं साऽववरद्वरम् ॥ ११९ ॥

नागेष्विति ॥ नागेषु वासुकिप्रभृतिषु सानुरागेष्वस्मदादिषु दिविषत्सु देवेषु च पश्यत्सु सानुरागां भैमीं स्वीयार्तिद्योतनपूर्वं विलोकयत्सु सत्सु । अथवा—अस्मदन्येषु देवेषु सानुरागेष्वस्मदादिषु कौतुकवशादेव पश्यत्सु तान्सर्वाननादृत्य सा भैमी नागाद्यपेक्षया वरं सर्वगुणाश्रयत्वाच्छ्रेष्ठं भूमिपालं सार्वभौमं नरं नृवरं वरं परिणेतारमववरद्वरयामास । सर्वानादरेण नलवरणात्सर्वेषां सौन्दर्यादिदर्पो गत इत्यर्थः । पश्यत्सु दिविषत्स्वित्यनेनास्माभिः कौतुकार्थं वरदानार्थमेव च गतम्, न तु तद्वरणार्थमिति च व्याख्यान्तरेण सूचितमिति ज्ञेयम् । नागेष्वित्यादौ 'षष्ठी चानादरे' इति सप्तमी । अववरत्, 'वर ईप्सायाम्' इति चुरादावदन्तपाठात्तदार्थणिजन्ताद्वरयतेश्चङ्यल्लोपित्वात्सन्वद्भावाभावादित्वदीर्घत्वाभावः ॥

---

१ 'त्वया तु किम्' इति पाठे 'त्वया पुनर्लङ्घ्य इति किं वाच्यम्' इति सुखावबोधा । २ 'अपाये यदुदासीनं चलं वा यदि वाचलम् । ध्रुवमेवादतावेशात्तदपादानमुच्यते ॥' इति हर्युक्तेः ।

किमिति ते परित्यक्ता इत्याशङ्कायां कारणमाहुः—

भुजगेशानसद्देशान्वानरानितरान्नरान् ।
अमरान्पामरान्भैमी नलं वेद गुणोज्ज्वलम् ॥ १२० ॥

भुजगेशानिति ॥ भैमी भुजगेशान्वासुकिप्रमुखान्फणागणजिह्वालोलनादिवैरूप्यादसद्देशानमनोहराकारान्वेद जानाति । तथा–इतरान्नलादन्यान्नरान्मनुजाधीशांश्चापत्यान्निर्गुणत्वान्वानरान्वेद । तथा–अमरानचतुरत्वात्पामरान्नीचान्वेद । केवलं नलमेव गुणोज्ज्वलं श्रुतशौर्यौदार्यसौन्दर्यादिभिः प्रकाशमानं वेद । सर्वगुणाकरत्वान्नल एव तया वृतोऽन्ये तु परित्यक्ता इत्यर्थः । 'विवर्णः पामरो नीचः' इत्यमरः । वेदेतीदानीमपि तथैव प्रतीतेः सत्त्वाद्वर्तमानता, विभक्तिप्रतिरूपको निपातो वा । तथा चाज्ञासीदित्यर्थः ॥

इति श्रुत्वा स रोषान्धः परमश्चरमं युगम् ।
जगन्नाशनिशारुद्रमुद्रस्तानुक्तवानदः ॥ १२१ ॥

इतीति ॥ चरममन्त्यं युगं स कलिः इतीन्द्रादिवचनं श्रुत्वा परमोऽत्युत्कृष्टो रोषान्धो रोषान्नितरां निर्विचारतया पुरःस्थमपि वस्त्वजानन्, अत एव—जगन्नाशसंबन्धिनी निशा । यस्यां निशि जगन्नाशो भवतीति यावत् । तत्संबन्धी प्रलयकाले सकलभूतग्रासलालसावशो रुद्रस्तद्वदुद्रा आकारो यस्य । क्रोधवशान्नितरां विकृताकार इति यावत् । एवंभूतः संस्तान्सुरानदो वक्ष्यमाणमुक्तवान् ॥

'पुनर्वक्ष्यति मा नैवम्' इत्यादेरुत्तरमाह—

कयापि क्रीडतु ब्रह्मा दिव्याः स्त्रीर्दीव्यत स्वयम् ।
कलिस्तु चरतु ब्रह्म प्रैतु वातिप्रियाय वः ॥ १२२ ॥

कयेति ॥ हे देवाः, ब्रह्मा कयाप्यतिसुन्दर्या गायत्र्यादिपदवाच्यया । अज्ञातनामजाति-गोत्रया वा । अथ च–अगम्यत्वादस्या नामकथनेऽप्यलीकं लज्जा भवति तया सुतया । सह सुखेन क्रीडतु । तथा—यूयं स्वयमात्मना दिव्याः स्त्रीः स्वर्गभवाः रम्भाद्याः । अहल्यातुल्या वा । रमणीर्दीव्यत स्वेच्छया ताभिः सह सुरतक्रीडां कुरुत । 'प्रजापतिः स्वां दुहितरमभ्यधा-वत्' इति श्रुत्या ब्रह्मणः स्वाच्छन्द्यात्प्रबलां सुतरां स्वाच्छन्द्यमिति स्वयमित्यनेनोक्तम् । कलिस्तु पुनर्ब्रह्मचर्याख्यं व्रतं यावज्जीवं चरतु । वा अथवा सोऽयं कलिरस्मानुपहसितुमुद्यतोऽत्यनेन न जीवि-तव्यमिति वो युष्माकमतिप्रियाय नितरां तुष्ट्यै प्रैतु म्रियताम् । स्वयं सर्वैः स्वेच्छाचारः क्रियते, मया तु स्वेच्छाचारो न कर्तव्यः, मर्तव्यमेवेति कीदृशोऽयं भवतां पक्षपातपरतेति सोल्लुण्ठो-पहासः । अथ च—यूयं ब्रह्मादयः सर्वेऽपि स्वेच्छाचारिणः स्वाच्छन्द्यं कुरुत नाम, कलिस्तु न तादृगिति ब्रह्मैव चरतु, युष्माकमप्यतिप्रियाय भैमीलक्षणाय वस्तुने म्रियताम् । अहं तु स्वेच्छा-चारं न करोमि किं तु भैमीप्राप्तये प्रवृत्तस्य मम मरणं चेत्स्यात्, तदप्यनुचितमिति भावः । अन्या-प्युपहास एव तात्पर्यम् । क्रीडत्वेति (नि) 'निसः कर्मणि च' इति कर्मण्यपि कर्तृत्वाविवक्षिते-त्यर्थे द्वितीया ॥

१ 'चरमं' इति तु युक्तः पाठः । तत्र चरमं शेषं युगं कलिम् । इति सुखावबोधा ।

उपहासमेव प्रकटयति—

चर्येव कतमेयं वः परस्मै धर्मदेशिनाम् ।
स्वयं तत्कुर्वतां सर्वं श्रोतुं यद्विभितः श्रुती ॥ १२३ ॥

चर्येति ॥ हे देवाः, परस्मा अन्यस्मै जनाय 'स्वसुतादिगमनं न कार्यम्' इति धर्मदेशिनां धर्ममुपदिशतां स्वयं तद्ब्रह्महत्यास्वसुतादिगमनं सर्वं निषिद्धं कर्म कुर्वतां वो युष्माकमियं कतमैव कैव चर्या आचाररीतिः अपि तु न कापीत्याक्षेपः । अचेतने अपि श्रुती कर्णौ यद्ब्रह्मवधमहल्यादिगमनं कर्म श्रोतुं बिभितः त्रस्यतः स्वेच्छाचारिणां भवतां परपीडायामेव तात्पर्यमिति भावः । चर्या, भावे 'गदमद–' इति यत् ॥

तत्र स्वयंवरेऽलम्भि भुवः श्रीर्नैषधेन सा ।
जगतो ह्रीस्तु युष्माभिर्लाभस्तुल्याभ एव वः ॥ १२४ ॥

तत्रेति ॥ तत्र स्वयंवरे नैषधेन भुवः श्रीः सौन्दर्यातिशयाद्भूलक्ष्मीः सा भैमी अलम्भि प्राप्ता । युष्माभिस्तु पुनर्जगतो ह्रीस्त्रैलोक्ये यावती वर्तते सा लज्जा, जगतः सकाशाद्वा भैम्यनाप्तत्वाद्या लज्जा सा लब्धा । इति वो नलस्य युष्माकं च लाभोऽपूर्ववस्तुप्राप्तिस्तुल्य एवाभाति तुल्याभ एव । शकारहकारमात्रवैलक्षण्यमितरत्तुल्यमेवेति । भवद्भिर्लज्जैव लब्धा, न तु भैमीति हास्यदर्पो वृथैवेति भावः । अयं च यूयं च यूयं तेषां वः । एकशेषः ॥

दूरान्नः प्रेक्ष्य यौष्माकी युक्तेयं वक्रवक्रणा ।
लज्जयैवासमर्थानां मुखमास्माकमीक्षितुम् ॥ १२५ ॥

दूरादिति ॥ आगच्छतो नोऽस्मान्दूराद्दूरत एव प्रेक्ष्य यौष्माकीयं वक्रवक्रणा मुखकौटिल्यकरणं युक्तैव । किंभूतानां युष्माकम्—[गुणीभूतस्य विग्रहान्तर्गतस्य युष्मच्छब्दस्य विशेषणम्] यतो भैम्यप्राप्तत्वात्संजातया लज्जयैव हेतुना आस्माकं मुखमीक्षितुमसमर्थानाम् । [illegible] लोके अन्यं दूरादेव दृष्ट्वा लज्जया मुखं न दर्शयति तस्मादगलज्जा भवन्त इति । युक्तं [illegible] इति भावः । अयमप्युपहासः 'लज्जयेव' इति पाठे उत्प्रेक्षा । प्रेक्ष्येति [illegible] [illegible] । यौष्माकीति 'तस्मिन्नणि च–' इति युष्माकादेशः । 'युष्माकम्' इति पाठः साधुः । [illegible] द्रष्टव्यम् । वक्रणेति नामधातोर्युच् ॥

छिन्नं भवद्भिः पश्यद्भिः कथं भोस्तदसांप्रतम् ।
निर्दग्धा दुर्विदग्धा किं सा दशा न ज्वलत्क्रुधा ॥ १२६ ॥

छिन्नमिति । हे देवाः, [illegible] पश्यद्भिर्भवद्भिः [illegible] छिन्नम् । [illegible] [illegible] । अनुचितमित्यर्थः । दुर्विदग्धा [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] [illegible] । [illegible] ॥

[illegible]

महावंशाननादृत्य महान्तमभिलाषुका ।
स्वीचकार कथंकारमहो सा तरलं नलम् ॥ १२७ ॥

महेति ॥ कुलशीलादिना महान्तमत्युत्कृष्टं नलं (वरं) अभिलाषुका सा भैमी कश्यपसुतत्वान्महावंशान्दिव्यवस्त्रादिभूषितान्युष्मान्परित्यज्य तरलं चलस्वभावमनिश्चितबुद्धिं नलं कथंकारं कथमेव स्वीचकार । अहो आश्चर्यम् । महान्तं कामयमानया देवपरित्यागेन मनुष्यवरणान्महच्चित्रमित्यर्थः । अथ च—या महापरिमाणं वाञ्छति सातिविशालान्महान्वेणून्परित्यज्य तरङ्गस्पर्शमात्रेणापि चञ्चलं हलं नलाख्यं तृणमङ्गीकरोतीति चित्रमेव । अत एव सा किं न भवद्भिर्दण्ड्येति भावः । अभिलाषुका, 'लषपत–' इत्युकञ् । महान्तमिति, 'न लोका–' इति षष्ठीनिषेधाद्द्वितीया । कथंकारं पूर्ववत् ॥

इदानीं नलः कथं सोढ इत्याह—

भवादृशैर्दिशामीशैर्मृग्यमाणां मृगेक्षणाम् ।
स्वीकुर्वाणः कथं सोढः कृतरीढस्तृणं नलः ॥ १२८ ॥

भवादृशैरिति ॥ भो देवाः, दिशामीशैर्महासमृद्धिभिर्भवादृशैर्मृग्यमाणां काम्यमानां मृगेक्षणां भैमीं स्वीकुर्वाणः समुद्वहन्, अत एव भवत्सु कृतरीढः कृतावज्ञः, तृणतुल्योऽतिनिःसारः, अथ च—नलशब्दवाच्यत्वात्तृणभूतः, स नलो भवद्भिः कथं केन प्रकारेण सोढः क्षान्तः । सा भवद्भिरभिलाषिता तया भवन्तोऽनादृता इत्युपहासः । मृगेक्षणां, 'न लोका–' इति षष्ठीनिषेधः । सोढः, 'तीषसह–' इतीड्विकल्पाद् 'यस्य विभाषा' इति निष्ठायां नेट् ॥

दारुणः कूटमाश्रित्य शिखी साक्षीभवन्नपि ।
नावहत्किं तदुद्वाहे कूटसाक्षिक्रियामयम् ॥ १२९ ॥

दारुण इति ॥ अयं शिखी वह्निर्दारुणः कूटं कापट्यमाश्रित्य भैमीनलयोः विवाहे साक्षीभवन्नपि तत्र प्रकाशमानोऽपि तयोर्भैमीनलयोः तस्य, तस्या वा, उद्वाहे विवाहे विषये कूटसाक्षिणोऽलीकसाक्षिणः क्रियां सत्यापलापलक्षणां किं नावहत् । अपितु—एतदप्यनुचितं कृतम् । कूटसाक्षी तु परकीयं वस्त्वन्यस्मै दापयति । तदनेन प्रामाण्येन न स्थितमित्यभिप्रायः । विवाह एव न भवतीति । भैमी नलेन नोढेति भैमी नलादन्यस्मै भवत्स्वेव मध्ये कस्मैचिदिति न दापितेत्यर्थः । अथ च—दारुणः पावकत्वादतिक्रूरः पुरुषः कपटमाश्रित्य व्यवहारे साक्षीभवन्नपि तस्य चिते धृतस्य कर्मणोद्वाहे निर्वाहे कूटसाक्षित्वं धत्ते । अत्र तु नेत्याश्चर्यम् ॥

अहो महःसहायानां संभूता भवतामपि ।
क्षमैवास्यै कलङ्काय देवस्येवामृतद्युतेः ॥ १३० ॥

अहो इति ॥ भो देवाः, महःसहायानां तेजस्विनां दिक्पतीनां भवतामपि क्षमैवास्यै कलङ्काय स्त्रीष्वपि सत्यपि भैमी नलं वृतवतीत्यपवादे । अथ च—महःसहायानामुत्सवस्य । अथ च—लक्ष्मणप्रसादस्यैव भवतां क्षमा गुणभूतापि कलङ्काय संभूता । अहो महदाश्चर्यम् । गुणभूता क्षमा दोषाय जातेत्यर्थः । महःसहायस्य तेजस्विनोऽप्यन्तर्वैरिण्य चन्द्रमसस्य चन्द्रस्येव । यथा चन्द्रस्य क्षमा भूमिः कलङ्काय जाता । भवतामपि क्षमयैव यत्र कलङ्कमात्रमपि नाभूदिति सूचितम् । 'भूश्चन्द्रकलङ्कः' इति ज्योतिर्विदः । महःसहायानामिति

ना । अन्यस्य मम तथा भवनामणीति सम्मुखवार्थो वा । दमो परित्यज्य भवद्भिरन्यस्मै-
नैकृतोऽङ्कारीन्पात तर्कयतो नाधिक्ष्यसीति भावः ॥

सा वव्रे यं तमुत्सृज्य महामोघाः शुनः स्थ किम् ।
ब्रूतागःसज्जनस्तस्याः कचमानाय्याच्छिनद्मि ताम् ॥ १३१ ॥

सेति ॥ हे देवाः, सा भैमी यं वव्रे तं नलमुत्सृज्य यूयं मह्यं हृष्यै किमिति क्रुद्धाः क्षान्तिपराः स्थ भवथ । अपराधिनस्तस्याप्यत्र क्षमाः सन्तोऽनपराधाय मह्यं किमिति क्रुद्धाः युष्माः सोत्प्रासः, तस्माद्यूयं ब्रूत कथयत—अहं तस्मान्नलापराधकारणात्कचमपि वर्तमानां तामाच्छिनद्मि आहरामि । यतः—आगसो भवदनादररूपापराधस्य सज्जो भूतः, तस्मादविलम्बेनैव तामाहरामि । गच्छेति मामनुमन्यध्वमित्यर्थः । अन्येनापराधे कृतेऽन्यस्मै क्रुध्यत इति युक्तमिति सोत्प्रासोपहासः । ब्रूत वो युष्माकं नलस्य चागःसज्जनकरणादपराधिनीं तां नलादानयामीति वा । मह्यं, 'क्रुधद्रुह-' इति चतुर्थी । आच्छिनद्मि, वर्तमानसामीप्ये लट् ॥

यतध्वं सहकर्तुं मां पाञ्चाली पाण्डवैरिव ।
सापि पञ्चभिरस्माभिः संविभज्यैव भुज्यताम् ॥ १३२ ॥

यतध्वमिति ॥ यूयं मां सहकर्तुं यतध्वं यत्नं कुरुत । भैमीमानेतुमहं गच्छामि, यूयं मम सहायार्थमागच्छतेत्यर्थः । तत्र साहाय्यकेऽस्माकं किं फलमित्यत आह—अस्माभिरिन्द्रादिभिः यमवरुणैर्मया सह पञ्चभिः सा भैम्यपि संविभज्य संभोगकालं समानभागमेव कृत्वैवोपभुज्यताम् । तथाच भवतामपि फलमस्तीति भावः । कैः केव-पञ्चभिः पाण्डवैः पाञ्चाली द्रौपदीव । पाञ्चालीदृष्टान्तेनैकस्याः पतिव्रताया बहुभिरुपभोगो न दृष्टचर इत्यलौकिकत्वं परिहृतम्[1]। पाण्डवानामप्रभावित्वात्तदानीं दृष्टान्तत्वेन कलेर्योगित्वाद्भविष्यदर्थज्ञानवत्त्वाद्वचनं युक्तम् । जगत्प्रवाहानादितया पाण्डवपाञ्चालीवृत्तान्तानामतीतत्वात्तदुदाहरणीकृत्यैतदुक्तमिति वा । पाञ्चाली । जनपदवाचिनः क्षत्रियाभिधायिनः पाञ्चालशब्दात् 'जनपदशब्दात्-' इत्यञ् ॥

अथापरिवृढा सोढुं मूर्खतां मुखरस्य ताम् ।
चक्रे गिरा शराघातं भारती सारतीव्रया ॥ १३३ ॥

अथेति ॥ अथ पूर्वोक्तकलिवचनाकर्णनानन्तरं तामुक्तप्रकारां मुखरस्यानुचितभाषणशीलस्य कलेर्मूर्खतां सोढुं क्षन्तुमपरिवृढाऽसमर्था भारती सरस्वती अर्थगाम्भीर्यात्सारया श्रेष्ठया, परुषत्वाच्च तीव्रया दुःसहया गिरा कलेः शराघातं बाणव्यधमिव चक्रे । बाणवत्पीडाकरं परुषं वचनमूच इत्यर्थः । 'भारतीव्रया' इति पाठे—अर्थगाम्भीर्येण दुःसहया ॥

कीर्तिं भैमीं वरं चास्मै दातुमेवागमन्नमी ।
न[2] लीढे धीरवैदग्धीं धीरगम्भीरगाहिनी[3] ॥ १३४ ॥

---

१ 'शतेषु षट्सु सार्धेषु त्र्यधिकेषु च भूतले । कलेर्गतेषु वर्षेषु प्राभवन् कुरुपाण्डवाः ॥' इति राजतरङ्गिणीतः पाण्डवानां कल्यन्तर्गतत्वेनेति बोध्यम् । २ 'नालीढ'इत्यपि पाठः—' इति सुखावबोधा । ३ 'गाहिनीम्' इति पाठे 'विरुद्धलक्षणया धीरे संबोध्य गम्भीरार्थस्य गाहिनीं धीरवैदग्धीं न लीढे इति व्याख्येयम्' इति सुखावबोधा ।

प्रतिज्ञेति ॥ हे विज्ञाः, कलेर्ममेयं प्रतिज्ञा विज्ञायताम्। भवद्भिरिति शेषः। इयमिति किम्—अहं तेन नलेन प्रयोज्येन भैमीं च भूमिं च त्याजयामि शीघ्रं मोचयामि। अत एव तं जयामीति प्रतिज्ञा मम चेतस्येवं वर्तत इति भवद्भिर्ज्ञायत एव तथापि स्पष्टं मया कथ्यते तदाकर्ण्यतामित्यर्थः। कलेर्ममेत्यहंकारः सूचितः। तेन, अनुक्ते कर्तरि तृतीया, त्याजयामि, जयामीति वर्तमानसामीप्ये भविष्यति लट् ॥

नैषधेन विरोधं मे चण्डतामण्डितौजसः।
जगन्ति हन्त गायन्तु रवेः कैरववैरवत् ॥ १३९ ॥

नैषधेनेति ॥ चण्डतया भूभैमीपरित्याजनद्वारातिपीडाकारित्वान्निर्दयत्वेन मण्डितौजसो-ऽलंकृततेजसो मे मम नैषधेन सह विरोधं जगन्ति त्रयोऽपि लोका गायन्तु कीर्तयन्तु। कस्य किमिव—चण्डतामण्डितौजसो रवेः सूर्यस्य कैरवैः कुमुदैः सह वैरवद्विरोधमिव। हन्त खेदे। अयोग्येन हीनतेजसा नलेन सह विरोधारम्भात्त्रैलोक्ये यद्यप्ययशो भविष्यति, तथापि किं कुर्म इति खेदः। अयशःसमुदयेऽपि सूर्येण कैरववैरवन्मयापि नलवैरं करिष्यत एवेति भावः। एतेन दर्पः सूचितः ॥

द्वापरः साधुकारेण तद्विकारमदीदिपत्।
प्रणीय श्रवणे पाणिमवोचन्नमुचे रिपुः ॥ १४० ॥

द्वापर इति ॥ द्वापरस्तृतीययुगरूपः सहचरस्तस्य कलेर्विकारं नलेन सह विरोधरूपं साधुकारेण साध्विति शब्दोच्चारणेनादीदिपत्साधु, उचितमेतत्त्वया विचारितमित्युद्दीपयामास। तस्य प्रोत्साहनं चकारेत्यर्थः। अथ नमुचेर्दैत्यस्य रिपुरिन्द्रो युष्माभिः साहाय्यं कर्तव्यमिति कलिनोक्तस्य वचस उत्तरत्वेनैतद्व्यापारमध्येऽस्माभिर्न स्थीयत इति लौकिकाभिनयव्यञ्जनवद्य-च्छ्रवणे पाणिं प्रणीय यत्त्वया विचारितं तदस्माभिः श्रोतुमप्यनर्हमिति वा पाणिभ्यां कर्णौ पिधाय कलिमवोचत्। अदीदिपत्, दीपेर्ण्यन्ताच्चङि 'भ्राजभासभाषदीप–' इत्यादिनोपधा-ह्रस्वविकल्पः ॥

विस्मेयमतिरस्मासु साधु वैलक्ष्यमीक्षसे।
यद्दत्तेऽल्पमनल्पाय तद्दत्ते ह्रियमात्मनः ॥ १४१ ॥

विस्मेयेति ॥ हे कले, त्वं विस्मेयाश्चर्यहेतुर्मतिर्यस्यैवंविधोऽसि। यस्मात्त्वमस्मासु वर्तमानं वैलक्ष्यं सलज्जत्वं साधु सम्यक्प्रकारेणेक्षसे जानासि। पराशयवेदितया तव तीक्ष्णबुद्धित्वादहं विस्मिताः स्मेत्युपहासः। साधूचितं यद्वैलक्ष्यं तदस्मास्वीक्षस इति वा। कथं भवतु वैलक्ष्य-स्यौचित्यमित्याशङ्क्य समर्थयते—यः पुरुषोऽनल्पाय महते पुरुषायाल्पमतितुच्छं वस्तु दत्त इति यत्, स पुरुषस्तदल्पवस्तुदानं कर्मात्मने स्वस्मै ह्रियमेव दत्ते। महते यदल्पं दीयते तदल्प-दानमेव कर्तृ दात्रे पुरुषाय लज्जामेव दत्ते। तेन तस्य लज्जैव भवतीत्यर्थ इति वा। तथा च महते नलायास्माभिरल्पमेव दत्तमिति लज्जा युक्तैवेति भावः। अतितरां नलमाहात्म्यं सूचि-तम्। एतेन 'दूरान्नः प्रेक्ष्य—' इत्यस्योत्तरम्। यद्यदि, तत्तर्हीति वा योज्यम्। यद्वा—अन-

---

१ 'हन्त हर्षे। आत्मनः सकाशादधिकेन नैषधेन विरोधाल्लोके मम यशो भावीति हर्षः' इति सुखावबोधा।

पाय न विद्यतेऽल्पो यस्मात् । अतिहीनायेत्यर्थः । यदल्पदादिरल्पं 'कस्कोऽत्रं धर्मेर्मर्माणि कृन्तति' इत्याद्युपालम्भवचनं दत्ते करोतीति तत्तस्मै ह्रियमेव दत्ते । अधमस्य महोपालम्भ-योग्यस्य तवाल्प एवोपालम्भः कृत इति विषादादस्माकं वैलक्ष्यं युक्तमेवेति व्याख्येयम् । अधमायाल्पमप्युपालम्भादि यद्दत्ते तत्तस्मै ह्रियं दत्ते । अधमेन सह संभाषणनिषेधात्तस्यो-पालम्भोऽपि न कार्यः । स त्वस्माभिः कृतः । तथा च पापरूपेण भवता सह संभाषणमस्मा-भिरनुचितं कृतमिति विषादादस्मात्तु वैलक्ष्यं युक्तमेवेति वा । इयमपि वक्रोक्तिः ॥

दानात्मत्वनलमहत्त्वप्रकटनपूर्वं वैलक्ष्यस्यौचितीं समर्थयते—

फलसीमां चतुर्वर्गं यच्छतांशोऽपि यच्छति ।
नलस्यास्मदुपघ्ना सा भक्तिर्भूतावकेशिनी ॥ १४२ ॥

फलेति ॥ यस्या नलभक्तेः शतांशोऽपि शततमो भागः फलस्य सीमां मर्यादाभूतं निर-तिशयफलरूपं चतुर्वर्गं धर्मार्थकाममोक्षरूपं यच्छति नलाय दातुं शक्नोति, सास्मदुपघ्नाऽस्म-दाश्रयाऽस्मद्विषया नलस्य भक्तिरवकेशिनी निष्फला भूता जाता । यस्याः शततमांशेन वशीकृतैरस्माभिः संतुष्य फलरूपत्वेन चतुर्वर्गोऽपि नलाय दातुं शक्यते, तस्या निरतिश-यायाः परिपूर्णायाश्चतुर्वर्गादधिकतमस्य फलस्याभावादस्माकं दातुमसामर्थ्यात्सा निष्फलैव जातेत्यर्थः । निरतिशयभक्तेर्दुष्करत्वान्महते नलाय चतुर्वर्गोऽप्यल्पतरफलत्वाद्दातुमयुक्तः । तादृशाय भैमीलक्षणाल्पतमफलदाने कृतेऽस्माकं लज्जा युक्तैवेति भावः । यच्छततमांशवशी-कृतैरस्माभिर्दत्तसामर्थ्यो नलोऽप्यन्यस्मै जनाय फलावधि चतुर्वर्गं दातुं शक्नोतीति यावत्, सा भक्तिरपूर्णा निष्फला जातेति वा व्याख्येयम् । 'सोऽपि' इति पाठे चतुर्वर्गं ददतामस्माकं स नलोऽपि क्रियमाणकर्मफलमर्यादां ब्रह्मार्पणरूपेण ददाति तस्याः पुनः प्रत्यर्पणात्तस्यास्माकं च साम्यमेव । किंतु नलस्यास्मद्विषया सा निरतिशया कर्मणामस्मास्वपि ब्रह्मण्येवार्पणात्फलानिर्ब-न्धनरहिता भक्तिर्वन्ध्या जाता, तादृग्भक्तिफलदानेऽस्माकमसामर्थ्यात् । तथा च वैलक्ष्यं युक्तमेवेति व्याख्येयम् । यच्छताम् । संबन्धे षष्ठी । शतं चासावंशश्चेति विग्रहे लक्षणया शततमोंश इति । 'उपघ्न आश्रये' इति साधुः ॥

नलो वैराहो न भवतीत्याह—

भव्यो न व्यवसायस्ते नले साधुमतौ कले ।
लोकपालविशालोऽयं निषधानां सुधाकरः ॥ १४३ ॥

भव्य इति ॥ हे कले, रागद्वेषादिरहितत्वेन साध्वी निर्मला मतिर्यस्य तस्मिन् नले विषये ते व्यवसायो वैरकरणोद्यमो भव्यः शुभोदर्को न । किं च निषधदेशानामुदयकारि-सुधाकरश्चन्द्रोऽयं नलो लोकपाला दिक्पाला इन्द्रादयस्तैर्विशेषेण शालते शोभते लोकपालानामिव शौर्यादिना । तदंशत्वाद्वा लोकपालवन्महात्मा वा । अतस्तेन सह वैरं तव शुभोदर्कं न भवति न तत्कार्यमित्यर्थः । 'नवे' इति पाठे असाध्यो नवीनो नलस्तस्मिन्निति व्याख्येयम् । 'कलेः' इति पाठे—असाधोर्दोषयुक्तस्य इति व्यवसायविशेषणम् ॥

---

१ 'कलौ' इति पाठः सुखावबोधाभिमतः ।

एतदेव स्फुटयति—

न पश्यामः कलेस्तस्मिन्नवकाशं क्षमाभृति।
निचिताखिलधर्मे च द्वापरस्योदयं वयम्॥ १४४॥

नेति॥ वयं तस्मिन्क्षमाभृति राज्ञि नले कलेस्तुर्ययुगस्य तत्रावकाशं प्रवेशावसरं न पश्यामः संभावयामः। तथा—भग्नमित्रस्य द्वापरस्य चोदयं नलपराभवनसामर्थ्यं न संभावयामः। यतः—नितरां चिता अर्जिता अखिला धर्मा येन। श्रौतस्मार्तधर्मानुष्ठातरीत्युभयत्र हेतुः। तस्य धर्ममयत्वात्, युवयोः पापरूपत्वात्तत्रावकाशलेशोऽपि न संभाव्यत इत्यर्थः। यद्यपि देवा नलपराभवस्य भविष्यत्तां जानन्ति, तथाप्युत्साहभङ्गद्वारा कलिनिषेध एव तात्पर्यादवकाशं न पश्याम इत्यूचुः। यद्वा—पश्याम इति वर्तमानसामीप्ये भविष्यति लट्प्रयोगात्प्रस्तुतमवकाशो नास्ति, विलम्बेन भविष्यतीति सूचितमिति ज्ञेयम्। अथ च—यथासंख्येन तितिक्षाशीले कलहावकाशो न, निश्चितसकलधर्मरहस्ये च संदेहस्योदयो न भवतीति युक्तम्॥

भैम्यपि न बाध्येत्याह—

सा विनीततमा भैमी व्यर्थानर्थग्रहैरहो।
कथं भवद्भिर्बाध्या प्रमितिर्विभ्रमैरिव॥ १४५॥

सेति॥ पातिव्रत्यादिधर्मनिष्ठत्वाद्विनीततमा सा भैमी व्यर्थो निर्हेतुको वैराचरणलक्षणोऽनर्थस्तत्र ग्रहोऽभिनिवेशो येषां तैर्भवद्भिः कथमिव बाध्या पीडनीया। अपितु-अनुचितमेतत्। अहो कष्टं, संबुद्धिर्वा, आश्चर्ये वा। कैः केव—विशिष्टैर्भ्रमैर्विपर्ययज्ञानैर्विनीतं सुतरामपाकृतं तमोऽज्ञानं ययैवंभूता भ्रान्तिज्ञानविरोधिनी प्रमितिः सम्यगनुभूतिस्तात्त्विकी रजतादिधीरिव कथं बाध्येत्यर्थः। किंभूतैर्विभ्रमैः—व्यर्थो निष्फलोऽनर्थस्य शुक्तिरजतादेर्ग्रहो ज्ञानं येषां तैः। 'अविनीततम आः' इति पदच्छेदः। आः कोपे। नितरामविनीत अधम कले इति वा॥

उक्तिविशेषेण षड्भिः श्लोकैः पुनरपि तौ न बाध्यावित्याह—

तं नासत्ययुगं तां वा त्रेता स्पर्धितुमर्हति।
एकप्रकाशधर्माणं न कलिद्वापरौ युवाम्॥ १४६॥

तमिति॥ न असत्यं नासत्यं किंतु सत्यमेव युगं सत्ययुगम्। कृतयुगमिति यावत्। तं नलं तां भैमीं वा स्पर्धितुं तुलयितुमर्हति। तथा—त्रेतायुगमपि स्पर्धितुमर्हति न तु जेतुमित्यर्थः। यथासंख्येन वा योज्यम्। यस्मादेको मुख्यः स चासौ प्रकाशधर्मा च तम् तां वा, प्रकाशः प्रसिद्धो धर्मो यस्य यस्याश्च। पश्चादेकशब्देन कर्मधारयः। लोकत्रयस्त्रीपुंसमध्ये तावेव धर्मप्रधानौ। यतः, तस्मात्सत्ययुगस्यापि चतुश्चरणधर्मत्वादेकप्रकाशधर्मत्वात्सत्ययुगं स्पर्धितुमर्हति। त्रेतायास्तु त्रिचरणधर्मत्वेऽपि कलिद्वापरापेक्षया धर्मबाहुल्यात्कृतयुगसाधर्म्यादेकप्रकाशधर्मत्वसंभवात्सापि स्पर्धितुमर्हतीत्यर्थः। कलिद्वापरौ युगे युवां पुनस्तौ स्पर्धितुं नार्हथ इति विभक्तिविपरिणामः कार्यः। तयोर्धर्मैकप्रधानत्वात्, युवयोश्चाधर्मबाहु-

स्याद्युगं तौ तुलयितुमप्यसमर्थौ, किं पुनर्जेतुमित्यर्थः। आ सामस्त्येन कलं यत्र तदाक-लम्। तच्च तद्युगं च, चतुश्चरणधर्मयुक्तं कृतयुगं, तथा—त्रेतायुगं, तौ स्पर्धितुं नार्हतः अपितु अर्हत एवेति काकुः। उक्तादेव हेतोरासत्ययुगं, कृतयुगं तौ स्पर्धितुमर्हति तत्रैव तयोः सत्त्वादनप्रधानत्वाच्च। त्रेतायुगं च नार्हति; त्रयाणामप्यधर्मसंसर्गात्; तत्र तयोरसत्त्वाच्चेति वा। कलिद्वापरयोः पुष्पलावनलेन सह, त्रेतायाश्च लीलाङ्गन्या सह, स्पर्धासंभावनायां पार्थक्येन निषेधो युक्त इति वा। कृतयुगं तं स्पर्धितुं नार्हति। युवामपि नार्हतः। सत्ययु-गेऽधर्मलेशसंस्पर्शसंभावनापि संभवेत्, नतु नले तथा—त्रेतायामपि, नतु भैम्याम्। तथा चायं युगद्वयं ताभ्यां स्पर्धितुमपि न शक्तम्, युवां पुनर्न शक्ताविति किं वाच्यमित्यर्थ इति वा। अथ च—दत्तयोर्युगं नलं स्पर्धितुमर्हति। गार्हपत्याहवनीयदक्षिणाग्नित्रयरूपा च भैमीं स्पर्धितुमर्हति। यतः—एकः केवलः प्रकाश उज्ज्वलः प्रसिद्धो वा धर्मः स्वभावः सौन्दर्या-दिगुणो वा ययोर्भैमीनलयोः प्रकाशः शोभालक्षणो धर्मो ययोरिति वा। अग्नित्रयपक्षेऽप्येकः केवलः प्रकाशस्तेज एव धर्मः स्वभावो यस्या इति सौन्दर्यादिरहितत्वात्पाविन्याच्च दत्तयुगमग्नि-त्रयं च ताभ्यां तुल्यं भवितुमर्हतीत्यर्थः। कलिद्वापरौ युवां पुनर्न, असुन्दरत्वात्तपःप्रधान-त्वाच्चेत्यर्थः। अथ च—एको विरुद्धधर्मरहितः प्रकाशो निश्चितश्च धर्मो यत्र तं च तां च कलहसंदेहौ स्पर्धितुं नार्हतः। विरुद्धधर्मत्वे हि कलहसंभवो विशेषधर्माप्रकाशे च संदेहसं-भवः। अत्र त्वेकधर्मत्वात्प्रकाशमानधर्मत्वाच्च कलहसंदेहौ न संभवत इति युक्तमिति भावः। 'त्रेताऽग्नित्रितये युगे', 'प्रकाशश्च प्रसिद्धे स्यात्', 'संदेहद्वापरौ चाद्ये' इत्यमरः। प्रकाशधर्म-शब्दयोः पूर्वं बहुव्रीहौ 'धर्मादनिच्–' इति समासान्तः। पश्चात्त्रैण समासः॥

करिष्येऽवश्यमित्युक्तिः करिष्यन्नपि दुष्यति।
दृष्टादृष्टा हि नायत्ताः कार्यायाहेतवस्तव॥ १५७॥

करिष्य इति॥ हे कले, अवश्यं निश्चितं करिष्ये। अर्थान्नलपराभवमित्युक्तिः प्रतिज्ञा-वचो यस्यैवंभूतस्त्वं करिष्यन्नपि कर्तुकामोऽपि दुष्यति दुष्टो भवति। अपकारस्य भविष्य-त्त्वादिदानीं साक्षात्कायव्यापाराभावेऽपि मनस्यपकारकरणपरामर्शा कृतत्वाद्वचनेन चतुर्दशा-दिनिषिपातकसद्भावात्। अकृत्यापि अकरणेऽपि अकृत्यं करिष्यामीत्यादरात्वितिरत्यर्थः। कुर्वाणो दुष्टो भविष्यसीति किं वाच्यमित्यपिशब्दार्थः। अथ च—अकर्ता दुष्यत्येव प्रतिज्ञा-भङ्गादिति किं वाच्यम्। किंतु यदपि नलस्य पराभवं करिष्यसि, तथापि दुष्यसि, प्रतिज्ञा-तार्थसंपादनेऽप्येवंप्रतिज्ञाकरणस्य दुष्टत्वात्। हि यस्मात्कार्यायाः कार्यसाधनभूता दृष्टा दृ-ष्टाः परादयः, अदृष्टा देवकालेश्वरेच्छादयो हेतवः कारणानि तवायत्तास्त्वदधीना (न) भवन्ति। कार्यसाधिका दृष्टादृष्टसामग्री तवायत्तया संपादयितुमशक्या। किंतु या यस्य तस्य तत्तत्कर्मपरायत्ततयैव संपद्यत इत्यर्थस्तात्पर्यम्। तथापि त्वया स्थिते दृष्टेऽदृष्टे च द्विविधं पातकमेव भवति। न तु तं पराभवितुं समर्थोऽसि। यदपि तं पराभवितुं शक्ष्यसे, तथापि नलोपसर्गोऽदृष्टवशादेव तत्र प्रयोजिका, न तु त्वमिति। नवैवं करिष्यते, नवैवं कृत-मित्यादिरूपां प्रतिज्ञां प्रति समर्थस्य परायत्ततया दृष्टादृष्टकार्यहेतुरेव प्रतिज्ञाकरणस्य अनिश्चितत्वाद्विदुषोऽपि कर्तुमशक्यं, त्वं तु यो नाम करोष्यसि च भावः। यद्वा दृष्टादृष्टाः

हेतवः, (तत्र) दृष्टसामग्री यथाकथंचित्वयापि संपादयितुं शक्यते तथाप्यदृष्टसामग्री त्वया न शक्यते। तथा च नलेन यदि परमो धर्मः कृतः, तर्हि स त्वया पराभवितुमशक्यः। अथाधर्मः कृतः तर्ह्यधर्मवशादेव तादृशी दशा भविष्यति त्वया किं क्रियत इत्युभयथापि दोषात् 'मयैवं करिष्यते, कृतम्' इत्यादि वल्गना न कार्येति भावः। 'इत्युक्त्वा' इति पाठे अवश्यं वश्यं वा करिष्ये इत्युक्त्वाकारप्रश्लेषेणाकरिष्यन्नपि दुष्यसि वाङ्मात्रेणापि पापलिप्तः किं पुनः करिष्यन्निति। अन्यत्पूर्ववत्। कार्यायाः, 'तस्येदम्' इत्यर्थे 'वृद्धाच्छः'। हितार्थे 'तस्मै हितम्' इति वा॥

द्रोहं मोहेन यस्तस्मिन्नाचरेदचिरेण सः।
तत्पापसंभवं तापमाप्नुयादनयात्ततः॥ १४८॥

द्रोहमिति॥ यः पुरुषो मोहेनाज्ञानेनापि तस्मिन्पुण्यश्लोकेऽनपकारिणि द्रोहमपकारमाचरेत्, स पुरुषः ततस्तस्मादनयादन्यायाद्धेतोरचिरेण तस्मात्तादृशापकारेण जातात्पापात्संभवो यस्य तं तापं दुःखमाप्नुयात्। बुद्धिपूर्वकारी लभत इति किं वाच्यमित्यर्थः। नलद्रोहस्तस्मात्त्वया सर्वथा त्याज्य इति भावः। अनेन शापोऽपि दत्त इति ज्ञेयम्। मोहेनेत्यत्रार्थादपिशब्दो योज्यः। मोहस्येन स्वामिन्नज्ञानाश्रय मूर्खतमेति वा संबोधनम्॥

युगशेष तव द्वेषस्तस्मिन्नेष न सांप्रतम्।
भविता न हितायैतद्वैरं ते वैरसेनिना॥ १४९॥

युगेति॥ हे युगानां सत्यादीनां शेष कले, तस्मिन्नले तवैष द्वेषो न सांप्रतमयुक्तः। यस्माद्वैरसेनिना नलेन सह एतत्प्रारब्धं वैरं ते तुभ्यं हिताय न भविता शुभोदर्कं न भविष्यति। युगेषु शेष इति निर्धारणसप्तमीसमासः। सांप्रतमव्ययम्। 'हितयोगे च' इति चतुर्थी॥

तत्र यामीत्यसज्ज्ञानं राजसं सदिहास्यताम्।
इति तत्र गतो मा गा राजसंसदि हास्यताम्॥ १५०॥

तत्रेति॥ हे कले, तत्र नलसमीपे पराभवार्थं यामि गच्छामीत्येवंरूपं राजसं रजोगुणजनितं विचारासहम्। अत एवासदशोभनं सद्वर्तमानमिहास्मिन्काले देशे वाऽस्यतां त्यज्यतामिति। सद्भद्रमिति वा। इति विचार्येति यावत्। इति किम्—तत्र राजसंसदि तस्यां नलसभायां गतः सन् हास्यतां परिहास्यतां त्वं मा गाः। एवं विचार्य तत्र गतः सभ्यैर्हास्य एव भविष्यसि नतु नलं पराभवितुं शक्ष्यसीत्येवंविधो विचारः परित्याज्य एवेत्यर्थः। असत्सदिति च विरोधाभासः। तत्र यामीति ज्ञानमसदयुक्तम्—यतो राजसम्। तर्हि किं कर्तव्यं तत्राह—इहास्मिन्नेव देश आस्यतां स्थीयताम्। इत एव परावर्तनीयमित्यर्थः। इत्थं त्वदीयं ज्ञानं सद्भद्रमितीतिशब्दमावर्त्य व्याख्येयम्। विपक्षे बाधकमाहोत्तरार्धेन—तत्र स्वयंवरे गतो राजसभायां स्वयंवरे वृत्ते किमर्थमागत इति हास्यतामेव गमिष्यसि॥

---

१ 'सांप्रतः' इति पाठे-संप्रतिशब्दात् 'तस्येदम्' इत्यणि सांप्रतो नाधुनिक इत्यर्थः'—इति सुखावबोधा।

गत्वान्तरा नलं भैमीं नाकलात्त्वं प्रवेक्ष्यसि ।
षण्णां चक्रमसंयुक्तं पठ्यमानं डकारवत् ॥ १५१ ॥

गत्वेति ॥ हे कले, निषधदेशान्गत्वा प्राप्य नलं भैमीमन्तरा नलभैम्योर्मध्येऽकलात्छीघ्रं दुरितलक्षणकारणमन्तरेण वा त्वं न प्रवेक्ष्यसि । नलस्य पुण्यश्लोकत्वात्, भैम्याश्च पातिव्रत्यादिधर्मयुक्तत्वात्, तौ पराभवितुं न शक्नोपीत्यर्थः । क इव—असंयुक्तं पूर्वं विसंधितया पृथक्कृतप्रकृतिप्रत्ययविभागं पश्चात्पठ्यमानं संहितया प्रयोगार्हम् । उच्चार्यमाणमिति यावत् । एवंभूतं षण्णां चक्रं षण्णामिति शब्दरूपस्यवर्णवृन्दमन्तरा मध्ये डकारवत् । डकारो वर्णो यथाऽकलाद्विधिमन्तरेण न प्रविशतीति साधर्म्योपमा । षष्शब्दात्षष्ठीबहुवचने 'षट्चतुर्भ्यश्च' इति नुटि तत्साहित आमि 'स्वादिष्वसर्वनामस्थाने' इति पूर्वपदस्य पदत्वात् 'झलां जशोऽन्ते' इति जश्त्वेन षकारस्य डकारे 'न पदान्तात्—' इति निषेधस्य 'अनाम्नवति—' इति निषेधात् 'ष्टुना ष्टुः' इति ष्टुत्वेन नामकारस्य णकारादेशे 'यरोऽनुनासिके—' इति डकारस्याप्यनुनासिकस्य व्यवस्थितविकल्पत्वादनुनासिकस्यात्र नित्यत्वेन णकारे जाते सर्वथापि न स्वेन रूपेण 'षण्णाम्' इति पदमध्ये डकारो यथा प्रवेशं लभते, तथा तयोर्मध्ये त्वमपीत्याशयः । अन्यथा विकल्पत्वात्पक्षे षड्णामिति स्यात् तन्मा भूदित्यत्र व्यवस्थितविभाषाऽङ्गीकरणीया । षण्णां चेति चकारो भैमीं चेति योज्यः । तथा च—क्रमेण परिपाट्या संयुक्तं षण्णामिति कर्मभूतं शब्दरूपमन्तरा डकारो यथा न प्रविशति । असंयुक्तावस्थायां यद्यपि स्वेन रूपेणावस्थानं वर्तते, तथापि संयुक्तावस्थायां नास्तीत्यर्थ इति वा । षण्णामित्यत्र प्रकृतिप्रत्ययदशायामकलादागन्तुकादेशरूपतया डकारो यथा प्रविशति, तथा त्वं न प्रविशसीति वैधर्म्योपमया वा व्याख्येयम् । 'टकारवत्' इति पाठे—'वावसाने' इत्यवसान इव चर्त्वविकल्पात्, खरभावात् षट्, षडित्यादिवत् । षण्णामित्यत्र खरवसानयोरभावाट्टकारो यथा न प्रविशतीति साधर्म्योपमैव । श्लेषोऽप्यत्र । नलं भैमीं, 'अन्तरान्तरेण—' इति द्वितीया ॥

अपरेऽपि दिशामीशा वाचमेतां शचीपतेः ।
अन्वमन्यन्त किंत्वेनां नादत्त युगयोर्युगम् ॥ १५२ ॥

अपरे इति ॥ अपरे दिशामीशा यमादयः शचीपतेरेनां पूर्वोक्तां वाचम् [illegible] 'इन्द्रो युक्तमाज्ञापयति' इत्यन्वमन्यन्त । किंतु पुनर्यूथं युगयोः कलिद्वापरयोर्[illegible] गिरं नादत्त नाङ्गीचक्रे । दिगीशानामपि संमतायां वाचि तयोरसंमतेः किंतु [illegible] त्वनाग्रहित्वं योज्यम् । एनाम्, अन्वादेशे एनादेशः । आदत्त, अनात्मनि[illegible]

कलिं प्रति कलिं देवा देवान्प्रत्येकशः कलिः ।
सोपहासं सनैवर्णैरित्थं व्यरचन्मिथः ॥ १५३ ॥

कलिमिति ॥ देवाः कलिं युगं प्रति लक्षीकृत्य, कलिर्देवान्[illegible]
ऽन्योन्यं सनैवर्णैस्तुल्यैरक्षरैः श्लिष्टैः शब्दैः सोपहासमनुहासम्[illegible]

---

१ 'प्रत्यये भाषायां नित्यवचनम्' इति वार्तिकेन नित्यत्वे [illegible]
छन्दोविषयत्वं वा द्रष्टव्यम् ।

मित्थं वक्ष्यमाणप्रकारेण व्यररचन्, व्यररचच्च कृतवन्तः कृतवांश्चेत्यर्थः। व्यररचत्, रचय-तेश्चौरादिकस्यादन्तत्वादग्लोपित्वान्न सन्वद्भावः। व्यरचयदित्यपि पाठः॥

इन्द्रः कलिं प्रत्याह—

तवाऽगमनमेवार्हं वैरसेनौ तया वृते।
उद्वेगेन विमानेन किमनेनापि धावता॥ १५४॥

तवेति॥ हे कले, तया वैरसेनौ नले वृते सति तवागमनं गमनाभावोऽर्हं युक्तम्। उद्वेगे-नोत्कृष्टजवेन, अत एव—धावता शीघ्रगामिनाऽनेन प्रत्यक्षदृश्येन विमानेनाकाशगामिना रथेन किम्, अपितु—न किंचित्प्रयोजनमस्ति। अन्यस्य वृतत्वादित्यर्थः। वैरसेनावुत्तरेण वा संब-न्धनीयम्। अनया नलेऽवृते एव तव स्वपुराद्गमनं युक्तम्। नलवरणानन्तरमिदानीं सर्वथा गमनं न कार्यमित्यर्थ इति वा। एतावत्पर्यन्तं किं कृतम्, इदानीं किमर्थं गम्यत इत्युपहासः॥

एतदेव वाक्यं कलिरिन्द्रं प्रत्याह—हे शक्र, भैम्या नले वृते सति तव यथागतमागमनमे-वाकृतकार्यत्वादिदानीं स्वर्गं प्रत्यगमनमेव युक्तम्। निर्लज्जत्वमङ्गीकृत्येन्द्राण्यादीनामग्रे कथं मुखं दर्शयिष्यति। अपि तु—अनुचितमेतत्। सर्वथा स्वर्गं प्रति न गन्तव्यमेव युक्तमित्यर्थ इति वा। विमानेनाहंकाररहितेनापिधा तिरोधानं तद्युक्तेन नितरां गोपितेनानेन मुखदर्शना-नुमितेनोद्वेगेन निर्वेदेन किम्, अपि तु—तद्गोपनं व्यर्थम्। धैर्यमवलम्ब्य निर्वेदो यद्यपि त्वया गोप्यते, तथापि मया ज्ञात एव। अथ च—भैमीनलाभ्यां वरदानार्थमेव मयागतमित्यादि-व्याजेन निर्वेदगोपनं क्रियते, तथापि स निर्वेदो ज्ञात एव। अभिमानशून्यत्वान्न किंचिदनेन निर्वेदेन साधयितुं शक्यते, तस्मात्सर्वथा दुःखं मा कार्षीरित्युपहसितवानित्यर्थः। विमानेना-न्यवरणादपमानेन हेतुना य उद्वेगस्तेन प्रकटेन किम्, अपि तु—तं गोपायेति वा। विगत-मानानामिन स्वामिन्नितरामभिमानशून्य इन्द्र, गोपितेन चानेन निर्वेदेन किमिति वा। उद्वेगेन किम्, अनेन धावता विमानेनापि किमिति वा। अपिधा, 'आतश्चोपसर्गे' इत्यङ् प्रत्ययः॥

वह्निः कलिमाह—

पुरा यासि वरीतुं यामग्र एव तया वृते।
अन्यस्मिन्भवतो हास्यं वृत्तमेतत्त्रपाकरम्॥ १५५॥

पुरेति॥ हे कले, त्वं यां वरीतुमितोऽपि पुरा यासि गमिष्यसि तयाऽग्र एव त्वदागम-नात्पूर्वमेवान्यस्मिन्वृत एतदिदानीं गमनं भवतस्त्रपाकरं हास्यं हास्यकरणं वृत्तं जातम्। वर्ति-ष्यमाणमपि वृत्तप्रायत्वाद्वृत्तमित्युक्तम्। सर्वोऽपि लोकस्त्वामुपहसिष्यतीत्यर्थः। एतत्तव वृत्तं गमनाचरणं हास्यहेतुभूतं त्रपाकारि च। भविष्यतीति शेष इति वा। एतल्लोकैः क्रियमाणं हास्यं तव त्रपयाऽकं दुःखं राति एवंविधं वृत्तं जातप्रायमेवेति वा। अत्राप्युपहासः॥

इदानीं कलिरग्निमाह—हे वह्ने, त्वं यां वरीतुं पुरा यास्ययासीः, तया तव समक्षमेव त्वाम-नादृत्याऽन्यस्मिन्नले वृते तवैतत्प्रत्यक्षदृश्यं वृत्तं वर्तुलमास्यं मुखं त्रपामा सामस्त्येन करोति नितरां लज्जावहं जातमिति शेषः। हा कष्टम्। त्रपयाऽकं दुःखं रात्यादत्ते लज्जासदं वृत्तं जातमिति

---

१ 'अवाप्योः—इत्यल्लोपे नञ्समासे अपिधावता प्रकटेन' इति सुखावबोधा। २ 'अत्र द्वयोरप्य-र्थयोः प्रकृतत्वात्केवलप्रकृतश्लेषः' इति जीवातुः।

या । हे यमे, पुराऽस्मद्गमनात्पूर्वं मां वरीतुमयासि त्वया प्रयत्नोऽकारि स्वयंवरं प्रति गतम् । यद्वा—तस्य गमनात्पूर्वं दूतीहस्तेनोपदानदानादिद्वारा मां वरीतुं प्रयत्नोऽकारि, तथा तत्र समक्षमेव नले वृते एतत्सर्वं प्रत्यागमनलक्षणमाचरणं तव त्रपां न करोतीति त्रपाऽकरं लज्जां नावहति । एवं कृतेऽपि निर्लज्जः सन् स्वगृहं गच्छन् त्वं वनितां मुखं कथं दर्शयितासि इति भाव इति । तथा विनैतत्स्वर्गगमनाचरणं लज्जावहं यदहास्यं हास्ययोग्यं न, अपितु—सर्वैर्हास्यमेवेति काकुर्वा । मुखं लज्जाकरम्, गृहगमनाचरणमपि लज्जाकरमेवेति वा । (पुरा) यासीति 'यावत्पुरा-' इति भविष्यति लट् । पक्षे 'पुरि लुङ् चा-' इति भूते लट् । पक्षे 'यसु प्रयत्ने' भावे क्विप् ॥

यमः कलिमाह—

पत्यौ तया वृतेऽन्यस्मिन्यदर्थं गतवानसि ।
भवतः कोपरोधस्तादक्षमस्य वृथारुषः ॥ १५६ ॥

पत्याविति ॥ हे कले, त्वं यदर्थं यस्या निमित्तेन गतवान्गमनयुक्तोऽसि यां वरीतुमेव गच्छसि तया पूर्वमेवान्यस्मिन्नलौ वृते स्वभर्तृत्वेनाङ्गीकृते सति भवतः कोपस्य रोधो निवारणं स्ताद्भवतु । यतोऽक्षमस्यासमर्थस्य अत एव—वृथा रुट् कोपो यस्य । तस्मादिदानीं कोपो रोद्धव्यः, न कार्य इत्यर्थः । नलद्वेषे कारणाभावाद्वा निष्कारणरोषस्य । यस्मादसहनस्यासमर्थस्य वा रुषो वृथा कोपो निष्फलः, तस्मात्कोपो निवार्य इति वा ॥

कविरेतदेव यममाह—हे यम, यां वरीतुं गतवानसि तया नले पत्यौ वृते भवतः सकाशादन्योऽधस्तादधरो हीनः कः, अपि तु त्वमेव । त्वत्सकाशादन्योऽधो हीनः कः स्यात्, अपि तु—त्वमेव हीन इति वा । अपरोऽर्थात्त्वदन्यो भवमुत्पत्ति तत्स्वपक्षयं प्रापयतीति भवतो निरर्थकजन्मा, अत एव—अधो हीनः कः स्यात्, अपि तु—त्वमेव हीन इति वा । संबुद्ध्यन्तं वा निरर्थकजन्मन्नित्यर्थः । अक्षमस्य भूसंरोहितस्य देवस्य रुषो वृथा । मत्सादृशानामेव रोषाः सफलाः, न तु भवादृशानामित्यर्थ इति वा । अक्षमासहमासमर्थ यम वृथा निष्कारणनलान्प्रति रुषः कोपान् स्म मा कुर्वित्यर्थ इति वा । यस्यै यदर्थं 'चतुर्थी तदर्था-' इति समासः । गतवान्मतुप् । पक्षे भूते क्तवतुः । भवतः षष्ठी पञ्चमी च दिग्योगे । पक्षे प्रथमा 'अधातोः' इति प्रतिषेधात् 'अत्वसन्तस्य-' इति न दीर्घः । अधस्तादिति दिक्शब्दत्वादधरशब्दादस्तातिः, 'अस्ताति च' इत्यधरस्याधादेशः । अध इति । तस्मादेव 'पूर्वाधरा-' इत्यस्तिरधरस्याधादेशश्च । स्येति 'षोऽन्तकर्मणि' ॥

वरुणः कलिमाह—

यासि सरञ्जयन्कान्त्या योजनौघं महार्यता ।
समूढस्त्वं वृतेऽन्यस्मिन्किं न ह्रीस्तेऽत्र पामर ॥ १५७ ॥

यासीति ॥ हे कले, कामकान्त्या त्वरं जयन्विश्वस्वलक्षणमास्त्रिकुरूपस्त्वं महान्तोऽवेन्तोऽश्वा यस्मिन्रथे तेन रथेन कृत्वा योजनौघं चतुःकोशरूपयोजनसमूहमतिदूरमिदानीमपि यासि व त्वं मूढो मूर्खः । यस्मात्—हे पामर नीच, नैन्याऽन्यस्मिन्नले वृते सति अत्रास्मि-

न्नर्थे वर्तमानस्य ते तव ह्रीः किं न, अपि तु—भविष्यत्येव । भाविनीं वर्तमानां वा लज्जामव- गणय्यापि गच्छसि, तस्मान्मूर्ख एवेत्यर्थः । सेनापुरःसरमतिगौरं कामं कज्जलतुल्यया स्वकाय- कान्त्या पराभावुकः । तथा–जनौघं स्वसेनासमूहमपि पराभावुकः । प्रसरन्त्या श्यामकायकान्त्या सर्वसेनामग्रेसरं स्मरं च श्यामीकुर्वन्नतिकुरूपः एवंभूतो रथेन समूढः सम्यग्धृतो यस्त्वं तया- ऽन्यस्मिन्वृते सत्यपि यासि । अर्थात्स्वयंवरम् । तस्य तेऽन्नार्थे स्वयंवरे वा ह्रीः किं न भवेत्। अपि तु—भवेदेवेति वा ॥

एतदेव कलिर्वरुणमाह—हे अमर देव वरुण, कान्त्या दिव्यदेहदीप्त्या योजनौघं दूरं देशं रञ्जयन्दीप्रं कुर्वन् । जनौघं स्वयंवरस्थलोकसमूहं वा रञ्जयन्नत्याश्चर्यदिव्यरूपदर्शनान्नलकार- धारणाद्वात्मनि सानुरागं कुर्वन्नतिजवनहययुतेन विमानेन महता श्यामकर्णादिनाऽर्वता हयेन वा समूढस्तमारूढो यस्त्वं यासि स्म स्वयंवरमयासीः, तस्य तवान्यस्मिंस्तया त्वत्समक्षं वृते ह्रीः किमिति न भवति । अत्रप निर्लज्जेति धिक्कारः । अहं तु तदा नासं त्वं तु गतोऽपि न वृत इत्यपमानाल्लज्जया भवितुं युक्तम् । परं सा न जायत इति चित्रम् । अत एव चात्रपत्व- मित्यर्थः । अत्रप(ःसन्) न म्रियसे इत्यमरः । अन्योऽप्येवमनादरे कृते लज्जया म्रियते, त्वं तु निर्लज्जो न म्रियस इति चित्रमित्यर्थं इति वा । अत्रपया लज्जाभावेनामरेत्येकं पदं वा । त्रपायां सत्यामप्यमरेति वा । अत्रपया लज्जाभावेनामं रोगं पीडामस्मादृशां रासि ददासीत्यत्रपामर । तव निर्लज्जत्वेन वयमतिदुःखिनो भवाम इत्यर्थ इति वा । एते चत्वारोऽपि श्लोका यथाक्रममि- न्द्रादिदेववचनत्वेन ज्ञेयाः कलिकलहस्तु सर्वत्रानुस्यूतः । तत्रापि पूर्वं देववचः, पश्चात्कलिवचः । महार्वता, 'अर्वणस्त्रसौ–' इति त्रन्तादेशः, 'आन्महतः–' इत्याकारः । यासि स्मेति पक्षे 'लट् स्मे' इति भूते लट् ॥

नलं प्रत्यनपेतार्तिं तार्तीयीकतुरीययोः ।
युगयोर्युगलं बुद्ध्वा दिवि देवा धियं दधुः ॥ १५८ ॥

नलमिति ॥ देवा इन्द्रादयस्तार्तीयीकतुरीययोस्तृतीयचतुर्थयोर्युगयोर्द्वापरस्य कलेश्च युगलं नलं प्रत्युद्दिश्यानपेतार्तिमनपगतव्यथं 'सर्वथा नलः पीडनीयः' इति नलेऽनिवृत्तापकारवाञ्छं । दिवि धियं दधुः । 'युगद्वयमस्मद्वचनं न शृणोति इतःपरं यत्किंचिद्भवतु, किमस्माकम्' विचार्य स्वर्गं गन्तुमीषुरित्यर्थः । तार्तीयीकः पूर्ववत् । तुरीयः, 'चतुरश्छयतावाद्यक्षरलो- ' इति छश्च लोपश्चेति ॥

द्वापरैकपरीवारः कलिर्मत्सरमूर्च्छितः ।
नलनिग्राहिणीं यात्रां जग्राह ग्रहिलः किल ॥ १५९ ॥

द्वापरैकेति ॥ कामादिसैन्यं परावर्त्य द्वापर एवैकः सहायो यस्य । तथा—मत्सरेण शुभद्वेषेण मूर्च्छितो विनष्ट इव, अतिमत्सरेण प्रवृद्धो वा । तथा—ग्रहिलो निवारणस्याना- नादाग्रहवान्कलिरवश्यं नलं निग्रहीष्यामीत्येवंरूपां नलनिग्राहिणीं यात्रां जग्राह निषधा- स्थ इत्यर्थः । किल यस्मात्—ग्रहिलः, तस्मात्प्रतस्थे । उपहासे वा । एकः परिवारो ति विगृह्य द्वापरेणैकपरीवार इति समासः । परीवारः, 'उपसर्गस्य घञि–' इति दीर्घः । निग्राहिणीम्, आवश्यके णिनिः ॥

नलेष्टापूर्तसंपूर्तेर्दूरं दुर्गानमुं प्रति ।
निषेधन्निषधान्गन्तुं विघ्नः संजघटे घनः ॥ १६० ॥

नलेति ॥ नलस्य इष्टापूर्तानां यागतडागादिधर्माणां संपूर्तेः संपूर्णत्वाद्धेतोर्नितरां धनैबाहुल्यात्पापरूपं प्रस्थितममुं प्रत्यनु दूरं दुर्गान्दुर्गमाननेन प्रवेष्टुमशक्यान्निषधान्गन्तुं गमनायामुं निषेधन्वारयन्घनो महान्निरन्तरश्च विघ्नो वक्ष्यमाणप्रकारेण संजघटे संजज्ञे । धर्मबाहुल्यं दृष्ट्वा सहसा तान्प्रवेष्टुं शङ्कित इत्यर्थः । अथ च—घनो मेघो जलपूर्तेर्दुर्गमं देशं गन्तुं विघ्नरूपो भवन्निषेधति । इष्टं च पूर्तं चेति द्वन्द्वे 'अन्येषामपि दृश्यते' इति दीर्घः ॥

मण्डलं निषधेन्द्रस्य चन्द्रस्येवामलं कलिः ।
प्राप म्लापयितुं पापः स्वर्भानुरिव संग्रहात् ॥ १६१ ॥

मण्डलमिति ॥ पापः कलिः, पापग्रहमध्ये गणितत्वात्पापः स्वर्भानुरिवामलं निष्पापं निषधेन्द्रस्य मण्डलं राष्ट्रम्, अमलं परिपूर्णप्रकाशं चन्द्रस्य मण्डलं बिम्बमिव सम्यग्ग्रहाद्धठाद्ग्रहणयोगवशाच्च म्लापयितुं विनाशयितुं ग्रसितुं च प्राप ॥

कियतापि च कालेन कालः कलिरुपेयिवान् ।
भैमीभर्तुरहंमानी राजधानीं महीभुजः ॥ १६२ ॥

कियतेति ॥ कालो युगलक्षणः समयरूपः । अथ च—पापरूपत्वाच्छ्यामवर्णः । अथ च—दारुणत्वात्कृतान्ततुल्यः । तथा—अहंमानी नलपीडनेऽहंकारवान्कलिः कियतापि भूयसा कालेन भैमीभर्तुर्महीभुजो नलस्य राजधानीं चोपेयिवान्प्राप्तवान् । पूर्वं देशं प्राविशत्, इदानीं तु राजधानीमिति वार्थः । भूमीभैमीलाभजने कलेरभिनिवेशाभिप्रायो विशेषणद्वयेन सूच्यते । कियताऽल्पीयसेति वा । अहमिति मननमहंमानः, सोऽस्यास्तीति, सर्वकार्येष्वहमेवेति मन्यते तच्छील इति वा ॥

इदानीं पुरप्रवेशविघ्नानाह—

वेदानुद्धरतां तत्र मुखादाकर्णयन्पदम् ।
न प्रसारयितुं कालः कलिः पदमपारयत् ॥ १६३ ॥

वेदानिति ॥ तत्र पुरे वेदानृग्यजुरादीनुद्धरतां गुणनिकां कुर्वतां श्रोत्रियाणां मुखात्पदं पदकारकल्पितं संहिताविभागरूपं पदमाकर्णयञ्छृण्वन्कालः समयरूपः, अथ च—पापरूपः कलिः पदमेकमपि चरणन्यासं प्रसारयितुं नापारयत् । पापरूपत्वादित्यर्थः । एतेन नलपुरस्य धर्मपूर्णत्वमुक्तम् । वेदान्, तद्योगे 'न लोका—' इति षष्ठीनिषेधः ॥

श्रुतिपाठकवक्त्रेभ्यस्तत्राकर्णयतः क्रमम् ।
क्रमः संकुचितस्तस्य पुरे दूरमवर्तत ॥ १६४ ॥

श्रुतीति ॥ तत्र पुरे श्रुतिपाठका वेदाभ्यासनिरतास्तेषां वक्त्रेभ्यः सकाशात्क्रमं पूर्वपदत्यागेनोत्तरपदग्रहणपाठविशेषं क्रमसंज्ञं [illegible] आकर्णयतः शृण्वतोऽस्य कलेः क्रमः [illegible]

---

१ 'स ग्रहात्' इत्यत्र पाठेषु 'स [illegible]' इति [illegible] व्याख्यातम् । जीवातौ तु श्लोक [illegible] नैव श्लोकः ।

दूरं नितरां संकुचितोऽवर्तत। क्रमाकर्णनाद्भयेन पापः पदमपि पुरश्चलितुमशक्तस्ततो देशाद्भुतं न्यवृतदित्यर्थः ॥

तावद्गतिर्धृताटोपा पादयोस्तेन संहिता।
न वेदपाठिकण्ठेभ्यो यावदश्रावि संहिता ॥ १६५ ॥

तावदिति ॥ तेन कलिना वेदपाठिनां कण्ठेभ्यो मुखेभ्यो यावत्संहिता पदक्रमरूपावस्थाद्वयविलक्षणा ऋगादिरूपा नाश्रावि नाकर्णिता तावत्कालं तावद्देशपर्यन्तं च प्रतिबन्धराहित्याद्धृताटोपा धृतसंरम्भा सत्वरा पादयोर्गतिः संहिता संयोजिता। यावत्कालं यावति न देशे संहिता नाकर्णिता, तावत्कालं तावद्देशपर्यन्तं च प्रतिबन्धराहित्याच्छीघ्रगतिरभूत्। यदा यस्मिंश्च देशे सा श्रुता तदैव तस्य गतिभङ्गोऽभूदित्यर्थः। यावत्संहिताऽश्रावि, तावत्पदयोः सत्वरा गतिर्न योजिता, अपि तु तावदेव योजिता। संहिताश्रवणपर्यन्तमेव सत्वरगतिः सोऽभूत्, नानन्तरमित्यर्थ इति वा ॥

तस्य होमाज्यगन्धेन नासा नाशमिवागमत्।
तथातत दृशौ नासौ क्रतुधूमकदर्थितः ॥ १६६ ॥

तस्येति ॥ तस्य नासा अग्निहोत्रादिहोमाज्यं होमसंबन्धि घृतं तस्य गन्धेन परिमलेन हेतुना नाशमिव मरणवेदनामिवागमदन्वभूदित्युत्प्रेक्षा। इवशब्द एवकारार्थो वा। तथा तेनैव प्रकारेणासौ कलिः क्रतुधूमेन कदर्थिते पीडिते दृशौ नेत्रे अपि नातत न प्रसारितवान्, किंचिन्न ददर्शेत्यर्थः। आज्यगन्धक्रतुधूमसंबन्धमात्रेण विव्यथ इत्यर्थः। अततेति तनोतेर्लुङि सिचि 'तनादिभ्यस्तथासोः' इति पाक्षिके सिज्लोपे तकारस्य झलादिङित्त्वाद् 'अनुदात्तोपदेशवनति–' इत्यनुनासिकलोपः ॥

अतिथीनां पदाम्भोभिरिमं प्रत्यतिपिच्छिले।
अङ्गणे गृहिणां तत्र खलेनानेन चस्खले ॥ १६७ ॥

अतिथीनामिति ॥ तत्र पुरेऽनेन खलेन कलिना गृहिणामङ्गणे चस्खले। यस्मादतिथीनां पदाम्भोभिश्चरणक्षालनोदकैरिमं पापरूपं कलिं प्रत्युद्दिश्यातिपिच्छिलेऽतितरां कर्दमयुक्ते। एवंविधमतिपवित्रमङ्गणं प्रवेष्टुं नाशकदित्यर्थः। अन्योऽपि पिच्छिले देशे पतति ॥

पुटपाकमसौ प्राप क्रतुशुष्ममहोष्मभिः।
तत्प्रत्यङ्गमिवाकर्ति पूर्तोर्मिव्यजनानिलैः ॥ १६८ ॥

पुटेति ॥ असौ कलिः क्रतुशुष्मा यागसंबन्धी वह्निस्तस्य महोष्मभिः प्रकृष्टतापैः कृत्वा पुटाभ्यां पुटयोर्वा पाकमुभयपार्श्वयोः पात्रादिसान्तरमग्निसंयोगमिव प्रापत्। प्रतिगृहं यागबाहुल्याद्वामदक्षिणपार्श्वयोर्वह्नितापैर्नितरां पीडामन्वभूदित्यर्थः। तथा–पूर्तानां धार्मिकनिर्मितवापीकूपतडागादीनामूर्मयस्तरङ्गास्तद्रूपाणि व्यजनानि तेषामनिलैर्वायुभिस्तस्य प्रत्यङ्गं सर्वाङ्गमकर्तीव छिन्नमिवाभूदित्युत्प्रेक्षा। प्रत्यवयवकर्तनेन च पीडातिशयाद्वाप्यादितरङ्गवायुसंसर्गमात्रेण नितरां व्यथितोऽभूदित्यर्थः। 'बर्हिः शुष्मा कृष्णवर्त्मा' इत्यमरः ॥

पितॄणां तर्पणे वर्णैः कीर्णाद्वेश्मनि वेश्मनि।
कालादिव तिलात्कालाद्दूरमत्रसदत्र सः ॥ १६९ ॥

पितृणामिति ॥ अत्र पुरे वेश्मनि प्रतिगृहं ब्राह्मणादिचतुर्वर्णैः पितृणां तर्पणे जलतर्पणे विषये कीर्णात्क्षिप्तात्पितृप्रियात्कालात्कृष्णवर्णात्तिलात्तस्मात्स कलिः कालात्कृतान्तादिव दूरं नितरामत्रसदृपसाप । 'तर्पणैः' इति पाठे—तर्पयन्तीति तर्पणैरिति वर्णविशेषणम् । तिलादिति जातावेकवचनम् ॥

स्नातृणां तिलकैर्मेने स्वमन्तर्दीर्णमेव सः ।
कृपाणीभूय हृदयं प्रविष्टैरिव तत्र तैः ॥ १७० ॥

स्नातृणामिति ॥ स कलिः स्नातृणां स्नानं कुर्वतां वैदिकानां तैस्तादृशैर्गोपीचन्दनादिरचितैर्ललाटादिस्थानस्थैर्द्वादशभिस्तिलकैः कृपाणीभूय खड्गतामङ्गीकृत्य तस्य कलेर्हृदयं विदार्य प्रविष्टैरिव स्वं स्वकीयमन्तः शरीरमध्यं दीर्णमेव शकलीभूतमेव मेने । कृपाणैर्हि विदारणं भवतीति युक्तम् । खड्गाकारांस्तिलकान्दृष्ट्वा बिभाय इत्यर्थः ॥

पुमांसं मुमुदे तत्र विदन्मिथ्यावदावदम् ।
स्त्रियं प्रति तथा वीक्ष्य तमथ म्लानवानयम् ॥ १७१ ॥

पुमांसमिति ॥ तत्र पुरेऽयं पुमांसं मिथ्यावदावदं मृषाभाषिणं विदञ्जानन्स्वमित्रलाभान्मुमुदे । अथ पश्चात्तं नरं स्वस्त्रियं प्रत्युद्दिश्य तथाऽलीकभाषिणं वीक्ष्य ज्ञात्वा मित्रनाशादिव दुःखवशान्म्लानवान्म्लानतां गतः । पत्नीं प्रति क्रीडायामसत्यदोषाभावाद्यथितोऽभूदित्यर्थः । 'न नर्मयुक्तं वचनं हिनस्ति स्त्रीपुंसयोः–' इति भारतादौ । विदन्, 'विदेः शतुर्वसुः' इत्यत्र विकल्पानुवृत्तेर्वसोरभावः । एवं 'चतुर्दशतयीं विद्यां विदद्भिः–' इत्यत्रापि ज्ञेयम् । वदावदं, 'चरिचलि–' इत्यादिना द्वित्वमभ्यासस्याक्च । म्लानवान्, क्तवतोस्तकारस्य 'संयोगादेरातः–' इति नः ॥

यज्ञयूपघनां जज्ञौ स पुरं शङ्कुसंकुलाम् ।
जनैर्धर्मघनैः कीर्णां व्यालक्रोडीकृतां च ताम् ॥ १७२ ॥

यज्ञेति ॥ स यज्ञयूपैः खादिरौदुम्बरपशुबन्धस्तम्भैर्घनां नितरां व्याप्तां तां पुरं शङ्कुभिस्तीक्ष्णाग्रकीलैः संकुलां व्याप्तामिव जज्ञौ मेने । तथा—धर्मघनैर्जनैः कीर्णां तां पुरं व्यालैः सर्पैर्दुष्टश्वापदैर्वा दुष्टगजैर्वा क्रोडीकृतां सर्वत्र पूर्णां व्यालाः क्रोडे मध्ये यस्यास्तामेतादृशीं कृतामिव मेने । कीलसर्पादिनिर्व्याप्तं स्थानं यथा प्रवेष्टुमशक्यम्, तथा सा पुरी तस्य प्रवेष्टुमशक्या जातेत्यर्थः । 'व्यालो भुजंगमे क्रूरे श्वापदे दुष्टदन्तिनि' इति विश्वः । रेफान्तः पूःशब्दः स्त्रीलिङ्गः । चः समुच्चयार्थ इवार्थो वा ॥

स पार्श्वमशकद्गन्तुं न वराकः पराकिणाम् ।
मासोपवासिनां छायालङ्घने धनमस्खलत् ॥ १७३ ॥

स इति ॥ वराकः क्वचिदपि स्थानालाभाद्दीनः स कलिः पराकिणां द्वादशरात्रोपवासरूपपराकाख्यकृच्छ्रविशेषव्रतचारिणां पार्श्वं गन्तुं नाशकत् । तथा—मासोपवासिनां कायप्रविच्छायाया अपि लङ्घनेऽतिक्रमणे तस्या अपि समीपे गन्तुं घनं नितरामस्खलदत्रस्तोऽभूत् । तच्छायामपि द्रष्टुं नाशकदित्यर्थः । वराकः, 'जल्पभिक्ष–' इति षाकन् ॥

---

१ 'विन्दन्' इति पाठः सुखावबोधायाम् । २ 'व्याड' इति पाठः सुखावबोधायाम् ।

आवाहितां द्विजैस्तत्र गायत्रीमर्कमण्डलात् ।
स संनिदधतीं पश्यन्दृष्टनष्टोऽभवद्भिया ॥ १७४ ॥

आवाहितामिति ॥ तत्र पुरे स द्विजैस्त्रैवर्णिकैः 'आगच्छ वरदे—' इत्यादिमन्त्रैरावाहिताम् अनन्तरमर्कमण्डलाद्भक्त्यतिशयसामर्थ्यात्सूर्यबिम्बान्निर्गत्य दिव्यरूपेण संनिदधतीं तत्समीपमागच्छन्तीं प्रातःसंध्याधिदेवतां गायत्रीं पश्यन्गायत्र्याः सकाशाद्भयेन गायत्र्यैवादौ दृष्टः पश्चात्तदानीमेव नष्टोऽदृश्योऽभवत् । संध्यावन्दनं कुर्वतो द्विजान्दृष्ट्वा गायत्री मां विनाशयिष्यतीति ततः स्थानात्पलाय्य गत इत्यर्थः । 'गायत्री सूर्यबिम्बस्था—' इति ध्यानम् । अर्कमण्डलादावाहितामिति वा । दृष्टनष्टः, 'पूर्वकाल—' इति समासः ॥

स गृहे गृहिभिः पूर्णे वने वैखानसैर्घने ।
यत्याधारेऽमरागारे क्वापि न स्थानमानशे ॥ १७५ ॥

स इति ॥ स गृहिभिर्गृहस्थैः पूर्णे गृहे, तथा—वैखानसैर्वानप्रस्थैर्घने व्याप्ते वने, तथा—यतीनां परमहंसानां संन्यासिनामाधार आश्रयभूतैर्व्याप्तेऽमरागारे । क्वापि कस्मिन्नपीति सर्वत्र योज्यम् । देवालये स्थानं न आनश आश्रयं न प्राप । गृहिभिर्गृहे पूर्णे सतीति सतिसप्तमी वा सर्वत्र ॥

क्वापि नापश्यदन्विष्यन्हिंसामात्मप्रियामसौ ।
स्वमित्रं तत्र न प्राप्नोदपि मूर्खमुखे कलिम् ॥ १७६ ॥

क्वापीति ॥ असौ कलिस्तत्र पुर आत्मनः प्रियामिष्टां निषिद्धां हिंसाम् । अथ च—स्त्रियम् । अन्विष्यन्नपि क्वापि कस्मिन्नपि देशे नापश्यत् । तथा—कलहप्रियत्वान्नामसाम्याच्च स्वस्य मित्रं कलिं कलहं मूर्खाणामपि मुखे संभाविते स्थले नाप्नोत् । मूर्खा अपि तत्र न कलहायन्ते हिंसाकलहयोरभावात्तत्र स्थितिं न लेभ इत्यर्थः । अन्योऽपि यत्र स्वस्त्रीमित्राद्यभावस्तत्र क्षणमपि न तिष्ठतीत्युक्तिः ॥

हिंसागवीं मखे वीक्ष्य रिरंसुर्धावति स्म सः ।
सा तु सौम्यवृषासक्ता खरं दूरान्निरास तम् ॥ १७७ ॥

हिंसेति ॥ मखे गोमेधाख्ये यज्ञे हिंसागवीं हिंसासंबन्धिनीं गवीं वीक्ष्य रिरंसुर्हृष्टचित्तः सः 'निषिद्धगोहिंसा मत्प्रिया' इति धावति स्म । सा तु हन्यमाना गौः पुनः सौम्ये सोमदेवताकद्रव्यसाध्ये वृषे धर्म आसक्ता तत्संबन्धिनी तत्साधिका सती । अभिचारादिदुष्टकर्मराहित्यात्सौम्यो रमणीयः पारलौकिको धर्मस्तत्साधिका वा । खरं पापरूपत्वाद्दुःसहम् । रलयोरभेदात्खलं वा । पापरूपं दूरादेव निरास निराचकार । अधर्मसाधनं गोहिंसादि दृष्ट्वा प्रवृत्तः पश्चाद्धर्मसाधनमग्नीषोमीयवैदिकपशुहिंसादि दृष्ट्वा मत्प्रिया हिंसा न भवतीति दूरात्परावृत्त इत्यन्वयः । 'मुखे' इति पाठे—हिंसाप्रतिपादिकां गां वाणीं यज्वनां मुखे वीक्ष्य । श्रुत्वेति यावत् । रिरंसुरधावत् । सा तु वाणी सौम्यप्रतिपादिका सती तमखरम् 'अग्नीषोमियं पशुम्—' इत्यादिवाक्याकर्णनमात्रेण दुःखवशान्निस्तेजस्कं दूरान्निरासेति वा । अथ च—कामातुरः सुरतेच्छुः खरो गर्दभो गां वीक्ष्य यद्यपि धावति, तथापि सा रमणीयवृषभानुरक्ता सती विजातीयत्वाद्गर्दभं दूरान्निराचकारेति । मुखे यज्ञप्रारम्भ इति वा । अथच—गौर्यथा

मुमुद इति ॥ एष द्विजन्मनो ब्राह्मणस्य मदिरादानं मदिरास्वीकारं विदञ्जानन्पश्यन् 'अयं महापातकी' इति बुद्ध्वा मुमुदे । अनन्तरं च सौत्रामणीमिष्टिमिन्द्रदेवताकं यागं कुर्वन्तं तं द्विजं दृष्ट्वाऽदूयत । 'सौत्रामण्यां सोमग्रहान्सुराग्रहांश्च गृह्णन्ति' इति श्रुतेर्मदिरादानस्य वैधत्वाल्लब्धाश्रयविनाशादिव विव्यथ इत्यर्थः । सौत्रामणी, देवतार्थे संबन्धमात्रे वाण्, 'अन्' इति प्रकृतिभावः ॥

अपश्यद्यावतो वेदविदां ब्रह्माञ्जलीनसौ ।
उदडीयन्त तावन्तस्तस्यास्राञ्जलयो हृदः ॥ १८३ ॥

अपश्यदिति ॥ असौ वेदविदां यावतो यावत्संख्याकान्बहून्ब्रह्माञ्जलीन्ब्रह्मयज्ञसमये क्रियमाणान्, हस्तस्वरकल्पनार्थं संयोजितान्करपुटान्वा, सूर्योपस्थायिनां गायत्रीमन्त्रजपाञ्जलीन् 'व्रतारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा । संहत्य हस्तावध्येयं स हि ब्रह्माञ्जलिः स्मृतः' इति मनूक्तलक्षणान्करसंपुटानपश्यत् । तावन्तस्तस्य कलेर्हृदः सकाशादस्राञ्जलयो रक्तपूर्णा अञ्जलय उदडीयन्त उत्पतिता निर्गताः । तद्दर्शनमात्रेण नितरां विदीर्णहृदयोऽभूदित्यर्थः । 'तदस्र-' इति पाठ उपेक्ष्यः ॥

स्नातकं घातकं जज्ञे जज्ञौ दान्तं कृतान्तवत् ।
वाचंयमस्य दृष्ट्येव यमस्येव विभाय सः ॥ १८४ ॥

स्नातकमिति ॥ स विद्यास्नातकम्, व्रतस्नातकम्, उभयस्नातकं च स्वस्य घातकं विश्वासघातिनं जज्ञे मेने । तथा—दान्तं तपःक्लेशसहं जितेन्द्रियं नरं कृतान्तवद्यममिव भयहेतुं जज्ञौ ज्ञातवान् । तथा—वाचयंमस्य मौनिनो दृष्ट्यैव दर्शनमात्रेण मौनिकर्तृककर्मक—स्वकर्तृकमौनिकर्मकदर्शनेनैव वा विभायात्रसत् । कस्येव—यमस्येव । यमकर्तृकस्वकर्मक—स्वकर्तृकयमकर्मकदर्शनेनेव । यमेन दृष्टे, यमे वा दृष्टे, यथा भयं, तथा मौनिन इत्यर्थः । 'स्नातकस्त्वाप्लुतो व्रती', 'तपःक्लेशसहो दान्तः' इत्यमरः । 'गुरवे तु वरं दत्त्वा स्नायाच्च तदनुज्ञया । वेदव्रतानि वा पारं नीत्वा ह्युभयमेव वा' इति याज्ञवल्क्यः । स्नातीति स्नातकः याजकादित्वात्साधुर्ण्वुलन्तः । घातकं, हन्तेर्ण्वुलि 'हनस्तः' । जज्ञौ जज्ञ इति जानातेः कर्त्रभिप्रायक्रियाफलविवक्षया 'शेषात्कर्तरि-' इति परस्मैपदम् । तद्विवक्षया तु 'अनुपसर्गाज्ज्ञः' इति तङ् । दृष्ट्येति भयहेतुत्वाविवक्षयानपादानत्वम् ॥

स पाखण्डजनान्वेषी प्राप्नुवन्वेदपण्डितान् ।
जलार्थीवानलं प्राप्य पापस्तापादपासरत् ॥ १८५ ॥

स इति ॥ स पाखण्डजनान्वेषी, स्वपक्षीयान्वेददूषकान्विचारयन्सन् वेदेषु पण्डिताञ्श्रौतस्मार्तकर्मठान्प्राप्नुवन्पश्यंस्तापादतिदुःखाद्धेतोरपासरत्पलायितः । यतः—पापरूपः । क इव—अनलं प्राप्य जलार्थीव । तृषितो जलं विचिन्वन्नग्निं प्राप्यौष्ण्याद्दूरं पलायते ॥

तत्र ब्रह्मव्रणं पश्यन्नतिसंतोषमानशे ।
निर्वर्ण्य सर्वमेधस्य यज्वानं ज्वरति स सः ॥ १८६ ॥

त्रिसंध्यं तत्र विप्राणां स पश्यन्नघमर्षणम्।
वरमैच्छद्दृशोरेव निजयोरपकर्षणम् ॥ १९१ ॥

त्रिसंध्यमिति ॥ स तत्र त्रिसंध्यं प्रातर्मध्याह्नसायाह्नरूपं संध्यात्रयमभिव्याप्य विप्राणामघमर्षणम् 'ऋतं च–' इति ऋग्भिर्नासास्पर्शाभिमन्त्रितं चुलुकोदकं तत्प्रक्षेपोदकं वा पश्यन्निजयोर्दृशोरपकर्षणमुन्मूलनमेव वरं श्रेष्ठमित्यैच्छत्। मदीयनेत्रे यदि कोऽप्युदमूलयिष्यत् तर्ह्येतद्दुःखमूलं नाद्रक्ष्यत। तस्मान्नेत्रोन्मूलनमेव वरमिति मेन इत्यर्थः। तदपि दृष्ट्वा दुःखितोऽभूदिति भावः। अघमर्षणदर्शनव्यथा नेत्रापकर्षणव्यथातुल्या। त्रिसंध्यं, अत्यन्तसंयोगे द्वितीया ॥

अद्राक्षीत्तत्र किंचिन्न कलिः परिचितं क्वचित्।
भैमीनलव्यलीकाणुप्रश्नकामः परिभ्रमन् ॥ १९२ ॥

अद्राक्षीदिति ॥ भैमीनलयोर्व्यलीकस्यानृतस्याणु दोपलेशमपि प्रश्नकामः प्रष्टुं वाञ्छन्। अत एव तत्र पुरे कथकस्मित्रगवेषणार्थं परिभ्रमन्परितो विचरन्स कलिः क्वचिदपि स्थाने किंचिदपि स्वस्य परिचितं जिनक्षपणादिमित्रं नाद्राक्षीत्। नलेन भैम्या वा तत्रत्येन जनेन वा कृतेषु क्वचिदपि केषुचिदपि महापातकोपपातकादिषु मध्ये किंचिदपि परिचितपातकं नाद्राक्षीत्। 'त्वया भैमी नलोऽत्रत्यलोको वा स्पृष्टः किम्' इति कलिर्यत्पृच्छति, तदेकमपि पापं नास्त्येवेति भाव इति वा ॥

तपःस्वाध्याययज्ञानामकाण्डद्विष्टतापसः।
स्वविद्विषां श्रियं तस्मिन्पश्यन्नुपततापि सः ॥ १९३ ॥

तप इति ॥ पञ्चाग्निसाधनादि तपः, वेदपाठरूपः स्वाध्यायः, देवतोद्देशेन द्रव्यत्यागो यज्ञो यागः, एषां स्वस्य पापरूपत्वाद्विद्विषां वैरिणां तस्मिन्पुरे श्रियं समृद्धिं बाहुल्यं पश्यन्नकाण्डं निष्कारणमेव द्विष्टास्तापसा येन स कलिरुपततापातिदाहमाप। अतिदुःखितोऽभूदित्यर्थः। अन्योऽपि स्ववैरिलक्ष्मीं पश्यन्नुपतप्यते। यज्ञापेक्षया स्वाध्यायस्याभ्यर्हितत्वात्पूर्वनिपातः ॥

कम्रं तत्रोपनम्राया विश्वस्या वीक्ष्य तुष्टवान्।
स मम्लौ तं विभाव्याथ वामदेव्याभ्युपासकम् ॥ १९४ ॥

कम्रमिति ॥ स तत्र पुरे उपनम्राया उपासकस्य समीपमागत्य स्थितायाः स्वजातीयाया विजातीयाया गम्याया अगम्याया वा विश्वस्याः सर्वस्याः स्त्रियाः कम्रं कामुकं तां संभुञ्जानं कंचन नरं वीक्ष्य अयं महापातकी ममाश्रयो भविष्यतीति बुद्ध्या तुष्टवान्। अथ पश्चाद्विचारणायां क्रियमाणायां तं कम्रं वामदेवेन मुनिना दृष्टं ब्रह्मसाम 'कयानश्चित्र–' इत्यादि वामदेव्यं नाम साम तस्य ब्रह्मविद्याया अभ्युपासकं विभाव्य मत्वा मम्लौ दुःखितोऽभूत्। 'वामदेव्योपासने सर्वाः स्त्रिय उपसीदन्ति' इति श्रुतिः। 'दृष्टं साम' इत्यर्थे 'वामदेवाड्ड्यड्ड्यौ' इति ड्यः ॥

वैरिणी शुचिता तस्मै न प्रवेशं ददौ भुवि।
न वेदध्वनिरालम्बमम्बरे वितताार वा ॥ १९५ ॥

प्लवे तं पश्यन्दुःस्थो दूनोऽभवत्। 'वारुणं तु जलस्नानमाग्नेयं भस्मनोदितम्। वायव्यं गोरजःस्नानमाग्नेयं भस्मनोदितम्। यत्तु सातपवर्षेण दिव्यं तदिति पञ्चधा' इति मनुः। पावनस्नानस्य धर्म्यत्वाद्दूनोऽभूदित्यर्थः। प्राप्नोत्, लङ्। 'प्राप्तः' इति च पाठः॥

अधावत्क्वापि गां वीक्ष्य हन्यमानामयं मुदा।
अतिथिभ्यस्तथा बुद्ध्वा मन्दो मन्दं न्यवर्तत॥ २००॥

अधावदिति॥ अयं क्वापि यज्ञशालायां गृहे वा हन्यमानां गां वीक्ष्य साक्षात्का मुदाऽधावत्। अनन्तरं तु पुनस्तां गामतिथिभ्योऽभ्यागतार्थं हन्यमानां बुद्ध्वा मन्दो मूर्खो दुःखवशान्मन्दं शनैर्न्यवर्तत परावृत्तः। क्षणमपि तत्र स्थातुमशक्तः सन्मन्दं शीघ्रं परावृत्त इति वा। 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्' इति स्मृतेः॥

हृष्टवान्स द्विजं दृष्ट्वा नित्यनैमित्तिकत्यजम्।
यजमानं निरूप्यैनं दूरं दीनमुखोऽद्रवत्॥ २०१॥

हृष्टवानिति॥ स द्विजं नित्यानि संध्यास्नानादीनि, नैमित्तिकानि ग्रहणस्नानादीनि त्यजति तमकुर्वाणं दृष्ट्वा हृष्टवान्स्वाश्रयाशया जहर्ष। अनन्तरमेनं यजमानं यागे कृतदीक्षं निरूप्य निश्चित्य निराशत्वाद्दीनमुखः सन् अद्रवत्तस्मात्प्रदेशाद्दूरं पलायांचक्रे। 'दीक्षितो न ददाति न जुहोति' इत्यादिश्रुतेर्नित्यनैमित्तिककर्मत्यागस्य वैधत्वाद्दोषाभावात्ततोऽपि पलायित इत्यर्थः। नैमित्तिकः, आगतार्थे भवार्थे वा ठक्॥

आननन्द निरीक्ष्यायं पुरे तत्रात्मघातिनम्।
सर्वस्वारस्य यज्वानमेनं दृष्ट्वाथ विव्यथे॥ २०२॥

आननन्देति॥ अयं तत्र पुर आत्मघातिनं कंचन निरीक्ष्याननन्द। 'सर्वत एवात्मानं गोपायेत्' इति विध्यतिक्रमात्पापकार्ययं ममाश्रयः स्यादिति बुद्ध्या जहर्षेत्यर्थः। अथ विचारणायां सत्यामेनमात्मघातिनं नाम्ना सर्वस्वारस्य यज्ञस्य यज्वानं यजमानं दृष्ट्वा ज्ञात्वा विव्यथे। आसन्नमरणो ह्यविचिकित्स्यरोगादिस्तत्राधिकारी। 'सोऽन्त्येष्ट्यै सर्वस्वारस्ये यज्ञे आत्मानमेव पशुमन्त्रैः संस्कृतं घातयित्वा यज्ञभागमर्पयति' इति श्रुतिः। वैधत्वादात्मघातदोषाभावाद्व्यथित इत्यर्थः। आत्मघातिनं, ताच्छील्ये णिनिः॥

क्रतौ महाव्रते पश्यन्ब्रह्मचारीत्वरीरतम्।
जज्ञे यज्ञक्रियामज्ञः स भण्डाकाण्डताण्डवम्॥ २०३॥

क्रताविति॥ स महाव्रताख्ये क्रतौ ब्रह्मचारी चेत्वरी च तयो रतं मैथुनं पश्यन्यज्ञक्रियां भण्डानामसत्यभाषणादिव्यापारशीलानामकाण्डताण्डवमसमयोद्धतनृत्तमिव जज्ञे मेने। यतोऽज्ञो मूर्खः। भण्डा यथा बहुजनसमक्षं गुह्यादि प्रकाशयन्ति, तथा—दिवैव बहुजनसमक्षमश्लीलव्यापारकरणाद्यागकर्म भण्डव्यापारतुल्यमिति यज्वानः सर्वेऽप्यसभ्या इति मेन इत्यर्थः। 'महाव्रते ब्रह्मचारिपुंश्चल्योः संप्रवादः' इत्युपनिषत्। एति तच्छीलेत्वरी स्वैरिणी, 'इण्नश—' इति क्वरपि तुकि च 'टिड्ढाणञ्—' इति ङीप्॥

---

१ 'भाण्डा—' इति पाठे—'भण्डानामिदं भाण्डं तच्च तदकाण्डं ताण्डवं वा' इति व्याख्येयम्—इति सुखावबोधा।

यज्वभार्याश्वमेधाश्वलिङ्गालिङ्गिवराङ्गताम् ।
दृष्ट्वाचष्ट स कर्तारं श्रुतेर्भण्डमपण्डितः ॥ २०४ ॥

यज्वेति ॥ स यज्वनो यजमानस्य भार्याया अश्वमेधाख्यस्य यज्ञस्याश्वस्य लिङ्गमालिङ्गत्येवंशीलं वराङ्गं गुह्यं यस्यास्तस्या भावस्तत्ता तां दृष्ट्वा श्रुतेर्वेदस्य कर्तारं भण्डमाचष्टाऽकथयत् । द्वापरस्याग्र इत्यर्थः । उन्मत्तत्वादात्मानं प्रत्येव वा । यतोऽपण्डितः शास्त्रानुसारिबुद्धिरहितः 'पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः' । इति राजाज्ञावन्निर्विचारं वेदार्थोऽनुष्ठेयः । अश्वमेधप्रकरणे 'अश्वस्य शिश्नं महिष्या उपस्थे निधत्ते' इत्यादिश्रुतेः । 'कर्ता भण्डः' इति श्रुतिकर्तुर्भण्डत्वाभिधानान्मूर्खः ॥

अथ भीमजया जुष्टं व्यलोकत कलिर्नलम् ।
दुष्टदृग्भिर्दुरालोकं प्रभयेव प्रभाप्रभुम् ॥ २०५ ॥

अथेति ॥ अथैवं पुरपरिभ्रमणकरणवशा(त्सकलनगरे धर्मात्मनामेव दर्शनेन चित्तखेदा)दनन्तरं कलिर्भीमजया भैम्या जुष्टं प्रीत्या सेवितं नलं व्यलोकत । कमिव—प्रभया संज्ञादेव्या, अथच—असह्यतेजसा जुष्टं प्रभाप्रभुं सूर्यमिव । किंभूतमुभयम्—दुष्टा मत्सरादिदोषोपहता दृग् बुद्धिर्येषां तैः पापरूपैर्दुरालोकं पुण्यश्लोकत्वात्पतिमत्तया तथा च द्युतकारकलिप्रभृतिभिः सुखेन द्रष्टुमशक्यम्, काचकामलादिदोषदृग्भिर्दुर्दर्शं च । प्रकृष्टा भा कायकान्तिर्यस्या इति भैमीविशेषणं च । प्रकृष्टया कायकान्त्या पापिभिर्दुरालोकं नलमिति वा । दुरालोकं खल्, तद्योगे च 'न लोका-' इति षष्ठीनिषेधाद्दुष्टदृग्भिरिति तृतीया ॥

तयोः सौहार्दसान्द्रत्वं पश्यञ्शल्यमिवानशे ।
मर्मच्छेदमिवानर्च्छ स तन्नर्मोर्मिभिर्मिथः ॥ २०६ ॥

तयोरिति ॥ स तयोर्भैमीनलयोः सौहार्दं सान्द्रत्वमन्योन्यानुरागोत्कर्षं पश्यञ्शल्यमिव हृदि नाराचव्यधमिवानशे प्राप तत्तुल्यदुःखोऽभूदित्यर्थः । तथा—मिथोऽन्योन्यं तयोर्नर्मोर्मिभिः क्रीडाकल्लोलैः प्रीत्यालिङ्गनचुम्बनादिभिरनुभावैः कृत्वा मर्मच्छेदमिव प्राणहरमर्मशरीरावयवकर्तनमिवानर्च्छ प्राप । सौहार्दसान्द्रत्वस्य कारणत्वादालिङ्गनादिनर्मणश्च कार्यत्वात्पौर्वापर्यम् । सौहार्दम्, युवादित्वादण्यपि 'हृद्भग-' इत्युभयपदवृद्धिः ॥

अमर्षादात्मनो दोषात्तयोस्तेजस्वितागुणात् ।
स्प्रष्टुं दृशाप्यनीशस्तौ तस्मादप्यचलत्कलिः ॥ २०७ ॥

अमर्षादिति ॥ कलिरमर्षाद्भैमीनलयोर्विषयेऽसहिष्णुत्वरूपाद्दोषात्, तथा—आत्मनो महापातकादिरूपाद्दोषाद्धार्मिकाप्रधर्षणाद्धेतोः, तथा—तयोर्भैमीनलयोस्तेजस्वित्वलक्षणाद्गुणात्तदुभयकारणक्रान्तिरूपाद्गुणात्त्वोन्नतत्वाद्विपक्षस्याप्रधर्षणीयत्वाद्धेतोस्त्रीनिमित्तैर्हेतुभिस्तौ भैमीनलौ न परं मनसा किं तु दृशापि नयनेनापि स्प्रष्टुमनीशोऽसमर्थः । किं पुनर्हस्तादिना, एवंभूतो यतोऽतस्तस्मात्स्थानादपि अचलत् कलिरपसर्पितः । एवंविधौ तौ दृष्ट्वा तत्रापि स्थातुमशक्तोऽपि चलित इत्यर्थः । अन्योऽपि मलिनस्तेजस्विनं द्रष्टुं सोढुमनलं दूरतः पलायते ॥

अगच्छदाश्रयान्वेषी नलद्वेषी स निःश्वसन् ।
अभिरामं गृहारामं तस्य रामसमश्रियः ॥ २०८ ॥

अगच्छदिति ॥ नलद्वेषी नलद्वेषपरः, अतएव तत्पराभवार्थमाश्रयान्वेषी निवासं मृग्यमाणः कुत्रचिदपि तदलाभाद्दुःखादमर्षेण च निःश्वसन्स कलिः रामेण श्रीरामेण समा तुल्या श्रीः शोभासंपद्यस्य तस्य नलस्याभिरामं वृक्षादिसमृद्धिमत्त्वाद्रमणीयं गृहारामं प्रासादसमीपवर्ति क्रीडावनमगच्छत् । समीपे स्थितौ क्रियमाणायां नलदोषविचारः सुशक इति गृहारामं प्राप्तवानित्यर्थः । श्रीरामसाम्येन नलस्य पावित्र्यं सौन्दर्यं संपदाधिक्यं भाविराज्यपरित्यागश्चेति सूचितम् । तदानीं रामस्य भावित्वे कव्यपेक्षयाभूतत्वात्प्रवाहस्यानादितया वा भूतत्वादुपमा युक्तैवेति ज्ञेयम् ॥

रक्षिलक्षवृतत्वेन बाधनं न तपोधनैः ।
मेने मानी मनाक्तत्र स्वानुकूलं कलिः किल ॥ २०९ ॥

रक्षीति ॥ कलिस्तत्र पुरे रक्षिणां रक्षकाणां लक्षं संघस्तेन यद्वृतत्वं परिवेष्टितत्वं तेन हेतुना प्रवेष्टुमप्यशक्यत्वात्तपोधनैः कृत्वा न बाधनं बाधयतीति बाधनमेवंविधं न भवति तापसानां तत्र प्रवेशाभावात्तापसनिमित्तस्वबाधारहितम्, अत एव—मनाक् ईषत्स्वानुकूलं स्वस्मै हितम्, एवंविधं मेने । विशेषणबलाद्विशेष्याक्षेपात्तमारामं स्वहितं मेन इत्यर्थः । यतो—मानी अभिमानवान् । नलपराभवार्थं तत्रैव निवासवाञ्छां दधारेत्यर्थः । किल प्रसिद्धौ । रक्षिलक्षवृतत्वेनैव बाधकम्, न पुनस्तपोधनैर्बाधकम् । अतस्तत्र पुरे तमाराममेव मनाक् स्वहितं मेन इत्यर्थः । रक्षकबाधने सत्यप्यदृश्यतयापि स्वस्य प्रवेष्टुं शक्यत्वान्नतु तपोधनबाधन इति मनागित्युक्तम् । एवं संकटे किमित्यवात्सीदित्यत आह—यतो मानी । अभिमानसाधनाय संकटमपि मानिनः सहन्त इत्यर्थ इति वा । रक्षकवृतत्वेन मुनिकर्तृकं बाधनं मनागपि तत्रारामे नास्तीति तं स्वानुकूलं मेन इति वा ॥

दलपुष्पफलैर्देवद्विजपूजाभिसंधिना ।
स नलेनार्जितान्प्राप तत्र नाक्रमितुं द्रुमान् ॥ २१० ॥

दलेति ॥ स कलिस्तत्रोद्यानवने दलैः पत्रैः पुष्पैः फलैश्च कृत्वा देवानां द्विजानामतिथीनां च पूजातद्विषयेणाभिसंधिनाशयेन कृत्वा देवद्विजपूजैवाभिसंधिराशयो यस्यैवंविधेन वा दलादिभिर्देवपूजां कर्तुकामेन नलेनार्जितानारोपितानाम्रादिद्रुमानाक्रमितुमारोढुमाश्रयितुं च न प्राप । तेषां धर्मोपयोगित्वात्, स्वस्य च पापरूपत्वात्तानाश्रयितुं नाशकदित्यर्थः ॥

अथ सर्वोद्भिदासत्तिपूरणाय स रोपितम् ।
बिभीतकं ददर्शैकं कुटं धर्मेऽप्यकर्मठम् ॥ २११ ॥

अथेति ॥ अथ स कलिर्धर्मे धर्मकार्ये विषयेऽकर्मठमकर्मशूरमपि पत्रादीनां देवाद्यनुपयोगाद्धर्मकार्यानर्हमपि सर्वेषामुद्भिदां वृक्षाणामासत्तेः सांनिध्यस्य पूरणाय वृक्षलतागुल्मादिजातमत्रास्तीति कीर्तिपूर्तिमात्राय तत्रोद्याने नलेनारोपितमेकं सर्ववृक्षाश्रितगुणस्यैकेनैव कृतत्वादेकसंख्यं बिभीतकं कुटं वृक्षं ददर्श । 'अनोकहः कुटः शालः' इत्यमरः । कर्मणि घटत इति, 'कर्मणि घटोऽठच्' । 'कर्मशूरस्तु कर्मठः', 'उद्भिदस्तरुगुल्माद्याः' इत्यमरः ॥

स तं नैषधसौधस्य निकटं निष्कुटध्वजम् ।
बहु मेने निजं तस्मिन्कलिरालम्बनं वने ॥ २१२ ॥

स इति ॥ स तस्मिन्वने नैषधसौधस्य निकटं समीपवर्तिनं निष्कुटस्य गृहारामस्य ध्वजं लक्ष्मभूतम्, अथच—उच्चोच्चतरत्वाद्ध्वजमिव तदग्रस्थित्वा नलदर्शनवशात्तच्छिद्रोपविचारोपायभूतं तं बिभीतकं निजं स्वीयमालम्बनमाधारं बहु मेने । 'गृहारामास्तु निष्कुटाः' इत्यमरः ॥

निष्पदस्य कलेस्तत्र स्थानदानाद्बिभीतकम् ।
कलिद्रुमः परं नासीदासीत्कल्पद्रुमोऽपि सः ॥ २१३ ॥

निष्पदस्येति ॥ तत्र पुरे वने च निष्पदस्याश्रयरहितस्य कलेः स्थानदानात्त्वेनैव तदाधारभूतत्वात्स बिभीतकः केवलमेवाश्रयभूतत्वात्कलिद्रुमः कलिसंबन्धी द्रुमः परं केवलं नासीदिति न । किंतु कलेः प्रत्यभिलाषपूरणात्कल्पद्रुमोऽप्यासीत् । अन्योऽपि निराश्रयस्याश्रयदानात्कल्पद्रुमत्वेन व्यपदिश्यते । 'भूतावासः कलिद्रुमः' इत्यमरः ॥

पापिनापि कलिना बिभीतकः स्थानं प्राप्तमित्यत्र हेतुमुत्प्रेक्षते—

ददौ पदेन धर्मस्य स्थातुमेकेन यत्कलिः ।
एकः सोऽपि तदा तस्य पदं मन्येऽखिलस्ततः ॥ २१४ ॥

ददाविति ॥ यद्यस्माद्धेतोः कलिः प्रवाहानादितयाऽतीते कलियुगसमये धर्मस्यैकेन पदेन चतुर्थांशेन स्थानं ददौ । ततस्तस्मात्तदा नलराज्यसमये कृतयुगे स बिभीतकोऽप्येक एव तस्य कलेः पदं चरणः, अथच—स्थानम्, अखिलत्वं जात इत्यहं मन्ये । 'कृतं कर्म भुज्यते' इति न्यायेन कालान्तरे यावद्दत्तं तावदेव तदानीं तेन लब्धमित्यहं मन्य इत्युत्प्रेक्षा । धर्मस्य संबन्धमात्रविवक्षया षष्ठी ॥

उद्भिद्विरचितावासः कपोतादिव तत्र सः ।
राज्ञः साग्नेर्द्विजाद्दस्मात्संतापं प्राप दीक्षितात् ॥ २१५ ॥

उद्भिदिति ॥ तत्रोद्याने उद्भिदि वृक्षे बिभीतके विरचित आवासः स्थितिर्येन सः कलिः साग्नेरग्निहोत्रिणो द्विजात्क्षत्रियात्, यथा—दीक्षितात्सोमयागादिदीक्षायुक्ताद्दस्मा-ज्ञोऽग्निषेकादिगुणयुक्तत्वात्[illegible] राज्ञः नलात्संतापं प्राप । 'दस्मो द्विजातः' इत्येताभ्यां सामान्ये विशेषे तात्पर्यं सूचितम् । 'साग्निर्दीक्षितः' इत्येताभ्यां च [illegible] तात्पर्यं सूचितम् । एवंविधोऽयं ममोपरिस्थितं मां [illegible], मां च दस्म-[illegible] संतापं प्रापेत्यर्थः । अग्निहोत्रिणो नलस्य संबन्धिनः [illegible] संतापं प्राप । [illegible] तत्र [illegible] इत्यर्थ इति वा । [illegible] —कपोतादिव । यथा—[illegible], [illegible] संतापं [illegible] [illegible] [illegible] च मर्म

१ '[illegible]' इति पाठे—'[illegible]' इति सुखावबोधा ।
२ '[illegible]' इति सुखावबोधा ।

आगत्यं कदाचित्, तथेत्युपमा। स यथा प्राप्नोति तथेत्यर्थः। अपिः कपोतादकस्मन्नाम-
भिप्रोऽत एव अन्यत्रापि पापागकणिकापि जीवेत इत्येतिह्यम्। शाकेरतामशिशः कते-
विशेषो ज्ञातव्यमस्माति। अन्द्रिरा तृणकाष्ठादिना निर्मितगृहः पुरुषोऽप्युत्तरेणात्मोप-
वेशमात्रेण गृहदाहादभिनिःसृत्य कादुर्घोषरि विलोकितात्कपोतात्कालशिशः सकाशाद्यथा भयं
प्राप्नोति तथाऽऽत्मापि।·········कपोतो हि गृहं प्रविष्टोऽनिष्टसूचकः। एवमनुक्ता दनेगोऽतो-
स्थूलाच्च गृहादिरोहिणो दृष्टात्कपोतात्तुच्छचारी पक्षी नरो वा यस्यापि भयमश्नुते
वायुपतनशङ्कया वा यथा बिभेति तथेत्यर्थः। एवं यथामति व्याख्यातव्यम्॥

विभीतकमधिष्ठाय तथाभूतेन तिष्ठता।
तेन भीमभुवोऽभीकः स राजर्षिर्धर्षि न॥ २१६॥

विभीतकमिति॥ विभीतकमधिष्ठायाधिष्ठाय तथाभूतेन तिष्ठता तस्य धर्मोपयोगाभा-
वादुन्मत्तादितेन स्थितवता, अथ च—तादृशनलदर्शनात्पूर्वोक्तप्रकारेण बिभ्यता सता स्थितेन
कलिना भीमभुवोऽभीकः भैम्याः कामुकः स राजा चाराश्रयश्च राजत्वेऽपि धर्मप्रधानत्वान्मु-
नितुल्यो नलः नाधर्षि न पराभूतः। अपराभवे राजर्षित्वमेव हेतुः। अथच—विभीतक-
तुल्यं तरुमाश्रित्य तिष्ठता, तथा अतिमहता भूतेन भूतलं प्राप्तेन केनचित्प्रेतेन पिशाचेन
भीमाया भयानकाया भुवे रणभूमेः, दग्धभूमेर्वा हेतोरभीको भयरहितो राजर्षिर्धार्मिको न
पराभूयत इत्युचितम्। भीमां भूमिमनादृत्य निर्भय इत्यनादरे षष्ठी॥

तमालम्बनमासाद्य वैदर्भीनिषधेशयोः।
कलुषं कलिरन्विष्यन्नवात्सीद्वत्सरान्बहून्॥ २१७॥

तमिति॥ कलिः तं विभीतकमालम्बनमाश्रयमासाद्य प्राप्य वैदर्भीनिषधेशयोः कलुषं
पापाचरणमन्विष्यन्, गवेषयितुमित्यर्थः। बहून्वत्सरानवात्सीत्। दोषसंसर्गेण विना
तयोः पराभवेऽशक्तत्वाद्दोषपरीक्षार्थं बहुकालं तत्रैव स्थित इत्यर्थः। अन्विष्यन्, हेतौ
शता। अवात्सीत्, वसेर्लुङि सिचि 'वदव्रज—' इति वृद्धौ 'सः स्यार्धधातुके' इति तत्वम्।
वत्सरान्, अत्यन्तसंयोगे द्वितीया॥

यथासीत्कानने तत्र विनिद्रकलिका लता।
तथा नलच्छलासक्तिविनिद्रकलिकालता॥ २१८॥

यथेति॥ तत्र कानने तस्मिन्नुद्याने यथा येन प्रकारेण विनिद्रकलिका विकसितकोरका
लता वल्ली आसीत्, तथा तेन प्रकारेण नलस्य छले आसक्तिरभिनिवेशस्तद्वशाद्विगतनिद्रो
जागरूकः सावधानः कलिलक्षणः कालः समयो यत्र तद्भावस्तत्ता सापि वने आसीत्। विक-
सितकोरकवल्लीसंबन्धस्तस्योद्यानस्य यथाऽभूत्, तथा सदा (जाग्रत्) कलिसंबन्धोऽप्यभूदि-
त्येतावन्मात्रेण श्लेषमात्रेण वौपम्यम्। नलच्छलनार्थं, नलदोषान्वेषणार्थं च जागरूकः स
कलिस्तत्रावात्सीदित्यर्थः॥

एवं कलेरवस्थानं निरूप्य द्वापरस्यावस्थानमाह—

दोषं नलस्य जिज्ञासुर्बभ्राम द्वापरः क्षितौ।
अदोषः कोऽपि लोकस्य मुखेऽस्तीति दुराशया॥ २१९॥

दोषमिति ॥ लोकापवादरूपमनिशात्मिकं वा नलस्य दोषं जिज्ञासुर्द्वापर इत्यघटमानया दुराशया क्षितौ बभ्राम । इति किम्—लोकस्य मुखे जनवार्तायामदोषो दोषरहितः कोऽपि नरो नास्ति, सर्वो जनो यं निर्दोषमाह तादृशः पुरुष एव नास्तीति नलस्यापि कंचिद्दोषं कोऽपि वदिष्यतीति । 'न दोषः' इति पाठे—लोकोक्तावल्पोऽपि दोषो नास्ति, अपितु प्रायेण भविष्यतीति दुराशयेति काक्वा संभावनपरत्वेन व्याख्येयम् । दोषं, 'न लोका—' इति षष्ठीनिषेधः ॥

> अमुष्मिन्नारामे सततनिपतद्दोहदतया
>
> प्रसूनैरुन्निद्रैरनिशममृतांशुप्रतिभटे ।
>
> असौ बद्धालम्बः कलिरजनि कादम्बविहग-
>
> च्छदच्छायाभ्यङ्गोचितरुचितया लाञ्छनमृगः ॥ २२० ॥

अमुष्मिन्निति ॥ असौ कलिः श्यामपक्षहंसजातीयाः कादम्बविहगाः कलहंसाख्याः पक्षिविशेषास्तेषां छदाः पक्षास्तेषां छायायाः कान्तेरभ्यङ्ग उचिता योग्या तैलाभ्यङ्गेनेव स्वसंसर्गमात्रेण श्यामत्वादिरूपकारिणी श्यामतरा रुचिः कान्तिर्यस्य तस्य भावस्तत्ता तया कृष्णवर्णतया च चन्द्रलाञ्छनमृगः कलङ्कमृगोऽभूत् । किंभूतः—सततं सदा निपतन्निक्षिप्यमाणो धूपादिर्दोहदो यत्र तस्य भावस्तत्ता तयानिशं सदा उन्निद्रैर्विकसितैः प्रसूनैर्मल्लिकादिसितपुष्पैः कृत्वोज्ज्वलत्वादानन्ददायित्वाच्चामृतांशोश्चन्द्रस्य प्रतिभटे प्रतिस्पर्धिनि चन्द्रतुल्येऽमुष्मिन्पूर्वोक्त आरामे नलोद्याने बद्धः कृत आलम्बो वासो येन सः । चन्द्रे हि कलङ्केन भवितव्यम् । तत्स्थाने कलिरेवाभूदिति । निर्दोषे नलोद्याने । एतेन कलिरेव दूषकोऽभूदित्युक्तम् । तत्र न्यवात्सीदित्यर्थः । पुष्पफलानामाकालिकसमुद्भवे वृक्षेषु वृक्षायुर्वेदोक्तो धूपादिर्दोहदः क्रियते । यथा—चम्पके पिण्याकादिजलक्षेपः, बकुले सुन्दरीगण्डूषजलमदिरासेकः, रक्ताशोके च तरुणीचरणप्रताडनमित्यादिः ॥

> स्फारे तादृशि वैरसेनिनगरे पुण्यैः प्रजानां घनं
>
> विघ्नं लब्धवतश्चिरादुपनतिस्तस्मिन्किलाभूत्कलेः ।
>
> एतस्मिन्पुनरन्तरेऽन्तरसितानन्दः स भैमीनला-
>
> वाराद्धुं व्यचित स्मरः श्रुतिशिखावन्दारुचूडं धनुः ॥ २२१ ॥

स्फार इति ॥ स्फारे विशालतरे तादृशि उक्तप्रकारेण धनबहुले स्फारत्वेऽपि सर्वत्र धनपूर्णे वैरसेनेर्नलस्य नगरे प्रजानां पुण्यैर्हेतुभिर्घनं भूयांसं विघ्नं लब्धवतः प्राप्तवतो विराधकस्य कलेस्तस्मिन्नलोद्याने चिरं बहुकालं नलदोषगवेषणार्थमुपनतिरवस्थितिः किलाभूत् । किलेति पुराणादौ श्रूयत इत्यर्थः । प्रजानां पुण्यैः स्फारे व्याप्त इति वा हेतुगर्भं विशेषणम् । एतस्मिन्नन्तरेऽवसरे पुनरन्येद्युर्दोषमेकमलब्ध्वानन्तरसितानन्दः प्राप्तनिःसीमहर्षः स प्रसिद्धप्रभावः स्मरो भैमीनलयोराराद्धुं सेवितुं सुतरां पीडयितुं वा धनुः श्रुतिशिखा कर्णौ वेदशास्त्रं तां वन्दारुः स्तावकिनी चूडा अग्रभागो यस्यैवंविधमाकर्णपूर्णं व्यचित चकार । भैमीनलयोर्नगरं प्राप्तौ सुरेषु स्वर्गतेषु कलौ च नलान्तिके तदीयच्छिद्रान्वेषणपरत्वेन स्थितवति सति तस्थौ स्मरपर्वं प्रवृत्तमिति भावः । अनेनोत्तरसर्गे संभोगवर्णनस्य संगतिः सूचिता । कलिवर्णनप्रबन्धस्य मध्ये स्मरवर्णनं न दोषः ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम्।
यातः सप्तदशः स्वसुः सुसदृशि छिन्दप्रशस्तेर्महा-
काव्ये तद्भुवि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ १७ ॥

श्रीहर्षमिति ॥ एककर्तृकत्वात्स्वसुर्भगिन्यादिछिन्दस्य राजविशेषस्य प्रशस्तेर्वर्णनाग्रन्थस्य सुसदृशि तत्तुल्ये तद्भुवि श्रीहर्षरचिते सप्तदशानां पूरणः स्वभावसुन्दरः सर्गः समाप्तः। छिन्दप्रशस्तिरपि ग्रन्थो मया कृत इति सूचितम्। सोदर्याश्च तुल्या भवन्ति। 'छन्दःप्रशस्तेः' इति पाठे—छन्दोबन्धक्रमस्वरूपनिरूपणपरस्य ग्रन्थस्येत्यर्थः। सप्तदश इति 'तस्य पूरणे—' इति डट्। तद्भुवि भाषितपुंस्कम् ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणविरचिते
नैषधीयप्रकाशे सप्तदशः सर्गः ॥

अष्टादशः सर्गः।

सोऽयमित्थमथ भीमनन्दिनीं दारसारमधिगम्य नैषधः।
तां तृतीयपुरुषार्थवारिधेः पारलम्भनतरीमरीरमत् ॥ १ ॥

सोऽयमिति ॥ सर्गसंगतिरुक्तैव। सोऽयमुक्तसौन्दर्यादिगुणप्रभावो नल इत्थमुक्तप्रकारेण त्रैलोक्यनायकसमक्षं दारसारं स्त्रीरत्नभूतां तामिन्द्रादिभिरप्यभिलष्यमाणां भीमनन्दिनीमधिगम्य तृतीयपुरुषार्थवारिधेः कामरूपदुरवगाहजलधेः संबन्धिनीं पारलम्भनतरीं परतीरप्रापणनौकारूपां तां भैमीमरीरमद्रमयामास। तादृश्या विना कामपुरुषार्थपारं कामशास्त्रोक्तनानारतपारं न प्राप्यत इत्यनेन सौन्दर्यातिशयः सूचितः। अन्यापि तरी वारिधेः पारं प्रापयति। 'तारणतरीम्' इत्यपि पाठः। अरीरमत्, रमेर्ण्यन्ताल्लुङि चङि सन्वद्भावादित्वादि ॥

अनुरागातिशयादहोरात्रं तत्संभोगे दोषमाशङ्क्य परिहरति—

आत्मवित्सह तया दिवानिशं भोगभागपि न पापमाप सः।
आहृता हि विषयैकतानता ज्ञानधौतमनसं न लिम्पति ॥ २ ॥

आत्मविदिति ॥ स नलस्तया सह दिवानिशं भोगभाक् सन्नपि दिवामैथुननिषेधातिक्रमजनितं पापं नाप। यतः—आत्मविज्जीवब्रह्माभेदबुद्धिमान्। उक्तमर्थं युक्त्यन्तरेण द्रढयति—हि यस्मादाहृता कृत्रिमा विषयैकतानता स्रक्चन्दनादिविषयपरता ज्ञानेन परमात्मज्ञानेन धौतं क्षालितं कामक्रोधादिमलिनं मनो यस्य तं पुरुषं न लिम्पति पापसंस्पर्शिनं न करोति। स्वाभाविकी हि विषयपरता पापासञ्जिनी, परमात्मज्ञानवतश्च सा न भवति किंतु भोगात्पूर्व-

---

१ द्वित्रपुस्तकानुरोधेनेत्थं लिखितम्। पञ्चषपुस्तकेषु तु—
'इति श्रीशेषरामचन्द्रविरचितायां नैषधचरितभावद्योतनिकायां सर्वानवद्यकारिण्यां सप्तदशः सर्गः' इति लिखितं दृश्यते। पुस्तकानि तूभयविधान्यपि प्राचीनानि दृश्यन्ते। २ 'नन्दनाम्' इति पाठः जीवातुसुखाववोधासंमतः। ३ अस्मिन्सर्गे 'रथोद्धतावृत्तम्'—इति जीवातुः।

केति ॥ यद्गृहेषु भस्मकालिकनागुणानि तैलं यासु एतादृशा दीपिकाः नं सौगन्ध्य-कानि भैमीनलालंकृते देशे तिमिरे निराकृते तेनिरे प्रकाशमानगर्भं चक्रुः । किंभूताः —कामशरदूताः कामनागशृङ्गाः कामशरेण कर्पूरेण धूपविशेषेण वा युता निर्मिता कुङ्कुम-रागा वर्तयस्तन्तुसञ्जनिता दीपाभास्तुल्या दशा यासां ताः । तथा—सरस्य भैमीनलस्य भावो स्फुरन्तोऽनलानि करुणासाङ्कुराणां प्रथमोद्गमानामिव श्रीः शोभा यासां ताः । एताः दीपिकादर्शनमात्रेण कामोत्पत्तेर्मुखाङ्कुराश्च दीपिका कामप्रतापाङ्कुरा इवेत्युत्प्रेक्षा । राजनिकटस्था दीपाः कर्पूरादियुक्तलेपाः क्रियन्ते । 'पुरसागोमयाख्यानकाम्नादिनियोगदेः । सर्वैः समभुविर्धूपो मतः कामशरानिलः' इति । कामशरो धूपः ॥

कुङ्कुमैणमदपङ्कलेपिताः क्षालिताश्च हिमवालुकाम्बुभिः ।
रेजुरध्यततशैलजस्रजो यस्य मुग्धमणिकुट्टिमा भुवः ॥ ७ ॥

कुङ्कुमेणेति ॥ यस्य मुग्धानि रमणीयानि मणिकुट्टिमानि यासु ता भुवो रेजुः । किंभू-ताः—कुङ्कुमं चैणमदः कस्तूरी च तयोः पङ्केन कर्दमेन लेपिताः । तथा—जलमध्ये निक्षेपा-द्द्रवीभूतहिमवालुकाम्बुभिः कर्पूरवासितोदकैः क्षालिताश्च । तथा—अध्यति नलागमनमार्गे तता विस्तारिताः शैलजा हिमवत्समुद्भूतमालत्यादिमाला यासु । अतिशैत्यसौगन्ध्यार्थं पूर्वं कुङ्कुमकस्तूरीलेपः कृतः, अनन्तरं च तत्पङ्कस्पर्शभिया कर्पूरजलैः क्षालनं कृतम्, तेन पङ्को गतोऽधिकं च सौगन्ध्यं जातम्, अनन्तरं च भैमीनलचरणयोर्मृदुतरत्वान्मणिबद्धभूकाठिन्य-परिहारार्थं मृदुतरशैलजप्रक्षेप इति पाठक्रमादर्थक्रमो बलीयानिति पूर्वं कर्पूरोदकैः क्षालिताः पश्चाद्गोमयस्थानीयकुङ्कुमकस्तूरीपङ्केन कृताङ्गोद्वर्तनाः, अनन्तरं च धृतशैलेयमाला धृतमन्दार-मणिखचितमणिभूषणाः सत्यः शुशुभिर इति वा । 'यत्र' इत्यपि पाठः । 'वालुकांशुभिः' इति पाठे—शुभ्रकर्पूरचूर्णैः क्षालितास्फुरिताः कृतरङ्गमालिका इत्यर्थः । अत्र शब्दोऽपि क्नो घटते । लेपिताः, ण्यन्तान्निष्ठा ॥

नैषधाङ्गपरिमर्दमेदुरामोदमार्दवमनोज्ञवर्णया ।
यद्भुवः क्वचन सूनशय्यया भाजि भालतिलकप्रगल्भता ॥ ८ ॥

नैषधेति ॥ क्वचन नलनिद्रास्थानदेशे सूनशय्यया पुष्परचितास्तरणेन यस्य सौधभूध-रस्य संबन्धिन्या भुवो भूमेर्भालस्य ललाटस्य तिलकस्तस्य प्रगल्भता रमणीयताऽभाजि धृता । पुष्पशय्या यद्भूमेर्ललाटतिलक इव रेज इत्यर्थः । कीदृश्या—नलाङ्गस्य परिमर्देन संसर्गेण वरुणस्य वरदानसामर्थ्यान्मेदुरो नितरामधिकीभूत आमोदः सौरभं मार्दवं मनोज्ञः सदैवाम्ला-नत्वात्सुन्दरो वर्णश्च यस्यास्तया । तिलकोऽपि कस्तूर्यादिनिर्मितत्वात्सुगन्धिः सुवर्णश्च भवति । अथच—यद्भूसंबन्धिनि क्वचनदेशे नलाङ्गसंबन्धेनामोदादियुक्तया पुष्पशय्यातुल्ययाऽति-मृद्व्या भैम्या भालतिलकेन या प्रगल्भता प्रकाशमानता सा अभाजि भञ्जिता । संभोगवशा-त्तिलकस्य मृष्टत्वादित्यर्थ इति वा । अभाजि, पक्षे 'भञ्जेश्च चिणि' इति नलोपः ॥

---

१ 'समृद्धिमद्वस्तुवर्णनादुदात्तालकारः' इति जीवातुः । २ 'यान्ति भालतिलकप्रगल्भताम्' इति पाठे–'यस्य भूमयः सूनशय्यया कृत्वा भालतिलकप्रगल्भतां यान्तीत्यर्थः' इति सुखावबोधा । ३ 'निदर्शनालंकारः' इति जीवातुः ।

चित्रेति ॥ यं सौधं वीक्ष्याश्चर्यातिशयाद्बहु वारंवारं शिरः धुवन्कम्पयञ्छिल्पिनामधि चमत्कारिनानावस्तुनिर्माणनिपुणानां राट् राजा श्रेष्ठो विधिर्ब्रह्मा विश्वकर्मा वा, जरया त्वेन वातकी वातरोग्यकल्पि तर्कितो देवादिभिरिति शेषः । किंभूतम्—चित्र आलेख्य चित्राण्याश्चर्यरूपाणि वा तेषां तेषामनुकार्याणामभिनेयानां देवर्षिमनुष्यादीनां विभ्रमं विला विशिष्टां तत्तद्भ्रान्तिं वाधायीन्युत्पादयन्त्येवंभूतानि शुक्लनीलपीतादिवर्णवशात्काष्ठपाषाण स्वर्णादिघटितत्वाद्वानेकविधरूपाणि नानाप्रकारस्वरूपाणि रूपकाणि प्रतिमा यत्र । चित्रमाश्च तन्वन्ति विस्तारयन्ति चित्रयन्ति तादृशानीति पूर्ववत् । अचेतनास्वलीकास्वपि प्रतिमा चेतनत्वादिभ्रमोत्पादिनिर्माणनैपुण्याद्भुतभरकम्पितशिराः शिल्पिराडपि ब्रह्मा विश्वकर्मा जरया निमित्तोद्भूतवाताधिप्रचलितग्रीव इत्युत्प्रेक्षित इत्यर्थः । रमणीयतमोऽयमिति भावः । 'वातकी वातरोगी स्यात्' इत्यमरः । वातकी, मत्वर्थे 'वातातीसाराभ्यां कुक्च' इतीनिः कुक्च ॥

भित्तिगर्भगृहगोपितैर्जनैर्यः कृताद्भुतकथादिकौतुकः ।
सूत्रयन्त्रजविशिष्टचेष्टयाश्चर्यसञ्जिबहुशालभञ्जिकः ॥ १३ ॥

भित्तीति ॥ यः सौधो भित्तिगर्भे ये गृहा भित्तिभिराच्छादितान्यदृश्यमानानि गर्भागाराणि तेषु तैर्वा गोपितैरदृश्यत्वेन स्थापितैर्जनैः कृत्वा कृतमद्भुतकथादिकौतुकमाश्चर्य जनकरमणीयगोष्ठीगीतनृत्तवादित्रादिसंबन्धिकौतूहलं येन सः । गर्भगृहस्थानामदृश्यमानत्वा द्भित्तय एव गोष्ठ्यादि कुर्वन्ति चित्रमेतदिति वहिर्वर्तमानानां जनानां कौतूहलं यः करोती त्यर्थः । तथा—सूत्राणां तत्तत्प्रतिमादिसंचारिततन्तूनां यन्त्रान्नियमनादनुपलक्षितस्याकर्षण विक्षेपात्सूत्ररूपाद्वा यन्त्राज्जातया विशिष्टयाऽद्भुतया चेष्टयाऽन्योन्यचुम्बनालिङ्गनताल... व्यजनादिचालनक्रिययाकृत्याश्चर्यसञ्जिन्योऽतिचमत्कारकारिण्यो बहुयः शालभञ्जिकाः पुत्रि गजदन्तादिनिर्मिताः पुत्रिका यत्र सः । गोपितैः, ण्यन्तान्निष्ठा ॥

तामसीष्वपि तमीषु भित्तिगै रत्नरश्मिभिरमन्द्रचन्द्रिकः ।
यस्तपेऽपि जलयन्त्रपालुकासारदूरधुततापतन्द्रिकः ॥ १४ ॥

तामसीष्विति ॥ यः सौधस्तामसीष्वपि तमीषु तमोबहुलकृष्णपक्षरात्रिषु भित्ति रत्नरश्मिभिः ... किरणैः सुवर्णादिषु प्रतिफलितैर्मणिबद्धभूमि... ... चन्द्रिका ज्योत्स्ना यत्र । तमोलेशस्याप्यभावात् । तथा—तपेऽपि ग्रीष्मेऽपि ... ...निःसृतजलधाराभ्यः ... ... तन्द्रिका मूर्च्छा निःसृता येन सः । ... ... । तामसी, मत्वर्थीयप्रकरणे 'ज्योत्स्नादिभ्य उपसंख्यानम्' इत्यण् । ... ... 'कन्' इति कन् ॥

यत्र ... ...
... ... ॥ १५ ॥

यत्रेति । ... ...

रजतादिभित्तीनां तादृशप्रकाशाभावात्ताभिरेव कपटकुड्यत्वं त्याजितानि जालरूपेणैव प्रतीयन्ते । ततश्च प्रतिष्ठासामर्थ्यात्सचेतनौ सुरतलोलुपौ रतिस्मरावपि गवाक्षेषु दिवा जातभित्तिभ्रमावुभावपि कुड्यभ्रमेणाविचार्यैव विशङ्कौ यत्र सुरतं चक्रतुः, जालमार्गेण शब्दसंचाराच्च तत्कूजितानि तौ शुश्रुवतुरिति भावः । पुरोधसो मन्त्रप्रभावश्च सूचितः । तण्डुलचूर्णादिमण्डलिप्तं चित्रमयं वस्त्रं कपटकुड्यम् । दिवोष्मप्रवेशभिया गवाक्षेषु चित्रपटा ध्रियन्ते, रात्रौ च पवनागमनार्थमपनीयन्ते, तथा च दिनवद्रात्रावपि कुड्यबुद्ध्या विशङ्कं मणितानि चक्रतुरिति वा ।[1] अपवृणोत्याच्छादयतीत्यपवरो गृहगर्भ, पचाद्यच । 'प्रतिकृतिरर्चा पुंसि–' इत्यमरः ॥

कृष्णसारमृगशृङ्गभङ्गुरा स्वादुरुज्वलरसैकसारिणी ।
नानिशं त्रुटति यन्मुखे पुरा किन्नरीविकटगीतिझंकृतिः ॥ १९ ॥

कृष्णेति ॥ कृष्णो वर्णः सारः श्रेष्ठो यस्य तस्य मृगस्य शृङ्गवद्भङ्गुराऽतिवक्रा बहुभङ्गियुक्ता, तथा—स्वादुः श्रुतिमधुराः, अत एव उज्ज्वलाः प्रकाशमानाः शृङ्गारादयो रसास्तेषामुज्ज्वलस्य शृङ्गाररूपस्यैव वा रसस्य एकाऽद्वितीया मुख्या वा सारिणी कृत्रिमनदी शृङ्गाररसपरिपूर्णेत्यर्थः । एवंभूता गाननिपुणानां किन्नरीणां विकटा षड्जादिसप्तस्वराणामारोहावरोहलीलाविषमा गीतिर्गानं तस्या झंकृतिर्ध्वनिविशेषः तस्य सौधस्य मुखे पुरोदेशेऽनिशं सर्वदा न त्रुटति कदाचिदपि विच्छिन्ना नाभूत्, भैम्याः सकाशाद्गानकलाशिक्षाहेतोरुत्वतरस्य तस्य सुन्दरे द्वारि आगत्य गन्धर्वकन्या अपि यत्र सर्वदा जगुरिति भावः । वक्के च ग्रा(गा)-नसद्भावाद्यः सर्वदा गायतीवेत्युत्प्रेक्षा च (मुखशब्देन) सूच्यते । अथ च—मृगशृङ्गवद्वक्रगामिनी, तथा—स्वादूदका, तथा—किन्नर्य इव किन्नर्यो भ्रमर्यः कमलबाहुल्यात्तासां श्रेष्ठा गुञ्जनहुंकृतिर्यस्या एवंविधा विकसत्कमलभ्रमरीमञ्जुगुञ्जनयुता निर्मलजला एका कुल्या यस्य सौधस्य पुरोभागे कदाचिद्ग्रीष्मर्तावपि मात्रुटत् । बहुजलैव स्थितेत्यर्थः । एकविंशे सर्गे (१४४ श्लो०) 'तुङ्गप्रसादवासात्' इत्यनेन कुल्याया अपि वर्णयिष्यमाणत्वात्प्रकृते सौधवर्णनोपयोगित्वादयमर्थः कविना विवक्षित इति प्रतीयते । 'विकटः सुन्दरे प्रोक्तो विशालविकरालयोः' इति विश्वः । त्रुटति, भूते 'पुरि लुङ् चास्मे' इति लट् ॥

भित्तिचित्रलिखिताखिलक्रमा यत्र तस्थुरितिहाससंकथाः ।
पद्मनन्दनसुतारिरंसुतामन्दसाहसहसन्मनोभुवः ॥ २० ॥

भित्तीति ॥ यत्र सौधे पद्मनन्दनस्य ब्रह्मणः सुतायां सरस्वत्यां रिरंसुता संभोगाभिलाषस्तद्रूपममन्दं महत्साहसं अविचार्यकारित्वं तेन हसन्स्वसामर्थ्यदर्पेण सोल्लासो मनोभूर्यासु ताः, ब्रह्मणः सुतारिरंसुतायां भोगोत्पादने विषये तद्रूपे वा महत्साहसं कामस्यैव, तेन दर्पेण सोल्लासस्य कामस्य संबन्धिन्यो वा इतिहाससंकथाः पुरावृत्ताख्यायिकाः भित्तिषु चित्ररूपेण चित्रकारलिखितोऽखिलः क्रमः परिपाटी यासामेवंभूताः सत्यः तस्थुः । ब्रह्मणः कामपराभवादिकथाप्रबन्धरूपेण यद्भित्तिषु लिखिता वर्तन्त इत्यर्थः । ब्रह्मणः सुतारिरंसादिकं मत्स्यपुराणादवगन्तव्यम् ॥

---

१ 'अत्र [illegible] शृङ्गाररसलालसत्वेन [illegible]' इति [illegible] ।

पुष्पकाण्डजयडिण्डिमायितं यत्रगौतमकलत्रकामिनः ।
पारदारिकविलाससाहसं देवभर्तुरुदटङ्कि भित्तिषु ॥ २१ ॥

पुष्पेति ॥ यत्र सौधे गौतमकलत्रमहल्यां कामयते स कामी तस्य संभुञ्जानस्य देवभर्तुरिन्द्रस्य पुष्पकाण्डस्य कामस्य लोकत्रयजये डिण्डिमायितं वाद्यविशेषवदाचरितं पारदारिकस्य परस्त्रीगामिनो विलासवैभवं सुवर्णादिभित्तिषु रचितासु उदटङ्कि टङ्कैरुत्कीर्य लिखितम् । येनेन्द्रोऽपि पराभूतः तादृशस्य महाप्रभावस्य स्मरस्य सेवा युवाभ्यामपि नियतं कार्येति सुवर्णोट्टङ्कितभित्तिषु कामोद्दीपनार्थमिन्द्रपारदारिकविलासा यत्र टङ्कैरुल्लिखिता इत्यर्थः । डिण्डिमायितम्, उपमानात्कर्तुः क्यङन्तान्निष्ठा । परदारान्गच्छति पारदारिकः, 'गच्छतौ परदारादिभ्यष्ठग्वक्तव्यः' इति ठक् । उदटङ्कि, 'टकि बन्धे' इत्यस्मात्कर्मणि चिण् ॥

उच्चलत्कलरवालिकैतवाद्वैजयन्तविजयार्जिता जगत् ।
यस्य कीर्तिरवदायति स्म सा कार्तिकीतिथिनिशीथिनीस्वसा ॥२२॥

उच्चलदिति ॥ उच्चलसौन्दर्यादिना वैजयन्ताख्यस्येन्द्रप्रासादस्य विजयेन याऽर्जिता लब्धा सा कार्तिकी कृत्तिकानक्षत्रयुक्ता तिथिः पूर्णिमा तस्या निशीथिनी रात्रिस्तस्याः स्वसा तद्वदत्युज्ज्वला यस्य प्रासादस्य कीर्तिः कान्तिरुच्चलतामुड्डीयमानानां कलरवाणां पारावतानामालिः पङ्क्तिस्तस्याः कैतवाद्व्याजाज्जगदवदायति स्म शोधयति स्म । उज्ज्वलं चकारेत्यर्थः । एते कलरवा न भवन्ति, किंतु शरच्चन्द्रचन्द्रिकातुल्या कीर्तिरेवैतस्येत्यर्थः । 'पारावतः कलरवः' 'स्यात्प्रासादो वैजयन्तः' इत्यमरः । दायति, 'दैप्, शोधने' इति भ्वादिरवपूर्वः सकर्मकः, 'लट् स्मे' इति लट् । कार्तिकी, 'नक्षत्रेण युक्तः कालः' इत्यणि ङीप् । अत्र कृत्तिकायुक्तो दिवसः कार्तिक इति भाषितपुंस्कत्वसंभवेऽपि 'तिथयो द्वयोः' इत्यभिधानात्पुंलिङ्गेन तिथिशब्देन समासे स्त्रीलिङ्गस्य समानाधिकरणस्योत्तरपदस्याभावात् 'पुंवत्कर्मधारय—' इति सूत्रेण न पुंवत् । ततश्च कार्तिकी चासौ तिथिश्चेति समासः ॥

गौरभानुगुरुरोहिणीस्मरोद्वृत्तभावमितिवृत्तमाश्रिताः ।
रेजिरे यदजिरेऽभिनीतिभिर्नाटिका भरतभारतीसुधा ॥ २३ ॥

गौरेति ॥ गौरभानोश्चन्द्रस्य गुरुरोहिण्यां बृहस्पतिभार्यायां तारायां विषये स्मरजनितो य उद्वृत्तभावो गुरुतल्पगामित्वादाचारत्यागित्वं, चन्द्रतारयोर्विषये स्मरस्योद्वृत्तभावः कामजनितसामर्थ्यातिशयलक्षणं वा, इतिवृत्तं पुरावृत्तमाश्रिताः प्रतिपादयन्त्यः, तथा—भरतेन मुनिना प्रणीता भारती भरताख्यो नाट्यवेदस्तस्मिन्सुधा अमृतरूपाः । भरतोक्तनाट्यरीत्याऽभिनीयमानाः सत्यः, सुधामया इति यावत् । एवंभूता नाटिका दशरूपकान्तर्गतचतुरङ्कप्रबन्धविशेषा यस्य सौधस्याजिरेऽङ्गणेऽभिनीतिभिः सात्त्विकाङ्गिकवाचिकाहार्यभेदभिन्नैश्चतुर्विधैर्नटाभिनीयमानैरभिनयैः कृत्वा रेजिरे । तयोः स्मरोद्वृत्तभावस्य मितिः सम्यक्परिच्छित्तिः सैव वृत्तं व्यापारोऽवीतं वा प्रमेयं यत्रैवंविधनाटकादिप्रबन्धमाश्रिता इति वा ॥

शंभुदारुवनसंभुजिक्रियामाधवव्रजवधूविलासयोः ।
गुम्फितैरुपलसा सुभाषितैर्यस्य हाटकविटङ्कमङ्कितम् ॥ २४ ॥

१ 'उच्छलद' इति सुखावबोधापाठः ।

शंभ्विति ॥ यस्य सौधस्य हाटकविटङ्कं सुवर्णघटितकपोतपालिका शंभोर्दारुवने मन्दरकन्दरायां देवदारुवने गौर्या सह दिव्यसहस्रवर्षपर्यन्तं या सुरतक्रीडा, माधवस्य श्रीकृष्णस्य व्रजवधूभिर्गोपिकाभिः सह विलासो रासक्रीडादिः, तयोर्विषय उशनसा शुक्राचार्येण गुम्फितैः श्लोकरूपेण ग्रथितैः सुभाषितैरतिचमत्कारकारिनवीनार्थशब्दविशेषैः करणैः कर्तृभिर्वाऽङ्कितं चिह्नितम् । हरकृष्णकामविलासवर्णककाव्यरचितकाव्यश्लोकाः कामोद्दीपनार्थं यदीयहाटकविटङ्के टङ्कैरुट्टङ्किता इत्यर्थः । 'कपोतपालिकायां तु विटङ्कं पुंनपुंसकम्' इत्यमरः । विशेषेण टङ्क्यते बध्यत इति विटङ्कं पक्षिविश्रमार्थं कुड्याद्बहिर्निर्गतं दारु ॥

अह्नि भानुभुवि दाशदारिकां यच्चरः परिचरन्तमुज्जगौ ।
कालदेशविषयासहात्स्मरादुत्सुकं शुकपितामहं शुकः ॥ २५ ॥

अह्नीति ॥ यस्मिन्सौधे चरतीति यच्चरः शुकः पक्षी शुकपितामहं पराशरमुज्जगौ तारस्वरं गायति स्म । किंभूतम्—अह्नि दिने भानुभुवि सूर्यपुत्र्यां यमुनायां विषये दाशदारिकां कैवर्तकुमारीं योजनगन्धां परिचरन्तं संभुञ्जानम् । अतएव—यथाक्रमं कालस्य रात्र्यादेरनिषिद्धस्य, देशस्य तीर्थदेवस्थानादिव्यतिरिक्तस्यानिषिद्धस्य निजशयनागारादेः, विषयस्य परदारादिव्यतिरिक्तस्य स्वभार्यालक्षणस्य, असहात्कालादीनसहमानादधैर्यजनकात्स्मराद्धेतोरुत्सुकं कामातिरेकं सोढुमसमर्थमित्यर्थः । पौराणिककथ्यमानभारतादिकथाश्रवणमात्रेण प्राज्ञः शिक्षातिशयादतिमुखरो यद्विहारी कीरस्तादृशीं भारताद्युक्तां कथामुच्चैरनूदितवानिति भावः । अह्नीत्यादिना कामातुरस्य कालाद्यसहनत्वं समर्थितम् । अन्योऽपि साधुरेवंभूतं स्वपितामहमपि निन्दति । 'कैवर्ते दाशधीवरौ' इत्यमरः । यच्चरः, अधिकरणे चरेष्टः ॥

नीतमेव करलभ्यपारतामप्रतीर्य मुनयस्तपोर्णवम् ।
अप्सरःकुचघटावलम्बनात्स्थायिना क्वचन यत्र चित्रगाः ॥ २६ ॥

नीतमिति ॥ मुनयः परमात्मज्ञानचतुरा ऋषयो यत्र सौधे क्वचन कस्मिन्नपि भित्तिभागे चित्रगाश्चित्रे लिखिता वर्तन्ते । किंभूताः—करलभ्यं पारं परतीरं यस्य तद्भावस्तां नीतमेव लक्षणया संनिहितभाविफलत्वात्समाप्तिं प्रापितप्रायमेव । अथ च—संनिहितपरतीरमपि तपोरूपं दुस्तरमर्णवं समुद्रमप्रतीर्यापरिसमाप्यानुत्तीर्य च तपोविघ्नार्थमिन्द्रेण प्रेषितानामप्सरसां रम्भादीनामत्युच्चकठिनकुचलक्षणानां घटानामवलम्बनाद्धारणादाधाराद्धेतोः स्थायिनः स्थातुं शक्ताः । कुचमर्दनादिसंभोगकारिण इत्यर्थः । योऽपि प्रतीर्यमाणं समुद्रं नद्यादि वा तीरे संनिहितेऽपि भ्रान्तिवशादुत्तरीतुमशक्तः स जलमध्य एव घटादिकमवलम्बनमाश्रित्य चित्रलिखित इव निश्चलस्तिष्ठति । कुटेति पाठे—'कुटः कोटे घटे गेहे' इति विश्वः ॥

स्वामिना च वहता च तं मया स स्मरः सुरतवर्जनाज्जितः ।
योऽयमीदृगिति नृत्यते स यत्केकिना मुरजनिस्वनैर्घनैः ॥ २७ ॥[1]

स्वामिनेति ॥ यस्य सौधस्य संबन्धिना केकिना क्रीडामयूरेणेति हेतोर्घनैर्निबिडैर्मुरजस्वनैर्मृदङ्गध्वनिभिः, अथ च—तैरेव मेघैर्नृत्यते स्म । इति किम्—योऽयमीदृग्ब्रह्मादिवशीकारकारी स महाप्रभावः स्मरः स्वामिना कार्तिकेयेन प्रभुणा च तदीयमानत्वेन तं वहता पृष्ठेन

१ अयं श्लोको जीवातौ न व्याख्यातः ।

पौरुषमिति ॥ एवंभूतया भीमसुतया एवंभूते नले विषये कियत्किपरिमाणं साध्वसं भयं न प्रापि, अपि तु बहुभयं प्राप्तम्। अधाक्षि प्रापेत्यर्थः। किंभूते नले—पौरुषं दधति बलिनि। किंभूतया—स्वयं तु—योषिताऽबलया। तथा—स्वामिनि आत्मनः प्रभौ राज्ञे च। स्वयं तु—श्रितोऽङ्गीकृतस्तदीयभावस्तदीयत्वं यया नलदासीभूतया। तथा—यूनि त- रुणे। स्वयं तु—शैशवं बाल्यमतीर्णयाऽनतिक्रान्तया वयःसंधौ वर्तमानया। बलिनः स्वामिनो राज्ञस्तरुणाच्चाबलया दासीभूतया बालया भयं प्राप्यत इति युक्तमिति। अत्र च प्रथमसंभोगे किं वा भावीति ईदृशे नले ईदृश्या तया महद्भयं प्रापीति भावः। सर्वाण्यपि विशेषणानि हेतुगर्भाणि। अथ च—श्रितो नलविषयो भावो रमणाभिलाषो ययैताहृश्यापि स्वामिनि भर्तरि नले महद्भयं प्रापि। यतः—पूर्वोक्तगुणविशिष्टया चेति। एवंभूतेऽपि नले एवंभूतया तया साध्वसं कियदल्पमेव प्राप्तम्। बहु साध्वसं वर्तत एव, तथापि किंचित्साध्वसं परित्य- क्तम्। यस्मात्—श्रितो नलविषयो रमणाभिलाषो ययेति वा। अथ च—श्रितः परिशीलितो ज्ञातो नलाशयो यया बाल(ला)या मम कण्ठोपभोगं न करिष्यतीति निश्चितनलाभिप्राया भयं न प्रापेति भाव इति वा। श्रितोऽनुष्ठितो नलाशयो यया नलभावानुकूलवर्तिन्या प्रथमसंभोगे पौरुषमवलम्ब्य क्रीडाकौतुककारी भवति, कान्ता चानुत्तीर्णशैशवा किमत्र भावीति उभया किं- चिदप्यजानानाऽल्पभयं विहाय प्रियभावानुकूलमाश्रयतीति। एतदनुभवसाक्षिकमिति भावः॥

इदानीं लज्जानुभावपूर्वं कामशास्त्रानुरोधेन प्रथमसंभोगक्रममाह—

दूत्यसंगतिगतं यदात्मनः प्रागशिश्रवदियं प्रियं गिरः।
तं विचिन्त्य विनयव्ययं ह्रिया न स्म वेद करवाणि कीदृशम्॥३१

दूत्येति ॥ इयं प्राक् विवाहात्पूर्वं दूत्येन देवदूतव्यापारेण संगतिं गतं संदन्यं प्रा साक्षाद्दृष्टं नलं प्रियमात्मनो विरहप्रकाशिनीर्नवमसर्गोक्ता गिरो वाणीरशिश्रवदाश्रावयामास यत्, तं प्रियस्य स्ववचनश्रावणलक्षणं विनयस्य व्ययं नाशं धाष्टर्यं विचिन्त्य विशेषेण स्मृत्वा ह्रिया कृत्वा कीदृशं करवाणीति न वेद स्म नाज्ञासीत्। तदानीं मया यदुक्तं तन्महदनुचि कृतं, तत्प्रतिक्रिया कीदृशी, प्रकृते चार्थे किं कार्यमिति विनयव्ययस्मरणाज्जातया ह्रि किंकर्तव्यतामूढाभूदित्यर्थः। उत्तमत्वं सूचितम्। उत्तमा हि पूर्वानुचितस्मरणाल्लज्जन्ते। अतः तस्मरणेनापि सलज्जाऽभूत्, प्रारब्धसंभोगानुभवदशायां तु सलज्जत्वं किं वाच्यमिति भावः अशिश्रवत्, शृणोतेर्णौ चङि द्विर्वचने उपधाह्रस्वत्वे 'सन्वल्लघुनि–' इति सन्वद्भावे 'स्र तिशृणोति–' इत्यभ्यासस्य वेत्त्वम्। प्रियं, शृणोतेः शब्दकर्मत्वाण्णौ कर्मत्वम्॥

यत्तया सदसि नैषधः स्वयं प्राग्वृतः सपदि वीतलज्जया।
तन्निजं मनसिकृत्य चापलं सा शशाक न विलोकितुं नलम्॥३२

यदिति ॥ तया सदसि मिलितलोकत्रयसमक्षं वीतलज्जया निर्लज्जया सत्या सपदि स परप्रवर्तनाद्यभावेऽप्यात्मनैव वरणमालया कृत्वा प्राक् नैषधो वृत इति यत्, सा तत्तथा न वरणलक्षणं निजं चापलं धाष्टर्यं मनसिकृत्य विचार्य तदानीं लज्जां त्यक्त्वा मया मह ष्टर्यमवलम्बितमेतदनुचितमिति स्मृत्वा लज्जातिशयवशात्तदानीं नलं विलोकितुमपि शशाक। अत्राप्युत्तमत्वं सूचितम्। तच्चापलं मनसिकृत्य विशेषेणेता प्राप्ता चासौ लज्जा तया कृत्वा नलं वीक्षितुं नाशकदिति वा। मनसिकृत्य पूर्ववत्॥

आसने मणिमरीचिमांसले यां दिशं स परिरभ्य तस्थिवान् ।
तामसूयितवतीव मानिनी न व्यलोकयदियं मनागपि ॥ ३३ ॥

आसन इति ॥ अनुरागातिशयादेकासने वर्तमानयोस्तयोर्मध्ये स नलो मणिमरीचिभिः खचितोत्तमरत्नप्रसारिकिरणैर्मांसले व्याप्त आसने सिंहासने (स नलः) यां दिशं परिरभ्य यं सिंहासनप्रदेशमाश्रित्य तस्थिवान्, इयं भैमी तां दिशं मनागपि न व्यलोकयत् । उत्प्रेक्षते—असूयितवतीव ईर्ष्यावतीव । दिशः स्त्रीत्वादियं मद्भर्त्रालिङ्गितेति सपत्नीबुध्याऽसूयां कृतवतीव तां नापश्यदित्यर्थः । यतो मानिनी । लज्जाभयाभ्यां नापश्यत्, तत्रेयमुत्प्रेक्षा । असूयितवती, कण्ड्वादियगन्तात् क्तवतुः, उगित्त्वान्ङीप् ॥

ह्रीसरिन्निजनिमज्जनोचितं मौलिदूरनमनं दधानया ।
द्वारि चित्रयुवतिश्रिया तया भर्तृहूतिशतमश्रुतीकृतम् ॥ ३४ ॥

ह्रीति ॥ निरन्तरप्रवाहरूपत्वाद्ध्रीरूपायां सरिति निजस्यात्मनो निमज्जनं तस्योचितं योग्यं मौलेः शिरसो दूरं नितरां नमनमानानेर्नम्रीभावं दधानया, तया—द्वारि गृहद्वारदेशे चित्रलिखितयुवतिवत् श्रीः शोभा यस्यास्तया लज्जाभयाभ्यामन्तःप्रवेष्टुमशक्ततयाऽतिनिश्चलया तत्रैव स्थितया भैम्यापि भैम्यागच्छेति भर्तुर्नलस्य हूतीनामाह्वानानां शतमश्रुतीकृतं श्रुतमश्रुतं कृतम् । श्रुतं लज्जाभयाभ्यामनुत्तरदानानागमनाभ्यामश्रुतमिव कृतमित्यर्थः । नवोढाजातिरियम् ॥

वेश्म पत्युरविशन्न साध्वसाद्वेशितापि शयनं न साऽभजत् ।
भाजितापि सविधं न साऽस्वपत्स्वापितापि न च संमुखाभवत् ३५

वेश्मेति ॥ सा किमग्रे भविष्यतीति साध्वसाद्भयात्पत्युर्वेश्म न स्वयमविशत् । अनन्तरं सख्या नलेन वा वेशितापि गृहमध्यं प्रापितापि शयनं नाभजत् । ततोऽपि सख्या नलेन वा शयनं भाजितापि सा सविधं नलसमीपं यथा तथा नास्वपत्, किंतु दूरत एव निद्राति स्म । ततोऽपि सख्या नलेनैव वाहुपाल्यादिना सविधं स्वापितापि न च संमुखाऽभवत्, किंतु शय्यापार्श्वपट्टिकावलम्बिनी पराङ्मुख्येवाभूदित्यर्थः । प्रथमसंभोगे मुग्धाया जातिरियम् । साध्वसादिति सर्वत्र । अस्वपत्, 'अङ्गार्ग्य–' इति लङ्यट् । संमुखा, 'स्वाङ्गाच्चोपसर्जनात्–' इति विकल्पान्न ङीप् ॥

केवलं न खलु भीमनन्दिनी दूरमत्रपत नैषधं प्रति ।
भीमजाहृदि जितः स्त्रिया ह्रिया मन्मथोऽपि नियतं स लज्जितः ३६

केवलेति ॥ भीमनन्दिनी केवलं नैषधं प्रत्युद्दिश्य दूरं नितरामत्रपत लज्जां प्रापेति न, किंतु भीमजाहृदि वर्तमानया ह्रिया लज्जारूपया स्त्रिया जितः खलु जित एव सोऽतिप्रसिद्धपराक्रमः हृद्येव वर्तमानो मन्मथोऽपि नियतं बहुकालं लज्जितः । अथच—मनो मथ्नाति पीडयतीति मन्मथः पृषोदरादिः । एवंविधोऽपि जितो लज्जितः संकुचितश्चेति चित्रम् । ह्रीवशात्कन्दर्पविकारं न प्रकटीचकारेत्यर्थः .... बहुकालं .... नाद्यः । अन्योऽपि स्त्रिया जितो लज्जते ॥

---

१ ३३ तमं श्लोकौ न वर्तेते ॥

आत्मनापि हरदारसुन्दरी यत्किमप्यभिललाप चेष्टितुम् ।
स्वामिना यदि तदर्थमर्थिता मुद्रितस्तदनया तदुद्यमः ॥ ३७ ॥

आत्मनेति ॥ हरदारवद्गौरीवत्सुन्दरी सा आत्मनापि स्वयमेव यत्किमपि यत्किंचिच्चेष्टितुं तदवसरोचितं कटाक्षवीक्षणताम्बूलदानतालवृन्तचालनाद्यभिललाप कर्तुमैच्छत् । तदर्थं तस्मै प्रयोजनाय तद्वस्तुदानाय इङ्गितज्ञेन स्वामिना नलेन ताम्बूलं देहीति यदि अर्थिता याचिता तर्ह्यनया भैम्या तस्य नलस्योद्यमो याचनप्रयत्नो मुद्रितः ताम्बूलादीनामदानाद्व्यर्थीकृतः । तेन याचिता सती न ददाविति भावः । अपिरेवार्थे । स्वामिनेत्यनेनावश्यकर्तव्यतायां सत्यामपीति सूचितम् । गौर्यपि प्रथमसंभोगे हरेणार्थिता सत्येवमेवाकरोदिति ध्वनिः ॥

ह्रीभराद्विमुखया तया भियं सज्जितामननुरागशङ्किनि ।
स स्वचेतसि लुलोप संस्मरन्दूत्यकालकलितं तदाशयम् ॥ ३८ ॥

ह्रीभरादिति ॥ दूत्यकाले कलितं परीक्षितं तदाशयं भैम्यभिप्रायं सम्यग्दृढसंस्कारतया स्मरणपथारूढं स्मरन्विचारयन्स नलो ह्रीभराद्विमुखया तया विमुखत्वादेवाननुरागशङ्किनि किमस्या मय्यनुरागो नास्तीति शङ्काशीले स्वचेतसि सज्जितां जनितामनुरागाभावसंभावनां भीतिं लुलोप निरस्यति स्म । दूत्यावसरे मय्यनुरागातिशयादिन्द्रादीनपि परित्यज्य मदलाभे कृतमरणनिश्चयेयमिदानीमनुरागं न त्यक्ष्यतीतिनिश्चित्य जातां शङ्कां तत्याज । मुग्धा लज्जाभरादेव विमुखीयं नत्वननुरागादिति निश्चिकायेत्यर्थः । तदाशयं, शेषत्वाविवक्षया षष्ठ्यभावः ॥

पार्श्वमागमि निजं सहालिभिस्तेन पूर्वमथ सा तयैकया ।
क्वापि तामपि नियुज्य मायिना स्वात्ममात्रसचिवावशेषिता ॥ ३९ ॥

पार्श्वमिति ॥ तेन नलेन भयवशादेकाकिनी नलस्य सविधमनागच्छन्ती सा आलिभिर्भूयसीभिः सह निजं पार्श्वमागमि प्रापिता । भवतीभिरपि किंचित्कालमनया सार्धमागन्तव्यमित्यादिष्टाभिस्ताभिस्तां स्वसंनिधिं प्रापितवानित्यर्थः । अथानन्तरं कियतापि कालेन किंचिद्विश्वासप्राप्त्यनन्तरमेकयैकाकिन्यैव तया सख्या सह सख्यन्तरपरिहारेण संनिधिं प्रापिता । अथानन्तरं कियतापि कालेन तामपि सखीं क्वापि गन्धमाल्यताम्बूलाद्याहरणे विषयेऽलीकं नियुज्य गन्धाद्यानयेति व्याजात्प्रेष्य यतो मायिना कामशास्त्रोक्तकन्याविस्रम्भणकपटपटुना चतुरेण तेन स्वात्ममात्रो नल एव सचिवः सखा यस्याः स्वसहायैवैकाकिनी अवशेषिता स्वसमीपे स्थापिता । विजनोचितं स्वीयमिङ्गितमदर्शयत्, तदीयं चापश्यदिति भावः । कन्याविस्रम्भप्रकारोऽयम् । आगमि, ण्यन्तात्कर्मणि चिण् '(विभाषा) चिण्णमुलोः' इति दीर्घविकल्पात्पक्षे ह्रस्वः ॥

संनिधावपि निजे निवेशितामालिभिः कुसुमशस्त्रशास्त्रवित् ।
आनयद्व्यवधिमानिव प्रियामङ्कपालिवलयेन संनिधिम् ॥ ४० ॥

१ बहुत्रोपलभ्यमानमपि विभाषापदमत्र प्रक्षिप्तम् । 'विभाषा चिण्णमुलोः' इति सूत्रस्य नुम्विधायकत्वेन दीर्घविधायकत्वाभावात् । तस्मात् 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' इति सूत्रं बोध्यम् ॥

देव द्वयोर्भुजयोः प्रतिरोद्धुमशक्यत्वाद्वाभ्यामपि निजभुजाभ्यामेकैकस्य नलभुजस्य पर्यायेण रोधनादेकक इत्युक्तेऽपि द्वावपि भुजौ निरुद्धाविति ज्ञेयम्। एकक इति पर्यायाशयेनोक्तम्। द्वाभ्यामेकस्यैव निरोधेऽपि द्वितीयेन स्पर्शमात्रं कर्तुं शक्यते, न तु द्विभुजसाध्यमङ्कपाल्यालिङ्गनमित्येकक इत्युक्तमिति वा अन्योन्याभिमुख्येन सुप्तयोस्तयोरधस्तनबाहू शय्यासंलग्नत्वाच्छय्ययैव नियन्त्रितौ। आलिङ्गनोद्युक्तः शय्यासंलग्नो नलबाहुस्तल्पयन्त्रणनिरवकाशत्वात्पृष्ठदेशे प्रवेष्टुमशक्यत्वादवरुद्धः। उपरितनस्तूपरितनेन भैमीबाहुना चिरं प्रतिरुद्ध इत्याशयः ॥

हारचारिमविलोकने मृषाकौतुकं किमपि नाटयन्नयम्।
कण्ठमूलमदसीयमस्पृशत्पाणिनोपकुचधाविना धवः ॥ ४४ ॥

हारेति ॥ हारस्य एकावल्यादिमुक्ताहारस्य चारिमा सौंदर्यं तस्य विलोकने विषयेऽतिवृत्तस्थूलमुक्तायुक्तोऽत्यद्भुतोऽयं त्वदीयो हारो दर्शय दर्शयैनमित्यादि किमपि लोकोत्तरं मृषाकौतुकं नाटयन्नभिनयन्नयं धवो भर्ता नलः स्पर्शलोभवशादुपकुचं स्तनसमीपं धावत्येवंशीलेन पाणिनाऽदसीयं भैम्याः संबन्धि कण्ठमूलं कण्ठाधोभागमस्पृशत्। सार्वभौमस्य तस्यापूर्वस्य वस्तुजातस्य दृष्टत्वात्कुचस्पर्श एव तात्पर्याच्च तात्त्विककौतुकाभावेऽपि साक्षात्करस्पर्शमसहमानायास्तस्या हरसौन्दर्यदर्शने मृषाकौतुकनाटनेन कण्ठमूलस्पर्शव्याजेन कुचावेव स्पृशति। मुग्धाविस्रम्भणजातिः ॥

पुनः स्तनस्पर्शे उपायान्तरमाह—

यत्त्वयास्मि सदसि स्रजाञ्चितस्तन्मयापि भवदर्हणार्हति।
इत्युदीर्य निजहारमर्पयन्नस्पृशत्स तदुरोजकोरकौ ॥ ४५ ॥

यदिति ॥ स इत्युदीर्योक्त्वा भैमीकण्ठे निजमुक्ताहारमर्पयन् सन् हारार्पणमिषेण तस्या उरोजावेव काठिन्यादिगुणत्वेन कोरकौ पस्पर्श। इति किम्—हे भैमि, सदसि सभामध्ये त्वयाऽहं स्रजा मधूकमालया कृत्वा यद्यस्मादञ्चितः सर्वेषां समक्षं पूजितोऽस्मि। तत्तस्मान्मयापि मत्कर्तृका भवत्या अर्हणा पूजा अर्हति। उपकारस्य प्रत्युपकर्तव्यमिति न्याययुक्तेति। अर्हणा कुर्वेत्यपि पाठः ॥

नीविसीम्नि निहितं स निद्रया मुग्धुवो निशि निषिद्धसंविदः।
कम्पितं शयमपास यन्नयं दोलनैर्जनितबोधयाऽनया ॥ ४६ ॥

नीवीति ॥ जाग्रदवस्थायां करं निराकरिष्यतीति बुद्ध्या निशि निद्रया निषिद्धा वारिता संविज्ज्ञानं यस्यास्तस्याः मुग्ध्रुवो भैम्या नीविसीम्नि रसनाकलापमोचनार्थं वसनग्रन्थिकापरिसरे निहिते स्थापित एव नीविस्पर्शमात्रेण कम्पितं सात्त्विककम्पयुक्तं शयं हस्तं स नलो दोलनैःअनुद्भूतस्वगतसात्त्विककम्पनिमित्तहस्तचालनैर्जनितबोधया त्याजितनिद्रयाऽनया भैम्या करणभूतयापास निराकृतवान्। कीदृशः—अयं शुभावहविधिम्। संभोगानन्दमिति यावत्। तं नन् प्राप्नुवन्। 'अपासयन्निजम्' इति पाठे—भैम्या प्रयोज्यया स प्रयोजको नलो निजं हस्तमपासयदनोचयदित्यर्थः। कम्पमानकरसंस्पर्शमात्रेण जातबोधया तया स्वः करो निरुद्ध इत्यर्थः। अनयेति करणे तृतीया। पाठान्तरे तु प्रयोज्यकर्तरि ॥

स प्रियोरुयुगकञ्चुकांशुके न्यस्य दृष्टिमथ सिष्मिये नृपः ।
आववार तदथाम्बराञ्चलैः सा निरावृतिरिव त्रपावृता ॥ ४७ ॥

स इति ॥ स नृपः प्रियया ऊरुयुगलस्य कञ्चुकांशुके आवरणभूते वस्त्रे दृष्टिं न्यस्य अथा-नन्तरमेव सिष्मिये ईषदहसत् । सूक्ष्मवस्त्रावृतत्वात्सर्वं मया द्रष्टुं शक्यत एवेत्याशयेनेत्यर्थः । ल्यपा पूर्वकालत्वेऽभिहितेऽपि स्मितस्यानन्तर्येऽप्यव्यवहितेतरत्वद्योतनार्थमथशब्दः । नीविस्थापि-तकरापासनानन्तरमिति वा । अथ नलस्मितानन्तरं निरावृतिरिव वस्त्ररहितेव त्रपावृता सती सा तदूरुयुगवर्त्तं वस्त्रस्य तस्यैवाञ्चलैरग्रभागैराववाराच्छादयामास । वस्त्रस्यातिसूक्ष्मत्वाद्वृथात्वं-भावितनिजगोप्याङ्गदर्शना सती घनावयवत्वसंपादनार्थं तद्वस्त्रं तदञ्चलैरेव प्रावृणोदिति भावः । कालिनोरियं जातिः । अञ्चलैरिति बहुत्वं पुनःपुनरावरणक्रियाभेदात् ॥

बुद्धिमान्व्यधित तां क्रमादयं किंचिदित्यमपनीतसाध्वसाम् ।
किंच तन्मनसि चित्तजन्मना ह्रीरनासि धनुषा समं मनाक् ॥ ४८ ॥

बुद्धिमानिति ॥ बुद्धिमान् कामशास्त्रोक्तकन्याविस्रम्भणप्रकारचतुरोऽयमित्थं पूर्वोक्त-रीत्या क्रमात्परिपाट्या तामपनीतसाध्वसां त्याजिताकालिकसंभोगभयां व्यधिताकृत । किंचेत्य-धिकोक्तौ । न परमेतावदेव, किंत्वन्यच्च—तस्या मनसि वर्तमाना ह्रीस्तत्रैव स्थितेन चित्तज-न्मना स्वधनुषा समं सह मनाक् अनासि शिथिलिता । कामेन धनुषि किंचिदारोप्यमाणे लज्जाप्यल्पा जातेत्यर्थः । पूर्वं कामो भयलज्जाभ्यां त्याजितः । इदानीं तु भैमीभयं नलेन निराकृतम्, एका त्वेव ह्रीरवशिष्टा, सा कामेन सुखेनाल्पितेति भयलज्जयोः किंचिदपासनेन पूर्वं मन्दीभूतोऽपि कामः स्तोकं पुनरुल्ललासेति भावः । अनासि, 'ज्वलहल–' इति वार्ति-कान्मित्त्वस्य पाक्षिकत्वान्मित्त्वाभावे ह्रस्वाभावः । मित्त्वेऽपि वा 'चिण्णमुलोः–' इति पाक्षिको दीर्घः ॥

सिष्मिये हसति न स्म तेन सा प्रीणितापि परिहासभाषणैः ।
स्वे हि दर्शयति ते परेण कानर्घ्यदन्तकुरुविन्दनालिके ॥ ४९ ॥

सिष्मिय इति ॥ तेन परिहासभाषणैः परिहासप्रधानैः सप्रेमवचनैः प्रीणिता जनितप्री-तिरपि सा तस्मिन्हसत्यपि विकसत्कपोलनयनमलक्षितदन्तं सिष्मिये स्मितं चकार । दर्शित-दन्तं प्रकटहास्यं तु न चकार । अन्या तु परिहासप्रीणिता हसति, इयं तु नेति विरुद्धि-रपिशब्दार्थः । हि यस्मात्ते प्रसिद्धे अनर्घ्या निर्मूल्याः सुलक्षणा दन्तास्त एव ताम्बूलरागला-कुरुविन्दानि माणिक्यानि तेषां नालिके अल्पे ह्रस्वे वा नाले । स्वे आत्मीये सर्वस्वरूपे का कुलीना स्त्री परेणान्येन हास्येन येन केनचित्सुरूपेण च दर्शयति दर्शनवस्तू करोति । अपि तु हास्यं स्त्रीणां दोषायेत्युत्तमस्त्रीत्वात्प्रकटितदशनं हास्यं न चकारेति युक्तम् । महत्वमेव-त्वन्यस्मै प्रदर्श्यते । तेन च हसति स्मेति वा । स्मितहसितविहसितोपहसितापहसितातिहसितैर्हास्य-रसो भरतेन षड्धा निरूपित इति स्मितहसितयोर्भेदः । 'अणौ यः कर्ता' इति कर्तृसंज्ञानु-

---

१ 'आवरणान्यनाववृणोदिति ववारीत्यर्थः' इति जीवातुः । २ 'अत्र हि ममनखुर्दं ममयोः सर्वाकर्षणयोः चैतन्यविधेन वहोऽत्रकल्पना' इति जीवातुः ।

वादेन कर्मत्वविधानात्संज्ञापूर्वकविधेरनित्यत्वात्परेणेत्यत्र दृशेर्बुद्ध्यर्थत्वाद् 'गतिबुद्धि-' इति प्राप्तकर्मत्वाभावः ॥

वीक्ष्य भीमतनयास्तनद्वयं मग्नहारमणिमुद्रयाङ्कितम् ।
सोढकान्तपरिरम्भगाढता सान्वमायि सुमुखी सखीजनैः ॥ ५० ॥

वीक्ष्येति ॥ सखीजनैः सा सुमुखी सोढा कान्तस्य परिरम्भाणामालिङ्गनानां गाढता दृढपीडनं यया एवंभूताऽन्वमाय्यनुमिता । किं कृत्वा—भीमतनयायाः स्तनद्वयं स्तनद्वये मग्नानां हारमणीनां मुद्रया किंचिद्गम्भीररक्तीभूतस्थानश्रियाऽङ्कितं चिह्नितं वीक्ष्य । स्तनयोर्मग्नहारमणिदर्शनादन्यथानुपपत्त्या गाढालिङ्गनमनया सोढमिति सखीभिर्ज्ञातमित्यर्थः । सुमुखीत्यनेनालिङ्गनसंजातहर्षोऽपि सूचितः ॥

याचते स्म परिधापिकाः सखीः सा स्वनीविनिविडक्रियां यदा ।
अन्वमिन्वत तदा विहस्य ता वृत्तमत्र पतिपाणिचापलम् ॥ ५१ ॥

याचत इति ॥ सा यदा यस्मिन्समये परिधापयन्तीति परिधापिकाः सखीः स्वनीव्या आत्मीयवस्त्रमेखलाबन्धस्य निविडक्रियां गाढबन्धनं याचते स्म प्रार्थितवती तदा ताः सख्योऽन्योन्यविलोकनपूर्वं विहस्यात्र नीविबन्धश्लथीकरणार्थं वृत्तं जातं पत्युः पाणिचापलं बलादुन्मोचनव्यापारमन्वमिन्वत अनुमितिविषयान्यथानुपपत्त्यैवं प्रार्थनं युज्यत इति पूर्ववृत्तं निश्चितवत्य इत्यर्थः । याचिर्द्विकर्मा । अन्वमिन्वत, मिनोतिः, स चानुपूर्वो ज्ञानार्थः ॥

कुर्वती निचुलितं ह्रिया कियत्सौहृदाद्विवृतसौरभं कियत् ।
कुड्मलोन्मिषितसूनसेविनीं पद्मिनीं जयति सा स्म पद्मिनी ॥ ५२ ॥

कुर्वतीति ॥ कामशास्त्रोक्तलक्षणा पद्मिनी सा भैमी पद्मिनीं कमलिनीं जयति स्म । किंभूता—कियत्किंचिच्चुम्बनादि संभोगकर्म ह्रिया निचुलितं स्थगितमप्रकटं कुर्वती (तथा—) कियदालिङ्गनादिकं सौहृदाच्चित्तसौख्यादिवृत्तं प्रकटितं सौरभं कामशास्त्रोक्तकौशलं यत्र एवंभूतं कुर्वाणा । किंभूतां पद्मिनीम्—कुड्मलोन्मिषितानि मुकुलान्येव प्रफुल्लानि सूनानि पुष्पाणि सेवते भजत्येवंशीलाम् । अर्धविकसितपुष्पवतीम् । निचुलितं कलिकास्थानीयम्, विवृतसौरभं विकसितपुष्पस्थानीयम् । कियत्कलिकारूपा कियद्विकसितकमला कमलिनीवं साऽभूदित्यर्थः । विवृतं सौरभं मनोज्ञत्वं सौगन्ध्यं वा यस्येति वा ॥

नाविलोक्य नलमासितुं सरो ह्रीर्न वीक्षितुमदत्त सुभ्रुवः ।
तद्दृशः पतिदिशाचलन्नथ व्रीडिताः समकुचन्मुहुः पथः ॥ ५३ ॥

नेति ॥ स्मरः सुभ्रुवो भैम्या नलमविलोक्याऽऽसितुं स्थातुं नादत्त । ह्रीश्च तमीक्षितुं नादत्त । यस्मात्, तस्मात्तस्या दृशः कटाक्षविक्षेपा नेत्रव्यापाराः क्रमेण पतिदिशा नलाधिष्ठितदेशमुद्दिश्य वलितग्रीवं वारंवारमचलन् । अथ पश्चादभिमुखं नलनेत्रसंमीलने सत्यनन्तरं व्रीडिताः सत्यो नलमप्राप्य पथो मार्गादेव मुहुः पुनः समकुचन्परावृत्ताः कामप्रेरितलज्जानि-

१ स्थितस्य गत्यन्वेषणमिदम् । वस्तुतस्तु—'स्वे व्यदर्शयत' इति पाठसत्त्वेन 'अभिवादिदृशोरात्मनेपदे वा' इति विकल्पेन कर्मत्वाभावः । किंच संज्ञाया अनूद्यमानतायामेव 'संज्ञापूर्वको विधिरनित्यः' इत्यङ्गीकारे 'ओर्गुणः' इति धर्मिग्राहकमानविरोधः । २ 'वीक्षितुमदान्मृगीदृशः' इति जीवातुसंमतः पाठः ।

तुसारेने, लज्जया निषिद्धत्वाच्च तदीक्षणान्निवृत्तेति भावः। लज्जाकामयोः समबलत्वाद्भावसंधिः। दृशः व्यापारापेक्षया बहुत्वम् ॥

नाऽनया पतिरनायि नेत्रयोर्लक्ष्यतामपि परोक्षतामपि।
वीक्ष्यते स खलु यद्विलोकने तत्र तत्र नयने ददानया ॥ ५४ ॥

नेति ॥ अनया पतिः प्रियो नेत्रयोर्लक्ष्यतां गोचरत्वमपि नानायि, परोक्षतामगोचरत्वमपि न प्रापि। नन्वेकस्य वस्तुनः परोक्षता वा भवेदपरोक्षता वा भवेत्, न तूभयथा, विरोधादित्याशङ्क्योपपादयति—खलु यस्माद्धेतोर्यस्य हारमुकुररत्नस्तम्भादेर्विलोकने सति स नलो वीक्ष्यते तत्र तत्र हारादिवस्तुनि विषये नयने ददानया प्रेरयन्त्या। मुकुरादेर्विलोकने तत्र तत्र प्रतिबिम्बितो नलोऽनुपलक्षितदर्शनेन दृष्टो मामियं पश्यतीति तेनाज्ञातत्वात्, उद्देश्यतया बिम्बरूपस्तु न दृष्ट इति विषयान्तरविलोकनव्याजेन प्रसङ्गात्संजातदर्शनस्य नलस्योभयरूपताकारेण वैचित्र्यादिकस्यापि विरुद्धोभयरूपसंभवे संस्कारेन्द्रियाभ्यां सहोत्पादनाच्छाखे प्रत्यभिज्ञावत्, लोके च खरतुरगोभयोद्भूतत्वादेसरवच्च युक्तत्वर्थः। लज्जावशात्साक्षाद्यद्यपि नापश्यत्, तथापि कामप्रेरितत्वाद्दर्पणादिद्वाराऽपश्यदिति भावः। वीक्ष्यते स्मेति पाठः सुयोज्यः। यद्यस्माद्विलोकननिमित्तं तत्र तत्र वस्तुनि नेत्रे ददत्या स वीक्ष्यते स्मैव, तस्माल्लक्ष्यतां परोक्षतां च नानायीति वा ॥

वासरे विरहनिःसहा निशां कान्तसङ्गसमयं समैहत।
सा ह्रिया निशि पुनर्दिनोदयं वाञ्छतिस्म पतिकेलिलज्जिता ॥५५॥

वासर इति ॥ सा यस्माद्वासरे दिने विरहनिःसहा संभोगविच्छेदं सोढुमशक्ता, तस्मात्कान्तस्य सङ्गसमयं संभोगसमयरूपां निशां समैहत रात्रिः कदा वा समेष्यतीति। निशि प्राप्तायां पत्युः केलिभिर्नवनवकामक्रीडाभिर्लज्जिता, अत एव—ह्रिया कृत्वा पुनर्दिनोदयं वाञ्छति स्म प्रभातं कदा वा समेष्यतीति हेतुहेतुमद्भावान्न पौनरुक्त्यम्। सहजया ह्रिया युक्ता ततोऽपि पतिकेलिभिर्विशेषेण लज्जितेति वाऽपौनरुक्त्यम् ॥

तत्करोमि परमभ्युपैषि यन्मा ह्रियं व्रज भियं परित्यज।
आलिवर्ग इव तेऽहमित्यमूं शश्वदाश्वसनमूचिवान्नलः ॥ ५६ ॥

तदिति ॥ नलोऽमूं भैमीं शश्वन्निरन्तरमित्याश्वसनं विश्वासहेतुं वच ऊचिवान्। इति किम्—हे भैमि, बहुविधेष्वालिङ्गनचुम्बनादिषु मध्ये यत्त्वमभ्युपैषि मन्यसे तत्परं केवलं करोमि, नान्यत्। तस्माद्ध्रियं मा व्रज पुनरङ्गसङ्गेन किं वा भावीति चित्ते धृतां भियं परित्यज। यतोऽहं ते आलिवर्ग इव सखीसमूहतुल्यः। तस्मात्तासु यथा विश्वसिषि तथा मय्यपि विश्वसिहि। भयं मा यासीरिति। इह त इति पाठे—इह चुम्बनादौ विषयेऽहं तवालिवर्ग इव। सखीकर्तृके चुम्बनादौ यथा कापि न भीतिस्तथात्रापीत्यर्थः ॥

येन तन्मदनवह्निना स्थितं ह्रीमहौषधिनिरुद्धशक्तिना।
सिद्धिमद्भिरुदतेजि तैः पुनः स प्रियप्रियवचोभिमन्त्रणैः ॥ ५७ ॥

येनेति ॥ येन तस्या मदनरूपेण वह्निना ह्रियेव महौषधिर्दिव्यौषधिस्तया निरुद्धा शक्तिः सामर्थ्यं यस्य तेन लज्जया निरोधेन स्थितं स कामाग्निः पुनः सिद्धिमद्भिः प्रकृतार्थसाधन-

मर्थैस्तैरुक्तरूपैः प्रियस्य प्रियवचांसि तद्रूपाण्यनुमन्त्रणानि रहस्यमन्त्रजपास्तैरुदतेजि अयमपि, प्रकाशीकृतसामर्थ्योऽकारीत्यर्थः । पूर्वोक्ताश्वासनवचनैः पुनरुद्दीप्तकामा जातेति भावः । अन्योऽपि वह्निरौषधप्रतिबद्धशक्तिः सुसिद्धैरग्निप्रकाशकैर्मन्त्रैः पुनरुदतेजि उद्दीप्यते स । 'तिज निशाने' निशानमुद्दीप्तकरणम् । अत्र क्षमार्थाभावान्न सन् ॥

यद्विधूय दयितार्पितं करं दोर्द्वयेन पिदधे कुचौ दृढम् ।
पार्श्वगं प्रियमपास्य सा ह्रिया तं हृदिस्थितमिवालिलिङ्ग तत् ॥ ५८ ॥

यदिति ॥ सा दयितेन मर्दनार्थं कुचयोरुपर्यर्पितं करं कराभ्यां विधूय निराकृत्य दोर्द्वयेन कररूपेण दृढं कुचौ यत्पिदधे तत्तेन कुचपिधानप्रकारेण पार्श्वगं पुरः समीपे स्थितं प्रियं ह्रियाऽपास्य हृदि स्थितं तमेवालिलिङ्गेवेत्युत्प्रेक्षा । स्त्रीणां याचने यन्निवारणं तदेव कामस्य परमायुधम् । आलिङ्गनेन यथा कामः प्रदीप्तो भवति, तथा कुचमर्दननिषेधपरेण कुचपिधानेनापि नलः प्रदीप्तकामो जात इति भावः । मुग्धाजातिरियम् ॥

अन्यदस्मि भवतीं न याचिता वारमेकमधरं धयामि ते ।
इत्यसिस्वददुपांशुकाकुवाक्सोपमर्दहठवृत्तिरेव तम् ॥ ५९ ॥

अन्यदिति ॥ इति एवंप्रकारा उपांशुर्मन्दा भीत्या प्रार्थनादैन्यवशात्, काकुर्ध्वनिविकारयुक्ता वाक् यस्य स नलो दीनप्रार्थनवशात्किंचिदनुमतौ सत्यामुपमर्दे दन्तदशनौष्ठपीडनगाढालिङ्गनादौ यो हठस्तेन सहिता वृत्तिरधरपानादिव्यापारो यस्य, सोपमर्दो करधूननादिना सविघ्नाऽधरपानहठवृत्तिर्यस्य वा एवंभूत एव सन् तमधरमसिस्वददपात् । एवमालिङ्गनाद्यपि । इति किम्—हे भैमि, अहं भवतीं त्वामन्यदपरं किमपि कुचमर्दनादि न याचितास्मि याचिष्ये, किं तर्हि—अहमेकवारं तेऽधरं धयामि पिबामीति । आशया दीनवचनम्, पाने तु बलात्कारः । एकवाराधरपानानुमतेरुपमर्दे भङ्गेन सहिता हठवृत्तिरननुमतद्वितीयाधरपानव्यापारो यस्येति वा एकवाराधरपानमात्रानुमतौ लब्धायामालिङ्गनाद्यपि द्वितीयाधरपानमप्यकरोत्, अपराधमार्जनं त्वनन्तरं करिष्यामीति बुद्ध्येति भावः । पूर्वमोष्ठपानमात्रमकरोत् अनन्तरं नखक्षताद्यपीति केचित् । अन्यदेति पाठे—क्षणान्तरे पुनरधरपानमपि न याचिष्य इत्यर्थः । सोऽयमर्थेति पाठे—सोऽयमर्थः किंचिन्मात्रो हठो यत्रैवंविधो व्यापारो यस्य । पूर्वपाठे स इति ज्ञेयम् । याचिता, तृच् । वारं, काले द्वितीया ॥

पीततावकमुखासवोऽधुना भृत्य एष निजकृत्यमर्हति ।
तत्करोमि भवदूरुमित्यसौ तत्र संन्यधित पाणिपल्लवम् ॥ ६० ॥

पीतेति ॥ असौ नल इत्युक्तिव्याजेन तत्रोरौ पाणिपल्लवं मृदुसुखस्पर्शतया पल्लवतुल्यं पाणिं संन्यधित स्प्रष्टुं संनिवेशितवान् । इति किम्—हे भैमि, एष भृत्यो मल्लक्षणो दासः । पीतस्तावकमुखमेवासवो मद्यं येन, अथच—पीतस्त्वदीयमुखस्य मुखगण्डूषो येन एवंभूतः सन्नधुना निजकृत्यं चरणसंवाहनादिरूपं भृत्यसंबन्धिकार्यं कर्तुमर्हत्युचितो भवति । तत्कारणात् दूरवनुष्ठानचवादिना चिरं भवदूरु त्वदीयमूरुं करोमि संवाहयामि । अथच—[illegible]

१ 'सान्द्रितांतरकरोन करदेन' इति [illegible] पाठः । २ 'अधुने' इति [illegible] पाठः । ३ अयं श्लोको जीवातौ न व्याख्यातः ।

दूर्ध्वं करोमीति । अनेकार्थत्वात्करोतिः संवाहनार्थः । अन्योऽपि भृत्यो भुक्तमुखोच्छिष्टचरण-संवाहनं करोति ॥

चुम्वनादिषु वभूव नाम किं तद्वृथा भियमिहापि मा कृथाः ।
इत्युदीर्य रसनावलिव्ययं निर्ममे मृगदृशोऽयमादिमम् ॥ ६१ ॥

चुम्वनेति ॥ इत्युदीर्य अयं मृगदृशस्तदानीमतितमां चञ्चलदृशो भैम्या आदिमं कदाचिदप्यकृतपूर्वत्वात्प्रथमं रसनावलिव्ययं मेखलाकलापमोचनं निर्ममे चक्रे । कलहर्षादौ दाक्ष्यं भयं च भजन्त्या भैम्या एवं विलम्भणपूर्वकं वसनमाचकर्षेति भावः । इति किम्—हे भैमि, नानेनानुभूतविषयप्रश्नानिनये । हे भैमि, चुम्वनालिङ्गनादिषु किं नाम विरुद्धं वभूव, अपि तु न किंचित् । तत्तस्मादिहाप्यत्रापि नीविमोक्षणे सुरतारम्भेऽपि करपीडने वा, मेखलामोचने वा वृथा अकारणां भियं मा कृथाः ॥

अस्तिवाम्यभरमस्तिकौतुकं सास्तिघर्मजलमस्तिवेपथु ।
अस्तिभीति रतमस्तिवाञ्छितं प्रापदस्तिसुखमस्तिपीडनम् ॥ ६२ ॥

अस्तीति ॥ सा एवंभूतं रतं प्रापत् । किंभूतम्—आरम्भसमयेऽस्ति वर्तमानो वाम्यभरो रतिप्रातिकूल्याचरणवाहुल्यं यत्र, आरम्भानन्तरं चास्ति कौतुकमननुभूतचरत्वादत्याश्चर्यं यत्र । ततोऽपि—सात्त्विकोत्पत्तेः श्रान्तेश्चास्ति घर्मजलं यत्र । तथा—अस्ति वेपथुर्यत्र । ततः—संभोगे प्रारब्धे भये निवृत्तेऽपि किमन्ते भावीत्यस्ति भीतिर्यत्र । तथा—सुखहेतुत्वादस्ति वाञ्छितमभिलाषो यत्र । तथा—लिङ्गकसंमर्दादस्ति सुखं यत्र । समरससुरतावसानसंजातसुखमिति यावत् । ततोऽप्यस्ति पीडनं संभोगावसाने सर्वाङ्गगाढालिङ्गनं यत्र । एवंभूतं प्रथमसंभोगमन्वभूदिति भावः । अस्तीति विभक्तिप्रतिरूपकमव्ययम् । 'अस्तिक्षीरादयश्च' इति समासः ॥

ह्रीस्तवेयमुचितैव यन्नवस्तावके मनसि मत्समागमः ।
तत्तु निस्त्रपमजस्रसंगमाद्व्रीडमावहति मामकं मनः ॥ ६३ ॥
इत्युपालभत संभुजिक्रियारम्भविघ्नघनलज्जितर्जिताम् ।
तां तथा स चतुरोऽथ सा यथा ऋतुमेव तमनु त्रपामयात् ॥६४॥

ह्रीति ॥ इतीति ॥ युग्मम् । चतुरः कामकलाकुशलः स नलः संभुजिक्रियायाः सुरतस्यारम्भे विघ्नभूतैर्घनैर्निविडैर्लज्जितैर्लज्जाभिर्नितरां संकोचादिभिर्जितामतिलज्जितां तामिति पूर्वोक्तप्रकारेणोपालभत सोत्प्रासमूचे । सा भैमी यथा येन प्रकारेणाथोपालम्भनानन्तरं तमनुलक्षीकृत्य ऋतुमेव लज्जितुमेव त्रपामयाल्लज्जां प्राप । लज्जागुप्तिविषयेऽपि लज्जा यथा जायते तथैवमुपालब्धेत्यर्थः । मम लज्जावत्त्वादन्यथास्य चेतसि स्फुरितमिति भिया लज्जां विहाय विलम्भेण तेन सह चिक्रीडेति भावः । इति किम्—हे भैमि, तवेयं वर्तमाना ह्रीर्युक्ता उचितैव । यद्यस्मात्तावके मनसि नवो नूतनो भवः । नवसंभोगे हि स्त्रिया लज्जा युक्तैवेत्यर्थः । तत्पुनरिदं विवाहात्पूर्वमप्यसकृत्स्वप्नादिदर्शनसंजातसंभोगवशात्स्त्रियं निर्लज्जमपि मामकं मनस्तु पुनः व्रीडं लज्जामावहति धारयति यत्, तेयमनौचिती सामर्थ्या-

१ 'आदिमामिति वदीयमादिमं च व्ययं रसनावलिव्ययम्' इति जीवातुसंमतः पाठः ।

लभ्योऽर्थः । निर्लज्जस्य लज्जाविरोधादयुक्ता । वहुवासरसंजातसंगमस्याप्यतिपरिचयाल्लज्जा न युक्तेत्यर्थः । यद्वा—लज्जाया औचित्ये कारणान्तरमाह—तुरप्यर्थः । अजस्रसंगमातित्रपं मामकमपि मनो लज्जितां त्वां दृष्ट्वा यस्माल्लज्जते किमु वक्तव्यं प्रथमसंभोगे ते मनो लज्जत इति व्याख्या ॥

वाहुवक्त्रजघनस्तनाङ्कितद्वन्धगन्धरतसंगतानतीः ।
इच्छुरुत्सुकजने दिनेऽस्मिते वीक्षिते ति समकेति तेन सा ॥ ६५ ॥

वाह्विति ॥ तेन वीक्षिता सा भैमी इति पूर्वोक्तप्रकारेण समकेति संकेतिता । इति किम् —हे भैमि, उत्सुकाः स्वस्वकार्यसाधनोत्साहवन्तो जना यत्र रात्रिवृत्ताकर्णनाद्यर्थमुत्सुकः सखीजनो यत्रैवंविधे वा दिने दिवसेऽपि ते संवन्धिनीः वाहू च वक्त्रं च जघनं च स्तनौ चाङ्क्री च तस्य वाह्वादेः कामशास्त्रप्रसिद्धा ये वन्धा नागपाशादीनि करणानि तेषां गन्धो लेशो विद्यते यत्र तादृशं रतं तेन संगता मिलिताश्च ता आनतयश्च नितरां नम्रत्वानि कौशलातिशयनिर्मितानवयवनम्रीभावान् । संगता इति पृथग्वा । नतीरिच्छुरभिलाषुकोऽस्मीति । स्मित इति भैमीसंबोधनं वा । रात्रिकृतवन्धरतप्रत्यभिज्ञानं यथा भवति वीक्षणमात्रेणेङ्गितं कृत्वाऽनुरागातिशयाद्दिनेऽपि स्वीयं तादृशताभिलाषं तां प्रति ज्ञापितवानिति भावः । यद्वा—वाह्वादेस्ताः प्रसिद्धाः क्रमेण वन्धश्च, गन्धश्च, रतं च, संगतं च, आनतिश्च, ताः । वाह्वोर्नागपाशादिवन्धः, वक्त्रस्य गन्धः पद्मिनीत्वात्सौरभम्, जघनस्य रतम्, स्तनयोः संगतं श्लेषः, वक्त्रस्य गन्धः पत्यर्थः, त्वत्संवन्धिनीस्ताः स्वस्वव्यापारकरणमात्रनिरता दुश्चित्ता जना यत्रैवंभूते दिनेऽपि इच्छुरस्मीति वीक्षिता साऽनेन स्वाशयं ज्ञापितेति भावः । यद्वा—त्वां पश्यामि तदैव ममैवं वाञ्छोदेति, त्वद्दर्शनमेव संभोगसमय इति च ज्ञापितेति भावः । उत्सुकसखीजनेऽस्मिते व्रीडितेति पाठे—रात्रिवृत्तप्रश्नवाञ्छागोपनार्थं तस्माल्लज्जा मा भूदित्यस्मिते स्मितरहित एवंविधे ज्ञातुमेवोत्सुके सखीजने सखीजनसंनिधौ पूर्वोक्तप्रकारेण सा तेन समकेति संकेतिता शब्दिता । यद्वात्रावाचरितं वाहुवन्धादि तदिदानीमिच्छुरस्मीति रात्रिवृत्तज्ञापनार्थं सखीसंनिधावेवमुवाचेत्यर्थः । अत एव सा व्रीडिता । उत्सुके सखीजने स्मिते प्रारब्धहासे सति व्रीडितेति वा । हे भैमि, ते वाह्वादिवन्धादीन् दिने वीक्षिता द्रष्टा एवंभूतोऽभिलाषुकोऽस्मि । रात्रौ यद्यपि कृताः, तथापि न दृष्टाः तस्माद्दिने तद्दर्शनेच्छुरस्मीत्येवं सा तेन शब्दिता । न परमहमेव, किंतु त्वत्सखीजनोऽपीत्युत्सुकपदेन सूचितमिति वा । व्याख्यानान्तरं ग्रन्थगौरवभयान्नोक्तम् । नतीरित्यत्र इच्छुर्वीक्षितेत्येताभ्यां योगे 'न लोका–' इति षष्ठीनिषेधः ॥

प्रातरात्मशयनाद्विनिर्यतीं संनिरुध्य यदसाध्यमन्यदा ।
तन्मुखार्पणमुखं सुखं भुवो जम्भजित्क्षितिशचीमचीकरत् ॥ ६६ ॥

प्रातरिति ॥ भुवो जम्भजिद्भूमीन्द्रो नलः प्रातरात्मशयनादुत्थाय विनिर्यतीं शीघ्रं वहिर्निर्गन्तुकामां संनिरुध्य चेलाञ्चलादौ सम्यग्धृत्वा क्षितिशचीं भूमीन्द्राणीं सुन्दरीं सौभाग्यवतीं चान्यदान्यस्मिन्काले रात्रौ प्रागेव ह्रीभयवशाद्यदसाध्यमप्राप्यं तत्तस्या मुखार्पणं मुखमादिर्यस्य तत्सुखं सुरतमचीकरत् । रात्रिप्रान्तसमये त्वं मदुक्तं चेत्करिष्यसि तर्हि उष्ट्रनगन्त्यं

१ अयं श्लोको जीवातौ न व्याख्यातः ।

चुम्बं दास्यामि नान्यथेति तां पेशलालिङ्गनादि कारितवान् । सा गन्तुकामापि चेदेतदुक्तं न करिष्यामि, तर्ह्ययं गन्तुं न दास्यति, सखीनां चायमवागमनसमय इति विचार्य चुम्बनादि दत्त्वा शीघ्रं निर्गतेति भावः । चुम्बनमात्रेणाचीकरदिति क्रियाविशेषणं वा । 'प्रभातप्रहरे पद्मिनी रन्तव्या' इति कामशास्त्रम् । क्षितिचरमानिति, 'हृक्रोः—' इति कर्मत्वम् ॥

नायकस्य शयनादहर्मुखे निर्गता मुदमुदीक्ष्य सुभ्रुवाम् ।
आत्मना निजनवस्मरोत्सवस्मारिणीयमहृणीयत स्वयम् ॥ ६७ ॥

नायकस्येति ॥ अहर्मुखे प्रातर्नायकस्य शयनान्निर्गता इयं भैमी सुभ्रुवां प्रौढानां सुन्दरीणां सख्यादीनां स्वस्वप्राणेशसुरतजनितां मुदमानन्दमुदीक्ष्यात्मनैव निजः स्वीयः नवः स्मरोत्सवः संभोगस्तस्य स्मारिणी स्मरणशीला सती स्वयमेवाहृणीयत लज्जिता । अनतिप्रौढोत्तमस्त्री-जातिः शयनान्निर्गता सखीनामोष्ठयावककपोलपत्रवल्लीमार्जनादि दृष्ट्वा स्वसंभोगचिह्नेन स्वस्वरू-पेण कृत्वा निजनवस्मरोत्सवं सखीः स्मारयितुंशीला सती स्वयं लज्जे । निजधवेत्यपि पाठः । हृणीङ् कण्ड्वादिः ॥

तां मिथोऽभिदधतीं सखीं प्रियस्यात्मनश्च स निशाविचेष्टितम् ।
पार्श्वगः सुरवरात्तिपिधां दधद्दृश्यतां श्रुतकथो हसन्गतः ॥ ६८ ॥

तामिति ॥ स नलस्तां भैमीं हसन् सन् दृश्यतां गतः स्वेच्छयैव नयनगोचरत्वं प्राप्तः । किंभूताम्—प्रियस्य नलस्यात्मनः स्वस्य च सखीं प्रति मिथो रहसि निशाविचेष्टितं संभो-गादिरात्रिवृत्तान्तमभिदधतीं कथयन्तीम् । किंभूतः—सुराणां वरात्तिरोधानसामर्थ्यं दधत् । अत एव—पार्श्वगो निकटस्थः । अत एव—श्रुता भैम्याऽभिधीयमाना रात्रिवृत्तान्तकथा येन । अदृश्येन मयाऽत्रैव स्थित्वा सर्वं श्रुतमिति प्रकटो भूत्वा हसन्, न चाकस्मादित्यर्थः । हसद्गत इति पाठे—श्रुतकथो दृश्यतां गतत्वाद्धसन्नित्यर्थः । पिधेति, 'आतश्चोपसर्गे' इत्यङ् ॥

चक्रदारविरहेक्षणक्षणे बिभ्यती धवहृदाय सानमत् ।
क्वापि वस्तुनि वदत्यनागतं चित्तमुद्यदनिमित्तवैकृतम् ॥ ६९ ॥

चक्रेति ॥ सा भैमी चक्राणां चक्रवाकानां दारैश्चक्रवाकीभिः सह विरहस्येक्षणक्षणे दर्शनकाले संध्यायां ममापि प्रियेण सहैतद्वियोगो मा भूदिति क्षणमात्रमपि वियोगाद्बिभ्यती धवस्य नलस्य हृदाय हृदालिङ्गनमनमत् । संध्यावन्दनमात्रेण वियोगेन चक्रवियोगदर्शन-मात्रेण च किमिति बिभेषीत्येवं वा प्रियेण हसितेत्यर्थः । तावतैव वियोगेन तद्वियोगदर्शन-मात्रेण च किमिति भीतेत्यत आह—क्वापि कस्मिंश्चिद्वस्तुनि विषये उद्यदुत्पद्यमानमनिमि-त्तमकारणं वैकृतं हर्षशोकभयादि यस्यैवंभूतं चित्तं कर्तृ अनागतं भाविनमर्थं शुभमशुभं वा वदति । तत्राग्रिमविप्रयोगसूचिका आधारणी तस्या भीतिरुचितेत्यर्थः । भावी विरहः सूचितः । इयं सत्यभीता नल्पमुग्ध्या चेति संदेहयात्या तेन हसितेति भावः । बिभ्यती च परि-रभ्य नानुचरीति पाठे—नमनोचितार्थं नल्पनाविश्यैव तस्थावित्यर्थः । निमित्तेन वैकृतं, प्रज्ञादित्वादण् ॥

चुम्बितं न मुखमाचकर्ष यत्पत्युरन्तरमृतं ववर्ष तत् ।
सा नुनोद न भुजं तदर्पितं तेन तस्य किमभून्न तर्पितम् ॥ ७० ॥

चुम्बितमिति ॥ सा क्रमेण गतभीर्गतलज्जा च सती चुम्बितं प्रियेण चुम्बितुमारब्धं मुखं यन्नाचकर्ष वक्रीचक्रे, तच्चुम्ब्यमानमुखानाकर्षणं कर्तृ पत्युरन्तश्चेतस्यमृतं ववर्ष । तदीयं मनः सुधावृष्ट्येव परितुष्टं चक्र इत्यर्थः । तथा—तेन स्तनादावर्पितं भुजं न नुनोद निराचकार, तेन भुजस्वीकारेण प्रयोजकेन तस्य किमङ्गं तर्पितं नाभूदपि तु सर्वाङ्गं तेन प्रीणितमभूत् ॥

नीतयोः स्तनपिधानतां तया दातुमाप भुजयोः करं परम् ।
वीतवाहुनि ततो हृदंशुके केवलेऽप्यथ स तत्कुचद्वये ॥ ७१ ॥

नीतयोरिति ॥ स नलस्तया भर्तृकृतपाणिपीडनभिया स्तनपिधानतां कुचाच्छादनतां नीयतोः प्रापितयोस्तदीयभुजयोः परं केवलं करं दातुं स्थापयितुं पूर्वमाप । शक्तोऽभूदित्यर्थः । ततोऽनन्तरं वीतवाहुन्यपनीतभैमीकरे हृदंशुके हृदयावरणवस्त्रे करं दातुमाप । अथ ततोऽपि पश्चात्केवले निरंशुके तत्कुचद्वये करं दातुमाप । मुग्धाजातिः । लज्जापचयकामोपचयौ क्रमेणोक्तौ ॥

याचनान्न ददतीं नखक्षतं तां विधाय कथयाऽन्यचेतसम् ।
वक्षसि न्यसितुमात्ततत्करः स्वं विभिद्य मुमुदे स तन्नखैः ॥ ७२ ॥

याचनादिति ॥ त्वमपि नखोल्लेखं कुर्विति प्रेमभरेण याचनादपि नखक्षतं न ददतीं कयापि कथयाऽन्यस्मिन्गोष्ठीरस एव चेतो यस्यास्तां विचित्तां विधाय गोष्ठीसंवादसुखाभिनयव्याजेन स्ववक्षसि न्यसितुं स्थापयितुमात्तः स्वहस्तेन गृहीतस्तस्याः करो येनैवंभूतः सन् तस्याः स्वहस्तधृतहस्तनखैः स्वं स्वशरीरं विभिद्योल्लिख्य मुमुदे ॥

स प्रसह्य हृदयापवारकं हर्तुमक्षमत सुभ्रुवो वहिः ।
ह्रीमयं तु न तदीयमान्तरं तद्विनेतुमभवत्प्रभुः प्रभुः ॥ ७३ ॥

स इति ॥ स प्रभुः स्वामी सुभ्रुवो भैम्या वहिर्हृदयापवारकं वक्षःस्थलादिवसनं प्रसह्य हठाद्धर्तुमक्षमत । तु पुनर्ह्रीमयमान्तरमन्तःस्थं भैमीसंवन्धितत्कामक्रीडानिवारकं कुलस्त्रीहृदयभूषणीभूतमपवारकमपनेतुं प्रभुः समर्थो नाभवत् । एवं विस्रम्भणक्रमेण यद्यपि लज्जां त्याजिता तथापि हृदयाच्छादिवस्त्रापाकरणपूर्वकुचस्पर्शादिना पुनरपि लज्जितैवेति भावः ॥

सा स्मरेण वलिनाऽप्यहापिता ह्रीक्षमे भृशमशोभतावला ।
भाति चापि वसनं विना ननु व्रीडधैर्यपरिवर्जनैर्जनः ॥ ७४ ॥

सेति ॥ वलिना प्रभावता, अथच—उद्दीप्तेनापि स्मरेण ह्रीक्षमे लज्जाधैर्ये अहापिताऽत्याजिता साऽवला स्त्री, अथच—स्त्रीत्वाद्दुर्बला भृशमशोभत । युक्तोऽयमर्थः—यतो जनो वसनं विनापि भाति च शोभत एव । तु पुनर्व्रीडधैर्ययोः परिवर्जने परित्यागे नैव शोभते । इत्याद्युक्तमर्थान्तरन्यासः । उद्दीप्तेति कामे लज्जाधैर्यापरित्यागान्नितरां नलस्य स्पृहणीयतामगमदिति भावः ॥

---

१ 'अनेकस्य करस्य क्रमादनेकेषु भुजांशुककुचेषु वृत्तिकथनात् 'क्रमेणैकमनेकस्मिन्' इत्याद्युक्तलक्षणः पर्यायालंकारभेदः' इति जीवातुः ।

आत्थ नेति रतयाचिनं न यन्मामतोऽनुमतवत्यसि स्फुटम् ।
इत्यमुं तदभिलापनोत्सुकं धूनितेन शिरसा निरास सा ॥ ७५ ॥

आत्थेति ॥ सा इत्येवं भङ्ग्या स्वनिषेधार्थमपि तस्या अभिलापने मञ्जुलवाणीश्रवण उत्सुकं कौतुकिनममुं धूनितेन कम्पितेन शिरसा कृत्वा निरास निषिषेध । इति किम्—हे भैमि, त्वं मह्यं सुरतं देहि प्रसीदेति सुरतयाचिनं मां यद्यस्मान्नेति न आत्थ अतो हेतोः 'अप्रतिषिद्धमनुमतं भवति' इति न्यायेन सुरतं कुर्विति मामनुमतवत्यसि अनुज्ञातवती त्वमसीति । इयं सुरतं नानुमन्यते परं मया सह न वदत्यपीत्येवं परिहासभाषणे क्रियमाणे निषेधार्थमपि किंचिद्वदिष्यतीत्याशया नलेन तद्वाचनार्थमेवं यत्ने कृतेऽपि कुशला लज्जाधैर्यवशाच्छिरोधूननेनैव तं न्यषेधत्, न तु साक्षादक्षरमप्युवाचेति भावः ॥

या शिरोविधुतिराह नेति ते सा मया न किमियं समाकलि ।
तन्निषेधसमसंख्यता विधिं व्यक्तमेव तव वक्ति वाञ्छितम् ॥ ७६ ॥

येति ॥ हे भैमि, ते या शिरोविधुतिः शिरःकम्पः नेत्याह निषेधार्थं ब्रूते, मया सेयं किं न समाकलि न सम्यग्ज्ञाता, अपि तु सम्यग्ज्ञातैव । कथमित्याह—तयोः शिरोविधुतियुगल-पक्षयोर्निषेधयोर्या समसंख्यता तुल्यता सा तव वाञ्छितं सुरतरूपं विधिं व्यक्तमेव वक्ति वदति । सुरतं तवेष्टमित्याहेत्यर्थः । द्वयोरेव निषेधयोः सुन्दोपसुन्दन्यायेनान्योन्यघातात् 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति न्यायेन च सुरतं त्वया विधेयमेवेति मां प्रति विधावेव तात्पर्यमिति मया त्वदाशयो ज्ञात इति भावः । इति पुनरपि भैमीवादनार्थं वक्रोक्तिः । विधि-रिति पाठे—तस्य मत्प्रार्थितस्य शिरोधूनति(न)द्वयरूपौ निषेधौ तयोः समसंख्यैव विधिस्ते तवाभिलापं स्पष्टमेव वक्तीति व्याख्येयम् ॥

नात्थ नात्थ शृणवानि ते न किं तेन वाचमिति तां निगद्य सः ।
सा स्म दूत्यगतमाह तं यथा तज्जगाद मृदुभिस्तदुक्तिभिः ॥ ७७ ॥

नेति ॥ स नलः तामिति पूर्वोक्तं निगद्योक्त्वा सा दूत्यं गतं दूत्येन हेतुना वा भैमीस-विधं गतं तं नलं 'तदय विश्रम्य शृणु—' इति यथा आह स्म ब्रूते स्म तदेव मृदुभिरतिमञ्जु-लाभिस्तस्या भैम्या उक्तिभिस्तदालापणानुकारिणीभिः जगाद । तादृगेवानूदितवानित्यर्थः । इति किम्—हे भैमि, अहं ते वाचं न शृणवानि, तेन मदश्रवणेन हेतुना मया नाकर्णनीयमिति बुध्वा त्वं नात्थ नात्थ न ब्रूषे न ब्रूषे किम् । त्वद्वाक्यानि मया पूर्वमेवाकर्णितानि, इदानीं तव भाषणं मया न श्रोतव्यमिति बुद्ध्यैवेदं मुखमुद्रणेति त्वया वक्तव्यमित्यवदादिति भावः । त्वं नात्थेति स्वरभङ्ग्या मा वादीरित्यर्थः । किमित्याक्षेपे वा मुग्धम् ॥

नीविसीम्नि निविडं पुराऽर्पयत्पाणिनाऽथ शिथिलेन तत्करम् ।
सा क्रमेण नननेति वादिनी विघ्नमाचरदमुष्य केवलम् ॥ ७८ ॥

नीवीति ॥ सा पुरा प्रथमसंभोगारम्भे नीविसीम्नि परिधानग्रन्थौ तस्य करं स्वपाणिना निविडमतिगाढं यथा तथाऽर्पयत् । अथानन्तरं क्रमेण समयक्रमानन्तरं दिनान्तरे दिनान्तर-[illegible] नलकरं शिथिलेन पाणिना दधौ । ततोऽपि अत्यन्तमन्तरं न न नेति वादिनी सती अमुष्य नलस्य केवलं विघ्नमाचरत् । [illegible]

तेत, तर्हि मा निवृतत्, वदामि तावदेवमिति वचोमात्रेणापि प्रमाचरत्, न तु कर्मणेति भावः। मुग्धाजातिः। भयलज्जात्यागः सूचितः॥

रूपवेषवसनाङ्गवासनाभूषणादिषु पृथग्विदग्धताम्।
सान्यदिव्ययुवतिभ्रमक्षमां नित्यमेत्य तमगान्नवा नवा॥ ७९॥

रूपेति॥ सा रूपेषु देववरदानात्कायधारणानिर्मितेषु सौन्दर्यविशेषेषु, वेषेषु महाराष्ट्र-लाटगुर्जरादिस्त्रीधृतवस्त्रालंकारादिश्रृङ्गारभङ्गीषु, वसनेषु नीलपीतदुकूलादिवस्त्रेषु, अङ्गवास-नासु चन्दनकस्तूरीकर्पूराद्यङ्गरागैरगुरुचन्दनादिधूपैश्च कृतेषु देहामोदेषु, भूषणेषु सौवर्णेषु मुक्तामाणिक्यहीरकादिखचितेष्वलंकारेषु, तदादिषु च भाषान्तरेषु विषये पृथक् प्रत्येकं प्रति-दिनमन्यस्या दिव्ययुवते रम्भादिस्वर्गस्त्रिया भ्रमे क्षमां समर्थां रम्भादिरियमेनेवेति भ्रान्तिका-रिणीं विदग्धतां चातुरीमेत्य प्राप्यात एव नवा नवा नूतना नूतना सती नित्यं तमगात्। संबुभुज इत्यर्थः। अन्वहमन्यैवेयमिति तस्य चेतसि स्फुरितेत्यर्थः। वा इवार्थः। नित्यं नवेन नागात्, अपि तु नवीनेव जगामेति काकुर्वा। अन्वहं नूतनत्वादनुरागातिशयादन्यावरोधा-ङ्गनासंभोगविमुखो नलो जात इति भावः। क्षमेति पाठे—भैमीविशेषणम्॥

इङ्गितेन निजरागनीरधिं संविभाव्य चतुभिर्गुणज्ञताम्।
भक्ततां च परिचर्ययाऽनिशं साधिकाधिकवशं व्यधत्त तम्॥८०॥

इङ्गितेनेति॥ सा अधिका सर्वगुणैरुत्कृष्टा चतुरा च तमधिकमतितरां वशमात्मन्यनु-रागिणं व्यधत्त चकार। किंचित्प्रौढाभूदित्यर्थः। किं कृत्वा—इङ्गितेन 'सख्यादिषु भर्तृगु-णवर्णनपूर्वं भाषणम्, तद्दोषापलापः, पश्चादाभिमुख्येन शयनम्, पूर्वमुत्थानम्, आगमने तुष्टिः, प्रवासे वैमनस्यम्, सदा समसुखदुःखता' इत्याद्यनुरागद्योतकेन चेष्टितेन निजम् अगा-धत्वादनुरागमेव नीरधिं नलं संविभाव्य सम्यग्ज्ञापयित्वा, तथा—चटुभिः 'भवादृशोऽतिसु-न्दरोऽतितेजस्वी वदान्यः सर्वकलाकुशलः कः, अपितु—न कोपि' इत्यादि प्रियभाषणैर्गुण-ज्ञतां च स्वीयगुणग्राहित्वं वैदग्ध्यं च ज्ञापयित्वा, तथा—अनिशं सर्वदा परिचर्यया चरणा-दिसंवाहनतालवृन्तचालनादिरूपया सेवया निजां भक्ततां भक्तियुक्ततां च ज्ञापयित्वा। अनिशं निशामभिव्याप्य मर्यादीकृत्य। अहोरात्रमित्यर्थ इति वा॥

स्वाङ्गमर्पयितुमेत्य वामतां रोपितं प्रियमथानुनीय सा।
आतदीयहठसंबुभुक्षुतां नान्वमन्यत पुनस्तमर्थिनम्॥ ८१॥

स्वाङ्गमिति॥ सा संभोगार्थिने नलाय स्वाङ्गं स्तनादिकं निजमङ्गमर्पयितुं दातुं किंचि-द्वामतां प्रातिकूल्यमेत्य किंचिदङ्गमदत्त्वा, अथानन्तरं तेनैव व्यापारेण रोषितमुत्पादितरोष-मौदासीन्यं प्राप्तं प्रियं नलं चुम्बनालिङ्गनाचरणपतनादिनाऽनुनीय प्रसादानन्तरमियं मां

---

१ 'अत्रैकस्मिन्नीविदेशे क्रमादनेकव्यापारसंबन्धोक्तेः पर्यायालंकारभेदः' इति जीवातुः।

२ इतः प्राक्

'यत्क्रियां प्रति यदस्तजस्तया (?) स्वस्वरस्य लघुतां दधानया।
पत्युरन्वहमहीयत स्फुटं तत्किलाहियत तस्य मानसम्॥'

इत्यधिकः श्लोकः क्वापि दृश्यते॥

प्रसादयति चेत्तर्हि मदीप्सितं करिष्यतीति बुद्ध्या पुनरर्थयन्तं तदङ्गं याचमानं तं तदीयां नलीयां हठाद्बलात्कारेण संबुभुक्षुतां संभोगेच्छुताम् आ मर्यादीकृत्य नान्वनन्यत तावन्नानुनेने । पूर्वं याञ्चापूर्वं संभोगे प्रवृत्तः, अनन्तरं तदीयवामतादोषवशादौदासीन्यं गतः स्वन्तरं प्रति गमिष्यतीति बुद्ध्या तयाऽनन्तरमनुनीतः सन् पुनरर्थयमानोऽपि यावद्बलात्संभोगं करोति तावन्नानुमतः, अनन्तरं त्वनुमत इत्यर्थः । याञ्चानन्तरमेवानुमनने तादृशोऽनुरागो न वर्धते । तदीयमनुरागमात्मनि परां कोटिं प्रापयितुं हठसंभोगमेवैच्छदिति भावः । अनुनयानन्तरं संभोगे कृतेऽप्यनुरागातिशयात्पुनः सुरताभिलाषी नानुमेन इति पुनःशब्दार्थो वा । रोषितं, ण्यन्तान्निष्ठा । आतदीयेति, मर्यादायामव्ययीभावो नपुंसकत्वाद्ध्रस्वत्वम् ॥

आद्यसंगमसमादराण्यधाद्वल्लभाय ददती कथंचन ।
अङ्गकानि घनमानवामताव्रीडलम्भितदुरापतानि सा ॥ ८२ ॥

आद्येति ॥ सा अङ्गकानि हस्तानि सौकुमार्यातिशयादनुकम्प्यानि निजान्यङ्गान्याद्यसंगमेन प्रथमसंभोगेन समस्तुल्य आदरः प्राप्त्युपायासक्तिर्येषु प्रथमसंभोगे भयलज्जात्यागपूर्वं विश्वासार्थं यावान् प्रतारणाद्युपायः कृतः, तावानेव पाश्चात्येष्वपि संभोगेषु यस्मात्स्ये नले-नोपायः कृतः, तादृशीं नीतिं यावदधाद्धार । यतः—वल्लभायातिप्रेयसे नलाय कथंचन भूयसा प्रयासेन तान्येव ददती । तत्रापि हेतुः—यतः—घनैर्दृढैर्मानवामताव्रीडैः मानः प्रीति-कलहजौदासीनता, वामता स्वाङ्गसमर्पणप्रातिकूल्यम्, व्रीडा लज्जा, तैः घनेन मानेन वा वामता तया लज्जया च, लम्भिता प्रापिता दुरापता दुर्लभता येषां तानि । आदौ विवाहात्पूर्वं यः संगमस्तत्कालीनेनादरेण तुल्यादराणीति वा । मानादिना तदङ्गानां दुष्प्रापत्वादिच्छाभिवृद्धेर्न-लीयोऽनुरागः प्रत्यहं परां कोटिमध्यारोहदिति भावः । अङ्गकानि, 'हस्वे' 'अनुकम्पायाम्'. इति वा कन् । वामतायुक्तो व्रीड इति समासः ॥

पत्युरागिरिशमा तरुक्रमात्स्वस्य चागिरिजमालतं वपुः ।
तस्य चार्हमखिलं पतिव्रता क्रीडति स्म तपसा विधाय सा ॥ ८३ ॥

पत्युरिति ॥ सा पतिव्रता धर्मेण कार्ये कारणोपचारात्तपसा तपःफलेनेन्द्रादिवरदानेन वा पत्युर्नलस्य वपुरागिरिशं हरमारभ्य आतरु वृक्षपर्यन्तं, तरुमारभ्य गिरिशपर्यन्तं वा वं, तथा—स्वस्य आत्मनः शरीरमागिरिजं गिरिजां पार्वतीमारभ्य आलतं लतापर्यन्तम्, लता-मारभ्य पार्वतीपर्यन्तं वारोहावरोहक्रमेण प्रथमं विधाय, पश्चात्तत्तद्रूपेण, गिरि-शरूपे गिरिजारूपं, तरुरूपे लतारूपमित्येवं वा क्रमेण विधाय तत्तद्रूपं निरवद्य तत्तन्मृदुच्छि-दशरीरान्तरस्य संभवत्यखिलं यद्भूषणादि क्रीडादि यार्हं योग्यं तदपि विधाय क्रीडति स्म । यतः—पतिव्रता । नहि पतिव्रतानां किंचिदसाध्यमस्ति । योऽयमकरणे । अखिलं भावने-पादि तत्तद्वर्हं यथा तथा रेमे इति वा ॥

न स्थली न जलधिर्न काननं नाद्रिभूर्न विषयो न विष्टपम् ।
क्रीडिता न सह यत्र तेन सा सा विधैव न यया यया न वा ॥८४॥

नेति ॥ सा तेन सह यत्र न क्रीडिता संभोगं नाकृत सा स्थली अकृत्रिमा भूरेव नास्ति । तथा—जलधिः कूलमारभ्य मध्यपर्यन्तं स जलधिर्नास्ति । तथा—काननं वृहदं वनं

नास्ति । साऽद्रिर्भूर्नास्ति । स विषयः कर्णाटादिरूपो देशविशेष एव सुखहेतुः स्रक्चन्दनादिर्वा नास्ति । तद्विष्टपं भूर्भुवःस्वराद्येव नास्ति । यस्यां यस्मिन्वा तेन चिक्रीडेति प्रत्येकं योज्यम् । वा समुच्चये । तथा—सा विधैव पुरुषायितादिरूपः कामशास्त्रोक्तः प्रकार एव नास्ति । यया यया येन येन प्रकारेण सा न क्रीडिता । जलान्तःसंभोगनिषेधे पूर्वश्लोके नानारूपधारणोक्तेर्मत्स्यादिरूपत्वान्निषेधो न, मनुष्याधिकारत्वाच्छास्त्रस्येति ज्ञेयम् । क्रीडिता, 'गत्यर्थाकर्मक-' इति कर्तरि निष्ठा ॥

नम्रयांशुकविकर्षिणि प्रिये वक्त्रवातहतदीप्तदीपया ।
भर्तृमौलिमणिदीपितास्तया विस्मयेन ककुभो निभालिताः ॥ ८५ ॥

नम्रयेति ॥ प्रियेंऽशुकविकर्षिणि सति लज्जावशाद्गुप्तावयवानवलोकनार्थं नम्रया, अत एव वक्त्रवातेन हतो निर्वापितो दीप्तः प्रकाशमानो दीपो यया तया भर्तृमौलौ मणयो मुकुटरत्नानि तैर्दीपिताः प्रकाशिताः ककुभो दिशः विस्मयेन निर्वापितेऽपि दीपे कथमयं प्रकाश इत्याश्चर्येण निभालिता विलोकिताः । रत्नप्रकाशाज्ञानाद्विस्मयः, रत्नप्रभातिशयाद्वा ॥

कान्तमूर्ध्नि ददती पिधित्सया तन्मणेः श्रवणपूरमुत्पलम् ।
रन्तुमर्चनमिवाचरत्पुरः सा स्ववल्लभतनोर्मनोभुवः ॥ ८६ ॥

कान्तेति ॥ तस्य पूर्वोक्तस्य दिक्षु दीप्तस्य मुकुटमणेः पिधित्सया आच्छादितुमिच्छया श्रवणपूरं कर्णभूषणीकृतं नीलोत्पलं कान्तमूर्ध्नि दधती स्थापयन्ती सा रन्तुं स्ववल्लभस्येव तनुः शरीरं यस्य नलदेहव्याजं धारयतो मनोभुवः पुर आदौ सुरतारम्भेऽर्चनमिवाचरत्पूजामिव चकार । पुष्पपूजा शिरसि कर्तुमुचिता । रतारम्भे च स्मरः समुचिता देवतेति तत्पूजा युक्ता । प्रकाशाभावार्थं कर्णोत्पलेन मुकुटमणिं पिदधाविति भावः ॥

तं पिधाय मुदिताथ पार्श्वयोर्वीक्ष्य दीपमुभयत्र सा स्वयोः ।
चित्तमाप कुतुकाद्भुतत्रपातङ्कसंकटनिवेशितस्मरम् ॥ ८७ ॥

तमिति ॥ सा तं नलीयं मुकुटमणिं पिधाय कर्णोत्पलेनाच्छाद्य मुदिता सती अथ पश्चात्स्वयोर्निजयोरुभयत्र द्वयोर्वामदक्षिणयोः पार्श्वयोर्दीपं वीक्ष्यार्थाद्द्वौ दीपौ दृष्ट्वा स्वचित्तमघटनाघटनात्कुतुकं तद्दर्शनजातमाः किमेतदिति चमत्करणमद्भुतमाश्चर्यं, लज्जा त्रपा, आकस्मिकदीपदर्शनादातङ्को भयं गोप्यान्यपि मदीयाङ्गानि प्रियेण दृष्टानीति शङ्कातिशये वातङ्कः, तेषां संकटे संमर्दे मध्ये निवेशितः स्मरो यत्र तदेवंभूतमाप । विशेषणविधौ तात्पर्यम् । दीपौ दृष्ट्वा कौतुकादिसहिताभूदिति भावः ॥

एककस्य शमने परं पुनर्जाग्रतं शमितमप्यवेक्ष्य तम् ।
जातवह्निवरसंस्मृतिः शिरः सा विधूय निमिमील केवलम् ॥ ८८ ॥

एककस्येति ॥ द्वयोर्दीपयोर्मध्य एककस्य दीपस्य मुखचेलाञ्चलादिना शमने निर्वाणे क्रियमाणे सति पूर्वशमितमपि तं द्वितीयं दीपं नलेच्छामात्रेण पुनरपि जाग्रतं प्रदीप्तमवेक्ष्य जाता वह्निवरसंस्मृतिर्यस्याः सा स्मरणाभिनयवशाद्वा शिरो विधूय केवलं निमिमील निमीलितवती । लज्जाभिनयः । कौतुकवशात्तदीयगोप्यावयवविलोकनार्थं तस्या निरुपायत्वात् पुनः पुनः शामितानपि दीपानिच्छामात्रेणाजिज्वलदिति भावः । एकस्य शमने कृतेऽपरदीपं जाग्रतं दृष्ट्वा शमितमपि पुनर्जाग्रतं दृष्टेति व्याख्येयम् । एककः पूर्ववत् ॥

पश्य भीरु न मयापि दृश्यसे यन्निमीलितवती दृशावसि ।
इत्यनेन परिहस्य सा तमः संविधाय समभोजि लज्जिता ॥ ८९ ॥

पश्येति ॥ अनेनेति परिहस्य सोपहासमुक्त्वा तदीयलज्जापाकरणार्थं दीपाभावेच्छामात्रेण तमः संविधायान्धकारं निर्माय सा समभोजि संभुक्ता । ततो लज्जिता । इति किम्— हे भीरु लज्जाभयकातरे, यद्यस्मात्त्वं दृशौ निमीलितवत्यसि तस्मात्त्वं मयापि न दृश्यसे पश्य नेत्रनिमीलनात्त्वया यथा स्वीयमङ्गं न निरीक्ष्यते, तथा मयापि त्वदङ्गमित्यर्थः । अथ च— त्वया नेत्रे निमीलिते, मया तु त्वं न दृश्यसे चित्रमेतत् । यस्मान्मया न द्रष्टव्यमिति हेतोस्त्वया नेत्रे निमीलिते, तावतैव मया न दृश्यसे, अपि तु दृश्यस एव । अन्या हि गोप्यमङ्गं वस्त्रादिनाच्छादयति, त्वया तु नेत्रे एव निमीलिते । तथा च मया त्वदीयगोप्यमङ्गं ज्ञानं दृष्टमेवेति किं नेत्रनिमीलनेन पश्येति । 'अमुना नलेन लज्जिता सा तमः सम्यग्विधायानन्तरं चैवं परिहासपूर्वमुक्ता । भीरु, ऊङन्तत्वान्नदीत्वाद्ध्रस्वः । तस्मान्मर्माणि गुणः ॥

चुम्ब्यसेऽयमयमङ्क्यसे नखैः श्लिष्यसेयमयमर्प्यसे हृदि ।
नो पुनर्न करवाणि ते गिरं हुं त्यज त्यज तवास्मि किंकरा ॥ ९० ॥

इत्यलीकरतकातरा प्रियं विप्रलभ्य सुरते ह्रियं च सा ।
चुम्बनादि विततार मायिनी किं विदग्धमनसामगोचरः ॥९१॥ युग्मम्

चुम्ब्यसे इति ॥ इतीति ॥ युग्मम् । हे प्रिय, मयाऽयं त्वं चुम्ब्यसे, अयं त्वं नखैरङ्क्यसे चिह्न्यसे, अयं त्वं श्लिष्यस आलिङ्ग्यसे, अयं त्वं हृदि अर्प्यसे हृदयोपरि धार्यसे । ते तव पुनरहं गिरं नो करवाणीति न, अपि तु करोम्येव । यत्त्वया चुम्बनादि याचितं तत्सर्वं करोम्येव । यत इत्यर्थः । हुमिति सुरतसंमर्दासहत्वेन पूर्वतामित्यर्थे । त्यज त्यज इति पीडानटने । मुञ्च मुञ्च मामित्यर्थः । अहं तव किंकरास्मीति दैन्यनटने । इत्येवंप्रकारेणालीकरते मिथ्यैव सुरते कातरा भीरुः । सुरते विषये बलात्कारनीता सती आत्मानं यथाकथंचिन्मोचयितुमेवेयं वदति, न तु हेलयेति । यथा—अयापीयमप्रौढेति प्रियं विप्रलभ्य प्रतार्य एतादृशीं वृथाबुद्धिं तस्योत्पाद्य तथा ह्रियमपि प्रतार्य मामियमद्यापि न मुञ्चति । बलात्कारेणमां चुम्बनादि करोति, न तु स्वेच्छयेति लज्जात्यागमप्यप्रकटीकृत्य चुम्बनादि पूर्वोक्तं सकलमपि सुरतसंभारं प्रौढवदेव विततार प्रियाय ददौ । यतो मायिनी मायावती । उक्तप्रकारेण कपटेनाच्छादितनिजकामोन्मादप्रौढिरिति यावत् । यस्मात्—विदग्धं व्यवहारचतुरं मनो येषां तादृशानां किं वस्तु अगोचरो विषयो न भवति, अपि तु—सर्वमपि साध्यमेव । चतुरा हि असाध्यमपि साधयन्ति । अलीकरतकातरेति पाठे—अलीकतरं कातरेति समासः । त्यज त्यज, वीप्सायां द्विरुक्तिः । किंकरेति, 'दिवाविभा—' इति टप्रत्ययेऽपि 'किंयत्तद्बहुषु कृञोऽज्विधानम्' इत्यच् तदन्तम् ॥

स्वेप्सितोद्भवितमात्रकृतया दीपिकाचपलया तमोघने ।
निर्विशङ्कुरतजन्मतन्मुखाकूतदर्शनसुखान्यभुङ्क्त सः ॥ ९२ ॥

स्वेति ॥ स तमसा घने सान्द्रेऽपि, अथ च, तमस्तुल्ये घने मेघे तमोघने मेघे स्वेप्सितेन स्वेच्छामात्रेणोद्भावितया प्रकटिता यावद्वदनानीव दर्शिता च, तथा—

दीपिकयैव चपलया विद्युता दृष्टनष्टया निर्विशङ्कं यद्रतं तस्माज्जन्म येषां तानि च तानि तस्या मुखाकूतानि वदनेङ्गितानि तेषां दर्शनानि तज्जन्यानि सुखान्यमुह्रान्वभूत् । अन्धकारव॰ शार्ङ्गी स्वेच्छाविरचितमुखाकूतदर्शनसुखानुभवार्थं वह्निवरदानवशात्तदानीमेव दीपिकां प्रकाशितवान्, तदानीमेव च लज्जावती स्यादिति भिया पुनस्तां शमितवानिति भावः । विद्युदप्येवंभूता भवति । लुपेत्यन्तर्भावितण्यर्थे ज्ञेयः ॥

यद्भ्रुवौ कुटिलिते तया रते मन्मथेन तदनामि कार्मुकम् ।
यत्तु हुंहुमिति सा तदा व्यधात्तत्सरस्य शरमुक्तिहुंकृतम् ॥ ९३ ॥

यदिति ॥ तया रते भ्रुवौ कुटिलिते वक्रिते इति यत्, तन्मन्मथेन कार्मुकमेवानामि । यत्तु पुनः सा तदा सुरतसमये सुरतसंमर्दनिःसहतावारणव्याजेन हुंहुमिति रतिह्लसचन्दं व्यधात्, तत्सरस्य शरमुक्तिहुंकृतं बाणमोचनकालीनं हुंकारमेवाकृत हुंकार एवाभूत् । तस्या हुंकरणं कामस्य चापनमनमित्यर्थः । कामस्य वामत्वाद्भ्रूवक्रणादिना कामः पुनरुज्जृम्भित एवाभूदिति भावः ॥

ईक्षितोपदिशतीव नर्तितुं तत्क्षणोदितमुदं मनोभुवम् ।
कान्तदन्तपरिपीडिताधरा पाणिधूननमियं वितन्वती ॥ ९४ ॥

ईक्षितेति ॥ चुम्बनरसात्कान्तदन्तैः परिपीडिताधरा दष्टाधरा, अत एव—पाणिधूननं वितन्वती इयं तत्क्षणे सुरतसमये उदितमुदं संजातहर्षं मनोभुवं नर्तितुमुपदिशतीव नृत्यं शिक्षयन्तीव प्रियेणेक्षिता । यापि नृत्यं शिक्षयति सापि हस्तकाभिनयवशात्करकम्पनं करोति । उपदिशती, 'आच्छीनद्योः–' इति पाक्षिकत्वान्नुमभावः ॥

सा शशाक परिरम्भदायिनी गाहितुं बृहदुरः प्रियस्य न ।
चक्षमे च स न भङ्गुरभ्रुवस्तुङ्गपीनकुचदूरतां गतम् ॥ ९५ ॥

सेति ॥ परिरम्भदायिनी सा प्रियस्य बृहदुरो गाहितुं सामस्त्येन स्प्रष्टुं न शशाक । यतो बृहदतिविशालम् । सा च कृशाङ्गीत्यर्थः । स च नलोऽपि भङ्गुरे भ्रुवौ यस्यास्तस्या वक्षः सर्वमपि स्प्रष्टुं न चक्षमे । यतः—तुङ्गाभ्यां कुचाभ्यां पीनाभ्यां दूरतां व्यवहिततां गतं प्राप्तम् । कुचमात्रमेवालिङ्गितम्, नतु सर्वं वक्ष इत्यर्थः । उभावपि संपूर्णालिङ्गनाप्राप्तेर्नितरां सस्पृहत्वादुज्जृम्भितकामौ जाताविति भावः ॥

बाहुवल्लिपरिरम्भमण्डली या परस्परमपीडयत्तयोः ।
आस्त हेमनलिनीमृणालजः पाश एव हृदयेशयस्य सः ॥ ९६ ॥

बाह्विति ॥ तयोर्बाहव एव दैर्घ्यकार्श्याभ्यां वल्ल्यो लतातुल्यास्तासां परिरम्भ आलिङ्गनविषये या मण्डलीवृत्ताकाराङ्कपाली परस्परमपीडयद्गाढमालिङ्गत् । स हृदयेशयस्य कामस्य हेमनलिनीमृणालाज्जातस्तेन निर्मितः पाश एव आस्त बभूव । अतिगौरत्वान्मार्दवत्वाच्च बाहूनां सौवर्णमृणालतुल्यत्वम् । पाशबद्धो यथा वश्यो भवति, तथाऽङ्कपालीपाशेन दृढं बद्धौ कामवशं याताविति भावः ॥

वल्लभेन परिरम्भपीडितौ प्रेयसीहृदि कुचाववापतुः ।
केलतीमदनयोरुपाश्रये तत्र वृत्तमिलितोपधानताम् ॥ ९७ ॥

वल्लभेनेति ॥ प्रेयसीहृदि वल्लभेन परिरम्भपीडितौ गाढालिङ्गनेन वामनीकृतौ कुचौ केलतीमदनयो रतिकामयोरुपाश्रये विश्रान्तिस्थाने तत्र वक्षसि वृत्तनिलितोपधानतां वर्तुलत्वंगतोच्छीर्षकभावमवापतुः । प्रभोर्हि विश्रान्तिस्थाने शय्यादौ गण्डोपधानं वृत्तमुच्छीर्षकं भवति, रतिकामौ च प्रभू तत्र वर्तेते, अतस्तत्रैव वर्तमानौ वृत्तौ वामनीभूतौ कुचौ द्वयोरुच्छीर्षके इव बभूवतुरित्यर्थः । इत्युत्प्रेक्षा । केलती रतिपर्यायः ॥

भीमजोरुयुगलं नलार्पितैः पाणिजस्य मृदुभिः पदैर्बभौ ।
तत्प्रशस्ति रतिकामयोर्जयस्तम्भयुग्ममिव शातकुम्भजम् ॥ ९८ ॥

भीमजेति ॥ भीमजोरुयुगलं नलार्पितैर्मृदुभिः पाणिजस्य नखस्य पदैः स्तोकत्वान्नोल्लेखिभिर्नखक्षतैः कृत्वा रतिकामयोः शातकुम्भजं सौवर्णं तयोर्यशःप्रशस्तिलिपिरूपा यत्र, सैव नखस्वरूपैव यशःप्रशस्तिर्यत्रैवंभूतं वा, निजजयप्रकाशकं स्तम्भयुग्ममिव बभौ । रतिकामयोरियमेव यशःप्रशस्तिर्यन्नखक्षतादिकरणं नाम । सुवर्णतुल्यत्वादूर्वोः सुवर्णस्तम्भत्वम् । अन्यस्यापि प्रभोर्यशःप्रशस्तिर्जयस्तम्भे लिख्यते ॥

वह्नमानि विधिनापि तावकं नाभिमूरुयुगमन्तराङ्कम् ।
स व्यधादधिकवर्णकैरिदं काञ्चनैर्यदिति तां पुराह सः ॥ ९९ ॥

वह्निति ॥ स तां पुरेत्याह अवोचत् । इति किम्—हे भैमि, नाभिमूरुद्वयमन्तरा नाभ्यूरुद्वयमध्येऽङ्कं कोमलतातिशयान्मर्दनासहतयाल्पं हत्नं वा मदनसदनाख्यं तावकमङ्कं न केवलं मया, किंतु वीतरागेण विधिना ब्रह्मणापि बहु नितरामनाम्याहतम् । यद्यस्मात्कारणात्स ब्रह्माधिको वर्णो येषां तैरतिगौरवर्णैरत्युत्तमैः काञ्चनैरिदं कामगृहं व्यधादकृत । निरन्तरावृतत्वादुष्णशीतवातादिसंबन्धाभावादलीनत्वाच्चाङ्गान्तरापेक्षयाऽधिकवर्णं वराङ्गं दृष्ट्वा प्रहृष्टकामः सन्नेवमुवाचेत्यर्थः । अश्लीलमप्येतन्मैथुनादन्यत्र निषेधाद्वराङ्गदर्शनं दुष्टमिति ज्ञेयम् । नाभिमित्यादौ, 'अन्तरान्तरेण—' इति द्वितीया । अङ्ककम्, 'अल्पे' 'ह्रस्वे' इति वा कन् । पुराहेति, भूते 'पुरि लुङ् चास्मे' इति लट् ॥

पीडनाय मृदुनी विगाह्य तौ कान्तपाणिनलिने स्पृहावती ।
तत्कुचौ कलशपीननिष्ठुरौ हारहासविहते वितेनतुः ॥ १०० ॥

पीडेति ॥ कलशवत्पीनौ पीवरौ निष्ठुरौ कठिनौ च तावतिप्रसिद्धगुणौ तस्याः कुचौ कर्तृभूतौ कान्तस्य पाणिनलिने करकमले कर्मभूते हारस्य हासः प्रकाशस्तेन विहते आच्छादिते वितेनतुश्चक्रतुः । स्तनान्तावपि नलकरौ हारदीप्त्या पिहिताविल्यर्थः । अथवा हार एव हासस्तेन पराभूते कृतोपहासे चक्रतुः । यतो—विगाह्य तावेवाभितः स्पृष्ट्वा पीडनाय मर्दनाय स्पृहावती साभिलाषे पृथक्छे । यतो—मृदुनी मर्दयितुमक्षमौ । स्वयं मृदुर्हि महतः कठिनस्य च पीडनाय न प्रभवतीति मृदुभ्यां पुराभ्यां विशालौ कठिनौ कामं मर्दयितुमशक्याविति तौ पराभूय यथा प्राभवे स्वपरतारतम्यं न सहते भवद्भ्यामिति तत्कुचाभ्यां नलकरौ हारहासेन विडम्बिताविल्यर्थः । कर्षतः स्पृष्टावेव न तु पीडिताविति भावः । 'अवकर्षणोऽन्तौ हस्तौ—' इति लक्षणात्काठिन्येन राजकरस्य गुणः, तथापि [illegible] उपेक्षया मर्दनान्मृदुनी स्तुत्यम् । पीडनाय स्पृहावती ये मृदुनी विशेषेण कृत्वा हारहासेन चक्रतुरिति वा । अन्योऽपि विरुद्धे मृदुमुपहसति ॥

यौ कुरङ्गमदकुङ्कुमाञ्चितौ नीललोहितरुचौ वधूकुचौ।
स प्रियोरसि तयोः स्वयंभुवोराचचार नखकिंशुकार्चनम् ॥ १०१ ॥

यावितिः ॥ यौ वधूवरौ कुरङ्गमदेन कस्तूर्या कुङ्कुमेन चाञ्चितौ पूजितौ कृतविलेपनावत एव क्रमेण नीला लोहिता रुक्कान्तिर्ययोः, अथ च—नीललोहितौ हरस्तत्कान्तौ एवंभूतौ नलस्तयोर्यौवनारम्भे प्रियोरसि भैमीवक्षसि स्वयमेव भवतोः प्रादुर्भवतो रक्तीङ्गाग्रलाञ्छैरेव किंशुकैः पलाशपुष्पैरर्चनं पूजामाचचार। कृताङ्गरागयोः कुचयोर्नखपदानि रचितवानित्यर्थः। अल्पनखोल्लेखस्य व्यथाराहित्येन शोभामात्रहेतुत्वापादनमित्युत्प्रेक्षा। कस्तूर्या अभ्यर्हितत्वात्पूर्वनिपातः ॥

अम्बुधेः कियदनुत्थितं विधुं स्वानुविम्बमिलितं व्यडम्बयत्।
चुम्बदम्बुजमुखीमुखं तदा नैषधस्य वदनेन्दुमण्डलम् ॥ १०२ ॥

अम्बुधेरिति ॥ सुरतावसरेऽम्बुजमुख्या भैम्या मुखं चुम्बद्यन्नैषधस्य वदनेन्दुमण्डलं कर्तृ प्रतिदिनमुदयसमयेऽम्बुधेः समुद्रात्कियत्स्तोकमनुत्थितम्, तथा—समुद्रजले जातेन स्वानुविम्बेनात्मीयप्रतिविम्बेन मिलितं निरन्तरसंबद्धं विधुं चन्द्रं व्यडम्बयदनुचकार। भैमीमुखं कर्तृ नलमुखं कर्मीभूतं चुम्बदिति वा। अनेन विपरीतरतं सूचितम्। विम्बप्रतिविम्बभावनिरूपणेनात्यन्तं तन्मुखयोः सादृश्यं सूचितम्[1]। कामसुहृच्चन्द्रोदयनिरूपणाच्च कामोज्जृम्भणं व्यज्यते ॥

पूगभागबहुताकषायितैर्वासितैरुदयभास्करेण तौ।
चक्रतुर्निधुवनेऽधरामृतैस्तत्र साधुमधुपानविभ्रमम् ॥ १०३ ॥

पूगेति ॥ पूगफलफालिकानां भागोऽशस्तस्य बहुतया कषायितैस्तुवररसं प्रापितैः, 'कषायः सुरभावपि—' इत्यभिधानात्सुरभितैर्वा। तथा पक्केनोदयभास्कराख्येन ताम्बूलमध्ये गृहीतेन कर्पूरेण वासितैः, सुरभितैरन्योन्याधरामृतैर्वा, अधररसैरेवामृतैः कृत्वा तौ दमयन्तीनलौ तत्र निधुवने सुरते मधुपानस्य विभ्रमं मद्यपानरूपं विलासं साधु सम्यग्यथा तथा अथ च—मद्यपानजन्यं विभ्रमं चक्रतुः। मद्यपानस्थानेऽन्योन्याधरपानमेव चक्रतुस्तेनैव च नितरां सोन्मादौ जाताविति भावः। अन्योऽपि कषायरसं कर्पूरवासितं शीतलं मधु पिबति। साध्वनिषिद्धं मध्विति वा। सुरते मधुपानविभ्रममधरामृतैः साधु यथा तथा चक्रतुः। उपदंशस्थानेऽधरामृतानि जातानीत्यर्थः। भोगेति पाठे—अनुभवः। रागेति पाठे—बहुताम्बूलचर्वणक्रमविवर्धमानरक्तिमबाहुल्येनेत्यर्थः। कषायितैः, 'तत्करोति' इति ण्यन्तान्निष्ठा ॥

आह नाथवदनस्य चुम्बतः सा स्म शीतकरतामनक्षरम्।
सीत्कृतानि सुदती वितन्वती सत्त्वदत्तपृथुवेपथुस्तदा ॥ १०४ ॥

आहेति ॥ तदा सुरतचुम्बनावसरे सीत्कृतानि वितन्वती कुर्वती, तथा कामावस्थाविकारविशेषेण सत्त्वेन दत्तः पृथुर्वेपथुः कम्पो यस्यास्तादृशी सती चुम्बने(तो) नाथवदनस्यानक्षरं वर्णैर्विना तत्कार्यकारित्वेन शीतकरतां चन्द्रतामाह स्म। चन्द्रस्पर्शाद्यथा दुःखं भवति,

---

१ 'सादृश्याक्षेपाद्विदर्शनालंकारः' इति जीवातुः।

तथा नलमुखस्पर्शात्तस्या अभूदित्यर्थः । शीतेऽपि सीत्कारः कम्पश्च भवति, मुखादक्षरं च न निर्गच्छति । शीतं कर्तुं शीलमस्य शीतकरः, 'कृञो हेतुताच्छील्य—' इति टः ॥

चुम्बनाय कलितप्रियाकुचं वीरसेनसुतवक्त्रमण्डलम् ।
प्राप भर्तुमनृतैः सुधांशुना सक्तहाटकघटेन मित्रताम् ॥ १०५ ॥

चुम्बनायेति ॥ चुम्बनाय कलितः स्पृष्टः प्रियाकुचो येन वीरसेनसुतस्य वक्त्रमण्डलं सुधांशुना चन्द्रेण मित्रतां साम्यं प्राप । किंभूतेन चन्द्रेण—स्वैरेवामृतैरात्मानं भर्तुं पूरयितुं सक्तः संगतो हाटकघटः सुवर्णकलशो येन । मुखं चन्द्रसममम्रृतभरणार्थं चन्द्रसंबद्धस्वर्णघटसमो भैमीकुचः । मुखेन्दुना स्वीयममृतं कुचकलशे निक्षिप्तम्, नतु तदमृतं गृहीतमिति अनौचिती नाशङ्कनीया । मुखचुम्बनादमृतांशुयोगादिव भैमीकुचः शान्ततापो जातसुखश्चाभूदिति भावः । 'मुखनेत्रस्तनबाहुमूलकपोलौष्ठहृदयवराङ्गान्यष्टौ चुम्बनस्थानानि, रागतः सर्वाण्यपि च' इति वात्स्यायनः । नयनगण्डकपोलदन्तवासोमुखान्तस्तनयुगललाटं वा चुम्बनस्थानम् । स्तने चूचुकं परिहृत्येति विशेषः । मित्रशब्दस्य तुल्यार्थत्वात्सुधांशुनेति 'तुल्यार्थैः—' इति तृतीया ॥

वीक्ष्य वीक्ष्य पुनरैक्षि सा मुदा पर्यरम्भि परिरभ्य चासकृत् ।
चुम्बिता पुनरचुम्बि चादरात्तृप्तिरापि न कथंचनापि च ॥ १०६ ॥

वीक्ष्येति ॥ अमुना सा वीक्ष्य वीक्ष्य पुनरैक्षि । तथा—असकृद्वारंवारं परिरभ्य च पुनः पर्यरम्भि पुनरालिङ्गि । तथा—आदराद्वारंवारं चुम्बितापि पुनरचुम्बि च । तथापि कथंचनापि केनापि प्रकारेणानेन तृप्तिस्मरणसद्भावेऽपि तृप्तिर्नापि न प्राप्ता ॥

छिन्नमप्यतनु हारमण्डलं मुग्धया सुरतलास्यकेलिभिः ।
न व्यतर्कि सुदृशा चिरादपि स्वेदबिन्दुकितवक्षसा हृदि ॥ १०७ ॥

छिन्नमिति ॥ सुदृशा निरीक्षणे नितरां चतुरयापि मुग्धया सुन्दर्या, अथ च—बालया भैम्या सुरतलास्यकेलिभिः सुरतसंबन्धिभिर्नृत्तविलासैः करधूननादिभिर्नृत्तविशेषैः कृत्वा हृदि छिन्नं त्रुटितगुणमप्यतनु आनाभिलम्बित्वाद्विशालं हारमण्डलं मुक्ताहारदाम चिरादपि भूयसापि कालेन न व्यतर्कि । यतः—स्वेदबिन्दुकितं संजातस्वेदबिन्दुकं वक्षो यस्यास्तया । सुरतायाससंजातस्वेदबिन्दुमण्डलस्य हारवद्दर्शनान्मोहाच्च त्रुटितोऽपि हारो नावोधीत्यर्थः । स्वार्थिककप्रत्ययान्तात्स्वेदबिन्दुकशब्दात्तारकादित्वादितच् ॥

यत्तदीयहृदि हारमौक्तिकैरास्त तत्र गुण एव कारणम् ।
अन्यथा कथममुत्र वर्तितुं तैरशाकि न तदा गुणच्युतैः ॥ १०८ ॥

यदिति ॥ हारमौक्तिकैस्तदीये हृदि वक्षसि, अथ च—चित्ते, यदास्ति स्थितं तत्र गुणो दोरकस्तत्सादिरेव कारणं हेतुः । अन्यथा यद्येवं तर्हि तदा सुरतसमये गुणच्युतैः सूत्रभ्रष्टैस्तैर्मौक्तिकैरमुत्र तदीये हृदि वर्तितुं स्थातुं कथं नाशाकि तथैव स्थातुम् । अथ च—तारत्वादिगुणहीनैर्मौक्तिकैस्तदीयहृदये न स्थीयते छिद्रमन्तरेण । तस्माद्गुणवदभि-

१ '[illegible]' इति जीवातुः ।
२ 'भ्रान्तिमदलंकारः' इति जीवातुः ।

धेऽपि भैमीहृदये स्थातुं मौक्तिकानामन्वयव्यतिरेकाभ्यां द्विविधोऽपि गुणो हेतुरित्यनुमानम्। सुरतसंमर्दान्मुक्ताहारस्त्रुटित इति भङ्ग्यन्तरेणोक्तम् । अन्यस्यापि विदग्धहृदयगामित्वे गुण एव हेतुः, गुणहीनेन तु चित्ते स्थातुं न शक्यते इति भङ्ग्या सूचितम्। गुणच्युतैः, 'पञ्चमी' इति योगविभागात्समासः॥

एकवृत्तिरपि मौक्तिकावलिश्छिन्नहारविततौ तदा तयोः।
छाययाऽन्यहृदये विभूषणं श्रान्तिवारिभरभाविते‍ऽभवत्॥ १०९॥

एकेति॥ तदा संभोगसमये तयोर्द्वयोर्मध्य एकस्मिन्नल एव वृत्तिर्यस्या एवंभूतापि मौक्तिकावलिरन्यस्या भैम्या हृदये छायया विभूषणमभवत् । किंभूतेऽन्यहृदये—छिन्ना हारस्य विततिर्विस्तारो यस्य। यतः—श्रान्तिवारीणि स्वेदबिन्दवस्तेषां भरः पूरस्तेन भाविते व्याप्ते। द्वयोः समीपे संमुखस्थितयोर्मध्ये भैम्या हारे त्रुटितेऽपि स्वेदजलपूरिते हृदये प्रतिबिम्बितो नलस्य हार एवाभरणं बभूवेत्यर्थः। अन्यहृदय इति सर्वनामत्वात्पुंवद्भावः॥

वामपादतललुप्तमन्मथश्रीमदेन मुखवीक्षिणानिशम्।
भुज्यमाननवयौवनामुना पारसीमनि चचार सा मुदाम्॥ ११०॥

वामेति॥ वामपादतलेन लुप्तो मन्मथश्रीमदः कामसौन्दर्यगर्वो येनातिसुन्दरेणाप्यनिशं भैमीमुखवीक्षिणा केवलभैम्यधीनेनामुना नलेन भुज्यमानं नवं नूतनं यौवनं तारुण्यं यस्याः सा भैमी मुदां संतोषाणां पारसीमनि परतीरमर्यादायां परमोत्कर्षे चचारावर्तत। भावावसानसमयं प्रापेत्यर्थः। वामपादतल—, मुखवीक्षि—, इति पदद्वयं लौकिकोक्तिः। एवंभूतेन च भुज्यमानत्वान्मुदां परमोत्कर्षं प्रापेति युक्तम्। मुखवीक्षणं दिने रात्रावपि वरदानप्रकाशितदीपवशाज्ज्ञेयम्॥

आन्तरानपि तदङ्गसंगमैस्तर्पितानवयवानमन्यत।
नेत्रयोरमृतसारपारणां तद्विलोकनमचिन्तयन्नलः॥ १११॥

आन्तरानिति॥ नलः स्वीयानान्तरान्शरीरमध्यवर्तिनः स्पृश्यमानानप्यवयवान् तदङ्गसंगमैः सुकुमारभैम्यवयवस्पर्शैरतिवेधकतया तर्पितान्सुखितानमन्यत। तथा—तद्विलोकनं च स्वीयनेत्रयोरमृतस्य सारेण श्रेष्ठभागेन पारणां तद्रूपं तृप्तीकरणमचिन्तयद्बुबुधे। पुनःपुनर्भैमीगाढालिङ्गनदर्शनादन्तर्बहिश्च प्रीणितोऽभूदित्यर्थः। अन्तरशब्दाद्वा भावार्थेऽण्। तर्पितान्, ण्यन्तात्कर्मणि क्तः॥

भूषणैरनुपदाश्रितैः प्रियां प्रागथ व्यपददेष भावयन्।
तैरभावि कियदङ्गदर्शने यत्पिधानमयविघ्नकारिभिः॥ ११२॥

भूषणैरिति॥ एष नलः प्रियामाश्रितैः स्वशरीरं मण्डयद्भिस्ताटङ्कादिभिर्भूषणैर्दृष्टैः प्राक् संतोषमगात्। अथ तोषानन्तरं भावयन्विचारयन्व्यपदद्विषण्णोऽभूत्। यद्यस्मात् [illegible] कियतोऽलंकृतस्याल्पस्याङ्गस्य दर्शने विषये पिधानमयानामाच्छादनरूपाणां दर्शनान्तरायाणां कारिभिस्तद्धेतुभूतैरभावि जातम्। अनलंकृतं चेत्तर्हि सर्वं दर्शनगोचरोऽभविष्यत्,

१ अत्रैकस्यैव हारस्योभयत्र भूषणत्वेनासंबन्धेऽपि संबन्धोक्तेस्तद्रूपातिशयोक्तिरलंकारः' इति जीवातुः।

न्त्वेवम्, तस्मात्पपदादित्यर्थः । भैमीसौन्दर्यं तस्यां नलानुरागातिशयश्च सूचितः । रतसमये भूषणमोचनस्यैव युक्तत्वाद्भूषणसद्भाववर्णनं यद्यप्यनुचितम्, तथापि यावद्भूषणानि मोचयति, तावदपि विलम्बासहिष्णुतया हठप्रुरतसूचनाद्भूषणवर्णनौचित्ये न दोषायेति, तदाप्यलन्ता-परिहार्यभूषणाभिप्रायेण वेति ज्ञेयम् । 'बहुमन्यत दृशा न चेतसा भूषणानि स विदर्भसु-भ्रुवः' इति वा पाठः सुगमः । अनुपत्, पुषादित्वादङ् ॥

योजनानि परिरम्भणेऽन्तरं रोमहर्षजमपि स्म वोधतः ।
तौ निमेषमपि वीक्षणे मिथो वत्सरव्यवधिमध्यगच्छताम् ॥ ११३ ॥

योजनानीति ॥ तौ रोमहर्षजं सात्त्विकभावोत्परोमाञ्चजातमल्पमप्यन्तरं परिर-म्भण आलिङ्गने विषये बहूनि योजनानि बोधतः स्म अजान(नी)ताम् । तथापि मिथो वीक्षणे प्रारब्धेऽन्योन्यविलोकनेऽल्पं निमेषमक्षिपक्ष्मसंकोचक्षणमपि वत्सरेण वर्षेण व्यवधिं व्यवधानं बहुवर्षदर्शनविच्छेदकालमध्यगच्छतामज्ञासिष्टाम् । अल्पीयसाऽपि देशका-लव्यवधानेन प्रेमभरादन्योन्यविच्छेदत्वाम्यानमनातामित्यर्थः । बोधतः, 'बुध अवगमने' भौवादिकः । स्मयोगे लट् ॥

वीक्ष्य भावमधिगन्तुमुत्सुकां पूर्वमच्छमणिकुट्टिमे मृदुम् ।
कोऽयमित्युदितसंभ्रमीकृतां स्वानुबिम्बमदर्शयत्ताम् ॥ ११४ ॥

वीक्ष्येति ॥ एष नलो मृदुं बालत्वात्सुरतभरासहां लघुद्रवां पद्मिनीम्, अत एव— स्तलात्पूर्वमेव बिन्दुपतनरयल्पं भावमधिगन्तुं प्राप्तुं नेत्रनिमीलनगाढालिङ्गनादिचिह्नेनोत्सुकां सत्वरां वीक्ष्य ज्ञात्वा तद्बिन्दुस्तम्भनार्थं कोऽयमपूर्वः पुरुष इति प्रश्नेन पूर्वमसंजातभयामपि नलरूपधारिणान्येनाहमुक्तेति बुद्ध्या सुरतसमयसमागतजनान्तरदर्शनाद्वा उदितसंभ्रमीकृतां समुत्पादितभयां विभ्रमत्वतया प्रतिबद्धभावोदयाम्, अनन्तरं का कुत्र तिष्ठतीति कृतप्रश्नां तां भैमीमच्छमणिकुट्टिमे निर्मले मणिबद्धभित्तिभागे स्वानुबिम्बं स्वप्रतिबिम्बमदर्शयत दर्शया-मास । नायमपूर्वः कश्चित्, किंतु मदीयमेवेदं प्रतिबिम्बम् तत्र ममान्य इति भ्रान्तिर्मा भूदिति स्वप्रतिबिम्बं तामदर्शयदित्यर्थः । अन्यतरस्य पूर्वं बिन्दुपतने विपरीतरतलाद्वैरस्यं स्यादिति बिन्दुस्तम्भार्थम् 'अन्यचित्ततया संभ्रमजननेन च भावबन्धं कुर्यात्' इति कामशास्त्रात्तस्या बिन्दुपातप्रतिबन्धमकरोदिति भावः । अदर्शयत, 'णिचश्च' इति तङ् । ('ऋदृशोऽङि गुणः') । तां बुध्यर्थत्वात्कर्मत्वम् ॥

एवं भैम्या भावलाभवेगभङ्गोपायमुक्त्वा नलस्य भावलाभवेगभङ्गमप्याह—

तत्क्षणावहितभावभावितह्लादशात्मलितदीधितिस्थितिः ।
स्वां प्रियामभिमतक्षणोदयां भावलाभलघुतां तुनोद सः ॥ ११५ ॥

तत्क्षणेति ॥ स प्रियाय अभिमते क्षणे स्वेदसमये भैमीभावलाभौत्सुक्यात्पूर्वमेवोदय उत्पत्तिः समयो यस्यास्तां भावलाभे स्वां प्रियां बिन्दुच्युतौ लघुतां शीघ्रतां तुनोद । अन्य-

१ टेढकमनारभ्यविलोम्यं पाठः । निविलिमिवक्ष्युमेन तदकैटविदेः । अतोऽभावेनोक्तक्रमशः । अस्पष्टोरनेदाहीकरणे तु अवोचदित्यनोकः, अपरथदित्यत्र पुनोऽस्पष्टः । २ 'दृशिर्' इति वार्तिकेनेति द्रष्टव्यम् । एवं सतमितेऽपभावानमस्मात् ।

चित्तीकरणेन व्यलम्बयदित्यर्थः। तदेवाह–किंभूतः—तस्मिन्नेव क्षणे निजभावौत्सुक्यसमयेऽ-वहितभावेनैतस्या इव ममापि भावलाभश्चेत्स्यात्, तर्हि विषमरतत्वाद्वैरस्यमेव स्यात्, अत-स्तुल्यकालनेवोभयोर्भावलाभं करवाणीति सावधानतयोक्तप्रकारेणैव सावधाने वा भावे चित्ते भाविता ध्यानवासनादिभिश्चिन्तिता द्वादशात्मनः सूर्यस्य, सितदीधितेश्चन्द्रस्य, स्थितिर्मर्यादा गगनगमनादिप्रकारो येन सः। तद्ध्यानेन निजबीजस्तम्भनार्थं स्वस्यैव संपादितवैचित्र्यः सन्निति यावत्। अथ च–सावधानतया कृता सूर्यचन्द्रापरपर्यायेडापिङ्गलाख्यदक्षिणवामनाडी-स्थयोर्मरुतोः स्थितिः स्थैर्यं येन। कुम्भितपवन इत्यर्थः। अन्यचित्ततासंपादनेन नासावायु-स्तम्भनेन चोपायेनैकसमयोभयभावप्राप्तिपर्यन्तं स्वीयं भावं स्थिरीचकरेति भावः। एतेन भङ्ग्या नलस्य योगाभ्यासोऽपि सूचितः, अन्येन तथा कर्तुमशक्यत्वात्। 'दक्षिणनासामुद्रणे पुरुषस्य, वामनासिकामुद्रणे योषितो बिन्दुस्तम्भो भवति' इति कामशास्त्रात्स्वीयं तदीयं च भावं स्थिरीचकारेति वा। विस्तरेणालम् ॥

इदानीं समरतमाह—

स्वेन भावजनने स तु प्रियां बाहुमूलकुचनाभिचुम्बनैः।
निर्ममे रतरहःसमापनाशर्मसारसमसंविभागिनीम् ॥ ११६ ॥

स्वेनेति ॥ स तु नलः पुनः स्वेन स्वयमेव भावजनन उभयोर्भावप्राप्तिसमये स्वेन सह वा स्वेनात्मनैव कर्त्रा यद्भावजननं तस्मिन्सति वा। स्वस्य भावजनकसमय इति यावत्। तत्र बाहुमूलं कक्षौ, कुचौ, नाभिश्च एतेषां चुम्बनैः कृत्वा रतस्य रहसि समापना तज्जनितं परम-काष्ठापन्नं शर्म सुखं, समापनारूपो वा शर्मसारस्तस्य समस्तुल्यो यः संविभागोंऽशस्तद्वतीं सम-रतप्रापणेन सुखिनीं निर्ममे चकार। स्वेनेत्यस्य प्रथमद्वितीयव्याख्ययोः कक्षादिचुम्बनं जातिः। तृतीयायां तु–कक्षादेर्निरन्तरं कामाधिष्ठानत्वात्तच्चुम्बनैरुपायैः स्वस्य भावप्राप्तिसमये तामपि भावमलम्भयदिति भावः। 'भावभजनेन तु–' इति पाठे—स्वीयेन भावभजनेन निमित्तेन बाह्वादिचुम्बनैरिति व्याख्या ॥

पुनरपि भङ्ग्यन्तरेण तदेवाह—

विश्लथैरवयवैर्निमीलया लोमभिर्द्रुतसितैर्विनिद्रताम्।
सूचितं श्वसितसीत्कृतैश्च तौ भावमक्रमकमध्यगच्छताम् ॥ ११७ ॥

विश्लथैरिति ॥ तौ भावलाभश्रमवशात्स्वोद्वहनेऽपि विश्लथैः शिथिलीभूतैरवयवैरङ्गैः, तथा—निद्राभावेऽपि निमीलया श्रमजनितनयनसंकोचत(न)या, तथा—तस्मिन्क्षणे द्रुतं शीघ्रं विनिद्रतामुल्लासमितैर्गतैर्लोमभी रोमाञ्चैः, तथा—श्वसितैः श्रमजमुखनासिकाश्वासैः सीत्कृतैश्च तैः सर्वैः सूचितमक्रमकं युगपत्संजातं बिन्दुच्युतिजन्यसुखरूपं भावमध्यगच्छताम्। सम-रतं प्रापतावित्यर्थः। भोगिनोः संभोगान्ते श्लथावयवत्वादि जातिः। क्रमकं, 'क्रमादिभ्यो वुन्' इति वुन् ॥

आस्त भावमधिगच्छतोस्तयोः संमदेषु करजक्षतार्पणा।
फाणितेषु मरिचावचूर्णना सा स्फुटं कटुरपि स्पृहावहा ॥ ११८ ॥

आस्तेति ॥ एवं भावमधिगच्छतोः सुरतान्तसुखमनुभवतोस्तयोः करजक्षतानां नखक्ष-तानामर्पणा दानं संमदेषु परमानन्देषु मध्ये आस्ताभूत्। आनन्ददायिकैवाभूदित्यर्थः। नखु

क्षतस्य सुखदायित्वं कथमित्यत आह—स्फुटं यस्मात्फाणितेषु दुग्धविकाररूपेषु खण्डविकारेषु वा पानकेषु मध्ये सा सूपशास्त्रप्रसिद्धा मरिचावचूर्णना कटुरसापि स्पृहावहा मधुररसजन्यारुचिपरिहारेण हृद्यामिच्छामावहति, तथा—कटुः पीडाजनिकापि नखक्षतार्पणा सुखकारिण्येवाभूदित्यर्थः । संभेदेषु नानाप्रकारेषु सुरतेषु भावं प्राप्नुवतोस्तयोस्तल्लिप्सैव समये सा कामशास्त्रप्रसिद्धा कटुः पीडाजनिकापि नखक्षतार्पणा स्पृहावहाऽभूत् । स्फुटशब्द इवार्थः । केषु केव—फाणितेषु कटुरसा मरिचावचूर्णनेव । सुरतान्ते कृताऽपि पुनः सुरतेच्छामेवोद्दीपयदिति भाव इति वा । भावमधिगच्छतोस्तयोः कटुरपि सुरतेषु स्पृहावहा या नखक्षतार्पणा सा स्फुटं निश्चितेषु फाणितेषु मरिचावचूर्णनाऽभूत् तद्रूपैव तद्रूपेव वाऽभूदित्यर्थ इति वा । 'मत्स्यण्डी फाणितं खण्डविकारः शर्करा सिता' इत्यमरः । चूर्णना, 'सत्यापपाश–' इति णिजन्ताद्युच् ॥

अर्धमीलितविलोलतारके सा दृशौ निधुवनक्लमालसा ।
यन्मुहूर्तमवहन्न तत्पुनस्तृप्तिरास्त दयितस्य पश्यतः ॥ ११९ ॥

अर्धेति ॥ निधुवनक्लमेन सुरतश्रमेणालसा । सुरतायासनिःसहाङ्गीत्यर्थः । सा दृशौ मुहूर्तं क्षणमात्रमर्धनिर्मीलिते ईषत्संकुचिते विलोले तारके ययोस्तादृशे(शौ) यदवहद्दधार, तत्तादृग्भैमीनेत्रावस्थानं पश्यतो दयितस्य पुनस्तृप्तिर्नास्ति मा भूत् । पुनः पुनः पश्यत इति वा (भावः) । पौनःपुन्यदर्शनामिलाषत्यानिवृत्तत्वात्पश्यन्नेव स्थित इत्यर्थः । तादृशी तस्य सुतरां सुखायाभूदिति भावः ॥

तत्क्लमस्तमदिदीक्षत क्षणं तालवृन्तचलनाय नायकम् ।
तद्विधा हि भवदैवतं प्रिया वेधसोऽपि विदधाति चापलम् ॥१२०॥

तदिति ॥ इदानींतनस्तस्याः क्लमः सुरतजः श्रमः नायकं नैषधमपि तं क्षणमात्रं तालवृन्तचलनायादिदीक्षतोपदिदेश । सुरतश्रान्तां तां दृष्ट्वा व्यजनवीजनेन श्रमापनयनं चकारेत्यर्थः । हि यतो—भवस्य संसारस्य कामसुखसर्वस्वस्य दैवतमिष्टदेवता तद्विधा भैमीसदृशी अतिसुन्दरी प्रियसौभाग्यवती प्रिया वेधसो ब्रह्मणोऽपि स्वभर्तुः चापलमनुरागतरलतां विदधाति करोति, किं पुनर्मनुष्यस्य नलस्येत्यर्थः । पुनरपि सानुरागो जात इति भावः । 'व्यजनं तालवृन्तकम्' इत्यमरः । अदिदीक्षत, निदर्शनार्थाद्दीक्षेर्णिजन्ताल्लुङि चङ् ॥

स्वेदबिन्दुकितनासिकाशिखं तन्मुखं सुखयति स्म नैषधम् ।
प्रोषिताधरशयालुयावकं सामिलुप्तपुलकं कपोलयोः ॥ १२१ ॥

स्वेदेति ॥ तस्या मुखं नैषधं सुखयति स्म । किंभूतम्—स्वेदबिन्दुकाः संजाता यस्याः तादृशी नासिकाशिखा नासाग्रं यस्य । तथा—प्रोषितो गतोऽधरशयालुरधरस्थितो यावको यस्य । तथा—सामिलुप्तकपोलयोः सामर्थ्यं यस्याः पुलका येन तादृशं यस्य एवंभूतं दृष्ट्वा स सुखी जातः, संभोगजनश्च जात इत्यर्थः । अत्र पूर्वोत्तरार्धे स्वभावोक्ते धनधीते, अन्यथा पुनरनुरागोदयोऽभवत् । सुखयति, मतुबन्तात् 'तत्करोति–' इति णिचि 'णाविष्ठवत्–' इति मतुब्लोपः ॥

ह्रीणमेव पृथु सस्मरं कियत्क्रान्तमेव बहुनिर्वृतं मनाक् ।
कान्तचेतसि तदीयमाननं तत्तदालभत लक्षमादरात् ॥ १२२ ॥

ह्रीणमिति ॥ तदतिसुन्दरं तदीयमाननं तदा सुरतान्तसमये कान्तचेतसि विषय आद-रातिशयाल्लक्षं लक्षसंख्यं द्रव्यमलभत । मूल्यरहितेऽत्युत्कृष्टे वस्तुनि 'एतल्लक्षं लभते' इति लोकोक्त्या परमोत्कर्षस्याभिव्यञ्जनात्परमत्युत्कर्षं प्रापेत्यर्थः । किंभूतम्—सुरतसुखानुभववेग-संजातस्वीयस्मरचापलस्मरणात्पुरुषायितस्मरणाद्वा बहुतरं ह्रीणं लज्जितमेव । तथा—पुनः सुरताभिलापधारणात्कियदीषत्सस्मरमुद्दीप्तकामम् । तथा—सौकुमार्यातिशयायासबाहुल्याद्बु सुतरां क्रान्तं म्लानमेव । तथा—प्रलयाख्यया कामावस्थया साध्यसाधनभेदावगमराहित्याद-कीभावात्परब्रह्मानन्दानुभवादिव महासुखानुभवविषयसुखापलापान्मनाङ्निर्वृतमल्पं सुखितम् । विस्मृतानुभूतसुखमिति यावत् । रतान्तसमये योषिन्मुखमल्हादरकारि भवति' इति कामशा-स्त्रम् । तदा तादृक्तदाननं दृष्ट्वा पुनः समदनोऽभूदिति भावः । अथ च—लक्षं विषयताम-लभतेत्यर्थः ॥

स्वेदवारिपरिपूरितं प्रियारोमकूपनिवहं यथायथा ।
नैषधस्य दृगपात्तथातथा चित्रमापदपतृष्णतां न सा ॥ १२३ ॥

स्वेदेति ॥ नैषधस्य दृक्स्वेदवारिणा सुरतश्रमजलेन परिपूर्णं प्रियारोमकूपनिवहं यथा यथा यावदपात्सादरं व्यलोकयत्, सा नलदृक् तथातथा तावत्तावदपतृष्णतां तृप्तिं नापदिति चित्रम् । पुनःपुनरवलोकने हि तृप्तिर्भवति अत्र तु न जातेत्याश्चर्यमित्यर्थः । च—पिपासोर-ञ्जलिजलेनापि पिपासा शाम्यति, अस्यास्त्वाकण्ठवारिपूरितकूपसङ्घस्य पुनः पुनः पानेऽपि पिपासा न शान्तेति चित्रमित्यर्थः । एवंभूतभैमीरोमकूपदर्शनमात्रेण पुनः सकामोऽभू-दिति भावः ॥

वीतमाल्यकचहस्तसंयमव्यस्तहस्तयुगया स्फुटीकृतम् ।
बाहुमूलमनया तदुज्ज्वलं वीक्ष्य सौख्यजलधौ ममज्ज सः ॥ १२४ ॥

वीतेति ॥ स सुरतसंमर्दाद्वीतमाल्याश्च्युतकुसुमाः कचहस्तास्तेषां संयमाय ग्रन्थिबन्ध-नाय व्यस्तमूर्ध्वव्यापारितं हस्तयुगं यया तया भैम्या स्फुटीकृतं तदतिरमणीयं कामवसतिस्था-नमुज्ज्वलमतिगौरं बाहुमूलं वीक्ष्य सौख्यजलधौ ममज्ज । निरवधि सुखमन्वभूदित्यर्थः । वान्तेति वा पाठः । कचहस्त इति हस्तशब्दः प्रशंसावाची । सुखमेव सौख्यं चतुर्वर्णा-दित्वात्ष्यञ् ॥

वीक्ष्य पत्युरधरं कृशोदरी बन्धुजीवमिव भृङ्गसंगतम् ।
मञ्जुलं नयनकज्जलैर्निजैः संवरीतुमशकत्स्मितं न सा ॥ १२५ ॥

वीक्ष्येति ॥ सा कृशोदरी नेत्रचुम्बनवशात्संलग्नैर्निजैर्नयनकज्जलैर्भिन्नवर्णतया मञ्जुलं शोभमानं पत्युरधरं भृङ्गेण भ्रमरेण संगतं मिलितं पीयमानमकरन्दं बन्धुजीवपुष्पमिव वीक्ष्य स्मितमीषद्धास्यं संवरीतुं गोपायितुमुत्पद्यमानमेव निरोद्धुं वा नाशकत्समर्था नाभूत् । स्त्रीत्वात्सलज्जत्वात्प्राणेशस्य सविधे स्मितं कर्तुमयुक्तं यद्यपि, तथापि स्वीयकं ॥ एवं दुत्पन्नस्य स्मितस्य संवरीतुमशक्यत्वात्सपत्नीदर्शने च सलज्जत्वेऽपि प्रा-संमदेषु सेष्मिय इति ॥

तां विलोक्य विमुखश्रितस्मितां पृच्छतो हसितहेतुमीशितुः ।
ह्रीमती व्यतरदुत्तरं वधूः पाणिपङ्करुहि दर्पणार्पणाम् ॥ १२६ ॥

तामिति ॥ वधूर्भैमी विमुखं तिर्यङ्मुखं यथा तथा पराङ्मुखीभूय श्रितस्मिता क्वचेय-द्धास्ला विमुखी चासौ श्रितस्मिता च तादृशीं वालां विलोक्य हसितहेतुं पृच्छत ईशितुर्नलस्य पाणिरेव पङ्करुट् कमलं तस्मिन्करकमले दर्पणस्यार्पणामेवोत्तरं व्यतरद्ददौ स्मितहेतुमाचष्ट । यतो—ह्रीमती । स्वनेत्रचुम्बनवशात्तवोष्ठे नेत्रकज्जलं लग्नमिति लज्जावशात्साक्षादुत्तरं दातु-मशक्ता कज्जलाङ्कितं स्वाधरं पश्येति भावेन दर्पणार्पणामेवोत्तरं ददावित्यर्थः ॥

लाक्षयात्मचरणस्य चुम्बनाच्चारुभालमवलोक्य तन्मुखम् ।
सा ह्रिया नतनताननाऽस्मरच्छेपरागमुदितं पतिं निशः ॥ १२७ ॥

लाक्षयेति ॥ कुपितभैमीप्रसादनार्थं चरणे पतनाद्भैम्याः पद्मिनीत्वात्[illegible]नावचन्धेन सुरतारम्भवशाद्वात्मचरणस्य लाक्षया चुम्बनात्संबन्धाद्धेतोश्चारु भालं ललाटं यस्यैवंभूतं तस्य नलस्य मुखमवलोक्य निजसुरतधार्ष्ट्यस्मरणजातया ह्रिया हेतुना नतनतं नतप्रकारमाननं यस्याः सैवंभूता सती उदितं प्राप्तोदयम्, उदयानन्तरं च कालकलापर्यापनात् [illegible] किंच-दवशिष्टो रागो लौहित्यं यस्य तं निशो रात्र्याः पतिं चन्द्रमस्मरत् । तन्मुखं तादृगभूदित्यर्थः । ईषदवशिष्टरक्तिमचन्द्रदर्शने यथा प्रीतिर्भवति, तथा तादृङ्मुखदर्शनेऽपि तस्याः प्रीतिर्जातेति भावः । नतनतेति प्रकारे द्विरुक्तिः । पतिं, कर्मत्वविवक्षया षष्ठ्यभावः ॥

स्वेदभाजि हृदयेऽनुबिम्बितं वीक्ष्य मूर्तमिव हृद्गतं प्रियम् ।
निर्ममे धुतरतश्रमं निजैर्ह्रीनतातिमृदुनालिकानिलैः ॥ १२८ ॥

स्वेदेति ॥ ललाटलग्नदर्शनसंजातनिजसुरतधार्ष्ट्यस्मरणवशाद्ध्रिया नता सा स्वेदभाजि श्रमजलयुते स्वहृदयेऽनुबिम्बितं प्रियं नलं मूर्तं साकारं हृद्गतं चित्तस्थमिव वीक्ष्य निजैरति-मृदुभिर्विश्रान्तिकृन्मन्दीभूतैर्नासिकानिलैः कृत्वा धुतोऽपनीतो रतश्रमो यस्यैतादृशं निर्ममे चकार । लज्जानम्रत्वान्नासाश्वासानां हृदयप्रतिबिम्बितप्रियसंबन्धान्मृदूनामपनोदनं युक्तम् । निर्मम इवोत्प्रेक्षा वा, तादृशीं तां दृष्ट्वा स गतश्रमः सहर्षः संजातः, सापि तं तादृशं दृष्ट्वा हर्षवशान्मन्दतरनासाश्वासान्मुमोचेति भावः ॥

सूननायकनिदेशविभ्रमैरप्रतीतचरवेदनोदयम् ।
दन्तदंशमधरेऽधिगामुका सात्पूत्कृतमनु चुम्बनं चकार च ॥ १२९ ॥

सूनेति ॥ सूननायकस्य कामस्य निदेश आज्ञा तस्य विभ्रमैर्विलासैर्हेतुभिरप्रतीतचरः पूर्वं संभोगवेलायामसातो वेदनोदयः पीडोद्भवो यस्मात्तं दन्तदंशमधरेऽधिगामुका प्राप्नुवती सीत्कारं कृतवती सा [illegible] यथा तथा [illegible] । तदनन्तरं च सीत्कारपूर्वकं [illegible] चकार । [illegible] जातमिति [illegible] । दन्तदंशं, 'न लोक—' इति षष्ठीनिषेधः ॥

---

१ '[illegible]' इति जीवातुसंमतः पाठः

वीक्ष्य वीक्ष्य करजस्य विभ्रमं प्रेयसार्जितमुरोजयोरियम् ।
कान्तमैक्षत हसस्पृशं कियत्कोपकुञ्चितविलोचनाञ्चला ॥ १३० ॥

वीक्ष्येति ॥ इयं प्रेयसा नलेन उरोजयोरुपरि बुद्धिपूर्वमर्जितं कृतं करजस्य नखस्य विभ्रमं कोपसंभ्रमवशाद्वीक्ष्य वीक्ष्य वारं वारं विलोक्य, अनन्तरमेव कियत्किंचित्कोपेन कुञ्चितावुन्मील्य मुकुलितौ पर्यायेण विलोचनाञ्चलौ नेत्रपक्ष्मौ यया एवंभूता सती स्वकृतत्वात्संभोगसमये तया ज्ञातत्वाच्च हसस्पृशं स्मितस्मितं कान्तमैक्षत । कोपेन वक्रमपश्यदित्यर्थः । कोपस्याल्पत्वेनोत्तमत्वं धीरत्वं च भैम्या व्यज्यते । वीक्ष्य वीक्ष्य, संभ्रमे द्विरुक्तिः । हसस्पृशं, 'स्पृशोऽनुदके-' इति क्विन् ॥

रोपरूपितमुखीमिव प्रियां वीक्ष्य भीतिदरकम्पिताक्षराम् ।
तां जगाद स न वेद्मि तन्वि तं कश्चकार तव कोपरोपणाम् ॥१३१॥

रोपेति ॥ स रोपरूपितं कोपयुक्तं मुखं यस्यास्तामिव दन्तदंशादेः सुखकारित्वेन तत्त्वतः कोपरहितत्वेऽपि कृत्रिमकोपेन भ्रुकुटितमुखीं प्रियां वीक्ष्य भीत्या दरमीषत्कम्पितानि सगद्गदान्यक्षराणि यस्यां क्रियायां तद्यथा तामिति जगाद । इति किम्-हे तन्वि, अहं तं न वेद्मि, कस्तव कोपरोपणां चकार । ब्रूहि शास्मि तव कोपरोपिणम्' इति पाठे-कोपस्य रोपिणमाधायकम् । 'न वेद्मि' इत्यात्मनः कोपरोपित्वं गोपायति ॥

रोपकुङ्कुमविलेपनान्मनाङ्न्ववाचि कृशतन्ववाचि ते ।
भूदयुक्तसमयैव रञ्जनामानने विधुविधेयमानने ॥ १३२ ॥

रोपेति ॥ पुनरपि, इति किम्—ननु कृशतनु अवाचि कोपवशादभाष्यभाषणे, तथा अवाचि नम्रीभूते, तथा—विधुनापि विधेया गुणाधिक्यवशात्कार्या मानना पूजा यस्यैवंभूते चन्द्राधिके तवानने रोपरूपेण कुङ्कुमेन विलेपनाद्धेतोर्मनागल्पीयसी इयं रञ्जना रक्तिमसंपादना मा भूत् न कार्या । यस्मादयुक्तसमयैवाप्रस्तावसमुद्भूतैव । किमपि मया नापराद्धमिति निर्हेतुकेयमनुचिता कोपरञ्जना त्यजतामित्यर्थः । अथ च-अयं संभोगसमयो रात्रिरियं, नतु कोपरञ्जनासमयः, तस्मादन्यदा कोपः कार्यः, अधुना तु त्यज्यतामित्यर्थः । अथ च—चन्द्राधिकं तव मुखम्, इदानीं रोषरूपितं सन्न्यूनं भविष्यतीत्ययुक्तसमया रञ्जना न कार्या कोपस्त्यज्यतामित्यर्थः । अथ च—कोपकुङ्कुमविलेपनरञ्जनाऽयुक्तसमया । यतः, तस्मान्नैव कार्या । शीतकाले ह्युष्णवीर्यतया वदनप्रसाधनं कुङ्कुमविलेपनं युक्तम्, इदानीं वसन्तजेन श्रमजेनोष्मणा श्रीखण्डपाण्डिमैवाननप्रसाधनायालम्, न कुङ्कुमरञ्जनेत्यर्थः ॥

क्षिप्रमस्य तु रुजा नखादिजास्तावकीरमृतसीकरं किरत् ।
एतदर्थमिदमर्थितं मया कण्ठचुम्बि मणिदाम कामदम् ॥ १३३ ॥

क्षिप्रमिति ॥ हे भैमि, कण्ठचुम्बि मम कण्ठे स्थितं, तथा—कामदमिच्छादायि, अत एव एतदर्थं त्वदीयकरजरदनक्षतजपीडापाकरणार्थं भैमीकरजादिक्षतपीडापनोदनं कुर्विति मयाऽर्थितं प्रार्थितं सदिदं चिन्तामणिरत्नानां दाम मालामृतशीकरं सुधाबिन्दुं किरत्सवत्सत् तावकीस्त्वदीया नखादिजा नखक्षतादिसमुद्भवा रुजाः पीडाः क्षिप्रमस्यतु । शमयत्वित्यर्थः ।

१ 'कोपसंकुञ्चितलोचनाञ्चलान्' इति जीवातुसंमतः पाठः । २ 'भूषित' इति जीवातुसंमतः पाठः ।

तस्मात्कोपं मा कार्षीरिति भावः । अर्पितमिति पाठे—पीडाशान्त्यर्थं मया त्वदीयकण्ठे क्षिप्तं सत्त्वदीयकण्ठचुम्बीति व्याख्येयम् । रुजा, भिदादित्वादङ् ॥

स्वापराधमलुपत्पयोधरे मत्करः सुरधनुष्करस्तव ।
सेवया व्यजनचालनाभुवा भूय एव चरणौ करोतु वा ॥ १३४ ॥

स्वापराधमिति ॥ हे भैमि, मत्करस्तव पयोधरे स्तने सुरधनुष्कर इन्द्रचापाख्यनखक्षतविशेषकारी सन् नखक्षतपीडाकरणजं स्वापराधं व्यजनस्य चालना तस्याः सकाशाद्भवतीति भूस्तया व्यजनवीजनसमुद्भूतया सेवयाऽलुपत् । वाऽथवा एतावत्यापि सेवया यदि न तुष्यति तर्हि भूय एव पुनरप्ययं करस्तव चरणौ करोतु संवाहयतु । चरणसंवाहने ह्यपराधमार्जनं भवति, तस्मात्तदयं करोत्वित्यर्थः । अथ च—चरणौ संभोगार्थमूर्ध्वौ करोत्वित्यर्थोऽवसेयः । अथ च—नानावर्णमुद्रिकायुक्तत्वात्त्वत्कुचे सुरधनुष्करः । तथा चापराधो नास्त्येव । अथ च—मेघे सुरधनुर्युक्तमेवेति पयोधरे तत्कारिणां न कोऽप्यपराधः । यद्यपि भवेत्, तथापि व्यजनसेवयाऽवलोपितः । चरणसंवाहनमपि करोत्वित्यर्थः । 'भूय एषः' इति पाठे—एष मत्करः । अलुपत्, लृदित्वादङ् । धनुष्करः, 'दिवाविभा–' इति टः, 'इसुसोः सामर्थ्ये' इति पक्षे विसर्जनीयस्य सः । करोतीति करः पचाद्यच् । सुरधनुषः कर इति षष्ठीसमासः । चलना, ण्यन्ताद्युच् । नित्यस्य पाक्षिकत्वाद्वृद्धिः ॥

आननस्य मम चेदनौचिती निर्दयं दशनदंशदायिनः ।
शोध्यते सुदति वैरमस्य तत्किं त्वया वद विदश्य नाधरम् ॥ १३५ ॥

आननस्येति ॥ हे सुदति, ममाननस्य चेद्यद्यनौचिती । यतो—निर्दयं यथा तथा दशनदंशदायिनो दन्तक्षतदानशीलस्य । तस्मात्तस्य यद्यपराधिता तर्हि अपराधकारिणोऽस्य मन्मुखस्याधरं विदश्यातितरां खण्डयित्वा त्वया किमिति तद्दन्तदानरूपं वैरं न शोध्यते त्वं वद कथय, अपि त्वपराधिनोऽस्याधरवनोष्ठं दन्तैः खण्डयित्वा वैरनिर्यातनं कुरु । तथा च समः समाधिरित्यर्थः ॥

दीपलोपनफलं व्यधत्त यस्त्वत्पटाहृतिषु मच्छिखामणिः ।
नो तदागसि परं समर्थना सोऽयमस्तु पदपातुकस्तव ॥ १३६ ॥

दीपेति ॥ हे भैमि, यो मच्छिखामणिस्त्वत्पटाहृतिषु त्वदीयवसनकर्षणेषु सत्सु लज्जापरान्मुखवाय्वादिना त्वया कृतं दीपलोपं स्वकिरणैरेव तिमिरनिराकरणादफलं व्यर्थं व्यधत्त । तस्य मणेरागस्यपराधे परं केवलं कराविवत्समर्थना परिहारो नो अस्ति, तस्मादुपायान्तराभावात्सोऽयं मौलिमणिस्तव पदयोः पातुको वन्दारुरस्तु । उपायान्तराभावे हि नमस्कारेणाप्यपराधमार्जनं क्रियते, तस्मादयमपि नमस्कारं करोत्वित्यर्थः ॥

इत्थमुक्तिमुपहृत्य कोमलां तत्पदे चुम्बितचिकुरश्चकार सः ।
आत्ममौलिमणिकान्तिभङ्गिनीं तत्पदारुणतरोज्ज्वलत्विषम् ॥ १३७ ॥

इत्थमिति ॥ स इत्थमुक्तप्रकारेण कोमलां मनोज्ञामुक्तिं वाक्यमुपहृत्योपढौक्य प्रणामकरणवशात्तत्पदचुम्बिनः तत्पादस्पर्शिनश्चिकुराः केशा यस्य स आत्ममौलिमणिकान्तिनिवहकृतमणिद्युतिरूपा भङ्गिनी रची तां तस्यैव भैमीचरणौ तद्रूपे अरुणरोचिः तत्सङ्गिनी

संवद्धां चकार। प्रणनामेत्यर्थः। नद्याश्च रक्तोत्पलसंबन्धो युक्त एव। तल्पचुम्बीलनेन शय्यायामेव प्रणामः सूचितः। भङ्गास्तरङ्गाः सन्त्यस्यां सेति विग्रहः॥

तत्पदाखिलनखानुबिम्बनैः स्वैः समेत्य समतामियाय सः।
रुद्रभूमविजिगीषया रतिस्वामिनोपदशमूर्तिताभृता॥ १३८॥

तदिति॥ कृतप्रणामः स नलः स्वैर्निजैस्तस्याः पदयोरखिलेषु दशस्वपि नखेषु जातैरनुबिम्बनैः प्रतिबिम्बैः समेत्य मिलित्वा रुद्रस्य भूमा बहुत्वमेकादशत्वं तस्यापि सर्वावशाद्विजिगीषया जेतुमिच्छयोपदशमूर्तितां धारयता रतिस्वामिना कामेन समतां साम्यमियाय मदीयः शत्रुर्यद्येकादशत्वं धारयति तर्हि मयापि तावत्संख्याकेन भवितुं युक्तमिति। एकादशत्वं यदि कामो धारयेत्, तर्हि भैमीदशनखसंजातस्वप्रतिबिम्बसंबन्धादेकादशमूर्तिधारी नलस्त्वेनोपमीयेतेत्यभूतोपमा। रुद्रभीतीति पाठे—एकादशभ्यो रुद्रेभ्यो भीतेर्विजिगीषया तदपाकरणाद्धेतोर्यद्येकादशमूर्तितां मदनो धारयेत्तर्हि स्वप्रतिबिम्बयोगादेकादशमूर्तित्वेनोपमीयेतेत्यर्थः। प्रणामवशात्तन्नखेषु प्रतिबिम्बित इति भावः। दशानां समीपे उपदशाः 'संख्याऽव्यया–' इति समासः। 'बहुव्रीहौ संख्येये' इति डच्। उपदशा मूर्तयो यस्येति समासः॥

आख्यतैष कुरु कोपलोपनं पश्य नश्यति कृशा मधोर्निशा।
एतमेव तु निशान्तरे वरं रोषशेषमनुरोत्स्यसि क्षणम्॥ १३९॥

आख्यतेति॥ एष तामित्याख्यतावोचत्। इति किम्—हे भैमि, त्वं कोपलोपनं कुरु। मधोर्वसन्तस्य कृशा दिनापेक्षया स्वभावत एवाल्पपरिमाणा, अथ च—प्रतिक्षणमपचीयमाना, निशा नश्यतीति पश्य। कोपापरित्यागे एवंप्रकारेणावशिष्टा रात्रिर्गमिष्यति, तस्मात्कोपं मुञ्च। तु पुनस्त्वमेतमेव रोषशेषं निशान्तर आगामिरात्र्यन्तरे दिनापेक्षयाऽधिकपरिमाणायां शिशिरर्तुरात्रौ क्षणमात्रमनुरोत्स्यसि कामयिष्यसे वरमेतन्मनागिष्टम्। शिष्टं कोपं तदा कुरु, इदानीं संभोगार्थं प्रसन्ना भव। सर्वं कोपमिदानीमेव चेत्करिष्यसि, तर्हि तदा किं करिष्यसि, तस्मादल्पं रोषं निशान्तरार्थं स्थापयेति लौकिकरीत्याऽधुना तावत्कोपं त्यजेति भैमीं प्रार्थयति स्मेत्यर्थः। आख्यत, 'चक्षिङः ख्याञ्' 'अस्यतिवक्ति–' इत्यङ्, ङित्वात्तङ्॥

साथ नाथमनयत्कृतार्थतां पाणिगोपितनिजाङ्घ्रिपङ्कजा।
तत्प्रणामधुतमानमाननं स्मेरमेव सुदती वितन्वती॥ १४०॥

सेति॥ अथ प्रणामभाषणानन्तरं प्रणामं मा कार्षीरित्यादिवचनपूर्वं पाणिभ्यां गोपिते निजाङ्घ्रिपङ्कजे यया तया तस्य प्रणामेन धुतो निरस्तो मानः कोपजमौदासीन्यं यस्यैवंभूतमाननं प्रसादात्स्मेरं सस्मितमेव वितन्वती कुर्वाणा सती सा सुदती नाथं कृतार्थतां कृतफलतामनयत्प्रापयामास। तावन्मात्रेण प्रसन्नाऽभूदिति भावः॥

तौ मिथो रतिरसायनात्पुनः संबुभुक्षुमनसौ बभूवतुः।
चक्षमे नतु तयोर्मनोरथं दुर्जनी रजनिरल्पजीवना॥ १४१॥

ताविति॥ तौ मिथोऽन्योन्यं रतिरसायनात्प्राप्तेः परस्परानुरागवियुद्धेर्हेतोः, अथ च—

प्रीतिरेव रसायनं प्रशान्तसुरतेच्छायाः पुनरुज्जीवनौषधं तस्माद्धेतोः, पुनः संवृत्तसुरतेच्छौ सुरतानिलाषिचित्तौ च बभूवतुः । द्वितीयसुरतेच्छू जाताविल्यर्थः । तु पुनः रजनिस्तयोर्नैनोरथं द्वितीयसुरतवाञ्छां न चक्षमे न विषेहे । यतः—दुष्टा जनिर्जन्म यस्याः । तथा—अल्पं जीवितं सत्त्वं यस्यास्तादृशी संजातप्रभातत्वनया । अथ च—अल्पायुषो जन्म दुष्टमेवेति । यद्वा—प्रभातस्यासन्नत्वाद्विरहसंभावनावशाद्वा दुष्टा व्याकुला जन्यो नवोढा यस्यां सा दुर्जनी । संभोगेच्छा तु न निवृत्ता, परं प्रभातत्वनयस्य जातत्वात्संभोगं न चक्रुरिति भावः । अन्योऽपि सुरतविषये यद्रसायनं वीर्यवृद्ध्यर्थमौषधं सेवमानः पुनः पुनः सुरतेच्छुर्भवति । अल्पचित्ताऽन्यापि दुष्टा वधूः सपत्न्यादिर्नायकयोः संभोगं न क्षमते । जननं जनि, 'जनिघसिभ्यामिन् (ण्),' 'जनिवध्योश्च' इति वृद्धिर्न । 'ढ्लोपे—' इति दीर्घः । पक्षे—जनानां अन्तविधेरनिलत्वात्कबभावः ॥

स्वप्नमाप्तशयनीययोस्तयोः स्वैरमास्यत वचः प्रियां प्रियः ।
उत्सवैरधरदानपानजैः सान्तरायपदमन्तरान्तरा ॥ १४२ ॥

स्वप्नमिति ॥ स्वप्नमाप्तं शयनीयं शय्या याभ्यां तयोर्मध्ये प्रियः प्रियां प्रति स्वैरं [illegible] स्थितत्वात्स्वच्छन्दं यथा तथा आस्यताबोचत् । किंभूतं वचः—परस्परमधरस्य दानं [illegible] पानं च ताभ्यां जातैरुत्सवैः परमानन्दकारणैर्निमित्तैरन्तरान्तरा मध्ये मध्ये [illegible] सविघ्नानि कियन्तं कालमनुच्चारितानि त्रुटितान्तानि पदानि यत्र तत् ॥

किमुवाचेत्याह—

देवदूत्यमुपगम्य निर्दयं धर्मभीतिकृततादृशागसः ।
अस्तु सेयमपराधमार्जना जीवितावधि नलस्य वश्यता ॥ १४३ ॥

देवदूत्यमिति ॥ देवदूत्यमुपगम्याङ्गीकृत्य निर्दयं यथा तथा धर्मभीत्या [illegible] दूत्याकरणे प्रतिश्रुतापरिपालनाद्धर्मो लुप्येतेति [illegible] [illegible] तथा हेतुभूतया कृतं [illegible] [illegible] तस्यापराधिनो नलस्य मम जीवितावधि यावज्जीवं या [illegible] मार्जना [illegible] । [illegible] तस्यां [illegible] भावः । [illegible] ॥

स क्षणः सुमुखि यत्त्वदीक्षणं तच्च राज्यसुख येन रज्यसि ।
तन्नलस्य सुधयाभिषेचनं यत्त्वदङ्गपरिरम्भविभ्रमः ॥ १४४ ॥

स इति ॥ हे सुमुखि, [illegible]

[illegible]

शर्म किं हृदि हरेः प्रियार्पणं किं शिवार्धघटने शिवस्य वा ।
कामये तव महेषु तन्वि तं नन्वयं सरिदुदन्वदन्वयम् ॥ १४५ ॥

शर्मेति ॥ हरेः श्रीविष्णोर्हृदि प्रियार्पणं लक्ष्म्याः स्थापनं किं नाम शर्म सुखम्। तथा—वाऽथवा शिवस्य शिवायाः पार्वत्या अर्धेन घटनं किं शर्म तदप्यल्पीयः। तर्हि किं नाम परमं सुखमित्याशङ्क्याह—ननु तन्वि भैमि, महेषु सुरतोत्सवेषु तव तमतिप्रसिद्धं सरिदुदन्वतोर्नदीसमुद्रयोरिवान्वयमविनाभावलोपलक्षणेन तादात्म्यलक्षणमयमन्वयं शुभावहमविच्छिन्नं वा संबन्धं कामये वाञ्छामि। इष्टदेवताभ्य इति शेषः। महेषूत्सवेषु मध्ये तव सरिदुदन्वदन्वयमेकं कामये नान्यमिति वा। हरेर्हृदि प्रियार्पणे, शिवस्य च शिवार्धघटन आलिङ्गनादीनां पृथक्स्थितानेकदेहसाध्यत्वादालिङ्गनादिजन्यं सुखं तावन्मात्रस्यैव किंत्वेकदेशसंतानजन्यमेवास्ति, तस्मादावयोर्यदि पृथक्त्वम्, तर्हि तदा सुरतसमये क्षीरवदेकीभावोऽस्तु। यद्यपृथक्त्वमिष्टम्, तर्हि नदीसमुद्रजलवत्तादात्म्यमेव भवतु, नतु हरिलक्ष्म्यादिवद्भेदोऽस्त्व इति भावः। नन्वहमित्यपि पाठः। 'तव मयेह—' इति पाठे—अयमहमिह भूलोके मया सह तव तं तादृशं सरिदुदन्वदन्वयं कामय इत्यर्थः ॥

धीयतां मयि दृढा ममेति धीर्वक्तुमेवमवकाश एव कः ।
यद्विधूय तृणवद्दिवस्पतिं क्रीतवत्यसि दयापणेन माम् ॥ १४६ ॥

धीयतामिति ॥ हे भैमि, मयि त्वं ममेति धीर्निश्चिता बुद्धिर्धीयतां न्यस्यताम्। मयि स्वत्वबुद्धिरासंसारं त्वया क्रियतामिति वक्तुमेवाभिधातुमप्यवकाशोऽवसर एव कः, अपि तु—तात्त्विकेऽर्थे एवं वक्तुमवकाशलेशोऽपि नास्ति, यद्यस्माद्धेतोर्दिवसतिमिन्द्रं तृणवत्तृणेन तुल्यं वर्तते तृणवदेव यथा तथा तृणमिव परित्यज्य दयारूपेण पणेन मूल्येन मां क्रीतवत्यसि। उदासीने हि ममत्वबुद्धिः कार्येत्यारोपः प्रार्थ्यते। विक्रीय मूल्येन गृहीते वस्तुनि तु स्वत्वं न्याय्यमस्त्येवेति तदारोपो न प्रार्थ्यत इत्यर्थः। यदि मयि स्वत्वं नाभविष्यत्तर्हि इन्द्रं परित्यज्य मां नावरिष्यः। वृतवत्यसि तावत्, तस्मादेवमपि मया याचितुमयुक्तमेवेति तव किंकरोऽस्मीति भावः। दिवस्पतिं, दयापणेनेत्येताभ्यामिन्द्रापेक्षया त्वदपेक्षया चाहमतितरां गुणवानिति वृत इति न, किंतु मद्वरणे तव कृपैव हेतुः, सा यावज्जीवं कार्येत्यर्थः ॥

शृण्वता निभृतमालिभिर्भवद्वाग्विलासमसकृन्मया किल ।
मोघराघवविवर्ज्यजानकीश्राविणी भयचलासि वीक्षिता ॥ १४७ ॥

शृण्वतेति ॥ किल कदाचित्समये आलिभिः सह असकृद्भवत्या वाग्विलासं कथासंवादं निभृतं पश्चादागत्याज्ञातं यथातथा वरदानाददृश्यत्वेन वा गुप्तं यथातथा शृण्वता, निभृतं रहसि स्थितत्वान्मच्छ्रावणशङ्काभावात्स्पष्टं स्वच्छन्दं सखीभिः सह भवत्संवादं किल शनैः पश्चादागमनाददृष्टिकरणादिना कपटेन शृण्वता सता वा, मया त्वं वीक्षिता एवंभूता दृष्टाऽसि। किंभूता—मोघं वह्नौ परीक्ष्याप्यकारणं श्रीराघवेण विवर्ज्यां त्यक्तां स्वलिखितामनुरक्तामपि जानकीं शृणोतीति तच्छीला, सीतेव भयेन स्वत्यागशङ्काभीत्या चला व्याकुला। (त्वत्किंकरभूते मय्यन्यथा धीर्न कार्येति भावः।) यद्वा यस्माद्भीता दृष्टासि, तस्मादवश्यं मयि

१ अयं पाठः पूर्वश्लोकव्याख्यान्तर्गतः प्रतिभाति ॥

रताय प्रीतये क्षणमल्पमपि समयं न दत्थ इति रुष्टयेति व्याख्येयम्। संगमय्य, 'ल्यपि लघुपूर्वात्' इति णेरयादेशः। जीविका, कर्तरि ण्वुल्। वां, षष्ठीद्वितीयाद्विवचने वामादेशः॥

ईदृशं निगदति प्रिये दृशं संमदात्कियदियं न्यमीलयत्।
प्रातरालपति कोकिले कलं जागरादिव निशः कुमुद्वती॥ १५१॥

ईदृशमिति॥ इयं प्रिये ईदृशमेवंप्रकारमन्यदपि निगदति सत्येव संमदाद्दर्पात्। सुरतानन्दजश्रमादिति यावत्। तस्माद्धेतोर्दृशं नेत्रे कियत्किंचिन्न्यमीलयन्निमीलितवती। श्रमसंजातया निद्रया प्रयोजिकयेति शेषः। निदद्रावित्यर्थः। श्रान्तो हि निद्राति। संमदादेवं गदति सतीति वा। दृशं न्यमीलयत्। संमदादिव प्रियप्रियोक्तिश्रवणसंजातहर्षवशादित्यर्थः। आनन्दातिशयसुखमनुभवन् हि निमीलितदृग्भवतीति प्रतीयमानोत्प्रेक्षा वा। कियदित्यनेन दृशोऽर्धनिमीलनस्य सूचितत्वाद्धन्यतमत्वमस्याः सूचितम्। केव—प्रातः कोकिले कलं मधुरास्फुटध्वनिं श्रोत्रसुखमालपति सति कुमुदिनीव। कुमुदिनी यथा निमीलितोत्पला भवति तथेयमपि। कस्मादिव—निशो रात्रिसंबन्धिनो जागरादिव। रात्रावनिद्रो हि प्रातर्दृशं घूर्णनेन निमीलयति। कुमुदिन्यपि रात्रावनिद्रावशादिव प्रातर्निमीलयति, तस्मादियमपि। प्रतीयमानोत्प्रेक्षा। न्यमीमिलदिति पाठे—णौ चङि 'भ्राजभास–' इति पाक्षिक उपधाह्रस्वः। जागराद्भावे घञि 'जाग्रोऽविचिण्णल्ङित्सु' इति वृद्ध्यपवादो गुणः॥

मिश्रितोरु मिलिताधरं मिथः स्वप्नवीक्षितपरस्परक्रियम्।
तौ ततोऽनु परिरम्भसंपुटैः पीडनां विदधतौ निदद्रतुः॥ १५२॥

मिश्रितेति॥ ततोऽनु तादृक्प्रियभाषणमध्य एव भैमीसंभोगरसानन्तरं परिरम्भरूपे संपुटे। संश्लेषपेटिकायामिति यावत्। तत्र पुनरपि पीडनां गाढालिङ्गनं विदधतौ कुर्वाणौ तौ मिश्रिते परस्परान्तरालघटिते ऊरू यस्यां क्रियायां तद्यथातथा, मिथः पानवशादन्योन्यमिलितावधरौ यस्यां क्रियायां तद्यथातथा, स्वप्ने वीक्षिता परस्परक्रियाऽन्योन्यचुम्बनादिव्यापारो यस्यां क्रियायां तद्यथातथा निदद्रतुः क्षीरनीरालिङ्गनं कृत्वा निद्रितावित्यर्थः। पीडनां, ण्यन्तत्वाद्युच्॥

तद्यातायातरंहच्छलकलितरतश्रान्तिनिश्वासधारा-
जस्रव्यामिश्रभावस्फुटकथितमिथःप्राणभेदव्युदासम्।
बालावक्षोजपत्राङ्कुरकरिमकरीं मुद्रितोर्वीन्द्रवक्ष-
श्छिद्राख्यातैकभावोभयहृदयमयाद्द्वन्द्वमानन्दनिद्राम्॥ १५३॥

तदिति॥ तद्द्वन्द्वं स्त्रीपुंसमिथुनमानन्देन संभोगसुखभरेण निद्रामयात्प्राप। किंभूतम्—निद्रासंबन्धिश्वासानां यातायातयोर्निर्गमप्रवेशयोः संबन्धिनो रंहसो वेगस्य छलेन व्याजेन कलिताऽङ्गीकृता या रतश्रान्तिनिश्वासधाराः सुरतश्रमसंजातनिश्वासपरम्परास्तासामन्योन्यमजस्रमनवरतं सुतरां यो व्यामिश्रभावः निद्रावशभैमीनासानिर्गतश्वासपरम्परासु निद्रावशनलनासानिर्गतनिश्वासपरम्पराः प्रविष्टाः, एवं वैपरीत्येनापि ज्ञातव्यम्। भैमीनिश्वासधारा निर्गत्य नलनिश्वासधारया सह मिलित्वा नलनासिकां प्रविशति, अत्रापि वैपरीत्यं ज्ञातव्यम्। इति मिश्रीभावार्थमिव यातायाते। तथा च—जले जलप्रवेशवदन्योन्यस्य निश्वासपरम्पराणामति-

अरुणिम्ना विलसद्भिर्वा चञ्चूपुटैः स्फुटं यथा तथा चुम्बितः स्पृष्टः पङ्कस्य प्रपञ्चः समूह इवो-च्चकैरतितरां स्फुरति शोभते। तिमिरस्तोमोऽन्तराप्रविष्टसूर्यकिरणस्पर्शाद्बिसखननार्थं पङ्कप्रवि-ष्टहंसारुणचपलचञ्चूपुटशबलपङ्कवच्छोभतेतरामित्यर्थः। तथा—आत्मानं कालीं मन्यते कालि-मन्या अतिकृष्णा भ्रमर्यप्यरुणतरैः सूर्यकिरणैर्धूमलच्छविरिव च कृष्णारुणकान्तिरिव शोभ-तेतराम्। सूर्यकराः प्रसृताः तिमिरं चाल्पीभूतमिति भावः। 'धूमलौ कृष्णलोहिते' इत्यमरः। उच्चकैः, अव्ययत्वादकच्। मधुकरी, जातिवाचित्वान्ङीष्। कालिमन्या, 'आत्ममाने खश्च' इति खश्, दिवादित्वाच्छ्यन्, 'खित्यनव्ययस्य' इति ह्रस्वः 'अरुर्द्विषद्–' इति मुम्। लक्ष्मी-लक्ष्मीं, 'न लोका–' इति षष्ठीनिषेधः॥

रजनिवमथुप्रालेयाम्भःकणक्रमसंभृतैः
कुशकिसलयस्याच्छैरग्रेशयैरुदबिन्दुभिः।
सुषिरकुशलेनायःसूचीशिखाङ्कुरसंकरं
किमपि गमितान्यन्तर्मुक्ताफलान्यवमेनिरे॥ ६॥

रजनीति॥ रजन्याः वमथुवत्करिणीवदननिर्गतजलवत्प्रालेयाम्भसो हिमजलस्य कणा लेशास्तेषां गलनक्रमेण संभृतैः संचितैः कुशकिसलयस्याग्रेशयैरग्रस्थितैः सूचीतीक्ष्णाग्रभागे स्थितैरच्छैर्निर्मलतरैरुदबिन्दुभिर्हिमजलकणैःकर्तृभिर्मुक्ताफलान्यवमेनिरेऽवगणितानि। मौक्ति-कतुल्यैर्जातमित्यर्थः। किंभूतानि मुक्ताफलानि—सुषिरे विवरकरणे कुशलेन मणिकारेण मध्ये किमपि लोकोत्तरं, स्तोकं वा, अयःसूच्या लोहसूच्या वेधनशलाकायाः शिखेव सूक्ष्म-त्वादङ्कुरस्तेन संकरं संयोगं गमितानि प्रापितान्यर्धविद्धानि। 'वमथुः करिशीकरः' इत्यमरः। 'ट्वितोऽथुच्'। अग्रेशयैः, 'अधिकरणे शेतेः' इत्यजन्ते शयशब्दे 'शयवास–' इति सप्तम्या अलुक्। सूची, 'कृदिकारात्–' ङीष्। संकरं, 'ऋदोरप्'॥

रविरुचिऋचामोंकारेषु स्फुटामलबिन्दुतां
गमयितुममूरुच्चीयन्ते विहायसि तारकाः।
स्वरविरचनायासामुच्चैरुदात्ततया हृताः
शिशिरमहसो बिम्बादस्मादसंशयमंशवः॥ ७॥

रवीति॥ रवेः पौर्वाह्णिक्यो रुचय एव ऋचस्तासां [प्रातःकाले रविकिरणानामृग्रूप-त्वात्। 'ऋग्भिः पूर्वाह्णे दिवि देव ईयते यजुर्वेदे तिष्ठति मध्येऽह्नः' इत्यादिश्रुतेः] ऋग्वेद-वाक्यानामोंकारेषु प्रारम्भप्रणवेषु, अथ च—लक्षणया प्रारम्भेषूदयसमयेषु स्फुटां प्रकटाम-मलां स्वरोच्चारणादिदोषरहितां बिन्दुतामनुस्वाररूपां गमयितुममूर्विहायसि स्थितास्तारकाः केनाप्युच्चीयन्तेऽवचयेन संगृह्यन्त एव। वृत्तामलत्वायोग्यत्वाच्च ऋक्प्रणवबिन्दुनिर्माणार्थ-मेता गृह्यन्त इव ततो न दृश्यन्त इत्यर्थः। प्रत्यृचमोंकारसद्भावात्तद्बाहुल्यात्ताराबिन्दूनामपि बहुत्वम्। अथ च—उद् ऊर्ध्वं चीयन्ते, नीयन्त इति यावत्। सूर्यप्रभोदय एव तारका नश्यन्तीति भावः। तथा—अस्तमयोन्मुखादस्माच्छिशिरमहसश्चन्द्रस्य बिम्बात्सकाशादंश-

---

१ 'अत्र काल्या नूनया रविकरैर्लोहितिमाजीविकाराद्धूमलत्वेन तदुत्थापिता धूमलत्वोत्प्रेक्षेति संकरः' इति जीवातुः। २ 'अत्र दर्भाग्रबिन्दूनां सूच्यग्रप्रोतमुक्ताफलत्वेन, प्रालेयाम्भःकणेषु वमथुत्वरूपणाद्र-जन्याः करिणीत्वरूपणसिद्धिरेकदेशविवर्ति रूपक इत्यनयोरङ्गाङ्गिभावात्संसृष्टिः' इति जीवातुः।

योऽभ्यासान्नृचामुच्चैर्नितरामुदूर्ध्वमात्ततया गृहीततया, अथ च—लक्षणावशाद्विशालतयोपरि-स्थिततया वा, अथ च—'उच्चैरुदात्तः' इत्युदात्तलक्षणयोगादुच्चैरुदात्तत्वेन योग्यत्वादुदात्तस्व-रस्य विरचनाय निर्माणाय असंशयं निश्चितं केनापि हृता इव । उदात्तस्य शिरस्युपलम्भना-नलव्यञ्जिकोर्ध्वा रेखा लिख्यते । यजुर्वेदे चरकशाखायामुपनिषदि 'उच्चैरुदात्तः', 'नीचैर-नुदात्तः', 'समाहारः स्वरितः' इति लक्षणं द्रष्टव्यम् । चन्द्रकिरणानामप्यस्तमये उपरिगामि-त्वात्सूक्ष्मोपरितनरेखातुल्यत्वादेवमुत्प्रेक्षितम् । सूर्यप्रभोद्गमक्रमेण चन्द्रकिरणा अपि कृशी-भूता इति भावः । वृता इति पाठे—स्वीकृताः । असंशयमुभयत्रापि योज्यम् । ऋचिऋचाम्, 'ऋत्यकः' इति प्रकृतिभावः ॥

व्रजति कुमुदे दृष्ट्वा मोहं दृशोरपिधायके
भवति च नले दूरं तारापतौ च हतौजसि ।
लघु रघुपतेर्जायां मायामयीमिव रावणि-
स्तिमिरचिकुरग्राहं रात्रिं हिनस्ति गभस्तिराट् ॥ ८ ॥

व्रजतीति ॥ गभस्तिराट् सूर्यः तिमिरमेव चिकुरास्तिमिरतुल्याः केशास्तेषु गृहीत्वेति ग्राहं रात्रिं हिनस्ति लघु शीघ्रं विनाशयति । कः कामिव—रावणिरिन्द्रजिन्मायामयीं माया-निर्मितां रघुपतेर्जायां सीतामिव । कस्मिन्सति—वाक्यार्थस्य कर्मत्वात्तदीयं रात्रिहिंसनरूपं कर्म दृष्ट्वा कुमुदे कैरवे मोहं संकोचं व्रजति सति । अथ च—सीताहिंसनरूपं कर्म दृष्ट्वा कुमुदाख्ये वानरे मूर्च्छां गच्छति । तथा—नले च भवति सति दृष्ट्वा सूर्योदयसमयं ज्ञात्वा दृशोरपिधायके उन्मीलितनेत्रे सति । यद्वा—नले सति नेत्रयोराच्छादके भवति सति । अथ च—नले वानरसेनापतौ दारुणं तदीयं कर्म दृष्ट्वा किमपि कर्तुमशक्यत्वाद्दुःखवशाद्वा तारापतौ च सुग्रीवे दृशोरपिधायके हतौजसि च निस्तेजस्के म्लानवदने च सति । रात्रिर्गता, रविरुदितः, कुमुदं च निमीलितम्, कमलं चोन्मीलितम्, चन्द्रश्च निष्प्रभो जात इत्यर्थः । मायामय्याः सीताया वध इन्द्रजिता कृत इति रामायणे । मायामयीं, प्राचुर्ये मयटि ङीप् । रावणिः, अपत्यार्थे बाह्वादित्वादिञ् । चिकुरग्राहं, सप्तम्यन्त उपपदे 'समासत्तौ' इति ग्रहेर्णमुल् । गभस्तिभी राजते गभस्तिराट्, 'सत्सूद्विष—' इति क्विप् ॥

त्रिदशमिथुनक्रीडातल्पे विहायसि गाहते
निधुवनधुतस्रग्भागश्रीभरं ग्रहसंग्रहः ।
मृदुतरकराकारैस्तूलोत्करैरुदरंभरिः
परिहरति नाखण्डो गण्डोपधानविधां विधुः ॥ ९ ॥

त्रिदशेति ॥ ग्रहसंग्रहः शुक्रादिस्थूलतारासमूहः त्रिदशा देवास्तेषां मिथुनं तस्य क्रीडासंबन्धिनि तल्पे शय्यारूपे विहायसि गगने निधुवनं सुरतसंमर्दस्तेन धुता विकीर्णाः स्रजः पुष्पमालास्तासां भाग एकदेशस्तस्य श्रीभरं शोभातिशयं गाहते । तथा—विधुश्चन्द्रः पूर्णो हतखण्डो गण्डोपधानविधां कपोलतल[illegible] न परिहरति न त्यजति, अखण्डोऽपि, तद्रूपोऽस्तीत्यर्थः । किंभूतो विधुः—मृदुतरकराकारैरतिमृदु-रश्मिरूपैस्तूलोत्करैः कर्पासतन्तुभिरुदरंभरिः परिपूरितमध्यः । गण्डोपधानं मृदुतरकर्पासपूरितं-

मध्यं वृत्तं शुभ्रं च भवति । स्थूलतरास्तारास्तल्पविकीर्यमाणकुसुमतुल्या इतस्ततो दृश्यन्ते चन्द्रोऽपि सौरप्रकाशस्यासन्नत्वेन संकुचिताभिः स्वकान्तिभिर्मध्यमेव पूरयन्मर्दितगण्डोपधानवन्निःशोभोऽस्तमयोन्मुखो जात इति भावः । संग्रहः, 'ग्रहवृद्दनिश्चिगमश्च' इत्यप् । उत्करः, 'ॠदोरप्' । उदरंभरिः, 'फलेग्रहिरात्मंभरिश्च' इति चकारस्यानुक्तसमुच्चयार्थकत्वादिनुमागमश्च ॥

> दशशतचतुर्वेदीशाखाविवर्तनमूर्तयः
> सविधमधुनाऽलंकुर्वन्ति ध्रुवं रविरश्मयः ।
> वदनकुहरेऽप्यध्येतॄणामयं तदुदञ्चति
> श्रुतिपदमयस्तेषामेव प्रतिध्वनिरध्वनि ॥ १० ॥

दशेति ॥ दश शतानि यासां ता एकसहस्रसंख्याश्चतुर्णामृग्वेदादिवेदानां समाहारश्चतुर्वेदी तस्याः शाखानामाश्वलायनतैत्तिरीयकादिसंज्ञानां तत्तद्वेदभागानां विवर्तनरूपा अतात्त्विका अन्यथाभावरूपाः शाखारूपतां प्राप्ता मूर्तयः स्वरूपाणि येषां तादृशा रविरश्मयो ध्रुवं यस्मादधुना प्रातःसमये सविधमस्मदादिसमीपदेशं भूषयन्ति सर्वेऽपि समीपदेशमागच्छन्ति । तत्तस्मादयमध्येतॄणां वेदं पठतां वदनलक्षणेषु कुहरेषु दरीषु विषय आकर्ण्यमानवर्णानुरूपस्तेषां वेदशाखीभवन्मूर्तीनां सूर्यकराणामेव श्रुतिपदमयो वेदपदरूपः प्रतिध्वनिः प्रतिशब्दोऽध्वनि गगन उदञ्चत्यूर्ध्वं प्रसरति । दरीषु प्रतिशब्दो युक्तः । अध्वनि मध्यतारध्वनिरहितं यथा तथेति । अध्येतारो हि प्रातर्मन्द्रध्वनिना वेदानधीयते । ध्रुवमुत्प्रेक्षायां वा । सूर्योदयो जातः, अध्येतारश्च वेदानधीयत इत्यर्थः । दशशतेति मूर्तिविशेषणम् । चतुर्वेदी, समाहारे द्विगोर्ङीप् । पदमयः, ताद्रूप्ये मयट् ॥

> नयति भगवानम्भोजस्याऽनिबन्धनबान्धवः
> किमपि मघवप्रासादस्य प्रघाणमुपघ्नताम् ।
> अपसरदरिध्वान्तप्रत्यग्वियत्पथमण्डली-
> लगनफलदश्रान्तस्वर्णाचलभ्रमविभ्रमः ॥ ११ ॥

नयतीति ॥ अम्भोजस्य कमलकुलस्यानिबन्धनबान्धवोऽकारणमित्रं तदानन्दकारी भगवान् षड्गुणैश्वर्यसंपन्नः श्रीसूर्यो मघवत इन्द्रस्य वैजयन्ताख्यस्य प्रासादस्य प्रघाणमलिन्दं किमपि स्तोकं तथातथोपघ्नतामाश्रयतां नयति प्रापयत्याश्रयति । तावत्पर्यन्तमूर्ध्वमागत इत्यर्थः । अथ च—तं श्लिष्यति । पराङ्मुखशत्रोः शूरस्य परस्पराश्लेषो युक्तः । किंभूतः—अपसरत्पुरः पलायमानमरिरूपं ध्वान्तं तस्य प्रतीचः पश्चिमाशायाः संबन्धिनि वियत्पथे गगनमार्गे मण्डल्या संधिभावेन यल्लगनं संश्लेषः प्रत्यग्दिगन्तगामित्वम्, लयनमिति पाठे—संधिभावेन यत्तिरोधानं सामस्त्येनादर्शनं तेन फलन्सफलो भवन्नश्रान्तो निरन्तरः स्वर्णाचलस्य मेरोः प्रदक्षिणलक्षणो भ्रमः स एव विभ्रमो विलासो यस्य । सद्वस्तुनगरपालनाय रात्रौ भ्रमतो यामिकस्य चौरपलायनेन यथा साफल्यं भवति तथा स्वर्णाचलरक्षणाय सूर्यस्य भ्रमण-

१ 'अत्र श्रियमिव श्रियन्', 'विधामिव विधान्' इति सादृश्याक्षेपादुभयत्र निदर्शनोत्थानात्तज्जातीय संसृष्टिः' इति जीवातुः ।

क्षणनन्यादृशमीक्ष्यते विलोक्यते । सूर्यकरैर्गगनं भूषितम्, ताराश्च सर्वथा न दृश्यन्त इत्यर्थः । इयदिति पाठे—हस्ताभिनयादतिनह्वदित्यर्थः । 'शलभुः स्याद्वहुलरः' इत्यमरः । अविभवः, 'विजम्भस्त-' इति हेतुस् । दिवि सीदन्तीति द्युसदः, 'सत्सूद्विष-' इति क्विप् 'द्युदगुभ्यां उरुपसंख्यानम्' इत्यलुक्प्राप्तावपि 'तत्पुरुषे कृति बहुलम्' इति बाहुलकाल्लुक्, 'दिव उत्', 'सात्पदाद्योः' इति षत्वनिषेधः । बहुकरः, शलभूपक्षे 'दिवाविभा-' इति टः । उपधिः, 'उपसर्गे घोः किः' ॥

प्रथममुपहृत्यार्घं तारैरखण्डिततण्डुलै-
स्तिमिरपरिषद्दूर्वापर्वावलीशवलीकृतैः ।
अथ रविरुचां ग्रासातिथ्यं नभः खविहारिभिः
सृजति शिशिरक्षोदश्रेणीमयैरुदसक्तुभिः ॥ १४ ॥

प्रथममिति ॥ नभः कर्तृ रविरुचां तिमिरपरिषत्तमःसमूहस्तद्रूपा दूर्वापर्वावल्यो दूर्वाग्रन्थिपरंपरास्ताभिः शवलीकृतैः कर्बुरीकृतैर्मिश्रितैस्तारैर्नक्षत्ररूपैरन्वलैश्चाखण्डिततण्डुलैरभग्नैनिस्तुषशालिबीजैः कृत्वाऽर्घं पूजां प्रथममुपहृत्य दत्त्वा, अथानन्तरमेव खविहारिभिः खस्मिन्वर्तमानैः खसत्ताकैश्च शिशिरस्य हिमस्य क्षोदश्चूर्णबिन्दवस्तेषां श्रेणीमयैः परम्परारूपैरुदसक्तुभिर्जलमिश्रयवचूर्णैर्ग्रासातिथ्यं भोज्यान्नदानलक्षणमतिथिपूजनं सृजति करोति । अन्योऽपि तण्डुलदूर्वादलयुतेन जलेन पूर्वमर्घं दत्त्वा सक्त्वादिना स्वगृहप्राप्तायातिथये भोज्यं ददाति । सूर्यदीप्तयः पूर्वं तारास्तिमिरं च हिमजलकणानप्यपनयन्ति स्मेति भावः । 'मूल्ये पूजाविधावर्घः', 'मुक्ताशुद्धौ च तारः स्यात्' इत्यमरः । अत्र तारशब्दः पुंलिङ्गः । तारयति सांयात्रिकानिति ण्यन्तात्तरतेः पचाद्यच् । रविरुचां, संबन्धसामान्यविवक्षया षष्ठी । उदकयुक्ताः सक्तवः मध्यमपदलोपी, उदकानि च सक्तवश्चेति वा समासः । 'मन्थौदन-' इत्युदादेशः ॥

असुरहितमप्यादित्योत्थां विपत्तिमुपागतं
दितिसुतगुरुः प्राणैर्योक्तुं न किं कचवत्तमः ।
पठति लुठतीं कण्ठे विद्यामयं मृतजीवनीं
यदि न वहते संध्यामौनव्रतव्ययभीरुताम् ॥ १५ ॥

अस्विति ॥ दितिसुता दैत्यास्तेषां गुरुः शुक्रः आदित्येभ्यो देवेभ्यो हेतुभ्य उत्थां जाताम्, अथ च—सूर्यात्संजातां विपत्तिं मरणं नाशं च कचवद्बृहस्पतिपुत्रवदुपागतं प्राप्तमसुरेभ्यो हितमपि तेषां रात्रिंचरत्वादनुकूलमपि तमः प्राणैर्योक्तुं संयोजयितुं कण्ठे लुठन्तीं जाग्रद्रूपां मृतानां जीवनीमित्यनुगतार्थां विद्यां किं न पठति, अपि तु सद्यः पठेदेव । परं चेदयं शुक्राचार्यः प्रातःकालीनसंध्यायां मौनव्रतं मौनलक्षणो नियमस्तस्य व्ययो भङ्गस्तस्माद्भीरुतां भयशीलत्वं यदि न वहते न धारयेत्, तर्हीति संबन्धः । पठति वहते । कालसामान्ये लट् । लुठतीम्, वैकल्पिकत्वान्नुमभावः ॥

उदयशिखरिप्रस्थान्यह्ना रणेऽत्र निशः क्षणे
दधति विहरत्पूषाण्यूष्मद्रुताश्मजतुस्रवान् ।

इति च कालिदासः । 'प्रभौ परिवृढः' इति निपातः । गाढप्रेमेति, 'डाबुभाभ्याम्–' इति पक्षद्वयेऽपि डाप् । डापो वैकल्पिकत्वादेकत्र नान्ततापि । विहंगनी, जातित्वान्ङीप् । रथाङ्गं चासौ विहंगमी चेति समासः ॥

निशि निरशनाः क्षीरस्यन्तः क्षुधाऽश्वकिशोरका
मधुरमधुरं हेषन्ते ते विलोलितवालधि ।
तुरगसमजः स्थानोत्थायं क्वणन्मणिमन्थभू-
धरभवशिलालेहायेहाचणो लवणस्यति ॥ १८ ॥

निशीति ॥ भो राजन्, निशि रात्रौ निरशना निराहाराः, अत एव—क्षुधा क्षीरस्यन्त आत्मनोऽत्यर्थं क्षीरं दुग्धमिच्छन्तः ते अश्वकिशोरका अतिप्रविद्धा अश्वबालकाः मधुरमधुरं यथातथा तिलकशब्दं, तथा—विलोलिताः पुनःपुनश्चालिता वालधयः पुच्छानि यस्यां क्रियायां तद्यथा तथा हेषन्ते हेषारवं कुर्वन्ति । तथा—तव मन्दुरायां स्थितस्तुरगाणां समजः समूहः स्थानोत्थायं शय्यास्थानाच्छीघ्रमुत्थाय क्वणन् हेषमाणः मणिमन्थनामके भूधरे भवानां जातानां शिलानां सैन्धवशिलानां लेहायास्वादनाय ईहया इच्छया पुनःपुनर्मुखादिचालनचेष्टया वा चणः ख्यातः सन् लवणस्यत्यात्मनो लोलुपत्वेन लवणमिच्छति । अश्वकिशोरकाः प्रातः क्षीरपानार्थं हेषन्ते, अश्वास्तु प्रातः सैन्धवास्वादनाय हेषन्त इति जातिः । सूर्योदयो जात इत्यर्थः । क्षीरस्यन्तो, लवणस्यन्तीत्यत्र चात्मेच्छायां क्यचि 'अश्वक्षीर–' इत्यादिना 'क्षीरलवणयोर्लालसायाम्' इति वचनाल्लालसायामसुक् । किशोरकाः, 'अल्पे' इति कन् । मधुरमधुरं प्रकारे द्विः । 'हेषङ् स्वने' । समजः पशुविषयत्वात् 'समुदोरजः पशुषु' इत्यप् । स्थानोत्थायम्, 'अपादाने परीप्सायाम्' इति णमुल् । लेहः, भावे घञ् ॥

उडुपरिषदः किं नार्हत्वं निशः किमु नौचिती
पतिरिह न यद्दृष्टस्ताभ्यां गणेयरुचीगणः ।
स्फुटमुडुपतेराश्मं वक्षः स्फुरन्मलिनाश्मन-
श्छवि यदनयोर्विच्छेदेऽपि द्रुतं वत न द्रुतम् ॥ १९ ॥

उड्विति ॥ हे राजन्, उडुपरिषदो नक्षत्रपरम्पराया अर्हत्वं किं न, अपि त्वौचित्यमेवैतत् । तथा—निशो रात्रेरौचिती न किमु, अपि त्वौचित्यमेव । यद्यस्मात्ताभ्यां तारापङ्क्तिविभावरीभ्यां गणेयोऽल्पो रुचीगणो दीप्तिसमूहो यस्य सः क्षीणतेजाः पतिः प्राणेशश्चन्द्र इहास्मिन्समये न दृष्टः । तस्मात्तयोरौचित्यमेवेत्यर्थः । 'धन्यास्तात न पश्यन्ति पतिभङ्गं कुलक्षयम्' इति वचनात्पतिविपदमदृष्ट्वैव द्वयोरपि ध्वस्तत्वादौचित्येव जातेत्यर्थः । स्फुरन्ती प्रकाशमाना कलङ्कव्याजेन मलिना कृष्णा आश्मनी पाषाणसंबन्धिनी छविः कान्तिर्यस्यैवंभूतमुडुपतेर्वक्षो मध्यम्, अथ च—हृदयम्, स्फुटं निश्चितमाश्मं पाषाणविकाररूपं । पाषाणघटितम् [illegible] कठिनं मलिनं चेत्यर्थः । यद्यस्मादनयोस्ताराराज्योर्विच्छेदे वियोगे, अथ च—[illegible] लट् । द्रुतं शीघ्रं न द्रुतं स्फुटितम् । पाषाणनिर्मितमेवेत्यर्थः । वत खेदे । यत् । उद[illegible] स्वस्यापि विलये निकटे सत्यपि तत्पतिना चन्द्रेण स्वप्रेयस्योः प्रेम न दर्शित- दध[illegible] र्थः । तारापरम्परा रात्रिश्च विनष्टा । चन्द्रोऽपि क्षीणतेजा आसन्ननाशो

धर्मविरोधिनः नर्मणः प्रातःकालीनालिङ्गनचुम्बनादिविलासस्य पुनः प्रबोधपूर्वमुत्थापनादिरचितः परुषरूपो विघ्नोऽपि वां युवयोरेकस्यै अरुषे केवलाय क्रोधाभावाय उदेत्विति न, किंतु खलु निश्चितं मुदेऽपि हर्षायाप्युदेतु। यद्यप्येतत्परुषमुक्तम्, तथापि रोषो न कार्यः परुषस्यापि पुण्यहेतुत्वाद्धर्षोऽपि यस्माद्भविष्यति। तथा च हितवादित्व एव तात्पर्यात्प्रियवचनचातुर्यमव्याहतमेवेत्यर्थः। क्रीडां विहाय शीघ्रमुत्तिष्ठतमिति भावः। रतीत्यादिविशेषणेन द्वयोरौचिती सूचिता। वां युवयोर्मध्येऽरुषे रोषहीनायै एकस्यै भैम्यै मुदे नोदेतु। भैम्याः संभोगप्रियत्वान्नर्मविघ्ने यद्यपि संतोषो न भवेत्, तथापि तव प्रियपुण्यत्वादेवास्माभिरुच्यत इत्यर्थ इति वा। भैम्यै कोपाभावायापि नोदेतु मुदेऽपि नोदेतु। भैम्या रोषो वास्तु हर्षोऽपि वा माभूत्, तथापि समयोचितमुच्यत एवेति वा। तत्तस्मादवसरोचितभाषित्वात्पुण्यद्रुहो नर्मणः परुषं यथा तथा विरचितो विघ्नोऽपि निश्चितमकोपाय केवलमुदेत्विति न, किंतु मुदेऽप्युदेतु। सदा स्वोपजीविनाभिहितेऽपि परुषे रोषो न भवति, किंतु हर्ष एव भवतीत्यर्थ इति वा। किंच प्रियवचःप्रवीणा अपि वयं यतो नग्नाचार्या जितलज्जाः, अतः स्वच्छन्दं वदाम इति भावः। 'नग्नो वन्दिक्षपणयोर्विवस्त्रे तु' इति विश्वः। द्वैतं पूर्ववत्। 'शेषाद्विभाषा' इति कप्। वदामतमां, 'प्रैषातिसर्ग-' इति प्राप्तकाले लोट्। 'तिङश्च' इत्यतिशये तमप्। पुण्यद्रुहः, 'सत्सूद्विष-' इति क्विप्। उदेतीति पाठे—'वर्तमानसामीप्ये-' इति लट्। एकस्यै, तादर्थ्यमात्रविवक्षया चतुर्थी॥

> भव लघुयुताकान्तः संध्यामुपास्स्व तपोमल
> त्वरयति कथं संध्येयं त्वां न नाम निशानुजा।
> द्युतिपतिरथावश्यंकारी दिनोदयमासिता
> हरिपतिहरित्पूर्णभ्रूणायिता कियतः क्षणान्॥ २२॥

भवेति॥ हे राजन्, त्वं तस्माल्लघु शीघ्रं युता पृथग्भूता कान्ता यस्मादेवंभूतो भव। इदानीं भैम्या सह क्रीडां त्यज, ततः संध्यां नित्यकृत्योपासनामुपास्स्व कुरु। हे तपसा नित्यकर्माद्यनुष्ठानरूपेणामलोज्ज्वल निर्दोष, निशानुजा रात्र्यनन्तरजाता प्राभातिकीयं संध्या त्वां कथं नाम न त्वरयति, अपि तु त्वरयत्येव। अथ मुहूर्तानन्तरक्षणे द्युतिपतिः सूर्यो दिनोदयं दिवसप्रारम्भमवश्यंकारी अवश्यं करिष्यति। उदेष्यतीत्यर्थः। यतः—हरिरिन्द्रः पतिर्यस्यास्तस्या हरितो दिशः प्राच्याः पूर्णभ्रूणो दशमासगर्भ इवाचरितो रक्ततरः कियतस्त्रिचतुरानेव क्षणानासिता स्थाता। प्रातःसंध्यायाः सूर्योदयात्प्रागेव विधानाच्छीघ्रमुत्थाय प्रातःसंध्यामुपास्स्वेत्यर्थः। युतेति, 'यु मिश्रणामिश्रणे' क्तः। त्यक्तादिपदत्यागेनामङ्गलप्रतीतिपरिहारार्थं युतेति श्लिष्टपदं प्रायोजि। संध्यापदेन कर्मानुष्ठानपर्यन्तमेव कान्तारहितो भव, तदनन्तरं पुनरपि युता संयुक्ता कान्ता येनेति मिश्रणमपि विवक्षितम्, एतदर्थमेतत्प्रायोजि वा। कान्ताशब्दस्य प्रियादित्वाद्युतेत्यस्य न पुंवत्। त्वरयति। हेतुमण्णिच्। कारीति भविष्यदावश्यके णिनिः तद्योगे च 'अकेनोः-' इति निषेधाद्दिनोदयमिति षष्ठ्यभावः। आसिता, लुट्। भ्रूणायितः, आचारक्यङन्तात् क्तः। क्षणान्, कालत्वाच्चात्यन्तसंयोगे द्वितीया॥

मकरन्दान् वध्वा भ्रमर्या मुखालव्धयाधरसुधया ओष्ठगतपीयूषेण मध्ये मध्ये स्वादुंकारं स्वादूनि माधुर्यातिशययुक्तानि कृत्वा धयति पिवति । कमलानि विकसितानि, भ्रमराश्च तन्मधूनि भ्रमर्यधरं च पिवन्तीत्यर्थः। मधुप इति साभिप्रायम् । मद्यपा अप्येतादृशा भवन्ति । समन्ताद्रावाः सांराविणानि, 'अभिविधौ भाव इनुण्' इतीनुणन्तात्स्वार्थे 'अणिनुणः' इत्यण् । स्वादुंकारं, 'स्वादुमि णमुल्' मान्तत्वं च पूर्वस्य 'स्वादुमि' इति निर्देशात् ॥

गतचरदिनस्यायुर्भ्रंशे दयोदयसंकुच-
त्कमलमुकुलक्रोडान्नीडप्रवेशमुपेयुषाम् ।
इह मधुलिहां भिन्नेष्वम्भोरुहेषु समायतां
सह सहचरैरालोक्यन्तेऽधुना मधुपारणाः ॥ ३० ॥

गतेति ॥ गतचरदिनस्यातीतानन्तरदिनस्यायुर्भ्रंशेऽऽवसानकाले सायंसमये दयाया उदयादिव संकुचतां म्लानानां कमलानां मुकुलानि कलिकास्तेषां क्रोडान्मध्याद्धेतोर्नीडेषु प्रवेशमुपेयुषां प्राप्तानाम् । मकरन्दास्वादलाम्पट्यात्सायंसंध्यासमयेऽपि कमलेषु स्थितानाम्, अनन्तरं च तेषु संकुचितेषु वहिर्निर्गन्तुमशक्तत्वात्संकुचत्कमलगर्भरूपेषु नीडेषु स्थितानामिति यावत् । 'क्रोडम्' इति पाठे विशिष्टकमलक्रोडमेव नीडप्रवेशं गतानाम्, अनन्तरं च रात्रावतीतायामिह प्रातःसंध्यासमये भिन्नेषु ईषद्विकसितेष्वम्भोरुहेषु समायतां स्थितानाम् । यद्वा—इह पूर्वदिनान्तसंकुचितेष्वीषदुन्मिषितेषु सत्सु सुखेन निर्गन्तुं शक्तत्वात्तेभ्यः सकाशादर्थान्नवीनकमलानि उद्दिश्य समागच्छताम् । मधुलिहामधुना सहचरैः पूर्वदिनान्ते कमलसंकोचात्पूर्वमेव कमलक्रोडान्निर्गतैः सहचरैः सहचरीभिश्च मित्रकलत्रादिभिः सह मधुना मकरन्देन कृत्वा पारणा उपोषितसंवन्धीनि भोजनान्यालोक्यन्ते । लोकैरिति शेषः । ये रात्रौ कमलवद्धास्ते तत्र मकरन्दाभावान्निर्वन्धवशाच्च कृतोपवासाः, अनिवद्धाः सहचरास्तु रात्रौ निद्रावशात्तद्वियोगाद्वा कृतोपवासाः, अतः सर्वेऽपि प्रातर्मिलित्वा विकसितकमलमधुना पारणां कुर्वन्तीत्यर्थः । पूर्वदिनान्ते संकुचितानि कमलानि प्रातः पुनः किंचिद्विकसितानीति प्रसिद्धम् । भ्रमराश्च मधु पिवन्ति, भूयान्समयो जातः, तस्मादुद्बुध्यस्वेत्यर्थः । अन्येऽपि कस्मिंश्चिन्महीयसि मृते वन्ध्वादौ वा निवद्धे कृपया संकुचितहर्षा भवन्ति । केचिन्न महागुरुनिपात उपवासं कुर्वाणा गृहमध्यं प्रविश्य दिनान्तरे ज्ञातिभिः सह भुञ्जते । 'ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभम्' इति शास्त्रार्थः सहचरपदेन सूचितः । निगडवद्धोऽपि कारागृहेषु भिन्नेषून्मोचितः समागच्छन्सन्स्वस्य वन्धनवशान्निराहारैर्ज्ञातिभिः सह मधुरैरन्नैः पारणां करोति । क्रोडादिति यथापथं हेतौ ल्यव्लोपे च पञ्चमी । समायताम्, इणः शता । सहचरैः, 'पुमान्स्त्रिया' इत्येकशेषः ॥

तिमिरविरहात्पाण्डूयन्ते दिशः कृशतारकाः
कमलहसितैः श्येनीवोर्मीयते सरसी न का ।
शरणमिलितध्वान्तध्वंसिप्रभादरधारणा-
द्गगनशिखरं नीलत्येकं निजैरयशोभरैः ॥ ३१ ॥

तिमिरेति ॥ प्राच्यादयो दिशस्तिमिरस्य विरहाभावात्पाण्डूयन्ते शुभ्रा इवाचरन्ति ।

अत एव—कृशा अप्रकाशाः किंचिद्दूरस्थास्तारकाः कतिपयनक्षत्राणि यान्तु । अन्यापि प्रिय-वियोगात्पाण्डुरा निमग्नातिकृशनेत्रकनीनिका च भवति । तथा—का सरसी कमठानां हसि-तैर्विकासैः कृत्वा श्येनीव श्वेतवर्णेन नोन्नीयते न तर्क्यते, अपितु—सर्वा अपि सरस्यस्तैः शुभ्रायन्ते । अन्यापि प्रियप्राप्तेः कमलतुल्यमुखहसितैः श्वेता भवति । एकं गगनशिखरं गग-नमध्यभागः शरणार्थं स्वपरित्राणार्थं गगनं प्रति लेलितस्य प्रत्यागतस्य ध्वान्तस्य ध्वंसिनो विनाशिनी या सूर्यप्रभा तस्या आदरधारणाद्धेतोर्निजैरचरोभैः खौचैरशोकितसमूहैर्नीलति श्याम इवाचरति, अन्योऽपि शरणागतं परित्यज्य तद्वैरिणमादरेणाङ्गीकुर्वन्दुर्यशसा श्यामो भवति । दिशः सरांसि च प्रसेदुः, गगनं च नक्षत्राहार्यशोभापगमान्निजं नीलिमानं प्राप्तमिति भावः । पाण्डुयन्ते, उपमानादाचारेर्थे 'कर्तुः क्यङ्—' इति क्यङ् 'अकृत्सार्वधातुकयोः—' इति दीर्घः । श्येनी, श्वेतशब्दाद्गुणवाचिनो 'वर्णादनुदात्तात्—' इति ङीप् तस्य नश्च । नीलति, 'नील वर्णे' इति धातुः । आचारक्विबन्तान्नीलशब्दात्तिब्वा ॥

> सरसिजवनान्युद्यत्पक्षार्यमाणि हसन्तु न
> क्षतरुचिसुहृच्चन्द्रं तन्द्रामुपैतु न कैरवम् ।
> हिमगिरिदृषद्दायादश्रि प्रतीतमदः स्मितं
> कुमुदविपिनस्याथो पाथोरुहैर्निजनिद्रया ॥ ३२ ॥

सरसिजेति ॥ सरसिजवनानि न हसन्तु, अपि तु—विकसन्त्वेव । यस्मादुद्यनुदि-त्वरः पक्षः सहायभूतः अर्यमा सूर्यो येषाम् । विकस्वराणीत्यर्थः । अथ च—यदि मित्रस्यो-दयो भवति, तदा सर्वोऽपि हर्षवशाद्विहसत्येव । तथा—कैरवं कुमुदं तन्द्रां संकोचं नोपैतु, अपि तु—प्राप्नोत्येव । यतः—क्षतरुचिगतलक्ष्मीकः सुहृच्चन्द्रो यस्य तादृशम् । चन्द्रोदयवि-कासिनः कुमुदस्य चन्द्रक्षये संकोचोचित एवेत्यर्थः । अन्योऽपि सुहृत्क्षये मूर्च्छावशामेती-त्यति । अथो अथवा पाथोरुहैर्विकसितकमलैः रात्रिसंबन्धिन्या निद्रया कृत्वा कुमुदवनस्यादः प्रत्यक्षदृश्यं स्मितं विकसितं प्रतीतं विनिमयेन गृहीतम् । किंभूतं स्मितम्—हिमगिरेर्हिमाच-लस्य दृषदां शिलानां दायादांशभागिनी सदृशी श्रीः शोभा यस्य । शुभ्रतरमित्यर्थः । कम-लानां रात्रौ निद्राभूत्, कुमुदानां विकासः । प्रातस्तु कमलानां विकासः, कुमुदानां च संकोचो दृश्यते, ततः स्वीयां निद्रां कुमुदेभ्यो दत्त्वा कमलैस्तद्विकासः परिवर्त्य गृहीत इति संभाव्यत इत्यर्थः । सूर्य उदितः, कमलानि विकसितानि, कुमुदानि च संकुचितानीति भावः । प्रतीतम्, प्रतिपूर्वादिणो निष्ठा । 'प्रतीष्टम्' इति च पाठः । अर्थः पूर्वोक्त एव ॥

> धयतु नलिने माध्वीकं वा न वानिनवागतः
> कुमुदमकरन्दौघैः कुक्षिंभरिर्भ्रमरोत्करः ।
> इह तु लिहते रात्रीतर्षं रथाङ्गविहंगमा
> मधु निजवधूवक्त्राम्भोजेऽधुनाधरनामकम् ॥ ३३ ॥

धयत्विति ॥ अभिनवो भूतनः प्रभाते आगतो भ्रमरोत्करो नलिने पद्मेऽन्तर्गतं माध्वीकं मकरन्दं धयतु पिबतु वा न वा । यतः— रात्रौ कुमुदमकरन्दौघैः कुक्षिंभरिः परिपूर्णोदर आकण्ठतृप्तः । रात्रौ कुमुदमकरन्दपानैः पूर्णोदरत्वात्कमलेषु पिबतु वा मा पिबतु वा । न

तत्रास्माकमाग्रह इत्यर्थः। अन्योऽप्याकण्ठतृप्तोऽतिथिर्भुङ्क्ते न वा, न तत्रादरः। रथाङ्गविहं मास्तु रात्रीतर्पं सकलां रात्रिं तर्पित्वा वियुक्तलाकुमुदमकरन्दं परित्यज्य पिपासयैव स्थिता इह प्रत्यक्षदृश्ये निजवधूवक्त्रलक्षणेऽम्भोजे वर्तमानमधरनामकमोष्ठसंज्ञं मधु अधुना प्रातः समये लिहत आस्वादयन्ति। एतदुक्तम् तावतैव चाम्भोजस्यापि कृतार्थत्वं जातमित्यर्थः। अन्यत्रापि तृप्त्यपेक्षयोपोषितभोजनं युक्ततरं भवति। भ्रमरा मकरन्दमास्वादयन्ति, चक्राकाश्च प्रातर्वियोगापगमात्कमलमकरन्दमनादृत्य निजसहचरीश्चुम्बन्तीति भावः। 'फलेग्रहिरात्मंभरिश्च' इति चात्कुक्षिंभरिः। रात्रीतर्पम्, 'अस्यतितृपोः—' इति णमुल्, 'तृतीयाप्रभृतीनि—' इति समासः॥

जगति मिथुने चक्रावेव सरागमपारगौ
नवमिव मिथः संभुञ्जाते वियुज्य वियुज्य यौ।
सततममृतादेवाहाराद्यदापदरोचकं
तदमृतभुजां भर्ता शंभुर्विषं बुभुजे विभुः॥ ३४॥

जगतीति॥ जगति त्रैलोक्यमध्ये चक्रावेव मिथुने स्त्रीपुंसौ सरागमपारगौ कामशास्त्रपारगामिनौ तद्रहस्यवेदिनौ नान्यौ। यद्वा—सरागमपारगौ चक्रवाकावेव जगति मिथुने। नान्ये एतादृशे चतुरे मिथुने स्त इत्यर्थः। कुत एतज्ज्ञातमित्यत आह—यौ चक्राकस्त्रीपुंसौ वियुज्य वियुज्य पुनः पुनरन्योन्येन सह रात्रौ वियोगं प्राप्य मिथोऽन्योन्यं नवमिवातिपरिचयजन्यावज्ञाशून्यं सातिस्पृहमिव संभुञ्जाते सुरतसुखमनुभवतः। अजस्रकामसेवनाद्विरागो भवेदिति वियुज्य संभोगः प्रत्यग्रसंभोगवद्रसातिशयचमत्कारकारी भवति, कामशास्त्ररहस्यं ज्ञात्वैव तावेवं कुरुत इत्यर्थः। अत्र दृष्टान्तः—यद्यस्मादमृतभुजां केवलपीयूषहाराणां सुराणां भर्ता स्वामी। सुलभतरामृत इति यावत्। विभुर्व्यापकः समर्थः। विषभक्षणेऽप्यसंभावितोपद्रव इति यावत्। स शंभुर्नीरोगकरणद्वारा सर्वेषामारोग्यसुखकार्यसंभावितरोगोपीश्वरः सततममृतलक्षणादेवाहाराद्भक्ष्यादरोचकममृतात्यन्तानभिलाषरूपं रोगमापत्प्राप। तत्तस्मात्तत्परिहारार्थं विषं बुभुजे। सततमधुरतरास्वादजन्यारुचिपरिहारार्थमेव स कालकूटं भक्षितवान्। अनन्तरं च पुनरमृतभक्षणे प्रत्यग्रैव रुचिस्त(र्य)था जायते तथा वियोगपूर्वः संभोगो नितरां रुचिमुत्पादयतीति बुद्ध्वा चक्रवाकाभ्यां क्रियत इति तावेव कामशास्त्ररहस्यज्ञाविति भावः। पारगौ, 'अन्तात्यन्ता—' इति डः। 'संभुञ्जाते', 'भुजोऽनवने' इति तङ्। अनेन संभोगस्य वियोगादेव नूतनत्वं भवतीति सूच्यते॥

विशति युवतित्यागे रात्रीमुचं मिहिकारुचं
दिनमणिमणिं तापे चित्ताग्निजाच्च यियासति।
विरहतरलज्जिह्वा वह्वाह्वयन्त्यतिविह्वला-
मिह सहचरीं नामग्राहं रथाङ्गविहंगमाः॥ ३५॥

विशतीति॥ युवतित्यागे चक्रवाकनिष्ठे स्त्रीवियोगे मिहिकारुचं शीतांशुं विशति सति, यतो—रात्रीमुचं रात्रीलक्षणाप्रियात्यागिनम्, तथा—वियोगजन्ये तापे परितापे औष्ण्ये च निजाच्चित्ताच्चक्रवाकहृदयात्सकाशाद्दिनमणिमणिं सूर्यकान्तं यियासति जिगमिषति सति विरहेण

तरलन्ती तरलेवाचरन्ती विह्वलीभवन्ती स्खलन्ती जिह्वा येषां ते रथाङ्गविहंगमाः विरहेणाति-
विह्वलां सहचरीं चक्रवाकीं नाममाहं ससंकेतेन नाम गृहीत्वेह प्रभाते कोकसरन्ति वा बहु
वारंवारं आह्वयन्त्याकारयन्ति । अन्योऽप्यतिविह्वलो वारंवारमाकारयते । स्खलितेति न वेति
संदेहात् । प्रातश्चक्रवाकानां संयोगः परितापत्यागः परस्पराह्वानम्, चन्द्रे धूसरत्वम्, सूर्य-
कान्ते तापश्च । 'प्रालेयं लिहिका' इत्यमरः । राज्ञोनुचम्, 'क्विप्' इति क्विप् । तरलेति
संपदादित्वात् । लिहिका रसनास्येति समासः । तरलजिह्वा, तरलेवाचरन्तीत्याचारक्विबन्ता-
च्छतरि (सम्प्रत्यपि) पुंवत् । आह्वयन्ति, सर्वाभावात्तदभावः ॥

स्वमुकुलमयैर्नेत्रैरन्धंभविष्णुतया जनः
किमु कुमुदिनीं दुर्व्याचष्टे रवेरनवेक्षिकाम् ।
लिखितपठिता राज्ञो दाराः कविप्रतिभासु ये
शृणुत शृणुतासूर्यंपश्या न सा किल भाविनी ॥ ३६ ॥

द्गतेरध्वानमलंगामिनम् । भक्तिशब्दस्य प्रियादित्वात्पुंवद्भावाभावः । अध्वन्यम्, अलंगान्वे 'अध्वनो यत्खौ' इति यत् । उदवज्रेति, 'मन्थौदन–' इत्युदकस्योदादेशः । 'अभिरभागे' इत्यभेः कर्मप्रवचनीयत्वाद्द्वितीया ॥

उदयशिखरिप्रस्थावस्थायिनी खनिरक्षया
शिशुतरमहोमाणिक्यानामहर्मणिमण्डली ।
रजनिदृषदं ध्वान्तश्यामां विधूय पिधायिकां
न खलु कतमेनेयं जाने जनेन विमुद्रिता ॥ ४२ ॥

उदयेति ॥ इयमहर्मणिः सूर्यस्तस्य मण्डली उदयशिखरिण उदयाचलस्य प्रस्थे सानुन्य वस्थायिनी वर्तमानाऽक्षया भूयसी शिशुतराणि महांसि तेजांसि तान्येव माणिक्यानि तेषां खनिरुत्पत्तिभूमिर्ध्वान्तेन तिमिरेण ध्वान्तवच्च श्यामां पिधायिकामाकरद्वाराच्छादिकां रजनिरूपां दृषदं शिलां विधूयापनीय कतमेन केन जनेन विमुद्रितोद्घाटितेति न खलु नैव जाने । रात्रिविगमे यतो दृश्यत इत्यर्थः । वाक्यार्थः कर्म । न जाने । अर्थात्तं जनमित्यर्थ इति वा । अन्यापि माणिक्यादिखनिः पर्वतप्रस्थावस्थायिनी कृष्णतरशिलापिहिता केनापि भाग्यवतोद्घाट्यते । अतिशयितः कः कतमो ब्रह्मा तेन विमुद्रितेत्यहं न जाने, अपितेवनैव जानामि । कालपरिवर्तनकारिणा ब्रह्मणैवोद्घाटितेत्यर्थ इति काकुर्वा । खनिः खलु खनिरेवेत्युत्प्रेक्षा वा । कतमः, डतमच्, अतिशये स्वार्थे वा तमब्वा ॥

सुरपरिवृढः कर्णात्प्रत्यग्रहीत्किल कुण्डल-
द्वयमथ खलु प्राच्यै प्रादान्मुदा स हि तत्पतिः ।
विधुरुदयभागेकं तत्र व्यलोकि विलोक्यते
नवतरकरस्वर्णस्रावि द्वितीयमहर्मणिः ॥ ४३ ॥

सुरेति ॥ सुरपरिवृढः शक्रः कर्णात्कुण्डलद्वयं कर्णभूषणयुगं ब्राह्मणवेषं धृत्वा प्रतिग्रहरूपेणाग्रहीत् । किलेति पुराणादौ । अथ प्रतिग्रहानन्तरं मुदा तत्कुण्डलद्वयं खलु निश्चितं प्राच्यै दिशे प्रादात् । हि यस्मात्स शक्रस्तस्याः प्राच्याः पतिर्धवो रक्षिता च । प्रेयान्प्रियायै प्रीत्या निजकर्णादिभूषणं प्रयच्छति । तस्यै दत्तमिति कुतो ज्ञातमत आह—तत्र प्राच्यां तयोर्द्वयोर्मध्ये वा सायमुदयभागुदित्वर आरक्तकिरणरूपमेकं कुण्डलं व्यलोकि दृष्टम् । प्रातरहर्मणिर्नवतरास्तत्कालनिर्गताः करा रक्ततरकिरणास्तद्रूपस्वर्णस्रावि सुवर्णस्रवणशीलं तादृशमेव द्वितीयं कुण्डलं विलोक्यते । तस्मात्तस्यै तद्द्वयं तेन प्रत्तमित्यहं शङ्क इत्यर्थः । सूर्यस्य कुण्डलसमर्थत्वमवश्यं वक्तव्यम्, प्रसङ्गाच्चन्द्रस्य कुण्डलत्वम् । बालतरकिरणः सूर्य उत्तमसुवर्णस्राविकर्णकुण्डलमिव शोभत इति भावः । कर्णेनेन्द्राय कुण्डलद्वयं दत्तमित्यारण्यके पर्वणि कथा ॥

दहनमविशद्दीप्तिर्यास्तं गते गतवासर-
प्रशमसमयप्राप्ते पत्यौ विवस्वति रागिणि ।

१ 'अत्र सूर्यमण्डल्यादीनां खनित्वाद्यारोपाद्रूपालंकारः' इति जीवातुः ।

अधरभुवनात्स्तोलुल्यया हठात्तरणेः कृता-
मरपतिपुरप्राप्तिर्धत्ते सतीव्रतमूर्तिताम् ॥ ४४ ॥

दहनमिति ॥ या दीप्ती रश्मिव्यापारका सती दिवसति सूर्यलक्षणे पत्यौ गतवासरप्रशाने पूर्वदिनावसाने सायंकाले प्रलयसमयलक्षणकालं प्राप्ते, अत एव—अस्तं विनाशमस्ताचलं वा गते प्राप्ते सति । 'अग्निर्ज्योतिः—' इत्यादिश्रुतिदर्शनत्वादिप्रमाणाग्न्याद्दहनमविशत् । सैव दीप्तिरधरभुवनात्पातालस्थानादुदङ्गलत्कारेणाधोत्तरनिमेषोद्गतलोदयं प्राप्य तरणेरग्रे कृतामरपतिपुरस्य स्वर्गस्य प्राच्या वा प्राप्तिर्यया एवंभूता तीव्रतया तीक्ष्णतया सह वर्तमाना मूर्तिर्यस्यास्तत्तां धत्ते । सूर्ये ऊर्ध्वदेशं प्राप्ते दीप्तिः खरतरा जायत इति भावः । या नारी भर्तरि विनाशसमयं प्राप्ते विनष्टे सति तस्मिन्ननुरागिणी सती जन्मान्तरेऽपि तत्प्राप्त्यर्थमग्निप्रवेशं कुरुते या दुष्कृतैः पातालप्राप्तमपि निरयपतितं 'व्यालग्राही यथा व्यालम्—' इत्यादिवचनप्रामाण्यान्निरयादुद्धृत्य तस्य कृतस्वर्गप्राप्तिः सती सतीनां पतिव्रतानां व्रतमेव मूर्तिः शरीरं यस्याः, सती गौरी तस्या व्रतयुक्ता मूर्तिर्यस्यास्तां धत्ते । गौरीवादेयमपीत्यर्थः । समयप्राप्ते, 'प्राप्तापन्ने च द्वितीयया' इति समासः ॥

बुधजनकथा तथ्यैवेयं तनौ तनुजन्मनः
पितृशितिहरिद्वर्णाद्याहारजः किल कालिमा ।
शमनयमुनाक्रोडैः कालैरितस्तमसां पिबा-
दपि यदमलच्छायात्कायादभूयत भास्वतः ॥ ४५ ॥

बुधेति ॥ तनुजन्मनोऽपत्यस्य तनौ वर्तमानः कालिमा श्यामत्वं किल प्रसिद्धं निश्चितं वा पितुः पित्रोर्वा शितिहरिद्वर्णादीनां कृष्णनीलवर्णपत्रशाकादीनां च आहारो भक्षणम् । शिति हरिद्वर्णं यदशनदनीयं पत्रशाकादि वा । तस्माज्जातः 'स श्यामो मिश्रातनयत्वात्' इत्यादि बुधानामुदयनाचार्यादीनामियं कथा गोष्ठी तथ्यैव सत्यैव । यद्यस्मादितो भास्वत इतः प्रत्यक्षदृश्यादमलच्छायादुज्ज्वलकान्तेः हृक्नालरादपि तमसां पिबात्तमिस्रैकाहारात्कायाच्छमनयमुनाशनैश्चरैः कालैः श्यामैरभूयतेत्यन्वयः । सूर्यकायस्योज्ज्वलत्वेऽपि श्यामतमसनीतनिस्राहारपरिणतिवशाद्यमादिभिरपत्यैः श्यामैर्यतो जातम् । तस्मादियं पण्डितकथा सत्यैवेत्यर्थः । सर्वमपि तमः सूर्येण नाशितमिति भावः । आयम्, अदेः 'ऋहलोर्ण्यत्' । काली च कालौ चेति 'पुमान्स्त्रिया' इत्येकशेषः । तमसां, कर्मणि षष्ठी । अभूयत, भावे तङ् । 'क्रोडः कालोऽसितः पङ्गुर्मन्दश्छायासुतः शनिः' इत्यमरशेषः ॥

अभजत चिराभ्यासं दैवः प्रतिक्षणदात्यये
दिनमयमयं कालं भूयः प्रसूय तथा रविः ।
न खलु शकिता शीलं कालप्रसूतिरसौ पुरा
यमयमुनयोर्जन्माधानेऽप्यनेन यथोज्झितुम् ॥ ४६ ॥

---

१ इदं तु चिन्त्यम्, प्राप्तशब्दस्य पूर्वनिपातापत्तेः । तस्मात् 'द्वितीया श्रिता—' इति समासः । २ 'अत्र प्रस्तुतदीप्तिविशेषणसाम्यादप्रस्तुत(सती)प्रतीतेः समासोक्तिरलंकारः' इति जीवातुः । ३ 'अत्र हन्नादिकालिमत्वविशिष्टनिरभार(राहार) परिणतिपूर्वकत्वोत्प्रेक्षा' इति जीवातुः ।

अभजतेति ॥ अयं रविर्देवः क्षणदा रात्रिस्तस्या अत्यये प्रत्यूषं प्रति । रात्र्यन्त इत्यर्थः । दिनरूपं कालं त्रुट्यादिलक्षणसनयम्, अथ च—तद्रूपं श्यामं वस्तु भूयो बहु यथा तथा पौनःपुन्येन वा प्रसूयोत्पाद्य चिरं बहुकालमभ्यासं तथा तेन प्रकारेणाभजत अश्रियत् । यथा येन प्रकारेण पुरा पूर्वं कालः प्रसूतिर्यस्य, अथ च—काली श्यामा प्रसूतिः सैवंभूतोऽसौ सूर्यः । यमयमुनयोरपि प्रसविष्यतोर्जन्माधाने जन्मार्थं बीजक्षेपसमयेऽभ्यस्य चिराभ्यासेन हेतुना शीलं कालोत्पादनस्वभावमुज्झितुं खलु निश्चितं न शकिता न समर्थो भविता । कालप्रसूतिस्वभावः सूर्यः स्वभावस्य दुरतिक्रमत्वात्तावपि कालावुदपादयदित्यर्थः । उदयमानेन सूर्येण दिवसः कृत इति भावः । प्रातःकाले क्रियमाणोऽभ्यासः पटुतरो भवति । चिराभ्यासम्, मयूरव्यंसकादित्वात्समासः । यद्वा—अकारान्तस्य चिरशब्दस्य 'अलन्त... योगे च' इति समासः । प्रतिक्षणदात्यये, वीप्सायामव्ययीभावे 'नाव्ययीभावात्—' इति तृ... न लुक् । 'अत्ययम्' इति पाठे पक्षे 'तृतीयासप्तम्योः—' इत्यम् । कालप्रसूतिः पूर्ववत् ॥

> रुचिरचरणः सूतोरुश्रीसनाथरथः शनिं
> शमनमपि स त्रातुं लोकानसूत सुताविति ।
> रथपदकृपासिन्धुर्बन्धुर्दृशामपि दुर्जनै-
> र्यदुपहसितो भास्वांस्तांस्तान्हसिष्यति कः खलः ॥ ४७ ॥

रुचिरेति ॥ सुजनैरेवंभूतो यो भास्वानिति संस्तुतः दुर्जनैर्यस्मादेवमुपहसितः, तस्मादतितुच्छान्परवर्णनोपजीविनः को नाम खलो नोपहसति, अपि तु—सर्वोऽप्युपहसत्येव । यथा—उदिते सूर्ये सद्भिः सूर्यस्यार्हणा क्रियते, तथा खलैर्न । एवं तुच्छा एव खोदरभरणार्थं यत्किंचिद्वदन्तीत्यस्माकं खलैर्निन्दायां कृतायां भवादृशै राजशिरोमणिभिरलाकमर्हणा क्रियत एवेत्यर्थः । एवं कथं स्तुतः कथमुपहसित इत्यत आह—स सूर्यः रुचिराश्चरणा लक्षितलक्षणया किरणा यस्य, तथा—सूतस्यारुणस्योर्व्या महत्या श्रिया, सूता सूर्येणैव प्रसूता उर्वी श्रीस्तया सनाथोऽलंकृतो रथो यस्य सः । तथा—शनिं शमनमपि शनैश्चरदण्डधरौ सुतौ लोकांस्त्रातुमसूत । शनिर्हि श्रुत्यादिसिद्धा ग्रहेषु लोकपालतया लोकान्रक्षति, यमोऽपि दुष्टादुष्टयोर्निग्रहानुग्रहौ कुर्वन् धर्माधर्माचरणप्रवृत्तिनिवृत्तिजननद्वारा रक्षति । एतादृशौ परोपकारपरौ पुत्रौ प्रासूत । तथा—रथपदानामनाथानां चक्रवाकानां कृपासिन्धुर्दयासमुद्रः, रथस्य पदेन व्यवसायेन गत्या जगतो दयासमुद्रो वा । तथा—सकलपदार्थग्रहणसहकार्यालोकसंपादनद्वारा दृशां सर्वजननेत्राणां बन्धुर्मित्रम् । एवंभूतः सुन्दरः परोपकारकरणैकस्वभावोऽपीति स्तुतिपक्षः ॥

रुचिस्तेजोरूपः ॥ तापकर इति यावत् । तथा—अचरणश्चरणरहितः, यद्वा—विपरीतलक्षणया रुचिरौ चरणौ यस्य, पुराणादौ चरणाङ्गुल्यादिध्याने कुष्ठादिदुष्टफलश्रवणात् । ध्यानेऽप्यचरण एव सूर्यः, विश्वकर्मणा कुन्द आरोपितस्य सूर्यस्य तेजसां दुःसहत्वाच्चरणा-

१ 'अत्र कालशब्दे वाच्यप्रतीयमानयोरभेदाध्यवसायेन भगवतो भानोः प्रत्यहं कालप्रसवन्यात्... पत्येष्वपि शमनयमुनादिषु कालप्रसवितृत्वमुत्प्रेक्ष्यते, तत्र कालयोः कृष्णानेहसोरभेदाध्यवसाय इति तयोरेकत्वेनात्र संकरः' इति जीवातुः ।

कारो न निर्मित इति वा । अन्धं प्रति मुनेरन्धत्ववचनवदचरणस्यापि रुचिरचरणत्वोक्त्योपहासः । तथा—सूतस्यानूरोः सारथेरुच्छोभया सनाथो रथो यस्य स इत्यपि विरुद्धलक्षणा । तथा—शनेः क्रूरग्रहत्वाच्चिरकालभोग्यदुःखदत्वात्, यमस्यापि जगत्प्राणहरणशीलत्वात्, परपीडाहरणैकस्वभावौ शनिशमनौ पुत्रौ लोकांस्त्रातुमसूतेत्यपि विरुद्धलक्षणा । तथा—तिर्यग्योनिपक्षिविशेषचक्रवाकाणामेव दयालिन्धुनान्येषां तापकरत्वात् । तथा—दृशामेव बन्धुः, नान्येषाम् । यद्वा—तेजोभरेण दृष्टिं प्रति घातकारित्वादबन्धुरपि दृशां बन्धुरित्यपि विरुद्धलक्षणेत्युपहासपक्षः । एवंभूतः सूर्यः समुदेतीति भावः ॥

> शिशिरजरुजां घर्मं शर्मोदयाय तनूभृता-
> मथ खरकरश्यानास्यानां प्रयच्छति यः पयः ।
> जलभयजुषां तापं तापस्पृशां हिममित्ययं
> परहितमिलत्कृत्यावृत्तिः स भानुरुदञ्चति ॥ ४८ ॥

शिशिरेति ॥ सोऽयं भानुरुदञ्चत्युदेति । स कः—यः शिशिरर्तौ शिशिरं हिमं तस्माज्जाता रुक् पीडा येषां तेषां तनूभृतां जनानां शर्मणः सुखस्योदयाय प्राप्तये वसन्तनिदाघसंबन्धिनं घर्ममुष्णं क्रमेण प्रयच्छति, अथानन्तरं च वसन्तनिदाघसंबन्धिनः खरास्तीक्ष्णतराः कराः सूर्यकिरणास्तैः श्यानं शुष्कं म्लानमास्यं मुखं येषां तेषां देहिनां सुखाय पयो वर्षासंबन्ध्युदकं दत्ते, ततो जलभयजुषां वर्षासंबन्धिजलभीतानां तापं दत्ते, ततः—तापस्पृशां शारदतापवतां देहिनां हेमन्ते हिमं दत्ते, एवंप्रकारेण परेभ्यो यद्धितं तस्मिन्विषये मिलन्ती पौनःपुन्येन घटमाना कृतेः शीततापहिमदानरूपव्यापारस्यावृत्तिरावर्तनं यस्य । यद्वा—कृत्यानां शीतादिदानरूपाणां कार्याणामावृत्तिर्यस्यैवंभूतः । परोपकारपरः सूर्य उदेतीत्यर्थः । श्यानेति द्रवमूर्तिस्पर्शवाचित्वाभावात्संप्रसारणाभावः । 'श्यो स्पर्शे' इति निष्ठानत्वम् । परहितेति, 'चतुर्थी तदर्थार्थ—' इति समासः । 'कृञः श च' इति योगविभागात् क्तिनि कृतिः, चकारात्क्यपि तुकि च कृत्या । पक्षे—अर्हार्थे 'विभाषा कृवृषोः' इति क्यपि तुक् ॥

> इह न कतमश्चित्रं धत्ते तमिस्रततीर्दिशा-
> मपि चतसृणामुत्सङ्गेषु श्रिता धयतां क्षणात् ।
> तरुशरणतामेत्य च्छायामयं निवसत्तमः
> शमयितुमभूदानैश्वर्यं यदर्यमरोचिषाम् ॥ ४९ ॥

इहेति ॥ पूर्वादीनां चतसृणामिह दिशामुत्सङ्गेषु प्रान्तदेशेषु श्रिता वर्तमानास्तमिस्रततीस्तमिस्रपरम्पराः क्षणाद्धयतां विनाशयतामप्यर्यम्णः सूर्यस्य रोचिषां तेजसां तरवः शरणं यस्य तद्भावं वृक्षतलाश्रितत्वेनेत्य प्राप्य निवसद्वर्तमानं छायामयं छायारूपं तमः शमयितुं विनाशयितुमनैश्वर्यमसामर्थ्यमभूदिति यत्, इहात्रासामर्थ्यविषये कतमः को नाम जनश्चित्रं विस्मयं न धत्ते । अपि तु सर्वोऽप्याश्चर्यं प्राप्नोत्येव । दिगन्तगतामपि तिमिरपरम्परां संहरे

---

१ 'हेतुत्वेनार्थान्तरन्यासोऽनुप्रासश्चालंकारः' इति जीवातुः । २ 'विभावनानुप्रासोऽलंकारः' इति जीवातुः । ३ 'खरेति पाठेऽपि नार्थभेदः' इति सुखावबोधा । ४ 'स्थिता' इति पाठः सुखावबोधासंमतः ।

येषां शक्तिस्तेषां रवितेजसां तरुतलमात्रस्थितं छायारूपं समीपवर्त्यपि तमः शमयितुमपि शक्तिर्नाभूदित्याश्चर्यमित्यर्थः। 'तनु' इति पाठे—तनुरल्पः शरीरं वा शरणं यस्य तद्भावं प्राप्य निवसत्। महदाश्रयेण स्थितमपि यो विनाशयितुं शक्नोति सोऽल्पाश्रयेण वर्तमानं शमयितुमपि न शक्नोतीत्याश्चर्यमेव। तरुच्छायामयं देहच्छायामयं वा तमो विहाय सर्वमपि तमः सूर्येण विनाशितमिति भावः। आनैश्वर्यम्, अनीश्वरस्य भाव इत्यर्थे 'नञ्पूर्वात्–' इति भावप्रत्ययनिषेधेऽपि ब्राह्मणादिष्वनीश्वरशब्दस्य पाठात्ष्यञि 'नञः शुचीश्वर–' इति पक्षे उभयपदवृद्धिः॥

जगति तिमिरं मूर्च्छामब्जव्रजेऽपि चिकित्सतः
पितुरिव निजादस्मावस्मादधीत्य भिषज्यतः।
अपिच शमनस्यासौ तातस्ततः किमु नौचिती
यदयमदयः कह्लाराणामुदेत्यपमृत्यवे॥ ५०॥

जगतीति॥ दस्रौ नासत्यौ निजात्स्वीयादस्मात्पितुः सूर्यादधीत्येवायुर्वेदं पठित्वेव भिषज्यतः स्वर्लोकचिकित्सां कुरुतः। किंभूतात्पितुः—जगति वर्तमानं तिमिरम्, अथ च—वस्तुदर्शनासामर्थ्यजनकं नेत्ररोगविशेषं चिकित्सतो नाशयतः। आयुर्वेदोक्तप्रतीकारेण शमयतः। तथा—अब्जव्रजे कमलख(ष)ण्डे वर्तमानां मूर्च्छां संकोचमपि नाशयतः, अथ च—'अप एव ससर्जादौ–' इति वचनादपां मूलभूतत्वादब्जव्रजे लोकसमूहे वर्तमानां मूर्च्छां वैचित्त्यध्वस्तचैतन्यभावरूपं मोहमपाकुर्वतः। उपचारचतुरात्कल्याणपाणेर्वैद्यादधीत्यैव हि राजवैद्यो भवति, तस्माद्वैद्यात्स्वपितुरेव वैद्यकमधीत्य ताभ्यामिन्द्रवैद्यत्वं प्राप्तमित्यर्थः। अपि च किंच सर्वभूतानि शमयति नाशयतीति शमनो यमस्तस्यासौ सूर्यो यस्मात्तातः पिताऽतस्तस्मात्कह्लाराणां कुमुदानामपमृत्यवे संकोचाय, अथ च—अकालमरणायोदेति। यतोऽयं सूर्योऽदयो निष्कृपः, साऽस्य सूर्यस्य नौचिती किमु, अपित्वेषाऽस्यौचित्येव। कारणगुणप्रक्रमेणैव कार्ये गुणारम्भाददयताऽपमृत्युदायिता च यमेनाप्यस्मात्स्वपितुरेव सकाशात्पठितेत्यर्थः। उदयता सूर्येण तमो नाशितम्, कामलान्युन्मीलितानि, कुमुदानि कुमुलितानीति भावः। पितुः, 'आख्यातोपयोगे' इत्यपादानत्वम्। भिषज्यतः कण्ड्वादिः। 'तपति' इति वा पाठः॥

उडुपरिवृढः पत्या मुक्तामयं यदपीडय-
द्यदपि बिसिनीं भानोर्जायां जहास कुमुद्वती।
तदुभयमतः शङ्के सङ्कोचितं निजशङ्कया
प्रसरति नवार्के कर्कन्धूफलारुणरोचिषि॥ ५१॥

उड्विति॥ अयमिदानीमस्तं जिगमिषुरुडुपरिवृढश्चन्द्रः सायमुदितः सन् अस्तं गतेन पत्या सूर्येण मुक्तां वियोगिनीं भानोर्भार्यां बिसिनीं पद्मिनीं यद्यस्माद्गतरात्रावपीडयत्संकोचितवान्। अथ च—करैर्दूषितवान्। यदपि यस्माच्चन्द्रे पद्मिनीं पीडयति सति कुमुद्वती कुमुदविकासव्याजेन रात्रौ जहास। अत एव हेतोस्तदुभयं चन्द्रकुमुदिनीरूपं द्वयमिदानीं कर्क-

१ 'किमनौचिती' इति पाठः जीवातुसुखावबोधासंमतः।

न्धूफलवत्लकबदरवत्कोपादिवारुणरोचिषि रक्तकान्तौ नवार्के तरुणादित्ये प्रसरति प्रकर्षेणागच्छत्युदयति सति निजशङ्कया स्वकृतानाचारनिमित्तभयेनेव प्रयोजकेन संकोचितं संकोचं प्रापितम् । निष्प्रभीकृतमित्यर्थः । इत्यहं शङ्के मन्ये । सूर्य उदितः, पद्मिनी च विकसिता, चन्द्रो निष्प्रभोऽस्तमेति, कुमुदिनी संकुचितेति भावः । अन्यत्राप्युक्तं प्रमेयं बोद्धव्यम् । संकोचितमिति ण्यन्तात्कर्मणि निष्ठा । अन्यथा व्याख्याने संकुचितमित्येव स्यात् । तदुभयं निजशङ्कया करणभूतया स्वयमेव संकुचितुं कृतारम्भमिति वा व्याख्येयम् । कर्कन्धूकुणेति पाठश्चिन्त्यः । ग्रन्थविस्तरभयात्साधनिकादि नोक्तम् । सुबुद्धिभिर्विविच्य बोद्धव्यम् ॥

श्रुतिमयतनोर्भानोर्जानेऽवनेरधराध्वना
विहरणकृतः शाखा साक्षाच्छतानि दश त्विषाम् ।
निशि निशि सहस्राभ्यां दृग्भिः शृणोति सहस्वराः
पृथगहिपतिः पश्यत्यस्याक्रमेण च भास्वराः ॥ ५२ ॥

श्रुतीति ॥ अहिपतिः शेषो ज्योतिःशास्त्रानुसारेणावनेर्भूमेरधराध्वनाधस्तनेन मार्गेण पातालमार्गेण रात्रौ विहरणकृतः परिभ्रमतः, तथा—श्रुतिमयी वेदरूपा तनुर्देहो यस्य तस्यास्य भानोस्त्विषां दश शतानि एकसहस्रमेव दश शतानि कठकण्वादिशाखाः निशि रात्रौ सहस्रफणत्वात्प्रतिफणं च नेत्रद्वयसद्भावाद्व्याभ्यां सहस्राभ्यां दृग्भिः सहस्रद्वयपरिमितानिर्दृष्टिभिरक्रमेण युगपत्पृथक्चक्षुःश्रवस्त्वात्साक्षाच्छृणोति पश्यति चेत्यहं जाने । क्रियाद्वये क्रमेण हेतुद्वयम्—यतः सहस्वराः स्वरूपेणोदात्तानुदात्तादिस्वरैः सह वर्तमानाः । स्वराणां शब्दरूपत्वाच्छृणोति । तथा—भास्वराः शुक्लभास्वररूपाः । ततः साक्षात्पश्यति च रात्रौ पातालगामित्वात्तत्र च शेषस्य वर्तमानत्वाद्वेदमयशरीरस्य किरणसहस्ररूपं शाखासहस्रं शेषो नेत्रसहस्रद्वयस्य सत्त्वाद्युगपत्पृथगेकेन नेत्रसहस्रेण शृणोति, द्वितीयेन च पश्यतीति युगपच्छ्रवणदर्शनाभ्यामेव शेषनेत्रसहस्रद्वयस्य सार्थक्यमभूदित्यर्थः । 'श्रुतिमयतरोः' इति पाठे—वेदवृक्षरूपस्य वृक्षस्य शाखा युक्ताः । अध्वना वर्त्मनेति पाठे—'वर्त्मन्यध्वा [illegible]' इत्यभिधानात्स एवार्थः । दशशतानीति [illegible] संबध्यते । सहस्वराः, '[illegible]सर्जनस्य' इति पाक्षिकत्वात्सभावाभावः ॥

बहुनखरता येषामग्रे खलु प्रतिभासते
कमलसुहृदस्तेऽमी भानोः प्रवालरुचः कराः ।
उचितमुचितं जालेष्वन्तःप्रवेशिनिरायतैः
किमवयवैरेषामालिङ्गिताङ्गुलिलक्ष्मिना ॥ ५३ ॥

बह्विति ॥ येषां कराणां करता [illegible] पूर्वं पूर्वक्षणे बहुनखरता न प्रतिभासते

१ '[illegible]' [illegible] इति जीवातुः । २ [illegible]
[illegible]
[illegible]
[illegible]
[illegible] इति जीवातुः ।

स्फुरति । सर्वथा नोपलक्ष्यत इत्यर्थः । यद्वा—नसमासेन नखरताऽतीक्ष्णता । पूर्वाह्णे येषामतितरां तीक्ष्णत्वाभाव उपलभ्यते । खलु निश्चितम् । अथ च—येषामुपरिभागे वक्रौ नखरा नखा येषां तत्तोपलभ्यते । तेऽमी प्रत्यक्षदृश्या विकासहेतुत्वात्कमलानां सुहृदो बन्धोर्भानोः कमलबन्धवो वा कराः किरणा एव पाणयः प्रवालरुचो विद्रुमवद्रक्तकान्तयः, अथ च—प्रकृष्टबालकान्तयोऽतिबालाः, अथ च—बालपल्लववद्रक्तकान्तयः । दृश्यन्त इति शेषः । तथा—जालेष्वन्तःप्रवेशिभिर्गवाक्षादिविवरमध्यप्रविष्टैः, अतएव—आयतैस्तद्वशादेव दृग्गोचरीभूतैरेषामेव कियदवयवैः कतिपयैरवयवैः करणैरेषां किरणानां पाणीनां च य आलिङ्गितः संबद्धश्चासावङ्गुलिलङ्गिमा च, अङ्गुलिवल्लङ्गिमा मञ्जिमा, अथ च—अङ्गुलिभिर्लङ्गिमा आलिङ्गिताङ्गुलिलङ्गिमा तदुचितमुचितम् । इयमतिशयेनौचिती । गवाक्षविवरप्रविष्टैः किरणावयवैः किरणानामङ्गुलितुल्यत्वादाश्रिताङ्गुलिवच्चारुता युक्तैव । पाणीनामपि दीर्घैः कतिपयैरङ्गुलिकृता चारुता भवतीत्यपि युक्तमेवेत्यर्थः । जालेष्वन्तःप्रवेशिभिरायतैरेषां कियदवयवैः कर्तृभिरङ्गुलिलङ्गिता आलिङ्गिता गवाक्षविवरप्रवेशानन्तरं समालिङ्गिष्यत इत्युचितम् । 'अङ्गुलिचारुता' इति पाठः सष्टार्थः । 'नखोऽस्त्री नखरः' इत्यमरः । उचितमुचितम्, वीप्सायां द्विरुक्तिः । प्रवेशिभिस्ताच्छील्य आवश्यके वा णिनिः । आलिङ्गिता, लिगिधातोः पक्षे कर्मणि लुट् पक्षे निष्ठा । लङ्गति रमणीयतया चित्तं प्राप्नोतीति गत्यर्थाल्लगिधातोः पचाद्यच् पृथ्वादेराकृतिगणत्वादिमनिच् समर्थनीयः ॥

> **नय नयनयोर्द्राक्पेयत्वं प्रविष्टवतीरमू-**
> **र्भवनवलभीजालान्नाला इवार्ककराङ्गुलीः ।**
> **भ्रमदणुगणक्रान्ता भान्ति भ्रमन्त्य इवाशु याः**
> **पुनरपि धृता कुन्दे किंवा न वर्धकिना दिवः ॥ ५४ ॥**

नयेति ॥ भो राजन्, त्वं भवनस्याधो गृहस्योपरि वर्तमानानां वलभीनां गृहविशेषाणां जालाद्गवाक्षविवराद्धेतोर्वलभीमेवार्थात्प्रविष्टवतीरमूरर्ककररूपा अङ्गुलीर्जालप्रवेशादङ्गुलितुल्यान्सूर्यकरान्, अथ च—करेष्वङ्गुलीनां युक्तत्वादर्ककराणामङ्गुलीर्नाला इव कमलदण्डसदृशीर्नयनयोः पेयत्वं गोचरत्वं (द्राक् शीघ्रम्) नय प्रापय सादरं पश्य । त्वन्नेत्रयोः कमलत्वान्नालमार्गप्रविष्टास्त्वया विलोक्यमाना एतास्त्वन्नेत्रकमलनाला इव जनैर्द्रक्ष्यन्त इत्यर्थः । जालानां वा कमलतुल्यत्वात्तन्नाला इव त्वं पश्येति वा । अमूः काः—या भ्रमतां जालप्रविष्टकिरणमध्ये परिभ्रमतामणूनां त्रसरेण्वादिरूपरजःकणानां गणेन समूहेनाक्रान्ता व्याप्ताः, अत एव-दिवो वर्धकिना स्वर्लोकतक्ष्णा श्वशुरेण विश्वकर्मणा पुनरपि कुन्दे शाणचक्रे धृता आरोपिताः सत्य आशु भ्रमन्त्य इव किंवा न भान्ति अपि तु—तथैव शोभन्ते । यद्वा—भ्रमन्तः शाणघर्षणवशात्परितः पतन्तो येऽणवः शातिततेजसः कणास्तेषां गणैराक्रान्तत्वं युक्तम् । विश्वकर्मणा सूर्यः शाणमारोपित इति पुराणम् । 'नयनयोराधेयत्वम्' इति पाठे—गुणेन वशेनेत्यर्थः । जालात्, जातावेकवचनम् ॥

---

१ अङ्गुलिवल्युवेतिपाठो जीवातुसंमतः । २ 'विशेषणसंकीर्णो निदर्शनाभेदः' इति जीवातुः । ३ 'अर्कस्य करा इव करा हस्ता इति श्लिष्टरूपकम् । भ्रमन्त्य इव भान्तीत्युत्प्रेक्षा' इति जीवातुः ।

दिनमिव दिवाकीर्तिस्तीक्ष्णैः क्षुरैः सवितुः करैः
स्तिमिरकबरीलूनां कृत्वा निशां निरदीधरत् ।
स्फुरति परितः केशस्तोमैस्ततः पतयालुभि-
र्ध्रुवमधवलं तत्तच्छायच्छलादवनीतलम् ॥ ५५ ॥

दिनमिति ॥ दिवाकीर्तिरिव नापित इव दिनं दिवसस्तीक्ष्णैः सवितुः करैरेव क्षुरैर्निशां तिमिरैकबरीलूनां तमोरूपां वेणीं छिन्नमूलां कृत्वा निरदीधरन्निर्धारितवान् । मुण्डयित्वा क्वापि कश्चित्केशोऽवशिष्टः स्यादिति गवेषितवानित्यर्थः । अथ च—बहिर्निष्कासयामास । नापितोऽपि व्यभिचारादिदुष्टां स्वीयां परकीयां वा स्त्रियं क्षुरैर्मुण्डयित्वा देशाद्बहिर्निष्कासयति । ततोऽनन्तरं, तस्मान्मुण्डनाद्वा परितस्तत्र तत्र पतयालुभिरधः पतनशीलैः केशस्तोमैः कृत्वावनीतलं तेषां तेषां वृक्षादिपदार्थानां छाया प्रतिबिम्बं तस्य छलव्याजेन ध्रुवं निश्चितमधवलं श्यामं स्फुरति शोभते । वृक्षाद्यधोभागे कृष्णत्वं मुण्डितकबरीपतयालुकेशसंबन्धकृतम्, नतु प्रतिबिम्बकृतमित्यर्थः । छायाव्यतिरिक्तं सर्वमपि तमो दिवसेन सूर्यकरैर्नाशितमिति भावः । 'दिवाकीर्तिस्तु नापितः' इत्यमरः । कबरी, 'जानपद—' इति ङीप् । लूनाम्, ल्वादित्वान्निष्ठानत्वम् । निरदीधरत्, धारेर्लुङि 'णौ चङि—' इत्युपधाह्रस्वत्वेऽभ्यासस्य सन्वद्भावादित्वम्, 'दीर्घो लघोः' इति दीर्घः । तत्तच्छायेति, 'विभाषा सेना—' इति वा नपुंसकत्वम् ॥

इदानीं शाङ्खिकानां शङ्खशब्दं श्रुत्वा तद्व्याजेन नलयशोवर्णनं कुर्वन्ति—

ब्रूमः शङ्खं तव नल यशः श्रेयसे सृष्टशब्दं
यत्सोदर्यः स दिवि लिखितः स्पष्टमस्ति द्विजेन्द्रः ।
अद्धा श्रद्धाकरमिह करच्छेदनप्यस्य पश्य
ग्लानिस्थानं तदपि नितरां हारिणो यः कलङ्कः ॥ ५६ ॥

ब्रूम इति ॥ हे नल, वयं श्रेयसे मङ्गलाय सृष्टः कृतः शब्दो यस्य तं शङ्खं तव यश एव ब्रूमः त्वत्कीर्तिमेव शङ्खत्वतया वर्णयामः । शाङ्खिकैर्यः शङ्खो वाद्यते तत्त्वद्यश एव । तद्वदुज्ज्वलतरं तव यश इत्यर्थः । शङ्खध्वनो हि मङ्गलदायकः । त्वद्यशोऽपि लोकानां शुभाय तव पुण्यश्लोकत्वाद्भवति । यस्य शङ्खस्य यशसश्च समुद्रप्रभवत्वात्शुभ्रतरत्वाच्च सोदर्यः समानोदर्यो भ्राता स प्रसिद्धो द्विजेन्द्रश्चन्द्रो दिवि स्पष्टं लिखितोऽस्ति । निष्प्रभत्वाच्चित्रलिखित इव निर्व्यापारः स्फुटो दृश्यत इत्यर्थः । त्वमिह गगने प्रत्यूषसमये वास्य चन्द्रस्याद्धा निश्चितं श्रद्धाकरं शङ्खसहोदरत्वात्तिरस्कबुद्धिजनकं करच्छेदं किरणविनाशमपि पश्य । शङ्खेऽपि किरणा न सन्ति, अस्यापीदानीं न सन्ति । किंच—अस्य हरिणसंबन्धी हारिणो यः कलङ्क-

---

१ 'दीप्ताङ्कुशात्सवितुः करात्' इति जीवातुसंमतः पाठः । २ 'निशां कबरीं तिमिरकबरीं ध्वान्तलक्षणां वेणीं लूनां कृत्वा छिन्नमूलां विधाय । 'तिमिरकबरीलूनाम्' इति पाठस्तु लूनशब्दस्य क्तान्तत्वेन पूर्वनिपातप्रसङ्गेनाशुद्धः' इति सुखावबोधा । 'जातिकालसुखादिभ्यः परवचनम्' इति लूनेति निष्ठायाः (क्तस्य) परनिपातः । 'बहुव्रीहेश्चान्तोदात्तात्' इति ङीप्' इति जीवातुः । एवं 'लूनाम्' इति पाठो जीवातुसंमतः प्रतिभाति

शङ्खं नितरामतिशयितं ग्लानेः श्यामतायाः स्थानमपि पश्य । शङ्खस्याप्युदरभागे किंचि-
च्छ्यामतास्ति सा चन्द्रेऽपि । तस्मादपि चन्द्रस्य शङ्खसोदर्यत्वं निश्चितं, तथा चन्द्रमपि तव यशो
ब्रूम इत्यर्थः । उक्तप्रकारेण शङ्खसोदर्यत्वं चन्द्रस्य यद्यप्युचित (यद्यपि) तथापि हारिणसंबन्धी
यः कलङ्कस्तस्य गुरुतरं ग्लानिस्थानं पश्य । चन्द्रस्य श्वेतशङ्खभ्रातृत्वेऽपि निष्कलङ्कं शङ्ख-
मेव तव यशो ब्रूमो, न तु सकलङ्कं चन्द्रमिति भाव इति वा । अथ च—हे राजन्, तव
यशःश्रेयसे यशोविशुद्धये सूत्रशब्दं विरचितस्मृतिवाक्यं शङ्खनामानं मुनिं ब्रूमः । शङ्खस्तव
यशोविशुद्धये स्मृतिं चकारेत्यर्थः । यस्य शङ्खमुनेः सोदर्यो भ्राता स लिखितनामा द्विजेन्द्रो
ब्राह्मणश्रेष्ठो दिवि स्पष्टमस्ति । इह लिखिते अदत्ताहरं स्तलविश्वासकारकमद्य साक्षान्निश्चितं
वा करयोः पाण्योश्छेदं कर्तनमपि पश्य । अथ च—श्रेयसे लोकानां कल्याणाय सृष्टः शुभ-
(श्लोको) नल इति शब्दो यस्मिंस्तंभूतं तव यशः शङ्खनामानमृषिं ब्रूमः समानधर्मत्वात्,
न तु तद्भ्रातरं कलङ्कित्वात् । सोऽपि धर्मार्थस्मृतिवाक्यानि सृष्टवान् । यस्य भ्रातेति पूर्ववत् ।
लिखितस्य चौर्यं हस्तच्छेदश्च भारते ज्ञातव्यः । शाङ्खिकास्त्वत्प्रबोधार्थं शङ्खं वादयन्ति
तस्माच्छीघ्रमुत्तिष्ठेति भावः । लिखितमुनिरेव दिवि ताराशङ्खो जात इति केचित् । समानो-
दरे शयित इत्यर्थे 'सोदराद्यत्' इति यत् । अस्मादेव निर्देशाद्यत्प्रत्ययविवक्षायामेव 'विभा-
षोदरे' इति पाक्षिकः समानस्य सः । हारिणः, संबन्धेऽण्, पक्षे आवश्यके णिनिः ॥

ताराशङ्खविलोपकस्य जलजं तीक्ष्णत्विषो भिन्दतः
सारम्भं चलता करेण निविडां निष्पीडनां लम्भितः ।
छेदार्थोपहृताम्बुकम्बुजरजोजम्बालपाण्डूभव-
च्छङ्खच्छित्करपत्रतामिह वहन्नस्तंगतार्धो विधुः ॥ ५७ ॥

तारेति ॥ विशाखानक्षत्ररूपस्य मातृमण्डलसंज्ञस्य शङ्खाकारत्वाच्छङ्खस्य विलोपकः
स्वप्रभया विनाशकस्तस्य, तथा—जलजं कमलानि भिन्दतो विकासयतः । अथ च—यतस्ता-
राशङ्खविलोपकस्य, अतएव जलजं शङ्खं खण्डयतः । तीक्ष्णत्विषः सूर्यस्यैव शाङ्खिकशिल्पिना
सारम्भं सोद्योगं चलता प्रसरता । अथ च—वर्षणवशात्साटोपं गमनागमने कुर्वता ।
करेण रश्मिना पाणिना च निविडां निष्पीडनां बाधां दृढां यन्त्रणां च लम्भितः प्रापितः ।
अस्तंगतमर्धं यस्य स विधुश्चन्द्रः शङ्खच्छेदसौकर्यार्थमुपहृतमानीतं यदम्बु जलं तस्य कम्बु-
जरजोजम्बालश्छिद्यमानशङ्खसंजातरजश्चयकर्दमः । उदकसंबन्धाद्रजः कर्दमीभवति । तेन
पाण्डूभवल्लोहमयत्वादधवलमपि धवलपङ्कवशाद्धवलं भवच्छङ्खच्छेदकारि करपत्रं तद्भावमिह
प्रातःसमये वहति । शाङ्खिकशिल्पिनो हि छेदसौकर्यार्थं छिद्यमानशङ्खादिदेशे जलं क्षिपन्ति ।
दृढतरग्रन्थिच्छेदादौ च करपत्रं करेण निविडं पीडयन्ति । शङ्खादिच्छेदककरपत्रं चार्धच-
न्द्राकारं संजातरजःपङ्कपाण्डुरं च भवति । अस्तमितार्धश्चन्द्रस्तादृक्करपत्रतुल्यो दृश्यत इत्यर्थः ।
सूर्योदयो जातः, तारा लुप्ताः, कमलानि विकसितानि, चन्द्रश्चार्धेनास्तमित इति भावः ।
जलजं, करेणेति च पक्षे जात्येकवचनम् । पाण्डूभवदिति च्विः ॥

जलजभिदुरीभावं प्रेप्सुः करेण निपीडय-
त्यशिशिरकरस्ताराशङ्खप्रपञ्चविलोपकृत् ।

यथा तथा निद्रामुद्रं निद्रासंबन्धिमुद्रामनुभवतीति। अन्तर्गतभ्रमरः सन् संकुचतीत्यर्थः। अथ च—यः कोशागारे सकलां रात्रिं जागर्ति स दिवसे घोरणापूर्वं यथा तथा निद्रातीत्यर्थः। इत्याद्यनवेमि। पुरा भवतीति, 'पुरि लुङ् चास्मे' इति भूते लट्। भीमशब्दार्थाद्दरोर्णव-न्वात् 'व्याप्तभन्श–' इति गुणः॥

> इह किमुषसि पृच्छाशंसिकिंशब्दरूप-
> प्रतिनियमितवाचा वायसेनैष पृष्टः।
> भण फणिभवशास्त्रे तातङः स्थानिनौ का-
> विति विहिततुहीवागुत्तरः कोकिलोऽभूत्॥ ६१॥

इहेति॥ इह प्रभाते पृच्छाशंसिनः प्रश्नवाचिनः किंशब्दस्य प्रथमान्तं रूपं तेनैव प्रतिनियमिता प्रतिक्षणं शब्दान्तरभाषणाद्व्यावर्तिता वाग्येन कौ कौ इति नियतभाषिणा वायसेन काकेन फणिना शेषाद्धयमुत्पन्नं महाभाष्यलक्षणशास्त्रम्। पाणिनीयमिति यावत्। तत्र तातङ्लक्षणादेशस्य स्थानिनौ आदेशिनौ कौ भण कथयेति पृष्टः कृतप्रश्न एष कोकिलो विहिता कृता या तुहीतिवाक् सैवोत्तरं यस्यैवंभूतोऽभूत् किम्। काकः प्रातः स्वभावतः 'कौ कौ' इति वदति। कोकिलश्च 'तुही तुही' इति। काकः स्वभावात् 'कौ कौ' इति प्रथमाद्विवचनान्तं प्रश्नशब्दं ब्रूते, कोकिलश्च 'तुही तुही' इति। तत्रोत्प्रेक्षा। तुश्च हिश्च तुही, 'तुह्योस्तातङाशिष्यन्यतरस्याम्' इति पाणिनिसूत्रस्मरणशीलः सन् तुहिस्थाने तातङो विधानात्तुहीति तातङः स्थानिनावित्युत्तरं कोलिको दत्तवान् किम्। प्रभातं जातं, काकादयः शब्दायन्ते इति भावः। सूत्रवार्तिकयोर्महाभाष्येणैवार्थसंपादनात्फणिभवेत्युक्तम्। स्थानं प्रसङ्गः सोऽस्त्यनयोरिति स्थानिनौ, अत इनिः॥

> दाक्षीपुत्रस्य तन्त्रे ध्रुवमयमभवत्कोऽप्यधीती कपोतः
> कण्ठे शब्दौघसिद्धिक्षतबहुकठिनीशेषभूषानुयातः।
> सर्वं विस्मृत्य दैवात्स्मृतिमुषसि गतां घोषयन्घो घुसंज्ञां
> प्राक्संस्कारेण संप्रत्यपि धुवति शिरः पट्टिकापाठजेन॥ ६२॥

दाक्षीति॥ अयमाकर्ण्यमानशब्दः कोऽपि कश्चित्कपोतो घूकलक्षणः पक्षी दाक्षीपुत्रस्य दक्षगोत्रसंजातमातृकस्य पाणिनेस्तन्त्रे पाणिनीयव्याकरणेऽधीतं पठनमस्यास्तीति पठितपाणिनीयव्याकरणोऽभवत्। अनेकेषु पाणिनिशिष्येषु मध्ये कोऽपि कपोतरूपः शिष्योऽभूत्। ध्रुवमित्यहमुत्प्रेक्षे। किंभूतः—तदध्ययनवशादेव कण्ठे देवादिशब्दौघानां सिद्धये उदाहरणसाधनाय क्षता घृष्टा बह्वी कठिनी खटिका तस्याः शेषोऽङ्गुलीलग्नोऽवशिष्टभागस्तद्रूपया भूषयानुयातः संबद्धः। खटिकाशेषरेखया कण्ठेऽलंकृत इत्यर्थः। बाला हि पट्टिकादौ खटिकया लिखितं पठित्वा सरस्वतीबुद्ध्या सायं लिपिप्रोञ्छनाङ्गुलिलग्नखटिकादिरजसा कण्ठे रचयन्तीति। कपोतस्य धूसरे कण्ठे स्वभावेनैव धवला रेखा भवति। यः कपोतः सर्वमपि शास्त्रं विस्मृत्य दैवात्स्मृतिं गतामुषसि प्रातः स्मृतां 'दा धा घ्वदाप्' इति पाणिनिकृतां घुसंज्ञां पुनर्विस्मरण-

१ 'भवैमीत्युत्प्रेक्षायाम्। एकस्मिन्कुमुदेऽनेकयोर्निद्राजागरयोः क्रमेण प्रत्यभिधानात् 'एकस्मिन्नथवानेकम्' इत्युक्तलक्षणपर्यायालंकारेण पूर्वोक्तनिदर्शनासंकीर्णा' इति जीवातुः।

भिया घोषयन्पुनः पुनः पठन्सन् भूयसि कालेऽतीतेऽपि संप्रत्यपि प्राक् काष्ठघटितपट्टिकालिखितसूत्रपाठादिपाठजेन संस्कारेण पटुतराभ्यासाहितवासनया शिरो धुवति । विस्मृतस्य प्रातः स्मृतिर्भवति । कपोताश्च प्रातर्घुरशब्दं कुर्वन्ति, शिरश्च कम्पयन्ति, तस्मादियमुत्प्रेक्षा । बालाश्च स्थानासु काष्ठघटितपट्टिकासु खटिकादिलिखितं धवलाक्षरं सूत्रपाठाद्यावेशेन घोषयन्तः शिरः कम्पयन्ति । योऽपि विस्मृतं पुनः स्मरति सोऽपि शिरः कम्पयति । दक्षस्यापत्यम्, 'अत इञ्' इतीञि 'इतो मनुष्यजातेः' इति ङीष् । तत्रे 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी । अधीतमनेनेत्यधीती इष्टादेराकृतिगणत्वादिनिः । घोषयन्, चौरादिकाद्धुषेः शता । धुवति, दीर्घान्तौदादिकात् 'धू कम्पे' इत्यस्माच्छस्य ङित्त्वाद्गुणनिषेधे उवङ् ॥

पौरस्त्यायां घुसृणमसृणश्रीजुषो वैजयन्त्याः
स्तोमैश्चित्तं हरिति हरति क्षीरकण्ठैर्मयूखैः ।
भानुर्जाम्बूनदतनुरसौ शक्रसौधस्य कुम्भः
स्थाने पानं तिमिरजलधेर्भाभिरेतद्भवाभिः ॥ ६३ ॥

पौरस्त्यायामिति ॥ जाम्बूनदतनुरुत्तमस्वर्णतुल्यस्वरूपोऽत एव शक्रसौधस्य वैजयन्तास्यस्योपरिवर्ती सुवर्णकलशरूपोऽसौ भानुः पौरस्त्यायां हरिति प्राच्यां दिशि कुङ्कुमेन कुङ्कुमवद्वा मसृणा स्निग्धरक्ता या श्रीः शोभा तां जुषो भजन्त्या वैजयन्त्याः पताकायाः स्तोमैः संघरूपैः क्षीरयुक्तकण्ठैर्लक्षणयातिबालैर्मयूखैः कृत्वा चित्तं हरति । इन्द्रसौधस्थैर्यपरिवर्तिनस्ता बालतराः सूर्यकिरणास्तदीयरक्तपताकासमूहा इव, सूर्यश्च स्वर्णकलश इव शोभत इत्यर्थः । राजादिप्रासादेषु हि रक्ता भूयस्यः पताकाः सुवर्णकलशाश्च वर्तन्ते । यतोऽयमिन्द्रसौधस्य स्वर्णकुम्भस्त्वम्, अत एव- एतस्माद्भवाभिरस्मान्निर्गताभिः कराभिः तिमिररूपोऽतिश्यामो जलधिस्तस्य पानं प्रासेन विरोधापनं तत्स्थाने नितरामुचितम् । कुम्भोद्भवो ह्यगस्त्यः पूर्वं समुद्रमपात् । अत एतासामपि भानुरूपकुम्भोद्भवत्वात्समुद्रपानं युक्तमित्यर्थः । सूर्य उदयेनागतः, तिमिरं च सर्वं निरस्तमिति भावः । 'घुसृणसुमनः-' इति पाठे—कुङ्कुमकेसरभोजुष इत्यर्थः । 'तोकैः' इति पाठे—तोकमपत्यम्, पताकाया अपत्यरूपैस्तत्सदृशैरित्यर्थः । पुरोदेशे भवा, 'दक्षिणापश्चात्पुरसस्त्यक्' 'कित्ति च' इति वृद्धिः । 'कर्तृकर्मणोः कृति' इति कर्तरि प्राप्तापि षष्ठी 'उभयप्राप्तौ कर्मणि' इति नियमेन भवाभिरित्यत्र तिमिरजलधेरित्यत्रैव भवति, भाभिरित्यत्र तु कर्तरि तृतीयैव ॥

द्वित्रैरेव तमस्तमालगहनग्रासे दवीभावुकै-
रुस्रैरस्य सहस्रपत्रसदसि व्यग्रापि वल्गोत्सवः ।
वर्णानां रचयन्मितं वितनुते तत्पिष्टपिष्टीकृत-
स्नानादिव्योमितनोर्घनोघबन्धुना मोघं विहायस्तुतिः ॥ ६४ ॥

द्वित्रैरिति ॥ तमस्तमालानां तिमिररूपवृक्षविशेषगहनस्य [illegible] दवीभावुकैर्दवरूपैस्त्रिचतुरैरेव [illegible] वा प्रासे निमित्ते [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

मोविनाशे पद्मविकासे च जाते रयचुम्बितं वेगवत्तरं मोघं निष्फलं वितनुते विस्तारयति। किंभूतम्—अत एव—पिष्टस्य पिष्टं पिष्टपिष्टमतत्तत्कृतं पिष्टपिष्टीकृतमत्यन्तचूर्णीकृतं स्वादि- न्योन्नां भूदिग्गगनानां तम एवाघं मालिन्यात्पातकं येन। तिमिरविनाशस्य कमलविकासस्य च द्वित्रैरेव किरणैः कृतत्वादन्यकिरणैस्तत्करणे पिष्टपेषणात्तद्वैयर्थ्यमित्यर्थः। 'दवदावौ वना- रण्यवह्नी', 'किरणोस्रमयूख—'इत्यादि, 'घस्रो दिनाहनी—' इत्याद्यमरः। द्वौ वा त्रयो वा द्वि- त्राः, 'संख्ययाऽव्यया—' इति बहुव्रीहौ 'बहुव्रीहौ संख्येये—' इति डच्। दवीभावुकैः, भुवो 'लषपतपद—' इति ताच्छील्यादावुकञ् अदवा दवा भावुका इत्यर्थे च्विः। व्र- श्चाणि दानार्थाच्चूर्णतेः चौरादिकाच्चूर्णयतेर्वा कर्मणि चिण्। चुम्बितम्, पिष्टीकृतमिति च कर्मणि भावे च निष्ठा॥

दूरारूढस्तिमिरजलधेर्वाडवश्चित्रभानु-
भानुस्ताम्यद्वनरुहवनीकेलिवैहासिकोऽयम्।
न स्वात्मीयं किमिति दधते भास्वरश्वेतिमानं
द्यामद्यापि द्युमणिकिरणश्रेणयः शोणयन्ति॥ ६५॥

दूरेति॥ अयं भानुस्तिमिरजलधेस्तमःसमुद्रस्य शोषकत्वाद्वाडवो वडवानलः चित्रभानु- र्विभावसुः। तथा—ताम्यन्त्याः खिद्यन्त्या वनरुहवन्याः कमलवन्या एव कान्तायाः केल्या क्रीडया वैहासिकः परिहासकः क्रीडानर्मकारी हेलामात्रेण विकासकश्च। तथा—दूरं गगनमार्गमारूढ ऊर्ध्वमागतः, एवंभूतः सन् स्वात्मीयं स्वीयं तेजोरूपत्वात्सहजं भास्वरश्वे- तिमानं स्वपरप्रकाशशुक्लभास्वररूपत्वमद्यापि दूरारूढत्वेऽपि किमिति कुतो न दधते धारयति। तथा—द्युमणेः सूर्यस्य किरणश्रेणयश्चाद्यापि द्यां गगनं किमिति शोणयन्ति रक्तीकुर्वन्तीति प्रश्नद्वयम्। यद्वा—स्वीयं रूपं रविर्न धत्त इति कुतो ज्ञातमित्याशङ्क्य प्रत्यक्षं प्रमाणयति— यद्यस्मादद्यापि सूर्यकिरणपङ्क्तयो द्यां शोणयन्ति, तस्माद्भास्वरश्वेतिमा सूर्येण न धृत इति ज्ञायत इत्यर्थः। एवंविशिष्टः सूर्यो दूरारूढः संजातः, तस्मादद्यापि सूर्यकिरणाः स्वीयं शुक्ल- भास्वरत्वं किमिति न दधते न धारयन्ति। ऊर्ध्वमागतः सूर्यः, कमलानि च विकसितानि, तस्माच्छीघ्रमुत्तिष्ठेति भावः। 'चित्रभानुर्विभावसुः' इत्यमरः। दूरारूढः, गम्यादिदर्शनात्स- मासः। विहासे नियुक्तः स प्रयोजनम्, शिल्पं वास्येति 'तत्र नियुक्तः' इति 'शिल्पम्' इति वा ठक्। 'प्रयोजनम्' इति वा ठञ्। स्वात्मीयं, 'वृद्धाच्छः', दधते 'दध धारणे' एतस्यैक- वचनान्तम्, धाञश्च बहुवचनान्तम्। श्वेतिमा, पृथ्वादिः। शोणां कुर्वन्तीति 'तत्करोति' इति ण्यन्तात् 'णाविष्ठवत्' इति पुंवद्भावष्टिलोपो वा॥

प्रातर्वर्णनयानया निजवपुर्भूपाप्रसादानदा-
द्देवी वः परितोषितेति निहितामान्तःपुरीभिः पुरः।
सूता मण्डनमण्डलीं परिदधुर्माणिक्यरोचिर्मय-
क्रोधावेगसरागलोचनरुचा दारिद्र्यविद्राविणीम्॥ ६६॥

प्रातरिति॥ सूता मागधा मण्डनमण्डलीं भूषणश्रेणीं परिदधुः तत्तद्धस्तकर्णाद्यवय- वेषु धारयामासुः। किंभूताम्—आन्तःपुरीभिरवरोधसंचारिणीभिः सखीभिरित्युक्त्वा

पुरो मागधानामग्रेऽभिहितां स्थापिताम् । इति किम्—हे मागधाः, अनया प्रातर्वर्णनया प्रबोधिकया परितोषिता नितरां संतोषं प्रापिता देवी कृताभिषेका राज्ञी भैमी निजवपुर्भूषाः स्वीयशरीरालंकारभूता अनेकविधसुवर्णमणिप्रभृतीनि भूषणान्येव प्रसादान्पारितोषिकाणि वो युष्मभ्यमदादिति । पुनः किंभूताम्—माणिक्यरोचिर्भैम्या पद्मरागप्रभारूपया क्रोधस्यावेगाडम्बरस्तेन सरागलोचनरुचारुणनेत्ररुचा कृत्वा दारिद्र्यस्य विद्राविणीं पलायनकारिणीम् । मयि स्थितायामप्यत्र दारिद्र्य, त्वं कथं नाम स्थातुमिच्छसीति क्रुद्धया यया माणिक्यप्रभारूपनेत्रारुणकान्त्या कृत्वा दारिद्र्यं दूरादपसारितम् । एवं प्रभातवर्णने क्रियमाणे भैम्या निजशरीरभूषणैस्ते धनाढ्याः कृता इत्यर्थः । अन्योऽपि रोषारुणलोचनरुचा किंचिद्विद्रावयति । आन्तःपुरीभिरिति बहुत्वेन माणिक्येत्यादिना च भूषणानां बहुलबहुमूल्यत्वं च सूचितम् । देवी प्रादादित्यनेन च नलः स्नानार्थं गतः प्रासादे नास्तीति सूचितम् । प्रातर्दुःखपष्टीकमव्ययम् । परितोषिता, ण्यन्तान्निष्ठा । आन्तःपुरीभिः, संबन्धेऽण् 'आन्तःपुरिक्या' इति पाठे—'अन्तःपुरशब्दात् अन्तःपूर्वपदाट्ठञ्' इति भवार्थे ठञ् । रोचिर्भैम्येति, 'स्त्रियाः पुंवत्–' इति पुंवत् ॥

आगच्छन्भणतामुषः क्षणमथातिथ्यं दृशोरानशे
स्वर्गङ्गाम्बुनि वन्दिनां कृतदिनारम्भाप्लुतिर्भूपतिः ।
आनन्दादतिपुष्पकं रथमधिष्ठाय प्रियायौतके
प्राप्तं तैरवरागतैरविदितप्रासादतो निर्गमः ॥ ६७ ॥

आगच्छन्निति ॥ अथ भूपतिर्नलो वन्दिनां दृशोरातिथ्यं प्रेक्षणविशेषद्योतितप्रेमभक्तिबाहुल्यमेवाङ्गगोचरत्वमानशे लेभे । किंभूतानाम्—क्षणमात्रमुषः प्रभातसमयं भणतां वर्णयताम् । किंभूतः—स्वर्गङ्गाम्बुनि मन्दाकिनीजले कृतदिनारम्भाप्लुतिः कृतप्रातःस्नानः । तथा—अवरागतैर्नलबहिर्गमनानन्तरमागतैस्तैर्मागधैरविदितोऽज्ञातः प्रासादतो निर्गमो राजगृहाद्बहिर्निर्गमो यस्य । तथा— प्रियायौतके भैमीपाणिग्रहणसमये कन्यादानप्रतिष्ठाप्रदत्तया दीयमाने वस्तुनि मध्ये प्राप्तमतिपुष्पकमतिक्रान्तपुष्पकाख्यकुबेरविमानमतिरमणीयवेगवत्तरं सर्वत्राप्रतिहतगमनं च रथमधिष्ठायारुह्यानन्दात्तद्रथातिशयसंजातहर्षादागच्छन् । मागधागमनात्पूर्वम्, नतु वर्णनानन्तरं प्रबुद्धः प्रासादान्निर्गच्छन्नित्यर्थः । अत एव भैम्यैव ते धनाढ्या इति पूर्वश्लोक उक्तम् । तस्य परमधार्मिकत्वं सूचितम् । कृतदिनारम्भाप्लुतिरागच्छन्नित्यनेन वन्दनापगमेनाप्रत्युद्गमनम्, उत्तरसर्गसंगतिश्च सूचिता । नलस्य पुण्यश्लोकत्वात्पर्वत्राप्रतिहतगतित्वात्तस्य च रथस्य पूर्वमेव 'कुलस्थादित्यमुदस्थापयत्' इत्यादिना सर्वत्राप्रतिहतगतित्वोक्तेश्चातिपुष्पकत्वोक्तेश्च स्वर्गगमनोक्तिर्युक्तैव । आनशे, 'अश्नोतेश्च' इति नुट् । अतिपुष्पकम्, 'अत्यादयः क्रान्ताद्यर्थे–' इति समासः । रथम्, 'अधिशीङ्–' इत्याधारस्य कर्मत्वम् । 'यौतकम्' इति पाठे—'कर्तृकरणे–' इति समासः । अवरागतैः, 'कालाः' इति द्वितीयासमासः । प्रासादतो निर्गमः 'पञ्चमी' इति योगविभागात्समासः, पश्चाद्बहुव्रीहिः ॥

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।

एकामत्यजतो नवार्थघटनामेकान्नविंशो महा-
काव्ये तस्य कृतौ नलीयचरिते सर्गोऽयमस्मिन्नगात् ॥ १९ ॥

श्रीहर्षमिति ॥ मुख्यां नवार्थघटनामपूर्वार्थनिर्मितमत्यजतोऽमुञ्चतो नूतनमेव प्रमेयं सर्वत्र वदतः श्रीहर्षस्य । एकान्नविंशः विंशतेः पूरण इत्यर्थे डटि 'ति विंशतेर्डिति' इति तिलोपे च विंशः । तत एकेन न विंश इति 'तृतीया' इति योगविभागात्समासे 'एकादिश्चै-कस्य चादुक्' इति नञः प्रकृतिभावः, एकशब्दस्यादुगागमः ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायण-
कृते नैषधीयप्रकाश एकान्नविंशः सर्गः ॥

विंशः सर्गः ।

सौधाद्रिकुट्टिमानेकधातुकाधित्यकातटम् ।
स प्राप रथपाथोभृद्वातजातजवो दिवः ॥ १ ॥

सौधेति ॥ सर्गसंगतिरुक्तैव । स रथ एव पाथोभृन्मेघः दिवः स्वर्गाद्गगनाच्च सौधो राजसदनमेवाद्रिस्तस्य कुट्टिमो नानावर्णानेकमणिबद्धभूमिः सैवानेकधातुका नानाविधगैरिकादिधातुयुक्ता अधित्यकोर्ध्वभूमिस्तस्यास्तटं पर्यन्तप्रदेशं प्राप । किंभूतः—वातात्सकाशाद् (अर्थादधिको) जातो जवो वेगो यस्य । यद्वा—जातो जवो यस्य स जातजवः, वातो जातजवो यस्माद्धेतोः, तेनापि यस्माद्रथात्सकाशाद्वेगः शिक्षितः । अथवा—(वा) तेन जातः । मेघो-प्युक्तविशेषणविशिष्टः पर्वतोर्ध्वदेशं गगनात्पतति । धातुकेति 'शेषाद्विभाषा' इति कप् ॥

ततः प्रत्युदगाद्भैमी कान्तमायान्तमन्तिकम् ।
प्रतीचीसिन्धुवीचीव दिनोंकारे सुधाकरम् ॥ २ ॥

तत इति ॥ ततः सौधोपरिभूमिप्राप्त्यनन्तरं दिनोंकारे दिनप्रारम्भे प्रभातेऽन्तिकमायान्तं सुधाकरं चन्द्रं प्रतीचीसिन्धुवीचीव पश्चिमदिक्समुद्रलहरीव भैमी रथादवतीर्यान्तिकं गृहपरि-सरप्रदेशमागच्छन्तं कान्तं नलं प्रति लक्षीकृत्योदगात्प्रत्युज्जगाम । एतेन भैम्या नल आद-रातिशयः सूचितः । 'अन्तिके' इत्यपि पाठः । 'अधिकरणे च' इति चात्सप्तमी । वीची, 'कृदिकारात्—' इति ङीप् । दिनोंकारे, 'ओमाङोश्च' इति पररूपम् ॥

स दूरमादरं तस्या वदने मदनैकदृक् ।
दृष्टमन्दाकिनीहेमारविन्दश्रीरविन्दत ॥ ३ ॥

स इति ॥ दृष्टा मन्दाकिन्या हेमारविन्दश्रीर्येन स नलस्तस्या वदने दूरं स्वर्णकमलादपि नितरामादरमविन्दत लेभे । अत एव मदने एका केवला मुख्या वा दृग्यस्य सः । स्वर्णकम-लादप्यधिकं तद्दृष्ट्वा संभोगवासनयापश्यदित्यर्थः । एका दृग्यस्येति एकदृक्, मदने एकदृक् । 'सप्तमी' इति योगविभागात्समासः । माद्यति सहर्षा भवतीति मदना, नन्द्यादित्वाल्ल्युः, ततः समानाधिकरणो वा बहुव्रीहिः ॥

तेन स्वर्देशसंदेशमर्पितं सा करोदरे ।
बभ्राजे बिभ्रती पद्मं पद्मेवोन्निद्रपद्मदृक् ॥ ४ ॥

तेनेति ॥ सा पद्मेव श्रीरिव बभ्राजे । किंभूता—स्वर्देशस्य स्वर्गदेशस्य गमनसमये मन्दाकिनीस्वर्णकमलं मम क्रीडार्थमानेयमिति संदेशरूपं तेन नलेनार्पितं दत्तं (पद्मं) करोदरे बिभ्रती । तथा—हर्षादुन्निद्रपद्मदृग्विकसितकमलतुल्यनेत्रा । लक्ष्मीरपि करे पद्मं धारयति, प्रसादाद्विकसितपद्मदृग्भवति । संदेशः, कर्मणि घञ् ॥

प्रियेणाल्पमपि प्रत्तं बहु मेनेतरामसौ ।
एकलक्षतया दध्यौ यत्तमेकवराटकम् ॥ ५ ॥

प्रियेणेति ॥ असौ भैमी प्रियेण प्रेम्णा प्रत्तं दत्तमेककमलरूपत्वादल्पमपि बहु मेनेतरां नितरां बहुमन्यत । यद्यस्माद्धेतोरेको मुख्यः श्रेष्ठो वराटको बीजकोशो यस्य तं पद्ममेकमेव लक्षं नयनविषयो यस्य यस्या वा तद्भावेनान्यवस्तुविलोकनपरित्यागेन तदेकपरतयात्यादरेण दध्यावचिन्तयत् । शोभां पुनः पुनरपश्यदित्यर्थः । अथ च—यदल्पमपि दत्तं बहुतरं न मन्ये तदेकश्चासौ वराटकश्च तमेकं कपर्दकमपि एकलक्षसंख्यापरिमितद्रव्यत्वेन न ध्यायेदिति श्लेषप्रतिभोत्थार्थापत्तिः । तेन प्रेम्णा स्वर्णकमलदानात् 'वसन्ति हि प्रेम्णि गुणा न वस्तुनि' इति न्यायेन तत्स्वर्णकमलं लक्षकोटिपरार्धद्रव्यादपि नितरामधिकं मेन इति भावः । प्रियपदेन प्रेमभरः सूचितः । पद्मस्य पुंलिङ्गत्वात्तमिति पुंनिर्देशः ॥

प्रेयसावादि सा तन्वि त्वदालिङ्गनविघ्नकृत् ।
समाप्यतां विधिः शेषः क्लेशश्चेतसि चेन्न ते ॥ ६ ॥

प्रेयसेति ॥ प्रेयसा नलेन सा भैमी इत्यवादि उक्ता । इति किम्—हे तन्वि कृशाङ्गि, तवालिङ्गनविघ्नं करोतीति कृत् शेषः स्नानसंध्यानन्तरकरणीयत्वेनावशिष्टः श्रुतिस्मृत्युक्तोऽनतिक्रमणीयो नित्याग्निहोत्रादिरूपो विधिर्मया समाप्यतां परिपूर्णाक्रियतां वदेति सामप्रश्नः । परं यदि ते चेतसि त्वद्विलम्बवशात्क्लेशः खेदश्चेन्न भवेत् । समागतेनाश्लेषलोलुपेन मया मन्दादरः कर्तव्यः, परमन्तरायस्वल्पः शेषो विधिरस्ति स पुनः प्रसन्नचित्तत्वेन यद्यनुजानासि तर्ह्येव समाप्तिं नेष्यते नान्यथेत्यर्थः । भैमीकर्मकालिङ्गनविषयमेतत् । भैमीकर्तृकालिङ्गनविषये अनालिङ्गनखिन्नां तां प्रत्येवं तेन प्रार्थना कृतेति भावः । 'विधेः शेषः' इत्यपि पाठः ॥

क्वैतावांस्त्वन्नर्मविद्विद्यते विधिरद्य ते ।
इति तं मनसा रोषादवोचद्वचसा न सा ॥ ७ ॥

क्वेति ॥ सा भैमी इति रोषादीर्ष्यया तं मनसैवावोचन्मनस्येवैवमचिन्तयत्, न वचसा साक्षाद्वाचा । इति किम्—हे प्रिय, नर्मनर्मविदालिङ्गनादिकेलिरहस्यवेदी एतावानदिद-हुरत्रापि ते तव विधिः क्व कुतः, कियति वा काले विद्यते, अपि तु नास्त्येव सर्वोऽपि विधिस्त्वया कृत एव केवलं ममालिङ्गनार्थम् । चाटूत्तरमेतत् । यद्वा—अद्यैतावान्क्व विद्यते, अपि तु नास्त्येव । पूर्वं कदाप्येतावतो विधेरदर्शनात् । इदमपि चाटूत्तरमेवेत्यर्थः । रोष-

१ नर्मनर्मविदिति पठित्वा नर्मणः क्रीडाद्युक्तस्येति व्याख्यातं जीवातौ ।

वशाल्लज्जावशाद्वा साक्षान्न बभाष इत्यर्थः। प्रतारणमेव मम करोषीति रुष्टाभूदिति भावः। नर्ममर्म विध्यतीति व्यधेः क्विपि संप्रसारणे च 'नहिवृति—' इति पूर्वपदस्य दीर्घः॥

क्षणविच्छेदकादेव विधेर्मुग्धे विरज्यसि।
विच्छेत्ता न चिरं त्वेति हृदाह स्म तदा कलिः॥ ८॥

क्षणेति॥ तदा भैमीचिन्तावसरे गृहारामस्थविमीतकनिवासी कलिः हृदा मनसा इत्याह स्मावोचत्। इति किम्—हे मुग्धे मूढे भैमि, क्षणविच्छेदकात्क्षणमात्रमेव वियोगकारिणो विधेर्नित्यकर्मण एव हेतोस्त्वं विरज्यस्युद्विग्ना भवसीति काकुप्रश्नः। एतावतैवोद्वेगो न कार्य इत्यर्थः। यतोऽहं कलिस्त्वां चिरं न विच्छेत्ता विच्छेदनशीलो भवामि, अपि तु वियोजयिष्याम्येवेति। एवमहं करिष्यामि न जानासीति सप्रतिभं मनोरथमकरोदित्यर्थः। भावी वियोगः सूचितः। विच्छेत्ता, ताच्छील्ये तृन्। त्वेति, 'त्वामौ' इति त्वादेशः॥

सावज्ञेवाथ सा राज्ञः सखीं पद्ममुखीमगात्।
लक्ष्मीः कुमुदकेदारादारादम्भोजिनीमिव॥ ९॥

सावज्ञेति॥ अथैवं नलवाक्यश्रवणोद्वेगानन्तरं सा भैमी नलेनानालिङ्गनात्स्वयमारब्धालिङ्गनानङ्गीकाराद्वा सावज्ञेव सापमानेव सती पद्ममुखीं नलात्सकाशाद्भैम्यागमनसंजातहर्षत्वाद्विकसितकमलतुल्यवदनां सखीमगात्प्रतिजगाम। का कस्मात्कामिव—लक्ष्मीः कुमुदानां केदारात्क्षेत्रादाराान्निकटे पद्मरूपवदनामम्भोजिनीं कमलिनीमिवेत्युपमा। लक्ष्मीनिर्गमे च कुमुदक्षेत्रस्य यथा म्लानत्वं, तथा भैमीनिर्गमे नलस्य, अम्भोजिन्याश्च लक्ष्म्यागमनानन्तरं यथा हर्षः, तथा भैम्यागमनानन्तरं सख्याः, इति सूचितमुपमया॥

ममासावपि मा संभूत्कलिद्वापरवत्परः।
इतीव नित्यसत्रेतां स त्रेतां पर्यतूतुपत्॥ १०॥

ममेति॥ स नल इतीव हेतोर्नित्यसत्रे नित्याग्निहोत्रे विषये तामाहवनीयगार्हपत्यदक्षिणाग्निरूपेण प्रसिद्धां त्रेताम्। अथ च—त्रेतारूपं द्वितीयं युगम्। आज्यादिना पर्यतूतुपत्परितोषितवान्पूजितवांश्च। इति किम्—असौ त्रेतापि कलिद्वापरवन्मम परः शत्रुर्मा संभूदिति। अग्नित्रयम[illegible]नेऽहितकारित्वाच्छत्रुरेव भवति। एतेन चाकरणे प्रत्यवायभियैव नित्याग्निहोत्रमकरोत्, [illegible]वतस्तु भैमीपर(वश) एवाभूदिति भावः। 'त्रेता त्वग्नित्रये युगे' इत्यमरः। अतूतुपत[illegible]। 'ऊदुपधाया गोहः' [illegible] '—' इत्युपधाह्रस्वः॥

क्रियां [illegible]त्या कृत्वा निषेधन्पाणिना सखीम्।
कराभ्यां [illegible]स्तस्या न्यमीमीलदसौ दृशौ॥ ११॥
दमयन्त्या वयस्याभिः सहास्याभिः समीक्षितः।
प्रसृतिभ्यामिवायामं मापयन्प्रेयसीदृशोः॥ १२॥

क्रियामिति॥ **दमयन्त्या इति**॥ युग्मम्। असौ नलः पृष्ठगः सन् कराभ्यां तस्या दृशौ न्यमीमिलत्पिदधौ। किं कृत्वा, प्राह्णेतनीं प्राभातिकीमग्निहोत्रादिक्रियां कृत्वा। किं कुर्वन् —पाणिनाहमागत इति तस्या अग्रे न कथनीयमिति करसंज्ञयैव सखीं निषेधन्। तथा—अत

एव सहास्याभिर्नलस्य संमुखीभिर्दमयन्त्या वयस्याभिः समीक्षितः । तथा किं कुर्वन्निव—प्रसृतिभ्यां करद्वयचुलुकाभ्यां प्रेयसीदृशोरियत्परिमाणमेतयोर्दैर्घ्यमायामं मापयन्निव । क्रीडा-कारिणामियं जातिः । प्रसृतिप्रमाणे दृशाविति सूचितम् । प्राह्णेतनी, 'सायंचिरम्—' इति ट्युत्तुट् च, टित्वान्ङीप् । नीलेरकर्मकत्वात् 'गतिबुद्धि—' इत्यादिनाऽणौ कर्तुर्णौ कर्मत्वाद्दृशाविति द्वितीया । मापयन्, 'मा माने' अस्माद्धेतुमण्णिचि शता ॥

तर्किताऽऽलि त्वमित्यर्धवाणीका पाणिमोचनात् ।
ज्ञातस्पर्शान्तरा मौनमानशे मानसेविनी ॥ १३ ॥

तर्कितेति ॥ हे आलि सखि, मया नेत्रपिधायिनी त्वं तर्किता ज्ञाताऽसीत्येवंरूपाऽर्धा मुखेऽस्यावचनादपरिपूर्णपदा वाणी यस्याः सा, तथा—स्वकराभ्यां नलपाण्योर्मोचना-द्धेतोः ज्ञातं स्पर्शान्तरं स्त्रीयस्पर्शाद्विलक्षणो नलस्पर्श इति यया, ज्ञातस्पर्शनान्तरं चेतो यस्या इति वा । सा मौनमानशे प्राप, यतो मानसेविनी मानिनी । स्पर्शेन नलं ज्ञात्वा मान-वत्त्वाय त्रेतायामनुरक्तोऽधुना वृथैव किमित्यागत इत्यभिमानात्किमपि नावददित्यर्थः । वाणी-केति, नद्यन्तत्वात्कप् ॥

सावादि सुतनुस्तेन कोपस्ते नायमौचिती ।
त्वां प्राप यत्प्रसादेन प्रिये तन्नाद्रिये तपः ॥ १४ ॥

सेति ॥ तेन नलेन सुतनुः शुभाङ्गी सा इत्यवादि उक्ता । (इति किम्—) अयि प्रिये भैमि, ते तवायं मयि कोपो नौचिती । औचितीशब्दस्याविष्टलिङ्गत्वादुचितोऽयं नेत्यर्थः । अहं यस्य तपसः प्रसादेन त्वां प्राप प्राप्तवानस्मि, तत्तपोऽग्निहोत्रादि नाद्रिये आदरेण न कुर्या-मित्याक्षेपककाकुप्रश्नः । एवंविधमहाफलस्य तपसोऽप्यादरो युक्त एवेत्यर्थः । त्वत्प्राप्तिफलादेवा-स्यादरः क्रियते, न त्वन्यथा, तस्मात्कोपं मा कार्षीरिति भावः ॥

निशि दास्यं गतोऽपि त्वां स्नात्वा पश्चान्न्यवीवदम् ।
तं प्रवृत्तासि मन्तुं चेन्मन्तुं तद्वद वन्द्यसे ॥ १५ ॥

निशीति ॥ हे भैमि, अहं निशि तव दास्यमाङ्घ्रिमर्दनचुम्बनादि [illegible] गतोऽपि सन् प्रातः स्नात्वा त्वां नाभ्यवीवदं न नमस्कृतवानिति यद्, तं मन्तुमपराधं मन्तु-मनोंकर्तुं त्वं प्रवृत्तासि चेत्, तर्हि वद तदपराधमार्जनार्थं पादाभ्यामेव वन्द्यसे नमस्क्रियसे । रात्रौ दास्यं प्राप्त इत्यनेन स्त्रीषु भैमीमादिमृत्तनमपि सूचितम् । अभ्यवीवदम्, [illegible] [illegible] स्वार्थणिचि चङि च 'ओः पुयण्—' इत्युपधाह्रस्वः ॥

इत्येतस्याः पदास्त्यै पत्यैव प्रेरितौ करौ ।
रुद्ध्वा सकोपं सातङ्कं तं कटाक्षैरनूनुदत् ॥ १६ ॥

इतीति ॥ एवं इत्येवमुक्त्वा [illegible] तस्याः भैम्याः पदास्त्यै [illegible] प्रेरितौ करौ [illegible]

१ [illegible] २ [illegible] ३ [illegible] ४ [illegible]

त्वीयचरणयोः पतिकरस्पर्शस्यानौचित्याद्वा आतङ्को भयं तेन च सह यथा तथा त्रपस्पर्शात्पूर्वमेव स्वकराभ्यां रुद्ध्वा निवार्य तं कटाक्षैरमूमुहत्कामावीनं चकार । एवं तया विलोकित एव कामवशो जात इति भावः । पदास्तस्यै, तादर्थ्यमात्रे चतुर्थी । मुहेरकर्मकत्वात् 'गतिबुद्धि-' इत्यादिनाऽणौ कर्तुर्णौ कर्मत्वात्तमिति द्वितीया । अमूमुहत्, हेतुमण्णिचङ्युपधाह्रस्वादि ॥

अवोचत ततस्तन्वीं निषधानामधीश्वरः ।
तदपाङ्गचलत्तारझलत्कारवशीकृतः ॥ १७ ॥

अवोचतेति ॥ ततस्तस्मात्तादृशकटाक्षविलोकनानन्तरं निषधानामधीश्वरस्तन्वीं वक्ष्यमाणमवोचत । किंभूतः—तारशब्दस्य कनीनिकावाचित्वे नपुंसकलिङ्गत्वात्तस्या अपाङ्गे चलत्तारस्य कनीनिकायाः किरणोल्लासलक्षणदर्शनचमत्काररूपो झलत्कारस्तेन वशीकृतः । द्वन्द्वो— चलन्ती तरला तारा यत्र तादृशश्चासौ झलत्कारश्च ततः पूर्वेण षष्ठीसमासः । झलत्कार इति देश्यपदम् ॥

कटाक्षकपटारब्धदूरलङ्घनरंहसा ।
दृशा भीत्या निवृत्तं ते कर्णकूपं निरूप्य किम् ॥ १८ ॥

कटाक्षेति ॥ हे प्रिये, कटाक्षकपटेन नेत्रप्रान्तवक्रविलोकनव्याजेनारब्धं कर्तुं प्रक्रान्तं दूरलङ्घनेऽतिदूरदेशातिक्रमणे रंहो वेगो यया एतादृश्या ते दृशा कर्णरूपं कूपमग्रे निरूप्य विलोक्य भीत्या पुनर्निवृत्तं परावृत्तं किमित्युत्प्रेक्षा । दूरं गन्तुमुपक्रान्ता हि महान्तं कूपं पुरो दृष्ट्वा भयेन शीघ्रं परावर्तन्त एव । दृशेत्यनेन स्त्रीत्वं युज्यते । स्त्रिया हि भीतिर्युक्ता ॥

सरोषापि सरोजाक्षि त्वमुदेपि मुदे मम ।
तपापि शतपत्रस्य सौरभायैव सौरभा ॥ १९ ॥

सरोषेति ॥ हे सरोजाक्षि, सरोषापि त्वं मम मुदे हर्षायैवोदेषि भवसि । [illegible] लिङ्गनाद्यर्थं दुरापत्वेन स्पृहणीयतरत्वात्सौन्दर्यातिशयाच्चेत्यर्थः । यस्मात्तापयुक्तापि सूरः सूर्यस्तत्संबन्धिनी सौरी भा दीप्तिः शतपत्रस्य कमलस्य विभासपूर्वं सौरभायैव भवति न तु म्लान्यै । सौरभेत्यत्र 'पुंवत्कर्मधारय-' इति पुंवत् ॥

छेत्तुमिन्दौ भवद्वक्त्रबिम्बविभ्रमविभ्रमम् ।
शङ्के शशाङ्कमानङ्क भिन्नभिन्नविधिर्विधिः ॥ २० ॥

छेत्तुमिति ॥ हे भैमि, विधिर्ब्रह्मा पूर्वं निष्कलङ्केऽपीन्दौ विषयेऽतिसादृश्यात्[illegible] भवन्मुखचन्द्रमा भवत्या वा वक्त्रबिम्बस्य विभ्रमो विशिष्य भ्रान्तिस्तस्य विभ्रमं विलासं छेत्तुं शशाङ्कमानङ्क शशरूपेण कलङ्केन चिह्नितवानित्यहं शङ्के । यतो भिन्नभिन्नो भिन्नप्रकारः किंचिद्भेदयुक्तो विधिर्घटपटादिविधानं यस्य तादृशः । तस्माद्भवन्मुखचन्द्रमसोरत्यन्तसादृश्यभ्रान्तिनिरासाय चन्द्रं कलङ्केन चिह्नितवानित्यर्थः । इत्यहं मन्ये । निष्कलङ्कं भवन्मुखं चन्द्रादप्यधिकमिति भावः । आनङ्क, चौरादिकाल्लक्षणार्थादङ्केर्लिट्, भिन्नभिन्नेति प्रकारे द्विरुक्तिः ॥

---

१ 'दृशान्वेषितेति पाठे—श्रोत्रकूपमन्वेष्टुं प्रलापस्य भूयो व्यावृत्तिं किमित्यर्थः । अलिन्दाद्वे [illegible] क्रान्तित्वेन भयं व्यञ्जन्' इति सुखावबोधा । २ 'दृशान्तारंकारः' इति जीवातुः ।

तान्रपर्णीतटोत्पन्नैर्मौक्तिकैरिन्दुकुक्षिजैः ।
वद्धस्पर्धतरा वर्णाः प्रसन्नाः स्वादवस्तव ॥ २१ ॥

ताम्रपर्णीति ॥ तव वर्णास्त्वद्वदननिर्गता वर्णाः प्रसन्नाः स्पष्टतरा निर्दोषत्वादुज्ज्वलाश्च, तथा—स्वादवो मधुराः सुश्राव्याः क्रमेण मलयनिर्गतदक्षिणसमुद्रगामिताम्रपर्ण्याख्यनद्यास्तटे उत्पन्नैः, तथा—अमृतमयस्येन्दोः कुक्षौ जातैर्मौक्तिकैः सह बद्धा धृता स्पर्धा साहश्यदर्पो यैस्तेऽतिशयेन बद्धस्पर्धा बद्धस्पर्धतराः । 'इक्षुकुक्षिजैः' इति पाठे—इक्षुकुक्षेर्जातैर्मौक्तिकैः । ताम्रपर्णीजातस्य मौक्तिकस्य सौन्दर्यम्, न माधुर्यम् । इक्षुकुक्षौ यदि मौक्तिकानि जायेरन्, तदा माधुर्यातिशयात्तैः सह बद्धस्पर्धतरा इत्यभूतोपमा । इक्षुर्वंशविशेषः, तत्रोत्पन्नस्य मौक्तिकस्य वैद्यकनिघण्टौ शैत्यं माधुर्यं पित्तोपशमकत्वं चोक्तम् । वंशान्मौक्तिकोत्पत्तिः प्रसिद्धा पूर्वमुक्ता च ॥

त्वद्गिरः क्षीरपाथोधेः सुधयैव सहोत्थिताः ।
अद्ययावदहो धावदुग्धलेपलवस्मिताः ॥ २२ ॥

त्वदिति ॥ तव गिरः क्षीरपाथोधेः क्षीरसमुद्रात्सकाशात्सुधयैव सहोत्थिता उत्पन्नाः । यस्माद्—अद्ययावदद्यतनदिनपर्यन्तमद्याप्यहो चित्रं धावत्प्रसरद्दुग्धलेशलवरूपं स्मितं हास्यं यासु तादृशः । अमृतेन सह निर्गतत्वादमृतवन्मधुराः, क्षीरसमुद्राच्च निर्गतत्वात्स्मित-व्याजेन तद्दुग्धलेपलेश एवाद्याप्यनुवर्तते । तद्वद्धवलस्मिताश्चेति भावः । धावत्, 'धावु गतिशुद्ध्योः' इत्यस्माच्छता ॥

पूर्वपर्वतमाश्लिष्टचन्द्रिकश्चन्द्रमा इव ।
अलंचक्रे स पर्यङ्कमङ्कसंक्रमितप्रियः ॥ २३ ॥

पूर्वेति ॥ स नलः पर्यङ्कमलंचक्रे । किंभूतः—अङ्के संक्रमिता समारोपिता प्रिया येन सः । कः कमिव—आश्लिष्टा चन्द्रिका कौमुदी येन स चन्द्रमाः पूर्वपर्वतमिव ॥

प्रावृडारम्भपाम्भोदः स्निग्धां द्यामिव स प्रियाम् ।
परिरभ्य चिरायास विश्लेषायासमुन्नुदे ॥ २४ ॥

प्रावृडिति ॥ स प्रियां भैमीं प्रातःस्नानादिनित्यकर्मानुष्ठानवशेन तावत्कालमविद्यमानस्यापि तस्या वा वियोगस्तज्जनितो य आयासः खेदस्तस्योपनोदं नुनुदे निरस्तवान् परिरभ्य चिरायास तस्यै ददुनेत्र वा । कः कामिव—प्रावृडारम्भे वर्षारम्भेऽम्भोदो मेघो द्यामिव । (किंभूतो मेघः—) स्निग्धः सजलत्वादरूक्षः श्यामश्च । मेघो यथा द्यां [illegible] ग्रीष्मसमये [illegible] सदा गगने [illegible] पङ्क्तिभिः [illegible] संबन्धस्तज्जनितदुःखपरिहाराय [illegible] [illegible] चिरं [illegible] । किंभूताम् [illegible]— स्निग्धोऽतिप्रीतिमान् । आस, 'असगतिदीप्त्यादानेषु' ॥

चुचुम्बास्यमसौ तस्या रसमग्नः स्मितस्थितम् ।
नवोन्मिषितकान्ताब्जं मधुलम्पाकुलितमिवेन्दुः ॥ २५ ॥

चुचुम्बेति ॥ असौ रसमग्नः [illegible] [illegible] तस्याः [illegible]

१ [illegible]

श्रितस्मितमास्यं चुचुम्ब । कः किमिव—मधुनध्येऽनुविम्बितः प्रतिफलितः, अत एव र मग्नो नभोमणिः सूर्योऽम्भोजमिव । तदपि श्रितविकासम् । सूर्यपद्मयोर्दूरदेशत्वात्कथं चुम्बनमिति प्रश्ने मधुमध्यानुविम्बित इत्युत्तरम् ॥

अथाहूय कलां नाम पाणिना स प्रियासखीम् ।
पुरस्ताद्वेशितामूचे कर्तुं नर्मणि साक्षिणीम् ॥ २६ ॥

अथेति ॥ अथ चुम्बनानन्तरं स पाणिना हस्तसंज्ञया कलां नाम प्रियायाः सखीमाहूय ऊचे । किंभूताम्—नर्मण्यन्योन्यरहःक्रीडाहासे साक्षिणीं कर्तुं पुरस्तादग्रे वेशितां स्थापिताम् । वेशिताम्, ण्यन्तान्निष्ठा ॥

कस्मादस्माकमब्जास्य वयस्या दयते न ते ।
आसक्ता भवतीष्वन्यं मन्ये न बहु मन्यते ॥ २७ ॥

कस्मादिति ॥ हे कले, अब्जास्या पद्ममुखी ते वयस्या मैत्री कस्मात्कारणादस्माकं न दयते कृपां न करोति, कथय पृच्छ वेति शेषः । स्वयमेव कारणमाचष्टे—भवतीषु नवःदर्शीषु सखीषु मध्य आसक्ता सामस्त्येनानुरक्ता सती हितकारिणमप्यन्यं नाहं बहु यथा तथा नितरां न मन्यत इत्यहं मन्ये । तेन मयि कृपां न करोतीत्यर्थः । यत्राव-रमानं मम हस्तेन स्प्रष्टुमपि नाददिति तां प्रति सूच्यते । भवदासक्तेरस्माकमियं दयाऽनया कृतेति कलां प्रत्यपि सोल्लुण्ठम् । अथ च—नवपरिचयेऽप्यस्माकं दयते, चिरपरिचयेऽपि ते तुभ्यं न दयते । कुतः—भवतीषु नासक्ता सती अन्यं मल्लक्षणं बहु मन्यते यत इत्युत्तरानुरोधेन व्याख्येयम् । अस्माकम्, 'अधीगर्थ-' इति षष्ठी, 'अस्मदो द्वयोश्च' इत्येकत्वेऽपि बहुवचनम् ॥

अन्वग्राहि मया प्रेयान्निशि स्वोपनयादिति ।
न विप्रलभते तावदालीरियमलीकवाक् ॥ २८ ॥

अन्विति ॥ अलीकाऽसत्या वागस्याः सेयं इत्युक्त्वाति विश्वासस्थानभूता भवादृशीरालीः सखीस्तावन्न विप्रलभते प्रतारयति । इति किम्—मया निशि आलिङ्गनचुम्बनादिना स्वात्मशरीरस्योपनयाद्दानादानुकूल्येन रमणान्मया प्रेयान्नलोऽन्वकम्पीति (विप्रलभते प्रतारयति) । मादृशान्यपि वञ्चयति, तथापि भवादृशीः कथं वञ्चयेदिति तावच्छब्दार्थः । अलीकवाङ्ग प्रतारयतीति विपरीतलक्षणया सोल्लुण्ठभाषणाद्विप्रलभत एवेत्यर्थः । आलीस्तावन्न विप्रलभते, अपि तु ता अपि वञ्चयत्येव, अस्मादृशां तु का कथेति काक्वा । तस्मादियमस्मान्न दयत इत्येव तथ्यं जानीत, सर्वथा नास्या वचसि भवतीभिर्न विश्वसनीयमिति भावः । एतेन नेदोषायप्रयोगः कृत इति सूचितम् ॥

पुनरप्यलीकतामेवाह—

आह सैषा नलादन्यं न जुषे मनसेति यत् ।
यौवनानुमितेनास्यास्तन्मृषाभून्मनोभुवा ॥ २९ ॥

आहेति ॥ एषा भवादृशीनां पुर इति यदाह स्म । इति किम्—अहं नलादन्यं मनसापि न जुषे भज इति । तदेतस्याः प्रतिज्ञावाक्यं यौवने प्रस्तुते तदनुमितेन मनोभु

तेन मन एव भूः स्थानं यस्य तेन कामेन कृत्वा तृषा मिथ्याभूत् । मदन्यस्य कामस्य मनसि धारणादसत्यप्रतिज्ञेयमिति निन्दा । वस्तुतस्तु तादृग्जन्मारभ्य मय्येवानुरक्तेति स्तुतिरेवास्याः कृता । व्याजस्तुतिः ॥

आस्यसौन्दर्यमेतस्याः शृणुमो यदि भाषसे ।
तद्धि लज्जानमन्मौलेः परोक्षमधुनापि नः ॥ ३० ॥

आस्येति ॥ हे कले, त्वमेतस्या आस्यसौन्दर्यं चिरपरिशीलनज्ञाताशेषविशेषत्वाद्यदि भाषसे तर्हि वयं शृणुमः । आदर्शे हस्तकङ्कणदर्शनवदसंगतमेतदित्याशङ्क्य हेतुमाह—हि यस्मात्तदेतदास्यसौन्दर्यमधुनापि विवाहमारभ्याद्यतनक्षणपर्यन्तं नोऽस्माकं परोक्षमप्रत्यक्षम् । नेत्रविषयो न जातमित्यर्थः । यतः—लज्जया नमन्मौलेर्नम्रमस्तकायाः । नम्रमौलित्वादेतन्मुखं कदापि मया न दृष्टम् । तस्मादेतदास्यसौन्दर्यं त्वं कथयेत्यर्थः । एतस्या मुखमपि न दृष्टं संभोगकथा तु दूरापास्ता । तस्मादेतदीयवचने सर्वथा न विश्वसनीयमिति भावः । अधुनेत्यस्य वर्तमानार्थत्वात्परोक्षस्य भूतार्थत्वाद्वर्तमानस्य भूतत्वविरोधात्परोक्षाधुनाशब्दयोरर्थान्तरपरिग्रहाद्विरोधाभासोऽपि ॥

पूर्णयैव द्विलोचन्या सैषालीरवलोकते ।
द्राग्दृगन्ताणुना मां तु मन्तुमन्तमिवेक्षते ॥ ३१ ॥

पूर्णयेति ॥ सैषा आलीर्निर्व्याजसखीः पूर्णयैव द्विलोचन्या नेत्रद्वयेनावलोकते, मां तु पुनः मन्तुमन्तमिव सापराधमिव एकस्या अपि दृशोऽन्तः प्रान्तदेशस्तस्याप्यणुर्लेशस्तेनापि द्राक् झटिति क्षणमात्रमेवेक्षते । पूर्णद्विलोचन्या चिरकालविलोकनस्य का कथेत्यर्थः । सापराधोऽपि सरोषया दृशा विलोक्यते । प्रियया च प्रेमदृगन्तेनैव विलोक्यते । सख्यादिबान्धवजनस्तु सरलैः सकलैर्नेत्रैः । द्विलोचन्या, समाहारद्विगौ 'द्विगोः' इति ङीप् ।

न[1] लोकते यथेदानीं मामियं तेन कल्पये ।
योऽहं दूत्येऽनया दृष्टः सोऽपि व्यस्मारिषीदृशा ॥ ३२ ॥

नेति ॥ हे सखि, यथा येन प्रकारेण । यत इति यावत् । यस्मादिदानीमियं मां न लोकते तेन हेतुना योऽहं दूत्यावसरेऽनया दृष्टोऽप्यहमीदृशा सर्वथानवलोकिन्याऽनयैव व्यस्मारिषि विस्मृत इति कल्पये संभावयामि । संप्रति विज्ञाताशेषविशेषं मां द्रक्ष्यतीति तु कथा दूरे । किंतु सर्वथा नावलोकयत्यपीत्यर्थः । न एवायमिति प्रत्यभिज्ञानं यद्यभविष्यत्, तर्हि तादृगेव व्यलोकयिष्यदपि, नत्वेवं तस्माद्विस्मृत एवाहमनयेति कल्पना युक्तेति सोल्लुण्ठम् । पूर्ववद्वक्रोक्तिः । कल्पये चिन्तार्थाच्चौरादिकात्कृपेः 'चिन्तव' इति तङ् । व्यस्मारिषि, स्मरतेः कर्मणि लुङुत्तमैकवचन इटि 'स्यसिच्सीयुट्—' इत्यादिना चिण्वदिडागमे तस्य चिण्वद्भावे 'अचोऽञ्णिति' इति वृद्धिः ॥

रागं दर्शयते सैषा वयस्याः सूनृतामृतैः ।
मम त्वमिति वक्तुं मां मौनिनी मानिनी पुनः ॥ ३३ ॥

---

[1] 'नालोकते' इति पाठो जीवातुसुखावबोधासंमतः ।

नै० — ० ६६

वैमुख्यं पराङ्मुखत्वम् । अथ च विरुद्धमुखत्वं जानीम एव । अनाचारशीलो हि कस्मैचि-दपि स्वमुखं न दर्शयति मलिनमुखश्च भवति । एतयोरप्युक्तप्रकारेण पराङ्मुखत्वं चूचुकयोः श्यामत्वान्मलिनमुखत्वं जानीम इति सोल्लुण्ठम् । अथ च—एतस्या हृदयं कठिनं ज्ञात्वा 'आर्जवं हि कुटिलेषु न नीतिः' इति न्यायेन निष्ठुरत्वमङ्गीकुर्वतोः । यत्नादुचितं वृत्तं स्थितिर्ययोः । अथ च—युक्ताचारयोः पराङ्मुखत्वं प्रतीम एव । हृदयस्योपर्यूर्ध्वमुखेन वर्तमानत्वाद्धृदयं प्रति कुचौ सदा पराङ्मुखावेवेत्यर्थः । युक्ताचारो हि कठिनहृदयं प्रति नि-र्दयो भूत्वा तस्मात्पराङ्मुख एव भवति, तं न पश्यति । अथच—ईदृक्सुन्दरतरं स्थानान्तर-परित्यागेनास्या हृदयं प्राप्य कठिनतरत्वं गुणं भजतोः, तथा—पीवरत्वादन्योन्यसंश्लिष्टयो-र्वर्तुलयोश्च विगतमुखत्वं निम्नचूचुकत्वं गौरत्वविरुद्धश्यामवत्वं च जानीम एव । अथ च—ईदृगतिकोमलमेतदीयं हृदयं ज्ञात्वा प्राप्य वा मूढतामनुभवतोरालिङ्गनादिना नयि वि-षये सकृपयोः, अत एव युक्ताचारयोर्विशिष्टमत्युन्नतं मुखमग्रं ययोस्तादृक्त्वं प्रसन्नमुखं च जानीम एवेति । इत्यादि ज्ञातव्यम् ॥

इति मुद्रितकण्ठेऽस्मिन्सोल्लुण्ठमभिधाय ताम् ।
दमयन्तीमुखाधीतस्मितयाऽसौ तया जगे ॥ २७ ॥

इतीति ॥ अस्मिन्नले इत्युक्तप्रकारेण सोल्लुण्ठं वक्रोक्त्यादिसहितं यथा तथा तां भैमीं कलां वाऽभिधायोक्त्वा मुद्रितकण्ठे मौनिनि सति दमयन्तीमुखादधीतं स्मितं यया नलवक्रो-क्तिमाकर्ण्य हसद्भैमीमुखं दृष्ट्वा संजातहासया, भैमीमुखेनाधीतं स्मितं यस्याः सकाशात् । नलीयसोत्प्रासवचनात्स्वयं हसन्तीं भैमीमपि हासयति स्मेत्यर्थः । तादृश्या वा तया कलया असौ नलो जगेऽभाणि । 'सोल्लुण्ठनं तु सोत्प्रासम्' इत्यमरः । उल्लुण्ठनमुल्लुण्ठः, भावे घञ् । तेन सह यथा स्यादिति क्रियाविशेषणम् । मुखाधीतेति, 'पञ्चमी' इति योगविभागात्स-मासः । '(स्मितया)ऽस्मै तया' इति पाठे—'क्रियया यमभिप्रैति–' इति संप्रदानत्वम् ॥

'कलादस्माकम्—' (२०।२७) इत्यस्योत्तरमाह—

भावितेयं त्वया साधु नवरागा खलु त्वयि ।
चिरंतनानुरागार्हं वर्तते नः सखीः प्रति ॥ २८ ॥

भावितेति ॥ हे राजन्, त्वयेयं साधु सम्यग्भाविता तर्किता । या त्वयि विषये खलु निश्चितं नवरागा नवप्रीतिर्वर्तते । नवोढत्वान्नवरागेण सलज्जा वर्तत इत्यर्थः । त्वयि नवरागा सती नः सखीः प्रति चिरंतनो योऽनुरागस्तस्यार्हं योग्यं यथा तथा वर्तते । बहुकालीनस्नेह-वशान्निःशङ्कं वर्तत इत्यर्थः । त्वयि नवरागा सती नः प्रति चिरंतनानुरागार्हमतिप्रेमार्हमिति (यथा तथा) वर्तते, न तु त्वयीत्येकवाक्यता वा । तत्सान्निध्यादस्माकमनुरागेण, नवोढेषु तु प्रीतिर्भवतीति तव बुद्धिरित्यर्थः । अथ च—त्वयेयं साधु तर्किता । साध्वीति काकु-विपरीतलक्षणया वा साध्वेव विपरीतमेव तर्कितेत्यर्थः । यद्वाऽसाधु एवैतत्साधु तर्किता । यतु यस्मादियं नूतनानुरागा प्रतिदिनमीदृशीति वर्तते, अस्मासु तु चिरंतनानुरागं यथा तथा-तिशिथिलप्रीतिर्वर्तते, न तु त्वयि । 'अविचारितरमणीयम्' इति न्यायादित्यर्थः । यद्वा नवं

दयते तुभ्यं न दयते इति वदता त्वया सत्यगुक्तमित्यर्थः । यद्वा—सम्यग्भाविता भावं प्रापिता । द्रावितेत्यर्थः । यस्मात्त्वयि नवरागत्वाद्दृढप्रीतिः सती अस्मान्प्रति पुराणप्रीतिसदृशमतिशिथिलप्रीति (यथा तथा) वर्तते, नतु त्वयि । तथा सम्यग्भाविता यथा त्वय्येव दृढप्रीतिः सत्यस्मान्सर्वथा न गणयत्यपीत्यर्थः । तस्मादस्मान्तृथैवोपहसथेति भावः । इति सोल्लुण्ठम् ॥

'अन्वग्राहि—' (२०।२८) इत्यादेरुत्तरमाह—

स्मरशास्त्रविदा सेयं नवोढा नस्त्वया सखी ।
कथं संभुज्यते बाला कथमस्मासु भाषताम् ॥ ३९ ॥

स्मरेति ॥ 'बालां बलान्न भुञ्जीत विरागोत्पत्तिशङ्कया । भुञ्जीत चेत्रपामीतिलाजनक्रमसंगताम् ॥' इत्यादिस्मरशास्त्रविदा कामशास्त्ररहस्यज्ञेन त्वया नवोढा नवपरिणीता सेयं बाला नोऽस्माकं सखी कथं संभुज्यते । अपि तु विरागोत्पत्तिभिया बलादुपमर्यं न कथंचिद्रम्यते, अत एव त्वया संभुक्तत्वादेवास्मासु कथं केन प्रकारेण भाषतां कथयतु, अपि तु—त्वत्कृतरतत्वादेव किंचिदपि न कथयतीति स्पष्टोऽर्थः । अथ चैवं वक्रोक्तिः । कामशास्त्रज्ञेन त्वयेयं नवोढा बाला कथं किंवा संभुज्यते, अपितु सामस्त्येन भोगो न क्रियत एव, किंतु स्मरशास्त्रवित्त्वात्स्वल्पमेव भुक्त्वा मुच्यत इत्यर्थः । अत एवास्मासु किं भाषताम्, अपितु—अतिपीडनाभावान्न किंचिदप्यस्मासु भाषते । या हि बाला सुरते नितरां पीड्यते, सैव सखीषु ममातिपीडा भवति मया सोढुं न शक्यते इत्यादि वदति, नतु सामि भुक्तमुक्तेत्यर्थः । अथ च—कामशास्त्रज्ञेन त्वया बालापीयमेतन्मनोनुकूलमेव भुक्ता, अतः कथमस्मासु भाषताम्, अपितु न कथंचिद्भाषते । बाला हि कामशास्त्रकौशलवशाद्यथानुरागं भुक्ता यद्यपि भोगं सहते, तथाप्यतीव लज्जालुत्वात्संभोगरहस्यं कस्याप्यग्रे न कथयतीत्यर्थः । तस्मादुभावपि वञ्चकौ युवामस्मान्वञ्चयथ इति भावः । अथ च—सामर्थ्याच्छास्त्रविदा कामशास्त्रज्ञेन त्वया नवोढेयं बाला केन प्रकारेण संभुज्यते स्मर चिन्तय । तं प्रकारमित्यर्थात् । रात्रौ कृतमेव संभोगमकृतमेव कथयति । संभोगः प्रायेण विस्मृतः, अतः स्मरेति काकूक्तिः । कथं चेयमस्मासु भाषताम्, अपितु नास्मासु कथयतीत्यर्थः । अथ च विपरीतलक्षणया त्वयेयं भुक्ता, अनया रहस्यमस्मासु कथितम्, किमिति नः प्रतारयसीत्यर्थः । अथ च—त्वयेयं बाला परिणीता कथं समन्ताद्भुज्यते, अपि त्वनुचितमेतत् विदुषापि त्वया क्रियते अस्मासु कथं नाभाषत एवेत्यादि ज्ञातव्यम् ॥

'आलीरियमलीकवाक्—' (२०।२८) इत्यंशस्य 'आह स—' (२०।२९) इत्यत्र 'तन्मृषाभूत्—' (२०।२९) इत्यंशस्य चोत्तरमाह—

नासत्यवदनं देव त्वां गायन्ति जगन्ति यम् ।
प्रिया तस्य सरूपा स्यादन्यथालपना न ते ॥ ४० ॥

नासत्येति ॥ हे देव राजन्, जगन्ति त्रयोऽपि लोका यं त्वामसत्यं वदनं भाषणं यस्य तादृशं न गायन्ति, किंतु सत्यवादिनमेव वदन्ति । यद्वा—न असत्यं नासत्यं सत्यमेव भाषणं

दस्य तम्। तस्य तादृशस्य सत्यभाषिणस्ते तव प्रिया अन्यथा विपरीतार्थमलीकमालपनं भाषणं यस्यास्तादृश्यसत्यवादिनी सरूपा तुल्यस्वभावा योग्या न स्यात् किंतु सत्यवादिन्येव प्रिया तव योग्या स्यादित्यर्थः। तस्मादस्यास्तु यदनया कथितं तत्सत्यमेवेति भावः। अथ च—वक्रोक्तिः। त्रयो लोका यं त्वामसत्यं भाषणं यस्य तं सदानृतवादिनं त्वां वदन्ति तस्यानृतवादिनस्तवान्यथालपनाऽसत्यवादिनी सदृशी योग्या न स्यात् किंत्वसत्यवादिन्येवो-चिता। कृतमपि संभोगमहं न कृतवानिति वदसि, तथैयमपि रात्रौ कृतमपि संभोगं नेति वदति। 'योग्यं योग्येन संबध्यते' इति न्यायो युक्तः। इति द्वावपि प्रति सोल्लुण्ठम्। भो राजन्, त्रयोऽपि लोका नासत्यवदश्विनीकुमारवन्मुखं यस्य तमतिसुन्दरमुखं वदन्ति तस्य तव प्रियाऽन्यथा कुरूपं लपनं मुखं यस्यास्तादृशी तुल्यरूपा न स्यात्, किंतु सुन्दरतरवदनैव योग्या स्यात्। तथा च त्वन्मुखवदेवैतस्या अपि मुखं सुन्दरमिति जानीहीति भावः॥

'आह स्म–' (२०।२९) इत्यादिः श्लोकत्रयेणोत्तरमाह—

मनोभूरस्ति चित्तेऽस्याः किंतु देव त्वमेव सः।
त्वदवस्थितिभूर्यस्मान्मनः सख्या दिवानिशम्॥ ४१॥

मनोभूरिति॥ अस्याश्चित्ते मनोभूः कामोऽस्ति सत्यम्। हे देव, किंतु त्वमेव स मनोभूः। न तु त्वदन्यः कश्चिदित्यर्थः। कुतः—यस्मात्कारणात् सख्या भैम्या मनो दिवानिशं तवावस्थितेर्भूः स्थानम्। कामपरत्वे मनसि भवति, नलपरत्वे मनो भूः स्थानं यस्य सोऽस्याश्चेतसि सुन्दरतरो मनोभूस्त्वमेव वर्तसे नान्य इति॥

यदहमेव कामस्तर्हि मद्विषयेऽस्याः कामो नास्तीति मनोभावान्तरस्थलापह्नवमिदमित्याशङ्क्या-न्येन प्रकारान्तरेण तस्यैवोत्तरमाह—

सततेऽथ सखीचित्ते प्रतिच्छाया स मन्मथः।
त्वयास्य समरूपत्वमतनोरन्यथा कथम्॥ ४२॥

सत इति॥ अथाथवा स मन्मथो(थः) सख्या भैम्याश्चित्ते सततं वर्तमानस्य तव प्रति-च्छाया प्रतिबिम्ब एव, न तु स्वतन्त्रो बिम्बरूपः। प्रतिबिम्बश्च स्वच्छ एव मुकुरादौ भव-तीति भैमीमनसः स्वच्छतरत्वं द्योतितम्। कुत एतदित्याशङ्क्यान्यथानुपपत्तिं प्रमाणयति—अन्यथा यदि प्रतिच्छाया न भवेत्, तर्ह्यतनोरशरीरस्यास्य कामस्य त्वया सह समरूपत्वं कथं स्यात्, अपितु न कथंचित्। एतेनाशरीरेण सशरीरस्य त्वया सह सारूप्यं (न) युज्यते। अथ स्वतनुः तस्मादस्य प्रतिबिम्बस्य एव त्वत्सारूप्यं युज्यते प्रतिबिम्बेन स्वशरीरमपि तुल्यरूपं भवति तस्मात्प्रतिबिम्बस्य बिम्बं विना स्वानुरूपत्वाज्जनयति तव शरीरसारू-प्यम्। त्वत्प्रतिबिम्बभूतं त्वदेकविषयं कामं मन्मथीभवन्तमेव धारयतीत्यर्थः। बिम्बस्याशरीर-त्वेन सारूप्यानुपपत्तेः प्रतिबिम्ब एवायमित्यनुमानम्॥

कः स्मरः कस्त्वमत्रेति संदेहे शाम्यतोमयोः।
त्वन्नेपथ्यितया सेयं धत्ते चित्तेऽथवा युवाम्॥ ४३॥

क इति॥ अनयोर्मध्ये द्वयोर्विलोक्यमानयोः [illegible] स्मरः कः, त्वं नलश्च कः, इति [illegible] सति [illegible] संदेहे सति वा [illegible]

लापतया सेयं भैमी युवां द्वावपि स्मरनलौ चित्ते धत्ते । सर्वो ह्यतिसदृशयोः काचमण्यादिपदार्थयोः संदेहे एकतरपरित्यागे मणिरेव परित्यक्तः स्यात्, तन्मा भूदिति मण्यर्थित्वेनैव यात्रिणीयं काचमपि न मुञ्चति, तथा तुल्यशोभत्वेन निश्चेतुमशक्यत्वात्स्मरपरित्यागे भवानेव परित्यक्तः स्यात् तन्मा भूदिति त्वय्येव साभिलाषतया द्वावपि न मुञ्चतीत्यर्थः । त्वदर्थमेव कामं धारयति, न तु कामार्थं त्वामिति भावः । त्वयेति पाठे—त्वया हेतुना यार्थिता तयेत्यर्थः न ॥

'पूर्णया–' (२०।३१) इत्यादेरुत्तरमाह—

त्वयि न्यस्तस्य चित्तस्य दुराकर्षत्वदर्शनात् ।
शङ्कया पङ्कजाक्षी त्वां दृगंशेन स्पृशत्यसौ ॥ ४४ ॥

त्वयीति ॥ पङ्कजाक्षी असौ त्वयि न्यस्तचित्तस्य दुराकर्षत्वस्याप्रत्यावर्तमानत्वस्य दर्शनाद्धेतोः शङ्कया चित्तवत् पुनरप्रत्यावृत्तिभिया त्वां दृगंशेन नेत्रप्रान्तेन स्पृशति पश्यति, नतु पूर्णया द्विलोचन्या । त्वयि न्यस्तस्येति अनुरागातिशयः, पङ्कजाक्षीति च दृशोरतिसौन्दर्यं सूचितम् । सुन्दरस्य वस्तुनः पुनरप्रत्यावृत्तौ महद्भयमिति च सूचितम् । शङ्कयेवेति प्रतीयमानोत्प्रेक्षा ॥

'नालोकते–' (२०।३२) इत्यादेरुत्तरमाह—

विलोकनात्प्रभृत्यस्या लग्न एवासि चक्षुषोः ।
स्वेनालोकय शङ्का चेत्प्रत्ययः परवाचि कः ॥ ४५ ॥

विलोकनादिति ॥ विलोकनात्प्रभृति अनया त्वं यदा दृष्टोऽसि तदारभ्य त्वमस्याश्चक्षुषोः संलग्न एवासि । त्वामेवेयं सदा पश्यति नान्यत्किंचिदपीत्यस्यास्त्वयि महती नेत्रप्रीतिरित्यर्थः । एवं सति मद्वचने इयं मिथ्या वदतीति शङ्काऽविश्वासश्चेत्, तर्हि एतदीयचक्षुषोर्मध्येऽहं वर्ते नवेति निश्चेतुं स्वेनात्मनैवालोकय । एतदीयचक्षुषी पश्य, अहमत्र वर्ते इत्यनुमानेनैव निर्धारयिष्यसीत्यर्थः । स्वेनालोकने हेतुमाह—परवाचि को नाम प्रत्ययो विश्वासः, अपि त्वनुभवयोग्येऽर्थे परवचनमप्रमाणमेवेत्यर्थः । दृश्यकनीनिकायां संमुखं वर्तुलरूपं प्रतिबिम्बं भवत्येवेति हृदोक्तिः । अथ च—नेत्रलग्नत्वादेव नेत्रकनीनिकादिनुगताभ्यामवलोकित इति त्वया सत्यमेवोक्तमित्यर्थः । अथ चेत् शङ्का तर्हि स्वनेत्राभ्यामेव [illegible] स्वेनालोक्य तदा ज्ञास्यसि परवाचि कः प्रत्ययः । विलोकनात्, 'आरम्भार्थयोगेऽपि' इति पञ्चमी ॥

'एनं दर्शने–' (२०।३३) इत्यादेरुत्तरमाह—

परीरम्भेऽनयारभ्य कुचकुङ्कुमसंक्रमम् ।
त्वयि मे हृदयस्यैव राग इत्युदितैव वाक् ॥ ४६ ॥

परीति ॥ अनया परीरम्भे गाढालिङ्गने क्रियमाणे तव हृदये कुचकुङ्कुमस्य संक्रमणम् [illegible] । [illegible] दर्शनेन मे हृदयस्य मनसः । अथ च—वक्षसः । [illegible] । अथ च—रक्तिमा । [illegible] वागुदितैव । [illegible] [illegible] गाढालिङ्गनं अनुरागं विना न घटते इति गाढालिङ्गने कुचकुङ्कुम[illegible]

भवेत्, दिवा तु नखक्षतादिसंभोगचिह्नदर्शनभिया वस्त्रावृतत्वात्कथं नाम चूचुकाग्रस्यापि दर्शनं स्यात्, न कथंचिदित्यर्थः। दोषया रात्र्या त्यक्तौ रात्रेर्गतत्वाद्दिनप्रकाशसंबद्धौ, अत एव ह्रिया वस्त्रावृतत्वाद्दिवा वैमुख्यमेव तयोर्युक्तमित्यर्थ इति वा। बहिःस्थितं त्वां प्रति वैमुख्यासंभवाद्धृदयस्थितस्य तव स्वमुखं कथं दर्शयतामिति ह्रिया भैम्याः पराङ्मुखत्वाद्वा कुचौ स्वमुखं नलस्य न दर्शयतः। स्वाश्रयभूतस्य भैमीहृदयस्य वा कुचौ स्वमुखं न दर्शयतः। नहि कुचौ हृदयस्य संमुखौ भवतः। अन्योऽपि दोषोज्झितो निरपराधो लब्धप्रतिष्ठो धनादिग्रहणेन पीडितो नासादिकर्तनेन कृतव्रणो लज्जितः कस्याप्यग्रे मुखं न दर्शयति। व्रणितौ, तारकादित्वादितच्॥

इत्यसौ कलया सूक्तैः सिक्तः पीयूषवर्षिभिः।
ईदृगेवेति पप्रच्छ प्रियामुन्नमिताननाम्॥ ५०॥

इतीति॥ कलया पीयूषवर्षिभिरमृतं क्षरद्भिरतिमधुरैः सूक्तैः शोभनवक्रोक्त्यादिरूपैर्वाक्यैः सिक्तः संजातगाढप्रेमभरोऽसौ नलः उन्नमितं पाणिना चिबुकं धृत्वोर्ध्वीकृतमाननं यस्यास्तां प्रियां भैमिं, इदं कलावचनमीदृगेवमेवेति सत्यमिति पप्रच्छ। उन्नमितेति 'ज्वलह्वल-' इति मित्त्वपक्षे ह्रस्वः॥

बभौ च प्रेयसीवक्त्रं पत्युरुन्नमयन्करः।
चिरेण लब्धसंधानमरविन्दमिवेन्दुना॥ ५१॥

बभाविति॥ पत्युः करोऽरविन्दमिव बभौ च। किंभूतः—प्रेयसीवक्त्रमुन्नमयन्। किंभूतमरविन्दम्—चिरेण कालेन वैरं विस्मृत्य निवृत्तवैरतया इन्दुना सह लब्धं संधानं येन। अभूतोपमा। चन्द्रकमलयोः सदा वैरम्॥

ह्रीणा च स्मयमाना च नमयन्ती पुनर्मुखम्।
दमयन्ती मुदे पत्युरुच्चैरप्यभवत्तदा॥ ५२॥

ह्रीणेति॥ नलोक्तेः कलोक्तवक्रोक्तिप्रत्युक्तिपरिहासेन ह्रीणा च स्मयमाना च, अत एव लज्जावशेन स्मितं च नलेन द्रष्टव्यमिति बुद्ध्याऽत्युच्चैर्नितरामुन्नमितमपि मुखं पुनर्नमयन्ती दमयन्ती सदा तस्मिन्मुखोन्नमनसमये पत्युर्मुदेऽभवत्। अत्युच्चैर्मुदेऽभूदिति वा तादृशीं तां दृष्ट्वा हृष्टोऽभूदिति भावः॥

भूयोऽपि भूपतिस्तस्याः सखीमाह स सस्मितम्।
परिहासविलासाय स्पृहयालुः सहप्रियः॥ ५३॥

भूय इति॥ सह प्रियया वर्तमानो भूयोऽपि पुनरपि वक्रोक्त्यादिपरिहासविलासाय स्पृहयालुरभिलाषुको भूपतिस्तस्याः सखीं कलां सस्मितं यथा तथा आह स्म। विलासाय, 'स्पृहेरीप्सितः' इति संप्रदानत्वम्। सहप्रियः, 'वोपसर्जनस्य' इति पाक्षिकत्वात्सादेशाभावः॥

क्षन्तुं मन्तुं दिनस्यास्य वयस्येयं व्यवस्यतात्।
निशीव निशिधात्वर्थं यदाचरति नात्र नः॥ ५४॥

क्षन्तुमिति॥ हे कले, इयं तव सदस्याऽस्य वर्तमानस्य दिनस्य मन्तुमपराधं क्षन्तुं सोढुं व्यवस्यतात्प्रयततात्। कोऽपराधो दिनस्येत्यत आह—यद्यस्मादियं भैमी निशीव रात्रा-

वेव नोऽस्माकं 'निशि चुम्बने' इति पठितस्य धातोरर्थमत्र दिने नाचरति । रात्रौ यथा नेःशङ्कं मां चुम्बति तथा भवतीभ्यो लज्जया दिने नेति दिनस्यैवापराधः, तस्मात्तस्यापराधं क्षमस्वेति प्रार्थ्यत इत्यर्थः । 'व्यवस्यताम्' इति पाठे आत्मनेपदं चिन्त्यम् ॥

दिनेनास्या मुखस्येन्दुः सखा यदि तिरस्कृतः ।
तत्कृता शतपत्राणां तन्मित्राणामपि श्रियः ॥ ५५ ॥

दिनेनेति ॥ दिनेनास्या मुखस्य सखा इन्दुर्यदि तिरस्कृतः निष्प्रभीकृत्य पराभूतः । एनमपराधं चेन्मन्येत तर्हि तस्य भैमीमुखस्य सादृश्यान्मित्रभूतानां बहूनां शतपत्राणां कमलानां श्रियो विकासलक्ष्म्यः, अथच—संपदोऽपि, कृताः । अनेकापकारकारिण्येकस्मि-न्पराभूते यदि बहूनां क्षेमं भवति तदा महानुपकार एवेति । त्वन्मुखमित्रभूतानां कमलानां प्रकाशकरत्वाद्दिनेनोपकार एव कृतः, नापकारः । तस्मादेतस्यापराधो नास्तीति मन्मुखचु-म्बनं दिनेऽपि कुर्विति भावः । 'एकस्मिन्धर्षिते पापे बहूनामपकारिणि । बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥' इत्याद्युक्तेः । 'कृता' इति पाठे—दिनस्य मित्रभूतानां तत्संबन्धात्त्व-ल्लक्ष्मीकाणां कमलानाम्, अथच—शतसंख्याकानि बहूनि पत्राणि वाहनानि येषां मित्राणां श्रियोऽपि तेन चन्द्रेण कृत्ताश्छिन्नाः रात्रौ संकोचकरणात् । दिनेन तु त्वन्मुखमित्रं चन्द्रो धर्षितः, चन्द्रेण तु दिनमित्राणि बहूनि कमलानि धर्षितानीति चन्द्रेण स्वयं वैरनिर्या-तनं कृतमेवेति दिनस्यापराधोऽनया न गणनीय इत्यर्थः । त्वन्मुखमित्राणां कमलानां श्रियो-ऽपि छिन्नाः, अपि तु—न । किंत्वभिवृद्धिमेव प्रापिताः । तस्मात्पूर्ववदेवापराधो नास्तीति काकुर्वा । त्वन्मुखमित्रं चन्द्रो यदि तिरस्कृतः, तर्हि दिनमित्राणां कमलानामपि श्रियस्त्वेन त्वन्मुखेन छिन्नाः स्वकान्त्या तेषां निष्प्र(श्री)भीकरणात् । वैरं निर्यातितमेवेति दिनस्याप-राधो न गणनीय इति भाव इति वा ॥

लज्जितानि जितान्येव मयि क्रीडितयाऽनया ।
प्रत्यावृत्तानि तत्तानि पृच्छ संप्रति कं प्रति ॥ ५६ ॥

लज्जितानीति ॥ हे कले, अनया मयि विषये तावल्लज्जितानि लज्जाविशेषाणि जितान्येव निरस्तान्येव । यतो रात्रौ क्रीडितया कृतसुरतक्रीडया मयि प्रदर्शितबहुविधसुरतचातुर्यया तत् तस्मात्संप्रति तानि लज्जितानि यत्पुनः प्रत्यावृत्तानि तत्कं प्रत्युद्दिश्येति त्वमेनां पृच्छ । ममास्याः सुरतचातुर्यधार्ष्ट्यं बहु बहुवारं दृष्टमेव त्वमेव प्रत्येयं दर्शितं इति जानीहीति भावः ॥

इदानीं श्लोकचतुष्टयेन स्वापराधमाशङ्क्य परिहरति—

निशि दष्टाधरायापि सैषा मह्यं न रुष्यतु ।
फलं दत्ते बिम्बीलता कीराय कुप्यति ॥ ५७ ॥

१ 'आमन्त्रणे तु सम्बुद्धौ [illegible]' इति सिद्धान्तकौमुदी । [illegible] (ध्वजस्य) प्रागग्रेणो [illegible] । 'निरस्य' इत्युक्तम् । [illegible] इति [illegible] । [illegible] पाठो दृश्यते । [illegible] दर्शितम्' इति सुखावबोधा ।

निशीति ॥ सैषा निशि दष्टोऽधरो येन तस्मा अपि मह्यं न रुष्यतु कुप्यतु । तस्मात् विम्बीलता फलं पक्कं विम्बीफलं दशते आस्वादितवते कीराय क कुप्यति, अपि तु न कुतोऽपि । किंतु स्वसंबन्धेन शोभाहेतवे तस्मै त्रिह्यत्येवेत्यर्थः । दन्तक्षते कृतेऽपि त्वत्संबन्धवशान्नितरामधरशोभाकारित्वेन मह्यं प्रसाद एव युक्तः, नतु कोप इति भावः । 'रुष्यतु' इति पाठे—सिद्धवत्कारेणोक्तिः । मह्यं कीराय च, 'क्रुधद्रुह–' इति (संप्रदानत्वे) चतुर्थी ॥

सृणीपदसुचिह्ना श्रीश्चोरिता कुम्भिकुम्भयोः ।
'पश्यैतस्याः कुचाभ्यां तन्नृपस्तौ पीडयानि न ॥ ५८ ॥

सृणीति ॥ एतस्याः सृणीपदमङ्कुशाघातक्षतनेव शोभनं चिह्नं यस्याः, अथच—अङ्कुशाकारनखपदविशेष एव शोभनं चिह्नं यस्याः सा कुम्भिनः करिणः कुम्भयोः श्रीः शोभासंपच्च यस्याश्चोरिता । पश्य एतत्कुचयोरङ्कुशाकारं नखं नास्ति तर्हि त्वमेव विलोकय । तत्तस्मान्नृपो दण्ड्यदण्डकरणाधिकारी अहं तौ स्तेयकारिणावेतत्कुचौ न पीडयानि, अपि तु—पीडयान्येव । तयोः पीडनं दण्डरूपं नखक्षतादिरूपं चोचितमित्यर्थः । राज्ञा हि चोरस्य दण्डः क्रियते, ममापराधो नास्तीति भावः । 'अङ्कुशोऽस्त्री सृणिर्द्वयोः' इत्यमरः । सृणी, 'कृदिकारात्' ङीप् ॥

अधरामृतपानेन ममास्यमपराध्यतु ।
मूर्धा किमपराद्धं यः पादौ नाप्नोति चुम्बितुम् ॥ ५९ ॥

अधरेति ॥ ममास्यं मुखमेतस्या अधरामृतस्य पानेन कृत्वाऽपराध्यतु । अयं मुखस्यापराधोऽङ्गीकृत इत्यर्थः । मम मूर्धा पुनः किमपराद्धम्, यो मस्तकः प्रणामहेतुनास्याः पादौ चुम्बितुं स्प्रष्टुमपि नाप्नोति नमस्कर्तुमपि न ददाति । कोऽपराधोऽनेन कृतः पृच्छेत्यर्थः ॥

अपराद्धं भवद्वाणीश्राविणा पृच्छ किं मया ।
वीणाह परुषं यन्मां कलकण्ठी च निष्ठुरम् ॥ ६० ॥

अपराद्धमिति ॥ भवद्वाणीश्राविणा त्वद्वचनाकर्णनशीलेन मया वीणायाः कोकिलायाश्च तत्र वा किमपराद्धम् को वापराधः कृत इति कले, त्वं भैमीमनेन किमपराद्धमिति पृच्छ । यद्यस्माद्वीणा सांप्रतं परुषमाह, कलकण्ठी कोकिला च मां प्रति निष्ठुरं ब्रूते । तत्सादपराधः संभाव्यते । येन हि यस्याः कश्चिदपराधः क्रियते तं प्रति सा तदीयो वा तत्सदृशः कश्चित्परुषं भाषते । अथच—वीणाकोकिलयोः स्वरे यस्मान्माधुर्यं नास्ति तस्मात्पश्चाद्गत्य निभृतं मयाऽसमक्षभाषमाणाया भवत्या भारती श्रुता, नत्वन्येन केनाप्यापराधेनेति सोऽपराधो न भवतीत्यर्थः । वीणाकोकिलालापापेक्षया भैमीवाणी मधुरतरा, रात्रौ एतद्वाणीमाधुर्यं मया बहुनुभूतम् । इदानीं तु त्वां दृष्ट्वा मां प्रति तूष्णीमास्ते इति । परुषं निष्ठुरं च क्रियाविशेषणम् । परुषं निःस्नेहम्, निष्ठुरं सतिरस्कारम् । कलकण्ठी, 'अङ्गगात्र–' इति ङीप् ॥

सेयमालिजने स्वस्य त्वयि विश्वस्य भाषताम् ।
ममताऽनुमताऽस्मासु पुनः प्रसर्यते कुतः ॥ ६१ ॥

---

१ 'दृष्टान्तालङ्कारः' इति जीवातुः । २—पीडयानीति बहुत्र पाठः । ३ क्रियान्तरेऽत्र पाठः सत्त्वेऽपि द्वयोरित्यर्थकत्वं तथा मुद्रिते विस्तरः ।

सेति ॥ हे कले, सेयं स्वस्यालिजने त्वयि विषये विश्वस्य (विश्वासमधिगम्य) आपतां कथयतु । अस्यास्तु विषयेऽनुमताङ्गीकृता ममता स्वीयतामतिः पुनः कुतः प्रत्यर्प्यते विसर्ज्यते इति त्वं पृच्छ, इयं च त्वयि विश्वस्य कथयत्वित्यर्थः । रात्रौ रतानुकूल्यमाचरितमनया, इदानीं तु तव समक्षं प्रातिकूल्यं किमित्याचरतीति भावः । इत्युपालम्भनभङ्गिः । प्रश-ब्दस्य गतार्थतया विस्मरणार्थता ॥

अथोपवदने भैम्याः स्वकर्णोपनयच्छलात् ।
संनिधाप्य श्रुतौ तस्या निजास्यं सा जगाद ताम् ॥ ६२ ॥

अथेति ॥ अथैवं नलोक्त्यनन्तरं सा कला भैम्या उपवदने वदनसमीपे स्वकर्णस्य उप-नयच्छलात्समीपनयनव्याजात् तस्या भैम्याः श्रुतौ कर्णे निजास्यं संनिधाप्य संनिहितं कृत्वा तां जगाद । अवदन्त्या अपि भैम्या वचनं शृण्वतीव स्वकर्णं भैमीमुखसमीपे कृत्वाऽनन्तरं च तद्वचःप्रतिवचनमेकान्ते वितरन्तीव भैमीकर्णसमीपे निजमुखं कृत्वा भैमीं जगादेत्यर्थः । कथकानुकथकजातिः । उपवदने, अव्ययीभावे सप्तम्या अम्भावाभावः । संनिधाप्य, हेतुम-ण्ण्यन्तात्ल्यप् ॥

अहो मयि रहोवृत्तं धूर्ते किमपि नाभ्यधाः ।
आस्स्व सभ्यसिमं तत्ते भूपमेवाभिधापये ॥ ६३ ॥

अहो इति ॥ हे धूर्ते वचनचतुरे, त्वं मयि विषये रहोवृत्तमेकान्ते निधुवनालिङ्गनादि किमप्येकमप्यल्पमपि च नाभ्यधाः । अहो आश्चर्यम् । एतादृशी धूर्ता कापि न दृष्टेत्यर्थः । त्वम् आस्स्व तिष्ठ तिष्ठ । यद्यपि त्वं नाचकथः, तथापि ते तव तद्रहोवृत्तं सभ्यं सभ्यस्थं सत्यवादिनमिमं भूपं नलमेवाभिधापये वादयामि । अहमपि त्वया यतो वञ्चिता तथा किंचिद्वचयिष्यामि यथा नल एव स्वयं त्वदीयचतुरतप्रागल्भ्यं प्रकटयति मां वञ्चयित्वा क्वेदानीं यास्यसि क्षणमात्रं स्थिरा भवेति सरोषोक्तिः । 'सत्यम्' इति पाठे—अभिधापये सत्यं जानीहीत्यर्थः । 'आश्चर्यम्' इति पाठे—इमं भूपमेव तवेदनचन्दनम् समासां जनस-मक्षं वक्तुमनर्हं तद्रहोवृत्तमाश्विदानीमेवाभिधापये तिष्ठ तिष्ठेत्यर्थः । भूपम्, 'अकथितं च' इति कर्मत्वं ब्रू इत्यर्थग्रहणात् । अभिधापये, अभिपूर्वाद्धाञ्धात्वर्थाद्धावेर्हेतुमण्णिचि 'लिङर्थ' इति वत् ॥

स्मरशास्त्रमधीयाना शिक्षितासि मयैव यम् ।
अगोऽपि सोऽपि कृत्वा किं दाम्पत्यव्यत्ययस्त्वया ॥ ६४ ॥

स्मरेति ॥ स्मरशास्त्रं वात्स्यायनादिप्रणीतमधीयाना पठन्ती (कन्वी) त्वं तत्र प्रतिपा-दितं यं दाम्पत्यव्यत्ययं विपरीतसंभोगं मयैव शिक्षितासि स दाम्पत्यव्यत्ययस्त्वया कृतानि लिप्सयापि मम पुरस्तात्किं किमर्थमगोऽपि गोपितः कथयेति प्रश्नः । चिरात् पाठं मदत्तमेव मया शिक्षितं विपरीतसुरतं कृतानि ममैव पुरस्तादकृतमेव कथयसीति चिरात् वचनचतुरा-सीति भावः । स्मरशास्त्रं, 'न लोक—' इति षष्ठीनिषेधः । दम्पत्योर्भावः कर्मेति वा ष्यञ्: 'पत्यन्तपुरोहितादिभ्यो यक्' इति यक् ॥

मौनिन्यामेव सा तस्यां तदुक्तीरिव शृण्वती।
वादं वादं मुहुश्चक्रे हुंहुमित्यन्तरान्तरा ॥ ६५ ॥

मौनिन्यामिति ॥ सा कला तस्यां भैम्यां मौनिन्यामवदन्त्यामेव सत्यां तदुक्तीर्भैमीवचनानि शृण्वतीव भैम्यामवदन्त्यामपि भैमी मां प्रति किमपि वदति अहं शृणोमीति नलं प्रति प्रकटयन्ती वादं वादं भैमीवचनप्रतिवचनव्याजेन स्वयमेव किंचिदुक्त्वोक्त्वा अन्तरान्तरा मध्येमध्ये हुंहुमिति शब्दं चक्रे । 'वदत्यचिह्नि-' (२०।६८) इत्यादेर्वक्ष्यमाणस्य सत्यत्वबुद्धिजननार्थं पूर्वरङ्गमलीकमेव श्रवणोत्तरदानरीतिप्रकटनमकरोदिति भावः। वादं वादम्, आभीक्ष्ण्ये णमुलि, आभीक्ष्ण्य एव द्विर्वचनम् ॥

अथासावभिसृत्यास्या रतिप्रागल्भ्यशंसिनी।
सख्या लीलाम्बुजाघातमनुभूयालपन्नृपम् ॥ ६६ ॥

अथेति ॥ अथ श्रवणप्रकारप्रकटनानन्तरमसौ कला नृपमभिसृत्य भैम्याः सकाशान्नलं प्रति गत्वा वक्ष्यमाणमवोचत् । किंभूता—अस्या भैम्या रतिप्रागल्भ्यं शंसति वर्णयति तच्छीला। विपरीतसुरतमपि करोषि सांप्रतं नितरां धृष्टा जातासीति भैमीकर्णे प्रेमभाषणं कुर्वाणा। अत एव—किं कृत्वा—सख्या भैम्या लीलाम्बुजेनाघातमनुभूय प्राप्य। रतिप्रागल्भ्यं नलेन शंसयति तच्छीलेति वा शंसिनी। केवलाद्धेतुमण्ण्यन्ताद्वा शंसेस्ताच्छील्ये णिनिः ॥

दृष्टं दृष्टं महाराज त्वदर्थाभ्यर्थनक्रुधा।
यत्ताडयति मामेवं यद्वा तर्जयति भ्रुवा ॥ ६७ ॥

दृष्टमिति ॥ हे महाराज सार्वभौम, इयं नलाय संभोगं वितरेति त्वदर्थं त्वत्संभोगनिमित्तं मया क्रियमाणमभ्यर्थनं तस्माज्जातया क्रुधा कोपेन हेतुना मामेवं लीलाकमलाघातप्रकारेण यत्ताडयति, यद्वा यच्च भ्रुवा कटाक्षेण तर्जयति भीषयते तत्त्वया दृष्टं दृष्टं त्वं पश्य पश्येत्यर्थः। त्वयि परपुरुषबुद्धिं कृत्वा तत्र मां कथं प्रवर्तयसीति मां ताडयति, भ्रूक्षेपेण चेतः परं मा वादीरिति तर्जयति च, तत्त्वं पश्येति भावः। दृष्टं दृष्टं, संभ्रमे द्विरुक्तिः ॥

वदत्यचिह्नि चिह्नेन त्वया केनैष नैषधः।
शङ्के शक्रः स्वयं कृत्वा मायामायातवानियम् ॥ ६८ ॥

वदतीति ॥ हे राजन्, इयमिति वदति। इति किं—हे कले, यदर्थमर्थनां त्वं करोषि एष नैषधः त्वया केन चिह्नेनाचिह्नि निर्धारितः। तर्हि कः—अयं शक्रः स्वयं करणकाल इव मायां नलरूपां कृत्वा स्वयमायातवानित्यहं शङ्के। त्वदर्थमर्थनां कुर्वत्या मम कर्णे इति वदति। चिह्नवान्कृत इति, णिचि मतुब्लुक् ॥

भैमी त्वदिन्द्रत्वे इदं प्रमाणमाह—

स्वर्णदीस्वर्णपद्मिन्याः पद्मदानं निदानताम्।
नयतीयं त्वदिन्द्रत्वे दिवश्चागमनं च ते ॥ ६९ ॥

स्वर्णदीति ॥ इयं स्वर्णद्यां मन्दाकिन्यां स्वर्णपद्मिन्याः पद्मसमानने दानं, दिवः स्वर्गात् भूमिं प्रति आगमनं च, तवेन्द्रत्वे निदानतां प्रथमकारणतां नयति प्रापयति। नहि मनुष्यस्य

स्वर्णदीस्वर्णपद्मिनीसुवर्णकमलानयने स्वर्गादागमने च सामर्थ्यं दृष्टम् । तस्मान्नलरूपं धृत्वा पूर्ववदिन्द्र एवायमागत इति एतदर्थं प्रार्थना त्वया कर्तुमयुक्तेतीयं मत्कर्णे कथयतीति भावः । स्वर्णदीति, 'पूर्वपदात्संज्ञायामगः' इति णत्वम् ॥

भाषते नैषधच्छायामायामापि मया हरेः ।
आह चाहमहल्यायां तस्याकर्णिततुर्नया ॥ ७० ॥

भाषते इति ॥ हरेरिन्द्रस्य नैषधस्य छायायाः कान्तेर्माया कापट्यं मया स्वयंवरकालेऽमापि ज्ञातेतीयं मां भाषते । स्वयंवरकाले तव परस्त्रीत्वाभावान्नलरूपं धृतम्, इदानीं तु परस्त्रीत्वमिदेवं न करिष्यतीति मया प्रत्युक्ता सतीयं भैमी अहल्यायां गोतमपत्न्यां तस्येन्द्रस्याकर्णितो व्यभिचारलक्षणो दुष्टो नयो यया, एवंविधाहमिति च ब्रूते । परस्त्रीत्वनीतिरपि तस्य नास्ति, तस्मादिन्द्र एवायमिति त्वयाऽभ्यर्थना न कार्येति मां प्रति भाषत इति भावः । नैषधस्येव छाया यस्यामिति मायाविशेषणत्वेन पृथग्वा ॥

संभावयति वैदर्भी दर्भाग्राभमतिस्तव ।
जम्भारित्वं कराम्भोजाद्दम्भोलिपरिरम्भिणः ॥ ७१ ॥

समिति ॥ कुशाग्राभा मतिर्यस्याः सा वैदर्भी दम्भोलिः सार्वभौमत्वसूचकं वज्रं तत्परिरम्भिणस्तद्युक्तात्कराम्भोजाद्धेतोस्तव जम्भारित्वमिन्द्रत्वं संभावयति तर्कयति । यतइन्द्रो वज्रहस्तः । रेखारूपादपि वज्रादेवमनुमानात्कुशाग्रबुद्धित्वमस्याः ॥

अनन्यसाक्षिकाः साक्षात्तदाख्याय रहःक्रियाः ।
शङ्कातङ्कं तुदैतस्या यदि त्वं तत्त्वनैषधः ॥ ७२ ॥

अनन्येति ॥ तस्माद्धो राजन्, त्वं यदि तत्त्वेन नैषधो भवसि, ननु छद्मना तर्हि न विद्यतेऽन्यो भैमीभवद्व्यतिरिक्तः साक्षी यासु । युवाभ्यामेव या ज्ञायन्त इत्यर्थः । तादृशी रहःक्रिया एकान्तक्रीडाः साक्षात् स्वयमेव, अथ च—[illegible] विना [illegible] प्रकटं कथयित्वा एतस्याः शङ्कातङ्कमिन्द्रमायासंशयमयं त्वं तुद निराकुरु । एतन्नलादिज्ञां क्रीडा[illegible]मयपेक्ष्य मुक्त्वाऽस्या एतस्याश्च संदेहमपनुदेत्यर्थः । 'तत्त्वनैषधः' इति च पाठः ॥

इति तत्सुप्रयुक्तत्वनिह्नुतीकृतकैतवाम् ।
वाचमाकर्ण्य तद्भावे संशयालुः शशंस सः ॥ ७३ ॥

इतीति ॥ इत्युक्तप्रकारेण तया कल्या सुप्रयुक्तत्वेन [illegible]केण सुवर्णकमलप्रदानादीन्द्रत्वनिश्चायकोपपत्तिमत्तया च सन्देहमयुक्तत्वेन निह्नुतं [illegible] कैतवं छद्म यस्यास्तां कलां वाचमाकर्ण्य तद्भावे [illegible] दुर्वचादि न [illegible] [illegible] भैम्याशये संशयालुः संदिहानः स नलो भैमीभावे [illegible] । [illegible] सन्नित्यर्थः ॥

स्मरसि त्वमनिद्रालुर्यया नामौ शयापितान् ।
[illegible] ॥ ७४ ॥

स्मरसीति ॥ हे भैमि, त्वया [illegible] [illegible] [illegible]

स्पर्शेन जातरोमाञ्चा सती पद्मयुक्ता नाभिर्यस्यास्तादृशी भविष्यसि संजातासीत्तत्स्मरसि। पाणिरोमाञ्चसंबन्धात्सकण्टककमलसंबन्धसंभावनया पद्मनाभीत्वं तव यज्जातं तत्स्मरेत्यर्थः। नलपाणिः पद्मस्थानीयः, रोमाञ्चश्च तत्कण्टकस्थानीयः। अथ च—विकसितकमलदलतुल्यरोमाञ्चोद्गमात्पद्ममिव नाभिर्यस्यास्तादृशी जातासि तत्स्मर। शयार्पणं रोमाञ्चोद्गमे हेतुः। अथ च—नाभौ शयार्पणादपद्मनाभः पद्मनाभः श्रीविष्णुर्भविष्यसि पद्मनाभीभविष्यसीति च्विः। तत्स्मरसि, नाभौ करकमलधारणाच्छ्रीविष्णुरूपा जातासि। नहि विष्णुं विनाऽन्यस्य नाभौ कमलमस्तीत्यर्थः। निद्रितासीति बुद्ध्या वसनस्रंसनार्थं नाभिसमीपे मया करेऽर्पिते तत्संस्पर्शाज्जातसात्त्विकरोमाञ्चा जातासि तत्स्मरेति भावः। आनन्दोल्लासिलोमेति निद्राया अलीकत्वं द्योतितम्। नहि निद्रायाः सत्त्वे करस्पर्शाद्रोमाञ्चोद्गमो भवति। भैमीपक्षे पद्मनाभीति च्विः। स्मरतियोगे त्व(नद्यतन)भूतेऽपि 'अभिज्ञावचने लृट्' इति लृट्। 'तदानन्द-' इति पाठः सभ्यः॥

जानासि ह्रीभयव्यग्रा यन्नवे मन्मथोत्सवे।
सामिभुक्तेव मुक्तासि मृद्वि खेदभयान्मया॥ ७५॥

जानासीति॥ हे मृद्वि सुकुमाराङ्गि, शीघ्रद्राविणि च भैमी, मया नवे मन्मथोत्सवे ह्रीभयाभ्यां व्यग्रा व्याकुलचित्ता त्वं अतिमृदुत्वात्संपूर्णसंभोगोपमर्दासहतया तव खेदो भविष्यतीति भयात्सामि अर्धभुक्तैवाप्राप्तसुरतावसानैव यन्मुक्तासि तज्जानासि स्मरसि। सामिभुक्ता, 'सामि' इति समासः॥

स्मर जित्वाजिमेतस्त्वां करे मत्पदधाविनि।
अङ्गुलीयुगयोगेन यदाश्लिक्षं जने घने॥ ७६॥

स्मरेति॥ हे भैमि, आजिं सङ्ग्रामं जित्वा त्वामा सांमुख्येनेतः प्राप्तोऽहं नमस्कारार्थं क्षालनार्थं वा मत्पदधाविनि मच्चरणस्पर्शिनि तव करेऽङ्गुलीयुगयोगेन मदीयचरणाङ्गुलीद्वयसंबन्धेन दर्शनार्थं समागते घने भूयसि जने मध्ये यदाश्लिक्षमालिङ्गितवान् तत्स्मर। जनसमक्षं साक्षादालिङ्गनस्यानौचित्यात्प्रवासोत्कण्ठाभरतरलतया चरणाङ्गुलिद्वयेन त्वत्पाणिपीडनवशात्त्वदालिङ्गनवाञ्छां त्वां प्रति द्योतितवांस्तत्स्मरेत्यर्थः। आश्लिक्षं, 'श्लिष आलिङ्गने' इति लुङुत्तमैकवचने च्लेः क्सः। 'विभाषा साकाङ्क्षे' इति वैकल्पिकत्वाल्लृडभावः॥

वेत्थ मानेपि मत्त्यागद्दूनां स्वं मां च यन्मिथः।
मद्दृष्टालिख्य पश्यन्ती व्यवाधा रेखयाऽन्तरा॥ ७७॥

वेत्थेति॥ हे भैमि, माने प्रीतिकलहे सत्यपि रोषात्त्वया कृतेन मत्कर्मकत्यागेन दूना खिन्ना क्षणमात्रमपि मद्विरहं सोढुमशक्ता सती मिथ एकान्ते स्त्रीरूपं स्वं, पुंरूपं मां चालेख्ये आलिख्य पश्यन्ती संयुक्तपरस्परदर्शनसुखमनुभवन्ती त्वं मया दृष्टा सती यच्चित्रलिखितयो-

१ यदानन्देति पाठे यद्योगसत्त्वेन 'न यदि' इति निषेधेन लृटोऽप्राप्तिमभिप्रेत्येदम्। तथा पाठेपि यदिति स्थाने यदेति पदच्छेदं कृत्वा व्याख्याने यच्छब्दयोगेपि व्याजशयनेन लक्षणेन पद्मनाभभवनस्य लक्ष्यत्वाल्लक्ष्यलक्षणसंबन्धे 'विभाषा साकाङ्क्षे' ति इति परत्वाल्लृटो विधानेन च न दोषः' इति सुखावबोधावगतोर्थः।

रावयोरन्तरा मध्ये तूलिकादिलिखितया रेखया व्यवायाः व्यवधानं कृतवत्यसि वेत्थ जानासि । तत्स्मरेत्यर्थः । व्यवायाः, व्यवपूर्वाद्दाञो लुब्व्यप्यत्ययः ॥

प्रस्मृतं न त्वया तावद्यन्मोहनविमोहितः ।
अतृप्तोऽधरपानेषु रसनामपिबं तव ॥ ७८ ॥

प्रस्मृतमिति ॥ हे भैमि, मोहनेन सुरतेन विशेषेण मोहितः सुरतपरवशः, अथ च—मोहनकारिणा कामबाणेन मोहितो निरस्तविवेकोऽहं तवाधरपानेषु अतृप्तः सं्स्तव रसनां जिह्वामपि यदपिबं तत्तावत्साकल्येन त्वया न प्रस्मृतम् । जिह्वाप्रलेहनमपि कामशास्त्रोक्तम् । प्रशब्दः प्रगतार्थः । 'अधरपानानाम्' इति पाठे तृप्त्यर्थानां करणे षष्ठी वा ॥

त्वत्कुचार्द्रनखाङ्कस्य मुद्रामालिङ्गनोत्थिताम् ।
स्मरेः स्वहृदि यत्स्मेरसखीः शिल्पं तवाब्रवम् ॥ ७९ ॥

त्वदिति ॥ अहं स्वहृदये तवालिङ्गनोत्थितां तव कुचे तात्कालिकत्वादार्द्रस्यानुच्छ्रुष्करुधिरस्य मया कृतस्य नखाङ्कस्य मुद्रां नखक्षतदर्शनादेव स्मेरसखीः हास्यपरास्तव सखीः प्रति तव शिल्पं भवत्सख्या भैम्येदं नखक्षतं कृतं पश्यतेति स्वनिर्माणं यदब्रवं तत्स्मरेश्चिन्तयेः । 'स्मेरः' इति पाठे—स्मेरः सस्मितः इत्यर्थः । सखीः, मुख्यं कर्म । शिल्पमिति, 'अकथितं च' इति कर्मत्वम् ॥

त्वयान्याः क्रीडयन्मध्येमधुगोष्ठि रुपेक्षितः ।
वेत्सि तासां पुरो मूर्ध्ना त्वत्पादे यत्किलास्खलम् ॥ ८० ॥

त्वयेति ॥ मधुगोष्ठ्या मद्यशालाया मध्ये मद्यसहपानावसरे अन्याः सपत्नीः क्रीडयन् त्वया रुषा रोषरूषितया दृशा ईक्षितोऽहं तासां सपत्नीनां पुरः समक्षमेव किल मदमत्ततास्खलनव्याजेन त्वत्पादे मूर्ध्ना यदस्खलं स्खलित्वा यदपतं तद्वेत्सि जानासि । स्खलनव्याजेन प्रणामेन त्वां प्रसादितवानस्मि तत्स्मरेति भावः । मध्येमधुगोष्ठि, 'पारे मध्ये षष्ठ्या वा' इति समासः ॥

वेत्थ मय्यागते प्रोष्य यत्त्वां पश्यति हार्दिनि ।
अचुम्बीरालिमालिङ्ग्य तस्यां केलिमुदा किल ॥ ८१ ॥

वेत्थेति ॥ मयि प्रोष्य विजययात्रां कृत्वा आगते, अत एव हार्दिनि प्रेमभरतरले त्वां पश्यति सति आलिं सखीमालिङ्ग्य अन्याः प्रति तस्यां केलिमुदा क्रीडाहर्षेण किल मिथ्याप्रकटनव्याजेन यत्तामचुम्बीः तद्वेत्थ स्मरसि । कामशास्त्रप्रसिद्धसंक्रान्तालिङ्गनचुम्बनव्याजेन मां प्रत्यालिङ्गनचुम्बनद्वारा सप्रेमभरं मत्सुखितवत्यसि तत्स्मरेति भावः । हे हार्दिनीति भैमीसंबुद्धिर्वा । प्रोष्य, प्रपूर्वाद्वसेः क्त्वो ल्यपि यजादित्वात्संप्रसारणम् । हार्दिनि, (सुपादित्वादिनि) 'हृदयस्य हृल्लेख—' इति हृद्भावे च 'अत इनिः' ॥

जागर्ति तत्र संस्कारः स्वमुखाद्भवदानने ।
विक्षिप्यायाविषं यत्तां न्यायात्ताम्बूलफाणिकाः ॥ ८२ ॥

जागर्तीति ॥ अहं ताम्बूलस्य चर्वितस्य [illegible] फाणिकाः [illegible] अनु-
[illegible] आनने विक्षिप्य [illegible] 'पर्यायो निक्षेपः' इत्यर्थः [illegible]

दण्ड्यः' इति न्यायाच्छास्त्रोक्तयुक्त्यर्थत्तास्ताम्बूलकालिकाः (यदहमयाचिषं) पुनर्भक्ष्यं देहीति याचितवान्, तत्र विषये स्मरणभूतो भावनाख्यः संस्कारो जागर्ति स्फुरद्रूपो वर्तते तत्स्मरसि किमित्यर्थ इति प्रश्नः ॥

चित्ते तदस्ति कच्चित्ते नखजं यत्क्रुधा क्षतम् ।
प्राग्भावाधिगमागस्स्थे त्वया शम्बाकृतं क्षतम् ॥ ८३ ॥

चित्त इति ॥ मयि प्राक् त्वय्यप्राप्तसुरतान्तसुखायामेव सत्यां यो भावाधिगमः सुरतान्तसुखप्राप्तिस्तद्रूपे आगस्यपराधे तिष्ठति एवंभूते सति मयि विषये वा समरतस्यैव सुखहेतुत्वाद्विषमरतस्यासुखहेतुत्वात्क्रुधा मध्य एव सुखजन्याद्रोपाद्धेतोर्नखजं क्षतं त्वया शम्बाकृतं प्रथमं फालकृष्टे क्षेत्रे पुनरपि सा(सी)रावदारणवत्प्रथमकृतनखक्षतमध्य एव पुनरपि गाढतरं नखक्षतं यदारोपितं तत्ते चित्तेऽस्ति कच्चित् । तत्स्मरेत्यर्थः । 'शम्बाकृतं द्वितीयं स्यात्' इति निघण्टुः । शम्बाकृतं, 'कृञो द्वितीय–' इति डाच् । लक्षणया प्रयोगः ॥

स्वदिग्विनिमयेनैव निशि पार्श्वविवर्तिनोः ।
स्वप्नेष्वप्यस्तवैमुख्ये सख्ये सौख्यं स्मरावयोः ॥ ८४ ॥

स्वेति ॥ स्वीयस्वीयदिशो विनिमयेनैव परिवर्तनेनैव निशि पार्श्वविवर्तिनोर्वामदक्षिणकुक्षिपरिवर्तनशीलयोः नतु यथावस्थितयोः संमुखयोरेवैवंभूतयोरावयोस्तव मम च स्वप्नेष्वपि निद्रास्वपि मध्ये अस्तं त्यक्तं वैमुख्यं पराङ्मुखत्वं यत्र तादृशे सख्ये मैत्रे यत्सौख्यं सुखं सुखित्वं वा तत्स्मर । संमुखयोर्हि यथावस्थितयोरेव पार्श्वपरिवर्तने द्वयोरपि पृष्ठभागघटनात्पराङ्मुखत्वमेव स्यादिति स्वस्वदिग्विनिमयपूर्वकमेकदैव पार्श्वपरिवर्तने वैमुख्याभावान्निद्रासमयेऽपि सांमुख्येन यदावयोर्मैत्रीसौख्यं तत्स्मरेत्यर्थः । स्वस्वदिग्विनिमयेन पार्श्वपरिवर्तने चान्योन्यं सांमुख्यमेव भवतीति सर्वसाक्षिकम् । सौख्यम्, स्वार्थे भावे वा ष्यञ् ॥

क्षणं प्राप्य सदस्येव नृणां विमनितेक्षणम् ।
दर्शिताधरमद्दंशा ध्याय यन्मामतर्जयः ॥ ८५ ॥

क्षणमिति ॥ सदस्येव सभायामेव वर्तमानापि त्वं सभास्थानां नृणां विमनितानि कार्यान्तरदर्शनपराणि कृतानीक्षणानि यत्र येन वा तादृशं क्षणमवसरं नृत्ताद्युत्सवं वा प्राप्य मध्यमङ्गुल्यादिना दर्शितोऽधरे वर्तमानो मद्दंशो मत्कृतो दन्तव्रणो ययैवंभूता सती तर्जन्यादिना मां यदतर्जयः, तद्ध्याय स्मर । विमनितेति, 'तत्करोति–' इति णिचि 'णाविष्ठवत्' इति टिलोपः ॥

तथावलोक्य लीलाब्जनालभ्रमणविभ्रमात् ।
करौ योजयताध्ये(धी)हि यन्मयासि प्रसादिता ॥ ८६ ॥

तथेति ॥ तथा अधरदन्तक्षतदर्शनपूर्वं तर्जनीतर्जनाप्रकारमवलोक्य लीलाब्जनालस्य कराभ्यां भ्रमणरूपाद्विभ्रमात्तद्व्याजात्प्रणामसादाञ्जलिबन्धनरूपेण करौ योजयता संयुक्तौ कुर्वता मया कोपत्याजनपूर्वं यत्प्रसादितासि तदध्ये(धी)हि । स्मरेत्यर्थः । 'इक् स्मरणे' ॥

ताम्बूलदानमन्यस्तकरजं करपङ्कजे ।
मम न स्मरसि प्रायस्तव नैव स्मरामि तत् ॥ ८७ ॥

ताम्बूलेति ॥ त्वं त्वदीयकरपङ्कजे मम ताम्बूलदानमन्यस्तकरजमक्षिप्तनखक्षतं प्रायो

बाहुल्येन न स्मरसि । अहमपि मदीयपाणिपद्मे त्वत्कृतं तृणच्छेदकं यथा ताम्बूलदानमक्षिप्त-
नखक्षतं बाहुल्येन नैव स्मरामि । किंतु—अन्योन्यवीटिकादानक्षणे प्रेमभरात्पाणिपद्मगर्भारो-
पितनखक्षतमेव सदा ताम्बूलदानमावयोः, तत्स्मरेति भावः ॥

तदध्ये (धी) हि नृपोद्यं मां हित्वा यत्त्वं गता सखीः ।
तत्रापि मे गतस्याग्रे लीलयैवाच्छिनस्तृणम् ॥ ८८ ॥

तदिति ॥ कमप्यपराधं कृत्वाप्यहमेतन्नाकार्षमित्यादिनृपोद्यमलीकभाषिणं मां कोपेन हित्वा सखीः प्रति गता त्वं तत्रापि सखीसमीपे भवदीयपृष्ठदेशानुवर्तित्वेन गतस्य मेऽग्रे लीलयैव स्वभावेनैव यत्तृणमच्छिनश्छिच्छेद(दिथ), तदध्ये(धी)हि इति पूर्ववत् । अयमनृतलोकभाषिणस्त्वयाहं न कापि, त्वं मम न कोपीति मैत्रीविच्छेदसूचकं तृणच्छेदं यथा बालकाः कुर्वन्ति, तद्वत्त्वयापि कृतमिति स्मरेत्यर्थः । नृपोद्यम्, 'राजसूय-' इति निपातः ॥

स्मरसि प्रेयसि प्रायो यद्द्वितीयरतासहा ।
शुचिरात्रीत्युपालब्धा त्वं मयापिकनादिनी ॥ ८९ ॥

स्मरसीति ॥ हे प्रेयसि, बालत्वात्सौकुमार्यविशेषाच्च द्वितीयरताभिलाषिणो मम द्वितीयस्य रतस्यासहा, तथा—पिकवद्वदति तच्छीला कोकिलतुल्यकूजना त्वं मया शुचिरात्री ग्रीष्मर्तुसंबन्धिनी रात्रीत्युपालब्धा सोपालम्भनामाङ्कितासि तत्प्रायः स्मरसि कथयेत्यर्थः । शुचिरात्रिरपि स्वल्पप्रमाणत्वादेकवारसुरतनिर्माणेनैव जातप्रभातत्वाद्द्वितीयसुरतनिर्माणासहा वसन्तनैकट्याच्च पिकनादोऽस्यां वर्तत इति । तत्रापि प्रभाते कोकिलालापो भवतीत्यर्थः । यद्वा—वसन्तस्यातीतत्वात्कोकिलानामभावात्पिकव्यतिरिक्ताः पक्षिणोऽपिकाः, तन्नादयुक्ता ॥

भुञ्जानस्य नवं निम्बं परिवेविषती मधौ ।
सपत्नीष्वपि मे रागं संभाव्य स्वरुषः स्मरेः ॥ ९० ॥

भुञ्जानस्येति ॥ मधौ वसन्ते नवं नूतनमागतपत्रपुष्पादिकं निम्बं भुञ्जानस्य मे सपत्नीष्वपि रागं प्रीतिं संभाव्यानुमाय कोपवशात् पुनःपुनः निम्बमेव मम भोजनार्थं परिवेविषती पात्रे परितः क्षिपन्ती त्वं स्वरुषः स्वीयात्कोपात् स्वकोपस्य वा स्मरेः । मधुरतरशर्करादिपरित्यागेनातिकटुरसेऽपि चेदस्यैवं रुचिस्तर्हि मदीयापेक्षयाऽतिहीनासु मत्सपत्नीष्वप्यस्य रुचिः स्यादिति संभाव्य बहुतरं निम्बमेव भुङ्क्ष्वेति वारं वारमतिकटुनिम्बादिदानेन मत्कोपान्मां प्रति व्यञ्जितवत्यसि तत्स्मरेति भावः । वसन्ते च जना निम्बं भुञ्जते । परिवेविषती, परिवेषणार्थात्परिपूर्वाद्विषेः शतृ 'श्लौ' इति द्विर्वचनम् । स्वरुषः, 'अधीगर्थ-' इति षष्ठी, कर्मत्वविवक्षया द्वितीया वा ॥

स्मर शार्करमास्वाद्य त्वया राद्धमिति स्तुवन् ।
स्वनिन्दारोषरक्तात्तु यदैप्सं तवाधरात् ॥ ९१ ॥

स्मरेति ॥ शार्करं शर्कराविकारभूतं शर्करासंस्कृतं वा किमपि भक्ष्यमास्वाद्य एतत्सर्वा-

---

१ 'यद्वा अपिकनादः' [illegible] सुखावबोधायाम् ।

[illegible] 'भीता—' इत्यादावन्वयः ॥

मुक्ताहारस्य मायन्ते चुम्बं चुम्बमनुस्मरन् ।
न प्राप्तं चुम्बितुं यत्ते भव्या तच्चुम्बतु स्मृतिः ॥ ९२ ॥

मुक्तादिति ॥ [illegible] चुम्बं चुम्बं चुम्बित्वा चुम्बित्वा [illegible] ([illegible]) [illegible] तस्मात् [illegible] भव्या स्मृतिश्चुम्बतु । [illegible] चुम्बितुं [illegible] मम तव [illegible] भावः । [illegible] मया चुम्बितुं न प्राप्तं तत्स्मृत्या प्राप्तम्, अत एव सा भव्येति भावः । [illegible] ॥

कमपि स्मरकेलिं तं स्मर यत्र भवन्निति ।
मया विहितसंबुद्धिर्व्रीडिता स्मितवत्यसि ॥ ९३ ॥

कमिति ॥ त्वं कमपि तमनिर्वचनीयं लोकोत्तरपुरुषायिताख्यं स्मरकेलिं स्मर । (तं कम्—) यत्र कामकेलौ पुंस्त्वारोपेण भवन्निति पुंलिङ्गोचितसंबुद्ध्या मया विहिता संबुद्धिर्यस्याः सा त्वं व्रीडिता स्मितवत्यसि । कामशास्त्राभ्यासकौशलाद्विपरीतसुरतनकार्षीः, तत्स्मरेत्यर्थः । केलेः पुंस्त्वं पूर्वं दर्शितम् ॥

नीलदाचिबुकं यत्र मदाक्तेन श्रमाम्बुना ।
स्मर हारमणौ दृष्टं स्वमास्यं तत्क्षणोचितम् ॥ ९४ ॥

नीलदिति ॥ तत्रोक्तरूपे पुरुषायिते ललाटकपोललिखितपत्रवल्लीसंबन्धिना मदेन कस्तूर्याक्तेन मिश्रितेन कलुषितेन गच्छता श्रमाम्बुना आचिबुकं हनुभागमभिव्याप्य नीलन्नीलवर्णं भवदुपरिस्थितत्वादधोविलोकयतो मुखस्य कस्तूरीमिलितेन गलता श्रमजलेन चिबुकसंबन्धसौचित्यान्नीलं भवत् एवंभूतम्, अधोभागे वर्तमानस्य मम हृदि वर्तमाने मुक्ताहारमध्यमणौ तत्क्षणे विपरीतरताचरणसमये तत्क्षण उत्सवे वोचितमुकरीला योग्यम्, अथ च—पुरुषायितक्षणे तादृशस्य श्रमजलस्य कूर्चकान्तिदायित्वेनोचितम्, दृष्टं स्वमास्यं स्मर । 'मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः' इत्यभिधानान्मदशब्द एकदेशलक्षणया मृगमदवाची । नीलद्, आचारक्विबन्ताच्छता । 'नील वर्णे' धातुरिति केचित् ॥

स्मर तन्नखमन्त्रौ कस्तेधा(दा)दिति ते मृषा ।
ह्रीदैवतमलुम्पं यद्व्रतं रतपरोक्षणम् ॥ ९५ ॥

१ 'नीलज्जातश्मश्रु यत्रेति पाठो दुर्योज्यलाञ्छनः' इति सुखावबोधा ।

स्मरेति ॥ अहं अत्रालिखं तयोरौ को नखनखा(दा)दिकृतानीति नृपा असत्यभाषी सन् हीरेव दैवतं यस्य तत्, अत एव रवस्य परोक्षणं परोक्षकरणं ब्रह्मचर्यरूपं सुरतप्रतिबन्धकं व्रतं नियमं यदनुरूपं निवर्तितवान् तत्स्मर । परपुरुषसंबन्धशङ्कोत्पादनार्थं नृपानापणेन रसान्तरमुत्पाद्य लज्जाकृतं सुरतप्रतिबन्धकमनुद्योगं यन्निवर्तितवांस्तत्स्मरेत्यर्थः । व्रतं सदैवतं भवतीति हीदैवतमित्युक्तम् ॥

वनकेलौ त्वराश्वत्थदलं भूपतितं प्रति ।
देहि मह्यमुदस्येति मद्गिरा व्रीडितासि यत् ॥ ९६ ॥

वनेति ॥ त्वम् इति मद्गिरा यद्व्रीडितासि तत्स्मर । इति किम्—हे भैमि, त्वं वनकेलौ आरामविहारसमये भुवि पतितमश्वत्थदलं प्रति उद्दिश्य इदम् उदस्य पाणिनोत्क्षिप्य मह्यं देहीति । 'अश्वत्थपत्रसदृशं विपुलं च गुह्यम्' इति कामशास्त्रवचनाद्भूपतिताश्वत्थदलयाचनेन वराङ्गयाचनस्य सूचितत्वाद्व्रीडितासि तत्स्मरेति भावः ॥

इति तस्या रहस्यानि प्रिये शंसति सान्तरा ।
पाणिभ्यां पिदधे सख्याः श्रवसी ह्रीवशीकृता ॥ ९७ ॥

इतीति ॥ सा भैमी प्रिये इति पूर्वोक्तप्रकारेण तस्या भैम्या रहस्यानि एकान्तवृत्तानि शंसति सति ह्रीवशीकृता लज्जिता सती अन्तरा मध्य एवास्तनाम एव वचने पाणिभ्यां सख्याः कलायाः श्रवसी कर्णौ पिदधे आच्छादितवती । इतः परमप्य(वि)वक्षुरन्नपि रहस्यमस्यै कथयिष्यति, तदनया नाकर्णनीयमिति बुद्ध्या तस्याः कर्णौ स्थगयतीत्यर्थः ॥

कर्णपिधान एवोत्प्रेक्षते—

कर्णौ पीडयती सख्या वीक्ष्य नेत्रासितोत्पले ।
अप्यपीडयतां भैमीकरकोकनदे तु (नु) तौ ॥ ९८ ॥

कर्णाविति ॥ भैमीकरावेव कोकनदे रक्तोत्पले अपि कर्तारौ (?) सख्याः कलाया नेत्रे एवासितोत्पले तस्या एव कर्णौ पीडयती पश्यन्त्यौ वीक्ष्य तौ कलाकर्णौ कर्णेनुतौ अपीडयतां नु कलानेत्रनीलोत्पलयोरवकर्णपूरतया कर्णाक्रमणात्पीडाकरणमिव भैमी—कररक्तोत्पले अपि साक्षान्नेत्रनीलोत्पलसाहाय्यकाचरणबुद्ध्येव स्पर्धयेव वा (भैमीकरकोकनदे अपि) तत्कर्णौ पीडयामासतुः । किमिति भावः । सवर्णयोः साहाय्यकं स्पर्धा च युक्ता । पीडयती, 'वा नपुंसकस्य' इति नुमभावः ॥

पुनरप्यन्यथोत्प्रेक्षते—

तत्प्रविष्टं सखीकर्णौ पत्युरालपितं ह्रिया ।
पिदधाविव वैदर्भी स्वरहस्याभिसंधिना ॥ ९९ ॥

तदिति ॥ वैदर्भी सखीकर्णौ प्रविष्टं तत्पूर्वोक्तं रहस्यं पत्युरालपितं स्वरहस्यभेद-

१ 'वनकेलौ आरामविहारसमये' इति 'जीवातु' स्वतः सम्यग्व्याख्यानं स्यादिदम् । २ '९४ च—इत्थं स्य (उदस्य) देहीति भाविनि अश्वत्थस्य दलो...(?)...' इति सुखावबोधाव्याख्यानमिदम् ।

रकर्णाभ्यां सकाशाद्बहिर्मा गादिखभिसंधिनाभिप्रायेणेव ह्रिया पिदधौ आच्छादितवती। अन्यदपि गोप्यं वस्तु भाण्डे निक्षिप्यान्यो मा स ज्ञासीदिति तद्वारं पिधीयते ॥

तमालोक्य प्रियाकेलिं नले सोत्प्रासहासिनि ।
आरात्तत्त्वमवुद्ध्वापि सख्यः सिष्मियिरेऽपराः ॥ १०० ॥

तमिति ॥ आराद्दूरे स्थिता अप्यपराः सख्यस्तत्त्वं नलहासकारणमवुद्ध्वापि सिष्मियिरे जहसुः । कस्मिन्सति—नले तं पूर्वोक्तं प्रियायाः केलिमालोक्य सोत्प्रासहासिनि उत्प्रासेनोत्कर्षेन सह यथा तथा हसति सति । नलाट्टहासश्रवणमात्रेण सिष्मियिर इत्यर्थः ॥

दम्पत्योरुपरि प्रीत्या ता वराप्सरसस्तयोः ।
ववृषुः स्मितपुष्पाणि सुरभीणि मुखानिलैः ॥ १०१ ॥

दम्पत्योरिति ॥ ताः सख्य एव वरायामुर्वश्याद्यप्सरसस्तयोर्दम्पत्योरुपरि प्रीत्या प्रेमातिशयेन सुरभीणि स्मितान्येव पुष्पाणि ववृषुः । सर्वा अपि सख्यस्तावुभौ क्रीडन्तावहसुरित्यर्थः । मुखानिलसुरभित्वेन तासां पद्मिनीत्वं सूचितम् । तयोः, 'षष्ठ्यतसर्थ–' इति षष्ठी ॥

तदास्यहसिताज्जातं स्मितमासामभासत ।
आलोकादिव शीतांशोः कुमुदश्रेणिजृम्भणम् ॥ १०२ ॥

तदिति ॥ तस्य नलस्यास्यहसिताज्जातमासां सखीनां स्मितं शीतांशोरालोकात्प्रकाशाज्जातं कुमुदश्रेण्या जृम्भणं विकासनमिवाभासत । 'तदस्य' इति क्वचित्पाठः ॥

प्रत्यभिज्ञाय विज्ञाथ स्वरं हासविकस्वरम् ।
सख्यास्तासु स्वपक्षायाः कला जातबलाऽजनि ॥ १०३ ॥

प्रतीति ॥ अथ सखीसमूहहासानन्तरं विज्ञाऽतिचतुरा कला तासु सखीषु मध्ये स्वपक्षाया निजमित्रभूतायाः कस्याश्चित्सख्याः स्वरं हासेन विकस्वरं सुव्यक्तम्, अत एव—सोऽयं मत्सख्या एव स्वर इति प्रत्यभिज्ञाय परोक्षप्रत्यक्षोभयांशात्मकज्ञानविषयं कृत्वा जातं बलं यस्यास्तादृशी, भैमीप्रतारणार्थं ससहायोत्साहशक्तियुक्ता वाऽजनि । मत्पक्षीयाऽत्र वियतेऽतोऽस्याः सकाशान्मां मोचयिष्यति, शिष्टं वाकर्णयिष्यतीति साश्वासाभूदिति भावः । अन्योपि केनचित्प्रतिबद्धः स्वपक्षीयं दृष्ट्वा जातबलो भवति । सखीस्वरश्रवणं तु कर्णपिधानात्पूर्वमेव ज्ञातव्यम् । अन्यथा स्वरश्रवणानुपपत्तेः । भैमीकरयोः कोमलतरतया कर्णनिविडपीडने सामर्थ्याभावेन वा श्रवणोपपत्तिः ॥

साहूयोच्चैरथोचे तामेहि स्वर्गेण वञ्चिते ।
पिब वाणी सुधावेणीर्नृपचन्द्रस्य सुन्दरि ॥ १०४ ॥

सेति ॥ अथ स्वपक्षीयस्वरप्रत्यभिज्ञानानन्तरं सा कला तां स्वसखीमुच्चैस्तारस्वरं यथातथाहूय इति ऊचे । इति किम्—दूरस्थत्वात् हे स्वर्गसुखेन वञ्चिते सुन्दरि, एहि समीपमागच्छ, आगत्य त्वं नृप एवाह्लादकत्वाचन्द्रस्तस्य सुधावेणीरमृतप्रवाहरूपा वाणीः पिब सादर-

---

१ 'स्वपक्ष्याया इति दिगादित्वाद्यः । स्वपक्षाया इति पाठे–पक्षशब्दस्य नित्यपुंलिङ्गत्वात्तत्पुरुषासंभवाद्बहुव्रीहिः कार्यः' इति सुखाववोधा । २ 'स्वाचैताम्' इति मूलपुस्तकपाठः ।

माकर्णयेति स्वर्गेपि चन्द्रामृतपानेनेव विशिष्टं नलपरिहासवाक्श्रवणसुखं स्वर्गसुखमेव तदनुभवेत्यर्थः ॥

साशृणोत्तस्य वाग्भागमनल्पासक्तिमल्पपि ।
कलपग्रामालपनिर्घोषं बदरीव कृशोदरी ॥ १०५ ॥

सेति ॥ कलया आहूता अनल्पासक्तिरल्पपि अलन्तनैकट्यरहितापि यत्र स्थितौ किंचिच्छ्रूयते किंचिन्नेति तत्र स्थिता कृशोदरी सा कलासखी तस्य वाचो भागं शिष्टमंशमशृणोत् । कलाकर्णयोर्भैम्या पिहितत्वादाहूता सखी नलकथ्यमानरहस्यकथाशेषमश्रृणोदित्यर्थः । का कमिव—कृशोदरी कृशमध्या । अल्पजनेति यावत् । एवंभूता बदरी कल्पग्रामनाम्नो ग्रामस्यालपनिर्घोषं लोककलकलं तत्र पठतां वेदध्वनिं वा तमिव । बदरिकाश्रमस्थो लोकः मुनिजनस्थानभूतकल्पग्रामनिवासिनो जनस्य कोलाहलं शृणोतीति तौ(तै)र्थिकप्रसिद्धिः ॥

अथ स्वपृष्ठनिष्ठायाः शृण्वत्या निषधाभिधाः ।
नलमौलिमणौ तस्या भावमाकलयत्कला ॥ १०६ ॥

अथेति ॥ अथ कलासख्या नलवाक्यशेषश्रवणानन्तरं कला स्वपृष्ठे निष्ठा स्थितिर्यस्याः कर्णपिधानपरतया कलापश्चाद्भागे स्थितायाः, तथा—कलासखीं प्रति रहस्यं ब्रुवतो नैषधस्याभिधा वचनानि शृण्वत्यास्तस्या भैम्या भावं रहस्यकथनाद्धासकोपादिव्यञ्जकमुखचेष्टाविशेषं नलस्य मौलिमणौ शिरोरत्ने प्रतिबिम्बवशादाकलयद्ज्ञासीत् । ददर्शेत्यर्थः । नलेन कलासखीं प्रति रहस्ये उक्ते भैम्या हास्यकोपादिचेष्टां नलमौलिरत्ने प्रतिबिम्बितं सा कला ददर्श नलशृणोदित्यर्थः ॥

प्रतिबिम्बेक्षितैः सख्या मुखाकूतैः कृतानुमा ।
तत्क्रीडाद्यनुकुर्वाणा शृण्वतीवान्वमायि सा ॥ १०७ ॥

प्रतिबिम्बेति ॥ प्रतिबिम्बेन ईक्षितैः सख्याः पृष्ठस्थितया भैम्याः स्वपक्षसख्या मुखाकूतैर्व्रीडाहास्यादिसूचकमुखसंकोचविकासादिचेष्टितैः कृत्वा कृताऽनुमितिर्यया ताहङ्मुखविकारदर्शनात्प्रायेण नलेनैवमुक्तं स्यादित्येवंकृता नलवाक्यार्थसंभावना यया सा, तथा—तस्या भैम्याः स्वपक्षसख्या वा नलवाक्यानुरूपं क्रीडाद्यनुकुर्वती प्रतिबिम्बदर्शनादेवानुसंधेयादनिनयेनानुकुर्वाणा दर्शयन्ती सा कला भैम्यापाणिपिहितकर्णाऽपि तत्क्रीडाद्यनुकरणादेव भैमीवत्, सखीवद्वा नलवचनं शृण्वतीवान्वमानि(यि) भैमीनलाभ्यां संभाविता । तत्क्रीडादि, 'न लोक—' इति निषेधाद्वितीया । अनुकुर्वाणा, 'अनुपराभ्यां कृञः' इति परस्मैपदविधानाच्चानशापि 'ताच्छील्यवयोवचनशक्तिषु चानश्' इति ताच्छील्ये शक्तौ वा चानश् ॥

कारं कारं तथाकारमूचे साऽशृणवं तमाम् ।
मिथ्या वेत्थ गिरश्चैतश्चार्थाः स्युर्मम देवताः ॥ १०८ ॥

कारमिति ॥ सा कला तथा पूर्वोक्तं भैम्याः स्वपक्षसख्या या नलेनाभिनिर्दिष्टं मुखनेत्रहर्षादाकारं कारं कारं कृत्वा कृत्वा अथवा सर्वं कुर्वतीति यया प्रतीतिर्भवति तथाभिनयं कृत्वा इति ऊचे । इति किम्—अहं भवदीयं सर्वं ह्यानन्दमशृणवं तदिमां नैषधकर्णेन्द्र-

त्यसि । हे भैमि, त्वं भवद्वचनश्रवणसूचिका मम गिरो मिथ्या चेद्वेत्थ जानीषे । अनाकर्णितमप्याकर्णितमियं वदतीति मन्यसे चेत्तर्हि अभीष्टसिद्ध्यर्थं प्रत्यहं पूज्यमाना मम गौर्यादिष्टदेवता निष्फलाः स्युरिष्टदायिन्यो मा भूवन्निति मया शपथः क्रियत इति नलं प्रत्यवोचत् । अशृणवंतमाम्, 'तिङश्च' इति तमप् ॥

मत्कर्णभूषणानां तु राजन्निविडपीडनात् ।
व्यथिष्यमाणपाणिस्ते निषेद्धुमुचिता प्रिया ॥ १०९ ॥
इति सा मोचयांचक्रे कर्णौ सख्याः करग्रहात् ।
पत्युराश्रवतां यान्त्या मुधायासनिषेधिनः ॥ ११० ॥

मदिति ॥ इतीति । युग्मम् । सा कला इति पूर्वोक्तं नलं प्रत्युक्त्वा सख्या भैम्याः करग्रहात् पाणिभ्यां पीडनात्सकाशात्कर्णौ मोचयांचक्रे । अर्थाद्भैम्यैव प्रयोज्यया । 'तृतीयान्त' (पाठ)स्तु सष्टार्थः । किंभूतायाः—कर्णपिधानरूपान्मुधायासाद्वृथाप्रयासान्निषेधिनो निवारयितुः पत्युराश्रवतां वचनकारित्वं यान्त्या गच्छन्त्याः । तद्वचनकारिण्या इत्यर्थः । अयमहं कलावचनमाकर्ण्य कर्णपिधानप्रयासो व्यर्थ इति निविडपीडनात्तव पाणिपीडैव भविष्यतीति तत्कर्णौ मुञ्चेति नलवचनाद्भैमी तत्कर्णावमुञ्चदित्यर्थः । इति किम् । हे राजन्, मत्कर्णपिधानवशान्मत्कर्णभूषणानां निविडपीडनाद्धेतोस्तु पुनः सौकुमार्यातिशयादितः परमपि व्यथिष्यमाणौ पीडां प्राप्स्यन्तौ पाणी यस्यास्तादृशी ते तव प्रिया निषेद्धुमुचितेति । कर्णपिधानफलं नास्ति पिधानप्रयासो व्यर्थः प्रत्युतास्याः पाणिपीडा भविष्यतीतीयं त्वया निषेध्येत्यर्थः ॥

श्रुतिसंरोधजध्वानसंततिच्छेदतालताम् ।
जगाम झटिति त्यागस्वनस्तत्कर्णयोस्ततः ॥ १११ ॥

श्रुतीति ॥ ततः कर्णमोचनानन्तरं ततो विस्तृतो वा तस्याः कलायाः कर्णयोः झटिति शीघ्रं त्यागस्तस्माच्छीघ्रहस्तमोचनाज्जातो यष्टादिस्वनः स श्रुत्योः संरोधान्निविडपीडनाज्जातो यो ध्वानः शब्दस्तस्य संततिरविच्छिन्नता निरन्तरसमुत्पन्नो गुमुगुमारव इति यावत्, तस्य छेदे विरतौ तालतां हस्ततालद्वयवाद्यपरिच्छेद्यगीतादिक्रियामानभूतकालतां जगाम । झटिति-कृतकर्णमोचनादनुभूयमानयष्टादिशब्दः, कर्णपिधानसमयेऽनुभूयमानगुमुगुमारवविरामज्ञापकोऽभूदित्यर्थः । एतच्च स्वप्रत्यक्षसिद्धम् ॥

सापसृत्य कियद्दूरं मुमुदे सिष्मिये ततः ।
इदं च तां सखीमेत्य ययाचे काकुभिः कला ॥ ११२ ॥

सेति ॥ सा कला ततोऽनन्तरं तस्माद्भैम्युपवेशनस्थानाद्वा सकाशात्कियत्किंचिद्दूरमपसृत्य गत्वा मुमुदे सिष्मिये । प्रतारणकौशलवशाज्जहास च । तां स्वसखीं श्रुतनलवचनामेत्येदं वक्ष्यमाणं काकुभिरर्थविशेषव्यञ्जकैरुच्चनीचैर्ध्वनिविकारैः कृपणभाषणैर्ययाचे च । अवोचदिति यावत् ॥

अभिधास्ये रहस्यं ते यदश्रावि मयानयोः ।
वर्णयाकर्णितं मह्यमेह्यालि विनिर्मीयताम् ॥ ११३ ॥

१ 'स्फोटे' इति पाठे—'संप्रने दिलस्थिः' इति सुखावबोधा ।

अभिधास्य इति ॥ हे सखि, मयाऽनयोर्यद्रहस्यमश्रावि, अहं तद्रहस्यं तुभ्यमभिधास्ये, नलकर्णपिधानानन्तरमनयो रहस्यं त्वया आकर्णितं तत्त्वं मह्यं वर्णय कथय एहि शीघ्रमागच्छ विनिनीयतां परिवृत्तिः क्रियताम्। मह्यम्, 'क्रियया यमभिप्रैति—' इति संप्रदानत्वम्। निजवाक्यत्वादन्वादेशाभावान्न मदादेशः ॥

वयस्याभ्यर्थनेनास्याः प्राकूटश्रुतिनाटने ।
विस्मितौ कुरुतः स्मैतौ दम्पती कम्पितं शिरः ॥ ११४ ॥

वयस्येति ॥ अश्रुतरहस्यश्रवणार्थमाहूताया वयस्याया अभ्यर्थनेन स्वाश्रुतश्रवणप्रार्थनेन हेतुनास्याः कलायाः 'अशृणवंतमाम्' इत्यादि प्राकूटश्रुतिः पूर्वं कृतं मिथ्याशिरःकम्पादिपूर्वं श्रवणं तस्या नाटनेऽभिनये विस्मितौ अनया कपटमावां प्रतारितौ स्वः दृष्टं दृष्टमिति मिथोवचनपूर्वं साश्चर्यौ तौ दम्पती शिरः कम्पितं कुरुतः स्म। नाटने, चौरादिकान्नाटेर्नपुंसके भावे ल्युट् ॥

तथालिमालपन्तीं तामभ्यधान्निषधाधिपः ।
आस्स्व तद्वञ्चितौ स्वश्चेन्मिथ्याशपथसाहसात् ॥ ११५ ॥

तथेति ॥ निषधाधिपः तथा रहस्यविनिमयकथनप्रार्थनरूपेण स्वपक्षभूतामालिं प्रत्यालपन्तीं तां कलामभ्यधादवोचत्। हे कले, मिथ्याशपथरूपात्साहसादविचारितकारित्वाद्धेतोर्भेदावां कर्णमोचनार्थमेव तथालीकवचनोक्त्या वञ्चितौ प्रतारितौ स्वो भवावस्तर्हि आस्स्व तिष्ठ। तत्तर्हि आस्स्वेति मित्रं वा। प्रतारणनिमित्तां तर्जनोक्तिमूचे इत्यर्थः ॥

प्रत्यालापीत्कलापीमं कलङ्कः शङ्कितः कुतः ।
प्रियापरिजनोक्तस्य त्वयैवाद्य नृपोद्यता ॥ ११६ ॥

प्रतीति ॥ कलापीमं नलं प्रति उद्दिश्यालपीदवोचत्। हे राजन्, त्वया प्रियाया भैम्याः परिजनस्य सेवकभूताया ममोक्तस्य वचनस्यैतावत्सु दिनेषु मध्येऽद्यैव नृपोऽद्यता मिथ्याभाषणतारूपः कलङ्को दोषः कुतः कस्माद्धेतोः शङ्कितः संभावितः, तत्कारणं कथयेति। सत्यवादिन्या भैम्याः परिचारिकाया ममालीकभाषित्वं संभावयितुमयुक्तमित्यर्थः। भैमी राज्ञिहृत्तमपि सुरतमत्यदग्रेऽहृत्तमिति कथयति। परिजनश्च प्रभुसदृशो युक्तः। तन्मालीकभाषणं मम गुण इव न तु कलङ्क इत्यपि। 'परिजनस्योक्ते' इति च पाठः ॥

स्ववचनस्य सत्यतां प्रतिपादयति—

सत्यं खलु तदाश्रौषं परं गुनुगुनारवम् ।
शृणोमीत्येव चावोचं नतु त्वद्वाचमित्यपि ॥ ११७ ॥

सत्यमिति ॥ अहं तदा श्रवणपिधानकाले खलु निश्चितमश्रौषमिति सत्यम्, परं केवलं गुनुगुनारवं न तु त्वद्वचनम्। तथापि—अश्रवणमात्रे सत्येनैवेत्यर्थः। तत्र श्रवणकाले वचनेऽपि तदनेकत्वेऽपि कर्णनिवेशनादहं शृणोमीत्येव चावोचम्, न तु त्वद्वाचमिति विशेषमन्ववोचम्। शपथोऽपि साधारणश्रवणमात्रविषयत्वात्तस्य एवेति न कथंचिदपि ममालीकभाषित्वं तदा

१ 'शिरःकम्पं चक्रतुरिति विस्मयार्थोक्तिः' इति जीवातुः।

शङ्कनीयमित्यर्थः । अश्रृणवंतमामिति तत्रोक्तत्वादत्र शृणोमीति श्रवणमात्रोपलक्षणपरं न तु भूतवर्तमानपरमिति ज्ञातव्यम् ॥

'व्यर्थाः स्युर्मम देवताः' (२०।१०८) इत्यत्र देवताशब्दस्यान्यार्थत्वेन 'शपथो मया न कृत एव' इति समर्थयते—

आमन्त्र्य तेन देव त्वां तद्वैयर्थ्यं समर्थये ।
शपथः कर्कशोदर्कः सत्यं सत्योपि दैवतः ॥ ११८ ॥

आमन्त्र्येति ॥ हे राजन्, अहं तेन 'व्यर्थाः स्युः-'(२०।१०८) इत्यादिवाक्येन देवेति त्वामामन्त्र्य संबोध्य ताः श्रवणप्रतिपादका अश्रृणवंतमामित्यादयो मम गिरो व्यर्था अलीकाः स्युः, यथा त्वं मिथ्याभूता वेत्थ तादृश्य एव कामं स्युरिति अश्रृणवंतमामित्यादीनां त्वद्वचनप्रतिपादिकानामपि गिरां वैयर्थ्यमेव समर्थये सिद्धान्तत्वेन प्रतिपादयामि । अथ च— या गुमुगुमारवरूपा अश्रौषम्, याश्च त्वं मिथ्या वेत्थ तासां गिरामनुकरणशब्दत्वादर्थशून्यत्वान्निरर्थकत्वाद्वैयर्थ्यं समर्थये । पूर्वं कृतस्य शपथस्यान्यनर्थं कृत्वा कथनफलमाह—'सत्येनापि शपेद्यस्तु देवाग्निगुरुसंनिधौ । तस्य वैवस्वतो राजा धर्मस्यार्थं निहन्तति ॥' इत्यादिमन्वादिवचनप्रामाण्याद्दैवतासंबन्धी सत्योपि शपथः सत्यं निश्चितं यस्मात्कर्कशोदर्कः दारुणपरिणामः, किं पुनरसत्यः तस्मादिति ज्ञात्वा मया शपथो न कृत एव परं देवस्यैव शपथभ्रान्तिर्जातेत्यर्थः । अत एव त्वां देवेत्यामन्त्रितवती । दैवतः सत्योपि शपथः कर्कशोदर्क इति यन्मन्वादिभिरुक्तम्, तत्सत्यं यस्माच्छपथभ्रान्त्या संप्रत्येव त्वया मयि कलङ्क आरोपित इत्यर्थ इति वा ॥

इदानीम् 'आर्जवं हि कुटिलेषु न नीतिः' इति न्यायादलीकभाषणेऽप्यदोषत्वमाह—

असंभोगकथारम्भैर्वञ्चयेथे कथं नु माम् ।
हन्त सेयमनर्हन्ती यन्न विप्रलभे युवाम् ॥ ११९ ॥

असंभोगेति ॥ हे भैमीनलौ, युवां 'भैमी मह्यं स्प्रष्टुमपि न ददाति, नलेनाहं कदा[illegible] न स्पृष्टापि' एत्यसंभोगकथारम्भैरन्योन्यसंभोगाभावविषयवृत्तान्तारम्भैर्मिथोनुभूतसु[illegible]भरनिह्नवैः कृत्वा मां कथं नु कथमिव वञ्चयेथे प्रतारयथः । यत् तु पुनः अहं कर्मीभूतो युवां विप्रलभे प्रतारयामि सेयमनर्हन्ती अयोग्या अनुचितकारिणी हन्त कष्टं चित्रं वेति काकुः । भवद्भ्यामहं वञ्चनीया मया तु भवन्तौ न वञ्चनीयौ का वा रीतिरियम्, वञ्चनकरणसाम्यात्समदोषगुणौ, 'युवामहं' चेति भावः । अर्हन्तीति 'अर्हः प्रशंसायाम्' इति शतरि उगित्वान्ङीपि नुम् । युवां कर्तृत्वेन (कर्मत्वेन) चावृत्त्या योज्यम् ॥

कर्णे कर्णे ततः सख्यौ श्रुतमाचख्यतुर्मिथः ।
मुहुर्विस्मयमाने च स्मयमाने च ते बहु ॥ १२० ॥

कर्ण इति ॥ ततः स्ववञ्चकत्वदोषपरिहारानन्तरं भैमीसुरतप्रागल्भ्ये मुहुर्विस्मयमाने

---

१ 'अनार्हन्तीतिपाठे'—यत्पुनर्युवामहं विप्रलभे सेयमनार्हन्ती अयोग्यता । अर्थान्ममेत्यर्थः' इति सुखावबोधा ।

आश्चर्यं कुर्वाणे च बहु नितरां स्मयमाने हसन्त्यौ च ते कलाकलासखीलक्षणे सख्यौ मिथो भैम्या वा सहचर्यौ मिथोऽन्योन्यस्य कर्णे कर्णे स्वश्रुतं स्वरहस्यमाचख्यतुः। चावन्योन्यसमुच्चये। अन्योन्यकर्णापेक्षया वीप्सायां द्विर्वचनम्॥

अथाख्यायि कलासख्या कुप्य मे दमयन्ति मा।
कर्णाद्द्वितीयतोऽप्यस्याः संगोप्यैव यदब्रवम्॥ १२१॥

अथेति॥ अथान्योन्यकर्णे तद्रहस्यकथनानन्तरं कलायाः सख्या कलयैव सख्या वा भैमी आख्यायि इति उक्ता। हे दमयन्ति, त्वं मे मह्यं मा कुप्य। अहं यदब्रवं तदस्याः द्वितीयतोऽपि कर्णात्संगोप्यैवाब्रवम्। अस्या एकेन कर्णेन श्रुतं नतु द्वितीयेनेति लौकिकादाभाणकात्परिहासोऽपि। 'एवम्' इति पाठे—एवंप्रकारेण संगोप्येति। कुप्य मे, 'क्रुधद्रुह–' इति संप्रदानत्वम्। मा निरनुबन्धकः। अब्रवम्, लङ्॥

प्रियः प्रियामथाचष्ट दृष्टं कपटपाटवम्।
वयस्ययोरिदं तेऽस्मान्मा सखीष्वेव विश्वसीः॥ १२२॥

प्रिय इति॥ अथ सख्युक्त्यनन्तरं प्रियः प्रियामाचष्ट इत्यूचे। इति किम्—हे भैमि, त्वं वयस्ययोः कपटपाटवमिदं वचनचातुर्यं दृष्टमनुभूतं यतः, तस्मात्सखीष्वेव मा विश्वसीः किं तु मयि कदाचिद्विश्वसिहि। सखीषु मैव विश्वसीः, किंतु मय्येवेति वा। यद्वा—मा विश्वसीरेव॥

आलापि कलयापीयं पतिर्नालपति क्वचित्।
रहस्येऽसौ रहस्यं तत्सभ्ये विस्रम्भमीदृशि॥ १२३॥

आलापीति॥ कलयापीयं भैमी मधुरकाकूक्त्या आलापि इत्युक्ता। इति किम्—हे वयस्ये, असौ तव पतिः क्वचिदपि देशे जने वा त्वद्रहस्यं नालपति, किंतु गोपायत्येव। तत्तस्मादीदृशि एतत्सदृशेऽन्यस्मिन्नपि सभ्ये साधौ विस्रम्भं विश्वसनीयं त्वया किं पुनरेतस्मिन्निति विरुद्धलक्षणया–अयं सर्वस्याग्रे त्वद्रहस्यं प्रकटयत्येव, अतस्त्वयापि तस्मिन्नेतत्तुल्येऽन्यस्मिन्नपि नैव विश्वसीरिति। नालपति, अपि त्वालपति। विस्रम्भमपि तु नेति काक्वा। 'अलापि' इत्यपि क्वचित्पाठः॥

इति व्युत्तिष्ठमानायां तस्यामूचे नलः प्रियाम्।
भण भैमि बहिः कुर्वे दुर्विनीते गृहादमुम्॥ १२४॥

इतीति॥ नलः तस्यां कलायां इत्युक्तप्रकारेण प्रतिबन्द्या व्युत्तिष्ठमानायां प्रतिरोधकारिण्यां सत्यां प्रियां प्रतीत्यूचे। इति किम्—हे भैमि, अहं दुर्विनीते दुष्टे नितरां विश्वासघातिन्यौ अमू सख्यौ गृहाद्बहिः कुर्वे निष्कासयामि भण आज्ञापय। एतेन नलस्य संभोगेच्छुता व्यज्यते। तदर्थमेव कुर्वे इति लट्। 'व्युत्थानं प्रतिरोधे च विरोधाचरणेऽपि च' इत्यभिधानादूर्ध्वकर्मत्वाभावात् 'उदोऽनूर्ध्वकर्मणि' इति तङ्। व्युत्तिष्ठमानायां विरोधाचरणं कुर्वाणायां वा॥

शिरःकम्पानुमत्याथ सुदत्या प्रेरितः प्रियः।
चुलुकं तुच्छमुत्सर्प्य सख्योः सलिलमक्षिपत्॥ १२५॥

शङ्कनीयमित्यर्थः । अशृणवंतमामिति तत्रोक्तत्वादत्र शृणोमीति श्रवणमात्रोपलक्षणत्वं न भूतवर्तमानपरमिति ज्ञातव्यम् ॥

'व्यर्थाः स्युर्मम देवताः' (२०।१०८) इत्यत्र देवताशब्दस्यान्यार्थत्वेन 'शपथो नच न कृत एव' इति समर्थयते—

आमन्त्र्य तेन देव त्वां तद्वैयर्थ्यं समर्थये ।
शपथः कर्कशोदर्कः सत्यं सत्योऽपि दैवतः ॥ ११८ ॥

आमन्त्र्येति ॥ हे राजन्, अहं तेन 'व्यर्थाः स्युः–'(२०।१०८) इत्यादिवाक्येन देवेति त्वामामन्त्र्य संबोध्य ताः श्रवणप्रतिपादका अशृणवंतमामित्यादयो मम गिरो व्यर्था अलीकाः स्युः, यथा त्वं मिथ्याभूता वेत्थ तादृश्य एव कामं स्युरिति अशृणवंतमामित्यादि रवद्वचनप्रतिपादिकानामपि गिरां वैयर्थ्यमेव समर्थये सिद्धान्तत्वेन प्रतिपादयामि । अथ च— या गुमुगुमारवरूपा अश्रौषम्, याश्च त्वं मिथ्या वेत्थ तासां गिरामनुकरणशब्दत्वादर्थशू न्यत्वान्निरर्थकत्वाद्वैयर्थ्यं समर्थये । पूर्वं कृतस्य शपथस्यान्यनर्थं कृत्वा कथनफलमाह आह—'सत्येनापि शपेद्यस्तु देवाग्निगुरुसंनिधौ । तस्य वैवस्वतो राजा धर्मस्यार्धं निकृ न्तति ॥' इत्यादिमन्वादिवचनप्रामाण्याद्देवतासंबन्धी सत्योऽपि शपथः सत्यं निश्चितं यस्मात्कर्कशोदर्कः दारुणपरिणामः, किं पुनरसत्यः तस्मादिति ज्ञात्वा मया शपथो न कृत एव परं देवस्यैव शपथभ्रान्तिर्जातेत्यर्थः । अत एव त्वां देवेत्यामन्त्रितवती । दैवतः सत्योऽपि शपथः कर्कशोदर्क इति यन्मन्वादिभिरुक्तम्, तत्सत्यं यस्माच्छपथभ्रान्त्या संभ्रमेण त्वया मयि कलङ्क आरोपित इत्यर्थ इति वा ॥

इदानीम् 'आर्जवं हि कुटिलेषु न नीतिः' इति न्यायादलीकभाषणेऽप्यदोषत्वमाह—

असंभोगकथारम्भैर्वञ्चयेथे कथं नु माम् ।
हन्त सेयमनर्हन्ती यन्न विप्रलभे युवाम् ॥ ११९ ॥

असंभोगेति ॥ हे भैमीनलौ, युवां 'भैमी मह्यं स्प्रष्टुमपि न ददाति, नलेनाहं कदाचिदपि न स्पृष्टापि' एत्यसंभोगकथारम्भैरन्योन्यसंभोगाभावविषयवृत्तान्तारम्भैर्निर्धोनुभूतसुरतभरनिह्नवैः कृत्वा मां कथं नु कथमिव वञ्चयेथे प्रतारयथः । यत् तु पुनः अहं कर्मीभूतो युवां विप्रलभे प्रतारयामि सेयमनर्हन्ती अयोग्या अनुचितकारिणी हन्त कष्टं चित्रं वेति काकुः । भवद्भ्यामहं वञ्चनीया मया तु भवन्तौ न वञ्चनीयौ का वा रीतिरियम्, वञ्चनकरणसाम्यात्समदोषगुणौ, 'युवामहं' चेति भावः । अर्हन्तीति 'अर्हः प्रशंसायाम्' इति शतरि उगित्त्वान्ङीपि नुम् । युवां कर्तृत्वेन (कर्मत्वेन) चावृत्त्या योज्यम् ॥

कर्णे कर्णे ततः सख्यौ श्रुतमाचख्यतुर्मिथः ।
मुहुर्विस्मयमाने च स्मयमाने च ते बहु ॥ १२० ॥

कर्ण इति ॥ ततः स्ववञ्चकत्वदोषपरिहारानन्तरं भैमीनुरतप्रागल्भ्ये मुहुर्विस्मयमाने

---

१ 'अनार्हन्तीतिपाठे'—यत्पुनर्युवामहं विप्रलभे सेयमनार्हन्ती अयोग्यता । अर्थान्ममेत्यर्थः' इति सुखावबोधा ।

शिर इति ॥ अथोक्तविषयप्रश्नानन्तरं मुदत्या भैम्या शिरःकम्पेन यां सखीनिष्कासनस्यानुमतिरनुज्ञा तया कृत्वा प्रीणितो जनितानन्दः प्रियः सख्योर्विषये तुच्छं रिक्तं चुलकमुत्सर्प्योद्यम्य वरुणवरेण प्राप्तं सलिलं तन्निष्कासनार्थमक्षिपत्। सख्योर्दुष्टत्वाच्छिरःकम्पेन भैम्या तद्बहिःकरणमङ्गीकृतम्। नलस्तु स्वाशयानुसारेण भैम्यपि संभोगेच्छयैवैता बहिः कर्तुमिच्छति मत्संभोगोऽनुमतोऽस्या इति संतुष्टः, अत एव तन्निर्गमनार्थं जलं निक्षिप्तवानिति भावः। शिरःकम्प एवानुमतिर्यस्यास्तया मुदत्येति वा ॥

तच्चित्रदत्ताचित्ताभ्यामुच्चैः सिचयसेचनम्।
ताभ्यामलम्भि दूरेऽपि नलेच्छापूरिभिर्जलैः ॥ १२६ ॥

तदिति ॥ तुच्छचुलुकमोचनमात्रेण जलसेचनात् तेन नलेन चित्रे आश्चर्ये दत्तं स्थापितं चित्तं ययोस्ताभ्यां सखीभ्यां तुच्छं चुलुकं नलेच्छामात्रेण पूरयन्ति सर्वमाप्लावयन्ति तच्छीलैः परिपूर्णतरैर्जलैः कृत्वा उच्चैर्नितरां सिचयस्य वस्त्रस्य सेचनमार्द्रीभावः अलम्भि प्रापि ॥

वरेण वरुणस्यायं सुलभैरम्भसां भरैः।
एतयोः स्तिमितीचक्रे हृदयं विस्मयैरपि ॥ १२७ ॥

वरेणेति ॥ अयं नलः वरुणस्य वरेण सुलभैरनायासलभ्यैरम्भसां भरैः पूरैः, तथाकस्मिकतद्दर्शनप्रभवैर्विस्मयैराश्चर्यैरपि कृत्वा एनयोः सख्योः क्रमेण हृदयमुरःस्थलमान्तरं च स्तिमितीचक्रे पूर्वमनार्द्रमप्यार्द्रं चक्रे, तथा—अनिश्चलमपि निश्चलीचक्रे। नीरपूरसेकेनातितरां साश्चर्ये जाते इत्यर्थः। 'तिम ष्टिम आर्द्रीभावे' ॥

तेनापि नापसर्पन्त्यौ दमयन्तीमयं ततः।
हर्षेणादर्शयत्पश्य नन्विमे तन्वि मे पुरः ॥ १२८ ॥
क्लिन्नीकृत्याम्भसा वस्त्रं जैनप्रव्राजितीकृते।
सख्यौ सक्षौमभावेऽपि निर्विघ्नस्तनदर्शने ॥ १२९ ॥

तेनेति ॥ क्लिन्नीकृत्येति। युग्मम्। ततो जलसेकानन्तरमयं नलस्तेन तावता जलसेकेनापि गृहाद्बहिर्नापसर्पन्त्यौ निर्गच्छन्त्यौ ते सख्यौ कुचदर्शनाज्जातेन हर्षेण दमयन्तीमदर्शयत्। ननु तन्वि, त्वं मे पुरः इमे सख्यौ पश्य। किंभूते सख्यौ—अम्भसा कर्तृभूतेन, करणभूतेन कर्तृभूतेन वा मया वसनं क्लिन्नीकृत्यार्द्रीकृत्य जैनप्रव्रजितीकृते दिगम्बरपरिव्राजिकात्वं प्रापिते। यतः—सक्षौमभावे दुकूलसाहित्ये सत्यपि निर्विघ्नमन्तरायरहितं स्तनदर्शनं ययोस्ते। सूक्ष्मतरे वस्त्रे जलसिक्ते निरन्तरमङ्गदर्शनं भवति। नग्नप्राये एते सख्यौ ममाग्रे विलोकयेति तयोर्लज्जात्याजनद्वारा बहिर्निर्गमनार्थं कुचदर्शनोपलक्षकपाणिचेष्टाभिनयेनादर्शयदित्यर्थः[१]। दृशेर्बुद्ध्यर्थत्वाद्दमयन्तीमित्यणौ कर्तुर्णौ कर्मत्वम्। जैनानां दिगम्बराणां प्रव्राजिता प्रव्राजिका। अताद‍ृश्यौ ताद‍ृश्यौ कृते इति च्विः ॥

अम्बुनः शम्बरत्वेन मायैवाविरभूदियम्।
यत्पटावृतमप्यङ्गमनयोः कथयत्यदः ॥ १३० ॥

---

१ इत्तेनेति पाठे—'कुचदर्शनोपलक्षकपाणिचेष्टाभिनयेन' इति कलिकातामुद्रितटीकायामधिकम्।

उक्तेरिति ॥ अथ राजा ताः सखीरुद्दिश्य ... वक्ष्यमाणप्रकारेणोचे हे सख्यः, यो युष्माकमिमं सखी युष्मानिदं ... प्रमाणमाह । एताभ्यां मम मनो रहस्यं युक्-मित्येतावत्, मया तु पुनरनयोः सख्योस्तन्मनो गुह्यमतं इदम् । 'श्रुतादृष्टं बलवत्' इति न्यायादेताभ्यामहमेव वञ्चयामीति न काऽपि मे भीतिरिति वक्ष्यमाणभैमीवचनानुसारेण नलोऽवोचदित्यर्थः । 'राजा' इति पाठे—ताः प्रति राजा ऊचे इत्यर्थः । न इत्यादुक्त्या पर्यव-सीयतेऽन्तम् ॥

मद्विरोधितयोर्वाचि न श्रद्धातव्यमेतयोः ।
अभ्यषिञ्चदिमे मायामिथ्यासिंहासने विधिः ॥ १३५ ॥

मदिति ॥ हे सख्यः, मद्विनिर्वासनानुमतिदानात् मया विरोधितयोः कृतवैरयोरेतयोः सख्योर्वाचि न श्रद्धातव्यं सत्यबुद्धिर्न कार्या । विरोधिनो हि प्रायेणासत्यमेव वदन्तीत्यर्थः । किंच विधिर्ब्रह्मा इमे सख्यौ मायानां कपटानां मिथ्या असत्यानां च सिंहासने कपटासत्यसाम्राज्याधिपत्येऽभ्यषिञ्चत् । योऽनयोर्मध्ये एको दृश्यते स नलकृतो मायामिथ्यासिंहासना-भिषेक एवेति भैमी मन्यत इत्यर्थः । तस्मादसतीभिरेतयोर्वचसि न विश्वसनीयमिति भावः । श्रद्धातव्यम्, अपितु न कथंचिदिति वार्थः ॥

शत्रुवचसि न विश्वसनीयमित्येतदेवार्थान्तरन्यासेन समर्थयते—

धौतेऽपि कीर्तिधाराभिश्चरिते चारुणि द्विपः ।
मृषामषीलवैर्लक्ष्म लेखितुं के न शिल्पिनः ॥ १३६ ॥

धौतेऽपीति ॥ कीर्तिधाराभिः कीर्तिपूरैर्धौते अत एव चारुणि मनोज्ञे धवले एवंवि-धेऽपि द्विपश्चरिते मृषामषीलवैरसत्यलक्षणमषीलेशैः कृत्वा लक्ष्म कलङ्कं लेखितुं के जनाः शिल्पिनश्चतुरा न भवन्ति । अपितु सर्वेऽप्यलीकदोषारोपं कुर्वन्त्येवेति मद्विरोधितयोरेतयो-र्वचसि न विश्वसनीयमित्यर्थः । अन्येऽपि शिल्पिनो जलधाराक्षालिते रमणीये कुड्यादौ मष्यादिवर्णकैश्चित्रं लिखन्ति । के द्विपः शिल्पिनो नेति वा ॥

ते सख्यावाचचक्षाते न किंचिद् ब्रूवहे बहु ।
वक्ष्यावस्तत्परं यस्मै सर्वा निर्वासिता वयम् ॥ १३७ ॥

ते इति ॥ ततस्ते सख्यौ इति आचचक्षाते ऊचतुः । इति किम्—आवामन्यत्किंचिद्ब-ह्वधिकं न ब्रूवहे । किंतु यस्मै प्रयोजनाय सर्वा वयं युवाभ्यां गृहाद्बहिर्निष्कासितास्तदेव परं केवलमावां वक्ष्यावो वदिष्यावः सर्वेषामग्रे 'सुरतार्थं वयं निष्कासिताः' इति कथयिष्यावो न त्वन्यत्किंचिदिति ॥

स्थापत्यैर्न स वित्तस्ते वर्षीयस्त्वचलत्करैः ।
कृतामपि तथावाचि करकम्पेन वारणाम् ॥ १३८ ॥

स्थापत्यैरिति ॥ ते सख्यौ तथावाचि सुरतार्थं वयं निष्कासिता इति वचने विषये स्थापत्यैः सौविदल्लैर्नपुंसकैः करकम्पेन कृतामपि वारणां निषेधं न वित्तः स न जानीतः त्व

१ 'विराधितयोरिति पाठेऽपि स एवार्थः । विपूर्वो राधिर्विरोधार्थ' इति । २ 'श्रद्धासध्यमिति पाठस्त्व-शुद्ध एव' इति च मल्लिनाथः ।

यस्माद्वर्षीयस्त्वेनातिवार्धकेन चलन्तः करा येषां तैः । वार्धकातिशयजनितवातदोषवशेन स्वाभाविककरकम्पनभ्रान्त्या कृतमपि निषेधं न वित्तः स्मेत्यर्थः । 'सौविदल्लाः कञ्चुकिनः स्थापत्याः सौविदाश्च ते' इत्यमरः । अतिशयेन वृद्धो वर्षीयान् । ईयसुनि 'प्रियस्थिर—' इति वर्षादेशः ॥

अपयातमितो धृष्टे धिग्वामश्लीलशीलताम् ।
इत्युक्ते चोक्तवन्तश्च व्यतिद्राते स्म ते भिया ॥ १३९ ॥

अपेति ॥ हे धृष्टे अतिनिर्लज्जे, सख्यौ युवामितो गृहादपयातं निर्गच्छतम् । यस्माद्वां युवयोरश्लीलशीलतां ग्राम्यभाषणस्वभावत्वं धिक् निन्द्यमिति तैः स्थापत्यैरुक्ते गदिते ते सख्यौ तेभ्यो मारणभिया व्यतिद्राते स्म पलायांचक्रतुः । एवमुक्तवन्तस्ते कञ्चुकिनश्च व्यतिद्राते स्म पलायांचक्रुः । तयोः पलायमानयोः पश्चाल्लगन्ति स्म । तयोः संभोगेच्छुतां ज्ञात्वा सखीतर्जनव्याजेन तेऽपि निर्गता इति भावः । ते इति, व्यतिद्राते इति च द्विवचनबहुवचनश्लेषः । इत्युक्ते सतीति वा । व्यतिद्राते वचनत्रयेऽपि तुल्यं रूपम् । द्रातेः परस्मैपदित्वादात्मनेपदं चिन्त्यम् । व्यतिद्रान्ति स्मेति पठनीयम् । इत्युक्ते ते ते उक्तवन्तश्च सर्वे व्यतिद्रान्ति स्मेत्यर्थः ॥

आह स्म तद्गिरा ह्रीणां प्रियां नतमुखीं नलः ।
ईदृग्भण्डसखी कापि निस्त्रपा न मनागपि ॥ १४० ॥

आहेति ॥ नलः सुरतार्थं सर्वे वयं निर्वासिता इति सख्योर्गिरा ह्रीणां लज्जिताम्, अत एव—नतमुखीं प्रियामित्याह स्म । इति किम्—ईदृशोऽश्लीलभाषणशीला भण्डा निर्लज्जाः सख्यो यस्यास्त्वादृशी कापि(क्वपि का) मनागपि निस्त्रपा निर्लज्जा न, अपितु सखीतुल्या त्वमेव । 'समानशीलव्यसनेषु सख्यम्' इति न्यायादनुरूपयोर्हि सख्यं युक्तमिति त्वमपि लज्जां मुञ्चेति सकामस्य नलस्य वचः । भण्डसखीकापि ईदृक् कलासदृशी न । त्वं तु मनागपि निस्त्रपा नासीति वा भण्डस्य निर्लज्जत्वं भवत्येव । सखीका, नद्यन्तत्वात्कप् । मनागसीति पाठः तदावृत्त्याऽपिशब्दो योज्यः ॥

अहो नापत्रपाकं ते जातरूपमिदं मुखम् ।
नातितापार्जनेऽपि स्यादितो दुर्वर्णनिर्गमः ॥ १४१ ॥

अहो इति ॥ अहो भैमि, ते इदं मुखं जातं रूपं सौन्दर्यं यस्यैवंविधं तदपत्रपाकं गतलज्जं न भवति किंतु सलज्जमेव । क्षीणां तु लज्जैव महद्भूषणमित्यर्थः । नापत्रपाकमिति नञ्नात्वेनैकपदं वा । अथ च—पत्राणां नागवल्लीदलानां पाकः फलभूतः पूगादियोगजन्यो रागः स नास्ति यस्य तदपत्रपाकं तादृशं न भवति ताम्बूलरागरहितमिति यावत् । अत एव —नितरां जातलावण्यम् । अथ च—सुन्दरमपि नापत्रपाकं सलज्जम् । अहो चित्रम् । असुन्दरं हि सलज्जं भवति स्वं न दर्शयति, इदं तु सुन्दरमपि स्वं न दर्शयतीत्यर्थः ।

---

१ 'द्रा कुत्सायां गतौ' इति धातोर्लटि 'कर्तरि कर्मव्यतिहारे' इत्यात्मनेपदम्' इति जीवातुः । 'न गतिहिंसार्थेभ्यः' इत्यात्मनेपदनिषेधश्चिन्त्य एव । 'इतरेतरा [illegible] नेपदमेव [illegible] ऽपि चिन्त्यमिदम् । प्रकारान्तर वा [illegible] इति सुखावबोधा ।

उच्चैरिति ॥ अथ राजा ताः सखीरुच्चैर्दूरादाकर्णनयोग्यं तारस्वरं वक्ष्यमाणप्रकारेणोचे हे सख्यः, वो युष्माकमियं सखी युष्मानिदं वक्ष्यमाणमाह । एताभ्यां मम मर्म रहस्यं श्रुतमित्येतावत्, मया तु पुनरनयोः सख्योस्तन्मर्म गुह्यमङ्गं दृष्टम् । 'श्रुताद्दृष्टं बलवत्' इति न्यायादेताभ्यामहमेव बलवतीति न कापि मे भीतिरिति वक्ष्यमाणभैमीवचनानुवादरूपेण नलोऽवोचदित्यर्थः । 'राज्ञा' इति पाठे—ताःप्रति राज्ञा ऊचे इत्यर्थः । व इत्यावृत्त्या पष्ठीद्वितीयान्तम् ॥

मद्विरोधितयोर्वाचि न श्रद्धातव्यमेतयोः ।
अभ्यषिञ्चदिमे मायामिथ्यासिंहासने विधिः ॥ १३५ ॥

मदिति ॥ हे सख्यः, बहिर्निष्कासनाद्यनुमतिद्वारा मया विरोधितयोः कृतवैरयोरेतयोः सख्योर्वाचि न श्रद्धातव्यं सत्यत्वबुद्धिर्न कार्या । विरोधिनो हि प्रायेणासत्यमेव वदन्तीत्यर्थः । किंच विधिर्ब्रह्मा इमे सख्यौ मायानां कपटानां मिथ्या असत्यानां च सिंहासने कपटासत्यसर्वाधिपत्येऽभ्यषिञ्चत् । योऽनयोर्जलसेको दृश्यते स ब्रह्मकृतो मायामिथ्यासिंहासनाभिषेक एवेति भैमी मन्यत इत्यर्थः । तस्माद्भवतीभिरेतयोर्वचसि न विश्वसनीयमिति भावः । श्रद्धातव्यम्, अपितु न कथंचिदिति वार्थः ॥

शत्रुवचसि न विश्वसनीयमित्येतदेवार्थान्तरन्यासेन समर्थयते—

धौतेऽपि कीर्तिधाराभिश्चरिते चारुणि द्विषः ।
मृषामषीलवैर्लक्ष्म लेखितुं के न शिल्पिनः ॥ १३६ ॥

धौतेऽपीति ॥ कीर्तिधाराभिः कीर्तिपूरैर्धौते अत एव चारुणि मनोज्ञे धवले एवंविधेऽपि द्विपश्चरिते मृषामषीलवैरसत्यलक्षणमषीलेशैः कृत्वा लक्ष्म कलङ्कं लेखितुं के जनाः शिल्पिनश्चतुरा न भवन्ति । अपितु सर्वेऽप्यलीकदोषारोपं कुर्वन्त्येवेति मद्विरोधितयोरेतयोर्वचसि न विश्वसनीयमित्यर्थः । अन्येऽपि शिल्पिनो जलधाराक्षालिते रमणीये कुड्यादौ मष्यादिवर्णकैश्चित्रं लिखन्ति । के द्विपः शिल्पिनो नेति वा ॥

ते सख्यावाचचक्षाते न किंचिद् ब्रूवहे बहु ।
वक्ष्यावस्तत्परं यस्मै सर्वा निर्वासिता वयम् ॥ १३७ ॥

ते इति ॥ ततस्ते सख्यौ इति आचचक्षाते ऊचतुः । इति किम्—आवामन्यत्किंचिद्बहुधिकं न ब्रूवहे । किंतु यस्मै प्रयोजनाय सर्वा वयं युवाभ्यां गृहाद्बहिर्निष्कासितास्तदेव केवलमावां वक्ष्यावो वदिष्यावः सर्वेषामग्रे 'सुरतार्थं वयं निष्कासिताः' इति कथयिष्याव इत्यन्यत्किंचिदिति ॥

स्थापत्यैर्न स वित्तस्ते वर्षीयस्त्वचलत्करैः ।
कृतामपि तथावाचि करकम्पेन वारणाम् ॥ १३८ ॥

स्थापत्यैरिति ॥ ते सख्यौ तथावाचि सुरतार्थं वयं निष्कासिता इति वचने विद स्थापत्यैः सौविदल्लैर्नपुंसकैः करकम्पेन कृतामपि वारणां निषेधं न वित्तः स न जानीतः व

१ 'विराधितयोरिति पाठेऽपि स एवार्थः । विपूर्वो राधिर्विरोधार्थे' इति । २ 'श्रद्धातव्यमिति पाठस्तु शुद्ध एव' इति च सुखावबोधा ।

अथ च—त्रपैवाकं दुःखम्, अपगतं त्रपाकं यस्मात्तदपत्रपाकं तादृग् न भवति लज्जाक दुःखसहितम्। अत एव न जातं रूपं यस्य। सुरतार्थं सर्वनिर्वासने ताभ्यामुक्ते लज्जाति यान्मुखं नितरां मलिनं जातं चित्रमेतदित्यर्थः। अथ च—पत्रयोर्मृत्पुटयोर्मध्ये यः पाकः नास्ति यस्य तादृशमपि न भवति यत्तत्रापत्रपाकम्। कृतपुटपाकमिति यावत्। एवं सुवर्णमेव तव मुखमहो चित्रम्। मुखस्य सुवर्णत्वमाश्चर्यकारीत्यर्थः। यतः सलज्जम्, अत एवातितरां तापस्य क्रोधाग्नेरर्जने संपादने सत्यपि समक्षमश्लीलभाषणादिना सखीभिः क्रोधे समुत्पादिते सत्यपीतो मुखात्सकाशाद्दुर्वर्णानां परुषाक्षराणां निर्गमो न स्यात्। कोपे सत्यपि लज्जाबाहुल्यात्सखीः प्रत्यक्षरमपि परुषं न भाषसे एतदपि चित्रमित्यर्थः। अथ च—कृत-पुटपाकसुवर्णसुरूपं यतोऽत एव पुटरहितम्। नितरामग्निदाहे सत्यप्यस्मात्सुवर्णाद्दुर्वर्णस्य रजतस्य निर्गमो न स्यात्। पुटपाकादेव मिश्रितरजतनिर्गमे सति निर्दुष्टस्य शुद्धतरस्य सुव-र्णस्य पश्चात्सुतरामग्निदाहे कृतेऽपि दुष्टाशयस्य पूर्वमेव गतत्वात्तस्माद्रजतनिर्गमो न भवत्येव। तथातितापार्जनेऽपि ते मुखाद्दुर्वर्णनिर्गमो नास्त्येवेत्याश्चर्यमित्यर्थः। अत्युत्तमषोडशवर्णक-सुवर्णवर्णाऽपरुषभाषिणी चासीति भावः। अपत्रपाकम्, पक्षे 'न कपि' इति ह्रस्वनिषेधः॥

तामथैष हृदि न्यस्य ददौ तल्पतले तनुम्।
निमिष्य च तदीयाङ्गसौकुमार्यमसिस्वदत्॥ १४२॥

तामिति॥ अथैष नलः तां हृदि न्यस्य तल्पतले शय्यायां तनुं शरीरं ददौ। पृष्ठेन शय्यां पस्पर्शेत्यर्थः। तदालिङ्गनसुखवशादेव निमिष्य नेत्रे निमील्य तदीयाङ्गसौकुमार्यमसि-स्वददनुबभूव च॥

न्यस्य तस्याः कुचद्वन्द्वे मध्येनीवि निवेश्य च।
स पाणेः सफलं चक्रे तत्करग्रहणश्रमम्॥ १४३॥

न्यस्येति॥ स तस्याः कुचद्वन्द्वे स्वकरं न्यस्य निक्षिप्य, तथा नीवीनां मध्ये च नाभिमूले निवेश्य स्थापयित्वा पाणेः स्वकरस्य तस्याः करग्रहणे (पाणि)विवादने विवाहे जातं श्रमं सफलं चक्रे। स्तनजघनादिस्पर्शसुखानुभवादित्यर्थः। एतदेव विवाहफलम्। यत्स्तनादिस्पर्शसुखानुभवनम्। अथ च—तत्प्रसिद्धं करस्य राजोपदायाः ग्रहणं तदर्जितं स्वपाणेः श्रमं सफलं चक्रे। स्तनादिमर्दनं राजदण्ड इत्यर्थः। अथ च—स्वपाणेर्मन्याः करेण यद्ग्रहणं निरोधनं तज्जनितं श्रमं सफलं चक्रे। कुचनीविस्पर्शमात्रेण निर्वृतो, न त्वन्तरं करं निवेशितवान् न च संबुभुजे। एतच्चोत्तरत्र संभोगनिषेधाल्लभ्यते॥

स्थापितामुपरि स्वस्य तां हृदा स मुदा वहन्।
तदुद्वहनकर्तृत्वमाचष्ट स्पष्टमात्मनः॥ १४४॥

स्थापितामिति॥ स मुदा कामाभिलाषेण स्वस्योपरि स्थापितां वक्षसि निवेशितां तां वहन् सुखातिशयात्तद्वहनं स्पष्टमुत्प्रेक्षे। आत्मनस्तस्या भैम्या उद्वहनं विवाहं प्रति, अथ च—ऊर्ध्वधारणं प्रति कर्तृत्वमाचष्ट चेति शब्दच्छलेनोत्प्रेक्षा॥

स्विद्यत्कराङ्गुलीलुप्तकस्तूरीलेपमुद्रया।
पूत्कार्यपीडनौ चक्रे स सखीषु प्रियास्तनौ॥ १४५॥

स्विद्यदिति ॥ स प्रियास्तनौ स्विद्यन्तीभिः संजातसात्त्विकस्वेदाभिः कराङ्गुलीभिर्लुप्तया कस्तूरीलेपसंबन्धिन्या मुद्रया पत्रवल्लीरचनाविशेषेण कृत्वा सखीषु विपक्षे पूत्कार्यं महाकलकलकथनीयं पीडनं मर्दनं ययोर्याभ्यां वा तथा चक्रे। भैमीकुचयुगले स्वरचितां कस्तूरीपत्रवल्लीरचनां प्रोञ्छितां दृष्ट्वा प्रियेण गाढमेतौ पीडिताविति अन्योन्यमुच्चैः कलकलं सख्यो यथा कुर्वन्ति वृत्तं कुचमर्दनं स्वयमेव जानन्ति तथा तत्कुचौ ममर्देति भावः। लोकेऽपि स्वकृतां मुद्रां लुप्तां दृष्ट्वान्यथाभावशङ्कयोच्चैः पूत्कारं कुर्वन्तीति ॥

तत्कुचे नखमारोप्य चमत्कुर्वंस्तयेक्षितः।
सोऽवादीत्तां हृदिस्थं ते किं मामभिनदेष न ॥ १४६ ॥

तदिति ॥ तस्याः कुचे नखमारोप्य निखाय स्वयमेव चमत्कुर्वन्नङ्गसंकोचाभिनयपूर्वं शङ्कमानः नखक्षतपीडाविशेषादेव तया किंचित्कोपेनेक्षितः स तामवादीत्—हे भैमि, एष नखस्ते हृदिस्थं मां किं नाभिनद्, अपितु—मामपि व्यदारयदेव अन्यथा कथं त्वदीये हृदि नखे क्षिप्ते ममाङ्गचमत्कार इति ॥

अहो अनौचितीयं ते हृदि शुद्धेऽप्यशुद्धवत्।
अङ्कः खलैरिवाकल्पि नखैस्तीक्ष्णमुखैर्मम ॥ १४७ ॥

अहो इति ॥ हे भैमि, तीक्ष्णमुखैर्नापितकल्पितनिशिताग्रैर्मम नखैः शुद्धे निष्कपटे हृदि अशुद्धं रुधिरं वर्तते (कल्पते) यत्र तद्यथा तथाऽङ्को मयूरपदादिचिह्नमकल्पि अकारीति यत्, सेयं महती अनौचिती अहो चित्रम्। कैरिव—दोषारोपरूपपरुषभाषणवशात्तीक्ष्णमुखैर्दुःसहवदनैः खलैरिव। यथा—खलैः शुद्धेऽपि पुरुषे अशुद्धवत्सदोषपुरुष इवाङ्को दोषारोपः कल्प्यते, सा यथानौचिती। नखक्षतेन रुग्णायाः स्वेनैव नखानामनौचित्यप्रकटनव्याजेन प्रसादनमकरोदित्यर्थः। अशुद्धवदिति पक्षे सप्तमीसमर्थाद्वतिः ॥

यच्चुम्बति नितम्बोरु यदालिङ्गति च स्तनौ।
भुङ्क्ते गुणमयं तत्ते वासः शुभदशोचितम् ॥ १४८ ॥

यदिति ॥ हे भैमि, गुणमयं सूक्ष्मश्लक्ष्णतरतन्तुकं ते वासः नितम्बोरु जघनमूरू च यच्चुम्बति स्पृशति, तथा यच्च ते स्तनौ आलिङ्गति तत्तस्मात्कारणाच्छुभानां रमणीयानां दशानां प्रान्ततन्तूनां यथोग्यमुचितं तद्भुङ्क्ते तादृशं भोगमनुभवतीत्यर्थः। यत्तदौ वाक्योपिरोपणे वा। अथ च—यो गुणमयः शौर्यौदार्यादिगुणपूर्णः निर्दोषश्च शुभाया दशायाः पूर्वाचरितपुण्यपाकोपनतशुभप्रहयोगानुकूलसमयविशेषस्योचितं भोगं लभते स एव सुन्दरतररमणीनितम्बोरुचुम्बनं तत्कुचालिङ्गनं च लभते नान्य इति। त्वन्नितम्बादिचुम्बनकारित्वान्मत्तोऽपि वसनमेव धन्यमिति। नितम्बोरु, प्राण्यङ्गत्वादेकवद्भावः ॥

लीनचीनांशुकं स्वेदि दरालोक्यं विलोकयन्।
तन्नितम्बं स निश्वस्य निनिन्द दिनदीर्घताम् ॥ १४९ ॥

लीनेति ॥ सात्त्विकस्वेदवशाद्विश्लिष्टसंलग्नत्वात्स्पष्टरूपेण लीनं संलग्नं चीनं देशजमंशुकं यत्र, तथा—स्वेदि सात्त्विकस्वेदयुक्तम्, अतएव—दरालोक्यमीषद्दृश्यं तस्या नितम्बं विलोकयन् स कामोन्मत्तो नलः निश्वस्य दिने सुरतनिषेधान्निरुद्धतया निश्वासोत्सर्जनेन दुःख-

मभिव्यज्य दिनस्य दीर्घतां कथं वा दिनं शीघ्रं गमिष्यतीति निनिन्द । सुरतार्थं दिनावसानम- भिललाषेत्यर्थः । कामपरवशत्वात्संभोगेच्छुरभूत्, दिवा तन्निषेधाच्च सुरते सहसा न प्रवृत्त इति भावः ॥

देशमेव ददंशासौ प्रियादन्तच्छदान्तिकम् ।
चकाराधरपानस्य तत्रैवालीकचापलम् ॥ १५० ॥

देशमिति ॥ असौ प्रियाया दन्तच्छदोऽधरस्तस्यान्तिकं समीपवर्तिनं देशं कपोलचि- बुकादिभागमेव पूर्वं दशनैर्ददंश । अनन्तरं तत्रैवाधरसमीपदेश एव अधरोपान्तस्थापितमुख एवाधरपानस्यालीकमेव चापलं (पुनः) पुनरोष्ठचालनचुंकारादित्वरां चकार । चापलस्या- लीकत्वं च तादृगभिनयमात्रकरणात्तात्त्विकचापलकरणेऽप्यधरसंबन्धाभावाज्ज्ञेयम् । संबुभु- क्षातिशयाद्यावता क्षणेनाधरश्चुम्बितुं प्राप्यते तावन्तमपि विलम्बं सोढुमशक्तः सत्ययमधर एवेति भ्रान्त्या वाऽधरोपान्तदेश एव दंशादि चकारेति भावः । अतिरिरंसोरियं जातिः ॥

न क्षमे चपलापाङ्गि सोढुं स्मरशरव्यथाम् ।
तत्प्रसीद प्रसीदेति स तां प्रीतामकोपयत् ॥ १५१ ॥

नेति ॥ स परिहासादिवशादालिङ्गनादिवशाच्च पूर्वं प्रीतां प्रसन्नामपि तामित्युक्त्वाऽको- पयत् । इति किम्—हे चपलापाङ्गि, अहं स्मरशरव्यथां सोढुं न क्षमे न शक्तोऽस्मि यतः, तत्तस्मात्त्वं मम प्रसीद प्रसीद मह्यं सुरतं देहि देहि । दिने रन्तुमनुचितत्वात्कोपव्याजेनापि दिनं गमयितुं तामकोपयदित्यर्थः । प्रसादनमपि कोपं विना न संभवतीति कोपसंपादनम् । शरव्यतामिति च पाठः । चपलापाङ्गि, 'अङ्गगात्र–' इति ङीप् ॥

नेत्रे निषधनाथस्य प्रियाया वदनाम्बुजम् ।
ततः स्तनतटौ ताभ्यां जघनं घनमीयतुः ॥ १५२ ॥

नेत्रे इति ॥ निषधनाथस्य नेत्रे पूर्वं प्रियाया वदनाम्बुजम्, ततोऽनन्तरं स्तनतटौ, ततोऽनन्तरं च ताभ्यां स्तनतटाभ्यां सकाशात् घनं पीवरं जघनमीयतुः प्रापतुः । सुरतोत्सु- क्यात्सादरं वदनादिक्रमेणालोकयदिति भावः । अम्बुजतटघनपदैः सादरावलोकनार्हत्वं सू- चितम् । घनपदं सादरावलोकनद्योतनार्थं क्रियाविशेषणत्वेन सर्वत्र वा योज्यम् ॥

इत्यधीरतया तस्य दृढवृत्तिविशङ्किनी ।
उदस्थादुत्थाय सोत्कण्ठमसावन्वसरत्सखीः ॥ १५३ ॥

इतीति ॥ इत्येवं वदनादिविलोकनपूर्वं जघने चिरकालं सादरदृष्टिस्थापनद्वारेणाऽतीवधै- र्यलोलुपतया दृढवृत्तौ बलात्सुरतारम्भे विशङ्किनी विशेषतः शङ्कमाना संभावयन्ती असौ [illegible] सत्वरमुत्थाय चिरनिर्गतसखीगवेषणाय सोत्कण्ठं यथातथा सखीः [illegible] । [illegible]स्मरोत्कण्ठाव्याजेन प्रियसुरतारम्भं पर्यहार्षीदिति भावः । अतितरां [illegible] [illegible], रसभङ्गश्च नायकस्य नीरसतामेवापादयतीति तदुभयपरिजिहीर्षया [illegible] [illegible] परां काष्ठां प्रापयितुं श्रीहर्षेण नैनानल्पोऽभिप्रेत्य स्थापितः [illegible] ॥

१ इदं च वात्स्यायने 'आलिङ्गितः [illegible] दिवालिङ्गं [illegible] न [illegible] । [illegible] [illegible] न [illegible]' (१८ सर्गे २) इति [illegible] । [illegible] [illegible] ।

न्यवारीव यथाशक्ति स्पन्दं मन्दं वितन्वता ।
भैमीकुचनितम्बेन नलसंभोगलोभिना ॥ १५४ ॥

न्यवारीति ॥ नलसंभोगलोभिना भैमीकुचनितम्बेन मन्दं शनैः स्पन्दं गमनं वितन्वता स्वीयपीवरतातिशयेन शीघ्रं गन्तुमददता सता भैमी, शक्तिमनतिक्रम्य शीघ्रगमनप्रतिबन्धकत्वरूपनिजशक्त्यनुसारेणेतो रतिगृहाद्बहिस्त्वया न निर्गन्तव्यमिति न्यवारीव न्यषेधीव । निर्गतापि स्तननितम्बभराकान्तत्वाच्छीघ्रं गन्तुं न शशाकेति भावः । कुचनितम्बेन, प्राण्यङ्गत्वादेकवद्भावः । लोभिना, अत इनिः ॥

अपि श्रोणिभरस्वैरां धर्तुं तामशकन्न सः ।
तदङ्गलङ्गजस्तम्भो गजस्तम्भोरुदोरपि ॥ १५५ ॥

अपीति ॥ स श्रोणिभरेण नितम्बभाराक्रान्तत्वेन स्वैरां मन्दगामिनीमपि समीपे गच्छन्तीमपि तां स्वयं गजबन्धनस्तम्भवद्दूरू दीर्घौ पीवरौ च दोषौ बाहू यस्यैवंभूतोऽपि सम्बद्धपाल्या धर्तुं नाशकत् । यतः—तस्या अङ्गसङ्गाज्जघनाद्यङ्गस्पर्शाज्जातो निष्क्रियत्वरूपसात्त्विकभावः स्तम्भो यस्य सः । सात्त्विकस्तम्भवशात्तां धर्तुं नाशकदित्यर्थः । भरास्वैरामिति पाठे—श्रोणिभरनिमित्तमस्वैरा स्वाधीना न भवति तदधीनैव तादृशीमित्यर्थः ॥

आलिङ्ग्यालिङ्ग्य तन्वङ्गि मामित्यर्धगिरं प्रियम् ।
स्मित्वा निवृत्य पश्यन्ती द्वारपारमगादसौ ॥ १५६ ॥

आलिङ्ग्येति ॥ असौ भैमी इति पूर्वोक्तप्रकारेणार्धगिरं वाक्यशेषं वक्तुमसमर्थं प्रियं नलं स्मित्वाऽधीरतरत्वेन हसित्वा निवृत्य परावृत्य वलितग्रीवं पश्यन्ती सती द्वारस्य पारं देहलीबहिःप्रदेशमगात् । इति किम्—हे तन्वङ्गि, प्रियं मामालिङ्ग्यालिङ्ग्य(श्लेषार्थोऽ)-परिपूर्णा वाणी यस्य तमित्यर्थः । कामोन्मादबाहुल्येन गद्गदनिस्वरतया आलिङ्ग्यालिङ्ग्य मां सुखय पश्चाद्गच्छेति वाक्यशेषः । स्मितादयः संभोगशृङ्गाररसाङ्गीभूततद्भावालंकाराः ॥

प्रियस्याप्रियमारभ्य तमन्तर्दूनयाऽनया ।
शेके शालीनयालीभ्यो न गन्तुं न निवर्तितुम् ॥ १५७ ॥

प्रियस्येति ॥ प्रियस्य तत्संभोगप्रातिकूल्यलक्षणमप्रियमारभ्य कृत्वा तद्वशादेवान्तर्हृदये दूनयोपतप्तया । प्राप्तपश्चात्तापयेति यावत् । द्वारबहिर्देशं प्राप्तयाऽप्यनया निरस्तानामीप्सिताचरणानन्तरं तस्य प्रसादनकृत्यैव सखीः प्रति गन्तुमयुक्तमिति विचार्यालीभ्यः सखीः प्रतिगन्तुं न शेके न समर्थाभूयत । तत्रैव तस्थावित्यर्थः । सखीभ्यः सकाशान्निवर्तितुं नलं प्रति परावर्तितुमपि न शेके । यतः—शालीनयाऽधृष्टयाऽतिलज्जया अल्पदुःखेनैव ... पुनरपि प्रियं प्रति पुनर्गतेति सख्यो हसिष्यन्ति, तथा च लज्जा स्यादिति भिया पुनर्न निवृत्तेत्यर्थः । नलविरहेण या लज्जा तन्मध्ये चिन्तयन्ती तूष्णीं स्थितेति भावः । आलीभ्यः, 'गत्यर्थकर्मणि—' इति चतुर्थी, निवृत्तिं प्रत्यपादानत्वात्पञ्चमी च ॥

अवकथदथ वन्दिसुन्दरी द्राक्सविधमुपेत्य नलाय नम्रमङ्गः ।
जय नृप दिनयौवनोष्मतप्तान्यवनजलानि पिपासति क्षितिले ॥ १५८ ॥

अचकथदिति ॥ अथ परिहासपूर्वं भैमीवहिर्निर्गमनानन्तरं पुरुषस्यान्तः प्रवेष्टुमसकलादवसरज्ञापकवचनस्यावश्यं श्रावणीयत्वाद्वन्दिसुन्दरी विदग्धमागधवनिता द्वाःसविधं द्वारदेशसमीपमुपेत्य इति अहो मध्यं मध्याह्नमचकथत्। व्यज्ञापयदित्यर्थः। इति किम्—हे नृप, जय सर्वोत्कर्षेण वर्तस्व। दिनस्य यौवनं मध्याह्नस्तत्संबन्धिनोष्मणा तप्ता आतपसंतापेन कृत्वा संतापवती क्षितिस्ते आप्लवनजलानि माध्याह्निकस्नानजलानि पिपासति पातुमिच्छतीति। अचकथत्, ण्यन्ताच्चङ्। अकथयदिति पाठे—लङ्। नलाय, 'क्रियया यमभिप्रैति-' इति संप्रदानत्वम् ॥

उपहृतमधिगङ्गमम्बु कम्बुच्छवि तव वाञ्छति केशभङ्गिसङ्गात्।
अनुभवितुमनन्तरं तरङ्गासमशमनस्वसृमिश्रभावशोभाम् ॥ १५९ ॥

उपेति ॥ अधिगङ्गं गङ्गामधिकृत्य वर्तमानमुपहृतं भागीरथ्याः सकाशादानीतं कम्बुच्छवि शङ्खधवलमम्बु तव कृष्णतरकुटिलकेशपाशस्य भङ्गिभिः कुटिलभावैः सह सङ्गात्संबन्धादनन्तरं संबन्धे जाते तरङ्गैः कृत्वाऽसमा अतुल्यरूपा विषमा वाऽतिकृष्णा शमनस्वसा यमभगिनी यमुना तया सह मिश्रभावेन मिलितत्वेन संगमे या शोभा तां गङ्गायमुनासंभूतप्रयागकामनीयकमनुभवितुं प्राप्तुं वाञ्छति। शुभ्रतरजलस्य कृष्णतरकेशपाशसङ्गे सति प्रयागजलशोभा भविष्यतीति गङ्गाजलेच्छां पूरय। माध्याह्निकस्नानं कुर्विति भावः। अधिगङ्गम्, विभक्त्यर्थेऽव्ययीभावः ॥

तपति जगत एव मूर्ध्नि भूत्वा रविरधुना त्वमिवाद्भुतप्रतापः।
पुरमथनमुपास्य पश्य पुण्यैरधरितमेनमनन्तरं त्वदीयैः ॥ १६० ॥

तपतीति ॥ हे राजन्, अद्भुतोऽसह्यः प्रकृष्टस्तापः करौष्ण्यं यस्य स रविरधुना मध्याह्नसमये जगत एव विश्वस्यापि मूर्ध्नि भूत्वा तपति। क इव—त्वमिव। यथाद्भुतः प्रतापः क्षात्रं तेजो यस्य स त्वं विश्वस्य मूर्ध्नि चरणमारोप्य तपसि राजलक्ष्म्या दीप्यसे तथेत्यर्थः। मध्याह्नसमयो निश्चितो वर्तत इत्यर्थः। अत एव पुरमथनं हरमुपास्याराध्योपार्जितैरिति शेषः। एवंभूतैस्त्वदीयैः पुण्यैर्देवपूजानन्तरं त्वमेनं सूर्यमधरितं मस्तकोपरिभागाच्च्यावितं तिर्यग्गगनभागे वर्तमानमेनं सूर्यं पश्य। देवपूजानन्तरं हि सूर्यो नमस्क्रियत इत्याचारस्त्वमप्यत्रापराह्णे सूर्यं नमस्कुर्विति भावः। अधुना तु त्वत्सदृशः हरपूजाजनितपुण्यैस्त्वया जितोऽधोगतो भविष्यतीत्यर्थः ॥

आनन्दं हठमाहरन्निव हरध्यानार्चनादीक्षण-
स्यासत्तावपि भूपतिः प्रियतमाविच्छेदखेदालसः।
पक्षद्वारदिशं प्रति प्रति मुहुर्द्राग्निर्गतप्रेयसी-
प्रत्यासत्तिधिया दिशन्दृशमसौ निर्गन्तुमुत्तस्थिवान् ॥ १६१ ॥

आनन्दमिति ॥ असौ भूपतिः स्नानाद्यर्थं वहिर्निर्गन्तुं शय्यायाः सकाशादुत्तस्थिवान्। किंभूतः—द्राक् झटिति वहिर्निर्गतायाः प्रेयस्या भैम्याः प्रत्यासत्तिधिया पराङ्मुख्यागमनस्य बुद्ध्या पुनरप्यागमिष्यति किमिति संभावनया तद्विलोकनार्थं पक्षद्वारदिशं पार्श्वद्वारप्रदेशं प्रति

१ 'निदर्शनालंकारः' इति जीवातुः।

स्वीकृत्य प्रतिमुहुर्मुहुर्मुहुर्दृशं दिशन् ददानः, तया—प्रियतमाया विच्छेदो वियोगस्तज्जन्येन खेदेन दुःखेनालसोऽपि । तया—हरध्यानार्चनादेः क्षणस्य मध्याह्नस्यावश्यावश्यकत्वे सत्य-मपि हठं यथा स्यादेवं बलात्कारेण गतमप्यानन्दमाहरन्निव परावर्तयन्निव । अर्चनादिरेव क्षण उत्सवस्तदागतस्तावपीति वा । विरहखेदाधाते सत्यपि नित्याह्निककल्लोपभिया द्विव-भक्त्या च सानन्दं बलाद्बहिर्निर्गत इत्यर्थः । श्लोकचतुष्टयेनोत्तरसर्गसंगतिः सूचितेति ज्ञेयम् । प्रतिमुहुर्, मुहुरित्यर्थे प्रतेर्मुहुःशब्देन 'सह सुपा' इति समासः । मुहुर्मुहुरित्यर्थः ॥

> श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं
> श्रीहीरः सुषुवे जितेन्द्रियचयं मामल्लदेवी च यम् ।
> अन्याक्षुण्णरसप्रमेयभणितौ विंशस्तदीये महा-
> काव्येऽयं व्यगलन्नलस्य चरिते सर्गो निसर्गोज्ज्वलः ॥ २० ॥

श्रीहर्षमिति ॥ अन्यैः श्रीहर्षव्यतिरिक्तैः कविभिरक्षुण्णा रसस्य शृङ्गारादेः प्रमेयस्य समासोक्त्युत्प्रेक्षादेश्च भणितिर्गुम्फना यत्र तादृशेऽपूर्वरसादिमति महाकाव्ये [illegible] सर्गो विंशतेः पूरणः व्यगलत्समाप्तिमितः । भणितौ, भाषितपुंस्कम् । पूरणे डटि 'ति विंशते—' इति तिलोपः ॥

इति श्रीवेदरकरोपनामकश्रीमन्नरसिंहपण्डितात्मजनारायणकृते
नैषधीयप्रकाशे विंशः सर्गः ॥

एकविंशः सर्गः ।

इदानीं पूर्वसर्गान्तप्रस्तावितमध्याह्नकालदेवपूजादि [illegible]—

> तं विदर्भतनयामणिसौधादुज्जिहानमनुदर्शितखेदः ।
> अर्पणान्निजकरस्य नरेन्द्रैरात्मनः करदता पुनरूचे ॥ १ ॥

तमिति ॥ [illegible]

> [illegible] ॥ २ ॥

[illegible]

तस्येति ॥ खल्वितीव हेतोरभितः पार्श्वद्वयेऽपि प्रणमन्ती राजराजिर्नृपपरम्परा तां सिचयैर्बद्धामपि पद्धतिं शिरसां माल्यैः शिरसि धृताभिः पुष्पमालाभिः प्यधत्त आच्छादयति स्म । इति किम्—चीनसिचयैर्देशविशेषोद्भवैः सूक्ष्ममृदुभिर्वस्त्रैर्बद्धा सज्जिता छादितापि सती पद्धतिस्तस्य नलस्य पद्युगात्सकाशात्कठिनेति । मृदुतरयोर्हि चरणयोर्मृदुतरपुष्पबद्धायां भुवि गमनं युक्तम् । शिरोधृतपुष्पस्रंसनं यावद्भवति तावत्पर्यन्तं मध्येमार्गं तस्य सादरं दण्डवत्प्रणामं सर्वेऽपि चक्रुरित्यर्थः ॥

द्रागुपाह्रियत तस्य नृपैतद्दृष्टिदानबहुमानकृतार्थैः ।
स्वस्य दिश्यमथ रत्नमपूर्वं यत्नकल्पितगुणाधिकचित्रम् ॥ ३ ॥

द्रागिति ॥ अथ प्रणामानन्तरं तेन कृतं दृष्टिदानं नेत्रनिरीक्षणं तल्लक्षणेन बहुमानेन कृतार्थैः सफलश्रमैर्नृपैर्दिशि भवं दिश्यं स्वस्य दिश्यं स्वीयदेशभवं तत्रान्यत्र वा पूर्वं दुर्लभमत्युत्तमम्, तथा—यत्नेन बुद्धिपूर्वं शिक्षावशेन कल्पितैरारोपितैर्वृत्तत्वोज्ज्वलत्वातिरमणीयत्वा(कृत्वा)दिगुणविशेषैरधिकं नितरां चित्रमाश्चर्यरूपं सहजैराहितैश्च गुणैरतितरमाश्चर्यकारिमणिमुक्ताकरितुरगादिरत्नं वस्तु तस्य द्राक् शीघ्रं प्रणामानन्तरमव्यवहितमेवोपाहियतोपदीकृतम् । तत्रोपदीकृते रत्नजाते दृष्टिदानमेव बहुमान इति वा । केनेदमानीतमित्यादरप्रश्नपूर्वं तेषु राजस्वपि दृष्टिदानमेवेति वा । स्वस्वेतिपाठे—स्वं स्वं च तद्दिश्यं चेत्यर्थः । यत्नेति पाठे—यत्कल्पितगुणाधिकचित्रं न भवति, किंतु स्वाभाविकगुणाधिकचित्रमेव, तद्रत्नमिति संबन्धः । दिश्यम्, भवार्थे दिगादित्वाद्यत् । देश्यमिति पाठेऽपि । रत्नं जातावेकवचनम् । एवमुत्तरश्लोकेऽपि ॥

अङ्गुलीचलनलोचनभङ्गिभ्रूतरङ्गविनिवेदितदानम् ।
रत्नमन्यनृपढौकितमन्ये तत्प्रसादमलभन्त नृपास्तत् ॥ ४ ॥

अङ्गुलीति ॥ अन्ये चिरकालसेविनस्तदानीमेवागता वा नृपा अन्यनृपैर्ढौकितमुपदीकृतं तत्पूर्वोक्तं मणिमुक्तादिरत्नजातमेव तस्य नलस्य प्रसादं पारितोषिकं दानमलभन्त । किंभूतम्—अङ्गुलीचलनेन लोचनभङ्ग्या प्रसादसूचकनेत्रवीक्षणविशेषेण भ्रूतरङ्गेण च एतस्मै एतत्, एतस्मै एतद्देहीति सेवकान् प्रति एतत्त्वं गृहाण, एतत्त्वं गृहाणेति एभिः प्रत्येकं वा विशेषेण निवेदितं दानं यस्य । अन्यैरानीतमन्येभ्यो दत्तवान्, न तु कोशागारे निवेशितवान् । अनेनौदार्यातिशयश्चातुर्यं च सूच्यते । चतुरो हि तदीयमेव तस्मै न ददाति । अङ्गुल्यादिचालनेन दाननिवेदनमीश्वरजातिः ॥

तानसौ कुशलसूनृतसेकैस्तर्पितानथ पितेव विसृज्य ।
अध्वरालयपुरालिषु विनिन्ये शैत्यकोपनमितानमितौजाः ॥ ५ ॥

तानिति ॥ अथ नूतनागतराजकृतोपदानानन्तरं चिरागतराजभ्यो वितरणानन्तरं च असौ अमितौजा अतुल्यपराक्रमो नलो नूतनागतान्राज्ञः कुशलसूनृतसेकैः कुशलप्रश्नसत्यप्रियवचनामृतसेचनैः 'भवतां राष्ट्रे देहे च कुशलं, भवतां कार्यं करिष्यामि' इत्यादिभिस्तर्पितान् प्रीणितान् सबहुमानं स्वशिबिरं प्रति विसृज्य शैत्यकोपेन शिष्यमानान् शीतेनोपनमितान्नमितानभ्यागतान्राजादिविधार्थं यज्ञस्थानान्तर्वर्तिनि पुरे, इत्यर्थः

चाणादीनि तेषां खुरलीषु हस्तचरणादिसंस्थानचातुरीविशेषेषु विनिन्ये । तद्विषयकौशलमशिक्षयदित्यर्थः । क इव—पितेव । शैष्यकेति भावे चोपधाद्वुञ् । शिष्यतेति च पाठः ॥

मर्त्यदुष्प्रचरमल्लविचारं चारुशिष्यजनतामनुशिष्य ।
स्वेदबिन्दुकितगोधिरधीरं स श्वसन्नभवदाप्लवनेच्छुः ॥ ६ ॥

मर्त्येति ॥ स नल आप्लवनेच्छुः जलावगाहनाय साभिलाषोऽभवत् । किंभूतः—मर्त्येषु दुष्प्रचरमविद्यमानप्रसरं मर्त्यैर्दुःप्रचर्यते दुःप्रचरं नलव्यतिरिक्तैर्मर्त्यैर्नाभिज्ञाताशेषविशेषमाभिचायत्वाणां विचारं मोक्षोपसंहारोपायप्रकारविशेषं चारुः प्रौढप्रतिभः शिष्यजनस्तत्समूहं, चारु सम्यग्वाऽनुशिष्य शिक्षयित्वा स्थितः, अनन्तरं श्रमवशाज्जाता ये स्वेदबिन्दुकास्ते संजाता यस्य तादृशो गोधिर्ललाटं यस्य, अत एव—धीरं दीर्घं न धीरमधीरमलं श्वसन् । बिन्दुकेत्यल्पार्थे कन् । तारकादित्वादितच् । 'ललाटमलिकं गोधिः' इत्यमरः ॥

यक्षकर्दममृदून्मृदिताङ्गं प्राकुरङ्गमदमीलितमौलिम् ।
गन्धवारिभिरनुबन्धितभृङ्गैरङ्गना सिषिचुरुच्चकुचास्तम् ॥ ७ ॥

यक्षेति ॥ उच्चकुचा अङ्गनास्तं बहलपरिमलेन अनुबन्धिता मिलन्तो भृङ्गा येषु तैर्गन्धवारिभिः कर्पूरवासितजलैः सिषिचुः । अभ्यङ्गस्नानमकारयन्नित्यर्थः । किंभूतम्—प्राक् पूर्वं कर्पूरागरुकस्तूरीचन्दनकङ्कोलचूर्णरूपेण यक्षकर्दमेन सुगन्धिद्रव्येण कृत्वा मृदु यथा तथा शनैर्मृदितमङ्गं यस्य पश्चात्कुरङ्गमदेन कस्तूरिकया मीलितः संबन्धं प्रापितो मौलिर्यस्य । कस्तूरिकानिर्वासिततैलशिरस्नानमिति यावत् । 'तथा कर्पूरमगुरुः कस्तूरी चन्दनं तथा । कङ्कोलं च भवेदेभिः पञ्चभिर्यक्षकर्दमः ॥' इति गरुडपुराणम् ॥

भूभृतं पृथुतपोधनमाप्तस्तं शुचिः स्नपयति स्म पुरोधाः ।
संदधज्जलधरस्खलदोघस्तीर्थवारिलहरीरुपरिष्टात् ॥ ८ ॥

भूभृतमिति ॥ अभ्यङ्गस्नानानन्तरं शुचिः सदाचारः आप्तो हितः परम्परागतः पुरोधाः जलधराद्बहुमूल्यस्वर्णकलशात्स्खलन् पतन् ओघः संततधारापरम्परा यासां ताः गङ्गादितीर्थवारीणां लहरीस्तरङ्गानुपरिष्टात्संदधत् प्रक्षिपन्सन् पृथुना विपुला [illegible] पुण्येन धनं पूर्णं तं भूभृतं नलं स्नपयति स्म । पूर्वमुष्णोदकस्नानेन शरीरशुद्धिं कारयित्वा संकल्पपूर्वं शीतलोदकेन वैदिकमन्त्रस्नानमकारयदिति भावः । शुचिरपवादः पृथुना [illegible] तापनाठेनापन्नं नापनारन्ध्र [illegible], एवंभूतं [illegible] वा । 'तपा नाधे(ऽप)' इत्यमरः । 'शुचिस्त्वमन् । आरादे' इति च ॥

[illegible]—

प्रेयसीकुचवियोगहविर्भुग्धूम्रधूमविततीरिव बिभ्रत् ।
स्नापिनः करसरोरुहयुग्मं तस्य गर्भपृथुदर्भविराजत् ॥ ९ ॥

प्रेयसीति ॥ स्नापिनो [illegible] तस्य करसरोरुहयुग्मं [illegible] प्रेयसीकुचवियोगहविर्भुग्धूम्र [illegible] शुशुभे । किंभूतमिव—उत्प्रेक्षते—प्रेयस्याः कुचवियोग एव हविर्भुग् [illegible] । दर्भाणां [illegible] धुम्रम् ॥

कल्प्यमानममुनाचमनार्थं गाङ्गमम्बु चुलुकोदरचुम्बि ।
निर्मलत्वमिलितप्रतिबिम्बद्यामयच्छदुपनीय करे नु ॥ १० ॥

कल्प्येति ॥ अमुना आचमनमर्थः प्रयोजनं यस्य आचमनं कर्तुं वा कल्प्यमानं स्वीक्रियमाणं चुलुकोदरचुम्बि चुलुकमध्यवर्ति गाङ्गमम्बु कर्तृ निर्मलत्वेन मिलितः स्वसंनिधातः प्रतिबिम्बो यस्यास्तां द्यां स्वर्गमुपनीय समीपां कृत्वा हस्तप्राप्यां कृत्वा करेऽयच्छत् । 'दाण् दाने' । नु उत्प्रेक्षायाम् । स्नानप्रारम्भाचमनं चकारेत्यर्थः । अन्यदपि दुर्लभं वस्तु हस्ते आनीय दीयते ॥

मुक्तमाप्य दमनस्य भगिन्या भूमिरात्मदयितं धृतरागा ।
अङ्गमङ्गमनुकं परिरेभे तं मृदो जलमृदूर्गृहयालुम् ॥ ११ ॥

मुक्तमिति ॥ भूमिरात्मनो भूपतित्वाद्दयितं प्रियं भर्तारं नलं स्नानकाले दमनस्य भगिन्या भैम्या मुक्तं विरहितमाप्य लब्ध्वा धृतो रागो लौहित्यं यया, अथ च—सानुरागा सती ऊषरादिमृत्तिकानिषेधात्तत्परिहाराय जलस्पर्शमात्रेण मृदूः शिथिलावयवाः मृदुतरस्पर्शाः स्नानार्थमानीता मृदो गङ्गादिमृत्तिका गृहयालुं गृह्णन्तमनुकमात्मनः कामुकं तमङ्गमङ्गं परिरेभे आलिलिङ्ग । श्रौतमार्गेण ललाटाद्यङ्गेषु रक्तमृत्तिकालगनव्याजेनान्यदा दुष्प्रापं स्ववल्लभं भूमिरालिलिङ्गेति भावः । प्रतीयमानोत्प्रेक्षा । अन्यापि सपत्नीमुक्तं वल्लभं चिरात्प्राप्य सानुरागा सती प्रत्यङ्गमालिङ्गति । कं सुखं (अनु) लक्षीकृत्य सुखोद्देशेनालिलिङ्गेति वा । 'शुक्ला विप्रस्य, रक्ता क्षत्रियस्य, मिश्रा विशः, कृष्णा शूद्रस्य' इति स्मृतिः । अनुकम्, 'अनुकाभिकाभीकः कमिता' इति साधुः । 'अनु किम्' इति पाठे—सर्वाण्यङ्गानि लक्षीकृत्य परिरेभे किमित्यर्थः ॥

मूलमध्यशिखरस्थितवेधःशौरिशंभुकरकाङ्घ्रिशिरःस्थैः ।
तस्य मूर्ध्नि चकरे शुचि दर्भैर्वारि वान्तमिव गाङ्गतरङ्गैः ॥ १२ ॥

मूलेति ॥ साग्रमूलैस्त्रिभिरगर्भैर्दर्भैस्तस्य मूर्ध्नि शुचि निर्मलं कुत्राप्यसंबन्धात्पवित्रतरं च मार्जनमन्त्रं तत्संबन्धि वारि चकरे विक्षिप्तम् । 'कॄ विक्षेपे' । किंभूतैः (किंभूतमिव)—'कुशमूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः । कुशाग्रे शंकरं विद्यात्त्रयो देवाः कुशस्थिताः ॥' इति वचनान्मूले मध्ये शिखरेऽग्रे च स्थितानां वेधःशौरिशम्भूनां ब्रह्मविष्णुहराणां क्रमेण करके कमण्डलौ, अङ्घ्रौ पादाम्बुजे, शिरसि च गङ्गा सर्वदेति पुराणप्रामाण्यात्स्थितैरेवंप्रकारेण दर्भेषु संभवद्भिर्गङ्गासंबन्धिभिस्तरङ्गैर्वान्तमिवोद्गीर्णमिव । कुशमूलस्थितब्रह्मादिदेवत्रयकरकादिनिष्ठगङ्गातरङ्गभ्रष्टैरिव पवित्रैर्दर्भाग्रजलैः स्नानाङ्गभूतमार्जनमकरोदित्यर्थः । 'कमण्डलौ च करकः' इत्यमरः । वान्तम्, उदित्त्वात् क्त्वायां वेट् इति 'यस्य विभाषा' इति निष्ठायामिण्निषेधः ॥

घ्राणमायतवतो जलमध्ये मज्जिमानमभजन्मुखमस्य ।
आपगापरिवृढोदरपूरे पूर्वकालमुषितस्य सितांशोः ॥ १३ ॥

घ्राणमिति ॥ सुवर्णघटितमहापात्रस्थतीर्थत्वोपकल्पितसमन्त्रककरकृतावगाहनजलमध्ये

१ 'विकरे इति क्वचित्कोऽपपाठः' इति सुखावबोधा ।

स्नानेति ॥ सुभगा मनोहरा, अथ च—सौभाग्यवती, आप्लवनभोः स्नानलक्ष्मीस्तं बभा
शिश्रिये । स्नानेन नितरां शुशुभे इत्यर्थः । किंभूता—स्नानार्थं वारि तत्सुवर्णघटात्त ए
राजन्तावुरोजौ कुम्भौ यस्याः सा । तथा—'ऊर्ध्वपुण्ड्रतिर्यग्गर्भचन्द्राकारा वर्णानां क्रमाति
लकाः' इति दर्शनाल्ललाटे धृतो गौरमृत्तिलकबिन्दुर्गङ्गातीरगोपीचन्दनादिरचितो वर्तुल
स्तिलकः स एव गौरमृत्तिलकान्मुखेन्दुर्यस्याः सा । तथा—'दुकूलवस्त्रेण मार्जयेत्' इति व्यास
वचनेन वैधस्नानानन्तरं वस्त्रादिना केशपरिमार्जनस्य निषेधात्केशेषु शेषं जलं केशप्रान्तेभ्यो
गलच्छलं जलबिन्दवस्त एव मौक्तिकानि दन्ताश्च यस्याः सा । यद्वा—जलमौक्तिकानि मुक्ताव
त्स्थूलजलबिन्दवस्त एव दन्ता यस्याः सा । एवंभूता रमणीयदशना तिलकं दधारेति भावः ।
अन्याप्येवंविधा तरुणी कंचिद्वृणुत इति ॥

श्वैत्यशैत्यजलदैवतमन्त्रस्वादुताप्रमुदितां चतुरक्षीम् ।
वीक्ष्य मोघधृतसौरभलोभं घ्राणमस्य सलिलघ्रमिवासीत् ॥ १७ ॥

श्वैत्येति ॥ श्वैत्येन शैत्येन च अलं देवतं येषां तैराप्यैः, जलदैवतं वरुणस्तत्संबन्धि-
भिर्वा वारुणैः मन्त्रैः शब्दात्मकैः स्वादुतया मधुररसतया च जलगतविशिष्टरूपस्पर्शशब्दरस-
लक्षणस्वीयस्वीयविषयलाभेन प्रमुदितामतितरां संतुष्टां चतुरक्षीं क्रमेण चक्षुस्त्वक्श्रोत्ररसन-
समाहाररूपां नेत्रादिचतुष्टयीं वीक्ष्य अस्य घ्राणेन्द्रियं सहजगन्धस्य पृथिव्यसाधारणगुणत्वा-
ज्जले तदसंभवात्कर्पूरादिवासितस्य च जलस्य देवस्नपनादिधर्मकर्मसु प्रतिषेधादौपाधिकस्या-
प्यसंभवान्मोघो निष्फल एव धृतः सौरभे शोभनगन्धे लोभो येन, लोभसजातीयस्पर्शा विग-
लितविवेकं सत् 'ऋतं च–' इत्यादिसंध्याघमर्षणचुलुकोदयस्पर्शमिषेण सलिलं जिघ्रतीति
सलिलघ्रं जलाघ्राणं कुर्वदिवाभूत् । लोभस्पर्धाभ्यां विगलितविवेको ह्यविषयेऽपि प्रवर्तते ।
संध्याघमर्षणं चकारेति भावः । श्वैत्यं, वर्णवाचित्वात्ष्यञ् । चतुरक्षीं, समाहारद्विगौ 'द्विगोः'
इति ङीप् । सलिलघ्रम्, आदन्तत्वात्कः ॥

राशि भानुमदुपस्थितयेऽस्मिन्नात्तमम्बु किरति स्वकरेण ।
भ्रान्तयः स्फुरति तेजसि चक्रुस्त्वष्टृतर्कुचलदर्कवितर्कम् ॥ १८ ॥

राशीति ॥ अस्मिन् राशि भानुमतः सूर्यस्योपस्थितये उपस्थानार्थमात्तं गृहीतमर्घ्यदान-
संबन्धि अर्घ्यदानानन्तरं वा । 'असावादित्यः–' इत्यादिमन्त्रपूर्वं जलं शिरः परितः स्वपा-
णिना स्फुरति प्रकाशमाने तेजसि सौरप्रभाप्रसरे मध्ये गलद्बिन्दुक्रमेण किरति सति भ्रान्तयः
क्षिप्तोदकस्यैव प्रादक्षिण्यपरिभ्रमणानि लोकस्य त्वष्टुर्विश्वकर्मणः तर्कुः शाणचक्रं तत्र घर्षणवशा-
च्चलतो भ्राम्यतो विष्वक्पतनशीलतेजःकणस्यार्कस्य वितर्कं तद्विषयं विशिष्टमूहं चक्रुः ।
प्रकाशमानसौरप्रभाप्रदक्षिणप्रक्षिप्तगलद्बिन्दुजलभ्रमणदर्शनेन विश्वकर्मणा सूर्यः पुनरपि शाण-
चक्रे धृतः किम्, अत एवैतेऽणवः कणाः पतन्तीति लोकस्य तदानीं बुद्धिरभूदित्यर्थः ।
भानुमदुपस्थितये गृहीतमम्बु स्वकरेण विक्षिपत्यस्मिन्राशि विषये लोकस्य भ्रान्तयो नलाङ्ग-
प्रभाप्रसरे प्रकाशमाने सति निशाणचक्रपरिभ्रमत्सूर्यसंभावनां लोकस्य चक्रुरिति वा । राज्ञा
यदम्बु गृहीतं तस्मिन्नुत्क्षिप्ते जले स्फुरति प्रतिफलति रवितेजसि जायमाना भ्रान्तयो भ्रम-
णानि त्वष्टृतर्कुचलदर्कवितर्कं चक्रुः । उत्क्षिप्ता आपो वियति भ्रमन्त्यः पतन्ति, तत्प्रतिबि-

देवानां पूजार्थमानीताः सुमनसः पुष्पाणि तासां स्रग्दामानि माल्यपरम्पराः, यद्वा—स्रजः कण्ठ-
मालाः, दामानि शिरोमाल्यानि, तेषां धामानि स्थानानि मध्यस्थापितपुष्पवेणुगुच्छकादिस्था-
नानि तेषां पटलेषु समूहे वितने तेषामुपरिगन्धेन समुद्भवैः कृष्णागुरुसमुत्थधूमजैः सौर-
भ्यार्थं स्थितैर्धूमोत्थानैर्धूमैरेव भ्रमराणां पटलेन गणेन भूयते स्म जातम् । पुष्पागन्धु
भ्रमरैर्भ्रान्तम्, तथा च—धूमजधूमा एव तत्स्थाने जाता इत्यर्थः । सुमनसो मालत्याः पुष्प-
माला परम्पराः, तासां स्थानं । तदन्वितमिति यावत् । एवं(भूतं) पटलं वितानं यत्र तादृ
शं । देवानामुपरि पुष्पवितानमपि भवेत्सर्वः । देवपूजार्थमुपहृतपुष्पमालापरम्पराणां स्था-
भूतं पटलं गृहप्रान्तच्छदिर्यत्र तादृशे । मध्यान्तरप्रदेशे । देवतागारे हि छदिः प्रान्ते स्थै
भरानयनीयकार्थं पुष्पमाला बध्यन्ते, तासामुपरि भृङ्गा एव भूता जाता इत्यर्थ इति वा । बहु
तरा धूपाः पुष्पमालाश्च यत्र सन्तीति भावः । 'सुमना मालती जातिः' इत्यमरः । 'पटल
छदिः—' (इति च) । 'नैकवर्णे—' इति यादवादिकुलकम् ॥

साङ्कुरेव रुचिपीततमा यैर्यैः पुरास्ति रजनी रजनीव ।
ते धृता वितरितुं त्रिदशेभ्यो यत्र हेमतिलका इव दीपाः ॥ २३ ॥

साङ्कुरेति ॥ यत्र गृहे ते दीपा हेमतिलका इव त्रिदशेभ्यो वितरितुं समर्पयितुं धृता स्थापिताः सन्ति । ते के—यैर्दीपै रुच्या दीप्त्या पीतं ग्रस्तं तमो यस्यास्तादृशी सती स भूता भविष्यन्ती वा रजनी रात्रिः साङ्कुरेवोद्भिन्नप्रलम्बतेजोङ्कुरसहितेव पुराऽस्ति अभूत् भविष्यति वा । तथा—यैः कृत्वा कान्त्या पीततमा अतितरां पीतवर्णाऽत्यन्तगौरी रात्रिरु-द्भिन्नप्रत्यग्राङ्कुरा रजनीव हरिद्रेवाभूद्भविष्यति वा । रात्रिः पीतीभूततया हरिद्रेव, प्रदीपक-लिकाश्च तदङ्कुरा इवेत्युत्प्रेक्षोपमा वा । 'निशाख्या काञ्चनी पीता' इत्यमरः । पीततमा पक्षे सान्तम्, पक्षे तमबन्तम् । पुरास्तीति 'पुरि लुङ् चास्मे' इति (भूते) 'यावत्पुरा—' इति भविष्यति वा लट् ॥

यत्र मौक्तिकमणेर्विरहेण प्रीतिकामधृतवह्निपदेन ।
कुङ्कुमेन परिपूरितमन्तः शुक्तयः शुशुभिरेऽनुभवन्त्यः ॥ २४ ॥

यत्रेति ॥ यत्र देवागारे मौक्तिकमणेः प्रियतमस्य विरहेण कर्त्रा कुङ्कुमस्य स्वोद्दीपनहेतुतया प्रीतिस्तया कामं दत्तं कामेन कर्त्रा वा दत्तं वह्नेः पदं दाहकत्वादिरूपोऽधिकारस्तद्रूपं चिह्नं वा यस्य तेन कुङ्कुमकेसरेण परिपूरितमन्तर्मध्यभागमनुभवन्त्यो बिभ्राणाः शुक्तयः शुशुभिरे । वियोगिन्यो हि विरहाग्नितप्तं हृदयमनुभवन्ति । कुङ्कुमपूर्णाः शुक्तयो वियोगिनीरूपकेण वर्ण्यन्ते । यद्वा—मौक्तिकमणिविरहेणोपलक्षिताः शुक्तयः कुङ्कुमस्य कामोद्दीपनहेतुतया प्रीतिस्तया युक्तेन कामेन । अन्यत्पूर्ववत् । प्रीतो हि किंचित्पदं ददाति शुक्तयो विशिष्टेन कुङ्कुमेनोपलक्षिताः सत्यो मौक्तिकमणिविरहेण पूर्णं मध्यमनुभवन्त्य इव शुशुभिर इति प्रतीयमानोत्प्रेक्षा वा । प्रीतेतिपाठे—स्वोद्दीपकत्वेन प्रीतात्कामाद्धृतं वरेण लब्धं वह्निपदं येनेत्यर्थः । मुक्ताफलोत्पत्तिहेतुभूताः शुक्तयः पुत्रविरहेण मातरो यथा हृदयान्तर्दहन्ति, तथा कुङ्कुमरूपमन्तर्दाहं वहन्त्यः शुशुभिर इति वा ॥

अङ्कचुम्बिघनचन्दनपङ्कं यत्र गारुडशिलाजममत्रम् ।
प्राप केलिकवलीभवदिन्दोः सिंहिकासुतमुखस्य सुखानि ॥ २५ ॥

अङ्केति ॥ यत्र देवागारे अङ्कचुम्बी मध्यवर्ती घनश्चन्दनपङ्को यस्य तस्य गारुडशिलाजमतिनीलस्थूलगरुडोद्गारमणिघटितममत्रं पात्रं केल्या लीलामात्रेण कवलीभवन् ग्रासीभवन् मुखमध्यवर्त्यर्धभाग इन्दुर्यस्य सिंहिकासुतमुखस्य राहुवदनस्य शीतान्नभोजनसुखानि प्राप । तत्सममभूदित्यर्थः । गारुडमणिपात्राणि यत्र चन्दनभृतानि सन्तीति भावः । अमत्रमिति जात्येकवचनम् । भवदिन्दोः भाषितपुंस्कम् ॥

गर्भमेणमदकर्दमसान्द्रं भाजनानि रजतस्य भजन्ति ।
यत्र साम्यमगमन्नमृतांशोरङ्करङ्ककलुषीकृतकुक्षेः ॥ २६ ॥

गर्भमिति ॥ यत्र देवागारे एणमदः कस्तूरी तस्य कर्दमत्वेन सान्द्रं पूर्णं गर्भं मध्यं भजन्ति बिभ्राणानि रजतघटितानि भाजनानि अङ्करङ्कुः कलङ्कमृगस्तेन कलुषीकृतो मलिनीकृतः कुक्षिर्यस्य तस्यामृतांशोश्चन्द्रस्य साम्यमगमत् । देवपूजार्थं रजतपात्राणि कस्तूरीपूर्णानि यत्र सन्तीति भावः ॥

उज्जिहानसुकृताङ्कुरशङ्का यत्र धर्मगहने खलु तेने ।
भूरिशर्करकरम्भवलीनामालिभिः सुगतसौधसखानाम् ॥ २७ ॥

उज्जिहानेति ॥ धर्मेण गहने निबिडे, अथ च—पुण्यकाननरूपे यत्रोच्चवर्तुलधवलतराणां सुगतसौधानां बौद्धदेवालयानां सखायः सदृशास्तेषां भूरिः शर्करा येषु तेषां करम्भवलीनां दधिसक्तूपहाराणां दध्योदनोपहाराणां वा आलिभिः पङ्क्तिभिरुज्जिहान उद्गच्छन् सुकृताङ्कुरस्तस्य शङ्का संभावना खलु निश्चितं तेने व्यरचि आम्रादिवने सहकाराङ्कुरा एवोद्गच्छन्ति, तथा धर्मकानने धर्माङ्कुरा एवेति । यत्र शर्करामिश्रदध्योदनबलिश्रेणय उपकल्पिताः सन्तीति भावः । सखानां, 'राजाह—' इति टच् ॥

खर्वमाख्यदमरौघनिवासं पर्वतं क्वचन चम्पकसंपत् ।
मल्लिकाकुसुमराशिरकार्षीद्यत्र च स्फटिकसानुमनुच्चम् ॥ २८ ॥

खर्वमिति ॥ यत्र क्वचन प्रदेशे विकसितचम्पककुसुमानां संपदुच्चतरपुञ्जोऽमरौघानां निवासभूतपर्वतं मेरुं खर्वं ह्रस्वमाख्यत् । सुवर्णमेरुवर्णचम्पकराशिर्मेरोरप्युच्चतरो यत्रासीदित्यर्थः । तथा—मल्लिकाकुसुमराशिः स्फटिका एव शिखराणि यस्य तं कैलासपर्वतमनुच्चं खर्वमकार्षीत् । शुभ्रतरस्फटिकवर्णमल्लिकापुष्पराशिः कैलासादप्युच्चतरो यत्रासीदित्यर्थः । पूर्वमन्यमात्सर्वानुपपद्यं निरस्तमिति ज्ञेयम् ॥

स्वात्मनः प्रियमपि प्रति शुद्धिं कुर्वती कुलवधूरिव जज्ञे ।
इष्टदैवतनिवेद्यनिवेशाद्यत्र भूमिरवकाशदरिद्रा ॥ २९ ॥

स्वात्मन इति ॥ यत्र हृद्यानां वर्णैरत्नादीनां मनोहारिणां देवतासंबन्धिनां निवेद्यानां पक्वान्नादीनां निवेशादवस्थापनादेतौ[illegible] संकटा दरिद्रा भूमिः स्वात्मनः प्रियं प्रत्यपि शुद्धिं [illegible] कुर्वती कुलवधूरिव

देहस्य गोपनं कुर्वती वा तिलमात्रमपि प्रदेशं द्रष्टुमददाना सती कुलवधूमवजज्ञौ अवमेने। कुलस्त्रीतुल्याभूदित्यर्थः ॥

यत्र कान्तकरपीडितनीलग्रावरश्मिचिकुरासु विरेजुः।
गातृमूर्धविधुतेरनुबिम्बात्कुट्टिमक्षितिषु कुट्टिमितानि ॥ ३० ॥

यत्रेति ॥ यत्र वर्तमानासु कुट्टिमक्षितिषु चन्द्रकान्तादिमणिबद्धभूमिषु देवपूजावसरे गातॄणां गायकानां गानवशान्मूर्धविधुतेः शिरःकम्पस्यानुबिम्बात्प्रतिबिम्बाद्धेतोस्तद्व्याजेन कुट्टिमितानि हठक्रियमाणचुम्बनादिपरिहारार्थं कामिनीशिरःकम्पविलसितानीव विरेजुः। किंभूतासु—भीमो भीमसेनवत् कान्ता सूर्यकान्ताश्चन्द्रकान्ता वा तेषां करैः किरणैः पीडिताः पुरस्ताद्गन्तुं प्रतिबद्धाः। तत्रैव घनीभूता इति यावत्। नीलग्रावरश्मयो नीलमणिकिरणा एव चिकुराः सुनीलाः केशा यासां तासु। कामिन्यो हठपरिचुम्ब्यमानाः प्रियपाणिगृहीता नीलमणिरश्मितुल्याः सुनीलाः केशा यासां कृतकचग्रहाः सत्यश्चुम्बनादिपरिहाराय शिरःकम्पनरूपान् विलासान् कुर्वन्ति। नानामणिबद्धा भूमयो देवसेवका गायकाश्च यत्र सन्तीति भावः ॥

नैकवर्णमणिभूषणपूर्णे स क्षितीन्दुरनवद्यनिवेद्ये।
अध्यतिष्ठदमलं मणिपीठं तत्र चित्रसिचयोच्चयचारौ ॥ ३१ ॥

नेति ॥ स क्षितीन्दुर्भूचन्द्रो नलस्तत्रोक्तरूपे देवपूजागृहे अमलं मणिभी रत्नैः खचितं पीठमध्यतिष्ठत्। किंभूते—नैकवर्णा मणयो येषु देवार्थं कल्पितैर्नानावर्णैर्भूषणैः पूर्णे। तथा—अनवद्यानि मोदकादिनिवेद्यानि यस्मिन्। तथा—चित्राणां नानावर्णानामाश्चर्यकारिणां वा देवार्थमानीतानां सिचयानां वस्त्राणामुच्चयेन राशिना चारौ रमणीये पूर्णे। मणिपीठम्, 'अधिशीङ्–' इति कर्मत्वम्। चार्विति पाठे—पीठविशेषणम् ॥

पञ्चायतनपूजायां प्राथम्येन सूर्यपूजाया विहितत्वात्प्रथमं सूर्यपूजामाह—

सम्यगर्चति नलेऽर्कमतूर्णं भक्तिगन्धिरमुनाकलि कर्णः।
श्रद्दधानहृदयंप्रति चातः साम्बमम्बरमणिर्निरचैषीत् ॥ ३२ ॥

[illegible] ॥ नले सूर्यकान्तमणिरूपं सुवर्णादिघटितप्रतिमारूपं वाऽर्कं सम्यक् श्रौत[illegible] अतूर्णं त्वरारहितं सावधानतया चिरकालमर्चति सति अमुना सूर्येण कर्णो [illegible] [illegible]: अल्पा भक्तिर्यस्य तादृशोऽकलि व्यज्ञापि। सूर्यभक्तोऽपि कर्णो नला[illegible]हीन एवेति सूर्येणान्तर्निश्चित इत्यर्थः। तथा–नलेऽर्कं शनैरर्चति सति अम्बर[illegible] सूर्यः श्रीकृष्णपुत्रं साम्बमन्तःकरणे श्रद्दधानहृदयप्रति श्रद्दधानहृदयमात्रं निरचैषीन्नि[illegible] साम्बोऽपि भक्ततया प्रसिद्धोऽप्यल्पश्रद्धावान्, नतु नलवदत्यन्तं भक्त इति [illegible]। उभाभ्यामपि सकाशान्नलस्य सूर्ये महती भक्तिरभूदिति भावः। अर्चती[illegible][illegible]तेः शता। भक्तिगन्धि, अल्पाख्यायां गन्धस्येत्। हृदयप्रतीति 'सुप् प्रतिना [illegible]व्ययी[illegible] [illegible] ॥

[illegible] प्रतीति पाठे—श्रद्धावद्धृदयममुं नलं प्रति लक्षीकृत्य भानुमान् साम्बं निरचैषीद [illegible] ज्ञातवानित्यर्थः। पूर्व [illegible] [illegible]धीवान्' इति सुखावबोधा।

तत्तदर्यमरहस्यजपेषु स्रग्लयः शयममुष्य बभाज ।
रक्तिमानमिव शिक्षितुमुच्चै रक्तचन्दनजबीजसमाजः ॥ ३३ ॥

तदिति ॥ तेषां तेषामर्यमसंबन्धिनां सूर्यसंबन्धिनां रहस्यानां श्रौतस्मार्तमन्त्राणां जपेषु उपांश्वावृत्तिषु विषये स्रग्लयो जपमालिकारूपः रक्तचन्दनकाष्ठजानां बीजानां कृतच्छिद्रमणीनां फलमध्यवर्तिबीजानां वा समाजः समूहो जपतोऽमुष्य शयं हस्तं बभाज सिषेवे । उत्प्रेक्षते—तत्करे वर्तमानमुच्चैरतिशयितं रक्तिमानं रक्तत्वं शिक्षितुमिव । अन्योऽपि शिष्य उपाध्यायं सेवत एव । रक्तचन्दनबीजजपमालिकाजपेन सौरमन्त्राणां शीघ्रफलत्वात्सौरमन्त्रान्रक्तचन्दनमालिकया जजापेत्यर्थः । स्रग्लयः, एकाच्त्वान्मयट् ॥

इदानीं श्लोकाष्टकेन हरपूजामाह—

हेमनामकतरुप्रसवेन त्र्यम्बकस्तदुपकल्पितपूजः ।
आत्तया युधि विजित्य रतीशं राजितः कुसुमकाहलयेव ॥ ३४ ॥

हेमेति ॥ हेमनामकस्य धत्तूरस्य तरोः प्रसवेन विकसितकुसुमेन कृत्वा तेन नलेनोपकल्पिता पूजा यस्य स त्र्यम्बको राजितः शुशुभे । उत्प्रेक्षते—रतीशं युधि विजित्य बलादात्तया गृहीतया कुसुमरूपकाहलया धत्तूरपुष्पाकारवाद्यविशेषेणेव । कुसुमकाहलयोपलक्षित इवेति वा । शराणां कौसुमत्वाद्वादित्राणामपि कौसुमतया युक्तत्वात्कामकाहलायाः कौसुमत्वमुचितमेव । पराभूतात्कामाद्बलाद्गृहीतया कौसुमकाहलयेव धत्तूरपुष्पेण रक्षित इत्यर्थः । अन्योऽपि शत्रुं जित्वा बलाद्गृहीतेन तच्छत्रवादित्रादिना शोभते । सौन्दर्येण स्वसार्धितत्वात्स्य शिवभक्तत्वात्कामस्य च शिवविरोधित्वात्स्वविरोधिनं स्वस्वामिविरोधिनं च स्मरं रणे जित्वा तस्माद्बलान्नलेनैव गृहीतया कुसुमकाहलयेव धत्तूरपुष्पेण कृत्वा नलेन कृतोपदः, अथच—कृतपूजः शुशुभे । सेवको हि स्वविरोधिनं स्वस्वामिविरोधिनं वा रणे जित्वा तच्छत्रवादित्रादि बलाद्गृहीत्वा स्वामिन उपदीकरोति । तेन च स्वामी शोभते इति वा । स्मितरेण धत्तूरपुष्पेण स नलः शिवमपूपुजदिति भावः । 'धत्तूरः कनकाह्वयः' इत्यमरः । 'वाद्यभाण्डविशेषे तु काहला' इति विश्वः ॥

अर्चयन्हरकरं स्मितभाजा नागकेसरतरोः प्रसवेन ।
सोऽयमापयदतिर्यगवाग्दिक्पालपाण्डुरकपालविभूषाम् ॥ ३५ ॥

अर्चयन्निति ॥ स्मितं विकासं भजते स्मितभाक् तेन विकसितेन नागकेसराख्यस्य तरोः प्रसवेन पुष्पेण कृत्वा हरकरं सुवर्णादिघटितदक्षिणामूर्त्यादिशिवप्रतिमानामर्चयन् पूजार्थं स्थूलतरं शुभ्रतरं केसरतरुकुसुमं तत्पाणौ स्थापयन् सोऽयं नलस्तिरश्चो दिशः प्राच्यादिदिगष्टकाद् अवाच्या अधो दिशः सकाशादन्याऽतिर्यगवाग्दिक् ऊर्ध्वा दिक् तस्याः पालो रक्षको ब्रह्मा तस्य चिरकालमर्दनाद्गतकान्ति पाण्डुरं धवलतरं कपालं शिरस्तेन मस्तककपालेन कृत्वा विभूषामलंकृतिं कपालरूपां विभूषामापयदलम्भयत् । हरेण ब्रह्मणः पञ्चमं शिरश्छित्त्वा कबन्धितं कुर्वतो हरस्य भिक्षार्थं करे तिष्ठति । ततश्च तत्प्रतिकृतावपि तेन भवितुं युक्तमिति केसरपुष्परूपेण मस्तककपालेन तत्करमलंचकारेत्यर्थः । 'चाम्पेयः केसरो नागकेसरः काञ्चना-

देहस्य गोपनं कुर्वती वा तिलमात्रमपि प्रदेशं द्रष्टुमददाना सती कुलवधूमवजज्ञौ अवमेने। कुलस्त्रीतुल्याभूदित्यर्थः ॥

यत्र कान्तकरपीडितनीलग्रावरश्मिचिकुरासु विरेजुः ।
गातृमूर्धविधुतेरनुबिम्बात्कुट्टिमक्षितिषु कुट्टिमितानि ॥ ३० ॥

यत्रेति ॥ यत्र वर्तमानासु कुट्टिमक्षितिषु चन्द्रकान्तादिमणिबद्धभूमिषु देवपूजावसरे गातॄणां गायकानां गानवशान्मूर्धविधुतेः शिरःकम्पस्यानुबिम्बात्प्रतिबिम्बाद्धेतोस्तद्व्याजेन कुट्टिमितानि हठक्रियमाणचुम्बनादिपरिहारार्थं कामिनीशिरःकम्पविलसितानीव विरेजुः । किंभूतासु—भीमो भीमसेनवत् कान्ता सूर्यकान्ताश्चन्द्रकान्ता वा तेषां करैः किरणैः पीडिताः पुरस्ताद्गन्तुं प्रतिबद्धाः । तत्रैव घनीभूता इति यावत् । नीलग्रावरश्मयो नीलमणिकिरणा एव चिकुराः सुनीलाः केशा यासां तासु । कामिन्यो हठपरिचुम्ब्यमानाः प्रियपाणिगृहीता नीलमणिरश्मितुल्याः सुनीलाः केशा यासां कृतकचग्रहाः सत्यश्चुम्बनादिपरिहाराय शिरःकम्पनरूपान् विलासान् कुर्वन्ति । नानामणिबद्धा भूमयो देवसेवका गायकाश्च यत्र सन्तीति भावः ॥

नैकवर्णमणिभूषणपूर्णे स क्षितीन्दुरनवद्यनिवेद्ये ।
अध्यतिष्ठदमलं मणिपीठं तत्र चित्रसिचयोच्चयचारौ ॥ ३१ ॥

नेति ॥ स क्षितीन्दुर्भूचन्द्रो नलस्तत्रोक्तरूपे देवपूजागृहे अमलं मणिभी रत्नैः खचितं पीठमध्यतिष्ठत् । किंभूते—नैकवर्णा मणयो येषु देवार्थं कल्पितैर्नानावर्णैर्भूषणैः पूर्णे । तथा—अनवद्यानि मोदकादिनिवेद्यानि यस्मिन् । तथा—चित्राणां नानावर्णानामाश्चर्यकारिणां वा देवार्थमानीतानां सिचयानां वस्त्राणामुच्चयेन राशिना चारौ रमणीये पूर्णे । मणिपीठम्, 'अधिशीङ्—' इति कर्मत्वम् । चार्विति पाठे—पीठविशेषणम् ॥

पञ्चायतनपूजायां प्राथम्येन सूर्यपूजाया विहितत्वात्प्रथमं सूर्यपूजामाह—

सम्यगर्चति नलेऽर्कमतूर्णं भक्तिगन्धिरमुनाकलि कर्णः ।
श्रद्दधानहृदयंप्रति चातः साम्बमम्बरमणिर्निरचैषीत् ॥ ३२ ॥

सम्यगिति ॥ नले सूर्यकान्तमणिरूपं सुवर्णादिघटितप्रतिमारूपं वाऽर्कं सम्यक् श्रौतस्मार्तमार्गेण अतूर्णं त्वरारहितं सावधानतया चिरकालमर्चति सति अमुना सूर्येण कर्णो राधेयो भक्तिगन्धिः अल्पा भक्तिर्यस्य तादृशोऽकलि व्यज्ञापि । सूर्यभक्तोऽपि कर्णो नलापेक्षयाऽतिहीन एवेति सूर्येणान्तर्निश्चित इत्यर्थः । तथा–नलेऽर्के शनैरर्चति सति अम्बरमणिः सूर्यः श्रीकृष्णपुत्रं साम्बमन्तःकरणे श्रद्दधानहृदयप्रति श्रद्दधानहृदयमात्रं निरचैषीन्निश्चितवान् । साम्बोऽपि भक्ततया प्रसिद्धोऽप्यल्पश्रद्धावान्, नतु नलवदत्यन्तं भक्त इति निश्चिकायेत्यर्थः । उभाभ्यामपि सकाशान्नलस्य सूर्ये महती भक्तिरभूदिति भावः । अर्चतीत्यचौरादिकादर्चतेः शता । भक्तिगन्धि, अल्पाख्यायां गन्धस्येत् । हृदयप्रतीति 'सुप् प्रतिना मात्रार्थे' इत्यव्ययीभावः ॥

---

१ 'श्रद्दधानहृदयं प्रतीति पाठे—श्रद्धावद्धृदयममुं नलं प्रति लक्षीकृत्य भानुमान् साम्बं निरचैषीत साम्ब एवासाविति ज्ञातवानित्यर्थः । पूर्व एव पाठः पटीयान्' इति सुखावबोधा ।

तत्तदर्यमरहस्यजपेषु स्रग्मयः शयममुष्य बभाज ।
रक्तिमानमिव शिक्षितुमुच्चै रक्तचन्दनजबीजसमाजः ॥ २३ ॥

तदिति ॥ तेषां तेषामर्यमसंबन्धिनां सूर्यसंबन्धिनां रहस्यानां श्रौतस्मार्तमन्त्राणां जपेषु उपांश्वावृत्तिषु विषये स्रग्मयो जपमालिकारूपः रक्तचन्दनकाष्ठजानां बीजानां कृतच्छिद्रम-णीनां फलमध्यवर्तिबीजानां वा समाजः समूहो जपतोऽमुष्य शयं हस्तं बभाज सिषेवे । उत्प्रेक्षते—तत्करे वर्तमानमुच्चैरतिशयितं रक्तिमानं रक्तत्वं शिक्षितुमिव । अन्योऽपि शिष्य उपाध्यायं सेवत एव । रक्तचन्दनबीजजपमालिकाजपेन सौरमन्त्राणां शीघ्रफलत्वात्सौरमन्त्रा-न्रक्तचन्दनमालिकया जजापेत्यर्थः । स्रग्मयः, एकार्थत्वान्मयट् ॥

इदानीं श्लोकाष्टकेन हरपूजामाह—

हेमनामकतरुप्रसवेन त्र्यम्बकस्तदुपकल्पितपूजः ।
आत्तया युधि विजित्य रतीशं राजितः कुसुमकाहलयेव ॥ २४ ॥

हेमेति ॥ हेमनामकस्य धत्तूरस्य तरोः प्रसवेन विकसितकुसुमेन कृत्वा तेन नलेनोप-कल्पिता पूजा यस्य स त्र्यम्बको राजितः शुशुभे । उत्प्रेक्षते—रतीशं युधि विजित्य बला-दात्तया गृहीतया कुसुमरूपकाहलया धत्तूरपुष्पाकारवाद्यविशेषेणेव । कुसुमकाहलयोपलक्षित इवेति वा । शराणां कौसुमत्वाद्वादित्राणामपि कौसुमतया युक्तत्वात्कामकाहलायाः कौसुमत्व-मुचितमेव । पराभूतात्कामाद्बलाद्गृहीतया कौसुमकाहलयेव धत्तूरपुष्पेण रञ्जित इत्यर्थः । अन्योऽपि शत्रुं जित्वा बलाद्गृहीतेन तच्छत्रवादित्रादिना शोभते । सौन्दर्येण स्वस्पर्धित्वा-त्स्वस्य शिवभक्तत्वात्कामस्य च शिवविरोधित्वात्स्वविरोधिनं स्वस्वामिविरोधिनं च स्मरं रणे जित्वा तस्माद्बलात्मलेनैव गृहीतया कुसुमकाहलयेव धत्तूरपुष्पेण कृत्वा नलेन कृतोपहारः, अथच—कृतपूजः शुशुभे । सेवको हि स्वविरोधिनं स्वस्वामिविरोधिनं वा रणे जित्वा तच्छत्र-वादित्रादि बलाद्गृहीत्वा स्वामिन उपदीकरोति । तेन च स्वामी शोभते इति वा । जितस्मरेण धत्तूरपुष्पेण स नलः शिवमपूपुजदिति भावः । 'धत्तूरः कनकाह्वयः' इत्यमरः । 'वाद्यभाण्ड-विशेषे तु काहला' इति विश्वः ॥

अर्चयन्हरकरं सितभाजा नागकेसरतरोः प्रसवेन ।
सोऽयमापदतिर्यगवाग्दिक्पालपाण्डुरकपालविभूषाम् ॥ २५ ॥

अर्चयन्निति ॥ सितं विकसितं भवति सितभाक् तेन विकसितेन नागकेसराख्यस्य तरोः प्रसवेन पुष्पेण कृत्वा हरकरं सुवर्णादिघटितदक्षिण[illegible]न् पूजार्थं स्थूलतरं शुभ्रतरं केसरतरकुसुमं तत्राग्रे स्थापयन् सोऽयं नलस्तिर्यग्गा दिशः प्राच्या-दिरष्टकाद् अवाच्या अधो दिशः [illegible] अन्यां दिशं [illegible] रक्षको ब्रह्मा तस्य शिरःकपाल[illegible] पाण्डुरं धवलतरं कपालं शिरस्तेन [illegible] कृत्वा विभूषणं [illegible] विभूषणमापदत् । हरेण ब्रह्मणः पञ्चमं शिरश्छित्त्वा प्रदक्षिणं कुर्वतो हरस्य भिक्षार्थं करे स्थितं । तस्य [illegible] तेन [illegible] पुष्पेण केसरपुष्परूपेण [illegible] तत्करतलं [illegible] इत्यर्थः । 'चाम्पेयः केसरो नागकेसरः काञ्चन-

ह्वयः' इत्यमरः । हरकरम्, अर्चनापेक्षया कर्मत्वम् । पक्षे आप्नोतेर्गत्यर्थत्वादणौ कर्तुर्णौ कर्मत्वम् । तिर्यगवागिति वाऽव्ययम्, अतिर्यगवाक् चासौ दिक् चेति समासः ॥

नीलनीररुहमाल्यमयीं स न्यस्य तस्य गलनालविभूषाम् ।
स्फाटिकीमपि तनुं निरमासीन्नीलकण्ठपदसान्वयतायै ॥ ३६ ॥

नीलेति ॥ स नलस्तस्य हरस्य स्फटिकनिर्मितामपि तनुं हरप्रतिमां नीलनीररुहाणां माल्यं माला तन्मयीं गलनालः कण्ठस्तस्य विभूषां भूषणं न्यस्य आवध्य नीलकण्ठवाचकं पदं तस्य सान्वयतायै अन्वयसाहित्याय नीलः कण्ठोऽस्येति संबन्धसार्थक्याय निरमासीन्निर्मितवान् । नीलोत्पलमालां कण्ठे बद्ध्वा स्फाटिकीमपि शिवप्रतिमां नीलकण्ठपदसहितामकरोदित्यर्थः । कण्ठे एव नीलोत्पलपूजां चकार, अन्यत्र तु चन्दनश्वेतपुष्पादिभिः पूजितवानिति भावः ॥

प्रीतिमेष्यति कृतेन ममेदृक्कर्मणा पुररिपुर्मदनारिः ।
तत्पुरः पुरमतोयमधाक्षीद्धूपरूपमथ कामशरं च ॥ ३७ ॥

प्रीतिमिति ॥ पुराणां दैत्यविशेषाणां रिपुः, तथा—मदनस्यारिः शिवो मम कृतेन ईदृशा कर्मणा पुरकामशरदाहरूपव्यापारेण प्रीतिमेष्यति प्रसन्नो भविष्यति । अतो हेतोरिव इति बुद्ध्या वायं नलस्तस्य पुररिपोः कामारेः पुरो धूपरूपं धूपस्वरूपम्, अथ च—धूपवेषधारिणं पुरं गुग्गुलुमधाक्षीत् ददाह । अथ तद्दाहानन्तरं धूपविशेषरूपं कामशरं कामबाणं च ददाह । यस्यारिर्यद्रिपुशरश्च यदग्रे येन दह्यते स तस्मिन् प्रीत एव । शिवभयेन वेषान्तरधारिणं पुरं दैत्यं कामबाणं च मोहनाख्यं ददाहेत्यर्थः । धूपसमर्पणान्तां शिवपूजामकरोदिति भावः । ईदृशा पुष्पपूजान्तेन भक्तियुक्तेनापि कर्मणा पुररिपुः कामारिः शिवो मम कृते मदर्थं मयि विषये प्रीतिं न यास्यति एतावतापि संतुष्टो न भविष्यति, अतः कारणादिव तदग्रे पुरं कामशरं च ददाह । एवं कृते शंकरस्तुष्टो भविष्यतीति भाव इति वा । पुररिपुर्मदनारिरिति च योगस्यैवात्र प्राधान्यान्न पौनरुक्त्यम् । 'गुग्गुलौ कथितः पुरः' इति विश्वः । तत्पुरः शेषषष्ठीसमासः । अन्यथा—अव्ययेन सह षष्ठीसमासनिषेधः स्यात् । तदिति लुप्तषष्ठीकं विभक्तिप्रतिरूपकमव्ययं पृथक्पदं वा ॥

तन्मुहूर्तमपि भीमतनूजाविप्रयोगमसहिष्णुरिवायम् ।
शूलिमौलिशशिभीततयाऽभूद्ध्यानमूर्च्छननिमीलितनेत्रः ॥ ३८ ॥

तदिति ॥ स चासौ मुहूर्तश्च तमपि तस्मिन्देवपूजाक्षणेऽपीत्यर्थः । भीमतनूजाविप्रयोगं वियोगमसहिष्णुरयं नलः शूलिमौलौ वर्तमानाच्छशिनो भीततयेव नेत्रध्यानेन यन्मूर्च्छनमेकाग्रतालक्षणः प्रलयस्तेन हेतुना निमीलिते संकोचितपक्ष्मीकृते नेत्रे येनैवंभूतोऽभूत् । विरहित्वाद्धरशिरश्चन्द्रदर्शनस्य नितरां संतापकारित्वभिया ध्यानमूर्च्छनव्याजेन नेत्रे निमीलितवानित्यर्थः । पूजानन्तरं शिवस्य ध्यानं चकारेति भावः । शूलधारिणापि यः शिरसि धृतः, तस्मादधिकं भयं युक्तमिति सूचयितुं शूलिपदं प्रायोजि । तन्मुहूर्तम्, अत्यन्तसंयोगे द्वितीया । विप्रयोगं, 'न लोका–' इति षष्ठीनिषेधाद्द्वितीया ॥

दण्डवद्भुवि लुठन्स ननाम त्र्यम्बकं शरणभागिव कामः ।
आत्मशस्त्रविशिखासनबाणान्न्यस्य तत्पदयुगे कुसुमानि ॥ ३९ ॥

दण्डवदिति ॥ स नलो दण्डेन तुल्यं साष्टाङ्गपातेन भुवि लुठन् सन् त्र्यम्बकं ननाम । किं कृत्वा—तस्य हरस्य पदयुगे पुष्पाञ्जलिदानार्थमञ्जलिदानाय धृतानि कुसुमानि न्यस्य समर्प्य । तत्रोत्प्रेक्षते—तान्येव कुसुमानि आत्मनः खड्गादि शस्त्रं विशिखासनं धनुः, बाणान् प्रशस्त्रभूतानि पुष्पाणि हरपदयुगे समर्प्य 'अद्यप्रभृति शस्त्रं न धारयामि दासोऽस्मि मां रक्ष' इत्यादि वदन् शरणं रक्षितारं शिवमेव भजमानो रूपसाम्यात्काम इव ध्यानानन्तरं पुष्पाञ्जलिदानपूर्वकं भक्त्यतिशयेन दण्डवत्प्रणाममकरोदित्यर्थः । विशिखासनं तूणीरं वा । अन्योऽपि शरणागते एवमेव करोति ॥

त्र्यम्बकस्य पदयोः कुसुमानि न्यस्य सैप निजशस्त्रनिभानि ।
दण्डवद्भुवि लुठन्किमु कामस्तं शरण्यमुपगम्य ननाम ॥ ४० ॥

त्र्यम्बकस्येति ॥ क्षेपकः । सैप इत्यत्र 'सोचि लोपे चेत्—' इति सुलोपः । पूर्वश्लोकोक्त एवार्थः ॥

व्यापृतस्य शतरुद्रियजप्तौ पाणिमस्य नवपल्लवलीलम् ।
भृङ्गभङ्गिरिव रुद्रपराक्षश्रेणिरश्रयत रुद्रपरस्य ॥ ४१ ॥

व्यापृतस्येति ॥ रुद्रशब्दात्परेषां पश्चादुच्चार्यमाणानामक्षाणां । रुद्राक्षाणामित्यर्थः । रुद्रः परः परं दैवतं येषां वा रुद्रपराः शिवभक्तास्तत्संबन्धिनाम् । तैर्धार्यमाणानामिति यावत् । तादृशानां वा मणीनां श्रेणिर्माला भृङ्गभङ्गिर्भ्रमरपङ्क्तिरिवास्य नलस्य नवपल्लवलीला यस्य तत्सदृशमित्यर्थः । एवंविधं पाणिं करमश्रयत सिषेवे । किंभूतस्य—रुद्रपरस्य शिवभक्तस्य, अत एव शतं रुद्रा देवता अस्य शतरुद्रसंबन्धिनः शतरुद्रियसंज्ञकस्य 'नमस्ते—' इत्यादि शिवसूक्तस्य जप्तौ जपे विषये व्यापृतस्य सव्यापारस्य रुद्राक्षाणां रुद्रपरत्वात् 'नमस्ते—' इत्यादिपठ्यजपं रुद्राक्षजपमालया चकारेत्यर्थः । भृङ्गमालापि नवपल्लवं सेवते । 'शतरुद्राद्घश्च' इति वक्तव्याद्घः । जप्तौ, 'तितुत्र—' इतीण्निषेधः । 'पञ्चाशतैव रुद्राक्षैः—' इत्यादि-हारीतोक्तो हरोक्तश्च जपमालाविधिर्द्रष्टव्यः । अनामिकादिविषये पाणौ रुद्राक्षयोगेति ज्ञातव्यः ॥

उत्तमं स महति स्म महीभृत्पूरुषं पुरुषसूक्तविधानैः ।
द्वादशापि च स केशवमूर्तीर्द्वादशाक्षरमुदीर्य ववन्दे ॥ ४२ ॥

उत्तममिति ॥ स महीभृन्नल उत्तमं परमं पूरुषं पुरुषोत्तमं पुरुषसूक्तस्य 'सहस्रशीर्षा पुरुषः—' इत्यादिषोडशर्चस्य सूक्तस्य विधानैरुक्तप्रकारविशेषैः । 'ऋचामुदमनूक्तेन यः पुष्पाण्यप एव वा । अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् । आनुष्टुभस्य सूक्तस्य त्रिष्टुबन्तस्य देवता । पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः ॥' तथा—'ॐकारपूर्वकैरेव षोडशर्चैः पृथक्पृथक् । आवाहनासनं पाद्यमर्घ्यमाचमनीयकम् । स्नानं वस्त्रोपवीतं च गन्धमाल्यानि च क्रमात् । धूपं दीपं च नैवेद्यं नमस्कारं प्रदक्षिणम् । विसर्जनोद्वासनं कुर्यादेव नारायणो विधिः ॥' इति स्मृतिकारविहितैः षोडशभिः प्रकारैः षोडशोपचारैरिति स्म तुष्टुवत् । स नलः 'ॐ नमो भगवते वासुदेवाय' इति मन्त्रमुच्चार्य द्वादश केशवादिमूर्तीर्ववन्दे

वैष्णवागमोक्तक्रमेणोवीर्य सम्यगुच्चार्य द्वादशापि केशवसंबन्धिनीर्मूर्तीर्वैष्णवीर्द्वादशशालग्राम-शिलामूर्तीर्ववन्दे तुष्टाव प्रणनाम वा । ता अप्यपूजयदिति भावः । 'शिला द्वादश भो वैश्य शालग्रामसमुद्भवाः । विधिवत्पूजिता येन तस्य पुण्यं वदामि ते ॥ कोटिद्वादशलिङ्गैस्तु पूजितैः स्वर्णपङ्कजैः । यत्स्याद्द्वादशकल्पेषु दिनेनैकेन तद्भवेत् ॥' इति पद्मपुराणमिति भावः। पूर्वोक्तद्वादशाक्षरमुच्चार्य द्वादशसंख्याका अपि केशवसंबन्धिनीर्मूर्तीः सामर्थ्यादेतन्मन्त्राक्षर-सूचिताः 'ॐ केशवाय धात्रे नमः' इति प्रकारेण 'द्वादशादित्यसहिता मूर्तीर्द्वादश विन्यसेत्। केशवाद्याः क्रमाद्देहे वक्ष्यमाणविधानतः ॥ ललाटे केशवं धात्रा कुक्षौ नारायणं पुनः। अर्यम्णा हृदि मित्रेण माधवः कण्ठदेशतः ॥ वरुणेन च गोविन्दं पुनर्दक्षिणपार्श्वके । अंशुना विष्णुमंसस्थं भगेन मधुसूदनम् ॥ गले विवस्वता युक्तं त्रिविक्रममनन्तरम् । वामपार्श्वस्थले-न्द्रेण वामनाख्यमथांसके ॥ पूष्णा श्रीधरनामानं गले पर्जन्यसंयुतम् । हृषीकेशाह्वयं पृष्ठे पद्मनाभं ततः परम् ॥ त्वष्ट्रा दामोदरं पश्चाद्विष्णुना ककुदि न्यसेत् । द्वादशार्णं महामन्त्रं ततो मूर्ध्नि प्रविन्यसेत् ॥' इति द्वादशाक्षरगर्भितमिति ज्ञातव्यम् । प्रकारान्तरमागमोक्तं द्रष्टव्यम् । महीयानिति पाठे—नितरामागमशास्त्रकोविदः परमभक्तश्चेत्यर्थः । 'पुरुषाः पूरुषा नरः' इत्यमरः ॥

कथमपूपुजदित्याह—

मल्लिकाकुसुमदुण्डुभकेन स भ्रमीवलयितेन कृते तम् ।
आसने निहितमैक्षत साक्षात्कुण्डलीन्द्रतनुकुण्डलभाजम् ॥ ४३ ॥

मल्लिकेति ॥ स नलः भ्रमीभिर्भ्रमणैर्वेष्टनैर्वलयितेन मल्लिकाकुसुमसंबन्धिना दुण्डुभकेन निर्विषविफणस्थूलराजिलतुल्येन घनस्थूलतरदाम्ना कृत्वा नलेनैव कृते रचिते आसने निहितं स्थापितं तं पुरुषोत्तमं साक्षात्तत्त्वतः कुण्डलिनां चक्षुःश्रवसामिन्द्रः शेषस्तस्य तनुः शरीरं तस्य कुण्डलं पुच्छवेष्टितवलयाकारशरीरभागं तद्भजते इति कुण्डलाकारशेषशरीरे वर्तमान-मिव ऐक्षत । दुण्डुभस्य विफणतया साम्यात्स्थूलघनतरे पुष्पदाम्नि दुण्डुभपदं लाक्षणिकम् । दुण्डुभप्रतिकृतिर्दुण्डुभकः 'इवे प्रतिकृतौ' इति कन् । 'दुडि निमज्जने' दुण्डतीति दुण्डुभ इत्यौणादिकः पृषोदरादिर्वा ॥

मेचकोत्पलमयी बलिवन्धुस्तद्बलिस्रगुरसि स्फुरति स्म ।
कौस्तुभाख्यमणिकुट्टिमवास्तुश्रीकटाक्षविकटायितकोटिः ॥ ४४ ॥

मेचकेति ॥ मेचकोत्पलानि नीलोत्पलानि तन्मयी तद्बलिस्रक् तेन नलेन समर्पिता बलिस्रक् पूजामाला बलिवन्धुर्बलेर्बन्धनकारिणः श्रीविष्णोरुरसि स्फुरति स्माशोभत । उत्प्रे-क्षते–कौस्तुभाख्यमणेः संबन्धि कुट्टिमं कौस्तुभमणिबद्धा भूर्वक्षोलक्षणा तद्वास्तु वसतिस्थानं यस्यास्तस्याः श्रियः कटाक्षाणां विकटायितानि विस्तारान्नीलतरनेत्रगोलकवक्रविस्फुरितकिरणा-स्तेषां कोटिः परम्परेव । नीलोत्पलमालाया वक्षस्येव वर्तमानत्वात्तत्रैव च लक्ष्म्या अपि वर्तमा-नत्वात्साम्यात्कटाक्षविकटायितं कोटिरिवाशोभतेति प्रतीयमानोत्प्रेक्षा । बलिबन्धुः, तृनि पूर्वेण 'द्वितीया' इति योगविभागात्समासः । विकटायितम्, आचारक्यङन्ताद्भावे निष्ठा ॥

१ 'आचारक्किबन्तात्' इति सर्वत्रोपलब्धोऽपि पाठो दुष्ट एव ।

स्वर्णकेतकशतानि स हेम्नः पुण्डरीकघटनां रजतस्य ।
माल्ययारुणमणेः करवीरं तस्य मूर्ध्नि पुनरुक्तमकार्षीत् ॥ ४५ ॥

स्वर्णेति ॥ स नलस्तस्य पुरुषोत्तमस्य मूर्ध्नि हेम्नः सुवर्णघटितपुष्पाणां मालया कृत्वा स्वर्णकेतकीपुष्पाणां शतानि, तथा—रजतस्य रूप्यघटितपुष्पाणां मालया कृत्वा पुण्डरीकाणां सिताम्भोजानां घटनां समर्पणां तथा—अरुणमणेः समर्पितमाणिक्यपद्मरागादिरक्तवर्णमणीनां मालया च कृत्वा करवीरपुष्पाणि, एतत्सर्वं पुनरुक्तमकार्षीत् । सुवर्णमाल्येनैव पूजायाः सिद्धत्वात्स्वर्णकेतकादि निरर्थकं चकारेत्यर्थः । स्वर्णकेतकादिभिः सुवर्णघटितपुष्पादिभिश्च श्रीपुरुषोत्तममपूपुजदिति भावः । विष्णुपूजायां कनककरवीरव्यावानपुष्पव्यतिरिक्तानां रक्तपुष्पाणां निषेधः, शूद्रारोपितकरवीरकुसुमपूजानिषेधः, इत्यविरोधः । पुनरुक्तं, 'नपुंसकमनपुंसकेन—' इत्येकशेषैकवद्भावौ ॥

नाल्पभक्तबलिरन्ननिवेद्यैस्तस्य हारिणमदेन स कृष्णः ।
शङ्खचक्रजलजातवदर्चः शङ्खचक्रजलपूजनयाभूत् ॥ ४६ ॥

नाल्पेति ॥ स पुरुषोत्तमस्तस्य नलस्यान्ननिवेद्यैस्तेन समर्पितैर्नानाविधौदनानामुपहारैः कृत्वा नाल्पोऽतिमहान् भक्तबलिरोदनोपहारो यस्य, अथ च—अतिमहान् भक्तः श्रद्धावान् बलिर्वैरोचनिर्यस्य, एवंभूतोऽभूत् । तथा—नलसमर्पितेन हारिणमदेन कस्तूर्या कृष्णवर्णः, अथ च—कृष्णनामा अभूत् । तथा—हेमरूप्यादिघटितदक्षिणावर्तादिशङ्खानां चक्रे समूहे तत्र स्थितेन जलेन कृत्वा या पूजा अभिषेकार्घदानादिरूपा तया कृत्वा शङ्खचक्रजलेन जातवती संपन्नार्चा पूजा यस्य, अथ च—शङ्खः पाञ्चजन्यः, चक्रं सुदर्शनः, जलजातं पद्मं, तानि विद्यन्ते यस्यास्तादृशी शङ्खचक्राब्जयुता अर्चा प्रतिमा यस्यैवंविधोऽभूत् । पुरुषोत्तमदेवस्य नालेतेषां शब्दानामन्वर्थत्वमेव तत्कृतान्ननैवेद्यादिसमर्पणेनेदानीमभूदित्यर्थः । एतन्निबन्धना एवास्यैताः संज्ञा इति वा । अत्र प्रतीयमानोत्प्रेक्षा । 'प्रतिकृतिरर्चा पुंसि—' इत्यमरः । नाल्पेति नकारसमासः । हारिणेति संबन्धेऽण् ॥

राशि कृष्णलघुधूपनधूमाः पूजयत्यहिरिपुध्वजमस्मिन् ।
निर्ययुर्भवधृता भुजगा भीदुर्यशोमलिनिता इव जालैः ॥ ४७ ॥

राशीति ॥ कृष्णलघुः कृष्णागुरुस्तस्य धूपनधूमा धूपकरणसंबन्धिनो धूमा अस्मिन् राज्ञि नले अहिरिपुर्गरुडो ध्वजे यस्य तं गरुडध्वजं पुरुषोत्तमं धूपोपचारेण पूजयति सति जालैर्गवाक्षैर्बहिर्निर्ययुः । उत्प्रेक्षते—भीरिव दुर्यशो गरुडाद्भीतिलक्षणमयशस्तेन मलिनिताः श्यामीकृताः देवतागारस्थितेन भवेन हरेण सर्वेऽपि भुजगलोके [illegible] बाहुकण्ठभुजगा भुजगा इव । अयमर्थः—[illegible] पूजयति, तदा शिवनिकटे स्थातुमक्षमत्वात् इतस्ततः पलायिताः [illegible] सर्पा भीदुर्यशोमलिनिता इव [illegible] निर्ययुरित्यर्थः । अन्योऽपि भीतिमलिनो जालरन्ध्रेण बहिर्निर्गच्छति । 'धूमः—' इत्यपि पाठः । अगुरुणोऽपि लघुत्वम् । तेन कृष्णागुरुरित्यर्थः ॥

अर्धनिःस्वनमिमाल्यविलिम्पैः लिरजाविनयङ्गलवद्धैः ।
तं पिधाय विदधे बहुतारारात्रिकोपनिधिमम्बुमिवैषः ॥ ४८ ॥

मैवेति ॥ हे भगवन्, त्वं 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह' इत्यादिश्रुतिप्र-
माणाद्वाङ्मनसयोर्विषयो गोचरो मैव भूः ताभ्यां ग्रहीतुं न शक्यः स एव यद्यपि, तथापि
ते वाङ्मनसे पुनस्त्वां कथं नोद्दिशताम्, अपितु अविषयमपि त्वामुद्दिश्य प्रवर्तेतामित्यर्थः।
दृष्टान्तमाह—अतिदूरवर्तित्वाद् घनं मेघमप्राप्नुवतोऽलभमानस्याप्युत्कटोत्कण्ठितस्य चातक-
स्त्रीपुंसयुगस्य घनो मेघो जलदानेन तृप्तये स्यादेवेति दृष्टान्तेनाविषयोऽपि भवान् स्तुतो
ध्यातश्च मोक्षहेतुः । त्वमेवानुग्रहीष्यतीति तव स्तुतिः कर्तुं युक्तैवेति भावः । वाङ्मन-
सयोः, 'अचतुर-' इत्यादिना साधुः ॥

इदानीं प्रथमं मत्स्यावतारं स्तोतुमाह—

> **छद्ममत्स्यवपुषस्तव पुच्छास्फालनाज्जलमिवोद्धतमब्धेः ।**
> **श्वैत्यमेत्य गगनाङ्गणसङ्गादाविरस्ति विबुधालयगङ्गा ॥ ५६ ॥**

छद्मेति ॥ हे हरे, शङ्खासुरापहृतवेदोद्धरणरूपच्छद्मना मत्स्य एव वपुर्यस्य तस्य तव
पुच्छेनास्फालनादाघातादूर्ध्वमुद्धतं क्षिप्तमुच्छलितं सागरजलमिव गगनाङ्गणस्य सङ्गात्संबन्धा-
च्छ्वैत्यं धवलतामेत्य प्राप्य विबुधालयस्य स्वर्गस्य गङ्गा मन्दाकिनी आविरस्ति प्रकटीभवति
तदेव जलं मन्दाकिनीभूय गगने स्फुरतीत्यर्थः । वेदसंरक्षणद्वारा लोकानुग्रहार्थमेव त्वया
तत्तच्छरीरं धार्यते इति भावः । एवमुत्तरत्रापि ज्ञेयम् । श्वैत्यमेत्येवेति वान्वयः । 'यदा
यदा हि धर्मस्य ग्लानिर्भवति भारत' इत्यादि श्रीकृष्णवचनमेव छद्मपदेन सूचितम् । साग-
रोदकस्याश्रयौपाधिकतया प्रतिभासमानस्यापि गगने क्षिप्ततया निरुपाधिकं शुक्लमेतावद्यां ब-
प्रकटितमित्यनेनातिस्थूलतरशरीरवत्त्वं सूचितम् । नदी चाद्यापि तथैव तिष्ठति, नत्वधः पत-
तीति सामर्थ्यातिशयः सूच्यते । यद्यपि नलः शैव इति प्रथा तथापि शिवस्य विष्णुभक्तत्वा-
द्विष्णुस्तुत्यैव शिवस्य प्रीतिसंभवादैकरूप्याच्च नलस्य विष्णुस्तुतिकरणम् । श्रीहर्षस्य च पर-
मवैष्णवत्वात्पुरुषोत्तमस्तुतिनिबन्धनं युक्तमेवेति न काचिदनुपपत्तिः । अतएवोपसंहारेऽपि
'हरिहरं परिपूज्य' इत्युक्तम् ॥

कूर्मं वर्णयति—

> **भूरिसृष्टिधृतभूवलयानां पृष्ठसीमनि किणैरिव चक्रैः ।**
> **चुम्बितावतु जगत्क्षितिरक्षाकर्मठस्य कमठस्तव मूर्तिः ॥ ५७ ॥**

भूरीति ॥ हे भगवन्, तव कमठसंज्ञा मूर्तिर्जगद् अवतु । किंभूता—भूरिषु सृष्टिषु
प्रतिसर्गं धृतानां भूवलयानां किणैरतिघर्षणनिष्ठुरीभूतसंजातवैवर्ण्यत्वग्व्रणैरिव चक्रैश्चक्राकारै-
खाविन्यासविशेषैः पृष्ठस्य सीमनि स्थले चुम्बिता स्पृष्टा । किंभूतस्य—क्षितौ क्षये प्रलये र-
क्षायां च कर्मठस्य कर्मशूरस्य पृष्ठे धारणेन क्षितिरक्षणक्षमस्य । पृथ्वीधारणद्वारा लोकानु-
ग्रहार्थमेव कमठरूपं त्वया धृतमिति भावः । सप्तपातालान्तेऽधस्तात्फणामण्डलेन शेषो भु-
विभर्ति, ततोऽप्यधो ब्रह्माण्डाधः कटाहस्य भारं पृष्ठे वहन् ब्रह्माण्डावरण(जलावरण)स्थे
जले कूर्मराजो वर्तत इति पुराणम् । एतेन प्रतिसर्गमनन्तभूमण्डलधारणेनानिर्वाच्यमहिमत्वं
सूचितम् । कमठपृष्ठे च स्वभावतश्चक्राणि भवन्ति ॥

श्लोकद्वयेन वराहं वर्णयति—

दिक्षु यत्खुरचतुष्टयमुद्रामभ्यवैमि चतुरोऽपि समुद्रान् ।
तस्य पोत्रिवपुषस्तव दंष्ट्रा तुष्टयेऽस्तु मम वाऽस्तु जगत्याः ॥ ५८ ॥

दिक्ष्विति ॥ अहं चतसृषु प्राच्यादिदिक्षु चतुरोऽपि समुद्रान् यस्य वराहस्य खुराणां चतुष्टयस्य मुद्रां चिह्नितं स्थापितचरणातिभारसंजातभूगर्तेनैवाभ्यवैमि जाने, तस्य पोत्रिवपुषो महावराहदेहस्य तव दंष्ट्रा मम तुष्टये कामपूर्त्यानन्दायास्तु । किंभूता दंष्ट्रा—जगत्याः पातालादुद्धरणद्धेतोर्वास्तु वसतिगृहम् । धृतभूमिरित्यर्थः । 'कोलः पोत्री किरिः किटिः' इत्यमरः । षित्त्वप्राप्तस्य ङीपोऽनित्यत्वाद्दंष्ट्रा ॥

उद्धृतिस्खलदिलापरिरम्भाल्लोमभिर्बहिरितैर्बहुहृष्टैः ।
ब्राह्ममण्डमभवद्बलिनीपं केलिकोल तव तत्र न मातः ॥ ५९ ॥

उद्धृतीति ॥ हे केल्या क्रीडामात्रेण कोल धृतवराहरूप भगवन्, हिरण्याक्षं दैत्यं हत्वा पातालात्तत्सकाशादुद्धृतावुद्धरणसमये स्खलन्त्याः पतन्त्या इलाया भुवः परिरम्भात्तत्समारम्भेण धारणादालिङ्गनाच्च हेतोर्बहु नितरां हृष्टैरूर्ध्वीभूतैः, अतएव—ब्रह्माण्डं निर्भिद्य बहिरितैर्निर्गतैर्लोमभिः कृत्वा ब्राह्ममण्डं तव बलेः पूजायाः संबन्धि नीपं तत्कालविकसितकदम्बकुसुममिवाभवत् । किंभूतस्य—तत्र ब्रह्माण्डे स्थूलतरदेहत्वान्न मातः संमातुमशक्तस्य । एवंविधकुसुमपूजायोग्यस्त्वमेव भवसीत्यर्थः । अन्योऽपि योषिदालिङ्गनाद्धृष्टरोमा भवति । 'ब्राह्मोऽजातौ' इति साधुः । मातः, 'मा माने' इत्यस्मात्क्तः ॥

श्लोकद्वयेन श्रीनृसिंहं वर्णयति—

दानवाद्यगहनप्रभवस्त्वं सिंह मामव रवैर्घनघोरैः ।
वैरिदारिदिविषत्सुकृताश्रुस्नानसंभवभवन्मनुजार्धः ॥ ६० ॥

दानवेति ॥ हे सिंह, दानवानामाद्यस्य प्रथमस्य हिरण्यकशिपोर्गहनं महत्कष्टं संकटं तदर्थं प्रभव उत्पत्तिः प्राकट्यं यस्य तन्मारणार्थं कृतावतारः, अथच—दानवो हिरण्यकशिपुस्तद्रूपमाद्यं पुरातनं यद्गहनं वनं तत्र प्रभवो यस्य । पुरातने हि वने सिंहसंभवो युक्तः, अथच—दानवानामाद्यः श्रीहरिभक्तत्वान्मुख्यः प्रह्लादस्तस्य गहने पितृकारितताडनादिदुःखनिमित्ते हिरण्यकशिपुविदारणद्वारा भक्तप्रह्लादसंरक्षणार्थं [illegible] तादृशस्त्वं घनवन्मेघवद्घोरैर्गम्भीरैर्निबिडैर्भयप्रदैश्च वा रवैः सिंहनादैर्मामव । किंभूतः—[illegible] तत्कालानि दिविषदां मुनीनां देवानां च सुकृतानि सत्कर्माणि च तेषां [illegible] संभव उत्पत्तिर्यस्य तादृशो भवन् संपद्यमानो मनुजो मनुष्य एवार्ध एकदेशो यस्य । 'दनुवाघ-' इति पाठे—दानवानां बाधने तेषां मर्दने लक्षणया बाहुल्यं तेन प्रभवो यस्य । [illegible] । दानवानामाद्यस्य हिरण्यकशिपोर्गहने वनगह्वरे प्रभवः प्राकट्यं यस्य वा । एवं सर्वा- [illegible]

१ 'नाद' इति पाठो जीवातुसंमतः ।

पवने एवावततारेति सकलपुराणसंवादः प्रकटितः। स्तम्भादिति तु प्रवादमात्रमिति भाष्य-
त्तविरोधादुपेक्ष्यम्॥

दैत्यभर्तुरुदरान्धुनिविष्टां शक्रसंपदमिवोद्धरतस्ते।
पातु पाणिसृणिपञ्चकमस्मान्छिन्नरज्जुनिभलग्नतदन्त्रम्॥ ६१॥

दैत्येति॥ हे श्रीनृसिंह, ते पाणिसंबन्धिनां सृणीनां तीक्ष्णतरनखरूपाणामङ्कुशानां पञ्चकमस्मान्पातु। किंभूतस्येव तव—दैत्यभर्तुर्हिरण्यकशिपोरुदरलक्षणेऽन्धौ कूपे निविष्टां पतितां शक्रसंपदमुद्धरत इव तस्माद्बहिर्निर्गमयत इव। किंभूतं पञ्चकम्—छिन्नरज्जुनिभानि मध्यत्रुटितपूर्वपतितदोरकतुल्यानि लग्नानि तस्य दैत्यरिपोरुदरस्य चान्त्राणि यत्र यस्य वा यथा कूपपतितं वस्तु समुद्धर्तुं लोहनिर्मिताङ्कुशपञ्चकं कूपमध्ये निक्षिप्य चालयित्वा पूर्वनिमग्न-रज्जुखण्डसहितं तदादाय निर्गच्छति तथा तव रज्जुस्थानीयभुजदण्डकपाणिजसृणिपञ्चकं दैत्यराजोदरकूपपतितामिन्द्रसंपदमुद्धरञ्छिन्नरज्जुनिभलग्नतदन्त्रं सन्मामवत्वित्यर्थः। सृणाति हिनस्ति, सृणिरौणादिकः। 'अस्मदो द्वयोश्च' इति बहुत्वम्॥

श्लोकचतुष्टयेन वामनं वर्णयति—

स्वेन पूर्यत इयं सकलाशा भो बले न मम किं भवतेति।
त्वं वटुः कपटवाचि पटीयान्देहि वामन मनःप्रमदं नः॥ ६२॥

स्वेनेति॥ हे वामन, इति पूर्वार्धोक्ता कपटवाक् तस्यां विषये पटीयानतिनिपुणो वटुर्ब्रह्मचारिवेषधारी चपलस्त्वं नोऽस्मदादीनां मम वा मनसः प्रमदं हर्षं धेहि सर्वाभिलाषपूर्तिं कुर्वित्यर्थः। वटवश्च कपटवाचो भवन्ति। इति किम्—पादत्रयमात्रस्थलयाचिनि वामने 'किमेतदल्पीयस्त्वया याचितं सकलमेतद्भुवनं गृहाण, अहं ददामि' इति दानशूरत्वाद्बलिच-क्रवर्तिनि भाषमाणे श्लेषवक्रोक्तिच्छलेन वामनस्य प्रत्युत्तरमेतत्—भो बले चक्रवर्तिन्, भवता स्वेनात्मना हेमरत्नादिना द्रव्येण वा इयं मदीया सकलाशा सर्वोऽप्यभिलाषो न पूर्यते, अपि तु परिपूर्णा करिष्यत एव परं मम (यतस्य) भिक्षोः निःस्पृहस्य वा किं प्रयोजनमिति शेषः। त्वं समर्थ एव परं तावता मम प्रयोजनं नास्ति। कुटीनिर्माणार्थं पदत्रयमितं स्थलमेव देहीत्यर्थः। स्वेनात्मीयेन बलेन च सैन्येन च निजशक्त्या वा सकला दिक् भवता पूर्यते त्रियत एव, तथापि मम किं तेन, यो यद्याचते तस्मै तद्ददासीति प्रत्यक्षदर्शनाद्भवताभिनवदर्शने-येयं सकलानां जनानां तृष्णा भो बले, त्वया परिपूर्णा क्रियते यतः, अतो मम कल-लेशेन सहिता। अल्पीयसीति यावत्। एवंभूता पदत्रयमिता तृष्णा किं न पूर्यते अपि तु पूरयिष्यत एव। अथ च—भो बले, इयं सकलापि दिशा मम स्वेनात्मना न पूर्यते, अपि तु त्वावरिष्यत एव। भवता किं कर्तुं शक्यते, अपि तु न किंचिदित्यर्थ इति वा। मया स्व-[illegible] सकलो दिगात्मना पूर्यते, भवता बलेन मम किं कर्तुं शक्यत इति वा। अथ —भो बले, पादत्रययाचनविषया मम सकला तृष्णा भवता स्वेनात्मस्वरूपेण स्वदेहेन किं पूर्यते, अपि तु पूरयिष्यत एव। महीयःशरीरधारणेन लोकद्वये पदद्वयेन मया व्याप्ते प्रतिज्ञा-तृतीयं पादमदातुर्निरयो भविष्यतीति भिया शिष्टपदस्थापनार्थं स्वशरीरमेव त्वया द-इत्यर्थः। त्वां पाताले पातयिष्यामीति भावः। भूस्वर्गरूपं लोकद्वयमेव बलेः स्वम्। न

पतनभिया स्वशरीरमेव तृतीयपदत्वेन दत्तमिति श्रीभागवते 'पदं तृतीयं कुरु शीर्ष्णि मे निजम्' इति वचनात्। इत्यादिकपटवाग्ज्ञेया। 'प्रनदच्चनदौ हर्षे' इति साधुः ॥

एवं वामनेनोक्ते बलिरुत्तरमाह—

दानवारिरलिकायविभूतेर्वेद्मि तेऽस्मि सुतरां प्रतिपत्तिम्।
इत्युदग्रपुलकं बलिनोक्तं त्वां नमामि कृतवामनमायम् ॥ ६३ ॥

दानेति ॥ अहं कृता वामनस्य ह्रस्वपुरुषस्य माया येन तथाहमनेन ज्ञात इति ज्ञात्वा जाताश्चर्यवशादुदग्रपुलकं संजातरोमाञ्चं बलिना इति पूर्वार्धोक्तप्रकारेण बलिचक्रवर्तिनोक्तं भाषितं त्वां नमामि। इति किम्—हे ब्रह्मन्, अस्मि अहं दानवारिणि रलिकाय कृताभिलाषाय ते तुभ्यं विभूतेः स्वीयसंपदः सुतरां प्रतिपत्तिं संकल्पेन दानं वेद्मि इच्छामि सर्वां संपदं तुभ्यं दातुमिच्छामि। अथ च—त्वं दानवानामरिः शत्रुरसि ते तव कायविभूतेः शरीरवैभवस्य प्रतिपत्तिं ज्ञानं नितरामहमिच्छामि। कीदृशं महच्छरीरं धारयिष्यसीति तद्द्रष्टुमिच्छामीत्यर्थः। यद्वा तव कायवैभवस्य प्रतिपत्तिं रूपान्तरप्राप्तिं वेद्मि। रूपान्तरं धारयिष्यामीति त्वया सूचितम्। तत्सुखेन धारणीयमित्यहं कामय इत्यर्थः। अस्मीत्यहमर्थेऽव्ययम् ॥

एवं बलिनोक्ते वामनः प्राह—

भोगिभिः क्षितितले दिवि वासं बन्धमेष्यसि चिरं म्रियमाणः।
पाणिरेष भुवनं वितरेति छद्मवाग्भिरव वामन विश्वम् ॥ ६४ ॥

भोगिभिरिति ॥ हे वामन, इति एवंरूपाभिश्छद्मवाग्भिः कपटवचनैरुपलक्षितस्त्वं विश्वमव रक्ष। इति किम्—बले, चिरं चिरायुषेण बहुकालं क्षितितले भूलोके दिवि वा म्रियमाणोऽवतिष्ठमानस्त्वं भोगिभिर्मित्रज्ञात्यातिथिभिः सह संयोगं प्राप्स्यसि यदि। यदि भूलोकेऽवस्थितिमिच्छसि तर्हि तत्र, यदि दिवि तर्हि तत्र वा, मित्रादिभिः सह सुखेन चिरकालमवस्थितिं प्राप्स्यसीत्यर्थः। इत्याशीः। एष प्रतिग्रहार्थं प्रसार्यमाणः प्रत्यक्षदृश्यो मम करोऽस्ति तस्मादत्र पाणौ पदत्रयदानसंबन्धि भुवनं जलं वितर देहीति। अथच—क्षितितले पातालक्षणे दिवि रमणीयत्वात्स्वर्गे भोगिभिः सर्पैर्म्रियमाणो बध्यमानः सन् चिरकालं वासं दुःखबहुलत्वाद्व्यतिरूपं बन्धं बन्धनं प्राप्स्यसि। यद्वा—चिरं जीवन् पाताले सर्पैः सह वासं बन्धनं चैष्यसि। यद्वा—सर्पैः क्रियमाणं बन्धनं म्रियमाणो धारयन्सन् पाताले वासमेष्यसि वा। इवार्थो वा दिवि वेत्यर्थः। यथा सुखिभिः सह स्वर्गे तिष्ठन् बंधनं प्राप्नोषि तथेदानीमेव पाताले सर्पैः सह संबन्धमेष्यसि। यद्वा—अरिति स्वर्गव्यतिरिक्ते पाताले तृतीयपादार्थं सर्वोत्तकारागारवामस्वर्गरूपे पाताले पातयिष्यामीत्यर्थः। एष मत्करो नेत्रतरो मम करोति, इत्यङ्गीकृतं भुवनं त्रैलोक्यं देहि पुनस्त्वं तत्र देहीति। भुवनं त्रिविष्टपवाचकत्वेनोक्तं सूच्यते। 'जीवनं भुवनं वनम्' 'विष्टपं भुवनम्—' इत्यमरः ॥

एवं वामनेनोक्ते बलिः पुनराह—

आशयस्य विवृतिः क्रियते किं दित्सुरस्मि हि भवच्चरणेभ्यः।
विश्वमित्यभिहितो बलिनात्मन्वामन प्रभव पावन पायाः ॥ ६५ ॥

आशयस्येति ॥ हे वामन, प्रभवपावन, बलिना इति पूर्वोक्तप्रकारेणाभिहित उक्त-

स्त्वमस्मान् पाया रक्ष । इति किम्—भो वामन, त्वया शयस्य पाणेर्विवृतिः प्रसारणं किं क्रियते, अपितु तन्न कर्तव्यम् । आशब्दोऽयोग्यतया शिरःकम्पपूर्ववारणाभिनये । अनुचितमेतन्न कर्तव्यमित्यर्थः । आ सामस्त्येन नितरां शयस्य विवरणं किं क्रियते, अपितु तन्न कर्तव्यमिति वा । वाक्यपूरणे वा । हि यस्माद्भवचरणेभ्यः पूज्येभ्यो भवद्भ्यो विश्वं सकलं हेमरत्नादि वा दित्सुर्दातुमिच्छुरस्मि । चरणशब्दः पूज्यार्थः । अहं सर्वमिदानीमेव ददामि किमिति पाणिप्रसारणेनैतदधैर्यं प्रकटीक्रियत इत्यर्थः । अथच—सहस्रपात्त्वाद्बहुभ्यो भवदीयपादेभ्यः सर्वं दित्सुरस्मि सर्वस्वदानेन भवचरणान् पूजयिष्यामि । तस्मात्करप्रसारणं किं क्रियते ॥

श्लोकत्रयेण परशुरामं स्तौति—

क्षत्रजातिरुदियाय भुजाभ्यां या तवैव भुवनं सृजतः प्राक् ।
जामदग्न्यवपुषस्तव तस्यास्तौ लयार्थमुचितौ विजयेताम् ॥ ६६ ॥

क्षत्रेति ॥ हे भगवन्, तव तौ भुजौ विजयेतां सर्वोत्कर्षेण वर्तेताम् । तौ कौ-प्राक् सृष्ट्यादौ भुवनं सृजतो ब्रह्मरूपिणस्तवैव 'बाहू राजन्यः कृतः' इति श्रुतिप्रामाण्याद्भुजाभ्यां प्रकाशाद्या क्षत्रजातिः क्षत्रियमात्रमुदियायोत्पन्नम् । तस्याः क्षत्रजातेर्लयार्थं क्षयार्थं जामदग्न्यवपुषस्तव तौ (यौ) भुजौ उचितौ । कारणे कार्यलयस्यौचित्यात् । 'अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् । एषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥' इति भारतवचनाच्च । अवतारप्रयोजनमुक्तम् । जातेर्नित्यत्वादुत्पत्तिविनाशावयुक्ताविति ये आक्षिपन्ति, ते आविर्भावतिरोभावयोर्विवक्षितत्वेनोत्तरणीयाः । वेदान्तसिद्धान्ते जातेर्नित्यत्वाभाव इत्यपि । जामदग्न्येति गर्गादिषु पाठसामर्थ्याद्यञिति ज्ञेयम् । विजयेतां, 'विपराभ्यां जेः' इति तङ् ॥

पांसुला बहुपतिर्नियतं या वेधसारचि रुषा नवखण्डा ।
तां भुवं कृतवतो द्विजभुक्तां युक्तकारितरता तव जीयात् ॥ ६७ ॥

पांसुलेति ॥ नियतं सर्वदा पांसुला धूलिबहुला बहवो मन्वादयः पतयो यस्याः सा मन्वादिभिः पालिता च या भूर्वेधसा रुषेव नवखण्डा भरतादिनवसंख्याविभागा अरचि निर्मिता, तां नवखण्डामपि सकलां भुवं द्विजभुक्तां काकादिपक्षिभिः कृतोपभोगां व्याप्ताम् । अथ च—ब्राह्मणैर्गृहीतफलां कृतवतस्त्रिःसप्तकृत्वः क्षत्रियमात्रं हत्वा निष्कण्टकीकृत्य प्रतिवारं ब्राह्मणेभ्यो ददतस्तव युक्तकारितरता नितरामुचितकरणशीलता जीयात् सर्वोत्कर्षेण वर्तताम् । एवंविधमतिशूरं दानशूरं च त्वां प्रति प्रणतोऽस्मीत्यर्थः । नियतमित्युत्प्रेक्षायां वा । रुषा नियतं रुषेवेत्यर्थ इति वा । अथ च—या स्वैरिणी अत एव बहुभिर्जारैर्भुक्ता सती तद्भर्त्रा कोपेन करचरणादिसंधिषु पृथक्छेदेन तत्कालं नवानि प्रत्यग्राणि खण्डितानि यस्यास्तादृशी कृतानां खण्डानामग्निसंस्कारनिवारणाद्धेतोः काकादिभिः पक्षिभिर्भक्षितां कुर्वतो [illegible] सर्वैः कीर्त्यते । 'स्वैरिणी पांसुला समा' इत्यमरः ॥

कार्तवीर्यभिदुरेण दशास्ये रैणुकेय भवता सुखनाश्ये ।
कालभेदविरहादसमाधिं नौमि रामपुनरुक्तिमहं ते ॥ ६८ ॥

'द्विश्लोक्या परशुरामं स्तौति' इति सुखाववोधा ।

कार्तवीर्येति ॥ हे रैणुकेय रेणुकापुत्र, कार्तवीर्यभिदुरेण यदीयकारागारे निबद्धो रावणोऽपि बहूनि वर्षाण्यतिष्ठत्, तं कार्तवीर्यं सहस्रार्जुनं हतवता भवता दशास्ये सुखेन क्लेशरहितमनायासेन नाश्ये हन्तुं शक्ये सति कालभेदस्य विरहादुभयोरवतारयोरेककालावस्थानत्वादसमाधिं परिहाररहितां मनुष्यावतारेण क्षत्रियेण त्वयैव रावणे हन्तुं शक्ये सति मनुष्यावतारेण क्षत्रियेण दाशरथिना रामेण विधेयान्तराभावादहं तस्मिन्नेव काले किमर्थमवतीर्णमिति वक्तुमशक्यत्वात्प्रयोजनाभावादहं ते रामपुनरुक्तिं दाशरथिरूपां वा जामदग्न्यरूपां वा नौमि स्तौमि । अन्यत्र तु पुनरुक्तेः कार्यभेदात्कालभेदाद्वा परिहारः कर्तुं शक्यते । वीप्सायामप्येककालप्रयुक्तस्यापि शब्दस्य भयादरसंभ्रमादिना परिहारोऽस्त्येव । अत्र तु पूर्वेणैवोत्तरावतारकार्यस्यापि कर्तुं शक्यत्वात्कार्यभेदाभावाच्च परिहारो नास्तीत्यर्थः । स्वतन्त्रस्य तव केनाप्यनुपयोगः । कर्तुं न शक्यते इति भावः । जामदग्न्यस्य मानुषत्वेऽपि दैवज्ञान(भाव)स्य तथैव तद्भावात्, देवाद्यवध्यत्वस्य रावणेन वृतत्वात्, तस्य तेन हन्तुमशक्यत्वात्, रावणवधपर्यन्तं च श्रीरामस्य दैवज्ञानाभावान्मानुषत्वेन तेनैव हन्तुं शक्यत्वात्कार्यभेदादेकस्मिन्नपि कालेऽवतारान्तरस्य युक्तत्वात्सूक्ष्मः परिहारोऽस्त्येव तथापि स्थूलदृष्ट्या परिहाराभाव उक्त इति ज्ञेयम् । नर्मदायां जलक्रीडां कुर्वता सहस्रार्जुनेन रावणः कारागारे निक्षिप्त इतीतिहासः । रैणुकेयेति क्षत्रियत्वसूचनम् । अपत्यार्थे 'स्त्रीभ्यो ढक्' ॥

अथ दशभिः श्लोकैर्दाशरथिं रामं स्तौति—[1]

हस्तलेखमसृजत्खलु जन्मस्थानरेणुकमसौ भवदर्थम् ।
राम राममधरीकृततत्तल्लेखकः प्रथममेव विधाता ॥ ६९ ॥

हस्तेति ॥ भो राम दाशरथे, असौ विधाता भवदर्थं त्वादृशोत्तमशिल्पनिर्माणार्थं जन्मस्थानं रेणुका एकवीरा यस्य तादृशं रामं प्रथमं त्वदपेक्षया आद्यं जामदग्न्यं खलु निश्चितं हस्तलेखमेवासृजत् चक्रे । त्वन्निर्माणार्थं जामदग्न्यं हस्ताक्षराभ्यासमेवाकरोदित्यर्थः । खल्विवार्थो वा । हस्तलेखमिव चक्रे । किंभूतः—अधरीकृता एतादृशनिर्माणासमर्थत्वान्निहीनाः कृतास्ते ते प्रसिद्धा लेखा देवा इन्द्रादयो दक्षप्रभृतयोऽष्टौ प्रजापतयो वा येन तादृशः । अथवा—अनधराः स्वर्गस्था अप्यधराः कृता भूमाववतारितास्ते ते हनुमत्सुग्रीवादिरूपा इन्द्रादयो देवा येन सः । प्रथमस्यैव हस्तलेखरूपेण निहीनत्वं न तु द्वितीयस्येत्यत्रोक्तम् । प्रथममेवाद्यमेव रामं न तु द्वितीयं त्वामिति वा । उत्तमशिल्पनिर्माणार्थं हि हस्तलेखः पूर्वं क्रियते । निहीनाः कृतास्ते तेऽतिप्रसिद्धा लेखका लिपिकरा येन स इति वा । अक्षराभ्यासेऽप्येवं क्रियते । जन्मस्थाने रेणुर्घृष्टेष्टकादिचूर्णरूपः पांसुर्यस्यैतादृशं हस्तलेखम् । (अधरीकृततत्तल्लेखकः) 'शेषाद्विभाषा' इति कप् ॥

उद्भवाजतनुजादज कामं विश्वभूषण न दूषणमत्र ।
दूषणप्रशमनाय समर्थं येन देव तव वैभवमेव ॥ ७० ॥

---

[1] सुखावबोधायां तु पूर्वश्लोकव्याख्यावसाने 'अथैकादशभिः श्लोकैर्दाशरथिं स्तौति—' इत्यभिहितम् ।
[2] 'अनकानन्' इति पाठमङ्गीकृत्य 'द्वौ नञौ प्रकृतमर्थं गमयतः' इति न्यायेन वर्णयन्तीति यद्व्याख्यातम्, तत्पाठपरिज्ञानविकलत्वादुपेक्ष्यम्' इति सुखावबोधा ।

उद्भवेति ॥ हे अज जन्मरहित श्रीरामचन्द्र, अजस्य रघुपुत्रस्य तनुजाद्दशरथात्स्वांशात् कामं स्वेच्छया उद्भवोत्पद्यस्व। भो विश्वभूषण जगदलंकारभूत, अत्र दशरथादपि जन्मविषये, अजस्यापि जन्मविषये दूषणं दोषलेशोऽपि नास्ति। यस्य पितामहोऽप्यजो नोत्पन्नः, तत्पुत्रः स्वपिता कुतस्तरामुत्पन्नः, तत्पुत्रपुत्रः स्वयं कुतस्तमामुत्पत्स्यते, तथा स्वयमप्यजः कथं जायते इत्याशङ्कायां स्वेच्छामात्रविलसितमित्याशङ्कापरिहारः। 'ब्रह्मैव हि स्वाविद्यया संसरति, मुच्यते च' इति न्यायात्। विश्वभूषणस्य तव दूषणरूपत्वाभावादपि दूषणलेशोऽपि तव नास्तीत्यर्थः। अथच—अजतनुजादजस्योत्पत्तिर्युक्तैव। अजो हि छागस्तस्य पुत्रोऽप्यज एव जातिनामत्वादजशब्दस्येत्यपि दूषणाभावः। दूषणाभावे हेत्वन्तरमप्याह—येन कारणेन हे देव श्रीराम, तव वैभवमेव प्रभाव एव दोषाणां प्रकर्षेण शमनाय नाशाय समर्थं। यत्स्मरणादिवैभवाद्वान्येषामपि भक्तानां दोषा नश्यन्ति, तत्स्वरूपे दोषलेशसंस्पर्शोऽपि कथंकारं स्यात्, अपितु न कथंचिदित्यर्थः। अथच—दूषणाख्यराक्षसविनाशाय तवैव सामर्थ्यं यतः, तस्मादत्र तवैवोत्पत्तौ सत्यां दूषणाभावो युक्त एवेति छलम्। अथच—परशुरामे सत्यपि तस्मिन्नेव काले त्वं दशरथात्सुखेनोत्पद्यस्व, अत्र तवोत्पत्तौ विषये दूषणं पुनरुक्तदोषो नास्ति यतो दूषणादिरावणान्तराक्षसविनाशाय तवैव सामर्थ्यं, नतु परशुरामस्येत्यत्र दूषणशब्द उपलक्षणपरः। तस्मादेककालीनत्वेऽपि कार्यभेदान्न पुनरुक्तिदोष इत्यर्थः। एतेनावतारप्रयोजनमुक्तम्। 'अनुकामम्' इति पाठे—कामं लक्षीकृत्य यथेच्छमित्यर्थः॥

नो ददासि यदि तत्त्वधियं मे यच्छ मोहमपि तं रघुवीर।
येन रावणचमूर्युधि मूढा त्वन्मयं जगदपश्यदशेषम्॥ ७१॥

नो ददासीति ॥ हे रघुवंश्यानां मध्ये वीर ईश्वरतम श्रीरघुनाथ, त्वं तत्त्वधियं मोक्षोपयोगिनमात्मतत्त्वसाक्षात्कारं यदि मे मह्यं नो ददासि तर्हि तं मोहमपि तां विशिष्टां भ्रान्तिमेव यच्छ देहि। तं कम्—येन मोहेन भयेन संजातभ्रान्तिविलासेन बुद्धिमूढा रावणचमूरशेषं सकलं जगत् त्वन्मयं श्रीरामचन्द्ररूपमपश्यत्। रावणसेनया च मोहेन जगद्रामात्मकं दृष्टमिति सर्वपुराणेषु॥

आज्ञया च पितुरज्ञभिया च श्रीरहीयत महीप्रभवा द्विः।
लङ्घितश्च भवता किमु नद्धिर्वारिराशिरुदकाङ्गलङ्कः॥ ७२॥

आज्ञयेति ॥ हे श्रीरामचन्द्र, भवता महीप्रभवा कृष्याद्युपायैर्भूलोकोत्पन्ना श्री राज्यलक्ष्मीः; अथच—भूमेरुत्पन्ना लक्ष्म्यवताररूपा जानकी, क्रमेण पितुराज्ञया च अज्ञेभ्यो भिया च मूर्खजनापवादभयेन च द्विर्द्विवारमहीयत त्यक्ता। वनवासाङ्गीकाराद्राज्यलक्ष्मीः, जनापवादभयाच्च वह्नौ विशुद्धाऽपि सीता त्यक्तेत्येव द्विप्रकारं त्यक्तेत्यर्थः। एवं पितुराज्ञाकारी लोकापवादभीरुश्च कोपिनास्तीति भावः। चावन्योन्यसमुच्चये। तथा—वारिराशिः, अरिराशिर्वा द्विर्द्विवारं द्विधा च न लङ्घितः किमु, सेतुं बद्ध्वा समुद्रोऽपि लङ्घित एव, तथा—रावणादिःशत्रुसमूहोऽपि पराभूत एव। वा चार्थे इवार्थो वा, अरिराशिश्चारिराशिरिव वा। गन्धना-

---

१ 'रघुवत्सेति' पाठो जीवातुसंमतः।

र्यद्वातेः क्विपि वातीति वाः, स चासावरिराशिश्च सकलो वैरिसंघ इत्यर्थः । किंभूतः—उदकाङ्कगा जलमध्यगा लङ्का यस्य । यदीयजलमध्ये लङ्कास्तीत्यर्थः । अरिराशिरपि—समुद्रजलमध्यवर्तिनी लङ्का यस्य । समुद्रपक्षे यस्येत्यस्योदकेन संबन्धः, अरिपक्षे तु लङ्कायाः एतावान्विशेषः । उत्कृष्टमकं दुःखं यस्यास्तादृशी अङ्कगा लङ्का यस्येति वा । सागरस्यापि बन्धनाद्रावणस्यापि वधाच्चैतादृशो महाप्रभावः शूरतरश्च त्वदन्यः कोऽपि नास्तीति भावः ॥

कामदेवविशिखैः खलु मेशं मार्पयञ्जनकजामिति रक्षः ।
दैवतादमरणे वरवाक्यं तथ्ययत्स्वमपुनाद्भवदस्त्रैः ॥ ७३ ॥

कामेति ॥ रक्षो रावण इतीव हेतोर्दैवतादमरणे मरणाभावविषये दैवाद्धेतोर्न मरिष्यसीति ब्रह्मणो वरवाक्यं तथ्ययत् सत्यं कुर्वत् स्वमात्मानं भवदस्त्रैरपुनाद् धुतकल्मषं चकार । इति किम्—जनकजां सीतां रामायार्पयद्ददहं रक्षः कामदेवस्य मोहनशोषणादिभिर्विशिखैः खलु निश्चितं मा मेशं तद्विरहसंतापवशान्मृतो मा भूवमिति । सीताप्रत्यर्पणे कामस्य देवत्वात्तद्बाणैर्मरणे वरवाक्यमसत्यं स्यादितीव तामददद्वरवाक्यसत्यत्वार्थं मानुषावतारकामरूपभवद्बाणैरात्मानं नाशितवानित्यर्थः । कामबाणाच्छरीरविनाशमात्रं त्वद्बाणात्तु मरणे संसारहेतुनिःशेषकल्मषक्षय इति महान्विशेषः 'अपुनात्' इत्यनेन सूच्यते । मेशम्, माङ्योगादडभावः । तथ्ययत्, 'तत्करोति—' इति ण्यन्ताच्छता ॥

तद्यशो हसति कम्बुकदम्बं शम्बुकस्य न किमम्बुधिचुम्बि ।
नामशेपितससैन्यदशास्यादस्तमाप यदसौ तव हस्तात् ॥ ७४ ॥

तदिति ॥ हे रघुनाथ, नामशेपितः कथाशेषीकृतो हतः सेनया सहितो दशास्यो येन तस्मात्तव हस्तात् असौ शम्बुको यदस्तं विनाशमाप, तच्छम्बुकनाम्नः शूद्रस्य अम्बुधिचुम्बि समुद्रमध्यवर्ति यशः कम्बुकदम्बं शङ्खवृन्दं धवलतया किं न हसति, अपितु—हसत्येव, तत्तुल्यं भवतीत्यर्थः । येन त्वत्करेणातिशूरो रावणो हतस्तेनैवान्त्यवर्णोऽधमो दुर्बलः शम्बुकोऽपि हत इति महत्तस्य भाग्यमित्यर्थः । यो ह्युत्कृष्टं बलिनं हन्ति, तेनैव हीने दुर्बले हते दुर्बलस्य महद्यशो भवति । बालब्राह्मणपुत्रमरणनिमित्तं शूद्राणामविहितं धूम्रपानं कुर्वन्तं शम्बुकशूद्रं श्रीरघुनाथो हतवानितीतिहासः । अथच—शम्बुकस्य जलशुक्तेः श्वेतरूपं यशः समुद्रमध्यस्थं शङ्खवृन्दं हसति तत्तुल्यं भवतीति युक्तमेव । नामशेपितेति, 'तत्करोति—' इति ण्यन्तान्निष्ठा ॥

मृत्युभीतिकरपुण्यजनेन्द्रत्रासदानजमुपार्ज्य यशस्तत् ।
ह्रीणवानसि कथं न विहाय क्षुद्रदुर्जनभिया निजदारान् ॥ ७५ ॥

मृत्युभीतीति ॥ यस्मान्मृत्योर्यमादन्येषां भीतिः, मृत्योर्भीतिकरः पुण्यजनेन्द्रो राक्षसेन्द्रो रावणस्तस्यापि मरणपर्यन्तं त्रासदानाद्भयोत्पादनाद्धेतोर्जातं तदतिप्रसिद्धं लोकत्रये शीघ्रमानं यश उपार्ज्य क्षुद्रोऽल्पत्वको दुर्जनस्तस्माद्भिया भयेन पामरलोकापवादभिया निजदारानात्मनः प्रियां सीतां विहाय परित्यज्य कथं न ह्रीणवान् लज्जितवानसि । लज्जितव्यं

१ 'मार्पयमिति पाठे जनकजामित्यहं मार्पयं नो ददामि । इतीति किम् कामदेवविशिखैर्मा मेशमिति । तदुस(मध्य)शालिनो माङ समयसंबन्धेन भ्रान्स्येयम्' इति सुखावबोधा ।

तावत्त्वयेत्यर्थः । यो रावणाय भयं दत्तवांस्तस्य दुर्जनभीत्या निर्दुष्टजनप्रियापरित्यागे हि लज्जैव युक्ता । अतिमाननिजस्त्रीहर्ता रावणो नाशितो लोकापवादभयाच्च सापि परित्यक्तेति । एतादृशः शूरोऽभिमानी लोकापवादभीरुश्च कोऽपि नास्तीति भावः । 'यातुधानः पुण्यजनः-' इत्यमरः । भीतिं करोतीति ताच्छील्ये टः ॥

इष्टदारविरहौर्वपयोधिस्त्वं शरण्य शरणं स ममैधि ।
लक्ष्मणक्षणवियोगकृशानौ यः स्वजीविततृणाहुतियज्वा ॥ ७६ ॥

इष्टेति ॥ हे शरण्य शरणागतभक्तरक्षण रघुनाथ, स त्वं मम शरणं रक्षकः एधि भव । स कः—यस्त्वम् इष्टदाराणां सीतायाः विरह एव दुःसहत्वादौर्वो वडवानलस्तस्य पयोधिराश्रयः एवंविधः सन् लक्ष्मणस्य क्षणमात्रमपि वियोगः स एव दुःसहतरत्वात्कृशानुस्तत्र स्वजीवितानामात्मप्राणानामेव तृणानामाहुतेस्तद्रूपहोमद्रव्यस्य यज्वा होता, यो हि लक्ष्मणवियोगं क्षणमात्रं सोढुमशक्तस्तृणवद्धेलामात्रेण स्वप्राणांस्तत्याज, स यावज्जीवं सीताविरहानलं कथं सोढवानिति क्रिययोर्विरोधादाश्चर्यम् । यज्वना चाहुतिरग्नौ हूयते । सीताविरहसहनेन जितेन्द्रियधुर्यत्वमुक्तम् । इन्द्रजिता शक्त्या मूर्च्छिते लक्ष्मणे स्वयमपि मुमूर्च्छे, तथा मुनिरूपकालकृतसमयभङ्गभग्नप्रतिज्ञे लक्ष्मणे रघुनाथाज्ञया सरयूजलप्रवेशेन कृतदेहत्यागे सति तद्वियोगमसहमानस्तत्क्षणमेव रघुनाथोऽपि गोप्रतारतीर्थे जलप्रवेशेन स्वयमपि स्वस्थानं प्रापेति युद्धकाण्डोत्तरकाण्डरामायणकथा । एतेन स्त्रीवियोगदुःखादपि भ्रातृवियोगदुःखं दुःसहमिति सूचितम् । परमकारुणिकस्त्वं शरणागतं मामपि रक्षेति सूचितम् ॥

क्रौञ्चदुःखमपि वीक्ष्य शुचा यः श्लोकमेकमसृजत्कविराद्यः ।
स त्वदुत्थकरुणः खलु काव्यं श्लोकसिन्धुमुचितं प्रबबन्ध ॥ ७७ ॥

क्रौञ्चेति ॥ दैवी वाक् येन भुवं प्रति प्रथममानीता स आद्यः प्रथमः कविर्वर्णको यो वाल्मीकिः क्रौञ्चयोः पक्षिविशेषयोर्मध्ये रिरंसावेकस्मिन् व्याधेन हतेऽन्यस्य दुःखं वीक्ष्य तैर्यग्योनेरपि तस्य दुःखं दृष्ट्वा उत्पन्नया शुचा शोकेन हेतुना 'मा निषाद प्रतिष्ठां त्वम्-' इत्यादिकं श्लोकमसृजत् । स कविस्त्वयि उत्पन्नः करुणारसो यस्य सीताविरहविह्वलमहानुभावभवद्दर्शनोत्पन्नशोक इव श्लोकानां सिन्धुं सागरभूतं चतुर्विंशतिसहस्रमितं रामायणाख्यं काव्यमुचितं योग्यं प्रबबन्ध । तिर्यग्योनिविषये शोकेन येन श्लोकः कृतः, तस्य उत्तमपुरुषविषये महाकाव्यनिर्माणमुचितमेव । अथ च—त्वया सिन्धुर्बद्धः, अयमपि त्वदेकचित्तः सिन्धुं बबन्धेत्युचितम् । परित्यक्तसर्वसङ्गो मुनिरपि त्वद्वर्णनां कृतवानेतादृशः परमपुरुषोऽसीति खल्वित्यर्थः ॥

विश्रवःपितृकयासुमनर्हं सश्रवस्त्वमनयेत्युचितज्ञः ।
किं चकर्तिथ न शूर्पणखाया लक्ष्मणेन वपुषा श्रवसी वा ॥ ७८ ॥

विश्रव इति ॥ हे रघुनाथ, इति हेतोरुचितं जानाति स उचितकारी त्वं चतुर्थांवतीर्णत्वाल्लक्ष्मणलक्षणेन स्वीयेनैव वपुषा शूर्पणखायाः श्रवसी कर्णौ किं वा न चकर्तिथ कर्तितवान्, अपितु कर्तितवानेव । इति किम्—विश्रवा मुनिः पिता यस्याः, अथ च—कर्णरहितः पिता यस्यास्तस्याः शूर्पणखायाः सश्रवस्त्वे सकर्णत्वमासुमनर्हमयोग्यमिति । श्रीवत्स-

स्यानौचित्यात्कर्णच्छेद एवोचितो यतः, अकर्णपितृकाया अकर्णत्वस्यौचित्यात्कर्णौ लक्ष्मणेन कर्तयानास्तियेत्येव विविधः समुचितकारी महाप्रभावोऽस्तीति भावः । या इवार्थो वा । इतीव हेतोरिति योजना । विश्रवःपितृकया, 'नद्यृतश्च' इति कप् । शूर्पणखा, 'पूर्वपदात्संज्ञायाम्-' इति णत्वम् । नखस्य स्वाङ्गत्वेऽपि 'नखमुखात्संज्ञायाम्' इति ङीबभावः । अन्वर्था चेयं संज्ञा ॥

नवभिः श्लोकैः श्रीकृष्णं वर्णयति—

ते हरन्तु दुरितव्रततिं मे यैः स कल्पविटपी तव दोर्भिः ।
छद्मयादवतनोरुदपाटि स्पर्धमान इव दानमदेन ॥ ७९ ॥

त इति ॥ कंसादितत्तद्दैत्यमारणरूपछद्मना यादवसंज्ञा तनुर्यस्य, अथ च—छद्म याति छद्मयाः एवंभूतश्चासौ दवतनुश्च मायावान् कंसादिवंशवनवह्निरूपशरीरश्च, श्रीकृष्णरूपस्य तव यैर्दोर्भिर्भुक्तिमुक्तिप्रदैश्चतुर्भिर्हस्तैः सोऽतिप्रसिद्धः कल्पविटपी कल्पितफलदानसमर्थः पारिजातवृक्ष उदपाटि उन्मूलितः । किं कुर्वन्निव—मादृशः कल्पितदानसमर्थः कोऽपि नास्त्येवेति दानस्य मदेन दर्पेण तैर्भुजैः सह स्पर्धमान इव ते बाहवो मे दुरितानां व्रततिं लतां दैन्यसंततिं हरन्तु उन्मूलयन्तु । ये पारिजातलक्षणमहावृक्षोन्मूलने समर्थास्तेषां लतोन्मूलने सुतरां सामर्थ्यम् । कपटदावानलदेहस्य च भुजानां वृक्षलतायुन्मूलने सामर्थ्यं युक्तमेवेत्यर्थः । दानशूरो महाप्रभावश्च त्वादृशः कोऽपि नास्तीति भावः । सत्यभामया याचितः पारिजात इन्द्रं जित्वोन्मूल्य सत्यभामाङ्गणे श्रीकृष्णेन स्थापित इति हरिवंशोक्तिः । निर्ऋतिव्रततिमिति पाठे—'स्यादलक्ष्मीस्तु निर्ऋतिः' इत्यमरः ॥

बालकेलिषु तदा यदलावीः कर्परीभिरभिहत्य तरङ्गान् ।
भाविबाणभुजभेदनलीलासूत्रपात इव पातु तदस्मान् ॥ ८० ॥

बालेति ॥ हे कृष्ण, त्वं तदा कृष्णावतारसमये भूयसीषु बालकेलिषु मध्ये कर्परीभिः स्फुटितघटशकलैः कृत्वा यमुनाजलतरङ्गान् अभिहत्य तेषामभिघातं कृत्वा तानेकप्रयत्नेनालावीश्छैत्सीरिति यत्, तत्कर्परीभिस्तरङ्गलवनं कर्तुं उपाहरणावसरे भावि करिष्यमाणं बाणासुरभुजभेदनं तल्लक्षणा लीला विलासस्तत्संबन्धी सूत्रपात इव प्रथममार्जवच्छेदनाभ्यासरूपनिपातोऽस्मानवतु । अक्षरपङ्क्तेर्ऋजुत्वार्थं प्रथमं खटिकादिम्रक्षितसूत्रपातनं क्रियते । तक्षादिभिरपि काष्ठस्यार्जवच्छेदनार्थं गैरिकादिम्रक्षितसूत्रपातनं क्रियते । तद्वद्बाणासुरभुजार्जवच्छेदनार्थं कर्परीभिरभिहत्य तरङ्गलवनं यदकारि तत्तत्र बालक्रीडनमभ्यासवदित्यर्थः । कर्परीघातेन तरङ्गच्छेदनं बालजातिः । अवतारप्रयोजनं चोक्तम् ॥

कर्णशक्तिमफलां खलु कर्तुं सज्जितार्जुनरथाय नमस्ते ।
केतनेन कपिनोरसि शक्तिं लक्ष्मणं कृतवता हतशल्यम् ॥ ८१ ॥

कर्णेति ॥ हे श्रीकृष्ण, ते नमोऽस्तु । किंभूताय ते—उरसि लग्ना इन्द्रजिन्मुक्ता शक्तिर्यस्य तं लक्ष्मणं द्रोणपर्वतानीतविशल्यौषधिप्रक्षेपेण हतं निष्कासितं शक्तिलक्षणं शल्यं यस्य तादृशं कृतवता केतनेन ध्वजस्तम्भपताकारूपेण कपिना हनूमता कृत्वा कर्णस्य शक्तिमाधिके बले, अथ च—इन्द्रदत्तां शक्तिम्, अफलां कर्तुमिव सज्जीकृतो योजितोऽर्जुनरथो येन तस्मै । नरनारायणरूपाय । यो हि यत्र कर्मणि दृष्टशक्तिः स एव तत्र नियोक्तुमुचितः । हनूमांश्च

शक्तिविफलीकरणे दृष्टप्रभावस्तस्मात्कर्णशक्तिविफलीकरणार्थमिवार्जुनरथे तं स्थापितवानसीति भक्तवत्सलाय तुभ्यं नम इत्यर्थः। यो मर्मभूतामुरःस्थां शक्तिं विफलीकरोति स श्रवणस्थां सुतरां विफलीकरोत्येवेति च्छलेनोक्तिः। खलु इवार्थः। उरसि शक्तिः 'अमूर्धमस्तकात्' इत्यलुक् ॥

नापगेयमनयः सशरीरं द्यां वरेण नितरामपि भक्तम्।
मा स भूत्सुरवधूसुरतज्ञो[2] दिव्यपि व्रतविलोपभियेति ॥ ८२ ॥

नेति ॥ हे कृष्ण, त्वं नितरां भक्तमपि आपगेयं भीष्मं सशरीरं वरेण प्रसादेन कृत्वा इति विचार्य कारणाद्वा द्यां स्वर्गं नानयः न प्रापितवानसि। इति किम्—स भीष्मः अनेन शरीरेण सुरतं न करिष्यामि, अद्यप्रभृति मम ब्रह्मचर्यमेवेति व्रतविलोपाद् भिया हेतुना दिव्यपि स्वर्गेऽपि सुरवधूनां रम्भादीनां सुरतज्ञो मा भूत् इति। भक्ततमस्य वरदानेन यद्यपि तेनैव शरीरेण स्वर्गप्रयाणमुचितम्, तथापि तस्य शरीरस्य स्वर्गप्रयाणेऽपि न कोऽप्युपयोगः, तेन तच्छरीरस्यातितुच्छत्वात्तच्छरीरं विनाश्य तं स्वर्गमनयत् ननु तच्छरीरसहितस्य प्रापणे तवाशक्तिरिति भावः। यद्वा मुक्त्यपेक्षया स्वर्गभुक्तेरप्यतितुच्छत्वात्तच्छरीरं विनाश्य तं मुक्तिमेव प्रापितवानिति हेतुः। आपगेयम्, अपत्यार्थे 'स्त्रीभ्यो ढक्' ॥

घातितार्कसुतकर्णदयालुर्जैत्रितेन्दुकुलपार्थकृतार्थः।
अर्धदुःखसुखमभ्यनयस्त्वं सास्रुभानुविहसद्विधुनेत्रः ॥ ८३ ॥

घातितेति ॥ अर्जुनेन प्रयोज्येन समरे घातितोऽर्कसुतः कर्णस्तस्मिन्विषये दयालुः सकरुणः। तथा—स्वसामर्थ्येन जैत्रितो जेता कृतो दत्तजय इन्दुकुलं सोमवंशभूतः पार्थोऽर्जुनस्तेन कृत्वा कृतार्थः संपादितावतारप्रयोजनः कृतकृत्यत्वात्सहर्षः। अत एव क्रमेण पुत्रशोकवशात्सास्रुः सबाष्पो रुदन् यः भानुः सूर्यः, पुत्रविजयाच्च विशेषेण हसन् हर्षानुभवं कुर्वन् विधुश्चन्द्रस्तावेव दक्षिणवामे नेत्रे यस्यैतादृशस्त्वं यथाक्रमम् अर्धदुःखं अर्धसुखं च अभ्यनयः अभिनयेन युगपद्दर्शितवानसि। परमार्थतोऽविद्यमानमप्यविद्याविलासाद्विहिनाटितवानसीत्यर्थः। सूर्यचन्द्रयोर्विष्णुनेत्रत्वात्कर्णस्य च सूर्यपुत्रत्वात्तन्नाशे शोकात्सूर्यस्य साश्रुत्वात् अर्जुनस्य च सोमवंशस्थत्वाद्विजये चन्द्रस्य हर्षेण विहसितत्वात्, ताभ्यामर्धदुःखसुखाभिनयादद्भुतरूपोऽसीति भावः। घातितेति हेतुमण्ण्यन्तान्निष्ठा। जैत्रितेति, 'तत्करोति–' इति ण्यन्तान्निष्ठा। पार्थेति कुरुत्वात् 'ऋष्यन्धक–' इत्यण्। अर्धं च तद्दुःखसुखं चेति द्वन्द्वगर्भः कर्मधारयः ॥

प्राणवत्प्रणयिराध न राधा पुत्रशत्रुसखिता सदृशी ते।
श्रीप्रियस्य सदृगेव तवश्रीवत्समात्महृदि धर्तुमजस्रम् ॥ ८४ ॥

प्राणेति ॥ प्राणवत् प्राण इव प्रणयिनी निरुपाधिपरप्रेमास्पदं राधाख्या गोपिका यस्य संभूत श्रीकृष्ण, ते तव राधापुत्रः कर्णस्तस्य शत्रुरर्जुनस्तस्य सखिता मैत्री सदृशी योग्या न।

---

१ 'मा स' इति पाठो जीवातुसुखावबोधासंमतः। २ 'सुरताशः' इति पाठमाश्रित्य 'सुरतं संभोगस्तस्याशोऽनभिज्ञो मा स भूदिति व्याख्याय 'सुरतदक्ष' इति पाठस्तु दुर्योज्यत्वादुपेक्ष्यः' इति सुखावबोधायामुक्तम्।

ाधावल्लभस्य हि राधापुत्रस्तानुमैत्री कथंकारमुचिता, अपितवुरुैव विरोधादित्यर्थः । एकत्र
ाधा गोपिका, अन्यत्र तु कर्णपालनकारिणी कैवर्तवधूरिति परिहारः । श्रियः प्रियस्य श्रीव-
भा यस्य तस्य तव श्रीवत्सं ब्राह्मणपदन्यासरूपं लाञ्छनम्, अथच श्रियो वत्सं पुत्रम्;
ालनात्हृदि धर्तुं सदैव उचितमेव । यस्य हि श्रीर्वल्लभा, स तत्पुत्रं स्ववक्षसि सदा
ाभर्तीति युक्तमेवेत्यर्थः । एतादृशः स्वपक्षपातदक्षो लोकशिक्षार्थं ब्राह्मणभक्तिपरश्च कोऽपि
ास्तीति भावः । प्रणयिराधेति 'स्त्रियाः पुंवत्' ॥

तावकापरतनोः सितकेशस्त्वं हली किल स एव च शेषः ।
साध्वसाववतरस्तव धत्ते तज्जरचिकुरनालविलासः ॥ ८५ ॥

तावकेति ॥ हे कृष्ण, हली लाङ्गलधरो बलभद्रः स एव च शेषोऽनन्तस्त्वमेव । शेषा-
तारूपोऽपि बलभद्रो भवानेव, नतु स त्वत्तो भिन्न इत्यर्थः । त्वं बलभद्रः स एव शेषः ।
ात्तो हली न भिद्यते, हलिनश्च शेषो न भिद्यते इति वा । यतः—कायस्य संबन्धाज्जरसा
ितकेशो धवलितकचः कलिरागमने । विष्णुपुराणादौ च यदुक्तम्—'उज्जहारात्मनः केशौ
ितकृष्णौ ततः प्रभुः' इति । न विद्यते परोत्कृष्टान्या यस्याः सा तावकी अपरा तनुस्त्वत्सं-
न्धिनी सर्वोत्कृष्टा सत्त्वमूर्तिस्तस्याः सितकेशः श्वेतकेशरूपो हली तवावतारोऽस्यावतारस्व-
ोऽसौ हली त्वं किल । त्वदवयवभूतकेशरूपत्वात्तस्य । स च हल्येव शेष इति वा । शेषरू-
ाबलदेवलक्षणोऽसाववतरो मूर्तिः । अत एव तस्या भवदीयापरतनोर्जरतो जरसा धवलीकृ-
ास्य चिकुरनालस्य केशदण्डस्य विलासं वर्णसारूप्यं साधु यथा तथा धत्ते । अतिगौरो बल-
ास्त्वदीयापरतनुधवलकेश इव भातीत्यर्थः । शेषस्यापि दीर्घत्वधवलत्वाभ्यां जराधवलदीर्घ-
ेशसारूप्यधारणं युक्तमेव । 'कारणगुणा हि कार्ये गुणानारभन्ते' इति न्यायाच्च युक्तमेव ।
अंशावतारो बलभद्रः' इति चोक्तम् । अत्र श्वेतकेशः सहज एव, नतु जरायोगात् । इति
ा । यतो हरिर्नित्यतरुण इति पुराणादिप्रसिद्धिः । वस्तुतस्तु—कस्य ब्रह्मणुखस्येशौ सुखरू-
ाावित्यर्थः । प्रकाशकत्वेन सत्त्वस्य सितशब्दवाच्यत्वात्, मोहकत्वेन च तमसः कृष्णशब्द-
ाच्यत्वात्सितकृष्णौ सत्त्वतमोगुणद्वयात्मकावेतावतारौ भूभारोत्तारणार्थं प्रभुरादिनारायणः
बलात्प्रकटीचकारेति विष्णुपुराणस्थसितकृष्णपदस्यार्थः । 'कृष्णस्तु भगवान्स्वयम्' इति भाग-
ातवचनेन कृष्णस्तु लीलाविग्रहधारी परब्रह्मैव । 'समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः'
इति भगवद्वचनात् । बलभद्रस्त्ववतारः 'रामो रामश्च रामश्च' इति वचनात् । अन्यथा बलभ-
द्रस्य सत्वमूर्तित्वम्, कृष्णस्य तमोगुणमूर्तित्वमापद्येत, नच तथास्तीति बलभद्रस्य तमःप्रधा-
नत्वदर्शनादित्याशयः । 'सितिकेशः—' इति पाठे—'सितौ धवलमेचकौ' इत्यभिधानात्त्वदी-
यपुराणतनोः संबन्धी सितिकेशः श्यामकेशरूपस्त्वं, हली च धवलकेशरूपः, स एव च हली
शेषः बलभद्रः शेषावतारः, इति पुराणादौ । स त्वदीयधवलकेशविलासं धत्ते तत्साधु । कृ-
ष्णस्य कृष्णवर्णत्वाद्धलिनश्चातिगौरत्वाद्यथाक्रमं श्यामसितकेशात्मनोत्प्रेक्षितत्वेनैव आत्मेयत्ते-

---

१ अयं श्लोको जीवातौ नास्ति । २ 'तावकोपरतनोः' इति पाठः उद्धरिष्यति प्रवस्मात्सुरम-
विलसितत्वादुपेक्ष्यः' इति सुखावबोधा । ३ 'तज्जरत्' इति पाठे—'पुराणपुरुषस्य तव जरन् धवलि-
कुरनालः इति व्याख्येयमिति' सुखावबोधा ।

त्यलमतिविस्तारेण । 'तावकापर–' इति पाठः साधीयान् । यतः 'युष्मदस्मदोः' इत्यनेन तव कादेशे वृद्धौ च 'वृद्धिनिमित्तस्य–' इत्यादिना पुंवद्भावप्रतिषेधे प्रसक्तेऽपि कर्मधारयत्वात् 'पुंवत्कर्मधारय–' इति प्रतिप्रसवात्पुंवद्भावः । अवतरः पूर्ववत् ॥

हृद्यगन्धवहभोगवतीशः शेषरूपमपि बिभ्रदशेषः ।
भोगभूतिमदिरारुचिरश्रीरुल्लसत्कुमुदबन्धुरुचिस्त्वम् ॥ ८६ ॥

हृद्येति ॥ हे हृद्यो हृदयानन्दकारी गन्धश्चन्दनादिसौरभं तं वहति धारयत्येवंविध सौरभधारिन् श्रीकृष्ण, त्वं शेषरूपं बलभद्ररूपम्, अथ च—नागाधीशरूपं बिभ्रद्धारयन्नप्यत्रोभयविधोऽप्यशेषः शेषो न भवसीति विरोधः । अथ च—न विद्यते शेषः शिष्टं निन्नं दलं दसावशेषः सकलजगदात्मकस्त्वमिति परिहारः । अथ च बलभद्रोऽप्यतिशयाङ्गारित्वाद्धृद्यगन्धवहः । अत एव भोगवतीनां सुखिनीनां गोपिकादीनामीशः प्राणप्रियः, अथ च—भोगवत्या अतितरां सुखिन्या रेवत्या ईशः पतिः । श्रीकृष्णोपि हृद्यं गन्धं शारीरं स्वाभाविकं चन्दनादिजन्यं च गन्धं वहन्तीनां सुखिनीनां भोगवतीनां गोपिकादीनामीशः शेषोऽपि जलक्रीडाभ्रलितचन्दनकर्पूराद्यङ्गरागसंबन्धिहृद्यसौरभधारिण्या भोगवत्याः पातालनद्याः पतिः । कर्पूरादिबहुलसौरभयुक्ताया नागनगर्या वा । तृप्तिहेतुत्वाद्धृद्यो गन्धवहो वायुर्यस्य स चासौ नागपुर्या नद्या वा पतिः । तथा कृष्णरूपस्त्वं भोगस्य सुखस्य भूतेर्हेतोर्मदिरावद्रुचिं सुखं रति जनयति तादृशी श्रीः कायकान्तिर्यस्य सः भोगः शेषफणः, तत्कायो वा स एव भूः स्थानं तस्य ऊतिरवनं स्वाधिष्ठानेन रक्षणं तेन माद्यति हृष्यतीति भोगभूतिमत् । तथा—इराया भूमेरिव रुचिरा रमणीया कान्तिर्यस्मादिति वा । तयोरुभयोः सपत्न्योरपि प्रीतिं ददाना समवर्तिनी श्रीर्हृदिस्था लक्ष्मीर्यस्येति वा । भोगानां कालीयफणानां भूतिरैश्वर्यजनितो दर्पस्तं नन्नाति तादृशो वा । पृथगवा पदम् । गोपिकादिसंभोगसुखसमृद्धिर्भोगभूतिस्तद्वांश्चासावुकरीला इराचिरश्रीश्चेति वा । अथ च बलभद्ररूपस्त्वं भोगस्य सुखस्य भूतिरुत्पत्तिहेतुस्तादृशी मदिरा तया कृत्वा रमणीया सरागा कान्तिः शोभा यस्य । बलदेवो हि सर्वदा मदिरामत्तः । अथ च—शेषरूपस्त्वं भोगस्य स्वकायस्य फणानां वा भूतिः समृद्धिस्तद्वानतिदीर्घमहाकायः सहस्रफणो वा तेन माद्यति वा । स चासौ स्वशिरःसु धारणाद्भूमे रुचिं ददाना कायकान्तिर्यस्य सः । तथा—कृष्णरूपस्त्वम् उल्लसन्ती कुमुदबन्धोश्चन्द्रस्य संबन्धिनी रुचिः प्रीतिर्यस्मिन् सर्वाह्लादकारित्वाच्चन्द्र इव सर्वप्रेमास्पदभूतमित्यर्थः । कुमुद् श्वेतं कैरवं तस्याबन्धुस्तद्विरोधिनी कृष्णा रुचिः श्रीर्यस्य जलदश्याम इत्यर्थ इति वा । उल्लसन्ती कुमुदाख्ये वानररूपे सुहृदि प्रीतिर्यस्य रामावतारे इति वा । उल्लसन्ती पृष्ठे दंष्ट्रायां वा कुः पृथ्वी यस्मिन्, मोदत इति मुदः, स चासौ स च । तथा—बन्धुषु बन्धौ बलभद्रे वा प्रीतिर्यस्येति वा । उल्लसन्ती कुमुदतुल्ये अतिगौरे बन्धौ बले प्रीतिर्यस्य वा । उल्लसन्ति कुमुदानि येन स चन्द्र एवोद्दीपकत्वाद्बन्धुर्यस्य, अथ च—प्रद्युम्नावतारः कामस्तत्र प्रीतिर्यस्मिन्पुत्रत्वादिति वा । अथ च—बलभद्ररूपस्त्वम् उल्लसन्ती कुमुदस्य बन्धुः कैरवसदृशी गौरतरा, कुमुदबन्धोश्चन्द्रस्येव वा गौरतरा कान्तिर्यस्य । उल्लसन्ती कुः पृथ्वी यस्मात्तस्मिन् मुदे सहर्षे बन्धावनुजे श्रीकृष्णे प्रीतिर्यस्य वा । उल्लसत्कुमुदबन्धावुक्तप्रकारेण प्रद्युम्ने प्रीतिर्यस्य वा । अथच शेषरूपस्त्वम् उल्लसन्ती

चन्द्रस्येव धवला कान्तिर्यस्य वा । उल्लसन्ती कुमुदस्य चन्द्रस्य बन्धुः सदृशी कान्तिर्यस्य वा । उल्लसत्कुम्बीकः सहर्षः सुहृत्सु प्रीतिर्यस्य वा । 'कुमुदेऽपि कुमुत्प्रोक्तम्' इति विश्वः । 'गोत्रा कुः पृथिवी' इत्यमरः । 'भोगः सुखे वधे चाहेः शरीरफणयोर्मतः' इति विश्वः । 'इरा वारिसुराभूमिभारतीषु' इति च । ऊतिः, अवतेः क्तिनि 'ज्वरत्वर–' इति वस्योपधायाश्चोठ् । नदिति मायतेर्मेभ्नातेश्च क्विप् । पक्षे मतुप् । मुदः, इगुपधात्कः ॥

रेवतीशसुषमा किल नीलस्याम्बरस्य रुचिरा तनुभासा ।
कामपाल भवतः कुमुदाविर्भावभावितरुचेरुचितैव ॥ ८७ ॥

रेवेति ॥ हे रेवतीनाम्न्याः प्रियाया ईश, तथा हे कामपाल (कामपूरक, कुः पृथ्वी तस्या मुदो हर्षस्याविर्भावेन प्रादुर्भावेन भाविता संचारिता रुचिः प्रीतिरिच्छा वा यस्य तस्य भवतः श्रीकृष्णस्य तनुभासा कायकान्त्या कृत्वा नीलस्याम्बरस्य । तत्तुल्यस्येत्यर्थः । तव रुचिरा शोभना, लोकानां रुचिं प्रीतिं ददाना वा । रेवतीशसुषमा चन्द्रसंबन्धिनी परमा शोभा उचितैव किल । आकाशस्य चन्द्रशोभोचितैव । अथच—बलभद्रस्वरूपत्वाद्रेवतीशसुषमा बलभद्रस्य परमा शोभोचितैव । किंभूतस्य—कुः पृथ्वी तस्या मुदस्य हर्षस्याविर्भावेन प्रकटनेन भाविनी(ता) त्रिलोकानां रुचिः प्रीतिर्येन । कुमुदस्य चन्द्रस्याविर्भावेन वा । अथच—रेवतीनाम्नी प्रियासदृशी । तथा—हे कामपाल) बलभद्र, कुः पृथ्वी तस्या मुदो हर्षस्याविर्भावेन प्रादुर्भावेन भाविता संचारिता रुचिः प्रीतिरिच्छा वा यस्य तस्य भवतस्तव तनुभासा कायकान्त्या नीलस्याम्बरस्य वस्त्रस्य रुचिं दीप्तिं राति ददाति एवंविधा सुषमा उत्कृष्टा शोभोचिता योग्यैव किल । धवलवस्तुसंपर्कान्नीलमतिशयेन शोभते । अथच—हे कामपाल कंदर्पपोषक रेवतीश चन्द्र, कैरवविकासस्फुटितकान्तेस्तव बिम्बतेजसा नीलस्य नभसः परमा शोभा युक्तैवेति ध्वनिः ॥

चतुर्भिः श्लोकैर्बुद्धं वर्णयति—

ऐकचित्ततातिरद्वयवादिन्नत्रयीपरिचितोऽथ बुधस्त्वम् ।
पाहि मां विधुतकोटिचतुष्कः पञ्चबाणविजयी षडभिज्ञः ॥ ८८ ॥

एकेति ॥ हे अद्वयवादिन् द्वैतवाच्यघटपटादिभेदाभानतत्त्वप्रतिपादनेनैकस्य ज्ञानाकारतामात्र एव वस्तुताङ्गीकारादद्वैतवादिन्, त्वं मां पाहि । किंभूतः—एकैव चित्ततति(र्ज्ञान)संततिर्यस्य दीपकलिकान्यायेन क्षणिकज्ञानप्रवाह एवैको यस्य मते, न तु तदतिरिक्तं किंचिदस्ति, तादृशः, अत एव—अद्वयवादिन् इति योजना । तथा—त्रय्या परिचितो ज्ञातस्तादृशो न भवतीत्यत्रयीपरिचितः । नञ्समासो वा । नेति पृथक्पदं वा । वेदत्रयीगम्योऽपि न भवतीत्यर्थः । अथच—वेदत्रय्यां परिचितः कृतपरिचयः वेदत्रयी परिचितान्यस्य येन तादृशो वा न भवति । सर्वस्य क्षणिकताङ्गीकाराद्धर्मिभेदोपलम्भनस्याभावा [illegible] इत्यर्थः । अत एव बुधः पण्डितः । नहि पण्डितं विना वेदविरुद्ध [illegible] बुद्धिः

१ [illegible] । २ [illegible] ।

संभवति। अथच—अत्रयीपरिचितोऽपि बुध इति विरोधाभासः। नहि वेदत्रयमजानानस्यापि पण्डितत्वं संभवति। अयच—यः पण्डितः 'एकमेवाद्वितीयं ब्रह्म' इति मन्यमानो वेदान्ती स वेदत्रयीं न मन्यत इति विरोधः। वेदान्तिना हि वेदप्रामाण्यस्य स्वीकृतत्वात्, अथच—अद्वयवादाद्धित्वसंख्यमपि नाङ्गीकरोति। स त्रित्वसंख्यां न मन्यत इति युक्तमेवेत्यर्थः। तथा—माध्यमिकानामपि कियन्मात्रमतभेदेन बौद्धसिद्धा(न्ता)न्तःपातित्वात्। 'न सन्नासन्न सदसन्न चाप्यनुभयात्मकम्। चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः॥' इति अनिर्वचनीयप्रपञ्चवादित्वाद्विधुतं निराकृतं सदसत्सदसद्द्वैलक्षण्यलक्षणं कोटिचतुष्कं प्रकारचतुष्टयं येन, अथच—त्रित्वनिषेधान्निरस्तचतुष्टयः। तथा—विरक्तत्वाद्दिगम्बरत्वात्पञ्चबाणः कामस्तद्विजयी मारजित्। अथच—'वण शब्दे' इत्यस्माद्धञि बाणः शब्दस्तं पञ्चसंख्यावाचिनं पञ्चशब्दं न सहत इत्यर्थः। यो हि चतुष्टयं न सहते स पञ्चापि न सहते इति युक्तमेवेत्यर्थः। तथा–देशादिव्यवहितवस्तुदर्शनम्, देशादिव्यवहितशब्दश्रवणम्, अतीतजन्मस्थितिस्मरणम्, परचित्तज्ञानम्, अविद्यास्मितारागद्वेषाभिनिवेशाख्यपञ्चक्लेशक्षयः, अणिमादिसिद्धिश्चेति षडभिज्ञा ज्ञानप्रकारा यस्य। वेदानुसारिभिर्दैत्यैः पराभूता देवा ब्रह्माणं शरणं गताः, ब्रह्मणा प्रसादितो नारायणो बुद्धरूपेणावतीर्य दैत्यबुद्धिं वेदार्थेभ्यश्च्यावयित्वा बौद्धमतमुपदिदेश, अतस्ते देवानां जय्याः संपन्ना इति। अतएव चैतदीयमतपरिभाषयैव स्तुतिरकारि। 'परिचिताथ बुधस्त्वम्–' इति पाठे—नेति पदं भित्त्वा त्वया वेदत्रयी न परिचिता न स्वीकृतप्रामाण्या। अथ विरोधे। तथापि बुधस्त्वमित्यर्थः। 'परिचिताध्वबुधः–' इति पाठे—त्रयीपरिचितानां वैदिकानां मार्गे पण्डितो न भवति। अवैदिकमार्गमेव जानान इत्यर्थः॥

तत्र मारजयिनि त्वयि साक्षात्कुर्वति क्षणिकतात्मनिषेधौ।
पुष्पवृष्टिरपतत्सुरहस्तात्पुष्पशस्त्रशरसंततिरेव॥ ८९॥

तत्रेति॥ तत्र तस्मिन् बुद्धावताररूपे सौन्दर्याज्जितेन्द्रियत्वाच्च मारजयिनि कामस्य जैत्रे त्वयि क्षणिकता सर्वं क्षणिकं सत्त्वात्, तथा—आत्मनिषेधश्च 'समनस्केन्द्रियजन्यनीलपीताद्याकारसविकल्पकनिर्विकल्पकवासनोपबृंहितचित्संततिरेवात्मा, भूतान्येव चेतयन्ते, मनसा संयोगे ज्ञानमुत्पद्यते, तस्माद्देह एवात्मा, नतु नित्योऽन्यः कश्चित्' इत्यादिप्रकारेण सर्वभावानां क्षणमात्रावस्थायिता नैरात्म्यं च स्वदर्शनोक्त समाधिना साक्षात्कुर्वति सति पुष्पशस्त्रस्य कामस्य शरसंततिर्बाणपरम्परारूपा सुरहस्तात्पुष्पवृष्टिरेवापतत्। अतिबले हि शत्रौ करादायुधानि पतन्ति। कामोऽपि त्वत्तो भीतः पुष्पशरश्च। तथाच तस्य करात्त्वद्भयेन पतितपुष्परूपबाणपरम्परा क्षणिकतात्मनिषेधौ साक्षात्कुर्वति त्वयि विषये सुरमुक्ता पुष्पवृष्टिरिवापतदित्युत्प्रेक्षा। कामेऽपि देवत्वमेव पुष्पवृष्टिमोचने हेतुः। यो हि लोकोत्तरं वस्तु प्रत्यक्षगोचरं करोति, यश्च कंचन विजहते, तयोरुपरि देवैः पुष्पवृष्टिः क्रियते इत्यादि ज्ञातव्यम्॥

तावके हृदि निपात्य कृतेयं मन्मथेन दृढधैर्यतनुत्रे।
कुण्ठनादतितमां कुसुमानां छत्रमित्रमुखतैव शराणाम्॥ ९०॥

तावक इति॥ मन्मथेन दृढमभेद्यं धैर्यमेव तनुत्रं कवचं यस्य तस्मिंस्तावके हृदि मनसि, अथच—वक्षसि अर्धाच्छरान्निपात्य नितरां दृढाघातपूर्वं यथातथा पातयित्वा दृढत-

नुन्नत्वादेवातितनां कुण्ठनात्तैक्ष्ण्यकलागाद्धेतोः कुसुमरूपाणां स्वीयशराणां छत्रं मित्रं येषां तानि, छत्रस्य वा मित्राणि, मुखानि येषां तेषां भावस्तत्ता सूचीमुखतापरित्याजनेन छत्रतुल्यवृत्तमुखेनेयं प्रत्यक्षदृशा कृता । दृढतनुत्रे हि पातितो बाणः कुण्ठितत्वाद्वृत्तमुखो भवति । स्मरशराः शरत्वात्पूर्वं सूचिमुखा आसन्, इदानीं तु धैर्यकञ्चुके त्वदीये हृदि निपत्य नितरां कुण्ठनादिव तेषां पुष्परूपाणां छत्राकारमुखता जातेत्युत्प्रेक्षोपपन्ने । विकसितानि पुष्पाणि छत्रतुल्यानि भवन्ति । अथच—छत्रं छायाकारित्वात्सुखदमेव यथा नतु दुःखदम्, तथा कामशरा अपि त्वदुदयस्यानिर्वापका एव जाताः नतु त्वां जेतुमशकन्नित्यर्थः । एतादृशो जितेन्द्रियः कोपि नास्तीति भावः । निपात्य, ण्यन्तात्क्त्वो ल्यप् ॥

यत्तव स्तवविधौ विधिरास्ये चातुरीं चरति तच्चतुरास्यः ।
त्वय्यशेषविदि जाग्रति शर्वः सर्वविद्ब्रुवतया शितिकण्ठः ॥ ९१ ॥

यदिति ॥ विधिस्तव स्तुतिविधौ बहुभिर्मुखैश्चातुरीं वैदग्ध्यं यद्यदि चरति प्राप्नोति नानाप्रकारैर्यदि त्वद्वर्णनं करोति तत्तर्ह्येव चतुराणि वर्णननिपुणान्यास्यानि यस्यैतादृशो भवेत् नान्यथा । अथ च—त्वद्वर्णनविधौ यस्माच्चातुरीं प्राप्नोति तस्मादेव हेतोश्चतुराण्यास्यानि यस्येति चतुरास्यो, नतु चत्वार्यास्यानि यस्येति विग्रहेण चतुरास्यः । आस्यानां चतुष्ट्वे सत्यपि तत्रार्थे गौरवाभावात् अत्र तु गौरवसद्भावात्तथैवोच्यत इत्यर्थः । त्वदीयस्तुतिपरत्वाद्ब्रह्मणो लोकत्रयेऽप्येवं कीर्तिरजनीति भावः । तथा—शर्वो हरस्त्वयि बुद्ध एवाशेषविदि सर्वज्ञे जाग्रति सति सर्वविदं सर्वज्ञमात्मानं ब्रूते स सर्वविद्ब्रुवस्तत्तयैव परगुणस्यात्मन्यारोपणेन हेतुना कलङ्केन शितिकण्ठो नीलकण्ठः, नतु कालकूटभक्षणेन नीलकण्ठः त्वत्स्पर्धितया लोकत्रयेऽपि महेशस्यैवमयशो जातमित्यर्थः । ब्रह्ममहेशाभ्यामपि सकाशात् त्वमेव परमपुरुषः सर्वज्ञश्चेति भावः । अन्यस्याप्यात्मस्तुत्या सर्वसंनिधौ लज्जया मालिन्यं भवति । सर्वविद्ब्रुवेति विदुषिब्रुवेतिवत् ॥

श्लोकद्वयेन कल्किनं स्तौति—

धूमवत्कलयता युधि कालं म्लेच्छकल्पशिखिनां करवालम् ।
कल्किना दशतयं मम कल्कं त्वं व्युदस्य दशमावतरेण ॥ ९२ ॥

धूमवदिति ॥ त्वं धूमवत् कालं करवालं खड्गं युधि म्लेच्छैः सह युद्धे कलयता धारयता, मृत्युरूपं खड्गं धूममिव धारयता वा, अत एव—म्लेच्छानां कल्पशिखिना प्रलयकालानलरूपेण, म्लेच्छा इव म्लेच्छाः पापिनस्तेषां वा, म्लेच्छप्रायाणां वा, एवंभूतेन कल्किसंज्ञेन दशमावतारेण कृत्वा मम दशतयं दशावयवं कल्कं पापं व्युदस्य निराकुरु । समूलमुन्मूलयेत्यर्थः । अथच— यः स्वयं कल्की, सोऽन्यकल्कं विनाशयतीति विरोधः । कल्किशब्दस्य विष्णुनामत्वात्परिहारः । म्लेच्छकल्पशिखिनेत्यवतारप्रयोजनमुक्तम् । अदत्तस्य वस्तुनः स्वयं ग्रहणम्, मार्गेणातिरिक्ता हिंसा, परस्त्रीगमनं च, त्रिविधं कायिकम् । पारुष्यम्, अनृतम्, पैशुन्यं असंबद्धप्रलापश्चेति चतुर्विधं वाचिकम् । परद्रव्यग्रहणेच्छा, परानिष्टचिन्ता, वृथैव परेषु दोषाभिध्यानं, चेति त्रिविधं मानसम् । इति दशविधं पापम् । चकुल्लक्ष्मीमत्र...

अपितु त्यक्तविरोध एव । किल यस्मात्पाञ्चजन्यत्वे सत्यपि अपाञ्चजन्यत्वमङ्गीकरोति । यूयं पश्यत, यतः सचेतनाः स्थ चैतन्ययुक्ता वर्तध्वे, कस्मान्मयि विषये विरोधं कुरुथेति अचेतना अपि मयि विरोधं नाचरन्ति, किमुत मरणभीताः सर्वज्ञाः । तस्मान्मयि विरोधं मा स्म कुद्ध्वम् । शब्दत एव विरोधः । अर्थद्वयेन तत्परिहारः । अथवा—अचेतन एव मयि मुक्तविरोधः शङ्खवत् । यूयं तु सचेतनाः स्थ, तस्मान्मयि विरोधमाचरयेति शङ्खवद्भवतोऽपि यावदचेतनान्न कुर्वे, तावद्विरोधो न त्यज्यत इति, अथवा—अचेतनोऽपि शङ्खो मयाद्यापि न मोच्यते, सचेतनास्तु शङ्खादयो भवतः कथं वा मया मोच्येरन् । अपितु मारयिष्याम्येवेति वक्षीत्यर्थः । अधिगत्य च अधिगत्यैवेति वा पक्षे संबन्धः । अचेतनोऽपि मयि मुक्तविरोधः किं न पश्यतेति वा । अपामिति कर्तरि 'कृत्यानाम्' इति षष्ठी ॥

तावकोरसि लसद्वनमाले श्रीफलद्विफलशाखिकयेव ।
स्थीयते कमलया त्वदजस्रस्पर्शकण्टकितयोत्कुचया च ॥ १०० ॥

तावकेति ॥ कमलया लक्ष्म्या लसन्ती पत्रपुष्पफलमयी वनमाला यस्मिंस्तस्मिंस्तावकोरसि श्रीफलस्य विल्ववृक्षस्य द्विफलशाखिकयेव फलद्वययुक्तया ह्रस्वकोमलशाखयेव स्थीयते । किंभूतया श्रिया—'तवाजस्रमनवरतं स्पर्श आश्लेषस्तेन कण्टकितया संजातसात्विकरोमाञ्चया, तथा—उत्कुचया चोन्नतपीवरस्तनया च । यत्र हि वनानां माला पङ्क्तिर्विलसति तत्र तत्कण्टकया फलसहितया च विल्वशाखया स्थीयते, तथात्रापि लसद्वनमालत्वाद्विशिष्टया लक्ष्म्या विशिष्टविल्वशाखयेव स्थीयते इत्युपमोत्प्रेक्षा वा । शाखिका, अल्पत्वे ह्रस्वत्वे वा कन् ॥

त्यज्यते न जलजेन करस्ते शिक्षितुं सुभगभूयमिवोच्चैः ।
आननं च नयनायितविम्बः सेवते कुमुदहासकरांशुः ॥ १०१ ॥

त्यज्यत इति ॥ जलजेन शङ्खेन, अथच—पद्मेन, ते करः कदाचिदपि न त्यज्यते सशङ्खचक्रगदापद्मत्वात्तवेत्यर्थः । तत्रोत्प्रेक्षते—उच्चैरत्यन्तं सुभगभूयं त्वत्करकमलरक्तिमादिसौभाग्यं शिक्षितुमिव । गुरुशुश्रूषा हि विद्याप्राप्तिहेतुः । तथा—कुमुदहासकराः कैरवविकासकारिणोंशवो यस्य स चन्द्रः नयनायितं नेत्रमिवाचरितं विम्बं यस्य तथाभूतः सन् त्वदीयवामनयनीभवंश्चन्द्रः परमं निष्कलङ्कत्वादि त्वन्मुखसौभाग्यं शिक्षितुमिव त्वदाननं गुरुं च सेवते । त्यज्यते सेवते इति लटा—अनयोः सौभाग्यं पद्मचन्द्रयोरद्यापि नागतमिति सूच्यते । 'पाञ्चजन्य–' इत्यादिश्लोकत्रयेण मूलप्रकृतिरेव वर्णिता । नयनायितेति आचारक्य(ङ)न्तान्निष्ठा । 'हासकर–' इति ताच्छील्ये टः ॥

ये हिरण्यकशिपुं रिपुमुच्चै रावणं च कुरुवीरचयं च ।
हन्त हन्तुमभवंस्तव योगास्ते नरस्य च हरेश्च जयन्ति ॥ १०२ ॥

य इति ॥ हे विष्णो, ये तव क्रमेण नरस्य मनुष्यस्य च हरेः सिंहस्य च । तथा—नरस्य श्रीरामचन्द्रस्य, हरेः सुग्रीवस्य । तथा—नरस्य अर्जुनस्य, हरेः श्रीकृष्णस्य च । संयोगा उच्चैरधिकं रिपुं हिरण्यकशिपुं हन्तुम्, तथा रावणं च हन्तुम्, तथा कुरुवीराणां भीष्मादीनां चयं च हन्तुमभवन् । ते तव नरस्य हरेश्च योगा जयन्ति सर्वोत्कर्षेण वर्तन्ते । हन्ताश्चर्यम् अवतारत्रयमपि नरहरियोगावलम्बनात् । योगः संश्लेषो मैत्री च ॥

केयमर्धभवता भवतोढे मायिना ननु भवः सकलस्त्वम् ।
शेषतामपि भजन्तमशेषं वेद वेदनयनो हि जनस्त्वाम् ॥ १०३ ॥

केति ॥ हे विष्णो, तव इयं पुराणादिषु दृश्यमाना अर्धे भवो महेशो यस्य तादृशोऽर्धभवस्तस्य भावोऽर्धभवता हरिहरमूर्तिता काप्यपूर्वाश्चर्यकारिणी मायिना भवता ऊढे (ऊढा) मुखात्प्रभृति चरणपर्यन्तं श्यामलादितत्तदसाधारणचिह्न उक्तार्धस्य अर्धस्य च धवलत्वाद्यसाधारणचिह्नरूपता, एतादृशी लोकोत्तरा तव मायाश्चर्यकारिणीत्यर्थः । अथ च केयम्, अपि त्वनुचितैव । ननु यस्मात्त्वं सकलः समग्रो भवो महेशः, अथ च—चन्द्रकलासहितो यो महेशः सम्पूर्णमूर्तिः स त्वमेव । तथा च सकलभवरूपस्यार्धभवरूपता विरोधादयुक्ता । आश्चर्यकारित्वेऽप्ययमेव हेतुः । हरिहरात्मकता चावतारान्तरमित्यवतारभेदेन तु विरोधपरिहारः । भवतेयमर्धभवता का ऊढे ऊढेत्यर्थ इति वा । अथ च—तवेयमर्धसंसारता का, अपि तु—विरुद्धा चित्ररूपा वा । यतः—समग्रः कलाभिरवयवैः सह वर्तमानश्च संसार उत्पत्तिधर्मा त्वमेवेति वा । हि यस्माद्वेदा एव नयनानि यस्य सकलवेदार्थनिश्चयदृढप्रत्ययो जनो लोकस्त्वां शेषतामेकदेशभूततां पृथग्भूततां भजन्तमपि अशेषं चराचरजगद्रूपं च वेद जानाति । 'सर्वं विष्णुमयं जगत्' इत्यादिश्रुतिस्मृतिभिस्त्वव चराचररूपत्वप्रतिपादनात्त्वयि सकलभवत्वं युक्तमेवेत्यर्थः । किंपुनर्हरिहरादिविचित्ररूपसाधारणम् । अथच शेषोऽपि विष्णोरेव मूर्तिरनन्ततां भजति, स एव कथमशेषोऽनन्तो न भवतीति च विरोधः । व्याख्यान्तरेण तत्परिहारः ॥

प्राग्भवैरुदगुदग्भवगुम्फान्मुक्तियुक्तिविहताविह तावत् ।
नापरः स्फुरति कस्यचनापि त्वत्समाधिमवधूय समाधिः ॥ १०४ ॥

प्राग्भवेति ॥ प्राग्भवैः प्राक्तनैः पूर्वजन्मोपार्जितैः कर्मभिर्हेतुभिरुदगुदग्भवस्योत्तरोत्तरस्य संसारस्य जन्मनो वा गुम्फाद्ग्रथनाद्धेतोः 'आत्यन्तिकी दुःखनिवृत्तिः, अविद्यात्मनो (वा) मोक्षः' इत्येवंलक्षणाया मुक्तेर्युक्तेर्योगः । प्राप्तिरिति यावत् । तस्या विहतावनेकजन्मसु तत्तत्सुकृतदुष्कृतरूपकर्मार्जनान्मूलसद्भावात्संसारानिवृत्तौ कथं नाम मुक्तिः संभवतीत्यादिनिर्युक्तिभिरनुपपद्यमानतायां तावन्निश्चयेन सत्यामिहैवं पूर्वपक्षे विषये कस्यचनापि वादिनस्त्वयि समाधिश्चित्तैकाग्र्यं ध्यानं संततानुचिन्तनमवधूय परिहृत्यापरोऽन्यः समाधिः परिहारः सिद्धान्तरूपो न स्फुरति प्रकाशते । उक्तरीत्या यद्यपि मुक्तिविहतिस्तथापि तव ध्यानादिद्वारा प्राप्तपरमात्मरूपसाक्षात्कारेणैव प्राचीनतत्तज्जन्मार्जितकर्मणां समुन्मूलनादिदानीमन्यकर्मारम्भे प्रारब्धकर्मणां भोगादेव क्षयान्नैष्कर्म्ये संपन्ने मुक्तिर्युज्यत एवेति सर्वेषामपि वादिनां त्वत्समाधिरेव सिद्धान्त इत्यर्थः । मुक्तिहेतुस्त्वमेवेति भावः । न तावत्स्फुरतीति वा ॥

ऊर्ध्वदिक्कदलनां द्विरकार्षीः किं तनुं हरिहरीभवनाय ।
किं च तिर्यगभिनो नृहरित्वे कः स्वतन्त्रमनु नन्वनुयोगः ॥ १०५ ॥

ऊर्ध्वेति ॥ हे विष्णो, त्वं हरिहरीभवनाय हरेर्हरस्यापि भवनाय हरिहरमूर्तीभवितुमूर्ध्वा दिग्यस्मिन्दलने तदूर्ध्वदिक्कमेवंभूतं दलनं विभागो यस्यास्त्वादृशीं तनुं द्विःप्रकारां भिन्नकार्षीः । हरिहरमूर्तौ चरणादिकमूर्ध्वपर्यन्तं तत्तद्विसदृशवर्णादिधारणादधोभागमारभ्यो-

सरिद्गङ्गा तवाङ्घ्रौ चरणे स्फुरति शोभते। तथा—अर्थस्य द्वितीयपुरुषार्थस्य मूलमादिकारणं श्रीस्त्ववोरसि स्फुरति। तथा—कामरूपं दैवतं कामरूपस्तृतीयपुरुषार्थोऽपि ते प्रसवः कृष्णरूपस्य तव प्रद्युम्नरूपतया पुत्र एव। सोऽपि पुत्रत्वादधीन एवेत्यर्थः। तथा—मुक्तिदं चतुर्थपुरुषार्थभूतमोक्षदानसमर्थं ब्रह्म परमात्मरूपं स्वयमेव स्वरूपेणैव त्वं भासि। चतुर्विधपुरुषार्थहेतुतया धर्मार्थकाममोक्षार्थिनां त्वदुपासनैवोचितेति भावः॥

इदानीं कतिचिद्भिः श्लोकैर्भगवन्नामसंकीर्तनमाहात्म्यं वर्णयति—

लीलयापि तव नाम जना ये गृह्णते नरकनाशकरस्य।
तेभ्य एव नरकैरुचिता भीस्ते तु विभ्यतु कथं नरकेभ्यः॥ ११२॥

लीलयेति॥ हे विष्णो, ये जना नरकस्य भौमासुरस्य नाशकरस्तस्य, अथच—पुण्यश्लोकत्वान्निरयनाशकारिणस्तव नाम राम, विष्णो, इत्यादि संज्ञा सङ्केतपरिहासादिप्रसङ्गान्तररूपया लीलया विलासमात्रेणापि गृह्णते उच्चारयन्ति तेभ्य एव त्वन्नामग्राहिभ्यो नरेभ्य एव सकाशात् पातकियातनास्थानभूतैर्महारौरवादिनरकैर्भीस्तत्कर्तृका तदधिकरणिका वा भीतिरुचिता योग्या। तेभ्य एव तैर्भयं प्राप्तुमुचितमित्यर्थः। ते तु नरकनाशकारिभवन्नामग्राहिणः क्षीणपापा नराः पुनः कथं नाम विभ्यतु भयं प्राप्नुवन्तु, अपितु न कथंचित्। तदुक्तं श्रीभागवते—'साङ्केत्यं परिहास्यं वा स्तोभं हेलनमेव वा। वैकुण्ठनामग्रहणमशेषाघहरं विदुः॥' इति। लीलयापीत्यपिशब्देन ये तु बुद्धिपूर्वमेव भवन्नामजपमेव कुर्वन्ति तेभ्यो नरका विभ्यतीति किमु वक्तव्यमिति सूचितम्। नरकैर्भीरिति 'कर्तृकर्मणोः कृति' इति षष्ठीप्राप्तावपि संपदादित्वाक्किपः स्त्र्यधिकारविहितत्वात्स्त्रीप्रत्ययत्वे 'शेषे स्त्रीप्रत्यये वा' इति वार्तिकात्पक्षे 'कर्तृकरणयोः—' इति तृतीया॥

मृत्युहेतुषु न वज्रनिपाताद्भीतिमर्हति जनस्त्वयि भक्तः।
यत्तदोच्चरति वैष्णवकण्ठान्निष्प्रयत्नमपि नाम तव द्राक्॥ ११३॥

मृत्युहेतुष्विति॥ हे विष्णो, त्वयि विषये भक्तो जनः अनेकेषु मृत्युहेतुषु मध्ये वज्रनिपातरूपान्मृत्युकारणात्सकाशाद्भीतिं नार्हति भयं प्राप्तुं योग्यो न भवति। यद्यस्मात्कारणात्तदा वज्रपातसमये तस्य वैष्णवस्य कण्ठान्निष्प्रयत्नं निरन्तरहरिस्मरणाभ्यासबलेन तस्मिन्काले विशिष्टमुद्यमं विनापि तव श्रीरामकृष्णादिनाम द्राक् शीघ्रमुच्चरति निर्गच्छति। वज्रनिपातान्मरणे संजातेऽपि तस्मिन्समये उक्तरीत्या नामोच्चारणसद्भावात्तावन्मात्रेण मोक्षप्राप्तेः पुनर्जन्माभावान्मृत्योर्भयं वैष्णवस्य नास्तीति भावः। मृत्युहेतुषु मध्येऽन्यापेक्षया दारुणान्मृत्युहेतोर्वज्रनिपातादपि सकाशाद्वैष्णवो भयं नार्हतीति किं वाच्यमित्यर्थः। तस्मान्मृत्युसमये वैष्णवकण्ठान्निष्प्रयत्नमपि तव नाम द्राङ्निर्गच्छति। व्याघ्राद्यनेकमृत्युहेतुषु हरिस्मरणादेव मृत्युभयं नास्तीति ज्ञातव्यम्। उच्चरति, सकर्मकत्वाभावात् 'उदश्चरः सकर्मकात्' इति न तङ्॥

---

१ भाष्यपर्यालोचनया तु 'उभयप्राप्तौ' इत्येतद्विधीयमाननियमस्यैव वैकल्पिकत्वमनेन क्रियते इति प्रतीयते। 'नरके गदिता भीः' इति पाठे कर्त्रर्यधिकरणत्वविवक्षायां सप्तमी कल्पनीया। नरकैर्निहिता भीः इति वा पाठः कल्पनीयः। यथाश्रुतेऽपि पाठे कर्तरि करणत्वविवक्षायां वा तृतीया।

अथ स्मरणमाहात्म्यमाह—

सर्वथापि शुचिनि क्रियमाणे मन्दिरोदर इवावकरा ये ।
उद्भवन्ति भविनां हृदि तेषां शोधनी भवदनुस्मृतिधारा ॥ ११४ ॥

सर्वथेति ॥ हे विष्णो, सर्वथा मनोवाक्कायनियमनाद्यनेकप्रकारैर्निर्धूतपापतया शुचिनि शुद्धे ब्रह्मार्पितफलत्वेन बन्धककर्मरहिते वा क्रियमाणेऽपि भविनां संसारिणां हृदि मनसि येऽज्ञानप्रमादकृता अवकरा रागादिदोषा उद्भवन्ति तेषां दोषाणां भवतोऽनुस्मृतिर्ध्यानं तस्या धारा परम्परा शोधनी प्रक्षालनहेतुः, नान्यः कश्चित् । कस्मिन्निव—मन्दिरोदरे गृहमध्य इव । यथा पुनःपुनर्मार्जनेन विरजस्त्वे क्रियमाणे गृहमध्ये ये तृणरजःपुञ्जा नवा नवा उद्भवन्ति तेषां शोधनी संमार्जनी भवति तथेत्यर्थः । भवदनुस्मृतिरेव चित्तशुद्धिसंपादनद्वारा नैष्कर्म्यसंपादनेन मोक्षहेतुरिति भावः । 'भुवि' इति पाठे—चेतस्येव भुवि स्थाने इत्यर्थः । 'संमार्जनी शोधनी स्यात्संकरोऽवकरस्तथा । क्षिप्ते' इत्यमरः ॥

पुनरपि नामान्तरापेक्षया रामनाम्नो माहात्म्यमाह—

अस्त्वदाद्यविषयेऽपि विशेषे रामनाम तव धाम गुणानाम् ।
अन्वबन्धि भवतैव तु कस्मादन्यथा ननु जनुस्त्रितयेऽपि ॥ ११५ ॥

अस्त्विति ॥ अत्रैव गुणाः सन्तीति विशेषाकारेण विशेषेऽस्मदाद्यज्ञानविषये बुद्ध्यगोचरे सत्यपि तव सहस्रनामसु मध्ये रामेतिनाम गुणानां धाम स्थानम् । यद्वा—हे राम, तव नाम गुणानां स्थानम् । अज्ञातेऽपि विशेषे कुत एतन्निर्णीतमित्यत्रार्थापत्तिं प्रमापयति—अन्यथा तु पुनर्यद्येवं न स्यात्तर्हि ननु जनुस्त्रितयेऽपि जामदग्न्य-दाशरथि-यदुनन्दन-रूपजन्मत्रयेऽपि भवतैव कस्माद्धेतोराग्रहेण पौनःपुन्येन रामेत्येव नाम अन्वबन्धि अङ्गीकृतम् । अनेकजन्मस्वेतस्य त्वयैव स्वीकारात्तवाप्येतत्प्रियतममिति ज्ञायते तस्माद्रामनाम्न गुणगणस्थानमित्यर्थापत्तिः । तथा च शिवेनापि 'राम रामेति रामेति—' इत्यादि पद्येऽनुस्मृतम् ॥

भक्तिभाजमनुगृह्य दृशा मां भास्करेण कुरु वीततमस्कम् ।
अर्पितेन मम नाथ न तापं लोचनेन विधुना विधुनासि ॥ ११६ ॥

भक्तीति ॥ हे नाथ, त्वं भास्करेण सूर्यरूपया दक्षिणदृशा त्वयि भक्तिभाजं मामनुगृह्य मयि प्रसाददृष्टिपातं कृत्वा वीततमस्कं गताज्ञानं कुरु । प्रसाददृष्टिपातेनाज्ञानान्धकारं निवारयेत्यर्थः । सूर्येण च तिमिरं निरस्यते तथा मयि अर्पितेन प्रसारितेन विधुना चन्द्ररूपेण वामलोचनेन कृत्वा मम त्रिविधमपि तापं न विधुनासि न दूरीकरोषि, अपितु निरस्यसीति काकुः । चन्द्रेण च शीतलत्वात्तापशान्तिः क्रियते । एवं स्तुवन्तं मां प्रसादपूर्णदृशा विलोक्य कृतार्थीकुर्विति भावः ॥

लङ्घयन्नहरहर्भवदाज्ञामस्मि हा विधिनिषेधमयीं यः ।
दुर्लभं स तपसापि गिरैव त्वत्प्रसादमहमीप्सुरलज्जः ॥ ११७ ॥

लङ्घयमिति ॥ हे स्वामिन्, योऽहं 'संध्यावन्दनादि कुर्वीत' इति विधिः, 'परदारादि न कुर्वीत' इति निषेधः, तन्मयीं भवदाज्ञां 'श्रुतिस्मृती ममैवाज्ञे' इति वचना-

श्रुतिस्मृतिरूपानहरहः प्रतिदिनं लङ्घयन्नतिक्रामन् यत् कर्तव्यतया त्वयोपदिष्टं तन्न करोमि, यच्च न कर्तव्यमित्युपदिष्टं तत्करोम्येवेति त्वदाज्ञां लङ्घयन्सन् अस्मि वर्ते । हा कष्टमुद्वेगकारी । सोऽहं महीयसापि तपसा दुर्लभं त्वत्प्रसादमिच्छुः 'प्रसीद' इति गिरैव प्रार्थयमानः सन्नलज्जो निर्लज्जोऽस्मि । यो हि एकदापि प्रभोराज्ञां करोति सोऽपि कथंचित्तत्प्रसादं लभते । यस्तु कदापि स्वाम्याज्ञां न करोति स दग्धोऽपि वाङ्मात्रेण प्रसादमिच्छन्निर्लज्ज एव । प्रसीदेति भावः । त्वत्प्रसादमिति, 'न लोका–' इति षष्ठीनिषेधः ॥

विश्वरूप कृतविश्व कियत्ते वैभवाद्भुतमणौ हृदि कुर्वे ।
हेम नह्यति कियन्निजचीरे काञ्चनाद्रिमधिगत्य दरिद्रः ॥ ११८ ॥

विश्वेति ॥ हे विश्वरूप स्थावरजङ्गमात्मक, तथा—कृतविश्वस्थावरजङ्गमकारिन् विष्णो, अहं ते तव वैभवाद्भुतं सामर्थ्यातिशयजन्यं तद्रूपं वाश्चर्यमणौ परमाणुरूपे हृदि मनसि कियत् किंपरिमाणं कुर्वे । अपितु–आधारस्याल्पीयस्त्वात्, आधेयस्य च महीयस्त्वात्त्वद्वैभवाद्भुतमणौ हृदि धारयितुं न शक्नोमीत्यर्थः । यद्यपि ते सामर्थ्यं महत्, तथापि कियदल्पमेव प्राप्नोमीति वा । युक्तमेतत् । यस्माद्दरिद्रोऽकिंचनो जनः काञ्चनाद्रिं सुमेरुमधिगत्य प्राप्य तत्स्थुद्रुतसुवर्णग्रहणाभिलाषोऽपि सन् शतधा शकलीभूतेऽसन्तजीर्णे निजचीरे स्वीये वस्त्रे कियत्किंपरिमाणं हेम नह्यति बध्नाति, अपित्वल्पमेव ग्रन्थौ बध्नात्यसामर्थ्यात्, तथा त्वद्गुणवर्णनाभिलाषे सत्यपि सामर्थ्याभावात्कियन्मात्रगुणवर्णना कृतेति भावः । इति स्तुत्युपसंहारः ॥

इत्युदीर्य स हरिं प्रति संप्रज्ञातवासिततमः समपादि ।
भावनाबलविलोकितविष्णौ प्रीतिभक्तिसदृशानि चरिष्णुः ॥ ११९ ॥

इतीति ॥ स नलः हरिं प्रति इत्युक्तप्रकारेणोदीर्य प्रसादं संप्रार्थ्य द्विविधसमाधिमध्ये संप्रज्ञाताख्येन समाधिना तत्र वासिततमः अतितरां संभावितमनास्तदेकतानः समपादि जातः । अतएव भावनाबलेन संप्रज्ञातध्यानबलेन विलोकिते साक्षात्कृते विष्णौ विषये प्रीतेः सहजप्रेम्णः भक्तेश्च सदृशानि योग्यानि कर्माणि आनन्दबाष्पगीतनृत्यादीनि चरितुं शीलमस्य सः । तदुक्तं श्रीभागवते—'शृण्वन्सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके । गीतानि नामानि तदर्थकानि गायन्विलज्जो विचरेदसङ्गः ॥' इति । इदं संप्रज्ञातप्रतिमादिसाकारध्यानेन विष्णुं साक्षात्कृतवानिति भावः । 'विष्णुः' इति पाठे—भावनाबलेन विलोकितो विष्णुर्येन सः । अतएव—प्रीतिभक्तिसदृशानि चरिष्णुः । एकार्थे—प्रेमभक्तियोग्यान्युपहारादीनि । ध्यानसमाधिर्द्विविधः—संप्रज्ञातोऽसंप्रज्ञातश्च । तत्र ध्येयवस्तुभावयुक्तसाकारध्यानसमाधिः संप्रज्ञातः, निर्विकल्पेन निराकारसम्यक्साक्षात्कारात्मकध्यानसमाधिरसंप्रज्ञात इति योगशास्त्रम् ॥

विप्रपाणिषु भृशं वसुवर्षी पात्रसात्कृतपितृक्रतुकव्यः ।
श्रेयसा हरिहरं परिपूज्य प्रह्व एष शरणं प्रविवेश ॥ १२० ॥

विप्रेति ॥ एष नलः प्रह्वः सन् शरणं भोजनगृहं प्रविवेश । नमस्कृत्य गृहप्रवेशिनो नलः । किंभूतः—विप्रपाणिषु भृशं तिलदानसंबन्धि वसु गोभूहिरण्यादि वर्षन्शीलः तथा पात्र—

१ 'भजनादिमेवोदिति—' इति जीवातुसंमतः पाठः ।

अपिर्नलदेवपूजापेक्षया समुच्चयार्थः । पत्यौ भुक्तवतीति पतिव्रताजातिः । 'परिरिप्सुमध्यम्' इति पाठे भैमीस्पर्शसंजातसात्त्विकरोमाञ्चं तदालिङ्गनेच्छुमध्यं यस्य । 'भरातिभरा' इत्येव पाठः साधीयान् । पैठान्तरं चिन्त्यम् । अङ्कम्, 'अधिशीङ्स्थासाम्–' इति कर्मत्वम् ॥

तामन्वगादशितबिम्बविपाकचञ्चोः स्पष्टं शलाटुपरिणत्युचितच्छदस्य ।
कीरस्य कापि करवारिरुहे वहन्ती सौन्दर्यपुञ्जमिव पञ्जरमेकमाली ॥१२३॥

तामिति ॥ काप्यनिर्दिष्टनामातिसुन्दरी वाला सखी तां भैमीमनु लक्षीकृत्य पश्चादगात् जगाम । कीदृशी–कीरस्य शुकस्यैकं पञ्जरं करवारिरुहे पाणिपद्मे वहन्ती । उत्प्रेक्षते–शुकस्य रमनो वा सुवर्णादिघटितत्वात्पञ्जरस्यैव वा मूर्तं सौन्दर्यपुञ्जमिव पृथक्करे पञ्जररूपेण वहन्तीति संबन्धः । किंभूतस्य कीरस्य–अशितस्य भक्षितस्य पक्वस्य बिम्बस्य बिम्बीफलस्य विपाकः परिणामस्तद्रूपा चञ्चुर्यस्य । अतिप्रियभुक्तपक्वबिम्बफलमेव यदीयचञ्च्वाकारेण परिणतमिति यावत् । तादृशस्यातिरक्तचञ्चोः । तथा स्पष्टं सर्वथापि शलाटुरपक्वं यत्किंचित्फलं भुक्तं बिम्बीफलमेव वा, तस्य परिणतिरतिनीलता तस्या उचितास्तद्योग्या अतिनीलाश्छदाः पक्षा यस्य । अपक्वानि श्यामानि भक्षितानि फलान्तराणि बिम्बीफलान्येव वा यदीयच्छदाकारेण परिणतानीति यावत् । तादृशस्यातिहरितपक्षस्य कीरस्य रक्तचञ्चुत्वं नीलपक्षत्वं जातिः । पाठितशुकादिपञ्जरादिधारिण्याः सख्या अपि नायिकानुगमनं जातिः । भोजनानन्तरं पाठितशुकसारिकादिशब्दानां गीतस्य च श्रवणेन नृत्तादिवीक्षणेन च क्रीडनं राज्ञामपि जातिः । 'आमे फले शलाटुः स्यात्' इत्यमरः ॥

कूजायुजा वहुलपक्षशितिम्नि सीम्ना स्पष्टं कुहूपदपदार्थमिथोऽन्वयेन ।
तिर्यग्धृतस्फटिकदण्डकवर्तिनैका तामन्ववर्तत पिकेन मदाधिकेन ॥१२४॥

कूजेति ॥ एका सखी पिकेन कोकिलेन सहोपलक्षिता वा तां भैमीमन्ववर्तत लक्ष्यीकृत्य जगाम । किंभूतेन पिकेन–कूजया मधुराव्यक्तेन शब्देन सहात्मानं युनक्ति युक्, तेन । कुहूशब्दं कुर्वता । तथा—वहुलो भूयान्यः पक्षाणां शितिमा कृष्णत्वं तस्मिन्सीम्नाऽवधिभूतेन । अतएव विशेषणक्रमेण (विशेषेण) 'कुहूः' इति पदस्य, शब्दस्य तथा पदार्थस्य तत्पदवाच्यस्यामावास्यारूपस्य च मिथोऽन्वयोऽन्योन्यसंवन्धो यत्र तादृशेन च स्पष्टमुत्प्रेक्षायाम् । कुहूपदयोगित्वात्कृष्णतमत्वाच्चामावास्या(वाचि)विषये कुहूपदपदार्थयोस्तादात्म्यरूपेणेति यावत् । अमावास्यापि कृष्णपक्षसंवन्धिनी मर्यादा भवति, अतएव कुहूशब्दवाच्या च । तथा–तिर्यक् तिरश्चीनं (यथा तथा) करे धृतः स्फटिकदण्डकस्तत्र वर्तिना स्थितेन । तथा–मदाधिकेन मदोन्मत्तेन । दण्डकेति, 'ह्रस्वे' इति कन् । ह्रस्वे दण्डे इत्यर्थः ॥

शिष्याः कलाविधिषु भीमभुवो वयस्या वीणामृदुक्वणनकर्मणि याः प्रवीणाः ।
आसीनमेनमुपवीणयितुं ययुस्ता गन्धर्वराजतनुजा मनुजाधिराजम् ॥१२५॥

शिष्या इति ॥ या भीमभुवो भैम्या वयस्याः सख्यः कलाविधिषु चतुःषष्टिकलाकर्मसु विषये भैम्या एव शिष्याः तथा—वीणायाः मृदुक्वणनकर्मणि मधुरशब्दरूपे व्यापारे प्रवी-

१ 'भूषणभरातितरालसाङ्गी' इति पाठो जीवातुसंमतः ।

गाथाः गन्धर्वराजो विश्वावसुस्तस्य तनुजाः कन्यास्तत्तुल्या वा प्रासादे आसीनं मनुजाधि-
राजमेनमुपवीणयितुं वीणयोपगातुं ययुः प्रापुः । उपवीणयितुं पूर्ववत् ॥

तासामभासत कुरङ्गदृशां विपञ्ची किंचित्पुरः कलितनिष्कलकाकलीका ।
भैमीतथामधुरकण्ठलतोपकण्ठे शब्दायितुं प्रथममप्रतिभावतीव ॥ १२६ ॥

तासामिति ॥ तासां कुरङ्गदृशां विश्वावसुकन्यानां विपञ्ची वीणा अभासत शुशुभे । किंभूता—किंचित् पुरः ईषत्पूर्वं प्रारम्भसमये कलिताङ्गीकृता निष्कला गम्भीरमन्द्रस्वरश्रुति-वर्णविशेषाभिव्यक्तिरहिता काकली सूक्ष्ममधुराव्यक्तरागविशेषो यया । अतएव—उत्प्रेक्षते—भैम्यास्तथानिर्वचनीयमधुरस्वरयुक्तायाः कण्ठलताया उपकण्ठे निकटे शब्दायितुं तस्याः पुरस्ताच्छब्दमपि कर्तुं प्रथमं प्रारम्भेऽप्रतिभावतीव प्रतिभारहितेवाधृष्टेव । अन्योऽप्यधिकविद्यस्य पुरस्ताच्छब्दायितुं गातुं वाऽधृष्टः सन् प्रथमं मन्दमेव भाषते गायति चेति संगीतविद्याविदामियं जातिः । प्रथमं गायनाः गानप्रारम्भे काकलीमारचयन्ति । काकल्यादि संगीतशास्त्राद-वगन्तव्यम् । काकलीकेति, 'नद्यृतश्च' इति कप् । शब्दायितुं, 'शब्दवैर–' इति क्यङ् ॥

सा यद्भुताखिलकलागुणभूमभूमीभैमीतुलाधिगतये स्वरसंगतासीत् ।
तं प्रागसावविनयं परिवादमेत्य लोकेऽधुनापि विदिता परिवादिनीति १२७

सेति ॥ सा विपञ्ची भूतानामखिलानां गीतनृत्तादिचतुःषष्टिकलानां सौन्दर्यादिगुणानां च भूम्नो बाहुल्यस्य भूमी स्थानभूता भैमी तस्यास्तुलाधिगतये साम्यप्राप्तये स्वयमपि पूर्वोक्तप्र-कारेण तादृशी सती भैमीस्वरतुल्यत्वप्राप्तये यत् स्वरैः षड्जादिभिः संगता संबद्धा आसीत् । अथच—भैम्या सार्धं साम्यप्राप्तये स्वरतं स्वाच्छन्द्याभिलाषं गतासीत् । असौ विपञ्ची तं भैमीसाम्यस्वाच्छन्द्याभिलाषलक्षणमविनयमनुचिताचरणमेव परिवादं स्फुटं दोषं प्राक् पूर्वमस्य प्राप्य, अथच परिवादं वीणावादनसाधनं तद्रूपमविनयं प्राप्य अधुनापि अद्यावदपि लोके परिवादिनीति विदिता ख्याता । परिवादयोगात्परिवादिनीत्यद्यापि गीयत इत्यर्थः । अथ च—वीणावादनसाधनयुक्ता । सप्त—सप्ततन्त्रीयुक्ता वीणा परिवादिनी । 'भीतो भयानि पश्यति' इति न्यायेन पूर्वमपि लोके दुष्टतां प्राप्ता पुनरपि चोत्तमस्य पुरस्ता-त्प्रागल्भ्ये दोषान्तरं शङ्कमानेव प्रतिभावतीति प्राचीनश्लोकार्थहेतुतया योज्यम् । 'परिवादः कलङ्के स्याद्वीणावादनवस्तुनि' इति विश्वः ॥

नादं निषादमधुरं ततमुज्जगार साभ्यासभागवनिभृत्कुलकुञ्जरस्य ।
स्तम्बेरमीव कृतसश्रुतिमूर्धकम्पा वीणा विचित्रकरचापलमानयन्ती ॥१२८॥

नादमिति ॥ अवनिभृतां कुलं वंशस्तत्र कुञ्जरः श्रेष्ठस्तस्य नलस्याभ्यासभाक् समीपव-र्तिनी सा तन्त्री वीणा [illegible] निषादस्वरेण मधुरं श्रव्यं ततमत्युच्चं नादमुज्जगारोद्गीर्णवती । किंभूता—स्वतः अङ्गुलीनां [illegible] मूर्धनि नादप्रान्ते कम्पः कम्पि-तस्वरो यया कृतः सह श्रुतिभिर्वर्तमाना मूर्धनि वीणाया एकोपरितनभागे कम्पितस्वरो यया, वीणोर्ध्वं [illegible] निषादस्वरे [illegible] तादृशी वा । स्वतः अङ्गुलीनां [illegible]-[illegible]संगीतशास्त्रविदां मूर्धकम्पो यया वा । तथा—विचित्रं करचापलं [illegible]-रोहादिक्रमेणाङ्गुलीप्रान्तस्पर्शेन [illegible]

मयं काम इति संदेहं को वा तनोति, अपितु न कोपि करोति। कामस्य हरेण दग्धत्वात्संदेहनिवृत्तेरित्यर्थः। आ इत्याश्चर्ये। यस्य तवाङ्गजा कान्तिर्यतो रतिं सूते ततो रतिरपि नप्त्री सा कामस्य स्त्री। तस्मात् त्वयि कामसंशयं कोऽपि न करोतीत्यर्थः। इति नलं प्रति तद्वचनं शुकेनान्ववादि इति वा। रतिकामाभ्यामपि युवामतितमां सुन्दराविति भावः। त्रैयक्षेति संबन्धेऽणि 'न य्वाभ्याम्–' इति वृद्धिनिषेधे पूर्वमैजागमः॥

एतां धरामिव सरिच्छविहारिहारामुल्लासितस्त्वमिदमाननचन्द्रभासा।
विभ्रद्विभासि पयसामिव राशिरन्तर्वेदिश्रियं जनमनःप्रियमध्यदेशाम्॥ १३४॥

एतामिति॥ हे नल, त्वं विभासि। किंभूतः—एतां भैमीं बिभ्रत् अङ्के धारयन्। किंभूताम्—सरितां नदीनां छविं कान्तिं हरन्ति तच्छीला उज्ज्वलतरा मौक्तिकहारा यस्यास्ताम्। तथा—वेद्यामन्तर्वेदि वेदिकामध्यं तद्वदतिकृशा श्रीः शोभा यस्याः। अन्तर्मध्ये वेदिवदतिकृशा श्रीर्यस्या वा। तथा—जनमनसां प्रिय आनन्ददायी मध्यदेशः शरीरमध्यभागो यस्यास्ताम्। किंभूतः—अस्या भैम्या आननमिदमाननं तल्लक्षणश्चन्द्रस्तस्य भासा कान्त्या उल्लासितो हर्षं प्रापितः। क इव—चन्द्रभासा वृद्धिं प्रापितः पयसां राशिः समुद्र इव। कामिव—धरां भूमिमिव। यथा पृथ्वीमङ्के धारयन् समुद्रः शोभते। किंभूतां धराम्—सरितो नद्य एव छव्या कान्त्या हारिणो मनोहरा हारा यस्यास्ताम्। तथा अन्तर्वेद्याख्यया गङ्गायमुनामध्यभुवा श्रीर्यस्यास्ताम्। तथा—जनमनसां प्रियो मध्यदेशो विन्ध्यहिमाचलान्तरभूभागरूप आर्यावर्तापरपर्यायः पुण्यभूतो मध्यदेशो यस्यास्ताम्। 'हिमवद्विन्ध्ययोर्मध्यं यत्प्राक्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः॥' इति मनुः। इदमाननम्, षष्ठीसमासः॥

दत्ते जयं जनितपत्रनिवेशनेयं साक्षीकृतेन्दुवदना मदनाय तन्वी।
मध्यस्थदुर्बलतमत्वफलं किमेतद्भुक्तिर्यदत्र तव भर्त्सितमत्स्यकेतोः॥ १३५॥

दत्त इति॥ जनितानि सखीभिः कस्तूर्यादिविरचितानि पत्रनिवेशनानि मकराद्याकारपत्रवल्लीलेखनानि यस्याः सा, पत्रवल्लीभूषिता। तथा—अक्षिभ्यां सह वर्तमानः साक्षः असाक्षः साक्षः कृतः सनेत्रतां प्रापितः साक्षीकृतः स चासाविन्दुश्च स एव वदनं यस्याः सा, चन्द्राधिकवदना। तन्वी कृशाङ्गी भैमी मदनाय जयं दत्ते। एवंविधभैमीदर्शनेन कामो नितरामुल्लसतीत्यर्थः। अथ च—कामाय जयं दत्ते। एवंविधभैमीदर्शनवशीकृतस्त्वं कामेन जीयस इत्यर्थः। यच्च कायकान्त्या भर्त्सितो जितो मत्स्यकेतुः कामो येन तस्य तवात्र भैम्या विषये भुक्तिरेव तच्छरीरोपभोग एतन्मध्य उदरभागे स्थितस्य वर्तमानस्य दुर्बलतमत्वस्यातिदौर्बल्यस्य फलं परिपाकः किमिति प्रश्नः, संभावना वा। अतिसुन्दरस्य तवैवैतच्छरीरभोगः कृशैतदुदररक्षणीयकमेव प्रयोजकमित्यर्थः। अथ च—मध्यदेशवर्तिनोऽतिकार्श्यस्य फल(ल)मेतदेव, यदतिसुन्दरस्य तवात्र भुक्तिर्नेत्यर्थः। कामेन तव विजये एतन्मुखचन्द्रस्य च साक्षादृष्टत्वात् साक्षित्वं युक्तम्। अथ च—कामेन जितमिति कामस्य जयदाने साक्षीकृता इन्दुवदनाः सख्यो यया। ता अपि हि कामेन नलो भैमीवशः कृत इति जानन्ति। इदं

१ 'यत्प्राग्विनशनात्' इति पाठ आधुनिकपुस्तकेषूपलभ्यते।

त्यपि क्रूरोक्त्यादिना तर्जितः कामो येन तस्य तवान्यस्मिन्भैमीविषये वा विवादविषये यो भोगः । लब्धजयं कामं क्रूरोक्त्या संतर्ज्य तदीयमपि विषयं बलादन्यायेनैव भुङ्क्ष इत्यर्थः । अथ च—मध्यस्थानां सभ्यानां दुर्बलतमत्वस्य ज्ञानदौर्बल्यस्य नियन्तुमसामर्थ्यस्य स्वदत्तजय-निर्वहणाशक्तत्वस्य वा फलं परिपाकः किमयमिति संभावना । अन्यत्रापि विवादपदे साक्षि-वादनं कृत्वा जयपत्रदानपुरःसरमेकस्मै जयपत्रं दीयते, तत्र निर्णये कृते मध्यस्थाश्चेद्दुर्बला भवन्ति तर्हि पराजितोऽप्येको लब्धजयमपि द्वितीयं तिरस्कृत्य तदीयं विवादपदं क्षेत्रादिकं बलाद्भुङ्क्ते । कथमन्यथा ससाक्षिकजयपत्रहस्तं निर्भर्त्स्यान्योन्यदीयभुक्तिं करोतीत्यर्थापत्तिः । साक्षिकृतेति 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः 'बहुव्रीहौ सक्थ्यक्ष्णोः—' इति षच् च्विः । पक्षे 'साक्षाद्द्रष्टरि—' इतीनौ च्विः ॥

चेतोभवस्य भवती कुचपत्त्रराजधानीयकेतुमकरा ननु राजधानी ।
अस्यां महोदयमहस्पृशि मीनकेतो के तोरणं तरुणि न ब्रुवते भ्रुवौ ते ॥१२६॥

चेत इति ॥ ननु भैमि, भवती चेतोभवस्य राजधानी नगरी । कीदृशी—कुचपत्त्रेषु राजानः श्रेष्ठाः पत्त्रवल्ल्य इत्यर्थः । तेषु धानीयः स्थापनीयः । यद्वा—कुचपत्त्रेणैव राजधा-नीयो राजधानीसंबन्धी केतुर्ध्वजश्चिह्नभूतो मकरो मत्स्यो यस्यां सा । राज्ञो मुख्यावस्थान-नगर्यां राजधान्यां साभिज्ञानश्चिह्नरूपः पताकादिध्वजो भवति । तथा च केतुभूतस्य मकरस्य त्वत्कुचयोर्वर्तमानत्वात्त्वं कामराजस्य राजधानी । साक्षान्मदनस्त्वय्येव वर्तत इत्यर्थः । अत एव हे तरुणि आरूढयौवने भैमि, के जना मीनकेतोर्मकरध्वजस्य संबन्धिनं महो-दयरूपं महत्सुत्सवं महानभ्युदयो यस्मिंस्तादृशं वोत्सवं स्पृशन्त्यां स्वसानिध्येनोदयोत्सवव-त्यामस्यां भवद्रूपायां राजधान्यां ते तव भ्रुवौ तोरणं न ब्रुवते । अपितु—सर्वेऽपि जनास्त्व-द्भ्रुयुगं कामाभ्युदयोत्थितवक्रितशिखं वंशाद्युपनिबद्धमाकारविशेषकसुनोल्बणरूपं तोरणमेव वदन्ति । कामस्त्वदेकाश्रयः सन्सर्वोत्कर्षेण वर्तत इति भावः । 'पत्त्ररत्न—' इत्यपि पाठः सष्टार्थः । राजेति पाठो मुख्यः । 'राजा—' इत्यादिना समासान्तः ॥

अस्या भवन्तमनिशं भवतस्तथैनां कामः श्रमं न कथमृच्छति नाम गच्छन् ।
छायैव वामथ गतागतमाचरिष्णोस्तस्याध्वजश्रमहरा मकरध्वजस्य ॥१२७॥

अस्या इति ॥ हे नल, अस्या भैम्याः सकाशाद्भवन्तं गच्छन् । तथा—भवतः सकाशा-देनां भैमीं गच्छन् प्राप्नुवन् कामः कथं नाम श्रमं न ऋच्छतु गच्छतु, अपितु सदा गमना-गमने कुर्वन् श्रमं गच्छत्येव । अथवा यस्माद्वां युवयोर्छाया कायकान्तिरेवोक्तरीत्या गतागत-माचरिष्णोस्तस्य मकरध्वजस्याध्वनि जातं श्रमं हरति एवंभूता भवतीति शेषः । युवयोर्गमना-गमनकर्मणोऽपि सर्वत्र श्रमहरच्छायाभावात्तस्य गतागतश्रमं न वेत्तीत्यर्थः । अथच—छायाभिर्गता च्छाया यदा गतागते कुर्वतः पुरुषस्य श्रमं हरत्येव । भैम्यास्त्वय्येव कामः तव च भैम्यामेव कामोऽत्यर्थं परस्परानुरागः कुत्रापि नास्तीति भावः ॥

स्वेदाम्बुवर्षणचितां नवरोमराजीं रत्यै यदाचरति जागरितव्रतानि ।
आभाति तेन नरनाथ मधूत्थलान्द्रमासनेषु रतकेलिरदन्तुरद्भुः ॥१२८॥

स्वेदेति ॥ हे नरनाथ, स्वेदे वर्षणं सलिलेन वा आचरः कर्म इव पश्यन्ति

जातनेत्रप्रीतिः सुन्दरतरनयनानन्दकारिणं नलं दृष्ट्वा जातनेत्रप्रीतिः स्तुहीलक्ष्यवेलयं इति रागशब्देनोत्प्रेक्षा । अनुकिचुचुरिति 'तेन वित्तः—' इति चुञ्चुप् ॥

तुङ्गप्रासादवासादथ भृशकृशतामायतीं केलिकुल्या-
मद्राक्षीदर्कबिम्बप्रतिकृतिमणिना भीमजा राजमानाम् ।
वक्रं वक्रं व्रजन्तीं फणियुवतिरिति त्रस्नुभिर्व्यक्तमुक्ता-
न्योन्यं विद्रुत्य तीरे रथपदमिथुनैः सूचितामार्तिरुत्या ॥ १४४ ॥

तुङ्गेति ॥ अथैव वीणाक्वाणानुवादिशुकालापानन्तरं भीमजा केलिकुल्यां क्रीडाकृत्रिमनदीमद्राक्षीत् । किंभूताम्—भैम्यास्तुङ्गे उन्नतरे प्रासादे वासात्स्थितेर्हेतोर्भृशकृशतामायतीं प्रगुणवर्तीम्, अधोदेशे स्थिता स्वयं महीयस्युच्चतरदेशे स्थितां भैमीं प्रलम्बमानत्वेन प्रतिभासमानाम् । तथा—अस्तगामिनोऽर्कबिम्बस्य प्रतिकृत्या प्रतिबिम्बरूपेण महाप्रकाशेन मणिना राजमानां प्रतिबिम्बितास्तगामिसूर्यबिम्बाम् । तथा—वक्रं वक्रं स्वभावकुटिलं व्रजन्तीं गच्छन्तीम् । अतएव-फणियुवतिः कृष्णसर्पिणीयमिति त्रस्नुभिस्त्रासशीलै रथपदमिथुनैश्चक्रवाकस्त्रीपुंसयुगलैर्व्यक्तं स्पष्टं मुक्तं त्यक्तमन्योन्यं परस्परं यथातथा तीरे विषये विद्रुत्य पलाय्य कर्मभूतेवा द्वे तीरे प्रति गत्वा अर्तिरुत्या विरहपीडासंबन्धिना रवेण कृत्वा सूचितां प्रकटीकृताम् । सांध्यतमसावृतत्वाच्च स्पष्टतरमदृश्यमानामपि नदीयमिति चक्रवाकशब्देन ज्ञापितां फणियुवतिरिति सूचितामिति वा । कृष्णसर्पिण्यपि कृशा भवति सूर्यबिम्बतुल्येन शिरःस्थेन मणिना शोभते । वक्रं वक्रं च व्रजति । तां च दृष्ट्वा जनाः पक्षिणो वा पलाय्य दीनस्वरोपलक्षिताः परस्परं सहवासं मुञ्चन्ति । सूर्यमस्तं जिगमिषुं दृष्ट्वा चक्रवाकमिथुनानि सांध्यविरहपीडया रुतं कृत्वान्योन्यं मुक्त्वा पलाय्य केलिकुल्याः पारावारे तीरे तिष्ठन्तीति भैमी ददर्शेत्यर्थः । उष्यतेऽस्मिन्निति वासः । तुङ्गप्रासादवासमारुह्याद्राक्षीदिति ल्यब्लोपे वा ।

अथ रथचरणौ विलोक्य रक्तावतिविरहासहताहताविवाग्नैः ।
अपि तमकृत पद्मसुप्तिकाले श्वसनविकीर्णसरोजसौरभं सा ॥ १४५ ॥

अथेति ॥ केलिकुल्यादर्शनानन्तरं सा भैमी रक्तौ परस्परानुरक्तौ स्वभावेन रक्तवर्णौ च अतो अतिविरहासहतया नितरां वियोगासहिष्णुतया हतौ कामशरविद्धौ लग्नशराघाते सति अस्रैः रुधिरैरिव रक्तौ रथचरणौ चक्रवाकौ विलोक्य तं पद्मानां सुप्तिकालं संकोचसमयं सायंसंध्यासमयमपि विरहपीडितकोकदर्शनाद्दुःखसंजातः श्वसनो निःश्वासभरस्तन्निर्गमनेन कृत्वा विकीर्णं सरोजसौरभं यस्मिंस्तादृशमकृत । संध्यासमये पद्मसंकोचात्सौरभाभावेऽपि निःश्वासनोच्छ्वासेन पद्मिनीत्वात्पद्मसौगन्ध्यं तदानीमपि विस्तारयति स्मेत्यर्थः । कोकौ तादृशौ दृष्ट्वा नूनं शोचेत्यर्थः । अन्योऽप्यत्रक्षतं रक्तव्याप्तं दृष्ट्वा नूनं निःश्वसिति । 'विरहावहनौ हताविवास्रैः' इति पाठः सुयोजनः । अस्त्रैः कामस्य रथचरणौ, 'पुमान्स्त्रिया' इत्येकशेषः ॥

अभिलपति पतिं प्रति स भैमी सदय विलोक्य कोकयोरवस्थाम् ।
मम हृदयमिमौ च भिन्दतीं हा क इव विलोक्य नरो न रोदितीमाम् ॥ १४६ ॥

---

१ 'मुक्ता' इति कलिकातामुद्रितपुस्तकपाठः ।

अभीति ॥ भैमी पतिं प्रति इति अभिलपति स्म अवोचत् । इति किम्—हे सदय सकरुण, त्वं कोकयोरवस्थां विरहविह्वलत्वं विलोकय । हा कष्टमिमौ कोकौ निन्दन्तीं पृथग्देशावस्थितौ कुर्वतीम्, अतएव—मम भैम्या अपि हृदयं च एतच्छोकेन विदारयन्तीमिमां कोकयोरवस्थां विरहविह्वलत्वं विलोक्य क इव नरः सचेता मनुष्यो न रोदिति, अपितु सर्वोऽपि परिदेवनं करोत्येव । सदयत्वात्तव दुःखं भविष्यतीति किं वक्तव्यमित्यर्थः ॥

कुमुदमुदमुदेष्यतीमसोढा रविरविलम्बितुकामतामतानीत् ।
प्रतितरु विरुवन्ति किं शकुन्ताः स्वहृदि निवेशितकोककाकुकुन्ताः ॥१४७॥

कुमुदेति ॥ हे प्रिय, रविरुदेष्यतीमुल्लसनानां कुमुदानां मुदं विकासरूपं हर्षमसोढेवाशक्नुवन्निवाविलम्बितुं सत्वरं गन्तुं कामो यस्य तद्भावस्तत्तामतानीत् विस्तारितवान् । आसन्नास्तमयो वर्तत इत्यर्थः । तथा—शकुन्ताः पक्षिणः प्रतितरु विरुवन्ति विशेषेण रुतं कुर्वन्ति । आसन्ननेत्रनिमीलना वासार्थिनो विरुवन्तः सन्तः स्वस्वनिवासवृक्षं प्रति गच्छन्तीत्यर्थः । तत्रोत्प्रेक्षते—स्वहृदि निवेशिताः कोकानां काकवः शोकविकृता विरावा एवातिपीडाकारित्वात्कुन्ता भल्ला यैस्तादृशाः किम् । चक्रवाकशोकपीडिता इव पक्षिणः क्रन्दन्तीत्युत्प्रेक्षा । अन्योऽपि वैरिणामुदेष्यतीमभिवृद्धिमसहमानः सत्वरं कुत्रचिद्गच्छति । तथा—अपरः सकृपः कश्चिद्दुःखितं कंचिद्दृष्ट्वा क्रन्दति । सोढा, तृन् । मुदम्, 'न लोका—' इति षष्ठीनिषेधः । उदेष्यतीम्, 'आच्छीनद्योः—' इति वैकल्पिकत्वान्नुमभावः ॥

अपि विरहमनिष्टमाचरन्तावधिगमपूर्वकपूर्वसर्वचेष्टौ ।
इदमहह निदर्शनं विहंगौ विधिवशचेतनचेष्टनानुमाने ॥ १४८ ॥

अपीति ॥ हे प्रिय, स्वस्यानिष्टमपि विरहमाचरन्तौ स्वयमेव कुर्वाणौ । तर्हि सदा स्वानिष्टाचरणस्वभावावेव भविष्यत इत्यत आह—अधिगमो ज्ञानं तत्पूर्विकाः पूर्वा विरहाचरणात्प्राचीनाः सर्वाश्चेष्टाः कर्तव्यता ययोस्तौ वा । अधिगमो लाभो हितमिति यावत् । तत्पूर्विकास्तदुद्देश्याः पूर्वाः सर्वाश्चेष्टा ययोस्तादृशौ वा । बुद्धिपूर्वकारी हि स्वाहिते न प्रवर्तते । कोकयोश्च दिने भोजनादयः सकलचेष्टा ज्ञानपूर्विकाः स्वहिताश्च । एवंसत्यनेनैवंस्वभावावप्येतौ संध्याकालकर्मादेवान्योन्यविरहं स्वयमेव बलादाचरतस्तस्माद् विधिवशं दैवाधीनं चेतनानां प्राणिनां चेष्टितं पूर्वकर्माधीनं प्राणिनामाचरणमित्येवंरूपेऽनुमाने कार्यात्कारणविशेषज्ञाने विषये यावेतौ विशिष्टौ विहंगौ कोकौ इदमेव निदर्शनमयमेव दृष्टान्तः । अहह अद्भुते खेदे वा । तस्मात्प्राचीनकर्मानुसारेणैव प्राणी कदाचिद्धितं कदाचिदहितमाचरतीति भावः । 'प्राणिनो दैवाधीनचेष्टिताः प्रतिकूलतया ज्ञातेऽपि प्रवर्तनाच्चक्रवाकवत्' इत्यनुमानम् ॥

अह्नि स्वाहरणिमेष्टकाविसरणैः शोणे कृपाणः स्फुटं
कालोऽयं विधिना रथाङ्गमिथुनं विच्छेत्तुमन्विच्छता ।
रश्मिग्राहिगरुत्मदग्रजसनाभ्याधावितानन्तरं
दण्डभ्राजिनि भानुशाणवलये संलग्य किं निन्यते ॥ १४९ ॥

अह्नीति ॥ उत्प्रेक्षते—हे प्रिय, रथाङ्गमिथुनं विच्छेत्तुं वियोजयितुम्, अथ च—विशेषेण विदारयितुमन्विच्छता विधिना ब्रह्मणा दैवेन सार्धं रक्तः सायंसंध्यासमय एव

स्फुटं खड्गगुणयोगात्कालः कृष्णः लोहमयः कृपाणः भानुशाणवलये सूर्यरूपे शाणचक्रे संसज्य संयोज्य निज्यते किम्, तीक्ष्णीक्रियते किमित्यर्थः। किंभूते वलये—अस्तमयकालसांनिध्यादङ्घ्रिस्थः किरणस्थोऽरुणिमा स एव इष्टकाविसरणानि इष्टकाचूर्णप्रसारणानि तैः शोणे रक्तवर्णे। तथा—रश्मिग्राहिणा गरुत्मतोऽग्रजेनारुणेन समारब्धाऽविरामा निरन्तरा भ्रमिः भ्रमणं यस्य तस्मिन्, सदाऽरुणेन कृतभ्रमणे। अथ च—आकर्षणरज्जुग्राहिभिररुणसमस्तवृत्तेजस्विभिर्वलिभिः पुरुषैरारब्धनिरन्तरभ्रमणे। तथा—दण्डसंज्ञकेन पारिपार्श्वकेन भ्राजिनि शोभमानशीले, अथ च—शाणचक्राधारभूतेनाकर्षणरज्जुसंयुक्तेन दारुमयेन दण्डेन शोभमाने। संनिहितास्तमयसूर्यसायंसंध्यासमयसांनिध्याच्चक्रवाकयुगं तीक्ष्णतरखड्गविदारितमिव विधिवशाद्वियुक्तं सद्यथत इति भावः। अन्योऽपि किंचिच्छेत्तुं खड्गमुक्तविशेषणविशिष्टे शाणचक्रे तीक्ष्णं करोति। 'किरणप्रग्रहौ रश्मी', 'माठरः पिङ्गलो दण्डश्चण्डांशोः पारिपार्श्विकाः' इत्यमरः। भ्रमाविति भाषितपुंस्कम्। निज्यते, 'णिजिर् शौचे' इत्यस्मात्कर्मणि यक्। नकारे तकारभ्रान्त्यैव तिज्यत इति पठन्ति तदसत्[१]॥

इति स विधुमुखीमुखेन मुग्धालपितसुधासवमर्पितं निपीय।
स्मितशबलवलन्मुखोऽवदत्तां स्फुटमिदमीदृशमीदृशं यथात्थ॥ १५०॥

इतीति॥ स नलोऽपि तां भैमीमिति अवदत्। इति किम्—हे प्रिये, त्वं यथात्थ, तदिदं स्फुटं निश्चितमीदृशमीदृशं सत्यमेवेत्यर्थः। किंभूतः—इति पूर्वोक्तरीत्या विधुमुख्या भैम्या मुखेनार्पितं दत्तं मुग्धं मनोहारि आलपितं मञ्जुभाषितमेव सुधासवं रसबाहुल्यादमृतं उन्मादकत्वाच्च मद्यं निपीयास्वाद्य सादरमाकर्ण्य च स्मितेन शबलं मिश्रितम् वलत् भैमीमुखं मुखं यस्य सः। कामिनो हि कामिनीमुखार्पितमद्यं सानुरागं पिबन्ति, अनन्तरं वलितमुखाः सहासं किंचिद्वदन्ति च॥

स्त्रीपुंसौ प्रविभज्य जेतुमखिलावालोचितौचित्ययो-
र्नम्रां वेद्मि रतिप्रसूनशरयोश्चापद्वयीं त्वद्भ्रुवौ।
त्वन्नासाच्छलनिह्नुतां द्विनलिकीं नालीकमुक्त्येषिणो-
स्त्वन्निश्वासलते मधुश्वसनजं वायव्यमस्त्रं तयोः॥ १५१॥

स्त्रीति॥ अयि प्रिये, अहं वक्रतरे त्वद्भ्रुवौ रतिश्च प्रसूनशरः कामश्च तयोः नम्रां स्त्रीजयाय रत्या पुंजयाय च कामेनाकर्णमाकृष्य वक्रितां चापद्वयीं वेद्मि, त्वद्भ्रुवावेव द्वयोर्धनुषी इत्यर्थः। किंभूतयोः—अखिलौ त्रिजगति वर्तमानौ तत्तज्जातीयौ स्त्रीपुंसौ प्रविभज्य विभागं कृत्वा पृथक्पृथक् जेतुमालोचितं विचारितमौचित्यं याभ्यां तयोः। स्त्रियाः स्त्र्येव जेतुं योग्या पुंसश्च पुमानेवेत्यालोचितौचित्ययोरित्यर्थः। तथा—नालीकानां वितस्तिमात्रनालीकाख्यशरविशेषाणां मुक्तिं मोक्षणमिच्छतः एवंशीलयो रतिकामयोः संबन्धिनीं द्विनलिकीं नालीकमोचनोपायभूतसरन्ध्रवंशपर्वद्वयं त्वन्नासाच्छलेन त्वदीयवामदक्षिणनासापुटद्वयव्याजेन निह्नुतां गोपितां जानामि। त्वन्नासापुटद्वयमेतन्न भवति, किंतु नालीकद्वयमुक्त्युपायभूता द्विनलिकी-

१ 'तिज निशाने' इत्यस्य तीक्ष्णीकरणार्थकस्य धातोस्ताद्रूप्यसंभवे 'तदसत्' इत्युक्तिश्चिन्त्या।

त्वेवाहं शङ्क इत्यर्थः । तथा—त्वन्निश्वासलवे तव वामदक्षिणनासानिश्वासधाराद्वयं तयो रतिकामयोः प्रत्येकं मधुश्वसनजं वसन्तकालीनमलयानिलप्रभवं वायव्यं वायुदेवताकमत्त्रमेव वेद्मि । सुन्दरत्वसूनासायवयवदर्शनमात्रेण कामवशत्वं भवतीति भावः । द्विनलिकी, समाहाराद्विगौ ङीप् । वायव्यम्, 'सास्य देवता' इत्यर्थे 'वाय्वृतुपित्रुषसो यत्' इति यत् ॥

पीतो वर्णगुणः स चातिमधुरः कायेऽपि तेऽयं यथा
यं बिभ्रत्कनकं सुवर्णमिति कैरादृत्य नोत्कीर्त्यते ।
का वर्णान्तरवर्णना धवलिमा राजैव रूपेषु य-
स्तद्योगादपि यावदेति रजतं दुर्वर्णतादुर्यशः ॥ १५२ ॥

पीत इति ॥ हे भैमि, वर्णेषु शुक्लादिरूपेषु मध्ये गुणो वैशेषिकादिभिर्गुणपदार्थत्वेन निर्दिष्टः पीतो हरिद्राभो वर्णः स च स एवातिमधुरो रमणीयतरो, नतु वर्णान्तरं मधुरमित्यर्थः । यथा येन कारणेनायं पीतो वर्णस्तेऽपि काये देहे वर्तते । अत्युत्तमया त्वयापि शरीरे धार्यते तस्मादयमत्युत्तम इत्यर्थः । अथच—रूपान्तरापेक्षया शुक्लरूपस्यैव प्रधानत्वादन्येषां चाप्रधानत्वाद्वर्णेषु मध्ये गुणोऽप्रधानभूतोऽपि यो हरिद्राभो वर्णः स एवातिमधुरः । प्रधानभूत इत्यर्थः । यस्मादयं ते काये वर्तते । अप्रधानस्यापि केनचिदत्युत्तमेनाङ्गीकृतत्वादि प्राधान्यं भवति, तथा त्वयाङ्गीकृतत्वादप्रधानस्याप्यस्य प्राधान्यं युक्तमेवेत्यर्थः । अथ च—गुणः पीत एव, नान्ये गुणाः, पीतवर्ण एव गुणरूपोऽन्ये तु दोषरूपा इत्यर्थः । स एव चातिमधुरः । अत्रापि हेतुः—यतोऽयं तव काये वर्तते तस्माद्गुणोऽतिमधुरश्चेत्यर्थः । अथच—ते तव काये वर्तमानोऽयं प्रत्यक्षगम्योऽतिमधुरो रसो यथा मया पीतस्त्वत्तचुम्बनस्थानचुम्बनवशेनास्वादितः, तथा तव काये सोऽतिप्रसिद्धो वर्णगुणो गौरिमापि पीतः सादरं निरीक्षितः । अथच—हरिद्राभ इत्यर्थः । चः अपिश्चान्योन्यसमुच्चये । सोऽतिमधुरो रसो यथा मया पीतः, तथायं वर्णगुणोऽपि पीत एवेति वा संबन्धः । अथच तवातिमधुरो वर्णगुणो वर्णात्मकशब्दलक्षणो गुणो यथा पीत आस्वादितः, अतिमधुरा तव वाणी मया पीतेत्यादि ज्ञातव्यम् । एवं छलेनोक्त्वा प्रकृतपीतरूपवर्ण एव युक्तिमाह—त्वच्छरीराश्रयं पीतवर्णं बिभ्रत् कनकं चम्पकं शोभनो वर्णोऽस्य तत्सुवर्णमिति कैर्जनैरादृत्यादरेण नोत्कीर्त्यते नोद्घोष्यते, अपितु—त्वदङ्गधृतवर्णतुल्यवर्णधारणादेव चम्पकं सुवर्णमित्युच्चैः कीर्त्यते । अथच त्वच्छरीराश्रयं पीतवर्णं धारयच्चामीकरं शोभनो वर्णोऽस्येतिव्युत्पत्त्या सुवर्णमिति कैर्जनैरादरेण नोद्घोष्यते, अपितु—त्वच्छरीराश्रितपीतवर्णतुल्यवर्णधारणादेव सुवर्णमिति कीर्तिं लेभे इत्यर्थः । अथच—शोभनो वर्णः स्तुतिर्यस्य । त्वदङ्गवर्णं बिभ्रदतितरां स्तुत्यं, नतु स्वत इति । तुल्यया वृत्त्या सुवर्णमिति सर्वमनङ्गम्, कनकं तु त्वद्द्युतिवर्णसाम्यधारणाद्धेम्ना वृत्त्या लोकेन कल्पत इत्यर्थः । अतएव पीतवर्णस्य पुरस्तादप्रधानानां वर्णान्तराणां नीलादीनां वर्णानां वर्णना का, अपितु—सा नैव कुत्राप्युपयुज्यते तत्कथा न कार्यैव । यावत् यतःकारणाद् यो धवलिमा शुक्लगुणः षड्विधेषु रूपेषु मध्ये राजैव श्रेष्ठतम एव । निर्मलत्वरम्यत्वादिभिर्वर्णिमा वैशेषिकैः प्रथमोच्चारितत्वाच्च प्रधानभूत एव । तस्य प्रधानभूतस्यापि योगात्संबन्धादपि रजतं दुःश्रेऽवनीचीनो वर्णो यस्य तस्य भावस्तस्मा दुर्वर्णतादुर्नाम्नः दुर्यशः दुर्वर्णोऽकी-

र्तिमेति। नीलादि वर्णान्तरयुक्तं तु दुर्वर्णतां प्राप्नोतीति किं वाच्यमित्यर्थः। यावत्सकलं रक्तमिति वा। अप्रधानस्यापि पीतरूपस्य भैमीशरीरेणानङ्गीकृतत्वादेवोत्तमत्वम्। तयोर्वचने सुवर्णमिति कीर्तिः। भैमीशरीरेणाङ्गीकृतत्वादेव चोत्तमस्यापि धवलिम्नोऽनुत्तमा। धवलिमा, वर्णवाचित्वाद्गुणवचनत्वाद्वेमनिच्॥

इदानीं नवभिः श्लोकैर्भैमीवाणीं वर्णयति—

खण्डक्षोदमृदि स्थले मधुपयःकादम्बिनीतर्पणा-
त्कृष्टे रोहति दोहदेन पयसां पिण्डेन चेत्पुण्ड्रकः।
स द्राक्षाद्रवसेचनैर्यदि फलं धत्ते तदा त्वद्गिरा-
मुद्देशाय ततोऽप्युदेति मधुराधारस्तमप्प्रत्ययः॥ १५३॥

खण्डेति॥ हे भैमि, पुण्ड्रकः स्थूलेक्षुविशेषः पयसां पिण्डेन दुग्धानामत्यन्ताग्निपाकघनीभूतेन गोलकेनैव दोहदेन एवंभूते स्थले क्षेत्रे चेद्रोहति साङ्कुरो भवति। किंभूते स्थले—खण्डः शर्कराचूर्णमेव मृन्मृत्तिका यस्मिन्। तथा—मधु अमृतं माक्षिकमेव वा पयो यस्यास्तया कादम्बिन्या मेघमालया तर्पणात् पूर्णजलत्वकरणाद्धेतोर्द्विगुणाकृष्टे। मेघमालावृष्टजलं हि क्षेत्रं पुनः कृष्यते, तादृशे समीकृते उप्तं हि बीजमङ्कुरार्थं पुनः पयोऽपेक्षते। तत्स्थानेऽत्र दुग्धगोलकः। दोहदेनेत्यनेन निरातङ्कमभिवृद्धिः सूचिता। अनन्तरं च प्ररूढाङ्कुरः सन् पुण्ड्रकः फलोत्पत्तिसमयपर्यन्तं द्राक्षाणां द्रवः पक्वफलनिष्पीडितरसस्तस्य सेचनैः कृत्वा इक्षुदण्डादपि परिणतमाधुर्यातिशयफलं यदि धत्ते तदा तर्हि ततोऽपि विशिष्टेक्षुफलादपि सकाशात्त्वद्गिरां तव वाणीनामुद्देशाय निर्देशार्थं मधुरशब्द आधारो मूलप्रकृतिर्यस्य तादृशस्तमप्प्रत्यय उदेति उत्पद्यते। कीदृग्भैम्या वाणीति पृष्टे उक्तविशेषणविशिष्टादिक्षुफलादपि मधुरतमेति तदा निर्देष्टुं शक्येत इत्यतिशायने तमप् तदेव संगच्छत इत्यर्थः। एवंविशिष्टं फलं यदि भवेत्, तर्हि तदेव तावदतिमधुरं तस्मादप्यतिमधुरं वस्तु विद्यते किमिति पृष्टे निःसीममधुरतमस्यान्यस्याभावात्तमप्प्रत्ययान्तमधुरशब्देन भवद्वाण्येवोत्तरत्वेन दातुं योग्या नतु विशिष्टमपीक्षुफलं, निःसीममाधुर्याभावात्तमप्प्रत्ययानुपपत्तेः, किमुत मधुराणि द्रव्यान्तराणीति भवद्वाणीवन्मधुरतमं वस्तु किंचिदपि न दृष्टमिति भावः। एवंविधे क्षेत्रे यदि पुण्ड्रको रोहति, स च पयसां पिण्डेन दोहदेन, द्राक्षाद्रवसेचनैश्च दोहदेन, यदि फलं धत्त इति वा। 'कादम्बिनी मेघमाला' इत्यमरः। 'पुण्ड्रो दैत्यविशेषेक्षुभेदयोः—' इति विश्वः। ततः स्वार्थे कन्॥

उन्मीलद्गुडपाकतन्तुलतया रज्ज्वा भ्रमीरर्जय-
न्दानान्तःश्रुतशर्कराचलमथः स्वेनामृतान्धाः स्मरः।
नव्यामिक्षुरसोदधेर्यदि सुधामुत्थापयेत्सा भव-
ज्जिह्वायाः कृतिमाह्वयेत परमां मत्कर्णयोः पारणाम्॥ १५४॥

उन्मीलदिति॥ अमृतमेवान्धोऽन्नं यस्य देवत्वात्, तादृशो भवन्स्मरो यदि इक्षुरस एवोदधिस्तस्मात्सकाशान्नव्यां नूतनां देवासुरोत्थापितपूर्वसुधाया अन्यादृशीं सुधामात्मनैवोत्थापयेन्निर्गमयेत्, तर्हि सा मधुरतमा सुधा मत्कर्णयोः परमां पारणामद्वितीयतृप्तिहेतुं भवत्या

संबन्धिनी वा नदी। अत एव—मन्मथस्य तीर्थं कामोद्दीपिका। तथा–इदमीयस्य अस्या नद्याः संबन्धिनः पुलिनस्य संबन्धिनी वालुकैव इक्षुविकाररूपः खण्डं खण्डमिलाख्यते गीयते। तथा—पूता निर्मलाः सिताः शुभ्राश्चक्रिकाः शर्कराकृतचक्राणि एतस्यास्तीरस्य मृदैव धवलमृत्तिकयैव विरचिताः किम्। तथा—पीयूषममृतमस्याः संबन्धीनि पयांसि इदंपयांसि किम्। अस्या जलान्येवामृतत्वेनाख्यन्ते किमित्यर्थः। तथा—तवाधरावेव इदंतीरे अस्या नद्यास्तीरे उभौ तटौ किम्। शृङ्गाररसप्रधाना कामोद्दीपिका भवद्वाणी मधुरतमेति भावः॥

परभृतयुवतीनां सम्यगायाति गातुं
न तव तरुणि वाणी यं सुधासिन्धुवेणी।
कति न रसिककण्ठे कर्तुमभ्यस्यतेऽसौ
भवदुपविपिनाम्रे ताभिराम्रेडितेन॥ १५७॥

परेति॥ हे तरुणि प्रादुर्भूतयौवने, सुधासिन्धुवेणी सुधानदीप्रवाहरूपा तवेयं वाणी परभृतयुवतीनां सम्यग्याथात्म्येन गातुं भाषितुं नायाति, यस्माद्धेतोस्ताभिः कोकिलाभिरसौ त्वद्वाणी भवत्या उपविपिने स्थितो य आम्रवृक्षस्तस्मिन्स्थित्वा रसालाङ्कुरास्वादेन रसिकेऽतिमधुरे, अथच—ममाप्येवंवाणी भवत्वेवंसाभिलाषे, कण्ठे कर्तुं कण्ठस्थां कर्तुमाम्रेडितेन पुनः पुनर्घोषणेन कति वारान्नाभ्यस्यते, अपितु वहुवारमभ्यस्यत एव। तस्मादद्यापि तासां भवद्वाणी सम्यङ्नायातीति ज्ञायत इत्यर्थः। कोकिलालापादपि त्वद्वाणी मधुरतमेति भावः। भिक्षाटनेन विद्याभ्यासः सुकर इति सूचनार्थं परभृतपदम्। पुमपेक्षया स्त्रीणां विशेषतस्तरुणीनामिति सूचनार्थं युवतिपदम्॥

ऊर्ध्वस्ते रदनच्छदः स्मरधनुर्बन्धूकमालामयं
मौर्वी तत्र तवाधराधरतटाधःसीमलेखालता।
एषा वागपि तावकी ननु धनुर्वेदः प्रिये मान्मथः
सोऽयं कोणधनुष्मतीभिरुचितं वीणाभिरभ्यस्यते[1]॥ १५८॥

ऊर्ध्वे इति॥ हे प्रिये, ते ऊर्ध्वो रदनच्छद ओष्ठ एव बन्धूकमालामयं स्मरधनुः। तवाधराधरतटस्याधस्तनौष्ठभागस्याधःसीमायां पर्यन्तमर्यादायां वर्तमाना लेखा सैव दैर्घ्याल्लता तत्र कामचापे मौर्वी। एषा तावकी वागपि मान्मथः कामसंबन्धी कामाद्वैतप्रतिपादको धनुर्वेद एव। सोऽयं विशिष्टस्त्वद्वाणीरूपो मान्मथो धनुर्वेद उचितं योग्यं यथा तथा कोणधनुष्मतीभिर्वीणावादनधनुर्युक्ताभिर्वीणाभिरभ्यस्यते परमद्यापि नायातीत्यर्थः। त्वद्वाणी वीणाक्वणितादपि मधुरतमेति भावः। धनुर्वेदश्च धनुर्धरैरेवाभ्यस्यते इत्यौचित्यम्। अभ्यस्यते, एतदुचितमिति वा। यत्खस्य नायाति तदागमनार्थमभ्यासो ह्युचित एवेत्यर्थः॥

स ग्राम्यः स विदग्धसंसदि सदा गच्छत्यपाङ्क्तेयतां
तं च स्प्रष्टुमपि स्मरस्य विशिखा मुग्धे विगानोन्मुखाः।
यः किं मध्विति नाधरं तव कथं हेमेति न त्वद्वपुः
कीदृङ्नाम सुधेति पृच्छति न ते दत्ते गिरं चोत्तरम्॥ १५९॥

[1] कलिकातामुद्रितपुस्तके तु 'आरभ्यते' इति पाठो मूलेऽपि प्रतीयते।

विलोकनेनानुगृहाण तावद्दिशं जलानामधिपस्य दारान् ।
अक्षालि लाक्षापयसेव येयमपूरि पङ्कैरिव कुङ्कुमस्य ॥ ३ ॥

विलोकनेनेति ॥ हे प्रिये, त्वं जलानामधिपस्य वरुणस्य दारान् भार्यां पश्चिमां दिशं विलोकनेनानुगृहाण कृतार्थीकुरु, तावदादौ विलोकनेनानुगृहाण, वर्णनया तु पश्चादित्यर्थः। यावच्चन्द्रोदयादिना प्राच्यां रामणीयकं भवति तावत्संध्यारागेण कृतरामणीयकां पश्चिमां दिशं विलोकयेति वा तावच्छब्दार्थः। जडाधिपस्य च भार्या दुःखिता विलोकनादिनानुग्रहीतुमर्हा भवतीत्युक्तिः। येयं पश्चिमा दिक् लाक्षापयसालक्तकरसेन कृत्वा केनाप्यक्षालीव क्षालितेव। तथा—कुङ्कुमस्य पङ्कैः कृत्वा केनाप्यपूरीव पूरितेव। एवंविधा रक्ता दृश्यते, यतस्त्वं रमणीयामेतां विलोकयेत्यर्थः ॥

उच्चैस्तरादम्बरशैलमौलेश्च्युतो रविर्गैरिकगण्डशैलः।
तस्यैव पातेन विचूर्णितस्य संध्यारजोराजिरिहोज्जिहीते ॥ ४ ॥

उच्चैरिति ॥ हे प्रिये, रविरेव गैरिकाख्यधातुविशेषसंबन्धी गण्डशैलः उच्चतरादत्युन्नतादम्बरशैलस्य गगनगिरेर्मौलेः शिखरात्सकाशाच्च्युतः पतितः स्थूलपाषाण एवाधः पतितः, अथच—संनिहितः, पातेनोच्चतरगिरिशिखरादधःपतनेन हेतुना विचूर्णितस्य विशेषेण सूक्ष्मचूर्णीकृतस्य तस्यैव गैरिकगण्डशैलस्य संबन्धिनी संध्यैव रजोराजिः। संध्यासंबन्धी राग इत्यर्थः। इह सायंकाले पश्चिमदिशि वा उज्जिहीते उपरिष्टात्प्रसरति। अस्तसमये सूर्यस्य रक्तत्वाद्गगनगिरिशिखराच्च्युतत्वाच्च गैरिकगण्डशैलत्वम्। उच्चतरात्प्रदेशात्पतितो गण्डशैलश्चूर्णीभवति चूर्णीभूतस्य च रजोराजिरूर्ध्वं प्रसरति तद्रजोराजिरेव संध्यारागः प्रायेणोर्ध्वं प्रसरतीत्यर्थः ॥

अस्ताद्रिचूडालयपक्कणालिच्छेकस्य किं कुक्कुटपेटकस्य।
यामान्तकूजोल्लसितैः शिखौघैर्दिग्वारुणी द्रागरुणीकृतेयम् ॥ ५ ॥

अस्तेति ॥ हे प्रिये, कुक्कुटानां पेटकस्य समूहस्य यामान्ते प्रहरान्ते या कूजा शब्दितं तद्वशादुल्लसितैः प्रकाशमानैः किंचिदुच्चीभूतैरुत्फुल्लजपाकुसुमतुल्यैः शिखानां शिरसि रक्तचर्ममयकेसराणामोघैर्वृन्दैः किमियं वारुणी दिक् द्राक् अकस्मादरुणीकृता रक्तीकृता। उत्प्रेक्षा। किंभूतस्य—अस्ताद्रेश्चूडा शिखरं सैवालयः स्थानं यस्य स पक्कणः शबरगृहं तस्यालिः समूहस्तत्रच्छेकस्यासक्तस्य शबरैर्गृहेषु संगृहीतस्य। कुक्कुटानां कूजनेनोन्नमितशिखत्वं जातिः। ते च यामान्ते कूजन्ति सायंसमये कूजनादुत्फुल्लशिखावृन्दसंबन्धादरुणीभवनसंभवार्थं यामान्ते-त्याद्युक्तम्। 'पक्कणः शबरालयः', 'गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते' इत्यमरः। 'पेटकं पुस्तकादीनां मञ्जूषायां कदम्बके' इति विश्वः ॥

पश्य द्रुतास्तंगतसूर्यनिर्यत्करावलीहैङ्गुलवेत्रयात्र।
निषिध्यमानाहनि संध्ययापि रात्रिप्रतीहारपदेऽधिकारम् ॥ ६ ॥

पश्येति ॥ संध्यया अत्र सायं समये चन्द्रस्य नायिकाया रात्रेः संबन्धिनः प्रतीहारस्य दौवारिकस्य पदे अधिकारमासदमपि पश्य विलोकय। किंभूतया—द्रुतं शीघ्रमस्तं गतस्य

सूर्यस्य निर्यती बहिर्निर्गच्छन्ती करावली किरणपरम्परैव हैङ्गुलं हिङ्गुलत्वेन रक्तकरस्थद्रव्यविशेषेण रक्तं वेत्रं दण्डविशेषो यस्यास्तथा । किंभूते पदे—निषिध्यमानं निवार्यमाणप्रवेशमहो दिनं यस्मिन् । स्त्रिया हि दौवारिकी स्त्रीव युक्तेति संध्यैव रात्रेर्दौवारिकी जातेत्यर्थः । सूर्योऽस्तमितः, दिनं गतम्, रात्रिरागतेति सायंसंध्यया ज्ञाप्यत इति भावः । दौवारिक्यपि हैङ्गुलवेत्रपाणिः सती प्रविशन्तं कमपि प्रतिषेधयति । 'तिर्यक्करा—' इति (पाठे—)तिर्यञ्चस्तिरःप्रसारिणश्च ते कराश्चेति । अहनीत्यत्र तत्पुरुषत्वाभावाट्टजभावः ॥

इदानीं संध्यानक्षत्रसंयोगं वर्णयति—

> महानटः किं नु सभानुरागे संध्याय संध्यां कुनटीमपीशाम् ।
> तनोति तन्वावियतापि तारश्रेणिस्रजा सांप्रतमङ्ग हारम् ॥ ७ ॥

भावज्ञाम्, अत एव—सभाया अनुरागे ईशां सभ्यानुरागजनने समर्थां संचिन्त्य विस्तु-त्यायातिविशालया शुद्धमौक्तिकपरम्परारूपया मालयोपलक्षितया तन्वाङ्गहारं तनोति तदसां-प्रतं किम्, अपितु—रसभावादि जनयन्त्या तया सभ्यानुरागे समुत्पादितेऽपि नृतकर्मकौ-शलेनापि सभ्यानुरागार्थं स्वयमङ्गहारं तनोतीति युक्तमेवेत्यर्थः ॥ ॥ अथ च—महा-न्नर्तको वयःसंधौ रसादिसंधौ वा वर्तमानां तथा समृद्धिमतीमपि स्त्रियं कुत्सितां नटीं नृत्ता-नभिज्ञां ज्ञात्वा सभानुरागे निमित्ते विशिष्टया तन्वा स्वयमङ्गहारं तनोति तदसांप्रतं किं नु, अपितु तस्या नृत्यकौशलाभावान्नृत्तेन सभानुरञ्जने सामर्थ्याभावात्सभानुरञ्जनार्थं स्वयमेव निपुणं नृत्यतीति युक्तमेवेत्यर्थः ॥ ॥ अथ च—अन्योऽपि महानतिसमृद्धोऽटति सर्वत्र गच्छति तादृशोऽतिचञ्चलोऽतिप्रसिद्धो विटः कुनटीमपि नृत्तविद्यायामचतुरामपि भया कायकान्त्या कृत्वा योऽनुरागस्तद्विषये ईशां सौन्दर्यातिशयेनैव रागमुत्पादयन्तीम्, तथा—शैशवतारु-ण्ययोः संधौ वर्तमानां प्रादुर्भूतयौवनां रसभावसंधिस्थत्वाद्रसभावज्ञां वा संचिन्त्य कायका-न्त्यानुरागे सति कुनटीमपि तरुणीं रसभावज्ञां वा तथेशां संपन्नां च विचिन्त्य तदीयश-रीरस्यातिविस्तृततया शुद्धमौक्तिकमालया हारं विरचयति। तत्रानुरक्तः संस्तस्यै मुक्ताहारं वितरतीत्यर्थः। एवमन्या अपि योजनाः सुधियोहनीयाः। 'सभानुरागैः संधाय' इति पाठो बहुषु पुस्तकेष्वदृष्टत्वादुपेक्ष्यः। अटः, पचाद्यच्। संध्याम्, दिगादित्वाद्यत्। तारशब्दस्य नक्षत्रकनीनिकाभिधायित्वं दशमसर्ग एवोक्तम् ॥

भूपास्थिदाम्नस्त्रुटितस्य नाट्यात्पश्योडुकोटीकपटं वहद्भिः।
दिग्मण्डलं मण्डयतीह खण्डैः सायंनटस्तारकराट्किरीटः ॥ ८ ॥

भूपेति ॥ हे भैमि, तारकराट् चन्द्रः किरीटो यस्य स शंभुः सायं नटतीति सायंनटो नर्तक उद्धतान्नाट्यान्नृत्ताद्धेतोस्त्रुटितस्य भूपास्थ्नां दाम्नो मालाया उच्छलितैः खण्डैः शकलैस्तै-रेव उडुकोटीकपटं कोटिसंख्यनक्षत्रव्याजं वहद्भिर्धारयद्भिः सद्भिरिह सायंसमये दिग्मण्डलं मण्डयति पश्य। एतानि नक्षत्राणि न, किंतु ताण्डवत्रुटितास्थिमालोच्छलच्छकलान्येव दिक्षु शोभन्त इत्यर्थः। अन्योऽपि चन्द्रतुल्यकिरीटो नृत्यंस्त्रुटितहारखण्डैः क्षोणीवृन्दं मण्डयति। 'मण्डयतीव' इति पाठे—उत्प्रेक्षा ॥

कालः किरातः स्फुटपद्मकस्य वधं व्यधाद्यस्य दिनद्विपस्य।
तस्यैव संध्या रुचिरास्रधारा ताराश्च कुम्भस्थलमौक्तिकानि ॥ ९ ॥

काल इति ॥ हे प्रिये, कालः संध्यासमय एव किरातः, अथ च—कृष्णवर्णो हिंसकत्वा-न्मृत्युरूपो वा कालो गिरिमहारण्यसंचारी शबरः स्फुटानि विकसितानि पद्मानि यस्मिन्। यद्वा—विकसितकमलं कं जलं यस्मिन्, अथच—प्रकटीभूतं शुण्डादण्डाग्रे प्रकाशमानं पद्मकं रक्तबिन्दुवृन्दं यस्मिंस्तादृशस्य दिनरूपस्य द्विपस्य वधं व्यधादकरोत्। तस्यैव हतस्य

---

१ 'अथच—महानटोऽपि संध्यां वयःसंधौ वर्तमानां कौ भुवि नटीं क्षितावद्वितीयनाटकर्माणम्। अत एव सभानुरागे ईशां संधाय ज्ञात्वापि वियतातिविशालया तारश्रेणिस्रजोपलक्षितया तन्वा स्वकी-यवपुषा यदङ्गहारं तनोति तत्किं सांप्रतम् 'अपितु नटीनृत्यावसरे तस्य नृत्यं तदभिरसानन्दनेना-नुचितमेवेत्यर्थः' इति सुखावबोधा।

करिणो रुधिराः रम्या संध्यारसधारा रुधिरधारा । ताराश्च नक्षत्राणि विदारिततदीयकुम्भस्थलमौक्तिकानि । संध्यारागो रक्तधारा ताराश्च स्थूलमुक्ता इव शोभन्त इत्यर्थः । स्फुटपद्मकस्येति बहुव्रीहौ कप् ॥

संध्यासरागः ककुभो विभागः शिवाविवाहे विभुनायमेव ।
दिग्वाससा पूर्वमवैमि पुष्पसिन्दूरिकापर्वणि पर्यधायि ॥ १० ॥

संध्येति ॥ विभुना प्रभुणा हरेण पूर्वं शिवायाः पार्वत्या विवाहावसरे संध्यया सरागो रक्तवर्णोऽयमेव ककुभः पश्चिमाशाया विभागः प्रदेशः पुष्पवर्णयुक्ता सिन्दूरिका रक्तवस्त्रं तत्संबन्धिनि तद्योगात् पुष्पसिन्दूरिकाख्ये पर्वण्युत्सवे पर्यधायि परिहितः । यतो दिग्वसनमेव वासो यस्य तेन रक्तवस्त्रपरिधानावसरेऽपि दिग्वाससा औचित्याद्रक्तदिग्भाग एव परिहित इत्यवैमि शङ्के । विवाहस्य चतुर्थे दिने प्रथमदिनपरिहितानि वस्त्राणि प्रक्षालनार्थं परित्यज्य पुष्पसिन्दूरिकाख्यपर्वणि कौसुम्भादिरक्तवस्त्राणि वधूवरेण परिधीयन्त इति वृद्धाचारः । तत्रेशस्य दिग्वसनत्वाद्रक्तपश्चिमभाग एवानेन परिहित इत्यर्थः । वर्णकभूतपुष्पस्थाने ताराः, सिन्दूरिकास्थाने संध्यारागः पश्चिमदिग्भाग इति भावः ॥

प्रातःसायंसंध्ययोः प्राचीप्रतीच्योर्द्वयोरपि तुल्यवर्णत्वात्सायंसंध्यारक्तपश्चिमदिश एव पुष्पसिन्दूरिकात्वं कथं वर्ण्यत इत्याक्षेपे तत्परिहारार्थं प्राच्या अपि तद्भावमाह—

सतीमुमामुद्वहता च पुष्पसिन्दूरिकार्थं वसने सुनेत्रे ।
दिशौ द्विसंध्यीमभि रागशोभे दिग्वाससोमे किमलम्भिषाताम् ॥११॥

सतीमिति ॥ हे सुनेत्रे, सतीं दाक्षायणीमुमां पार्वतीं चोद्वहता परिणयता दिग्वाससा हरेण पूर्वोक्तपुष्पसिन्दूरिकार्थं द्विसंध्यीं अभि द्वे अपि प्रातःसायंसंध्ये लक्षीकृत्य द्वे प्राचीप्रतीच्यौ दिशावेव रागेण रक्तवर्णेन शोभा ययोस्ते, रक्तवर्णेन शोभेते इति वा, तादृशे रक्ते उभे द्वे वसने अलम्भिषातां प्राप्ते किम् । विवाहद्वये संध्याद्वयरक्तदिग्द्वयमेव दिग्वसनत्वाद्रक्तवस्त्रद्वयं शिवेन लब्धमित्यहं मन्य इत्यर्थः । शिवेन द्वे दिशावेव वस्त्रे द्वे संध्ये लक्षीकृत्य रागेण रञ्जकद्रव्येण कृत्वा ये शोभे कर्मभूते ते प्रापिते किम् । विवाहे वस्त्रं रञ्जनाय कस्मैचित्कारे समर्प्यते, तत्साम्याच्छिवेन दिग्वस्त्ररूपे मम द्वे वस्त्रे भवतीभ्यां रक्तशोभे प्रापणीये इति संध्याद्वयनामकं तादृग्द्वयं रक्तशोभं चक्रे इत्यर्थ इति वा । सुनेत्रीति पाठे—'असंयोगोपधात्' इति निषेधान्ङीष् चिन्त्यः । द्विसंध्यीम्, समाहारद्विगोरेकत्वे 'आबन्तो वा' इति स्त्रीत्वे च 'द्विगोः' इति ङीपि संध्याशब्दस्य तद्धितयदन्तत्वात् 'हलस्तद्धितस्य' इति यलोपः । 'अभिरभागे' इत्यभेः कर्मप्रवचनीयत्वात्तद्योगे द्वितीया । गत्यर्थत्वादणौ कर्तुर्णौ कर्मत्वं पक्षे ॥

आदाय दण्डं सकलासु दिक्षु योऽयं परिभ्राम्यति भानुभिक्षुः ।
अब्धौ निमज्जन्निव तापसोऽयं संध्याभ्रकाषायमधत्त सायम् ॥१२॥

आदायेति ॥ योऽयं भानुरेव भिक्षुः परिव्राट् दण्डं पारिपार्श्विकमेव दैण्डिकमादाय सकलासु दिक्षु परिभ्राम्यति, सोऽयं तापसः परिव्राट् सायंकाले अब्धौ निमज्जन् पाताले प्रविशन्, अथ च—बहुजले जलाशये स्नानं कुर्वन् संध्याभ्रमेव गमनं तदेव [illegible]

१ 'यदि 'द्विसंध्याम्' [illegible] 'शब्देकवचनम्' इति सुखावबोधा ।

वक्रमधत्तेव उपरि शाखोर्ध्वभागे, अथ च—उपलाटस्योपरि दण्डस्योपरि वा निजनखकोपरि वा धृतवानिव। एवं गतिरपि बहुकालावस्थानस्य निषिद्धत्वादुत्फलदागः सन् परिभ्रमणे काषायं वस्त्रं धारयति। काषायमिव संध्या शोभत इत्यर्थः। 'माठरः पिङ्गलो दण्डः (चण्डांशोः पारिपार्श्विकाः)' 'भिक्षुः परिव्राट् कर्मन्दी' इत्यमरः। काषायम्, 'तेन रक्तम्—' इत्यण्॥

अस्ताचलेऽस्मिन्निकषोपलाभे संध्याकपोल्लेखपरीक्षितो यः।
विक्रीय तं हैलिहिरण्यपिण्डं तारावराटानियमाददित द्यौः॥ १३॥

अस्तेति ॥ यः सूर्यः अस्मिन्प्रतीच्यां वर्तमाने निकषोपलाभे सुवर्णपरीक्षापाषाणतुल्येऽस्ताचले संध्यारागः एव कपोल्लेखः घर्षणोल्लेखस्तेन परीक्षितः। इयं द्यौस्तं हैलिं सूर्यमेव हिरण्यपिण्डं विक्रीय विनिमयेन कस्मैचिद्दत्त्वा ताररूपान्वराटान् कपर्दकानादित जग्राह। उत्तमं सुवर्णं रक्तपीतं भवति। तथाच रक्तपीतसुवर्णगोलकस्य निकषपरीक्षितसुवर्णरेखेव संध्या दृश्यते, ताराश्च वराटा इव दृश्यन्त इत्यर्थः। द्यौरिति लोकव्यवहारानभिज्ञत्वद्योतनार्थं स्त्रीलिङ्गनिर्देशः। स्त्रीहि सुवर्णं दत्त्वा मूर्खतया वराटकान्गृह्णाति, धूर्तेन वञ्च्यते च। वराटकव्यवहारे देशे सुवर्णमपि दत्त्वा वराटका एव गृह्यन्ते॥

पचेलिमं दाडिममर्कबिम्बमुत्तार्य संध्या त्वगिवोज्झितास्य।
तारामयं बीजभुजादसीयं कालेन निष्ठ्यूतमिवास्थियूथम्॥ १४॥

पचेलिममिति ॥ दाडिमबीजभुजा कालेन रक्तमर्कबिम्बमेव पचेलिमं तरोरुपर्येव स्वयं पक्वं दाडिमं फलमुत्तार्य गगनतरोस्त्रोटयित्वा बीजग्रहणार्थं भित्त्वा वा संध्यारक्तत्वगिव अस्य दाडिमस्य पक्वत्वाद्रक्तकृत्तिरिवोज्झिता परित्यक्ता। तद्बीजभक्षणार्थमुपरितनबीजकोशवत्संध्यापृथक्कृता। तथा—बीजभक्षणानन्तरं तारामयं तारारूपमदसीयममुष्य दाडिमस्य अमीषां बीजानां वा, संबन्धि अस्थ्नां बीजमध्यस्थश्वेतकणानां यूथं वृन्दं निष्ठ्यूतमिवोद्गीर्णमिव बीजानि भक्षयित्वा गृहीतरसं तदन्तर्गतश्वेतकणवृन्दं पुनस्त्यक्तमिव। नहि कालादन्यः सूर्यदाडिमं भक्षितुं समर्थः। अन्योऽपि दाडिममुत्तार्य तत्त्वचं परित्यज्य बीजान्यास्वाद्य गृहीतरसान्बीजकणांस्थूत्कृत्य त्यजति॥

ताराततिर्बीजमिवादमादमियं निरष्ठेवि यदस्थियूथम्।
तन्निष्कुलाकृत्य रविं त्वगेषा संध्योज्झिता पाकिमदाडिमं वा॥ १५॥

तारेति ॥ सामर्थ्यात्कालेन कर्त्रा रविमेव तत् पक्विमं दाडिमं निष्कुलाकृत्य निर्गतबीजकुलं कृत्वा बीजरूपं सारं गृहीत्वा तदीया त्वगेवैषा संध्या उज्झिता। वाशब्दः संभावनायाम्। उज्झिता किमित्याशङ्क्याह—बीजानि आदमादं भक्षयित्वा भक्षयित्वा यस्य सूर्यरूपस्य पक्वदाडिमस्य संबन्धि अस्थियूथमिवेयं ताराततिर्निरष्ठेवि निष्ठ्यूता। जग्ध्वा जग्ध्वेत्यादमादम्, अदेराभीक्ष्ण्ये णमुल् द्विर्वचनं च। निरष्ठेवि, कर्मणि चिण्। निष्कुलाकृत्य, 'निष्कुलान्निष्कोषणे' इति डाच्। क्षेपकोऽयं श्लोकः॥

---

१ 'तन्' इति सुखावबोधासंमतः पाठः। २ पूर्वेण 'गतार्थत्वादित्यधिक' इति सुखावबोधायाम्।

संध्यावशेषे धृतताण्डवस्य चण्डीपतेः पत्पतनाभिघातात्।
कैलासशैलस्फटिकाश्मखण्डैरमण्डि पश्योत्पतयालुभिर्द्यौः ॥१६॥

संध्येति ॥ हे प्रिये, संध्यावशेषे संध्यावन्दनान्ते धृतं ताण्डवनृत्यं येन तस्य चण्डीपतेः पदोश्चरणयोर्द्वंद्वं पतनं तेनाभिघाताद्धेतोरुत्पतयालुभिरुत्पतनशीलैरुच्छलितैः कैलासशैलसंबन्धिस्फटिकाश्मनां खण्डैः सकलैर्द्यौरमण्डि अलंकृता पश्य। कैलासस्फटिकखण्डा एव गगने तारारूपेण शोभन्ते। उत्पतयालुभिः 'स्पृहिगृहि-' इत्यालुच् ॥

इत्थं ह्रिया वर्णनजन्मनेव संध्यामपक्रान्तवतीं प्रतीत्य।
तारातमोदन्तुरमन्तरिक्षं[१] निरीक्षमाणः स पुनर्बभाषे ॥ १७ ॥

इत्थमिति ॥ स नलः पुनर्भैमीं बभाषे। किंभूतः—इत्यनुक्तप्रकारेण वर्णनजन्मना स्तुतिजातया ह्रियेवापक्रान्तवतीं निर्गतां संध्यां प्रतीत्य निखिलान्तरिक्षं गगनं तारातमोभ्यां दन्तुरितं मिश्रितं निरीक्षमाणः। अन्योऽप्युत्तमो निजवर्णनजातलज्जयापक्रामति ॥

रामेषुमर्मव्रणनार्तिवेगाद्रत्नाकरः प्रागयमुत्पपात।
ग्राहौघकिर्मीरितमीनकम्बु नभो न भोः कामशरासनभ्रु ॥ १८ ॥

रामेति ॥ हे कामशरासनमेव भ्रुवौ यस्याः, भ्रूदर्शनमात्रेण कामोदयकारिणि भैमि, रामस्य जामदग्न्यस्य वा इषुणा मर्मणो व्रणनाद्भेदनाद्धेतोर्या आर्तिः पीडा तस्या वेगादाधिक्याद्धेतोर्निजस्थाने स्थातुमशक्तः सन् नीलो रत्नाकर एवायं प्राक् तस्मिन्नवसरे उत्पपातोर्ध्वमगात्। नेदं नभः। यः पूर्वमुत्पतितः स श्यामजलः स्फुटरत्नगर्भो रत्नाकर एवायं न त्वेतन्नभ इत्यर्थः। कीदृशः—ग्राहाणां जलचारिणां जन्तूनां ओघत्वेन किर्मीरिता मिश्रिता मीनाः कम्बवः शङ्खाश्च यस्मिन्। नभस्तु ग्रहसंबन्धी ओघः शुक्रबृहस्पत्यादिवारग्रहसमूहः ध्रुवमण्डलग्रहसंबन्धी समूहो वा तेन मिश्रितो मीनाख्यो राशिः कम्बुः शङ्खाकारविशाखानक्षत्रं च यस्मिन्। रघुनाथेन किल सेतुबन्धसमये शरेण समुद्रो भेत्तुमारब्ध इति तावन्मात्रेण पीडातिशयादुत्पतित इत्युच्यते। परशुरामेणापि निजवसत्यर्थं समुद्रो बाणेन परास्तः सङ्कुचितः। समुद्रजलस्यैवायं कालिमा, न तु गगनस्य। उत्पतितस्य समुद्रस्याधोदेशे स्थितानि रत्नग्राहादीनि अधःस्थितेन जनेन सुखेन द्रष्टुं शक्यन्ते। नक्रकर्कटादयः ग्राहा मीनादय एव नतु राश्यादिभूताः, स्थिताश्च ताराः सामुद्रिकमौक्तिकान्येव, नतु तारा इत्यादि ज्ञातव्यम्। शरासनभ्रूरिति उपदस्थानत्वाद्वैतानावाङ्कुरत्वाभावः। हलायुधस्तु 'वहैरवंशप्रभवञ्च' इतिवत्समर्थनीयः। यद्वा लिङ्गविप्रयोगदर्शनाज्ज्ञातव्यः ॥

मोहाय देवाप्सरसां विमुक्तास्ताराः शराः पुष्पशरेण शङ्के।
पञ्चास्यवत्पञ्चशरस्य नाम्नि प्रपञ्चवाची खलु पञ्चशब्दः ॥ १९ ॥

मोहायेति ॥ हे भैमि, पुष्पशरेण कामेन देवानामप्सरसां च मोहायान्योन्यमनुरागसंजननार्थं देवदर्शनादुपरि वर्तमानत्वाद्विमुक्ता ऊर्ध्वं क्षिप्ताः कुसुमरूपाः शरा एव तारा इत्यहं शङ्के। ननु कामस्य पुष्पशरत्वेऽपि पञ्चसंख्यात्वात्ताराणां बहुत्वात्कथं कामबाणत्वमित्याशङ्क्य समर्थयते—खलु यस्मात् पञ्चशरस्य नाम्नि पूर्वपदत्वेन वर्तमानः पञ्चशब्दः

१ 'अन्तरिक्षमिति पाठः 'अन्तरिक्षमन्तरीक्षं च खमित्यनुलिङ्गकम्' इति सरस्वतीकोशानुगुण्याद् दुष्टिः स्व' इति सुखावबोधा।

प्रपञ्चवाची शब्दः पञ्चो विस्तारस्तद्वाचकः, न तु संख्यावाचकः 'पचि विस्तारवचने' इति स्वार्थणिजन्ताद्धातोः पञ्चयन्ति पञ्चयन्तो विस्तृता भवन्ति पञ्चाः शरा यस्येति विग्रहः, न तु पञ्चसंख्याकाः शरा यस्येति । तस्मात्पुष्पबाणत्वं ताराणां युक्तमेवेत्यर्थः । यथैव—पञ्चास्यवत् 'सिंहो मृगेन्द्रः पञ्चास्यः' इति सिंहाभिधायिनि पञ्चास्यशब्दे सिंहस्य पञ्चसंख्यमुखत्वाभावात् पञ्चयति विस्तृतं भवति पञ्चं विस्तृतमास्यं यस्यासौ पञ्चास्य इति व्युत्पत्त्या पञ्चशब्दो यथा विस्तारवाची तथेति । 'व्यासः प्रपञ्चो विस्तारः' इति हलायुधः ॥

नभोनदीकूलकुलायचक्रीकुलस्य नक्तं विरहाकुलस्य ।
दृशोरपां सन्ति पृषन्ति ताराः पतन्ति तत्संक्रमणानि धाराः ॥ २० ॥

नभ इति ॥ नक्तं विरहेणाकुलस्य पीडितस्य नभोनद्या मन्दाकिन्याः कूलमेव कुलायः स्थानं यस्य तस्य चक्रीकुलस्य चक्रवाकीसमूहस्य दृशोर्नेत्रयोरपामश्रुजलानां पृषन्ति ये विन्दवः सन्ति त एव तारका अधःस्थितैर्जनैर्दृश्यन्ते । तथा—तासां ताराणां संक्रमणानि पुण्यक्षयवशाद्भूमिं प्रत्यागमनानि गलद्बाष्पजलानां धारा एव पतन्ति । दृशोः सन्ति विरस्थितिमन्ति यानि बाष्पपृषन्ति तानि तारा इति वा । तत्संक्रमणानि स्थितताराप्रतिबिम्बभूतानि तत्तुल्यानि पतन्ति अधःपातीनि यानि पृषन्ति तानि धारा अश्रुप्रवाहाः । तासां ताराणां संक्रमणानि वीथयो मेषादिसंक्रान्तयो वा धारा अश्रूणां प्रवाहा इति वा । स्त्रियो हि विरहमसहमाना रुदन्ति । सन्ति, पतन्तीति च तिङन्तम्, पृषद्विशेषणं वा ॥

अमूनि मन्येऽमरनिर्झरिण्या यादांसि गोधा मकरः कुलीरः ।
तत्पूरखेलत्सुरभीतिदूरो मग्नान्यधः स्पष्टमितः प्रतीमः ॥ २१ ॥

अमूनीति ॥ हे प्रिये, गोधाख्यास्तारा गोधा, मकरराशिसंबन्धिन्यस्तारा मकरः, कुलीरः कर्कराशिस्तत्संबन्धिन्यस्ताराः कुलीरः, अमूनि प्रत्यक्षदृश्यान्यमरनिर्झरिण्या मन्दाकिन्या यादांसि जलजन्तव एव इत्यहं मन्ये । गोधा मत्स्याः कर्कटका अपि जले वर्तन्ते उपरि च दृश्यन्ते । तस्माद्देवनद्या यादांस्येवैतानीत्यर्थः । तर्ह्युपरि वर्तमानेन द्रष्टुं योग्याः, नत्वधःस्थितेनेत्यत आह—तस्या नाकनद्याः पूरे खेलन्तः क्रीडन्तः सुरास्तेभ्यः सकाशान्द्रीत्या दूरं तलपर्यन्तं मग्नानि अतएव जलतलगामित्वादधोभागे इतो भूदेशादपि स्पष्टं सुखेन जानीमः । भूभागे स्थिता अपि जलतलगामित्वाद्गोधादियादांसि व्यक्तं पश्याम इत्यर्थः । गोधाकारं ध्रुवमण्डलं, गोधा ज्येष्ठा वा ॥

स्मरस्य कम्बुः किमयं चकास्ति दिवि त्रिलोकीजयवादनीयः ।
कस्यापरस्योडुमयैः प्रसूनैर्वादित्रशक्तिर्घटते भटस्य ॥ २२ ॥

स्मरस्येति ॥ त्रिलोकीजये वादनीयो वादनार्हः स्मरस्य संबन्धी अयं प्रत्यक्षदृश्यो विशाखानक्षत्ररूपः कम्बुः शङ्खः दिवि चकास्ति किम् । उच्चतरप्रदेशे वादितं वाद्यं सर्वत्राकर्ण्यत इति गगने स्थापितो लोकत्रयविजयवादनार्हः कामस्यैव कम्बुः किमित्यर्थः । यस्मादपरस्य कस्य भटस्योडुमयैस्तारारूपैः प्रसूनैः कृत्वा वादित्रशक्तिर्वाद्यनिर्माणं घटतेऽपि । स्मरस्यैव धनुर्बाणानां पुष्परूपत्वदर्शनात्तदीयस्यैव वाद्यस्य पुष्परूपत्वसंभावनाया युक्तत्वात् ताराकुसुमरूपः कामशङ्ख एवायं गगने शोभते, न त्वन्यदीय इत्यर्थः ॥

१ 'वादित्रसृष्टिः' इति सुखावबोधासंमतः पाठः ।

लोकेति ॥ हे भैमि, ब्रह्माण्डनामा सर्वस्मादपि पूर्वं तद्विनिर्माणं यस्य, अथच—चिरविनिर्मितं पुराणम् मण्डपमिति आभाति तदिव शोभत इत्यर्थः। यतो—लोकानां त्रयाणामपि आश्रयः ब्रह्माण्डाधारत्वाज्जगताम्। मण्डपोऽपि लोकानामाश्रयः, तच्छायानिवासित्वलोकानाम्। आश्रयनामत्वाच्च। अत एव—अस्य ब्रह्माण्डमण्डपस्य अनुकाष्ठं दिशि दिशि एतत्संबन्धिनीषु सर्वासु दिक्षु, अथच—एतत्संबन्धीनि काष्ठानि दारूणि लक्षीकृत्य तेषु भानि नक्षत्राणि स्वकान्तिरूपस्तोकस्तोकरेणूत्करस्य संबन्धिनो यान्तितद्वारत्वद्दन्ति घुणाक्षरैर्दलितेन्मितो व्रणविच्छिदं तस्य द्वारं नूनं तन्निभानि तत्तुल्यानि घुणोत्कीर्णदारुरजोयुक्तानि दारुच्छिद्रमुखानीव दृश्यन्त इत्यर्थः। जनाश्रयनाना मण्डपोऽप्यतिजीर्णो यदा भवति तदा तदीयकाष्ठेषु घुणाः पतन्ति घुणोत्कीर्णगलद्रजोयुक्तानि घुणकृतच्छिद्रमुखानि श्वेतानि श्वेतानि च दृश्यन्ते, तानीव भानि भान्तीति भावः। 'मण्डपोऽस्त्री जनाश्रयः' इत्यमरः। अनुकाष्ठम्, वीप्सायामव्ययीभावः, पक्षान्तरे विभक्त्यर्थे ॥

इदानीं सर्वदिग्व्यापितमोवर्णनं प्राच्यादिक्रमेणोपक्रमते—

शचीसपत्न्यां दिशि पश्य भैमी शक्रेभदानद्रवनिर्झरस्य।
पोप्लूयते वासरसेतुनाशादुच्छृङ्खलः पूर इवान्धकारः ॥ २७ ॥

शचीति ॥ हे भैमि, अन्धकारः शच्याः सपत्नी दिक् प्राची तस्यां वासररूपस्य सेतोः सूर्यप्रभामर्यादाया नाशात् उच्छृङ्खलो निरर्गलः शक्रेभस्य दानद्रवो दानोदकं तस्य निर्झरः प्रवाहस्तस्य श्यामः पूर इव पोप्लूयते भृशं प्रसरति। प्राच्यां व्याप्नोतीत्यर्थः। त्वं पश्य। प्राच्यामेव चैरावतदानजलप्रवाहपूरसंभवः। जलपूरोऽपि बन्धापगमनादप्रतिहतप्रसरः सन्नतितरां प्रसरति, 'प्लुङ् सर्पणे' इत्यस्माद्भृशार्थे यङ् द्विर्वचनम् ॥

दक्षिणदिग्व्यापि तमो वर्णयति—

रामालिरोमावलिदिग्विगाहि ध्वान्तायते वाहनमन्तकस्य।
यद्वीक्ष्य दूरादिव बिभ्यतः स्वानश्वान्गृहीत्वापसृतो विवस्वान् ॥ २८ ॥

रामेति ॥ श्रीरामस्यालिः सेतुः सेतुबन्ध एव श्यामत्वाद्रोमावलिर्यस्यास्तस्या दक्षिणस्या दिशो विगाहि नितरां व्यापकम् अन्तकस्य दिक्पतित्वाद्दक्षिणदिक्स्थं तद्वाहनं महिष एव ध्वान्तायते कज्जलनीलोऽन्धकार इवाचरति। विवस्वान् सूर्यः यममवाहनं दूराद्वीक्ष्य सहजाश्वमहिषवैरस्मरणाद्बिभ्यतः सभयान् स्वानश्वान् गृहीत्वापसृतः पलायित इव दक्षिणदिशि तिमिरं यममहिषवच्छोभते इत्यर्थः। अन्तकपदेन तद्वाहनस्य दारुणत्वं सूचितम्, अत एव ततोऽप्यश्वानां भयं युक्तम्। ध्वान्तायते, 'उपमानादाचारे' 'कर्तुः क्यङ्—' इति क्यङन्तात्तङ्। 'सेतुरालौ स्त्रियां पुमान्' इत्यमरः ॥

प्रतीचीव्यापितमो वर्णयति—

पक्वं महाकालफलं किलासीत्प्रत्यग्गिरेः सानुनि भानुबिम्बम्।
भिन्नस्य तस्यैव दृषन्निपाताद्बीजानि जानासितमां तमांसि ॥ २९ ॥

पक्वमिति ॥ भानुबिम्बं प्रत्यग्गिरेः प्रतीच्यां वर्तमानस्यास्ताचलस्य सानुनि अत्यन्तरापक्वं महाकालस्यैन्द्रवारुण्याः फलमासीत् किलाहं मन्ये इत्यर्थः। तथा—अहमतिपक्वत्वाद्-

सङ्कुमावस्थालत् किम् । अतिभारेण पतितं किम्, गुरुत्वाद्धि पतनं युक्तम् तत्कज्जलमेव भूमौ पतितं किम्, अपितु तमो नाम न किंचिदित्यर्थ इति वा । कज्जलमपि कर्परे धृतं क्रमेण बहु भवद्गुरुत्वादधः पतति । 'कटाहः कर्परे तथा' इति निघण्टुः । ईषदसमाप्तौ कल्पप् ॥

ध्वान्तैणनाभ्या शितिनाम्बरेण दिशः शरैः सूनशरस्य तारैः ।
मन्दाक्षलक्ष्या निशि मामनिन्दौ सेर्ष्या भवायान्त्यभिसारिकाभाः ३३

ध्वान्तेति ॥ ध्वान्तेनैवैणनाभ्या कस्तूर्या । तथा शितिना नीलेनाम्बरेण गगनेन, अथ च—वस्त्रेण, यद्वा—ध्वान्तैणनाभ्या कृत्वा नीलेन गगनेनोपलक्षिताः । तथा—निशिदलत्पुष्पतुल्यरूपत्वाद्योज्ज्वलैः तारैर्नक्षत्रैरेव सूनशरस्य कामस्य शरैरुपलक्षिताः, अथ च—तारैरुज्ज्वलैः पुष्पैरुपलक्षिताः । तथा प्रकाशाभावान्मन्दाक्षैर्मन्दनयनैर्नरैर्लक्ष्या लक्षणीयाः, अथ च—मन्दाक्षस्य लज्जाया विषयभूताः सलज्जाः । अत एवाभिसारिकाभाः स्वैरिणीतुल्या दिशोऽनिन्दौ चन्द्ररहितायामनुदितचन्द्रत्वाच्छयानायां निशि मामायान्ति प्रत्यागच्छन्ति । तत्तात्सपत्नीभ्रान्त्या त्वं सेर्ष्या भव । अभिसारिका अपि शुभ्रायां रात्रौ शुभ्रवस्त्राद्याभरणाः, कृष्णायां च रात्रौ कृष्णवस्त्राद्याभरणाः समायान्ति, ता अपि कस्तूरीकृताङ्गरागा नीलवसनाः प्रच्छन्नधृतपुष्पाः कामबाणपीडिताः सलज्जाः सत्यः कामुकं प्रति समायान्ति, तद्दर्शनाच्चिक्ष च सेर्ष्या भवति तथा दिशोऽपीत्यर्थः । सर्वा अपि दिश एकत्र मिलिता इति प्रतीतिः । तिर्यग्व्यापि तमो वर्णितमनेन । 'कान्तार्थिनी तु या याति संकेतं साभिसारिका' इति । 'मन्दाक्षमन्दाः' इति पाठे मन्दनयनानामल्पदृश्यात्तमोबाहुल्यात् । अथ च—तमोबाहुल्यान्मन्दाक्ष्यः, अतएव मन्दगमना इत्यर्थः । तारशब्दः पूर्ववत् । मन्दाक्षेति पुंवद्भावः ॥

भास्वन्मयीं मीलयतो दृशं द्राङ्मिथोमिलद्भ्र्यञ्चलमादिपुंसः ।
आचक्ष्महे तन्वि तमांसि पक्ष्म श्यामत्वलक्ष्मीविजितेन्दुलक्ष्म ॥ ३४ ॥

भास्वदिति ॥ हे तन्वि कृशाङ्गि, भास्वन्मयीं रविरूपां दक्षिणां दृशमस्तनयव्याजेन द्राक् शीघ्रं मीलयतः संकोचयतः आदिपुंसः श्रीविष्णोर्मिथोऽन्योन्यं मिलन्तौ द्राक्प्यञ्चलावूर्ध्वाधःपुटे यस्य निमीलनवशादन्योन्यसंलग्नपुटत्वान्निविडरोमकम्, अत एव श्यामत्वलक्ष्म्या विजितं नितरां पराभूतमिन्दुलक्ष्म येन तादृशं पक्ष्म नेत्रसंबन्ध्यूर्ध्वाधःपुटपत्रीभूतरोमाण्येव तमांसि वयमाचक्ष्महे ब्रूमः, नतु ततोऽन्यानि तमांसीत्यर्थः । तिमिरव्याप्तत्वात्किमपि न दृश्यत इति भावः । पक्ष्मेति जात्येकवचनम् ॥

विवस्वतानायिषतेव मिश्राः स्वगोसहस्रेण समं जनानाम् ।
गावोऽपि नेत्रापरनामधेयास्तेनेदमान्ध्यं खलु नान्धकारैः ॥ ३५ ॥

विवस्वतेति ॥ विवस्वता नेत्रमित्यपरं नामधेयं यासां ताश्चक्षूरूपा जनानां गावोऽपि स्वस्य गवां किरणानां सहस्रेण समं सह मिश्रा दिने मिलिताः सत्योऽनायिषतेव नीता इव । यस्मात्तेन खलु तेनैवेदमान्ध्यं प्रकाशाभावान्नेत्रापगमाच्च रूपाग्रहणं, नत्वन्धकारैः कृत्वेदमान्ध्यम् । तमोवशात्किमपि न दृश्यत इति भावः । अन्येनापि गोपालेन स्वगोसहस्रेण मिश्रिताः परेषामपि गावो नीयन्त इति ॥

ध्वान्तस्य वामोरु विचारणायां वैशेषिकं चारु मतं मतं मे ।
औलूकमाहुः खलु दर्शनं तत्क्षमं तमस्तत्त्वनिरूपणाय ॥ ३६ ॥

मूर्धेति ॥ यो रविः नवानां ग्रहाणां मध्ये खलु निश्चितं मूर्धाभिषिक्तो राजा। स्वकानां लोकः सकुलस्य खेर्भंगा दीप्त्या समास्कन्दिता नितरां पराभूता नक्षत्रशोभा नक्षत्रकान्तिर्यस्मिंस्तत्। तथा—स्फुटमुपलब्धानि अन्येन जनेन दृष्टानि घटादिरूपाणि यस्मिंस्तादृशमपि दिवा कर्मीभूतं दिनमन्धकारमेवालोकत। दिने तस्य दर्शनाशक्तेर्दिनमन्धकाररूपत्वेनैव मेने इत्यर्थः। तथा—व्यक्तं लब्धानि घटादिरूपाणि यत्र तादृशमन्धकारमेवालोकनपदार्थदर्शनसहकारिप्रकाशरूपत्वेनैव मेने। अर्थाद्रात्राविल्यर्थः। अन्धकारं स्फुटलब्धरूपमित्यावृत्त्या योज्यम्। तेन तमसा विपरीतदृश एव भवन्तीति व्यज्यते। एवंविधमन्धकारं च स्फुटमतिप्रसिद्धं शुक्रभास्वरात्मकं लब्धं रूपं येन तादृशमालोकमेवापश्यत्। कृष्णरूपमपि तमः शुक्लभास्वरालोकत्वेनापश्यदिति विरुद्धमित्यर्थः। अथ च—यो ग्रहराजः सूर्यः, आक्रान्तनक्षत्रलक्ष्मीकां तद्भासं सूर्यदीप्तिमेवायमुलूकलोको दिवा दिनेऽन्धकारमपश्यत्। रात्रौ चान्धकारमालोकमपश्यत्। दिने सूर्यालोक एव तमः, रात्रौ च तम एव सूर्यालोक इति ददर्शेत्यर्थः। कीदृशीं तद्भासम्—कीदृशमन्धकारम्—स्फुटमुपलब्धानि घटादिरूपाणि यस्यामन्यजनेन तादृशीम्, स्फुटं संजातस्वरूपलाभं चेत्यन्धकारस्य नपुंसकत्वान्नपुंसकैकशेषैकवद्भावेन वा व्याख्येयम्। सूर्यदीप्त्याऽसमास्कन्दिताऽपराभूता नक्षत्रलक्ष्मीर्यत्र तमन्धकारविशेषणं वा। रात्रौ सूर्यदीप्तेरभावादतिरस्कृतनक्षत्रशोभमित्यर्थः। सूर्यदीप्तेरेव समास्कन्दनसामर्थ्यात्तमसैव रात्रौ यत्तिरस्करणं तेन नक्षत्रशोभा यस्मिन्निति वा इत्यादिव्याख्यानानि ज्ञातव्यानि। 'लक्ष्मीम्' इति पाठे—नदीत्वेऽपि समासान्तविधेरनित्यत्वात्कबभावः। 'मूर्धाभिषिक्तो राजन्यः', 'अन्धकारोऽस्त्रियाम्' इत्यमरः॥

दिने मम द्वेषिणि कीदृगेषां प्रचार इत्याकलनाय चारीः।
छाया विधाय प्रतिवस्तुलग्नाः प्रावेशयत्प्रष्टुमिवान्धकारः॥ ३९॥

दिन इति ॥ अन्धकार इत्याकलनाय सामस्त्येन ज्ञानार्थं प्रतिवस्तुलग्नाः पदार्थमात्रसंबद्धाः प्रतिच्छाया एव चारीर्गूढार्थवेदिकाश्चारनारीः विधाय चारपदं ताभ्यो दत्वा दिनं प्रति संप्रेष्य समागतास्तास्तत्रत्यवृत्तान्तं प्रष्टुमिव पुनः प्रावेशयत्। निजनैकट्यमित्यर्थात्। इति किम्—ममान्धकारस्य द्वेषिणि मामसहमाने दिने विषये एषां वस्तूनां कीदृक् प्रचारो विहरणम् स्नेहादिव्यवहारश्चेति। दिवा प्रतिपदार्थसंबद्धाश्छाया एव रात्रौ समागत्य मिलिता निजस्वामिनमन्धकारं प्राविशन्। रात्रौ हि प्रकाशाभावे छाया अन्धकारेण सहैकीभवतीति तत्संबन्धादेव महानन्धकारः प्रतीयत इति भावः। एतेन प्रतिच्छायापि तम एवेति वर्णितम्। अन्योऽपि रात्रौ लोकस्थितिं ज्ञातुकामः स्त्रीणां सर्वत्र प्रवेष्टुं शक्यत्वाच्चारनारीः संप्रेष्य तत्रत्यं वृत्तान्तं विचार्य समागतास्ताः प्रष्टुमात्मसविधं प्रवेशयति। छाया एव चारीः प्रतिवस्तुलग्ना विधायेति वा। चारपदं दत्त्वा यद्दिनं प्रत्येव प्रेषयामास। अत एव ता दिने प्रतिवस्तुलग्ना दृश्यन्त इति वा। चारीः, पुंयोगान्ङीप्॥

इदानीं चन्द्रोदयं वर्णयितुमुपक्रमते—

ध्वान्तस्य तेन क्रियमाणयेत्थं द्विषः शशी वर्णनयाऽथ रुष्टः।
उद्यन्नुपाश्लोकि जपारुणश्रीर्नराधिपेनानुनयेच्छयेव॥ ४०॥

---

१ 'वर्णनयेव' इत्यपि पाठः—इति सुखावबोधा।

तदा जनस्त्वद्दृशं चन्द्रावलोकनविकसितमिन्दीवरमेवैतदिति ज्ञास्यतीति सूचितम् । दिवा संकोच्यादसादृश्यमितीन्दीवरस्य विकसितत्वद्योतनार्थं निशापदम् । चकोरैः, 'गतिबुद्धि-' इति कर्मत्वप्राप्तावपि 'आदिखाद्योर्न' इति प्रतिषेधात्कर्तरि तृतीया । आदयमानं, निगरणार्थत्वात्परस्मैपदप्राप्तावपि 'अदेः प्रतिषेधो वक्तव्यः' इती निषेधात् 'णिचश्च' इति तङ् ॥

असंशयं सागरभागुदस्थात्पृथ्वीधरादेव मथः पुरायम् ।
अमुष्य यस्मादधुनापि सिन्धौ स्थितस्य शैलादुदयं प्रतीमः ॥ ४४ ॥

असंशयमिति ॥ पुरा पूर्वं सागरभाक् समुद्रगर्भस्थोऽयं चन्द्रः मथो दण्डभूतात्पृथ्वीधरात्पर्वतान्मन्दराद्रेरेव हेतोरुदस्थादुत्पन्न इति असंशयं निश्चितम् । पुराणादौ यदेवं श्रूयते तत्सत्यमित्यर्थः । पुरा उदस्थात्प्रथमसंभवावसरे तस्मादेव समुत्थित इति वा । तत्र हेतुमाह—यस्माद्धेतोरधुनापि संभवान्तरावसरेऽपि सिन्धौ स्थितस्य सागरगर्भस्थस्याप्यमुष्य चन्द्रस्य शैलादुदयाचलादेवोदयमुत्पत्तिं प्रतीमो जानीमः । प्रत्यहं सागरस्थस्याप्यस्याचलोत्पत्तिशीलत्वरूपलिङ्गदर्शनात्समुद्रमथने प्रथमसंभवावसरेऽप्ययमचलादेवोत्पन्न इति निश्चिनुम इत्यर्थः । उदयाचलशिखरं चन्द्रोऽतिक्रामतीति भावः ॥

निजानुजेनातिथितामुपेतः प्राचीपतेर्वाहनवारणेन ।
सिन्दूरसान्द्रे किमकारि मूर्ध्नि तेनारुणश्रीरयमुज्जिहीते ॥ ४५ ॥

निजेति ॥ निजानुजेन एकस्मात्सिन्धोरुत्पन्नतयास्माच्चन्द्रात्पश्चाज्जातेन कनीयसा भ्रात्रा प्राचीपतेरिन्द्रस्य वाहनवारणेन प्राच्यां स्थितेनैरावतेनातिथितामुपेतः प्राप्तः । प्राच्यामुदितत्वात्तत्सविधं प्राप्तः सन्नयं चन्द्रोऽग्रजत्वात्सिन्दूरेण सान्द्रे मूर्ध्नि अकारि कृतः किम् । गौरवान्नमस्कारपूर्वं शिरस्यारोपितः किमित्यर्थः । तेन सान्द्रसिन्दूरशिरःस्थापनेन हेतुना लग्नसिन्दूरवशादयमरुणश्रीरारक्तशोभः उज्जिहीते उदेति । उज्जिहीते किमिति वा । उदितश्चन्द्रः सिन्दूररक्तो दृश्यत इत्यर्थः ॥

यत्प्रीतिमद्भिर्वदनैः स्वसाम्यादचुम्बि नाकाधिपनायिकानाम् ।
ततस्तदीयाधरयावयोगादुदेति बिम्बारुणबिम्ब एषः ॥ ४६ ॥

यदिति ॥ वृत्तत्वादिगुणयोगेन स्वसाम्यात्प्रीतिमद्भिर्नाकाधिपस्येन्द्रस्य नायिकानां वदनैर्यस्मात्स्वसविधमागत एष चन्द्रोऽचुम्बि चुम्बितः, तस्माद्धेतोस्तस्माच्चुम्बनाद्वा तदीयानां देवेन्द्रनायिकानामधरेषु न्यस्तो यावोऽलक्तकस्तस्य योगात्संबन्धाद्धेतोर्बिम्बवत्पक्वबिम्बीफलवदरुणं बिम्बं मण्डलं यस्य तादृश उदेति । अन्योऽपि समानः सखा सविधमागतः सन् सख्या प्रीत्या चुम्ब्यते, मुखैरिति बहुवचनेन तत्र प्रदेशे युगपदेव चुम्बनाद्बहुलयावकयोगात्सकलस्यापि चन्द्रबिम्बस्य रक्तत्वं युक्तमिति सूचितम् ॥

विलोमिताङ्कोत्किरणाद्दुरूहदृगादिना दृश्यविलोचनादि ।
विधिर्विधत्ते विधुना वधूनां किमाननं काञ्चनसञ्चकेन ॥ ४७ ॥

विलोमितेति ॥ विधिर्ब्रह्मा विधुना चन्द्रेणैव काञ्चनस्य सञ्चकेन बिम्बकेन कृत्वा वधूनामतिरमणीयमाननं विधत्ते किम् । यतः—किंभूतेन । विलोमितः पराङ्मुखः कृतः स्वप्रभया जितः अङ्कः कलङ्को येन तादृशादुत्कृष्टादतितेजस्विनः किरणाद्धेतोर्दुरूहो दुस्तर्क्यो दृगा-

न्सन्न त्रपते न लज्जते बत चित्रम्। किंभूतः—न विद्यते कर्णनासं स्वभावादेव यस्य सः तथा रक्ता आरक्ता उस्राः किरणास्तद्वर्षणशीलः, शोणश्चासौ किरणवर्षी च तादृशो वा तथा—लक्ष्मणा कलङ्केनाभिभूत आक्रान्तमध्यः, अतएव शूर्पणखाया रावणभगिन्या मुख दाभा यस्य स तद्वदनतुल्यः। एषु लज्जाकारणेषु सत्स्वपि न लज्जते तच्चित्रमित्यर्थः त्वन्मुखं पश्यन्नप्युदयत्येव, स्वं प्रकाशयति च, तस्मादेव न लज्जते इति ज्ञायते। अन्य स्त्वकर्णनासो लज्जते, अयं तु तादृशोऽपि न लज्जत इत्यपि चित्रमेव। शूर्पणखामुखम् लक्ष्मणेन पराभूतं छिन्नकर्णनासत्वाद्रुधिरवर्षि सद्रामममभिलक्षीकृत्य वर्तमानम्, अत एवा भयरहितं च, सीतामुखं पश्यदपि न लज्जते, तदनन्तरमपि प्रौढिवादप्रकटनात् अभिश्च स्यावृत्तिः कार्या। लक्ष्मशब्दो नान्तः, पक्षे लक्ष्मणोऽकारान्तः॥

आदत्त दीप्रं मणिमम्बरस्य दत्त्वा यदस्मै खलु सायधूर्तः।
रज्यत्तुपारद्युतिकूटहेम तत्पाण्डु जातं रजतं क्षणेन॥ ५२॥

आदत्तेति॥ हे भैमि, सायंकालरूपो धूर्तो यद् रज्यन्नुदयकाले रक्तीभवंस्तुषारद्युति श्चन्द्र एव लेपवशाद्रज्यत् कूटहेम कृत्रिमं सुवर्णमस्मै गगनाय मूल्यरूपेण दत्त्वा दीप्रं प्रकाश मानमम्बरस्य मणिं सूर्यमादत्त जग्राह। तदलीकं हेम क्षणमात्रेण पाण्डु शुभ्रं रजतं खलु रूप्यमिव जातम्। धूर्तो हि रूप्यं लेपादिभिरुपलिप्तं सुवर्णीकृत्य ददाति, वस्त्रान्तरस्थमपि प्रसरद्दीप्तिकं रत्नं च गृह्णाति उदयानन्तरमतिक्रान्तकियत्कालत्वाद्रक्तिमानं परित्यज्य चन्द्रो रूप्यवद्धवलो जात इति भावः। घञन्तोऽत्र सायशब्दः सायंशब्दसमानार्थः॥

बालेन नक्तंसमयेन मुक्तं रौप्यं लसद्बिम्बमिवेन्दुबिम्बम्।
भ्रमिक्रमादुज्झितपट्टसूत्रनेत्रावृतिं मुञ्चति शोणिमानम्॥ ५३॥

बालेनेति॥ हे प्रिये, रौप्यं राजतं लसद्विलसमानं डिम्बं बालक्रीडासाधनं भ्रमरकमि वेन्दुबिम्बं कर्तृ भ्रमिक्रमाद्भ्रमणपरिपाट्या, अथ च—ऊर्ध्वदेशगमनक्रमेणोज्झिता त्यक्ता या पट्टसूत्रस्य नेत्रं दोरकस्तत्कृता आवृतिर्वेष्टनं तद्रूपम्, अथ च—पट्टसूत्रजालिकावत् चन्द्राव रणं येन तं शोणिमानं रक्तिमानं मुञ्चति। किंभूतमुभयम्—नक्तंसमयरूपेण बालेन, अथ च— बालेन प्रदोषरूपेण, रात्रिसमयेन मुक्तं भ्रमणार्थं करात् कृतमोचनम्, अथ च—उद्गीर्ण जनि तोयम्। शिशुक्रीडासाधनं हि भ्रमरकं काष्ठमयं भवति। ईश्वराणां च डिम्बं समृद्ध्यतिशया द्राजतं पट्टसूत्रवलितदोरकस्रंसनात्तत्संबन्धजातं रक्तिमानं मुञ्चति। तथेदं चन्द्रबिम्बमपी त्यर्थः। इदानीं चन्द्रो धवलो जात इति भावः। 'नेत्रावृते–' इति पाठे—भ्रमिक्रमाद्धेतोरु ज्झिता या पट्टसूत्रनेत्रावृतिस्तस्या हेतोः शोणिमानं मुञ्चति। उज्झिता बिम्बेनैव पट्टसूत्रनेत्रा वृतिर्यत्र तादृशाद्भ्रमिक्रमाद्धेतोरिति वा डिम्बं ललडिम्बमिति वा गौडदेशभाषायां भ्रमरकस्य । महाराष्ट्रभाषायां कान्यकुब्जाषभायां च 'भवरा' इति संज्ञा। रौप्यं, संबन्धे विकारे वाण्। 'नेत्रं मन्थगुणे वस्त्रे' इत्यभिधानान्नेत्रशब्दो यद्यपि मन्थवेष्टनगुणे मुख्यः तथाप्यत्र गुणमात्रपर इति ज्ञेयम्॥

ताराक्षरैर्यामसिते कठिन्या निशालिखद्व्योम्नि तमःप्रशस्तिम्।
विलुप्य तामल्पयतोऽरुणेऽपि जातः करे पाण्डुरिमा हिमांशोः॥५४॥

१ 'नेत्रावृतेः' इत्यादिपाठः सुखावबोधार्थः।

तारेति ॥ निशाऽसितवे स्थाने व्योम्नि गगन एव कज्जलादिलिप्तश्यामलपट्टिकायां कठिन्याः शुभ्रधातुविशेषस्य संबन्धिभिस्ताराक्षरैः शुभ्रैरक्षरैरिव नक्षत्ररूपैरक्षरैः कृत्वा यां तमःप्रशस्तिं तमोवर्णनश्लोकादिलिपिमलिखत् । ताराक्षरैरुपलक्षितां यां कठिन्यालिखदिति वा । तां लिपिं विलुप्य प्रोञ्छ्याल्पमतः परिमेयताराक्षरां कुर्वतो हिमांशोररुणेऽपि करे किरणे, अथ च—पाणौ, पाण्डुरिमा जातः । प्ररूढकिरणे हि चन्द्रे नक्षत्राणामल्पता भवतीति खटिकालिखिताक्षराणि मार्जयतश्चारुणोऽपि करः खटिकासङ्गाद्धवलो भवतीति तमसि नक्षत्राणि बहून्युज्ज्वलतराणि च दृष्टानि, चन्द्रे तूदितेऽल्पानि निष्प्रभाणि च जातानि, चन्द्रश्च धवलो जात इति भावः ॥

सितो यदात्रैष तदान्यदेशे चकास्ति रज्यच्छविरुज्जिहानः ।
तदित्थमेतस्य निधेः कलानां को वेद वा रागविरागतत्त्वम् ॥ ५५ ॥

सित इति ॥ एष चन्द्रो यदा यस्मिन्काले अत्र देशे सितो धवलश्चकास्ति, तदा तस्मिन्नेव काले अन्यदेशे रज्यच्छवी रक्तकान्तिरुज्जिहान उदयन् शोभते । एवमत्रोदयसमये अन्यत्र च श्वेत इत्यपि सामर्थ्याल्लभ्यम्, एतद्देशस्थं प्रतीदानीं सितो दृश्यते, द्वीपान्तरस्थं प्रति तूदयमिदानीमेव दृश्यते यस्मात्, तस्मात्कलानां निधेः पूर्णस्य चन्द्रस्य रागविरागयोर्लोहितत्वालोहितत्वयोस्तत्त्वं याथात्म्यमित्थमनुना प्रकारेण को वा वेद, अपितु—कोऽपि निश्चेतुं न शक्नोतीत्यर्थः । उदयास्तमययोरतात्त्विकत्वाद्व्यवहितस्य यत्र यदा प्रथमदर्शनं तदा तत्रोदय इति दूरस्थस्य प्रथमं रक्तत्वप्रत्ययः, क्रमतासंनिध्यात्तु धावल्यप्रत्यय इति तत्त्वम् । अन्यस्यापि चतुःषष्टिकलानिधेरनुरागाननुरागयोर्याथात्म्यं कुत्रानुरक्तः कुत्र वा नेति कोऽपि न जानाति ॥

कश्मीरजै रश्मिभिरौपसंध्यैर्मृष्टं धृतध्वान्तकुरङ्गनाभि ।
चन्द्रांशुना चन्दनचारुणाङ्गं क्रमात्समालम्भि दिगङ्गनाभिः ॥ ५६ ॥

कश्मीरजैरिति ॥ दिग्भिरेवाङ्गनाभिः संध्यायाः समीपमुपसंध्यं तत्र जातैरुपसंध्यै रश्मिभिरेव कश्मीरजैः कुङ्कुमैः कृत्वा मृष्टं पूर्वं कृतोद्वर्तनं ततः संध्यापगमनानन्तरं धृता ध्वान्तरूपा कुरङ्गनाभिः कस्तूरी येन तादृशमङ्गं क्रमात्कस्तूरीलेपानन्तरं चन्द्रांशुनैव चन्दनेन धवलेन चन्दनेन कृत्वा समालम्भि अलेपि । अन्या अपि ललनाः कुङ्कुमादिभिः क्रमेणाङ्गमनुलिम्पन्ति । चन्दनधवलैश्चन्द्रकरैः सर्वा अपि दिशो विलिप्ताः कृता इति भावः । औपसंध्यैः सामीप्येऽव्ययीभावाद्भवार्थेऽण् ॥

विधिस्तुषारर्तुदिनानि कर्तंकर्तं विनिर्माति तदन्तनिस्तैः ।
ज्योत्स्नीर्निवेचत्यतिना इना वा कथं कथं तानि च यामनानि ॥ ५७ ॥

विधिरिति ॥ विधिस्तुषारर्तोः शिशिरर्तोर्दिनानि कर्तंकर्तं छित्त्वा छित्त्वा तेषां दिनानामन्तनिस्तैर्मध्यसंबन्धिभिः वारस्तैः शकलैः शुभ्रैः खण्डैः कृत्वा ज्योत्स्नीर्निशा निर्मिमीते । नचैवं यदि नाशङ्क्यते, तदेना ज्योत्स्नीर्दीर्घा इति [illegible] पलिप्तस्यान्यां तत्त्वदृशः कथम् । तानि च दिनानि यामनानि न्यूनदैर्घ्याणि न्यूनदीर्घत्वायुतानि कथं वा । अपितु—शिशिरर्तौ [illegible] रात्रिदैर्घ्यं [illegible] शिशिरदिनानामल्पता च

ज्यौत्स्नीनामतितमां शीतलप्रकाशवत्त्वानुपपत्तेश्च शिशिरर्तुदिनानि छित्त्वाछित्त्वैव तत्सारभूतैश्च शकलैश्चन्द्रिकान्विता रात्रयो ब्रह्मणा वर्धिता इत्यर्थः। चन्द्रचन्द्रिकया रात्रिः शीतल धवलतरा च कृतेति भावः। कर्तं कर्तम् 'कृती छेदने' इत्यस्मादाभीक्ष्ण्ये णमुल् द्विर्वचनं च। ज्योत्स्नीः, ज्योतिरस्यामस्तीत्यर्थे 'ज्योत्स्नातमिस्रा—' इति साधुकृताज्ज्योत्स्नाशब्दाद् 'अण्प्रकरणे ज्योत्स्नादिभ्य उपसंख्यानम्' इत्यस्त्यर्थेऽणि ङीप्॥

इत्युक्तिशेषे स वधूं बभाषे सूक्तिश्रुतासक्तिनिबद्धमौनाम्।
मुखाभ्यसूयानुशयादिवेन्दौ केयं तव प्रेयसि मूकमुद्रा॥ ५८॥

इतीति॥ स नलः इत्युक्तिशेषे एवं चन्द्रवर्णनावसाने सूक्तीनां प्रसादादिगुणयुक्तानां शोभनवचनानां श्रुते श्रवणे विषये आसक्त्या रसातिशयात्तदेकतानतया बद्धं स्वीकृतं मौनं यया तां तूष्णींभावमास्थितां वधूं भैमीं प्रतीदं बभाषे। इति किम्—हे प्रेयसि, इन्दौ विषये तवेयं मूकस्येव मुद्रा वाग्निरोधरीतिः का किंकारणिका। त्वमपि किमिति न चन्द्रं वर्णयसी-त्यर्थः। मौने स्वयमेव हेतुमुत्प्रेक्षते—मुखस्य चन्द्रकृतवदनसाम्यस्याभ्यसूया स्पर्धा तज्जन्यान्मनोद्वेषादिव। स्वस्पर्धाकारिणो हि वर्णनेऽन्येन क्रियमाणेऽन्योऽपि कोपात्तूष्णीं तिष्ठति, नानुमोदते, स्वयं च न तं वर्णयति। तथा—त्वन्मुखस्पर्धाकरणसंजातकोपादिवेन्दुं न वर्णयसि नानुमोदसे च किमिति प्रश्नः। नलसूक्तिश्रवणादरकृतं मौनं कोपादिवेत्युत्प्रेक्षितम्॥

शृङ्गारभृङ्गारसुधाकरेण वर्णस्रजानूपय कर्णकूपौ।
त्वच्चारुवाणीरसवेणितीरं तृणानुकारः खलु कोपकारः॥ ५९॥

शृङ्गारेति॥ हे प्रिये, त्वं शृङ्गाररससंबन्धी भृङ्गारः स्वर्णकलशस्तद्रूपेण सुधाकरेण चन्द्रेण हेतुना वर्णस्रजा कृत्वा मम कर्णकूपौ अनूपय जलपूर्णौ कुरु। वर्णस्रजः सरसत्वात्कर्णकूपयोर्जलपूर्णत्वकरणं युक्तम्। अथच—शृङ्गाररससंबन्धिस्वर्णकलशस्य भवन्मुखस्य संबन्धि यत्पीयूषं तस्याकरेण खनिभूतया सरसया वर्णस्रजा कर्णकूपावनूपय। खलु यस्मात् कोषकार इक्षुविशेषस्तव चारुवाण्या वक्रोक्त्यादिरूपाया वाचः संबन्धिनः शृङ्गारादयो रसास्तेषां वेणिः प्रवाहस्तस्यास्तीरे समुद्यत्तृणं तस्यानुकारस्तत्सदृशः। अतिस्वादुरसोपीक्षुविशेषो यदीयसरसवाणीतीरतृणमनुकरोति, नतु समो जातः। तां वाणीं श्रावय, चन्द्रं वर्णयेति भावः। 'कोपकाराद्या इक्षुविशेषाः' इति क्षीरस्वामी। अनूपय, अनूपशब्दात्, 'तत्करोति—' इति णिचि लोट्॥

अत्रैव वाणीमधुना तवापि श्रोतुं समीहे मधुनः सनाभिम्।
इति प्रियप्रेरितया तयाथ प्रस्तोतुमारम्भि शशिप्रशस्तिः॥ ६०॥

अत्रैवेति॥ इति प्रियेण प्रेरितया तया भैम्याथानन्तरं शशिनः प्रशस्तिर्माहात्म्यं प्रस्तोतुमारम्भि प्रारब्धा। इति किम्—हे भैमि, अहमत्रैव चन्द्रवर्णन एव विषये मधुनोऽमृतस्य सनाभिं तुल्यां तवापि वाणीमधुना श्रोतुं समीहे इच्छामीति॥

पूरं विधुर्वर्धयितुं पयोधेः शङ्केऽयमेणाङ्कमणिं कियन्ति।
पयांसि दोग्धि प्रियविप्रयोगसशोककोकीनयने कियन्ति॥ ६१॥

पूरमिति॥ हे प्रिय, अयं विधुः पयोधेः पूरमागन्तुकजलप्रवाहं वर्धयितुमेणाङ्कमणिं

चन्द्रकान्तं कियन्ति पयांसि दोग्धि तत्साद्गृहाति । तथा—प्रियस्य चक्रवाकस्य विप्रयोगेन सशोकायाः कोक्या नयने अपि कियन्ति जलानि दोग्धि, तान्यानपि तत्काललं किंवद्गृह्णातीत्यहं शङ्के मन्ये । इति भैमी प्रियमवदत् । उदिते चन्द्रे सागरपूरो वृद्धिं यातः, चन्द्रकान्ताः स्रवन्ति, चक्रवाकी भृशं रोदितीति भावः । दुहिर्द्विकर्मा ॥

ज्योत्स्नामयं रात्रिकलिन्दकन्यापूरानुकारेऽपप्लुतेऽन्धकारे ।
परिस्फुरन्निर्मलदीप्तिदीपं व्यक्तायते सैकतमन्तरीपम् ॥ ९२ ॥

ज्योत्स्नेति ॥ हे प्राणेश, तमोवसरेऽतिश्यामा रात्रिरेव कालिन्दकन्या यमुना तस्याः पूर आगन्तुकातिनीलजलप्रवाहस्तदनुकारे तत्सदृशे तद्वदतिकृष्णेऽन्धकारेऽपप्लुते गते सति परिस्फुरन्ती निर्मला दीप्तिर्यस्य । प्रकाशमानश्चासौ धवलद्युतिश्च तादृशो वा यश्चन्द्रः स एव दीपो यत्र तादृशं चन्द्रिकारूपं सैकतं धवलतरवालुकामयं रात्रियमुनाया एव तदन्तर्वर्तिनमन्तरीपं द्वीपं व्यक्तायते स्फुटमिव भवति प्रकटं दृश्यते । पूरापसरेऽस्फुटमपि सैकतं स्फुटीभवतीति शङ्के । चन्द्रचन्द्रिकया सकलं धवलीकृतमिति भावः । अव्यक्तं व्यक्तमिव भवति, 'कर्तुः क्यङ्—' इति क्यङ् । अव्यक्तं व्यक्तं भवतीत्यर्थः । सैकतम्, 'सिकताशर्कराभ्यां च' इत्यस्त्यर्थेऽण् ॥

हासत्विषैवाखिलकैरवाणां विश्वं विशङ्केऽजनि दुग्धमुग्धम् ।
यतो दिवा बद्धमुखेषु तेषु स्थितेऽपि चन्द्रे न तथा चकास्ति ॥ ९३ ॥

हासेति ॥ अखिलकैरवाणां सकलकुमुदानां हासत्विषैव विकाससंबन्धिन्या कान्त्यैव विश्वं सकलं जगत् दुग्धवत् मुग्धं धवलं शीतलं चाजनि जातम्, न तु चन्द्रेणेदं विश्वं सितीकृतमिति मन्ये । यतो हेतोर्दिवा तेषु सकलकैरवेषु बद्धमुखेषु संकुचितेषु विकासरहितेषु न तु चन्द्रे स्थिते विद्यमानेऽपि सकलकुमुदविकासाभावात्सकलं जगत्तथा हासत्विषेव शीतलं धवलं वा न चकास्ति । तस्मादिदं जगत्कुमुदहासत्विषैव शीतलं धवलं च जातम्, न तु चन्द्रेणेत्यर्थः । कुमुदवद्दुग्धवच्च शीतला धवला चन्द्रचन्द्रिकास्तीति भावः ॥

मृत्युंजयस्यैष वसञ्जटायां न क्षीयते चन्द्रकुरङ्गकान्तुः ।
न वर्धते च स्वसुधासजीवन्मुण्डराहुद्वयभीरुतोऽयम् ॥ ९४ ॥

ज्योत्स्नीनामतीतानां शीतलतामाप्तामुपगतेन शिशिरपुंस्त्वाधौ [illegible] तेषु वा [illegible] रजनी न तथा [illegible] । चन्द्रचन्द्रिकायुता रात्रिः शीत- [illegible] न करोतीति भावः । कर्तुं [illegible] 'कृती छेदने' इत्यस्मादाशीर्लिङ् [illegible] च । ज्योत्स्नीः, ज्योतिरस्यामस्तीति 'ज्योत्स्नातमिस्रा-' इति साधु [illegible] 'अस्यकरणे ज्योत्स्नादिभ्य उपसंख्यानम्' इत्यस्यार्थे ङीप् ॥

इत्युक्तिशेषे स वधूं बभाषे सूक्तिश्रुतासक्तिनिबद्धमौनाम् ।
मुखान्यसूयानुशयादिवेन्दौ केयं तव प्रेयसि मूकमुद्रा ॥ ५८ ॥

इतीति ॥ स नलः इत्युक्तिशेषे एवं चन्द्रवर्णनावसाने सूक्तीनां प्रसादादिगुणयुक्तानां शोभनवचनानां श्रुतौ श्रवणे विषये आसक्त्या रसातिशयात्तदेकतानतया बद्धं स्वीकृतं मौनं यया तां तूष्णींभावेनावस्थितां वधूं भैमीं प्रतीदं बभाषे । इति किम्—हे प्रेयसि, इन्दौ विषये तवेयं मूकस्येव मुद्रा वाग्निरोधरीतिः का किंनिमित्ता । त्वमपि किमिति न चन्द्रं वर्णयसीत्यर्थः । मौने स्वयमेव हेतुमुत्प्रेक्षते—मुखस्य चन्द्रकृतवदनसाम्यत्वासूया रोषो तदनु- शयोद्वेगादिव । स्वसधर्मचारिणो हि वर्णनेऽन्येन क्रियमाणेऽन्योऽपि कोपात्तूष्णीं तिष्ठति, नानुमोदते, स्वयं च न तं वर्णयति । तथा—त्वन्मुखसधर्मचारित्वसंजातकोपादिवेन्दुं न वर्णयसि नानुमोदसे च किमिति प्रश्नः । नलसूक्तिश्रवणादरकृतं मौनं कोपादिवेत्युत्प्रेक्षितम् ॥

शृङ्गारभृङ्गारसुधाकरेण वर्णस्रजानूपय कर्णकूपौ ।
त्वच्चारुवाणीरसवेणितीरं तृणानुकारः खलु कोपकारः ॥ ५९ ॥

शृङ्गारेति ॥ हे प्रिये, त्वं शृङ्गाररससंबन्धी भृङ्गारः स्वर्णकलशस्तद्रूपेण सुधाकरेण चन्द्रेण हेतुना वर्णस्रजा कृत्वा मम कर्णकूपौ अनूपय जलपूर्णौ कुरु । वर्णस्रजः सरसत्वा- त्कर्णकूपयोर्जलपूर्णत्वकरणं युक्तम् । अथच—शृङ्गाररससंबन्धिस्वर्णकलशस्य भवन्मुखस्य संबन्धि यत्पीयूषं तस्याकरेण खनिभूतया सरसया वर्णस्रजा कर्णकूपावनूपय । खलु यस्मात् कोपकार इक्षुविशेषस्तव चारुवाण्या वक्रोक्त्यादिरूपाया वाचः संबन्धिनः शृङ्गारादयो रसा- स्तेषां वेणिः प्रवाहस्तस्यास्तीरे समुत्पन्नतृणं तस्यानुकारस्तत्सदृशः । अतिस्वादुरसोऽपीक्षुवि- शेषो यदीयसरसवाणीतीरतृणमनुकरोति, नतु समो जातः । तां वाणीं श्रावय, चन्द्रं वर्ण- येति भावः । 'कोपकाराद्या इक्षुविशेषाः' इति क्षीरस्वामी । अनूपय, अनूपशब्दात्, 'तत्क- रोति-' इति णिचि लोट् ॥

अत्रैव वाणीमधुना तवापि श्रोतुं समीहे मधुनः सनाभिम् ।
इति प्रियप्रेरितया तयाथ प्रस्तोतुमारम्भि शशिप्रशस्तिः ॥ ६० ॥

अत्रैवेति ॥ इति प्रियेण प्रेरितया तया भैम्याथानन्तरं शशिनः प्रशस्तिर्माहात्म्यं प्रस्तो- तुमारम्भि प्रारब्धा । इति किम्—हे भैमि, अहमत्रैव चन्द्रवर्णन एव विषये मधुनोऽमृतस्य सनाभिं तुल्यां तवापि वाणीमधुना श्रोतुं समीहे इच्छामीति ॥

पूरं विधुर्वर्धयितुं पयोधेः शङ्केऽयमेणाङ्कमणीं कियन्ति ।
पयांसि दोग्धि प्रियविप्रयोगसशोककोकीनयने कियन्ति ॥ ६१ ॥

पूरमिति ॥ हे प्रिय, अयं विधुः पयोधेः पूरमागन्तुकजलप्रवाहं वर्धयितुमेणाङ्कमणीं

नामैव कर्तृ ब्रवीति । सर्वेषां तत्तत्संबन्धसंभवेऽपि कुमुदानामियं कौमुदीति, 'तस्येदम्' इति संबन्धेऽण् । कुमुदानामेव प्रीत्यतिशयेन संबन्धं वदतीत्यर्थः । कौमुदीति नामैव हि स्पष्टं ब्रवीतीति वा । चन्द्रिकया सर्वेषामप्यानन्दः कृतः । कुमुदानां तु विशेषत इति भावः । कार्येण कारणानुमानम् । ताण्डविका, अर्शआद्यजन्तान्मतुबन्ताद्वा ताण्डवशब्दात् 'तत्करोति-' इति ण्यन्ताण्ण्वुल् । अशनमशिः, 'इकृष्यादिभ्यः' इतीकि अशिमर्हतीति दण्डादित्वाद्यत् । 'आश्या' इति च पाठः ॥

ज्योत्स्नापयःक्ष्मातटवास्तुवस्तुच्छायाछलच्छिद्रधरा धरायाम् ।
शुभ्रांशुशुभ्रांशकराः कलङ्कनीलप्रभामिश्रविभा विभान्ति ॥ ७२ ॥

ज्योत्स्नेति ॥ शुभ्रांशोश्चन्द्रस्य शुभ्रांशा धवलभागाश्च ते कराश्च किरणास्ते धरायां भूम्यां कलङ्कस्य नीलीभिः प्रभाभिर्मिश्रा निभा कान्तिर्येषां ते कलङ्कनीलकान्तिच्छुरिता इव विभान्ति । यतः कीदृशाः—ज्योत्स्नैव पयो जलं दुग्धं वा यस्मिंस्तादृशं क्ष्मातटं दुग्धधवल-चन्द्रिकाधवलीकृतं भूतलं तदेव वास्तु वसतिगृहं येषां तानि वस्तूनि वृक्षादिपदार्थास्तेषां छाया छलं येषां तादृशानि छिद्राणि प्रकाशेन रिक्तत्वाद्बिलानि पदार्थप्रतिच्छायारूपाणि तानि धर-न्तीति तादृशाः चन्द्रिकाधवलिताः पदार्थाश्चन्द्ररश्मय एव, वृक्षादिप्रतिच्छायाश्चन्द्रकलङ्कनील-रश्मय एवेति धरायामपि निपतिताश्चन्द्रकिरणा नीलधवला एव शोभन्त इत्यर्थः । अन्यस्य करा हस्ताः कलङ्कवन्नीलस्य नीलमणेः प्रभया मिश्रकान्तयो नीलमणियुक्ताङ्गुलीयकप्रभामिश्रा विभान्ति । 'शुभ्रांशुशुभ्रांशु-' इति पाठेऽपि 'अंशुर्लेशे रवे रश्मौ' इत्यभिधानादंशुशब्दस्य लेशवाचित्वात्स एवार्थः । ज्योत्स्नैव पयो जलं तस्य क्ष्मा भूमिस्तस्यास्तटं तदेव वास्तु निवा-सस्थानं येषां तेषां वस्तूनां छायाया व्याजेन छिद्राणि धरन्तीति वा ॥

कियान्यथानेन वियद्विभागस्तमोनिरासाद्विशदीकृतोयम् ।
अद्भिस्तथा लावणसैन्धवीभिरुल्लासिताभिः शितिरप्यकारि ॥ ७३ ॥

कियानिति ॥ उदितमात्रेणानेन चन्द्रेण तमोनिरासाद्धेतोः कियान् किंचिन्मात्रोयं विय-द्विभागः पूर्वाकाशदेशो यथा विशदीकृतः तथा चन्द्रकिरणैरुल्लासिताभिर्वृद्धिं प्रापिताभिर्लावण-सैन्धवीभिरद्भिः कियानयं वियद्विभागः शितिःश्यामोऽप्यकारि । अप्रौढप्रभे चन्द्रे पूर्वाकाश-देशस्तिमिरनिरासाद्धवलो भवति, ततो निरस्तस्य च तमसः प्रतीच्यां घनीभूतत्वात्पश्चिमाका-शदेशः श्यामलो भवतीति । नत्रेयमुत्प्रेक्षा । समुद्रजलं च नीलं, पूर्वाकाशदेश एव नीलैः समुद्रजलैः पुनर्नीलोप्यकारीति वा । लावणसैन्धवीभिः लवणसिन्धोरिमाः 'तस्येदम्' इत्यणि 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इत्युभयपदवृद्धिः ॥

गुणौ पयोधेर्निजकारणस्य न हानिवृद्धी कथमेतु चन्द्रः ।
चिरेण सोऽयं भजते तु यत्ते न नित्यमम्भोधिरिवात्र चित्रम् ॥ ७४ ॥

गुणाविति ॥ चन्द्रो निजकारणस्य पयोधेर्हानिवृद्धिरूपौ गुणौ कथं नैतु प्राप्नोतु, अपितु कार्यगुणानां कारणगुणपूर्वकत्वनियमादवश्यमपचयोपचयौ चन्द्रं प्राप्नुत इति युक्तमेवात्र न किंचिच्चित्रमित्यर्थः । तर्हि कुत्र चित्रमित्याशङ्क्याह—सोऽयं चन्द्रस्ते हानिवृद्धी यच्चिरेण पक्षान्तपरिमितेन बहुना कालेन भजते, नतु अम्भोधिरिव नित्यं प्रत्यहं भजते, अत्र चित्रं चित्रमित्याश्चर्यम् । समुद्रो यथा प्रत्यहं हानिवृद्धी भजते, तथा पुत्रोऽपि चन्द्रो नेत्याश्चर्यमित्यर्थः ॥

आदर्शदृश्यत्वमपि श्रितोऽयमादर्शदृश्यां न बिभर्ति मूर्तिम् ।
त्रिनेत्रभूरप्ययमत्रिनेत्रादुत्पादमासादयति स्म चित्रम् ॥ ७५ ॥

आदर्शेति ॥ अयं चन्द्र आदर्शवद्दृश्यत्वमुज्ज्वलत्वादिना रमणीयत्वं श्रितो भजमानोऽप्यादर्शवद्दृश्यां रमणीयां मूर्तिं न बिभर्ति चित्रम् । यो ह्यादर्शवद्दृश्यो भवति स एवादर्शवद्दृश्यां मूर्तिं न बिभर्ति तद्वद्दृश्यो न भवतीति विरोधाश्चर्यमित्यर्थः । अथच—दर्पणवद्दृश्यत्वं श्रितोप्यादर्शं दर्शमनिव्याप्य दृश्याममावास्यायां दर्शनयोग्यां मूर्तिं न बिभर्ति । इदानीं पूर्णत्वेन दृश्यमानोऽपि दर्शे लेशेनापि न दृश्यते इत्यर्थ इति विरोधपरिहारः । दर्पणवद्दृश्यत्वं श्रितोऽपि आदर्शं दर्शं मर्यादीकृत्य कृष्णचतुर्दशीमनिव्याप्य दृश्यां मूर्तिं न बिभर्ति, अपितु तावत्पर्यन्तं दृश्यो भवत्येवेति वा । तथा—अयं चन्द्रस्त्रिनेत्राद्भवति तादृशात्त्रिनेत्रादुत्पन्नोपि न त्रिनेत्रोऽत्रिनेत्रः । तस्मात्त्रिनेत्रव्यतिरिक्तात्सकाशादुत्पादमुत्पत्तिमासादयति स्म प्राप्नोत्येतदपि चित्रम् । त्रिनेत्रादुत्पन्नोऽपि त्रिनेत्रादुत्पन्नो न भवतीत्याश्चर्यमित्यर्थः । अथ च—त्रिनेत्रादुत्पन्नोऽप्यत्रिनेत्रादुत्पत्तिमाप्नोत्येतदपि विरुद्धम् । अथ च—त्रिनेत्रो भूरुत्पत्तिस्थानं यस्य तादृशः, तथा—अत्रेर्मुनेर्नेत्राच्चित्रमाश्चर्यरूपमुत्पादं प्राप्नोति विरोधपरिहारः । सहजसौन्दर्यमाश्चर्यमाहात्म्यं कुलस्य माहात्म्यं चानेन चन्द्रस्य वर्णितम् । चन्द्रस्यात्रिनेत्रसमुद्भूतत्वं पुराणप्रसिद्धम् ॥

इज्येव देवव्रजभोज्यऋद्धिः शुद्धा सुधादीधितिमण्डलीयम् ।
हिंसां यथा सैव तथाङ्कमेषा कलङ्कमेकं मलिनं बिभर्ति ॥ ७६ ॥

इज्येति ॥ देवानां व्रजैः समूहैर्भोज्या पेया ऋद्धिः समृद्धिर्यस्याः सा शुद्धा धवला इयं सुधादीधितेरमृतकरस्य चन्द्रस्य मण्डली इज्येव याग इव शोभत इति शेषः । इज्यापि देवव्रजभोज्यपुरोडाशादिसमृद्धिः शुद्धा पवित्रा च भवति । तथैषा चन्द्रमण्डली कलङ्काख्यमेकं मध्यवर्तिनमङ्कमवयवं मलिनाकारं तथा बिभर्ति, यथा सैव इज्यैव पूर्वोक्तगुणविशिष्टा सत्येकं पशुहिंसात्मकमङ्कं कर्मसाधनं मलिनं पापहेतुं बिभर्ति । परोपकारशीलायाः सर्वात्मना शुद्धाया अपि चन्द्रमण्डल्या दैवादेकमङ्कं मलिनं जातमित्यर्थः । यागे हि हिंसामात्रमेव मालिन्यम् । 'सुधाङ्कम्—' इति पाठे—कलङ्करूपमेकमङ्कं मलिनं वृथैव बिभर्ति । शुद्धाया मालिन्ययोगस्यानौचित्यादित्यर्थः । शुद्धस्यापि धौतधर्मस्य वाच्यैर्दोषारोपणान्मालिन्यं मुधैवेत्यर्थः । इज्या, 'व्रजयजोः—' इति क्यप् ॥

एकः पिपासुः प्रवहानिलस्य च्युतो रथाद्वाहनरङ्कुरेषः ।
अस्त्यम्बरेऽनम्बुनि लेलिहास्यः पिबन्नमुष्यामृतबिन्दुवृन्दम् ॥ ७७ ॥

एक इति ॥ एष मृगाङ्के दृश्यमानः प्रसिद्धः एकः पिपासुस्तृषाक्रान्तः सप्तवायुस्कन्धमध्यवर्तिनः प्रवहाख्यस्यानिलस्य मृगवाहनस्य गगनचारिणो रथाच्च्युतो वाहनभूतो रङ्कुर्मृगोऽनम्बुनि निर्जलेऽम्बरे लेलिहास्यो नितरां पौनःपुन्येन चास्वादनकारि मुखं यस्य तादृशो सन्नमुष्य चन्द्रस्यामृतबिन्दुवृन्दं पिबन्नस्ति । तृषाक्रान्तो रथं परित्यज्य पतितो निर्जलेऽपि गगने चन्द्रामृतबिन्दुवृन्दमास्वादयन्सुखादनमृग एवायम्, नतु कश्चित्कलङ्कमृगो मन्ये-त्यर्थः । अस्तीति वर्तमानप्रत्ययेनामृतास्वादनेन चन्द्रं परित्यज्य गन्तुमशक्तोऽद्यापि वर्तत इति सूचितम् । एवमन्योऽपि तृषाक्रान्तो निर्जले देशे प्रस्रवणादेः पतज्जलबिन्दुवृन्दं पिबन्

मुपशान्तपिपासो खेलिद्रासः संस्थनेन चिरं तिष्ठति । सासनायुक्कन्माः पुराणप्रसिद्धाः ।
खेलिद्देति, नितरां पुनःपुनर्वा खेदोऽस्येति भवि व्याख्यानि 'गतोऽपि न' इति भवेत् कुरु ॥

अस्मिन्शिशौ न स्थित एष रङ्कुर्यूनि प्रियाभिर्विहितोपदायम् ।
आरण्यसंदेश इवौषधीभिरङ्के स राज्ञे विधुना न्यधायि ॥ ७८ ॥

अस्मिन्निति ॥ शिशौ बाले एककलात्मकेऽस्मिंश्चन्द्रे रङ्कुर्मृगो न स्थितो नासीदिव तस्यां दशायामदर्शनात् । किंतु प्रियाभिरोषधीभिर्यूनि तरुणे पूर्णावयवेऽस्मिंश्चन्द्रेऽयं रङ्कुरुपदेवं विहिता प्रेषिता । कीदृशी—अरण्ये भवः संदिश्यते प्रस्थाप्यते संदेशस्तद्रूपा । अरण्यभवानां संदेशरूपा वा । वयं भवत्प्रिया निर्जने वने मृगैः सह वसामः, त्वं तु स्वर्गे विजयी सुखेन वर्तसे इति सूचनार्थं(वा)ऽरण्यमृगमिति कृति यावत् । अनन्तरं विधुना प्रेयसी संदेशरूपः स रङ्कुरङ्के मध्ये, अथच—उत्सङ्गे, प्रियाप्रेमभरेण न्यधायि स्थापित इत्यहं शङ्के । अन्यापि प्रिया तरुणं प्रियं प्रति कंचित्संदेशमुपदारूपेण प्रेषयति स च तं हृदयादौ धारयति । ओषध्यो हि वनवासिन्यस्तदनुरूपमेव संदेशं मृगं स्वप्रिये चन्द्रे प्रेषितवत्यः । आरण्यसंदेश इवायमुपदा प्रहितेति वा । 'यदा—' इति पाठे—यदाप्रभृति प्रेषितः, तदाप्रभृति तारुण्यदशायां चन्द्रेणायमङ्के न्यधायि, नतु पूर्वमित्यर्थः । आरण्यः, भवार्थेऽण् ॥

अस्यैव सेवार्थमुपागतानामास्वादयन्पल्लवमोषधीनाम् ।
धयन्नमुष्यैव सुधाजलानि सुखं वसत्येष कलङ्करङ्कुः ॥ ७९ ॥

अस्येति ॥ एष कलङ्करङ्कुर्विरहपीडितत्वादस्यैव चन्द्रस्य सेवार्थमुपागतानामोषधीनां पल्लवमास्वादयन् । तथा—अमुष्यैव सुधारूपाणि जलानि वहन् पिबन् सुखमनायासलब्धवृत्तिरिव वसति । आहारलोभादत्रैव वसतीत्यर्थः । अन्योऽपि मृगो जलकिसलययुते देशे सुखेन वसति कदाचिदपि न त्यजति । पल्लवम्, जात्येकवचनम् ॥

रुद्रेषुविद्रावितमार्तमारात्तारामृगं व्योमनि वीक्ष्य बिभ्यत् ।
मन्येऽयमन्यः शरणं विवेश मत्वेशचूडामणिमिन्दुमेणः ॥ ८० ॥

रुद्रेति ॥ दक्षयज्ञे वीरभद्रावतारस्य रुद्रस्येषुणा विद्रावितम् । अत एव—आर्तं तारारूपं मृगं व्योमनि आरात्समीपे दूरे वा वीक्ष्य बिभ्यत् त्रसन् अयमन्योऽपर एण इन्दुमीशस्य चूडामणिं ज्ञात्वा शरणं विवेश । शिवेन शिरसि स्थापितत्वादयं मान्य इत्येतदाश्रयेण रुद्रान्मामयं रक्षिष्यत्येवेत्याशयेनान्यो मृगश्चन्द्रं शरणं प्रविष्ट इत्यर्थः । इत्यहं मन्ये । अन्योऽपि सजातीयं कस्माचिद्भीतं दृष्ट्वा स्वयमपि भीतः सन्कमपि शरणं याति । 'गत्वा' इत्यपि पाठः । तारामृगस्य रुद्रेषुविद्रावणं काशीखण्डादौ ज्ञातव्यम् ॥

पृष्ठेऽपि किं तिष्ठति नाथ नाथ रङ्कुर्विधोरङ्क इवेति शङ्का ।
तत्त्वाय तिष्ठस्व मुखे स्व एवं यद्द्वैरथे पृष्ठमपश्यदस्य ॥ ८१ ॥

पृष्ठ इति ॥ हे नाथ, विधोरङ्क इव यथा चन्द्रस्योत्सङ्गे कलङ्कमृगो वर्तते, तथा रङ्कुः पृष्ठेऽपि पश्चाद्भागे किं तिष्ठति अथ न तिष्ठति इति तवाशङ्का चेद्वर्तते इति शेषः । तर्हि त्वं तत्त्वाय याथात्म्यज्ञानार्थं स्वे निजे मुखे एव विषये तिष्ठस्व । निजमुखमेव निर्णयं पृच्छेत्यर्थः । यत्त्वन्मुखं द्वैरथे समानशोभाभिलाषाद्भिरथसंबन्धिनि द्वन्द्वयुद्धेऽस्य त्वन्मुखाद्भज्यमानत्वात्पला-

यनानस्य चन्द्रस्य पृष्ठं पश्चाद्भागनपश्यत् । तस्मात्तत्त्वमुखमेव निर्णेतृत्वेन पृच्छेत्यर्थः । त्वन्मुखं चन्द्रादधिकमिति भङ्ग्या नलमुखवर्णनं मे कृतम् । तत्त्वाय तत्त्वं ज्ञातुं, 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति चतुर्थी, तादर्थ्यमात्रे वा । तिष्ठस्व, स्थेयाख्यायां तङ् । स्वे, वैकल्पिकत्वात्सिमभावः ॥

उत्तानमेवास्य वलक्षकुक्षिं देवस्य युक्तिः शशमङ्कमाह ।
तेनाधिकं देवगवेष्वपि स्यां श्रद्धालुरुत्तानगतौ श्रुतायाम् ॥ ८२ ॥

उत्तानमिति ॥ युक्तिरर्थापत्तिरनुमानं वास्य देवस्य चन्द्रस्य मध्यवर्तिनमङ्कं कलङ्करूपं शशमुत्तानं स्वर्गसंमुखमस्मदादिदृश्यमानपृष्ठभागमाह ब्रूते । यतो वलक्षकुक्षिं धवलोदरम् । यद्ययं शशकोऽस्मत्संमुखोदरोऽनुत्तानोऽभविष्यत्, तर्हि मध्यवर्तिशशकोदरस्य धवलत्वाच्चन्द्रमध्यभागोऽपि धवलोऽभविष्यत्, नच तथा दृश्यते, किंतु मलिनः । तस्मादुत्तान एव शशकश्चन्द्रेऽस्तीति युक्तिराहेत्यर्थः । तेन चन्द्रशशकनिश्चितोत्तानत्वेनैव हेतुनाहं देवगवेष्वपि सुरभीप्रभृतिषु विषये वेदे श्रुतायामुत्तानगतौ सुरलोकसंमुखचरणतया गमने विषये पूर्वापेक्षयाधिकमतितरां श्रद्धालुरास्तिक्ययुक्ता स्याम् । 'उत्ताना वै देवगवाश्चरन्ति' इति श्रुतिर्न्यायोपपन्नार्थतया सत्यैवेत्यहमिदानीमधिकं मन्य इत्यर्थः । देवगवेषु 'गोरतद्धितलुकि' इति टच् । 'देवगवीषु' इति पाठे टित्त्वान्ङीप् ॥

उक्तिरीत्योत्तानगतौ विद्यमानमपि शशकस्य रक्तपृष्ठत्वान्नीलत्वेन प्रतीतिः कथमित्यत आह—

दूरस्थितैर्वस्तुनि रक्तनीले विलोक्यते केवलनीलिमा यत् ।
शशस्य तिष्ठन्नपि पृष्ठलोम्नां तन्नः परोक्षः खलु रागभागः ॥ ८३ ॥

दूरेति ॥ दूरस्थितैर्द्रष्टृभी रक्तनीले मिश्रितोभयवर्णे वस्तुनि केवलस्त्यक्तरागभागो नीलिमैव यद्यस्माद्विलोक्यते तत्तस्मात्कारणाच्छशस्य पृष्ठवर्तिरोम्णां तिष्ठन्नपि रागभागो रक्तिमांशः नोऽस्माकमतिदूरस्थितानां खलु निश्चितं परोक्षो दृग्गोचरो न भवति, किंतु नीलिमैव दृश्यत इत्यर्थः । तिष्ठन्वर्तमानोऽपि परोक्ष इति विरोधाभासः । दूरस्थत्वान्न दृश्यत इति तत्परिहारः । खल्वुत्प्रेक्षायां वा ॥

भङ्क्तुं प्रभुर्व्याकरणस्य दर्पं पदप्रयोगाध्वनि लोक एषः ।
शशो यदस्यास्ति शशी ततोऽयमेवं मृगोऽस्यास्ति मृगीति नोक्तः ॥ ८४ ॥

भङ्क्तुमिति ॥ एष कविर्लोकः पदानां सुप्तिङन्तानां प्रयोगाध्वनि विषये व्याकरणस्य प्रकृतिप्रत्ययविभागपूर्वं शब्दव्युत्पादनकारिणः शास्त्रस्य मदधीन एव सकलशब्दप्रयोग इति दर्पं गर्वं, यद्वा—लक्षणया वैयाकरणस्य व्याकरणाधीन एव सकलशब्दप्रयोग इति गर्वं भङ्क्तुं त्याजयितुं प्रभुः समर्थः । यद्यस्मादेतोरयं चन्द्रः शशोऽस्यास्ति ततो हेतोः शशी यथोक्तो लोकेनेति शेषः । एवममुनैव प्रकारेण मृगोऽस्यास्ति मृगीति नोक्तः । शशोऽस्यास्तीति मत्वर्थे 'अत इनिठनौ' इतीनौ यथायं शशीत्युच्यते, तथा तेनैव सूत्रेण मृगोऽस्यास्तीत्यस्मिन्नर्थे इनिः प्राप्तो सत्यामपि मृगीति नोक्तः । तस्मादतिव्याप्त्यादिदोषाद्व्याकरणमूल एव लोकप्रयोग इति नियमो न युक्तः किंतु कृत्तद्धितसमासानामभिधानं नियामकम् । लक्ष्यमनुसृत्य लक्षणप्रवृत्तिः, ननु

असाविति ॥ असौ चन्द्रो वितनोरनङ्गस्य सखा नो भवति । कुतः—असाम्यादसादृश्यात् । 'विवाहमैत्रीवैराणि भवन्ति समशीलयोः' इति शास्त्रादनयोः साङ्गानङ्गयोः सादृश्याभावान्मैत्री न संगच्छत इत्यर्थः । तर्ह्यनयोर्लोकप्रसिद्धा मैत्री कथमित्यत आह—खलु निश्चितं कर्पूरापरनाम्नैवेन्दुत्वस्यानङ्गस्य मित्रम्, तावतैव लोकप्रसिद्धिरिति विरोधाभाव इत्यर्थः । तत्र हेतुमाह—यद्यस्मात्तौ द्वावपि कामकर्पूरौ दग्धौ सन्तौ पूर्वस्माददग्धदशायाः सकाशादधिकां वीर्यवत्तां हि स्फुटं दधाते । पक्वो हि कर्पूरो वीर्यवत्तरो भवति, कामोऽपि दाहानन्तरमधिकं वीर्यवाननुभूयते । तदुक्तम्—'कर्पूर इव दग्धोऽपि शक्तिमान्यो जने जने । नमोऽस्त्ववार्यवीर्याय तस्मै कुसुमधन्वने ॥' इति । तस्मात्कामकर्पूरयोर्मैत्री युक्ता । 'अथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्रसंज्ञः' इत्यमरः । अस्त्रियामित्यमरवचनात्कर्पूरशब्दो नपुंसकोऽपि ॥

स्थाने विधोर्वा मदनस्य सख्यं स शंभुनेत्रे ज्वलति प्रलीनः ।
अयं लयं गच्छति दर्शभाजि भास्वन्मये चक्षुषि चादिपुंसः ॥ ८९ ॥

स्थान इति ॥ वाथवा विधोर्मदनस्य सख्यं स्थाने । युक्तमेवेत्यर्थः । तत्र हेतुः—स कामः ज्वलति देदीप्यमाने शंभुनेत्रे प्रलीनः प्रकर्षेण लीन एकतां प्रलयं गतः । विनष्ट इत्यर्थः । अयं चन्द्रश्च दर्शभाजि दर्शनं दर्शस्तद्व्यापारयुक्ते, अथच—अमावास्यां गते, भास्वन्मये सूर्यरूपे आदिपुंसो विष्णोश्चक्षुषि लयमेकतां गच्छति । दर्शे हि चन्द्रः सूर्यं गच्छति, अतएव दर्शस्य सूर्येन्दुसंगम इति नाम । सूर्यो विष्णोर्दक्षिणं चक्षुः । तथाच तुल्ययोरीश्वरयोर्नेत्रयोर्द्वयोरपि चन्द्रकामयोः प्रलीनत्वादृशं चन्द्रस्याप्यनष्टतया च [illegible] मैत्रीत्यर्थः । तथाच कामस्य चन्द्रसखिताप्रसिद्धिर्युक्त्यैव युक्तेति भावः ॥

नेत्रारविन्दत्वमगान्मृगाङ्कः पुरा पुराणस्य यदेष पुंसः ।
अस्याङ्कपर्यायमगात्तदानीं कनीनिकेन्दिन्दिरसुन्दरत्वम् ॥ ९० ॥

नेत्रेति ॥ पुरा पूर्वं यदा मत्स्यकाले मृगाङ्कः पुराणस्य पुंसः श्रीविष्णोर्नेत्रारविन्दत्वं नयनकमलत्वमगात् । तदा तत्स्यकाले अस्य विष्णुनेत्रारविन्दभूतस्य चन्द्रस्याङ्कः कलङ्क एव कनीनिकया इन्दिन्दिरस्य भ्रमरस्य सुन्दरत्वमगात् । 'अदात्' इति पाठे—अयं श्रीविष्णुरस्य चन्द्रस्याङ्के विषये कनीनिकेन्दिन्दिरसुन्दरत्वमदात् । नेत्रे हि कनीनिकया [illegible], अरविन्दे च भ्रमरेण । तथाचास्य नेत्रारविन्दत्वसद्भावात् [illegible] श्रीविष्णुः [illegible]मित्यर्थः । अङ्क एव कनीनिका [illegible] भ्रमरेण सुन्दरत्वम[illegible] वा । '[illegible]चञ्चरीकालिनो द्विरेफाः स्युः' इति हलायुधः ॥

[illegible] तेनैष च [illegible] साम्यं [illegible] ।
द्विजाधिराजौ हरिणाश्रितौ च युक्तं मिथस्तौ [illegible] ॥ ९१ ॥

[illegible]ति ॥ [illegible]

[illegible]

१ [illegible]

लक्षणमुद्दिश्य लक्ष्यप्रवृत्तिरिति । तस्मात्प्रयोगमूलं व्याकरणमिति व्याकरणाल्लोक एव प्रयोगे बलीयानिति भावः । अप्रस्तुतप्रशंसा ॥

यावन्तमिन्दुं प्रतिपत्प्रसूते प्रासावि तावानयमब्धिनापि ।
तत्कालमीशेन भृतस्य मूर्ध्नि विधोरणीयस्त्वमिहास्ति लिङ्गम् ॥ ८५ ॥

यावन्तमिति ॥ शुक्लप्रतिपद्यावन्तं यत्प्रमाणमेककलमिन्दुं प्रसूते, अब्धिनापि तावत्प्रमाण एककल एवायं प्रासावि, नतु पूर्ण इत्यर्थः । एतत्कथं ज्ञातमित्यत आह—तत्काल तस्मिन्काले समुद्रादुत्पत्तेरवसर एव ईशेन मूर्ध्नि धृतस्य विधोरणीयस्त्वं नितरां कार्श्यमेवैककलत्वे लिङ्गं ज्ञापकमनुमापको हेतुरस्ति । यदि समुद्रेण संपूर्णोऽयमजनिष्यत, तर्हि शिवेनापि तदानीमेव शिरसि तावानेवाधास्यत, नतु तथा, तस्मात्प्रतिपदेककलः प्रसूतः, तावान्समुद्रेणापीति प्रतिपदुत्पन्नोऽप्ययमेककलत्वादेव न दृश्यत इति भावः ॥

आरोप्यते चेदिह केतकत्वमिन्दौ दलाकारकलाकलापे ।
तत्संवदत्यङ्कमृगस्य नाभिकस्तूरिका सौरभवासनाभिः ॥ ८६ ॥

आरोप्यत इति ॥ केतकत्वमिहेन्दौ चेद्यदि आरोप्यते यतो दलाकारः केतकीपत्रसदृशः धवलः कलानां कलापः समूहो यस्य तस्मिन् । तत्तस्मात्केतकदलवच्छुभ्रकलाकलापत्वाच्चन्द्रः केतकमेवेति रूप्यत इत्यर्थः । तत्तर्हि अङ्कमृगस्य मृगत्वेन नाभिकस्तूरिका कर्त्री आरोपितं तत्केतकत्वं कर्मीभूतं सौरभवासनाभिः कृत्वा संवदिति । चन्द्रे केतकत्वं युक्तमित्यनुमन्यत इत्यर्थः । 'नाभिः' इति पाठे—अङ्कमृगस्य नाभिः कर्त्री कस्तूरिकासंबन्धिसौरभवासनाभिः कृत्वा संवदतीति वा । केतक्यां कस्तूरीपरिमलो वर्तते, चन्द्रे कलङ्कमृगनाभिरूपा कस्तूरी वर्तते । तस्माच्चन्द्रे केतकत्वमारोपयितुं युक्तमित्यर्थः । तत्केतकत्वमङ्कमृगस्य नाभिकस्तूरिकायाः परिमलस्य वासनाभिः संक्रमणैः कृत्वा संवदति युक्त्या संवादं प्राप्नोत्येवेति वा । 'ताभिः' इति पाठे—अतिप्रसिद्धाभिर्वासनाभिः ॥

आसीद्यथाज्यौतिषमेष गोलः शशी समक्षं चिपिटस्तथोऽभूत् ।
स्वर्भानुदंष्ट्रायुगयन्त्रकृष्टपीयूषपिण्याकदशावशेषः ॥ ८७ ॥

आसीदिति ॥ एष शशी यथाज्यौतिषं गर्गादिमुनिप्रणीतग्रहगणितशास्त्रानतिक्रमेण गोलः कपित्थफलवद्वर्तुलोपरितनभाग एव पूर्वमासीत् । तर्हीदानीं कथमन्यथा दृश्यत इत्याशङ्क्याह—ततोऽनन्तरं कालक्रमेण स्वर्भानो राहोरूर्ध्वाधोभागस्थितदंष्ट्रायुगमेव यन्त्रं निष्पीडनचक्रं तेन कृष्टं निष्कृष्य गृहीतं पीयूषममृतं यस्य, यस्माद्वा, स चासौ पिण्याकश्च तस्य दशा गृहीतरसनीरसतिलादिपिण्डीमात्ररूपतावशेष उद्धृतो भागो यस्यैवंभूतः सन् चिपिटः पर्पटप्रायोऽभूदिति समक्षमिदानीं प्रत्यक्षेणानुभूयत एवेत्यर्थः । ज्योतिरधिकृत्य कृतो ग्रन्थो ज्यौतिषम्, 'अधिकृत्य कृते ग्रन्थे' इत्यण् । ततो यथार्थेऽव्ययीभावः । ज्योतिःशास्त्रादौ त्रयोदशाङ्गुलश्चन्द्रः षोडशाङ्गुलस्य सूर्यस्याधोभागस्थो जलपूर्णकाचकूपिकाप्रायो यथोदितः, तथैव पूर्वमासीदित्युक्तम् ॥

असावसाम्याद्वितनोः सखा नो कर्पूरमिन्दुः खलु तस्य मित्रम् ।
दग्धौ हि तौ द्वावपि पूर्वरूपाद्यद्वीर्यवत्तामधिकां दधाते ॥ ८८ ॥

लानां पूजार्थं चन्द्रसविधे क्रियमाणानां चन्द्रतेजसा संकोचस्यैव संभवादुन्निद्रसरोजपूजाश्रियं कथं प्राप्नोति । प्रकारान्तरेण प्राप्नोतीत्याह—निजाङ्कभूतस्य रङ्कोर्मृगस्याक्षिद्वयेनैवालंकृतोऽयं चन्द्रस्तामुन्निद्रसरोजपूजाश्रियमनेति प्राप्नोति तन्नयनयोरुन्निद्रकमलरूपत्वादित्यर्थं इत्यहं मन्ये । अङ्कमृगनेत्राभ्यां कृत्वायं चन्द्रो विकसितकमलाभ्यां पूजात्मिव शोभां प्राप्नोतीति भावः । एत्येवेति वा ॥

य एष जागर्ति शशः शशाङ्के बुधो विधत्ते क इवात्र चित्रम् ।
अन्तः किलैतत्पितुरम्बुराशेरासीत्तुरङ्गोऽपि मतङ्गजोऽपि ॥ ९६ ॥

य इति ॥ एष प्रत्यक्षदृश्यः शशः शशाङ्के जागर्ति स्फुरति अत्र विषये क इव बुधश्चित्रमाश्चर्यं विधत्ते, अपितु न कोऽपि । किल यस्मादेतत्पितुरम्बुराशेरन्तर्मध्ये उच्चैःश्रवःसंज्ञकस्तुरङ्गोऽप्यासीत् । ऐरावताख्यो मतङ्गजोऽप्यासीत् । यदीयपितुर्मध्येऽश्वगजादिकं भवति, तदीय(पुत्र)मध्ये शशमात्रसंभवे किमाश्चर्यमित्यर्थः ॥

गौरे प्रिये भातितमां तमिस्रा ज्यौत्स्नी च नीले दयिता यदस्मिन् ।
शोभास्तिलोभादुभयोस्तयोर्वा सितासितां मूर्तिमयं बिभर्ति ॥ ९७ ॥

गौर इति ॥ तमिस्रा तमोबहुलास्य दयिता रात्रिर्गौरे प्रिये चन्द्रे विषये भातितमाम् । तथा—ज्यौत्स्नी च चन्द्रिकायुक्ता धवलास्य दयिता रात्रिर्नीले प्राणेशे चन्द्रे नितरां शोभते । भिन्नवर्णे हि शोभेते इत्यर्थः । तस्मादेतोस्तयोस्तमिस्राज्यौत्स्न्योरुभयोरपि विषये स्वस्य शोभाप्राप्तेर्लोभादभिलाषात्तयोरेव वा पत्न्योर्या शोभाप्राप्तिस्तदभिलाषाद्धवलश्यामलवर्णसंबन्धात्तमिस्राज्यौत्स्न्योः शोभया भवितव्यमिति । अयं चन्द्रः सितासितां धवलां श्यामलां च मूर्तिं बिभर्ति । वा इवार्थः । शोभाप्तिलोभादिवेत्यन्वयः । नीलभागे ज्यौत्स्नीं प्रियां धारयितुं धवले च तामसीमिति यथासंख्यम् ॥

वर्षातपानावरणं चिराय काष्ठौघमालम्ब्य समुत्थितेषु ।
बालेषु ताराकवकेष्विहैकं विकस्वरीभूतमवैमि चन्द्रम् ॥ ९८ ॥

वर्षेति ॥ अहं बालेषु तनुषु सूक्ष्मरूपेष्वविकसितेषु चेह प्रत्यक्षदृश्येषु तारासु नक्षत्रेष्वेव कवकेषु छत्राकेषु मध्ये चिरकालोत्पन्नत्वाद्विकस्वरीभूतं विकसितमेकं छत्राकमेव चन्द्रमवैमि मन्ये । किंभूतेषु ताराकवकेषु—चिराय बहुकालं वर्षर्तौ आतपे ग्रीष्मर्तौ च वर्षेषु जलवृष्टिषु आतपेषूष्मसु च सत्सु अनावरणमनाच्छादितं काष्ठौघं दिक्समूहमेव दारुसमूहमालम्ब्य समुत्थितेषूत्पन्नेषु । वर्षाकाले स्थानस्थेषु जलक्लिन्नेषु पश्चादुष्णतप्तेषु च काष्ठेषु सूक्ष्मस्थूलानि छत्राकाणि भवन्ति । तथाच तारा अल्पकवकानि, चन्द्रस्तु स्थूलकवकमेवेत्युत्प्रेक्षा ॥

दिनावसाने तरणेरकस्मान्निमज्जनाद्विश्वविलोचनानि ।
अस्य प्रसादादुडुपस्य नक्तं तमोविपद्द्वीपवतीं तरन्ति ॥ ९९ ॥

दिनेति ॥ विश्वस्य जगतो विलोचनानि दिनावसाने तरणेः सूर्यस्याकस्मादर्शनाभावहेतोर्निमज्जनादस्ताचलगमनात्समुद्रपतनाद्धेतोर्नक्तं रात्रौ तमोविपत्तिं तमसा विपत्तिं निमग्नमिव द्वीप-

तद्युक्तमुचितमित्यर्थः । चावन्योन्यसमुच्चये । साम्यमेवाह—उभयपक्षौ शुक्लपक्षकृष्णपक्षौ भजति चन्द्रः, गरुडस्तु द्वौ छदौ भजति, तादृशौ द्वावपि । तथा—द्विजानां ब्राह्मणानां राजा चन्द्रः । गरुडस्तु पक्षिणां राजा तादृशौ । तथा—हरिणेन कलङ्कमृगेणाश्रितश्चन्द्रः, गरुडस्तु हरिणा विष्णुना वाहनार्थेनाश्रितः, तादृशौ । एवमुभयोः साम्यात्सम एव व्यापारे यन्नियुक्तौ तदुचितं कृतमिति भावः । काश्यपिः, बाह्वादित्वादिञ् ॥

यैरन्वमायि ज्वलनस्तुषारे सरोजिनीदाहविकारहेतोः ।
तदीयधूमौघतया हिमांशौ शङ्के कलङ्कोऽपि समर्थितस्तैः ॥ ९२ ॥

यैरिति ॥ यैः पण्डितैः सरोजिन्याः दाहरूपाद्विकाराद्धेतोस्तुषारे ज्वलनोऽग्निरन्वमायि । तुषारः साग्निर्भवितुमर्हति संबन्धे सति दाहकारित्वात्, साग्निभूदेशवत्, तप्तोदकवद्वेति हिमे विषये वह्निरनुमित इत्यर्थः । तैः पण्डितैर्हिमांशौ तुषारमये चन्द्रे वर्तमानः कलङ्कोऽपि तदीयधूमौघतया हिमाग्निसंबन्धिधूमसमूहरूपत्वेन समर्थित इत्यहं शङ्के । वह्नौ हि धूमेन भाव्यम्, चन्द्रश्च तुषारमयत्वादुक्तरीत्या वह्निमान्, तथा च कलङ्को धूमसमूह एवेति तैः समर्थितमित्यहं संभावयामीत्यर्थः ॥

स्वेदस्य धाराभिरिवापगाभिर्व्याप्ता जगद्भारपरिश्रमार्ता ।
छायापदेशाद्वसुधा निमज्ज्य सुधाम्बुधावुज्झति खेदमत्र ॥ ९३ ॥

स्वेदस्येति ॥ वसुधा छायापदेशात्स्वीयप्रतिबिम्बव्याजेन सुधाम्बुधावत्र चन्द्रे निमज्ज्यान्तः प्रविश्य खेदं जगद्भारपरिश्रमपीडामुज्झतीव । किंभूता—जगद्भारवहननिमित्तः परिश्रमस्तेनार्ता नितरां पीडिता । अत एव—स्वेदस्य धाराभिरिवापगाभिर्व्याप्ता समन्तात्पूरिता । अमृतसमुद्रनिमज्जने हि खेदो गच्छत्येव यस्याश्च तत्तन्नदीरूपः स्वेदः, तस्याः श्रमहरणे सुधासमुद्र एवोचितः । एतेन कलङ्कस्य मृगशशभूच्छायाप्रभृति मतभेदा वर्णिताः ॥

ममानुमैवं बहुकालनीलीनिपातनीलः खलु हेमशैलः ।
इन्दोर्जगच्छायमये प्रतीके पीतोऽपि भागः प्रतिबिम्बितः स्यात् ॥ ९४ ॥

ममेति ॥ हेमशैलो मेरुः खलु निश्चितं सर्गमारभ्याद्ययावदतिक्रान्तेन बहुना कालेन कृत्वा नीलीनिपातः श्यामिकालगनं तेन कृत्वा वा नीलः बहुकालीनत्वान्नीलमलसंबन्धान्नीलः संजातोऽस्तीति, एवंप्रकारा ममानुमानुमानम्, एवमहं संभावयामीत्यर्थः । अन्यथा यदि स्वर्णाचलः कालभूयस्त्वेन न नीलीभूतः किंतु हेममयत्वात्पीत एव स्यात्, तर्हि इन्दोर्जगच्छायमये जगत्प्रतिबिम्बभूते कलङ्करूपे प्रतीकेऽवयवे मेरोः पीतोऽपि भागः प्रतिबिम्बितः सन्पीतोंऽशोपि दृश्येत, तस्मात्स्वर्णाचलो नील एव जातः । तथाच सकलाया अपि भूमेर्नीलवर्णत्वात्तत्प्रतिबिम्बरूपः कलङ्कोऽपि नील एव युक्त इत्यर्थः । जगच्छाये, 'विभाषा सेना—' इति षण्ढत्वम् ॥

मावापदुन्निद्रसरोजपूजा श्रियं शशी पद्मनिमीलितेजाः ।
अक्षिद्वयेनैव निजाङ्करङ्कोरलंकृतस्तामयमेति मन्ये ॥ ९५ ॥

मेति ॥ शशी उन्निद्रैर्विकसितैः सरोजैः कृत्वा या पूजा तज्जनितां श्रियं मा अवापत् न लभत । यतः—पद्मनिमीलि कमलसंकोचकं तेजो यस्य सः । विकसितानामपि कम-

चकोरैरप्यजरामरैर्भाव्यम्, नच ते तथा, तस्मात्तत्तेजसः सुधात्वं वा मृषा भवेत्, सुधाभूतस्यापि वा जरामरणापहारे सामर्थ्यं नास्तीत्यन्यतरदङ्गीकार्यम्। तथा—'सुधाप्रभावैर्न निजाश्रयं वा' इति पूर्वश्लोकांशसमाधानमित्याशयः। 'अजरामरीस्युः—' इति पाठे—च्विः॥

वाणीभिराभिः परिपक्त्रिमाभिर्नरेन्द्रमानन्दजडं चकार।
मुहूर्तमाश्चर्यरसेन भैमी हैमीव वृष्टिः स्तिमितं च तं सा॥ १०३॥

वाणीभिरिति॥ सा भैमी आभिः पूर्वोक्ताभिः परिपाकेन निर्वृत्ताभिः परिणतकवित्वशक्तितया प्रसादादिगुणयुताभिर्वाणीभिः कृत्वा तं नरेन्द्रमानन्दजडं हर्षपरवशं चकार। तथा—मुहूर्तमद्भुतापरनाम्नाश्चर्येण रसेन, अथच—तद्रूपेण जलेन, हैमी तुषारसंबन्धिनी वृष्टिरिव भैमी स्तिमितमतिस्नेहात्प्राप्तस्तम्भं च, अथच—आर्द्रं चकार। हिमवृष्टिर्यथान्यं जडमार्द्रं च करोति, तथैयमप्यानन्दजडं सातिस्नेहं च चकारेत्यर्थः। परिपक्त्रिमाभिः, ड्वित्त्वान्निर्वृत्तेर्थे क्त्रिः क्त्रेर्मप्॥

इतो मुखाद्वागियमाविरासीत्पीयूषधारामधुरेति जल्पन्।
अचुम्बदस्याः स मुखेन्दुबिम्बं संवावदूकश्रियमम्बुजानाम्॥ १०४॥

इत इति॥ इत्येवं जल्पन् वदन् स नलोऽम्बुजानां संवावदूका नितरां संवादिनी श्रीः शोभा यस्य तादृशं कमलतुल्यशोभमस्या मुखेन्दुबिम्बमचुम्बत्। चन्द्रकमलतुल्यं भैमीमुखं प्रीत्यतिशयादचुम्बदित्यर्थः। इति किम्—हे भैमि, इयमुक्तप्रकारा पीयूषधारावन्मधुरा वाक् इतः प्रत्यक्षदृश्यात्त्वन्मुखादाविरासीत् निःसृतेति। इत इत्यनेन सामीप्याभिनयकारिणा करेण भैमीमुखं चिबुके धृतमिति ध्वन्यते। मुखस्येन्दुबिम्बत्वेन च पीयूषधारासंबन्धौचिती सूच्यते। तथा च पीयूषधारया मधुरेत्यपि व्याख्येयम्। संवावदूकेत्यादिना च भैम्याः पद्मिनीत्वं प्रसिद्धम्। चन्द्रबिम्बस्य कमलैः सह विसंवादो विरोधित्वात्, एतन्मुखचन्द्रबिम्बस्य तु कमलैः सह संवादः कमलसौभाग्यभाक्त्वादिति प्रसिद्धचन्द्रबिम्बादेतन्मुखबिम्बमधिकमिति सूच्यते। अत्यर्थं संवदति संवावदूका, संपूर्वोऽयं वदतिर्मैत्र्यां वर्तते॥

प्रियेण साथ प्रियमेवमुक्ता विदर्भभूमीपतिवंशमुक्ता।
सितांशुजालं विततार तारा दिवः स्फुरन्तीव कृतावतारा॥ १०५॥

प्रियेणेति॥ प्रियेण एवम् 'इतो मुखात्—' इत्यादिरूपं प्रियं वचनमुक्ता भाषिता विदर्भभूमीपतेर्वंशेन कुलेन मुक्ता जनिता। तथा—स्फुरन्ती दीप्यमानकान्तिः सोल्लासा वा भैमी अथ नलवचनानन्तरं सितांशुजालं विततार। तदेव नलाय प्रीतिदानमिव ददावित्यर्थः। केव—दिवः सकाशात् क्षीणपुण्यतया स्वेच्छया वा कृतावतारा भूलोकमागता रोहिणी तारेव स्फुरन्ती किरणजालं विततारेवेति उत्प्रेक्षोपमा वा वंशः कुलमेव वंशो वेणुस्तत्र जाता देवधार्या मुक्ता मौक्तिकरूपा। कृतावतारेत्यत्र तरणं तरः 'ऋदोरप्' तदन्तात्कृतादित्वात्तारपेऽपि पश्चादवशब्देन सह 'सह सुपा' इति समासः॥

स्ववर्णना न स्वयमर्हतीति नियुज्य मां त्वन्मुखमिन्दुरूपम्।
स्थानेऽत्युदास्ते शशिनः प्रशस्तौ धरातुरासाहमिति स्म साह॥१०६॥

---

१ 'वितान' इत्यपि क्वचित्पाठः' इति सुखावबोधा।

गगनस्थोऽपि मृगो भैमीमुखगीर्ति कथमशृणोदित्याशङ्क्याह—

आप्यायनाद्वा रुचिभिः सुधांशोः शैत्यात्तमःकाननजन्मनो वा ।
यावन्निशायामथ घर्मदुःस्थस्तावद्व्रजत्यह्नि न शब्दपान्थः ॥ ११० ॥

आप्यायनादिति ॥ शब्दरूपः पान्थो नित्यपथिको निशायां यावद्व्रजति तावदथ पश्चात्प्राकल्येन वा अह्नि न गच्छति, यस्माद्दिने घर्मेणातपेन दुःस्थः संतप्तः, तस्माद्दिनेऽल्पमेव गच्छतीत्यर्थः । रात्रौ दूरागमने हेतुमाह—सुधांशोरमृतरूपाभी रुचिभिराप्यायनादुज्जीवितबलत्वाद्वा तम एव काननं वनं तस्माज्जन्म यस्य गाढान्धकारजाताच्छैत्याद्वा तेजसोऽभावे तमसः संभवादौष्ण्याभावाच्छैत्यम् । अतएव रात्रौ बहु गच्छति, दिने चोष्णेन श्रान्त इव बहु न गच्छति । शब्दो हि रात्रौ स्वभावादतिदूरेऽपि श्रूयते । दिवा तु न तथा । पथिकोऽपि रात्रौ शैत्याद्दूरं गच्छति, दिने चाल्पम् । दूरश्रवणप्रतिपादकोयं श्लोकः ॥

दूरेऽपि तत्तावकगानपानाल्लब्धावधिः स्वादुरसोपभोगे ।
अवज्ञयैव क्षिपति क्षपायाः पतिः खलु स्वान्यमृतानि भासः ॥ १११ ॥

दूरेऽपीति ॥ हे प्रिये, खलु निश्चितं क्षपायाः पतिश्चन्द्रो भासश्चन्द्रिका एव स्वान्यमृतानि क्षिपति अधो मुञ्चति । किंभूतः—दूरेऽप्यतितरां देशव्यवधानेऽपि तत्प्रसिद्धं मधुरतरं तावकं गानं तस्य पानात्सादरश्रवणाद्धेतोः स्वादुरसोपभोगे माधुर्यातिशयानुभवे विषये लब्धावधिः प्राप्तमर्यादः । उत्प्रेक्षते—अवज्ञयेव अनुभूतभवद्गीतमाधुर्यापेक्षयाल्पमाधुर्यतयावमाननयैवेत्यर्थः । अयं श्लोको भिन्न एव, नतु युग्मम् ॥

अस्मिन्न विस्मापयतेऽयमस्मांश्चक्षुर्बभूवैष यदादिपुंसः ।
तदत्रिनेत्रादुदितस्य तन्वि कुलानुरूपं किल रूपमस्य ॥ ११२ ॥

अस्मिन्निति ॥ हे तन्वि, एष चन्द्रः आदिपुंसः श्रीविष्णोर्वामं चक्षुर्बभूवेति यत् । अस्मिन्नेव भवनविषयेऽयं नेत्रभूतश्चन्द्रोऽस्मान्न विस्मापयते आश्चर्यं न प्रापयति । अत्रार्थेऽस्माकमाश्चर्यं न भवतीत्यर्थः । किल यस्माद्धेतोरत्रिनेत्रादुदितस्योत्पन्नस्यास्य तच्चक्षुर्भवनं कुलानुरूपं कुलोचितं स्वरूपम् । नेत्ररूपात्कारणाज्जातस्य नेत्रीभवनमुचितमेव । तस्मादस्य पुराणपुरुषनेत्रभवने न किंचिदस्माकं चित्रमित्यर्थः । विस्मापयते, 'नित्यं स्मयतेः' इत्यात्त्वम्, 'भीस्म्योर्हेतुभये' इति तङ् । अस्मान्, जनान्तरापेक्षया बहुलम् ॥

आभिर्मृगेन्द्रोदरि कौमुदीभिः क्षीरस्य धाराभिरिव क्षणेन ।
अक्षालि नीली रुचिरम्बरस्था तमोमयीयं रजनीरजक्या ॥ ११३ ॥

आभिरिति ॥ हे मृगेन्द्रोदरवत्कृशमुदरं यस्यास्तादृशि, रजन्येव रजकी तया क्षीरस्य दुग्धस्य धाराभिरिव दृश्यमानाभिर्धवलतराभिराभिः कौमुदीभिः कुलाऽम्बरस्था गगनस्था तमोमयीयं नीली कज्जलवत्काली रुचिः क्षणमात्रेणाक्षालि निरस्ता । यथा रजक्या वसनस्था काली कान्तिर्दुग्धधाराभिः क्षणेन क्षाल्यते । तदुक्तं कलाकोषे—'तैलं घृतेन दध्नोष्णजलं दुग्धेन कज्जलम् । नाशयेदम्बरस्थं तु मलं क्षारेण सोष्मणा ॥' इति । चन्द्रिकानिर्गगनं निर्मलीकृतमिति भावः । मृगेन्द्रोदरि, 'नासिकोदर—' इति ङीप् । ओषधिप्राणिनामनिःस्वानानार्नीलीव नीलेति ङीप् समर्थनीयः । रजकी, षुनः षित्वान्ङीष् ॥

स्वेति ॥ सा धरातुरासाहं भूमीन्द्रमित्याह स्म । इति किम्—हे प्रिय, इन्दुरूपं त्वन्मुखमिति हेतोश्चन्द्ररूपात्मस्तुतौ मां नियुज्याज्ञाप्य शशिनः प्रशस्तौ वर्णनविषयेत्युदास्तेऽतितरामुदासीनं भवति । एतत्स्थाने युक्तम् । हेतुमेवाह—इति किम्—'सतामेतदकर्तव्यं परनिन्दात्मनः स्तुतिः' इत्यादिवचनात्स्वयमात्मनैव स्वस्य वर्णना स्तुतिर्नार्हति न युक्तेति । इयत्पर्यन्तं मया चन्द्रो वर्णितः, इदानीं त्वया वर्णनीयः,' तूष्णींभावो वा युक्त इत्याशयेन भैमी चन्द्रस्तुतौ तं सोत्प्रासं प्रावर्तयदिति भावः । तुरासाहमित्यत्र तृतीयसर्गे 'धरातुरासाहि' इत्येतच्छ्लोकस्था शङ्का ज्ञातव्या, तत्रोत्तरम्—इन्दुरूपं त्वन्मुखं, चन्द्ररूपात्मस्तुतौ मां नियुज्य शशिनः प्रशस्तौ अत्युदास्ते । साहं धरावदतुराऽनुत्तालाऽवेगा वा । पृथ्वीवद्गम्भीरेत्यर्थः । अर्थात्तमाह स्मेति ज्ञातव्यम् ॥

तयेरितः प्राणसमः सुमुख्या गिरं परीहासरसोत्किरां सः ।
भूलोकसारः स्मितवाक् तुषारभानुं भणिष्यन्सुभगां बभाण ॥ १०७ ॥

तयेति ॥ स भूलोके सारः श्रेष्ठतमो नलः स्मितवाक् तुषारभानुं चन्द्रं भणिष्यन् वर्णयिष्यन् सन् सुभगां सौभाग्यवतीं भैमीं बभाण । किंभूतः—तया सुमुख्या भैम्या परिहासरसस्योत्किरामुद्भावयित्रीं गिरमीरित उक्तः । तथा—प्राणसमोऽतिप्रेयान् । तया चन्द्रवर्णने ईरितः प्रेरितः सन्परिहासरसोत्किरां गिरं बभाणेति वा । उत्किराम्, 'इगुपध—' इति कः । पूर्वेण षष्ठीसमासः । भणिष्यन्, हेतौ लृटः शता ॥

तवानने जातचरीं निपीय गीतिं तदाकर्णनलोलुपोऽयम् ।
हातुं न जातु स्पृहयत्यवैमि विधुं मृगस्त्वद्वदनभ्रमेण ॥ १०८ ॥

तवेति ॥ हे प्रिये, अयं मृगः तवानने जातचरीं भूतपूर्वां गीतिं स्वरमाधुरीं निपीय सादरमाकर्ण्येदानीमपि तस्या भवद्गीतेराकर्णनलोलुपोऽतितरां लुब्धोऽतिसादृश्यात्त्वद्वदनभ्रमेण विधुं हातुं जातु कदाचिदपि न स्पृहयतीत्यहमवैमि । मृगा हि गानप्रिया भवन्तीति चन्द्रं त्वन्मुखभ्रान्त्या त्यक्तुं नेच्छतीत्यहं शङ्क इत्यर्थः । जातचरीं, 'भूतपूर्वे चरट्' । लोलुपः, यङन्तात्पचाद्यचि 'यङोऽचि च' इति यङो लुक् ॥

इन्दोर्भ्रमेणोपगमाय योग्ये जिह्वा तवास्ये विधुवास्तुमन्तम् ।
गीत्या मृगं कर्षतु भन्त्स्यता किं पाशीवभूवे श्रवणद्वयेन ॥ १०९ ॥

इन्दोरिति ॥ अतिसादृश्यादिन्दुरेवेदमितीवेन्दोर्भ्रमेण मृगस्योपगमाय योग्ये प्राप्तुमर्हे तवास्ये वर्तमाना जिह्वा कर्त्री गीत्या वर्णस्वरमाधुर्या कृत्वा विधुरूपं वास्तु वसतिगृहं तद्विद्यते यस्य तं विधुवास्तुमन्तं चन्द्रमध्यस्थायिनमपि मृगं कर्षतु । गीतेर्मधुरतमत्वान्मृगस्य च प्रियगानत्वात्स्वसमीपमानयत्वित्यर्थः । तदाकर्षणसाधनमुत्प्रेक्षते—भन्त्स्यता आगमिष्यतो मृगस्यात्रैव निवासार्थं बन्धनं करिष्यता श्रवणद्वयेन पाशीवभूवे किम् । तद्रूपया बन्धनरज्ज्वा समाकर्षत्वित्यर्थः । अन्यापि शबरी गीत्या मृगमाकृष्य पाशेन बध्नाति । भवन्मुखं निष्कलङ्कममृताधिकगीतियुक्तं च, चन्द्रस्तु सकलङ्क इति भावः । चन्द्रवर्णनावसरेऽपि मध्ये मध्ये भैमीमुखवर्णनानुरागातिशयसूचनार्था । अयं श्लोकः क्षेपक इति केचित् ॥

एनमिति ॥ स गिरीन्द्रपुत्रीपतिः शंभुरेनमोषधीशं विधुमुत्तमाङ्गे शिरसि शिरोधारयन् समावितजन्म समुद्रोत्पन्नं घोरं दारुणमपि विषमश्नाति, विधुकलङ्की भुजङ्गं सर्पराजं वासुकिं च धत्ते । शंभोरप्युपकारकत्वेन पूज्यः श्रेष्ठोऽयमिति भावः । ओषधिशमिनोऽस्य शिरसि धारणादिव निःशङ्कं विषं भक्षयति सर्पांश्च धारयतीत्युत्प्रेक्षा । भुजङ्गम्, जातिनिप्रायेणैकवचनं वा ॥

नास्य द्विजेन्द्रस्य बभूव पश्य दारान्गुरोर्यातवतोऽपि पातः ।
प्रवृत्तयोऽप्यात्ममयप्रकाशान्नहन्ति न ह्यान्तिमदेहमाप्तान् ॥ १२० ॥

नेति ॥ हे प्रिये, द्विजेन्द्रस्य अस्य चन्द्रस्यास्य गुरोर्बृहस्पतेर्दारान् भार्यां यातवतो गच्छतोऽपि गुरुतल्पगामिनोऽपि पातः स्वर्गाद्भ्रंशः, अथच—पातित्यम्, न बभूव पश्य । चित्रमेतद्विलोकयेत्यर्थः । अथवा युक्तमेतत् । प्रवृत्तयो धर्माधर्महेतुकर्माण्यपि आत्मनैव आत्मस्वरूपेणैव प्रकाशो येषां तान्प्रकाशान्तरनिरपेक्षान्प्रकाशात्मनान्, अथच—परमात्मैव प्रकाशो येषां तान् परमात्मस्वरूपातिरिक्तप्रकाशाज्ञानविज्ञान्स्वप्रकाशात्मवादिनो आन्तिमदेहं तेजोमयशरीरं पूर्णतां वा प्राप्तान्, अथच—अनन्तरभाविनोऽशुभात्प्राचीनशरीरस्याद्यपेक्षया शेषं शरीरं प्राप्तान् जीवन्मुक्तान्नुदत्यान्हि यत्नान् नहन्ति शुभाशुभकर्मबन्धेन न संबध्नन्तीत्यर्थः । 'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इति प्रामाणिकवचनात्तेजोरूपत्वात्त्स्य चन्द्रस्य पातो नाभूदिति युक्तमेव, नात्र चित्रमिति भावः । चन्द्रोऽप्यात्ममयप्रकाशः आन्तिमदेहं संपूर्णतां प्राप्तश्च ॥

स्वधाकृतं यत्तनयैः पितृभ्यः श्रद्धापवित्रं तिलमिश्रमन्नः ।
चन्द्रं पितृस्थानतयोपतस्थे तदङ्करोचिःखचिता सुधैव ॥ १२१ ॥

स्वधेति ॥ तनयैः पुत्रैः श्रद्धया परलोकास्तित्वबुद्ध्या विशीर्णतत्वतिलमिश्रं कृष्णतिलैर्मिश्रं पितृभ्यः स्वधाकृतं यदन्नः पितृस्थानतया 'चन्द्रो वै पितृलोकः' इति श्रुतेः पितृलोकतया चन्द्रमुपतस्थे चन्द्रेण संगतमभूत् । तत्कृष्णतिलमिश्रं कलङ्करूपस्य अङ्कस्य रोचिभिः कान्तिरूपा खचिता मिश्रिता सुधा पीयूषम् । कृष्णतिला एव कलङ्कः, तत्संबद्धं अन्नमेव पीयूषम्, नत्वन्यः कलङ्को न चान्यत्पीयूषमित्यर्थः । अथेति, पितृलोकत्वात्तौ हेतुगर्भम् । उपतस्थे, संगतकरणे तङ् ॥

पश्योच्चसौधस्थितिसौख्यलक्ष्ये त्वत्केलिकुल्याम्बुनि बिम्बमिन्दोः ।
चिरं निमज्ज्येद सतः प्रियस्य भ्रमेण यच्चुम्बति राजहंसी ॥ १२२ ॥

पश्येति ॥ हे प्रिये, त्वमुच्चसौधे स्थिता सुखेन सौख्येन निरन्तरेण लक्ष्ये दृश्ये केलिकुल्याम्बुनि तदिन्दोर्बिम्बं पश्य । किंभूतम्—राजहंसी इह कुल्याम्बुनि निमज्ज्य चिरं सतोऽन्तर्वर्तिनस्तस्य प्रियस्य राजहंसस्य भ्रमेण यच्चन्द्रबिम्बं चुम्बति तत्पश्य, सतो वर्तमानस्य । 'राजहंसः' इत्यादौ—शुक्लत्वेन । सदृशत्वेनाभिप्रायेण भ्रान्तिः ॥

सौवर्णवर्णैरमृतं निपीय कृतोऽद्य तुच्छः शशलाञ्छनोऽयम् ।
पूर्णोऽमृतानां निशि तेऽत्र नद्या नकः पुनः स्यात्किमिह... ॥ १२३ ॥

पयोमुचां मेचकिमानमुच्चैरुच्चाटयामास ऋतुः शरद्या।
अपारि वामोरु तयापि किंचिन्न प्रोञ्छितुं लाञ्छनकालिमास्य ॥११४॥

पय इति ॥ हे वामोरु, या शरदृतुः पयोमुचां मेघानां वर्षाकालीनमुच्चैरतिशयितमपि मेचकिमानं कालिमानमुच्चाटयामास। तया कालिमापनयने दृष्टसामर्थ्ययापि शरदाप्यस्य चन्द्रस्य लाञ्छनरूपः कालिमा किंचिदल्पमपि प्रोञ्छितुं स्फोटयितुं नापारि। शरत्स्वच्छे चन्द्रे मलिनः कलङ्कोऽतितरां शोभत इति भावः। मेचकिमानं, वर्णवाचित्वादिमनिच् ॥

एकादशैकादशरुद्रमौलीनस्तं यतो यान्ति कलाः किमस्य।
प्रविश्य शेषास्तु भवन्ति पञ्चपञ्चेषुतूणीमिषवोऽर्धचन्द्राः ॥ ११५ ॥

एकेति ॥ अस्तं यतो गच्छतोऽस्य चन्द्रस्यैकादश कला एकादशानां रुद्राणां मौलीन् प्रति यान्ति किल गच्छन्तीव। शेषाः पञ्चकलास्तु पुनः पञ्चेषोः कामस्य तूणीमल्पनिषुधिं प्रविश्यार्धचन्द्राकारत्वादर्धचन्द्राख्या इषवो भवन्ति। विनाशसमयेऽप्ययं परोपकारनिरत इति ध्वन्यते। तूणीम्, अल्पत्वविवक्षया स्त्रीत्वे गौरादित्वान्ङीप्, अर्धचन्द्रशब्दो रूढः ॥

निरन्तरत्वेन निधाय तन्वि तारासहस्राणि यदि क्रियेत।
सुधांशुरन्यः स कलङ्कमुक्तस्तदा त्वदास्यश्रियमाश्रयेत ॥ ११६ ॥

निरन्तरेति ॥ हे तन्वि, ताराणां नक्षत्राणां सहस्राणि निरन्तरत्वेनान्योन्यसंबन्धितया विधायैकीकृत्य यदि अन्यः सुधांशुः क्रियेत निर्मीयेत तदा तर्हि स चन्द्रस्ताराणामकलङ्कत्वात्तन्मयत्वात्कलङ्केन मुक्तः संस्त्वदास्यस्य श्रियं शोभामाश्रयेत। क्रियातिपत्तेरविवक्षितत्वाल्लृङभावः ॥

यत्पद्ममादित्सु तवाननीयां कुरङ्गलक्ष्मा च मृगाक्षि लक्ष्मीम्।
एकार्थलिप्साकृत एष शङ्के शशाङ्कपङ्केरुहयोर्विरोधः ॥ ११७ ॥

यदिति ॥ हे मृगाक्षि, यत्पद्मं तवाननीयां मुखसंबन्धिनीं लक्ष्मीमादित्सु ग्रहीतुकामम्, कुरङ्गलक्ष्मा चन्द्रश्च तव मुखशोभां गृहीतुकामः, तयोः शशाङ्कपङ्केरुहयोरेष विरोधस्त्वन्मुखशोभालक्षण एकोऽर्थस्तस्य लिप्साकृतः प्राप्तिवाञ्छानिमित्त एवेत्यहं शङ्के। एकद्रव्याभिलषितृत्वेन विरोधः सुप्रसिद्धः। चन्द्रपद्मयोरपि विरोधः प्रसिद्ध एव। चन्द्रपद्माभ्यां सकाशात्ते मुखमधिकमिति भावः। आदित्सु, चन्द्रपक्षे लिङ्गविपरिणामः। लक्ष्मीं, 'न लोका—' इति षष्ठीनिषेधः ॥

लब्धं न लेखप्रभुणापि पातुं पीत्वा मुखेन्दोरधरामृतं ते।
निपीय देवैर्विघसीकृतायां घृणां विधोरस्य दधे सुधायाम् ॥ ११८ ॥

लब्धमिति ॥ हे प्रिये, अहं सर्वैरपि देवैर्विघसीकृतायां निःशेषं पीत्वा भुक्तशेषीकृतायाम्, अस्य विधोः सुधायां घृणां जुगुप्सां दधे धारयामि। किं कृत्वा—लेखानां देवानां प्रभुणेन्द्रेणापि पातुं न लब्धं कृतप्रयत्नस्यापि तस्यावरणात्तेन दुष्प्रापं केनाप्यनुच्छिष्टं ते मुखेन्दोरधररूपममृतं निपीय पीत्वा। चन्द्रसुधायाः सकाशात्त्वदधरामृतं स्वादुतरमिति भावः। अन्योऽप्युच्छिष्टभोजने जुगुप्सां धारयति ॥

एनं स विभ्रद्विधुमुत्तमाङ्गे गिरीन्द्रपुत्रीपतिरोषधीशम्।
अश्नाति घोरं विषमब्धिजन्म धत्ते भुजङ्गं च विमुक्तशङ्कः ॥ ११९ ॥

पन्नमिति ॥ स गिरीन्द्रपुत्रीपतिः शंभुरेनमोषधीशं विधुमुत्तमाङ्गे शिरसि बिभ्रद्धारयन् सवब्धिजन्म समुद्रोत्पन्नं घोरं दारुणमपि विषमश्नाति, विमुक्तशङ्को भुजङ्गं सर्पराजं वासुकिं च धत्ते । शंभोरप्युपकारकत्वेन पूज्यः श्रेष्ठोऽयमिति भावः । ओषधिस्वामिनोऽस्य शिरसि धारणादिव निःशङ्कं विषं भक्षयति सर्पांश्च धारयतीत्युत्प्रेक्षा । भुजङ्गम्, जातिनिप्रायेणैकवचनं वा ॥

नास्य द्विजेन्द्रस्य बभूव पश्य दारान्गुरोर्यातवतोऽपि पातः ।
प्रवृत्तयोऽप्यात्ममयप्रकाशान्नहन्ति न ह्यन्तिमदेहमाप्तान् ॥ १२० ॥

नेति ॥ हे प्रिये, द्विजेन्द्रस्य अस्य चन्द्रस्यास्य गुरोर्बृहस्पतेर्दारान् भार्यां यातवतो गच्छतोऽपि गुरुतल्पगामिनोऽपि पातः स्वर्गाद्भ्रंशः, अथच—पातित्यम्, न बभूव पश्य । चित्रमेतद्विलोकयेत्यर्थः । अथवा युक्तमेतत् । प्रवृत्तयो धर्माधर्महेतुकर्मारम्भा अपि आत्ममय आत्मस्वरूपमेव प्रकाशो येषां तान्प्रकाशान्तरनिरपेक्षान्प्रकाशरूपान्, अथच—परमात्मैव प्रकाशो येषां तान् परमात्मस्वरूपातिरिक्तप्रकाशानभिज्ञान्स्वप्रकाशात्मवादिनो ब्रह्मज्ञानिनोऽन्तिमदेहं तेजोरूपशरीरं पूर्णतां वा प्राप्तान्, अथच—अनन्तरभाविमोक्षत्वात्प्राचीनशरीरप्रवाहापेक्षया शेषं शरीरं प्राप्तान् जीवन्मुक्तान्पुरुषान्हि यस्मान्न घ्नन्ति शुभाशुभफलबन्धेन न संबध्नन्तीत्यर्थः । 'तेषां तेजोविशेषेण प्रत्यवायो न विद्यते' इति प्रामाणिकवचनात्तेजोरूपस्यास्य चन्द्रस्य पातो नाभूदिति युक्तमेव, नात्र चित्रमिति भावः । चन्द्रोऽप्यात्ममयप्रकाशः अन्तिमदेहं संपूर्णतां प्राप्तश्च ॥

स्वधाकृतं यत्तनयैः पितृभ्यः श्रद्धापवित्रं तिलचित्रमम्भः ।
चन्द्रं पितृस्थानतयोपतस्थे तदङ्करोचिःखचिता सुधैव ॥ १२१ ॥

स्वधेति ॥ तनयैः पुत्रैः श्रद्धया परलोकास्तित्वबुद्ध्या वितीर्णत्वात्पवित्रं कृष्णतिलैश्चित्रं मिश्रितं पितृभ्यः स्वधाकृतं यदम्भः पितृस्थानतया 'चन्द्रो वै पितृलोकः' इति श्रुतेः पितृलोकतया चन्द्रमुपतस्थे चन्द्रेण संगतमभूत् । तत्कृष्णतिलमिश्रं जलमेवाङ्कस्य कलङ्कस्य यद्रोचिः कान्तिस्तया खचिता मिश्रिता सुधा पीयूषम् । कृष्णतिला एव कलङ्कः, तत्संलग्नं जलमेव पीयूषम्, नत्वन्यः कलङ्को न चान्यत्पीयूषमित्यर्थः । श्रद्धेति, पितृलोकप्राप्तौ हेतुगर्भम् । उपतस्थे, संगतकरणे तङ् ॥

पश्योच्चसौधस्थितिसौख्यलक्ष्ये त्वत्केलिकुल्याम्बुनि बिम्बमिन्दोः ।
चिरं निमज्ज्येह सतः प्रियस्य भ्रमेण यच्चुम्बति राजहंसी ॥ १२२ ॥

पश्येति ॥ हे प्रिये, त्वमुच्चसौधे स्थित्वा कृत्वा सौख्येन निरन्तरायं लक्ष्ये दृश्ये त्वत्केलिकुल्याया अम्बुनि तदिन्दोर्बिम्बं पश्य । तत्किम्—राजहंसी इह कुल्याजले निमज्ज्य चिरं सतोऽन्तर्वर्तमानस्य प्रियस्य राजहंसस्य भ्रमेण यच्चन्द्रबिम्बं चुम्बति सौख्यम्, स्वार्थे सुखिनो भाव इति भावे वा ष्यञ् । 'सौक्ष्म्य-' इतिपाठे—सूक्ष्मत्वेन लक्ष्ये । उच्चतरप्रदेशस्थितं प्रति ह्यधोदेशस्थितं वस्तु सूक्ष्मं प्रतिभाति ॥

सौवर्गवर्गैरमृतं निपीय कृतोऽह्नि तुच्छः शशलाञ्छनोऽयम् ।
पूर्णोऽमृतानां निशि तेऽत्र नद्यां मग्नः पुनः स्यात्प्रतिमाच्छलेन ॥१२३॥

सौवर्गेति ॥ स्वर्गे भवाः सौवर्गा देवास्तेषां वर्गैर्वृन्दैरमृतं निपीयाह्वि तुच्छो रिक्तः कृतोऽयं शशलाञ्छनो निशि ते तवात्र क्रीडानद्यां प्रतिमाच्छलेन प्रतिबिम्बव्याजेन मग्नः सन्पुनरमृतानां जलैः, अथच—पीयूषैः पूर्णः स्याद्भवेदित्यहं संभावयामीत्यर्थः। एतेन नदीजलस्यामृतत्वं सूचितम्। अह्वि तुच्छः कृतोऽपि पुनः क्रमेणामृतैः पूर्णः सन्रात्रौ तव क्रीडानद्यां प्रतिमाव्याजेन मग्नः स्यात् पुनः पानभयादिव पलाय्य निलीनः स्यादित्यहं शङ्के इत्यर्थ इति वा। पूर्णोऽमृतानाम्। तृप्त्यर्थत्वात्करणे षष्ठी ॥

समं समेते शशिनः करेण प्रसूनपाणाविह कैरविण्याः।
विवाहलीलामनयोरिवाह मधुच्छलत्यागजलाभिषेकः ॥ १२४ ॥

सममिति ॥ इह तव क्रीडानद्यां कैरविण्याः कुमुदिन्याः प्रसूनरूपे पाणौ शशिनः करेण रश्मिना, अथच—पाणिना, समं सह समेते संगते सति मधु पुष्परस एव च्छलं यस्य स तद्व्याजस्त्यागजलस्य कन्यादानसंकल्पोदकस्याभिषेकः कर्ता, अनयोश्चन्द्रकुमुदिन्योर्विवाहलीलामाहेव सूचयतीव। चन्द्रकरस्पर्शमात्रेण कुमुदानि विकसितानि, मकरन्दपूर्णानि च जातानीति भावः। विवाहे उभयोः पाणिमेलनं, पाणौ दानजलाभिषेकोऽपि भवति ॥

विकासिनीलायतपुष्पनेत्रा मृगीयमिन्दीवरिणी वनस्था।
विलोकते कान्तमिहोपरिष्टान्मृगं तवैषाननचन्द्रभाजम् ॥ १२५ ॥

विकासीति ॥ हे प्रिये, इह तव केलिनद्यां वनस्था जलनिवासिनी, अथच—काननस्था, तथा-विकासिनीलमायतं विस्तृतं च पुष्पमेव नेत्रं यस्यास्तत्तुल्यनेत्रा चेयं प्रत्यक्षदृश्या इन्दीवरिणी, यस्मान्मृगी वनस्थत्वाद्विकासिनीलायतपुष्पनेत्रत्वाच्च हरिणी, ततस्मादिन्दीवरिणीरूपा मृगी, आननमिव यश्चन्द्रः सामर्थ्यात्त्वदाननतुल्यो यश्चन्द्रस्तद्भाजं तत्स्थं कान्तं सुन्दरम्, अथच—तुल्यजातीयं स्वप्रियं, मृगमुपरिष्टाद्विलोकते। विकसितकुसुमनेत्राणि ऊर्ध्वं प्रसारितानि दृश्यन्ते तर्हि प्रायेण चन्द्रस्थमुपरिवर्तमानं निजभर्तारं मृगं मृगी पश्यतीत्यर्थः। त्वदाननमेव यश्चन्द्रस्तत्रस्थं चन्द्रत्वादनुमेयं मृगमुपरिष्टात्पश्यति। त्वं प्रासादोपरि वर्तसे, इयं चाधोदेशे वर्तते। 'न न' इति पदच्छेदं कृत्वा चन्द्रभाजं निजप्राणेशं मृगमुपरिष्टान्न पश्यतीति न, किंतु पश्यत्येवेति वा व्याख्येयम्। वनस्था मृगी हि प्रसारितनीलायतनेत्रा सती स्वकान्तं मृगमितस्ततो विलोकयति। 'शशम्' इत्यपपाठः। मृगपर एव वा व्याख्येयः।

तपस्यताम्बुनि कैरवाणां समाधिभङ्गे विबुधाङ्गनायाः।
अवैमि रात्रेरमृताधरोष्ठं मुखं मयूखस्मितचारुचन्द्रम् ॥ १२६ ॥

तपस्यतामिति ॥ हे प्रिये, अम्बुनि सदा निवासात्तत्र तपस्यतां कैरवाणां कुमुदानां समाधेर्दिवा संकोचस्यैव ध्यानस्य भङ्गे त्याजने विषये निमित्ते वा विबुधाङ्गनाया अप्सरोरूपाया रात्रेश्चन्द्रं मुखमेवाहमवैमि मन्ये। किंभूतं मुखम्—अमृतमेवाधरोऽनूर्ध्व ओष्ठो यस्य, अथच—अमृततुल्योऽधरोष्ठो यस्य, यद्वा—अमृतमधरं यस्मात्पीयूषादधिकरस ओष्ठो यस्य। तथा—मयूखाः किरणा एव स्मितम्, अथच—तत्समाधिभङ्गादेव चन्द्रकरवदुज्ज्वलं यत्स्मितं, तेन चारु। चन्द्रविशेषणे लिङ्गविपरिणामः। देवाङ्गनानामप्येवंविधं मुखं रात्रौ जले

तपस्यतां दुश्चरं तपश्चरतामपि मुनीनां समाधिभङ्गं करोति । तपस्यतामिति तपश्चरतीत्यर्थे 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ्, 'तपसः परस्मैपदं च' इति शता ॥

अल्पाङ्कपङ्का विधुमण्डलीयं पीयूषनीरा सरसी स्मरस्य ।
पानात्सुधानामजलेऽप्यमृत्युं चिह्नं बिभर्त्यत्रभवं स मीनम् ॥ १२७ ॥

अल्पेति ॥ अल्पोऽङ्क एव पङ्को यस्यां, तथा—पीयूषमेव नीरं यस्यां सेयं विधुमण्डली स्मरस्य सरसी विशालं सर एव । अत एव—स स्मरः अत्र भवमस्यां चन्द्रसरस्यां समुत्पन्नं सुधानामेतदीयामृतानां पानादजले जलरहितेऽपि स्थले जलाभावेऽपि वाऽमृत्युं मरणरहितं मीनं चिह्नम्, अथच—सुधासरोजातत्वाज्ज्ञापकं लिङ्गं बिभर्ति । मीना हि जलाद्बहिर्भूता म्रियन्त एव, अयं तु न म्रियते, तस्माच्चन्द्रामृतसरसीभवत्वात्तदामृतपानाज्जलाभावेऽपि मृत्युरहित इति सर्वं युक्तमित्यर्थः ॥

तारास्थिभूषा शशिजह्नुजाभृच्चन्द्रांशुपांशुच्छुरितद्युतिर्द्यौः ।
छायापथच्छद्मफणीन्द्रहारा स्वं मूर्तिमाह स्फुटमष्टमूर्तेः ॥ १२८ ॥

तारेति ॥ द्यौः स्वमात्मानमष्टमूर्तेर्हरस्य मूर्तिं शरीरं स्फुटं व्यक्तमाह ब्रवीति । यतः—किंभूता—तारा एवास्थीनि भूषा यस्याः । तथा—शशिनमेव जह्नुजां, चन्द्रं गङ्गां च, बिभर्तीति भृत् । तथा—चन्द्रांशव एव पांसवो भस्मानि तैश्छुरिता कृताङ्गरागा द्युतिर्यस्याः । तथा—छायापथो गगने दण्डाकारा दक्षिणोत्तरस्था धवला रेखा छद्म यस्य छायापथच्छद्मरूपः फणीन्द्रो वासुकिः स एव मुक्ताहारो यस्याः सा । हरमूर्तिरप्युक्तविशेषणविशिष्टा । द्यौरप्येतादृशीति मूर्त्यन्तरापेक्षया व्यक्तमेव महेशस्य मूर्तिं गगनं कथमतीवेत्यर्थः ॥

एकैव तारा मुनिलोचनस्य जाता किलैतज्जनकस्य तस्य ।
ताताधिका संपदभूदियं तु सप्तान्विता विंशतिरस्य यत्ताः ॥ १२९ ॥

एकेति ॥ एतस्य चन्द्रस्य जनकस्य तस्य प्रसिद्धस्यात्रिमुनेर्लोचनस्य तारा कनीनिका किलैकैव जाताभूत् किल पुराणादौ । अस्य तत्पुत्रस्य तु पुनरियं दृश्यमाना संपत् ताताधिका पितुरत्रिनेत्रात्सकाशादधिका । यस्मादस्य चन्द्रस्य तारकाः कनीनिकाः, अथच—नक्षत्राणि, सप्तभिरन्विता विंशतिरभूदिति च्छलम् । पितुः सकाशादधिकसंपत्तिः सत्पुत्रस्य भाग्योदयमिति भावः । 'सप्तविंशतिमिन्दवे' इति, दक्षः सप्तविंशतिकन्या अश्विन्यादिकाश्चन्द्राय ददाविति पुराणम् ॥

मृगाक्षि यन्मण्डलमेतदिन्दोः स्मरस्य तत्पाण्डुरमातपत्रम् ।
यः पूर्णिमानन्तरमस्य भङ्गः स छत्रभङ्गः खलु मन्मथस्य ॥ १३० ॥

मृगाक्षीति ॥ हे मृगाक्षि हरिणीनेत्रे, यदेतद्दृश्यमानमिन्दोर्मण्डलं तत्स्मरस्य पाण्डुरं श्वेतं साम्राज्यसूचकमातपत्रमेव । श्वेतच्छत्रदर्शने सति सकलो जनो वशगो भवति । पूर्णचन्द्रमण्डलस्य मोहोत्पादकत्वात्तद्दर्शने सर्वेऽपि जनास्तस्य वशगा भवन्ति । तत्साम्राज्यसूचकमस्य श्वेतातपत्रमेवेति भावः । यच्च पूर्णिमानन्तरमस्य कृष्णपक्षेन्दुमण्डलस्य भङ्गो भेदनं खण्डनं स च मन्मथस्य छत्रभङ्गः खलु । छत्रस्य भेदनं राज्यभ्रंशं सूचयति । कुमारसंभवे चेन्दुमण्डल-

मित्रचन्द्रक्षये कामः क्षीण एव भवति, तस्मात्कृष्णपक्षे योऽस्य भङ्गः स कामस्य छत्रभङ्ग एव स एव वेति भावः। खलूत्प्रेक्षायां निश्चये वा ॥

दशाननेनापि जगन्ति जित्वा योऽयं पुरापारि न जातु जेतुम्।
म्लानिर्विधोर्मानिनि संगतेयं तस्य त्वदेकाननिर्जितस्य ॥ १३१ ॥

दशेति ॥ दिग्विजयोद्यतेन दशाननेनापि जगन्ति जित्वापि योऽयं चन्द्रः पुरा पूर्वं जातु कदाचिदपि जेतुं नापारि। हे मानिनि स्वमुखस्पर्धिनं चन्द्रमसहमाने भैमि, तस्य विधोरियं प्रत्यक्षदृश्या कलङ्करूपा म्लानिर्लज्जा संगता लग्ना, अथच युक्तैव। यतस्त्वदेकेनाननेन नितरां जितस्य। यो हि दशाननेन दशभिर्मुखैर्जेतुं नाशाकि, तस्य स्त्रियास्त्वदेकेन मुखेन विजितत्वेन लज्जया मालिन्यमुचितमेवेत्यर्थः। त्वन्मुखमेतस्मादधिकमिति भावः। प्रतीयमानोत्प्रेक्षा। लज्जयापि म्लानिर्भवति। रावणश्चन्द्रं जेतुं प्रवृत्तस्तत्तुषाराग्निना दह्यमानः कम्पमानतनुस्तमजित्वैव परावृत्त इत्युत्तरकाण्डे कथा ॥

दृष्टो निजां तावदियन्त्यहानि जयन्नयं पूर्वदशां शशाङ्कः।
पूर्णस्त्वदास्येन तुलां गतश्चेदनन्तरं द्रक्ष्यसि भङ्गमस्य ॥ १३२ ॥

दृष्ट इति ॥ अयं शशाङ्क इयन्त्येतावन्ति अहानि शुक्लपक्षदिनानि तावदवधीकृत्य निजां पूर्वदशां पूर्वपूर्वदिनावस्थां जयन् निकाममुत्तरोत्तरदिनेषु कलावृद्ध्याधिकीभवंस्त्वया दृष्टः। इयन्ति दिनानि जयंस्तावत् जयन्नेव दृष्ट इत्यवधारणार्थो वा तावच्छब्दः। अनयैव परिपाट्या पूर्णबिम्बोऽयं त्वदास्येन सह तुलां साम्यम्, अथच—तोलकाष्ठं, प्राप्त आरूढश्चेत्, तदनन्तरं निकटं त्वमेव श्वःप्रभृत्येवास्य भङ्गं पराजयं कलाक्षयं च द्रक्ष्यसि। उत्तमेन सह स्पर्धमानो हि भङ्गं प्राप्नोत्येव। तुलादिव्ये हि हीनस्य पराजयः सर्वैर्दृश्यते। अहानि, अत्यन्तसंयोगे द्वितीया। त्वदास्येन, 'अतुलोपमाभ्याम्–' इति निषेधेऽपि सहयोगे तृतीया। तथाच कालिदासः—'तुलां यदारोहति दन्तवाससा' इत्यादि ॥

क्षत्राणि रामः परिभूय रामात्क्षत्राद्यथाभज्यत स द्विजेन्द्रः।
तथैव पद्मानभिभूय सर्वास्त्वद्वक्त्रपद्मात्परिभूतिमेति ॥ १३३ ॥

क्षत्राणीति ॥ द्विजेन्द्रो जमदग्न्यपत्यत्वात्सोऽतिप्रसिद्धपराक्रमो रामः परशुरामः सर्वाणि क्षत्राणि परिभूयापि क्षत्रादेव रामाद्दाशरथेः सकाशाद्यथाभज्यत पराभवं प्राप, तथा तेनैव प्रकारेणायमपि द्विजराजः सर्वान्पद्मानभिभूय संकोचकरणात्पराभूयापि त्वद्वक्त्रपद्मात्सकाशात्परिभूतिं पराभवमेति। सकलक्षत्रियाधिक्यं यथा श्रीरामस्य तथा सर्वपद्माधिक्यं त्वन्मुखपद्मस्येति भावः। 'वा पुंसि पद्मम्' इत्यमरः ॥

अन्तः सलक्ष्मीक्रियते सुधांशो रूपेण पश्ये हरिणेन पश्य।
इत्येष भैमीमदर्शदस्य कदाचिदन्तं स कदाचिदन्तः ॥ १३४ ॥

अन्तरिति ॥ हे पश्ये चन्द्रदर्शनप्रवृत्ते भैमि, हरिणेन पाण्डुरेण रूपेण वर्णेन कर्त्रा सुधांशोरन्तः प्रान्तभागः पूर्वमश्रीकोऽपीदानीं सलक्ष्मीक्रियते सश्रीः क्रियते त्वं पश्य। अथच—चन्द्रस्य मध्यं हरिणेन मृगेण कर्त्रा रूपेण स्वीयनीलवर्णेन कृत्वा असलक्ष्म सलक्ष्म क्रियते सलक्ष्मीक्रियते। सकलङ्कं क्रियत इत्यर्थः। पश्य। एष स नल इत्यमुना प्रकारेणास्य

चन्द्रस्यान्तं पर्यन्तभागं कदाचित्सपत्नात्रं भैमीमदर्शयद् दर्शयामास, कदाचिच्चान्तर्मध्यभागं दर्शयामास । अङ्गुल्यादिना चन्द्रश्वेतनीलप्रान्तमध्यभागप्रदर्शनपूर्वं श्लिष्टपदैस्तया सह क्रीडां चकारेति भाव इति मध्ये कवेरुक्तिः । 'हरिणः पाण्डुरः पाण्डुः' इत्यमरः । अन्त इत्यकारान्तमेकम्, अन्तरित्यव्ययमपरं मध्यवाचि । लक्ष्मीशब्दस्य समासान्तविधेरनित्यत्वात्कबभावे सलक्ष्मीशब्दाभ्यिः । पक्षे सलक्ष्मशब्दाभ्यिः । पक्षे 'पाघ्रा' (इत्या)दिना कर्तर्येव शः । दृशेर्बुद्ध्यर्थत्वात् 'गतिबुद्धि–' इत्यणौ कर्तुर्णौ कर्मत्वाद्भैमीमिति द्वितीया ॥

सागरान्मुनिविलोचनोदराद्द्वयादजनि तेन किं द्विजः ।
एवमेव च भवन्नयं द्विजः पर्यवस्यति विधुः किमत्रिजः ॥ १२५ ॥

सागरादिति ॥ अयं चन्द्रः सागरात् मुनिविलोचनोदराच्चैतद्रूपाद्द्वयात्स्थानद्वयादजनि उत्पन्नः, तेन कारणेन द्वाभ्यां जातत्वाद्द्विजः किम् । एवमेव चानयैव रीत्या द्वाभ्यां जातत्वादेव द्विजो भवन्नप्ययं विधुरत्रेर्मुनेर्जातः किं कथं पर्यवस्यति । द्वाभ्यां जातत्वे सत्यपि अत्रिमुनेरेव जात इति तात्पर्यवृत्त्या कथमुच्यत इत्यर्थः । अथच—एवमेव यथानेन प्रकारेण द्विजत्वं, तथैवात्रिमुनिजो भवन्नयं द्विजः पर्यवस्यति किम् । द्वाभ्यां जातत्वाद्यथा द्विज उच्यते, तथा द्विजादत्रिमुनेर्जातत्वादपि द्विज उच्यते किम् । द्विजोत्पन्नो हि द्विज एव भवतीत्यर्थः । अथच द्वाभ्यां जातत्वाद्द्विजो भवन्नेव न त्रिभ्यो जायत इत्यत्रिज इत्येवं तात्पर्यवृत्त्या कथ्यते किम् । यो हि द्वाभ्यां जायते स त्रिजो न भवति, एवमेवायमत्रिजः कथ्यते किमित्यर्थः । अन्योऽपि द्विजस्त्रिजो न भवत्येव ॥

ताराविहारभुवि चन्द्रमयीं चकार यन्मण्डलीं हिमभुवं मृगनाभिवासम् ।
तेनैव तन्वि सुकृतेन मते जिनस्य स्वर्लोकलोकतिलकत्वमवाप धाता ॥ १२६ ॥

तारेति ॥ हे तन्वि कृशाङ्गि, धाता ताराणां नक्षत्राणां विहारभुवि गगने चन्द्रमयीं मण्डलीं बिम्बं जिनस्य पुराणपुरुषस्य श्रीविष्णोर्मतेऽनुमतौ सत्यां तदादिष्टः सन् यच्चकार निर्ममे तेनैव सुकृतेन शोभनेन लोकोत्तरव्यापारेण कृत्वा स्वर्लोकः स्वर्गभुवनं तत्संबन्धिनां लोकानां सुराणां मध्ये तिलकत्वं श्रेष्ठत्वमवाप । किंभूतां मण्डलीम्—हिमस्य तुषारस्य भुवं स्थानभूतामतिशीतलाम् । तथा—मृगस्य नाभौ मध्ये वासो यस्यास्तां, यस्या मध्ये मृगोऽस्तीति यावत्, तादृशीम् । अन्येषां सुराणामेतादृग्व्यापारकरणे सामर्थ्याभावाद्धातैव श्रेष्ठोऽभूदित्यर्थः । अथच—तारया बुद्धदेव्या विहारस्थाने पूजास्थाने हिमभुवं शीतलां, शुभ्रत्वादिनावदातां वा, तथा—मृगनाभेः कस्तूर्या वासः परिमलोऽवस्थानं वा यस्यां तां कस्तूरीमिश्रितां चन्द्रमयीं कर्पूरमयीं मण्डलीं राशिं यच्चकार तेनैव पुण्येन जिनस्य मते बौद्धदर्शने ब्रह्मा सुरश्रेष्ठत्वमवाप्त । बौद्धा हि बुद्धदेवप्रसादे तत्पूजार्थं कर्पूरकस्तूरीराशिं करोति स सर्वलोकमध्ये श्रेष्ठो भवतीति स्वदर्शने प्रत्यपादयन् । ब्रह्मा चैवमकृत तस्मादेव सर्वश्रेष्ठो जात इत्यर्थः । 'तेनैव' इति पाठे—उत्प्रेक्षा । 'बुद्धदेव्यां मता तारा' ॥

---

१ 'बुद्धेश' इति [illegible] । [illegible] संगतेः ।

इन्दुं मुखाद्बहुतृणं तव यद्गृणन्ति नैनं मृगस्त्यजति तन्मृगतृष्णयेव।
अत्येति मोहमहिमा न हिमांशुबिम्बलक्ष्मीविडम्बिमुखि वित्तिषु पाशवीषु॥

इन्दुमिति॥ हे हिमांशुबिम्बस्य लक्ष्म्याः शोभाया विडम्बि सलाञ्छनत्वात्परिहासकारि ततोऽप्यधिकशोभं मुखं यस्यास्तादृशि भैमि, पण्डिता इन्दुं तव मुखात्सकाशात्त्वन्मुखमपेक्ष्य वा बहुतृणमीषदसमाप्तं तृणं, तृणत्वमपि यस्य पूर्णं न संपन्नं, तृणादपि निःसारमिति यावत्, अथच—बह्वधिकं तृणं यस्मात् तृणादपि निःसारं यद्यस्माद्गृणन्ति, तत्तस्माद्धेतोर्मृग एनं चन्द्रं मृगसंबन्धिन्या तृष्णया कोमलतृणकवलनाभिलाषेणैव, अथवा चन्द्रे प्रयुक्तस्य बहुतृणशब्दस्य बहु च तत्तृणं च, बहूनि तृणानि यस्मिंस्तादृशमिति वेत्येवंरूपार्थग्रहणरूपया भ्रान्त्यैव न त्यजति। मृगो हि बहु यत्तृणं बहुतृणं देशं वा न मुञ्चति। नन्वनुभवे सत्यप्यासंसारं कथं भ्रान्तिरित्याशङ्क्यार्थान्तरन्यासमाह—पाशवीषु पशुसंबन्धिनीषु वित्तिषु ज्ञानेषु विषये मोहमहिमा भ्रान्तिबाहुल्यं नात्येति बहुकालातिक्रमेऽपि नापयाति। पशवो हि सर्वदा मूढा एवेत्यपि मृगस्य भ्रान्तिर्नापयाति, तस्मादेनं न त्यजतीति युक्तमित्यर्थः। 'वृत्तिषु' इति पाठे—व्यापारेषु। मुखात्, ल्यब्लोपे पञ्चमी। बहुतृणं, पक्षे ईषदसमाप्तौ 'विभाषा सुपो बहुच्—' इति बहुच्॥

स्वर्भानुना प्रसभपानविभीषिकाभिर्दुःखाकृतेनमवधूय सुधा सुधांशुम्।
स्वं निह्नुते शितिमचिह्नममुष्य रागैस्ताम्बूलताम्रमवलम्ब्य तवाधरोष्ठम्॥१३८॥

स्वर्भानुनेति॥ हे प्रिये, सुधा एनं सुधांशुमवधूय त्यक्त्वा तवाधरोष्ठमवलम्ब्यामुष्य रक्तस्यौष्ठस्य रागै रक्तवर्णैः कृत्वा शितस्य भावः शितिमा धावल्यमेव चिह्नं यस्य तादृशं धवलरूपमपि स्वमात्मानं निह्नुते पुनः पुनः स्वर्भानुपानभिया तिरो दधाति। यतः—स्वर्भानुना वारंवारं प्रसभपानेन विभीषिकाभिर्भयोत्पादनैः कृत्वा दुःखाकृता प्रातिलोम्याचरणेनोत्पादितदुःखा। किंभूतमधरोष्ठम्—प्रसिद्धस्य ताम्बूलस्येव ताम्रो वर्णो यस्य, ताम्बूलेनैव वा ताम्रं रक्तवर्णम्। पुना राहुपानभिया त्वदधरमेव स्थानान्तरमाश्रित्य रूपान्तरेणात्मानं गोपायतीत्यर्थः। अन्योऽपि सभयं स्थानं हित्वा स्थानान्तरमाश्रित्य तत्रापि रूपान्तरं धृत्वा स्वं निह्नुते। सुधया चन्द्रस्य परित्यागात्त्वन्मुखाश्रयणात्त्वन्मुखं चन्द्रादधिकमिति भावः। ताम्बूलताम्रमित्युक्तरीत्योपमोत्प्रेक्षा वा। दुःखाकृता, 'दुःखात्प्रातिलोम्ये' इति डाच्॥

हर्यक्षीभवतः कुरङ्गमुदरे प्रक्षिप्य यद्वा शशं
जातस्फीततनोरमुष्य हरिता सूतस्य पत्या हरेः।
भङ्गस्त्वद्वदनाम्बुजादजनि यत्पश्चात्तदेकाकिनः
स्यादेकः पुनरस्य स प्रतिभटो यः सिंहिकायाः सुतः॥१३९॥

हर्यक्षीति॥ हे प्रिये, मतभेदेन कलङ्करूपं कुरङ्गं, यद्वा—शशमुदरे मध्ये प्रक्षिप्य जाता स्फीता पूर्णा तनुर्यस्य, हरेरिन्द्रस्य पत्या हरिता प्राच्या दिशा सूतस्य तत्रोदितस्य पूर्णस्य, अत एव हरेः श्रीविष्णोर्वामाक्षीभवतः, यद्वा—संजातपूर्णशरीरस्य मृगं, यद्वा—शशं, कलङ्कं मध्ये निक्षिप्य मध्यस्थितकलङ्कस्य कनीनिकातुल्यत्वाच्छ्रीविष्णोर्वामनेत्रीभवतोऽमुष्य चन्द्रस्य त्वद्वदनाम्बुजात्सकाशाद्यद्भङ्गः पराजयोऽजनि तदेकाकिनः सर्वदाऽसहायादेकस्मात्पश्चात्, नत्वन्य-

---

१ 'स्वर्भानुरिति क्षुभ्नादित्वात्' 'पूर्वपदात्—' इति न णत्वम्' इति रायमुकुटः।

स्यात्कनलात्, नह्यन्यैः पद्मैरयं पराजीयते यत्पुनरयमेव पद्मात्पराभवतीत्यर्थः । अथवा—अम्बुजतुल्यात्त्वद्वदनादेव पद्माद्, अथच—पद्मसंख्याकात्त्वद्वदनरूपादम्बुजाद्यदस्य भङ्गो जातः, तदेकाकिनोऽसहायस्य स्याद्भवेत्। बहुभिरेकः पराजीयत इति युक्तमेवेत्यर्थः । यः सिंहिकायाः सुतो राहुः स पुनरेकोऽन्योऽस्य प्रतिभटः प्रतिमल्लः पराभावुको राहुरेव नत्वन्य इति । 'संप्रति' इति पाठे—अद्य पुनरस्यैकः प्रतिभटः, यः सिंहिकायाः सुतः स्यात्। एकाकिनोऽस्य त्वन्मुखपद्मः प्रतिद्वन्द्वी न भवति, अतुल्यत्वात् किं त्वेकाकी राहुरेवास्य प्रतिभटो युक्त इत्यर्थः । किंच स्वशत्रुभूताद्राहोरप्यस्यान्यः पराजय इति महदस्य कष्टं प्राप्तमित्यर्थः । अथच—हरिद्वर्णया हरेः सिंहस्य पत्न्या सिंहिकया प्रसूतस्य, तथा—मृगं शशं वा यं कंचन पशुं जठरे निक्षिप्य भक्षयित्वा स्थितस्य, अत एव संजातपुष्टशरीरस्य, अत एव हर्यक्षोद्भवतः सिंहतां प्राप्नुवतोऽस्य त्वन्मुखाद्यः पराजयोऽजनि स एकाकिनः केवलात्पद्माद्गजादेव पराजयः सिंहस्य गजाद्भङ्गो यथा तद्वदेतन्महच्चित्रमित्यर्थः । अथच—पद्मसंख्याकादेकस्य पराजयः । सिंहोऽप्येको बहुसंख्यैः पराजीयत एवेत्यर्थः । अथच—पद्मात्कुञ्जरभादष्टापदादेव भङ्गः सिंहस्य केवलमष्टापदादेव भङ्गः । पद्मचन्द्राभ्यां सकाशात्त्वन्मुखमधिकमिति भावः । 'हर्यक्षः केसरी हरिः' इत्यमरः । 'गजाब्जशरभाः पद्माः' इत्यनेकार्थे भोजः । प्रथमपक्षे हर्यक्षिपद्वाचित्वः, द्वितीयपक्षे हर्यक्षशब्दादेव ॥

> यत्पूजां नयनद्वयोत्पलमयीं वेधा व्यधात्पद्मभू-
>   र्वाक्पारीणरुचिः स चेन्मुखमयं पद्मः प्रिये तावकम् ।
> कः शीतांशुरसौ तदा मखमृगव्याधोत्तमाङ्गस्थल-
>   स्थास्नुस्स्वस्तटिनीतटावनिवनीवानीरवासी वकः ॥ १४० ॥

यदिति ॥ हे प्रिये, वेधा नयनद्वयमेवोत्पलं तन्मयीं तद्रूपां तदर्चितां यस्य पद्मस्य पूजां व्यधादरचयत्। यतः श्रीविष्णोर्नाभौ वर्तमानात्पद्माद्भवतीति पद्मभूः । स्वजनकस्य पद्मस्य पितृभक्तया नेत्रद्वयेनैव नीलोत्पलद्वयेनेव महतीं पूजामकृत । वाक्पारीणा वाचः परतीरे भवा वाचा वर्णयितुमशक्या रुचिर्यस्य सोऽयं पद्मश्चेत्तावकं मुखं स एव त्वन्मुखपद्मो जातः, अनन्तरं ब्रह्मणा स्वपितृबुद्ध्या नेत्रनीलोत्पलाभ्यां कृतपूजत्वादत्र तव मुखे नेत्रनीलोत्पले दृश्येते इत्यर्थ इति चेत्। तदा तर्हि असौ शीतांशुः को नाम, अपितु न कोऽपि। त्वन्मुखस्य पुरस्तादयं कः। स्वरूपतोऽपि नेत्यर्थः । तर्ह्यसौ क इति चेत्तत्राह—अयं वकः । [illegible]—दक्षमख एव मृगस्तस्य व्याधो हरस्तस्योत्तमाङ्गं शिरस्तद्रूपे स्थले स्थास्नुः स्थितिशीलो स्वस्तटिनी गङ्गा तस्यास्तटावन्यां तीरभूम्यां या वनी महद्वनं वा तत्र वानीरे वेतसे [illegible] तत्सन्निधिवासी । चन्द्रश्च हरमस्तकस्थ [illegible] । [illegible] वा । अत्र बकस्य [illegible] सौन्दर्यं [illegible], [illegible] सौन्दर्यं [illegible] लोके न भवतीत्यर्थः । त्वन्मुखस्य चन्द्रस्य च महदन्तरम्, [illegible] भावः । एतेन [illegible] सूचितम्, [illegible] ध्वनितम् । [illegible] सूचितम्, [illegible] च सूचितम् । [illegible]

स्यति। नदीतीरवानीरवासित्वं बकजातिः। वाक्पारीणा, भवार्थे 'राष्ट्रावारपाराद्घखौ' इत्यत्र 'अवारपाराद्विपरीतादपि विगृहीतादपि' इति वचनात्खः॥

जातं शातक्रतव्यां हरिति विहरतः काकतालीयमस्या-
मश्यामत्वैकमत्यस्थितसकलकलानिर्मितेर्निर्मलस्य।
इन्दोरिन्दीवराभं बलविजयिगजग्रामणीगण्डपिण्ड-
द्वन्द्वापादानदानद्रवलवलगनादङ्कमङ्के विशङ्के॥ १४१॥

जातमिति॥ अहमिन्दोरङ्के बलविजयिन इन्द्रस्य गजग्रामणीर्हस्तिषु मध्ये प्रधानं प्राच्यामेव वर्तमानो य ऐरावतस्तस्य गण्डयोः कपोलयोः पिण्डयोः शिरःस्थितकुम्भस्थलयोश्च ये द्वन्द्वे गण्डद्वन्द्वं पिण्डद्वन्द्वं च ते एवापादानं निर्गमनस्थानं येषां ते च ते दानद्रवलवा मदजललेशास्तेषां लग्नात्संपर्कात्काकतालीयमाकस्मिकं दैवात्सिद्धमिन्दीवराभं नीलोत्पलतुल्यं जातमङ्कं कलङ्कं विशङ्के मन्ये। किंभूतस्येन्दोः—अस्यामङ्गुलीनिर्दिष्टायां पुरोदृश्यायां शतक्रतोरियं शातक्रतवी तस्यां हरिति दिशि विहरत उद्गच्छतः। तथा—अश्यामत्वे विषये ऐकमत्यं सर्वसंवादस्तेन तत्र वा स्थिताभिर्वर्तमानाभिः सकलाभिः पञ्चदशभिरपि कलाभिः कृता निर्मितिर्यस्य। अश्यामत्वैकमत्येन स्थिता सकलकलानिर्मितिर्यस्य तादृशस्य वा। अतएव—निर्मलस्य प्रत्येकं कलानां धावल्यस्य दृष्टत्वाद्धवलसकलकलानिर्मितत्वात्कारणधावल्याद्धवलस्य, अश्यामत्वैकमत्ये स्थिता याः सकलाः कलास्ताभिर्या निर्मितिस्तस्या वा हेतोर्धवलस्य। पूर्वं कारणधावल्यात्सकलोऽप्ययं धवल एवाभूत्, पश्चात्तु पूर्वदिग्भ्रमणवशात्तत्रैव भ्रमत ऐरावतस्य कपोलकुम्भस्थलगलन्मदजलं दैववशाल्लग्नं तेनायं मध्ये कालः प्रतिभातीत्यर्थः। तालतरुतले यदैव काकस्योपवेशनम्, तदैव दैवात्काकस्योपरि तालफलपात इति काकतालमिव, 'समासाच्च तद्विषयात्' इति छः। निर्मितेः, पक्षे हेतौ पञ्चमी॥

अंशं षोडशमामनन्ति रजनीभर्तुः कलां वृत्तय-
न्त्येनं पञ्चदशैव ताः प्रतिपदाद्याराकवर्धिष्णवः।
या शेषा पुनरुद्धृता तिथिमृते सा किं हरालंकृति-
स्तस्याः स्थानबिलं कलङ्कमिह किं पश्यामि सश्यामिकम्॥ १४२॥

अंशमिति॥ हे प्रिये, लोकाः रजनीभर्तुः षोडशमंशं कलामामनन्ति सत्यं कथयन्ति, ताश्च षोडशांशरूपाः प्रतिपदादिर्यस्मिन्कर्मणि राकां पूर्णिमामभिव्याप्य वर्धिष्णवः प्रतितिथि एकैककलाभिवृद्ध्या वर्धमानाः पञ्चदशसंख्याका एव कला एनं चन्द्रं वृत्तयन्ति वर्तुलं कुर्वन्ति। तिथिसंख्यासाम्यात्पूर्णमण्डलं कुर्वन्तीत्यर्थः। या पुनः कला षोडशी तिथिमृते उद्धृता प्रयोजनाभावाच्चन्द्राद्बहिः कृता सा षोडशी कला शेषा पञ्चदशकलाभ्योऽवशिष्टा सती, यद्वा षोडशीं तिथिं विना प्रयोजनाभावाद्यावशिष्टा सा निष्प्रयोजनत्वादुद्धृता चन्द्राद्बहिर्निष्कालिता सती हरालंकृतिः शिवशिरोभूषणं जाता किम्। चन्द्रे प्रयोजनाभावाद्धरालंकृतिरिवाभूत्किमित्यर्थः। अहं तस्याश्चोद्धृतायाः षोडश्याः कलायाः सश्यामिकं नभो नीलिम्ना सह वर्तमानं स्थानस्य पूर्वावस्थितेः संबन्धि बिलं विवरं तत्कलानवस्थित्या कृत्वा शून्यं नीलं नभोभागमेवेह चन्द्रमण्डलमध्ये कलङ्कं पश्यामि किम्। मध्यवर्तिनीलं तत्स्थानं बिलमेवाहं कलङ्कत्वेन शङ्के इत्यर्थः।

दोषशब्दस्याभिधेयलिङ्गत्वं पूर्वमेव दर्शितम् । 'पूर्णे राका निशाकरे' इत्यमरः । वृत्तयन्ति, 'तत्करोति–' इति णिच् । वर्धिष्णवः, 'अलंकृञ्–' इतीष्णुच् । तिथिमूते, 'कृते नलाशाम्' इति मत् । स्वामिका, मनोज्ञादेराकृतिगणत्वाद्भावे वुञ् ॥

ज्योत्स्नामाद्यते चकोरशिशुना द्राघीयसी लोचने
लिप्सुर्मूलमिवोपजीवितुमितः संतर्पणात्मीकृतात् ।
अङ्के रङ्कुमयं करोति च परिस्रष्टुं तदेवादृत-
स्त्वद्वक्त्रं नयनश्रियाप्यनधिकं मुग्धे विधित्सुर्विधुः ॥ १४३ ॥

ज्योत्स्नामिति ॥ हे मुग्धे सुन्दरि, त्वद्वक्त्रं वृत्तत्वादिगुणैः समानमपि नयनश्रियापि कुत्रानधिकं समानमेव विधित्सुः, अत एव—स्वस्य द्राघीयसी अतिदीर्घे लोचने लिप्सुर्लब्धु-मिच्छुर्विधुश्चकोरशिशुना प्रयोज्येन स्वीयां ज्योत्स्नामादयते भक्षयति । तत्रोत्प्रेक्षते—चन्द्रि-कामृतपायनकृतसन्तर्पणेनात्मीकृतात्स्ववशीकृतादितश्चकोरबालकात्सकाशान्मूलं स्वचन्द्रिका-पायनहेतुभूतनेत्रीयातिदीर्घनेत्रद्वयमुपजीवितुमादातुमिव । यद्वा—यत्किंचित्स्वस्य चन्द्रिकां पाययित्वा ततो नेत्रद्वयलक्ष्मीप्राप्त्या मूलं चन्द्रिकारूपधनं वर्धयितुमिव । अन्योऽप्युत्तमर्णोऽ-धमर्णस्य किंचिद्दत्वा तं वशीकृत्योत्तममिष्टं वस्तु ततो गृह्णाति । तथा—अयं चन्द्र आदृत आदरयुक्तः सन्नङ्के मध्ये, अथच—उत्सङ्गे, च रङ्कुं च करोति । उत्सङ्गधारणेन लालयती-त्यर्थः । किमर्थमित्याशङ्क्याह—तन्मूलभूतमतिविशालं तदीयनयनयुगलं परिस्रष्टुमिव स्वलग्नं कर्तुमिव । त्वन्मुखसाम्यनिमित्तरमणीयनेत्रद्वयसंपादनायायं चन्द्रश्चकोरहरिणौ वञ्चयतीत्यर्थः । चन्द्रादुत्कृष्टं त्वन्मुखमिति भावः । 'परिग्रहीतुम्' इति पाठे एतन्नेत्ररामणीयकप्राप्त्युपायं प्रष्टुमि-वेत्यर्थः । शिशुः सुप्रतार्य इति सूचयितुं शिशुपदम् । आदयते, अदेर्निगरणार्थत्वेऽपि 'अदेः प्रतिषेधो वक्तव्यः' इति वचनात् 'निगरण–' आदि (सूत्रेण) परस्मैपदाभावे, 'णिचश्च' इति तङ् । शिशुना, 'आदिखाद्योर्न' इत्याणौ कर्तुर्णौ कर्मत्वाभावः । द्राघीयसी, अतिशायने ईयसुनि 'प्रियस्थिर–' इति द्राघादेशः । लिप्सुः, विधित्सुरिति च, 'न लोका–' इति षष्ठीनिषेधः ॥

लावण्येन तवास्यमेव बहुना तत्पात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्धमलिनेनारम्भि शेषेण तु ।
निर्माय द्वयमेतदप्सु विधिना पाणी खलु क्षालितौ
तल्लेशैरधुनापि नीरनिलयैरम्भोजमारभ्यते ॥ १४४ ॥

लावण्येनेति ॥ हे प्रिये, बहुना क्वचित्पात्रे संचितेनाखिलेन लावण्येन कृत्वा तवास्य-मेवारम्भि निर्मितम् । चन्द्रस्तु पुनस्तस्य लावण्यस्याधारपात्रं स्पृशतीति स्पृक् तेन लावण्य-स्थापनपात्रमात्रलग्नेन, अत एव प्रोञ्छनेन पात्रनिघर्षणेन कृत्वा या लब्धतोपार्जितत्वं तेनार्धे किंचित्खण्डं मलिनं यस्य तेन किंचिन्मलिनेन शेषेण भवन्मुखनिर्माणावशिष्टेनांशेन कृत्वारम्भि निर्मितः । अत एव शबलमण्डलोऽयं शोभत इत्यर्थः । शेषेण तु निर्मित इति वा । विधिना एतत्त्वन्मुखचन्द्राङ्कलक्षणं द्वयं निर्माय तदप्राप्त्सु पाणी क्षालितौ खलु लावण्यलेपकृतजलक्षाल-नाविव । तस्मात्तस्य क्षालनरजोलोलितलावण्यलेपस्य लेशैरल्पैरंशैरेव कर्तृभिरधुनापि नीरनि-लयैर्जलस्थायिभिः सद्भिरम्भोजमारभ्यते निर्मीयते । कमलनिर्माणे ब्रह्मणः कोऽपि प्रयासो

नेत्यर्थः । कमलाच्चन्द्रोऽधिकः, तस्मादपि त्वन्मुखं लावण्यसाकल्येन निर्मितत्वादधिकमिति भावः । अम्भोजम्, जात्येकत्वम् ॥

लावण्येन तवाखिलेन वदनं तत्पात्रमात्रस्पृशा
चन्द्रः प्रोञ्छनलब्धतार्थमलिनेनारम्भि शेषेण यः ।
तल्लेखापि शिखामणिः सुषमयाहंकृत्य शंभोरभू-
दब्जं तस्य पदं यदस्पृशदतः पद्मं च सद्म श्रियाः ॥ १४५ ॥

लावण्येनेति ॥ अखिलेन लावण्येन तव वदनमारम्भि । ततो भवद्वदनकामनीयकवर्णनातिचिन्तापि दूरे तिष्ठतु, अशक्यकरणत्वादित्यर्थः । उत्करीत्या तत्पात्रमात्रस्पृशा प्रोञ्छनलब्धतार्थमलिनेन शेषेण तु यश्चन्द्रो विधिना निरमायि तस्य लेखापि लावण्यपात्रमात्रस्थलावण्यनिर्मितस्य चन्द्रस्य षोडशांशरूपा कलापि कलामात्रत्वादेव निष्कलङ्कत्वात् सुषमया परमया शोभया कृत्वा अहंकृत्य अस्यापेक्षयाहमेव रमणीयेति दर्पमवलम्ब्य शंभोः शिखामणिः शिरोभूषणमभूच्छिवशिरोऽध्यरोहत् । अन्यदपि सदर्पमुत्तमशिरोऽधिरोहति । अब्जं कुमुदं कर्तृ यद्यस्मात्तस्य चन्द्रस्य पदं प्रतिबिम्बस्थानं जलमस्पृशत् । अतः श्रियः सद्माभूत् । चन्द्रकरस्पर्शादेव हि कुमुदं सश्रीकं भवति । पद्मं च श्रियः सद्माभूत् । जलस्य चन्द्रकिरणसंस्पर्शात् पद्मस्य च तत्रोत्पन्नत्वाद्वर्तमानत्वात्कुमुदसाहचर्याच्च पद्ममपि लक्ष्म्याः स्थानमभूत् । यद्वा—पद्मं चातः कुमुदाद्धेतोः श्रियः सद्माभूत् । अब्जत्वजातियोगात्कुमुदाधारजलयोगाच्च कुमुदादेव परम्परया पद्मानां लक्ष्मीगृहत्वमभूदित्यर्थः । यद्वा—या तल्लेखा शंभोः शिखामणिरभूत्, तस्य शिखामणेश्चन्द्रस्य पदं स्थानं शिवमस्तकं पूजासमये यस्मात्कुमुदं पद्मं चास्पृशत्, अतस्तदुभयं श्रियः सद्माभूत् । चन्द्रसंबद्धशिरःसंबन्धादुभयं श्रीगृहमभूदित्यर्थः । यद्वा—तस्य शंभोः पदं चरणं पूजावशाद्यस्मात्कुमुदं पद्मं चास्पृशत् तस्मादुभयं श्रीसद्माभूत्, तस्य लावण्यस्य स्थानं विधिहस्तलेपक्षालनजलं यस्मात्कुमुदं पद्मं चास्पृशत् । यद्वा पद्ममेवास्पृशत् । यतोऽब्जं तस्मात्कुमुदम्, पद्मं च पद्ममेव वा श्रीसद्माभूदिति वा । त्वन्मुखलावण्यलेशपरम्परासंस्पर्शप्राप्तशोभानि चन्द्रादीनीति त्वन्मुखलावण्यं वाङ्मनसगोचरो न भवतीति भावः । अर्थान्तरस्य स्पष्टत्वात्, पूर्वार्धस्य त्वर्थान्तरप्रतिपादनार्थमनुवादरूपत्वान्नायं श्लोकः पुनरुक्तः । अहमिति विभक्तिप्रतिरूपकमव्ययं, तस्य क्त्वान्तेन 'सह सुपा' इति समासे क्त्वो ल्यप् ॥

सपीतेः संप्रीतेरजनि रजनीशः परिषदा
परीतस्ताराणां दिनमणिमणिग्रावमणिकः ।
प्रिये पश्योत्प्रेक्षाकविभिरभिधानाय सुशकः
सुधामभ्युद्धर्तुं धृतशशकनीलाश्मचषकः ॥ १४६ ॥

सपीतेरिति ॥ हे प्रिये, संप्रीतेस्ताराणामेवान्योन्यं सम्यग्या प्रीतिः सौहार्दं तस्माद्धेतोर्या सपीतिः सह पानं, सुहृदो हि सह पानं कुर्वन्ति तस्माद्धेतोः, यद्वा सहपानाद्धेतोर्या सम्यक् प्रीती रुच्यभिवृद्धिः, तस्माद्धेतोस्ताराणां परिषदा सङ्घेन परीतः समन्ताद्व्याप्तोऽयं रजनीशो दिनमणिमणिः सूर्यकान्तमणिस्तस्य ग्रावा शिला तया घटितोऽतिधवलः स्थूलः पेय-

उपनतमुडुपुष्पजातमास्ते भवतु जनः परिचारकस्तवायम्।
तिलतिलकितपर्पटाभमिन्दुं वितर निवेद्यमुपास्स्व पञ्चवाणम्॥१४९॥

उपनतमिति॥ हे प्रिये, 'रक्तो भौमः शनिः कृष्णो गुरुः पीतः सितः कविः' इत्या-
दिज्योतिःशास्त्रादिप्रामाण्यान्नानावर्णाकृतीन्युडूनि नक्षत्राण्येव पुष्पजातमुपनतमुपसंपन्नमास्ते
अयं मल्लक्षणो जनः प्रारब्धकामदेवपूजायास्तव परिचारकश्चन्दनाद्युपचारोपनायकः, अथच—
संभोगकारी भवतु। त्वं तिलैः संजाततिलकः, तिलैरेव तिलकवान्कृतो वा यः पर्पटः शालि-
तण्डुलपिष्टरचितश्चिपिटस्तिलसंकुलीसंज्ञ उपदंशविशेषस्तद्वदाभा यस्य तत्तुल्यं सकलङ्कत्व-
त्वाद्विशिष्टपर्पटसदृशमिन्दुमेव निवेद्यं कामाय वितर एवं पञ्चवाणं कामदेवमुपास्स्व पूजय।
अन्योऽपि देवपूजकः पुष्पादिसामग्र्या देवं पूजयति, कश्चित्परिचारकोऽपि तस्य भवति। एव-
मत्रापि। सर्वाणि नक्षत्राण्युदितानि, कामोद्दीपकश्चन्द्रोऽप्युदितः, सुरतान्तरायकारी तिमिरः
संध्यासमयोऽतिक्रान्तः, तस्मात्काममुपास्स्व, सुरतेच्छुरस्मीति भावः। पञ्चवाणमित्यनेन
कामस्यातिपीडाकारित्वं सूच्यते। 'जातिर्जातं च सामान्यम्' इत्यभिधानाज्जातशब्दः सामा-
न्यवाची पुष्पमात्रे पर्यवस्यति। तिलकितेति तारकादिः, मतुबन्तात् 'तत्करोति-' इति
ण्यन्तान्निष्ठा वा॥

इदानीं काव्यसमाप्तिं चिकीर्षुः श्रीहर्षो नायकमुखेनाशिषमाशास्ते—

स्वर्भानुप्रतिवारपारणमिलद्दन्तौघयन्त्रोद्भव-
श्वभ्रालीपतयालुदीधितिसुधासारस्तुषारद्युतिः।
पुष्पेष्वासनतत्प्रियापरिणयानन्दाभिषेकोत्सवे
देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये॥१५०॥

स्वर्भानुरिति॥ हे प्रिये, देवः प्रकाशमानस्तुषारद्युतिर्हिमकरः, अथच हिमकर एव
देवः, वर्णनां पूजां च कुर्वतां नोऽस्मदादीनाम्, आवयोर्वा तुष्टये परमानन्दायास्तु
किंभूतः। स्वर्भानो राहोः प्रतिवारं पौनःपुन्येन यत्पारणं चन्द्रस्यैव गिलनं तेन तत्र व
मिलन् संलग्नो यो दन्तौघस्तद्रूपं यन्त्रं छिद्रकरणसाधनं तस्मादुद्भवो यस्याः सा श्वभ्राली
दन्तदशनकृतविवरपरम्परा तया तस्याः सकाशाद्वा पतयालुः पतनशीला दीधितिसुधा किर-
णामृतं तद्रूपः, दीधितिसुधाया वा सारः श्रेष्ठभागो यस्य, दीधितिसुधाया आसारो धारासंपातो
दीधितिसुधारूपो वा आसारो यस्य सः। अत एव—पुष्पमेवेष्वासनं धनुर्यस्य तस्य कामस्य
तत्प्रियायां रत्याश्चानयोर्यः परिणयो विवाहो लक्षणया परस्परसंमेलनं तद्रूपो य आनन्द
संतोषस्तत्संबन्धिनि 'समुद्रज्येष्ठा-'इत्यादि श्रौतेऽभिषेकाख्य उत्सवे महाभिषेकार्थं सहस्र-
संख्या धारा लोहशलाकानिर्मितजलप्रवाहमार्गा यस्य स तादृशो यः कलशस्तस्य श्रीः प्राप्त
सहस्रच्छिद्रगलज्जलधारकलशस्येव श्रीः शोभा येन सः। महोत्सवे हि सहस्रधारेण सुवर्णक-
लशेन महाभिषेकः क्रियते। तथाच राहुदन्तकृतच्छिद्रपरम्परागलदमृतधारश्चन्द्रो गलज्जल-
धारसहस्रच्छिद्रसुवर्णकलश इव शोभमानः पूर्वोक्तवर्णनयोक्तविधत्वत्कृतपूजया च सुरतप्रवृत्त-
योरावयोरुद्दीपकतया परमानन्दं कुर्यादिति भावः। एतेन तत्समयोचितरतिकामविवाहोत्स-
वाभिधानेन 'चन्द्रोऽस्तु नस्तुष्टये' इत्यनेन च विलासिना नलेन स्वनिर्वर्त्यतृतीयपुरुषार्थपयो-

दिर्शीति ॥ गिरिग्रावाणोऽद्रिपाषाणा दिशि दिशि स्वां निजां सरस्वतीं नदीमन्तर्गत-प्रस्रवणं वमन्तु मुञ्चन्तु । आपातः सामस्त्येन पतनं स्फुरन्प्रकाशमानो ध्वनिडम्बरः शब्दाडम्बरो यस्यां तां च नदीं मिथस्तुलयतु मिथोऽन्यनया समीकरोतु । अविसर्गान्तपाठे—आपातेन समन्तादूर्ध्वदेशादधःपतनेन प्रकाशमानः शब्दाडम्बरो यस्यां तामन्यनया समं समीकरोतु । जन इत्यर्थः । अथच—आपाते प्रथमारम्भ एव स्फुरत्प्रपातघोषां तां जनो मिथस्तुलयतु । उभयव्याख्यानेऽपि परिणामे तु न नदी न च तस्याः शब्दाडम्बरश्चिरंतन इत्यर्थः । स क्षीरोदन्वान् परं केवलं, अपरः न विद्यते पर उत्कृष्टो, यस्मादत्युत्कृष्टः । अथच—अन्य एव । यतो यस्य क्षीरोदस्येदं यदीयममृतमेतादृशमुदीयते उत्पद्यते । कीदृशम्—मथितुर्दे-वादेः खेदच्छेदि मथनजनितक्लेशापहम् । तथा—प्रमोदनं नितरामानन्ददायि । तथा—ओदनं भक्तमास्वाद्यं सिद्धान्नरूपम् । अथच—एवंभूतं परमुत्कृष्टममृतं यदीयमुदीयते स क्षीरोदन्वान-परः परोऽन्यो नास्ति किंत्वेक एव । अथच—प्रतिदिशं सर्वदेशेषु गिरि वाण्यां विषये पाषा-णतुल्या जडा अन्ये कवयः स्वीयां वाणीमुद्गिरन्तु । आपातेन प्रतिभामात्रेण स्फुरन्व्याख्यः काव्यविशेषस्याडम्बरो यस्यां, प्रथमारम्भ एव स्फुरन् शब्दाडम्बरोऽनुप्रासो यत्र तां वा, वाणीमन्योन्यं जनः समीकरोतु यस्य कवेरुक्तिरस्येव, अस्य च तस्येव इत्येवं तुलयतु । 'आपातः' इति विसर्जनीयान्तपाठे—आपातः प्रतिभासस्तां तुलयत्वित्यर्थः । एवंविधं परं काव्यामृतं यदीयमुत्पद्यते स क्षीरसमुद्रतुल्यः श्रीहर्षकविरपरो(न्यो) नास्ति, किं त्वेक एव । अन्ये कवयः पर्वतग्रावतुल्याः, अहं श्रीहर्षस्तु क्षीरसमुद्रतुल्य इत्यर्थः । यथा क्षीरसागरो नीरार्थिनोऽपि तीरमात्रस्थान्क्षीरेण तर्पयति । लक्ष्मीकौस्तुभामृतादिभिः परमानन्ददायिभिः कृतार्थयति, (तथा) मदीयकाव्यविचारकस्यैव खेदच्छेदि प्रमोदनं वचनामृतमुत्पद्यते, नान्य-काव्यविचारकस्येति, अन्ये ग्रावतुल्याः क्षीरोदतुल्यश्चाहमिति भावः ॥

इदानीं प्रसादरूपमुख्यगुणाभावादतिदुर्बोधत्वादकाव्यमिति ये वदन्ति, तच्छङ्कामपनुदन् खलदर्पदलनार्थं गुरुसंप्रदायेन विना दुर्बोधमित्यतिगाम्भीर्यप्रतिपादनार्थं च बुद्धिपूर्वमेव मयेदं काव्यं तत्र तत्र दुर्बोधं व्यरचीत्याह—

> **ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान्मया**
> **प्राज्ञंमन्यमना हठेन पठिती मास्मिन्खलः खेलतु ।**
> **श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय-**
> **त्वेतत्काव्यरसोर्मिमज्जनसुखव्यासज्जनं सज्जनः ॥ ३ ॥**

ग्रन्थेति ॥ आत्मानं प्राज्ञं मन्यन्ते प्राज्ञंमन्यं मनो यस्यैवंविधोऽस्मिन्काव्ये हठेन स्वीय-प्रज्ञाबलेन पठितमस्यास्तीति पठिती इदंकाव्यस्य पाठकः खलो मा खेलतु 'किमत्रास्ति, अश्रु-तमेव व्याकर्तुं शक्यते' इत्यवज्ञापूर्वां दर्पाभिव्यक्तिं मा कार्षीदित्येवमर्थमिह काव्ये क्वचित्क्व-चिदपि तत्र तत्र स्थले मया प्रयत्नाद्बुद्धिपूर्वं ग्रन्थग्रन्थिर्ग्रथ्यमानशब्दार्थकुटिलिका न्यासि वि-न्यस्ता खलु मुखभङ्गार्थं बुद्धिपूर्वमेवेदं काव्यं मया दुर्बोधं व्यरचि नतु प्रसन्नकाव्यकरणास-क्त्येत्यर्थः । क्वचित्क्वचिदपीत्यनेन तत्र तत्र प्रसन्नताप्यस्तीति न काव्यत्वहानिरिति सूच्यते । सज्जनस्य तु ग्रन्थविवेचनोपायमाह—श्रद्धेति । श्रद्धया गुरौ दैवतैक्यबुद्ध्या आरादेन पूजितेन

गुरुणा पूर्वमन्थया अपि श्लथाः कृता व्याख्यया सुबोधाः कृता दृढा स्वतो दुर्बोधा ग्रन्थयो यस्मै स गुरुसंप्रदायावगतार्थः, अत एव दर्पराहित्यात्सज्जनः सुधीरेतत्काव्यस्य रसोर्मिरम्भ-लहरी तस्यां मज्जनमवस्थानं समासादयतु प्राप्नोतु । गुरुपरम्परया विनैतस्यापि ग्रन्थस्यार्थो बोद्धुं न शक्यते, तस्माद्गुरुपरम्परया एवाध्येतव्यमिदं काव्यमित्यर्थः । यश्चेदं गुरुपरम्परया अधीते स सततं सुखी भवत्विति महाकविस्तस्मा आशिषं ददाति । अस्मिन्नधीतीति, 'क्तस्येन्विषयस्य-' इति कर्मणि सप्तमी । आराद्धेति राधेरनुदात्तत्वादिडभावः ॥

इदानीं पण्डितानन्दजननद्वारा स्वकृतेरभ्युदयमाशास्ते—

ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरा-
द्यः साक्षात्कुरुते समाधिषु परं ब्रह्म प्रमोदार्णवम् ।
यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः
श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ॥ ८ ॥

ताम्बूलेति ॥ यः कान्यकुब्जेश्वरात्सकाशात्तत्कालपण्डितादिसमक्षं ताम्बूलद्वयं [illegible]